M. T. B. COLLEGE, SURAT
Manuscripts Library
No. Ref.
Ser. 88
Title: Bhagawat Skandha 15 12

Clean.

Bhagawata	: Title
Skandhas 1 to 9 with	: Author
Commentary Bhavartha-	: Editor
Deepika of Shridhar	: Year, Vols.
Swami	: Publisher
Sam. 16—(?)	: Remarks

Bundle 9/88

Serial No. in the type-list 126

भा॰प्र॰

श्रीगणेशाय नमः॥ ॥श्रीलक्ष्मीनृसिंहाय नमः॥ ॥वागीशा यस्य वदने लक्ष्मीर्यस्य च वक्षसि॥ यस्यास्ते हृदये संवित्तं नृसिंहं नमा-
हं॥१॥ विश्वसर्गविसर्गादिनवलक्षणलक्षितं॥ श्रीकृष्णाख्यं परं धाम जगद्धाम नमामि तत्॥२॥ माधवोमाधवावीशौ सर्वसिद्धिविधायि-
नौ॥ वंदे परस्परात्मानौ परस्परनतिप्रियौ॥३॥ संप्रदायानुरोधेन पौर्वापर्यानुसारतः॥ श्रीभागवतभावार्थदीपिकेयं प्रतन्यते॥४
क्वाहं मंदमतिः क्वेदं मथनं क्षीरनीरधेः॥ किं तत्र परमाणुर्वै यत्र मज्जति मंदरः॥५॥ मूकं करोति वाचालं पंगुं लंघयते गिरिं॥ यत्कृपा तम-
हं वंदे परमानंदमाधवं॥६॥ श्रीमद्भागवताभिधः सुरतरुस्ताराङ्कुरः सज्जनिः स्कंधैर्द्वादशभिस्ततः प्रविलसद्भक्त्यालवालोदयः॥द्वा-
त्रिंशत्त्रिशतं च यस्य विलसच्छाखाः सहस्राण्यलं पर्णान्यष्टदशोष्टदोतिसुलभो वर्वर्ति सर्वोपरि॥७॥ अथ नानापुराणशास्त्रप्रबंधैश्चि-
त्तशुद्धिमलभमानस्तत्र तत्रापरितुष्यन्नारदोपदेशतः श्रीमद्भगवद्गुणप्रधानं श्रीभागवतशास्त्रं प्रारिप्सुर्वेदव्यासस्तत्प्रतिपाद्यपरदे-

श्रीः १ जन्माद्यस्य यतोन्वयादितरतश्चार्थेष्वभिज्ञः स्वराट् तेने ब्रह्म हृदा य आदिकवये मुह्यंति यत्सूरयः॥ तेजोवारिमृदां यथा
त्रि विनिमयो यत्र त्रिसर्गोमृषा धाम्ना स्वेन सदा निरस्तकुहकं सत्यं परं धीमहि॥१॥

वतानुस्मरणलक्षणं मंगलमाचरति॥ तं परं परमेश्वरं धीमहि। ध्यायते लिङि छांदसं। बहुवचनं पुत्रशिष्यादिभिः सहेति। तमेव श्रीः १
स्वरूपतटस्थलक्षणाभ्यामुपलक्षयति। तत्र स्वरूपलक्षणं सत्यमिति। सत्यत्वे हेतुः। यत्र यस्मिन् त्रयाणां मायागुणानां तमोरजःस-
त्त्वानां सर्गो भूतेंद्रियदेवतारूपः अमृषा सत्यः यत्सत्यतया मिथ्यासर्गोपि सत्यवत्प्रतीयते। तं परं सत्यमित्यर्थः। अत्र दृष्टांतः। तेजो-
वारिमृदां यथा विनिमयो अन्यस्मिन्नन्यावभासः यथा अधिष्ठानसत्तया सद्वत्प्रतीयते इत्यर्थः। तत्र तेजसि वारिबुद्धिः मरीचितो-
ये प्रसिद्धा मृदि च काचादौ वारिबुद्धिरित्यादि। यथायथमूह्यं। यद्वा तस्यैव परमार्थसत्यत्वप्रतिपादनाय तदितरस्य मिथ्यात्वमुक्तं। व्यसय
तत्र मृषैवायं त्रिसर्गो न वस्तुतः सन्निति। यत्रेत्यनेन प्रतीतं उपाधिसंबंधं वारयति। स्वेनैव धाम्ना महसा निरस्तं कुहकं कपटं य-
स्मिन् तं। तटस्थलक्षणमाह। जन्मादीत्यस्य विश्वस्य जन्मादि स्थितिभंगं यतो भवति तं धीमहि। अत्र हेतुः। अन्वयादितरतश्च
रस्य सद्रूपेणान्वयात्। अकार्येभ्यश्च ख... ...भ्यस्तद्व्यतिरेकात्।

तच्छब्देन व्यावृत्तिः। अनुवृत्तत्वात्। सद्रूपं ब्रह्म कारणं मृत्सुवर्णादिवत्। व्यावृत्तत्वात् विश्वं कार्यं घटकुंडलादिवदित्यर्थः। यद्वा
सावयवत्वादन्वयव्यतिरेकाभ्यां यदस्य जन्मादि तत् यतो भवतीति संबंधः। तथा च श्रुतिः। यतो वा इमानि भूतानि जायंते येन जा
तानि जीवंति यत्प्रयंत्यभिसंविशंतीत्याद्या॥ स्मृतिश्च। यतः सर्वाणि भूतानि भवंत्यादियुगागमे। यस्मिंश्च प्रळयं यांति पु
नरेव युगक्षये। तर्हि किं प्रधानं जगत्कारणत्वाद्ध्येयमभिप्रेतं नेत्याह। अभिज्ञ इति। स ऐक्षत लोकान्नु सृजा इति। स इमाल्लो
कानसृजत इत्यादिश्रुतेः। ईक्षतेर्नाशब्दमिति न्यायाच्च। तर्हि जीवः स्यात्। नेत्याह। स्वराट्। स्वेनैव राजते यः। तं स्वतःसिद्धज्ञान
मित्यर्थः। तर्हि किं ब्रह्मा नेत्याह। हिरण्यगर्भः समवर्तताग्रे भूतस्य जातः पतिरेक आसीत्। स दाधार पृथिवीं द्यामुतेमां
कस्मै देवाय हविषा विधेम इति श्रुतेः। ननु ब्रह्मणोऽन्यतो वेदाध्ययनमप्रसिद्धं। सत्यं। तत्तु मैनं सो हृदैव तेने अनेन बुद्धि
वृत्तिप्रवर्तकत्वेन गायत्र्यर्थो दर्शितः। वक्ष्यति हि। प्रचोदिता येन पुरा सरस्वती वितन्वताजस्य सतीं स्मृतिं हृदि। स्व
लक्षणा प्रादुरभूत्किलास्यतः स मे ऋषीणामृषभः प्रसीदतामिति। ननु च ब्रह्मा सुप्तप्रतिबुद्धन्यायेन वेदमुपल
भतां। नेत्याह। यद्यस्मिन् ब्रह्मणि सूरयोऽपि मुह्यंति। तस्माद् ब्रह्मणोऽपि पराधीनज्ञानत्वात्। स्वतःसिद्धज्ञानः परमेश्व
र एव जगत्कारणं। अत एव सत्यं। असतः सत्ताप्रदत्वाच्च परमार्थसत्यः। सर्वज्ञत्वेन च निरस्तकुहकं। तं धीमहि। गायत्र्या
प्रारंभेण च गायत्र्याख्यब्रह्मविद्यास्वरूपमेतत्पुराणमिति। दर्शितं। यथोक्तं मत्स्यपुराणे। पुराणदानप्रस्तावे। यत्रा
धिकृत्य गायत्रीं वर्ण्यते धर्मविस्तरः। वृत्रासुरवधोपेतं तद्भागवतमिष्यते। लिखित्वा तच्च यो दद्याद्धेमसिंहोपरि
स्थितं। प्रौष्ठपद्यां पौर्णमास्यां स याति परमं पदं॥ अष्टादश सहस्राणि पुराणं तत्प्रकीर्तितं। पुराणांतरे च। ग्रंथो

वस्तुनः शक्तिर्माया वस्तुनः कार्यं जगच्च तत्सर्वं वस्त्वेव। न ततः पृथगिति वेद्यं। अयत्नेनैव ज्ञातुं शक्यं ततः किमत आह १
शिवदं परमसुखदं किं च। आध्यात्मिकादितापत्रयोन्मूलनं च। अनेन ज्ञानकांडविषयेभ्यः श्रैष्ठ्यं दर्शितं। कर्मतोऽपि
श्रैष्ठ्यमाह। महामुनिकृते महामुनिः श्रीनारायणस्तेन प्रथमं संक्षेपतः कृते। उपासनाकांडगतं श्रैष्ठ्यमाह। परैः शास्त्रै
स्तदुक्तसाधनैर्वा ईश्वरो हृदि किं वा सद्य एव वावरुध्यते स्थिरीक्रियते। वा शब्दः कटाक्षे किंतु विलंबेन कथंचिदेव। अत्र तु
शुश्रूषुभिः श्रोतुमिच्छद्भिरेव तत्क्षणादेवावरुध्यते। ननु इदमेव तर्हि किमिति सर्वे न शृण्वंति तत्राह। कृतिभिरिति। श्रव
धर्मः प्रोज्झितकैतवोऽत्र परमो निर्मत्सराणां सतां वेद्यं वास्तवमत्र वस्तु शिवदं तापत्रयोन्मूलनं॥ श्रीमद्भागवते
महामुनिकृते किं वा परैरीश्वरः सद्यो हृद्यवरुध्यतेऽत्र कृतिभिः शुश्रूषुभिस्तत्क्षणात्॥ २॥ निगमकल्पतरो
र्गलितं फलं शुकमुखादमृतद्रवसंयुतं पिबत भागवतं रसमालयं मुहुरहो रसिका भुवि भावुकाः ३
णेच्छा तु महत्पुण्यैर्विना नोपपद्यत इत्यर्थः। तस्मात्कांडत्रयार्थस्यापि यथावत्प्रतिपादनादिदमेव सर्वशास्त्रेभ्यः
श्रेष्ठं। अतो नित्यं एतदेव श्रोतव्यमिति भावः। २ इदानीं तु न केवलं सर्वशास्त्रेभ्यः श्रेष्ठत्वात् अस्य श्रवणं विधीयते अ
पि तु सर्वशास्त्रफलरूपमिदं। अतः परमादरेणासेव्यमित्याह। हे भावुकाः हे पुण्यपुरुषाः भागवतं मुहुर्वारंवारं पिबत।
कथंभूतं निगमो वेदः स एव कल्पतरुः सर्वपुरुषार्थोपायत्वात् तस्य फलमिदं भागवतं नाम तत्तु वैकुंठगतं नारदेनानी
य मह्यं दत्तं। मया च शुकमुखे निहितं तच्च तन्मुखत्वाद्भुवि गलितं शिष्यप्रशिष्यादिरूपपरंपरया शनैः शनैरखंडमेवावती
र्णं न तूच्चपातेन स्फुटितमित्यर्थः। एतच्च भविष्यदपि भूतवन्निर्दिष्टं। अनागताख्यानेनैवास्य शास्त्रस्य प्रवृत्तेः। अत एवामृतरू
पेण द्रवेण संयुतं लोके हि शुकमुखस्पृष्टफलममृतमिव स्वादु भवतीति प्रसिद्धं। अत्र तु शुको मुनिः अमृतं परमानंदः स एव द्रवो र

भा०प्र ३

अप्युरु कर्मे । कुर्वंत हेतुकी भक्तिमित्थं भूतगुणो हरिरिति ॥ ३ ॥

सः रसं ह्येवायं लब्ध्वानंदी भवतीति श्रुतेः । अतो हे रसिकाः रसज्ञाः तत्रापि भावुकाः रसविशेषभावनाचतुराः अहो भुवि गलितमिदं वाक्योक्तेः इदं भागवतं नाम मुहुः पिबत । ननु त्वगष्ठ्यादिकं विहाय फलाद्रसः पीयते कथं फलमेव पातव्यं तत्राह । रसं रसरूपं अ तस्त्वगस्थ्यादि हेयस्याभावात् । फलमेव कृत्स्नं पिबत । अत्र च रसतादात्म्यविवक्षया रसवत्त्वस्याविवक्षितत्वाद् गुणवचनेपि परतः रसमयं आप्तभावात्तेन विनैव रसं फलमिति सामानाधिकरण्यं फलमित्युक्तेः पानासंभवाद्धेयं । प्रशस्तश्लेषः तन्निष्ठत्वं परं रसमित्युक्तं रसमित्युक्ते विगलितस्य रसस्य पातुमशक्यत्वान्न फलमित्युक्तमिति द्रष्टव्यं । न च भागवतामृतपाने मोक्षेपि विघ्नोऽयमित्याह । आलयं लयो मोक्षः अभिविधावाकारः लयमभिव्याप्य तद्गृहीतं स्वर्गादिसुखं मुक्तेर्वस्तुस्पृहास्यते । किंतु सेव्यतं तत्तदेव स्पृतिः । आत्मारामाश्च मुनयो निर्ग्रंथा इत्येवमनेन श्लोकत्रयेण विशिष्टेष्टदेवतानुस्मरणपूर्वकं प्रारिप्सितस्य शास्त्रस्याभि

नैमिषेऽनिमिषक्षेत्रे ऋषयः शौनकादयः । सत्रं स्वर्गाय लोकाय सहस्रसममासत ॥ ४ ॥

धेयप्रयोजने दर्शिते शिष्टेन सुखसेव्यत्वेन च श्रोतृनभिमुखीकर्तुं शास्त्रमारभते । नैमिष इति पाठे ब्रह्मणा विसृष्टस्य चक्रस्य मनोमयस्य नेमिः शीर्यते कुंठी भवति यत्र तन्नैमिषं । तथा च वायवीये । एतन्मनोमयं चक्रं मया सृष्टं विसृज्यते । यत्रास्य शीर्यते नेमिः स देशस्तपसः शुभः । इत्युक्त्वा सूर्यसंकाशं चक्रं सृष्ट्वा मनोमयं । प्रणिपत्य महादेवं विससर्ज पितामहः । तेपि हृष्टतरा विप्राः प्रणम्य जगतां प्रभुं । प्रययुस्तस्य चक्रस्य यत्र नेमिर्विशीर्यते । तद्वनं तेन विख्यातं नैमिषं मुनिपूजितमिति । नैमिषेति पाठे वाराहपुराणे द्रष्टव्यं । तत्रापि गौरमुखमृषिं प्रति भगवद्वाक्यं । एवं कृत्वा ततो देवो मुनिं गौरमुखं तदा । उवाच निमिषेणेदं निहतं दानवं बलं । अरण्येस्मिंस्ततस्त्वेतन्नैमिषारण्यसंज्ञितं । भविष्यति यथार्थं वै ब्राह्मणानां विशेषकमिति । अनिमिषश्च विष्णुः अलुप्तदृष्टित्वात् तस्य क्षेत्रे तथा चात्रैव शौनकादिवचनं । क्षेत्रेस्मिन्वैष्णवे वयमिति । स्वः स्वर्गी यत इति स्वर्गाय हरिः स एव लोकः भक्तानां निवासस्थानं तस्मै तत्प्राप्तये इत्यर्थः । सहस्रं समाः संवत्सराः अनुष्ठानकालो यस्य तत्सत्रं सत्रसंज्ञकं कर्म उद्दिश्य आसत उपविविशुः यद्वा आसत अकुर्वतेत्यर्थः । आलस्यतनिर्वर्तत उपपत्तौ स्यादिवत् । प्रत्ययोच्चारणमात्रार्थत्वेन आसत इति धा

गे

प्रातःकाले हुतहुताग्नयो हुतो वैश्वानरोऽग्निर्यैस्ते अनेन नित्यनैमित्तिकहोमसाधनत्वं दर्शितं । इदं वक्ष्यमाणं आदरात् पप्रच्छुः । विविदिषितार्थान्प्रष्टुं सूतस्य सर्वशास्त्राभिज्ञतया ज्ञानातिशयमाहुस्त्रिभिः ॥ ५ ॥ इतिहासो महाभारतादिस्तत्सहितानि । न केवलमधीतानि । अपितु आख्यातान्यपि । धर्मशास्त्राणि तान्यपि किंच ॥ ६ ॥ विदुषां मध्ये श्रेष्ठः व्यासः यानि शास्त्राणि वेदपरावरे सगुणनिर्गुणे ब्रह्मणि ये विदंतीति यथा ॥ ७ ॥ वेत्थ जानासि । हे सौम्य साधो तेषामनुग्रहात् तत्त्वतो ज्ञाने हेतुमाह ।

त एकदा तु मुनयः प्रातर्हुतहुताग्नयः । सत्कृतं सूतमासीनं पप्रच्छुरिदमादरात् ॥ ५ ॥ ऋषयः । त्वया खलु पुराणानि सेतिहासानि चानघ । आख्यातान्यप्यधीतानि धर्मशास्त्राणि यान्युत ॥ ६ ॥ यानि वेदविदां श्रेष्ठो भगवान्बादरायणः । अन्ये च मुनयः सूत परावरविदो विदुः ॥ ७ ॥ वेत्थ त्वं सौम्य तत्सर्वं तत्त्वतस्तदनुग्रहात् । ब्रूयुः स्निग्धस्य शिष्यस्य गुरवो गुह्यमप्युत ॥ ८ ॥ तत्र तत्राञ्जसायुष्मन्भवता यद्विनिश्चितं । पुंसामेकान्ततः श्रेयस्तन्नः शंसितुमर्हसि ॥ ९ ॥ प्रायेणाल्पायुषः सभ्य कलावस्मिन्युगे जनाः । मन्दाः सुमन्दमतयो मन्दभाग्या ह्युपद्रुताः ॥ १० ॥ भूरीणि भूरिकर्माणि श्रोतव्यानि विभागशः । अतः साधोऽत्र यत्सारं समुद्धृत्य मनीषया । ब्रूहि नः श्रद्दधानानां येनात्मा सुप्रसीदति ॥ ११ ॥ १२

ब्रूयुरिति । स्निग्धस्य प्रेमवतः अत एव रहस्यमपि ब्रूयुरेव ॥ ८ ॥ अंजसा ग्रंथार्जवेन एकांततः श्रेयः अव्यभिचारि श्रेयः साधनं अन्येपि बहुना कालेन बहुशास्त्रश्रवणादिभिः विनिश्चिन्वंति त्वं तु नेत्याहुः ॥ ९ ॥ प्रायेणेति हे सभ्य साधो अस्मिन् कलौ युगे अल्पायुषो जनाः तत्रापि मंदा अलसाः तत्रापि मंदमतयः तत्रापि मंदभाग्याः विघ्नाकुलाः तत्रापि उपद्रुता रोगादिभिः ॥ १० ॥ तच्च बहुशास्त्रश्रवणे क्वतावतैव फलसिद्धिरित्याहुः भूरीणि कर्माण्यनुष्ठेयानि येषु तानि समुद्धृत्य येन त्वद्वचनेन ॥ ११ ॥ आत्मा बुद्धिः सुप्रसीद

प्रश्नांतरं सूतेति पंचभिः भद्रं त इत्यौत्सुक्येनाशीर्वादः दृष्ट विस्तरेणाशीर्वादवचनेन निर्विघ्नो भवति स ह्यानिरुक्तमहच्छिद्रं संमोहः स्व
च विभ्रमः । यन्मुहूर्तं क्षणं वापि वासुदेवं न चिंतयेत् । इति वक्ष्यमाणत्वात् भगवान् निरतिशयैश्वर्यादिगुणः सात्वतां सात्व
तेन सर्वं भूतिर्भगवान् स उपास्यते यया विद्यया इति सत्वं अतो भक्ताः स्वार्थेऽण् । राक्षसवायसादिवत् । तस्य चान्वर्णमा
तद्वंशा सात्वता इति । तेषां पतिः पालकः यस्यार्थविशेषस्य चिकीर्षया वासुदेवस्य भार्यायां देवक्यां जातः १३ अंग हे सूत
न्नोवर्णयितुमर्हसि । यस्यावतारो भूतानां क्षेमाय पालनाय च समृद्धये तत्प्रभावमनुवर्णयेत्तस्तद्यशः श्रवणोत्सुक्यमाह

सूत जानासि भद्रं ते भगवान्सात्वतां पतिः देवक्यां वसुदेवस्य जातो यस्य चिकीर्षया १३ तन्नः शुश्रूषमाणानां
अर्हस्यंगानुवर्णितुं यस्यावतारो भूतानां क्षेमाय च भवाय च १४ आपन्नः संसृतिं घोरां यन्नाम विवशो गृणन्
ततः सद्यो विमुच्येत यद्बिभेति स्वयं भयं १५ यत्पादसंश्रयाः सूत मुनयः प्रशमायनाः सद्यः पुनंत्युपस्पृष्टाः
स्वर्धुन्यापोऽनुसेवया १६ को वा भगवतस्तस्य पुण्यश्लोकेड्यकर्मणः शुद्धिकामो न शृणुयाद्यशः कलिमलापहं
तस्य कर्माण्युदाराणि परिगीतानि सूरिभिः ब्रूहि नः श्रद्दधानानां लीलया दधतः कलाः १८

कुर्वंतीति भिः १४ संसृतिं आपन्नः प्राप्तः विवशोपि ततः संसृतेः हेत्वंतरहेतुः यद्यतो नाम्नः स्वयमपि भयं बिभेति । १५ यस्य पा
दः संश्रयो येषां अत एव प्रशमो अयनं वर्त्म आश्रयो वा येषां ते मुनयः उपस्पृष्टाः संनिधिमात्रेण सेविताः सद्यः पुनंति स्वर्धु
नी गंगा तस्याः आपः तस्मादनिस्सृताः ननु तत्रैवाति ष्ठंति अत स्तत्संबंधेन पुनंत्यो पि अनुसेवया पुनंतीति ततः सद्य इति मुनीनां
मुत्कर्षोक्तिः १६ पुण्यश्लोकैः ईड्यानि स्तव्यानि कर्माणि यस्य तस्य कलिमलापहं संसारदुःखोपशमनं प्रश्नांतरं १७ ४
उदाराणि महोति विश्वसृष्ट्यादीनि सूरिभिः नारदादिभिः कलाः ब्रह्मरुद्रादिमूर्तीः १८

अथेति प्रश्नांतरं अवतारकथाः सृष्ट्यर्थमेव तत्र देवसरे मत्स्याद्यवताराः तदीयाः कथाः स्वैरं लीलाः कुर्वतः श्रीकृष्णावता
रस्य योऽनप्रश्ने नैव तच्चरितप्रश्नोपि ज्ञात एव । अत्यौत्सुक्येन पुनरपि तच्चरितान्येव श्रोतुमिच्छंति स्वात्मनः तस्य
भावमावेदयंति १९ वयं तु योगं मायादिमुग्धाः स्म । उद्गच्छति तमो यस्मात् स उत्तमः । तथाभूतः श्लोको यस्य तस्य वि
क्रमे तु विशेषेण न तृप्यामः । अलमिति न मन्यामहे तत्र हेतुः । यच्छिक्रमं शृण्वतां । यद्वा अन्ये तृप्यंतु नाम वयं तु नेति
तुशब्दान्वयः अयमर्थः । त्रेधा ह्यलंबुद्धिर्भवति । उदरादिपूरणेन वा । रसज्ञानेन वा । साधुविशेषभावाद्वा । तत्र श्रु
णवतामित्यनेन श्रोत्रस्याकाशत्वान्न पूरणमित्युक्तं । रसज्ञानामित्यनेन चाज्ञानतः पशुवत्तृप्तिर्निराकृता । इत्युत्त
अथाख्याहि हरेर्धीमन्नवतारकथाः शुभाः लीला विदधतः स्वैरमीश्वरस्यात्ममायया १९ वयं तु न वितृप्याम
उत्तमश्लोकविक्रमे यच्छृण्वतां रसज्ञानां स्वादु स्वादु पदे पदे २० कृतवान्किल वीर्याणि सह रामेण केशवः
अतिमर्त्यानि भगवान्गूढः कपटमानवः २१ कलिमागतमाज्ञाय क्षेत्रेऽस्मिन्वैष्णवे वयं आसीना दीर्घ
सत्रेण कथायां सक्षणा हरेः २२ त्वं नः संदर्शितो धात्रा दुस्तरं निस्तितीर्षतां कलिं सत्वहरं पुंसां कर्णधा
र इवार्णवं २३ ब्रूहि योगेश्वरे कृष्णे ब्रह्मण्ये धर्मवर्मणि स्वां काष्ठामधुनोपेते धर्मः कं शरणं गतः २४
इति श्री महाभागवते महापुराणे प्रथमस्कंधे प्रथमोऽध्यायः
क्षणात्सांतरभावेन तृप्तिं निराकरोति । पदे पदे प्रतिक्षणं स्वादु तोपि स्वादु अतः कृष्णचरित्राणि कथयेत्याशयेना
ह्यः २० अतिमर्त्यानि मर्त्यानतिक्रांतानि गोवर्धनोद्धरणादीनि मनुष्यप्रसंभावितानीत्यर्थः । ननु यजनाध्यय
न सत्रेण निमित्तेन सत्र आसीनाः हरेः कथायां सक्षणाः कृतावसराः अस्मिन्भवसमये त्वद्दर्शनमीश्वरेणैव संपादितं
मित्याह २२ कलिं संसारं निस्तर्तुमिच्छतां अर्णवं तितीर्षतां कर्णधारो नाविक इव पुनः प्रश्नांतरं २३ धर्मस्य वर्मणि

कवचवद्रक्षके स्वां काष्ठां स्वस्वरूपं अस्यचोत्तरं कृष्णे
स्वधामोपगते धर्मज्ञानादिभिः सहेत्ययं श्लोकः २४
इति श्री भा० टी० प्र० प्रथमोऽध्यायः ।

तदेवं प्रथमेध्यायेषट्प्रश्नामुनिभिःकृताः। द्वितीयेतूत्तरंसूतश्चतुर्णामाहतेषय। विप्राणामिति। एवंभूतैःसम्यक्प्रश्नैःसम्यक्
रोमहर्षणपुत्रःउग्रश्रवाः। तेषांवचः प्रतिपूज्य सत्कृत्यप्रवक्तुंउपचक्रांतवान्। प्रवचनस्योपक्रमोनामगुरुदेवतानमस्कारइति
नमाहन्निभिः। नत्रस्वगुरोःश्रीशुकस्यैश्वर्यंतच्चरितेनैवद्योतयन्नाह। १ यंप्रव्रजंतंसन्न्यस्यअनुपेतं अनुपनीतमुपनयसंस्कारार्थ
यनार्थमनुपन्नां। यद्वाकेनेवाप्यनुपेतंअननुगतं। एकाकिनमित्यर्थः। तत्रहेतुः। अपेतकृत्यंकर्ममार्गाद्प्रवर्तमानं नैष्ठि
कत्वात्कृत्यशून्यं द्वैपायनोव्यासःविरहात्। कातरोभीतःसन्पुत्रइतिपुत्रेनाजुहाव। आहूतवान्। दूरादाहूतेपुत्रेस

व्यासउवाच इतिसंप्रश्नसंतुष्टोविप्राणांरौमहर्षणिः प्रतिपूज्यवचस्तेषांप्रवक्तुमुपचक्रमे १ सूतउवाच यं
प्रव्रजंतमनुपेतमपेतकृत्यंद्वैपायनोविरहकातरआजुहाव पुत्रेतितन्मयतयातरवोभिनेदुस्तंसर्वभूतहृदयंमु
निमानतोस्मि २ यःस्वानुभावमखिलश्रुतिसारमेकमध्यात्मदीपमतितीर्षतांतमोंधं संसारिणांकरुणया
हपुराणगुह्यंतंव्याससूनुमुपयामिगुरुंमुनीनां ३

सक्तिसंधितार्थः। नदातन्मयतयातरवोभिनेदुःप्रत्युक्तवंतः पितृस्नेहानुबंधपरिहारायपयोः वृक्षरूपेणप्रतिशब्दच्छलेनो
त्तरंदत्तवानित्यर्थः। तंमुनिंआनतोस्मि। तन्मयत्वोपपादनायविशेषणंसर्वभूतहृदयं सर्वभूतानांहृन्मनः अयतेप्राबल्ये
नप्रविशतीतिसर्वभूतहृदयस्तौकृपाद्भुतांदर्शयन्नाह। २ अंधंगाढंतमःसंसारास्वयंअतितर्तुमिच्छतांपुराणानांमध्येगु
ह्यंगोप्यंतत्रहेतुत्वेनचत्वारिविशेषणानि। स्वःनिजःअसाधारणःअनुभावःप्रभावोयस्यतत्स्वानुभावंअखिलश्रुतीनांसा ५
रं। एकंअद्वितीयंअनुपममित्यर्थः। आत्मानंकार्यकारणसंघातमधिकृत्यवर्तमानमात्मतत्त्वमध्यात्मंतस्यदीपंसाक्षा
त्प्रकाशकं। उपयामिशरणंव्रजामि। एवंद्वाभ्यांगुरुंनमस्कृत्यदेवंप्रणमति ३

अयत्यनेनसंसारमितिजयोग्रंथःतंउदीरयेदिति। स्वयंतथोदीरयन्अन्यान्पौराणिकाननुप्रशिक्षयति। तेषांवचःप्रतिपूज्येतियदु
क्तंतत्पूजनंकरोति। ४ हेमुनयःसाधुयथाभवतिनहाहंपृष्टः यतोलोकानांमंगलमेतत्। यतःकृष्णविषयःप्रश्नःकृतः। सर्वशा
स्त्रार्थसारोद्धारप्रश्नस्यापिकृष्णेपर्यवसानात्। एवमुक्तं। तत्रप्रथमंयत्पृष्टंसर्वशास्त्रार्थसारंएकांतिकंश्रेयोब्रूहीतितत्रोत्त
रं ५ अयमर्थः। धर्मोद्विविधः। प्रवृत्तिलक्षणोनिवृत्तिलक्षणश्च तत्रयःस्वर्गाद्यर्थः प्रवृत्तिलक्षणःसोपरः। यस्तुधर्मा त

नारायणंनमस्कृत्यनरंचैवनरोत्तमं देवींसरस्वतींव्यासंततोजयमुदीरयेत् ४ सूतउवाच मुनयःसाधुपृ
ष्टोहंभवद्भिर्लोकमंगलं यत्कृतःकृष्णसंप्रश्नो ×सं× येनात्मासुप्रसीदति ५ सवैपुंसांपरोधर्मोयतो
यतोभक्तिरधोक्षजे अहैतुक्यप्रतिहतायथात्मासुप्रसीदति ६ वासुदेवेभगवतिभक्तियोगः
प्रयोजितः जनयत्याशुवैराग्यंज्ञानंयत्तदहैतुकं ७

तश्रवणादरादिलक्षणाभक्तिर्भवति। सपरोधर्मः सएवैकांतिकंश्रेयइति। कथंभूताभक्तिः अहेतुकी हेतुःफलानुसं
धानं तद्रहिता अप्रतिहताअप्रतिहतोविघ्नैरनभिभूताननुतमेतमात्मानंवेदानुवचनेनब्राह्मणाविविदिषंति
यज्ञेनदानेनतपसानाशकेनेत्यादिश्रुतिभ्योधर्मस्यज्ञानांगत्वंप्रसिद्धं। तत्कुतोभक्तिहेतुत्वंधर्मस्योच्यतेसत्यं
तत्तुभक्तिद्वारेणेत्याह। ६ अहैतुकंशुष्कतर्काद्यगोचरं। औपनिषदमित्यर्थः। व्यतिरेकमाह ७

भा०१
६

योधर्मइतिप्रसिद्धः सःस्वनुष्ठितःसन्यदिविष्वक्सेनस्यश्रीवासुदेवस्यकथासुरतिंनोत्पादयेत्। तर्हिस्वनुष्ठितोपिसन्श्रमएवेत्यर्थः। नन्वस्तिनचापिस्वर्गादिफलमित्याशंक्य हिशब्देनसाधयति। तद्यथेहकर्मजितोलोकःक्षीयते। एवमेवामुत्रपुण्यजितोलोकःक्षीयतेइति। तर्कानुगृहीतयाश्रुत्या क्षयप्रतिपादनात्। तदेवंहरिभक्तिद्वारानदितवैराग्यात्मज्ञानपर्यंतःपरोधर्मइत्युक्तं। अन्येत्वेवंमन्यते। धर्मस्यार्थफलंतस्यतुकामःफलंतस्यचेंद्रियप्रीतिःतत्प्रीतेश्चपुनरपिधर्मार्थाद्विपरंपरेतियथाहुः। धर्मादर्थश्चकामश्चसकिम

धर्मःस्वनुष्ठितःपुंसांविष्वक्सेनकथासुयः नोत्पादयेद्यदिरतिंश्रमएवहिकेवलं ८ धर्मस्यह्यापवर्ग्यस्यनार्थोर्थायोपलप्यते नार्थस्यधर्मैकांतस्यकामोलाभायहिस्मृतः ९ कामस्यनेंद्रियप्रीतिर्लाभोजीवेतयावता जीवस्यतत्त्वजिज्ञासानार्थोयश्चेहकर्मभिः १० वदंतितत्तत्त्वविदस्तत्त्वंयज्ज्ञानमद्वयं ब्रह्मेतिपरमात्मेतिभगवानितिशब्द्यते ११

र्थंनसेव्यतेइत्यादि ८ तन्निराकरोतिधर्मस्येतिद्वाभ्यां। अपवर्गस्यतुकन्यायेनापवर्गपर्यंतस्यअर्थायफलत्वायअर्थोनोपलप्यतेयोग्योनभवति। तथार्थस्याप्येवंभूतधर्माव्यभिचारिणःकामोलाभायफलत्वायनहिस्मृतोमुनिभिः ९ कामस्यविषयभोगस्यइंद्रियप्रीतिर्लाभःफलंनभवतिकिंतुयावताजीवितताव। नैवकामस्यलाभःजीवनपर्याप्तिएवकामःसेव्यइत्यर्थः। जीवनस्यचपुनःकर्मानुष्ठानद्वाराकर्मभिर्यइहप्रसिद्धःसोर्थोनभवतिकिंतुतत्त्वजिज्ञासेवेति। ननुतत्त्वजिज्ञासानामधर्मजिज्ञासैवधर्मएवाह। १० तत्त्वमितिकेचित्तत्राह। वदंतीति। तत्त्वविदस्तुतदेवतत्त्वंवदंतिकिंतत्यत्ज्ञानंनामअद्वयमिति। क्षणिकविज्ञानपक्षंव्यावर्तयति। ननुतत्त्वविदोपिविगीतवचनाएवनैवंतस्यैवतत्त्वस्यनामांतरैरभिधानादित्याह। औपनिषदैर्ब्रह्मेतिहैर १

तज्ज्ञतत्त्वंसपरिकरयाभक्त्यैवज्ञाप्यतइत्याह॥ [illegible] ज्ञानवैराग्ययुक्तयेत्यत्रज्ञानंपरोक्षंतज्ज्ञतत्त्वंआत्मनियपरोक्षेवक्रेपश्यंति। किंतदात्मानंपरमात्मानंश्रुतेनवेदांतश्रवणेनगृहीतयाप्राप्तयेति। भक्तेर्दार्ढ्यमुक्तं धर्मफलंमुक्तिर्नार्थकामादिकमितीममर्थमुपपाद्योपसंहरति॥१२॥ हेद्विजश्रेष्ठाःहरितोषणंहरेराराधनसंसिद्धिःफलं। यस्माद्भक्तिविहीनोधर्मःकेवलंश्रमएव। तस्माद्भक्तिप्रधानोनुष्ठेय इत्याह॥१३॥ एकेनएकाग्रेणमनसा। भक्तिहीनःकेवलंश्रमइतिप्रपंचितं॥ ॥इदानींतुभक्तेर्मुक्तिफलत्वंप्रपंचयति॥१४॥ धर्मो

तच्छ्रद्दधानामुनयोज्ञानवैराग्ययुक्तया॥ पश्यंत्यात्मनिचात्मानंभक्त्याश्रुतगृहीतया॥१२॥ अतःपुंभिर्द्विजश्रेष्ठावर्णाश्रमविभागशः॥ स्वनुष्ठितस्यधर्मस्यसंसिद्धिर्हरितोषणं॥१३॥ तस्मादेकेनमनसाभगवान्सात्वतांपतिः॥ श्रोतव्यःकीर्तितव्यश्चध्येयःपूज्यश्चनित्यदा॥१४॥ यदनुध्यासिनायुक्ताःकर्मग्रंथिनिबंधनं॥ छिंदंतिकोविदास्तस्यकोनकुर्यात्कथारतिं॥१५॥ शुश्रूषोःश्रद्दधानस्यवासुदेवकथारतिः॥ स्यान्महत्सेवयाविप्राःपुण्यतीर्थनिषेवणात्॥१६॥ शृण्वतांस्वकथांकृष्णःपुण्यश्रवणकीर्तनः॥ हृद्यंतःस्थोह्यभद्राणिविधुनोतिसुहृत्सतां॥१७॥

यदनुध्या॥ स्वअनुध्याअनुध्यानंसैवासिःखड्गःतेनयुक्ताविवेकिनःग्रंथिमहंकारंनिबध्नातियत्कर्मसतच्छिंदंति। तस्यकथायांरतिंकोनकुर्यात्। ननुसत्यमेवकर्मनिर्मूलिनीहरिकथारतिःतथापितस्यांरुचिर्नोत्पद्यतेतत्कथमित्याह॥१५॥ पुण्यतीर्थनिषेवणादिभिःनिःपापस्यमहत्सेवास्यात्। तयाचतद्धर्मश्रद्धाततःश्रवणेच्छाततोरुचिःस्यादित्यर्थः। ततश्च॥१६॥ पुण्येश्रवणकीर्तनेयस्यसतांसुहृत्हितकारी। हृदियान्यभद्राणिकामादिवासनाःतानिअंतस्थःसन्हृदयस्थःततश्च॥१७॥

६

॰॰ नष्टप्रायेष्विति। सर्वाभद्रनाशस्य ज्ञानोत्तरकालत्वात् प्राग्ग्रहणं भागवतानां भागवतशास्त्रसेवया नैष्ठिकी नि
॰श्चला विक्षेपकत्वाभावात्॥ १८॥ रजस्तमश्च येच तत्प्रभावाः कामादयः एतैरनाविद्धं अनभिभूतं प्रसीदति उपशाम्यति।
॥ १९॥ भगवद्भक्तियोगतः प्रसन्नमनसः अत एव मुक्तसंगस्य ज्ञानफलमाह॥ २०॥ हृदयमेव ग्रंथिः चिज्जडग्रंथनरूपो

नष्टप्रायेष्वभद्रेषु नित्यं भागवतसेवया॥ भगवत्युत्तमश्लोके भक्तिर्भवति नैष्ठिकी॥ १८॥ तदा रज
स्तमोभावाः कामलोभादयश्च ये। चेत एतैरनाविद्धं स्थितं सत्त्वे प्रसीदति॥ १९॥ एवं प्रसन्नमनसो
भगवद्भक्तियोगतः॥ भगवत्तत्त्वविज्ञानं मुक्तसंगस्य जायते॥ २०॥ भिद्यते हृदयग्रंथिश्छिद्यंते
सर्वसंशयाः॥ क्षीयंते चास्य कर्माणि दृष्ट एवात्मनीश्वरे॥ २१॥ अतो वै कवयो नित्यं भक्तिं परमया
मुदा॥ वासुदेवे भगवति कुर्वंत्यात्मप्रसादनीं॥ २२॥ सत्त्वं रजस्तम इति प्रकृतेर्गुणास्तैर्युक्तः परः
पुरुष एक इहास्य धत्ते॥ स्थित्यादये हरिविरिंचिहरेति संज्ञाः श्रेयांसि तत्र खलु सत्त्वतनोर्नृणां स्युः
२३॥

हंकारः अत एव सर्वसंशयाः असंभावनारूपाः कर्माण्यारब्धफलानि आत्मस्वरूपभूते ईश्वरे दृष्टे एवकारेण ज्ञानानंतरमेवे
ति दर्शयति। अत्र सदाचारं प्रमाणयन्नुपसंहरति॥ २१॥ आत्मप्रसादिनीं मनःशोधनीं वासुदेवे भक्तिं कुर्वंतीति भजनीयविशे
षाद्‌रीति:॥ तद्देवोपपादयितुं ब्रह्मादीनां त्रयाणामेकात्मकत्वेपि वासुदेवस्याधिक्यमाह॥ २२॥ इह यद्यप्येक एव परः पुमान् इह विश्व
स्य स्थित्यादयेऽस्य स्थितिलयार्थं संज्ञाः केवलं भिन्ना धत्ते। हरिविरिंचिहरा इति संज्ञाः केवलं भिन्ना धत्ते तत्र तेषां त्रयाणां मध्ये श्रेयांसि
शुभफलानि सत्त्वतनोर्वासुदेवादेव स्युः। उपाधिवैशिष्ट्येन फलवैशिष्ट्यं सदृष्टांतमाह॥ २३॥

भि॰ उपाधिवैशिष्ट्येन फलवैशिष्ट्यं सदृष्टांतमाह। पार्थिवात्स्वप्रवृत्तिप्रकाशरहितात् दारुणः काष्ठात्तत्सकाशात् धूमप्रवृत्तिः
स्वभावः त्रयीमयः वेदोक्तकर्मप्रचुरः ईषत्कर्मप्रत्यासत्तेः तस्मादपि अग्निस्त्रयीमयः साक्षात्कर्मसाधनत्वात् एवं तमसः
सकाशात् रजो ब्रह्मदर्शिनं ब्रह्मप्रकाशकं तु ईषत्प्रकाशकत्वेन लयात्मका तमसः सकाशात् रजसः सोपाधिकज्ञानहेतुत्वेन किंचि
द्ब्रह्मदर्शनप्रत्यासत्तिमात्रमुक्तं। ननु सर्वथा तत्प्रकाशकत्वं विक्षेपकत्वाद्यत्न तत्सत्त्वं तत्साक्षाद्ब्रह्मदर्शनं। अतस्तद्गुणोपा
धीनां ब्रह्मादीनामपि यथोत्तरं वैशिष्ट्यमिति भावः। वासुदेव उक्तं पूर्वाचारं प्रमाणयति। २४ अत अधो हेतोः अथ पुरा विशुद्ध

पार्थिवाद्दारुणो धूमस्तस्मादग्निस्त्रयीमयः तमसस्तु रजस्तस्मात्सत्त्वं यद्ब्रह्मदर्शनं २४ भेजिरे मुनयोथाग्रे भगवं
तमधोक्षजं सत्त्वं विशुद्धं क्षेमाय कल्पंते येनुतानिह २५ मुमुक्षवो घोररूपान्हित्वा भूतपतीनथ नारायणकलाः शां
ता भजंति ह्यनसूयवः २६ रजस्तमःप्रकृतयः समशीला भजंति वै पितृभूतप्रजेशादीन् श्रियैश्वर्यप्रजेप्सवः २७

सत्त्वमूर्तिं भगवंतं अधोक्षजं अतो ये तान् अनुवर्तंते ते इह संसारे क्षेमाय कल्पंते नन्वन्यानपि केचिद्भजंतो दृश्यंते सत्यं। मुमुक्ष
वस्तु अन्यान् न भजंति। किंतु सकामा एवेति द्वाभ्यां। भूतपती इति पितृप्रजेशादीनामुपलक्षणं। अनसूयवः देवतांतरानिंदकाः सं
तः २६ रजस्तमसी प्रकृतिः स्वभावो येषां ते अत एव पितृभूतादिभिः समं शीलं येषां ते। श्रिया सह ऐश्वर्यं च प्रजाश्चेप्सं
तीति। तत्त्वतो मोक्षप्रसादत्वात् वासुदेवो भजनीयः इत्युक्तं सर्वशास्त्रार्थतात्पर्यगोचरत्वादपीत्याह द्वाभ्यां २७ अ

भा०१
८

वासुदेवएवपरः तात्पर्यगोचरोयेषांते ननुवेदापरमखाद्दृश्यंतेइत्याशंक्यतेपितद्आराधनार्थत्वात्तत्परा एवेत्युक्तं । योगाःयो
गशास्त्राणितेषामप्यासनप्राणायामादिक्रियापरत्वमाशंक्यतासामपितत्प्राप्त्युपायत्वान्नतत्परत्वमुक्तं २८ ज्ञानंज्ञा
नशास्त्रं । ननुयत्तत्शास्त्रंज्ञानपरमेवेत्याशंक्यज्ञानस्यापितत्परत्वमुक्तं । तपोत्रज्ञानंधर्मोधर्मशास्त्रंज्ञानं व्रतादिवि
यं ननुतत्स्वर्गपरमित्याशंक्य । गम्यतइतिगतिः स्वर्गादिफलंतदपितदानंदांशरूपत्वात्तत्परैवेत्युक्तं । यद्वावेदाइत्यनेनैव
तन्मूलत्वात्सर्वाण्यपिवासुदेवपराणि । ननुतेषां मखयोगक्रियादिनानार्थपरत्वात्‌नतदेकपरत्वमित्याशंक्यमखादीना

वेदा
वासुदेवपरादेवावासुदेवपरामखाः वासुदेवपरायोगावासुदेवपराःक्रियाः २८ वासुदेवपरंज्ञानंवासुदेवपरं
तपः वासुदेवपरोधर्मोवासुदेवपरागतिः २९ सएवेदंससर्जाग्रेभगवानात्ममायया सदसद्रूपयाचासौगुण
मय्यागुणोविभुः ३० तयाविलसितेष्वेषुगुणेषुगुणवानिव अंतःप्रविष्टआभातिविज्ञानेनविजृंभितः ३१

मपितत्परत्वमुक्तंद्रष्टव्यं । ननुजगत्सर्गप्रवेशनियमनादिविलासयुक्तेवस्तुनिसर्वशास्त्रसमन्वयोदृश्यतेकथंवा
सुदेवपरत्वंसर्वस्यतत्राहचतुर्भिः २९ एतैरेवश्लोकैःतस्यकर्माण्युदाराणिब्रूहीतिप्रश्नस्योत्तरं सदसद्रूपयाकार्य
कारणात्मिकया । अगुणश्चेत्यन्वयः । स्वतोनिर्गुणोपिसन्नित्यर्थः । जगत्कारणत्वमुक्तं ३० प्रवेशनियमलक्ष
णांलीलामाह । विलसितेषुउद्भूतेषुआकाशादिषुअंतःप्रविष्टःसन्गुणवानिवमदधीनाएतेगुणाइत्यभिमा
निव । ननुवस्तुतस्तथा । यतोविज्ञानेनचिच्छक्त्याविजृंभितःअस्पृष्टिंतःवस्तुरूपत्व — माह ३१

स्वयोनिषुस्वाभिव्यंजकेषुअवहितोनिहितःविश्वात्मापुमान्परमेश्वरः भूतेषुप्राणिषुअंतर्यामिणोपिप्रतियोनिनाना
त्वेननानात्वमिवोच्यते । क्षेत्रज्ञरूपेणवाभोगरूपांलीलामाह ३२ असौहरिःभूतसूक्ष्माणिचइंद्रियाणिचआत्मामन
श्चतैःस्वयंनिर्मितेषुभूतेषुचतुर्विधेष्विति भोगेस्वातंत्र्यं सद्योतेतद्गुणान् । तन्मदनुरूपान्विषयानिच्छयाभुंक्तेभो
जयतीतिणिजर्थोवाद्रष्टव्यः । पालयतीतिवा । नदास्मनेपरमार्षं । भुंजोनवनइतिस्मरणात् । ३३ इदानींसूतजानासी
तिप्रश्नोत्तरमाह । भावयतिपालयति । एतत्तुसर्वावतारसाधारणप्रयोजनं । विशेषतःकृष्णावतारस्यकुंतीस्तुतौवक्ष्यते

दा
यथाह्यवहितोवह्निर्दारुष्वेकःस्वयोनिषु नानेवभातिविश्वात्माभूतेषुचतथापुमान् ३२ असौगुणमयैर्भा
वैर्भूतसूक्ष्मेंद्रियात्मभिः स्वनिर्मितेषुनिर्विष्टोभुंक्तेभूतेषुतद्गुणान् ३३ भावयत्येषसत्त्वेनलोकान्वैलो
कभावनः लीलावतारानुरतोदेवतिर्यङ्नरादिषु ३४ इतिश्रीमन्महाभागवतेप्रथमस्कंधेद्वितीयोध्यायः
॥२॥ सूतउ० जगृहेपौरुषंरूपंभगवान्महदादिभिः संभूतंषोडशकलमादौलोकसिसृक्षया १

लोकभावनःलोककर्त्तादेवादिषुलीलावतारास्तेष्वनुरक्तः ३४ इतिटीकायांप्रथमेद्वितीयः अवतारकथाःप्रश्नेन्त
तीयेतूत्तराविधाः । पुरुषाद्यवतारोक्त्यातत्तच्चरित्रवर्णनैः । यदुक्तं । अथाख्याहिहरेर्धीमन्नवतारकथाःशुभाइति । तद
नरत्वेनावतारानुक्तमिष्यन्प्रथमंपुरुषावतारमाह । जगृहइतिपंचभिः । महदादिभिःमहदहंकारपंचतन्मात्रैःएकाद
शेंद्रियाणिपंचमहाभूतानीतिषोडशकलाअंशायस्मिन् ननुयद्यपिभगवद्विग्रहोनैवंभूतःतथापिविराड्जीवांतर्यामि

कोसौ भगवानित्यपेक्षायां तं विशिनष्टि । यस्यांभसि एकार्णवे शयानस्य विश्रांतस्य तत्र च योगः समाधिः तद्रूपां निद्रां विस्तार
यतः तस्य नाभिरेव ह्रदः तस्मिन् यदंबुजं तस्मात् कोशात् ब्रह्मा आसीत् अभूत् पाद्मे कल्पे स पौरुषं रूपं जगृहे २ कीदृशं रूपं
तदाह । यस्येति । ननु कीदृशो विग्रहस्तस्य योंभसि शेते तस्मिन् तदाह । तस्य भगवतो रूपं तु विशुद्धं रजआद्यसंभिन्नं । अत एवो
र्जितं निरतिशयं सत्वं ३ एतच्च योगीनां प्रत्यक्षमित्याह । अदभ्रेण अनल्पेन ज्ञानात्मकेन चक्षुषा तेन सहस्रं अपरिमितानि या

यस्यांभसि शयानस्य योगनिद्रां वितन्वतः । नाभिह्रदांबुजादासीद्ब्रह्मा विश्वसृजां पतिः २ यस्यावयवसंस्था
नैः कल्पितो लोकविस्तरः । तद्वै भगवतो रूपं विशुद्धं सत्वमूर्जितं ३ पश्यंत्यदो रूपमदभ्रचक्षुषा सहस्रपादोरुभुजाननाद्भु
तं । सहस्रमूर्द्धश्रवणाक्षिनासिकं सहस्रमौल्यंबरकुंडलोल्लसत् ४ एतन्नानावताराणां निधानं बीजमव्ययं । य
स्यांशांशेन सृज्यंते देवतिर्यङ्नरादयः ५ स एव प्रथमं देवः कौमारं सर्गमाश्रितः । चचार दुश्चरं ब्रह्मा ब्रह्मचर्यम
खंडितं ६ द्वितीयं तु भवायास्य रसातलगतां महीं । उद्धरिष्यन्नुपादत्त यज्ञेशः सौकरं वपुः ७

नि पद्मादीनि तैः अद्भुतं सहस्रं मूर्द्धादयो यस्मिन् तत् सहस्रं मौल्यादीनि तैः उल्लसत् शोभमानं एतत्तु कूटस्थं न तु अन्यावतारवदा
विर्भावतिरोभाववदित्याह । ४ तत् आदिनारायणरूपं निधीयते अस्मिन्निति निधानं कार्यावसाने प्रवेशस्थानमित्यर्थः । बीजं
उद्गमस्थानं बीजत्वेपि नान्यबीजतुल्यं किंतु अ कौमारः आर्षः प्राजापत्यो मानव इत्यादीनि सर्गविशेषनामानि । यत्तो
रूपं रूपं जगृहे । स एव देवः कौमाराख्यं सर्गमास्थितः सन् ब्रह्मा ब्राह्मणो भूत्वा ब्रह्मचर्यं चचार । वाराहावतारमाह ६ ९
अस्य विश्वस्य भवाय उद्भवाय महीमुद्धरिष्यन्निति कर्मोक्तिः । एवं सर्वत्रावतारस्तत्कर्म चोक्तमित्यनुसंधेयं । श्रीनारदावतारमाह ७

तृतीयं ऋषिसर्गं उपेत्य तत्र देवर्षित्वमुपेत्येत्यर्थः । सात्वतं वैष्णवं तंत्रं पंचरात्रागमं आचष्ट उक्तवान् । यतस्तंत्रात्
निर्गतं कर्म बंधहेतुत्वं येभ्यः तानि नैष्कर्म्याणि कर्मणामेव मोचकत्वं यतो भवति तदाचष्टेत्यर्थः । नरनारायणावता
रमाह । ८ चतुर्थे अवतारे धर्मस्य कलाः अंशाः भार्येत्यर्थः । अर्द्धो वा एष आत्मनो यत्पत्नीति श्रुतेः । तस्याः सर्गे ऋषी भू
त्वेत्येकावतारतां दर्शयति । कपिलावतारमाह । ९ आसुरये तन्नाम्ने ब्राह्मणाय तत्त्वानां ग्रामस्य संघस्य निर्ण
यो यस्मिन् शास्त्रे । तत्सांख्यं । दत्तात्रेयावतारमाह । १० अत्रेरपत्यत्वं तेन वृतः सन् प्राप्तः अत्रेरपत्यमभिकांक्षं

तृतीयं ऋषिसर्गं वै देवर्षित्वमुपेत्य सः । तंत्रं सात्वतमाचष्ट नैष्कर्म्यं कर्मणां यतः ८ तुर्ये धर्मकलासर्गे नरनारा
यणावृषी भूत्वात्मोपशमोपेतं अकरोत् दुश्चरं तपः ९ पंचमः कपिलो नाम सिद्धेशः कालविप्लुतं प्रोवा
चासुरये सांख्यं तत्वग्रामविनिर्णयं १० षष्ठमत्रेरपत्यत्वं वृतः प्राप्तोनसूयया आन्वीक्षिकीमलर्काय प्र
ह्लादादिभ्य ऊचिवान् ११ ततः सप्तम आकूत्यां रुचेर्यज्ञोभ्यजायत स यामाद्यैः सुरगणैरपात्स्वायंभुवां
तरं १२ अष्टमो मेरुदेव्यां तु नाभेर्जात उरुक्रमः दर्शयन्वर्त्म धीराणां सर्वाश्रमनमस्कृतं १३ ऋषिभिर्या
चितो भेजे नवमं पार्थिवं वपुः दुग्धेमामोषधीर्विप्रास्तेनायं स उशत्तमः १४

त आह । तुष्टोहं निवक्ष्यमाणत्वात् । कथं प्राप्तः अनसूयया मत्सदृशापत्यमिषेण मामेवापत्यं वृतवानिति दोषदृष्टि
मकुर्वन्नित्यर्थः । आन्वीक्षिकीं आत्मविद्यां प्रह्लादादिभ्य ऊचिवान् । यज्ञावतारमाह ११ स यज्ञः यामाद्यैः स्वैः पुत्रैः यामाना
मदेवताः तदाद्यैः सह स्वायंभुवं मन्वंतरं पालितवान् तदा स्वयमिंद्रो भूदित्यर्थः । ऋषभावतारमाह १२ सर्वाश्रमनमस्कृ
तं आश्रमं पारमहंस्यं वर्त्म धीराणां दर्शयन् आग्नीध्रपुत्रात् नाभेः ऋषभो जातः । पृथ्ववतारमाह १३ पार्थिवं वपुः
राजदेहं पृथुरूपं । पाठांतरे पृथोरिदं पार्थिवं । ओषधीरित्युपलक्षणं इमां पृथ्वीं सर्वाणि वस्तूनि दुग्ध । अङ्गमाभावस्ता

... मत्स्यावतारमाह १५

चाक्षुषमन्वंतरे यद्यप्युदधिसंप्लवस्तस्मिन्नुपद्यपि मन्वंतरावसाने प्रलयो नास्ति तथापि केनचित्कौतुकेन सत्यव्रतायामा
याप्रदर्शिता। अथ। अकांडे मार्कंडेयायेति द्रष्टव्यं। महीमय्यां नावरूपायां मह्यामित्यर्थः। अपात् रक्षितवान्। वैवस्वत
मिति भाविनी संज्ञा। कूर्मावतारमाह। १५ कमठः कूर्मः तद्रूपेण एकादशे अवतारे विभुर्दधार। धन्वंतर्यवतारमाह।
१६ धान्वंतरं धन्वंतरिरूपं द्वादशमा दिप्रयोगस्त्वार्षः। त्रयोदशमेव रूपं तच्चरित्रेण सह दर्शयति। अपाययदित्यत्र सु

रूपं स जगृहे मात्स्यं चाक्षुषांतरसंप्लवे नाव्यारोप्य महीमय्यामपाद्वैवस्वतं मनुं १५ सुरासुराणामुदधिं म
थ्नतां मंदराचलं दध्रे कमठरूपेण पृष्ठ एकादशे विभुः १६ धान्वंतरं द्वादशमं त्रयोदशममेव च अपायय
त्सुरानन्यान्मोहिन्या मोहयन्स्त्रिया १७ चतुर्दशं नारसिंहं बिभ्रद्दैत्येंद्रमूर्जितं ददार करजैर्वक्षः ए
रकां कटकृद्यथा १८ पंचदशं वामनकं कृत्वागादध्वरं बलेः पदत्रयं याचमानः प्रत्यादित्सुस्त्रिविष्टपं १९
अवतारे षोडशमे पश्यन्ब्रह्मद्रुहो नृपान् त्रिःसप्तकृत्वः कुपितो निःक्षत्रामकरोन्महीं २० ततः सप्तदशे
जातः सत्यवत्यां पराशरात् चक्रे वेदतरोः शाखा दृष्ट्वा पुंसोऽल्पमेधसः २१

धामित्यध्याहारः। मोहिन्या स्त्रिया रूपेण अन्यान् असुरान् धन्वंतरिरूपेणामृतमानीय मोहिन्या अपाययदित्यर्थः। न
सिंहावतारमाह। १७ नारसिंहस्वरूपं बिभ्रत्। एरकां निर्ग्रंथितृणं। वामनावतारमाह। १८ दुष्टानो मर्दं वामयतीति
वामनः। ह्रस्वं रूपं वा। प्रत्यादित्सुः तस्मा दाच्छिद्य गृहीतुमिच्छुः। परशुरामावतारमाह। १९ त्रिः त्रिगुणं यथा भवति तथा
सप्तकृत्वः सप्तवारान् एकविंशति वारानित्यर्थः। व्यासावतारमाह। २० अल्पमेधसः अल्पप्रज्ञान् पुंसो दृष्ट्वा तदनुग्रहा

नरदेवत्वं राघवरूपेण प्राप्तः सन् अष्टादशे रामकृष्णावतारमाह। २२ विंशतितमइति वक्तव्ये तकारलोपश्छांदोऽनु
रोधेन रामकृष्णावित्येवं नामनी जन्मनी प्राप्य २३ अजिनस्य सुतः। जिनसुत इति पाठे स एवाजिनः। कीकटेषु मध्यगया
प्रदेशे। कल्क्यवतारमाह। २४ युगसंध्यायां कलेरंते विष्णुयशसो ब्राह्मणात् सकाशात् जनिता जनिष्यते। अनुक्तसर्वसं
ग्रहार्थमाह २५ असंख्येयत्वे दृष्टांतः। यथेति अविदासिनः अपक्षयशून्यात् सरसः काशात् कुल्याः क्षुद्रप्रवाहाः
विभूतीराह २६ तत्र विशेषमाह २७ पुंसः परमेश्वरस्य केचिदंशाः केचित्कलाः विभूतयश्च तत्र मत्स्यादीनां अवता

नरदेवत्वमापन्नः सुरकार्यचिकीर्षया समुद्रनिग्रहादीनि चक्रे वीर्याण्यनेकशः २२ एकोनविंशे विंशतिमे
वृष्णिषु प्राप्य जन्मनी रामकृष्णाविति भुवो भगवानहरद्भरं २३ ततः कलौ संप्रवृत्ते संमोहाय सुरद्विषां बुद्धो
नाम्नाजिनसुतः कीकटेषु भविष्यति २४ अथासौ युगसंध्यायां दस्युप्रायेषु राजसु जनिता विष्णुयशसो नाम्ना
कल्किर्जगत्पतिः २५ अवतारा ह्यसंख्येया हरेः सत्वनिधेर्द्विजाः यथाविदासिनः कुल्याः सरसः स्युः सहस्रशः
ऋषयो मनवो देवा मनुपुत्रा महौजसः कलाः सर्वे हरेरेव सप्रजापतयस्तथा २६ एते चांशकलाः पुंसः कृष्णस्तु भ
गवान्स्वयं इंद्रारिव्याकुलं लोकं मृडयंति युगेयुगे २८

एतेन सर्वज्ञत्व सर्वशक्तित्वे पि यन्वोपयोगमेव ज्ञानक्रियाशक्त्याविष्करणं। कुमारनारदादिष्वधिकारिकेषु यथोपयोगमंशकला
वेशः। एथ्वादिषु कलावेशः। कृष्णस्तु साक्षाद्भगवान् नारायण एव आविष्कृतसर्वशक्तित्वात्। सर्वेषां प्रयोजनमाह। इंद्रा
रयो दैत्याः तैर्व्याकुलमुपद्रुतं। लोकं मृडयंति। सुखिनं कुर्वंति। एतत्कीर्तनफलमाह। २८

भा०१
११

गुह्यं अतिरहस्यं जन्मप्रयतः शुचिः सन् दुःखग्रामात् संसारात् विमुच्यत इत्युक्तं। तत्र कथं देहद्वयसंबंधस्य भगवन्मायावि
लसितत्वात् एतच्छ्रवणादिजनितविद्यया तन्निवृत्तिरुपपद्यत इति आशयमाह पंचभिः २९ अरूपस्य चिदेकरूपस्य आत्म
नो जीवस्य एतत् स्थूलं रूपं शरीरं भगवतो या माया तस्याः गुणैः महदादिरूपैः विरचितं। एकं आत्मनि आत्मस्थाने शरीरं
तन्नि इत्यर्थः कथमित्यपेक्षायां स्वरूपावरणेन तदध्यासत इति सदृष्टांतमाह। ३० यथा वायुमाश्रितो मेघो नभसि आका
शे अबुद्धिभिर्जनैः आरोपितः। यथा वा पार्थिवो रेणुः तद्गतधूसरत्वात् अनिले एवं द्रष्टरि आत्मनि दृश्यत्वादि धर्मकं शरीर
मारोपितमित्यर्थः ३१ अतः स्थूलात् रूपात् परं अन्यत् द्वितीयं लिंगशरीरं आरोपितमित्यर्थः। नुषंगः। कथं भूतं तत्तत्र अ
जन्मगुह्यं भगवतो य एतत्प्रयतो नरः सायंप्रातर्गृणन् भक्त्या दुःखग्रामाद्विमुच्यते २९ एतद्रूपं भगवतो ह्यरूप
स्य चिदात्मनः मायागुणैर्विरचितं महदादिभिरात्मनि ३० यथा नभसि मेघौघो रेणुर्वा पार्थिवोऽनिले एवं द्रष्टरि द
श्यत्वमारोपितमबुद्धिभिः ३१ अतः परं यदव्यक्तमव्यूढगुणबृंहितं अदृष्टाश्रुतवस्तुत्वात् स जीवो यत्पुनर्भवः ३२
व्यक्तं तत्सूक्ष्मं तत्र हेतुः अव्यूढगुणबृंहितं। व्यूहः करचरणादिपरिणामः। तथा अपरिणता अव्यूढास्ते गुणैर्व्यूहितं आकार
विशेषरहितत्वाद् अव्यक्तमित्यर्थः। एतदेव कुतस्तत्राह। अदृष्टाश्रुतवस्तुत्वात्। यतः कारविशेषवद् वस्तुत इस्मदादिवत् दृश्यते।
श्रूयते वा इंद्रादिवत् इदं तु तथा न व्यक्तं। तर्हि तस्य सत्त्वे किं प्रमाणं तत्राह। स जीवः जीवोपाधिर्जीवो जीवेन निर्मुक्तः। जीवो जी
वेविहायेत्यादौ जीवोपाधौ लिंगदेहे। जीवशब्दप्रयोगात्। जीवोपाधितया कल्प्यत इत्यर्थः। ननु स्थूलमेव भोगायतनत्वात् जी
वस्योपाधिर्वस्तु किमन्यकल्पनेनेत्यत आह। यद्यस्मात् सूक्ष्मात् पुनर्भवः पुनर्जन्म उत्क्रांतिगत्यागतीनां तेन विना संभवादिति
वै १

यत्र यदा इमे स्थूलसूक्ष्मरूपे स्वसंविदा स्वस्वरूपसम्यग्ज्ञानेन प्रतिषिद्धे भवतः। ज्ञानेन प्रतिषेधार्थत्वेन तमेव हेतुमाह। अविद्य
यात्मनि कल्पिते इति हेतोः तद्ब्रह्म तदा जीवो ब्रह्मैव भवतीत्यर्थः। कथं भूतं दर्शनं ज्ञानं कस्वरूपं तथापि भगवन्मायायाः सं
सृतिकरणभूतायाः विद्यमानत्वात् कथं ब्रह्मतात्राह। ३३ असंदेहसंदेहवचनं। यदि वेदप्रमाणं स्युरिति तत्। वैशार
दी विशारदः। सर्वज्ञः ईश्वरः तदीया देवी संसारचक्रेण क्रीडती माया एषा यद्युपरता भवति। किमित्युपरता भवेत्तत्राह। मतिर्वि
द्याभयं भावः। यदा अविद्यात्मना आवरणविक्षेपौ करोति। तावन्नोपरमति। यदा तु सैव विद्यारूपेणपरिणता भवेत्। तदास
यत्रेमे सदसद्रूपे प्रतिषिद्धे स्वसंविदा अविद्ययात्मनि कृते इति तद्ब्रह्मदर्शनं ३३ यद्येषोपरता देवी माया वैशारदी
मतिः संपन्न एवेति विदुर्महिम्नि स्वे महीयते ३४ एवं जन्मानि कर्माणि अकर्तुरजनस्य च वर्णयंति स्म क
वयो वेदगुह्यानि हृत्पतेः ३५ स वा इदं विश्वममोघलीलः सृजत्यवत्यत्ति न सज्जतेऽस्मिन् भूतेषु चांतर्हित आत्मतं
त्रः षाड्वर्गिकं जिघ्रति षड्गुणेशः ३६
इस्तद्रूपं जीवोपाधिर्दग्धा निरिंधनाग्निवत्स्वयमेवोपरमेदिति। तदा संपन्नः ब्रह्मस्वरूपं प्राप्त एवेति विदुस्तत्त्वज्ञाः
किमतो यद्येवं स्वे महिम्नि परमानंदरूपे महीयते पूज्यते विराजत इत्यर्थः। यथा जीवस्य जन्मादि मायया एवमीश्वरस्यापि जन्मक
र्मादि मायेत्याह। ३४ अकर्तुः कर्माणि अजनस्य जन्मादि हृत्पतेरंतर्यामिणः। न हि जीवादीश्वरस्य कोपि विशेषः स्वातंत्र्यमे
व विशेष इत्याह ३५ षाड्वर्गिकं इंद्रियषड्वर्गविषयं जिघ्रति दूरादेव गंधवन्न गृह्णाति न तु सज्जत इत्यर्थः। कुतः ष
ड्गुणेशः षडिंद्रियनियंता। ननु किं ईश्वरस्य सृष्ट्यादिकर्मभिः विषयभोगैर्वा तत्राह ३६

भा०१
१२

धातुर्जगद्विधातुः ईश्वरस्य कृतीः लीलाः कुमनीषः कुबुद्धिः निपुणेन तर्कादिकौशलेन अवैति न जानाति। मनसा रूपाणि व
चसा नामानि संतन्वतः विस्तारयतः। वचोभिरिति बहुवचनं श्रुत्यभिप्रायेण। ननु कोपि यदि न जानाति तर्हि अनिर्मोक्षः प्रसंगः स्या
त् इत्याशंक्याह। ३७ अमायया अकुटिलभावेन। संतनया निरंतरया अनुवृत्त्या सेवया तत्पादसरोजगंधं यो भजेत् स एवैतं स्वरू
पं वेद जानाति। हरिकथायां प्रवृत्तान् ऋषीन् अभिनंदति ३८ यतो एवमुक्त भगवन्तं त्वं जानाति। अथ अतो भगवंतः सर्वज्ञाः धन्याः कृ
तार्थाः कुतः यद्यस्मात् इत्थं प्रश्ने वासुदेवे आत्मभावं ममत्वं कुर्वंति। सर्वात्मकं एकांतिकं यत्र यस्मिन् भावे सति भूयः परिवर्त्तो

न चास्य कश्चिन्निपुणेन धातुरवैति जंतुः कुमनीष ऊतीः नामानि रूपाणि मनोवचोभिः संतन्वतो नटचर्यामिवाज्ञः ३७ स वे
द धातुः पदवीं परस्य दुरंतवीर्यस्य रथांगपाणेः योमायया संततयानुवृत्त्या भजेत तत्पादसरोजगंधं ३८ अथेह धन्या
भगवंत इत्थं यद्वासुदेवेऽखिललोकनाथे कुर्वंति सर्वात्मकमात्मभावं न यत्र भूयः परिवर्त्त उग्रः ३९ इदं भागवतं ना
म पुराणं ब्रह्मसंमितं उत्तमश्लोकचरितं चकार भगवानृषिः ४० निःश्रेयसाय लोकस्य धन्यं स्वस्त्ययनं महत् तदि
दं ग्राहयामास सुतमात्मवतां वरं ४१ सर्ववेदेतिहासानां सारं सारं समुद्धृतं स तु संश्रावयामास महाराजं परीक्षितं
४२ प्रायोपविष्टं गंगायां परीतं परमर्षिभिः तत्र कीर्तयतो विप्रा विप्रर्षेर्भूरितेजसः ४३
जन्ममरणाद्यावर्त्तो न भवति। सूत किमेतच्छास्त्रं अपूर्वं कथयसि तत्राह। ३९ ब्रह्मसंमितं सर्ववेदतुल्यं उत्तमश्लोकस्य चरितं यस्मिन् १२
मुनिर्व्यासः तत्संप्रदायप्रवृत्तिमाह। ४० महत् इत्थं दशसाहस्रं सुतं श्रीशुकं। आत्मवतां धीराणां वरं मुख्यं ४२ प्रायेण मृत्युपर्यंतमन
शनेनोपविष्टं अतिपरमवैराग्ययुक्तैः हे विप्राः विप्रर्षेः सकाशात् अध्यगतं श्रुतवानस्मि ४३

४

तत्र कीर्त्तयतः तत्र निविष्ट इति वा अन्वयः हे द्विजाः तत्र परावृत्तिर्न शोकः। यथाधीतं न तु स्वमनीषिकयेति। तं तत्रापि यथामति स्वमत्यनु
सारेण संक्षेपतः श्रुतं विस्तरेण श्रावयिष्यामि ४५ इति प्रथमे तृतीयः ३ तुर्ये भागवतारंभकरणत्वेन वर्ण्यते व्यासस्या
परितोष स्तु तपः प्रवचनादिभिः। इति एवं प्रसत्त्यया श्रावयिष्यामीति ब्रुवाणं संस्तूय शौनकः अब्रवीत्। मुनीनां बहूनां मध्ये
एकेन वक्तव्यं योवृद्धस्तेन प्रष्टव्यं। वृद्धेष्वपि बहुषु यः कुलपतिः गणमुख्यः तेष्वपि बहुषु ये बह्वृचः सौवेदी तेन वक्तव्यं अतः
एवं भूतत्वात् शौनको ब्रवीत् १ यां कथामाह २ कस्मिन् स्थाने केन हेतुना महाभारतादि धर्मशास्त्राणि कृतवतः। पुनर् भग१४
अहं चाध्यगमं तत्र निविष्टस्तदनुग्रहात् सोहं वः श्रावयिष्यामि यथाधीतं यथामति ४४ कृष्णे स्वधामोपगते
धर्मज्ञानादिभिः सह कलौ नष्टदृशामेष पुराणार्कोधुनोदितः ४५ इति श्रा०प्र० तृतीयोध्यायः इति ब्रुवाणं सं
स्तूय मुनीनां दीर्घसत्रिणां वृद्धः कुलपतिः सूतं बह्वृचः शौनकोब्रवीत् १ शौनक उवाच सूत सूत महाभाग वद
नो वदतां वर कथां भागवतीं पुण्यां यामाह भगवान् शुकः २ कस्मिन् युगे प्रवृत्तेयं स्थाने वा केन हेतुना कुतः स
ंचोदितः कृष्णः कृतवान् संहितां मुनिः ३ तस्य पुत्रो महायोगी समदृङ्निर्विकल्पकः एकांतमतिरुन्निद्रो गूढो मूढ
नत्संहिताकरणे किं कारणमित्यर्थः। कुत इति सार्वविभक्तिकस्तसिः केन प्रवर्त्तित इत्यर्थः। कृष्णो व्यास इवेयते ४
सः। यदुक्तं स महाराजं परीक्षितं संश्रावयामासेति। ननु शुकस्य व्याख्यानादिकं कथं घटितमिति प्रष्टुं तस्यासंगोदासीन
तामाह द्वाभ्यां। ३ समदृक् समं ब्रह्म पश्यति अतो निर्विकल्पः स्वार्थैकः निरस्तभेदः एकांतमतिः एकस्मिन्नंतः समाधिर्य
स्यास्तथाभूता मतिर्यस्य यतः उन्निद्रः मायाशयनादुद्बुद्धः। या निशा सर्वभूतानां तस्यां जागर्त्ति संयमीति स्मृतेः। अतएव गूढः

भा० १
१३ आत्मजं शुकं प्रव्रजंतं अनुयांतं अनुगच्छंतं ऋषिं व्यासं अनग्नमपि दृष्ट्वा जले देव्यः क्रीडंत्यो अप्सरसः ह्रिया लज्जया वस्त्रपरिधानं चक्रु
तवत्यः अनग्नमपि इति अनेनार्थेन तत्सुतो नग्न इत्युक्तं भवति नग्नस्य पुरतो गच्छतः सुतस्य तु ह्रिया न परिदधुः तच्चित्रं वीक्ष्य अयं पुमान् इ-
यं स्त्री इति भेदमतिः नास्ति विविक्ता पूता दृष्टिर्यस्य ५ एवंभूतो सौ कथमालक्षितः ज्ञातः कुरवो जांगलाश्च देशविशेषाः तान्प्राप्तः
प्रथमं ततो गजाह्वये विचरन् गजेन सहितः आह्वयो नाम यस्य तस्मिन्हास्तिनापुरे । हस्ती नाम राज्ञा तेन निर्मितत्वात् ६ एवंभूतेन

दृष्ट्वानुयांतमृषिमात्मजमप्यनग्नं देव्यो ह्रिया परिदधुर्न सुतस्य चित्रं तद्वीक्ष्य पृच्छति मुनौ जगदुस्तवास्ति स्त्रीपुंभिदा न तु सु-
तस्य विविक्तदृष्टेः ५ कथमालक्षितः पौरैः संप्राप्तः कुरुजांगलान् उन्मत्तमूकजडवद्विचरन्गजसाह्वये ६ कथं वा पांड-
वेयस्य राजर्षेर्मुनिना सह संवादः समभूत्तात यत्रैषा सात्वती श्रुतिः ७ स गोदोहनमात्रं हि गृहेषु गृहमेधिनां अवेक्ष-
ते महाभाग तीर्थीकुर्वंस्तदाश्रमं ८ अभिमन्युसुतं सूत प्राहुर्भागवतोत्तमं तस्य जन्म महाश्चर्यं कर्माणि च गृणीहि नः
९ स सम्राट् कस्य वा हेतोः पांडूनां मानवर्धनः प्रायोपविष्टो गंगायामनादृत्याधिराट् श्रियं १०

मुनिना सह यत्र संवादे एषा सात्वती भागवती श्रुतिः संहिता । एतद्व्याख्यानं बहुकालावस्थापेक्षं तस्य त्वेकत्रावस्थानं दुर्लभमित्या-
ह ७ गोदोहनमात्रं कालं प्रतीक्षते । तदपि न भिक्षार्थं किंतु तेषामाश्रमान् गृहान् तीर्थीकुर्वन् पवित्रीकुर्वन् । तस्मादेवंभूतो वक्ता इत्या-
श्चर्यं श्रोतुस्तच्चरितमतीवाश्चर्यमितः कथयेत्याह ८ गृणीहि कथय ९ सम्राट् महाराजो वेति वितर्के कस्य वा हेतोः कस्मात्का- १३
रणात् । अधिराट् श्रियं संपदमनादृत्य गंगायां प्रायोपविष्टः १० श्रीमदनंतायशेषशायिने भगवते वासुदेवाय नमः ।

धरे २

यस्य पादनिकेतं चरणपीठं धनान्यानीय शत्रवो नमंति । अंग हे सूत युवा तरुण एव स्वेच्छया असुभिः प्राणैः सह तत्कुविरक्तस्य किं धना-
दिभिरिति चेत्तत्राह ११ उत्तमश्लोकपरायणाः विष्णुभक्ताः यज्जीवंति तत्स्वात्मार्थं किंतु परोपकारार्थमेव । लोकस्य शिवाय सुखा-
य भवाय समृद्ध्यै भूतये ऐश्वर्याय । जीवंति न स्वात्मार्थं । एवं सति असौ राजा निर्विद्य विरज्यापि परेषामाश्रयं कलेवरं कुतो हे-
योग्य४ तोर्मुमोच । नहि परोपजीवनं स्वयं त्यक्तुमित्यर्थः १२ यत्किंचन पृष्टोऽसि तत्सर्वं नोऽस्माकं समाचक्ष्व । यद्यस्मात्त्वं वाचां वि-
षये गिरां गोचरे अर्थे स्नातं पारंगतं त्वां मन्ये । छांदसाद्वैदिकव्यतिरेकेणात्र वर्णितत्वात् । एकस्मिन् युगे इत्यादि

नमंति यत्पादनिकेतमात्मनः शिवाय हानीय धनानि शत्रवः कथं स वीरः श्रियमंग दुस्त्यजां युवैषतोत्स्रष्टुम-
हो सहासुभिः ११ शिवाय लोकस्य भवाय भूतये य उत्तमश्लोकपरायणा जनाः जीवंति नात्मार्थमसौ पराश्रयं मु-
मोच निर्विद्य कुतः कलेवरं १२ तत्सर्वं नः समाचक्ष्व पृष्टो यदिह किंचन मन्ये त्वां विषये वाचां स्नातमन्यत्र छांद-
सात् १३ सूत० द्वापरे समनुप्राप्ते तृतीये युगपर्यये जातः पराशराद्योगी वासव्यां कलया हरेः १४ स कदाचि-
त्सरस्वत्या उपस्पृश्य जलं शुचिः विविक्त एक आसीन उदिते रविमंडले १५ परावरज्ञः स ऋषिः कालेनाव्य-
क्तरंहसा युगधर्मव्यतिकरं प्राप्तं भुवि युगे युगे १६

प्रश्नानां व्यासजन्मकथनपूर्वकमुत्तरमाह । १३ द्वापरे समनुप्राप्ते कदेत्यपेक्षायामाह । तृतीये युगस्य पर्यये परिवर्ते वास-
व्यां उपरिचरस्य वसोः वीर्याज्जातायां सत्यवत्यां योगी ज्ञानी व्यासो जातः १४ सरस्वत्या जलं उपस्पृश्य जले स्नानादिकं
कृत्वा इत्यर्थः । आसीनो बभूवेति शेषः । विविक्ते देशे इत्यादि चित्रे काव्यार्थमुक्तं । अनेनैव बदरिकाश्रमे स्थाने सूचि-
तं । १५ तत्र च स ऋषिः युगधर्मव्यतिकरं दृष्ट्वा इति किं वीक्ष्य सर्ववर्णाश्रमाणां यद्धितं तद्ध्यावितिं तृतीयेनान्वयः । परावरज्ञः
अतीतानागतवित् । अव्यक्तं वेगो रंहो यस्य तेन कालेन युगधर्माणां संकरं प्राप्तं वीक्ष्य तथा युगे युगे २१६

भौतिकादीनां शरीरादीनां तत्कृतं कालकृतं तैर्निःसत्वान् धैर्यशून्यान् दुर्मेधान् मंदमतीन् अमोघदृक् सर्वज्ञानसंपन्नः १९
ततश्च होत्रोपलक्षितांश्चतरो ऋत्विजः चतुर्होतारः तैरनुष्ठेयं कर्म शुद्ध्युपदिश्य तिरोबुद्धिकरं यज्ञसंतत्यैव ज्ञानामविच्छेदाय चातुर्होत्र
मेवाह २० उद्धृताः पृथक्कृताः २१ दारुणः अथर्ववेदोक्ताभिचारादिप्रवर्तकः २२ व्यस्यन् विभक्तं कुर्वन् वेदविभागप्रयोज

भौतिकानां च भावानां शक्तिह्रासं च तत्कृतं अश्रद्दधानान्निःसत्वान्दुर्मेधान्ह्रसितायुषः १८ दुर्भगांश्च
जनान्वीक्ष्य मुनिर्दिव्येन चक्षुषा सर्ववर्णाश्रमाणां यो दध्यौ हितममोघदृक् १९ चातुर्होत्रं कर्म शुद्धं प्रजा
नां वीक्ष्य वैदिकं व्यदधाद्यज्ञसंतत्यै वेदमेकं चतुर्विधं २० ऋग्यजुःसामाथर्वाख्या वेदाश्चत्वार उद्धृताः इति
हासपुराणानां पंचमो वेद उच्यते २१ तत्रर्ग्वेदधरः पैलः सामगो जैमिनिः कविः वैशंपायन एवैको निष्णा
तो यजुषामुत २२ अथर्वांगिरसामासीत्सुमंतुर्दारुणो मुनिः इतिहासपुराणानां पिता मे रोमहर्षणः २३
त एत ऋषयो वेदं स्वं स्वं व्यस्यन्ननेकधा शिष्यैः प्रशिष्यैस्तच्छिष्यैर्वेदास्ते शाखिनोऽभवन् २४ त एव वेदा दु
र्मेधैर्धार्यंते पुरुषैर्यथा एवं चकार भगवान्व्यासः कृपणवत्सलः २५ स्त्रीशूद्रद्विजबंधूनां त्रयी न श्रुतिगो
चरा कर्मश्रेयसि मूढानां श्रेय एवं भवेदिह २६ इति भारतमाख्यानं कृपया मुनिना कृतं एवं प्रवृत्तस्य सदा
भूतानां श्रेयसि द्विजाः सर्वात्मकेनापि यदा नातुष्यद्धृदयं ततः २७ नातिप्रसीदद्धृदयः सरस्वत्यास्तटे शुचौ
वितर्कयन्विविक्तस्थ इदं चोवाच धर्मवित् २८
नमाह २३ एवं ये पूर्वं अतिमेधाविभिर्धार्यंते त एव वेदाः किंच २४ कर्मरूपे श्रेयसि श्रेयःसाधने एवं भवेत् । अत एव तेषां कृपया भार १४
ताख्यानं मुनिना तेन कृतं २५ अनेन प्रकारेण भूतानां श्रेयसि हिते सर्वात्मकेनापि कर्मणा नातिप्रसीदन् हृदयं यस्य सः २८

चिंताप्रसन्नो हेतुं वितर्कयन् इदमुवाच । भाविताः पूजिताः अनुशासनमाज्ञा २९ आम्नायार्थो वेदार्थः ३० देहः देहव
ः आत्मा जीवः वस्तुतो विभुः परिपूर्ण एव । आत्मना स्वेन रूपेण असंपन्नः तादात्म्यं अप्राप्त आभाति । ब्रह्मवर्चसं श्रवणाश्र
नोत्कर्षजं तेजः तत्र साधवो ब्रह्मवर्चस्याः तेषु सत्तमः अतिश्रेष्ठोऽपि यद्यहं अनुकेवलं असंपन्न इव भाति । प्रस्तुत ब्रह्मवर्चस्वी ब्रह्म
वर्चस्वानपि असत्तम इव भाति । तादात्म्यं अप्राप्त इव भाति । असंपन्नत्वे हेतुं स्वयमेवाशंकते । ३१ प्रायेण भूयस्त्वेनाहि

धृतव्रतेन हि मया छंदांसि गुरवोऽग्नयः मानिता निर्व्यलीकेन गृहीतं चानुशासनं २९ भारतव्यपदेशेन ह्याम्नाया
र्थश्च दर्शितः दृश्यते यत्र धर्मादि स्त्रीशूद्रादिभिरप्युत ३० तथापि बत मे दैह्यो ह्यात्मा चैवात्मना विभुः असंपन्न
इवाभाति ब्रह्मवर्चस्यसत्तमः ३१ किं वा भागवता धर्मा न प्रायेण निरूपिताः प्रियाः परमहंसानां त एव ह्यच्युतप्रियाः
तस्यैवं खिलमात्मानं मन्यमानस्य खिद्यतः कृष्णस्य नारदोऽभ्यागादाश्रमं प्रागुदाहृतं ३२ तमभिज्ञाय सहसा प्रत्यु
त्थायागतं मुनिं पूजयामास विधिवन्नारदं सुरपूजितं ३३ इति श्रीभा० प्र० चतुर्थोध्यायः ४ सूत० अथ तं सु
खमासीनमुपासीनं बृहच्छ्रवाः देवर्षिः प्राह विप्रर्षिं वीणापाणिः स्मयन्निव १
यस्मात् एव धर्माः अच्युतस्य प्रियाः ३२ खिलं न्यूनं खिद्यतः खेदं प्राप्नुवतः कृष्णस्य व्यासस्य प्रागुदाहृतं सरस्वतीतीरस्थं
नारदोऽभ्यायतो ३३ नारदमागतमभिज्ञाय सहसा प्रत्युत्थाय विधिवत्पूजयामासेति ३४ इति श्रीमहाभागव
ते प्रथमस्कंधे चतुर्थोध्यायः ४ पंचमे सर्वधर्मेभ्यो हरिकीर्तनगौरवं । व्यासचित्तप्रसादाय नारदेनोपदिश्यते १
उपसमीपे आसीनं विप्रर्षिं श्रीनारदः बृहच्छ्रवाः महायशाः । स्मयन्निव ईषद्धसन्निवेत्यनेन मुखप्रसत्तिर्द्योत्यते । खेद
इवेत्यनधिकारार्थं । अहो महानपि मुह्यतीति स्मयमानः प्राह १

भा० १
१५ शारीरः शरीराभिमानी आत्मा आत्मना तेन शरीरेण कच्चित् किं परितुष्यति मानस आत्मा मनोभिमानी तेन मनसा सह परितु
ष्यति नो वा २ ते जिज्ञासितं ज्ञातुमिष्टं धर्मादि। यत्तत्सर्वं सुसंपन्नं सम्यक् ज्ञातं अपि शब्दात् अनुष्ठितमित्यर्थः। अपि निपाठे संबोधनं
सुसंपन्नत्वे हेतुः महदद्भुतमित्यादि सर्वैरर्थैर्धर्मादिभिः परिबृंहितं परिपूर्णं ३ यत्तत्सनातनं नित्यं परं ब्रह्म तच्च त्वया जिज्ञासितं वि
चारितं अधीतं अधिगतं प्राप्तं चेत्यर्थः। अथापि शोचसि तत् किमर्थमिति शेषः ४ आत्मा शारीरो मानसश्च तन्मूलं तस्य अपरितो
अ षस्य कारणं अव्यक्तं स्फुटं हे नारद त्वा त्वां पृच्छामः। आत्मभवो ब्रह्मा तस्य आत्मनो देहाद् उद्भूतं। अत एव अगाधो अतिगंभीरो बो
धो यस्य तं त्वां अगाधबोधतां प्रपंचयन्नाह द्वाभ्यां। ५ सर्वगुह्यज्ञाने हेतुः यद्यस्मात् पुराणपुरुषः उपासितस्त्वया कथं भूतः परा व
नारद उ० पाराशर्य महाभाग भवतः कच्चिदात्मना परितुष्यति शारीर आत्मा मानस एव वा २ जिज्ञासितं सुसंपन्नमप
पि ते महदद्भुतं कृतवान्भारतं यस्त्वं सर्वार्थपरिबृंहितं ३ जिज्ञासितमधीतं च ब्रह्म यत्तत्सनातनं तथापि शोचस्या
त्मानमकृतार्थ इव प्रभो ४ व्यास उ० अस्त्येव मे सर्वमिदं त्वयोक्तं तथापि नात्मा परितुष्यते मे तन्मूलमव्यक्तमगाधबोधं
पृच्छामहे त्वात्मभवात्मभूतं ५ स वै भवान्वेद समस्तगुह्यं उपासितो यत्पुरुषः पुराणः परावरेशो मनसैव विश्वं सृजत्यव
त्यत्ति गुणैरसंगः ६ त्वं पर्यटन्नर्क इव त्रिलोकीमंतश्चरो वायुरिवात्मसाक्षी परावरे ब्रह्मणि धर्मतो व्रतैः स्नातस्य मे
न्यूनमलं विचक्ष्व ७
रेशः कार्यकारणनियंता मनसैव संकल्पमात्रेण गुणैः कृत्वा विश्वं सृजतीत्यादि ६ त्वं त्रिलोकीं पर्यटन् अर्क इव स
र्वदर्शी योगबलेन च प्राणः वायुरिव सर्वप्राणिनामंतश्चरः सन् आत्मसाक्षी बुद्धिवृत्तिज्ञः अतः परे ब्रह्मणि धर्मयो
गेन निष्णातस्य तदुक्तं याज्ञवल्क्येन। इज्याचारदमाहिंसा ज्ञानस्वाध्यायकर्मणां। अयं तु परमो धर्मो यद्योगेना
त्मदर्शनं। अवरे ब्रह्मणि वेदाख्ये व्रतैः स्वाध्यायनियमैः निष्णातस्य मे अलं अत्यर्थं यत् न्यूनं तद्विचक्ष्व वितर्कय ७ १५

यथा
अनुदितप्रायं। अननुगतप्रायं। भगवद्यशो विना येनैव धर्मादिज्ञानेन असौ भगवान्न तुष्येत। तदेव दर्शनं। ज्ञानं खिलं न्यूनं मन्ये।
ननु भगवद्यश एव तत्र तत्रानुवर्णितं तत्राह। ८ अर्थाः अधर्मादिसाधनानि च तथा धर्मादिवत् प्राधान्येन वासुदेवस्य महिमा
नोक्त इत्यर्थः। वासुदेवव्यतिरिक्तान्यविषयज्ञानवद्वान्यविषयं वाक्यं चातुर्यं खिलमेवेत्याह। ९ चित्रपदमपि यद्वचो हरेर्य
शो न प्रगृणीत तद्वायसं तीर्थं काकतुल्यानां कामिनां रतिस्थानं। उशंति मन्यंते। कुतः मानसाः सत्वप्रधानमनसि वर्तमाना हंसाः
यतयः यत्र न निरमंति कर्हिचिदपि न रमंते। कथं भूतास्ते उशिक्क्षयाः उशिक् कमनीयं ब्रह्माख्यं क्षयो निवासो येषां ते। यथा प्र
सिद्धा हंसाः मानससरसि चरंतः कमनीयपद्मखंडनिवासाः भवंति। परं तु यत्र कावि चित्रास्तादियुक्ते प्युच्छिष्टगर्ते काकक्री
ते डास्थाने न रमंत इति शेषः। किंविशिष्टं यशः चित्रपदं चित्राणि मनोहराणि पदानि वाक्यानि यस्मिन् कमलनयनेत्यादि। किं
लक्षणं यशः जगत्पवित्रं जगत्पवित्रयतीति जगत्पवित्रं। अथवा जगत् जंगमगुणसंपन्नां गंगादेरपि पवित्रं जगत्पवित्रं
नारद उ० भवतानुदितप्रायं यशो भगवतोऽमलं येनैवासौ न तुष्येत मन्ये तद्दर्शनं खिलं ८ यथा धर्मादयश्चार्था
मुनिवर्यानुकीर्तिताः न तथा वासुदेवस्य महिमा ह्यनुवर्णितः ९ न यद्वचश्चित्रपदं हरेर्यशो जगत्पवित्रं प्रगृणी
त कर्हिचित् तद्वायसं तीर्थमुशंति मानसा न यत्र हंसा निरमंत्युशिक्क्षयाः १०
अथवा जगत्पाति निजगत्पो विष्णुः स विद्यते येषु जनेषु ते जगत्पविदः तान् त्रायत इति जगत्पवित्रं। अथवा जगत्स्रष्टा नारायणं विदंति
जानंतीति जगत्पवित्रावेदो व्यासशुकादयः तान् त्रायत इति जगत्पवित्रं। अथवा जगत्सिवतीति जगत्पः स एव विः पक्षी श्येनः तस्मात्
यमलक्षणात् वेः पक्षिणः सकाशात् त्रायत इति जगत्पवित्रं। अथवा जगतः संसाररूपात् पवेः वज्रात् त्रायत इति जगत्पवित्रं। अमु
मेवार्थं प्रतिवस्तूपपादनेन दृढयति। तद्वायसं तीर्थमुशंति। मानसा ब्रह्मणः पुत्राः तद्वायसं तीर्थमुशंति मन्यंते। यत्र हंसाः सारा
सारविवेकचतुराः उद्गतिवितर्के शिक्षा पाठ उपदेशरूपेण न निरमंति। कथं भूतास्ते उशिक्क्षयाः। उशिक् कमनीयं मनोहरं अंतःक
[illegible] १६

तद्वाग्विसर्गः स चासौ वाग्विसर्गश्च वाचःप्रयोगः कथंभूतः जनताघविप्लवः। जनानां समूहो जनता। तस्या अघं विप्लावयति नाशयतीति तस्मिन् वाग्विसर्गे अबद्धवत्यपि अपशब्दादियुक्तेपि प्रतिश्लोकं अनंतस्य यशोंकितानि नामानि भवंति। अत्रहेतुः यत्तानि नामानि चरित्राणि साधवो महांतो वक्तरि सति शृण्वंति श्रोतरि सति वदंति अन्यदा तु स्वयमेव गायंति। कीर्त्तयंति। भक्तिहीनं कर्म च न्यूनमेव दर्शयति ११ निष्कर्म ब्रह्म तदेकाकारत्वान्नैष्कर्म्यं। अज्यतेऽनेनेत्यंजनं उपाधिः तन्निवर्तकं निरंजनं एवंभूतमपि ज्ञानं। अच्युते भावो भक्तिः। तद्वर्जितं चेत्। अलमत्यर्थं न शोभते। सम्यगपरोक्षाय न कल्पत इत्यर्थः। शश्वत्साध
नदीति

तद्वाग्विसर्गो जनताघविप्लवो यस्मिन्प्रतिश्लोकमबद्धवत्यपि नामान्यनंतस्य यशोंकितानि यच्छृण्वंति गायंति गृणंति साधवः ११ नैष्कर्म्यमप्यच्युतभाववर्जितं न शोभते ज्ञानमलं निरंजनं कुतः पुनः शश्वदभद्रमीश्वरे न चार्पितं कर्म यदप्यकारणं १२ अतो महाभाग भवानमोघदृक् शुचिश्रवाः सत्यरतो धृतव्रतः उरुक्रमस्याखिलबंधमुक्तये समाधिनानुस्मर तद्विचेष्टितं १३

नकाले फलकाले च अभद्रं दुःखरूपं। यत्काम्यं कर्म तद्यदप्यकारणमकाम्यं तच्चेति चकारस्यान्वयः। तदपि कर्म ईश्वरेनार्पितं चेत् कुतः पुनः शोभते बहिर्मुखत्वेन सत्वशोधकत्वाभावात्। तदेवं भक्तिरहितानि नैष्कर्म्यज्ञानवाक्चातुर्यकर्मकौशलानि व्यर्थान्येव। यतः अतो हरेश्चरितमेव अनुवर्णयेत्याह १२ अतः कारणात् अमोघा यथार्था दृक् दर्शनं यस्य शुचिः शुद्धं श्रवो यस्य स सत्ये रतः। धृतानि व्रतानि येन स भवान् एवं महागुणः अतः उरुक्रमस्य विविधं चेष्टितं लीलाः चित्तैकाग्र्येण अखिलस्य बंधमुक्तये त्वमनुस्मर। स्मृत्वा वर्णयेत्यर्थः। एतच्च वाक्यांतरमिति मध्यमपुरुषप्रयोगो नानुपपन्नः। विपक्षे दोषांतरमाह १३ १६

ततः उरुक्रमचेष्टितात् पृथग्दृशः अतएव तान् यथा प्रकारांतरेण यत्किंचिदर्थांतरं विवक्षितः। तया विवक्षया कृतैः स्फुरितैः रूपैः नामभिश्च वक्तव्ये नोपस्थितैः दुःस्थिता अनवस्थिता सती मतिः कदाचित्क्वापि विषये आस्पदं स्थानं न लभेत। वातेन हता आघूर्णिता नौरिव। तदुक्तं गीतासु। व्यवसायात्मिका बुद्धिरेकेह कुरुनंदन। बहुशाखा ह्यनंताश्च बुद्धयोऽव्यवसायिनां। तदेवं हरियशो विना भारतादिकृतं धर्मादिवर्णनं अकिंचित्करमित्युक्तं। प्रत्युत विरुद्धमेव जातमित्याह। १४ जुगुप्सितं निंद्यं काम्यकर्मादि स्वभावत एव रक्तस्य तत्र रागिणः पुरुषस्य धर्मकृते धर्मार्थं अनुशासतस्तव महानयं व्यतिक्रमः। अन्येनत

ततोन्यथा किंचन यद्विवक्षितः पृथग्दृशस्तत्कृतरूपनामभिः न कुर्हिचित्क्वापि च दुःस्थिता मतिर्लभेत वाताहतनौरिवास्पदं १४ जुगुप्सितं धर्मकृतेनुशासतः स्वभावरक्तस्य महान्व्यतिक्रमः यद्वाक्यतो धर्म इतीतरः स्थितो न मन्यते तस्य निवारणं जनः १५

२त्वद्वेन स्वयं चायं क्रियमाणं। न कर्मणा न प्रजया धनेन त्यागेनैके अमृतत्वमानशुरित्यादिश्रुत्या क्रियमाणं निवारणं यथार्थमेतदिति मन्यते। किंतु प्रवृत्तिमार्गानधिकृतविषयं तदिति कल्पयति। तदुक्तं मतांतरोपन्यासे जैमिनिः। तत्रैवं शाक्यतेव कुंठधपंग्वादयो जनाः। गृहस्थत्वं न शक्ष्यंति कर्तुं तेषामयं विधिः। नैष्ठिकं ब्रह्मचर्यं वा परिव्राजकतापि वा। नैरवश्यं गृहीतायां तेनादावेतदुच्यते। इत्यादि ननु यद्येवं प्रवृत्तिमार्गो निंद्यते तर्हि निवृत्तिमार्गे सर्वक्रियात्यागेनैव परमेश्वरसुखस्वरूपानुभूतेः किं तद्यशः कथनेनापि तत्राह। १५

भा०१
१७

विचक्षणो निपुणः कश्चिदेव निवृत्तितः सर्वक्रियानिवृत्त्या अस्य विभोः सुखं निर्विकल्पकं सुखात्मकं स्वरूपं वेदितुं ज्ञातुं अर्हति । न पुनरविचक्षणः प्रवृत्तिस्वभावः । विभुत्वे हेतुः अनंतः कालतः पारं च देशतो नोऽयस्य तस्य विभोश्चरितं ततः कारणात् हे विभो अनात्मनो देहाद्यभिमानिनः अतएव गुणैः सत्त्वादिभिः प्रवर्त्तमानस्य जनस्य दर्शय भवानिति त्वमित्यर्थः । एवं तावत्काम्यकर्मादेरनर्थहेतुत्वात् । तं विहाय हरेर्लीलावर्णनीया इत्युक्तं । इदानीं तु नित्यनैमित्तिकस्वकर्म निष्कामनादृत्य केवलं हरिभक्तिरेवोपदेष्टव्या । इत्याशयेनाह । १६ ननु स्वधर्मत्यागेन भजन् भक्तिपरिपाकेन यदि कृतार्थो भवेत्तदा न काचिच्चिंता यदि पुनरप

विचक्षणोऽस्यार्हति वेदितुं विभोरनंतपारस्य निवृत्तितः सुखं प्रवर्त्तमानस्य गुणैरनात्मनस्ततो भवान्दर्शय चेष्टितं विभो । १६ त्यक्त्वा स्वधर्मं चरणांबुजं हरेर्भजन्नपक्वोऽथ पतेत्ततो यदि यत्र क्व वाभद्रमभूदमुष्य किं को वार्थ आप्तोऽभजतां स्वधर्मतः १७

त
क एव म्रियेत तो भ्रश्येत् । ततो स्वधर्मत्यागनिमित्तोऽनर्थः स्यादित्याशंक्याह । ततो भजनात्तेन कथंचित्प्रभ्रश्येत् म्रियेत वा यदि तदा भक्तिरसिकस्य कर्मण्यनधिकारान्नानर्थशंका । अंगीकृत्याप्याह । वा शब्दः कटाक्षे अपक्वस्य नीचयोनावपि अमुष्य भक्तिरसिकस्य अभद्रमभूत्किं नाभूदेवेत्यर्थः । भक्तिवासनासद्भावादिति भावः । अभजद्भिस्तु केवलं स्वधर्मतः को वा अर्थः आप्तः प्राप्तः अभज- १७
तामिति षष्ठी संबंधमात्रविवक्षया ननु स्वधर्ममात्रादपि । कर्मणा पितृलोक इति श्रुतेः । पितृलोकप्राप्तिरस्त्येव तत्राह १७

ग
कोविदो विवेकी तस्यैव हेतोः तदर्थं यत्नं कुर्यात् । उपरि ब्रह्मपर्यंतं अधः स्थावरपर्यंतं भ्रमतां जीवैः न लभ्यते । षष्ठी तु पूर्ववत् । तं
तत्तु विषयसुखं अन्यत एव प्राचीनकर्मणा सर्वत्र नरकादावपि लभ्यते । दुःखवत् । यथा दुःखं प्रयत्नं विना विलभ्यते । तद्वत् ।
यदुक्तं यत्र क्व वाभद्रमभूदिति । तदुपपादयति । नवाइति । १८ मुकुंदसेवी जनः जातु कदाचित्कथंचन कुयोनिगतोऽपि सं-
सृतिं नाव्रजेत् । अंग अहो अन्यवत् केवलकर्मनिष्ठवदिति वैधर्म्यदृष्टांतः कुत इत्यत आह । मुकुंदांघ्रेः उपगूहनं आलिंगनं
न पुनःस्मरन्विहातुं इच्छेत् यतोऽयं जनो रसग्रहः । रसेन रसनीयेन विष्णोः यशसा गृह्यते वशीक्रियते । यद्वा रसनीये ग्रहः आग्रहो

ग
तस्यैव हेतोः प्रयतेत कोविदो न लभ्यते यद्भ्रमतामुपर्यधः तल्लभ्यते दुःखवदन्यतः सुखं कालेन सर्वत्र गभीररंहसा १८
न वै जनो जातु कथंचनाव्रजेन्मुकुंदसेव्यन्यवदंग संसृतिं स्मरन्मुकुंदांघ्र्युपगूहनं पुनर्विहातुमिच्छेन्न रसग्रहो जनः
इदं हि विश्वं भगवानिवेतरो यतो जगत्स्थाननिरोधसंभवाः तद्धि स्वयं वेद भवांस्तथापि वै प्रादेशमात्रं भवतः प्रदर्शितं २०

यस्य । तदुक्तं भगवता । यतते च ततो भूयः संसिद्धौ कुरुनंदन । पूर्वाभ्यासेन तेनैव ह्रियते ह्यवशोऽपि सः । तदेवं भगवल्लीलां प्राधान्ये
नानुवर्णयेत्युक्तं । तत्र कोऽसौ भगवान् । का वा तस्य लीला इत्यपेक्षायामाह । १९ इदं विश्वं भगवानेव स तु अस्माद्विश्वस्मादितरः अ-
यं भावः । ईश्वरात्प्रपंचो न पृथक् ईश्वरस्तु प्रपंचात्पृथगित्यर्थः । तत्र हेतुः । यतो भगवतो हेतोः जगतः स्थित्यादयो भवंति । अनेनैव
लीलापि दर्शिता । यद्वा इदं भगवान् । इतर इव इतरोऽयः स जीवोऽपि भगवान् चेतनाचेतनप्रपंचस्तद्व्यतिरेकेण नास्ति स एवैकस्तत्त्व
मित्यर्थः । हि शब्देन सर्वं खल्विदं ब्रह्मेत्यादि प्रमाणं सूचितं । तद्धि स्वयमेव भगवान्वेद । प्रादेशमात्रमेकदेशमात्रं । आचार्यवा-
न्पुरुषो वेदेत्यादि श्रुत्यर्थं संपादनाय प्रदर्शितं । न च तथा चार्यापेक्षा । ईश्वरावतारत्वादिति आह २०

भा०१ १८ हे अमोघदृक् सत्ये आत्मनास्वयं आत्मानं अजमेव संतं जगतः शिवाय प्रजातमेव विदि। कुतः परस्य पुंसः कलांशभूते। तत्तस्या महा
नुभावस्य हरेः अभ्युदयः पराक्रमः अधिकं गण्यतां निरूप्यतां। अनेनैव तप आदिसर्वं व्रतं सफलं स्यादित्याह २१ पुंसः पु
रुषस्य इष्टस्य वा हितपः श्रवणादेः अविच्युतो नित्यो र्थः। फलं किंतत्। उत्तमश्लोकस्य गुणानुवर्णनमिति यत्तत्। सत्संगतो हरिक
थाश्रवणादिफलं स्वस्मिन् तेन प्रपंचयति २२ अहं पुरा पूर्वकल्पे अतीतभवे पूर्वजन्मनि वेदवादिनां दास्याः सकाशान्। अत एव जातो
स्मि निरूपितो नियुक्तः। योगीनां शुश्रूषणे प्रावृषि वर्षोपलक्षिते। चातुर्मास्ये निर्विविक्षतां एकत्रवासं कर्तुमिच्छतां २३

त्वमात्मनात्मानमवेह्यमोघदृक् परस्य पुंसः परमात्मनः कलां अजं प्रजातं जगतः शिवाय तन्महानुभावाभ्युदयो
धिगण्यतां २१ इदं हि पुंसस्तपसः श्रुतस्य वा स्विष्टस्य सूक्तस्य च बुद्धिदत्तयोः अविच्युतोर्थः कविभिर्निरूपितो य
दुत्तमश्लोकगुणानुवर्णनं २२ अहं पुरातीतभवेऽभवं मुने दास्यास्तु कस्याश्चन वेदवादिनां निरूपितो बालक एव
योगिनां शुश्रूषणे प्रावृषि निर्विविक्षतां २३ ते मय्यपेताखिलचापलेऽर्भके दान्तेऽधृतक्रीडनकेऽनुवर्तिनि चक्रुः
कृपां यद्यपि तुल्यदर्शनाः शुश्रूषमाणे मुनयोऽल्पभाषिणि २४ उच्छिष्टलेपाननुमोदितो द्विजैः सकृत्स्म भुंजे
तदपास्तकिल्बिषः एवं प्रवृत्तस्य विशुद्धचेतसस्तद्धर्म एवात्मरुचिः प्रजायते २५

अपेतान्यखिलानि चापल्यानि यस्मात्तस्मिन् दान्ते अधृतक्रीडनके स्यक्तक्रीडासाधने अनुवर्तिनि अनुकूले
२४ उच्छिष्टलेपान् भिक्षापात्रलग्नान् तैर्द्विजैरनुज्ञातः सन् सकृत् एकवारं भुंजे। तेन भोजनेन अपास्तकिल्बि १८
षो जातोस्मि तद्धर्मे तेषां धर्मे भगवद्भजने एवमात्मनो मनसो रुचिः जायते स्मेत्यनुषंगः २५

म०
अशृण्वं श्रुतवानस्मि श्रद्दधानो मम एव स्वतः सिद्धया। न त्वन्येन बलाज्जनितया अतो ममेत्यस्यापौनरुक्त्यं। प्रियश्रवसो यशो
यस्य २६ तस्मिन् भगवति लब्धरुचेः मम अस्खलिता अप्रतिहता मतिः अभवदित्यनुषंगः यया मत्या परं प्रपंचातीते ब्रह्म
ने रूपे मायिसदसत्स्थूलसूक्ष्मे च एतच्छरीरं स्वमायया अविद्यया कल्पितं। ननु वस्तुतो नास्तीति तत्क्षणमपश्यमि। एवं शुद्धस
पदार्थं शोधं हार्द कृत्वा विक्षेपनिवृत्तेः स्वकारणभूतरजस्तमो निवर्तकं हार्द भक्तिर्जातेत्याह २७ हरेर्यशः शृण्वतो मे
अनुसवं त्रिकालं २८ तस्य ज्ञानं शुद्धत्वं पदार्थस्य दृष्ट्वा किमतो मे प्राश्रितस्य विनीतस्य २९ गुह्यतमं इति साधनम्
तत्रान्वहं कृष्णकथाः प्रगायतां अनुग्रहेणाशृणवं मनोहराः ताः श्रद्धया मेऽनुपदं विशृण्वतः प्रियश्रवस्यंग ममाभव ३१
द्रुतिः २६ तस्मिंस्तदा लब्धरुचेर्महामुने प्रियश्रवस्यस्खलिता मतिर्मम ययाहमेतत्सदसत्स्वमायया पश्ये म
यि ब्रह्मणि कल्पितं परे २७ इत्थं शरत्प्रावृषिकावृतू हरेर्विशृण्वतो मेऽनुसवं यशोऽमलं संकीर्त्यमानं मुनिभिर्म
हात्मभिर्भक्तिः प्रवृत्तात्मरजस्तमोपहा २८ तस्यैवं मेऽनुरक्तस्य प्रश्रितस्य हतैनसः श्रद्दधानस्य बालस्य दान्तस्या
नुचरस्य च २९ ज्ञानं गुह्यतमं यत्तत्साक्षाद्भगवतोदितं अन्ववोचन् गमिष्यन्तः कृपया दीनवत्सलाः ३० येनैवा
हं भगवतो वासुदेवस्य वेधसः मायानुभावमविदं येन गच्छन्ति तत्पदं ३१ एतत्संसूचितं ब्रह्मंस्तापत्रयचिकित्सि
तं यदीश्वरे भगवति कर्म ब्रह्मणि भावितं ३२
तं धर्म तत्त्वज्ञानं गुह्यं तत्साध्यं विविक्तात्मज्ञानं गुह्यानुरं तत्प्राप्यं ईश्वरज्ञानं गुह्यतमं भगवतोदितं। भागवतशास्त्रं अन्ववोचन् उप
दिष्टवंतः तदेव ज्ञानं पूर्वोक्तं त्वंपदार्थज्ञानादिविवेकेन दर्शयति ३० अविदं ज्ञानवानहं। तत्साधनं धर्मरहस्यं सूचितमित्याह। ३१
तापत्रयस्याध्यात्मिकादेः चिकित्सितं भेषजं तन्निवर्तकं सत्त्वशोधकमिति यावत्। किं तत् भगवति भावितं समर्पितं यत्कर्म तत्।
कथंभूते भगवति ईश्वरे एवमपि ब्रह्मणि अप्रच्युतपूर्णरूपे। ननु संसारहेतोः कर्मणः कथं तापत्रयनिवर्तकत्वं सामग्रीभेदेन घ

आमयो रोगः येन घृतादिना जायते तेन तद्द्रव्यं केवलमामयकारणभूतं द्रव्यं तमामयं न पुनाति न निवर्तयतीत्यर्थः । किंतु चिकित्सि-
तं द्रव्यांतरेण भावितं तत्पुनात्येव यथा ३३ आत्मनि नाशाय कर्मनिबंधकर्माणि अंते समर्थाः भवंति । परे ईश्वरे कल्पिताः अर्पिताः
संतः अत्र प्रथमं महत्सेवा ततस्तद्धर्मे श्रद्धा ततो भगवत्कथाश्रवणं । ततो भगवति रतिः । तया स्वदेहद्वयविवेक आत्मज्ञा-
नं । ततो दृढा भक्तिः ततो भगवत्तत्त्वज्ञानं । ततस्तत्कृपया सर्वज्ञत्वादि भगवद्गुणाविर्भावः इति क्रमो दर्शितः । ननु च ज्ञाने-
नाज्ञानप्राप्तकर्मनाशः । तच्च ज्ञानं भक्तियोगाद्भवति । कथं कर्मणा कर्मनाशः स्यात्तत्राह । ३४ भगवदर्पणेन क्रियमाणं

आमयो येन भूतानां जायते यश्च सुव्रत तदेव ह्यामयं द्रव्यं न पुनाति चिकित्सितं ३३ एवं नृणां क्रियायोगाः सर्वे सं-
सृतिहेतवः त एवात्मविनाशाय कल्पंते कल्पिताः परे ३४ यदत्र क्रियते कर्म भगवत्परितोषणं ज्ञानं यत्तदधीनं हि
भक्तियोगसमन्वितं ३५ कुर्वाणा यत्र कर्माणि भगवच्छिक्षयासकृत् गृणंति गुणनामानि कृष्णस्यानुस्मरंति च
३६ नमो भगवते तुभ्यं वासुदेवाय धीमहि प्रद्युम्नायानिरुद्धाय नमः संकर्षणाय च ३७ इति मूर्त्यभिधा-
नेन मंत्रमूर्तिममूर्तिकं यजते यज्ञपुरुषं स सम्यग्दर्शनः पुमान् ३८ इमं स्वनिगमं ब्रह्मन्नवेत्य मदनु-
ष्ठितं अदान्मे ज्ञानमैश्वर्यं स्वस्मिन्भावं च केशवः ३९

कर्म भक्तियोगं जनयतीति सदाचारेणादर्शयति । ३५ यत्र यदा भगवच्छिक्षया कर्माणि कुर्वाणा भवंति तदा श्रीकृष्णस्य गुण-
नामानि गृणंति अनुस्मरंति च कृष्णं इयं भगवच्छिक्षा । यत्करोषि यदश्नासि यज्जुहोषि ददासि यत् । यत्तपस्यसि कौंतेय तत्
कुरुष्व मदर्पणं । कीर्तनस्मरणरूपभक्तिहेतुत्वमुक्तं । ज्ञानहेतुत्वमाह द्वाभ्यां । ३६ नमो धीमहि मनसा नमनं कुर्वी-
महे ३७ अमूर्तिकं मंत्रोक्तमूर्तिभिर्यं यजते पूजयति स पुमान् सम्यग्दर्शनो भवति । एवं च कृतवति मयि हरिः स्व- १९
दृशो ज्ञानादिकं दत्तवानित्याह । ३८ इमं स्वनिगमं स्वोपदेशं मयानुष्ठितं अवेत्य ज्ञात्वा भावं प्रीतिं च अतस्त्वमप्येवं कुर्विति सा-
ह ३९

अदभ्रं अनल्पं श्रुतं यस्य हे अदभ्रश्रुत विभोर्विश्रुतं यशः प्रख्याहि कथय । येन विश्रुतेन बुद्धेन विदां विदुषां बुभुत्सितं बोद्धुमि-
ष्टं समाप्यते । यतः दुःखैः पीडितानां क्लेशशांतिं प्रकारांतरेण मन्यंते ४० इति० प्र० पंचमः ५ व्यासस्य प्रत्ययार्थं च षष्ठे श- दे
गुर्जन्मसंभवं स्वं प्राग्जन्म नारदः प्राह कृष्णसंकथनोद्भवं । स्वयमपि तथा चिकीर्षुः गुरूपदेशानंतरमाचरितं व्यासः पृच्छति १
विप्रवसिते दूरदेशगमने कृते सति विज्ञानस्य आदेष्टृभिः २ परं वयः आयुः तत्त्वया कथं वर्तितं नीतं इदं दासीपुत्रक- ७
कलेवरं कथमुदस्राक्षीः उत्सृष्टवानसि ३ कथं न व्यवधात् न खंडितवान् । अद्भुतमा... सर्वार्थः । यतः एषः कालः स-

त्वमप्यदभ्रश्रुत विश्रुतं विभोः समाप्यते येन विदां बुभुत्सितं प्रख्याहि दुःखैर्मुहुरर्दितात्मनां संक्लेशनिर्वाण-
मुशंति नान्यथा ४० इति श्री भा० प्र० व्यासनारदसंवादे पंचमोध्यायः ५ सूत उ० एवं निशम्य भगवान्दे-
वर्षेर्जन्म कर्म च भूयः पप्रच्छ तं ब्रह्मन्व्यासः सत्यवतीसुतः १ व्यास उ० भिक्षुभिर्विप्रवसिते विज्ञानादेष्टृ-
भिस्तव वर्तमानो वयस्याद्ये ततः किमकरोद्भवान् २ स्वायंभुव कया वृत्त्या वर्तितं ते परं वयः कथं चेदमु-
दस्राक्षीः काले प्राप्ते कलेवरं ३ प्राक्कल्पविषयामेतां स्मृतिं ते सुरसत्तम न ह्येष व्यवधात्काल एष सर्वनिरा-
कृतिः ४ नारद उ० भिक्षुभिर्विप्रवसिते विज्ञानादेष्टृभिर्मम वर्तमानो वयस्याद्ये तत एतदकारिषं ५ एका-
त्मजा मे जननी योषिन्मूढा च किंकरी मय्यात्मजेनन्यगतौ चक्रे स्नेहानुबंधनं ६ सास्वतंत्रा न कल्पासीद्यो-
गक्षेमं ममेच्छती ईशस्य हि वशे लोको योषा दारुमयी यथा ७

सर्वनिराकृतिः अपलापाय समर्थः ४ विप्रवसिते दूरदेशगमने कृते सति एतदकारिषं । रेफषकारयोर्विश्लेषः छंदानुरो-
धेन तत्र तावत्कालं तत्रैव मातृस्नेहेन स्थितोन्यत्र साभिप्रायाहं त्रिभिः ५ एकात्मजा अहमात्मजो यस्याः सा । योषिदिति मूढेति च स्ने-
हानुबंधे हेतुः । किंकरी स्वस्यार्थं प्रपंचयति । ६ अस्वतंत्रा सा अतो न कल्पा न समर्था आसीत् । दारुमयी योषित् यंत्रप...

भा०१
२०
अहंच तस्मिन् ब्रह्मकुले ऊषिवान् वासं कृतवान् तस्याः मातुः स्नेहानुबंधापेक्षया कदाचिदिमेदिति प्रतीक्षमाण
इत्यर्थः पंचहायनः पंचवर्षः ८ गेहान्निर्गतां गां दुहंती दोग्धुं शलत्रप्रत्ययः गां दोग्धुं निर्गतामित्यर्थः । पदास्पृष्टः इव
न दष्टः कालेनोदितः प्रेरितः अदशत् । सोपि दैवेनोदितः । नंतु स्वतंत्रः ९ तन्मातुर्मरणं ईशस्य अनुग्रहं मन्यमानः उत्तरां दिशं प्रातिष्ठं प्रस्थितोस्मि
१० स्फीतान् जनपदान् अतियातः सन् महद्विपिनमद्राक्षमिति चतुर्थेनान्वयः । जनपदादिषु नानादोषगुणसमद्धैः
न गतोहमिति तात्पर्यार्थः । स्फीतान् समृद्धान् जनपदान् देशान् । तत्र तस्यां दिशि पुरग्रामव्रजाकरान् तत्र पुराणि राजधान्यः
अहं च तद्ब्रह्मकुले ऊषिवांस्तदपेक्षया । दिग्देशकालाव्युत्पन्नो बालकः पंचहायनः ८ एकदा निर्गतां गेहाद्दुहंतीं
निशि गां पथि । सर्पोदशत्पदा स्पृष्टः कृपणां कालनोदितः ९ तदा तदहमीशस्य भक्तानां शमभीप्सितः अनुग्र
हं मन्यमानः प्रातिष्ठं दिशमुत्तरां १० स्फीतान् जनपदांस्तत्र पुरग्रामव्रजाकरान् खेटान् खर्वटवाटीश्च
वनान्युपवनानि च ११ चित्रधातुविचित्राद्रीन् इभभग्नभुजद्रुमान् जलाशयान् शिवजलान् नलिनीः सुर
सेविताः १२ चित्रस्वनैः पत्ररथैर्विभ्रमद्भ्रमरश्रियः नलवेणुशरस्तंबकुशकीचकगह्वरं १३
ग्रामाः स्वल्पप्राकाराः विप्राश्च विप्रभृत्याश्च यत्र चैव वसंति वै । स तु ग्राम इति प्रोक्तः शूद्राणां वास एव चेति । व्रजाः गोकुला
नि । आकाराः रत्नाद्युत्पत्तिस्थानानि । खेटाः कर्षकग्रामाः । खर्वटाः गिरितटग्रामाः यद्वा । एकतो यत्र तु ग्रामो नगरं चैकतः स्थि
तं । मिश्रं तु खर्वटं नाम नदीगिरिसमाश्रयमिति । वाटीः पुष्पवाटीं नववनानि । स्वतः सिद्धवृक्षाणां समूहाः उपवनानि आरोपि
तवृक्षाणि । ११ चित्रैर्धातुभिः स्वर्णरजतादिभिर्विचित्रान् अद्रीन् इभैर्भग्नाः भुजाः शाखा येषां तान् द्रुमान् येषु तान् । शिवानि भद्रा
णि जलानि येषां तान् । नलिनीः सरसीः सुरसेविताः देवैरवगाहिताः १२ चित्राः स्वनाः येषां तैः पक्षिभिः तत्रादप्रबुद्धैरित्यर्थः । २०

एक एवाहं नानाकम्पगतः सन् महद्विपिनं । वनं अपश्यं कीदृशं नलवेणुशरस्तंबैः कुशैः कीचकैश्च गह्वरं दुर्गमं । तत्र वेण
जातय एव विपुलांतरालगर्भाः कीचकाः घोरं दुःसहं । प्रतिभयाकारं भयंकररूपं व्यालादीनामजिरं क्रीडास्थानं १४ परि
श्रांतानि इंद्रियाणि आत्मा देहश्च यस्य । तृषापरीतो व्याप्तः उपस्पृष्टः आचांतः १५ पिप्पलोपस्थे अश्वत्थमूले आ
श्रितः उपविष्टः । आत्मस्थं हृदिस्थं । आत्मना परमात्मानं १६ भावेन भक्त्या निर्जितं वशीकृतं यच्चेतः तेन औत्कंठ्येन अश्रु
कलाः पुलके अक्षीणि यस्य तस्य मे हृदि शनैर्हरिराविर्बभूव १७ प्रेम्णातिभरेण निर्भिन्नानि विपुलकानि अंगानि यस्य आनं
एक एवातियातोहमपश्यं विपिनं महत् घोरं प्रतिभयाकारं व्यालोलूकशिवाजिरं १४ परिश्रांतेंद्रियात्मा
हं तृट्परीतो बुभुक्षितः स्नात्वा पीत्वा ह्रदे नद्या उपस्पृष्टो गतश्रमः १५ तस्मिन्निर्मनुजेरण्ये पिप्पलोपस्थ आ
श्रितः आत्मनात्मानमात्मस्थं यथाश्रुतमचिंतयं १६ ध्यायतश्चरणांभोजं भावनिर्जितचेतसा औत्कंठ्या
श्रुकलाक्षस्य हृद्यासीन्मे शनैर्हरिः १७ प्रेमातिभरनिर्भिन्नपुलकांगोतिनिर्वृतः आनंदसंप्लवे लीनो ना
पश्यमुभयं मुने १८ रूपं भगवतो यत्तन्मनःकांतं शुचापहं अपश्यन् सहसोत्तस्थौ वैक्लव्याद्दुर्मना इव १९
दिदृक्षुस्तदहं भूयः प्रणिधाय मनो हृदि वीक्ष्यमाणोपि नापश्यमवितृप्त इवातुरः २० एवं यतंतं विजने मा
मा हागोचरो गिरां गंभीरश्लक्ष्णया वाचा शुचः प्रशमयन्निव २१ हंतास्मिन् जन्मनि भवान्मा मां द्रष्टुमिहार्हति अ
विपक्वकषायाणां दुर्दर्शोहं कुयोगिनां २२
तान्तः संप्लवे । महापूरे परमानंदे उभयं आत्मानं परं च १८ म
तस्य शोकः तमपहंतीति तथा उत्तस्थौ उत्थितोस्मि १९ हृदि मनः प्रणिधाय स्थिरीकृत्य अवितृप्तोहम
नसः कांतं अभीष्टं शुचः शोकः तमपहंतीति तथा उत्तस्थौ उत्थितोस्मि १९ हृदि मनः प्रणिधाय स्थिरीकृत्य अवितृप्तोहम
तुर इव अभवमिति शेषः । २० गिरामगोचरः सन् तस्याविषयभूत ईश्वरः प्राह २१ हंतेति सानुकंपसंबोधनं । अ
स्मिन्नेव जन्मनि भवान् मां द्रष्टुं नार्हति । यतः अविपक्वः अदग्धः कषायः मलाः कामादयो येषां कुयोगिनां अनिष्पन्नयो २२

सकृद्दर्शितमित्येतत्तु एतत्कामाय मय्यनुरागाय यत्कामेन किं मन्यत आह। मत्कामः पुमान् हृच्छयान् कामान् २३ अदीर्घया
षिसतां सेवया। अवद्यं निंद्यं लोकं। देहं मज्जनं नाम मत्पार्षदतां गंतासि २४ प्रजानां सर्गस्थितौ निरोधे संहारेपि प्रजासर्गस्य निरो
धइति वा न विपद्येत न याती त्यर्थः २५ मत्प्रसिद्धं महद्भूतं अस्य महतो भूतस्य निश्वसितमेतद्यदृग्वेदइति श्रुतेः। कीदृशं ईश्व
रं सर्वनियंतारं। न भासि लिंगं मूर्तिर्यस्य तत्। न भाति लिंगं संनिहितमपि न लिंग्यत इत्यलिंगं। अस्मै दृष्टाय अवनामं प्रणामं

सकृद्यद्दर्शितं रूपं एतत्कामाय तेनघ मत्कामः शनकैः साधुः सर्वान्मुंचति हृच्छयान् २३ सत्सेवयादीर्घया
ते जाता मयि दृढा मतिः हित्वावद्यमिमं लोकं गंता मज्जनतामसि २४ मतिर्मयि निबद्धेयं न विपद्येत कर्हिचित्
प्रजासर्गनिरोधेपि स्मृतिश्च मदनुग्रहात् २५ एतावदुक्त्वोपरराम तन्महद्भूतं नभो लिंगमलिंगमीश्वरं अ
हं चतस्मै महतां महीयसे शीर्ष्णावनामं विदधेनुकंपितः २६ नामान्यनंतस्य गतत्रपः पठन् गुह्यानि भद्राणि कृ
तानि च स्मरन् गांपर्यटंस्तुष्टमना गतस्पृहः कालं प्रतीक्षन् विमदो विमत्सरः २७ एवं कृष्णमतेर्ब्रह्मन्नसक्त
स्यामलात्मनः कालः प्रादुरभूत्काले तडित्सौदामिनी यथा २८

विदधे कृतवान्। अहं तेनानुकंपितः सन् २६ गतत्रपः सकलज्ञः सन् विमत्सरो जातोस्मीति संबंधः २७ काले स्वाव
सरे कालो मृत्युः प्रादुरभूत् आविर्बभूव। अकस्मात्तो दुर्निवेद्दृष्टांतः। विद्युदिवेति सौदामिनीति विशेषणं। स्फुट
त्वदर्शनार्थं सुदाममाला तदाकारे त्यर्थः। यद्वा सुदामा नाम पर्वतः। तेनैकदिगिति सूत्रेण स्फटिकादिमय पर्वतप्रांते
प्रवाहि विद्युदिति स्फुटा भवति तद्वदित्यर्थः। यद्वा। तडिदिति अंतिके इत्यर्थः। तडिदंतिकबंधयोरिति नैरुक्तस्मरणात् २८ २१

अयमर्थः हित्वावद्यमिमं लोकं गंता मज्जनतामसि। इति या भागवती भगवत्पार्षदरूपा शुद्धा सत्वमयी तनुः प्रतिश्रुता तां शनि
भगवनाम यियुंजमाने नीयमाने आरब्धं यत्कर्म तन्निर्वाणो समाप्तं यस्य मे आरब्धकर्मणो निर्वाणमेव निर्वाणं यस्येति स
पंचभूतात्मको देहो न्यपतत्। अनेन पार्षदतन्नाम कर्मारब्धत्वं इत्यादि सूचितं भवति २९ इदं त्रैलोक्यं आदाय उपसंह
त्य उदन्वतः एकार्णवस्यांभसि शयाने भगवति नारायणे शिशयिषोः शयनं कर्तुमिच्छोः विभोः ब्रह्मणः श्रीनारायणस्य अंतः मे
ध्ये अनुप्राणं निश्वासेन सह विविशे प्रविष्टोहं। ३० ततो वतीर्य विश्वात्मदेहमाविश्य चक्रिणः अवाप वैष्णवीं निद्रामे
कीभूयाथ विबुध्येति कूर्मोक्तेः। स्वायनं भसीति पाठे स्वायने स्वस्यायने भसि शिशयिषोः ब्रह्मणः इति श्रीनारायणोना
एवं मयि तु युंजाने शुद्धां भागवतीं तनुं आरब्धकर्मनिर्वाणो न्यपतत्पांचभौतिकः २९ कल्पांत इदमादाय शयानें
भस्युदन्वतः शिशयिषोरनुप्राणं विविशेंतरहं विभोः ३० सहस्रयुगपर्यंते उत्थायेदं सिसृक्षतः मरीचिमिश्रा ऋ
षयः प्राणेभ्योहं च जज्ञिरे ३१ अंतर्बहिश्च लोकांस्त्रीन्पर्येम्यस्कंदितव्रतः अनुग्रहान्महाविष्णोरविघात
गतिः क्वचित् ३२ देवदत्तामिमां वीणां स्वरब्रह्मविभूषितां मूर्छयित्वा हरिकथां गायमानश्चराम्यहं ३३

भेद्यत्रि वक्ष्यमिति गमितव्यं ३० प्राणेभ्यः इंद्रियेभ्यः अहं मरीचिमिश्राः तन्मुखाः उत्संगान्नारदो जज्ञे दक्षोंगुष्ठात्स्व
यंभुवइति वक्ष्यमाणत्वात् ३१ ये कर्मिणस्ते बहिर्नयांति तपआदिभिर्ब्रह्मलोकं गतस्ते अंतर्न यांति। अहं श्रीमहावि
ष्णोरनुग्रहात् अखंडितब्रह्मचर्यव्रतः सन् अंतर्बहिश्च पर्येमि। क्वचिदपि अविघाता अप्रतिहता गतिर्यस्य सः। न
नु किमिति पर्यटसि ईश्वराज्ञया लोकमंगलार्थमित्याह चतुर्भिः ३२ स्वराः। निषादर्षभगांधारषड्जमध्यमधैवताः
पंचमइति सप्त। एतएव ब्रह्म अभिव्यंजकत्वात् तेन विभूषितं स्वतः सिद्धसप्तस्वरामित्यर्थः। मूर्छयित्वा मूर्छनामापवनी २२

श्रीभागवतटीकाप्रथमः

भा०१ आहूतइवआकारितइव।तीर्थंगंगादियत्पादयोर्यस्यसतीर्थपादः।प्रियंश्रवःश्रवणंयस्यसप्रियश्रवाः। ३४ मात्राःविषयाः
२२ तेषांस्पर्शाभोगास्तेषामिच्छयाआतुराणिचित्तानियेषां।हरिचर्यानुवर्णनंयत्एतदेवभवसिंधौप्लवःपोतः।नकेवलंश्रुतिप्रा
माण्येनकिंत्वन्वयव्यतिरेकाभ्यां।दृष्टएवेत्यर्थः।एतदेवेत्युक्तमवधारणमनुभवेनद्रढयति यमादिभिस्तथानशाम्य
ति।यथामुकुंदसेवयाअद्धासाक्षात्आत्मामनःशाम्यति।किंपुनस्तद्गुणवर्णनेतिभावः ३६ भवतोमनःपरितोषकंआ ३६

प्रगायतःस्ववीर्याणितीर्थपादःप्रियश्रवाः आहूतइवमेशीघ्रंदर्शनेयातिचेतसि ३४ एतद्ध्यातुरचित्तानां
मात्रास्पर्शेच्छयामुहुः मुकुंदसेवयायद्वत्तथात्माद्धानशाम्यति ३५ सर्वंतदिदमाख्यातंयत्पृष्टोहंत्वयानघ
जन्मकर्मरहस्यंमेभवतश्चात्मतोषणं ३६ सूतउ० एवंसंभाष्यभगवान्नारदोवासवीसुतं आमंत्र्यवीणां
रणयन्ययौयादृच्छिकोमुनिः ३७ अहोदेवर्षिर्धन्योयंयत्कीर्तिंशार्ङ्गधन्वनः गायन्माद्यन्निदंतंत्र्यारम
यत्यातुरंजगत् ३८ इतिश्रीमहाभागवतेप्रथमस्कंधेव्यासनारदसंवादेषष्ठोध्यायः ६

मंत्र्यअनुज्ञाप्ययादृच्छिकःस्वप्रयोजनसंकल्पशून्यःहरिकथागायकंधन्यंश्लाघते ३७ माद्यन्हृष्यन्तंआवी
णयागिरावाण्याच ३८ इतिश्रीभागवतेप्रथमस्कंधेश्रीधरस्वामिकृतटीकायांषष्ठोध्यायः ६ अथभागव २२
तश्रोतुर्जन्मवक्तुंपरीक्षितः।सुप्तबालवधाद्द्रौणेर्दंडःसप्तमउच्यते १ श्रीवासुदेवःशरणं

तस्यनारदस्याभिप्रेतंश्रुत्वाबादरायणःकिंअकरोत् १ ब्रह्मनद्यांसरस्वत्यां ब्रह्मदेवतायांब्राह्मणैरन्वितायांवा।सत्रंकर्मवर्द्धय
तीतितथा।बदरीणांखंडेनसमूहेनमंडिते।मनःप्रणिदधौस्थिरीचकार।समाधिनानुस्मरतांहृद्येवेति।भिन्ने।नारदोपदिष्टं
ध्यानंकृतवानित्यर्थः।२ पूर्णंपुरुषंईश्वरमपश्यत्।पूर्वंतदुपाश्रयांईश्वरापांतदधीनांमायांचापश्यत्।ईशमायया
तानांजीवानांसंसृतिंअपश्यदित्याह। ४ ययासंमोहितःस्वरूपावरणेनविक्षिप्तःपरोपित्रिगुणत्वयाव्यतिरिक्तोपि।तत्कृतं
त्रिगुणत्वाभिमानकृतंअनर्थंचकर्तृत्वभोक्तृत्वादिकंप्राप्नोति ५ अनर्थंउपशमयति।योधोक्षजेभक्तियोगःतंचाप
शौनकः निर्गतेनारदेसूतभगवान्बादरायणः श्रुतवांस्तदभिप्रायंततःकिमकरोद्विभुः १ सूतउ० ब्रह्मनद्यां
सरस्वत्याआश्रमःपश्चिमेतटे शम्याप्रासइतिप्रोक्तऋषीणांसत्रवर्धनः २ तस्मिन्स्वआश्रमेव्यासोबदरीषं
डमंडिते आसीनोपउपस्पृश्यमनःप्रणिदधौस्वयं ३ भक्तियोगेनमनसिसम्यक्प्रणिहितेमले अपश्यत्पुरु
षंपूर्णंमायांचतदुपाश्रयां ४ ययासंमोहितोजीवआत्मानंत्रिगुणात्मकं परोपिमनुतेनर्थंतत्कृतंचाभिपद्यते ५
अनर्थोपशमंसाक्षाद्भक्तियोगमधोक्षजे लोकस्याजानतोव्यासश्चक्रेसात्वतसंहितां ६
श्यत्।एतत्सर्वंस्वयंदृष्ट्वा।एवंअजानतोलोकस्यार्थेसात्वतसंहितां।श्रीभागवताख्यांचक्रे।तदनेनभक्तियोगेनमन
सीत्यादिनाश्लोकत्रयेण भागवतार्थःसंक्षेपतोदर्शितः।एतदुक्तंभवति।विद्याशक्त्यामायानियंता।नित्यानंदपरमा
नंदस्वरूपःसर्वज्ञःसर्वशक्तिरीश्वरः।तन्मायया संमोहितःतिरोभूतस्वरूपःतद्विपरीतधर्माजीवः।तस्यचेश्वरभक्त्यालब्ध
ज्ञानेनमोक्षइति।तदुक्तंस्वामिनांह्लादिन्यासंविदाश्लिष्टःसच्चिदानंदईश्वरः स्वाविद्यासंवृतोजीवःसंक्लेशनिकरा
करः।सईशोयद्वशेमायासजीवोयस्तयार्दितः।स्वाविर्भूतपरानंदःस्वाविर्भूतसुदुःखभूः।तादृगुत्थविपर्यासभवभेदजभीर
वं।यन्माययाजुषन्नास्तेतमिमंनृहरिंपुनः।इत्यादिसंहितायाःअनर्थोपशमकत्वंदर्शयति ६

यस्यांश्रूयमाणायामेव किंपुनःश्रुतायामित्यर्थः ७ अनुक्रम्यपरोधपित्वा ८ कस्यवाहेतोःबृहतींविततां ९ निर्ग्रंथाः
ग्रंथेभ्योनिर्गताः।तदुक्तंगीतासु।यदातेमोहकलिलंबुद्धिर्व्यतितरिष्यति।तदागंतासिनिर्वेदंश्रोतव्यस्यश्रुतस्यच।यद्वाग्रंथि
र्हृतोहंकाररूपोग्रंथिर्येषांतेननुमुक्तानांकिंभक्त्येत्यादिसर्वाक्षेपपरिहारार्थमाह।इत्थंभूतगुणोहरिः।ननुभक्तिंकुर्व
तुनामआत्मारामस्यशुकस्यएतच्छास्त्राभ्यासेकिंकारणमित्याह।१० अध्यगात्।अधीतवान्।विष्णुजनाःप्रियाःयस्येतिवा

यस्यांवैश्रूयमाणायांकृष्णेपरमपूरुषे भक्तिरुत्पद्यतेपुंसांशोकमोहभयापहा ७ ससंहितांभागवतींकृ
त्वानुक्रम्यचात्मजं शुकमध्यापयामासनिवृत्तिनिरतंमुनिः ८ शौनकः सवैनिवृत्तिनिरतःसर्वत्रोपेक्षकोमुनिः
कस्यवाबृहतीमेतामात्मारामःसमभ्यसत् ९ सूतः आत्मारामाश्चमुनयोनिर्ग्रंथाअप्युरुक्रमे कुर्वंत्यहैतुकीं
भक्तिमित्थंभूतगुणोहरिः १० हरेर्गुणाक्षिप्तमतिर्भगवान्बादरायणिः अध्यगान्महदाख्यानंनित्यंविष्णुज
नप्रियः ११ परीक्षितोथराजर्षेर्जन्मकर्मविलापनं संस्थांचपांडुपुत्राणांवक्ष्येकृष्णकथोदयं १२ वासुदेवायनमः

ख्यानादिप्रसंगेनतत्संगतिकामः इतिभावः एतेनतस्यपुत्रोमहायोगीत्यादिनाशुकस्यव्याख्यानेप्रवृत्तिःकथमितियत्
ष्टंतस्योत्तरंवक्तुंयदन्यत्परीक्षितःप्रायोपवेशेनश्रवणंकथमितितस्यजन्ममहाश्चर्यमित्यादिनातस्योत्तरंवक्तुमाह ११
विलापनंमुक्तिंवासंस्थां।महाप्रस्थानं।श्रीकृष्णकथानामुदयोयथाभवतितथापरीक्षितोजन्मनिरूपयिष्यन्।आदौ २३
तावद्द्रौणेःपुंसःएवाश्वत्थाम्नोब्रह्मास्त्रात्श्रीकृष्णेनरक्षितइतिवक्तुंकथांप्रस्तौति १२ श्रीरामःशरणं

यदाद्रौणिरश्वत्थामा।कृष्णासुतानांद्रौपदीपुत्राणांशिरांस्यहरत्।तदातन्माताअरुदत्।तांसांत्वयन्किरीटमालीअर्जुनः
प्राहेतितृतीयेनान्वयः।किमितिबालानांशिरांसिआनीतवानित्यपेक्षायामाह।मृधेयुद्धेबद्धापिपांडवाअपिकौरवाएवतथा
पिसृंजयाधृष्टद्युम्नःपांडवानांसेनापतिरितिसृंजयानामित्युक्तं।वीरगतिंस्वर्गंगतेषु।अथानंतरंवृकोदरेणविद्धायाःक्षि
प्तायाःअभिमर्शेनभग्नावूरुदंडौयस्यतथाभूतेधृतराष्ट्रपुत्रे।दुर्योधनेसति भर्तुःप्रियंद्रौणिरिति।भर्तुर्दुर्योधनस्यस्मे
तिवितर्के।एवंकृतेभर्तुःप्रियंस्यादितिपश्यन्जानन्द्रौपदीपुत्राणांतेनौसुप्तानांशिरांसिहृतवान्।तस्यदुर्योधनस्यत

यदामृधेकौरवसृंजयानांवीरेष्वथोवीरगतिंगतेषु वृकोदराविद्धगदाभिमर्शभग्नोरुदंडेधृतराष्ट्रपुत्रे १३
भर्तुःप्रियंद्रौणिरितिस्मपश्यन्कृष्णासुतानांस्वपतांशिरांसि उपाहरद्विप्रियमेवतस्यजुगुप्सितंकर्मवि
गर्हयंति १४ मातासुतानांनिधनंशिशूनांनिशम्यघोरंपरितप्यमाना तदारुदद्बाष्पकलाकुलाक्षीतांसांत्व
यन्नाहकिरीटमाली १५ तदाशुचस्तेप्रमृजामिभद्रेयद्ब्रह्मबंधोःशिरआततायिनः गांडीवमुक्तैर्विशिखैरु
पाहरेत्वा[illegible]म्ययत्स्नास्यसिदग्धपुत्रा १६

द्विप्रियमेवाभवत्।विप्रियत्वेहेतुःजुगुप्सितमिति।
१४ घोरंदुःसहंयथाभवति।बाष्पकलाभिर्बिंदुभिःआकुलेअक्षिणीयस्याःसा।किरीटस्यैकदेशेऽर्पितदामाणांबाहुल्या
त्किरीटमाली १५ शुचःशोकम्प्रमार्जयामि।यर्हियदाब्रह्मबंधोर्ब्राह्मणाधमस्य।आततायिनइति।अग्निदो
गरदश्चैवशस्त्रपाणिर्धनापहः।क्षेत्रदारहरश्चैवषडेतेआततायिनइतिस्मरणात्।अत्रआततायीशस्त्रपाणिः।तेनच
नपुत्रहंतृत्वंलक्ष्यते।गांडीवाद्धनुषोमुक्तैर्विशिखैर्बाणैर्हत्वात्वत्समीपमानयामि।यत्शिरःआक्रम्यआसनंविधा
यदग्धपुत्रासतीस्नास्यसि १६

भा०१
२४
दंशितःबद्धकवचः।उग्रंधनुःचापंयस्यकपिःहनुमान्ध्वजेयस्यवल्गूनिरम्याणिविचित्राणिजल्पानिभाषणानितैःअर्जुनः
अच्युतएवमित्रंसूतश्चयस्यसगुरोःपुत्रंरथेनअन्वाद्रवत् अन्वधावत् १७ आयान्तंआधावंतंसद्रौणिःकुमा
रहा।बालघाती।उद्विग्नमनाःकंपितहृदयःप्राणपरीप्सुःप्राणान्रक्षितुमिच्छुःनतुकीर्तियावत्गमंयावद्गंतुंशक्यंता
वत्तावेगेनउर्व्यांपराद्रवत्।अपलायत।अजोब्रह्मामृगोभूत्वासुतांवाचमभिगन्तुमुद्यतःसन्रुद्रस्यभयाद्यथापलायत
लायतेस्म।अर्कइवेतिपाठे।वामनपुराणेकथासूचिता।विद्युन्मालिनीनामकश्चिद्राक्षसोमाहेश्वरः।तस्मैरुद्रे

इतिप्रियांवल्गुविचित्रजल्पैःसमांत्वयित्वाच्युतमित्रसूतः अन्वाद्रवद्दंशितउग्रधन्वाकपिध्वजोगुरु
पुत्रंरथेन १७ तमापतंतंसविलक्ष्यदूरात्कुमारहोद्विग्नमनारथेन पराद्रवत्प्राणपरीप्सुरुर्व्यांयावद्गमं
रुद्रभयादिवार्कः १८ यदाशरणमात्मानमैक्षतश्रांतवाहनं अस्त्रंब्रह्मशिरोमेनेआत्मत्राणंद्विजात्म
जः १९ अथोपस्पृश्यसलिलंसंदधेतत्समाहितः अजानन्नपिसंहारंप्राणकृच्छ्रउपस्थिते २०

णसौवर्णंविमानंदत्तं।ततोसावर्कस्यपृष्ठतोभ्रमत्।विमानदीप्त्यारात्रिंविलोपितवान्।ततोर्केणनिजतेजोभिर्द्रावयि
त्वातद्विमानंपातितं।तथुत्ताकुपितेरुद्रेभयादर्कःपर्यद्रवत्।ततोरुद्रस्यक्रूरदृष्ट्यादंदह्यमानःपतन्वाराणस्यांश्रीरुद्र
राजधान्यांपतितोलोलार्कइतिनामविख्यातोजातः १८ अशरणंरक्षकरहितं।ननुपलायनमेवरक्षकमस्तीतिन
कस्यापिकुंठितत्वात्।श्रांताःवाजिनोयस्यतं।ब्रह्मशिरोस्त्रंब्रह्मास्त्रोद्विजात्मजइतिअदीर्घदर्शितामाहविप्राःपश्चि २४
मबुद्धयइतिवचनात् १९ तद्ब्रह्मास्त्रेसमाहितः।कृतध्यानः।उपसंहारंअजानन्संधानेहेतुःप्राणकृच्छ्रइति २०

ततःअस्त्रात्सर्वतोदिशंप्रादुःभूतंकपटीभूतंतेजःअभिप्रेक्ष्यतत्रप्राणापहंचाभिप्रेक्ष्यप्रस्तुतंविज्ञापयितुंप्रथमंस्तुवन्भ
हार्जुनश्चतुर्भिः। २१ संसृतेर्हेतोर्दह्यमानानांतस्यापवर्गोअपवर्जयितानाशकइत्यर्थः २२ अतस्त्वमीश्वरःसाक्षात्कुतः
यतःप्रकृतेःपरःपुरुषःनाकुतःयतःआद्यःकारणंकारणत्वेप्यविकारित्वमाह।चिच्छक्त्यामायांव्युदस्यअभिभूयकैवल्यरूपे
आत्मन्येवस्थितइतित्रिवर्गदानापित्वमेवेत्याह। २३ यस्त्वंमायांअभिभूयस्थितःसएवमायाभिभूतस्यजनस्यउपा
स्थितःसन्धर्मादिफलंविधत्से।स्वेनवीर्येणस्वप्रभावेणतथाचानेनअवतारेणतवसाधुपक्षपातोलक्षितःइत्याह।

ततःप्रादुरभूत्तेजःप्रचंडंसर्वतोदिशं प्राणापहमभिप्रेक्ष्यविष्णुंजिष्णुरुवाचह २१ अर्जुनउ० कृष्णकृष्णमहा
बाहोभक्तानामभयंकर त्वमेकोदह्यमानानामपवर्गोसिसंसृतेः २२ त्वमाद्यःपुरुषःसाक्षादीश्वरःप्रकृतेः
परः मायांव्युदस्यचिच्छक्त्याकैवल्येस्थितआत्मनि २३ सएवजीवलोकस्यमायामोहितचेतसः विधत्से
स्वेनवीर्येणश्रेयोधर्मादिलक्षणं २४ तथायंचावतारस्तेभुवोभारजिहीर्षया स्वानांचानन्यभावानामनुध्या
नायचासकृत् २५ किमिदंस्वित्कुतोवेतिदेवदेवनवेद्म्यहं सर्वतोमुखमायातितेजःपरमदारुणं २६ भ
गवानु० वेत्थेदंद्रोणपुत्रस्यब्राह्ममस्त्रंप्रदर्शितं अजानन्नपिसंहारंप्राणकृच्छ्रउपागते २७

२४ तथाचअवतारः।साधुपक्षपातभूभारहरणार्थमेव।ननुकिंभूभारहरणेमदिच्छामात्रेणनभवतितत्राह।स्वानांभक्ता
नांअनुध्यानाय।कथंभूतानांस्वानांअनन्यभावानांनास्तित्वद्व्यतिरेकेणभावोभावनायेषां।एवंस्तुत्वाप्रस्तुतंविज्ञापय
ति २५ किमात्मकमिदंकुतोवाआयातीतिस्विदितर्के २६ तेनचप्राणबाधेप्राप्तेप्रदर्शितं।केवलंनतुतत्प्रयोगेकुशल
इत्यर्थः।यतोसावुपसंहारंनवेदअतस्त्वंवेत्थअजानासि २७

भा० १ प्रसवकर्षणं कुशलकरं निवर्तकमित्यर्थः। अतस्त्वदस्त्रतेजसैवाऽहि घातय। त्वत्प्रयुक्तं चास्त्रं तदुपसंहृत्य स्वयमुपशाम्येत। य
२५ तस्त्वमस्त्रज्ञोऽसि २८ परेशाच्च कस्तु एव वीराः तान् हंतीति तथा फाल्गुनोऽर्जुनः अपः स्पृष्ट्वा आचम्य तं श्रीकृष्णं परिक्रम्य प्रदक्षि
णीकृत्य ब्राह्म्याय ब्रह्मास्त्रं निवर्तयितुं २९ ततश्च उभयो ब्रह्मास्त्रयोः तेजसा शरैः संवृते संवेष्टिते परस्परं मीलिते
ववृधाते अवर्धेतां किं कृत्वा रोदसी द्यावापृथिव्यौ खं अंतरिक्षं आवृत्य यथा प्रलये संकर्षणमुखाग्निः उपरिस्थितोऽर्कश्च

नह्यस्यान्यतमं किंचिदस्त्रं प्रत्यवकर्षणं जह्यस्त्रतेज उन्नद्धमस्त्रज्ञो ह्यस्त्रतेजसा २८ सूत उ० श्रुत्वा भ
गवता प्रोक्तं फाल्गुनः परवीरहा स्पृष्ट्वापस्तं परिक्रम्य ब्राह्मं ब्राह्मास्त्राय संदधे २९ संहत्यान्योन्यमुभयोस्ते
जसी शरसंवृते आवृत्य रोदसी खं च ववृधातेऽर्कवह्निवत् ३० दृष्ट्वास्त्रतेजस्तु तयोस्त्रीँल्लोकान्प्रदहन्महत् दह्य
मानाः प्रजाः सर्वाः सांवर्तकममंसत ३१ प्रजोपद्रवमालक्ष्य लोकव्यतिकरं च तं मतं च वासुदेवस्य संजहारा घो
र्जुनो द्वयं ३२ तत आसाद्य तरसा दारुणं गौतमीसुतं बबंधामर्षताम्राक्षः पशुं रशनया यथा ३३ शिबिरा
य निनीषंतं रज्वा बध्वा रिपुं बलात् प्राहार्जुनं प्रकुपितो भगवानंबुजेक्षणः ३४

संहत्य वर्धतेत्यत्र ३० तयोः द्रौणिफाल्गुनयोः अस्त्रतेजसा दह्यमानाः सर्वाः प्रजाः सांवर्तकं प्रलयाग्निं अमंसत मेनि
रे ३१ लोकानां व्यतिकरं व्यत्ययं नाशमित्यर्थः। वासुदेवस्य मतं चालक्ष्य ब्रह्मास्त्रद्वयमुपसंहृतवान् ३२ गौतमवं
पी शजा गौतमी कृपी तस्याः सुतं अमर्षेण कोपेन ताम्रे अक्षिणी यस्य सः निःकृपत्वे दृष्टांतः। पशुं यथेति। तस्य बंधनेऽ २५
भिप्रायत्र दृष्टांतः यथा याज्ञिकपशुं रशनया रज्वा ३३ शोकदोषाद्धि युक्तस्याप्यर्जुनस्य धर्मजिज्ञासां ज्ञापनाय श्रीकृष्ण
वाक्यं षड्भिः शिबिराय राजनिवेशाय नेतुमिच्छंतं प्रकुपितश्चेति ३४

अनागसः अनपराधान् सुप्तान् स्वपतः बालकान् यो वधीत् तस्य वधो धर्म इति अन्यार्थैर्दर्शयति ३५ मत्तं मद्यादिना प्रमत्तं अनवहि
तं उन्मत्तं ग्रहवातादिना जडं अनुद्यमं। प्रपन्नं शरणागतं। विगतरथं भग्नरथं ३६ तद्वधोऽदंडरूपस्तस्यैव श्रेयः स पुरुषा
र्थः। यद्यतो दंडप्रायश्चित्तरहिताद्दोषात्स पुमान् अधो यातीति। तथा च स्मृतिः राजभिर्धृतदंडास्तु कृत्वा पापानि मानवाः
विधूतकल्मषा यांति स्वर्गं सुकृतिनो यथा ३७ आहरिष्ये छेत्स्यामि ३८ आततायी। बालहा। भर्तुर्दुर्योधनस्य

मैनं पार्थार्हसि त्रातुं ब्रह्मबंधुमिमं जहि योऽसावनागसः सुप्तानवधीन्निशि बालकान् ३५ मत्तं प्रमत्तमुन्म
त्तं सुप्तं बालं स्त्रियं जडं प्रपन्नं विरथं भीतं न रिपुं हंति धर्मवित् ३६ स्वप्राणान्यः परप्राणैः प्रपुष्णात्यघृणः
ध्या खलः तद्वधस्तस्य हि श्रेयो यद्दोषाद्यात्यधः पुमान् ३७ प्रतिश्रुतं च भवता पांचाल्यै शृण्वतो मम आहरि
ष्ये शिरस्तस्य यस्ते मानिनि पुत्रहा ३८ तदसौ वध्यतां पाप आततायात्मबंधुहा भर्तुश्च विप्रियं वीर कृत
वान्कुलपांसनः ३९ सूत उ० एवं परीक्षता धर्मं पार्थः कृष्णेन चोदितः नैच्छद्धंतुं गुरुसुतं यद्यप्यात्मह
नं महान् ४० अथोपेत्य स्वशिबिरं गोविंदप्रियसारथिः न्यवेदयत्तं प्रियायै शोचंत्यै आत्मजान्हतान्
४१ तथाहृतं पशुवत्पाशबद्धमवाङ्मुखं कर्मजुगुप्सितेन निरीक्ष्य कृष्णापकृतं गुरोः सुतं वामस्वभावा कृ

यद्यपि नोदितस्तथापि हंतुं नैच्छत्। आत्महनं पुत्रहंतारमपि। यतो महान् धर्मज्ञः ४० पयानताम ४२
गोविंदः प्रियः सारथिर्यस्य आत्मजान् शोचंत्यै ४१ तथा परिभवेन आपहृत मानी तं कर्मणा जुगुप्सितेन दोषेण
अवाङ्मुखं अपकृतं अपकारिणं कृपया निरीक्ष्य वामः शोभनः स्वभावो यस्याः सा ननाम उवाचेति चकाराभ्यां संत

बंधेनानयनमसहमाना ४३ सरहस्यः गोप्यमंत्रसहितः विसर्गोत्र प्रयोगः उपसंयमः उपसंहारः ताभ्यां सहितोस्त्रसमूहश्च ४४ न
स्य द्रोणस्य आत्मनो देहस्यार्द्ध रूपी आस्ते। अर्द्धत्वे हेतुः पत्नी अर्द्धांगी। एव आत्मनो यत्पत्नी इति श्रुतेः। जायापती अग्निमाद
धीयेतामिति श्रुतेः। उभयोरेककार्यत्वावगमाच्च भर्तरि मृते सा कथं जीवतीति तत्राह। नान्वगात् न मृता यतो वीरसूः पुत्रवती ४५
तत्तस्मात् द्रोणस्य गुरोः कुलं भवद्भिः कर्तृभिः वृजिनं दुःखं प्राप्तुं नार्हति। किंतु पूज्यं वंद्यं च ४६ मृतवत्सा मृतपुत्रा विपक्षे दोषमाह ४७

उवाच चासहंत्यस्य बंधनानयनं सती मुच्यतां मुच्यतामेष ब्राह्मणो नितरां गुरुः ४२ सरहस्यो धनुर्वेदः सविसर्गोपसंयमः अ
स्त्रग्रामश्च भवता शिक्षितो यदनुग्रहात् ४४ स एष भगवान्द्रोणः प्रजारूपेण वर्त्तते तस्यात्मनोर्द्धं पत्न्यास्ते नान्वगाद्वीरसूः
कृपी ४५ तद्धर्मज्ञ महाभाग भवद्भिर्गौरवं कुलं वृजिनं नार्हति प्राप्तुं पूज्यं वंद्यमभीक्ष्णशः ४६ मारोदीदस्य जननी
गौतमी पतिदेवता यथाहं मृतवत्सार्त्ता रोदिम्यश्रुमुखी मुहुः ४७ यैः कोपितं ब्रह्मकुलं राजन्यैरकृतात्मभिः तत्कुलं
प्रदहत्याशु सानुबंधं शुचार्पितं ४८ धर्म्यं न्याय्यं सकरुणं निर्व्यलीकं समं महत् राजा धर्मसुतो राज्ञ्याः प्रत्यनंदद्वचो
द्विजाः ४९ नकुलः सहदेवश्च युयुधानो धनंजयः भगवान्देवकीपुत्रो ये चान्ये याश्च योषितः ५०

तेषां राजन्यानां कुलं कर्तृभूतं सानुबंधं सपरिवारं। शुचा शोकेन आर्पितं व्याप्तं च ब्रह्मकुलं कर्तृ प्रदहति ४८ धर्म्यमित्यादि
यो वचसः षड्गुणाः पूर्वश्लोकषट्के द्रष्टव्याः। ततः धर्म्यं धर्मादनपेतं मुच्यतां मुच्यतामेष इत्येकेन। न्याय्यं न्यायादनपेतं। सरहस्यो
धनुर्वेद इति सकरुणं तस्यात्मनोर्धमिति निर्व्यलीकं न द्रुहं इति। समं मारोदीदस्येति। दुःखसाम्योक्तिः। यैः कोपितमिति
निष्ठुरोक्त्या हितोपदेशाः एवंभूतं राज्ञः हितोपदेशाः एवंभूतं राज्ञः वचः हे द्विजाः प्रत्यनंदन्। अनुमोदितवान् ४९ नकुलादय

नस्यत्यथाविधस्य द्रौणेः वध एव श्रेयः। अन्यथा अस्य वनरक्षपातप्रसंगात् तदाह। नभर्तुरिति। अहन् जघान। ५१ चतुर्भुजोक्तेः
अयं भावः। भीमे हंतुं प्रवृत्ते द्रौपद्यां च सहमानायां तन्निवारणे प्रवृत्तायां उभयोः वारणाय विधृतचतुर्भुज इति ५२ वधार्हणः।
संदिहानस्य सख्युः अर्जुनस्य मयैव शास्त्रं कृतो मयं कथितं ब्राह्मणो न हंतव्यः। तथा। आततायिनमायांतमपि वेदांतपारगं।
जिघांसंतं जिघांसीयान्न तेन ब्रह्महा भवेत्। इति वदता मदुभयमप्यनुशासनं परिपालयत वचः प्रतिज्ञां पूरयेत्याह। ५३
प्रियं सांत्वयता त्वया यत् प्रतिश्रुतं हननं तच्च सत्यं कुरु। मह्यं मम च धर्मे मत्सेनस्य प्रियं भवति अवधे द्रौपद्याः द्वयेश्री हस्य

तत्राहामर्षितो भीमस्तस्य श्रेयान्वधः स्मृतः न भर्तुर्नात्मनश्चार्थे योहन्सुप्ताञ्शिशून्वृथा ५१ निशम्य भी
मगदितं द्रौपद्याश्च चतुर्भुजः आलोक्य वदनं सख्युरिदमाह हसन्निव ५२ भगवानु० ब्रह्मबंधुर्न हंतव्य आ
ततायी वधार्हणः मयैवोभयमाम्नातं परिपाह्यनुशासनं ५३ कुरु प्रतिश्रुतं सत्यं यत्तत्सांत्वयता प्रियां प्रियं च भी
मसेनस्य पांचाल्या मह्यमेव च ५४ सूत उ० अर्जुनः सहसाज्ञाय हरेर्हार्दमथासिना मणिं जहार मूर्द्धन्यं द्विजस्य
सहमूर्द्धजैः ५५ विमुच्य रशनाबद्धं बालहत्याहतप्रभं तेजसा मणिना हीनं शिबिरान्निरयापयत् ५६ वपनं द्र
विणादानं स्थानान्निर्यापणं तथा एष हि ब्रह्मबंधूनां दंडो नान्योस्ति दैहिकः ५७ पुत्रशोकातुराः सर्वे पांडवाः सह कृष्ण
या स्वानां मृतानां यत्कृत्यं चक्रुर्निर्हरणादिकं ५८ इति श्रीभागवते प्रथ० अश्वत्थाम्नो निर्यापणं नाम सप्तमोध्यायः

स्य अर्जुनो हार्दं अभिप्रायं ज्ञात्वा तदा शक्यमुभयं विदध्यात्। यतोयमभिप्राय इति ज्ञात्वा असिना खड्गेन मूर्धन्यं मूर्ध्नि जातं सहजं
सहकेशं मणिं जहार ५५ मणिना च हीनं निरयापयत्। अनेन श्रीकृष्णोक्तं सर्वं संपादितमित्याह। ५६ निर्हरणं दाहादिक्रिया ५८
इति प्रथमे सप्तमः ७

भा०१ २७ अष्टमे कुपिताद्द्रोणेरस्त्रादुत्तरापरीक्षितः । श्रीकृष्णस्य स्तुतिः कुंत्या राज्ञः शोकश्च कीर्त्यते । ते पांडवाः संपरेतानां मृतानां गंगाया
मुदकं दातुं सकृष्णाः श्रीकृष्णेन सहिताः स्त्रियः स्त्रीः पुरस्कृत्य ययुः । अग्रतः कृत्वा तासि— कार्ये स्त्रीपुरःसरत्वविधानात् १ निनीय दत्वा
हरिपादशुद्धरजोभिः [illegible] सरित् गंगा तस्याः जले पुनर्ग्रहणात् । आदावपि स्नाना इति गम्यते २ कुरुपतिं युधिष्ठिरं । सहा
नुजैर्भीमादिभिः सहितं ३ मुनिभिः सहितैस्तैर्यामास सकृष्णः किं कुर्वन् भूतेषु अप्रतिक्रियां कालस्य गतिं दर्शयन् । पुराणांतरान्वे
ने न्वैस्तैः सकृष्णः शोकं कुरु मा दुःखमं दिशं । सर्वेषामिह भूतानां पारश्यामो यमी दृशः पुरंदरसहस्राणि चक्रवर्त्तिशतानि च । निर्वा

सूत उ० अथ ते संपरेतानां स्वानामुदकमिच्छतां दातुं सकृष्णा गंगायां पुरस्कृत्य ययुः स्त्रियः १ ते निनीयोदकं सर्वे
विलप्य च पुनः पुनः आप्लुता हरिपादाब्जरजःपूतसरिज्जले २ तत्रासीनं कुरुपतिं धृतराष्ट्रं सहानुजं गांधारीं
पुत्रशोकार्त्तां पृथां कृष्णां च माधवः ३ सांत्वयामास मुनिभिर्हतबंधून् शुचार्पितान् भूतेषु कालस्य गतिं दर्शयन्नप्रती-
क्रियां ४ साधयित्वाजातशत्रोः स्वं राज्यं कितवैर्हृतं घातयित्वासतो राज्ञः कचस्पर्शक्षतायुषः ५ याजयित्वा-
श्वमेधैस्तं त्रिभिरुत्तमकल्पकैः तद्यशः पावनं दिक्षु शतमन्योरिवातनोत् ६ आमंत्र्य पांडुपुत्रांश्च शैनेयोद्धवसं-
युतः द्वैपायनादिभिर्विप्रैः पूजितैः प्रतिपूजितः ७

पितानि कालेन प्रदीपाइव वायुना । दुर्गं त्रिकूटं परिखाः समुद्रो रक्षांसि योधाः परमश्च वित्तं । शास्त्रं च यस्योशनसा प्रणी-
तं स रावणः कालवशाद्विपन्नः । येपि शोषयितुं शक्ताः समुद्रं ग्राहसंकुलं । उद्धर्तुं धरणीं शक्ताः ग्रसितुं चंद्रभास्करौ । प्रविष्टास्ते
विकालेन कृतांतवदनं शुभे । एवं कालगतिं बुध्वा न शोचितुमिहार्हसि । ४ कितवैर्धूर्तैः दुर्योधनादिभिः द्रौपद्याः कचग्रह- २७
णादिना क्षतं नष्टं आयुर्येषां तान् ५ याजयित्वेत्यादिभिः भाविकथासंक्षेपः शतमन्योः शतक्रतोरिव ६ शैनेयः शिने
र्नप्ता सात्यकिः तेन च उद्धवेन संयुतो रथमास्थितः सह ७

उत्तरां परीक्षिन्मातरं अभिमुखं धावंतीं । उपलेभे ददर्श । उत्तरा श्रीकृष्णं संप्रार्थयति द्वाभ्यां । ८ पाहि पाहि । रक्ष रक्ष । अन्यस्तु त्वा-
र्थनायोग्यो नास्तीत्याह । त्वत्त्वत्तः अन्यं अभयं भयरहितं न पश्यामि । यत्र लोके परस्परं मृत्युर्भवति । तत्र प्रस्तुतं भयमावेदयति
९ तप्तलोहमयो बाणः मां अभिद्रवति । सन्मुखमायाति । अतिकार्पण्यमाह । कामम्मिति कामं यथेष्टं १० पराभवेना-
तिकुपितस्य द्रौणेः अपांडवं पांडवशून्यं इदं विश्वं कर्तुं प्रवृत्तं ब्रह्मास्त्रं अबुध्यत । अत एव बहुमुखं तदागतमिवेत्याह ११

गंतुं कृतमतिर्ब्रह्मन् द्वारकां रथमास्थितः उपलेभेऽभिधावंतीमुत्तरां भयविह्वलां ८ उत्तरा उ० पाहि पाहि महायो-
गिन्देवदेव जगत्पते नान्यं त्वदभयं पश्ये यत्र मृत्युः परस्परं ९ अभिद्रवति मामीश शरस्तप्तायसो च्युत कामं दह-
तु मां नाथ मा मे गर्भो निपात्यतां १० सूत उ० उपधार्य वचस्तस्या भगवान् भक्तवत्सलः अपांडवमिदं कर्तुं द्रौ-
णेरस्त्रममन्यत ११ तर्ह्येवाथ मुनिश्रेष्ठ पांडवाः पंच सायकान् आत्मनोऽभिमुखान्दीप्तानालक्ष्यास्त्राण्यु-
पाददुः १२ व्यसनं वीक्ष्य तत्तेषामनन्यविषयात्मनां सुदर्शनेन स्वास्त्रेण स्वानां रक्षां व्यधाद्विभुः १३ अंत-
स्थः सर्वभूतानामात्मा योगेश्वरो हरिः स्वमायया वृणोद्गर्भं वैराट्याः कुरुतंतवे १४ यद्यप्यस्त्रं ब्रह्मशिरस्त्वमो-
घं चाप्रतिक्रियं वैष्णवं तेज आसाद्य समशाम्यद्भृगूद्वह १५

तर्ह्येव तदानीमेव ब्रह्मास्त्रस्य अस्त्रांतरैरनिवर्त्यत्वात् । कृष्णस्तूपायं चक्र इत्याह १२ ब्रह्मास्त्रस्य अस्त्रांतरैरनिवर्त्यत्वा-
त् दुःपरिहरं व्यसनं वीक्ष्य अनन्यविषयः आत्मा येषां स्वैकनिष्ठानामित्यर्थः १३ वैराट्याः उत्तरायाः अंतस्थः सन् गर्भमा-
त यसौ वान् । तत्र हेतुः यतः सर्वभूतानामात्मा अंतर्यामी योगेश्वर इति बहिस्त्वास्यापि प्रवेशसाधनार्थमुक्तं । कुरूणां तंतवे
संतानाय पांडवानामपि कुरुवंशजत्वादेवमुक्तं १४ अमोघमप्रतिक्रियं । तथापि वैष्णवं तेज आसाद्य समशाम्यत् सं
शांतमासीत् १५

भा०१ एतद्ब्रह्मास्त्रशमनं माश्चर्यमिति मामन्यथेदं जगत् १६ पृथा कुंती कृष्णया द्रौपद्या सह १७ त्वां नमस्करो
२८ मि। ननु कनिष्ठं मां कथं नमस्करोषि तत्राह। आद्यं पुरुषं कुतः प्रकृतेः परं तत् कुतः ईश्वरं प्रकृतेरपि नियंतारं अत एव
सर्वभूतानां अंतर्बहिश्च पूर्णत्वेनास्थितं। तथाप्यलक्ष्यं तत्र हेतुमाह १८ मायैव जवनिका तिरस्करणी तया आछन्नं
अतोहमज्ञा भक्तियोगानभिज्ञा केवलं नमस्यामि। अधः अक्षजं ज्ञानं यस्मात्तं। अव्ययं अपरिछिन्नं न ह्यपंचः। भू
मामंस्त्राहोत राश्वर्यं सर्वस्त्रिवर्यमये च्युते यदिदं मायया देव्या सज्जत्यनिहंत्यजः १६ ब्रह्मतेजो विनिर्मुक्तै
रात्मजैः सह कृष्णया प्रयाणाभिमुखं कृष्णमिदमाह पृथा सती १७ कुंत्युवाच नमस्ये पुरुषं त्वाद्यमीश्वरं प्रकृ
तेः परं अलक्ष्यं सर्वभूतानामंतर्बहिरवस्थितं १८ मायाजवनिकाछन्नमज्ञाधोक्षजमव्ययं न लक्ष्य
से मूढदृशा नटो नाट्यधरो यथा १९ तथा परमहंसानां मुनीनाममलात्मनां भक्तियोगविधानार्थं कथं पश्येम हि
स्त्रियः २० कृष्णाय वासुदेवाय देवकीनंदनाय च नंदगोपकुमाराय गोविंदाय नमो नमः २१ नमः पंकजनाभाय न
मः पंकजमालिने नमः पंकजनेत्राय नमस्ते पंकजांघ्रये २२
मूढदृशा देहमानिना पुंसा त्वं न लक्ष्यसे यथा नटः १९ परमहंसानां आत्मानात्मविवेकिनां ततो मुनीनां मननशीलानां अ
पि ततश्चामलात्मनां निवृत्तरागादीनां अपि तथा लेनिज महिम्ना न लक्ष्यसे। अतो भक्तियोगं कारयितुं भवतीर्णमिति सर्वथा
ज्ञानभक्त्योरशक्या सम्युक्ता पुनः केवलं नमस्करोति द्वाभ्यां २० पंकजं नाभौ यस्य पंकजानां माला अस्ति यस्य पंकजवत्स
सन्ने नेत्रे यस्य पंकजांकिता अंघ्री यस्य तस्मै। नत्कृतोपकारान् अनुस्मरंती द्वाभ्यां २२ २८

अयमर्थः मानतोपि मय्यधिकातव प्रीतिः तथापि हे हृषीकेश यथा देवकी कंसेन रुद्धा त्वया मोचिता अहं तु तथैव विमोचि
ज्ञेति तेति स कालं महान् विशेषः उक्तः तं दर्शयति। सा अतिचिरं रुद्धा सती तस्मादेव सकृद्विमोचिता। शुचार्पिता च तस्याः पुत्रा रक्षि
ता अस्ति तान्यो नाथस्तस्याः आह च विपद्गणात् तत्रापि मुहुः शीघ्रं च सा मजा च त्वयैव च नाथेनेति विपद्गणमेव दर्श
यति २३ विषात् भीमस्य विषमोदकदानात् महाग्नेः जतुगृहदाहात्। पुरुषादा हिडिंबादयो राक्षसाः तेषां दर्शनात्।
असत्सभायाः द्यूतस्थानात्। अभितो रक्षिता आस्म अभवाम २४ यत्या सु विपत्सु की दृशं दर्शनं नास्ति पुनरपि सं
यथा हृषीकेश खलेन देवकी कंसेन रुद्धासुचिरं शुचार्पिता विमोचिताहं च सहात्मजा विभो त्वयैव नाथेन मुहु
र्विपद्गणात् २३ विषान्महाग्नेः पुरुषाददर्शनादसत्सभाया वनवासकृच्छ्रतः मृधे मृधेनेकमहारथास्त्रतो
द्रौण्यस्त्रतश्चास्म हरेभिरक्षिताः २४ विपदः संतु नः शश्वत्तत्र तत्र जगद्गुरो भवतो दर्शनं यत्स्यादपुनर्भवदर्श
नं २५ जन्मैश्वर्यश्रुतश्रीभिरेधमानमदः पुमान् नैवार्हत्यभिधातुं वै त्वामकिंचनगोचरं २६ नमोकिंचन
वित्ताय निवृत्तगुणवृत्तये आत्मारामाय शांताय कैवल्यपतये नमः २७
मसे
सार दर्शनं यस्मात् संपदस्तु श्रेयः परिपंथिन इत्याह २५ जन्म सत्कुले जन्मादिभिरेधमानो यस्य सः अभिधा
तुं श्रीकृष्ण गोविंदेति वक्तुमपि नार्हति। अकिंचनानां गोचरं विषयभूतं प्रस्तुत मनोरथपूरणाय प्रणमति २६
अकिंचना भक्ता एव वित्तं सर्वस्वं यस्य तस्मै। ततः किं निवृत्ता गुणवृत्तयो धर्मार्थकामविषया यस्मात् तस्मै तत् कुतः आ
त्मारामाय तदपि कुतः शांताय रागादिरहिताय किंच कैवल्यपतये कैवल्यं दातुं समर्थाय ननु देवकीपुत्रं मां कथमेवं
स्तौषि तत्राह २७

मन्येत्वांकालेनत्हदेवकीपुत्रंतत्रहेतवः ईशानंनियंतारं अनादिनिधनंआद्यंतशून्यं। विभुंप्रभुं। समंयथाभवतितथासर्वत्रचरं
तं। ननुपार्थसारथ्येममकथंसाम्यंतत्राह। यद्यनस्त्वत्तोनिमित्तभूतात् भूतानामेवमिथःकलहोभवति। ननुस्त्वतस्त्वयिवैषम्यं।
ननुनिग्रहानुग्रहरूपंमयिप्रसिद्धंवैषम्यं। अतआह २८ नृणांविडंबनमनुकरणमीहमानस्यकुर्वतः यस्मिंस्तवविष
मामतिः अनुग्रहनिग्रहरूपा भवति २९ अजस्यजन्मअकर्तुः कर्मतिर्यक्षुवराहरूपेण ऋषिषुवामनादिरूपेण। यादः
सुमत्स्यादिरूपेण नरविडंबनं अस्याश्चर्यरूपमित्याह ३० गोपीयशोदात्वयिकृतागसिदधिभांडस्फोटनंकृतवति

मन्येत्वांकालमीशानमनादिनिधनंविभुं समंचरंतंसर्वत्रभूतानांयन्मिथःकलिः २८ नवेदकश्चिद्भगवंश्चि
कीर्षितंतवेहमानस्यनृणांविडंबनं नयस्यकश्चिद्दयितोस्तिकर्हिचिद्द्वेष्यश्चयस्मिन्विषमामतिर्नृणां २९ ज
न्मकर्मचविश्वात्मन्नजस्याकर्तुरात्मनः तिर्यङ्नृषिषुयादस्सुतदत्यंतविडंबनं ३० गोप्याददेत्वयिकृतागसिदा
मतावद्यातेदशाश्रुकलिलांजनसंभ्रमाक्षं वक्त्रंनिनीयभयभावनयास्थितस्यसामांविमोहयतिभीरपियद्बिभे
ति ३१ केचिदाहुरजंजातंपुण्यश्लोकस्यकीर्तये यदोःप्रियस्यान्ववायेमलयस्येवचंदनं ३२

यावत्दामरज्जुआददे। तावत्तत्क्षणमेवयातवदशाअवस्था सामांविमोहयति। कथंभूतस्यतव। अश्रुभिःकलिलंव्यामि
श्रंअंजनंतेनच। संभ्रमेआकुलेअक्षीणियस्मिन्तत् वक्त्रंनिनीयअधःकृत्वामांताडयिष्यतीतिभयभावनयास्थितस्य
यत्यतःत्वतःभीरपिस्वयंबिभेतितस्यतेदशाअतएवजगन्मोहनतयादुर्ज्ञेयत्वात्तवजन्मादिबहुधावर्णयंतीत्याह।
केचिदितिचतुर्भिः। ३१ पुण्यश्लोकस्ययुधिष्ठिरस्यकीर्तयेयदोरेवकीर्तयेइतिवामलयस्यकीर्तयेचंदनंयथा ३२ २९

तथावसुदेवस्यदेवक्यांभार्यायांअजएवत्वमभ्यगात् पुत्रत्वमितिशेषः। प्रथमपुरुषस्त्वार्षः। अगेत्वमितिपाठःसुगमः। ताभ्यामेव
पूर्वंसुतपापृश्निरूपाभ्यांयाचितःसन् अस्यजगतःक्षेमाय ३३ आत्मभुवेतिब्रह्मप्रार्थनस्यप्राधान्यविवक्षयामतांतरं ३४
परमानंदस्वरूपाज्ञानंअविद्याततोदेहाद्यभिमानात्कामःततःकर्माणितैःक्लिश्यमानानांतन्निवृत्तयेश्रवणाद्यर्हाणिकर्माणि
करिष्यन्अस्यपक्षस्यसिद्धांततामभिप्रेत्यश्रवणादिफलमाह। ३५ नंदंतिअन्यैःकीर्त्यमानमभिनंदंतियेजनाःईहितंच

अपरेवसुदेवस्यदेवक्यांयाचितोभ्यगात् अजस्त्वमस्यक्षेमायवधायचसुरद्विषां ३३ भारावतारणायान्येभुवोना
वइवोदधौ सीदंत्याभूरिभारेणजातोह्यात्मभुवार्थितः ३४ भवेस्मिन्क्लिश्यमानानामविद्याकामकर्मभिः श्रवण
स्मरणार्हाणिकरिष्यन्नितिकेनच ३५ शृण्वंतिगायंतिगृणंत्यभीक्ष्णशःस्मरंतिनंदंतितवेहितंजनाः तएवपश्यं
त्यचिरेणतावकंभवप्रवाहोपरमंपदांबुजं ३६ अप्यद्यनस्त्वंस्वकृतेहितप्रभोजिहाससिस्वित्सुहृदोनुजीविनः
येषांनचान्यद्भवतःपदांबुजात्परायणंराजसुयोजितांहसां ३७

रितंतावकंत्वदीयंपदांबुजं तएवपश्यंत्येव। अचिरेणैवेतिचसर्वत्रावधारणं। भवप्रवाहस्यजन्मपरंपरायाःउपरमोयस्मित्
तत् इदानींतवास्मत्परित्यागोह्यनुचितइत्याशयेनाहचतुर्भिः ३६ हेप्रभोसुहृदोनुजीविनःनोस्मानपिस्वित्किंस्वित्
त्वंजिहासासियेषामस्माकंअन्यत्परायणंनैवास्तिकुतःराजसुयोजितमंहोदुःखंयैस्तेषांकृतामीहितंयेनतस्यसंबोध
नंविसर्गेतापाठेत्वंपदविशेषणंननुतवबंधवोयादवाःपुत्राश्चपांडवाःशूराःतत्किंकार्पण्यंभाषसेअतआह ३७

भा०१
३० यर्हियराभवतोदर्शनं।यदात्वमस्मान्नपश्यसिनदानाम्नाख्यात्यारूपेणसमृध्याचयदुभिःसहिताःपांडवाःकेवयं।नकेपिभ
वितुत्साइत्यर्थः। हृषीकाणामीशितुजीवस्यअदर्शनेयथानकिंचिन्नामरूपंतद्वत् ३८ यथेदानीमियमस्मत्पाल्याभूमिःत्वे
रसाधारणैर्वज्रांकुशादिभिर्लक्षणैर्विलक्षितैश्चिह्नितैस्त्वत्पदैःअंकितासतीभाति।नतुतदात्वयिनिर्गतेसतिनशोभि
ष्यते ३९ अपिचइमेजनपदादेशाःसुसमृद्धाःसंतःतववीक्षितैःएधंते।गमनेपांडवानांअशकुनंअगमनेयादवानामित्यु
भयतोप्याकुलचित्तासतीनेवुस्नेहानुवृत्तिंप्रार्थयति ४० विश्वेशेत्यादिसंबोधनानिस्नेहच्छेदेसाधर्म्यख्यापनायद्रष्टव्यानि
केवयंनामरूपाभ्यांयदुभिःसहपांडवाः भवतोदर्शनंयर्हिहृषीकाणामिवेशितुः ३८ नेयंशोभिष्यतेतत्रयथेदानीं
गदाधर त्वत्पदैरंकिताभातिस्वलक्षणविलक्षितैः ३९ इमेजनपदाःस्वृद्धाःसुपक्वौषधिवीरुधः वनाद्रिनद्युद
न्वंतोह्येधंतेतववीक्षितैः ४० अथविश्वेशविश्वात्मन्विश्वमूर्तेस्वकेषुमे स्नेहपाशमिमंछिंधिदृढंपांडुषुवृष्णिषु ४१
त्वयिमेनन्यविषयामतिर्मधुपतेसकृत् रतिमुद्वहतादद्धागंगेवौघमुदन्वति ४२ श्रीकृष्णकृष्णसखवृष्ण्यृ
३ षभावनिध्रुग्राजन्यवंशदहनानपवर्गवीर्य गोविंदगोद्विजसुरार्तिहरावतारयोगेश्वराखिलगुरोभगवन्नमस्ते ४३
ननुततःकिं ४१ अन्यविषयासतीमेमतिः ईश्वरविषयेरतिमुद्वहतात्।अनवच्छिन्नांप्रीतिंकरोत्वित्यर्थः।ओघंप्रवाहंयथागं
गाप्रतिबंधंनगणयतिएवंमतिरपिविघ्नान्मागणयेदितिभावः।एवमभ्यर्थ्यपुनःप्रणमति ४२ हेश्रीकृष्णतेनमः।उप
कारान्नुस्मरंतीबहुधासंबोधयति।कृष्णसखअर्जुनस्यसखे।वृष्णीनामृषभश्रेष्ठअवन्यैभूम्यैयेद्रुह्यंतियेराजन्या ३०
स्तेषांवंशस्यदहन।एवमप्यनपवर्गवीर्य।अक्षीणप्रभावगोविंदप्राप्तकामधनैश्वर्यद्विजसुराणामार्तिहरोवतारोयस्येति ४३

कण्ठानिमधुराणिपदानियेषुतैर्वाक्यैःपरिणूतःप्रकटीकृतः।अखिलाउदयोमहिमायस्यसमंदंईषत्जहास।तस्यहासएवमाया
वक्ष्यतिहि।हासोजनोन्मादकरीचमायेति।परितोनुतस्तुतोअखिलमहिमायस्यपरिणुतइत्येवंकेचिदीर्घः।छंदोभंगभयात् ४४
त्वयिमेनन्यविषयामतिरितियत्प्रार्थितंतद्दाढमित्यंगीकृत्यरथस्थानाद्गजाह्वयमागत्यपृथ्वांनांचअन्यांश्चसुभद्राप्रमुखा
स्त्रियः उपामंत्र्यआमंत्र्यअनुज्ञाप्यस्वपुरंयास्यन्राज्ञायुधिष्ठिरेणप्रेम्णाअत्रैवाकंचित्कालंनिवसेतिप्रार्थ्य।अथनीक्ष्म
४ निर्याणोत्सवेकुंडपोद्धातकथांप्रस्तौति ४५ व्यासाद्यैःप्रतिबोधितोपिशुचाव्याप्तःसन्नावबुध्यतविवेकंनप्राप।कुतःई
सूत उ० पृथयेत्थंकलपदैःपरिणूताखिलोदयः मंदंजहासवैकुंठोमोहयन्निवमायया ४४ तांबाढमित्युपामंत्र्यप्र
विश्यगजसाह्वयं स्त्रियश्चस्वपुरंयास्यन्प्रेम्णाराज्ञानिवारितः ४५ व्यासाद्यैरीश्वरेहाज्ञैःकृष्णेनाद्भुतकर्मणा
प्रबोधितोपीतिहासैर्नाबुध्यतशुचार्पितः ४६ आहराजाधर्मसुतश्चिंतयन्सुहृदांवधं प्राकृतेनात्मनाविप्राःस्नेह
मोहवशंगतः ४७

श्वरेहाज्ञैः ईहामाह।स्वकृष्णःनीष्मनिर्याणमहोत्सवायराज्ञासहकुरुक्षेत्रंगंतव्यंतन्मुखेनैवायंप्रतिबोधनीयइतिहीश्व
राभिप्रायः।कार्यद्वयविधायकःतमजानद्भिरित्यर्थः।श्रीकृष्णेनापिबोधितोनाबुध्यत।तत्रहेतुः।अद्भुतकर्मणायथा
कुरुपांडवसंधानार्थंगतापियथोचितमेवदंन्नापिविग्रहमेवदृढीकृतवान्।एवमत्रापिप्रबोधयन्।अबोधमेवदृढीच
कारेत्यर्थः।अबोधमेवप्रपंचयति।आहेतिषड्भिः। ४६ प्राकृतेनअविवेकव्याप्तेनआत्मनाचित्तेनहेविप्राः ४७
४२

पारक्यस्य श्वसृगालाद्याहारस्य देहस्यार्थे मया अक्षौहिणीः अक्षौहिणीप्रमाणं व्यासेनोक्तं तदाह । अक्षौहिणीप्रसंख्याता गजा
नां द्विजसत्तमाः संख्या गणनतत्त्वज्ञैः सहस्राण्येकविंशतिः । शतान्युपरि चाष्टौ च तथा भूयश्च सप्ततिः । रथानां च प्रसंख्यान
मेतदेव प्रकीर्तितं । ज्ञेयं शतसहस्रं तु सहस्राणि नवैव तु । नराणामपि पंचाशच्छतानि त्रीणि चैव हि । पंचषष्टिसहस्राणि तथा
श्वानां शतानि च । दशोत्तराणि षट् प्राहुः संख्यातत्त्वविदो जनाः । एतामक्षौहिणीं प्राहुर्यथावदिह संख्यया । ४८ सुहृदः संब
धिनः मित्राणि सखायः पितरः पितृव्याः । ४९ द्विषां वधः एनः पापं न भवति इति यत् शासनं शिष्यानुरूपं वचः कुतो न क भा

अहो मे पश्यताज्ञानं हृदि रूढं दुरात्मनः पारक्यस्यैव देहस्य बह्व्यो मेऽक्षौहिणीर्हताः ४८ बालद्विजसुहृन्मित्रपितृ
भ्रातृगुरुद्रुहः न मे स्यान्निरयान्मोक्षो ह्यपि वर्षायुतायुतैः ४९ नैनो राज्ञः प्रजाभर्तुर्धर्मयुद्धे वधो द्विषां इति मे न तु
बोधाय कल्पते शासनं वचः ५० स्त्रीणां मद्धतबंधूनां द्रोहो योऽसाविहोत्थितः कर्मभिर्गृहमेधीयैर्नाहं कल्पो व्यपोहितुं ५१

अतो येन तस्त इव वचः प्रजाभर्तुरेक अयं भावः स्वजीवनाय अन्यतो बाधप्रसक्ते न हि वयोनुज्ञातः दुर्योधनेन तु प्रजायां पाल्यमानायां म
या केवलं राज्यलोभेन हतत्वात् पापमेव मम जातं किंच युद्धे पुंसां वधो नाम भवतु धर्मः ५० स्त्रीणां मया हतबंधवो यासां
तासां द्रोहो योऽसौ उत्थितस्तं व्यपोहितुं अपाकर्तुं शतवर्षैरपि नाहं कल्पः समर्थः । गृहमेधीयैर्गृहाश्रमविहितैः कर्म
भिः । ननु च सर्वं पाप्मानं तरति । ब्रह्महत्यां योऽश्वमेधेन यजेते । य उ चैनमेवं वेदेति श्रुतेः । पापमश्वमेधेन नश्यदेवेत्या ३१
शंक्य अविवेकविजृंभितं हेतुवादमाश्रित्य निराकरोति ५१

यथा घनपंकेन मृज्यते । यथा सुरालेशकृतामपवित्रतां बुध्या सुरया न मृज्यते तथा भूतहत्यां प्रमादतो जातां बुद्धिपूर्वं हिंसाप्रायैर्यज्ञै
र्मार्ष्टुं शोधयितुं नार्हतीति ५२ इति प्रथमेऽष्टमः युधिष्ठिरायत्तीष्मेण सर्वधर्मनिरूपणं । कृष्णस्तुतिश्च मुक्तिश्च नवमे तस्य व
र्ण्यते । यदर्थं तस्याविवेकः श्रीकृष्णेन संवर्द्धितः तद्दर्शयति । सर्वेषां धर्माणां विवित्सया वेदितुं इच्छया विनशनं कुरुक्षेत्रं देवव्रतो

यथा पंकेन पंकांभः सुरया वा सुराकृतं भूतहत्यां तथैवैकां न यज्ञैर्मार्ष्टुमर्हति ५२ इति श्रीभा०प्र० युधिष्ठिरानुतापो
नामाष्टमोऽध्यायः ८ सूत उ० इति भीतः प्रजाद्रोहात्सर्वधर्मविवित्सया ततो विनशनं प्रागाद्यत्र देवव्रतोऽपतत्
१ तदा ते भ्रातरः सर्वे सदश्वैः स्वर्णभूषणैः अन्वगच्छन् रथैर्विप्रा व्यासधौम्यादयस्तथा २ भगवानपि विप्रर्षे रथेन स
धनंजयः स तैर्व्यरोचत नृपः कुबेर इव गुह्यकैः ३ दृष्ट्वा निपतितं भूमौ दिवश्च्युतमिवामरं प्रणेमुः पांडवा भीष्मं सानु
गाः सह चक्रिणा ४ तत्र ब्रह्मर्षयः सर्वे देवर्षयश्च सत्तम राजर्षयश्च तत्रासन् द्रष्टुं भरतपुंगवं ५ पर्वतो नारदो धौम
म्यो भगवान्बादरायणः बृहदश्वो भरद्वाजः सशिष्यो रेणुकासुतः ६ वसिष्ठ इंद्रप्रमदस्त्रितो गृत्समदोऽसितः क
क्षीवान्गौतमोऽत्रिश्च कौशिकोऽथ सुदर्शनः ७ अन्ये च मुनयो ब्रह्मन्ब्रह्मरातादयोऽमलाः शिष्यैरुपेता आजग्मुः क
श्यपांगिरसादयः ८ तान्समेतान्महाभागानुपलभ्य वसूत्तमः पूजयामास धर्मज्ञो देशकालविभागवित् ९

भीष्मः १ सं तैः श्रेष्ठाः अश्वाः ये युक्तैः रथैः तत्र तदा २ कुबेरो धनदो यक्षैः ३ सानुगाः परिचारकसहिताः ४ तत्रासन् तत्
क्षणमेवागता इत्यर्थः । भरतपुंगवं भीष्मं ५ रेणुकासुतः परशुरामः । ६ कौशिको विश्वामित्रः ७ ब्रह्मरातः शुकः
आंगिरसो बृहस्पतिः ८ वसूत्तमो भीष्मः ९

कृष्णंचतत्प्रभावज्ञआसीनंजगदीश्वरं॥ हृदिस्थंपूजयामासमाययोपात्तविग्रहं॥१०॥

भा०१ ३२ हृदिसंस्थितंपुरतःआसीनंपूजयामास १० उपासीनान्समीपेउपविष्टान् प्रश्रयोविनयःप्रेमस्नेहः ताभ्यांउपसन्नान् पाठां
तरेताभ्यामवनतान् अभ्याचष्ट अभ्यभाषत।अनुरागास्रैःस्नेहाश्रुभिः अंधीभूतेनचक्षुषाददर्श ११ X संगतान् X अभिभा
षणंअहोइत्येकादशभिः।हेपांडुनंदनाः यूयंक्लिष्टंयथावदत्येवंजीवितुंनार्हथ।एतदहोकष्टं जुगुप्सितं।अहोअन्याय्यं
चैतत्।यतोयूयंविप्रधर्माच्युताश्रयाः विप्राःधर्मोअच्युतश्च आश्रयोयेषांते।कालकृतत्वेनशोकंवारयतिद्वाभ्यां १२

पांडुपुत्रानुपासीनान्प्रश्रयप्रेमसंगतान् अभ्याचष्टानुरागास्रैरंधीभूतेनचक्षुषा ११ अहोकष्टमहोन्याय्यं
यद्यूयंपांडुनंदनाः जीवितुंनार्हथाक्लिष्टं विप्रधर्माच्युताश्रयाः १२ संस्थितेतिरथेपांडौपृथाबालप्रजावधूः
युष्मत्कृतेबहून्क्लेशान्प्राप्तातोकवतीमुहुः १३ सर्वंकालकृतंमन्येभवतांचयदप्रियं सपालोयद्वशेलोको
वायोरिवघनावलिः १४ यत्रधर्मसुतोराजागदापाणिर्वृकोदरः कृष्णोऽस्त्रीगांडिवंचापंसुहृत्कृष्णस्त
तोविपत् १५ नह्यस्यकर्हिचिद्राजन्पुमान्वेदविधित्सितं यद्विजिज्ञासयायुक्तामुह्यंतिकवयोपिहि १६ वि

यद्वशेयस्यवशावर्तते अहोदुर्घटघटनापटुकालइत्याह। १४ कृष्णोऽर्जुनःअस्त्रीधन्वीततःतत्रापिविपत्दुःखं।न
नुकृष्णंकथंकालोतिक्रमेदित्यपेक्षायामाह।नह्यस्येति। १५ अस्यश्रीकृष्णस्येत्यंगुल्यानिर्दिशति।विधित्सितंक
र्तुमिष्टंयस्यविधित्सितस्यविजिज्ञासयातांकवयोपिमुह्यंति १६ ३२

देवतंचईश्वराधीनंइदंदुःखंदुःखादिव्यवस्यनिश्चित्यतस्येश्वरस्यानुविहितःअनुवर्तितःसन् कर्तरिक्तः हेनाथ।
कुलपरंपरागतस्वामिन् प्रभोसमर्थअनाथाःप्रजाःपाहि।अनुविधेयःपरमेश्वरश्चश्रीकृष्णएवेत्याह १७ एषवै
भगवान्सर्वेश्वरःयतःआद्यःपुमान्तत्रयतोनारायणःसाक्षात्।तदुपपादयति।अस्येति १८ अनुभावंप्रभा
वं १९ त्वंत्वज्ञानात्।यंत्वंमन्यसेमातुलेयंदेवक्याःसुतंप्रियंप्रीतिविषयंमित्रंप्रीतिकर्तारं।सुहृत्तंप्रत्युपकारा
नपेक्षोपकारकरं।सौहृदात्विश्वासात् सारथिंकृतवानसि।सचिवंमंत्रिणंच।नन्वीश्वरश्चेत् कथंनीचसारथ्यादौ

तस्मादिदंदैवतंजंव्यवस्यभरतर्षभ तस्यानुविहितोनाथानाथपाहिप्रजाःप्रभो १७ एषवैभगवान्साक्षा
दाद्योनारायणःपुमान् मोहयन्मायया लोकंगूढश्चरतिवृष्णिषु १८ अस्यानुभावंभगवान्वेदगुह्यत
मंशिवः देवर्षिर्नारदःसाक्षाद्भगवान्कपिलोनृप १९ यंमन्यसेमातुलेयंप्रियंमित्रंसुहृत्तमं अकरोःस
चिवंदूतंसौहृदादथसारथिं २० सर्वात्मनःसमदृशोह्यद्वयस्यानहंकृतेः तत्कृतंमतिवैषम्यंनिरवद्य
स्यनक्वचित् २१ तथाप्येकांतभक्तेषुपश्यभूपानुकंपितं यन्मेसूंस्त्यजतःसाक्षात्कृष्णोदर्शनमागतः २२

प्रवृत्तस्तत्राह २० तत्कृतंनीचोच्चकर्मकृतंयोग्यमितिमतेर्वैषम्यंक्वचिदपिनास्ति।कुतःनिरवद्यस्यरागादिशू
न्यस्यतत्कुतःअनहंकृतेः तच्चकुतःअद्वयस्यतदपिकुतःसमदृशःतत्रापिहेतुःसर्वस्यात्मनःयथेष्टंवाहेतुमद्भा
वः २१ तथापिसमत्वेपिहेभूपअनुकंपितंअनुकंपांयन्मेप्राणान्त्यजतःसाक्षात्स्वयमेवनंतुइंद्रा
दिरूपेणइदानींदेहत्यागपर्यंतंश्रीकृष्णावस्थानंप्रार्थयतिद्वाभ्यां २२

३३

या वदतीति विलंबं द्योतयति । अहं हि नोमीति स्वातंत्र्यं इदमिति अनात्मत्वेन ज्ञातं प्रसन्न ते हासीनं अरुणलोचनाभ्यां चउल्ल
सद्मुखिरां मुखांबुजं यस्य ध्यानस्य पंथा विषयो यो न्येभ्यः स्यते केवलं सोग्रतः स्थितः सन्मां प्रतीक्षतामित्यर्थः २४ तत्सा
नुकंपं वाक्यं आकर्ण्य २५ पुरुषस्वाभावेन विहितान् नरजातिजातिसाधारणान् वर्णयामासेति तृतीयेनान्वयः । यथा
वर्णं वर्णधर्मान् यथाश्रमं आश्रमधर्मान् वैराग्यरागाभ्यां क्रमेणाम्नातं । उभयं निवृत्तिप्रवृत्तिरूपं लक्षणं येषां तान् पु

मनत्यावेश्य मनो यस्मिन्वाचा यन्नाम कीर्तयन् । त्यजन्कलेवरं योगी मुच्यते कामकर्मभिः २३ स देवदेवो भग
वान्प्रतीक्षतां कलेवरं यावदिदं हिनोम्यहम् । प्रसन्नहासारुणलोचनोल्लसन्मुखांबुजो ध्यानपथश्चतुर्भुजः
२४ सूत उ० युधिष्ठिरस्तदाकर्ण्य शयानं शरपंजरे । अपृच्छद्विविधान्धर्मानृषीणामनुशृण्वतां २५ पुरुष
स्वभावविहितान्यथावर्णं यथाश्रमं । वैराग्यरागोपाधिभ्यामाम्नातोभयलक्षणान् २६ दानधर्मान्राजधर्मा
न्मोक्षधर्मान्विभागशः । स्त्रीधर्मान्भगवद्धर्मान्समासव्यासयोगतः २७ धर्मकामार्थमोक्षांश्च सहोपाया
न्यथामुने । नानाख्यानेतिहासेषु वर्णयामास तत्त्ववित् २८ धर्मं प्रवदतस्तस्य स कालः प्रत्युपस्थितः । यो योगिन
श्छंदमृत्योर्वाञ्छितस्तूत्तरायणः २९

नस्तत्रैव विशेषमाह । २९ मोक्षधर्मान् शमदमादीन् भगवद्धर्मान् हरितोषणादीन् द्वादश्यादिनियमरूपान् समास
व्यासौ संक्षेपविस्तारौ ताविव योगौ उपायौ ततस्ताभ्यां २७ धर्मादींश्च यथाधिकारं प्रतिनियतोपायसहितान् य
थावत् नानाख्यानेषु इतिहासाः ते यथा संति तथा वर्णयामास २८ छंदेन इच्छया मृत्युर्यस्य २९ ३३

सहस्रणीः युद्धे समीपस्थान् सहस्रं रथिनो नयति पालयतीति सहस्रणीः भीष्मः । सहस्रगिरीति पाठे सहस्रार्थवती गीः
लसंतौ शोभमानौ पीतौ पटावंबरे यस्य तस्मिन् अमीलितदृग् व्यवधारयत् ३० अनयैव भुद्ध्या धारणया हतमशुभं यस्य
सः । तस्य श्रीकृष्णस्य ईक्षया रूपा हष्यैव गता आयुधव्यथा यस्य सः अतश्च निवृत्तसर्वेंद्रियवृत्तीनां विभ्रमो विविधभ्रम
णं यस्मात् सः जन्यं देहं विसृजन् जनार्दनं तुष्टाव अस्तौत् । परमफलरूपां श्रीकृष्णे रतिं प्रार्थयितुं प्रथमं स्वकृतमर्पयति ३१
इतीति नानाधर्माद्युपायैः मतिः धारणलक्षणा उपकल्पिता समर्पिता । कं सात्वतानां पुंगवे श्रेष्ठे भगवति वितृष्णा निःकामा वि
भूम्नि विगतो भूमा यस्मात् तस्मिन् यमीक्ष्य अन्यत्र महत्त्वं नास्तीत्यर्थः । तदेव परमैश्वर्यमाह । स्वसुखं स्वस्वरूपभूतं परमानंदं

तदोपसंहृत्य गिरः सहस्रणीर्विमुक्तसंगं मन आदिपूरुषे । कृष्णे लसत्पीतपटे चतुर्भुजे पुरःस्थितेऽमीलितदृग्व्यधारयत् ३०
विशुद्धया धारणया हताशुभस्तदीक्षयैवाशु गतायुधव्यथः । निवृत्तसर्वेन्द्रियवृत्तिविभ्रमस्तुष्टाव जन्यं विसृजञ्जनार्दनं ३१
भीष्म उ० इति मतिरुपकल्पिता वितृष्णा भगवति सात्वतपुंगवे विभूम्नि । स्वसुखमुपगते क्वचिद्विहर्तुं प्रकृतिमुपेयुषि यद्भ
वप्रवाहः ३२ त्रिभुवनकमनं तमालवर्णं रविकरगौरवांबरं दधाने । वपुरलककुलावृताननाब्जं विजयसखे रतिरस्तु मेऽनवद्या ३३

उपगते प्राप्तवत्येव क्वचित्कदाचित् विहर्तुं क्रीडितुं प्रकृतिमुपेयुषि स्वीकृतवति न तु स्वरूपतिरोधानेन जीववत् सा रंतुमित्यर्थः । वि
हर्तुमित्युक्तं प्रपंचयति । यद्यतः प्रकृतेः भवप्रवाहः सृष्टिपरंपरा भवति । इदानीं श्रीकृष्णमूर्तिं निर्णयन् रतिं प्रार्थयति ३२ त्रि
लोक्यामिकमेव यत्कमनीयं तद्वपुर्दधाने श्रीकृष्णे मे रतिः अस्तु तमालवत् नीलो वर्णो यस्य तत् प्रातःकालीनारवेः करा इव स्व
तएव गौरे पीते वरे निर्मले अंबरे यस्मिन् तत् अलककुलैः उपरि आवृतं आननं मुखाब्जं यस्मिन् तत् । विजयसखे पार्थसारथौ

अनवद्या अहैतुकी फलाभिसंधिरहिता रतिरस्तु विजयसखित्वमेवानुवर्णयन् रतिं प्रार्थयते ३३

भा०१ ३४ युधियुद्धेतुरंगाणांखुरजः तुरगरजः तेनविधूम्रास्तरक्तेचविष्वक् इतस्ततः कचाः कुंतलाः तैर्विलुलितं विकीर्णं श्रमवारिस्वेदबिंदुरू
पंतेनत्वक्वालत्वम धौतकेनअलंकृतमास्यंयस्यतस्मिन् श्रीकृष्णेममात्मामनोस्तुरमतामित्यर्थः। पुनःकिंभूतेमदीयैस्तीक्ष्णैर्नि
शितैःशरैःविभिद्यमानाः सत्वचस्यशरीरेवविलसत्कवचंयस्यतस्मिन् ३४ सेनयोरुभयोर्मध्येरथंस्थापयमेच्युत। यावदेतान्
निरीक्षेहंयोद्धुकामानवस्थितान् इतिसख्युरर्जुनस्यवचोनिशम्यसपदितत्क्षणमेवस्वपरयोः सैन्ययोर्मध्येस्थितेपार्थस
खेश्रीकृष्णेमेममरतिरस्तु। तत्रस्थित्वाकृतंसर्वंदर्शयति। परस्यदुर्योधनस्यसैनिकानांआयुःअक्ष्णाकालदृष्ट्याहृतव

युधितुरगरजोविधूम्रविष्वक्कचलुलितश्रमवार्यलंकृतास्ये ममनिशितशरैर्विभिद्यमानत्वचिविलसत्कवचे
स्तुकृष्णआत्मा ३४ सपदिसखिवचोनिशम्यमध्येनिजपरयोर्बलयोरथंनिवेश्य स्थितवतिपरसैनिकायुरक्ष्णा
हृतवतिपार्थसखेरतिर्ममास्तु ३५ व्यवहितपृतनामुखंनिरीक्ष्यस्वजनवधाद्विमुखस्यदोषबुद्ध्या कुमति
महरदात्मविद्ययायश्चरणरतिः परमस्यतस्यमेस्तु ३६

तिअसौद्रोणः असौकर्णः इतितत्रप्रदर्शनव्याजेनदृष्ट्यैवसर्वेषामायुराकृष्यअर्जुनस्यजयंकृतवति नकेवलंअर्जु
नस्यसपत्नायुर्हरणेनैवजयमावहत् किंत्वविद्याहरणेनापीत्याह। ३५ व्यव दूरेस्थितायाःपृतना याःमु
खमिवमुखंअग्रेस्थितान्भीष्मादीन्निरीक्ष्येत्यर्थः। स्वजनवधाद्विमुखस्यनिवृत्तस्य। तदुक्तंगीतासु। एवमुक्त्वार्जु ३४
नःसंख्येरथोपस्थउपाविशत्। विसृज्यसशरंचापंशोकसंविग्नमानसइति। कुमतिंअहंहंतेत्यादिकुबुद्धिंममतुमहांतंअनु
ग्रहंकृतवानित्याहद्वाभ्यां ३६

स्वनिगमंस्वप्रतिज्ञांअशस्त्रएवाहंसाहाय्यमात्रंकरिष्यामीत्येवंरूपांमत्प्रतिज्ञांऋतंसत्यंयथाभवतितथाअधिकांकर्तुंरथ
स्थःसन्अवप्लुतःसहसैवावतीर्णः मांमभिमुखमधावत् कथंभूतः धृतरथचरणः धृतंरथचरणंचक्रंयेनसः उत्क्षिप्ततेइभंहं
तुंहरिःसिंहइव। तदाचसंरंभेणमानुष्यनाट्यविस्मृतेरुदरस्थसर्वभूतभुवनभारेणप्रतिपदंचलत्कुचलतीगौःपृथिवीय
स्मात् तेनैवसंरंभेणपथिनगंपतितेउत्तरीयंवस्त्रंयस्यसमुकुंदोगतिर्मेभवत्वितिउत्तरेणान्वयः ३७ एवंयदामामभ्यगात्
तदास्मयमानस्यआततायिनोधन्विनोमेशितैस्तीक्ष्णैर्विशिखैर्हतः। अतोविशीर्णदंशः विध्वस्तकवचः क्षतजेनरुधिरेण
परिप्लुतोव्याप्तः सन् प्रसभंबलात्वारयंतंअर्जुनमतिक्रम्यमद्वधार्थमभिससार अभिजगाम। एवंयोलोकदृष्ट्याअर्जुनप

स्वनिगममपहायमत्प्रतिज्ञामृतमधिकर्तुमवप्लुतोरथस्थः धृतरथचरणोभ्ययाच्चलद्गुर्हरिरिवहंतुमिभंगतो
त्तरीयः ३७ शितविशिखहतोविशीर्णदंशःक्षतजपरिप्लुतआततायिनोमे प्रसभमभिससारमद्वधार्थंसभ ३८
वतुमेभगवान्गतिर्मुकुंदः ३८ विजयरथकुटुंबआत्ततोत्रे धृतहयरश्मिनितच्छ्रियेक्षणीये भगवतिरतिरस्तुमे
मुमूर्षोर्यमिहनिरीक्ष्यहतागताःस्वरूपं ३९

क्षपातीवियस्थितः। वस्तुतस्तुमामेवानुग्रहंकृतवान्। यन्मद्भक्तेनोक्तंवचः मायथास्त्भगवानिमेगतिर्भवत्वित्यर्थः। ३८ वि
जयोर्जुनःतस्यरथएवकुटुंबंअकृत्स्नरक्षणीयोयस्यआत्तंतोत्रंप्रतोदोयेनतस्मिन् धृताश्चतेहयानांरश्मयोप्रग्रहा
स्तेसंतियस्यतस्मिन् तच्छ्रियातयासारथ्यश्रियाईक्षणीयेशोभमानेमुमूर्षोर्मत्रेमिध्योः ननुअन्यायवर्तिनिकथंरतिः
प्रार्थ्यतेअतआह। भगवतिअचिंत्यैश्वर्यइत्याह। इहयुद्धेयेहताःतेसर्वेयंश्रीकृष्णंनिरीक्ष्यस्वरूपंप्रापुरिततत्रचिचं। यतोमहा

ललितगतिश्च विलासश्च हासादितः मंजुगत्यादिभिः आमोदितैर्वा कल्पितउरुमानः पूजा यासां ताः अतः उत्कटेन मदेन अंधाः
अतएव तदेकचित्तत्वेन तस्य कृतं कर्म गोवर्धनोद्धरणादिकं अनुकृतवत्यो गोपवध्वः यस्य प्रकृतिं स्वरूपमगमन् । मकारलोप
स्त्वार्षः । किल प्रसिद्धं तस्मिन्मे रतिरस्त्विति पूर्वेणैवान्वयः । राजसूये पूज्यतामनुस्मरन्नाह ४० मुनिगणैर्नृपवरैश्च संकुले
व्याप्ते अंतःसदसि सभामध्ये युधिष्ठिरस्य राजसूये येषां मुनिगणादीनां ईक्षणीयः अहो रूपमहो माहात्म्यमित्येवमाश्चर्येणा
वलोकनीयः सन् उपपेदे प्राप । एष जगतामात्मा मम दृशिगोचरः दृष्टिविषयः सन् आविः प्रकटो वर्तते । अहो मे भाग्य

ललितगतिविलासवल्गुहासप्रणयनिरीक्षणकल्पितोरुमानाः । कृतमनुकृतवत्य उन्मदांधाः प्रकृतिमगन्
किल यस्य गोपवध्वः ४० मुनिगणनृपवर्यसंकुलेंऽतःसदसि युधिष्ठिरराजसूय एषां । अर्हणमुपपेद ईक्षणी
यो मम दृशिगोचर एष आविरात्मा ४१ तमिममहमजं शरीरभाजां हृदि धिष्ठितमात्मकल्पितानां । प्रतिदृशमि हृदि
वनैकधार्कमेकं समधिगतोऽस्मि विधूतभेदमोहः ४२ सूत उ० कृष्ण एवं भगवति मनोवाग्दृष्टिवृत्तिभिः । आ
त्मन्यात्मानमावेश्य सोंतःश्वास उपारमत् ४३

मिति भावः । सोहं कृतार्थोस्मीत्याह । ४१ तमिमम् अजं सम्यगधिगतः प्राप्तोस्मि । सम्यक्त्वमाह विधूतभेदमोहः । त
दर्थं भेदस्योपाधिकत्वमाह । आत्मकल्पितानां स्वयंनिर्मितानां शरीरभाजां प्राणिनां हृदि हृदि प्रति हृदयं धिष्ठितं अधि
ष्ठितं । अकारलोपस्त्वार्षः । नैकधा अनेकधा अधिष्ठानभेदात् अनेकधा भानमित्यर्थः । अत्र दृष्टांतः । सर्वप्राणिनां दृशं दृशं
प्रति एकमेवार्कमनेकधा यथा तीतमेवेति । ४२ मनोवाग्दृष्टीनां वृत्तिभिः परमात्मनि श्रीकृष्णे अंतरेव लीनः श्वासो यस्य सः ४३ ३५

निष्कले निरुपाधौ संपद्यमानं मिलितं आज्ञाय ज्ञात्वा ४४ देवैर्मानवैश्च वादिताः राज्ञां मध्ये ये साधवः अनसूयवः ४५ निर्ह
रणादीनि संस्कारादीनि सम्यक्प्रेतस्य मुक्तस्यापीत्यर्थः ४६ ४७ पितरं धृतराष्ट्रं तपस्विनी संतापवती ४८ राज्ञा युधि
ष्ठिरः ४९ प्रथमे नवमः दशमे कृतकार्यस्य हस्तिनापुरतो हरेः । स्त्रीभिः संस्तूयमानस्य वर्ण्यते द्वारकागमः ॥ १ राज्यं
चकारेत्युक्तं । तत्र पृच्छति हत्वेति । स्वरिक्थं धनं स्पर्द्धते स्म ये ते तथा यद्वा स्वरिक्थाय स्पर्द्धते संग्रामो येषां अतएव वनादिल

संपद्यमानमाज्ञाय भीष्मं ब्रह्मणि निष्कले । सर्वे बभूवुस्ते तूष्णीं वयांसीव दिनात्यये ४४ तत्र दुंदुभयो नेदुर्देवमान
ववादिताः । शशंसुः साधवो राज्ञां खात्पेतुः पुष्पवृष्टयः ४५ तस्य निर्हरणादीनि संपरेतस्य भार्गव । युधिष्ठिरः कार
यित्वा मुहूर्तं दुःखितोऽभवत् ४६ तुष्टुवुर्मुनयो हृष्टाः कृष्णं तद्गुह्यनामभिः । ततस्ते कृष्णहृदयाः स्वाश्रमान्प्रययुः पु
नः ॥ ४७ ततो युधिष्ठिरो गत्वा सहकृष्णो गजाह्वयं । पितरं सांत्वयामास गांधारीं च तपस्विनीं ४८ पित्रा चानुमतो
राजा वासुदेवानुमोदितः । चकार राज्यं धर्मेण पितृपैतामहं विभुः ४९ इति श्रीभाग० प्रथमस्कंधे नवमो
ध्यायः शौनक उवाच हत्वा स्वरिक्थस्पृध आततायिनो युधिष्ठिरो धर्मभृतां वरिष्ठः । सहानुजैः प्रत्यवरुद्धभोजनः
कथं प्रवृत्तः किमकारषीत्ततः १ सूत उवाच वंशं कुरोर्वंशदवाग्निनिर्हृतं संरोहयित्वा भवभावनो हरिः । निवेशयि
त्वा निजराज्य ईश्वरो युधिष्ठिरं प्रीतमना बभूव ह २

ण आततायिनः तान्हत्वा प्रत्यवरुद्धभोजनः बंधुवधदुःखेन संकुचितभोगः राज्यलोभेन प्राप्तभोगो वा कथं राज्ये प्रवृत्तः प्रवृत्तो
वा ततः किमकारषीत् । राज्यप्रवृत्तेः श्रीकृष्णस्य प्रीतिं पर्यालोच्य प्रवृत्त इत्याशयेनोत्तरमाह । वंशांकुरोः संरोपयित्वा परीक्षिद्रूपेण न

संरोहः अंकुरितं ह्यत्वा कथंभूतं वंशं वंशदवाग्निनिर्हृतं वंश एव दवो वह्निः नंतस्मा हेयेतो क्रोधरूपोग्निः तेननिर्हृतं दग्धं निजराज्ये
निवेश्यच २ प्रवृत्तो हेतुमुक्त्वा किमकार्षीदित्यस्योत्तरमाह। निशम्येति। प्रवृत्तं यद्विज्ञानं परमेश्वराधीनं जगन्न स्वतंत्रमित्येवंभूतं
तेन विधूतो विभ्रमो अहं कर्तेत्येवंभूतो मोहो यस्य सः। अनुजैरनुवर्तितः सेवितः सन् अजितः श्रीकृष्ण एव आश्रयो यस्य सः प

निशाम्य भीष्मोक्तमथाच्युतोक्तं प्रवृत्तविज्ञानविधूतविभ्रमः। शशास गामिंद्र इवाजिताश्रयः परिध्युपांतामनुजा
नुवर्तितः ३ कामं ववर्ष पर्जन्यः सर्वकामदुघा मही। सिषिंचुस्म व्रजा गावः पयसोधस्वतीर्मुदः ४ नद्यः
समुद्रा गिरयः सवनस्पतिवीरुधः। फलंत्योषधयः सर्वाः काममन्वृतु तस्य वै ५ नाधयो व्याधयः क्लेशा दै
वभूतात्महेतवः। अजातशत्रावभवन् जंतूनां राज्ञि कर्हिचित् ६ उषित्वा हास्तिनपुरे मासान्कतिपयान्हरिः
सुहृदां च विशोकाय स्वसुश्च प्रियकाम्यया ७ आमंत्र्य चाभ्यनुज्ञातः परिष्वज्याभिवाद्य तं। आरुरोह रथं कै
श्चित्परिष्वक्तोभिवादितः ८

रिधिः समुद्रः तत्पर्यंतां गां पृथ्वीं पालयामास ३ तस्य राज्यमनुवर्णयति। काममिति त्रिभिः मही सर्वकामदोग्ध्री बभू
व। व्रजान् गोष्ठानि ऊधस्वत्यः ऊधः क्षीराशयः तद्वंत्यः स्थूलोधस इत्यर्थः सिषिचुः अभ्यषिंचन् ४ अन्वृतु प्रतिऋ
तो ५ आधयो मनोव्यथाः। व्याधयो रोगाः क्लेशाः शीतोष्णादिकृताः दैवभूतात्मानि च आत्मा च हेतुर्येषां आधिदै
विकादीनां ते जंतूनां नाभवन् ६ इदानीं द्वारकाभिगमनं निरूपयितुमाह। उषित्वेति स्वसुः सुभद्रायाः ७ तं युधिष्ठिरं ८ ३६

युयुत्सुर्धृतराष्ट्राद्वैश्यायां भार्यायां जातः। गोतमः कृपः यमौ नकुलसहदेवौ ९ अन्याश्च स्त्रियः मत्स्यसुता उत्तरा तस्याः
पुनर्यद्गर्भरक्षक कृष्णविरहे मोहाधिक्यात्। यद्वा मत्स्यसुता सत्यवती कृष्णविरहासहने कैमुत्यन्यायेनाह। इत्याह
१० सतां संगाद्धेतोः मुक्तः पुत्रादिविषयो दुःसंगो येन सः सद्भिः कीर्त्यमानं रुचिकरं यशो यस्य सकृदप्याकर्ण्य सत्संगं त्यक्तुं
न शक्नोति ११ दर्शनादिभिः तस्मिन् श्रीकृष्णे न्यस्ता अभ्यस्ता धीर्येषां ते विरहं सोढुं कथं शक्ता भवंति १२ अतए

सुभद्रा द्रौपदी कुंती विराटतनया तथा गांधारी धृतराष्ट्रश्च युयुत्सुर्गौतमो यमौ ९ वृकोदरश्च धौम्यश्च
स्त्रियो मत्स्यसुतादयः नसेहिरे विमुह्यंतो विरहं शार्ङ्गधन्वनः १० सत्संगान्मुक्तदुःसंगो हातुं नोत्सहते बुधः कीर्त्य
मानं यशो यस्य सकृदाकर्ण्य रोचनं ११ तस्मिन्न्यस्तधियः पार्थाः सहेरन्विरहं कथं दर्शनस्पर्शनालापशयनासन
भोजनैः १२ सर्वे तेनिमिषैरक्षैः तमनुद्रुतचेतसः वीक्षंतः स्नेहसंबंधाद्विचेलुस्तत्र तत्र ह १३ न्यरुंधन्नुद्गलद्बाष्प
मौत्कंठ्याद्देवकीसुते निर्यात्यगारान्नोभद्रमिति स्याद्बांधवस्त्रियः १४ मृदंगशंखभेर्यश्च वीणापणवगोमुखाः
धुंधुर्यानकघंटाद्या नेदुर्दुंदुभयः समं १५

वश्च अनिमिषैः नेत्रैः तमेव वीक्ष्यमाणाः तत्र तत्राहणानृपनाद्यर्थं चलंति स्म। यतः स्नेहेन सम्यक् बद्धाः अत एव तं अनुग
तानि चेतांसि येषां ते १३ अगारान्निर्याति निर्गच्छति सति औत्कंठ्याद्धेतोः उद्गलत् स्रवद्बाष्पं अश्रु न्यरुंधन्
नेत्रेष्वेव स्तंभितवत्यः तत्र हेतुः अभद्रं नो स्यात्। अमंगलं मा भूत् १४ मृदंगादयो दश वाद्यभेदाः। समं एककालं १५

भा०१
३७ प्रेमव्रीडास्मितपूर्वैरीक्षणैर्यासांताः १६ गुडाका निद्रा तस्याः ईशः गुडाकेशः जितनिद्र इत्यर्थः १७ व्यजने चामरे उग्रहः तुः मधु
पतिः श्रीकृष्णः १८ अनुरूपाश्च निर्गुणस्य परमानंदस्य सुखी भवेत्यादयो अननुरूपाः गुणात्मनो मानुष्य नाट्यावतारे अनुरूपा
श्चेत्यर्थः १९ सर्वासां श्रुतीनां मनोहरः उपनिषद्भोपि सूर्निमित्यः सत्यः संतः उत्तमश्लोकस्य नरो भिप्रायर्थः। न चैतेऽज्ञः सौंदर्यातिशयेन वि
स्मिताभ्यः सखिभ्यो याः स्त्रियः कथयंति नात्र विस्मयः कार्यः साक्षादीश्वरत्वादस्येति सत्वा इति चतुर्भिः २० वैस्मरणे किलेतिश

प्रासादशिखरारूढाः कुरुनार्यो दिदृक्षया ववृषुः कुसुमैः कृष्णं प्रेमव्रीडास्मितेक्षणाः १६ श्वेतातपत्रं जग्राह मुक्तादा
मविभूषितं रत्नदंडं गुडाकेशः प्रियः प्रियतमस्य ह १७ उद्धवः सात्यकिश्चैव व्यजने परमाद्भुते विकीर्यमाणः कुसुमैरेजे म
धुपतिः पथि १८ अश्रूयंताशिषः सत्यास्तत्र तत्र द्विजेरिताः नानुरूपानुरूपाश्च निर्गुणस्य गुणात्मनः १९ अन्योन्य
मासीत्संजल्प उत्तमश्लोकचेतसां कौरवेंद्रपुरस्त्रीणां सर्वश्रुतिमनोहरः २० स्त्रिय ऊ० स वै किलायं पुरुषः पुरातनो य
एक आसीदविशेष आत्मनि अग्रे गुणेभ्यो जगदात्मनीश्वरे निमीलितात्मन्निशि सुप्तशक्तिषु २१

सिध्यां प्रमाणद्योतनं। य एक एवाद्वितीयः पुरुषः आसीत् स एवासौ श्रीकृष्णः कुत्र आसीत् अविशेषे आत्मनि निःप्रपंचे कदा गु
णेभ्यः अग्रे गुणक्षोभात् पूर्वं निमीलितात्मन् निमीलितात्मनि इति तु सप्तम्यंतपदं जातावेकवचनं। ईश्वरे लीनरूपेषु जीवेषु स
त्स्वित्यर्थः। ननु जीवानां ब्रह्मत्वात् कथं लयस्तत्राह। सुप्तासु शक्तिषु सतीषु जीवोपाधिभूतसत्वादिशक्तिलय एव जीवलय इ ३७
त्यर्थः। तदेवं सृष्टेरादौ प्रलयानंतरं च निःप्रपंचावस्थानमुक्तं सृष्टिप्रलययोर्मध्ये सप्रपंचावस्थानमाहुः २१

स एव अप्रच्युतस्वरूपस्थित एव प्रकृतिं अनुससार। अधिष्ठितवान् भूयः पुनरिति सृष्टिप्रवाहस्यानादित्वात् कीदृशां निजवीर्येण नो
दितां। स्वकालशक्तिप्रेरितां। स्वांशभूतानां जीवानां मायां मोहिनीं। अत एव सिसृक्षतीं स्रष्टुमिच्छंतीं किमर्थमनुससार। अनाम
रूपे आत्मनि जीवे रूपनामनी विधातुमिच्छन्। उपाधिसृष्ट्या जीवानां भोगायेत्यर्थः। कर्माणि च विधातुं वेदान् कृतवानिति
आहुः शास्त्रकृदिति। अस्य दर्शनं अतिदुर्लभमप्यस्माभिर्महाभाग्यवशाल्लब्धमित्याहुः २२ स वै अयं यस्य पदं स्वरू
पं अंघ्रिं वा निर्जितो मातरिश्वा प्राणो यैस्ते सूरय एव पश्यंति। केन भक्त्या उत्कलितो उत्कंठितो अमलो यः आत्मा बुद्धिः

स एव भूयो निजवीर्यचोदितां स्वजीवमायां प्रकृतिं सिसृक्षतीं अनामरूपात्मनि रूपनामनी विधित्समानो
नुससार शास्त्रकृत् २२ स वा अयं यत्पदमत्र सूरयो जितेंद्रिया निर्जितमातरिश्वनः पश्यंति भक्त्युत्कलि
तामलात्मना नन्वेष सत्वं परिमार्ष्टुमर्हति २३ स वा अयं सख्यनुगीतसत्कथो वेदेषु गुह्येषु च गुह्य
वादिभिः य एक ईशो जगदात्मलीलया सृजत्यवत्यत्ति न तत्र सज्जते २४

तेन दृश्यते त्वग्र्यया बुध्या इति श्रुतेः। बुद्धिवैमल्ये अस्याप्ययमेव हेतुरित्याहुः। हे सखि एष एव सत्वं बुद्धिं परिमार्ष्टुं सम्य
क् शोधयितुमर्हति। ननु योगादय इत्यर्थः। यद्वा नु अहो एष सत्वे ज्ञानं परिमार्ष्टुं नाशयितुं दूरगमने नाप्रसन्नी भवितुं
नार्हति। किंतु नेन सह गंतव्यमित्यर्थः। पुण्यश्लोकतामाहुः २३ हे सखि यो वेदेषु रहस्यागमेषु च रहस्यनिरूपकैः
अनुगीतसत्कथः। अनुगीता सती कथा यस्य सोयमेव। गानप्रकारमाहुः। एक ईश इत्यादि। एवंभूतस्य नानावतारे कारणमाहुः
२४

तमोव्याप्ताधीर्येषांतेनृपाःअधर्मेणकेवलंजीवंतिशाणन्नुपलं तितत्रतदाएषएवभवायस्थित्यैसत्वतः। विशुद्धसत्वेनरूपाणि दधारऋगादीनिधत्ते प्रकटयतियुगेयुगेततदवसरे भगंऐश्वर्यंसत्यंसत्यप्रतिज्ञत्वंऋतंयथार्थोपदेशकत्वंदयांअद्भुतकर्मत्वंविशेषतःश्रीकृष्णावतारसौअप्यंवर्णयतिपंचभिः २५ यद्यस्मादेषपुरुषोत्तमःश्रियःपतिःस्वजन्मना यदोःकुलंअंचतिपूजयतिसत्करोति। अतःश्लाघ्यतमंतच्चंक्रमणेनमधोर्वनंमथुरांसत्करोति। अतस्तत्पुण्यतममिति २६
अहोबतअत्याश्चर्यंकिंतत्कुशस्थलीद्वारकास्वर्गअत्कृष्टइतियद्यशस्तस्यतिरस्करीपरिभवकर्त्री शुचिश्च पुण्ययशस्क

यदाह्यधर्मेणतमोधियोनृपाजीवंतितत्रैषहिसत्वतःकिल धत्ते भगंसत्यमृतंदयांयशोभवायरूपाणि दधद्युगे
युगे २५ अहोअलंश्लाघ्यतमंयदोःकुलंअहोअलंपुण्यतमंमधोर्वनं यदेषपुंसामृषभःश्रियःपतिःस्वजन्म
नाचंक्रमणेनचांचति २६ अहोबतस्वर्यशसस्तिरस्करीकुशस्थलीपुण्ययशस्करीभुवः पश्यंतिनित्यंयदनु
ग्रहेषितंस्मितावलोकंस्वपतिंस्मयत्प्रजाः २७ नूनंव्रतस्नानहुतादिनेश्वरःसमर्चितोह्यस्यगृहीतपाणिभिः
पिबंतियाःसख्यधरामृतंमुहुर्व्रजस्त्रियःसंमुमुहुर्यदाशयाः २८

री। पुण्ययशःकर्त्रीयद्यतःयत्रत्याःप्रजाःसर्वास्वानुग्रहेणईक्षितंप्रेक्षितंस्मितपूर्वावलोकंउषितमितिपाठेस्वानुग्रहार्थमुषि
तंकृतनिवासेनैतत्स्वर्गेस्तीत्यर्थः। स्वस्यात्मनःपतिंश्रीकृष्णंनतुपित्रादिवद्देहपतिंनित्यंपश्यंतिस्म। अहोभाग्यमेस्माकं
मण्यतेत्यर्थः २७ हेसख्यःअस्यगृहीतपाणिभिःपत्नीभिःईश्वरोयमेवनूनंजन्मांतरेषुअर्चितः। यस्मिन्नधरेआशयाश्चि
त्तंयासांताःसमोहंप्राप्ताइतिमनोहरत्वमुक्तंतत्प्रपंचयतिद्वाभ्यां २८ ३८

वीर्यप्रभाववश्शुल्कंमूल्यंतेनभुष्मिणःबलिष्ठान्प्रद्युम्नश्चसांबश्चअबश्चसुतायासांरुक्मिणीशांबवतीनाग्नजिती
नीताआदिर्यासांसत्यभामादीनांताःयाश्चपराःअस्यश्लोकस्यउत्तरश्लोकेनान्वयः। २९ एताःस्त्रीत्वमेवकेवलंपरंसाधु
शोभनंकुर्वते। अपास्तंपेशलंभद्रंस्वातंत्र्यंयस्मात्निरस्तंशौचंशुचित्वंयस्मात् तथाभूतमपिजातुकदाचित्। अपिनापैति
ननिर्गच्छति। आहृतिभिर्व्याहारैःयद्वापारिजातादिप्रियवस्त्वाहरणैःहृदिस्पृशात्। आनंदयन् २९ एवंविधाःविचित्राःगिरः
यावीर्यशुल्केनहृताःस्वयंवरेप्रमथ्यचैद्यप्रमुखान्हिशुष्मिणः प्रद्युम्नसांबांबसुतादयोपरायाश्चाहृताभौमवधेसह
स्रशः २९ एताःपरंस्त्रीत्वमपास्तपेशलंनिरस्तशौचंबतसाधुकुर्वते यासांगृहात्पुष्करलोचनःपतिर्नजात्वपैत्या
हृतिभिर्हृदिस्पृशन् ३० एवंविधागदंतीनांसगिरःपुरयोषितां निरीक्षणेनाभिनंदन्सस्मितेनययौहरिः ३१
अजातशत्रुःपृतनांगोपीथायमधुद्विषः परेभ्यःशंकितस्नेहात्प्रायुंक्तचतुरंगिणीं ३२ अथदूरागतान्शौरिःकौर
वान्विरहातुरान् संनिवर्त्यदृढंस्निग्धान्प्रायात्स्वनगरींप्रियैः ३३ कुरुजांगलपांचालान्शूरसेनान्सयामुनान्
ब्रह्मावर्तंकुरुक्षेत्रंमत्स्यान्सारस्वतानथ ३४ मरुधन्वमतिक्रम्यसौवीराभीरयोःपरं आनर्तान्भार्गवोपागाच्छ्रांत भा
सस्मितेननिरीक्षणेनअभिनंदन्सहर्षयन् ३० मधुद्विषोगोपीथायरक्षणायस्नेहात् तवाहोमनाग्विभुः ३५
रेभ्यःशत्रुभ्यःशंकितैःसह ३२ कुरुक्षेत्रंकुरुदेशांतर्गतंयेचक्रमोत्तरविवक्षितः X तैःसहहस्त्यश्वरथपादातसेनांगंचतु
र्विधांपृतनांसेनां ३१ पांडोःकुरुवंशजत्वात्पांडवाअपिकौरवाःएवतान्प्रियैरुद्धवादि X मरुन्निरुदकोदेशःधन्वोप्य
नोदकःआनर्तास्त्योद्वारकादेशाः। सविभुःउपागात्प्राप्तः। हेभार्गवमनाक्ईषत्श्रांताःवाहाःयस्यसः ३५

भा०१ ३९ तत्रतत्रतस्मिंस्तस्मिन्देशेतत्रत्यैर्जनैःप्रत्युद्यतानिनिवेदितानिअर्हणानिउपायनानियस्यसः। सायंअपराह्णे। पश्चाद्दिशं प
श्चिमांदिशंभेजेप्राप्तः। तदागविष्ठःस्वर्गस्थःसूर्यःगांउदकंगतःअस्तंगतइत्यर्थः। अह्नोवाप्रवसानरूपेत्यपःसायंप्रविशतीति
श्रुतेः। यद्वासायंकालेआनेरथादवतीर्यगविष्ठःभूमौस्थितः। ततोगांजलाशयंगतःसन्पश्चाद्दिशंभेजे। संध्यांउपासितवान्।
इतिप्रथमेदशमः एकादशेरतिःसम्यग्यादवेंद्रस्यवर्ण्यते। आनर्तैःस्तूयमानस्यपुरींनिर्विश्यबंधुभिः। उत्सवैस्तत्र
तत्रतत्रतत्रत्यैर्हरिःप्रत्युद्यतार्हणः सायंभेजेदिशंपश्चाद्गविष्ठोगांगतस्तदा ३५ इतिश्रीभागवतेप्रथमस्कंधे
श्रीकृष्णप्रयाणेदशमोध्यायः १० सूतउ० आनर्तान्सउपव्रज्यस्वृद्धाञ्जनपदान्स्वकान् दध्मौदरवरंतेषांविषा
दंशमयन्निव १ सउच्चकासेधवलोदरोदरोप्युरुक्रमस्याधरशोणशोणिमा दाध्मायमानःकरकंजसंपुटेयद
ब्जखंडेकलहंसउत्स्वनः २ तमुपश्रुत्यनिनदंजगद्भयभयापहं प्रत्युद्ययुःप्रजाःसर्वाभर्तृदर्शनलालसाः ३
तत्रोपनीतबलयोरवेर्दीपमिवादृताः आत्मारामंपूर्णकामंनिजलाभेननित्यदा ४
६
वत्पोरमुदंडध्वजतोरणं। उल्लसद्दलदीपालिस्वपुरंप्रभुराविशत्। न्करद्वान्समृद्धान्स्ववरंपांचजन्यंदध्मौवादि
तवान् १ दरःशंखःउच्चकासेशुशुभे २ जगतोयद्भयंमरणंतस्यभयस्यनाशनं। प्रत्युद्ययुःप्रतिजग्मुः। भर्तुःश्रीकृष्णद
र्शनेलालसंऔत्सुक्यंयासांताः ३ तत्रतस्मिन्श्रीकृष्णेउपनीताःबलयःउपायनानियाभिः। निरपेक्षेपितस्मि
न्आदरेणसमर्पणेदृष्टांतः। रवेर्दीपमिवेति ४ ३९

पितरंअर्भकाइव। तंसर्वसुहृदंअवितारंऊचुः। महत्वेनैवाविंतारंनतुकामेनअत्रहेतुःआत्मारामंतत्रापिहेतुः। परमानंदनिजरूप
लाभेनैवपूर्णकामंकिमूचुरित्याह ५ विरिंचोब्रह्मावैरिंच्याःसनकादयःइहसंसारेपरंक्षेमंमिच्छतांपरायणंपरमेश्वर
णंपरेषांब्रह्मादीनांप्रभुःकालोपियत्रनप्रभुःअतः ६ भवायउद्भवायनोस्माकंत्वंभवहेविश्वभावनकृतिनःकृता
र्थाबभूमेति। जातावयंकृतार्थत्वमेवाहुः ७ अहोभगवता[illegible]यंसनाथाअस्म। यद्यस्मात्तवरूपंपश्येम त्रिविष्टपा
प्रीत्युत्फुल्लमुखाःप्रोचुर्हर्षगद्गदयागिरा पितरंसर्वसुहृदमवितारमिवार्भकाः ५ नताःस्मतेनाथसदांघ्रिपंकजं
विरिंचिवैरिंच्यसुरेंद्रवंदितं परायणंक्षेममिहेच्छतांपरंनयत्रकालःप्रभवेत्परःप्रभुः ६ भवायनस्त्वंभवविश्वभा
वनत्वमेवमाताथसुहृत्पतिःपिता त्वंसद्गुरुर्नःपरमंहिदैवतंयस्यानुवृत्त्याकृतिनोबभूविम ७ अहोसनाथा
भवतास्मयद्वयंत्रैविष्टपानामपिदूरदर्शनं प्रेमस्मितस्निग्धनिरीक्षणाननंपश्येमरूपंतवसर्वसौभगं ८
यर्ह्यंबुजाक्षापससारभोभवान्कुरून्मधून्वाथसुहृद्दिदृक्षया तत्राब्दकोटिप्रतिमःक्षणोभवेद्रविंविनाक्ष्णोरिवनस्त
वाच्युत ९
नामपिदूरेदर्शनंयस्य। देवानामपिदुर्लभमित्यर्थः। प्रेम्णायत्स्मितंतद्युक्तंस्निग्धंनिरीक्षणंयस्मिन्तदाननंयस्मिन्
तद्रूपंसर्वेषुचांगेषुसौभगंयस्मिन् ८ यर्हियदाभोअंबुजाक्षभवान्अस्माननादृत्यअपहायजगाम नोभवान्तिष्ठ
हे तद्दर्शनादरेवर्षोकुरून्हस्तिनापुरंमधून्मथुरांवातत्रतदारविंविनाआंध्यादक्ष्णोर्यथाएवंतवयानःत्वदीया
नस्माकमपीत्यर्थः। नकेवलंतवादर्शनेस्माकमांध्यंकिंतुजीवनमपिदुर्लभमित्याहुः ।९।

भा०१ प्रपन्नानां तृष्णा तृष्णैवोपस्तापस्तस्य मोषणं नाशकं त्वां प्रपन्नानां तृष्णासंभवादिति भावः १० इति च एवंविधा अन्याश्चोदीरि
४० ता वाचः शृण्वन् दृष्ट्या सामि नंदावलोकनं अनुग्रहात् कुर्वन् पुरीं द्वारकां प्राविशत् तां पुरीं वर्णयति पंचभिः ११ स्वतुल्यैः कुकुरैर्मधुभो
जादिभिर्गुप्तां रक्षितां १२ सर्वेषु ऋतुषु सर्वे विभवाः पुष्पफलादिसंपदो येषां ते पुण्यवृक्षाः लताश्च यत्र मंडपाश्च येषु तैः उद्यानादि

कथं वयं नाथ चिरोषिते त्वयि प्रपन्नतृष्णाखिलतापमोषणं जीवेम ते सुंदरहासशोभितमपश्यमाना वदनं मनोहरं
१० इति चोदीरिता वाचः प्रजानां भक्तवत्सलः शृण्वानोनुग्रहं दृष्ट्या वितन्वन्प्राविशत्पुरीं ११ मधुभोजदशार्हार्हकुकुरां
धककृष्णिभिः आत्मतुल्यबलैर्गुप्तां नागैर्भोगवतीमिव १२ सर्वर्तुसर्वविभवपुण्यवृक्षलताश्रमैः उद्यानोपवनारामैर्वृतां
पद्माकरश्रियं १३ गोपुरद्वारमार्गेषु कृतकौतुकतोरणां चित्रध्वजपताकाग्रैरंतःप्रतिहतातपां १४ विरजस्कमहा
मार्गरथ्यापणकचत्वरां सिक्तां गंधजलैरुप्तां फलपुष्पाक्षतांकुरैः १५ द्वारिद्वारि गृहाणां च दध्यक्षतफलेक्षुभिः अ
लंकृतां पूर्णकुंभैर्बलिभिर्धूपदीपकैः १६

भिः वृतां पद्माकराः सरांसि तैः श्रीः शोभा यस्यास्तां। उद्यानं प्रफलप्रधानं। आरामः क्रीडार्थवनं। १३ गोपुरं पुरद्वारं द्वारं गृहद्वा
रं कृतानि कौतुकेन उत्सवेन तोरणानि यस्यां। गरुडादिचिह्नांकिता ध्वजाः जयप्रदर्यं त्रावितपताका चित्रध्वजपताकानामग्रै
रंतः प्रतिहताः आतपा यस्यां १४ विरजस्कानि संमार्जितानि महामार्गादीनि यस्यां। महामार्गाः राजमार्गाः रथ्याः इतरमा ४०
र्गाः आपणकाः पण्यवीथयः चत्वराण्यंगणानि फलादिभिः उप्तां अवकीर्णां १५ १६

प्रेष्ठमायांतं निशम्य श्रुत्वा वसुदेवादयः प्रत्युज्जग्मुरिति चतुर्थेनान्वयः १७ प्रहर्षवेगेन उच्छ्वसितानि उच्छ्वसितानि त्यक्तानि शयना
दीनि यैः १८ ते मंगलार्थं वारणेंद्रं भद्रजातिकं अलंकृत्य पुरतः कृत्वा सुमंगलैः सुमंगलपुष्पादियुक्तपाणिभिः। ब्रह्मघोषमंत्र
पाठः १९ प्रणयेन स्नेहेन आगतं साध्वसं भ्रमो येषां ते वारमुख्याः नर्तक्यः २० लसत्कुंडलैर्निर्भातानि कपोलानि तैर्वदने
षु श्रीर्यासां। नटा नवरसाभिनयचतुराः। तालाद्यनुसारेण नृत्यंतो नर्तकाः। गंधर्वा गायकाः। सूताः पौराणिकाः। प्रोक्ता मागधा वंश
शंसकाः बंदिनस्त्वमलप्रज्ञाः प्रस्तावसदृशोक्तयः ते सर्वे उत्तमश्लोकस्य अद्भुतानि चरित्राणि भक्तवात्सल्यादीनि गायंति यथावि

निशम्य प्रेष्ठमायांतं वसुदेवो महामनाः अक्रूरश्चोग्रसेनश्च रामश्चाद्भुतविक्रमः १७ प्रद्युम्नश्चारुदेष्णश्च सां
बो जांबवतीसुतः प्रहर्षवेगोच्छ्वसितशयनासनभोजनाः १८ वारणेंद्रं पुरस्कृत्य ब्राह्मणैः ससुमंगलैः शंखतूर्यनि
नादेन ब्रह्मघोषेण चादृताः १९ प्रत्युज्जग्मू रथैर्हृष्टाः प्रणयागतसाध्वसाः वारमुख्याश्च शतशो यानैस्तद्दर्श
नोत्सुकाः २० लसत्कुंडलनिर्भातकपोलवदनश्रियः नटनर्तकगंधर्वाः सूतमागधबंदिनः गायंति चोत्तमश्लोकचरि
तान्यद्भुतानि च २१ भगवांस्तत्र बंधूनां पौराणामनुवर्तिनां यथाविध्युपसंगम्य सर्वेषां मानमादधे २२ प्रह्वाभि
वादनाश्लेषकरस्पर्शस्मितेक्षणैः आश्वास्य चाश्वपाकेभ्यो वरैश्चाभिमतैर्विभुः २३ स्वयं च गुरुभिर्विप्रैः सदा
रैः स्थविरैरपि आशीर्भिर्युज्यमानोन्यैर्बंदिभिश्चाविशत्पुरं २४ राजमार्गं गते कृष्णे द्वारकायाः कुलस्त्रियः
हर्म्याण्यारुरुहुर्विप्र तदीक्षणमहोत्सवाः २५

धि यथोचितं हास्यहस्तग्रहादिभिः संगतं कृत्वा सर्वेषां मानं कृतवानिति तदेवाह २१ प्रह्वत्वे शिरसा नतिः। अभिवादनं वचन
नतिः। आश्वास्य अभयं दत्वा श्वपाकादीनभिव्याप्य वरैरभीष्टदानैश्च मानं कृतवानित्यर्थः २३ अन्यैश्च बंदिभिः २४ हे वि
प्र शौनक तस्य ईक्षणं महानुत्सवो यासां २५

भा०१ ४१ यद्यपि नित्यं सदा अच्युतं निरीक्षमाणानामपि दृशो नेत्राणि न तृप्यंति अलंबुद्धिं न कुर्वन्ति अत एवाह अतृप्ता इत्यादिना । अन्वयो योजना । कथंभूता अच्युतं ॥ २६ कथं श्रियः शोभायाः धाम स्थानं । अंगं यस्य तं रत्नतरीव अपि नये गाह । श्रियो लक्ष्म्याः यस्य उरः वक्षो निवासो यस्य मुखं सर्वप्राणिनां दृशां सौंदर्यामृतपानाय पात्रं यस्य बाहवो लोकपालानां निवासः पादांबुजं सारंगाणां सारं श्री कृष्णचरित्रं गायंतीति सारंगाः भक्तास्तेषां तं निरीक्षमाणा नो दृश इति पूर्वेणान्वयः २७ सितैरातपत्रव्यजनै रुपस्कृतः प्रसूनवर्षैरभिवर्षितः मंडितः अर्कश्च उडुपो नक्षत्रसहितश्चंद्र

नित्यं निरीक्षमाणानां यद्यपि द्वारकौकसां न वितृप्यंति हि दृशः श्रियो धामांगमच्युतं २६ श्रियो निवासो यस्योरः पानपात्रं मुखं दृशां बाहवो लोकपालानां सारंगाणां पदांबुजं २७ सितातपत्रव्यजनैरुपस्कृतः प्रसूनवर्षैरभिवर्षितः पथि पिशंगवासा वनमालया बभौ घनो यथार्कौडुपचापवैद्युतैः २८

श्च चापमिंद्रधनुश्च वैद्युतं विद्युत्तेजः तैः अर्कः धनस्योपमानं नक्षत्राणि पुष्पवृष्टेः चंद्रः परिभ्रमकृतमंडलाकारयोश्चामरव्यजनयोः चापं वनमालायाः । विद्युत्तेजः पिशंगवाससः । अभूतोपमेयं यदि घनस्योपरि सूर्यबिंबं अधः पतच्चंद्रो सर्वतो नक्षत्राणि मध्ये चमीलितं चापद्वयं स्थिरं च विद्युत्तेजो यदि भवंति । तर्हि स घनो यथा भाति तथाहरिर्बभावित्यर्थः २८ ४१

देवकीप्रमुखाः सप्त वसुदेव इति मातृसौंदर्यविशेषज्ञापनार्थं । अष्टादश पितुर्वसुदेवस्य भार्यामातृतुल्यत्वात् । नयत्कृताएव २९ सहस्राणि च षोडशेति चकारादष्टोत्तरशताधिकानीति ज्ञातव्यं ३० प्रोष्य देशांतरे उषित्वा आगतः दूरादेव विलोक्य संजातो मनसि महोत्सवो यासां ताः आसनादाशयाच्च आसनाद्देहेनोत्तस्थुः आशयोंतःकरणं । तस्मात् प्रात्मनोत्तस्थुः । श्लेषेणात्मनः संश्लेषे अंतःकरणव्यवधानमपि नासहंतेत्यर्थः । व्रीडितानि लोचनानि आननानि च यासां अपांगैरेव वीक्षणात् व्रीडितलोचनाः । अवनतमुखत्वात् व्रीडिताननाः सा कं व्रतैरिति हास्यक्रीडावर्जनादि नियमाज्जयितेभ्यः उत्तस्थुरित्यर्थः । धृतव्रताए

प्रविष्टस्तु गृहं पित्रोः परिष्वक्तः स्वमातृभिः ववंदे शिरसा सप्त देवकीप्रमुखा मुदा २९ तां पुत्रमंकमारोप्य स्नेहस्नुतपयोधराः हर्षविह्वलितात्मानः सिषिचुर्नेत्रजैर्जलैः ३० अथाविशत्स्वभवनं सर्वकाममनुत्तमं प्रासादा यत्र पत्नीनां सहस्राणि च षोडश ३१ पत्न्यः पतिं प्रोष्य गृहानुपागतं विलोक्य संजातमनोमहोत्सवाः उत्तस्थुरारात्सहसासनाशयात्साकं व्रतैर्व्रीडितलोचनाननाः ३२ तमात्मजैर्दृष्टिभिरंतरात्मना दुरंतभावाः परिरेभिरे पतिं निरुद्धमप्यास्रवदंबु नेत्रयोर्विलज्जतीनां भृगुवर्य वैक्लवात् ३३ यद्यप्यसौ पार्श्वगतो रहोगतस्तथापि तस्यांघ्रियुगं नवं नवं पदे पदे का विरमेत तत्पदाच्चलापि यं श्रीर्न जहाति कर्हिचित् ३४

वोत्तस्थुरिति वा । अनतानि याज्ञवल्क्येनोक्तानि । क्रीडां शरीरसंस्कारं समाजोत्सवदर्शनं हास्यं परगृहे यानं त्यजेत्प्रोषितभर्तृका ३२ पुत्रैर्गृहीतकंठं आलिंगयंत्य इव स्वयमालिंगितवत्यः इत्यर्थः । अत्र हेतुः दुरंतभावाः गंभीराभिप्रायाः । तदा च तासां नेत्रयोः निरुद्धमप्यंबु बाष्पं वैक्लव्यात् । वैवश्यात् । आस्रवत् । सुस्राव । अत एव धैर्यहान्या विलज्जतीनां हे भृगुवर्य विचित्रं भणितवति ३३ पार्श्वतः समीपस्थः तत्रापि रहोगत एकांते प्रवर्त्तितस्म । पदे पदे प्रतिक्षणं नवं नवमेव अनुजके मुति कन्यायः । का विरमेतेति । चलाचंचलस्वभावापि श्रीर्यं कदापि न जहाति । उक्तं श्रीकृष्णचरित्रं संक्षिप्याह । एवमिति ह्राभ्यां ३४

भा०१
४२
क्षितेर्भारत्य जन्म येषां अक्षौहिणीभिः कृता परिवृत्ता सर्वतः प्रसृता तेजः प्रभावो येषां श्वसनो वायुः वेणूनामन्योन्यसंघर्षेणा
नलं विधाय मिथो दाहेन शाम्यति तद्वत् ३४ स्त्रीरत्नकूटस्थः उत्तमस्त्रीकदंबस्थः । नन्वेतत्स्त्रीसंगादिभिः संसारी प्रतीतेः
कथं भगवान् अवतीर्ण इत्युच्यते तत्राह । उद्दामेति द्वाभ्यां । ३५ यासां गंभीरे उद्दामो रे यो भावो अभिप्रायः तत्स्य पिशुनः सू
चको अमलो वल्गु सुंदरो हासो व्रीडावलोकश्च ताभ्यां निहतः अदनः श्रीमहादेवोपि संमुह्यलज्जया चापं पिनाकं जहौ

एवं नृपाणां क्षितिभारजन्मनां अक्षौहिणीभिः परिवृत्ततेजसां विधाय वैरं श्वसनो यथानलं मिथो वधेनो
परतो निरायुधः ३५ स एष नरलोकेस्मिन्नवतीर्णः स्वमायया रेमे स्त्रीरत्नकूटस्थो भगवान्प्राकृतो यथा
३६ उद्दामभावपिशुनामलवल्गुहासव्रीडावलोकनिहतो मदनोपि यासां संमुह्य चापमजहात्प्रमदो
त्तमास्ताः यस्येंद्रियं प्रमथितुं कुहकैर्न शेकुः ३७ तमयं मन्यते लोको ह्यसंगमपि संगिनं आत्मौपम्येन
मनुजं व्यापृण्वानमतो बुधः ३८

२ इः कुत इत्यपेक्षायामैश्वर्यलक्षणमाह ३७

त । एवंप्रभावा याः स्त्रियः इत्येतावद्विवक्षितं । यद्वा भगवतो मोहिनीरूपेण महेशोपि मोहित एव । ताश्च ता हस्तिलासं
एवेति । यथोक्ताः कुहकैः । कपटैर्विभ्रमैः यस्येंद्रियं मनः विमथितुं न शक्ताः ३६ तं श्रीकृष्णं अयं प्राकृतो लोकः आत्मौ
पम्येन स्वस्वसादृश्येन संगिनं मनुजं मन्यते । अत्र हेतुः व्याप्रियमाणं मनुजं ग्धा परं कुर्वंतं । यतो यं लोकः अबुधः अत्य ४२

ईशस्य ईशनं ऐश्वर्यं नाम एतदेव किं तत् । प्रकृतिस्थोपि तस्याः गुणैः सुखदुःखादिभिः सदा न युज्यते तद्वत् । वैधर्म्ये दृष्टां
तो वा आत्मस्थैः सत्वाप्रकाशादिभिः यथा बुद्धिर्न युज्यत इति । एवं वा असदात्मा देहः । तत्रस्थैर्गुणैः तदाश्रया बुद्धिः न दुष्य
धीजश्चो युज्यते । एवं प्रकृतिस्थोपि तद्गुणैर्न युज्यत इति । यत् एतत् ईशस्य ऐश्वर्यमिति । तस्य तत्त्वोपि तस्य तत्त्वं न ज्ञा
नंतीत्याह । ३८ तैः स्त्रैणं आत्मवश्यं रहः एकांते अनुव्रतं अनुसृतं च मेनिरे । भर्तुरप्रमाणविदः प्रमाणमियत्तां मं
महिमानमजानंत इत्यर्थः ईश्वरं क्षेत्रज्ञं मतयः अहं कृतयो यथा स्वाधीनं स्वधर्मयोगिनं मन्यंते तद्वत् । यद्वा न तथा तासां म
तयः कल्पनाः तं ईश्वरं स्त्रैणादिरूपं मेनिर इत्यर्थः ३९ इति प्रथमे एकादशः ११ पुरोक्तं यत्प्रसंगाय द्रौणि
एतदीशनमीशस्य प्रकृतिस्थोपि तद्गुणैः न युज्यते सदात्मस्थैर्यथा बुद्धिस्तदाश्रया ३८ तं मेनिरे बला मूढ
स्त्रैणं चानुव्रतं रहः अप्रमाणविदो भर्तुरीश्वरं मतयो यथा ३९ इति श्रीभागवते प्रथमे एकादशोध्यायः
शौनक उ० अश्वत्थाम्नोपसृष्टेन ब्रह्मशीर्ष्णोरुतेजसा उत्तराया हतो गर्भ ईशेनाजीवितः पुनः १ तस्य ज
न्म महाबुद्धेः कर्माणि च महात्मनः निधनं च यथैवासीत्स प्रेत्य गतवान्यथा २ तदिदं श्रोतुमिच्छामि गदितुं य
दि मन्यसे ब्रूहि नः श्रद्दधानानां यस्य ज्ञानमदाच्छुकः ३
रंजादिविस्तरात् । द्वादशे तु नरदेवाय परीक्षिज्जन्म वर्ण्यते । परीक्षितोथ राजर्षेर्जन्मकर्मविलापनं । संस्थां च पांडुपुत्राणां
वक्ष्ये कृष्णकथोदयं इति प्रतिज्ञाय पांडवानां राज्यस्थितिः उपोद्घातरूपा सप्रसंगं सप्तमाध्यायमारभ्य निरूपिता । इदानीं उ
पोद्घातं कं उक्तानुवादपूर्वकं पृच्छति । उपसृष्टेन विसृष्टेन तस्य जन्मादीनि ब्रूहीत्युत्तरेणान्वयः । १ स परीक्षिदिहं सत्का २
गदितुं कथितुं अनुग्रहेण यदि मन्यसे तर्हि ब्रूहीति । तस्य ज्ञानमदाच्छुक इति श्रवणेच्छायां कारणं तस्य हस्यापि राज्ञः श्रीक

पितृवद्दीपालत् । पालयामास ४ कृतवस्तद्गुपार्जितालोकाश्च ५ सुरस्पार्हाः सुराणांस्पृहणीयाः तेसंपदादयः
कामाः विषयाः किंमुदंप्रीतिंआधिरुद्धः नकृतवंतइत्यर्थः । नचहेतुः मुकुंदएवमनोयस्येति । क्षुधितस्यअन्नैकमनसः
यथाइतरेस्रक्चंदनादयोनप्रीतिंजनयंतितद्वत् । प्रस्तुतमाह । ६ पुरटंसुवर्णंस्फुरत्पुरटोमौलिर्यस्यास्तिव्रीह्या
दिभ्यश्चेति इतिप्रत्ययः । अपीच्यंअपिसुंदरंदृश्यतइतिदर्शनंरूपंयस्य । तडिद्वद्वाससीयस्येति अच्युतंअविकारं ८

सूतउ० अपीपलद्धर्मराजः पितृवद्रंजयन्प्रजाः निस्पृहः सर्वकामेभ्यः कृष्णपादानुसेवया ४ संपदः क्र
तवोलोकामहिषीभ्रातरोमही जंबूद्वीपाधिपत्यंचयशश्चत्रिदिवंगतं ५ किंतेकामाः सुरस्पार्हामुकुंदमन
सोद्विज अधिजह्रुर्मुदंराज्ञः क्षुधितस्ययथेतरे ६ मातुर्गर्भगतोवीरः सतदाभृगुनंदन ददर्शपुरुषं
कंचिद्दह्यमानोस्त्रतेजसा ७ अंगुष्ठमात्रममलं स्फुरत्पुरटमौलिनं अपीच्यदर्शनं श्यामं तडिद्वाससम
च्युतं ८ श्रीमद्दीर्घचतुर्बाहुं तप्तकांचनकुंडलं क्षतजाक्षं गदापाणिमात्मनः सर्वतोदिशं ९ परि
भ्रमंतमुल्काभं भ्रामयंतंगदांमुहुः अस्त्रतेजःस्वगदयानीहारमिवगोपतिः १० विधमंतंसंनिकर्षेपर्यैक्षत
कइत्यसौ ११ विधूयतदमेयात्मा विधवान्धर्मगुप्विभुः
८ तप्तंदाहोत्तीर्णंयत्कांचनंतन्मयेकुंडलेयस्य । क्षतजाक्षंरक्ताक्षं । अहोमद्भक्तस्यापिब्रह्मास्त्रेणोदिपीडाइतिसंरं
भाद्रक्तनेत्रं ९ अस्त्रतेजोविधमंतंविनाशयंतं । नीहारंहिमं । गोपतिः सूर्यइव । सन्निकर्षेसमीपेददर्श । द
ृष्ट्वाचअसौकइतिपर्यैक्षत । वितर्कितवान् १० अमेयात्माकथंतत् विधूतवानित्यवितर्करूपः । धर्मंगोपायती
तिधर्मगुप् । दशमासस्यपरिच्छेद्यस्यतस्यमिषतः पश्यतः यत्रदृष्टस्तत्रैवांतर्हितः । नत्वन्यत्रगतः । यतोविभुः सर्वगः ११

उदर्कः उत्तरंफलंसर्वगुणानामुत्तरोत्तराधिक्यंस्यचकेलग्नेतच्चहेतुः अनुकूलैः अन्यैर्ग्रहैः सहितानांपंचग्रहाणांउदयो
यस्मिन् जज्ञेजातः उत्प्रेक्षतेअपरः पांडुरिव १२ जातकंजातकर्म । सुमंगलंपुण्याहे १३ वरान्श्रेष्ठान् स्वन्नेशोमन्नम
न्नंच । यावन्नछिद्यतेनालंतावन्नाप्नोतिसूतकं । छिन्नेनालेततःपश्चात्सूतकंतुविधीयते । इतिवचनात् । ततःपूर्वंप्रजा
सुजातीर्थेपुत्रोत्पत्तिपुण्यकाले । पुत्रेजातेव्यतीपातेदत्तं भवतिचाक्षयं । इतिवचनात् । देवाश्चपितरश्चैवपुत्रेजातेद्विजन्म
 मिषतोदशमासस्यतत्रैवांतर्दधेहरिः ११ ततः सर्वगुणोदर्केसानुकूलग्रहोदये १२ जज्ञेवंशधरः पांडोर्भूयः पां
डुरिवौजसा १२ तस्यप्रीतमनाराजाविप्रैर्धौम्यकृपादिभिः १३ जातकंकारयामासवाचयित्वासुमंगलं
हिरण्यंगांमहींग्रामान्हस्त्यश्वान्नृपतिर्वरान् १४ प्रादात्स्वन्नंचविप्रेभ्यः प्रजातीर्थेसतीर्थवित् दैवे
नाप्रतिघातेनशुक्लेसंस्थामुपेयुषि १५ रातोवोनुग्रहार्थायविष्णुनाप्रभविष्णुना तस्मान्नाम्नाविष्णु
रातइतिलोकेबृहच्छ्रवाः १६ भविष्यतिनसंदेहोमहाभागवतोमहान् १७ राजोवाच अप्येषवंश्यान्राज्ञो
जर्षीन्पुण्यश्लोकान्महात्मनः अनुवर्तितास्विद्यशसासाधुवादेनसत्तमाः १८
नां । आयांतीहितन्पश्यपुण्याहमितिवाचुवन् १५ शुक्लेशुद्धेअस्मिन्प्रजातेतौदैवेनकथंभूतेन अप्रतिघातेनदुर्वा
रेणसंस्थांनाशंउपेयुषिगतेसतिवोनुग्रहार्थायस्मात् प्रभविष्णुनारातोदत्तः रक्षितोवा । १६ तस्माल्लोकेमहा
भागवतश्चगुणैर्महान्भविष्यति । नात्रसंदेहइतितंराजानंब्राह्मणाऊचुरितित्रयाणामन्वयः । महाभागवतोभविष्यतीति
विष्णुरातइतिनाम्नाभविष्यतीत्युक्तेहृष्टः पृच्छति । १७ आवर्तिस्साधुवादेनयशसासत्कीर्त्याअनुवर्तिताभविष्यतीत्य

भा० १
४४

प्रजानां अविता रक्षकः । मानवः मनोः पुत्रः । ब्रह्मण्यः ब्राह्मणभक्तः सत्यप्रतिज्ञश्च । श्रीरामो यथा १९ उशीनरदेशाधिपतिः
शिबिः येन स्वमांसं श्येनाय दत्वा शरणागतः कपोतो रक्षितः । स्वानां ज्ञातीनां यज्वनां च यशोविस्तारकः । दौष्यंतिर्भरत इव २० धं
अर्जुनयोः पार्थकार्त्तवीर्ययोः २१ हिमवानिव सतां निषेव्यः । वसुधा इव क्षमावान् प्रीत्या मातापितेव सहिष्णुः पितराविव
२२ पितामहो ब्रह्मा तेन समः साम्ये समत्वे सर्वभूतानां आश्रयणीयः २३ सर्वैर्माहात्म्यं यस्य सः २४ धृत्या धैर्येण

ब्राह्मणा ऊचुः पार्थ प्रजाविता साक्षादिक्ष्वाकुरिव मानवः ब्रह्मण्यः सत्यसंधश्च रामो दाशरथिर्यथा १९
एष दाता शरण्यश्च यथा ह्यौशीनरः शिबिः यशो वितनिता स्वानां दौष्यंतिरिव यज्वनां २० धन्विनामग्रणी
रेष तुल्यश्चार्जुनयोर्द्वयोः हुताश इव दुर्धर्षः समुद्र इव दुस्तरः २१ मृगेंद्र इव विक्रांतो हिमवानिव ति निषेव्यो
तिक्षुर्वसुधेवासौ सहिष्णुः पितराविव २२ पितामहसमः साम्ये प्रसादे गिरिशोपमः आश्रयः स
र्वभूतानां यथा देवो रमापतिः २३ सर्वसद्गुणमाहात्म्य एष कृष्णमनुव्रतः रंतिदेव इवोदारो ययातिरिव
धार्मिकः २४ धृत्या बलिसमः कृष्णे प्रह्लाद इव सद्ग्रहः आहर्तैषोऽश्वमेधानां वृद्धानां पर्युपासकः २५
राजर्षीणां जनयिता शास्ता चोत्पथगामिनां निगृहीता कलेरेष भुवो धर्मस्य कारणात् २६ तक्षकादात्मनो
मृत्युं द्विजपुत्रोपसर्जितात् प्रपत्स्यत उपश्रुत्य मुक्तसंगः पदं हरेः २७ जिज्ञासितात्मयाथात्म्यो मुनेर्व्यास
सुतादसौ हित्वेदं नृप गंगायां यास्यत्यद्धाकुतोभयं २८

सद्ग्रह इति सत्सु हार्थग्राही । आहर्ता कर्ता २५ राजर्षीणां जनमेजयादीनां २६ द्विजपुत्रेण प्रेरितात् तक्षकात् आत्मनो मृत्यु ४४
मुपश्रुत्य विरक्तः सन् हरेः पदं प्रपत्स्यते प्राप्स्यति २७ जिज्ञासितं ज्ञातं आत्मनो याथात्म्यं येन इदं शरीरं गंगायां हित्वा
अकुतोभयं जन्ममरणादिभयवर्जितं श्रीविष्णोः पदं यास्यति २८ तो

लब्धा अपचितिः पूजा यैः परीक्षिदिति नाम निर्वक्ति २९ यद्यस्मात् प्रभुः समर्थः गर्भे दृष्टं पुरुषं अनुध्यायन् अनुदृश्यमानेषु न
रेषु मध्ये सर्वमपि नरं परीक्षेत । अयमसौ भवेदिति नो वा इति वितर्कयन् परीक्षिदिति विख्यातः ३० शुक्ले शुक्लपक्षे प्रसिद्धः उडुपः
अन्वहं यथा कलाभिः पंचदशकलाभिः आपूर्यमाणो वर्द्धते । एवं पितृभिः युधिष्ठिरादिभिः । कामैश्च लालितः पक्षे कलाभिः आपू
र्यमाणो ववृधे पूर्वमपकृष्य क्रतुनाश्वमेधार्थ स्वाधिसप्रकाशं कथयति ३१ ज्ञातिद्रोहस्य ग्लानिः द्व्या यक्ष्यमाणः करदंडयो

इति राज्ञ उपादिश्य विप्रा जातककोविदाः लब्धापचितयः सर्वे प्रतिजग्मुः स्वकान् गृहान् २९ स एष लोके वि
ख्यातः परीक्षिदिति यत्प्रभुः पूर्वं दृष्टमनुध्यायन् परीक्षेत नरेष्विह ३० स राजपुत्रो ववृधे आशु शुक्ल इवोडु
पः आपूर्यमाणः पितृभिः काष्ठाभिरिव सोऽन्वहं ३१ यक्ष्यमाणोऽश्वमेधेन ज्ञातिद्रोहजिहासया राजा ल
ब्धधनो दध्यावन्यत्र करदंडयोः ३२ तदभिप्रेतमालक्ष्य भ्रातरोऽच्युतचोदिताः धनं प्रहीणमाजह्रुरुदीच्यां
दिशि भूरिशः ३३ तेन संभृतसंभारो धर्मपुत्रो युधिष्ठिरः वाजिमेधैस्त्रिभिर्भीतो यज्ञैः समयजद्धरिं ३४
आहूतो भगवान् राज्ञा याजयित्वा द्विजैर्नृपं उवास कतिचिन्मासान् सुहृदां प्रियकाम्यया ३५ ततो राज्ञा
भ्यनुज्ञातः कृष्णया सह बंधुभिः ययौ द्वारवतीं ब्रह्मन् सार्जुनो यदुभिर्वृतः ३६ इति श्रीभागवते महापुराणे
प्रथमस्कंधे पारीक्षिते द्वादशोऽध्यायः १२ छ छ छ छ छ

रन्यत्र ताभ्यां विना लब्धधनः सन् दध्यौ चिंतयामास । करदंडधनस्य परिजनमात्रोपक्षीणत्वात् ३२ प्रहीणं मरुत्तस्य या
गे उदीच्यां दिशि भूरिधनं ब्राह्मणैस्त्यक्तं सुवर्णपात्रादिकं आनीतवंतः ३३ संभृतसंभारः संपादितयज्ञोपकरणः भीतो ज्ञातिद्रो
हात् ३४ इति श्रीधरटीकायां भावार्थदीपिकायां भागवते प्रथमस्कंधे द्वादशोऽध्यायः १२

भा०१ निर्गमो धृतराष्ट्रस्य विदुरोक्त्या त्रयोदशे । उक्तः पौत्राभिषेकेण वक्तुं राज्ञो महोदयं । इदानीं पारीक्षितः कलिनिग्रहादिकर्माणि कथयि
४५ ष्यन् विदुरागमने धृतराष्ट्रस्य प्रस्थानं । ततोऽर्जुनागमनं । ततः श्रीकृष्णांतर्धानं निशम्य पांडवानां महाप्रस्थानं निरूपयति त्रिभिरध्यायैः ग
तिं हरितया आत्मगत्या अवाप्तं विधित्सितं ज्ञातुमिष्टं सर्वं येन तदेवाह १ कर्मयोगज्ञानादिविषयान् प्रश्नान् प्रथमं कृतवान् कौषारवस्य मै
दु त्रेयस्य पुरतः पश्चात् विशुद्धप्रश्नार्थज्ञानमात्रेण गोविंदे जातैकभक्तिः तया कृतार्थः सन् तेभ्यः प्रश्नेभ्यः उपरराम परं न विजिज्ञासित

स्ति सूत उ० विदुरस्तीर्थयात्रायां मैत्रेयादात्मनो गतिं ज्ञात्वागाद्धास्तिनपुरं तयावाप्तविधित्सितः १ यावतः कृतवान्प्रश्ना
न्क्षत्ता कौषारवाग्रतः जातैकभक्तिर्गोविंदे तेभ्यश्चोपरराम ह २ तं बंधुमागतं दृष्ट्वा धर्मपुत्रः सहानुजः धृतराष्ट्रो
युयुत्सुश्च सूतः शारद्वतः पृथा ३ गांधारी द्रौपदी ब्रह्मन्सुभद्रा चोत्तरा कृपी अन्याश्च जामयः पांडोर्ज्ञातयः ससुताः
स्त्रियः ४ प्रत्युज्जग्मुः प्रहर्षेण प्राणं तन्व इवागतं अभिसंगम्य विधिवत्परिष्वंगाभिवादनैः ५ मुमुचुः प्रेमबाष्पौघं वि
रहौत्कंठ्यकातराः राजा तमर्हयांचक्रे कृतासनपरिग्रहं ६ तं भुक्तवंतमासीनं विश्रांतं सुखमासने प्रश्रयावनतो रा
जा प्राह तेषां च शृण्वतां ७ युधि० अपि स्मरथ नो युष्मत्पक्षच्छायासमेधितान् विपद्गणाद्विषाग्न्यादेर्मोचिता यत्समातृकाः ८

श्री० वान् २ सूतः संजयः शारद्वतः कृपः पृथा कुंती ३ कृपी द्रोणाचार्यजाया जामयः ज्ञातिभार्याः अन्याश्च स्त्रियः ४ प्राणं तन्व इव । कुतश्चिन्मू
र्छादिदोषतः प्राणे सन्नेसति तन्वः करचरणाद्या यथा निश्चेष्टा भवंति । पुनस्तस्मिन्नाविर्भूते यथा निष्ठंति तद्वत् ५ विरहेण यदौत्कंठ्यं तेन कात
राः विवशाः । ६ प्रश्रयावनतो विनयेन नम्रः तं विदुरं ७ पक्षिणो ह्यपत्यानि यथा तिर्यग्देहेन पक्षच्छायायां वर्धयंति तद्वत् । युष्मत्पक्ष
पातच्छायया समेधितान् नः अस्माकं स्मरथ । समेधितत्वमेवाह । विपद्गणाद्यस्मान्मोचिताः स्म ८ ४५

बः पुण्याभिः कया वृत्त्या वर्तितं । देहवृत्तिः कृता । कानि च तीर्थानि च सेवितानीति । भवता च तीर्थाटनं स्वार्थं कृतं किं तु तीर्थानुग्रहार्थमित्या
ह । ९ मलिनजनसंपर्केण तीर्थानि मलिनानि संति । संतः पुनस्तीर्थी कुर्वंति । स्वांतं मनः । तत्रस्थेन गदाभृता श्रीनारायणेन । १०
अपि किं सुखमासते । भवद्भिः कृष्णमुख्या यादवाः केचिद्दृष्टाः श्रुता वा स्वपुर्यां सुखं वर्तंते ११ यदुकुलक्षयवर्णने कारण
माह । १२ सकरुणश्चेत्तर्हि केषां दुःखं नावेदयेत् इत्यर्थः १३ श्रेयस्कृत् तत्त्वमुपदिशन् । ननु शूद्रोऽसौ कथं तत्त्वमुपदिशेत्
१४ नह्यसौ शूद्रः किंतु यमस्तद्रूपेणासीत् । किं तत्र कारणं । येमे चाष्टगते अमुत्र कोदंडधरः इत्यपेक्षायामाह । अबिभ्रदिति

कया वृत्त्या वर्तितं वश्चरद्भिः क्षितिमंडलं तीर्थानि क्षेत्रमुख्यानि सेवितानीह भूतले ९ भवद्विधा भागवता
स्तीर्थभूताः स्वयं विभो तीर्थीकुर्वंति तीर्थानि स्वांतस्थेन गदाभृता १० अपि नः सुहृदस्तात बांधवाः कृष्णदेव
ताः दृष्टाः श्रुता वा यदवः स्वपुर्यां सुखमासते ११ इत्युक्तो धर्मराजेन तत्सर्वं समवर्णयत् यथानुभूतं क्रमशो
विना यदुकुलक्षयं १२ नन्वप्रियं दुर्विषहं नृणां स्वयमुपस्थितं नावेदयत्सकरुणो दुःखितान्द्रष्टुमक्षमः १३ किं
चित्कालमथावात्सीत्सत्कृतो देववत्सुखं भ्रातुर्ज्येष्ठस्य श्रेयस्कृत्सर्वेषां प्रीतिमावहन् १४ अबिभ्रदर्यमा दंडं यथाव
दघकारिषु यावद्दधार शूद्रत्वं शापाद्वर्षशतं यमः १५

मांडव्यशापात् । तथाहि । कश्चिच्चोराननुधावंतो राजभटाः मांडव्यस्याश्रमे तपश्चरतः समीपे तु तान् चोरान् संप्राप्य तेन सह निब
ध्यानीय राज्ञो निवेद्य तदाज्ञया सर्वान् शूलमारोपयामासुः । ततो राजा तमृषिं ज्ञात्वा शूलादवतार्य प्रसादयामास । ततो मुनिर्यमं ग
त्वा कुपित उवाच । अहो कस्मादहं शूल आरोपित इति तेनोक्तं । त्वं बाल्ये शलभं कुशाग्रेण विध्य क्रीडितवानिति । तदा मांडव्य
स्तं शशाप । बाल्ये अज्ञानतो मे महांतं दंडं यतस्त्वं कारितवान् । अतः शूद्रो भव अतएव तत्कालं अन्यः दंडं दधार । इदानीं राज्यापक

भा०१ ४६

कुलंधरं वंशधरं १६ तदीया गृहव्यापारेण प्रमत्तानां अत्यक्रामत्। आयुःकाळोतिक्रांतः। यद्वा तानुअत्यक्रवदित्यर्थः १७ भयं
मरणं। तदभिप्रेतसनाशकालमागतं विज्ञाय ननु तत्प्रतीकारः क्रियतां किं निर्गमनेनतत्राह १८ सर्वेषामिति येऽतिकर्तव्यं तेषामपी
त्यर्थः। ननु कथं धनादिवियोगः सोढुं शक्यः अत आह १९ अभिपन्नः अभिग्रस्तः अत्रावस्थानमिति दैन्यं दर्शयन् वैराग्यमुत्पाद
यति। पितृभ्रात्रेति सप्तभिः २० आत्मा च देहः २१ येन ते पुत्रा हतास्तेन भीमेन दत्तं पिंडं ग्रासं संगृह्य पालवत् श्वा इव २२ निरस्तः प्र

युधिष्ठिरो लब्धराज्यो दृष्ट्वा पौत्रं कुलंधरं भ्रातृभिर्लोकपालाभैर्मुमुदे परमश्रिया १६ एवं गृहेषु सक्तानां प्रमत्तानां तदी
८ हया अत्यक्रामदविज्ञातः कालः परमदुस्तरः १७ विदुरस्तदभिप्रेत्य धृतराष्ट्रमभाषत राजन्निर्गम्यतां शीघ्रं पश्येदं भय
मागतं १८ प्रतिक्रिया न यस्येह कुतश्चित्कर्हिचित्प्रभो स एव भगवान्कालः सर्वेषां नः समागतः १९ येन चैवाभिपन्नो
यं प्राणैः प्रियतमैरपि जनः सद्यो वियुज्येत किमुतान्यैर्धनादिभिः २० पितृभ्रातृसुहृत्पुत्रा हतास्ते विगतं वयः
आत्मा च जरया ग्रस्तः परगेहमुपाससे २१ अहो महीयसी जंतोर्जीविताशा यया भवान् भीमापवर्जितं पिंडमाद
त्ते गृहपालवत् २२ अग्निर्निसृष्टो दत्तश्च गरो दाराश्च दूषिताः हृतं क्षेत्रं धनं येषां तद्दत्तैरसुभिः कियत् २३ तस्यापि
तव देहोऽयं कृपणस्य जिजीविषोः परैत्यनिच्छतो जीर्णो जरया वाससी इव २४ गतस्वार्थमिमं देहं विरक्तो मुक्तबंधनः
अविज्ञातगतिर्जह्यात्स वै धीर उदाहृतः २५ यः स्वकात्परतो वेह जातनिर्वेद आत्मवान् हृदि कृत्वा हरिं गेहात्प्रव्रजेत्स नरोत्तमः २६

क्षिप्तः। गरो विषं। दूषिताः अवमानिताः। तद्दत्तैरन्नादिभिर्लब्धैरसुभिः किं प्रयोजनं। किंचिदित्यर्थः २३ तस्याप्येवं दैन्यमनुभवतो न
पि परैति क्षीयते अत एव धीरो भवेदिति किं लक्षणो धीरः इत्यपेक्षायामाह। २४ गतस्वार्थं यशोधर्मादिरहितं मुक्तबंधनं त्य मु
क्तोऽभिमानः क्व गत इत्यविज्ञाता गतिर्यस्य स धीरः २५ नरोत्तमस्तु ततः प्रागेव प्रतीकारः स्वकात् स्वत एव परतः परोपदेशतो ४६
वा जातनिर्वेदः सन् सर्वं जह्यात् स नरोत्तमः। त्वं तु नरोत्तमो मा भूः। अतः इदानीं धीरो भव २६

अर्वाक् अर्वाचीनः एष्यन्नित्यर्थः। गुणान् दयाधैर्यादीन् विकर्षति। आछिनत्तीति नया २७ आजमीढः अजमीढवंशजः प्रज्ञाचक्षुः अं
धः एवं बोधितः सन् दृढिम्नो चित्तदार्ढ्यात् भ्रात्रा संदर्शितः अधामोक्षमार्गो यस्य सः २८ सुबलस्य पुत्री गांधारी साध्वी सुशीला हिमा
लयं प्रयांतं पतिं अनुजगाम। ननु कथं कुसुमारी हिमादिदुःखबहुलं हिमवंतं गता अत आह। न्यस्तदंडानां प्रहर्षो यस्मिन् तं दुः
खदमपि केषांचित् प्रहर्षहेतुर्भवतीत्यत्र दृष्टांतः मनस्विनां शूराणां युद्धेनीव प्रहारो यथा। पाठांतरे सत्संप्रहारं युद्धं यथेति २९
अथोदीचीं दिशं यातु स्वैरज्ञातगतिर्भवान् इतोर्वाक्प्रायशः कालः पुंसां गुणविकर्षणः २७ एवं राजा विदुरेणानुजेन ये
प्रज्ञाचक्षुर्बोधित आजमीढः छित्त्वा स्वेषु स्नेहपाशान्द्रढिम्नो निश्चक्राम भ्रात्रसंदर्शिताध्वा २८ पतिं प्रयांतं
सुबलस्य पुत्री पतिव्रता चानुजगाम साध्वी हिमालयं न्यस्तदंडप्रहर्षं मनस्विनामिव सत्संप्रहारं २९ अजात
शत्रुः कृतमैत्रो हुताग्निर्विप्रान्नत्वा तिलगोभूमिरुक्मैः गृहं प्रविष्टो गुरुवंदनाय न चापश्यत्पितरौ सौबलीं च ३०
तत्र संजयमासीनं पप्रच्छोद्विग्नमानसः गावल्गणे क्व नस्तातो वृद्धो हीनश्च नेत्रयोः ३१ अंबा च हतपुत्रार्ता पितृव्यः
क्व गतः सुहृत् अपि मय्यकृतप्रज्ञे हतबंधुः स भार्यया ३२ आशंसमानः शमलं गंगायां दुःखितोपतत् ३३ पितर्यु
परते पांडौ सर्वान्नः सुहृदः शिशून् अरक्षतां व्यसनतः पितृव्यौ क्व गतावितः ३४ सूत उवाच कृपया स्नेहवैक्लव्यात्सूतो वि
रहकर्शितः आत्मेश्वरमचक्षाणो न प्रत्याहातिपीडितः ३५ विमृज्याश्रूणि पाणिभ्यां विष्टभ्यात्मानमात्मना अजात
कृतमैत्रं मित्रदेवसंध्यावंदनं येन नत्वा संपृष्ट्वा पितरौ विदुरधृतराष्ट्रौ शत्रुं प्रत्यूचे प्रभोः पादावनुस्मरन् ३६
३० हे गावल्गणे संजय ३१ अपि मय्यकृतप्रज्ञे मंदमतौ मयि शमलं अपराधं आशंसमानः। भार्यया सह किं गंगायां पपात ३२
पांडौ उपरते मृते नः शिशून् यौ रक्षतां तौ इतः स्थानात् ३३ सूतः संजयः। कृपया स्नेहवैक्लव्यात् च अतिपीडितः आत्मेश्वरं धृतराष्ट्रं अपश्य
न्नाह। ३४ आत्मना बुद्ध्या आत्मानं मनो विष्टभ्य धैर्ययुक्तं कृत्वा प्रभोर्धृतराष्ट्रस्य पादावनुस्मरन् प्रत्यूचे उवाच ३५

व्यवसितंनिश्चितंयतोमुषितःवंचितोस्मि ३६ एवंकिंचित्कालंशोचितिनस्मिन्नथनारदआजगाम। कचित्पुस्तकेपाठांतरमस्ति
तदुल्लंघ्ययथासंप्रदायंव्याख्यायते ३७ अभ्यर्चयन्निवाहराजातंभ्यर्च्यतत्कृतःशोकाक्रांतःक्रुधाविष्टःश्रद्धयारहितः
पुमान्। गुरुदेवद्विजातिपूजनंनसमाचरेदितिस्मृतेः। ३८ वेदवेद्मि। तपस्विनीदुःखयुता ३९ अपारेशोकार्णवेभगवा
स्त्वमेवपारदर्शकः। अतोब्रूहीतिशेषः। आदावेवयथावृत्तकथनेशोकमूर्छितःपतेदिति। प्रथमंतावत्शोकमुपशमय

नाहंवेदव्यवसितंपित्रोर्वःकुरुनंदन गांधार्यावामहाबाहोमुषितोस्मिमहात्मभिः ३६ अथाजगामभगवान्नारदः
सहतुंबरुः प्रत्युत्थायाभिवाद्याहसानुजोभ्यर्चयन्निव ३७ वीणांत्रितंत्रीरणयन्युधिष्ठिरनिवेशने राजादत्तोप
नीता[illegible]प्रत्युत्थायाभिवाद्यतं सुखमासनमासीनंपौरवेंद्रोभ्यभाषत ३८ युधिष्ठिर० नाहंवेदगतिंपित्रोर्भग
वान्क्वगतावितः अंबावाहतपुत्रार्ताक्वगतासातपस्विनी ३९ कर्णधारइवापारेभगवन्पारदर्शनः अथाबभाषे
भगवान्नारदोमुनिसत्तमः ४० नारदः माकंचनशुचोराजन्यदीश्वरवशंजगत् लोकाःसपाला यस्येमे वहन्ति बलिमीशितुः ... सस्संयुनक्तिभूतानिसएववियुन
क्तिच ४१ यथागावोनसिप्रोतास्तंत्यांबद्धाश्चदामभिः वाक्तंत्यांनामभिर्बद्धावहंतिबलिमीशितुः ४२ यथाक्री
डोपस्कराणांसंयोगविगमाविह इच्छयाक्रीडितुःस्यातांतथैवेशेच्छयानृणां ४३

ति ४० कंचनमाशुचः। शोकंमाकार्षीः नकेवलंतानेवयदस्मादीश्वराधीनंजगत्। तदेवाहससंयुनक्तीति ४१ गावोबलीवर्दाः ६,
नसिनासिकायांप्रोताः। उपदामभिःतंत्यांदीर्घतंत्र्यांबद्धाःस्वामिनःबलिंवहंतियथा एवंवाक्तंत्यांकर्तव्याकर्तव्यविधेयायांवेदलक्ष
णायांवर्णाश्रमलक्षणैर्बद्धाःपरमेश्वरस्यबलिंवहंति। प्रवृत्तौपारतंत्र्यमुक्त्वासंयोगवियोगावप्याह ४२ क्रीडोपस्कराणांक्री ४७
डासाधनानांईश्वराधीनत्वान्नशोकःकार्यः इत्युक्तंलोकतत्त्वेचविचार्यमाणेनिर्विषयोयंशोकइत्याह ४३

यत्यदिलोकंजनंध्रुवंजीवरूपेणअध्रुवंदेहरूपेणनचेतिनेध्रुवंनेचेतिनाप्यध्रुवं। सिद्धब्रह्मरूपेणअनिर्वचनीयत्वेनउभयंवाचिद्रूपां
शतःसर्वथाचतुर्ष्वपिपक्षेषुतेपित्रादयोनशोच्याःस्नेहादन्यत्रस्नेहएवकेवलंशोकहेतुःसचाज्ञानमूलइत्यर्थः ४४ तस्मात्मांविना
तेकथंवर्तेरन्निति मनसोवैक्लव्यंचव्याकुलतांत्यज। नचत्वद्दृष्टतत्तेषांवृत्तिरिस्येतावन्नास्तीत्याह ४५ कालःगुणक्षोभकःकर्मजन्म
निमित्तंगुणाउपादानंपांचभौतिकः। उडःतर्हिभागेनाशावांश्चसर्पग्रस्तः। अजगरगिलितः। यथाअन्यंअग्रस्तंनरक्षतितद्वत्। ई
श्वरेणविहितावृत्तिश्चसर्वतःसुलभैवेत्याह ४६ अहस्तानिपश्चादीनिअपदानितृणादीनितत्रतेषुअहस्तादिष्वपिफल्गूनि

यन्मन्यसेध्रुवंलोकमध्रुवंवानचोभयं सर्वथाहिनशोच्यास्तेस्नेहादन्यत्रमोहजात् ४४ तस्माज्जह्यंगवैक्लव्यमज्ञा
नकृतमात्मनः कथंत्वनाथाःकृपणावर्तेरंस्त्वांचमामाश्रिताः ४५ कालकर्मगुणाधीनोदेहोयंपांचभौतिकः कथम
न्यांस्तुगोपायेत्सर्पग्रस्तोयथापरं ४६ अहस्तानिसहस्तानामपदानिचतुष्पदां फल्गूनितत्रमहतांजीवोजीवस्यजी
वनं ४७ तदिदंभगवान्राजन्एकआत्मात्मनांस्वदृक् अंतरोनंतरोभातिपश्यतंमाययोरुधा ४८

अन्या। निएवंजीवःसर्वोपिजीवस्यसर्वस्यजीवनंजीविकाएतेनैवसर्वेतोमृत्युग्रासत्वंचोक्तंमोहनिवृत्त्यर्थंभूतस्यावस्तुत्वंत
माह ४७ तदिदंअहस्तसहस्तादिकंजगत्स्वदृक्भगवानेवनततःपृथक्। सचैकएवनतुनानानुनुसजातीयभेदे
नप्रत्यक्षेकुतएतत्तत्राह। आत्मनांभोक्तॄणांआत्मास्वरूपंअतोनसजातीयभेदः। अंतरोनंतरश्चअंतर्बहिश्चयोग्यरू
हामायावीहारकायमित्याह ४८ मायया बहुधातंपश्येति। कासावस्तीदृशोभ

अस्यां पृथिव्यां अभावाय नाशाय तर्हि श्रीकृष्णो नास्ति यत्रैवास्त्वं मा कृथा इत्याह। ४९ देवानां कार्यं तेन निष्पादितं केवलमवशेषं
यदुकुलक्षयं प्रतीक्षते। ततो निजं धाम यास्यति ततो यूयमपि गच्छतेत्यर्थः। तर्हि वंशो कावस्थां यैर्निवार्य जिज्ञासवे तस्मै यथावृत्तं कथयि
ष्यति षड्भिः ५० हिमवतो दक्षिणभागे ऋषीणां आश्रमे गतः सन् तदपि कुत्र ५० यावै प्रसिद्धा स्वर्धुनी गंगा आत्मानं यत्र सप्तधा
व्यधात्। पृथक् सप्तभिः स्रोतोभिः प्रवाहैः किमर्थं सप्तानां ऋषीणां प्रीतये अत एव तत्तीर्थं नाम्ना सप्तस्रोत इति तत्र तेन कृतमष्टां
गं योगमाह चतुर्भिः ५१ तत्र स्नानं होमो अब्भक्षणं च नियमा उक्ताः भक्षस्थाने अपां स्वीकारः अब्भक्षः उपशान्तः आत्मीयस्य

सोयमद्य महाराज भगवान्भूतभावनः कालरूपोवतीर्णोस्यामभावाय सुरद्विषां ४९ निष्पादितं देवकृत्यमवशे
षं प्रतीक्षते तावद्यूयमवेक्षध्वं भवेद्यावदिहेश्वरः ५० धृतराष्ट्रः सह भ्रात्रा गांधार्या च स्वभार्यया दक्षिणेन हिमव
त ऋषीणामाश्रमं गतः ५१ स्रोतोभिः सप्तभिर्यत्र स्वर्धुनी सप्तधा व्यधात् सप्तानां प्रीतये नाना सप्तस्रोतः प्रच
क्षते ५२ स्नात्वानुसवनं तस्मिन्हुत्वा चाग्नीन्यथाविधि अब्भक्ष उपशान्तात्मा स आस्ते विगतैषणः ५३ जिता
सनो जितश्वासः प्रत्याहृतषडिंद्रियः हरिभावनया ध्वस्तरजःसत्वतमोमलः ५४ विज्ञानात्मनि संयोज्य क्षेत्र
ज्ञे प्रविलाप्य तं ब्रह्मण्यात्मानमाधारे घटांबरमिवांबरे ५५

विगता पुत्राद्येषणा यस्मात् इति इति यमा उक्ताः ५२ जितासन इत्यादिना आसनप्राणायामप्रत्याहारा उक्ताः हरिभावनयेति धा
रणोक्ता। ध्वस्ताः रजःसत्वतमोरूपा मला यस्येति। फलतो ध्यानमुक्तं। समाधिमाह द्वाभ्यां ५३ आत्मानं मनः अहंकारायं स्वस्य
स्थूलदेहाद्वियोज्य विज्ञानात्मनि बुद्धौ संयोज्य एकीकृत्य। तं विज्ञानात्मानं दृश्यांशाद्वियोज्य। क्षेत्रज्ञे द्रष्टरि प्रविलाप्य तं च क्षेत्र
ज्ञं द्रष्टृंशाद्वियोज्य। आधारे आश्रयसंज्ञे ब्रह्मणि प्रविलाप्य यथा घटांबरं घटोपाधेर्वियोज्य। यथा महाकाशे प्रविलाप्यते

अंतर्गुणक्षोभाद्वा बहिरिंद्रियविक्षेपाद्वा व्युत्थानं भवेत्। तदुभयं तस्य नास्ति यतः ध्वस्तो मायागुणानां उदर्कः उत्तरं फलं वासनारूप
निरुद्धानि करणानि चक्षुरादीनि आशयो मनश्च यस्य अत एव निवर्तितः अखिलः आहारो भोज्यं इंद्रियविषयाहरणं वा येन स्थाणुरि
व निश्चलः आस्ते यथा भूतमपि आनेतुमुद्यतं प्रत्याह ५६ अंतरायो विघ्नः मैवाभूरित्यडागमः छांदसः दर्शनमपि तावत्का
र्यमित्युद्यतं प्रत्याह स वा अद्यतनाद्राजन्नः स्वस्वार्थी [illegible] गमिष्यामीनेत्याह। तद्योक्त हि गांधार्या नियमा [illegible]

ध्वस्तमायागुणोदर्को निरुद्धकरणाशयः निवर्तिताखिलाहार आस्ते स्थाणुरिवाचलः ५६ तस्यान्तरायो मैवाभूः सन्न्य
स्ताखिलकर्मणः स वा अद्यतनाद्राजन्परतः पंचमेहनि कलेवरं हास्यति स्वं तच्च भस्मीभविष्यति ५७ दह्यमानेग्निभि
र्देहे पत्युः पत्नी सहोटजे बहिः स्थिता पतिं साध्वी तमग्निमनुवेक्ष्यति ५८ विदुरस्तु तदाश्चर्यं निशाम्य कुरुनंदन
हर्षशोकयुतस्तस्माद्गंता तीर्थनिषेवकः ५९ इत्युक्त्वाथारुहत्स्वर्गं नारदः सह तुंबरुः युधिष्ठिरो वचस्तस्य हृदि कृत्वा
जहाच्छुचः ६० इति श्रीभागवते प्रथमे धृतराष्ट्रप्रयाणे त्रयोदशोध्यायः १३ सूत उवाच संप्रस्थिते द्वारकायां जिष्णौ बंधु
दिदृक्षया ज्ञातुं च पुण्यश्लोकस्य कृष्णस्य च विचेष्टितं १ व्यतीताः कतिचिन्मासास्तदा नायात्ततोर्जुनः ददर्श घोररूपा
णि निमित्तानि कुरूद्वहः २

मैवाभूः आह ५६ पत्युर्देहे सहोटजे पर्णशालासहिते योगाग्निना सह गार्हपत्यादिभिर्दह्यमा
ने तस्य पत्नी बहिः स्थिता सती तं पतिमनु अग्निं प्रवेक्ष्यति प्रवेक्ष्यति। तर्हि विदुरस्य [illegible] मार्थं गंतव्यमेव नेत्याह ५८ विदुरस्त्विति निशाम्य
दृष्ट्वा [illegible] हर्षः तन्मृत्युनाशेन शोकः [illegible] तस्मात्स्थानात् तीर्थानि सेवितुं गमिष्यति ५९ शुचः शोकान् ६०
इति श्रीभा० प्रथ० त्रयोदशोध्यायः चतुर्दशे तु रिष्टानि दृष्ट्वा राजा विशंकितः। अर्जुनादर्जुनात् कृष्णतिरोधानमितीर्यते १ श्री
कृष्णस्य चेष्टितं कर्तव्यं अभिप्रायं ज्ञातुं १ कतिचित्सप्तमासाः तदा कालातिक्रमणेपि ततः द्वारकायाः न आयात्। अनागतः निमित्ता

भा०१
४९

रौद्रां घोरां । ऋतवश्चाह । विपर्यस्ताः ऋतुधर्माः यस्मिन् । तस्य वार्तां जीविकां क्रोधलोभानृतैर्युक्ताः आत्मा येषां ३ जिह्मप्रायं कपटबहु
लं व्यवहृतं व्यवहारं शाठ्यं वंचनं तेन मिश्रं सौहृदं सौख्यं पितादीनां परस्परं विरोधेन कलहादि ४ पिता अपोषकं सुते
५ अत्यरिष्टानि अत्यंतमशुभानि दृष्ट्वा नृणां लोभाद्यधर्मप्रकृतिं दृष्ट्वा अनुजं भीमं ६ चेति वितर्के कस्माद्धेतोः नायातीत्यहं
न वेद्मि । एतच्चोपरिष्टादर्जुनस्य दर्शनं करिष्यति ७ पश्य मांभा भीक्षणे न ऋीडास्मिन् संगे । नदा ऋीडं आऋीडं ऋीडासाधनं

कालस्य च गतिं रौद्रां विपर्यस्तर्तुधर्मिणः पापीयसीं नृणां वार्तां क्रोधलोभानृतात्मनां ३ जिह्मप्रायं व्यवहृतं शाठ्यमि
श्रं च सौहृदं पितृमातृसुहृद्भ्रातृदंपतीनां च कल्कनं ४ कन्यात्विक्रयिणं तातं मातापित्रोरपोषकं ब्राह्मणान्वेदविमु
खान्शूद्रांश्चैव ब्रह्मवादिनः ५ निमित्तान्यत्यरिष्टानि काले त्वनुगते नृणां लोभाद्यधर्मप्रकृतिं दृष्ट्वोवाचानुजं नृपः
६ युधि० संप्रेषितो द्वारकायां जिष्णुर्बंधुदिदृक्षया ज्ञातुं च पुण्यश्लोकस्य कृष्णस्य च विचेष्टितं ७ गताः सप्ताधुना
मासा भीमसेन तवानुजः नायाति कस्य वा हेतोर्नाहं वेदेदमंजसा ८ अपि देवर्षिणादिष्टः स कालोयमुपस्थितः
यदात्मनोंगमाऋीडं भगवानुत्सिसृक्षति ९ यस्मान्नः संपदो राज्यं दाराः प्राणाः कुलं प्रजाः आसन्सपत्नविजयो लो
काश्च यदनुग्रहात् १० पश्योत्पातान्नरव्याघ्र दिव्यान्भौमान्सदैहिकान् दारुणान्शंसतो दूराद्भयं नो बुद्धिमोह
स्फु नं ११ ऊर्वक्षिबाहवो मह्यं स्फुरंत्यंग पुनः पुनः वेपथुश्चापि हृदये आराद्दास्यंति विप्रियं १२

न शरीरं ९ यस्माद्धरिकृष्णाद्धेतोः लोकाश्च यज्ञकरणरूपाः । यस्यानुग्रहात् १० आद्दूरात्संनिहितं नोस्माकं आशंसतः उ
त्पातान्दैहिकानाह ११ ऊर्वादयो वामाः स्फुरंति वेपथुः कंपश्च हृदये वर्त्तते । एतैर्मह्यं आरात्संनिहितं विप्रियं दास्यंतीति भौमानाह । ४९

शिवा क्रोष्ट्री आदित्यमभिरौति । उत्सूर्याभिमुखं क्रोशती । अनलानना । अग्निं मुखेन वमंती अंग हे भीम मामभिलक्ष्य सारमेयः
श्वा मुखं ऊर्ध्वं कृत्वा रेभति आ भीरुवत् निःशंकं १३ शस्ताः गवादयः । मां सव्यं वामं कुर्वंति । अपरे गर्दभाद्याः प्रदक्षिणं कुर्वंति । वाहान्
अश्वान् रुदतोभिलक्ष्यते १४ अयं कपोतो मृत्युदूतः मृत्युसूचकः । उलूको घूकः प्रत्युलूकः । तत्प्रतिपक्षो घूकः । काकोवा
कुह्वानैः कुत्सितशब्दैः विश्वं शून्यं कर्त्तुमिच्छतइव १५ धूम्राः धूसराः दिशः परिधयः इवाग्निं लोकं मारण्वंति निर्घातः निर

शिवैषोद्यंतमादित्यं अभिरौत्यनलानना मामंगसारमेयोयमभिरौदित्यभीरुवत् १३ शस्ताः कुर्वंति मांसव्यं
दक्षिणं पशवोपरे वाहांश्च पुरुषव्याघ्र लक्षये रुदतो मम १४ मृत्युदूतः कपोतोयमुलूकः कंपयन्मनः प्रत्युलूक
श्च कुह्वानैरनिद्रो शून्यमिच्छतः १५ धूम्रा दिशः परिधयः कंपते भूः सहाद्रिभिः निर्घातश्च महानासीत्
साकं च स्तनयित्नुभिः १६ वायुर्वाति खरस्पर्शो रजसा विसृजंस्तमः असृग्वर्षंति जलदा बीभत्समिव सर्वतः
१७ सूर्यं हतप्रभं पश्य ग्रहमर्दं मिथो दिवि सुसंकुलैर्भूतगणैर्ज्वलिते इव रोदसी १८ नद्यो नदाश्च क्षुभि
ताः सरांसि च मनांसि च न ज्वलत्यग्निराज्येन कालोयं किं विधास्यति १९ न पिबंति स्तनं वत्सा न दुह्यंति च
२ मातरः रुदंत्यश्रुमुखा गावो न हृष्यंत्यृषभा व्रजे २० न

भवज्रपातः दिव्याना हृसाद्रिभ्यां १५ तमः विशेषेण सृजन् । असृक् रक्तं १६ ग्रहाणां मर्दं । भूताः रुद्रानुचराः तेषां
गणैः संकुलैः व्यामिश्रैः प्राणिभिः सहितैः रोदसी द्यावापृथिव्यौ । ज्वलिते प्रदीप्ते इव पश्य इति । पुनर्भौमानाह । साद्रैस्त्रि
भिः १७ प्राणिनां मनांसि १८ न दुह्यंति । कर्मकर्त्तरि आर्षं । न प्रस्नुवंतीत्यर्थः १९ देवतादिप्रतिमाः २०

भा०१ ५०

आद्यं दुःखं एतैर्महोत्पातैः कत्वा नविद्यते न्येषु पुरत्वेषु श्रीर्वेङ्गां कुशादिशो न्नायेषां तैर्भगवतः पदै हरिना भूरित्यहं मन्ये २१ तस्य राज्ञः इत्येवं दृष्टान्यरिष्टानियेन तेन चेतसा चिंतयतः २२ अयथापूर्वं निपतितं नदेवाह। आतुरमित्यादि अत्रिद्वं अश्रूणि नेत्राभ्यां विसृजंतमित्यर्थः। २३ उद्विग्नं कंपितं हृदयं यस्य विछायं विगतकांतिं २४ स्वजनाः बांधवाः सुखं वसंति किं वस्य

देवतानि रुदंतीव स्विद्यंति ह्युच्चलंति च इमे जनपदा ग्रामाः पुरोद्यानाकराश्रमाः २१ भ्रष्टश्रियो निरानंदाः किमघं दर्शयंति नः मन्ये एतैर्महोत्पातैर्नूनं भगवतः पदैः २२ अनन्यपुरुषश्रीभिर्हीना भूर्हतसौभगा इति चिंतयतस्तस्य दृष्टारिष्टेन चेतसा राज्ञः प्रत्यागमद्ब्रह्मन्यदुपुर्याः कपिध्वजः २३ तं पादयोर्निपतितमयथापूर्वमातुरं अधोवदनमब्बिंदून्सृजंतं नयनाब्जयोः २४ विलोक्योद्विग्नहृदयो विछायमनुजं नृपः पृच्छति स्म सुहृन्मध्ये संस्मरन्नारदेरितं २५

युधि० कच्चिदानर्तपुर्यां नः स्वजनाः सुखमासते मध्वभोजदशार्हार्हसात्वतांधकवृष्णयः २६ शूरो मातामहः कच्चित्स्वस्त्यास्ते वाथ मारिषः मातुलः सानुजः कच्चित्कुशल्यानकदुंदुभिः २७ सप्त स्वसारस्तत्पत्न्यो मातुलान्यः सहात्मजाः आसते सस्नुषाः क्षेमं देवकीप्रमुखाः स्त्रियः २८ कच्चिद्राजाहुको जीवत्यसत्पुत्रोस्य चानुजः

हृदिकः ससुतोक्रूरो जयंतगदसारणाः २९ स

तीति शंकया व्यवहितक्रमेण पृच्छति २६ मारिषः मान्यो मातामहः शूरो नाम यादवः कुंत्याः पिता। आनकदुंदुभिर्मातुलो वसुदेवः २७ स्वसारः परस्परं वा सुदेवक्षेमं तासामपि क्षेमं दृष्टमपि पृथगपि पृच्छति स्वयामिति। २८ आहुकः उग्रसेनः असत्पुत्रो यस्य अत एव जीवनमात्रमेव पृष्टं अनुजश्च देवकः। हृदीकसुतः कृतवर्मा। जयंतादयः कृष्णभ्रातरः २९ ५०

सर्वकृष्णीनां मध्ये महारथः। गंभीररयः सुयुद्धे महावेगः। प्रद्युम्नः सुखं आस्ते वर्धते मोदते निरुद्धः ३१ श्रीकृष्णापत्यानि का र्ष्णियाः तेषु प्रवराः ३२ सुनंदह्रोशीर्षण्यो मुख्यो येषां ३३ भगवान्सुखमास्ते इति प्रश्नस्यानौचित्यमाशंक्याह। भगवतो भावस्थाने हि लोकानां मंगलं नान्यथेत्याशंक्याह। चतुर्भिः ३४ मंगलाय भुवनाय। उद्भवाय अनंतसखः बलदेवसहायः ३५ अ

आसते कुशलं कच्चिद्ये च शत्रुजिदादयः कच्चिदास्ते सुखं रामो भगवान्सात्वतां प्रभुः ३० प्रद्युम्नः सर्ववृष्णीनां सुखमास्ते महारथः गंभीररयोनिरुद्धो वर्द्धते भगवानुत ३१ सुषेणश्चारुदेष्णश्च सांबो जांबवतीसुतः अन्ये च कार्ष्णिप्रवराः सपुत्रा ऋषभादयः ३२ तथैवानुचराः शौरेः श्रुतदेवोद्धवादयः सुनंदनंदशीर्षण्या ये चान्ये सात्वतर्षभाः ३३ अपि स्वस्त्यासते सर्वे रामकृष्णभुजाश्रयाः अपि स्मरंति कुशलं अस्माकं बद्धसौहृदाः ३४ भगवानपि गोविंदो ब्रह्मण्यो भक्तवत्सलः कच्चित्पुरे सुधर्मायां सुखमास्ते सुहृद्वृतः ३५ मंगलाय च लोकानां क्षेमाय च भवाय च आस्ते यदुकुलांभोधावाद्योनंतसखः पुमान् ३६ यद्बाहुदंडगुप्तायां स्वपुर्यां यदवोर्चिताः क्रीडंति परमानंदं महापौरुषिका इव ३७ यत्पादशुश्रूषणमुख्यकर्मणा सत्यादयो द्व्यष्टसहस्रयोषितः निर्जित्य संख्ये त्रिदशांस्तदाशिषो हरंति वज्रायुधवल्लभोचिताः ३८

र्चिताः सर्वैः पूजिताः परमानंदं यथा भवति तथा क्रीडंति। महापुरुषो विष्णुस्तदीयाः महापौरुषिका वैकुंठनाथानुचराइव ३७ यस्य पादशुश्रूषणमेव मुख्यं तप आदिभ्यः श्रेष्ठं कर्म तेन सत्यभामादयः संख्ये युद्धे श्रीकृष्णबलेन त्रिदशान्देवान्निर्जित्य तदाशिषः देवभोग्यान्पारिजातादीन् वज्रायुधस्य वल्लभा शची तस्या उचिताः ३८

भा०१ यत्नभावोपजीविनः सुधर्मामंद्भिरधिक्रामंतिस गोविंदः सुखमास्तइतिगतपंचमेनान्वयः। इदानींतस्यैवार्जुन
५१ स्यप्रश्नतिषड्भिः ३९ अनामयंआरोग्यंनलब्धोमतोयेन। बंधुभिःसकाशात्। किंवातेःप्रत्युतअवज्ञातःतिरस्कृ
तः किंपतम्रिशंपितः बहुकाळंतत्रस्थितः ४० अभावैःप्रेमशून्यैःअमंगळैःपुरुषैःशब्दादिभिःनाभिहतः। नगाडितो

यद्बाहुदंडाभ्युदयानुजीविनोयदुप्रवीराह्यकुतोभयामुहुः अधिक्रमंत्यंघ्रिभिराहृतांबलात्सभांसुध
र्मांसुरसत्तमोचितां ३९ कच्चित्तेनामयंतातभ्रष्टतेजाविभासिमे. अलब्धमानोवज्ञातःकिंवाताततचि
रोषितः ४० कच्चिन्नाभिहतोभावैःशब्दादिभिरमंगलैः नदत्तमुक्तमर्थिभ्यआशयायत्प्रतिश्रुतं ४१ क
च्चित्त्वंब्राह्मणंबालंगांवृद्धंरोगिणंस्त्रियं शरणोपसृतंसत्त्वंनात्याक्षीःशरणप्रदः ४२ कच्चित्त्वंनागमोग
म्यांगम्यांवासत्क्रियांस्त्रियं पराजितोवाथभवान्नोत्तमैर्नासमैःपथि ४३

सिकिंयद्वा। अर्थिभ्यःकिमाप्नोदास्यामीत्युक्तंकिं। यद्वाआशयासहयथाआशाभवतितथादास्यामीतिप्र
श्रुतंसतनदत्तं ४१ अन्यद्वाशरणागतंसत्वंप्राणिमात्रंनत्यक्तवान्। यत्त्वंपूर्वंशरणदःआश्रयप्रदः। ४२
अगम्यामितिच्छेदः। निंदितांस्त्रियंनागमः किंनगतवानसि। असत्कृतांमळिनवस्त्रादिना किंनोत्तमैर ५१
नुत्तमैः। समैरित्यर्थः। समैरधमैर्वानपराजितोसीत्यर्थः ४३

संभोज्यान्भोजनार्हान्वृद्धान्बालकांश्च किंस्वित्पर्यभुंक्थाःत्यक्त्वाभुक्तवानसि। अक्षमंकर्तुमयोग्यंयत्तद्यत्कृतवानसि
किं ४४ नित्यंसदाप्रेष्ठतमेनहृदयेनइत्यंतरंगेनस्वबंधुना। श्रीकृष्णेनरहितःशून्योसीतिमन्ये। अन्यथातेरुङ्मनःपी
डानघटते ४५ इतिप्रथमेचतुर्दशः कलिप्रवेशमालक्ष्यधुरंन्यस्यपरीक्षिति। आरुरोहनृपःस्वर्गमितिपंचदशेब्रवी
त् १ कृष्णस्यसखाअर्जुनःनानाशंकास्पदंरूपंआलक्ष्यविकल्पितइत्यर्थः। प्रतिभाषितुंनाशक्नोदित्युत्तरेणान्वयः। न
अपिस्वित्पर्यभुंक्थास्त्वंसंभोज्यान्वृद्धबालकान् जुगुप्सितंकर्मकिंचित्कृतवान्नयदक्षमं ४४ कच्चित्प्रेष्ठत
मेनाथहृदयेनात्मबंधुना शून्योस्मिरहितोनित्यंमन्यसेतेन्यथानरुक् ४५ इतिश्रीभा०प्रथ०अर्जुनसमाग
मि मेचतुर्दशोध्यायः १४ सूतः एवंकृष्णसखःकृष्णोभ्रात्राराज्ञाविकल्पितः नानाशंकास्पदंरूपंकृष्णविश्ले
षकर्शितः १ शोकेनशुष्यद्वदनहृत्सरोजोहतप्रभः विभूतिमेवानुध्यायन्नाशक्नोत्प्रतिभाषितुं २ कृच्छ्रे
णसंस्तभ्यशुचःपाणिनामृज्यनेत्रयोः परोक्षेणसमुन्नद्धप्रणयोत्कंठ्यकातरः ३ सख्यंमैत्रींसौहृदंचसार
मि थ्यादिषुसंस्मरन् नृपमग्रजमित्याहबाष्पगद्गदयागिरा ४ वंचितोहंमहाराजहरिणाबंधुरूपिणा ये
नमेपहृतंतेजोदेवविस्मापनंमहत् ५
न्नहेतुः। कृष्णविश्लेषेणकर्शितःकृशः १ शोकेनहेतुनावदनंचहृच्चतएवसरोजेशुष्यती वदनसरोजेयस्य २ शु
चःशोकाश्रूणियाः। पाणिनाआमृज्य। नेत्रयोरेवसंस्तभ्य। गलितानिचपाणिनाआमृज्य। परोक्षेणदर्शनाभावेनप्र
कृष्णेनहेतुनासमुन्नद्धअधिकंयत्प्रेमोत्कंठ्यंतेनकातरोव्याकुळःसन्नृपमाहेत्युत्तरेणान्वयः ३ सख्यंहितैषितां
मैत्रीउपकारितांसुहृत्त्वंसंबंधितांचबाष्पेणअश्रुणागद्गदयागिराप्राह ४ येनमावंचयितादेवानविस्मापयति
यत् ५

भा०१
५२

यस्यक्षणवियोगेनेत्यादि यच्छब्दानां नैनाहमद्यमुक्तिमितिसप्तमश्लोकस्थेन तच्छब्देन संबंधः। प्रियस्याप्रियत्वे दृष्टांतः। उ
क्थेन प्राणेन रहितः एव पित्रादिः मृतकः प्रोच्यते। यथा श्रीकुलकतानुपक्रासन् अनुस्मरति। यत्संश्रयादिति दृशभिः ६
यस्य संश्रयाद् द्रुपदगेहमागतानां राज्ञां स्वयंवरमुखे स्मरदुर्मदानां अतिमत्तानां तेजः प्रभावोपहतः। धनुर्ग्रहणेनेव पश्चात् तद्धनुः सज्जीकृ
तं येन मत्स्योयं जोपरिभ्रमन् विद्धः ततस्ताश्च विजित्य द्रौपदी प्राप्ता च ७ अग्नि विस्मये खांडवं दंदह्यमाने अग्नये अदा

यस्यक्षणवियोगेनलोकोह्यप्रियदर्शनः उक्थेनरहितोह्येषमृतकःप्रोच्यतेयथा ६ यत्संश्रयाद्द्रुपदगेहमु
पागतानांराज्ञांस्वयंवरमुखेस्मरदुर्मदानां तेजोहृतंखलुमयाभिहतश्चमत्स्यःसज्जीकृतेनधनुषाधिगता
चकृष्णा ७ यत्संनिधावहमुखांडवमग्नयेदामिंद्रंचसामरगणंतरसाविजित्य लब्धासभामयकृता
द्भुतशिल्पमायादिग्भ्योहरन्नृपतयोबलिमध्वरेते ८ यत्तेजसानृपशिरोंघ्रिमहन्मखार्थेआर्योनुजस्तव
गजायुतसत्ववीर्यः तेनाहृताःप्रमथनाथमखायभूपायन्मोचितास्तदनयन्बलिमध्वरेते । ९

दत्तवानस्मि। खांडवदाहे रक्षितेन मयेन कृता च सभा लब्धा अद्भुतशिल्परूपा माया यस्यां सा अध्वरे राजसूये टीका
अनंतरं लोको विगीतस्तथापि व्याख्यायते ८ नृपशिरःसु अंघ्रिर्यस्य तं जरासंधं तव अनुजो भीमसेनः मखा
र्थं हतवान्। तं निर्जये विना राजसूयमखो नु पपत्तेः गजायुतस्येव सत्त्वमुत्साहशक्तिः वीर्यं च बलं च यस्य सः ५२
प्रमथनाथो भैरवः तस्य मखाय ये राजानः तेन आहृताः ते यस्मात् मोचिताः न तस्मात् ते अध्वरे बलिमानीतवंतः यत्तेजसा तेन

ये क्लिन्ने दुःशासनादिभिः तव पत्न्याः कबरीं विकीर्य उन्मुच्य स्पृष्टं आकृष्टं। येराजसभामाणा हृष्टा द्रौपदी तेषां स्त्रि
यो हतकेशाः अत एव वैधव्यात् मुक्तकेशाश्च अकृत च कार। कथंभूतं कबरं आधिमुखं राजसूयमधिकृत्य कृष्णोरवि
नो यो महाभिषेकः तेन श्लाघ्यतमं चारु रम्यं स्मरणात् इदानीमेव अस्मत्कृपया प्राप्तस्य श्रीकृष्णस्य नमने पदद्वयोः पतिता
अश्रूणि मुखानि यस्याः पत्न्याः त्वयि नाथे सति चेद् दुःखं तर्हि कोपराधस्तव ममैव भाग्यमित्यभिप्रायः। पदृशाद्वैसोपेक्ष्या
पिपतिः शाद्वस्याश्रुपदेन समासो नित्यसापेक्षत्वात् १० शिष्याणामयुतस्याग्रे तत्पंक्तौ भुंक्ते यः तस्मात् दुर्वाससो हे

पत्न्यास्तवाधिमखकृष्णमहाभिषेकश्लाघिष्ठचारुकबरींकितवैःस्पृशांयां स्पृष्टं विकीर्यपदयोःपतिता
श्रुमुख्यायस्तास्त्रियोकृतहतेशाविमुक्तकेशाः १० योनोद्य गोपवनमेत्य दुरंतकुद्धाद्दुर्वाससोरिवि
हितादयुताग्रभुग्यः शाकान्नशिष्टमुपभुज्ययतत्त्रिलोकीतृप्तामममेस्तसलिलेविनिमग्नसंघः ११

तो अग्रभुजा दुर्योधनेन रचितं यत् दुरंतं कुद्धं शापलक्षणं तस्मात् सकाशात् वने एत्य जुगोप। किंभूतात् शापसेवाचं तदेव पाने
वशिष्टं उपभुज्य भुक्त्वा यतः उपभोगात् सलिले विनिमग्नो मुनीनां संघः त्रिलोकी तृप्ता ममं स्नरे वै हि भारते आरण्यके पर्व
णि कथा। कदाचित् दुर्वाससो दुर्योधनेनातिथ्ये कृते तेन च परितुष्टेन वरं वृणीष्वेति उक्ते दुर्वाससः शापात् पांडवानश्येयुरिति
मनसि विधाय दुर्योधनेनोक्तं युधिष्ठिरस्य कुलमुख्यो नस्तस्यापि भवने वं शिष्यायुतसहितेन अतिथिना भाव्यं। यतो
द्रौपदी भुक्तवा न सी तेन तथा तस्यां भुक्तवत्यां न केहे गतव्यामिति। ततश्च तथैव दुर्वाससि संप्राप्ते परमादरेण युधिष्ठिरो प्यपाद्य
दिकं कृतो वाच। भगवन्कृतार्थो हे त्वद्गमनेन। इत्युक्त उवाच। भगवान्दुर्वासा महाराज अद्याहं तेनतिथिर्भवामि।

भा०१
५३

इत्युक्ते युधिष्ठिरेणोक्ते । स्वामिन्माध्याह्निकं कृत्वा आगम्यतामिति विज्ञापितो मुनिसंघो धर्मर्षणाय जले निमज्जनं तदा युधिष्ठिरेणोक्तं । हे श्रीमिन्द्री धर्मपृष्ठकृता ध्यानी यतो अग्निप्रवेशं करिष्यामि । यथा मुनिसंघो मां मैनशापयेत् । तदाजीमोक्षितुं कृत्वा ध्यानी पव
द्रुपदबालयति । तदा चिंतातुरया द्रौपद्या उक्तं शरणं प्रतीक्षं भूमिनि । यो सो विश्वं भरो देवः कथमस्मानुपेक्षते इत्युक्त्वा एकाग्रया
द्रौपद्या भगवान् श्रीकृष्णः स्मृतः । स तु स्मृत एव रोमांचितगात्र अंकस्थां रुक्मिणीं हित्वा तत्क्षणमेव सकलवात्सल्यतया तत्रागमो
हे तवनेन तापनुनमस्कृत्य आवेदितेन हृतं तेन भगवतोक्तं । द्रौपदि अहमपि बुभुक्षितोस्मि । प्रथमं मां भोजय । तया चातिलज्जया
निनं । याथ्ह्यिणी कैवेदमं नैराद्वन्तोपिनायाति । आयाति चेत्तर्हि मुनिः समे महत्संगं इति सपुराणपुरुषः मध्ये हमागतः स्वपुत्रे
न भोजनैर्धार्थयति इति मनसि विधायोक्तं । अतो नास्त्यन्नमिति यस्मिन्नुत्तं चकार । तथाप्यतिनिर्बंधेन स्थाली मानाय्य तत्कंठलग्नं
शाकपत्रं उदकपूर्णं जलेन निधायोक्तं । अनेन विश्वात्मा भगवान् चराचरगुरुः श्री नारायणः प्रीतो स्तु । अथ भोजनं मुनिसंघ
मानय वेति । भीमं प्रहितवान् । भीमेनोक्तं स्वामिन् भोजनार्थमागम्यतां । कथं विलंबः क्रियते । स नावनुतानितः प्राह । भीमतत्र
कोप्यन्नकं स्वभावनगतो च नैतत्स्वस्ति । श्रीकृष्णस्तत्र नागतोस्ति । अवतो वदनार्थे । ततस्तद्वचनं पृष्ठापि कृष्णस्य नपलायग
तं । यस्यैवंविधः प्रभावः तेन श्रीकृष्णेन वंचितोस्मि

यत्तेजसाथ भगवान्युधि शूलपाणिर्विस्मापितः सगिरिजोस्त्रमदान्निजं मे अन्येपि
चाहममुनैव कलेवरेण प्राप्तो महेंद्रभवने महदासनार्द्धं १२

गिरिजासहितो विस्मापितः सन् निजं पाशुपतास्त्रं । अन्येपि लोकपालाः निजानि अस्त्राण्यदुः । अन्यदप्या- ५३
श्चर्यमाह । अमुना देहेन महेंद्रभवनगतोहं तस्यासनार्द्धं आरुरोह । यत्तेजसा मुख्यो हे १२

तत्रैव स्वर्गे क्रीडतः गांडीवलक्षणं चिह्नं यस्य तत् आराततयो निवातकवचादयो दैत्याः तेषां वधार्थमाश्रितवंतः यदनुभा-
वितं येनानुभावितं प्रभावयुक्तं कृतं । हे आजमीढ युधिष्ठिर तेन वंचितोस्मि कथं । भूम्ना निजमहिम्ना वस्त्राने अदर्शनेन १३ यद्बांधव इत्यादि श्लोकत्रयस्यापि तेन मुषितोहमिति पूर्वेणैव संबंधः । श्रीकृष्णबांधवः एक एवाहं कौर-
वसैन्याब्धिं नास्ति तोगा तीर्थपापारं च देशतो यस्य तत्तीर्णवान् । उत्तरगोग्रहे । अतीर्याणि दुस्तराणि सत्वानि
तिमिंगिलादीनि भीष्मादिरूपाणि यस्मिन् । प्रत्याहृतं परैर्गोधनं नीतं । परेषां च शिरोभ्यः सकाशात् तेजास्पदं

तत्रैव मे विहरतो भुजदंडयुग्मं गांडीवलक्षणमरातिवधाय देवाः सेंद्राः श्रिता यदनुभावितमाजमीढ ते-
नाहमद्य मुषितः पुरुषेण भूम्ना १३ यद्बांधवः कुरुकुलाब्धिमनंतपारमेको रथेन ततरेहमतीर्यसत्वं
प्रत्याहृतं बहु धनं च मया परेषां तेजास्पदं मणिमयं च हृतं शिरोभ्यः १४ यो भीष्मकर्णगुरुशल्यचमू-
ष्वदभ्र राजन्यवर्यरथमंडलमंडितासु अग्रेचरो मम विभो रथयूथपानामायुर्मनांसि च दृशा सह ओज आ-
र्च्छत् १५

भावस्य आस्पदं उष्णीषरूपं मणिमयं मुकुटरत्नरूपं च बहु धनं तान्मोहनास्त्रेण मोहयित्वा हृतं यद्बांधवेन मया १४
अदभ्रा अनल्पा ये राजन्यवर्यास्तेषां रथमंडले मंडितासु भीष्मादीनां चमूषु सारथिरूपेण ममाग्रेचरः सन् हे विभो तेषां रथयू-
थपानां आयुरादीनि यो दृशा दृष्ट्यैव आर्च्छत् । हृतवान् । मनांसीत्युत्साहशक्तिः । सह इति बलं । ओजः शस्त्रादिकौशलं भी-

ष्मद्रोणादीनामहरत् । यथाअधुनामम १५

भा०१ ५४ यस्य दोःषु भुजेषु मा मां प्रणिहितं स्थापितं। तैरेव गुर्वादिभिः निरूपितानि अस्त्राणि मां नोपस्पृशुः। गुरुर्द्रोणः। त्रिगर्तदेशा न: १९
धिपतिः सुशर्मा। शल्यः शाल्वः सैंधवः सिंधुदेशाधिपतिः जयद्रथः बाह्लीकः शंतनोर्भ्राता। अमोघो महिमा येषां तेषां नृसिं
त्ये सारथ्ये कुमतिना मे मया रहितः। कुमतित्वमेवाह। आत्मद इत्यादिना। अरुवाय मोक्षाय भव्याः विवेकिनः श्रांताः वाहाः

यद्दोःषु मा प्रणिहितं गुरुभीष्मकर्णद्रोणत्रिगर्तशलसैंधवबाह्लिकाद्यैः अस्त्राण्यमोघमहिमानि निरूपि
तानि नोपस्पृशुर्नृहरिदासमिवासुराणि १६ सौत्ये वृतः कुमतिनात्मद ईश्वरो मे यत्पादपद्ममभवाय भजंति
भव्याः संश्रांतवाहमरयो रथिनो भुविस्थं न प्राहरन्यदनुभावनिरस्तचित्ताः १७ नर्माण्युदाररुचिरस्मितशो
भनानि हे पार्थ हेर्जुन सखे कुरुनंदनेति संजल्पितानि नरदेव हृदिस्पृशानि स्मर्तुर्लुठंति हृदयं मम माधवस्य १८

अश्वाय स्यतं। मां जयद्रथवधे जलपानं विना अश्वाः श्रांताः अतो रथादवतीर्य बाणे भुवं भित्वा जलं संपादितं मया तदा यस्या
नुभावेन निरस्तचित्ताः अरयो पि मां न प्रहृतवंतः। स सौत्ये वृत इति कुमतित्वं १७ हे नरदेव उदारं गंभीरं रुचिरं यत् स्मितं तेन
शोभितानि नर्माणि परिहासवाक्यानि तथा कार्यप्रवेषु हे पार्थेत्यादीनि संजल्पितानि मधुराणि वाक्यानि हृदिस्प ५४
शानि मनोज्ञानि माधवस्य यान्येतानि तानि इदानीं स्मर्तुर्मम हृदयं लुठंति क्षोभयंति। णिजिभाव आर्षः १८

भा

विकत्थनं स्वगुणश्लाघनं। शय्यादिषु ऐक्यात्। अव्यतिरेकाद्धेतोः कदाचिद्व्यभिचारं दृष्ट्वा हे वयस्य। ऋतवान् सत्ययुक्त
स्त्वं इति। वक्रोक्त्या विप्रलब्धः तिरस्कृतो पि असौ महान् मया वयस्य इति मत्वा विप्रलब्धः तिरस्कृत इत्यर्थः। मे अयं अपराधे
असहत। महिनया महित्वेन एकपदे अतिमहत्वेनेत्यर्थः। सख्युः अघं सखेव तनयस्याघं पितेव। त्वया शंकितं पराज
यं च प्राप्तो हमित्याह १९ तेन सख्या रहितः अतो हृदयेन शून्यः। अंग हे राजन्। उरुक्रमस्य परिग्रहं षोडशसहस्रस्त्रील

शय्यासनाटनविकत्थनभोजनादिष्वैक्याद्वयस्य ऋतवानिति विप्रलब्धः सख्युः सखेव पितृवत्तनय
स्य सर्वं सेहे महान्महितया कुमतेरघं मे १९ सोहं नृपेंद्र रहितः पुरुषोत्तमेन सख्या प्रियेण सुहृदा हृदयेन
शून्यः अध्वन्युरुक्रमपरिग्रहमंग रक्षन् गोपैरसद्भिरबलेव विनिर्जितोस्मि २० तद्वै धनुस्त इषवः स
रथो हयास्ते सोहं रथी नृपतयो यत आनमंति सर्वं क्षणेन तदभूदसदीशरिक्तं भस्मन्हुतं कुहकराद्धमिवोप्तमुःष्यां
ष्यां २१ राजंस्त्वयाभिपृष्टानां सुहृदां नः सुहृत्पुरे विप्रशापविमूढानां चतुःपंचावशेषिताः २२ वारुणीं
मदिरां पीत्वा मदोन्मथितचेतसां अजानतामिवान्योन्यं विघ्नतां मुष्टिभिर्मिथः २३
क्षणं असद्भिर्नरैः आभीरैः अबलायाएव श्रीकृष्णवियोगएवात्र हेतुर्नान्य इत्याह २० यतः येभ्यः नृपतयो नमंति ईशे
न रिक्तं शून्यं असत् कार्याक्षमं। सन्मंत्रविधानैरपि भस्मनि हुतमिव। अतिप्रीतादपि कुहकात् मायाविनः सकाशाद्द्रव्यं
लब्धं यथा असत् संसम्यक्कर्षणादिनापि ऊषरभूमौ उप्तं बीजमिव २१ सुहृत्पुरे त्वयापृष्टानां नः सुहृदानां मध्ये चत्वा
रः पंचावशेषिताः तत्र हेतुः विप्रशापेत्यादि २२ वारुणीं अन्नमयीं अजानतामिवान्योन्यं परस्परं मुष्टिभिर्निघ्नतां। अवशेषि
ता इत्यनेनोक्तं। हेतुकर्तारमाह त्रिभिः २३

भा०१
५५

भावयंतिपालयंति. २४ जलौकसांमत्स्यादीनांमध्येमहांतःस्थूलाःअणीयसःसूक्ष्मान्यथाभक्षयंति २५ भुवोभार
भूतान्अतःपरंवक्तुंनशक्नोमिइतिसूचयन्नाह २६ देशकालोचितार्थयुक्तानिमनःपीडोपशमकराणिचगोविंदस्यव
चनानिस्मरतोममचित्तंहरंतिआकर्षंति २७ एवमितिसूतोक्तिः।अंघ्रिद्वंद्वेनस्नेहेनकृष्णपादसरोरुहंचिंतयानोर्जुन ति
स्यमतिःशांताविशोकाविमलाविरक्ताचासीत्।मतिवैमल्यफलमाह २८ वासुदेवांघ्र्यनुध्यानेनपरिबृंहितोरंहो
यस्याःसातयाभक्त्यानिर्मथितानिउन्मूलिताःअशेषाःकषायाःकामादयोयस्याःसाधिषणाबुद्धिर्यस्यसः।ज्ञानेषु
प्रायेणोतद्भगवतईश्वरस्यविचेष्टितं मिथोनिघ्नंतिभूतानिभावयंतिचयन्मिथः २४ जलौकसांजलेयद्वन्म
हांतोदंत्यणीयसः दुर्बलान्बलिनोराजन्महांतोबलिनोमिथः २५ एवंबलिष्ठैर्यदुभिर्महद्भिरितरान्विभुः
यदून्यदुभिरन्योन्यंभूभारान्संजहारह २६ देशकालार्थयुक्तानिहृत्तापोपशमानिच हरंतिस्मरतश्चित्तंगोविं
दाभिहितानिमे २७ सूत उवाच एवंचिंतयतोजिष्णोःकृष्णपादसरोरुहं सौहार्देनातिगाढेनशांतासीद्विमला
मतिः २८ वासुदेवांघ्र्यनुध्यानपरिबृंहितरंहसा भक्त्यानिर्मथिताशेषकषायधिषणोर्जुनः २९ गीतं
भगवताज्ञानंयत्तत्संग्राममूर्धनि कालकर्मतमोरुद्धंपुनरध्यगमद्विभुः ३० विशोकोब्रह्मसंपत्त्याछिन्नसं संछिन्न
शयः लीनप्रकृतिनैर्गुण्यादलिंगत्वादसंभवः ३१
नरध्यगमादित्युत्तरेणान्वयः २९ कालेनकर्मभिस्तमसाभोगाभिनिवेशेनआवृतेरुद्धंसत्पुनःप्राप्तज्ञानफलमाह ३०
एतदेवशोकहेत्वभावेनउपपादयति।शोकस्यहिहेतुर्द्वैतभ्रमःतस्यदेहःतस्यदेहस्यलिंगंतस्यगुणाःतेषांगुणानांअविद्या
हेतुःतत्रब्रह्मसंपत्त्यावेदांतादिश्रवणेब्रह्माहमितिज्ञानेनलीनाप्रकृतिरविद्यायस्मिन्अतएवनैर्गुण्यंभवति।ननुसुषुप्तिप्र ५५
लययोरविद्याशेषःतस्मात्नैर्गुण्याद्गुणकार्यनाशःआलिंगत्वाच्चअसंभवःनसम्यक्भोगायभवतिपुनःपुनरितिसं
भवःस्थूलशरीरंतद्रहितः।ततश्चतस्यारब्धछेदात्लिंगXवान्।संछिन्नोद्वैतलक्षणःसंशयोभ्रमोयस्यसविशोकोजातइति
३०

भगवतोमार्गंप्रलक्ष्ययदुकुलस्यसंस्थांनाशंश्रुत्वानारदोक्तंचानुस्मृत्य।स्वःपथायस्वर्गमार्गायनिभृतात्मानिश्चलचित्तः
३९ नांगतिंदुर्ज्ञेयांवक्ष्यतिहिएकादशे।सौदामिन्यायथाकाशेयांत्याहित्वाभ्रमंडलंगतिर्नलक्ष्यतेमर्त्यैस्तथाकृष्णस्यदै
वतैरितिसंस्थानेःउपरामदेहंजहौ।वातदेवमुक्तमप्याद्वेष्योभगवतोवैलक्षण्यंअबुध्यानतामांयंवदंतोमंदमतीन्प्र
तिवैलक्षण्यंस्पष्टयतिद्वाभ्यां ३२ ययायादवरूपयातन्वाभुवोभारंकंटकेनकंटकमिवाहरत्।यादवतनुःभूभारतनुश्चेति
द्वयमपिईश्वरस्यसंहार्यत्वेनसममेव।श्रीकृष्णमूर्तेर्विशेषमाह ३४ नान्यापियथाधत्तेजहातिचतदाह।यथानटोनिज
निशम्यभगवन्मार्गंसंस्थांयदुकुलस्यच स्वःपथायमतिंचक्रेनिभृतात्मायुधिष्ठिरः ३२ पृथाप्युपश्रुत्यध
नंजयोदितंनाशंयदूनांभगवद्गतिंचेतां एकांतभक्त्याभगवत्यधोक्षजेनिवेशितात्मोपरराससंसृतेः ३३
ययाहरद्भुवोभारंतांतनुंविजहावजः कंटकंकंटकेनेवद्वयंचापीशितुःसमं ३४ यथामत्स्यादिरूपाणि
धत्तेजह्याद्यथानटः भूभारःक्षपितोयेनजहौतच्चकलेवरं ३५ यदामुकुंदोभगवानिमांमहींजहौस्वतन्
न्वाश्रवणीयसत्कथः तदाहरेवाप्रतिबुद्धचेतसामभद्रहेतुःकलिरन्ववर्तत ३६ युधिष्ठिरस्तत्परिसर्पणं
बुधःपुरेचराष्ट्रेचगृहेतथात्मनि विभाव्यलोभानृतजिह्महिंसनाद्यधर्मचक्रंगमनायपर्यधात् ३७
रूपेणस्थितोयथारूपांतराणिधत्ते।अंतर्धत्तेचतथातदपिकलेवरंजहौ।अंतर्दधादित्यर्थः।युधिष्ठिरस्यस्वर्गारोहणप्रसंगायक
लिप्रवेशमाह ३५ स्वतन्वाजहौ।स्वतन्वानारेववैकुंठारोहात्श्रवणार्हासतीकथायस्यतदायदहःतस्मिन्नेवअहरितिस
न्मंतंपदं।अप्रतिबुद्धचेतसांअविवेकिनांभगवत्कथाश्रवणादिपराणांतुनप्रभुरित्युक्तं।अन्ववर्ततेतिपूर्वमेवांशेनप्रविष्ट
स्वेनरूपेणानुवृत्तिरुक्ता ३६ युधिष्ठिरस्तस्यकलेःपरिसर्पणंविलोक्यकथंभूतंलोभाद्यधर्मचक्रंयस्मिन्जिह्मंकौटिल्यं कृ
पर्यधात्।तदुचितंपरिधानमकरोत्।पुरेलोभबाहुल्यंराष्ट्रेदेशमध्येअनृतंगृहेगृहेकौटिल्यंआत्मनिअरिष्टानि ३७

भा०१
५६

आत्मनः स्वगुणैः समं अतिसदृशं। तोयं सर्वतः स्थितं समुद्रोदकमेव निवीं परिधानं विशेषो यस्याः तस्याः भूमेः पतित्वेनाभिषि
क्तवान् ३८ वज्रं अनिरुद्धस्य पुत्रं निरूप्य कृतेत्यर्थः। अविवर। आत्मन्यात्तपयामास। ईश्वरः समर्थः ३९ संछिन्नान्यशेषा
णि बंधनानि उपाधयो येन तदेव दर्शयति द्वाभ्यां ५० वाचमित्युपलक्षणं सर्वेंद्रियाणि मनसि प्रविलापितवानित्यर्थः। तच्च मनः प्रा
णे प्राणाधीनत्वान्नित्यात् तं प्राणं इतरे अपाने नापकर्षणात्। अपानव्यापारः उत्सर्गः। तत्सहितमपानं मृत्यौ तदधिष्ठात् देवतायां अनेनै
व वागादि वृत्तिसहितं नक्रमे साहित्यं ज्ञेयं तं मृत्युं पंचत्वे पंचभूतानामैक्ये देहे। देहस्यैव मृत्युर्नात्मन इति भावितवानित्यर्थः। अजो हवी दि

स्वराट् पौत्रं विनयिनं आत्मनोनवमं गुणैः तोयनीव्यापतिं भूमेः रभ्यषिंचद्गजाह्वये ३८ मथुरायां तथा वज्रं शूर
सेनपतिं ततः प्राजापत्यां निरूप्येष्टिमग्नीनपिबदीश्वरः ३९ विसृज्य तत्र तत्सर्वं दुकूलवलयादिकं निर्ममो निर
हंकारः संछिन्नाशेषबंधनः ४० वाचं जुहाव मनसि तत्प्राण इतरे च तं मृत्यावपानं सोत्सर्गं तं पंचत्वे ह्यजोहवी
त् ४१ त्रित्वे हुत्वा च पंचत्वं तच्चैकत्वेऽजुहोन्मुनिः सर्वमात्मन्यजुहवीद्ब्रह्मण्यात्मानमव्यये ४२ चीरवासा निराहा
रो बद्धवाङ्मुक्तमूर्धजः दर्शयन्नात्मनो रूपं जडोन्मत्तपिशाचवत् ४३ त्रित्वे हुत्वा च पंचत्वं तच्चैकत्वेऽजुहोन्मु
निः सर्वमात्मन्यजुहवीद्ब्रह्मण्यात्मानमव्यये ४४ अनवेक्षमाणो निरगादशृण्वन्बधिरो यथा उदीचीं प्र
विवेशाशां गतपूर्वां महात्मभिः ४५

त्रियङ्गुलुडं तान् लिंगरूपं ४१ त्रिते गुणत्रये पंचत्वं देहं। तच्च त्रित्वं एकत्वे अविद्यायां सर्वं सर्वारोपहेतुरविद्या। आत्मनि जी
वे एवं शोधितमात्मानं ब्रह्मणि अव्यये कूटस्थे न तस्य अन्यत्र लय इत्यर्थः। तदेव आत्मप्रतिपत्तिमुक्तो बाह्यस्थितिमाह द्वाभ्यां
४२ बद्धवाक् मौनी ४३ अनवेक्षमाणः अनुज्ञामप्रतीक्षमाणः कुर्वन् आशां दिशं गतपूर्वां पूर्वं प्रविष्टां महात्मभिः विवेकवद्भिः

नी

वी

अधर्मो मित्रं यैस्तैर्नैर्ये स्ये साधुकृतास्सर्वेधर्माद्ययोगैः ४६ अत एव श्रीवासुदेवस्य चरणांबुजमेव आत्यंतिकं शरणं ज्ञात्वा म
नसा धारयामासुः ४७ विधूतकल्मषा पं० नां स्थानां स्थानं यत्र यस्मिन् विरजेनात्मनैव प्रापुः। ननु षोडशकलेन लिंगशरीरेण
गतेर्वा विशेषणं। विरजेनात्मनेवावस्थानरूपां गतिं विधूतकल्मषाः प्रापुरिति ४८ विदुरोपि तीर्थान्पर्यटन् प्रभासे श्रीकृ
ष्णावेशेन श्रीकृष्णे चित्तमावेश्य देहं परित्यज्य पतत्स्थितः सन् तदानीं नेतुमागतैः पितृभिः सह स्वकक्षयं स्वाधिकारस्थानं ययौ ४९

भा

हृदि ब्रह्म परं ध्यायन्नावर्तेत यतो गतः सर्वे तमनुनिर्जग्मुर्भ्रातरः कृतनिश्चयाः ४६ कलिनाधर्ममित्रेण
दृष्ट्वा स्पृष्टाः प्रजा भुवि ते साधुकृतसर्वार्था ज्ञात्वात्यंतिकमात्मनः ४७ मनसा धारयामासुः श्रीकृष्णचर
णांबुजं तद्ध्यानोद्रिक्तया भक्त्या विशुद्धधिषणाः परे ४८ तस्मिन्नारायणपदे एकांतमतयो गतिं अवापु
र्दुरवापां ते असद्भिर्विषयात्मभिः ४९ विधूतकल्मषा स्थानं विरजेनात्मनैव हि विदुरोपि परित्यज्य प्रभासे
देहमात्मवान् कृष्णावेशेन तच्चित्तः पितृभिः स्वक्षयं ययौ ५० द्रौपदी च तदाज्ञाय पतीनामनपेक्षतां वा
सुदेवे भगवति ह्येकांतमतिराप तं ५१ यः श्रद्धयैतद्भगवत्प्रियाणां पांडोः सुतानामिति संप्रयाणं शृणो
त्यलं स्वस्त्ययनं पवित्रं लब्ध्वा हरौ भक्तिमुपैति सिद्धिं ५२ इति श्री म० भा० म० पुरा० प्र० स्क० यु० प्र० पंचदशः

द्रौपदी आत्मानं प्रति। पतीनां अनपेक्षतां ज्ञात्वा भगवंतं शरणं जगाम। न माता न पिता बंधुवर्गो न भर्ता न पुत्रो न दैवं न च
ज्ञातिवर्गः दयानाथ दीनानुकंपिन् मुरारे शरण्यं गतास्त्वां हि तेन नमोस्तु श्रीकृष्णः शरणं ममेत्युक्त्वा पपात ५० इति एवं यत्संप्रया
णं अलं अतिशयेन स्वस्त्ययनं मंगलास्पदं अलं पवित्रं ५२ इति० भा० प्र० पंचदशोध्यायः

६२

भा० १
५७

५

ततश्च षोडशे भूमिधर्मयोः कलिखिन्नयोः। संवादे वर्ण्यते प्राग्भिः पालकस्य परीक्षितः। १ द्विजवर्याणां शिक्षया सूत्यां जन्म निमित्ते अभिजातकोविदाः जातकर्मविदः हे विप्र महागुणा यस्मिन् सः १ जनमेजयादीन् इत्यर्थः क्षिराधिक्यांगत्वेदसं २ शारद्वतं कृपं यत्र यज्ञे मे धेनु देवा दृष्टिगोचराः ३ निजग्राह निगृहीतवान्। कलिमेव निर्दिशति नृपेति ४ कस्य हेतोरिति अयमर्थः कलिं

सूत उ० ततः परीक्षिद्द्विजवर्यशिक्षया महीं महाभागवतः शशास ह यथा हि सूत्यामभिजातकोविदाः समादिशन्विप्र महद्गुणस्तथा १ स उत्तरस्य तनयामुपयेम इरावतीं जनमेजयादींश्चतुरस्तस्यामुत्पादयत्सुतान् २ आजहाराश्वमेधांस्त्रीन्गंगायां भूरिदक्षिणान् शारद्वतं गुरुं कृत्वा देवा यत्राक्षिगोचराः ३ निजग्राहौजसा वीरः कलिं दिग्विजये क्वचित् नृपलिंगधरं शूद्रं घ्नंतं गोमिथुनं पदा ४ शौनकः कस्य हेतोर्निजग्राह कलिं दिग्विजये नृपः नृदेवचिह्नधृक् शूद्रः कोसौ गां यः पदाहनत् ५ तत्कथ्यतां महाभाग यदि कृष्णकथाश्रयं अथवास्य पदांभोजमकरंदलिहां सतां ६ किमन्यैरसदालापैरायुषो यदसद्व्ययः क्षुद्रायुषां नृणामंग मर्त्यानामृतमिच्छतां इहोपहूतो भगवान्मृत्युः शामित्रकर्मणि ७ न कश्चिन्म्रियते तावद्यावदास्त इहांतकः एतदर्थं हि भगवानाहूतः परमर्षिभिः ८

द

कस्माद्धेतोः केवलं निजग्राह। ननु हतवान्। यतोसौ शूद्रः। अति कुत्सितः। पदा अहन्निति ५ कस्य विष्णोः पदांभोजयोः यो मकरंदः तं लिहंति आस्वादयंति ते ये सतां महतां वा। कथाश्रयमिति समासांतः कृष्णस्यानुषंगः। तर्हि कथ्यतां न चेत्। किमन्यैरसदालापैः। यतः यैः आयुषो वृथा क्षयः। अस्माकमयं सत्रप्रयत्नोपि हरिकथामृतपानार्थमेवेत्याह। सार्धद्वाभ्यां ६ क्षुद्रमल्पमायुर्येषां अतो मर्त्यानां मरणवतां तथापि ऋतं सत्यं मोक्षमिच्छतां यो मृत्युः। स इह सत्रे शामित्रे शामितुरिदं शामित्रं कर्म पशुहिंसनं तदर्थं

५७

क्रि २

अहो नृलोके हरिलीलामृतं वचः पीयेत। इत्येतदर्थं हरिलीला एवामृतं यस्मिन्। वृथा जीवेद्यथैव जीवनमित्याह ९ मंदस्य अलसस्य नक्तं रात्रौ यद्वयः आयुः तन्निद्रया निःफलं गच्छति। दिवा अल्पं च यद्वयः तद्व्यर्थकर्मभिः क्षीयते। तच्चतावत्कलिनिग्रहप्रसंगमाह १० यदा निजचक्रवर्तिते स्वसेनया पालिते देशे कलिं गां प्रविष्टं शुश्राव। तदा तां अनतिप्रियां वार्तां किंचित्प्रियां च युद्धकौतुकसंपत्तेः निशम्य। ततः शरासनं दुष्टनिग्रहार्थमाददे। संयुगशौंडिः युद्धप्रगल्भः। पाठांतरे युद्धे शौंडितुल्यः ११ ततश्च दिग्विजयाय

श्लो

अहो नृलोके पीयेत हरिलीलामृतं वचः यस्मिन्पीते कृतं सर्वं इष्टापूर्तादिकं भवेत् ९ मंदस्य मंदप्रज्ञस्य वयो मंदायुषश्च वै निद्रया ह्रियते नक्तं दिवा च व्यर्थकर्मभिः १० सूत उ० यदा परीक्षित्कुरुजांगलेवसत्कलिं प्रविष्टं निजचक्रवर्तिते निशम्य वार्तामनतिप्रियां ततः शरासनं संयुगशौंडिराददे ११ स्वलंकृतं श्यामतुरंगयोजितं रथं मृगेंद्रध्वजमाश्रितः पुरात् वृतो रथाश्वद्विपपत्तियुक्तया स्वसेनया दिग्विजयाय निर्गतः १२ भद्राश्वं केतुमालं च भारतं चोत्तरान्कुरून् किंपुरुषादीनि सर्वाणि विजित्य जगृहे बलिं १३ तत्र तत्रोपशृण्वानः स्वपूर्वेषां महात्मनां प्रगीयमानं पुरतः कृष्णमाहात्म्यसूचकं १४ आत्मानं च परित्रातमश्वत्थाम्नोस्त्रतेजसः स्नेहं च वृष्णिपार्थानां तेषां भक्तिं च केशवे १५

दिशां जयार्थं १२ भद्राश्वादीनि पूर्वपश्चिमदक्षिणोत्तरतः समुद्रलग्नानि वर्षाणि मेरोः पर्वतइलावृतं ततउत्तरतो रम्यकं। हिरण्मयं च दक्षिणतो हरिवर्षं किंपुरुषं च। तानि विजित्य १३ प्रगीयमानं यशः यशआदीनि शृण्वन् तेभ्यो ददौ इति तृतीयेनान्वयः। स्वपूर्वेषां पांडवानां यशः कृष्णमाहात्म्यसूचकं। श्रीकृष्णमहिमानं सूचयति। यद्यशः तदेवाह १५

तेभ्यः कृष्णगाथा गायकेभ्यो महाधनानि बहुमूल्यानि वासांसि हारान् ददौ १६ स्निग्धेषु पांडुषु यानि विष्णोः सारथ्यादीनि कर्माणि तानि शृण्वन् तथा विष्णोर्जगत्कर्तृकां प्रणतिं च शृण्वन् नृपतिः परीक्षित् विष्णोश्चरणारविंदे भक्तिं करोति स्म। पार्षदमिति रेफषकारयोः श्लिष्टपाठात्। स तत्र पार्षदं सभापतिसेवनं चिन्तानुवृत्तिः। वीरासनं रात्रौ खड्गहस्तस्य तिष्ठतो जा

तेभ्यः परमसंतुष्टः प्रीत्युज्जृंभितलोचनः महाधनानि वासांसि ददौ हारान्महामनाः १६ यत्किंचित्तस्य सैन्येषु वस्तुमात्रमनुत्तमं तत्सर्वमददात्प्रीतः कृष्णगाथाहृताशयः १७ सारथ्यपारषदसेवनसख्यदौत्यवीरासनानुगमनस्तवनप्रणामं स्निग्धेषु पांडुषु जगत्प्रणतस्य विष्णोर्भक्तिं करोति नृपतिश्चरणारविंदे १८ तस्यैवं वर्तमानस्य पूर्वेषां वृत्तमन्वहं नातिदूरे किलाश्चर्यं तदासीत्तन्निबोध मे १९ धर्मः पदैकेन चरन्विच्छायामुपलभ्य गां पृच्छति स्माश्रुवदनां विवत्सामिव मातरं २० वृषभ उ० कच्चिद्भद्रे नामयमात्मनस्ते विच्छायासि म्लायतायन्मुखेन आलक्षये भवतीमंतराधिं दूरे बंधुं शोचसि कंचनांब २१

गारणं। अनुवर्तमानस्य विष्णोश्चरणारविंदे भक्तिं करोति १७ नातिदूरे समीप एव १८ धर्मो वृषरूपः विच्छायां हतप्रभां गां गोरूपां पृथ्वीं विवत्सां नष्टापत्यां १९ ते आत्मनो देहस्य यद्यपि अनामयो न [illegible]ने। तथापि अंतर्मध्ये आधिः पीडा यस्याः तां त्वामालक्षये। केन त्वं विच्छायासि। अतः ईषत् म्लायता ×बहिः× वैवर्ण्यं भजता मुखेन लिंगेन। तत्र कारणानि क

दूरे स्थितं बंधुं त्रिभिः पादैर्न्यूनं अतएव एकपादं मामां वृषलैः अतऊर्ध्वं भोक्ष्यमाणं पुंस्त्वमात्मनेपदविशेषात्। हृतायज्ञभागा येषां यज्ञाद्यकरणात् २१ हे उर्वि पृथ्वि भर्तृभिररक्ष्यमाणाः स्त्रियः शोचसि किं पितृभिररक्ष्यमाणान् बालान् प्रत्युत तैरेव पुरुषादैरिवार्दितैः। आर्तिर्दिष्टान् वाडितान् वा च देवीं सरस्वतीं कुकर्मणि दुराचारे स्थितान् कुलाग्र्यान् ब्राह्मणोत्तमान् राजसेवकान् वा। २२ कलिना उपसृष्टान् व्याप्तान् क्षत्रियान् शोचसि। अथ तैरेव अवरोपितानि उद्वासितानि देशान् व्यवायो मैथुनं निषेधा

पादैर्न्यूनं शोचसि मैकपादमात्मानं वा वृषलैर्भोक्ष्यमाणं अहो सुरादीन् हृतयज्ञभागान्प्रजा उत स्विन्न मघवत्यवर्षति २१ अरक्ष्यमाणाः स्त्रिय उर्वि बालान् शोचस्यथो पुरुषादैरिवार्तान् वाचं देवीं ब्रह्मकुले कुकर्मण्यब्रह्मण्ये राजकुले कुलाग्र्यान् २२ किं क्षत्रबंधून्कलिनोपसृष्टान्राष्ट्राणि वा तैरवरोपितानि इतस्ततो वाशनपानवासस्नानव्यवायोन्मुखजीवलोकं २३ यद्वांब ते भूरिभरावतारकृतावतारस्य हरेर्धरित्रि अंतर्हितस्य स्मरती विसृष्टा कर्माणि निर्वाणविडंबनानि २४ इदं ममाचक्ष्व तवाधिमूलं वसुंधरे येन विकर्शितासि कालेन वा ते बलिनां बलीयसा सुरार्चितं किं हृतमंब सौभगं २५

नामनादरेण सर्वतः शयनादिषून्मुखं जीवलोकं वा २३ हे अंब मातः धरित्रि ते तव यो भूरिभारः तस्य अवतारणार्थं कृतावतारस्य कर्माणि विस्मरती तेन विसृष्टा सती शोचसि। निर्वाणं विडंबितं आश्रितं येषु तानि। अथवा निर्वाणं मोक्षं विडंबितं उपहसितं। यैः मोक्षादपि अधिकसुखानीत्यर्थः २४ हे अंब ते सौभाग्यं कालेन वा हृतं। ननु भवान् ज्ञानात्येव तथापि विवक्ष्या

भा०१ ५९ येन हेतुभूतेन त्वं चतुर्भिः पादैः वर्त्तसे। यत्र च सत्यादयो गुणाः न वियंति न क्षीयंते। तेन श्रीनिवासेन रहितं लोकं शोचामीति षष्ठे
नान्वयः २६ सत्यं यथार्थभाषणं शौचं शुद्धत्वं। दया परदुःखासहनं। क्षांतिः क्रोधप्राप्तौ चित्तयमनं। त्यागः अर्थिषु मुक्तहस्तता। संतोषः अलंबुद्धिः। आर्जवं अवक्रता। शमो मनोनैश्चल्यं। दमो बाह्येंद्रियनैश्चल्यं। तपः स्वधर्मः। साम्यं अरिमित्राद्यभावः। तितिक्षा परापराधसहनं। उपरतिः लाभप्राप्तावौदासिन्यं। श्रुतं शास्त्रविचारः। २७ ज्ञानं आत्मविषयं
विरक्तिर्वैतृष्ण्यं। ऐश्वर्यं नियंतृत्वं। शौर्यं संग्रामोत्साहः। तेजः प्रभावः। बलं दक्षत्वं। स्मृतिः कर्तव्यार्थानुसंधानं। स्वातंत्र्य

धरण्युवाच भवान्हि वेद तत्सर्वं यन्मां धर्मानुपृच्छसि चतुर्भिर्वर्त्तसे येन पादैर्लोकसुखावहैः २७ सत्यं शौचं दया क्षांतिस्त्यागः संतोष आर्जवं शमो दमस्तपः साम्यं तितिक्षोपरतिः श्रुतं २८ ज्ञानं विरक्तिरैश्वर्यं शौर्यं तेजो बलं स्मृतिः स्वातंत्र्यं कौशलं कांतिर्धैर्यं मार्दवमेव च २९ प्रागल्भ्यं प्रश्रयः शीलं सह ओजो बलं भगः गांभीर्यं स्थैर्यमास्तिक्यं कीर्तिर्मानोनहंकृतिः ३० एते चान्ये च भगवन्नित्या यत्र महागुणाः प्रार्थ्या महत्वमिच्छद्भि
नं वियंति हि कर्हिचित् ३१

मपराधीनता। कौशलं क्रियानिपुणता। कांतिः सौंदर्यं। धैर्यमव्याकुलता। मार्दवं चित्ताकाठिण्यं। २८ प्रागल्भ्यं प्रभावितशयः। प्रश्रयो विनयः। शीलं सुस्वभावः। सह ओजो बलानि मनसः ज्ञानेंद्रियाणां कर्मेंद्रियाणां पाटवानि। भगः भोगास्पदत्वं। ५९
गांभीर्यं अक्षोभ्यत्वं। स्थैर्यं अचंचलता। आस्तिक्यं श्रद्धा। कीर्तिर्यशः। मानः पूज्यत्वं। अनहंकृतिर्गर्वाभावः २९ एते एकोनचत्वारिंशद्गुणाः अन्ये च ब्रह्मण्यत्वशरण्यत्वादयो महांतो गुणा यस्मिन् श्रीकृष्णे नित्याः सहासतः न वियंति न क्षीयंते ३०

तेन गुणपात्रेण गुणालयेन पाप्मना पापहेतुना कलिना ३१ तस्य विरहेऽनुशोचामीति आर्चतुर्भिः ३२ ब्रह्मादयो देवाः यस्याः श्रियः अपांगमोक्षः स्वस्मिन् कृपादृष्टिपातः। तत्कामाः संतः बहुतिथं बहुकालं तपः समचरन् सम्यक्चरंति स्म। भगवद्भिः उत्तमैः सेव्यमाना अपि अरविंदवनं विहाय यत्पादलावण्यं अलं अतिशयेन सेवते ३३ यस्य भगवतः श्रीमद्भिः पदैः केतुध्वजः। अब्जादयो चिन्हानि येषां तैः। यद्वा अब्जादीनामाश्रयैः समलंकृतं अंगं यस्याः साहं ततो भगवतः विभूतिं संपदं उ

तेनाहं गुणपात्रेण श्रीनिवासेन सांप्रतं शोचामि रहितं लोकं पाप्मना कलिनेक्षितं ३१ आत्मानं चानुशोचामि भवंतं चामरोत्तमं देवान्पितॄनृषीन्साधून्सर्वान्वर्णांस्तथाश्रमान् ३२ ब्रह्मादयो बहुतिथं यदपांगमोक्षकामास्तपः समचरन्भगवत्प्रपन्नाः सा श्री स्ववासमरविंदवनं विहाय यत्पादसौभगमलं भजतेनुरक्ता ३३ यस्याहमब्जकुलिशांकुशकेतुकेतैः श्रीमत्पदैर्भगवतः समलंकृतांगी त्रीनत्यरोच उपलभ्य ततो विभूतिं लोकान्स मां व्यसृजदुत्स्मयतीं तदंते ३४ यो वै ममातिभरमासुरवंशराज्ञामक्षौहिणीशतमपानुददात्मतंत्रः
त्वां दुस्थमूनपदमात्मनि पौरुषेण संपादयन्यदुषु रम्यमबिभ्रदंगं ३५

पलभ्य प्राप्य त्रीन्लोकानतिक्रम्य अरोचे शोभितवत्यस्मि। पश्चात्तस्याः विभूतेरंते नाशकाले प्राप्ते सति उत्स्मयंतीं गर्वं कुर्वाणां मां संत्यक्तवान् किंच ३४ यो वै आसुरो वंशो येषां तेषां राज्ञां अक्षौहिणीशतरूपं ममातिभरं भारं अपनीतवान्। त्वं च ऊनपदत्वात् दुःस्थं संतं पौरुषेण पुरुषकारेण आत्मनि स्वास्मिन् संपूर्णपदं सुस्थं संपादयन् लक्षणहेत्वोः क्रियाया इति हेतौ शतृप्रत्ययः। संपादयितुमित्यर्थः। अबिभ्रत् धृतवानित्यर्थः ३५

धिरः

भा॰१ ६० न्तस्यविरहंकोवासहेत।प्रेमावलोकभ्वरुचिरस्मितंचवल्गुजल्पभ्वनैर्मधुमानिनीनांसत्यभामादीनांसमानंगर्वसहितंस्थैर्यंतद्धत्वंयोहरत्यूस्यांप्रीणारङस्युत्तंनाविटंकितायाःअलंकृतायाःसस्याद्दिमिषेणरोमोत्सवोन्वद्वति ३६
कथयतोःसतोःप्राचीपूर्ववाहिनीकुरुक्षेत्रे ३७ इतिप्रथमेषोडशः १६ ततःसप्तदशेराज्ञःकलेर्निग्रहउच्यते।यस्यैवंवीर्यमाजोपिवैराग्यंचकृष्णंमद्भुतं।हन्यमानंताड्यमानं १ मृणालंपद्मकंदः तद्वत्धवलं।भयान्मेहं

कोवासहेतविरहंपुरुषोत्तमस्यप्रेमावलोकरुचिरस्मितवल्गुजल्पैः स्थैर्यंसमानमहरन्मधुमानिनीनांरोमोत्सवोममयदंघ्रिविटंकितायाः ३६ तयोरेवंकथयतोःपृथिवीधर्मयोस्तदा परीक्षिन्नामराजर्षिःप्राप्तःप्राचींसरस्वतीं ३७ इतिश्रीमहाभाग॰प्रथ॰पृथिवीधर्मसंवादेषोडशोध्यायः १६ सूतः तत्रगोमिथुनंराजाहन्यमानमनाथवत् दंडहस्तंचवृषलंददृशेनृपलांछनं १ वृषंमृणालधवलंहेमंतमिवबिभ्यतं वेपमानंपदैकेनसीदंतंशूद्रताडितं २ गांचधर्मदुघांदीनांभृशंशूद्रपदाहतां विवत्सांसाश्रुवदनांक्षामांयवसमिच्छतीं ३

तंमूत्रयंतं।इवेत्यनेनपादविशेषोधर्मोभयान्मूत्रयन्निवप्रतिक्षणंक्षीयमाणांशःसस्याप्यनिर्वाहित्।कंपमानइवेतिदर्शितं २ धर्मदुघांहविर्दोग्ध्रींक्षामांकृशांयवसंतृणंअन्नसस्यादिप्रसवक्षयाद्विवत्सेवयज्ञाभावात्कृशाअतएवयवइच्छतीपृथिवीसूचितं ३ ६०

कार्तस्वरंसुवर्णंतन्मयःपरिच्छदःपरिकरोयस्यस्वर्णनिबद्धमित्यर्थः।सज्जीकृतकार्मुकः ४ हंसिघातयसिराजाहमितिचेत्तत्राह।नरइववेषमात्रेणनरदेवोसिकर्मणाआद्विजःशूद्रः ५ अशोच्यान्निरपराधान्रहसिस्वयंप्रहरसि।अतएवशोच्यःसापराधोसि।अतोवधमर्हसिवृषंप्रत्याह ६ हेमृणालधवलत्वंवाकःस्वयमेवसंभावयतिकिंकश्चिद्देवोवृषरूपेणास्मान्परिखेदयन्वर्तसे ७ दोर्दंडैःपरिरक्षितेसुरक्षितेतेअश्रूणिविनान्येषांअश्रू ९

राजोवा॰ यस्त्वंरथमारूढःकार्तस्वरपरिच्छदं मेघगंभीरयावाचासमारोपितकार्मुकः ४ कस्त्वंमच्छरणेलोकेबलाद्धंस्यबलान्बली नरदेवोसिवेषेणनटवत्कर्मणाद्विजः ५ कस्त्वंकृष्णेगतेदूरंसहगांडीवधन्वना शोच्योस्यशोच्यान्रहसिप्रहरन्वधमर्हसि ६ त्वंवामृणालधवलपादैर्न्यूनःपदाचरन् वृषरूपेणकिंकश्चिद्देवोनःपरिखेदयन् ७ नजातुकौरवेंद्राणांदोर्दंडपरिरक्षिते भूतलेनुतंपत्यस्मिन्विनातेप्राणिनांशुचः ८ मासौरभेयानुशुचोव्येतुतेवृषलाद्भयं मारोदीरंबभद्रंतेखलानांमयिशास्तरि ९ यस्यराष्ट्रेप्रजाःसर्वास्त्रस्यंतेसाध्व्यसाधुभिः तस्यमत्तस्यनश्यंतिकीर्तिरायुर्भगोगतिः १० एषराज्ञःपरोधर्मोह्यार्तानामार्तिनिग्रहः अतएवंहनिष्यामिभूतद्रुहमसत्तमं ११

णिनानुपतंतिइतिखेदहेतुत्वंदर्शितं।एवमुक्तेपुनरपिशोचंतंप्रत्याह ८ हेसुरभेःपुत्रमाशुचःशोकंमाकुरुवृषलात्तेभयंव्येतुअपयातु।गांप्रत्याह।अंबमातःशास्तरिमयिजीवतिसतितेभद्रमेवअतोमारोदीःमाद्रुतार्थमेवैनंहनिष्यामि।नतवोपकारायेतिद्वाभ्यां। ९ हेसाध्विसर्वायाःकाश्चिदपीत्यर्थः।असाधुभिस्त्रस्यंतेपीड्यंतेभगोभाग्यंगतिः

[illegible] १० [illegible] ९

भा०१ ६२ कोरश्चन।त्वादृशाः त्वद्विधाः दुःखिताः १२ ब्रोभद्रमस्तु।आत्मनस्तवपादच्छेदेन वैरूप्यंकृतवंतंपार्थानांपांडवानांयुंजन्कुर्व
न्भवति।अस्य एवं भूतस्य मत्तः सकाशात्।सर्वे आपि सर्वस्मिन् श्लोके भयं भवति।ततः साधूनां भद्रं भवेदिति।एतस्य दंडे अहम
समर्थ इति माशंकीरित्याह १४ अनागस्त्विति।आगस्कृत् अपराधकर्ता तस्यामनस्य दंडस्यापि भुजं आह नास्मि इं आहरि

कोरश्चतवपादांस्त्री सौरत्रेयचतुष्पद मा भूवंस्त्वादृशाराष्ट्रे राज्ञो कुल्यानुवर्तिनां १२ आख्याहि दृषभ भद्रं वः
साधूनामकृतागसां आत्मवैरूप्यकर्तारं पार्थानां कीर्तिदूषणं १३ जनेनाघस्य घ्नं युंजन्सर्वतोस्य च भयं साधु
नां भद्रमेव स्यादसाधुदमने कृते १४ अनागःस्विह भूतेषु य आगस्कृन्निरंकुशः आहर्तास्मि भुजं साक्षादमर्त्य
स्यापि सांगदं १५ राज्ञो हि परमो धर्मः स्वधर्मस्थानुपालनं शासतोन्यान्यथाशास्त्रं अनापद्युत्पथानिह १६ ध
र्मः एतद्वः पांडवेयानां युक्तमार्ताभयं वचः येषां गुणगणैः कृष्णो दौत्यादौ भगवान्कृतः १७ न वयं क्लेशबी
जानि यतः स्युः पुरुषर्षभ पुरुषं तं विजानीमो वाक्यभेदविमोहिताः १८

वाभि।सांगदमित्यनेन मूलतः उत्पाद्याहरिष्यामीति दर्शितं।पूरं तु ब्राह्मणात् कृतेन न्येकस्य निग्रहे अन्यस्यानुग्रहे
न वा किं प्रयोजनं तत्राह १५ अन्यान् अधर्मिष्ठान् शासयन् दंडयन् १६ आर्तानां अभयं यस्मात्तद्वचः वः पांडवेया
नां युक्तं उचितमेव १७ वयं यतः पुरुषात् क्लेशा हेतवो भवेयुस्तं पुरुषं न विजानीमः यतः वादीनां वाक्यभेदैर्विमोहिताः ६२

दिगंबराः

विकल्पवसने दंवसं ते आच्छादयंतिये योगिनस्ते आत्मानमेवात्मनः प्रभुं सुखदुःखप्रदमाहुः।तदुक्तं।आत्मैव ह्यात्मनो बंधुरात्मै
व रिपुरात्मन इति।यद्वा विकल्पैः कुतर्कैः प्राकृतानास्तिकाः एवं हितेवदंति।न तावद्देवतादीनां प्रभुत्वं कर्माधीनत्वात्।न च कर्मणः स्वाधीन
त्वात्।अतः स्वयमेव प्रभुर्न भवान् यः कश्चिदिति।अन्ये दैवज्ञाः देवताग्रहादिरूपां देवतां।परे तु मीमांसकाः कर्म।अपरे लौकायतिकाः वार्तिकाः
स्वभावं।यद्यपि एतेष्वरेषु केषांचिदुल्लंभत्वं दर्शितं निश्चय इति सिद्धांतत्वं अप्रतर्क्यात् मनोगोचरात् अनिर्देश्यात् वचनागोचरात् परमेश्व
रात् सर्वं भवतीति विमृशस्व विचारय स्वबुद्ध्या।विखेदः गतमोहः पर्यचष्ट प्रत्यचष्ट ज्ञातवानिति वा।अनिर्धारितमिव।ब्रुवन् घातकं ज्ञान

केचिद्विकल्पवसना आहुरात्मानमात्मनः।दैवमन्ये परे कर्म स्वभावमपरे प्रभुं।।१८।।अप्रतर्क्यादनिर्देश्यादिति केष्वपि
निश्चयः।।अत्रानुरूपं राजर्षे विमृश स्वमनीषया।।१९।। एवं धर्मे प्रवदति स सम्राड्द्विजसत्तम।।समाहितेन मनसा विखे
दः पर्यचष्ट तं।।२०।।धर्मं ब्रवीषि धर्मज्ञ धर्मोसि वृषरूपधृक्।।यदधर्मकृतः स्थानं सूचकस्यापि तद्भवेत्।।२१।।अथवा देव
मायाया नूनं गतिरगोचरा।।चेतसो वचसश्चापि भूतानामिति निश्चयः।।२२।।तपः शौचं दया सत्यमिति पादाः प्रकीर्तिताः
अधर्मांशैस्त्रयो भग्नाः स्मयसंगमदैस्तव।।२३।।इदानीं धर्म पादस्ते सत्यं निर्वर्तयेद्यतः।।तं जिघृक्षत्यधर्मोयमनृतेनै
धितः कलिः।।२४।। इयं च भूर्भगवता न्यासितोरुभरा सती।।श्रीमद्भिस्तत्पदन्यासैः सर्वतः कृतकौतुका।।२५।।

न्यपि न सूचयेदित्येवं रूपं धर्मं ब्रवीषि।अतो धर्मोसि।सूचने को दोष इत्यत आह।यदिति।स्थानं नरकादि यद्वा अज्ञानाद्यपकनं भवतीत्या
ह।अथवेति।देवस्य माया या गतिर्वध्यघातकलक्षणा वृत्तिः।भूतानां चेतसो वचसश्च गोचरी भवितुं योग्या न भवतीति।धर्मोसीति ज्ञात्वा तस्य पादानु
वादेन व्यवस्थामाह।।तप इति द्वाभ्यां।अधर्मपादैः स्तवयः पादास्त्रिभिस्त्रिरंशैर्भग्नाः स्मयो विस्मयः।इदानीं कलौ हे धर्म ते पादः चतुर्थांशस्तत्रापि स
त्यमेवास्ति।यतः सत्याद्भवान् आत्मानं निर्वर्तयेत।यद्वा पुरुषस्त्वां साधयेत्।तमपि परं अनृतेन संवर्धितः कलिरूपोयमधर्मो ग्रहीतुमिच्छति।तत्रेयं
स्थितिः कृतयुगे प्रथमं संपूर्णश्चतुष्पाद्धर्मः त्रेतायां चतुर्णामपि पदानां मध्ये स्मयेन तपः संगेन शौचं मदेन दया अनृतेन सत्यमित्येवं चतुर्थांशो
हीयते द्वापरे त्वर्द्धं कलौ चतुर्थांशो वशिष्यते नश्यतीति।२४।। न्यासिता अन्योन्याद्धारेणावतारितः उरुभारो यस्याः कृतं कौतुकं मंगलं यस्याः
२५

भा. प्र. अश्रूणि कलयति मुंचती त्वच्छकज्जला तेन त्यक्ता सती शूद्रा भोक्ष्यंति मामिति शोचति ॥२६॥ इति निशातं निशितं अधर्मस्य हेतुर्यः कलिस्तं हंतुमित्यर्थः। अभिप्रेत्य ज्ञात्वा शरण्य आश्रयार्हः श्लोक्यः सत्कीर्त्यर्हः ॥२९॥ गुडाकेशोऽर्जुनः तस्य यशोधराः ये वयं तेषां तान्प्रति बद्धांजलेर्न तस्य ते किमु कथं च न केनाप्यंशेन न वर्त्तितव्यं। यस्मात्त्वमधर्मबंधुः तदेवाह। राजदेहेषु वर्तमानं त्वामनु सर्वधा प्रवृत्तः। अनार्यं

शोचत्यश्रुकला साध्वी दुर्भगेवोज्झिता धुना॥ अब्रह्मण्या नृपव्याजाः शूद्रा भोक्ष्यंति मामिति ॥२६॥ इति धर्मं महीं चैव सांत्वयित्वा महारथः॥ निशातमाददे खड्गं कलयेऽधर्महेतवे ॥२७॥ तं जिघांसुमभिप्रेत्य विहाय नृपलांछनं॥ तत्पादमूलं शिरसा समगाद्भयविह्वलः॥ ॥२८॥ पतितं पादयोर्वीरः कृपया दीनवत्सलः॥ शरण्यो नावधीत्श्लोक्य आह चेदं हसन्निव ॥२९॥ ॥राजोवाच॥ ॥न ते गुडाकेशयशोधराणां बद्धां-

श्रीः ६२ जलेर्वै भयमस्ति किंचित्॥ न वर्तितव्यं भवता कथंचन क्षेत्रे मदीये त्वमधर्मबंधुः॥ श्रीः ६२

॥३०॥ त्वां वर्तमानं नरदेवदेहेष्वनुप्रवृत्तोऽयमधर्मपूगः॥ लोभोऽनृतं चौर्यमनार्यमंहो ज्येष्ठा च माया कलहश्च दंभः॥ ॥३१॥ न वर्तितव्यं तदधर्मबंधो धर्मेण सत्येन च वर्तितव्ये॥ ब्रह्मावर्ते यत्र यजंति यज्ञैर्यज्ञेश्वरं यज्ञवितानविज्ञाः॥ ॥३२॥

दौर्जन्यं अंहः स्वधर्मत्यागः ज्येष्ठा अलक्ष्मीः माया कपटं। तत्तस्माद्वर्तितव्ये वर्तितुमर्हे ब्रह्मावर्ते देशे। यज्ञस्य वितानं विस्तारः तं विज्ञाः निपुणाः। यज्ञैर्यज्ञेश्वरं यत्र यजंति ॥३२॥ ॥श्रीकृष्णाय नमः॥ ॥ ॥छ॥

दुयाग[illegible]मूर्तिर्यस्य शं क्षेमस्तं कामांश्च न तिंद्रादयो देवाः इज्यंते न तु हरिस्तत्राह। एष स्थावरादीनामात्मेति तथापि इज्येवत्। न परिछिन्न इत्याह। अंतर्बहिरिति। यथा वायुः प्राणरूपेणांतः स्वरूपेण बहिरप्यस्ति तद्वत्सर्वांतर्यामीश्वरोपि ३३ उद्यतासिं उद्धृतखड्गं। दंडपाणिं यमं उद्यतं उद्युक्तं ३४ अत्र न वस्तव्यमिति या त्वयाज्ञा तया यत्र क्वापि वत्स्यामि। किंतु तत्र आत्तः गृहीतः इषुः शरासनं च येन तं त्वामेव लक्षये ३५ तस्मात् यत्र नियतो निश्चलो वत्स्यामि। तत्स्थानमादेष्टुमर्हसि ३६

यस्मिन्हरिर्भगवानिज्यमान इज्यात्ममूर्तिर्यजतां शं तनोति कामानमोघान्स्थिरजंगमानामंतर्बहिर्वायुरिवैष आत्मा ३३ सूतः परीक्षितैवमादिष्टः स कलिर्जातवेपथुः तमुद्यतासिमाहेदं दंडपाणिमिवोद्यतं ३४ यत्र क्व चन वत्स्यामि सार्वभौम तवाज्ञया लक्षये तत्र तत्रापि त्वामात्तेषुशरासनं ३५ तन्मे धर्मभृतां श्रेष्ठ स्थानं निर्देष्टुमर्हसि यत्रैव नियतो वत्स्य आतिष्ठंस्तेऽनुशासनं ३६ अभ्यर्थितस्तदा तस्मै स्थानानि कलये ददौ द्यूतं पानं स्त्रियः सूना यत्राधर्मश्चतुर्विधः ३७

पानं मद्यादेः स्थानं सूना प्राणिवधस्थानं। द्यूतमनृतं पाने मदः पूर्वं मदो दयानाशकत्वेनोक्तः। अत्र तु वर्गद्वारा तपोनाशकत्वेन। स्त्रीपुसंगः हिंसायां क्रौर्यं। दयानाशकमिति ज्ञेयं। यद्यपि सर्वं सर्वत्र संभवति तथापि प्राधान्येन। अनृतादीनां बाहुल्यादिषु यथासंख्यं ज्ञेयं। द्वादशस्कंधे तु। सत्यं दया तपो दानमिति पादा विभोर्नृप इत्यत्र दानशब्देन शौचमेवोक्तं। मनःशुद्धिरूपत्वात्। भूताभयदानस्य त्रेतायां धर्मपादानां तुर्यांशो हीयते। शनैरधर्मपादैरनृतहिंसासंतोषविग्रहैः इत्यत्र च असंतोषशब्देन तस्य हेतुर्गर्वो लक्ष्यते। विग्रहशब्देन च तद्धेतुः स्त्रीसंग इत्यत्र विशेषः ३७ गर्व

भा०१
६३ चतुर्विधस्याप्येकत्रैवस्थानंदेहीतिपुनर्याचमानायजातरूपंसुवर्णंदत्तवान् । ततःसुवर्णात् । अनृतंमदंकाममितिसंगंरजः
त्रिरजोमूलांहिंसांएतानिचत्वारिपंचमंवैरंचादादिति ३८ अमूनिअमुष्यस्थानेषुन्यवसदित्यर्थः ३९ अथेतिहेतो
र्बुभूषुःउद्भवितुमिच्छुःस्त्रीसुवर्णयोरसेवनंनामतयोरनासक्तिः ४० एवंकलिंनिगृह्यात्वृषस्यपादान्प्रतिसंदधेतप
आदीनिप्रवर्तितवानित्यर्थः ४१ युष्मदीयसत्त्वप्रवृत्तिरपितत्प्रभावादेवेत्याहत्रिभिः । एतर्हिइदानींयुधिष्ठिरेणारण्यंप्रवे

पुनश्चयाचमानायजातरूपमदात्प्रभुः ततोनृतंमदंकामंरजोवैरंचपंचमं ३८ अमूनिपंचस्थानानिह्य
धर्मप्रभवःकलिः औत्तरेयेणदत्तानिन्यवसत्तन्निदेशकृत् ३९ अथैतानिनसेवेतबुभूषुःपुरुषःक्वचित् विशे
षतोधर्मशीलोराजालोकपतिर्गुरुः ४० वृषस्यनष्टांस्त्रीन्पादान्तपःशौचंदयामिति प्रतिसंदधआश्वास्य
महींचसमवर्द्धयत् ४१ सएषएतर्ह्यध्यास्तेआसनंपार्थिवोचितं पितामहेनोपन्यस्तंराज्ञारण्यंविविक्षता ४२
आस्तेधुनासराजर्षिःकौरवेंद्रश्रियोल्लसन् गजाह्वयेमहाभागश्चक्रवर्तीबृहच्छ्रवाः ४३ इत्थंभूतानुभा
वोयमभिमन्युसुतोनृपः यस्यपालयतःक्षोणीयूयंसत्रायदीक्षिताः ४४ इतिभा० प्र० कलिनिग्रहोनामसप्तदशः

ष्टुमिच्छताउपन्यस्तंसमर्पितंआसनमध्यास्ते । अधुनापालयतीतिइतिवर्तमानसामीप्येवर्तमानवन्निर्देशःस्मेत्यध्याहारोवा ४२ ६३
बृहच्छ्रवाबृहत्कीर्तिः । सत्रायसत्रंकर्तुंदीक्षिताःदीक्षांकृतवंतः ४४ इतिश्रीधरीटीकायांप्रथमेसप्तदशोध्यायः १७

राज्ञस्त्वष्टादशेनस्यब्रह्मशापोनिरूप्यते । स्वानुग्रहएवास्यजातोवैराग्यमावहत् । १ परीक्षितोनिर्याणमाश्चर्यंवक्तुंत
त्संभवनायजन्माश्चर्यमनुस्मारयति । विप्लुष्टोनिर्दग्धः १ ब्रह्मकोपादुत्थितात्तक्षकात्यःप्राणविप्लवःप्राणनाशःउ
रुभयंतस्मात्नसंमुमोह । अत्रहेतुः । यस्तुभगवत्येवार्पिताशयइतिकिंनु । २ वैयासकेःशिष्यःसन् विज्ञाताअजितस्य
हरेःसंस्थितिस्तत्त्वंयेनसः । नचैतच्चित्रमित्याह ३ उत्तमश्लोकस्यैववार्तायेषुअतएवनित्यंतत्कथारूपममृतंजुष

सूतः योवैद्रौण्यस्त्रविप्लुष्टोनमातुरुदरेमृतः अनुग्रहाद्भगवतःकृष्णस्याद्भुतकर्मणः १ ब्रह्मकोपोत्थि
ताद्यस्तुतक्षकात्प्राणविप्लवात् नसंमुमोहोरुभयाद्भगवत्यर्पिताशयः २ उत्सृज्यसर्वतःसंगंविज्ञाताजि
तसंस्थितिः वैयासकेर्जहौशिष्योगंगायांस्वंकलेवरं ३ नोत्तमश्लोकवार्तानांजुषतांतत्कथामृतं स्यात्सं
भ्रमोंतकालेपिस्मरतांतत्पदांबुजं ४ तावत्कलिर्नप्रभवेत्प्रविष्टोपीहसर्वतः यावदीशोमहानुर्व्यामभिम
न्यवएकराट् ५ यस्मिन्नहनियर्ह्येवभगवानुत्ससर्जगां तदैवेहानुवृत्तोसावधर्मप्रभवःकलिः ६ नानुद्वे
ष्टिकलिंसम्राट्सारंगइवसारभुक् कुशलान्याशुसिध्यंतिनेतराणिकृतानियत् ७

तांसंभ्रमोनस्यात्तस्मिन्राज्ञिसुतरांनतत्रचित्रमित्याह ४ अभिमन्योःपुत्रएकराट्चक्रवर्ती । ईशःपतिस्तावत्ननु
तदाकलेरप्रवेशएवास्तु । प्रविष्टोपिनप्रभवेदितिकुतस्तत्राह ५ यस्मिन्नहनियर्हियस्मिन्क्षणेगांपृथ्वीं अनुवृत्तःप्रविष्टः
अधर्मस्यप्रभवोयस्मिन् ननुअधर्महेतुंकलिंसर्वथाकिंनहतवानतत्राह ६ सारंगोभ्रमरइव । सारग्राहीसारमाहर
न्यस्मिन्कलौकुशलानिपुण्यानिआशुसंकल्पमात्रेणफलंति । इतराणिपापानिआशुनसिध्यंतियतस्तानिकृता
न्येवसिध्यंति ७

भा०१ ६४

ननुसंकल्पितमाजानीति। ननुदोषाधिक्यान्नूहष एवयुक्तः। नधीरेषुतस्या। किंचित्करत्वादित्याह ८ बालेषुअधीरे
षुअप्रमत्तःअसावधानःसन्नयोदकइववर्त्तते। तर्हिधीरेषुभीरूणां किंकठिनेत्यर्थः ८ परीक्षितमाख्यानंअष्ट
व। एष्टवंतोयूयंकिंबहुनानचैतावदेवकर्त्तव्यमितिसर्वशास्त्रार्थसारंकथयति ९ कथनीयान्युरूणिकर्माणियस्य
तस्यगुणकर्मविषया बुभूषुभिःसद्भावमिच्छद्भिःपुनर्विस्तरेणकथनार्थंसूतोकिंसत्संगंचाभिनंदतित्रिभिः १० हेसू

किंनुबालेषुशूरेणकलिनाधीरभीरुणा अप्रमत्तःप्रमत्तेषुयोवृकोनृषुवर्त्तते ८ उपवर्णितमेतद्वःपुण्यं
पारिक्षितंमया वासुदेवकथोपेतमाख्यानंयदपृच्छत ९ यायाःकथाभगवतःकथनीयोरुकर्मणः गुणक
र्माश्रयाःपुंभिःसंसेव्यास्ताबुभूषुभिः १० ऋषयऊचुः सूतजीवसमाःसौम्यशाश्वतीर्विशदंयशः यस्त्वंशं
ससिकृष्णस्यमर्त्यानाममृतंहिनः ११ कर्मण्यस्मिन्ननाश्वासेधूमधूम्रात्मनांभवान् आपाययतिगो
विंदपादपद्मासवंमधु १२

नशाश्वतीःसमाःअनंतान्वत्सरान्जीव। अत्यंतसंयोगेद्वितीया। यस्त्वंचश्रीकृष्णस्यविशुद्धंयशःशंससि। तच्चा
स्माकंमर्त्यानांअमृतंमरणनिवर्त्तकं किंच ११ अस्मिन्कर्मणिसत्रेअनाश्वासेअविश्वसनीयेवैगुण्यबाहुल्ये
नफलनिश्चयाभावात्। धूमेनधूम्रःविवर्णःआत्मामनोयेषांतान्अस्मान्कर्मणिषण्णां। आसवंमकरंदमधुमधुरं
म १२

भगवत्संगिनोविलुप्तकास्तेषांसंगस्ययोलवःअत्यल्पःकालः। तेनापिस्वर्गंनतुलयामममोक्षमपिसमंनपश्याम। संभा
वनायांलोट्। मर्त्यानांतुच्छाआशिषोराज्याद्याःनतुलयामेति। किमुतुवक्तव्यं। एवंसत्संगमभिनंद्यश्रवणोत्सुक्यमावि
ष्कुर्वंति १३ रसवित्रसज्ञः। महत्तमानामेकांतेनपरंअयनंआश्रयोयःतस्यकथायांअगुणस्यप्राकृतगुणरहितस्यक
ल्याणगुणानामंतं। येयोगेश्वरास्तेपिनजग्मुः। एतावंतइतिपरिगणनायांचक्रुः। भवःशिवःपद्मोब्रह्माचमुख्योयेषां
तेनोस्माकंमध्येभगवान्प्रधानंसेव्योयस्यसःभगवान्नःशुश्रूषतांहरेश्चरितंवितनोतुविस्तारयतु। तच्चशुकपरी

तुलयामलवेनापिनस्वर्गंनापुनर्भवं भगवत्संगिसंगस्यमर्त्यानांकिमुताशिषः १३ कोनामतृप्येद्रसवित्
कथायांमहत्तमैकांतपरायणस्य नांतंगुणानामगुणस्यजग्मुर्योगेश्वरायेभवपाद्ममुख्याः १४ तन्नो
भवान्वैभगवत्प्रधानोमहत्तमैकांतपरायणस्य हरेरुदारंचरितंविशुद्धंशुश्रूषतांनोवितनोतुविद्वन् १५
सवैमहाभागवतःपरीक्षिद्येनापवर्गाख्यमदभ्रबुद्धिः ज्ञानेनवैयासकिशब्दितेनभेजेखगेंद्रध्वजपा
दमूलं १६ तन्नःपरंपुण्यमसंवृतार्थमाख्यानमत्यद्भुतयोगनिष्ठं आख्याह्यनंताचरितोपपन्नंपारी
क्षितंभागवताभिरामं १७

क्षित्संवादेनकथयेत्याहद्वाभ्यां १५ वैयासकिनाश्रीशुकेनशब्दितेनक
थितेनयेनज्ञानेनज्ञानसाधनेनअपवर्गइत्याख्यायस्यतत् खगेंद्रध्वजस्यहरेःपादमूलंभजे १६ तत्ज्ञानसाधनं
६ असंवृतार्थंयथातथाआख्याहितदेवनिर्दिशति। परीक्षितेकथितंआख्यानंश्रीमद्भागवतंपुराणंपुण्यंसत्त्वशोधकं
अत्यद्भुतेयोगेनिष्ठायस्यअनंतस्यचरितेरुपपन्नंयुक्तं। अतएवभागवतानांअभिरामंप्रियं। एतैर्विशेषणैःकर्मज्ञानभ

भा०१ ६५ अहो इत्याश्चर्ये। ह इति हर्षे वयमिति बहुवचनं श्लाघायां प्रतिलोमजा अपि अद्य जन्मभृतः सफलजन्मानः। आस्म जाताः वृद्धानामनुवृत्त्या आदरेण ज्ञानवृद्धः शुकः तस्य सेवयेति वा। यतो दुःकुलत्वमितो चमनःपीडां महत्तमानां अभि
धानयोर्लौकिकोऽपि संभाषणलक्षणः संबंधः विधुनोति अपनयति १८ कुतः पुनः किं वक्तव्यं। तस्य अनंतस्य नामगृणतः पुंसामभिधानयोगो दौःकुल्यं विधुनोतीति। यद्वा नामगृणतः कुतः पुनर्दौःकुल्यमिति। यद्वा गृणतः

सूत उ० अहो वयं जन्मभृतोऽद्य हास्म वृद्धानुवृत्त्यापि विलोमजाताः दौःकुल्यमाधिं विधुनोति शीघ्रं महत्तमानामभिधानयोगः १८ कुतः पुनर्गृणतो नाम तस्य महत्तमैकांतपरायणस्य योऽनंतशक्तिर्भगवाननंतो महद्गुणत्वाद्यमनंतमाहुः १९ एतावतालं ननु सूचितेन गुणैरसाम्यानतिशायनस्य हित्वेतरान्प्रार्थयतो विभूतिर्यस्यांघ्रिरेणुं जुषतेऽनभीप्सोः २०

पुंसस्तस्य नाम दौःकुल्यं विधुनोतीति किं पुनर्वक्तव्यमिति। कैमुत्यमेव। अनंताः शक्तयो यस्य स्वतोऽप्यनंतः किंच। महांतो गुणा यस्य स महद्गुणः तस्य भावस्तस्मात् यं गुणतोऽप्यनंतमाहुः एतत्प्रपंचयति त्रिभिः १९ तस्य यदसाम्यं अनतिशायनं च। गुणैस्तत्साम्यं तदाधिक्यं चान्यस्य नास्ति तस्यार्थस्य ज्ञानं एतावता सूचितेन अलं पर्याप्तं। कस्तद्विस्तरतो वक्तुं शक्नोतीति तदेवाह। इतरान्ब्रह्मादीन्प्रार्थयमानान्हित्वा विभूतिः लक्ष्मीः अनभीप्सोः अपि यस्यांघ्रिरेणुं

६ जुषते सर्वांतरेयस्य पादनखादवसृष्टं निःसृतमंभः पविरिंच्येन ब्रह्मणा उपहृतं समर्पितं अर्हणां अर्घोदकं ईशसहितं जगत्पुनाति विरंच्योपहृतं सेशमिति वा योरप्युपासकत्वमुक्तं तस्मान्मुकुंदव्यतिरिक्तः को नाम भगवत्पदार्थः सर्वेश्वर इत्यर्थः २१ धीराः संतः ऊढं दृढतं। अंत्यं परमकाष्ठापत्तिः तदाह। यस्मिन्नहिंसा उपशमश्च स्वाभाविको धर्मः एवं स्वभाग्यमभिनंद्य परीक्षितोपाख्यानं वक्तुमाह २२ हे अर्यमणः सूर्यमूर्तयः अत्र यावानात्मावगमः मम ज्ञानं तावत् आच

अथापि यत्पादनखावसृष्टं जगद्विरिंचोपहृतार्हणांभः सेशं पुनात्यन्यतमो मुकुंदात्को नाम लोके भगवत्पदार्थः २१ यत्रानुरक्ताः सहसैव धीरा व्यपोह्य देहादिषु संगमूढं व्रजंति तत्पारमहंस्यमंत्यं यस्मिन्नहिंसोपशमः स्वधर्मः २२ अहं हि पृष्टोऽर्यमणो भवद्भिराचक्ष आत्मावगमोऽत्र यावान् नभः पतंत्यात्मसमं पतत्त्रिणस्तथा समं विष्णुगतिं विपश्चितः २३ एकदा धनुरुद्यम्य विचरन्मृगयां वने मृगाननुगतः श्रांतः क्षुधितस्तृषितो भृशं २४ जलाशयमचक्षाणः प्रविवेश तमाश्रमं ददर्श मुनिमासीनं शांतं मीलितलोचनं २५ प्रतिरुद्धेंद्रियप्राणमनोबुद्धिमुपारतं स्थानत्रयात्परं प्राप्तं ब्रह्मभूतमविक्रियं २६

क्षे प्रवक्ष्यामि। तथा हि पतत्त्रिणः आत्मसमं स्वशक्त्यनुरूपमेव उत्पतंति न कृत्स्नं तथा विपश्चितो विष्णोर्गतिं लीलां समं स्वमत्यनुरूपमेव वदंतीत्यर्थः। २३ अचक्षाणः अपश्यन् तं प्रसिद्धमाश्रमं तस्मिन् आश्रमे आसीनं मुनिं शमीकं। २५ प्रतिरुद्धाः प्रत्याहृताः इंद्रियादयो येन। अत एव उपारतं स्थानत्रयात् जाग्रदादिलक्षणात्परं तुरीयपदं प्राप्तं। अत एव ब्रह्मभूतत्वादविक्रियं २६

विप्रकीर्णजटाभिराच्छन्नं रुरुर्मृगविशेषः तस्य चर्मणा आच्छन्नं विशेषेण शुष्यत्तालुर्यस्य सः। तथाभूतं मुनिं उदकं अया
चत २७ नलब्धं तृणं तृणासनं भूमिरूपवेशनस्थानं चयेन सः न संप्राप्तो अर्घः सूनृतवचनं चयेन सः २८ मत्सरः
तदुत्कर्षासहनं २९ गतासुमृतं। धनुःकोट्या चापाग्रेण सर्पनिधने राज्ञोभिप्रायमाह ३० एषकिंप्रत्याहृतसर्वे
द्रियः सन्मीलितेक्षणःस्थितः। यद्वाक्षत्रबंधुभिरागतैर्वा किंस्यादित्यवज्ञायामृषासमाधिः सन्निति जिज्ञासयेत्यर्थः

प्रविकीर्णजटाछन्नं रौरवेणाजिनेन च विशुष्यत्तालुरुदकं तथाभूतमयाचत. २७ अलब्धतृणभूम्यादि
रसंप्राप्तार्घसूनृतः अवज्ञातमिवात्मानं मन्यमानश्चुकोप ह २८ अभूतपूर्वः सहसा क्षुत्तृड्भ्यामर्दि
तात्मनः ब्राह्मणं प्रत्यभूद्ब्रह्मन्मत्सरो मन्युरेव च २९ सतु ब्रह्मऋषेरंसे गतासुमुरगं रुषा विनिर्गच्छ
न्धनुःकोट्या निधाय पुरमागतः ३० एषकिंनिभृताशेषकरणो मीलितेक्षणः मृषासमाधिराहोस्वित्किं
नु स्यात्क्षत्रबंधुभिः ३१ तस्य पुत्रोतितेजस्वी विहरन्बालकोर्भकैः राज्ञाघं प्रापितं तातं श्रुत्वा तत्रेदम
ब्रवीत् ३२ अहो अधर्मः पालानां पीनां बलिभुजामिव स्वामिन्यघं यद्दासानां द्वारपानां शुनामिव ३३
ब्राह्मणैः क्षत्रबंधुर्हि द्वारपालो निरूपितः स कथं तद्गृहे द्वास्थः सभांडं भोक्तुमर्हति ३४

१ तस्य पुत्रः शृंगी नाम अतितेजस्वी तपोबलसंपन्नः तत्र अर्भकमध्ये इदं अब्रवीत् पालानां राज्ञां पीनां पुष्टानां अधर्ममेव नि ६६
दर्शति। स्वामिनि दासानां यदघं पापाचरणं बलिभुजां शुनामिव काकानामिवेति दासत्वं दर्शयति। ३३ सहास्थः तद्गृहे
भांडे एकस्थितं कथं भोक्तुमर्हति ३४

तत्र तदनंतरं अहं शास्मि दंडयामि ३५ इति वयस्यान् उक्त्वा रोषेण ताम्रे असी लियस्य कौशिकी नदी तस्याः आपः
संधिरार्षः। वाग्वज्रं शापं ३६ इति एवं सर्पनिक्षेपणाधर्षतिं। भस्मीकरिष्यति स्म निभिश्चयार्थे कुलस्यांगार मुमुक्षुं
मे मया ३७ गळे सर्पकळेवरं यस्य इत्यनुक्रमासः। मुक्तकंठः। उच्चैरित्यर्थः ३८ आंगिरसः। आंगिरसगोत्रो

ह्युत्सिगते भगवति शास्त्र्युत्पथगामिनां तद्भिन्नसेतूनद्याहं शास्मि पश्यत मे बलं ३५ इत्युक्त्वा रो
षताम्राक्षो वयस्यान् ऋषिबालकः कौशिक्याप उपस्पृश्य वाग्वज्रं विससर्ज ह ३६ इति लंघितमर्या
दं तक्षकः सप्तमेहनि धक्ष्यति स्म कुलांगारं चोदितो मे पितृद्रुहं ३७ ततोभ्येत्याश्रमं बालो गळे सर्पक
ळेवरं पितरं वीक्ष्य दुःखार्तो मुक्तकंठो रुरोद ह ३८ सवा आंगिरसो ब्रह्मन् श्रुत्वा सुतविलापनं उन्मी
ल्य शनकैर्नेत्रे दृष्ट्वा चांसे मृतोरगं ३९ विसृज्य पुत्रं पप्रच्छ वत्स कस्माद्धि रोदिषि केन वा ते विप्रकृ
तमित्युक्तः सन्यवेदयत् ४० निशम्य शप्तमतदर्हं नरेंद्रं स ब्राह्मणो नात्मजमभ्यनंदत् अहो बता
होम हदद्य ते कृतं अल्पीयसि द्रोह उरुर्दमो धृतः ४१ नवै नृभिर्नरदेवं पराख्यं संमातुमर्हस्यवि
पक्वबुद्धे यत्तेजसा दुर्विषहेण गुप्ता विंदंति भद्राण्यकुतोभयाः प्रजाः ४२
द्भवः शमीकः ३९ तं च सर्पं विसृज्य पुत्रं पप्रच्छ। केनापकारः कृतः इत्युक्तः सन् शृंगी सर्वं पूर्ववृत्तांतं शापं न्यवेदय
त् ४० शापायोग्यं नरेंद्रं श्रुत्वा नाभिनंदत। वाक्यं अहो इति बत कष्टं ते त्वया महत्पापं कृतं यदल्पीयसि द्रोहे ब
उर्दमः कृतः ४१ परो विष्णुरित्याख्या आख्या निर्यस्य तं नरदेवं नृभिः संमातुं शप्तुं द्रष्टुं अर्हसि ४२

भा०१
६७

अलक्ष्यमाणे अदृश्यमाने। अविवरूथवत् मेघसंघवत् ४३ नष्टो नाथो यस्य लोकस्य तस्य वसोः वसुनो धनस्य आलुंप कात् अपहर्तुः चौरात् देहेनार्थस्य च पंजविष्यति। तदस्मिन् भिन्नो लोकः स्मानुपैष्यति। अनन्वयं संबंधशून्यमेव। नदेव पापं दर्शयति। परस्परमिति। शपंति। परुषं वदंति। पश्वादीन् ऊर्यंते अपहरंति। पुरुदस्यवः चौरबहुलाः ४४ आर्यधर्मः सदाचारः। शुनां कपीनामिव अर्थकामयोरेवाभिनिवेशितात्मनां। एवं राजमात्रस्य शापायोग्यत्वमुक्त्वा प्रस्तुते विशेषमा

अलक्ष्यमाणे नरदेवनाम्नि रथांगपाणावयमंग लोकः तदा हि चौरप्रचुरो विनंक्ष्यत्यरक्ष्यमाणो विवरूथ वत्क्षणात् ४३ तदद्य नः पापमुपैत्यनन्वयं यन्नष्टनाथस्य वसोर्विलुंपकात् परस्परं घ्नंति शपंति वृंजते पशू न्स्त्रियोर्थान् पुरुदस्यवो जनाः ४४ तदार्यधर्मश्च विलीयते नृणां वर्णाश्रमाचारयुतस्त्रयीमयः ततोर्थकामा भिनिवेशितात्मनां शुनां कपीनामिव वर्णसंकरः ४५ धर्मपालो नरपतिः स तु सम्राड्बृहच्छ्रवाः साक्षान्महा भागवतो राजर्षिर्हयमेधयाट् ४६ क्षुत्तृट्श्रमयुतो दीनो नैवास्मच्छापमर्हति अपापेषु स्वभृत्येषु बा लेनापक्वबुद्धिना [illegible] पापं कृतं तद्भगवान् विश्वात्मा क्षंतुमर्हति ४७ तिरस्कृता विप्रलब्धाः शप्ताः क्षिप्ता हता अपि नास्य तत्प्रतिकुर्वंति तद्भक्ताः प्रभवोपि हि ४८

हसाईन। ४५ हयमेधयाट् अश्वमेधयाजी महाभागवतः ४६ अस्य महापापस्य अन्यत्प्रायश्चित्तमदृष्ट्वा। पाप मेवोचुः स्त भगवंतं प्रार्थयते। अपापेष्विति। राजा चेत् सतिशापयोग्यः तर्हि निष्कृतिर्भवेत्। तत्तु न संभवति। तस्य भागव तत्वादित्याह ४७ तिरस्कृताः निंदिताः प्रविलब्धाः वंचिताः क्षिप्ताः अवज्ञाताः हताः ताडिताः अस्य तिरस्कारादिकं तु

विप्रकृतः अघं अपराधं पुत्रकृतं चैतदित्याह। ४८ द्वंद्वेषु सुखदुःखादिषु अगुणाश्रयः सुखदुःखाद्यनाश्रयो न ऋवति ५०
इति प्रथमे अष्टादशः प्रायोपविष्टे गंगायां राज्ञि योगिजनावृते शुकस्यागमनं तत्र प्रोक्तमेकोनविंशके १ स्वकृतं तत् कर्म मुनिस्कंधे सर्पनिक्षेपणं। गर्हं निंद्यं विचिंतयन्। सुदुर्मनाः जातः चिंतामेवाह। साद्धाभ्यां। अहो इति। अमीवं पापं। ब्रह्मणि ब्राह्मणे। गूढं गुप्तं तेजो यस्य १ कृतं यद्देवहेलनं। ईश्वरावज्ञा। पापमित्यर्थः तस्मान्मे व्यसनं भविष्य

इति पुत्रकृताघेन सोन्वतप्तो महामुनिः स्वयं विप्रकृतो राज्ञा नैवाघं तदचिंतयत् ४९ साधवः प्रायशो लोके परैर्द्वं द्वेषु योजिताः न व्यथंति न हृष्यंति यत आत्मा गुणाश्रयः ५० इति भा० प्र० परीक्षितः शापानुग्रहे अष्टादशः
सूतः महीपतिस्त्वथ तत्कर्म गर्ह्यं विचिंतयन्नात्मकृतं सुदुर्मनाः अहो मया नीचमनार्यवत्कृतं निरागसि ब्रह्मणि गूढतेजसि १ ध्रुवं ततो मे कृतदेवहेलनाद्दुरत्ययं व्यसनं नातिदीर्घात् तदस्तु साक्षादघनिष्कृताय मे यथा न कुर्यां पुनरेवमद्धा २ अद्यैव राज्यं बलमृद्धकोशं प्रकोपितब्रह्मकुलानलो मे दहत्वभद्रस्य पुनर्न मेभूत्पापीयसी धीर्द्विजदेवगोभ्यः ३

ति। तत्तु नातिदीर्घात्कालात् अचिरादेवास्तु। तत्रापि साक्षान्न तु पुत्रकलत्रादिद्वारेणेति प्रार्थना। कामं असंकोचेन एवं प्रार्थनायाः प्रयोजनमपि। अघस्य निःकृताय प्रायश्चित्ताय। यथा पुनरेवं न कुर्यामिति च। एवं साक्षात्स्वस्येव व्यसनं संप्रा र्थ्य। तत्प्रागेव किंचित्प्रार्थयति। २ अद्यैव मे राज्यादि दहतु। प्रकोपितं ब्रह्मकुलं तदेव अनलः पुनर्ब्राह्मणादीन् पुन :पीडयितुं अधर्मो मा भूत्। न भवेदित्यर्थः। ३

भा०१
६८

इत्थं चिंतयन्स राजा मुनेः सुतेनोक्तः अद्यतनात्सप्तमे ह्नि निरतिर्मृत्युर्भविष्यतीति । तथा अश्रृणोत् । शमीकप्रेरिता
च्छिष्यात् इत्येवं मरणं श्रुत्वा स तक्षकस्य विषाग्निं साधु मेने । यतो विषयेषु प्रसक्तस्य मे एतदेव विरक्तिकारणं ४ अ
थानंतरं उभौ लोकौ पुरस्तात्राज्यमध्य एव हेयतया विमर्शितौ विमृश्य ज्ञातौ विहाय श्रीकृष्णांघ्रिसेवामेव अधिम
न्यमानः सर्वपुरुषार्थाधिक्यं जानन् । प्रायं मरणपर्यंतं अन्नोदकादिनियमसंकल्पेनोपाविशदिति । यद्वा प्रायं प्र

सचिंतयन्नित्थमथाश्रृणोद्यथा मुनेः सुतोक्तो निर्ऋतिस्तक्षकाख्यः ससाधु मेने न चिरेण तक्षकानलं
प्रसक्तस्य विरक्तिकारणं ४ अथो विहायेमममुंच लोकं विमर्शितौ हेयतया पुरस्तात् कृष्णांघ्रिसेवाम
धिमन्यमान उपाविशत्प्रायममर्त्यनद्यां ५ या वै लसच्छ्रीतुलसीविमिश्रकृष्णांघ्रिरेण्वभ्यधिकां
बुनेत्री पुनाति लोकानुभयत्र सेशान्कस्तां न सेवेत मरिष्यमाणः ६ इति व्यवच्छिद्य स पांडवेयः प्रायोप
वेशं प्रति विष्णुनद्यां दध्यौ मुकुंदांघ्रिमनन्यभावो मुनिव्रतो मुक्तसमस्तसंगः ७

कटमयनं शरणं यथा भवति तथा अमर्त्यनद्यामिति विशेषणस्य फलमाह ५ या गंगा लसंती श्रीर्यस्यास्तुलस्याः त
या विमिश्राः ये श्रीकृष्णांघ्रिरेणवः तैरभ्यधिकं सर्वोत्कृष्टं यदंबु तस्य नेत्री तद्वाहिनी उभयत्र अंतर्बहिश्च सेशान्लोक
पालैः सहितान् लोकान् पुनाति मरिष्यमाणः आसन्नमरणः । मरणस्यानियतकालत्वात्सर्वोपि तथा अतस्तां को न
सेवेत ६ इत्येवं विष्णुनद्यां गंगायां प्रायोपवेशं प्रति व्यवच्छिद्य निश्चित्य पांडवेय इति । तत्कुलोचितत्वं दर्शय ६८
ति । नास्त्यन्यः यस्मिन् भावो यस्य सः कुतः मुनिव्रतः उपशांतः तत्कुतः मुक्तः समस्तसंगो येन सः ७

तत्र तदा तद्दर्शनार्थं वक्ष्यमाणाः मुनयः समागताः ननु तीर्थस्नानार्थं कृतार्थत्वात् । ननु तादृशानामपि तीर्थयात्रा दृश्यते
श्रूयते च तत्राह । प्रायेणेति । तीर्थयात्राव्याजैः ८ नानार्षेयप्रवरान् । नानाप्रकाराण्यार्षेयाणि ऋषीणां गोत्राणि तेषु प्रव
रान् श्रेष्ठान् शिरसा भुवं स्पृष्ट्वा ववंदे ९ ११ विज्ञापनार्थं पुनः कृतप्रणामः विविक्तं शुद्धं चेतो यस्य विचिकीर्षितं प्रायो
पवेशनादि युक्तमयुक्तं चेति विज्ञापयामास । अनुमोदनेनानुग्रहमालक्ष्य आत्मानं श्लाघ्यते १२ नृपाणां मध्ये

तत्रोपजग्मुर्भुवनं पुनाना महानुभावा मुनयः सशिष्याः प्रायेण तीर्थाभिगमापदेशैः स्वयं हि तीर्थानि पुनंति सं
तः ८ अत्रिर्वसिष्ठश्च्यवनः शरद्वानरिष्टनेमिर्भृगुरंगिराश्च पराशरो गाधिसुतोथ राम उतथ्य इंद्रप्रमदे
ध्मवाहौ ९ मेधातिथिर्देवल आर्ष्टिषेणो भारद्वाजो गौतमः पिप्पलादः मैत्रेय और्वः कवषः कुंभयोनिर्द्वै
पायनो भगवान्नारदश्च १० अन्ये च देवर्षिब्रह्मर्षिवर्या राजर्षिवर्या अरुणादयश्च नानार्षेयप्रवरान्स
मेतानभ्यर्च्य राजा शिरसा च ववंदे ११ सुखोपविष्टेष्वथ तेषु भूयः कृतप्रणामः स्वचिकीर्षितं यत् विज्ञा
पयामास विविक्तचेता उपस्थितोग्रेभिगृहीतपाणिः १२ राजोवाच अहो वयं धन्यतमा नृपाणां महत्त
मानुग्रहणीयशीलाः राज्ञां कुलं ब्राह्मणपादशौचाद्दूराद्विसृष्टं बत गर्ह्यकर्म १३

महत्तमैः अनुग्रहणीयं शीलं वृत्तं येषां एतच्च राज्ञामिति दुर्लभमाह । ब्राह्मणानां पादशौचात् पादक्षालनोदकात् दू
रे विसृष्टं । दूरादुच्छिष्टविण्मूत्रपद्मांसि समुत्सृजेत् इति स्मृतेः दूरे रहितैः तद्विसृष्टं उच्यते । ततोपि दूरादेव विसृष्टं प्र
क्षिप्तं । तत्रापि स्थातुमयोग्यमित्यर्थः । गर्ह्यं कर्म यस्य त्वात्मानमुद्दिश्योक्तं सर्वेषां नृपाणां मध्ये गर्ह्यकर्माहमित्यर्थः

भा०१ ६९

तस्य गर्ह्यकर्मण एव अतः अघस्य पापात्मनः गृहेष्वासक्तचित्तस्य मे स्वप्राप्तये परावरेणामीश एव । द्विजशापरूपो बभूव । यत्र यस्मिन् शापे सति गृहेषु प्रसक्तो भयं विधत्ते । निर्विण्णो भवति । यतो निर्वेदमूलः वैराग्यस्य मूलं प्राप्तिकारणं । यस्मिन्नवस्य वैराग्यप्राप्तत्वात् । तस्य च भयमूलत्वात् । तदर्थं द्विजशापं कारितवानित्यर्थः । तत्प्रार्थयति द्वाभ्यां । १४ मामा उपयातं शरणागतं प्रतियंतु जानंतु । देवी देवतारूपा गंगा च वा शब्दः प्रतिक्रियानादरे । गाथाः कथाः १५ तदाश्र

तस्यैव मेघस्य परावरेशो व्यासक्तचित्तस्य गृहेष्वभीक्ष्णं निर्वेदमूलो द्विजशापरूपो यत्र प्रसक्तो भयमाशु धत्ते १४ तं मोपयातं प्रतियंतु विप्रा गंगा च देवी धृतचित्तमीशे द्विजोपसृष्टः कुहकस्तक्षको वा दशत्वलं गायत विष्णुगाथाः १५ पुनश्च भूयाद्भगवत्यनंते रतिः प्रसंगश्च तदाश्रयेषु महत्सु यां यामुपयामि सृष्टिं मैत्र्यस्तु सर्वत्र नमो द्विजेभ्यः १६ इति स्म राजाध्यवसाययुक्तः प्राचीनमूलेषु कुशेषु धीरः उदङ्मुखो दक्षिणकूल आस्ते समुद्रपत्न्याः स्वसुतन्यस्तभारः १७ एवं च तस्मिन्नरदेवदेवे प्रायोपविष्टे दिवि देवसंघाः प्रशस्य भूमौ व्यकिरन्प्रसूनैर्मुदा मुहुर्दुंदुभयो विनेदुः १८ न वा इदं राजर्षिवर्य चित्रं भवत्सु कृष्णं समनुव्रतेषु येऽध्यासनं राजकिरीटजुष्टं सद्यो जहुर्भगवत्पार्श्वकामाः १९

येषु सत्वाश्रयो येषां तेषु प्रकृष्टः संगो भूयात् । तस्यां सृष्टौ जन्मनि । १६ अध्यवसायो निश्चयः । प्राचीनमूलेषु प्रागग्रेषु कुशेषु आस्ते स्म । स्वसुते जनमेजये न्यस्तो भारो राज्यं येन १७ प्रशस्य साधु साध्वित्युक्त्वा प्रसूनैः पुष्पैः मुदा व्यकिरन् वर्षापयांचक्रुः देवसंघैर्वादिता नेदुः १८ प्रजानुग्रहे शीलं सारो बलं च येषां । उत्तमश्लोकगुणैः अभिरूपं सुंदरमि

६९

परस्परं संमंत्रयंति । परं श्रेष्ठं । लोकस्य श्रेष्ठत्वे हेतुः । विरजस्कं निर्मायं । विशोकं च यास्यतीति कुतस्तत्राह । अयमिति । यतो भागवतप्रधानः मुख्यः २१ आश्रुत्य आकर्ण्य । समं पक्षपातशून्यं । मधुच्युत् । अमृतस्रावी । गुरु गंभीरार्थं । अव्यलीकं सत्यं । एतान् अभिवंद्य प्राह २२ त्रिपृष्ठे त्रयाणां लोकानां पृष्ठे उपरि सत्यलोके । अथामूर्तिधरा वेदाः तत्तुल्याः यूयमिति ज्ञानातिशयमुक्त्वा कृपालुतामाह । नेह इति । भवतां प्रयोजनं परानुग्रहं विना नास्ति । ननु तर्हि स एव अर्थः स्यात् । य

सर्वे वयं तावदिहास्महेऽथ कलेवरं यावदसौ विहाय लोकं परं विरजस्कं विशोकं यास्यत्ययं भागवतप्रधानः २१ आश्रुत्य तदृषिगणवचः परीक्षित्समं मधुच्युद्गुरु चाव्यलीकं आभाषतैनानभिवंद्य युक्तः शुश्रूषमाणश्चरितानि विष्णोः २२ राजोवाच समागताः सर्वत एव सर्वे वेदा यथा मूर्तिधरास्त्रिपृष्ठे नेहाथवामुत्र च कश्चनार्थ ऋते परानुग्रहमात्मशीलं २३ ततश्च वः पृच्छ्यमिमं विपृच्छे विश्रभ्य विप्रा इति कृत्यतायां सर्वात्मना म्रियमाणैश्च कृत्यं शुद्धं च तत्रामृशताभियुक्ताः २४ सूतः तेन देवनारत्वं पृष्टा वादान्वितेनिरे नाना शास्त्रविदो विप्रा मिथः साधनदूषणैः २५ हरिर्देवः शिवो देवं भास्करो देव मित्यपि काल एव स्वभावश्च कर्मैवेति पृथग्जगुः २६ अथ खिन्नः स राजर्षिर्बहुवादाकुलांतरः निश्वसन्भगवन्मूर्तिं मोक्षमार्गे न संशयः २७

न आत्मशीलं स्वभावं २३ पृच्छ्यं प्रष्टव्यं विश्वस्य विश्वासं कृत्वा एवं करणीयमिति अस्य भावः इति कृत्यतायां तस्मिन् विषये सर्वात्मा सर्वावस्थासु कृत्यं । विशेषतश्च म्रियमाणैः तच्च शुद्धं पापसंपर्करहितं । आमृशत विचारत २७

× अथास्य पूर्वैः खलु पुण्यसंचयैर्व्यासात्मजो ज्ञानमहाब्धिचंद्रमाः। तमेव देशं प्रययौ यदृच्छया शुकः सधीमानवधूतवेषधृ ×
×क् २८ अयत्नसंवर्द्धितवेश्चलज्जटः प्रकीर्णकंठाचलसूतमात्रिकेतः। तत्रागमद्भगवान्व्यासपुत्रो ×

तत्र तेषु योगतपोदानदेवाराधनादिभिर्विदमानेषु सत्सु यदृच्छया गां पर्यटन् व्यासपुत्रस्तत्रागत इत्याह। तथेति २९
नलक्ष्यं आश्रमादि लिंगं यस्य निजलाभेन आत्मसाक्षात्कारेण तुष्टः अवधूतः अवज्ञायाः ईश्वस्य कोयः तस्येव वे

यदृच्छया गामटमानोनपेक्षः अलक्ष्यलिंगो निजलाभतुष्टो वृतश्च बालैरव
धूतवेषः २९ तं द्व्यष्टवर्षं सुकुमारपादकरोरुबाह्वंसकपोलगात्रं चार्वायताक्षोन्नसतुल्यकर्णसुभ्र्वाननं कंबुसुजातकंठं ३० निगूढजत्रुं पृथुतुंगवक्षसं आवर्त्तनाभिं वलिवल्गूदरं च दिगंबरं वक्त्रविकीर्णकेशं प्रलंबबाहुं स्वमरोत्तमाभं ३१ श्यामं सदापीव्यवयोंगलक्ष्म्या स्त्रीणां मनोज्ञं रुचिरस्मितेन
प्रत्युत्थितामुनयः स्वासनेभ्यस्तल्लक्षणज्ञा अपि गूढवर्चसं ३२

षोयस्य २९ तमित्यादीनां प्रत्युत्थिता इति तृतीयेनान्वयः। द्विगुणान्यष्टौ वर्षाणि वद् दृश्यमानं। सुकुमारोपा
दौ करावूरू बाहू अंसौ कपोलौ गात्रं च यस्य। आयते अक्षीणि यस्य तत्। उन्नता नासा यस्मिन् लंबद्धस्वादिवेष
म्यं विना तुल्यौ कर्णौ यस्मिन् शोभनौ भ्रुवौ यस्मिन् एवं भूतमाननं यस्य कंबूवद्रेखात्रयोकितः सुष्ठु जातः कंठो यस्य ७०

नोष्ठ॰
श्लोकद्वयटीकात्रत्र पत्रे लिखिता × २०

कंठस्याधोभागयोः स्थिते अस्थिनी निजत्रुनी मांसेन निगूढे यस्य। पृथु विस्तीर्णं तुंगमुन्नतं वक्षो यस्य आवर्त्तवन्नाभिर्य
स्य वलिभिस्त्रिर्यक् निम्नरेखाभिः वल्गुरम्यमुदरं यस्य दिश एव अंबरं यस्य वक्त्रविकीर्णा जटारूपाः केशा यस्य प्र
लंबौ बाहू यस्य स्वमरेषु श्रेष्ठदेवेषु उत्तमो हरिस्तद्वत् आभायस्य ३१ सदापि पीव्यं अत्यंतोत्तमं यद्वयो यौवनं ते
न या अंगलक्ष्मी देहकांतिः तया रुचिरस्मितेन च गूढवर्चसमपि प्रत्युत्थिताः। तं दृष्ट्वा प्रत्युद्गमं कृतवंत इत्यर्थः ३२

स विष्णुरातो ऽतिथय आगताय तस्मै सपर्यां शिरसाजहार ततो निवृत्ता ह्यबुधाः स्त्रियोर्भकाः महासने
सोपविवेश पूजितः ३३ स संवृतस्तत्र महान्महीयसां ब्रह्मर्षिराजर्षिसुरर्षिसंघैः व्यरोचतालं भगवान्य
थेंदुर्ग्रहर्क्षतारानिकरैः परीतः ३४ प्रशांतमासीनमकुंठमेधसं मुनिं नृपो भागवतोभ्युपेत्य प्रणम्य
मूर्ध्नावहितः कृतांजलिर्नत्वा गिरा सूनृतयान्वपृच्छत् ३५ अहो अद्य वयं ब्रह्मन्सत्सेव्याः क्षत्रबं
धवः कृपयातिथिरूपेण भवद्भिस्तीर्थकीकृताः ३६

शिरसेव सपर्यां आजहार। आत्मनिवेदनं कृतवान्। तेन सहागताः स्त्र्यपत्यादयो निवृत्ताः पूजितः सन्नुपविवेश ३३
५ स भगवान् ब्रह्मर्षिसंघादिभिः संवृतः सन्नरं व्यरोचत। ग्रहाः शुक्रादयः। ऋक्षाण्यश्विन्यादीनि। अन्यास्तारास्तैः
परिवृतश्चंद्र इव बभौ ३४ न कुंठा सर्वार्थेषु मेधा यस्य। प्रश्नार्थं पुनर्नत्वा सूनृतया गिरा अन्वपृच्छत्। अहो इति पं
चभिः ३५ सतां सेव्या जातायतः अतिथिरूपेण भवद्भिस्तीर्थरूपाः कृताः पाविता इत्यर्थः ३६

भा०१ ७१ गृहाः गेहानि ३७ विष्णोः सांनिध्यात् सुराइव ३८ पांडुसुतानां प्रियः श्रीकृष्णः अद्य मे प्रसन्नोऽस्ति अतः ते बांधवैश्च
स्त्रियसानां प्रीत्यर्थं तद्गोत्रस्य मे आत्तं स्वीकृतं बांधवं बंधुकृत्यं येन सः ३९ अन्यथा श्रीकृष्णप्रसादं विना नृणां नः तवद
तं र्शनं कथं संजोघटी। तत्रापि नितरां म्रियमाणानां अव्यक्तो गतिर्यस्य वनयितायान्वयिना। वनयित् तमो वनीयान् तस्य

येषां संस्मरणात् पुंसां सद्यः शुध्यंति वै गृहाः। किं पुनर्दर्शनस्पर्शपादशौचासनादिभिः ३७ सांनिध्या
त्ते महायोगिन् पातकानि महांत्यपि। सद्यो नश्यंति वै पुंसां विष्णोरिव सुरेतराः ३८ अपि मे भगवान्प्री
तः कृष्णः पांडुसुतप्रियः। पैतृष्वस्रेयप्रीत्यर्थं तद्गोत्रस्यात्तबांधवः ३९ अन्यथा तेऽव्यक्तगते दर्शनं नः कथं
नृणां नितरां म्रियमाणानां संसिद्धस्य वनीयसः ४० अतः पृच्छामि संसिद्धिं योगिनां परमं गुरुं। पुरुषस्येह
यत्कार्यं म्रियमाणस्य सर्वथा ४१

अत्युदारतया याचेत्वा इति। सम्यक् संसिद्धिर्यस्मात् ४० यत्कार्यं कर्तुं योग्यं। कर्तव्यत्वावश्यकमिति भेदः।
अत एव सर्वथा म्रियमाणस्य पुरुषस्य यस्मिन् कृते संसिद्धिः मोक्षलक्षणा सिद्धिर्भवति तत्। त्वां योगिनां ७१
गुरुं पृच्छामि ४१

भा०प्र कर्तव्यत्वादावश्यकं तत् ब्रूहि। एवमिति मेदं द्विपर्ययं श्रोतव्यादि ४२ तद्दर्शनस्य पुनर्दुर्लभत्वा
७२ दिदानीमेव कथनीयमित्याशयेनाह। नूनमिति॥ गोदोहनमात्रकालमपि॥ ४३॥ एवं आहो

यच्छ्रोतव्यमथो जाप्यं यत्कर्तव्यं नृभिः प्रभो॥ स्मर्तव्यं भजनीयं वा ब्रूहि यद्वा विपर्ययं ४२
नूनं भगवतो ब्रह्मन् गृहेषु गृहमेधिनां॥ न लक्ष्यते ह्यवस्थानमपि गोदोहनं क्वचित्
४३ सूत उवाच एवमाभाषितः पृष्टः स राज्ञा श्लक्ष्णया गिरा॥ प्रत्यभाषत धर्म
ज्ञो भगवान् बादरायणिः ४४ इति श्रीभागवते महापुराणे प्रथमस्कंधे एकोनविंशः

इत्याभाषितः श्लक्ष्णया सुधुरया गिरा आभाषितः अभिमुखीकृतः पृष्टश्च ४४ इति दीपिकायां एको ७२
नविंशः॥ समाप्तोयं प्रथमः॥



श्रीगणेशाय नमः ॥ द्वितीये तु दशाध्याये श्रीभागवतमादितः ॥ उद्देशलक्षणोक्तिभ्यां संक्षेपेणोपवर्ण्यते ॥१॥
तत्र तु प्रथमेऽध्याये कीर्तनश्रवणादिभिः ॥ स्थविष्ठे भगवद्रूपे मनसो धारणोच्यते २ यन्नामकीर्तनं दानतपोयो
गादिसत्फलं ॥ तन्नित्यं परमानंदं हरिं निरन्तरं स्मर ३ अथ द्वितीयस्कंधव्याख्या ॥ उक्तः पूर्वमुपोद्घातः सप्रसंगः शु
कागमः ॥ राज्ञा पृष्टं नृणां कृत्यमथाह शुकसन्मुनिः ४ राज्ञः प्रश्नमभिनंदति वरीयानिति । ते त्वया पुंसां श्रोत

शुक उवाच ॥ वरीयानेष ते प्रश्नः कृतो लोकहितं नृप ॥ आत्मवित्संमतः पुंसां श्रोतव्यादिषु
यः परः १ श्रोतव्यादीनि राजेंद्र नृणां संति सहस्रशः ॥ अपश्यतामात्मतत्त्वं गृहेषु गृहमेधिनाम्
२ निद्रया ह्रियते नक्तं व्यवायेन च वा वयः ॥ दिवा चार्थेहया राजन्कुटुंबभरणेन वा ३

व्यादिषु मध्ये यः परः श्रेष्ठो गोचरः प्रश्नः कृत एष वरीयान् आत्मविदां मुक्तानां संमतो यतो लोकहितमेतत् । मोक्षहे
तुत्वात् १ तत्र तावत्स्वाभाविकक्रियाणामनर्थहेतुत्वं वदन् ब्रूहि यद्वा विपर्ययमित्यस्योत्तरमाह । श्रोतव्यादीनी
ति त्रिभिः । गृहेषु सक्तानां अत एव गृहमेधिनां तत्तत्पंचसूनापराणां मेधेति हिंसार्थः २ तैश्च दृष्ट्यैवायुर्व्ययो
भवतीत्याह । नक्तं रात्रौ पतत् वयः आयुः तन्निद्रया व्यवायेन रत्या वा ह्रियते । दिवा अह्नि यत् वयस्तत् अर्थेहया अर्थार्थ
(आत्मविदां मुक्तानां संमतो यतः) मुद्यमेन । सिद्धेऽर्थे कुटुंबपोषणेन वा । वकारावनुक्तसमुच्चयार्थौ ३

अस्मिन्दशावैविरक्तस्यैवाधिकारान्निंदा श्लोकत्यावैराग्यं जनयन्प्रश्नक्रममुल्लंघ्योत्तरमाह ।

ननु नश्वरकुटुंबाद्यर्थं कथमापुर्व्ययं कुर्यात् । तत्राह । देहादिषु ननु आत्मनः सैन्येषु परिकरेषु असत्सु मिथ्याभूतेष्वपि
प्रमत्तः प्रसक्तः तेषां पित्रादिदृष्टांतेन नाशं पश्यन्नपि नानुसंधत्ते ४ एवं विपर्ययप्रश्नस्योत्तरमुक्त्वा श्रोतव्यादिप्रश्न
स्योत्तरमाह । तस्मादिति । हे भारत तस्मात्तं सर्वात्मेति श्रेष्ठत्वमाह । भगवानिति सौंदर्यादि ईश्वर इत्यावश्यकत्वं हरिरि
ति बंधहारित्वं । अभयं मोक्षमिच्छता ५ अतः परमन्यच्छ्रेयो नास्तीत्याह । एतावानेव जन्मनो लाभः फलं । तमाह । ना
रायणस्मृतिरिति । सांख्यादिभिः साध्यतत्त्वानि । तेषां स्वातंत्र्येण लाभत्वं वारयति । सांख्यमात्मानात्मविवेकः । योगोऽष्टां

देहापत्यकलत्रादिष्वात्मसैन्येष्वसत्स्वपि ॥ तेषां प्रमत्तो निधनं पश्यन्नपि न पश्यति ४ तस्माद्भारत सर्वात्मा
भगवान्हरिरीश्वरः ॥ श्रोतव्यः कीर्तितव्यश्च स्मर्तव्यश्चेच्छताभयं ५ एतावान्सांख्ययोगाभ्यां स्वधर्मपरिनिष्ठ
या ॥ जन्मलाभः परः पुंसामंते नारायणस्मृतिः ६ प्रायेण मुनयो राजन्निवृत्ता विधिनिषेधतः ॥ नैर्गुण्यस्था रमं
ते स्म गुणानुकथने हरेः ७ इदं भागवतं नाम पुराणं ब्रह्मसंमितं ॥ अधीतवान्द्वापरादौ पितुर्द्वैपायनादह
म् ८ परिनिष्ठितोऽपि नैर्गुण्ये उत्तमश्लोकलीलया ॥ गृहीतचेता राजर्षे आख्यानं यदधीतवान् ९

गः अंते तु स्मृतिः परो लाभः । न तन्महिमा वक्तुं शक्य इत्यर्थः ६ तत्र सदाचारं प्रमाणयति प्रायेणेति । विधिनिषेधतः
विधिनिषेधाभ्यां निवृत्ता नैर्गुण्ये ब्रह्मणि स्थिता अपि स्म प्रसिद्धं ७ किमिदमपूर्वं कथयसि । सत्यं । अन्यपूर्वमेवेदमि
 त्याह । इदं मे वत्प्रोक्तं तन्नामैकप्रधानं पुराणं । ब्रह्मसंमितं सर्ववेदतुल्यं । यद्वा ब्रह्मसम्यक् मितं येन । कुतः त्वया प्राप्त
अत आह । अधीतवानिति । ननु सिद्धस्य तव कुतो अध्ययने प्रवृत्तिः तत्राह । परिनिष्ठितोऽपीति । गृहीतचेताः आकृष्ट
चित्तः ९

भा० द्वि० महापुरुषो विष्णुस्तदीयः। यस्य यस्मिन्श्रद्धांकुर्वतां। सती अहैतुकी १० साधकानां सिद्धानां चनातःपरमन्यत्श्रेयो
२ स्तीत्याह। एतदिति। इच्छतां कामिनां तत्तत्फलसाधनमेतदेव। निर्विद्यमानानां मुमुक्षूणां मोक्षसाधनमेतदेव। यो
गिनां ज्ञानिनां फलं चैतदेव निर्णीतं नात्र प्रमाणं वक्तव्यमित्यर्थः ११ अल्पमेवायुरवशिष्टं किमहं साधयेयमि
ति माशुचइत्याह किमिति त्रिभिः। परोक्षैरलक्षितैर्हायनैर्वर्षैः। विदितं वृथा यातीति ज्ञातं यतो येन ज्ञातेन घटे
न यत्नं करोति १२ खट्वांगो हि देवपक्षे स्थित्वा दैत्यान जयत्। ततो देवैर्वरं वृणीष्वेत्युक्तो। ततस्तेनोक्तं प्रथमं ता प्रसन्नो:

तदहंतेभिधास्यामि महापौरुषिको भवान् यस्य श्रद्दधतामाशु स्यान्मुकुंदे मतिः सती १० एतन्निर्विद्य
मानानामिच्छतामकुतोभयं योगिनां नृप निर्णीतं हरेर्नामानुकीर्तनं ११ किं प्रमत्तस्य बहुभिः परोक्षैर्हा
यनैरिह वरं मुहूर्तं विदितं घटते श्रेयसे यतः १२ खट्वांगो नाम राजर्षिर्ज्ञात्वेयत्तामिहायुषः मुहूर्तात्स
र्वमुत्सृज्य गतवानभयं हरिं १३ तवाप्येतर्हि कौरव्य सप्ताहं जीवितावधिः उपकल्पय तत्सर्वं तावद्यत्सां
परायिकं १४ अंतकाले तु पुरुष आगते गतसाध्वसः छिंद्यादसंगशस्त्रेण स्पृहां देहेनु ये च तम् १५

वन्ममायुः कथ्यतामिति। ततो देवैरुक्तं तत्तु मुहूर्तमात्रमेतदस्तीति। ततो अतिशीघ्रं विमानेन भुवमागत्य हरिं श राम
रणं गत इति। यतः इयं स्वर्गभूमिः रजोधिका। कर्मभूमिः पृथ्वी १३ तवनु एतर्हि अपि इदानीमपि। तावदिति। ता २
वता कालेन सांपरायिकं पारलौकिकं साधनं संपादय १४ तत्र वैराग्यं तावदाह। अंतकाल इति। गतसाध्वसः मृ
त्युभयशून्यः। असंगो नाम अनासक्तिः तेन शस्त्रेण स्पृहां सुखेच्छां। तं देहमनुये पुत्रकलत्रादयस्तेष्वपि स्पृहां छिं
द्यात् १५

किंच यः गृहात्प्रव्रजितः निर्गतः गृहे स्थितस्य पुनरप्यासक्तिसंभवात्। तत्राष्टांगयोगमाह। धीर इति ब्रह्मचर्यादियमोपल
क्षणं। पुण्यतीर्थेति स्नानादिनियमोपलक्षणं। आसनमाह। शुचाविति विविक्त एकांते विधिवत् कुशाजिनचैलैः क्रमेण नि
र्मिते १६ उपगर्भप्राणायामं वक्तुं जप्यमाह त्रिवृत् त्रिभिरकारादिभिर्वर्णैस्त्रिवृतं ग्रथितं ब्रह्माक्षरं प्रणवं मनसा अभ्यसेत् २०
आवर्तयेत् मनसा इंद्रियप्रत्याहारं वक्तुं प्राणायामेन मनोनियमनमाह मनो यच्छेत् ब्रह्मबीजं प्रणवं अविस्मरन्नेव
जितश्वासः सन् १७ प्रत्याहारमाह यच्छेत् अक्षान् इंद्रियाणि निश्चयात्मिका बुद्धिः सारथिर्यस्य सः धारणामाह मन इ

गृहात्प्रव्रजितो धीरः पुण्यतीर्थजलाप्लुतः शुचौ विविक्त आसीनो विधिवत्कल्पितासने १६ अभ्यसेन्मन
सा शुद्धं त्रिवृद्ब्रह्माक्षरं परं मनो यच्छेज्जितश्वासो ब्रह्मबीजमविस्मरन् १७ नियच्छेद्विषयेभ्योक्षान्मन
सा बुद्धिसारथिः। मनः कर्मभिराक्षिप्तं शुभार्थे धारयेद्धिया १८ तत्रैकावयवं ध्यायेदव्युच्छिन्नेन चेतसा
मनो निर्विषयं युक्त्वा ततः किंचन न स्मरेत् १९ पदं तत्परमं विष्णोर्मनो यत्र प्रसीदति रजस्तमोभ्यामाक्षि
प्तं विमूढं मन आत्मनः २०

ति पुनश्च कर्मभिस्तद्वासनाभिः आक्षिप्तं आकृष्टं शुभार्थे भगवद्रूपे धारयेत् १८ ध्यानमाह तत्रेति एकमेकं पादाद्यव
यवं अव्युच्छिन्नेन समग्ररूपादवियुक्तेन आश्रयविशेषे सामान्यतः स्थितस्य स्थिरीकरणं धारणा अवयवविज्ञावनया तद्दार्ढ्यं
ध्यानमिति भेदः। समाधिमाह निर्विषयं मनो युक्त्वा समाधौ स्थिरीकृते मनसि स्फुरत्परमानंदमात्राकारं कुर्यादित्य
र्थः १९ प्रसीदति उपशाम्यति गुणवशात्पुनरपि क्षोभे सति धारणामेव स्थिरीकुर्यादित्याह रजसा आक्षिप्तं तमसा विमूढं चा

भा०द्वि० यतः यस्यां क्रियमाणायां भद्रं सुखात्मकं आश्रयं विषयं पश्यतस्तत्रैव प्रीतिर्भवति २१ यथाय त्वया दृशीवेतिकर्तव्यतावि
२ षयतातद्विशेषणानां प्रश्नः २२ यथेत्यस्योत्तरं जितासन इति २३ विशेष[illegible]माह स्थूल इति सार्धेन विशेषो विराड्दे २३
हः अतिस्थूलानामपि स्थूलतरः सत्कार्यमात्रं २४ अस्य चोपलक्षणत्वेन विषयत्वं वस्तुतस्तु विराड्जीवनियंता भगवानेव
विषय इत्याह आंडकोशांतरवर्त्तिनि कटाहएव पृथिव्यावरणं ततः अपतेजो वाय्वाकाशाहंकारमहत्तत्त्वानीति सप्त २५ विराट्

यच्छेद्धारणया धीरो हंति या तत्कृतं मलं यतः संधार्यमाणायां योगिनो भक्तिलक्षणः आशु संपद्यते यो
गआश्रयं भद्रमीक्षतः २१ राजोवाच यथा संधार्यते ब्रह्मन्धारणा यत्र संमता यादृशी वा हरेदाशु पु
रुषस्य मनोमलं २२ शुक उवाच जितासनो जितश्वासो जितसंगो जितेंद्रियः स्थूले भगवतो रूपे
मनः संधारयेद्धिया २३ विशेषस्तस्य देहोयं स्थविष्ठश्च स्थवीयसां यत्रेदं दृश्यते रूपं भूतं भव्यं भवच्च स विश्वं
त् २४ आंडकोशे शरीरेस्मिन्सप्तावरणसंयुते वैराजः पुरुषो योसौ भगवान्धारणाश्रयः २५ पा
तालमेतस्य हि पादमूलं वदंति पार्ष्णिप्रपदे रसातलं महातलं विश्वसृजोथ गुल्फौ तलातलं वै पुरुषस्य जंघे २६ २

देहस्तज्जीवत दंतर्यामिणा मभेदमारोप्योपासनं कर्तव्यमित्याशयेनाह पातालं पादमूलं पादस्याधो भागं पातालादीनां
तदवयवताध्यवसीयते पातालादीन्यतलांतानि अधस्तनादारभ्य सप्त भूमिविवराणि पठंति गृणंतीत्यादि प्रमाण
दर्शनी पार्ष्णिप्रपदे पादस्य पश्चात्पुरोभागौ २६ ॐ नमो भगवते वासुदेवाय

उरूद्वयं तस्याधो भागे वितलं उत्तरभागे अतलमिति ज्ञेयं नाभिरेव सरः २७ ज्योतिरनीकं ज्योतिषां समूहं स्व
र्गं महर्लोकं ग्रीवेति गृणंति तपोलोकं [illegible]रराटी ललाटं सत्यं सत्यलोकं २८ उस्रा देवाः तेजोमयशरीरत्वा
त् ते बाहव इत्याहुः दिशः अस्मदादिश्रोत्राधिष्ठात्र्यो देवताः कर्णौ श्रोत्रस्याधिष्ठानं शब्दस्तु श्रोत्रविषयः स
तस्य श्रोत्रेंद्रियं एवं नासिकादिष्वपि नासत्यदस्रौ अश्विनौ नासे नासापुटे इद्धः दीप्तः २९ द्यौरंतरिक्षं

देजानुनी सुतलं विश्वमूर्तेरूरुद्वयं वितलं चातलं च महीतलं तज्जघनं महीपते नभ
स्तलं नाभिसरो गृणंति २७ उरःस्थलं ज्योतिरनीकमस्य ग्रीवा महर्वदनं वै जनोस्य त
पो रराटीं विदुरादिपुंसः सत्यं तु शीर्षाणि सहस्रशीर्ष्णः २८ इंद्रादयो बाहव आहुरुस्राः क
र्णौ दिशः श्रोत्रममुष्य शब्दः नासत्यदस्रौ परमस्य नासे घ्राणोस्य गंधो मुखमग्निरि
द्धः २९ द्यौरक्षिणी चक्षुरभूत्पतंगः पक्ष्माणि विष्णोरहनी उभे च तद्भ्रूविजृंभः परमेष्ठि
धिष्ण्यमापोस्य तालू रस एव जिह्वा ३०

अक्षिणी नेत्रगोलके चक्षुरिंद्रियं पतंगः सूर्यः अहनी रात्र्यहनी परमेष्ठिधिष्ण्यं ब्रह्मपदं तालुः अधि
ष्ठानं जिह्वा इंद्रियं ३१

ना॰टि॰ ४ छंदांसिवेदाः शिरोब्रह्मरंध्रं स्नेहकलाः पुत्रादिस्नेहलेशाः द्विजानि दंताः षंढत्वमार्ष दुरंतः अपारः सर्गइतिय:
सतस्यकटाक्षः ३१ अधर्ममार्गोस्यपृष्ठभागः कः प्रजापतिः मित्रौमित्रावरुणौ ३२ अनंतवीर्यस्यस: वयः
कालः तस्यगमनं गुणप्रवाहः प्राणिनांसंसारः कर्मतस्यक्रीडा ३३ भूम्नःविभोः अव्यक्तंप्रधानंचंद्रमाः प्र
सिद्धः तदीयंमनः सर्वेषांविकाराणांकोशश्चाश्रयस्तत्तंतन्मादिमागत्वात् ३४ विज्ञानशक्तिंचित्तंमहिंमहत्त

छंदांस्यनंतस्यशिरोगृणंति दंष्ट्रायमःस्नेहकलाद्विजानि हासोजनोन्मादकरीचमा
यादुरंतसर्गोयदपांगमोक्षः ३१ व्रीडोत्तरोष्ठोधरएवलोभोधर्मस्तनोधर्मपथोस्यपृष्ठं
कस्तस्यमेढ्रंवृषणौचमित्रौकुक्षिःसमुद्रागिरयोस्थिसंघाः ३२ नद्योस्यनाड्योथतनूरु
हाणिमहीरुहाविश्वतनोर्नरेंद्र अनंतवीर्यश्वसितंमातरिश्वागतिर्वयःकर्मगुणप्रवाहः
३३ ईशस्यकेशान्विदुरंबुवाहान्वासस्तुसंध्यांकुरुवर्यभूम्नः अव्यक्तमाहुर्हृदयंमनश्च
सचंद्रमाःसर्वविकारकोशः ३४ विज्ञानशक्तिंमहिमामनंतिसर्वात्मनोंतःकरणंगिरित्रं ४
अश्वाश्वतर्युष्ट्रगजानखानिसर्वेमृगाःपशवःश्रोणिदेशे ३५

त्वंअंतःकरणंअहंकारंगिरित्रंश्रीरुद्रं गर्दभाद्वडवायामुत्पन्नाअश्वतरी ३५ वासुदेवायनमः

भा॰टि॰

वयांसिपक्षिणः तस्यव्याकरणंनामरूपेव्याकरवाणीतिश्रुत्युक्तंशिल्पनैपुण्यं यथाहुः येनशुक्लीकृताहंसाः शुकाश्च
हरितीकृताः मयूराश्चित्रितायेनसतेवृत्तिंविधास्यतीतिमनुःस्वायंभुवःमनीषाबुद्धिः मनुजःपुरुषःनिवासः आश्र
मा ले यःपुरुषैर्वाविस्तारात्मैतिश्रुतेः गंधर्वादीनांहृदैक्यंगंधर्वादयःस्वरस्मृतीःषड्जादिस्वरस्मृतयइत्यर्थः असुरानीकंवीर्यंय
स्यसःस्मृतिः असुरानीकवीर्यइतिपाठेगंधर्वादयःस्वराः असुरसमूहश्रेष्ठःप्रह्लादःस्मृतिस्तस्येति ३६ ब्रह्मविप्रस्त

वयांसितद्व्याकरणंविचित्रंमनुर्मनीषामनुजोनिवासः गंधर्वविद्याधरचारणाप्सरःस्वरस्मृती
रसुरानीकवीर्यः ३६ ब्रह्माननंक्षत्रभुजोमहात्माविडूरुरंघ्रिश्रितकृष्णवर्णः नानाभिधाभीज्यगणो
पपन्नोद्रव्यात्मकःकर्मवितानयोगः ३७ इयानसावीश्वरविग्रहस्ययःसन्निवेशःकथितोमयाते
संधार्यतेस्मिन्वपुषिस्थविष्ठेमनःस्वबुद्ध्यानयतोस्तिकिंचित् ३८

ते अभि स्याननंमुखं क्षत्रंक्षत्रियोभुजायस्य विट्वैश्यःउरूयस्य अंघ्रिश्रितःकृष्णवर्णःशूद्रोयस्य नानाभिधा
भिर्नामानियेषांतेतेचइज्याद्देवास्तेषांगणैर्वसुरुद्रादिभिरुपपन्नोयुक्तः द्रव्यात्मकोहविःसाध्यःवितानयोगः
यज्ञप्रयोगःतस्यकर्मकार्यंआवश्यकोभिप्रेतइत्यर्थः ३७ इयानेतावान्सन्निवेशःअवयवसंस्थानंअस्मि
न्स्वबुद्ध्यामनःसंधार्यतेमुमुक्षुभिःयतोव्यतिरिक्तंकिंचिन्नास्तितस्मिन् ३८ श्रीवासुदेवाय

तद्देवं चित्तस्थैर्यार्थं विराड्देहजीवेश्वराणामभेदेनोपासनमुक्तं तत्र तु देहजीवावीश्वरे प्रविलाप्य स एव ध्येय इति नि-
र्धारयति सर्वेति सर्वेषां धीवृत्तिभिरनुभूतं सर्वं येन स एक एव सर्वांतरात्मा तमेव सत्यं भजेत अन्यत्रोपलक्षणे
न सज्जेत यतः आसंगादात्मनः पातः संसारो भवति एकस्य तत्तदिंद्रियैः सर्वानुभूतौ दृष्टांतः यथा स्वप्नजना ना-
नामीक्षिता एक एव स्वप्ने हि कदाचिद्बहून् देहान्कल्पयन् जीवस्तत्तदिंद्रियैः सर्वं पश्यतीति तद्वत् ईश्वरस्य तु विद्या-

स सर्वधीवृत्त्यनुभूतसर्व आत्मा यथा स्वप्नजनेक्षितैकः तं सत्यमानंदनिधिं भजेत नान्यत्र स-
ज्जेद्यत आत्मपातः ३९ इति श्रीभागवते महापुराणे द्वितीयस्कंधे महापुरुषसंस्थानु-
वर्णने प्रथमोध्यायः श्रीशुक उवाच एवं पुरा धारणयात्मयोनिर्नष्टां स्मृतिं प्रत्य-
वरुध्य तुष्टात् तथा ससर्जेदममोघदृष्टिर्यथाप्ययात्प्राग्व्यवसायबुद्धिः १

शक्तित्वान्न बंधः ३९ इति श्रीधरस्वामिविरचितायां टीकायां प्रथमोध्यायः द्वितीये तु ततः स्थूलधारणातो जि-
तं मनः सर्वसाक्षिणि विश्वेशे विष्णौ धार्यमितीर्यते १ इत्याद्यं वनरूपैव मुक्ता वैराजधारणा इहोच्यते तु तत्सा-
ध्या सर्वांतर्यामिधारणा २ तत्र तावत्पूर्वोक्तधारणाया अवांतरफलमाह एवं या धारणा तया तुष्टाद्धरेः पुरा प्रलय-
समये नष्टां स्मृतिं प्रत्यवरुध्य लब्ध्वा अप्ययात्प्रागिदं विश्वं यथासीत्तथा ससर्ज व्यवसायात्मिका बुद्धिर्यस्य अतए-
व अमोघा दृष्टिर्यस्येति अतस्तया धारणया सृष्टिसामर्थ्यं भवति १ ओं नमो भगवते वासुदेवाय
सृष्टिः

उपासनाफलादपि विरक्तस्य शुद्धात्मधारणायामधिकारः अतो वैराग्यार्थं कर्मफलं निंदति शाब्दं शाब्दमयं ब्रह्म वेदः तस्य ए-
षः पंथाः कर्मफलबोधनप्रकारः कोसौ अर्थश्चन्यैरेव स्वर्गादिनामभिः साधकस्य धीर्ध्यायति तेन दिक्षां करोतीति यत् अ-
पार्थत्वमेवाह तत्र मायामये पथि सुखमिति वासनया शयानः स्वप्नान्पश्यन्निव परिभ्रमन् अर्थान्न विंदति तत्र श्लोकं
आहोपि निरवद्यं सुखं न लभत इत्यर्थः २ तर्हि सर्वथा कर्मफलत्यागे सद्य एव देहपातः स्यादित्याशंक्याह अतः कविर्ना-

शाब्दस्य हि ब्रह्मण एष पंथा यन्नामभिर्ध्यायति धीरपार्थैः परिभ्रमंस्तत्र न विंदतेर्थान्मायामये वास-
नया शयानः २ अतः कविर्नामसु यावदर्थः स्यादप्रमत्तो व्यवसायबुद्धिः सिद्धेन्यथार्थे न यतेत तत्र प-
रिश्रमं तत्र समीक्षमाणः ३ सत्यां क्षितौ किं कशिपोः प्रयासैर्बाहौ स्वसिद्धे ह्युपबर्हणैः किं सत्यां-
जलौ किं पुरुधान्नपात्र्या दिग्वल्कलादौ सति किं दुकूलैः ४

नमात्रेषु भोग्येषु यावतार्थेन अर्थो देहनिर्वाहो यस्य तथाभूतः स्यात् अप्रमत्तः तावन्मात्रेप्यनासक्तः व्यवसायबुद्धिः
नेदं सुखमिति निश्चयवान् तदापि तत्र तस्मिन्नर्थे अन्यथैव सिद्धे सति तत्र यत्ने परिश्रमं पश्यन्न यतेत ३ अन्यथासि-
द्धिमाह सत्यामिति द्वाभ्यां कशिपोः शय्यायाः किं स्वतः सिद्धौ बाहौ सति उपबर्हणैः उच्छीर्षकैः पुरुधा बहुप्रकारया अन्न-
पात्र्या भोजनपात्रेण किं दिग्वल्कलादौ सति दुकूलैः किं ननु दिक्षु सद्भावो नाम नग्नत्वमेव ४ वासुदेवाय नमः

र

चीराणि किं पथि वल्कलमन्नं तोयं वासःस्थानं च याच्ञाप्रयत्नं विना कथं प्राप्येत तत्राह चीराणि वस्त्रखंडानि परानेव बिभ्रति
पुष्णंति फलादिभिर्ये गुहाः गिरिदर्यः ननु कदाचिदेषामलाभे किं कार्यं तत्राह अजितो हरिः उपसन्नान् शरणागतान् किं ना
वति न रक्षति किंशब्दस्य पूर्वत्रापि संबंधः धनेन ये दुर्मदास्तेन दुर्मदांधान् ५ तदा ते न किं कर्तव्यं हरिस्तु सेव्य इत्याह एवं
विरक्तः सन् तं भजेत भजनीयत्वे हेतुः स्वचित्ते स्वत एव सिद्धः स्थितः यत आत्मा एव प्रियः यस्य सेवा सुखरूपैवेत्यर्थः

चीराणि किं पथि न संति दिशंति भिक्षां नैवांघ्रिपाः परभृतः सरितोप्यशुष्यन् रुद्धा गुहाः किमजितो
वति नोपसन्नान् कस्माद्भजंति कवयो धनदुर्मदांधान् ५ एवं स्वचित्ते स्वत एव सिद्ध आत्मा प्रि
यो र्थो भगवाननंतः तं निर्वृतो नियतार्थो भजेत संसारहेतूपरमश्च यत्र ६ कस्तां त्वनादृत्य परानुचिं
तामृते पशूनसतीं नाम युंज्यात् पश्यन् जनं पतितं वैतरिण्यां स्वकर्मजान्परितापान् जुषाणं ७ राम

सत्यः न तु नात्मवन्मिथ्या भगवान् भजनीयगुणश्च अनंतः अनित्यः एवंभूतस्तं भजेत नियतार्थः निश्चितस्वरूपः तदनुभवानं ६
देन निर्वृतः सन्निति स्वतः सुखात्मत्वं दर्शितं किं च यत्र यस्मिन् भजने सति संसारहेतोरविद्याया उपरमो नाशो भवति ६ ए
तदेवान्यचिंतानिंदया द्रढयति क इति तां तथाभूतां परस्य हरेरनुचिंतां धारणामनादृत्य पशून् कर्मजडान् विना यथा पशुरेव सदेवो ना
मितिश्रुतेः असतीं विषयचिंतां को नाम कुर्यात् तया चिंतया वैतरिण्यां पतितं तत्र च स्वकर्मजान् आध्यात्मिकादिक्लेशान् सेवमा
नं जनं पश्यन् वैतरणी यमद्वारस्था नदी तत्तुल्यत्वात्संसृतिर्वैतरणी ७ ओं नमो भगवते वासुदेवाय

तामेव धारणां सविशेषणामाह केचिदिति षड्भिः स्वदेहस्यांतर्मध्ये यत् हृदयं तस्यावकाशस्तस्मिन्वसंतं प्रादेशस्तर्ज
न्यंगुष्ठयोर्विस्तारः स एव मात्रा प्रमाणं यस्येति हृदयपरिमाणं तत्रोपचर्यते कंजं पद्मं रथांगं चक्रं ८ नलिनं पद्मं तद्वत्प्रस
न्ने आयते ईक्षणे यस्य कदंबकुसुमस्य किंजल्काः केसराणि तद्वत्पिशंगे पीते वाससी यस्य लसंति महारत्नानि येषु ता
नि सुवर्णमयान्यंगदानि यस्य स्फुरंति यतानि महारत्नानि च तन्मयानि किरीटकुंडलानि यस्य ९ उन्निद्रं विकसितं

केचित्स्वदेहांतर्हृदयावकाशे प्रादेशमात्रं पुरुषं वसंतं चतुर्भुजं कंजरथांगशंखगदाधरं धारणया स्म
रंति ८ प्रसन्नवक्त्रं नलिनायतेक्षणं कदंबकिंजल्कपिशंगवाससं लसन्महारत्नहिरण्मयांगदं स्फु
रन्महारत्नकिरीटकुंडलं ९ उन्निद्रहृत्पंकजकर्णिकालये योगेश्वरास्थापितपादपल्लवं श्रील
क्ष्मणं कौस्तुभरत्नकंधरमम्लानलक्ष्म्या वनमालयाचितं १० विभूषितं मेखलयांगुलीयकैर्महाधनैर्नू
पुरकंकणादिभिः स्निग्धामलाकुंचितनीलकुंतलैर्विरोचमानाननहासपेशलं ११

पि

यत् हृदयपंकजं तस्य कर्णिकैव आलयं स्थानं तस्मिन् योगीश्वरैरास्थापितौ पादपल्लवौ यस्य श्रीरेव रत्नलक्ष्म चिह्नं तद्युक्तं
प्रामादिविहितो मत्वर्थीयो नप्रत्ययः कौस्तुभरत्नं कंधरायां यस्य अम्लाना लक्ष्मीः शोभा यस्याः तया वनमालया चितं
व्याप्तं १० स्निग्धत्वादिविशिष्टैः कुंतलैः विरोचमाने आनने यो हासः तेन पेशलं सुंदरं ११ वासुदेवाय नमः

भा० द्वि०
७

अदीनं उदारं यल्लीलाहसितं तेन यदीक्षणं तस्मिन् उल्लसंतो ये भ्रूभंगाः भ्रूविक्षेपाः तैः संसूचितो भूरि अनुग्रहो येन चिंतयाविर्भवंतं १२ अस्यैव ध्यानमाह एकैकश इति अनुभावयेत् येत् यत् जितं अयत्नतः स्फुरितं पादगुल्फादिस्थानं अवय

तं वस्तदपोह्य त्यक्त्वा परं परं जंघाजान्वादि धारयेत् शुध्यति तस्मिन् निश्चला भवति १३ पूर्वोक्ते वैराजधारणायाः एतद्धारणं गत्व माह यावदिति परे ब्रह्मादयः अवरे यस्मात् कुतः विश्वेश्वरे द्रष्टरि ननु द्वयं चैतन्यघनत्वात् भक्तियोगः प्रेमलक्षणः क्रि

अदीनलीलाहसितेक्षणोल्लसद्भ्रूभंगसंसूचितभूर्यनुग्रहं ईक्षेत चिंतामयमेनमीश्वरं यावन्मनो धारणया वतिष्ठते १२ एकैकशोंगानि धियानुभावयेत्पादादि यावद्धसितं गदाभृतः जितं जितं स्थानमपोह्य धारयेत् परं परं शुध्यति धीर्यथा यथा १३ यावन्न जायेत परावरेस्मिन् विश्वेश्वरे द्रष्टरि भक्तियोगः तावत्स्थवीयः पुरुषस्य रूपं क्रियावसाने प्रयतः स्मरेत १४ स्थिरं सुखं चासनमास्थितो यतिर्यदा जिहासुरिममंग लोकं काले च देशे च मनो न सज्जयेत् प्राणं नियच्छेन्मनसा जितासुः १५ मनः स्वबुद्ध्यामलया नियम्य क्षेत्रज्ञ एतां निनयेत्तमात्मनि आत्मानमात्मन्यवरुध्य धीरो लब्धोपशांतिर्विरमेत कृत्यात् १६

मेवेत्युक्तं यावसाने आवश्यककर्मानुष्ठानानंतरं अनेन कर्मापि भक्तियोगपर्यंतं १४ एवं तावदासन्नमृत्योः पुंसः कृत्यमुक्तं इदानीं तस्यैव स्वयं देहं त्यक्तुमिच्छतः कृत्यमाह स्थिरमिति सार्धैश्चतुर्भिः अंग हे राजन् एवं भूतो यतिर्यदा इमं लोकं देहं जिहासुमिच्छति तदा देशे पुण्यक्षेत्रे काले च उत्तरायणादौ मनो न सज्जयेत् न देशकालो योगिनः सिद्धिहेतू किंतु योग एवेति दृढनिश्चयो भूत्वा सुखं सुखकरं चासनमास्थितः प्राणं नियच्छेदित्यर्थः १५ ओं नमो भगवते वासुदेवाय एतां बुद्धिं क्षेत्रज्ञे बुध्यादिद्रष्टरि निनयेत् प्रविलापयेत् तं क्षेत्रज्ञं आत्मनि शुद्धे तं च शुद्धात्मानं आत्मैवाहं आत्मनि शुद्धे ब्रह्मणि

संगं न प्रापयेत् २

भा०

तदेवाह। नयत्रेति। यत्रात्मस्वरूपे कालो न प्रभुः किमपि कर्तुं न समर्थः। अत एव च देवाः न प्रभवंतीत्याह। अनिमिषां देवानां परः प्रभुः कालोपि यत्र न प्रभुः। तत्र कुतो नु देवाः प्रभवेयुः। देवनियम्यानां तु जगतां प्राणिनां का वार्तेत्याह। जगतामिति। कुतो न प्रवर्तंतीत्यपेक्षायां निरुपाधित्वादित्याह। नयत्रेति। यद्वा जगत्कारणान्यपि न यस्य स्रष्टृत्वादौ प्रभवंतीत्याह॥ नयत्रेति। विकारोहंकारः १७ निरुपाधित्वं कुत इत्यत आह। परमिति। यद्यस्मात् अतत् आत्मव्यतिरिक्तं नेति नेतीत्येवं मुमुक्षुभिः त्यक्तुमिच्छवो दौरात्म्यं देहाद्यात्मत्वं विसृज्य अर्हस्य श्रीविष्णोः पदं पदे पदे क्षणे क्षणे हृदा उपगूह्य आश्लिष्यानां

नयत्र कालोऽनिमिषां परः प्रभुः कुतो नु देवा जगतां य ईशिरे नयत्र सत्वं न रजस्तमश्च न वै विकारो न महान् प्रधानम् १७ परं पदं वैष्णवमामनंति यन्नेति नेतीत्यतदुत्सिसृक्षवः विसृज्य दौरात्म्यमनन्यसौहृदा हृदोपगुह्यार्हपदं पदे पदे १८ इत्थं मुनिस्तूपरमेद्व्यवस्थितो विज्ञानदृग्वीर्यसुरंधिताशयः स्वपार्ष्णिनापीड्य गुदं ततो निलं स्थानेषु षट्स्वुन्नमयेज्जितक्लमः १९

न्यस्मिन् सौहृदं येषां तथाभूताः संतः तद्वैष्णवं पदं। अत एव परं सर्वतः श्रेष्ठमामनंतीत्यन्वयः १८ तस्मादित्थं ब्रह्मत्वेन व्यवस्थितो मुनिरुपरमेत्। तुशब्देन यदि प्रयास्यन्निति वक्ष्यमाणात् सकामाद्विशेष उक्तः। तमाह। विज्ञायते नेनेति विज्ञानं शास्त्रं तेन जाताद् दृक् ज्ञानं तस्य वीर्यं बलं तेन सुरंधिताः विहिंसिता आशया विषयवासना यस्य सः। इदानीं तस्य देहत्यागप्रकारमाह। स्वपार्ष्णिना पादमूलेन गुदं मूलाधारं आपीड्य निरुध्य अनिलं प्राणं उन्नमयेत्। ऊर्ध्वं नयेत्। जितः क्लमो येन षट्सु स्थानेषु नाभ्यादिषु १९ श्रीवासुदेवाय नमः राम राम राम

स्थिरं सुखमित्यादि यदं तकाल इति कर्तव्यमुक्तं तदुपसंहरति ५

भा०द्वि० नाभ्यां मणिपूरके स्थितं हृदि अनाहतचक्रे अधिरोप्य उरसि कंठादधोदेशे स्थिते विशुद्धचक्रे मनस्वी जितचित्तः स्व
८ तालुमूलं तस्यैव चक्रस्याग्रदेशं ततो बुद्ध्यागमसंभवाच्छनकैरित्युक्तं २० तस्माद्भ्रुवोरंतरं आज्ञाचक्रं। निरुद्धा
नि श्रोत्रे नेत्रे नासिके मुखं चेत्येवं सप्तायतनानि प्राणमार्गा येन सः। अनपेक्षश्चेत्परं ब्रह्म गतः सन् मूर्द्धन् मूर्द्धनि
ब्रह्मरंध्रे निर्भिद्य देहमिंद्रियाणि च विसृजेत्। २१ यदि तु पारमेष्ठ्यं पदं प्रयास्यन् भवति। वैहायसानां खेचराणां
सद्योमुक्तिमुक्त्वा क्रममुक्तिमाह। यदीति दशभिः ८

नाभ्यां स्थितं हृद्यधिरोप्य तस्मादुदानगत्योरसि तं नयेन्मुनिः ततोनुसंधाय धिया मनस्वी
स्वतालुमूलं शनकैर्नयेत २० तस्माद्भ्रुवोरंतरमुन्नयेत निरुद्धसप्तायतनोनपेक्षः स्थित्वा
मुहूर्त्तार्द्धमकुंठदृष्टिर्निर्भिद्य मूर्धन् विसृजेत्परं गतः २१ यदि प्रयास्यन्नृप पारमेष्ठ्यं वैहाय-
सानामुत यद्विहारं अष्टाधिपत्यं गुणसन्निवाये सहैव गच्छेन्मनसेंद्रियैश्च २२

राम ८

सिद्धानां यद्विहारं क्रीडास्थानं। कीदृशं। अष्टावाधिपत्यानि अणिमाद्यैश्वर्याणि यस्मिन्। तदपि प्रयास्यन्। क
गुणसन्निवाये गुणसमुदायरूपे ब्रह्मांडे सर्वत्रेत्यर्थः। तर्हि देहत्यागावसरे मनश्चेंद्रियाणि च न त्यजेत्। किंतु
तैः सहैव तत्तल्लोकभोगार्थं गच्छेत् २२ श्रीगोपालकृष्णाय नमः राम राम राम राम

यतः कर्मगतिवन्न योगगतिः परिच्छिन्नेत्याह। योगेश्वराणां त्रिलोक्या अंतश्च बहिश्च महर्लोकादिषु ब्रह्मांडाद्बहिश्च
गतिमाहुः। अत्र हेतुः। पवनस्यांतः आत्मा लिंगशरीरं येषामिति। विद्या उपासना। तपो भगवद्धर्मः। योगोष्टांगः।
समाधिर्ज्ञानं। तान् ये भजंति। तेषां या गतिस्तां २३ तामाह वैश्वानरमित्यष्टभिः। विहायसा आकाशेन। तत्र च ब्र
ह्मलोकपथेन गतः सन् वैश्वानरमग्न्यभिमानिनीं देवतां याति केनोपायेन। सुषुम्नया नाड्या सा च देहाद्बहिरपि ९
प्रथमं राम

योगेश्वराणां गतिमाहुरंतर्बहिस्त्रिलोक्याः पवनांतरात्मनां नकर्मभिस्तां गतिमाप्नुवंति वि
द्यातपोयोगसमाधिभाजाम् २३ वैश्वानरं याति विहायसा गतः सुषुम्नया ब्रह्मपथेन शो
चिषा विधूतकल्कोथ हरेरुदस्तात्प्रयाति चक्रं नृप शैशुमारम् २४

विततास्तीत्याह। शोचिषा ज्योतिर्मय्या विधूतस्त्यक्तः कल्को मलं येन सः। क्वाप्यसज्जमान इत्यर्थः। उदस्तात् उपरि
ष्टाद्ब्रह्ममार्गे हरेः संबंधि तारारूपं नारायणाधिष्ठितमित्यर्थः। शैशुमारं चक्रं। पंचमस्कंधे वक्ष्यमाणं शिशुमारा
श्रयं ज्योतिश्चक्रं। चक्रस्थानानि आदित्याद्ध्रुवांतानि पदानि प्रयातीत्यर्थः २४ श्रीवासुदेवाय नमः

तद्विश्लोक्यं विश्वस्य नाभिं सूर्याद्याश्रयभूतं आविष्टलिंगत्वान्नाभिशब्दस्य नपुंसकत्वं। अतिवर्त्य अतिक्रम्य परतः
स्वर्गिणां गत्यभावादेक एव। निर्मलेन लिंगशरीरेण। ब्रह्मविदां स्थानं। अन्यैर्नमस्कृतं महर्ल्लोकमुपैति। यद्यस्मि
न्विबुधाः महाकल्पायुषो भृग्वादयः २५ अथो अनंतरं कल्पांते स विश्वं त्रैलोक्यं अतिशयेन दह्यमानं निरीक्ष्य तत्र
अप्यूष्मप्राप्तेः। यत् द्विपरार्धस्थायि तत्पारमेष्ठ्यं पदं प्रति निर्याति। सिद्धेश्वरैर्जुष्टानि धिष्ण्यानि विमानानि यस्
मिन् तत्। ३। इति श्रेष्ठ्यं स्ववित्तं २६ तदेवाह नयत्रेति। आर्त्तिर्दुःखं उद्वेगो भयं किंतु चित्तंतो हेतोर्यद्दुःखं अदः

तद्विश्वनाभिं त्वतिवर्त्य विष्णोरणीयसा विरजेनात्मनैकः नमस्कृतं ब्रह्मविदामुपैति कल्पायुषो यद्विबुधा
रमंते २५ अथो अनंतस्य मुखानलेन दंदह्यमानं स निरीक्ष्य विश्वं निर्याति सिद्धेश्वरजुष्टधिष्ण्यं यद्द्वैप
रार्ध्यं तदु पारमेष्ठ्यं २६ न यत्र शोको न जरा न मृत्युर्नार्त्तिर्न चोद्वेग ऋते कुतश्चित् यच्चित्ततोदः कृपयानि
दंविदां दुरंतदुःखप्रभवानुदर्शनात् २७

ऋते तदेकं विना। तत्कुतो भवति। अनिदंविदां इदं भगवतो ध्यानमजानतां प्राणिनां दुरंतदुःखो यः प्रभवो जन्म न
स्यात्त्वनुदर्शनात्। तेषां कृपया यद्भावि चित्ततोदो मनःपीडेति यत् तत् विना कुतश्चिदपि यत्र शोकादयो न संतीति
तत्र ब्रह्मलोकं गतानां त्रिविधा गतिः। ये पुण्योत्कर्षेण गतास्ते कल्पांतरे पुण्यतारतम्येनाधिकारिका भवंति। ये
तु हिरण्यगर्भाद्युपासनाबलेन गतास्ते ब्रह्मणा सह मुच्यंते। ये तु भगवदुपासकास्ते स्वेच्छया ब्रह्मांडं भित्वा वैष्णवं
पदमारोहंतीति २७ राम ९

तत्र प्रकृतस्य भगवद्भक्तस्य ब्रह्मांडभेदनप्रकारमाह। ततइत्यादिना। तत्रेयं प्रक्रिया। ईश्वराधिष्ठितायाः प्रकृतेः केन
चिदंशेन महत्तत्वं भवति। तस्यांशेनाहंकारस्तस्यांशेन शब्दतन्मात्रद्वारा नभस्तस्यांशेन स्पर्शतन्मात्रद्वारा वायुस्त
स्यांशेन रूपतन्मात्रद्वारा तेजः तस्यांशेन रसतन्मात्रद्वारा आपस्तदंशेन गंधतन्मात्रद्वारा पृथ्वी। तैश्च मीलितैश्च
तुर्दश भुवनात्मकं विराट्शरीरं तस्य च पंचाशत्कोटियोजनविशालस्य पृथिव्येवांडकटाहविशेषशब्दवाच्या। कोटि
योजनविशालं प्रथममावरणं। पंचाशत्कोटियोजनविशालमित्येके। ततश्चाबादीनां ये परिणतांशास्तान्येवो

ततो विशेषं प्रतिपद्य निर्भयस्तेनात्मनापोनलमूर्तिरत्वरन् ज्योतिर्मयो वायुमुपेत्य काले
वाय्वात्मना खं बृहदात्मलिंगं २८ घ्राणेन गंधं रसनेन वै रसं रूपं तु दृष्ट्या श्वसनं त्वचैव
श्रोत्रेण चोपेत्य नभोगुणत्वं प्राणेन चाकूतिमुपैति योगी २९

त्तरोत्तरं दशगुणान्यावरणानि। अष्टमं तु प्रकृत्यावरणं व्यापकमेव। तदेवं स्थिते पृथिव्याद्यावरणभेदप्रकारः कथ्य
ते। ततो विशेषं प्रतिपद्य लिंगदेहेन पृथिव्यात्मतां प्राप्येत्यर्थः। एवमुत्तरत्रापि द्रष्टव्यं। निर्भयः कथं यास्यामीति शं
काशून्यः। तेनात्मना पृथिवीरूपेणात्मना अत्वरं तरां अपः प्रतिपद्य अत्वरन् त्वरामकुर्वन्। तत्तदात्मत्वेन क्लेददाहादिशं
काभावाद्यथेष्टं भोगान् भुंजान इत्यर्थः। एवं ज्योतिर्मयः सन् काले भोगावसाने बृहत् आत्मनो लिंगं परमात्ममूर्ति
त्वेनोपासने पूर्वं। यद्वा वेदशब्दात्मनां तस्य प्रमापकमिति २८ इंद्रियार्थानां भूतसूक्ष्माणामतिक्रममाह। घ्रा मप
णेनाधिष्ठिते न गंधमुपेत्य श्वसनं स्पर्शनं। नभोगुणत्वं शब्दात्मतां। प्राणेन तत्तत्कर्मेंद्रियेण आकूतिं तत्क्रियां॥
मूर्त्ति२
२९

तदेवं स्थूलसूक्ष्मभूतातिक्रममुक्त्वा तदावरणभूताहंकारप्राप्त्या महदादिप्राप्तिमाह। संयोगी विकार्यं संसाद्य वि
ज्ञानतत्त्वं याति विविधं कार्यमस्येति विकार्यो ऽहंकारः। स त्रिविधः। तामसो राजसः सात्विक इति। तत्र तामसाज्जडा
नि भूतसूक्ष्माणि जायंते। राजसाद्बहिर्मुखानि दशेंद्रियाणि। सात्विकान्मन इंद्रियदेवाश्च। तेषां लयश्च तत्र तदहं
कारे। तत्र भूतसूक्ष्माणामिंद्रियाणां च सन्निकर्षं लयस्थानं तामसं राजसं च। मनोमयं देवमयं च सात्विकं प्राप्य।

स भूतसूक्ष्मेंद्रियसन्निकर्षं मनोमयं देवमयं विकार्यं। संसाद्य गत्या सह तेन याति वि
ज्ञानतत्त्वं गुणसन्निरोधम् ३० तेनात्मनात्मानमुपैति शांतमानंदमानंदमयो ऽवसा
ने एतां गतिं भागवतीं गतो यः स वै पुनर्नेह विषज्जते ऽंग ३१

गत्या एवं गमनेन तेनाहंकारेण सह विज्ञानतत्त्वं महत्तत्त्वं याति। ततो गुणानां सन्निरोधो लयो यस्मिन् तत्प्रधा
नं याति ३० तेनात्मना प्रधानरूपेणानंदमयः सन् उपाधीनामवसाने शांतमविकृतमानंदं परमात्मान
मुपैति। न विषज्जते नावर्तत इत्यर्थः ३१ श्रीवासुदेवाय नमः राम राम राम रामं

सृती मार्गौ त्वत्प्रकाशावित्यर्थः। हे नृप। अनपेक्षो निर्भिद्य मूर्द्ध विसृजेत् परं गत इति या सद्योमुक्तिः। एका सृतिः। य
दि प्रयास्यन्नित्यादिना क्रममुक्तिरुक्ता द्वितीया सृतिः। एते सृती वेदेन गीते उक्ते। ननु स्वोत्प्रेक्षिते। यत्र यदा सर्वे प्रमुच्यं
ते कामा ये ऽस्य हृदि श्रिताः। अथ मर्त्यो ऽमृतो भवत्यत्र ब्रह्म समश्नुत इति सद्योमुक्तिः। ते ऽर्चिरर्चिसंभवंतीत्यादिना क्र
ममुक्तिश्च वेदेनोक्ता। यद्दानकर्मभिर्धूमं गतिमाप्नुवंतीति दक्षिणमार्गस्यापि सृतित्वात्ते सृती इति द्विवचनं। त्व

एते सृती ते नृप वेदगीते त्वयाभिपृष्टे ह सनातने च ये वै पुरा ब्रह्मण आह पृष्ट आराधितो भगवान्वासुदेवः
३२ न ह्यतो ऽन्यः शिवः पंथा विशतः संसृताविह वासुदेवे भगवति भक्तियोगो यतो भवेत् ३३

याभिपृष्टे यच्छ्रोतव्यमित्यादिप्रश्नेनार्थान्मुक्तिविषये द्वे अपि सृती पृष्टे। ब्रूहि यद्वा विपर्ययमिति दक्षिणमार्गो ऽप्यर्था
त्पृष्टः। एवं त्वया च ये पृष्टे एते सृती इत्यन्वयः ३२ संति संसरतः पुंसो बहवो मोक्षमार्गास्तपोयोगादयः। समीची
नस्त्वयमेवेत्याह। न हीति यतो ऽनुष्ठितात् भक्तियोगो भवेत्। अतो ऽन्यः शिवः सुखरूपो निर्विघ्नश्च नास्त्येव ३३

कुत एतदत आह। भगवान् ब्रह्मा। कूटस्थः निर्विकारः एकाग्रचित्तः सन्नित्यर्थः। त्रिरन्वीक्ष्य विचार्य। कार्त्स्न्येन साकल्येन
ब्रह्म वेदं अन्वीक्ष्य विचार्य यतः आत्मनि हरौ रतिर्भवेत्। तदेव मनीषया अध्यवस्यत। निश्चितवान् ३४ नन्वनुभू
तेऽर्थे रतिर्भवति। अननुभूते तु भगवति कथं रतिः स्यात्तत्राह। भगवान् लक्षितः दृष्टः। कथं स्वात्मना साक्षित्वेन ज्ञाततया
मितया केर्दृश्यैर्बुद्ध्यादिभिः। तदेव द्वेधा दर्शयति। दृश्यानां जडानां दर्शनं स्वप्रकाशं द्रष्टारं विना न घटत इत्यनुप

भगवान्ब्रह्म कार्त्स्न्येन त्रिरन्वीक्ष्य मनीषया तदध्यवस्यत्कूटस्थो रतिरात्मन्यतो भवेत् ३४ भगवान्स
र्वभूतेषु लक्षितः स्वात्मना हरिः दृश्यैर्बुद्ध्यादिभिर्द्रष्टा लक्षणैरनुमापकैः ३५ तस्मात्सर्वात्मना राज
न्हरिः सर्वत्र सर्वदा श्रोतव्यः कीर्तितव्यश्च स्मर्तव्यो भगवान्नृणाम् ३६ पिबंति ये भगवत आत्म
नः सतां कथामृतं श्रवणपुटेषु संभृतं पुनंति ते विषयविदूषिताशयं व्रजंति तच्चरणसरोरुहांतिकं
३७ इति श्री भागवते महापुराणे द्वितीयस्कंधे द्वितीयोऽध्यायः

पत्तिमुखेन। लक्षणैः स्वप्रकाशांतर्यामिलक्षकैः। तथा बुद्ध्यादीनि कर्तृप्रयोज्यानि। करणत्वाद्वास्यादिवदिति
व्याप्तिमुखेनानुमापकैः स्वतंत्रश्च कर्तेत्येवमीश्वरसिद्धिः ३५ यच्छ्रोतव्यमित्यादिषु प्रश्नोत्तरमुपसंहरति। त
स्मादिति ३६ श्रवणादिफलमभिनयेनाह। पिबंतीति। सतां आत्मनः आत्मत्वेन प्रकाशमानस्य कथैवामृ
तं। विषयैर्विदूषितं मलिनीकृतं आशयं पुनंति शोधयंति। तस्य चरणपद्मांतिकं श्री विष्णुपदं व्रजंति ३७
इति द्वितीयस्कंधे द्वितीयोऽध्यायः

तृतीये विष्णुभक्तेस्तु वैशिष्ट्यं श्रृण्वतो मुनेः। भक्त्युद्रेकेण तत्कर्मश्रवणादर ईर्यते १ इदानीमन्यदेवताभजनस्या
पि पुत्रादिभजनवद्देवतुच्छफलत्वेन हेयत्वं वक्तुं हे ह्य उक्तमनुवदति। एवमिति। ममेति मां कदाचिद्दैवयोगेन मनुष्य
त्वं प्राप्तेषु जीवेषु ये मनीषिणस्तेषां। तत्रापि ये म्रियमाणास्तेषां विशेषत एव मेतद्धरिकथाश्रवणादिकं निगदितं
विहितमित्यर्थः १ कामफलप्राप्त्यर्थमन्येषां भजनमाह। ब्रह्मणस्पतिं वेदपतिं ब्रह्माणं। इंद्रियपाटवकामः

शुक उवाच एवमेतं निगदितं पृष्टवान्यद्भवान्मम नृणां यन्म्रियमाणानां मनुष्येषु मनीषिणां १ ब्र
ह्मवर्चसकामस्तु यजेत ब्रह्मणस्पतिं इंद्रमिंद्रियकामस्तु प्रजाकामः प्रजापतीन् २ देवीं मायां तु श्रीका
म स्तेजस्कामो विभावसुं वसुकामो वसून्रुद्रान्वीर्यकामोऽथ वीर्यवान् ३ अन्नाद्यकामस्त्वदितिं स्वर्ग
कामोऽदितेः सुतान् विश्वान्देवान्राज्यकामः साध्यान्संसाधको विशां ४ आयुःकामोऽश्विनौ देवौ पु
ष्टिकाम इलां यजेत् प्रतिष्ठाकामः पुरुषो रोदसी लोकमातरौ ५ रूपाभिकामो गंधर्वान्स्त्रीकामो
ऽप्सर उर्वशीं आधिपत्यकामः सर्वेषां यजेत परमेष्ठिनम् ६

इंद्रं प्रजापतीन् दक्षादीन् २ मायां दुर्गां। विभावसुमग्निं। वसुकामः धनार्थी। वीर्यं प्रभावस्तत्कामो वीर्यवान्रु
द्रान् यजेत ३ अन्नाद्यं भोज्यं भक्ष्यं च। अदितेः सुतान् द्वादशादित्यान्। विशां देशस्थप्रजानां स्वाधीनतामि
च्छन्यजेत् ४ इलां पृथ्वीं प्रतिष्ठा स्थानादप्रच्युतिः। रोदसी द्यावाभूमी ५ अप्सरा अप्सरसो उर्वशीवत्सौ ६
साध्यान्

भा०द्वि० यज्ञं यज्ञोपाधिं विष्णुं। कोशो वसुसंचयः। वसुकाम इत्यत्र धनमात्रमिति भेदः। दांपत्यमन्योन्यप्रीतिस्तदेवार्थो य
१२ स्य सः। धर्मार्थः धर्मकामः। उत्तमश्लोकोपाधिं विष्णुं। तंतुस्तत्र संतानवृद्धिमन्विच्छन्। रक्षाबाधानिवृत्तिस्तत्कामः
पुण्यजनान् यक्षान्। ओजो बलं तत्कामः। मरुद्गणान् देवान् ८ राज्यं राजत्वं तत्कामो मनून् देवान् मन्वंतरपा
लकान्। राज्ञः कर्मराज्यं तत्कामो विश्वान् देवानिति शेषः। अभिचरन् शत्रुमरणमन्विच्छन्। निर्ऋतिं राक्षसं। का

यज्ञं यजेद्यशःकामः कोशकामः प्रचेतसम्। विद्याकामस्तु गिरिशं दांपत्यार्थ उमां सतीं ७
धर्मार्थ उत्तमश्लोकं तंतुं तन्वन् पितॄन् यजेत्। रक्षाकामः पुण्यजनानोजस्कामो मरुद्गणान्
८ राज्यकामो मनून् देवान् निर्ऋतिं त्वभिचरन् यजेत्। कामकामो यजेत्सोमम् अकामः पुरुषं प
रं ९ अकामः सर्वकामो वा मोक्षकाम उदारधीः। तीव्रेण भक्तियोगेन यजेत पुरुषं परम् १०
एतावानेव यजतामिह निःश्रेयसोदयः। भगवत्यचलो भावो यद्भागवतसंगतः ११

मकामः भोगेच्छुः अकामः वैराग्यकामः पुरुषं परं प्रकृतिव्यतिरेकोपाधिमीश्वरं ९ अकामः एकांतभक्तः। उ राम
क्तात्तु सर्वकामो वा पुरुषं पूर्णं निरुपाधिं १० पूर्वोक्तनानादेवतायजनस्यापि संयोगपृथक्त्वेन भक्तियोगफ १२
लत्वमाह। एतावानिति। इंद्रादीनपि यजतां। इह तत्तद्यजने भागवतानां संगतो भगवत्यचलो भावो भक्ति
र्भवतीति यत्। एतावानेव निःश्रेयसस्य परमपुरुषार्थस्योदयः लाभः। अन्यत्तु सर्वं तुच्छमित्यर्थः ११

भगवत्संगत इत्यनेन सूचितां हरिकथारतिं स्तौति। ज्ञानमिति। यत्र यासु कथासु ज्ञानं भवति। कीदृशं आ सर्वतः
प्रतिनिवृत्तं उपरतं गुणोर्मीणां रागादीनां चक्रं समूहो यस्मात्तत्। उत अनंतरं तद्धेतुरात्मप्रसादश्च। यत्र यासु म
नःप्रसादहेतुः गुणेषु विषयेष्वसंगो वैराग्यं वा। उभयत्रेति पाठे इहामुत्र च। गुणेष्वसंगः। कैवल्यमित्येवं संमतः
पंथा यो भक्तियोगः। निर्वृतः श्रवणसुखेन। अन्यत्रानिर्वृत्त इति वा। तासु हरिकथासु को रतिं न कुर्यात् १२ अ

ज्ञानं यदाप्रतिनिवृत्तगुणोर्मिचक्रमात्मप्रसाद उत यत्र गुणेष्वसंगः। कैवल्यसंमतपथस्त्वथ भक्तियोग
ः को निर्वृतो हरिकथासु रतिं न कुर्यात् १२ शौनक उवाच इत्यभिव्याहृतं राजा निशम्य भरतर्ष
भः किमन्यत्पृष्टवान् भूयो वैयासकिमृषिं कविं १३ एतच्छुश्रूषतां विद्वन् सूत नोऽर्हसि भाषितुं कथा ह
रिकथोदर्काः सतां स्युः सदसि ध्रुवं १४ स वै भागवतो राजा पांडवेयो महारथः बालक्रीडनकैः क्रीडन्
कृष्णक्रीडां य आददे १५ वैयासकिश्च भगवान् वासुदेवपरायणः उरुगायगुणोदाराः सतां स्युर्हि समा
गमे १६ आयुर्हरति वै पुंसामुद्यन्नस्तं च यन्नसौ तस्यर्ते यत्क्षणो नीत उत्तमश्लोकवार्तया १७

भिव्याहृतं उक्तं ऋषिं परब्रह्मदर्शिनं कविं शाब्दब्रह्माणि निष्णातं। निष्णातं। श्रवणेच्छायां हेतुः। हरिकथा एव उदर्कः
उत्तरफलं यासु ताः कथाः सतां भागवतानां सदसि सभायां स्युः १४ एतत्प्रपंचयति। स वा इति द्वाभ्यां। कृष्णप्रज्ञा
दिरूपां क्रीडां यः स्वीकृतवान् १५ उरुगायस्य गुणैरुदाराः महत्यः कथाः स्युः १६ किं च व्यर्थे वक्ष्यमाणमायु
र्हरिकथया सफलं कुर्वित्याशयेनाह। त्रिभिः आयुरिति। असौ सूर्य उद्यन् उदं च न अस्तमदर्शनं च यन् गच्छन्। येन
क्षणो नीतस्तस्य आयुः ऋते वर्जयित्वा व्यर्थे वहरति १७

तः से

भा०द्वि० ननुजीवनमेवतेषामायुषःफलमस्ति।तत्राह।तरवइति।ननुतेषांश्वासोनास्ति।तर्हिभस्त्राश्चर्मकोशाः।ननुतासा
१३ माहारादिकंनास्ति।तत्राह।नखादंतिनाश्नंति।नमेहंतिरेकंमैथुनंनकुर्वंतिकिं।उत्तश्रपिनराकारंपशुंमत्वाह।श्र
परेइति १८ तदेवाह।श्वादिभिःसंस्तुतःसदृशोनिरूपितः।यस्यकर्णपथंकदाचिदपिनागतःसः।अवज्ञास्पद
त्वात्श्वभिः।कश्मलविषयासक्तत्वाद्विड्वराहैर्ग्रामसूकरैःकंडुकंडूःखदविषयासक्तत्वात्उष्ट्रैःभारवाहित्वात्खरैः

तरवःकिंनजीवंतिभस्त्राःकिंनश्वसंत्युत नखादंतिनमेहंतिकिंग्रामपशवोपरे १८ श्वविड्वराहोष्ट्रखरैः
संस्तुतःपुरुषःपशुः नयत्कर्णपथोपेतोजातुनामगदाग्रजः १९ बिलेबतोरुक्रमविक्रमान्येनशृण्वतः
कर्णपुटेनरस्य जिह्वासतीदार्दुरिकेवसूतनचोपगायत्युरुगायगाथाः २० भारःपरंपट्टकिरीटजुष्टम
प्युत्तमांगंननमेन्मुकुंदम् शावौकरौनोकुरुतःसपर्यांहरेर्लसत्कांचनकंकणौवा २१ बर्हायितेतेनय
नेनराणांलिंगानिविष्णोर्ननिरीक्षितोये पादौनृणांतौद्रुमजन्मभाजौक्षेत्राणिनानुव्रजतोहरेर्यौ २२

रेखत्वइत्यर्थः १९ तस्यांगानिचानिःफलानीत्याह।बिलेइतिपंचभिः।बतेतिखेदे।नशृण्वतःअशृण्वतोनर राम १३
स्यपेकर्णपुटेतेबिलेइवथारंध्रे।नचेदुपगायतितस्यजिह्वाअसतीदुष्टा।दार्दुरीभेकसंबंधिनीयाजिह्वेव २० पट्टवस्त्रो
ष्णीषेणकिरीटेनजुष्टमपिशिरोयदिननमेत्।तर्हिकेवलंभारएव।शवौमृतकःतत्करतुल्यौलसंतीकांचनकं
कणेययोस्तौ।अप्यर्थेवाशब्दः २१ येनयनेविष्णोर्मूर्तयःनैननिरीक्षितेतेबर्हायितेमयूरपिच्छनेत्रतुल्यौ।द्रुमवत्
जन्मभजतइतितथावृक्षमूलतुल्यावित्यर्थः २२

नाभिलभेत(अभितो)नस्पर्शेन।नधारयेत्।श्रीविष्णुपद्याःश्रीविष्णुपदलग्नायानवेदनि(?)श्रवघ्रायनाभिनंदेदित्यर्थः २३ अश्म
वत्सारोबलंकाठिन्यंयस्य।विक्रियालक्षणमाह।अथेति।गात्ररुहेषुरोमसुहर्षउद्गमः २४ यस्मादभक्तस्यसर्व
मेतद्व्यर्थंमनसोनुकूलंचप्रियंब्रूषेअथअतःसोधुपृष्टःसनुवैयासकिःनृपतिंप्रतियदाह।तदभिधेहीति २५
इतिद्वितीयस्कंधेतृतीयोध्यायः तुर्येपरीक्षितापृष्टंसृष्ट्यादिहरिचेष्टितं।शुकेनब्रह्मनत्पुत्रसंवादेनोपवर्ण्य

जीवंछवोभागवतांघ्रिरेणुंनजातुमर्त्योभिलभेतयस्तु श्रीविष्णुपद्यामनुजस्तुलस्याःश्वसंछवोयस्तुनवेद
गंधं २३ तदश्मसारंहृदयंबतेदंयद्गृह्यमाणैर्हरिनामधेयैः नविक्रियेताथयदाविकारोनेत्रेजलंगात्र
रुहेषुहर्षः २४ अथाभिधेह्यंगमनोनुकूलंप्रभाषसेभागवतप्रधानः यदाहवैयासकिरात्मविद्याचि
शारदोनृपतिंसाधुपृष्टः २५ इतिश्रीभागवतेमहापुराणेद्वितीयस्कंधेतृतीयोध्यायः सूतउवा
च वैयासकेरितिवचस्तत्वनिश्चयमात्मनः उपधार्यमतिंकृष्णेऔत्तरेयःसतींव्यधात् १ आत्म
जायासुतागारपशुद्रविणबंधुषु राज्येचाविकलेनित्यंविरूढांममतांजहौ २ पप्रच्छचेममेवार्थंय
न्मांपृच्छतसत्तमाः कृष्णानुभावश्रवणेश्रद्दधानोमहामनाः ३

ते १ राज्ञःप्रश्नंकथयितुंतस्यप्राकृतनीस्थितिमाहचतुर्भिः।वैयासकेःशुकस्यइतिएवंभूतमात्मनस्तत्वस्यनि
श्चयोयस्मात्तद्वचःउपधार्य।आकलय्यासतींकृष्णएवसेव्यःनान्यइत्येवंभूतां १ आत्मादेहः।पशवोगजाद
यः २ इममेवार्थंहरिलीलालक्षणम् ३ श्रीगोपालकृष्णायनमः श्रीराम राम राम

भा॰द्वि॰ संछ्छां मृत्युं त्रैवर्गिकं धर्मार्थकामप्रधानं संन्यस्य त्यक्त्वा। आत्मभावं परमप्रेमाणं भगवदात्मत्वं गतः प्राप्तः सन्नुपप्र
१४ छ ४ मह्यं मम तमोऽज्ञानं नश्यति। तव कथयतः सतः अतः समीचीनं ५ पुनश्च वेदितुमिच्छामि। इदं दुर्विभाव्यं अ
वितर्क्यं विश्वं यथा सृजति ६ गोपायति पालयति। संयच्छति संहरति। पुरुशक्तिः बहुशक्तिमान्। क्रीडन्यथा करोति

संछ्छां विज्ञाय संन्यस्य कर्म त्रैवर्गिकं च यत् वासुदेवे भगवति आत्मभावं दृढं गतः ४ राजोवाच स
मीचीनं वचो ब्रह्मन्सर्वज्ञस्य तवानघ तमो विशीर्यते मह्यं हरेः कथयतः कथां ५ भूय एव विवित्सामि भग
वानात्ममायया यथेदं सृजते विश्वं दुर्विभाव्यमधीश्वरैः ६ यथा गोपायति विभुर्यथा संयच्छते पुनः या
यां शक्तिमुपाश्रित्य पुरुशक्तिः परः पुमान् आत्मानं क्रीडयन्क्रीडन्करोति विकरोति वा ७ नूनं भग
वतो ब्रह्मन् हरेरद्भुतकर्मणः दुर्विभाव्यमिवाभाति कविभिश्चापि चेष्टितम् ८ यथा गुणांस्तु प्रकृतेर्युग
पत्क्रमशोऽपि वा बिभर्ति भूरिशस्त्वेकः कुर्वन् कर्माणि जन्मभिः ९ विचिकित्सितमेतन्मे ब्रवीतु भगवान्य
था शाब्दे ब्रह्मणि निष्णातः परस्मिन् भगवान् खलु १० सूत उवाच इत्युपामंत्रितो राज्ञा गु
णानुकथने हरेः हृषीकेशमनुस्मृत्य प्रतिवक्तुं प्रचक्रमे ११ राम १४

आत्मानं ब्रह्मादिरूपिणं क्रीडयन् विकरोति विविधं करोति। एकः पुरुषरूपेण युगपज्जन्मभिः ब्रह्माद्यवतारैः क्रम
शो वा यथा प्रकृतेर्गुणान्गृह्णाति विचिकित्सितं संदिग्धं शाब्दे ब्रह्मणि विचारेण निष्णातः। परस्मिन्ननुभवेन।
उपामंत्रितः प्रार्थितः उपचक्रमे। देवतागुरुनमस्कारादिरूपमुपक्रमं कृतवानित्यर्थः ११ श्रीकृष्णाय नमः

तद्देवाहत्रयोदशभिः। परस्मै सर्वोत्तमाय। तत्र हेतुः। भूयसे अपरिमितमहिम्ने। तद्दर्शयति। सन्ततः प्रपंचस्य उद्भ
वादिषु निमित्तभूतया लीलया गृहीतं ब्रह्मादिरूपेण रजआदिशक्तित्रितयं येन तस्मै। अंतर्भवाय अंतर्यामि
णे। अत एव सर्वांतरत्वादनुपलक्ष्यं वर्त्म यस्य १२ विचित्रफलदातृत्वमनुस्मरन्प्रणमति। भूयः पुनश्च नमः।
सतां धर्मवर्त्तिनां वृजिनच्छिदे दुःखहंत्रे। असतामधर्मशीलानां असंभवाय अनुद्भवहेतवे। अखिलसत्त्वमूर्तये
तत्तद्देवादिरूपेण तत्तत्फलदायेत्यर्थः। समग्रसत्त्वमूर्तये इति वा। पुनरपि पूर्वोक्तोभयवैलक्षण्यमाह। पारमहंस्ये

शुक उवाच नमः परस्मै पुरुषाय भूयसे सदुद्भवस्थाननिरोधलीलया गृहीतशक्तित्रितयाय देहि
नामंतर्भवायानुपलक्ष्यवर्त्मने १२ भूयो नमः सद्वृजिनच्छिदेऽसतामसंभवायाखिलसत्त्वमूर्तये पुं
सां पुनः पारमहंस्य आश्रमे व्यवस्थितानामनुमृग्यदाशुषे १३ नमो नमस्तेऽस्त्वृषभाय सात्वतां विदूर
काष्ठाय मुहुः कुयोगिनां निरस्तसाम्यातिशयेन राधसा स्वधामनि ब्रह्मणि रंस्यते नमः १४

प्रत्यक्निष्ठारूपे आश्रमे व्यवस्थितानां पुंसामनुमृग्यं अतन्निरसनेन पुनः पुनर्मृग्यं यदात्मतत्त्वं तस्य दाशुषे दा
त्रे १३ सात्वतां भक्तानां ऋषभाय पालकाय। कुयोगिनां भक्तिहीनानां विदूरा काष्ठा दिगपि यस्य। दुर्ज्ञेयायेत्यर्थः
तदेवं वैषम्यप्रतीतावपि निर्दोषत्वाय। चिंत्यमैश्वर्यमाह। निरस्तं साम्यं अतिशयश्च यस्य। यदपेक्षया अन्य
स्य साम्यमतिशयश्च नास्ति। तेन राधसा ऐश्वर्येण स्वधामनि स्वरूपे ब्रह्मणि रममाणाय १४

भा०द्वि० सर्वसाधनेभ्यो भक्तेः श्रैष्ठ्यमनुस्मरन् प्रणमति यत्कीर्तनमिति द्वाभ्यां। अर्हणं पूजनं। सुभद्रं मंगलं श्रवो यशो यस्य
१५ तस्मै १५ विचक्षणाः विवेकिनः यस्य चरणयोरुपसादनात् उपसत्तेर्भजनात्। अंतरात्मनो मनसः उभयत्र इह
च परत्र च संगं व्युदस्य निरस्य गतक्लमाः प्रयासरहिताः १६ भक्तिशून्यानां सर्वसाधनवैफल्यं दर्शयन्नमस्यति त
पस्विन इति मनस्विनो योगिनः सुमंगलाः सदाचाराः यस्मिन् जपआद्यर्पणं विना। सुभद्रश्रवस इति अस्यावृत्तिर्यशः

यत्कीर्तनं यच्छ्रवणं स्मरणं यदीक्षणं यद्वंदनं यच्छ्रवणं यदर्हणं लोकस्य सद्यो विधुनोति कल्मषं तस्मै सुभद्र
श्रवसे नमो नमः १५ विचक्षणा यच्चरणोपसादनात्संगं व्युदस्योभयतोऽन्तरात्मनः विंदंति हि ब्रह्मगतिं
गतक्लमास्तस्मै सुभद्रश्रवसे नमो नमः १६ तपस्विनो दानपरा यशस्विनो मनस्विनो मंत्रविदः सुमंगला
: क्षेमं न विंदंति विना यदर्पणं तस्मै सुभद्रश्रवसे नमो नमः १७ किरातहूणांध्रपुलिंदपुल्कसा आभीर
कंका यवनाः खसादयः (गतव्यलीकैरजशंकरादिभिर्वितर्क्यलिं) येऽन्ये च पापा यदुपाश्रयाश्रयाः शुध्यं
ति तस्मै प्रभविष्णवे नमः १८ स एष आत्मात्मवतामधीश्वरस्त्रयीमयो धर्ममयस्तपोमयः गतव्यली
कैरजशंकरादिभिर्वितर्क्यलिंगो भगवान्प्रसीदतां १९

श्रवणादेः प्राधान्यज्ञापनाय १७ भक्तेः परमशुद्धिहेतुत्वं दर्शयन्नाह। किरातादयो ये पापजातयः अन्ये च ये कर्म राम
तः पापास्ते यदुपाश्रयाः भागवताः तदाश्रयणेन संतः शुध्यंति। असंभावनाशंकां परिहरति प्रभविष्णवे प्रभ १९
वनशीलायेति १८ सर्वोपास्यत्वमनुस्मरन्प्रार्थयते। स एष आत्मवतां धीराणामात्मा आत्मत्वेनोपास्य इ
त्यर्थः। त्रयीमयत्वादिविशेषणैः तत्तन्मार्गेणोपास्यत्वं विवक्षितं। गतव्यलीकैर्निष्कपटैर्भक्तैर्वितर्क्यमनुपाश्रयेण
वीक्षणीयं लिंगं मूर्तिर्यस्य स प्रसीदतु १९

सर्वपालकत्वमनुस्मरन्नाह। श्रिय इति गतिश्च सर्वापत्सु रक्षकः २० ज्ञानप्रदत्वमनुस्मरन्नाह द्वाभ्यां। यस्यांघ्रे
रनुध्यानमेव समाधिस्तेन धौतया शोधितया यथास्वरुच्यनुसारेण सगुणनिर्गुणादिभेदैः। यद्वा। रुक् प्रतिभा य
था मतीत्यर्थः २१ किंच पुरा कल्पादौ अजस्य हृदि सती सृष्टिविषयां स्मृतिं वितन्वता येन प्रचोदिता सती तस्यमु
खतः किल प्रादुरभूत्। स्वानि लक्षणानि शिक्षायुक्तानि यस्याः सा। ऋषीणां ज्ञानप्रदानां ऋषभः श्रेष्ठः २२ इदानीं [illegible]

श्रियः पतिर्यज्ञपतिः प्रजापतिर्धियां पतिर्लोकपतिर्धरापतिः पतिर्गतिश्चांधकवृष्णिसात्वतां प्रसीदतां मे
भगवान्सतां पतिः २० यदंघ्र्यनुध्यानसमाधिधौतया धियानुपश्यंति हि तत्त्वमात्मनः वदंति चैतत्कवयो
यथारुचं स मे मुकुंदो भगवान्प्रसीदतां २१ प्रचोदिता येन पुरा सरस्वती वितन्वताजस्य सतीं स्मृतिं हृदि
स्वलक्षणा प्रादुरभूत्किलास्यतः स मे ऋषीणामृषभः प्रसीदतां २२ भूतैर्महद्भिर्य इमाः पुरो विभुर्निर्मा
य शेते यदमूषु पूरुषः भुंक्ते गुणान्षोडश षोडशात्मकः सोऽलंकृषीष्ट भगवान्वचांसि मे २३

शृंगारकरुणादिशोभां प्रार्थयते भूतैरिति। स मे वचांसि अलंकृषीष्ट अलंकरोतु। अन्यस्य च वचसामन्ये नालंकारा
संभवमाशंक्य तस्यांतर्यामितामाविष्करोति। यो महद्भिर्भूतैरिमाः पुरः शरीराणि सृष्ट्वा अमूषु पूर्षु अंतर्यामित
या शेते वसति अत्र पुरुषसमाख्यां प्रमाणयति। यद्यस्मात्पुरुष इति। अत एव यः एकादशेंद्रियपंचभूतरूपा
न् षोडशगुणान् कलाः भुंक्ते प्रकाशयति पालयतीति वा। तदा चात्मनेपदमार्षं। अत्र हेतुः। यतः षोडशात्मा
त्माभावेन पितास्वार्थैकः। नत्वत्र जीवत्वमुच्यते। प्रार्थनाविरोधात् २३

श्रीव्यासंनमस्करोति।सोम्याभक्ताःयस्यमुखांबुरुहेआसवोमकरंदस्तं २४ इदानींप्रश्नस्योत्तरतयाब्रह्म
नारदसंवादंप्रस्तौति।उत्पत्तिसमयएववेदामभेयस्य।साक्षाद्धरिर्यदाह २५ इतिद्वितीयेचतुर्थः
पंचमेनारदेनाथपृष्टःस्रष्ट्यादिवत्त्वयजः हरेर्लीलांविराट्सृष्टिंकालकर्मादिशक्तिभिः नारदायविष्टं
तेवेदगर्भोभ्यधादित्युक्तं।तत्रनारदप्रश्नमाह।देवदेवेति।हेभूतभावन।अतएवसर्वेषांपूर्वज।अनादेः।ज्ञा

व्यासायामितितेजः

नमस्तस्मैभगवतेवासुदेवायवेधसे पपुर्ज्ञानमयंसोम्यायन्मुखांबुरुहासवं २४ एतदेवात्म
भूराजन्नारदायविपृच्छते वेदगर्भोभ्यधात्साक्षाद्यदाहहरिरात्मनः २५ इतिश्रीभाग
वतेमहापुराणेद्वितीयस्कंधेचतुर्थोध्यायः नारदउवाच देवदेवनमस्तेस्तु भूतभा
वनपूर्वज तद्विजानीहियज्ज्ञानमात्मतत्त्वनिदर्शनं १ यद्रूपंयदधिष्ठानंयतःसृष्टमिदंप्रभो
यत्संस्थंयत्परंयच्चतत्तत्त्वंवदतत्त्वतः २

ज्ञायतेऽनेनेतिज्ञानंतत्साधनंयत्तद्विजानीहि।विशेषेणज्ञापयेत्यर्थः।कथंभूतंआत्मनत्त्वंनितरांदृश्यते
येनतत् १ उपलक्षणभूतंविश्वमेवात्मज्ञानसाधनं।अतस्तद्विशेषंपृच्छति।यद्रूपंयेनरूप्यतेप्रकाश्यते
यदधिष्ठानंयदाश्रयं।यतोयेनसृष्टं।यत्संस्थंयेनलीयते।यत्परंयदधीनं।यच्चेतियदात्मकं।स्वतःसत्का
रणतोवेत्यर्थः।तस्ययत्तत्त्वंयाथार्थ्यंतत्त्वतोवद २ श्रीकृष्णायनमः राम राम राम

नजानामीतिनवक्तव्यमित्याह।सर्वमितिभूतंजातंभव्यंजनिष्यमाणंभवत्ज्ञायमानंतेषांप्रभुर्यतः।अतोवि
शिष्टेनज्ञानेनावसितंनिश्चितं ३ आस्नामिदंआदौतावत्त्वामेवकथयेत्याह।यतोविज्ञानंयस्यकस्त्वंवि
ज्ञानदइत्यर्थः।यदाधारःकस्त्ववाश्रयः।यत्परोयदधीनः।यदात्मकःयत्स्वरूपः।ममतुत्वमेवस्वतंत्रःपरमेश्वरइ
तिबुद्धिः।तवतपश्चरणेनतुपरशंकयाएच्छामीत्याहसार्द्धैश्चतुर्भिः।एकोऽसहायः।आत्मनिभावयसेपालयसि

सर्वंह्येतद्भवान्वेदभूतभव्यभवत्प्रभुः करामलकवद्विश्वंविज्ञानावसितंतव ३ यद्विज्ञानोयदाधारोय
त्परस्त्वंयदात्मकः एकःसृजसिभूतानिभूतैरेवात्ममायया ४ आत्मन्भावयसेतानिनपराभावयन्
स्वयं आत्मशक्तिमवष्टभ्यसूत्रनाभिरिवाक्लमः ५ नाहंवेदपरंह्यस्मिन्नापरंनसमंविभो नामरूपगु
णैर्भाव्यंसदसत्किंचिदन्यतः ६ सभवानचरद्घोरंयत्तपःसुसमाहितः तेनखेदयसेनस्त्वंपराशंकां
प्रयच्छसि ७

स्वयमेवपराभवमप्रापयन्।अक्लमःश्रमरहितः।यथोर्णनाभिरात्मनएवशक्तिमवष्टभ्यसृजतितद्वत् ५
तस्मात्अहंतुअस्मिन्विश्वस्मिन्परंउत्तमं।अपरंअधमंसमंमध्यमंवा।तत्रापिनाममनुष्यादि।रूपंद्विपदत्वा
दि।गुणाःशुक्लत्वादितैर्भाव्यंसाध्यं।तत्रापिसदसत्स्थूलंसूक्ष्मंवा।किंचिदप्यन्यतोनवेद।किंतुत्वत्तएवसर्वंभवती
तिमन्ये ६ सत्तथाविधोपिभवान्तपोऽचरदितियत्तेननोस्मान्खेदयसेमोहयसि।यतःपराशंकांईश्व
रांतरशंकांप्रयच्छसि ७

भा०द्वि० यथैवाहं त्वयानुशासितः शिक्षितः सन्बुध्येयं तथा विशेषेण विज्ञापय ८ प्रश्नमभिनंदति हे वत्स पुत्र तवेदं वि
१८ विचिकित्सितं संदेहस्तत्पूर्वकः प्रश्नोयं सम्यगित्यर्थः। यतः कारुणिकस्य तवायं प्रश्नः। अत्र हेतुः। यतः परं भगव
द्वीर्यप्रकाशने प्रवर्त्तितोस्मि। अतस्त्वं जिज्ञासुरपि मयि कृपामेव कृतवानित्यर्थः ९ ननु त्वमेव भगवानि
त्युक्तं त्वया एकः सृजसि भूतानीत्यादिना। सत्यं यथा मामीश्वरत्वेन प्रभाषसे तदपि तव भाषणं नान्यं तम
न्तं। यतः कारणात् एतावन्त्प्रभावस्य भाव एतावत्त्वं मे अस्ति। किंतु मत्तः परमीश्वरमविज्ञाय ब्रूषे अतः सादृ

एतन्मे पृच्छतः सर्वं सर्वज्ञ सकलेश्वर विजानीहि यथैवेदमहं बुध्येनुशासितः ८ ब्रह्मोवाच
सम्यक्कारुणिकस्येदं वत्स ते विचिकित्सितं यदहं चोदितः सौम्य भगवद्वीर्यदर्शने ९ नानृतं तव
तच्चापि यथा मां प्रब्रवीषि भो अविज्ञाय परं मत्त एतावत्त्वं यतो हि मे १० येन स्वरोचिषा विश्वं रो
चितं रोचयाम्यहं यथार्कोग्निर्यथा सोमो यथर्क्षग्रहतारकाः ११

श्यात्तवेयं भ्रांतिः। न तु बुद्धिपूर्वमनृतमित्यर्थः। यत ईश्वरान्मम एतावत्त्वं तमविज्ञायेति वान्वयः १० तर्हि राम
कोसावीश्वरः इत्यपेक्षायां भक्त्या नमस्कुर्वन्नेव तं कथयति त्रिभिः। येन स्वप्रकाशेन रोचितं प्रकाशितमेव १८
प्रकाशयामि सृष्ट्याभिव्यक्तं करोमि। यथार्कादयश्चैतन्यप्रकाश्यमेव प्रकाशयंति। तथा च श्रुतिः। न तत्र सू
र्यो भाति न चंद्रतारकं नेमा विद्युतो भांति कुतोयमग्निः। तमेव भांतमनुभाति सर्वं तस्य भासा सर्वमिदं वि
भातीति ११

तस्मै नमो धीमहि यस्य मायया मोहिताः संतो युष्मदादयो मां जगद्गुरुं जगत्कर्तारं च वदंति तस्मै १२ यन्माययेति मायासं
बंधोक्तेस्तस्या दुर्जयत्वोक्तेश्च तस्यापि किमस्ति संसारः नैवेत्याह मत्कपटं असौ जानाति यस्य दृष्टिपथे स्थातुं विलज्जमान
येव तस्मिन्त्वकार्यमकुर्वत्या अमुया मायया विमोहिताः अस्मदादयो दुर्धियः अविद्यावृतज्ञाना एव केवलं विकत्थंते श्लाघं
ते अनेन यद्रूपमित्यस्य प्रश्नस्योत्तरमुक्तं भवति १३ तदेवं स्वस्मादन्यं परमेश्वरं निरूप्य इदानीं यदधिष्ठानमित्यादिनवप्र

तस्मै नमो भगवते वासुदेवाय धीमहि यन्मायया दुर्जयया मां ब्रुवंति जगद्गुरुं १२ विलज्जमानया यस्य स्था
तुमीक्षापथेमुया विमोहिता विकत्थंते ममाहमिति दुर्धियः १३ द्रव्यं कर्म च कालश्च स्वभावो जीव एव च
वासुदेवात्परो ब्रह्मन्न चान्योर्थोस्ति तत्त्वतः १४ नारायणपरा वेदा देवा नारायणांगजाः नारायणपरा लो
का नारायणपरा मखाः १५ नारायणपरो योगो नारायणपरं तपः नारायणपरं ज्ञानं नारायणपरा गतिः १६

श्नानां स एवाधिष्ठानादिकं सर्वमित्युत्तरं वक्तुं तद्व्यतिरेकेणान्यस्यासत्त्वमाह द्रव्यमिति द्रव्यं महाभूतानि उपादानरूपा
णि कर्म जन्मनिमित्तं कालस्तत्क्षोभकः स्वभावस्तत्परिणामहेतुः जीवो भोक्ता वासुदेवात्परोन्योर्थो नास्ति कारणाव्यतिरे
कात्कार्यस्य १४ तत्प्रपंचयति द्वाभ्यां नारायणः परः कारणं येषां ते अनेनैव शास्त्रयोनित्वप्रतिपादनेनेश्वरे प्रमाणं स
र्वज्ञत्वादिकं चोक्तं देवाश्च तदंगजाताः अतो न तद्व्यतिरिक्ताः लोकाः स्वर्गादयः तदानंदांशाः मखास्तत्साधनभूताः १५
योगः प्राणायामादिः तपः साध्यं चित्तैकाग्र्यं ज्ञानं तत्साध्यं गतिस्तत्फलं अनेनैव सर्वं तदधीनमित्युक्तं १६

भा० द्वि० त
८७

र्हि त्वं किं करोषीत्यपेक्षायामाह तस्य सृज्यमपि तेन सृष्टोहं सृजामि ईक्षयाकटाक्षेणैव तत्र हेतवः द्रष्टुरित्यादयः १७ ननु कुतोयं जीवेश्वरविभागः यतस्त्वं प्रेर्यः स चक्षुरेकस्यादित्यपेक्षायां जीवेश्वरविभागे हेतुमाह सत्वमित्यादिभिस्त्रिभिः निर्गुणस्यापीश्वरस्यैते त्रयो गुणाः बध्नंतीत्युत्तरेणान्वयः कथंभूताः ते नैव स्वातंत्र्येण स्थित्याद्यर्थं मायया गृहीताः १८ वस्तुतः सर्वदा मुक्तं मायिनं मायाविषयं पुरुषं जीवं बध्नंति कः कार्यमधिभूतं कारणं आध्यात्मिकं कर्तृ आधिदैवतं तेषां भावस्तत्वं तस्मिन् द्रव्यं महाभूतानि ज्ञानशब्देन देवताः क्रि

तस्यापि द्रष्टुरीशस्य कूटस्थस्याखिलात्मनः सृज्यं सृजामि सृष्टोहमीक्षयैवाभिचोदितः १७
सत्वं रजस्तम इति निर्गुणस्य गुणास्त्रयः स्थितिसर्गनिरोधेषु गृहीता मायया विभोः १८ कार्य
कारणकर्तृत्वे द्रव्यज्ञानक्रियाश्रयाः बध्नंति नित्यदा मुक्तं मायिनं पुरुषं गुणाः १९ स ८७
एष भगवान् लिंगैस्त्रिभिरेभिरधोक्षजः स्वलक्षितगतिर्ब्रह्मन् सर्वेषां मम चेश्वरः २०

याः इंद्रियाणि तदाश्रयाः तेषां कारणभूताः तत्तदभिमानेन बध्नंति १९ स एव बद्ध्यमायः एभिर्लिंगैर्गुणैर्जश्वानामावरके रूपाधिभिः सुष्टु अलक्षिता गतिस्तत्वं यस्य सः स्वैर्भक्तै रेव लक्षिता गतिर्यस्येति वा २०

तस्य सृष्टिप्रकारमाह कालमिति कालः क्षोभकः कर्म जीवादृष्टं विबुभूषुः विविधं भवितुमिच्छन् २१ गुणानां व्यतिकरः क्षोभः साम्यत्यागः स्वभावतः परिणामः रूपांतरापत्तिः पुरुष ईश्वरः तेनाधिष्ठितत्वं त्रयाणां विशेषणं २२ महतः महत्तत्वात् विकुर्वाणात् विक्रियमाणात् तस्य च क्रियाज्ञानशक्तित्वात् निर्गुणत्वेपि रजःसत्वाभ्यां उपबृंहितत्वं अहंकारस्य तावत् तमःप्रधानत्वं अत एवाहंकारकार्येषु तामसमाकाशादिकं बहुराजसं सात्विकं चाल्पं एवं तदुपाधिके पुं जीवे पापि तथैव तामसाधिक्यं तेसे विकुर्वन् रूपांतरं गच्छन् २३ त्रैविध्यमेवाह वैकारिकः सात्विकः तैजसः राजसः य

कालं कर्म स्वभावं च मायेशो मायया स्वया आत्मन्यदृच्छया प्राप्तं विबुभूषुरुपाददे २१ कालाद्गुणव्यति
करः परिणामः स्वभावतः कर्मणो जन्म महतः पुरुषाधिष्ठितादभूत् २२ महतस्तु विकुर्वाणाद्रजःसत्वोप
बृंहितात् तमःप्रधानस्त्वभवद्द्रव्यज्ञानक्रियात्मकः २३ सोहंकार इति प्रोक्तो विकुर्वन्समभूत्त्रिधा वैका
रिकस्तैजसश्च तामसश्चेति यद्भिदा २४ द्रव्यशक्तिः क्रियाशक्तिर्ज्ञानशक्तिरिति प्रभो २४ तामसादपि
भूतादेर्विकुर्वाणादभून्नभः तस्य मात्रा गुणः शब्दो लिंगं यद्द्रष्टृदृश्ययोः २५

द्भिदा यस्य भेदः द्रव्यशक्तिरित्यादीनि प्रातिलोम्येन त्रयाणां लक्षणानि द्रव्ये महाभूतात्मके शक्तिर्यस्य क्रियासु इंद्रियेषु शक्तिर्यस्य ज्ञानेषु देवेषु शक्तिर्यस्य हे प्रभो बोद्धुं शक्त २४ भूतादेरिति तामसस्य ननु तामसात्प्रथमं शब्दो भवतीति प्रसिद्धं सत्यं स तु तस्य नभसो मात्रा सूक्ष्मरूपं गुणश्चासाधारणः व्यावर्तको धर्मः शब्दद्वारा नभ उत्पद्यत इत्यर्थः एवमेवस्यशादिष्वपि द्रष्टव्यं शब्दस्य लक्षणं लिंगमिति कुड्याद्यंतरितेन केनचिद्भो गजो गज इत्युक्ते योगज द्रष्टा यश्चतेन

५४

परस्य नभसः कारणत्वेनान्वयाच्छब्दवांश्च वायुः तस्यैव लक्षणं प्राणो देहधारणं ओजः सहो बलानि इंद्रियमनः
शरीराणां पाटवानि तेषां हेतुरित्यर्थः २६ ततो रूपवत्तेजः वायुनभसोः कारणभूतयोरन्वयात्स्पर्शशब्दवच्च २७
एवं नभसः पृथिव्याश्च परान्वयाधिक्याद्गुणाधिक्यं घोषः शब्दः २८ विशेषः पृथ्वी पृथिव्याश्च परान्वयाधिक्याद्गु
णाधिक्यं २९ मनः शब्देनैव तदधिष्ठाता चंद्रोपि द्रष्टव्यः अन्ये च दश देवता वैकारिकाः सात्विकाहंकारकार्याः

नभसोथ विकुर्वाणाद्भूत्स्पर्शगुणोनिलः परान्वयाच्छब्दवांश्च प्राण ओजः सहो बलं २६ वायो
रपि विकुर्वाणात्कालकर्मस्वभावतः उदपद्यत तेजो वै रूपवत्स्पर्शशब्दवत् २७ तेजसस्तु विकुर्वा
णादासीदंभो रसात्मकं रूपवत्स्पर्शवच्चांभो घोषवच्च परान्वयात् २८ विशेषस्तु विकुर्वाणादंभसो
गंधवानभूत् परान्वयाद्रसस्पर्शशब्दरूपगुणान्वितः २९ वैकारिकान्मनो जज्ञे देवा वैकारिका द
श दिग्वातार्कप्रचेतोश्विवह्नींद्रोपेंद्रमित्रकाः ३० तैजसात्तु विकुर्वाणादिंद्रियाणि दशाभवन् ज्ञान
शक्तिः क्रियाशक्तिर्बुद्धिः प्राणश्च तैजसात् श्रोत्रं त्वग्घ्राणदृग्जिह्वावाग्दोर्मेढ्रांघ्रिपायवः ३१ १९

तानाह दिशश्च वातश्च अर्कश्च प्रचेताश्च अश्विनौ च एते पंचभ्यो त्वक्चक्षुर्जिह्वाघ्राणानामधिष्ठातारः वह्निश्च
इंद्रश्च उपेंद्रश्च मित्रश्च प्रजापतिश्च एते पंच ३० वाक्पाणिपादपायूपस्थानां यतो ज्ञानशक्तिर्बुद्धिः क्रियाशक्तिः
प्राणश्च तैजसाहंकारकार्यौ अतो ज्ञानक्रियाविशेषरूपाणींद्रियाण्यपि तैजसादभवन्नित्यर्थः तान्याह श्रोत्रमिति
दोः पाणी मेढ्रः उपस्थः क्रमस्तत्र न विवक्षितः ३१

एवं कारणसृष्टिमुक्त्वा कार्यसृष्टिमाह। यदा एते असंगताः अमिलिता आसन्। अतएव यदा आयतनस्य शरीरस्य नि
र्माणे न शेकुः ३३ तदा सदसत्वं प्रधानगुणभावं उपादाय स्वीकृत्य उभयं समष्टिव्यष्ट्यात्मकं शरीरं ३४ काल
कर्मस्वभावानधिष्ठाय स्थितः जीवयतीति जीवः परमात्मा। अजीवमचेतनमजीवयच्चेतयति स्म। निर्भिद्य पृथ
क्कृत्य उपस्थित इत्यर्थः ३५ तदवयवैर्लोकरचनामाह। यस्येति। कटिरिति जानुमूलयोः पश्चाद्भागः जघनं पु

यदैतेऽसंगता भावा भूतेंद्रियमनोगुणाः यदायतननिर्माणे न शेकुर्ब्रह्मवित्तमाः ३४ तदा संहत्य चान्यो
न्यं भगवच्छक्तिचोदिताः सदसत्वमुपादाय चोभयं ससृजुर्ह्यदः ३५ वर्षपूगसहस्रांते तदंडमुदकेशयं
कालकर्मस्वभावस्थो जीवोऽजीवमजीवयत् ३६ स एव पुरुषस्तस्मादंडं निर्भिद्य निर्गतः सहस्रोर्वंघ्रिबा
ह्वक्षः सहस्राननशीर्षवान् ३७ यस्येहावयवैर्लोकान्कल्पयंति मनीषिणः कट्यादिभिरधः सप्त सप्तोर्ध्वं
जघनादिभिः ३८ पुरुषस्य मुखं ब्रह्म क्षत्रमेतस्य बाहवः उरोर्वैश्यो भगवतः पद्भ्यां शूद्रो व्यजायत ३९
भूर्लोकः कल्पितः पद्भ्यां भुवर्लोकोऽस्य नाभितः हृदा स्वर्लोक उरसा महर्लोको महात्मनः ४० ग्रीवायां ज
नलोकश्च तपोलोकः स्तनद्वयात् मूर्धभिः सत्यलोकस्तु ब्रह्मलोकः सनातनः ४१

पुरोभागं अधः सप्तलोकान्। अतलादीन्। ऊर्ध्वं भूरादीन् ३६ वर्णानां तत उत्पत्तिं दर्शयति। पुरुषस्येति। ब्रह्म ब्राह्म
णः मुखमिति कार्यकारणयोरभेदविवक्षयोक्तं। बाहव इति बाहुजं क्षत्रियः ३७ इदानीमुपासनार्थं लोककल्
पनाभेदान् दर्शयन् सप्तलोकपक्षमाह द्वाभ्यां। भूर्लोकः पातालमारभ्य कटिपर्यंताभ्यां ३८ स्तनद्वयादिति
उपासनार्थत्वादूर्ध्वाधोभागवैपरीत्यं न दोषः। यद्वा स्तनतः शब्दं कुर्वन् यद्दोषद्वयं तस्मादित्यर्थः। ब्रह्मलोको वै
कुंठाख्यः सनातनः नित्यः। न तु सृज्यप्रपंचांतर्वर्तीत्यर्थः ४१

भा०द्वि० इदानीं चतुर्दशलोकपक्षं दर्शयति। तत्र जघनादिभिर्भूरादयः पूर्वोक्ता एव सप्त कट्यादिभिरधः सप्त लोकानाह। तलं
१० कट्यामिति द्वाभ्यां। शुद्धं हरिभक्तनिवासत्वात् ४२ त्रिलोकपक्षमाह। भूर्लोकः पातालादिसहितः ४३ इति
द्वितीये पंचमोध्यायः षष्ठे विराड्विभूतिश्च प्रोक्ताध्यात्मादिभेदतः दृढीकृतं च पूर्वोक्तं सर्वं पुरुषसूक्ततः
इदानीं वैराजस्य विभूतिः सप्रपंचमनुवर्ण्यते वाचामस्मदादिवागिंद्रियाणां तदधिष्ठातुर्वह्नेश्च तस्य मुखं

वाचामिति ४

तलं कट्यां वातलं ऊरुभ्यां वितलं विभोः जानुभ्यां सुतलं शुद्धं जंघाभ्यां तु तलातलं ४१ महातलं तु
गुल्फाभ्यां प्रपदाभ्यां रसातलं पातालं पादतलत इति लोकमयः पुमान् ४२ भूर्लोकः कल्पितः पद्भ्यां भु
वर्लोकोस्य नाभितः स्वर्लोकः कल्पितो मूर्ध्ना इति वा लोककल्पना ४३ इति श्रीभागवते महापुरा
णे द्वितीयस्कंधे पंचमोध्यायः ब्रह्मोवाच वाचां वह्नेर्मुखं क्षेत्रं छंदसां सप्त धातवः हव्य
कव्यामृतान्नानां जिह्वा सर्वरसस्य च १ श्रीकृष्णाय नमः राम १०

क्षेत्रं उत्पत्तिस्थानं छंदसां गायत्र्यादीनां सप्तानां तस्य सप्त धातवः त्वगादयः क्षेत्रं। हव्यं देवानामन्नं कव्यं पितॄणां
अमृतं तदुभयशेषो मनुष्याणां तेषामन्नानां। सर्वरसस्य मधुरादेः षड्विधस्य चकारादस्मदादिरसनेंद्रिय
स्य तदधिष्ठातुर्वरुणस्य च एतस्य जिह्वा क्षेत्रं उत्पत्तिस्थानं। एवं सर्वत्रानुक्रमुन्नेयं १ राम राम

सर्वासूनामस्मदादिप्राणानां तस्य नासे नासारंध्रे परमायने क्षेत्रे उत्तमक्षेत्रे मोदप्रमोदयोश्च सामान्यविशेषगंध
योर्घ्राणेंद्रियं परमायनं २ तेजसां रूपप्रकाशकानां चक्षुरिंद्रियं अक्षिणी नेत्रगोलके सर्वत्र षष्ठ्यंतानां प्रथमांतं
क्षेत्रं द्रष्टव्यं कर्णौ श्रोत्राधिष्ठाने श्रोत्रमिंद्रियं तस्य गात्रं शरीरं वस्तूनां ये सारांस्तेषां भाजनस्थानं ३ अस्य त्वक् शा ३
अस्य वायोश्चेत्यर्थः सर्वस्य मेधस्य यज्ञस्य उद्भिज्जातीनां सर्ववृक्षाणां ये वृक्षैर्यज्ञः सम्यक् संवृतः सम्यक् साधितः

सर्वासूनां च वायोश्च तन्नासे परमायने अश्विनोरौषधीनां च घ्राणो मोदप्रमोदयोः २ रूपाणां तेज
सां चक्षुर्दिवः सूर्यस्य चाक्षिणी कर्णौ दिशां च तीर्थानां श्रोत्रमाकाशशब्दयोः ३ तद्गात्रं वस्तुसारस्य
सौभगस्य च भाजनं त्वगस्य स्पर्शवायोश्च सर्वमेधस्य चैव हि ४ रोमाण्युद्भिज्जातीनां यैर्वा यज्ञ
स्तु संभृतः ४ केशश्मश्रुनखान्यस्य शिलालोहाभ्रविद्युतां बाहवो लोकपालानां प्रायशः क्षेमक
र्मणां ५ विक्रमो भूर्भुवः स्वश्च क्षेमस्य शरणस्य च सर्वकामवरस्यापि हरेश्चरण आस्पदं ६

तेषामेव वा ४ केशा मेघानां क्षेत्रं पूर्वं तथोक्तेः श्मश्रूणि विद्युतां पादकरनखानि शिलालोहानामिति साहचर्यादू
ह्यं क्षेमकर्मणां पालनकर्तॄणां बाहवः ५ विक्रमः पादन्यासः भूरादिलोकानां आस्पदं आश्रयः भूरादि शब्दानां त्रै
व्ययत्वात् क्षेमं लब्धस्य रक्षणं तत्र यादृशां सर्वेषां कामानां वरस्यापि हरेरंघ्रिरास्पदं ६ श्रीकृष्णाय नमः

वरणस्या

भा०द्वि० २१ श्रुकस्य शिश्नो धिष्ठानं उपस्थस्त्विंद्रियं प्रजात्यानंदः संतानार्थः संभोगस्तेन निर्वृतिः ताप हानिस्तस्याः ७ उप
रिमोक्ष स्यपायुरिंद्रियं गुदस्थानं निर्ऋतेरलक्ष्म्याः ८ तमसोज्ञानस्य पश्चिमः पृष्ठ भागः गोत्राणां गिरीणां अस्थि
संघातः ९ अव्यक्तं प्रधानं रसः आम्लादि सारः सिंधवः समुद्रास्ते पांनिधनस्य लयस्य उदरं पदं स्थानं विदितं ज्ञा
नित्तिः मनसः अस्मदादि लिंगशरीरस्य १० तुभ्यं तव कुमाराणां सनकादीनां भवस्य श्रीरुद्रस्य आत्मा चित्तं परम

अपां वीर्यस्य सर्गस्य पर्जन्यस्य प्रजापतेः पुंसः शिश्न उपस्थस्तु प्रजात्यानंदनिर्वृतिः ७ पायुर्यम
स्य मित्रस्य परिमोक्षस्य नारद हिंसाया निर्ऋतेर्मृत्योर्निरयस्य गुदः स्मृतः ८ पराभूतेरधर्मस्य
तमसश्चापि पश्चिमः नाड्यो नदनदीनां तु गोत्राणामस्थिसंहतिः ९ अव्यक्तरससिंधूनां भूतानां निध
नस्य च उदरं विदितं पुंसो हृदयं मनसः पदं १० धर्मस्य मम तुभ्यं च कुमाराणां भवस्य च विज्ञानस्य च 21
सत्वस्य परस्यात्मा परायणं ११ अहं भवान् भवश्चैव त इमे मुनयोग्रजाः सुरासुरनरा नागाः खगा मृगसरीसृ
पाः १२

विश्वं ततो
यनं एतावत्यमेश्वरा ज्ञातं न भिन्नं यथा कुंडलं सुवर्णान्न पृथक् स तु सर्वनियंता सर्वप्रकाशको नित्यमुक्त इत्यर्था द्वि
उक्तं एतदेव पुरुषस्य सकार्थकथने न दृढयति तत्र सहस्रशीर्षेत्यर्धर्चस्य ब्राह्मणोस्य मुखमासीत्यादेश्च सकृत्त्रय
स्यार्थः पूर्वाध्याय एव दर्शितः पुरुष एवेदं सर्वमित्यस्यार्थं दर्शयति अहमिति सार्द्धैस्त्रिभिः ते अग्रजा इमे सनकास्य मरी
दि२

भूतानीति सामानाधिकरण्यमधिष्ठानाधिष्ठेयाभेदविवक्षया यादृशस्ये कुत्र नं सामान्यान्निप्रायेणेतिव्याख्यातं भवति १७
जलं च स्थलं च न भश्चोकांसि येषां ते नभोकइति संधिरार्षः १४ सर्वं पुरुष एवेदं न ततः पृथगित्यर्थः भूतं भव्यं भवच्च एवमप
रिच्छेद्यं वक्तुं सभूमिमित्यस्यार्थमाह तेन पुरुषेण विश्वमिति भूमिपदस्यार्थः वितस्तिमिति दशांगुलपदस्य अधीत्यतिश
स्व भूस्येवं वितस्तिमधिकं व्याप्य तिष्ठति आधिक्यमात्रं विवक्षितं न प्रमाणं अनुपयोगादपरिच्छिन्नत्वात् १५ एतत्स दृष्टां
तमाह असौ प्राणः आदित्यः असौ वा आदित्यः प्राण इति श्रुतेः स्वधिष्ण्यं मंडलं प्रकाशयन् बहिश्च प्रकाशयति एवं विरा
डदेहं प्रकाशयन् ब्रह्मांडमंतर्बहिश्च प्रकाशयति नित्यमुक्तत्वं दर्शयितुं उतामृतत्वस्येत्यस्यार्थमाह स इति अन्नयस्ये

गंधर्वाप्सरसो यक्षा रक्षोभूतगणोरगाः पशवः पितरः सिद्धा विद्याधाश्चारणा द्रुमाः १३ अन्ये च विविधा जी
वा जलस्थलनभौकसः ग्रहर्क्षकेतवस्तारास्तडितस्तनयित्नवः १४ सर्वं पुरुष एवेदं भूतं भव्यं भवच्च यत्
तेनेदमावृतं विश्वं वितस्तिमधितिष्ठति १५ स्वधिष्ण्यं प्रतपन्प्राणो बहिश्च प्रतपत्यसौ एवं विराजं प्रतपंस्त
पत्यंतर्बहिः पुमान् १६ सोमृतस्याभयस्येशो मर्त्यमन्नं यदत्यगात् १६ महिमैष ततो ब्रह्मन्पुरुषस्य दुरत्ययः
पादेषु सर्वभूतानि पुंसः स्थितिपदो विदुः १७

तिमंत्रसंगतामृतपदव्याख्या अन्ने नेति पदं विभक्तिव्यत्ययेन व्याचष्टे मर्त्यमरणधर्मात्मकं अन्नं कर्मफलं यस्मादत्यगात् अतिक्रांतवान्
अतो न केवलं सर्वात्मकः किंतु अमृतत्वस्य निजानंदस्यापीश्वरस्य इत्यर्थः १६ प्रपंचात्मकस्य कुतो नित्यत्व मुक्तमित्या
शंक्य तत्परिहाराय एतावानस्येत्यस्यार्थमाह महिमेति प्रपंचात्मकस्यापि त्रिमतेरालमित्येष महिमा दुरत्ययः अपारः प्रपं
चानभिभूतत्वादिति भावः मंत्रेण च एतावानस्य महिमा विभूतिः स तु ज्यायान्महत्तर इति वदता यमेवार्थ उक्तः तदेवं ईश्वरो नित्यमुक्त
इत्युक्तं तदाश्रितानां भूतानां बंधमोक्षौ व्यवस्थापयति दर्शयन्पादोस्य विश्वा भूतानीत्यस्यार्थमाह पादेष्विति तिष्ठंत्येवेति स्थितयो
भूरादिलोकाः तेपादाइव पादाः अंशा यस्य सः स्थितिपादस्य पादेषु अंशाद्भूतेषु लोकेषु सर्वाणि जीवा इति विदुः मंत्रे तु पादोस्य विश्वा

भूतेषु फलवैचित्र्यं दर्शयन् त्रिपादस्यामृतं दिवीत्यस्यार्थमाह अस्येश्वरसंबंधित्रिपाद्भूतं नित्यसुखं दिवि ऊर्ध्वलो
केषु न तु त्रिलोक्यामित्यर्थः तदेव त्रिपाच्छब्दोक्तं त्रैविध्यं दर्शयन्नाह त्रयाणां लोकानां मूर्धा महर्लोकः तस्य मूर्धानस्त
दुपरि जनादिलोकास्तेषु यथाक्रमं अमृतादिकं अधायि निहितं तत्र त्रिलोक्यां नश्वरमेव सुखं महर्लोकस्य क्रममुक्तिस्था
नत्वेपि कल्पांते तत्रस्थानां स्थानत्यागान्नाविनाशि सुखं जनलोके तु अमृतमविनाशि सुखं यावज्जीवं तत्स्थानान्नापरि
त्यागात् किंतु महर्लोकवासि कल्पांते त्रिलोकदाहोष्मपीडितानां तदा तत्र गमनाद्द्रसे महर्लोकनिमज्जितपोलोके तस्यानाश

अमृतं क्षेममभयं त्रिमूर्ध्नोधायि मूर्धसु पादास्त्रयो बहिश्चासन्नप्रजानां य आश्रमाः १८
अंतस्त्रिलोक्यास्त्वपरो गृहमेधो बृहद्व्रतः सृती विचक्रमे विष्वक् साशनानशने उभे १९

वात् क्षेममेव वक्ष्यति हि त्रिलोक्यां दह्यमानायां शक्त्या संकर्षणाग्निना यांत्युष्मणा महर्लोकाज्जनं भृग्वाद २२
योर्दिता इति सत्यलोके त्वभयं मोक्षः तत्र च यासा सत्त्वः एतदेव वैचित्र्यमधिकारिभेदेनोपपादयन्निति पादूर्ध्वमित्यस्या ६
र्थमाह न प्रजायंते पुत्रादिरूपेणेत्यप्रजाः नैष्ठिकब्रह्मचारिवानप्रस्थयतयस्तेषामाश्रमाः त्रिलोक्या बहिरासन्
१८ गृहमेधस्त्वंतः यस्मात् अबृहद्व्रतः ब्रह्मचर्यव्रतरहितः अयं चाधिकारभेदः एकस्यैवावस्थाभेदेन न त्वंतर्भिन्न सं
विषय इति दर्शयितुं ततो विष्वगित्यस्यार्थमाह विविधं सु अंचतीति विष्वङ् पुरुषः क्षेत्रज्ञः सृती मार्गौ दक्षिणोत्तरौ
विचक्रमे व्याप्तवान् कथंभूते सृती साशनानशने भोगापवर्गप्राप्तिसाधनभूते १९ श्रीवासुदेवाय नमः

अत्र हेतुत्वे न पुनर्विशेषणं यद्यतः अविद्या कर्मरूपा एका विद्या च तत्साधनोपासनारूपान्या तदेवं विराडंतर्वर्तिनां
फलवैचित्र्यमुक्त्वा तत्कारणेश्वरस्य तद्वैलक्षण्यं दर्शयितुं तस्माद्विराड् जायत इत्यस्यार्थमाह यस्मादंडं जज्ञे तत्र भूतेंद्रिय
गुणात्मको विराट् व्यजज्ञे स ईश्वरः तत् विश्वं विराड् जज्ञे स ईश्वरः २० तद्विश्वं विराड्देहं द्रव्यं अंडं च अतिक्रांतवान् सू
र्य इवेति पूर्वोक्त एव दृष्टांतः नन्वेवं पुरुष एव चेत्सर्वं तर्हि यज्ञस्य तत्साधनानां च पृथक् कालाद्यभावाद्धेतोः पुरुषाराधनं न सिध्येदि

यदविद्या च विद्या च पुरुषस्तूभयात्मकः यस्मादंडं विराड् जज्ञे भूतेंद्रियगुणात्मकः २० तद्द्रव्यमत्यगा
द्विश्वं गोभिः सूर्य इवातपन् यदास्य नाभ्यान्नलिनादहमासं महात्मनः २१ नाविदं यज्ञसंभारान् पुरुषाव
यवादृते तेषु यज्ञस्य पशवः सवनस्पतयः कुशाः २२ इदं च देवयजनं कालश्चोरुगुणान्वितः वस्तून्योषध
यः स्नेहा रसलोहमृदो जलं २३

त्याशंक्य तत्परिहाराय यत्पुरुषेणाहविषेत्यादिमंत्रार्थं संगृह्य दर्शयति यदेत्यादिना अस्यैव विराडंतर्यामिणस्त
स्यैव प्रकृतत्वात् नाभौ भवं नाभ्यं तस्माद्यज्ञस्य संभारान् साधनानि नापश्यं तदा तेषु संभारेषु साध्येषु सत्सु पुरु
षावयवैः एते संभाराः संभृता इति चतुर्थेनान्वयः वनस्पतयो यूपाः २२ देवयजनं भूमिः इदं चेति च नाद्यज्ञाहं स्थाने उप
विष्टः कथयतीति गम्यते बहुगुणान्वितो वसंतादिकालः वस्तूनि पात्राणि ओषधयो व्रीह्यादयः स्नेहाः घृतादयः
रसाः मधुरादयः सौवर्णादीनि मृद्भश्च २३ यज्ञं २
लोहानि

भा० द्वि०
२३

यानु होत्रं हौत्रादिकं कर्मनामधेयानि ज्योतिष्टोमादीनि ऋगादीनामुक्तत्वात् मंत्रा इति स्वाहाकारादयः २४ देवतानाम
नुक्रमम् उद्देशः कल्पो बोधायनादि कर्मपद्धतिग्रंथः अनेनाहं यक्ष्य इति संकल्पः तंत्रमनुष्ठानप्रकारः गतयो विष्णुक्रमा
द्याः मतयो देवताध्यानानि कृतस्य भगवति समर्पणं २५ संभृताः संपादिताः संभारा येन सोहं तेनैवं अनेन य यज्ञेनैव
ज्ञेन यज्ञमयजंत इति मंत्रार्थः सूचितः २६ तेन देवा अयजंतेत्यस्यार्थस्य प्रपंचं दर्शयति तत इति द्वाभ्यां व्यक्तं इंद्रादि
रूपेण अव्यक्तं स्वतः अनेन पुरुषं जातमग्रत इत्यस्यार्थो दर्शितः २७ काले स्वस्यावसरे २८ यदधिष्ठानमित्य

२ देवतानुक्रमः कल्पः संकल्पस्तंत्रमेव च गतयो मतयश्चैव प्रायश्चित्तं समर्पणं २५ इत्यायजंपि
१ सामानि चातुर्होत्रं च सत्तम नामधेयानि मंत्राश्च दक्षिणाश्च व्रतानि च २४ पुरुषावयवैरेते संभा
राः संभृता मया इति संभृतसंभारः पुरुषावयवैरहं २६ तमेव पुरुषं यज्ञं तेनैवायजमीश्वरं ततः
स्ते भ्रातर इमे प्रजानां पतयो नव ✻ अयजन्व्यक्तमव्यक्तं पुरुषं सुसमाहिताः ततश्च मनवः काले २३
ऋषयोपरे ईजिरे ऋषयः पितरो विबुधा दैत्या मनुष्याः क्रतुभिर्विभुं २८ नारायणे भगवति तदिदं विश्वमाहितं गृही
तमायोरुगुणः सर्गादावगुणः स्वतः २९

तत्प्रश्नोत्तरार्थमुपसंहरति नारायण इति आहितं अधिष्ठितं भगवत्त्वे हेतुः यः स्वतोगुणः सर्गादौ गृहीता मय
या उरवो गुणा येन तस्मिन् २९ श्रीवासुदेवः शरणं मम

यत्परस्त्वमित्येतत्प्रश्नोत्तरं यदुक्तं स एष भगवान्सर्वेषां मम चेश्वर इति तदुपसंहरति सृजामीति पालनं तु स्वयमेव क
विष्णुरूपेण रोतीत्याह विश्वमिति पुरुषरूपेण त्रिशक्तिर्मायातां धारयतीति तथा सः ३० यच्चेदं विश्वं यदात्मकं च त्वमित्येवमादि सर्व
प्रश्नानां सामान्योत्तरं यदुक्तं वासुदेवात्परो ब्रह्मन्न चान्योर्थोस्ति तत्त्वत इति पुरुष एवेदं सर्वमिति श्रुत्या च यद्दृढीकृतं त
दुपसंहरति इतीति इति कार्यकारणात्मकं भाव्यं संज्ञं भगवतः सकाशादन्यत्पृथङ् न भवतीत्यभिहितं ३१ यदुक्तं एतावत्त्वं

सृजामि तन्नियुक्तोहं हरो हरति तद्वशः विश्वं पुरुषरूपेण परिपाति त्रिशक्तिधृक् ३० इति तेभिहितं
तात यथेदमनुपृच्छसि नान्यद्भगवतः किंचिद्भाव्यं सदसदात्मकं ३१ न भारती मेंग मृषोपलक्ष्यते न वै क्वचि
न्मे मनसो मृषा गतिः न मे हृषीकाणि पतंत्यसत्पथे यन्मे हृदौत्कंठ्यवता धृतो हरिः ३२ सोहं समाम्ना
यमयस्तपोमयः प्रजापतीनामभिवंदितः पतिः आस्थाय योगं निपुणं समाहितस्तं नाध्यगच्छं यत आ
त्मसंभवः ३३

यतो हि मे तमविज्ञाय मामीश्वरं अब्रवीः तदुपपाद्योपसंहरति न भारतीति यद्यस्मान्मे मया औत्कंठ्यमुद्रेकः
तद्युक्तेन हृदा हरिर्धृतः ध्यातः अंग हे नारद मे इंद्रियाणां वृत्तयः सत्यार्थाः न तु मत्प्रभावेनेत्यर्थः ३३ अत्र स्वानु
भावमेवान्वयव्यतिरेकाभ्यां प्रमाणयति द्वाभ्यां सोहं समाम्नायादिभिः सर्वोत्कृष्टोपि योगमाश्रित्यापि यतः आत्मनो
मम संभवो जन्म तमेव न ज्ञातवान् कुतोन्यस्य वार्ता एतच्च तृतीयस्कंधे पद्मोद्भवे वक्ष्यति ३४ श्रीवासुदेवाय नमः ५
ने

प्रतः मेवाक् ३

भा०द्वि० २४

तदा समीयुषां शरणागतानां संसारनिवर्त्तकं मंगलावहं सुखेन व्यं च तस्य चरणं नतोस्मि ततो ऽचिंत्यमहिमत्वेन ज्ञा
तवानस्मीति कैमुत्यन्यायेनाह यो हीति स्वमायाविस्तारं यः स्वयमपि पर्यगात् परिज्ञातवानिषेधे एतावानितिज्ञातवा न
नित्यर्थः अपरे कुतो जानीयुः तस्य चरणं नतोस्मीति पूर्वेण संबंधः ननु सर्वज्ञो ऽयं कथं न जानाति अंतं ना वा इति दृ
ष्टांतेनाह यथा स्वस्यांतं नभो नाप्नोति न हि स्वपुष्पादर्शनं सार्वज्ञ्यं विहंतीति भावः तथा च वक्ष्यति द्युपतय एव ते न ययु
रंतमनंततया त्वमपि यदंतरांडनिचया ननु सावरणाः इत्यादि श्रुतिश्च यो ऽस्याध्यक्षः परमे व्योमन् सो अंग वेद

नतोस्म्यहं तच्चरणं समीयुषां भवच्छिदं स्वस्त्ययनं सुमंगलं यो ह्यात्ममायाविभवं स्म पर्यगा द्यथा
नभः स्वांतमथापरे कुतः ३५ नाहं न यूयं यदृतां गतिं विदुर्न वामदेवः किमुतापरे सुराः तन्मायया मोहि
तबुद्धयस्त्विदं विनिर्मितं चात्मसमं विचक्ष्महे ३६ यस्यावतारकर्माणि गायंति ह्यस्मदादयः न यं विदंति
तत्त्वेन तस्मै भगवते नमः ३७ स एष आद्यः पुरुषः कल्पे कल्पे सृजत्यजः आत्मात्मन्यात्मनात्मानं
स यच्छति च पाति च ३८ २४

यदि वा न वेदेति ३५ एतत्प्रपंचयति नाहमिति द्वाभ्यां वामदेवो रुद्रः यस्य ऋतां गतिं परमार्थस्वरूपं किं च इदं प्रपंच
रूपं तस्य मायानिर्मितं विचक्ष्महे विद्मः तदप्यात्मसमं स्वज्ञानानुरूपमेव न तु कृत्स्नं मोहितबुद्धय इत्ययं तदज्ञाने प्र
पंचाज्ञाने च हेतुः ३६ ननु सर्वैर्वितं वर्णितो दृश्यन्ते तत्राह यस्येति अवतारकर्माणि संक्षेपतो दर्शयति ३७ स एष आ
द्यो भगवान् यः पुरुषावतारः स सृष्ट्यादि करोति आत्मा आत्मन्यीति कर्त्रा अधिकरणं साधनं कर्म च स्वयमेवेत्यर्थः
पुरुषावतारः सृष्ट्यादीनि कर्म कर्माणि करोतीति संक्षेपोक्तिः ३८ ओं नमो भगवते वासुदेवाय

पं२ त्मनात्मा नमि २

न यं विदंतीति तत्त्वेनेत्युक्तं किं तत्त्वमित्यपेक्षायामाह ज्ञानं केवलं सत्यं तत्त्वं घटाद्याकारवृत्तिज्ञानव्यवच्छेदार्थं विशेषणा
नि विशुद्धं विषयाकारशून्यं यतः प्रत्यक् सर्वांतरं अत एव सम्यक् संदेहादिरहितं अवस्थितं स्थिरं यतो निर्गुणं गुण
कार्यं हि गुणव्यतिकराच्चंचलं भवति यद्यपि वृत्तिज्ञानमपि स्वरूपज्ञानमेवेति न चांचल्यादिदोषयुक्तं तथाप्यंतःकरणवृ
त्तिदोषैस्तथा तथा भवतीति व्यवच्छिद्यते एभिरेव विशेषणैः सत्यत्वमपि समर्थितं किं च यच्छिकारवत्तदसत्यं दृष्टं न ५

विशुद्धं केवलं ज्ञानं प्रत्यक् सम्यगवस्थितं सत्यं पूर्णमनाद्यंतं निर्गुणं नित्यमद्वयं ३९
ऋषे विदंति मुनयः प्रशांतात्मेंद्रियाशयाः यदा तदेवासत्तर्कैस्तिरोधीयेत विप्लुतं ४०

चास्य जन्मादयः षड्विकाराः संतीत्याह अनाद्यंतं जन्मनाशरहितं अत एव जन्मांतरास्तित्वलक्षणो ऽपि वि
कारो नास्ति वृद्धिविपरिणामापक्षयाश्च न संति यतः पूर्णं तत्र हेतुः नित्यमद्वयं नित्यं सर्वदा द्वैतप्रतीति
समये ऽपि परमार्थतो ऽद्वयमिति ३९ अत्र विद्वदनुभवं प्रमाणयति ऋषे नारद प्रशांतात्मेंद्रियाशयाः प्रसन्नदे
हेंद्रियमनसो यदा तत्र वर्तंते तदा विदंति अन्यदा तदज्ञाने कारणमाह यदा तु तदेव प्रकाशमानमेव असतां तर्कैर्विप्लु
तं स्यात्तदा तिरोधीयेतेति ४० श्रीवासुदेवाय नमः

विराड्२

भा०द्वि० २५ अवतारान्विस्तरेणाह आद्य इत्यादि यावदध्यायसमाप्तिः परस्य भूम्नः पुरुषः प्रकृतिप्रवर्तकः यस्य सहस्रशी
र्षेत्युक्तो लीलाविग्रहः स आद्योवतारः वक्ष्यति हि भूतैर्यदा पंचभिरात्मसृष्टैः पुरं विरच्य तस्मिन्स्वांशेन वि
ष्टः पुरुषाभिधानमवाप नारायण आदिदेवः यथोक्तं विष्णोस्तु त्रीणि रूपाणि पुरुषाख्यान्यथो विदुः प्रथमं
महतः स्रष्टृ द्वितीयं त्वंडसंस्थितं तृतीयं सर्वभूतस्थं तानि ज्ञात्वा विमुच्यत इति यद्यपि सर्वेषामविशेषेणावता

आद्योवतारः पुरुषः परस्य कालः स्वभावः सदसन्मनश्च द्रव्यं विकारो गुण इंद्रियाणि विराट्
स्वराट् स्थास्नु चरिष्णु भूम्नः ४१ अहं भवो यज्ञ इमे प्रजेशा दक्षादयो ये भवदादयश्च
स्वर्लोकपालाः खगलोकपाला नृलोकपालास्तललोकपालाः ४२

रुक्तमुच्यते तथापि कालश्च स्वभावश्च सदसदिति कार्यकारणात्मिका प्रकृतिश्च एताः शक्तयः मन आदीनि कार्या २५
णि ब्रह्मादयो गुणावताराः दक्षादयो विभूतयः इति विवेकः व्यं मनः महत्तत्वं द्रव्यं महाभूतानि क्रमोत्रैव विवक्षितः न
विकारोहंकारः गुणः सत्वादिः विराट् समष्टिशरीरं स्वराट् वैराजः स्थास्नु स्थावरं चरिष्णु जंगमं च व्यष्टिशरीरं ४१
अहं ब्रह्मा भवो रुद्रः यज्ञो विष्णुः दक्षादय इमे प्रजेशाः तललोकपालाः पातालाधिपतयः ४२ श्रीवासुदेवाय नमः

~~अहं ब्रह्मा भवो रुद्रः यज्ञो विष्णुः दक्षादय इमे प्रजेशाः तललोकपालाः पातालाधिपतयः ४२~~ गंधर्वविद्याधरादीनामी
शा यक्षादीनां नाथाः रक्षोरगेति संधिरार्षः ऋषीणां च पितॄणां ये श्रेष्ठाः प्रेतादीनामधीशाः ४३ किं बहुना यत्किंचिद्भग
वद्दादितत्सर्वं परमेव तत्वमित्यन्वयः भगवदैश्वर्ययुक्तं महस्वत् तेजोयुक्तं ओजः सहसी इंद्रियमनःशक्ती तद्युक्तं ब
लं दाक्ष्यं श्रीः शोभा ह्रीः कर्म जुगुप्सा विभूतिः संपत्तिः आत्मबुद्धिः तद्युक्तं अर्णो वर्णः अद्भुतार्णं आश्चर्यवर्णमित्यर्थः रूपमेव
स्वरूपं रूपवत् अरूपं च एतत्सर्वं परं तत्वं तद्विभूतिरित्यर्थः ४४ शुद्धसत्वावतारान्क्रमाह प्राधान्यत इति असत्कथाश्र

गंधर्वविद्याधरचारणेशा ये यक्षरक्षोरगनागनाथाः ये वा ऋषीणामृषभाः पितॄणां दैत्येंद्रसिद्धेश्वरदानवें
द्राः ४३ अन्ये च ये प्रेतपिशाचभूतकूष्मांडयादोमृगपक्ष्यधीशाः यत्किंच लोके भगवन्महस्वदोजः सहस्वद्बल
वत्क्षमावत् ४४ श्रीह्रीविभूत्यात्मवदद्भुतार्णं तत्वं परं रूपवदस्वरूपं प्राधान्यतो यानृष आमनंति लीलाव
तारान्पुरुषस्य भूम्नः आपीयतां कर्णकषायशोषाननुक्रमिष्ये त इमान्सुपेशान् ४५ इतिश्रीभागवते महा
पुराणे अष्टादशसाहस्र्यां संहितायां द्वितीयस्कंधे षष्ठोध्यायः श्रीवासुदेवाय नमः

वणौर्ये कर्णयोः कषायाः मलाः तान् शोषयंतीति तथा तान् सुपेशान् सुंदरान् सकारलोप आर्षः हे ऋषे ते तुभ्यं अनुक्रमिष्ये
तदनुक्रमेण भूतं त्वयापीयतामित्यर्थः यद्वा आपीयतामिति भावे तं आपीयतां कर्णकषायशोषानित्यर्थः ४५ षा
इतिश्रीभागवते महापुराणे द्वितीयस्कंधे श्रीधरस्वामिविरचितायां टीकायां षष्ठोध्यायः

सप्तमे भगवल्लीलावतारा ब्रह्मणोदिताः नारदाय तु तत्कर्मप्रयोजनगुणैः सह १ यत्र यदा क्षितितलोद्धरणार्थं वाराहीं तनुं बिभ्रत् उद्यतो नंतस्तदा तं सुप्रसिद्धं हिरण्याक्षं दंष्ट्रया ददार १ यज्ञावतारमाह रुचेः प्रजापतेः सकाशात् भार्यायाः आकूतेः सूनुः सुयज्ञो नाम जातः स च स्वभार्यायां दक्षिणायां सुयमान् देवानजनयत् स एवेंद्रः सन् यदा यदार्तिं महरत् तदा स्वयंभुवमनुना मातामहेन हरिरित्युक्तः अनेन देवोत्पादनं लोकत्रयार्तिहरणं च तस्य कर्म दर्शितं २

ब्रह्मोवाच यत्रोद्यतः क्षितितलोद्धरणाय बिभ्रत्क्रौडीं तनुं सकलयज्ञमयीमनंतः अंतर्महार्णवमुपागतमादिदैत्यं तं दंष्ट्रयाद्रिमिव वज्रधरो ददार १ जातो रुचेरजनयत्सुयमान्सुयज्ञ आकूतिसूनुरमरानथ दक्षिणायां लोकत्रयस्य महतीमहरद्यदार्तिं स्वायंभुवेन मनुना हरिरित्यनूक्तः २ जज्ञे च कर्दमगृहे द्विज देवहूत्यां स्त्रीभिः समं नवभिरात्मगतिं स्वमात्रे ऊचे ययात्मशमलं गुणसंगपंकमस्मिन्विधूय कपिलस्य गतिं प्रपेदे ३ २६

एवं सर्वत्रावतारस्तत्कर्म च ज्ञेयं कपिलावतारमाह कर्दमप्रजापतेर्गृहे च तद्भार्यायां देवहूत्यां जज्ञे नवभिः स्त्रीभिर्भगिनीभिः सह स च स्वमात्रे आत्मगतिं ब्रह्मविद्यां उक्तवान् ययात्मगत्या आत्मनः शमलं मलिनीकरणं गुणसंगरूपं पंकं अस्मिन्नेव जन्मनि विधूय कपिलस्य गतिं मुक्तिं प्राप्तवती ३ श्री वासुदेवाय नमः

दत्तात्रेयावतारमाह मया हमेव तुभ्यं दत्त इति यद्यदाह अतः सन्नाम्ना दत्तो जातः स च भक्तेभ्यो योगैश्वर्यदानं तच्चरितं दर्शयति यस्य पादपंकजयोः परागः तेन पवित्रा देहा येषां ते उभयीं ऐहिकामुष्मिकीं च भुक्तिमुक्तिरूपां वा ४ कुमारावतारमाह मे मया आदौ यत्तपस्तप्तं तस्मात्स्वतपसः महतस्तपसो हेतोः स हरिः चतुःसनो भूत् सनत्कुमारः सनकः सनंदनः सनातन इति चत्वारः सनशब्दाः नाम्नि यस्य सः कथंभूतात्स्वतपसः सनात् अखंडितात् यद्वा स्वतपसः दानात् ममार्पणादित्यर्थः प्राणुदाने स च पूर्वकल्पस्य संप्लवे प्रलये विनष्टं उच्छिन्नं संप्रदायं आत्मतत्त्वं इह अस्मिन्कल्पे मुनिभ्यः सम्यक् जगाद उक्तवान्

अत्रेरपत्यमभिकांक्षत आह तुष्टो दत्तो मयाहमिति यद्भगवान्स दत्तः यत्पादपंकजपरागपवित्रदेहा योगर्द्धिमापुरुभयीं यदुहैहयाद्याः ४ तप्तं तपो विविधलोकसिसृक्षया मे आदौ सनात्स्वतपसः स चतुःसनोभूत् प्राक्कल्पसंप्लवविनष्टमिहात्मतत्त्वं सम्यग्जगाद मुनयो यदचक्षतात्मन् ५ धर्मस्य दक्षदुहितर्यजनिष्ट मूर्त्यां नारायणो नर इति स्वतपःप्रभावः दृष्ट्वात्मनो भगवतो नियमावलोपं देव्यस्त्वनंगपृतना घटितुं न शेकुः ६

सम्यक्त्वं दर्शयति यदुदितमात्रमेव मुनयः आत्मन् आत्मनि अचक्षत साक्षादपश्यन् ५ नरनारायणावतारमाह धर्मस्य पत्न्यां दक्षदुहितरि मूर्तिसंज्ञायां नरनारायण इति मूर्तिद्वयेन जातः कथंभूतः स्वः असाधारणस्तपः प्रभावो यस्य तदेवाह अनंगपृतनाः देव्यो प्सरसः भगवतः सकाशादात्मनः स्वप्रतिरूपाः उर्वश्याद्याः स्त्रीर्दृष्ट्वा तस्य नियमावलोपं भंगं घटितुं साधयितुं न शेकुः यद्वा आत्मनः स्वस्य नियमः तपो नाशनरूपः तस्य लोपं दृष्ट्वा भगवतस्तं घटयितुं न शेकुरिति एतच्चाख्यानं एकादशे भविष्यति ६

यत्र कामः विजयी क्रोधोपि विजेतितत्र कामोपि न प्रभवतीइति किं वक्तव्यमित्याह काममिति कृतिनः श्रीरु
द्रमुखाः रोषयुक्तया दृष्ट्या कामं दहंति रोषं स्वात्मानं दहंतमपि तेन दहंति क्रोधेनाभिद्ह्यंते इत्यर्थः ननु
सोयं रोषः यदंतरं यन्मध्यं प्रविशन्नल्लं बिभेति यद्वा यस्यांतः मनः कथंभूतं अमलं निर्मलं प्रविशन्निति
७ चरित्रेणैव कममप्यवतारं सूचयति मातुः सपत्न्या उदितानि उक्तानि वाक्यान्येव पत्रिणो बाणाः तैर्वि
कामं दहंति कृतिनो ननु रोषदृष्ट्या रोषं दहंतमुत तेन दहंत्यदह्यं सोयं यदंतरमलं निविशन्बिभेति
कामः कथं तु पुनरस्य मनः श्रयेत ७ विद्धः सपत्न्युदितपत्रिभिरंति राज्ञो बालोपि सन्नुपगतस्त
पसे वनानि तस्मा अदाद्ध्रुवगतिं गृणते प्रसन्नो दिव्याः स्तुवंति मुनयो यदुपर्यधस्तात् ८ यद्वेन
मुत्पथगतं द्विजवाक्यवज्रविप्लुष्टपौरुषभगं निरयेपतंतं त्रात्वार्थितो जगति पुत्रपदं च लेभे दुग्धा व
सूनि वसुधा सकलानि येन ९

द्धो ध्रुवः राज्ञ उत्तानपदः अंति समीपे तपसे तपस्तप्तुं ध्रुवगतिं ध्रुवपदं यत्र यां उपरि स्थिताः अधस्तात् स्थिताः दिवि २७
ज वा दिव्याः सप्तर्षयः स्तुवंति यद्वा उपरि भृग्वादयः अधस्तात् सप्तर्षय इति ८ पृथ्ववतारमाह यद्वेनमिति विप्रैर्र्थि
तः तदा वेनं त्रात्वा अन्वर्थं तत्पुत्र इति पदं नाम लेभे पुन्नाम्नो नरकाद्यस्मात्पितरं त्रायते सुतः तस्मात्पुत्र इति प्रो
क्तः स्वयमेव स्वयं भुवेति पुत्रपदस्य ख्यातिः कथंभूतं द्विजानां शापवाक्यमेव वज्रं तेन विप्लुष्टं दग्धं पौरुषं भगमैश्वर्यं यस्य
स्य तं चरित्रांतरमाह येनजगति जगदर्थं वस्तून्यन्नादिद्रव्याणि वसुधा दुग्धा ९

ऋषभावतारमाह असौ हरिर्नाभेराग्नीध्रपुत्रात्सुदेव्याः सूनुरास नाभेर्भार्यायां मेरुदेव्या एव सुदेवीत्यपि सं २१
ज्ञा जडवद्योगेन नित्यसमाधिना चर्यां यद्दृति यां तत्रापि हेतुः स्वस्थः स्वरूपे स्थितः यतः शांतेंद्रियः तत्कुतः परितो
मुक्तसंगः १० हयग्रीवावतारमाह सत्रइति अथो इत्यर्थांतरे स एव साक्षाद्भगवान्मम ब्रह्मणः सत्रे यज्ञे हय
शीर्षा आस तपनीयं सुवर्णं तद्वद्वर्णो यस्य छंदोमयः वेदमयः तद्विधेयायेमखास्तन्मयः अमृतमय इतिवा पाठः

नाभेरसावृषभ आस सुदेविसूनुर्यो वै चचार समदृग्जडयोगचर्यां यत्पारमहंस्यमृषयः पदमाम
नंति स्वस्थः प्रशांतकरणः परिमुक्तसंगः १० सत्रे ममास भगवान्हयशीर्षाथो साक्षात्स यज्ञपु
रुषस्तपनीयवर्णः छंदोमयो मखमयोखिलदेवतात्मा वाचो बभूवुरुशतीः श्वसतोस्य नस्तः ११
मत्स्यो युगांतसमये मनुनोपलब्धः क्षोणीमयो निखिलजीवनिकायकेतुः विस्रंसितानुरु
भये सलिले मुखान्मे आदाय तत्र विजहार ह वेदमार्गान् १२ श्रीकृष्णाय नमः

मखैर्यज्ञैर्यैनीयाः अखिला देवतास्तदात्मा च अस्य श्वसतः श्वासं मुंचतः नासापुटात् उशतीः उशत्यः कमनीयाः
वेदलक्षणाः वाचो बभूवुः ११ मत्स्यावतारमाह मत्स्यो नाविना वैवस्वतेन मनुना दृष्टः क्षोणीमयः पृथ्वीप्रधान
तदाश्रय इत्यर्थः अत एव निखिलजीवनिकायानां आश्रयः मे मुखाद्विस्रंसितान्गलितान्वेदस्य मार्गान्वेदानाश्रा

दृष्टवा युगांत सलिल विजहार [illegible]

कूर्मावतारमाह क्षीरोदधौ कच्छपवपुः सन् गोत्रं मंथनार्थं मंदरगिरिं पृष्ठेन दधृतवान् कदा अमृतलब्धये क्षीराब्धिमु
न्मथ्नतां सतां निद्रायाः क्षणः अवसरः उत्सवो वा यस्य सः अद्रेः परिवर्तः परिभ्रमः कषाणः कषणं संघर्षणं सः स्वप्न
दो यस्याः सा कंडूर्यस्य सः यद्वा अद्रिपरिवर्त एव कषैः कषणं तेन अणिनि अपयाती कषाण कंडूर्यस्य १३ श्रीनृसिं
हावतारमाह त्रैविष्टपाः देवाः तेषामुरुभयं हंतीति तथा स भगवान् कथंभूतं भ्रमंत्यौ भ्रुकुट्यौ दंष्ट्राश्च यस्मिन् तत्करालव
क्त्रं यस्मिन्

क्षीरोदधावमरदानवयूथपानामुन्मथ्नताममृतलब्धय आदिदेवः पृष्ठेन कच्छपवपुर्विदधार गोत्रं नि
द्राक्षणोऽद्रिपरिवर्तकषाणकंडूः १३ त्रैविष्टपोरुभयहा स नृसिंहरूपं कृत्वा भ्रमद्भ्रुकुटिदंष्ट्रकरालव
क्त्रं दैत्येंद्रमाशु गदयाभिपतंतमारादूरौ निपात्य विददार नखैः स्फुरंतं १४ अंतःसरस्युरुबलेन पदे
गृहीतो ग्राहेण यूथपतिरंबुजहस्त आर्तः आहेदमादिपुरुषाखिललोकनाथ तीर्थश्रवः श्रवणमंगल
नामधेय १५ श्रुत्वा हरिस्तमरणार्थिनमप्रमेयश्चक्रायुधः पतगराजभुजाधिरूढः चक्रेण नक्रव २८
दनं विनिपाट्य तस्माद्धस्ते प्रगृह्य भगवान् कृपयोज्जहार १६ श्रीवासुदेवाय नमः

तं दैत्येंद्रं स्फुरंतं आरात्समीपे स्वगदया उपलक्षितं अभिपतंतं नखैर्विददार १४ हरिसंज्ञावतारमाह अनंतद्
तियुगलेन गजयूथस्य पतिः तीर्थरूपं श्रवो यस्य सः तीर्थश्रवाः हे तीर्थश्रवः श्रवणे एव मंगलं नामधेयं यस्य १५ तं द्व
वनं श्रुत्वा शरणार्थिनं तं हस्ते शुंडायां प्रगृह्य किं कृत्वा नक्रस्य ग्राहस्य वदनं विनिष्पाट्य तस्माद्दनात् १६
नेरू

वामनावतारमाह अदितेः सुतानां द्वादशादित्यानां मध्ये अधियज्ञः यज्ञाधिष्ठाता विष्णुः अवरजः कनीयानपि गुणैर्ज्यायान्
ज्येष्ठः गुणानेवाह यद्यतः इमान् लोकान् विचक्रमे पादन्यासैः क्रांतवान् अथ प्रतिष्ठानानंतरमेव तत्र हेतुः बलेः क्ष्मां वा
मनेरूपेण जगृहे नन्वीश्वरः स्वयं किमिति दुर्बलवत् याचके तत्राह याञ्चां विना धर्ममार्गे वर्तमानो न चाल्यः ऐश्वर्या
न्नच्यावनीयः १७ ननु तर्हि याञ्चयापि चालनं अनुचितमेवेत्याशंक्य ततोऽधिकं स्वसालोक्यादि दास्यामीत्याशयेन

ज्यायान्गुणैरवरजोप्यदितेः सुतानां लोकान्विचक्रम इमान्यदथाधियज्ञः क्ष्मां वामनेन जगृहे
त्रिपदच्छलेन याञ्चामृते पथि चरन्प्रभुभिर्न चाल्यः १७ नार्थो बलेरयमुरुक्रमपादशौचमापः शिखा
धृतवतो विबुधाधिपत्यं यो वै प्रतिश्रुतमृते न चिकीर्षदन्यदात्मानमंग शिरसा हरयेभिमेने १८

हतवानित्याह नार्थ इति यद्विबुधाधिपत्यं इदानीं बलात् आसंप्रयेदीयमानं च अयं बलेः पुरुषार्थो न भवति कुत इ
त्यत आह आ अप इति छेदः उरुक्रमस्य पादशौचं चरणक्षालनरूपा आपः आ सर्वतो धृतवतः शिखायां मूर्ध्नि इत्य
र्थः किं च शुक्रेण वारितः शप्तोपि अंग हे नारद प्रतिश्रुतं विना अन्यं न चिकीर्षति कर्तुं नैच्छत् यः तृतीयपादपूरणा
र्थं हरये आत्मानमपि देहमपि अभिमेने अंगीकृतवान् स्वं स देहं त्रैलोक्यं श्रद्धया दत्तवतो विबुधाधिपत्यं अ
र्थो न भवतीत्यर्थः १९

९ क्षत्रं क्षयाय विधिनोपभृतं महात्मा ब्रह्मध्रुगुज्झितपथं नरकार्तिलिप्सु उद्धन्त्यसाववनिकंटकमुग्रवीर्यस्त्रिः सप्तकृत्व ग

भा॰ द्वि॰ २९ हंसावतारमाह तुभ्यमिति तुभ्यं विद्दृढेन भावेन आत्मकृष्ट्रिक्रया भक्त्या परितुष्टः सन् भक्तियोगं साधु यथा तथाउ वाच ज्ञानं चेति ज्ञानसाधकं किं तद्भागवतं नाम कथंभूतं तत्वमेव स तत्वं आत्मतत्वदीपकं विद्दृढभावेनेति विशेषणस्य फलमाह यदिति १९ ततन्मन्वंतरावतारमाह चक्रमिति स्वतेजः निजं प्रभावमेव चक्रं सुदर्शनं बिभर्ति चक्र वत्प्रतिहतं प्रभावं बिभर्तीत्यर्थः तदेवाह मनुवंशपालकः सन् त्रयाणां लोकानां पृष्ठे उपरि स्थिते सत्यलोकेपि कम नीयां स्वकीर्तिं विस्तारयन् राजसु दंडं विधत्ते २० धन्वंतर्यवतारमाह लोके अवतीर्य धन्वंतरिः सन् पुरुरुजां रोगिणां

तुभ्यं च नारद भृशं भगवान्विवृद्धभावेन साधु परितुष्ट उवाच योगं ज्ञानं च भागवतमात्मतत्वदीपं यद्वासुदेवशरणा विदुरंजसैव १९ चक्रं च दिक्ष्वविहतं दशसु स्वतेजो मन्वंतरेषु मनुवंशधरो बिभर्ति दुष्टेषु राजसु दमं व्यदधात्स्वकीर्तिं सत्ये त्रिपृष्ठ उशतीं प्रथयंश्चरित्रैः २० धन्वंतरिश्च भगवान्स्वयमेव कीर्तिर्नाम्ना नृणां पुरुरुजां रुज आशु हंति यज्ञे च भागममृतायुरवावरुन्ध आयुष्यवेदमनुशास्त्यवतीर्य लोके २१

स्वनाम्नैव रुजः रोगान् हंति स्वयमेव कीर्तिरिति कीर्त्यतिशयोक्तिः अमृतं मरणशून्यमायुर्यस्मात्सः अवसन्नं पूर्वं दैवैः प्रतिबद्धं यज्ञे भागं च अवरुंधे लेभे रुरुद्ध इति पाठेप्ययमेवार्थः आयुर्विषयं वेदं चानुशास्ति प्रवर्तयति २१ परशुरामावतारमाह जगतः क्षयाय विधिना दैवेन उपभृतं संवर्धितं भृत्यत्वे समर्पितमिति वा ब्राह्मणेद्रुह्यतीति त था अत उज्झितः पंथाः वेदमार्गो येन अत एव नरकार्तिं लिप्सतीव एवंभूतं अवनेः कंटकतुल्यं क्षत्रं असो महात्मा उरुधारपरश्वधेन २२ २९

त्रिः उरुधारपरश्वधेन २२

रामावतारमाह त्रिभिः अस्माकं ब्रह्मादीनां ... पदे सुमुखः कलया भरतादिरूपया सह कला माया त स्याः ईशः गुरोर्दशरथस्याज्ञायां तिष्ठन् सीतालक्ष्मणाभ्यां सहितो वनमाविवेश यस्मिन् विरोधं कृत्वा रावणो नाशं प्राप्तः २३ यस्मै रामाय उदधिर्मार्गं ददौ सपदि शीघ्रं हरो यथा त्रिपुरं दिधक्षुः तद्वद्रिपुरं लंकां दग्धु मिच्छोः षष्ठी चतुर्थ्यर्थे पक्षापंचमी यं दिधक्षोः रामाद्भयं प्राप्तं तेनांगे कंपो यस्येति कथं भूतः उदधिः उद्धप्राप्त

अस्मत्प्रसाद सुमुखः कलया कलेश इक्ष्वाकुवंश अवतीर्य गुरोर्निदेशे तिष्ठन्वनं सदयितानुज आविवेश यस्मिन्विरुध्य दशकंधर आर्तिमार्च्छत् २३ यस्मा अदादुदधिरूढभयांगवेपो मार्गं सपद्यरिपुरं हरवद्दिधक्षोः दूरे सुहृन्मथितरोषसुशोणदृष्ट्या तातप्यमानमकरोरगनक्रचक्रः २४

यद्भयं तेनांगेषु वेपः कंपो यस्य अत्र हेतुः दूरे वर्तमानं सुहृत् सीता तया निमित्तभूतया मथितः क्षुभि तो रोषः तेन सुशोणा अत्यरुणा दृष्टिस्तया अत्यंतं तप्यमानं मकराणां उरगाणां नक्राणां चक्रं यस्मिन् २५

रनेश्वरतया जनैरनुपलक्ष्यो मार्गो यस्य तर्हि ईश्वरत्वे किं प्रमाणं अतिमानुषकर्मान्यथानुपपत्तिरेवेत्याह आत्मनो महिमा उप
निबध्यते आश्रियन्ते येषु तानि २६

भा०द्वि० ३० किंच युद्धे रावणस्य वक्षःस्थलस्पर्शेन रुग्णाः भग्नाः ये महेंद्रवाहस्यैरावतस्य दंताः तैर्विडंबिताः स्वधवलिम्नाध
वलीकृताः तत्र दिक्षु पतितैः प्रकाशिता इत्यर्थः या एवंभूताः ककुभो दिशः ताः जुषते सेवते पालयतीति तथा तस्य
दारहर्तुः रावणस्य अहो मत्समः कोन्योस्तीति महागर्वेणारूढः प्राप्तः हासः असुभिः प्राणैः सह सद्यः शीघ्रं विने
ष्यति अपनेष्यति कैः धनुषो विस्फूर्जितैः टंकारघोषैरेव अधि तस्य अधिसैन्ये स्वपरसैन्ये उद्धरतः
उत्कर्षेण चरतः ककुब्जुषरूढहासमिति पाठे दंतैरुज्ज्वलितानां ककुभां जयेन योरूढहासः संजातो गर्वस्तं
उ
वक्षस्स्थलस्पर्शरुग्णमहेंद्रवाहदंतैर्विडंबितककुब्जुषरूढहासं सद्योसुभिः सह विनेष्यति दारह
र्तुर्विस्फूर्जितैर्धनुष उद्धरतोधिसैन्ये २५ भूतैः सुरेतरवरूथविमर्दितायाः क्लेशव्ययाय कल
यासितकृष्णकेशः जातः करिष्यति जनानुपलक्ष्यमार्गः कर्माणि चात्ममहिमोपनिबंधना
स्तंमं नेष्यतीत्यर्थः २५ कृष्णावतारः भूमेरिति द्वाभ्यां सुरेतराः असुरांशसंभूता राजानस्तेषां वरूथैः सै नि २६
न्यैर्विमर्दितायाः भारेण पीडितायाः कलया सह रामेण जातः सन् कोसौ जातः सितकृष्णौ केशौ यस्य भगवतः स एव साक्षा ३०
त् सितकृष्णकेशत्वं शोभैव न तु वयःपरिणामकृतं अविकारत्वात् यदुक्तं विष्णुपुराणे उज्जहारात्मनः केशौ सितकृष्णौ महा
मुने इति यच्च भारते स चापि केशौ हरिरुद्बभार शुक्लं केशमपरं चापि कृष्णं तौ चापि केशावाविशतां यदूनां कुले स्त्रियौ रोहिणीं देवकीं च
तयोरेको बलदेवो बभूव यो सौ श्वेतस्तस्य देवस्य केशः कृष्णो द्वितीयः केशवः संबभूव केशो यो सौ वर्णतः संबभूव कृष्ण इति २
न तत्तु केशमात्रावतारा भिप्रायं किंतु भारावतरणरूपं शक्त्या कियदेतन्मत्केशावेव कर्तारावित्ति द्योतनार्थं रामकृष्णयोर्वर्णसू
चनार्थं केशोद्धरणमिति गम्यते अन्यथा तत्रैव पूर्वापरविरोधापत्तेः कृष्णस्तु भगवान्स्वयमिति एतद्विरोधाच्च कथंभूतः प

कार्य २

एतदेव प्रपंचयति तोकेनेत्यादिना बालेन पूतनायाजीवहरणं यत्तद्विंगताज्ञानुत्यां गच्छत्या अंतरगतेन मध्यं प्राप्तेन
दिवस्पृशो अत्युच्चयो इतरथा अनीश्वरत्वेन न्न भाव्यं २७ विषतोयपीतान विषमतोयस्य पानं येषां पालान्
गोपांश्च कृपादृष्टिसुधावृष्ट्या जीवयिष्यतीति यमुनायां विहरन् क्रीडन् उरगं कालीयं उच्चाटयिष्यति तच्च हृयेतस्याद्र
दिन्या निर्विषत्वाय अतिविषवीर्येण विलोला चंचला जिह्वा यस्य २८ दिव्यमलौकिकं स्वेति लोकोक्तिः उन्नेष्यति

तोकेन जीवहरणं यदुलूकिकायास्त्रैमासिकस्य च पदा शकटोपवृत्तः यद्रिंगतांतरगतेन दिवस्पृशो
र्वा उन्मूलनं त्वितरथार्जुनयोर्न भाव्यं २७ यद्वै व्रजे व्रजपशून्विषतोयपीतान्पालांस्त्वजीवयदनु
ग्रहदृष्टिवृष्ट्या तच्छुद्धयेपि विषवीर्यविलोलजिह्वमुच्चाटयिष्यदुरगं विहरन्ह्रदिन्यां २८
तत्कर्म दिव्यमिव यन्निशि निःशयानं दावाग्निना शुचिवने परिदह्यमाने उन्नेष्यति व्रजमतोव
सितांतकालं नेत्रे पिधाप्य सबलोनधिगम्यवीर्यः २९

उद्धरिष्यति शुचिर्ग्रीष्मः तत्संबंधिनि वने शुष्क इत्यर्थः अतो दावाग्नेर्हेतोः अवसितो निश्चितो अंतकालो यस्य
तं सबलः सरामः अनधिगमं दुर्ज्ञेयं वीर्यं यस्य तत्र निशि निःशयानमिति कालीयदमनेरात्र्यां यमुनातीरे नेत्रे
पिधाप्य पिहिते कारयित्वेति कारमुंजाटव्यां ज्ञेयं अनेनेति २९ श्रीवासुदेवाय नमः

मं २

भा० टि०
२९

उपबंधं तत्साधनं शुल्बं दाम अमुष्य माता यशोदा अग्रहीत् तत्र दमुष्य न माति बंधन संमितं न भवति न पूर्यत इत्यर्थः गोपीय शोदा संवीक्ष्य दृष्ट्वा प्रतिबोधिता निजैश्वर्यं ज्ञापिता आसीदितियत् तच्च कर्म दिव्यमेवेति सर्वत्र पूर्वेणान्वयः ३० वरुणस्य पाशाद्यद्यं तस्मान्मोचयिष्यतीति मयस्तनुना ग्रोमनाम्ना दिवसे आप्तुं व्यापारग्रस्तं निशि शयानमिति च वैकुंठप्राप्तिसाधनानुष्ठाना भावो दर्शितः उपनेष्यति प्रापयिष्यति गोकुलवासि नं जनं स्मे

गृहीत यद्यदुपबंधममुष्य माता शुल्बं सुतस्य न तु तत्तदमुष्य माति यज्जृंभतोस्य वदने भुवनानि गोपी संवीक्ष्य शंकितमनाः प्रतिबोधितासीत् ३० नंदं च मोक्ष्यति भयाद्वरुणस्य पाशाद्गो
य पान्बिलेषु पिहितान्मयसूनुना च अह्न्याप्टतं निशि शयानमतिश्रमेण लोके विति
कुंठ उपनेष्यति गोकुलं स्म ३१ गोपैर्मखे प्रतिहते व्रजविप्लवाय देवेति वर्षति पशून्कृपया रि
रक्षुः धर्त्तोच्छिलींध्रमिव सप्तदिनानि सप्तवर्षो महीध्रमनघैककरे सलीलं ३२ ३१

त्यावर्ये ३१ देवे इंद्रे पशून्रिरक्षुः रक्षितुमिच्छुरित्यर्थः अनघे श्रमरहिते एकस्मिन्नेव करे सलीलं यथा भवति तथा महीध्रं गोवर्द्धनं धर्त्ता धारयिष्यति उच्छिलींध्रं उद्यतं छत्राकमिव सप्तवर्षाणि वयो यस्य ३२

निशि रात्रौ निशाकररश्मिभिर्गौर्यां धवलायां वने क्रीडन् कलानि मंजूनि पदानि यस्मिन् तच्च तत् आयतं दीर्घं मूर्छितं आलापविशेषयुक्तं गीतं तेन उद्दीपितः स्मर एव रुक् यासां तासां गोपीनां हर्त्तुः शंखचूडस्य शिरो हरिष्यति ये च प्रलंबादयस्ते सर्वे हरिणा हेतुभूतेन तदीयं निलयं अदर्शनं दर्शनायोग्यं वैकुंठं अलं यास्यंतीत्युत्तरेणान्वयः खरो धेनुकः दर्दुर इव दर्दुरो बकः इभः कुवलयापीडः कपिर्द्विविदः कुजो नरकः ये चान्ये आततचापाः समितौ संग्रामे शालंते श्लाघंते समितिशालिनः ननु प्रलंबखरकपिबल्वलरुक्मिप्रमुखाः बलभद्रेण निहताः कां

क्रीडन्वने निशि निशाकररश्मिगौर्यां रासोन्मुखः कलपदायतमूर्छितेन उद्दीपितः स्मररुजां व्रजभृद्वधूनां हर्त्तुर्हरिष्यति शिरो धनदानुजस्य ३३ ये च प्रलंबखरदर्दुरकेश्यरिष्टमल्लेभकंसयवनाः कुजपौंड्रकाद्याः अन्ये च शाल्वकपिबल्वलदंतवक्त्रसप्तोक्षशंबरविदूरथरुक्मिमुख्याः ३४ ये वा मृधे समितिशालिन आत्तचापाः कांबोजमत्स्यकुरुकेकयसृंजयाद्याः यास्यंत्यदर्शनमलं बलपार्थभीमव्याजाह्वयेन हरिणा निलयं तदीयं ३५

बोजाह्यस्य भीमार्जुनादिभिः शंबरः प्रद्युम्नेन यवनो मुचुकुंदेन ननु हरिणा तत्राह बलो भीमः पार्थ इत्याह्वयः व्याजाह्वयाः कपटनामानि यस्य तेन सप्तोक्षाण स्कतेन दमिताः कालांतरे तदीयं निलयं यास्यंतीति भावः एतच्च सर्वमपि कर्म

दृश्यमिव तद्यथा नत्वायमिति ध्वनिवसंबंधः ३४

व्यासावतारमाह अनुयुगंमीलितासंकुचिताधीर्येषां स्तोकमल्पायुर्येषां स्वनिगमो वेदराशिः बत अहो दूरे पारोयस्येतिदुर्गमइत्यवमृश्य सत्यवत्यामाविर्भूतः सन् सएवहरिः विटपशःशाखाभेदेन ३६ बुद्धावतारमाह देवद्विषांनिष्ठितानांनितरांस्थितानां तत्कृतेन पूर्भिः पुरीभिः अदृश्यरूपाभिः अलक्ष्यवेगाभिः मतेर्विमोहः योग्यतात्यागोयस्मात् मतेः प्रलोभश्च अयुक्तेः स्वीकारोयस्मात् तंपाखंडवेषंविधाय तेन औपधर्म्यं पाखंडधर्मस्ता

कालेनमीलितधियामवमृश्यनॄणां स्तोकायुषांस्वनिगमोबतदूरपारः आविर्हितस्त्वनुयुगंस हिसत्यवत्यां वेदद्रुमंविटपशोविभजिष्यतिस्म ३६ देवद्विषांनिगमवर्त्मनिनिष्ठितानां पूर्भिर्मयेनविहिताभिरदृश्यतूर्भिः लोकान्घ्नतांमतिविमोहमतिप्रलोभं वेषंविधायबहुभाष्यतऔपधर्म्यं ३७ यर्ह्यालयेष्वपिसतांनहरेःकथाःस्युः पाखंडिनोद्विजजनावृषलानृदेवाः स्वाहास्वधावषडितिस्मगिरोनयत्र शास्ताभविष्यतिकलेर्भगवान्युगांते ३८ ३२

र्भ्यंच बहुभाष्यतइत्यर्थः ३७ कल्क्यवतारमाह यर्हि यदा सताम् अप्यालयेषु गृहेषु त्रैवर्णिकाः पाखंडिनः स्युः तदा कल्किरूपेण कलेः शास्ताभविष्यति ३८ श्रीवासुदेवायनमः शूद्राश्चराजानश्च

कथंभूतंसधस्थं सहस्यसधादेशः तिष्ठतीतिस्थः तत्रस्थैर्देवैः सहवर्तमानमित्यर्थः ४०

अत्रचब्रह्मनारदसंवादात्प्राग्भाविनोवराहादयः मन्वंतरावताराउक्ताभाविनश्चधन्वंतरिपरशुरामोतदावर्त्तेतेश्रीरामादयउक्ताविनः तत्रक्वचिद्भूतादिनिर्देशः छांदसमितिद्रष्टव्यं सृष्ट्यादिकार्यभेदेन मायागुणावतारविभूतीराह सर्गइतिस्थानेस्थितौमखोविष्णुः धर्मश्चमखश्चसर्गश्चमनवश्च अमराश्च अवनीशाश्च अंतेसंहारेहरोमन्युवशाः सुराद्याः बहुशक्तिधारिणोभगवतइमाविभूतयः ३९ इदंमयासंक्षेपेणोक्तं नकोपिसमर्थइत्याह पृथिव्याःपरमाणूनपि रुद्र विस्तरेण वक्तुं

सर्गेतपोहमृषयोनवयेप्रजेशाः स्थानेथधर्ममखमन्वमरावनीशाः अंतेत्वधर्महरमन्युवशासुराद्याः मायाविभूतयइमाःपुरुशक्तिभाजः ३९ विष्णोर्नुवीर्यगणनांकतमोर्हतीह यःपार्थिवान्यपिकविर्विममेरजांसि चस्कंभयःस्वरहसास्खलतात्रिपृष्ठं यस्मात्त्रिसाम्यसदनादुरुकंपयानं ४०

योविममेगणितवान् तादृशोपि कोनुविष्णुवीर्यगणनांकर्त्तुमर्हति कथंभूतस्ययोविष्णुः त्रिपृष्ठं सत्यलोकंचस्कंभ धृतवान् किमितिचस्कंभयस्मात्त्रिविक्रमेअस्खलन्तीगतिर्यातश्चन्येनस्वरंहसास्वपादवेगेत्रिसाम्यरूपंसदनमधिष्ठानंप्रधानंतस्माद्वारभ्यउरुअधिकंकंपेनयानंयस्येतिवा अतःकारणाच्चस्कंभ अत्रिपृष्ठमितिवाछेदः सत्यलोकमभिव्याप्ययःसर्वंधृतवानित्यर्थः तथाचमंत्रः विष्णोर्नुकमिति अस्यार्थः विष्णोर्नुकंवीर्याणिप्रवोचं कःप्रवोचदित्यर्थः यःपार्थिवानिरजांस्यपिविममेसोपियोविष्णुः त्रेधाविचक्रमाणः त्रिविक्रमंकुर्वन् उत्तरलोकमस्कभायत् अवष्टब्धवान्

सौभर्युतंकशिबिदेवलपिप्पलाद्याः सारस्वतोद्धवपराशरभूरिषेणाः। येन्ये बिभीषणहनूमदुपेंद्रदत्तपार्थार्ष्टिषेणविदुरश्रुतदेववर्याः॥४५॥

भा० द्वि० ३३ विदं

एतत्प्रपंचयति पुरुषस्य यन्मायाबलं तस्यांतं न विदामि न वेद्मि दृशशतानि आननानि यस्य गुणान् गायन्पारं न समवस्यति न प्राप्नोति ४१ यदि न केपि विदंति तर्हि कथं मुच्येरन् तत्कृपयैवेत्याह ते च यदि निःकपटं आश्रितचरणाः भवंति ते दुस्तरां देवमायां अतितरंति एकाराभावाः पाविस्तवंतरंति च अथेनिवापाठः अत्यक्षमे वतेषां मायातरणमित्याह नेषामिति श्वसृगालानां भक्ष्ये देहे ४२ अंतर्ज्ञानाभावेपि माययेयमिति ज्ञानं तत्कृपया बहूनामस्तीत्याह वेदाहमिति

नांतं विदाम्यहममी मुनयोग्रजास्ते मायाबलस्य पुरुषस्य कुतोपरे ये गायन्गुणान्दशशताननआदिदेवः शेषोधुनापि समवस्यति नास्य पारं ४१ येषां स एव भगवान्दययेदनंतः सर्वात्मनाश्रितपदो यदि निर्व्यलीकं ते दुस्तरामतितरंत्यथ देवमायां नैषां ममाहमिति धीः श्वसृगालभक्ष्ये ४२ वेदाहमंग परमस्य हि योगमायां यूयं भवश्च भगवानथ दैत्यवर्यः पत्नीमनोः स च मनुश्च तदात्मजाश्च प्राचीनबर्हिर्ऋभुरंग उत ध्रुवश्च ४३ इक्ष्वाकुरैलमुचुकुंदविदेहगाधिरघ्वंबरीषसगरा गयनाहुषाद्याः मांधात्रलर्कशतधन्वनुरंतिदेवदेवव्रतो बलिरमूर्त्तरयो दिलीपः ४४ ऋभु ३३ र

भिः यूयमिति सनकानंतभ्राख्य बहुवचनांतं दैत्यवर्यः प्रह्लादः मनुः स्वायंभुवः तस्य पत्नी शतरूपा च तदात्मजाः पुत्राः प्रियव्रतादयः कन्याश्च प्राचीनबर्हिषो विसर्गलोपश्छांदसः ४३ शतधनुः अनुश्च संधिरार्षः रंतिदेवः पाठः सुगमः एकपद्ये एतैः सहितो देवव्रतः भीष्म इत्यर्थः उपेंद्रदत्तः शुकः बिभीषणादयो वर्याः मुख्या येषां ते ४५ श्रीकृष्णायनमः

॥७॥

किं बहुना सत्संगेन सर्वेपि विदंतीत्याह ते वा इति अद्भुताः विक्रमाः पादन्यासाः यस्य हरेस्तत्परायणास्तद्भक्तास्तेषां शीले शिक्षा येषां ते तथा यदि भवंति तर्हि तेपि विदंतीत्यर्थः श्रुते भगवतो रूपे धारणा मनोनियमनं येषां ते विदंतीति किमु वक्तव्यं ४६ किं तद्भगवतः स्वरूपं यस्मिन्मनो धारणां विधाय मायां तरंतीत्यपेक्षायामाह शश्वदिति द्वाभ्यां यद्वेति विदुर्मुनयः तद्भगवतः स्वरूपं किं तदुक्तलक्षणं आह अनंतं नित्यं च तत्स्वरूपं च विशोकं चेति अभयत्वसुखत्वहेतुः शश्वत्सदा च प्रशांतं अतो नित्यरूपं विशोकत्वे हेतुः अभयं कुतः यतः समं भेदशून्यं अतो भयं द्वितीयाद्वै भयं भवतीति श्रुतेः तत्कुतः यतः प्रतिबोधमात्रं ज्ञानैकरसं ननु ज्ञानस्यापि नीलपीताद्याकारेण वृक्षादिकरणभेदेन च भेदो दृश्यते न शुद्धं निर्मलं ननु द्वितीयो विषयकरणोपरागरूपो मलः इत्यत आह सदसतः परं विषयकरणसंगशून्यं द्वैतेरेव तदुपरागो न ज्ञानस्येति भावः ननु तथापि ज्ञाता सह भेदः स्यात् न आत्मतत्वं आत्मनो ज्ञातुः स्वरूपमेव तत्

ते वै विदंत्यतितरंति च देवमायां स्त्रीशूद्रहूणशबरा अपि पापजीवाः यद्यद्भुतक्रमपरायणशीलशिक्षास्तिर्यग्जना अपि किमु श्रुतधारणा ये ४६ शश्वत्प्रशांतमभयं प्रतिबोधमात्रं शुद्धं समं सदसतः परमात्मतत्वं शब्दो न यत्र पुरुकारकवान्क्रियार्थो माया परैत्यभिमुखे च विलज्जमाना ४७

न ततो भिन्नं ननु च तत्तापनिषदं पुरुषं पृच्छामीति शब्दबोध्यत्वप्रतीतेः कुतो बोध्यरूपत्वं तत्राह शब्दो न यत्रेति आरोपितनिदर्शनैव शब्दस्य व्यापारो न तद्बोध इत्यर्थः ननु च भवतु नाम निरस्तभेदज्ञानरूपत्वाद्विशोकत्वं सुखस्य तु नानाकारकसाध्यक्रियाफलत्वात्कथमजस्रसुखत्वं तस्येत्यत आह यत्र बहुकारकसाध्या क्रियार्थ उत्पाद्याप्यविकार्यसंस्कार्यरूपं चतुर्विधं क्रियाफलं च नास्ति इंद्रियैर्ज्ञानाभिव्यक्तिमात्रं क्रियते नोत्पत्त्यादि किमिति भावः ननूत्पत्त्याद्यभावेपि मायामलापकरणे न विकार्यत्वं स्यादेव श्रीहीणामिव तुषाकरणे नेत्याशंक्याह माया अभिमुखे स्थातुं विलज्जमानेव यस्मादपैति दूरतोपसरति तस्मादेवं भूते भगवति नियमितमनसां कृतार्थानां

सहांवतीति सध्र्यक् सहचरंमनः यं प्रति नियम्य यस्मिन् स्थिरीकृत्य यतयः यत्नशीलाः कर्तृभेदः तन्निरासो कर्तृत्वं तस्य
जहति साधनं जह्युः त्यजेयुः अनुपयोगात्तन्नाज्ञियंत इत्यर्थः उपयोगाभावेन साधनानादरे दृष्टांतः निपीयते स्मिन्नि
ति निपानं कूपः तस्य खनित्रं खननसाधनं यथा स्वराट् स्वयमेव पर्जन्यरूपेण विराजमान इंद्रो नाद्रियते न नह्यदिति यस्वैनै
व राजत इति स्वराट् दरिद्रः स यदा इंद्रः समृद्धः सन् कर्मकारदशायां गृहीतं निपानखनित्रं जहाति तद्वदित्यर्थः ४८ एवं

तद्वै पदं भगवतः परमस्य पुंसो ब्रह्मेति तद्विदुरजस्रसुखं विशोकं सध्र्यङ्नियम्य यतयो यमकर्तहेतिं जह्युः
स्वराडिव निपानखनित्रमिंद्रः ४८ स श्रेयसामपि विभुर्भगवान्यतोस्य भावस्वभावविहितस्य सतः प्र
सिद्धिः देहे स्वधातुविगमे नुविशीर्यमाणे व्योमेव तत्र पुरुषो न विशीर्यते जः ४९

तावद्भजतां सुखविशोकब्रह्मैव भगवतः स्वरूपं तत्प्राप्ता नां च न प्राप्यं कृत्यं वा किंचिदस्तीत्युक्तं इदानीं स एव प्राकृसर्वफलदा
ता सर्वकर्मप्रवर्तकश्चेत्याह स एव श्रेयसां फलानां विभुर्दाता तत्र हेतुः भावानां ब्राह्मणादीनां स्वभावैः शमदमादिभिः विशेषणैः
विहितस्य सतः शुद्धस्य कर्मणो यतः प्रवर्तकात्प्रसिद्धिः यद्वा भावानां महदादीनां स्वभावेन परिणामे विहितस्य सतः कार्यस्य प्र
सिद्धिः स एव स्वर्गादीनां तोद्धेत्यर्थः ननु कर्तुर्मृतस्य कथं स्वर्गादिफलं स्यात् तत्राह स्वारंभकधातूनां भूतानां विगमे वि
योगे सति अनुविशीर्यमाणेपि देहे तत्रस्थ व्योमेव यः तेन सह न विशीर्यते यतः अजः तेन सह नजातः तस्य पुरुषस्य न

श्रीधरा

श्रीधरस्वामिकृत ३४

अध्यायत्रयस्यार्थमुपसंहरति सोयं ते समासेन संक्षेपेणाभिहितः तमेवाह सदसत्कार्यकारणं हरेरन्यन्न भवति न
नु हरेस्तद्व्यतिरेकेण तद्गतप्रसंगः स्यात् न अन्यस्मात्कारणभूतो हरिः कार्याद्व्यतिरिक्त इत्यर्थः ५० अयं च विभूतीनां सं
ग्रह उद्दितः यथा वर्णितेन नृणां भक्तिर्भविष्यती त्येवं संकल्प्य संचिंत्य यथा हरिलीलाप्राधान्येन श्रीभागवतं वर्णय भवु

सोयं तेभिहितस्तात भगवान्विश्वभावनः समासेन हरेर्नान्यदन्यस्मात्सदसच्च यत् ५० इदं भागवतं नाम
यन्मे भगवतोदितं संग्रहो यं विभूतीनां त्वमेतद्विपुलीकुरु ५१ यथा हरौ भगवति नृणां भक्तिर्भविष्यति
सर्वात्मन्यखिलाधार इति संकल्प्य वर्णय ५२ मायां वर्णयतो मुष्य ईश्वरस्यानुमोदतः शृण्वतः श्रद्धया नि
त्यं माययात्मा न मुह्यति ५३ इति श्रीभागवते महापुराणे द्वितीयस्कंधे ब्रह्मनारदसंवादे सप्तमोध्यायः
राजोवाच ब्रह्मणा चोदितो ब्रह्मन् गुणाख्याने गुणस्य च यस्मै यस्मै यथा प्राह नारदो देवदर्शनः १ एत
द्वेदितुमिच्छामि तत्त्वं वेदविदां वर हरेरद्भुतवीर्यस्य कथा लोकसुमंगलाः २

भक्तिरस्य विघातेन केवलं तत्त्वमित्यर्थः ५१ ननु लीला मायाश्रया किं तद्वर्णनेनेत्यत आह मायामिति ५२ ५३
इति श्रीधरस्वामिविरचितायां टीकायां द्वितीये सप्तमोध्यायः अष्टमे देहसंबंधमाक्षिपन्नी राजीवयोः बहून्परी
क्षिदापृच्छत्पुराणार्थान् बुभुत्सितान् १ त्वमेतद्विपुलीकुर्वित्युक्तत्वात्तदेव विपुलीकरणं पृच्छति ब्रह्मणेति त्रिभिः अगुण
स्य गुणातीतस्यापि देवस्य दर्शनं यस्य सः १ २

भा०द्वि० ३५ निःसंगं मनः श्रीकृष्णे निवेश्येति स्वप्रपंचो दर्शितः ३ सोपि श्रद्धया शृण्वतो भवति नावश्यक इत्याह शृण्वत इति स्वश्रयलंबि
नाद्भगवान्स्वयमेव हृदि विशति ४ भावसरोरुहं हृदयकमलं प्रविष्टः तद्गतं सर्वं मलं धुनोति सलिलस्येति द्रव्यांतरव्यामिश्रेण
दिना कुंभस्थे जले शोधिते तदेव केवलं शुद्ध्यति न तु तडागादिगतं स च मलः कुंभस्यांतस्तिष्ठत्येव न तु सर्वथा विलीयते अतए
व किंचिच्चलनेन पुनःक्षुभ्यतीव एवं तपोदानादि प्रायश्चित्तं न सर्वथा सर्वेषां सर्वपापं धुनोति किं तु सावशेषं तच्च कस्यचि

कथयस्व महाभाग यथाहमखिलात्मनि कृष्णे निवेश्य निःसंगं मनस्त्यक्ष्ये कलेवरं ३ शृण्वतः श्रद्धया नित्यं गृण
तश्च स्वचेष्टितं कालेन नातिदीर्घेण भगवान्विशते हृदि ४ प्रविष्टः कर्णरंध्रेण स्वानां भावसरोरुहं धुनोति श
मलं कृष्णः सलिलस्य यथा शरत् ५ धौतात्मा पुरुषः कृष्णपादमूलं न मुंचति मुक्तसर्वपरिक्लेशः पांथः स्वशरणं
यथा ६ यदधातुमतो ब्रह्मन्देहारंभोस्य धातुभिः यदृच्छया हेतुना वा भवंतो जानते यथा ७

देव हृदि प्रविष्टमात्र एव श्रीकृष्णः सर्वेषां पापं धुनोति निःशेषं हरतीत्यनेन दृष्टांतेनोक्तं सलिलस्य मलं यथा शरदिति ५ त ३५
तश्च कृतार्थो भवतीत्याह धौतात्मा निःपापः मुक्ताः सर्वे रागद्वेषादयः परिक्लेशा येन पांथः प्रवासादागतः स्वशरणं गृहं यथा
न मुंचति तद्वत् ६ तदेवं श्रवणोत्सुकत्वमाविःकृत्य संदिग्धानर्थान्पृच्छति अधातुमतो धातवो भूतानि तत्संबंधशून्यस्य ब्र
स्य लौकिकस्यात्मनः धातुभिर्देहारंभ इति यत् एतत्किं यदृच्छया निमित्त हेतुना वा अस्मदादिवत्कर्मादिना भवंतो यथा वा जा
नंति अतः कथयंत्विति शेषः ७

भा०द्वि० ३६ इदानीमज्ञानाद्बहूनर्थान्पृच्छति यावानित्यादिना कल्पो महान्विकल्पो वांतरः भूतादि भाव्यो यस्मात् यस्य वाचक इति वा स
तःस्थूलदेहाभिमानिनो मनुष्यपितृदेवादेः आयुषः प्रमाणं अनुमानप्रकारः पृष्टः १२ विशेषं पृच्छति कालस्येति अनुग
तिः प्रवृत्तिः कर्मगतयः कर्मप्राप्यानि स्थानानि यादृश्यः गुणानां सत्वादीनां परिणामं देवादिरूपमिच्छतां गुणिनां जीवानां मध्ये
यस्मिन्परिणामे कर्मणां पुण्यपापानां समवायः समुदायः केन कर्मसमुदायेन कथं कृतेन कोधिकारी देवादिभावं प्राप्नो
तीत्यर्थः १४ भूरादीनां संभवः एतानि ओकांसि येषां प्राणिनां तेषां च संभवः यच्चेति सर्वत्रानुषंगः १५ वर्णानामा

यावान्कल्पो विकल्पो वा यथा कालोनुमीयते भूतभव्यभवच्छब्द आयुर्मानं च यत्सतः १२ कालस्या
नुगतिर्या तु लक्ष्यतेण्वी बृहत्यपि यावत्यः कर्मगतयो यादृशीर्द्विजसत्तम १३ यस्मिन्कर्मसमा
वायो यथा येनोपगृह्यते गुणानां गुणिनां चैव परिणाममभीप्सतां १४ भूपातालककुब्व्योमग्र
हनक्षत्रभूभृतां सरित्समुद्रद्वीपानां संभवश्चैतदोकसां १५ प्रमाणमंडकोशस्य बाह्याभ्यंतरभे
दतः महतां चानुचरितं वर्णाश्रमविनिश्चयः १६ अवतारानुचरितं यदाश्चर्यतमं हरेः युगानि युगमानं च ३६
धर्मो यश्च युगे युगे १७

श्रमाणां च निश्चयः तत्तत्स्वभावैर्निर्धारः १६ युगे युगे प्रतियुगं यो धर्मः यच्च हरेरवतारानुचरितं १७

यथ्यासावीश्वरः सोप्येतत्तुल्यदेहवान्प्रोक्तः अतस्तस्य को विशेष इत्याशयेन पृच्छति आसीदिति स्यादेहेन लोकानां संस्था
येन लोकानां संस्थानं स्वनंतरे वक्ष्यमाणं स्वरूपं यस्य तत्पद्मं यस्योदरादासीत् असावीश्वरः इयत्तायुक्तैः स्वपरिमितैरवय
वैरयं लौकिकः पुरुषः यावान्तत्संख्याकावयवयुक्तः तावान्प्रोक्तः संस्थावानवयववानित्यप्रोक्तः ८ अतः को विशेषस्तस्ये
ति अवश्यं वा विशेषो वाच्य इत्याशंक्याह अजो ब्रह्मा भूतानां बुध्युपाधीनां आत्मनियंतासन्नप्युपाधित्वात् येन वस्त्रनुग्र

८ आसीद्यदुदरात्पद्मं लोकसंस्थानलक्षणं यावानयं वै पुरुष इयत्तावयवैः पृथक् ८ तावानसाविति प्रोक्तः संस्था
वयववानिव अजः सृजति भूतानि भूतात्मा यदनुग्रहात् ९ ददृशे येन तद्रूपं नाभिपद्मसमुद्भवः स चापि य
त्पुरुषो विश्वस्थित्युद्भवाप्ययः १० मुक्त्वात्मनायां मायेशः शेते सर्वगुहाशयः पुरुषावयवैर्लोकाः सपा
लाः पूर्वकल्पिताः लोकैरमुष्यावयवाः सपालैरिति शुश्रुम ११

हृत्तातस्य रूपं ददृशे दृष्टवान् एतच्च तस्यापि दुःखुरीशस्य कूटस्थस्याखिलात्मनः सृज्यं सृजामि सृष्टोहं वीक्षयैवाभिनोदितः
इत्यादिनोक्तमनूद्यते अग्रे तु स्पष्टं भविष्यति ९ प्रश्नांतरमाह स चापीति यत्र शेते येन रूपेणावतिष्ठते विश्वस्थित्यादयो य
स्मादेव मादि प्रश्नो नांतत्वतोर्हस्युदाहर्तुमिति १० सर्वातेर्क्रियायाः संबंधः प्रश्नांतरमाह पुरुषस्यावयवैः पूर्वं कल्पिताः य
हा स्यैवयवैर्लोकान्कल्पयंति १ त्यादौ लोकैश्चामुष्यावयवा इति पातालमेतस्य हि पादमूलमित्यादौ त्वं मुखाद्भूतवतो वयमेवर्सं
देहविपर्यया त्वयोपृष्टं ११

भा० द्वि० ३७ यथा बृहद्दृष्टमपि २४ अत्र प्रमाणं सम्यग्ज्ञातं यतस्त्वं ब्रह्मनारदव्यासक्रमेण संप्रदायोऽस्तीति सामान्यन्यायेनाह प
रेचेति यद्वा त्वदन्यैः प्रायशो गतानुगतिका न व तत्त्वविद इत्याह २५ ननु तवानशनाद्द्विजकोपाच्च व्याकुलस्य कुतः श्र
वणं तत्राह नेति न परायंति नापगच्छंति न व्याकुलीभवंतीत्यर्थः अच्युतकीर्तिपीयूषं पिबतः २६ उपामंत्रितः पृष्टः सं
श्वासोपपतिश्च तस्य २७ ब्रह्मकल्पे स्मृत्युपक्रमकल्पे २८ उपक्रमे भागवताख्याने नैव प्रश्नानामुत्तरं दातुमुपक्रांतवानि
त्यर्थः पांडूनां ऋषभ श्रेष्ठः आनुपूर्व्येणेति प्रस्तावक्रमो विवक्षितः २९ इति द्वितीयेऽष्टमः राजप्रश्नोत्तरं वक्ष्य

सर्वमेतच्च भगवन्पृच्छतो मेऽनुपूर्वशः तत्त्वतोर्हस्युदाहर्तुं प्रपन्नाय महामुने २४ अत्र प्रमाणं हि भवान्प
रमेष्ठी यथात्मभूः परे चेहानुतिष्ठंति पूर्वेषां पूर्वजैः कृतं २५ न मे सवः परायंति ब्रह्मन्ननशनादमी
पिबतो च्युतपीयूषमन्यत्र कुपिताद्द्विजात् २६ सूत उवाच स उपामंत्रितो राज्ञा कथायामिति स
त्पतेः ब्रह्मरातो भृशं प्रीतो विष्णुरातेन संसदि २७ प्राह भागवतं नाम पुराणं ब्रह्मसं
मितं ब्रह्मणे भगवत्प्रोक्तं ब्रह्मकल्प उपागते २८ यद्यत्परीक्षिदृषभः पांडूनामनुपृच्छति आनुपूर्व्येण त
त्सर्वमाख्यातुमुपचक्रमे २९ इति श्रीभागवते महापुराणे द्वितीयस्कंधे परीक्षित्प्रश्नकथनं नामाष्टमो ध्यायः

स्य श्रुक उवाच आत्ममायामृते राजन्परस्यानुभवात्मनः न घटेतार्थसंबंधः स्वप्नद्रष्टुरिवांजसा १
न्नत्रैवो हरिणोदितं कथयामास नवमे शुको भागवतं पुनः १ तत्र श्यत्वा वैकुं यस्थात्मतइत्यनेन जीवस्य कथं देहसंबं
ध इति तत्रोत्तरमाह आत्मनो हरेर्मायामंतरेणानुभवरूपस्यात्मनः अर्थेन दृश्येन देहादिना संबंधः अंजसा तत्त्वतो न घटे

द

३७

सविशेषः वर्णाश्रमनिबंधनः श्रेणीनां तत्र व्यवस्थायोयजीविनां व्यवहारनियमलक्षणो धर्मः राजर्षीणां प्रजापालनाधिकारिणां कृच्छ्रेषु आपत्सु जीवतां १८ सर्वेषां तत्वानां प्रकृत्यादीनां परिसंख्यानं लक्षणं स्वरूपं हेतुतो लक्षणं तत्तत्कार्यहेतुत्वेन तल्लक्षणमित्यर्थः पुरुषाराधनस्य विधिः देवपूजाप्रकारः अष्टांगयोगस्य च विधिः १९ योगेश्वराणामैश्वर्येण अणिमादीनां अर्चिरादिगतिः लिंगशरीरस्य जीवस्य प्रलयः वेदा ऋग्वेदादयः उपवेदाः आयुर्वेदादयः धर्माः धर्मशास्त्राणि

नृणां साधारणो धर्मो सविशेषश्च यादृशः श्रेणीनां राजर्षीणां च धर्मः कृच्छ्रेषु जीवतां १८ तत्वानां परिसंख्यानं लक्षणं हेतुलक्षणं पुरुषाराधनविधिर्योगस्याध्यात्मिकस्य च १९ योगेश्वरैश्वर्यगतिर्लिंगलिंगस्य योगिनां वेदोपवेदधर्माणामितिहासपुराणयोः २० संप्लवः सर्वभूतानां विक्रमः प्रतिसंक्रमः इष्टापूर्तस्य काम्यानां त्रिवर्गस्य च यो विधिः २१ यश्चानुशायिनां सर्गः पाखंडस्य च संभवः आत्मनो बंधमोक्षौ च व्यवस्थानं स्वरूपतः २२ यथात्मतंत्रो भगवान्विक्रीडत्यात्ममायया विसृज्य वा यथा मायां मुनिस्ते साक्षिवद्विभुः २३

इतिहासपुराणयोश्च गतिः २० संप्लवः अवांतरप्रलयः यद्वा सम्यक्प्लवनं उद्भवः विक्रमः स्थितिः प्रतिसंक्रमो महाप्रलयः इष्टं वैदिकं कर्म पूर्तं स्मार्तं वापीकूपतडागादि देवतायतनानि च अन्नप्रदानमारामः पूर्तमित्यभिधीयत इति तत्र काम्यानामग्निहोत्रादीनां विधिः अविरोधप्रकारः २१ अनुशायिनां लीनोपाधीनां जीवानां आत्मनो जीवस्य व्यवस्थानं बंध

मोक्षादिक्रियासर्गप्रकरणं २२ उपायप्रकरणं २३

संसारोपि माययैवेत्याह बहुरूपः बालयुवादिरूपः देवनरादिरूपश्च आभाति गुणेषु देहादिषु २ अत एव तद्वियोगेन तन्निरासे सति मोक्षोपि घटत इत्याह यर्हि इति वा शब्द एवार्थे स्व एव महिम्नि यदा रमेत तदैवाह कालमाययोः पुरुषप्रकृत्योः परस्मिंस्तदा उभयं अहंममेति वस्त्यक्त्वा उदासीनः पूर्णस्वरूपेणावतिष्ठते तदुक्तं यया संमोहितो जीव आत्मानं त्रिगुणात्मकं परोपि मनुते नर्थं तत्कृतं चाभिपद्यते १ अनर्थोपशमं साक्षाद्भक्तियोगमधोक्षजे लोकस्याजानतो व्यासश्चक्रे सात्वतसंहि

बहुरूप इवाभाति मायया बहुरूपया रममाणो गुणेष्वस्या ममाहमिति मन्यते २ यर्हि वाव महिम्नि स्वे परस्मिन्कालमाययोः रमेत गतसंमोहस्त्यक्त्वोदास्ते तदोभयं ३ आत्मतत्वविशुध्यर्थं यदाह भगवानृतं ब्रह्मणे दर्शयन्रूपमव्यलीकव्रतादृतः ४

तामिति ३ यच्चोक्तं परमेश्वरस्यापि देहसंबंधाविशेषात्कथं तद्भक्त्या मोक्षः स्यादिति आसीद्यदुदरात्पद्ममित्यादिना तत्राह आत्मनो जीवस्य तत्वविशुद्ध्यर्थं तत्वज्ञानार्थं तद्भक्त्यैव किं तत् यत्तप आदिनार्जनं भगवद्भजनं भगवान्ब्रह्मणे आह किं कुर्वन् ऋतं सत्यं विशुद्धं रूपं दर्शयन् दर्शने हेतुः अव्यलीकेन व्रतेन तपसा आदृतः सेवितः सन् अयं भावः जीवस्याविद्यया मिथ्या देहरूपसंबंधः ईश्वरस्य तु योगमायया विशुद्धसत्त्वलीलाविग्रहाविर्भाव इति महान्विशेषः अतस्तद्भजनेन मोक्षोपपत्तिरिति ४

भा॰द्वि॰

जगवद्भजनादेव तत्त्वज्ञानमित्येतत्प्रपंचयिष्यन् ब्रह्मणोपि तत्त्वज्ञानं तत्प्रसादादेवेति दर्शयितुं इतिहासमाह सइत्या
दिना परो गुरुः भक्तिरहस्योपदेष्टा स्वधिष्ण्यं पद्मं आस्थाय अधिष्ठाय तस्य अधिष्ठानान्वेषणाय पूर्वं जले निमग्नः
पराहृत्य स्वधिष्ण्ये स्थित्वेत्यर्थः ऐक्षत तत्कथं स्रष्टव्यमित्यालोचितवान् तां दृशं प्रज्ञां अत्र सृष्टिविषये संमतां
अव्यभिचारिणीं विधिः प्रकारः ५ स चिंतयन् कदाचित् द्व्यक्षरं वचः अंभसि उपाशृणोत् उपसमीपे श्रुतवान् ते अक्ष

स आदिदेवो जगतां परो गुरुः स्वधिष्ण्यमास्थाय सिसृक्षयैक्षत ताम्नाध्यगच्छद्दृशमत्र संमतां प्रपंच
निर्माणविधिर्यया भवेत् ५ स चिंतयद्व्यक्षरमेकदांभस्युपाशृणोद्द्विर्गदितं वचो विभुः स्पर्शेषु यत्
षोडशमेकविंशं निःकिंचनानां नृप यद्धनं विदुः ६ निशम्य तद्वक्तृदिदृक्षया दिशो विलोक्य तत्रान्य
दपश्यमानः स्वधिष्ण्यमास्थाय विमृश्य तद्धितं तपस्युपादिष्ट इवादधे मनः ७

रेव दर्शयति कादयो मावसानाः स्पर्शाः तेषु षोडशं तकारः यश्चैकविंशं पकारः वचसो निर्देशार्थमाह हे नृप निःकिं ३९
चनानां त्यक्तधनानां धनं यद्विदुः येन तपोधना इति प्रसिद्धाः उक्तेर्द्विर्गतं द्विर्जगतः पतिः लोटेमध्यमपुरुषैकवचनं तस्य
धि वीप्सां सादरं विहितरूपमशृणोदित्यर्थः ६ एवं निशम्य तस्य वचसो वक्तुर्दिदृक्षया त[illegible]प्रचलितः सन् दिशो विलोक्य
पुनः स्वधिष्ण्यमास्थाय केन चित्प्रत्यक्षनियुक्त इव तज्ज्ञात्मा हितं विमृश्य तपसि मनो धृतवानित्यर्थः ७

ततश्च सः अखिलानां लोकानां तापनं तपः अतप्यत कृतवान् तपतपेत्येतस्य वचसोऽर्थे अमोघं दर्शनं यस्य
जितानिलः आत्मा मनश्च येन विजितानि उभयेंद्रियाणि ज्ञानकर्मात्मकानि येन तपतां तपश्चरतां मध्ये तपीयान्
अतिशयेन तपस्वी ८ तस्मै ब्रह्मणे स्वलोकं वैकुंठाख्यं परं श्रेष्ठं न यत्परं यतः परं उत्कृष्टमन्यन्नास्ति तमेव लोकम ७
नुवर्णयति पंचभिः व्यपेताः संक्लेशादयो यस्मात् स्वदृष्टवद्भिः यद्वा स्वस्य दृष्टं दर्शनं अस्ति येषां आत्मविद्भिरित्यर्थः ता

दिव्यं सहस्राब्दममोघदर्शनो जितानिलात्मा विजितोभयेंद्रियः अतप्यत स्माखिललोकतापनं तपस्त
पीयांस्तपतां समाहितः ८ तस्मै स्वलोकं भगवान्[illegible]भाजितः संदर्शयामास परं न यत्परं व्यपेतसंक्ले
शविमोहसाध्वसं स्वदृष्टवद्भिर्विबुधैरभिष्टुतं ९ प्रवर्त्तते यत्र रजस्तमस्तयोः सत्वं च मिश्रं न च काल
विक्रमः न यत्र माया किमुतापरे हरेरनुव्रता यत्र सुरासुरार्चिताः १० श्यामावदाताः शतपत्रलोचनाः ८
पिशंगवस्त्राः सुरुचः सुपेशसः सर्वे चतुर्बाहव उन्मिषन्मणिप्रवेकनिष्काभरणाः सुवर्चसः ११

तयोः मिश्रं सत्वं च न प्रवर्त्तते किंतु शुद्धमेव सत्वं कालविक्रमो नाशः अपरे रागलोभादयो न संतीति किमुत वक्तव्यं
अनुव्रताः पार्षदाः १० श्यामाश्च ते अवदाताश्च पद्मनेत्राः पीतांबराः सुरुचः अतिकमनीयाः सुपेशसः अतिसु
कुमाराः उन्मिषंत इव प्रभावंतो मणिप्रवेकाः मण्युत्तमाः येषु तानि निष्काणि पदकान्याभरणानि येषां ते सुवर्चसः अ

प्रवालादिवद्वर्णो येषां ते परिस्फुरंति कुंडलानि मौलयो मालाश्च संति येषां पार्षदाननुवर्ण्य पुनरपि लोकमनु
वर्णयति भ्राजिष्णुभिर्दैदीप्यमानाभिः १२ प्रमदोत्तमानां दिव्यः कांतयस्ताभिः विद्योतमाना सहविद्युद्भिर्वर्तमा
नाः सविद्युतः ताभिरभ्रावलीभिः तत्र विद्युत इव स्त्रियः अभ्रपंक्तय इव विमानानि नभ इव लोकः श्रीः संप
त्सारूपिणी मूर्तिमती मानं पूजां विभूतिभिर्नानाविलासैः १३ प्रेंखं आंदोलनं संश्रितां कुसुमाकरो वसंतः त
प्रवालवैडूर्यमृणालवर्चसः परिस्फुरत्कुंडलमौलिमालिनः भ्राजिष्णुभिर्यः परितो विराज
ते लसद्विमानावलिभिर्महात्मनां १२ विद्योतमान[illegible]प्रमदोत्तमाद्युभिः सविद्युदभ्रावलि
भिर्यथा नभः श्रीर्यत्र रूपिण्युरुगायपादयोः करोति मानं बहुधा विभूतिभिः १३ प्रेंं
खश्रिता या कुसुमाकरानुगैर्विगीयमाना प्रियकर्म गायती ददर्श तत्राखिलसात्वतां
पतिं श्रियः पतिं यज्ञपतिं जगत्पतिं १४ सुनंदनंदप्रबलार्हणादिभिः स्वपार्षदमुख्यैः परिसेवितं
विभुं भृत्यप्रसादाभिमुखं दृगासवं प्रसन्नहासारुणवारुलोचनं १५ ३९
स्यानुगाः भ्रमराः तैर्विविधैर्गीयमाना स्वयं तु प्रियस्य हरेः कर्म गायंती भवति १४ एवंभूतो लोकः तत्र त
स्मिन् भृत्यानां प्रसादे अभिमुखं दृगेव आसव इव दृष्टॄणां मे हर्षकरी यस्य तं प्रसन्नहासं मरुणलोचनं
१५

यस्यानुनं वक्षसि स्थितया च श्रिया लक्षितं अलंकृतमित्यर्थः अध्यर्हणीयं वरिष्ठं सिंहासनं च
प्रकृति
तस्त्रः पुरुषं महदहंकाररूपाः षोडश एकादशेंद्रियमहाभूताख्याः पंच तन्मात्रारूपाः याः शक्तयस्ताभि
र्वृतं १६ स्वैर्भगैः स्वाभाविकैः ऐश्वर्यादिभिः इतरत्र योगिषु अध्रुवैः आगंतुकैः साधारणैरित्यर्थः एवं स
त्यपि स्वे एव धामन् स्वस्वरूप एव रममाणं अत एव ईश्वरं तस्य दर्शनेयः आह्लादस्तेन परिप्लुतं आत्मं
किरीटिनं कुंडलिनं चतुर्भुजं पीतांबरं वक्षसि लक्षितं श्रिया अध्यर्हणीयासनमास्थितं परं वृतं
चतुःषोडशपंचशक्तिभिः १६ युक्तं भगैः स्वैरितरत्र चाध्रुवैः स्व एव धामन् रममाणमीश्वरं
तद्दर्शनाह्लादपरिप्लुतांतरो हृष्यत्तनुः प्रेमभराश्रुलोचनः १७ ननाम पादांबुजमस्य विश्व
सृक् यत्पारमहंस्येन पथाधिगम्यते तं प्रीयमाणं समुपस्थितं सदा प्रजाविसर्गे निज
निजशासनार्हणं १८
तरं अंतःकरणं यस्य हृष्यंती रोमांचिता तनुर्यस्य प्रेमभरेण अश्रूणि लोचने च यस्य १७ विश्वसृक्
ब्रह्मा पारमहंस्येन पथा ज्ञानमार्गेण तं ब्रह्माणं भगवान् बभाषे प्रजाविसर्गकार्ये निजशासनार्हणं
स्वनियोगार्हं प्रजाविसर्गे समुपस्थितमिति वान्वयः ईषत्स्मितेन रोचिर्दीप्तिर्यस्यास्तया गिरा
बभाष ईषत्स्मितरोचिषा गिरा प्रियं प्रियः प्रीतमनाः करं स्पृशन् १८

सिसृक्षया हेतुना चिरं संभृतेन तपसा अहं सम्यक् तोषितः दुस्तोषस्तोषयितुमशक्यः १९ मा इति मां श्रेयसां फलानां परिश्रमः साधनप्रयासः मम दर्शनमवधिर्यस्य स तथा अतोधिकं तु पुनः श्रमफलं नास्तीत्यर्थः २० एतच्च मत्कृपयैव त्वया प्राप्तमित्याह मनीषितं इच्छा तु न्यूनमिदं दातव्यमिति या मम इच्छा तस्या अनुभावो यो हं तमाह मम लोकस्यावलोकनं यत् न चेदं ममैव तपोबलेन प्राप्तमिति स्यात् तं च्येतामन्यस्व तत्राह त्ते नैरपि म

श्रीभगवानुवाच त्वयाहं तोषितः सम्यक् वेदगर्भ सिसृक्षया चिरं भृतेन तपसा दुस्तोषः कूटयोगिनां १९ वरं वरय भद्रं ते वरेशं माभिकांक्षितं ब्रह्मन् श्रेयःपरिश्रामः पुंसो मद्दर्शनावधिः २० मनीषितानुभावोयं मम लोकावलोकनं यदुपश्रुत्य रहसि चकर्थ परमं तपः २१ प्रत्यादिष्टं मया तत्र त्वयि कर्मविमोहिते तपो मे हृदयं साक्षादात्माहं तपसोनघ २२ ४०

त्वं तत्वादित्याह रहसि तप तपेति यद्वचः उपश्रुत्य परमं तपश्चकर्थ कृतवानसि २१ तदपि त्वां प्रति मयैवादिष्टं कदा तत्र तदा सृष्ट्यारंभे त्वयि कर्मणि कार्येर्थे अतिमोहिते सति किं च तपो नाम ममैव शक्तिरित्याह तपो मे हृदयं अंतरंगा शक्तिः आत्मा स्वरूपं यस्य ज्ञानमयं तप इति श्रुतेः २२

सृजामि संहरामि बिभर्मि पालयामि वीर्यं शक्तिः २३ अध्यक्षः अधिष्ठाता गुहायां बुद्धाववस्थितः यद्यपि वेद तथापीत्यक्षरेणान्वयः २४ नाथमानस्य याचमानस्य उपतप्यमानस्येति वा हे नाथ नाथय आशंसय प्रयच्छय नाथितं याचितं नाथृ नाधृ याञ्चोपतापैश्वर्याशीःषु नाथितमेवाह परं सूक्ष्मं अवरं स्थूलं च ते रूपं यथा जानीयां २५ यथा त्वं क्रीडयसि तथा तद्विषयां मनीषां मयि धेहीत्यक्षरेणान्वयः नानाशक्त्युपबृंहितं विश्वं विलुंपन् संहरन् विधं सृजन् बिभ्रत् पालयन् आत्मना स्वयमेव आत्मानं ब्रह्मादिरूपं गृह्णन् २६ क्रीडसि ऊर्णुनाभिरिवा

सृजामि तपसैवेदं ग्रसामि तपसा पुनः बिभर्मि तपसा विश्वं वीर्यं मे दुश्चरं तपः २३ ब्रह्मोवाच भगवन् सर्वभूतानामध्यक्षोवस्थितो गुहां वेद ह्यप्रतिरुद्धेन प्रज्ञानेन चिकीर्षितं २४ तथापि नाथमानस्य नाथ नाथय नाथितं परावरे यथा रूपे जानीयां ते त्वरूपिणः २५ यथात्ममायायोगेन नानाशक्त्युपबृंहितं विलुंपन् विसृजन् गृह्णन् बिभ्रदात्मानमात्मना २६ क्रीडस्यमोघसंकल्प ऊर्णनाभिर्यथोर्णुते तथा तद्विषयां धेहि मनीषां मयि माधव २७ भगवच्छिक्षितमहं करवाणि ह्यतंद्रितः नेहमानः प्रजासर्गं बध्येयं यदनुग्रहात् २८

त्मानमाच्छादयति २७ तत्किं सृष्टेरुद्विग्न एव तत्वज्ञानं प्रार्थयसे नेत्याह भगवन् भगवता त्वया शिक्षितं अनुशिष्टं अतंद्रितः अनलसः सन् करिष्यामि तर्हि किमनेन तत्वज्ञानेनाह यस्मादेवं भूतात्तवानुग्रहात् प्रजासर्गमीहमानः

कन्नापि अहंकारादिर्हि नतवध्यामि २४ [margin note, uncertain reading]

भा०द्वि०
४१

अवश्यं च मदो भविता स तु कंचित्कालं मा भूदिति प्रार्थयते यावदिति भो ईश तेन त्वया लौकिकस्य सख्युः यः सखेवाहं कृतः करस्पर्शादिना ममत्वेन संमानितः सन् प्रजासर्गरूपे तव परिकर्मणि सेवायां स्थितो विक्लवोऽव्याकुल एव यावज्जनं विभजामि उत्तममध्यमादिभेदेन सृजामि तावत्त्वत्संमाननाद्धेतोः समुन्नद्धः स्वतंत्र इति मानिनो मे स मुन्नद्धः उत्कटो मदो मा भूत् यद्वा मदो मास समुन्नद्धस्ततं उद्रिक्तो न भवेदित्यर्थः २९ ज्ञानं शास्त्रो

यावत्सखा सख्युरिवेश ते कृतः प्रजाविसर्गे विभजामि भो जनं अविक्लवस्ते परिकर्मणि स्थितो मा मे समुन्नद्धमदोऽजमानिनः २९ श्रीभगवानुवाच ज्ञानं परमगुह्यं मे यद्विज्ञानसमन्वितं सरहस्यं तदंगं च गृहाण गदितं मया ३० यावानहं यथा भावो यद्रूपगुणकर्मकः तथैव तत्त्वविज्ञानमस्तु ते मदनुग्रहात् ३१

क्तं विज्ञानमनुभवः रहस्यं भक्तिः सुगोप्यमपि वक्ष्यामि इत्यादि निर्देशात् तस्यांगं साधनं ३० यावान् ४१
यत्स्वरूपः यथा भावः यादृक्सत्ता यानि रूपाणि गुणाः कर्माणि यस्य ३१ श्रीवासुदेवाय नमः

३ यदेतद्दृश्यं तदप्यहमस्मि

न
एतदेव सम्यगुपदिशन् यावानित्यस्यार्थं स्फुरयति अहमेवाग्रे सृष्टेः पूर्वमासं स्थितः नान्यत्किंचित् सत्स्थूलं असत्सूक्ष्मं परं तयोः कारणं प्रधानं तस्यांतर्मुखतया तदा मय्येव लीनत्वात् अहं च तदा आसमेव केवलो न त्वान्यत् कर्ता पश्चात्सृष्टेरनंतरमहमेवास्मि प्रलये योऽवशिष्येत सोऽप्यहमेव अनेन च देशकालानवच्छिन्नत्वात् अद्वितीयत्वाच्च परिपूर्णोऽहमित्युक्तं भवति ३२ यथाभावो मायायोगेनेत्यनेन मायायाः अपि सृष्टत्वादस्य मायोपयोगित्वाच्च मायां निरूपयति ऋते अर्थं विना पिकास्तवमर्थं यद्यतः किमप्यनिरुक्तं आत्मन्यधिष्ठाने प्रतीयेत सदपि च न प्रतीयेत तत् आत्मनो मम मायां विद्यात् य

अहमेवासमेवाग्रे नान्यद्यत्सदसत्परं पश्चादहं यदेतच्च योऽवशिष्येत सोऽस्म्यहं ३२ ऋतेऽर्थं यत्प्रतीयेत न प्रतीयेत चात्मनि तद्विद्यादात्मनो मायां यथाभासो यथा तमः ३३ यथा महांति भूतानि भूतेषूच्चावचेष्वनु प्रविष्टान्यप्रविष्टानि तथा तेषु न तेष्वहं ३४

था आभासो द्विचंद्रादिरिति आभासश्चंद्रादेः प्रतिबिंबरूपं तमश्छाया तदुभयं चंद्रपुरुषयोर्विद्यमानयोरेव भवति नान्यदिति प्रकल्पितं यथा तद्वत् अद्वितीय आत्मा तद्व्यतिरिक्तं मायामयमिति साक्षात्कारो विज्ञानमित्यर्थः अर्थं विना प्रतीतौ दृष्टांतः यथा तम इति सत्यां प्रतीतौ ३३ यथाभासस्त्वेतत्स्पष्टयति यथा महाभूतानि भौतिकेषु अनुसृष्टेः अनंतरं प्रविष्टानि तेषूपलभ्यमानत्वात् अप्रविष्टानि च प्रागेव कारणत्वात् तेषु विद्यमानत्वात् तथा तेषु भौतिकेष्वहं न च तेष्वहं एवं भूतान्मम सत्तेत्यर्थः साधनमाह आत्मनस्तत्त्वजिज्ञासुना एतावत्तत्त्वमेव जिज्ञा दुर्जा (?)
स्यं विचार्यं

३ तमो रात्रौ यथा गृहमंडले स्थितोऽपि न दृश्यते

अन्वयः कार्येषु कारणत्वेनानुवृत्तिः कारणावस्थायां च तेभ्यो व्यतिरेकः तथा जाग्रदाद्यवस्थासु तत्साक्षितयान्वयः व्यतिरे
कश्च समाध्यादौ एवमन्वयव्यतिरेकाभ्यां यत्स्यात्सर्वत्र सर्वदा तदेवात्मेति अन्वयव्यतिरेकसाधनेनात्माजिज्ञास्य
इत्यर्थः ३५ यस्माथितं नेहमानः प्रजासर्गमिति तत्प्रसादीकरोति एतन्मतं सम्यगनुतिष्ठेत् समाधिना चित्तैकाग्र्येण क
ल्पेषु विकल्पाः विधातृसृष्टयः तेषु विमोहं कर्तृत्वाभिनिवेशं न यास्यतीति ३६ एवं संप्रदिश्य उपदिश्य जनानां परमे
ष्ठिनं परमेश्वाधिपत्ये स्थितं ब्रह्माणमात्मनः तद्रूपं न्यरुणत् अंतर्हितवान् ३७ अंतर्हितः इंद्रियार्थः प्रत्यक्षो रूपं येन तस्मै ब्र

एतावदेव जिज्ञास्यं तत्त्वजिज्ञासुनात्मनः अन्वयव्यतिरेकाभ्यां यत्स्यात्सर्वत्र सर्वदा ३५ एतन्मतं समातिष्ठ
परमेण समाधिना भवान्कल्पविकल्पेषु न विमुह्यति कर्हिचित् ३६ श्रीशुक उवाच संप्रदिश्यैव
मजनो जनानां परमेष्ठिनं पश्यतस्तस्य तद्रूपमात्मनो न्यरुणद्धरिः ३७ अंतर्हितेंद्रियार्थाय हरये विहि
तांजलिः सर्वभूतमयो विश्वं ससर्जेदं स पूर्ववत् ३८ प्रजापतिर्धर्मपतिरेकदा नियमान्यमान् भद्रं प्रजा
नामन्विच्छन्नातिष्ठत्स्वार्थकाम्यया ३९ ४२

ह्मणे विहितांजलिः सन् ३८ तदनंतरं पूर्वोक्तो ब्रह्मनारदसंवादः प्रवृत्त इत्यत आह प्रजापतिरिति पंचभिः प्रजानां भद्रमन्विच्छन्
विभूतीः स्वैरस्वार्थकाम्यस्वप्रयोजनेच्छा तया यमनियमाननन्वतिष्ठत् ३९ श्रीवासुदेवाय नमः

रिक्थ्यादीनां पुत्राणां मध्ये प्रियतमः तं पितरं सेवमानः शीलादिना परितोषयामास ४० किमिच्छन् विष्णोर्मायां दिव
दिषन् ज्ञातुमिच्छन् ४१ निशाम्य दृष्ट्वा ज्ञात्वेत्यर्थः मामां ४२ भगवता चतुःश्लोक्या संक्षेपेण प्रोक्तं विस्तारेणाह द
शलक्षणानि लक्षणीयाः अर्थाः विद्यंते यस्मिन् तत् ४३ नारदः प्राह मुनये तत्संप्रदायतो भागवतं मया ज्ञातमित्या
शयेनाह नारद इति ४४ भागवतव्याख्यानेनैव त्वत्प्रश्नानामुत्तरं दास्यामीत्याह यदुतेति पुरुषावयवैर्लोकाः सपालाः
पूर्वकल्पिताः इत्यादिना वैराजात्पुरुषादिदं विश्वं कथमासीदिति यदहं त्वया पृष्टः तद्यथावदुपाख्यास्ये शृण्विति ४५ इति द्वितीये नवमः

तं नारदः प्रियतमो रिक्थादानामनुव्रतः शुश्रूषमाणः शीलेन प्रश्रयेण दमेन च ४० मायां विविदिषन्विष्णो
र्मायेशस्य महामुनिः महाभागवतो राजन्पितरं पर्यतोषयत् ४१ तुष्टं निशाम्य पितरं लोकानां प्रपिता
महं देवर्षिः परिपप्रच्छ भवान्यन्मानुपृच्छति ४२ तस्मा इदं भागवतं पुराणं दशलक्षणं प्रोक्तं भगवता प्राह
प्रीतः पुत्राय भूतकृत् ४३ नारदः प्राह मुनये सरस्वत्यास्तटे नृप ध्यायते ब्रह्म परमं व्यासायामिततेज
से ४४ यदुताहं त्वया पृष्टो वैराजात्पुरुषादिदं यथासीत्तदुपाख्यास्ये प्रश्नानन्यांश्च कृत्स्नशः ४५

इति श्रीभागवते महापुराणे अष्टादशसाहस्र्यां संहितायां द्वितीयस्कंधे नवमोध्यायः

ततो भागवतव्याख्या द्वारेण दशमे स्फुटं राजप्रश्नोत्तरं चक्रे कुमारेण बादरायणिः १ दशलक्षणं पुराणं प्राहेत्युक्तं
तानि दशलक्षणानि दर्शयति अत्रेति मन्वंतराणीशानुकथा इति द्वंद्वः सर्गादयोत्र दशार्था लिख्यंते २

ततोभागवतव्याख्याद्वारैवदशानेस्फुटं राजप्रश्नोत्तरंचकुमारेनेबादरायणिः १ दशलक्षणंपुराणंप्राहेत्युक्तं। ता
निदशलक्षणानिदर्शयति अत्रेति मन्वंतराणि ईशानुकथाश्चेतिद्वंद्वः सर्गादयोत्र दशार्थाः लक्ष्यंते १ नन्वेवमर्थ
भेदाच्छास्त्रभेदः स्यात् तत्राह दशमस्याश्रयस्य विशुद्ध्यर्थं तत्त्वज्ञानार्थं नवानांलक्षणंस्वरूपं एकस्यैवप्राधान्यान्ना
यंदोषइत्यर्थः ननुअत्र नैवंप्रतीयते अतआह श्रुतेन श्रुत्यैवस्तुत्यादिस्थानेषु अंजसासाक्षात्वेनवर्णयंति अर्थे
नतात्पर्यवृत्त्याच तत्रहव्याख्यानेषु सर्गादीनांप्रत्येकंलक्षणमाह भूतानिआकाशादीनि मात्राणि शब्दादीनि इंद्रिया

शुकउवाच अत्रसर्गोविसर्गश्चस्थानंपोषणमूतयः मन्वंतरेशानुकथानिरोधोमुक्तिराश्रयः १
दशमस्यविशुद्ध्यर्थंनवानामिहलक्षणं वर्णयंतिमहात्मानः श्रुतेनार्थेनचांजसा २ भूतमात्रेंद्रिय
धियोजन्मसर्गउदाहृतः ब्रह्मणोगुणवैषम्याद्विसर्गःपौरुषःस्मृतः ३ स्थितिर्वैकुंठविजयःपो
षणंतदनुग्रहः मन्वंतराणिसद्धर्मऊतयःकर्मवासनाः ४

णि धीःशब्देनमहदहंकारौगुणानांवैषम्यात् परिणामात् ब्रह्मणःपरमेश्वरात् कर्तुर्भूतादीनांत्रयेक्षिराद्रूपेणस्वरूपतश्च ४३
जन्मसर्गः विसर्गमाह पुरुषोवैराजः तत्कृतः पौरुषः चराचरसर्गोविसर्गइत्यर्थः वैकुंठस्यभगवतोविजयः सृष्टानांतत्तन्मर्या
दापालनेनोत्कर्षः स्थितिः स्थानं स्वभक्तेषु तस्यानुग्रहः पोषणंतदनुगृहीतानांमन्वंतराधिपतीनांधर्मःकर्मणांवासनाः
वैस्तंतुसंतानैर्उयंतेकर्मभिःसंतन्यंतइत्यूतयः यद्वावृध्यर्थसंश्लेषार्थाद्वा अवतोधातोरिदंरूपंउयंतेकर्मभिर्वध्य
तेसंश्लिष्यंतइत्यूतयः ४

हरेरवतारानुचरितंअस्यानुवर्तिनांपुंसांचसत्कथाःईशानुकथाःप्रोक्ताइत्यर्थः ५ आत्मनोजीवस्यहरेर्योगनिद्रामनुप
पश्चात्शक्तिभिःस्वोपाधिभिःसहशयनंलयः निरोधः अन्यथारूपंविद्ययाअध्यस्तंकर्तृत्वादिहित्वास्वरूपेण
ब्रह्मतयाव्यवस्थितिर्मुक्तिः ६ आभासस्यसृष्ट्यादेःनिरोधोलयश्चयतोभवति अध्यवसीयतेप्रकाशतेचसब्रह्मे
तिपरमात्मेतिप्रसिद्धः आश्रयःकथ्यते ७ आश्रयस्वरूपंअपरोक्षानुभवेनस्पष्टंदर्शयितुं अध्यात्मादिविभा

निरोधोस्यानुशयनमात्मनःसहशक्तिभिः मुक्तिर्हित्वान्यथारूपंस्वरूपेणव्यव
स्थितिः ६ आभासश्चनिरोधश्चयतश्चाध्यवसीयते सआश्रयःपरंब्रह्मप
रमात्मेतिशब्द्यते ७ योध्यात्मिकोयंपुरुषःसोसावेवाधिदैविकः यस्त
त्रोभयविच्छेदःसोस्मृतोह्याधिभौतिकः ८

गमाह योयमध्यात्मिकःपुरुषः चक्षुरादिकरणाभिमानीद्रष्टाजीवःसएवाधिदैविकः चक्षुराद्यधिष्ठाता
सूर्यादिः तत्रैकस्मिन्नेवउभयविरूपोविच्छेदोयस्मात्सआधिभौतिकः चक्षुर्गोलकाद्युपलक्षितोदृश्योदेहः
पुरुषइतिस्यजीवोपाधिःसएवपुरुषोन्नरसमयइत्यादिश्रुतेः ८ श्रीवासुदेवायनमः
अवतारानुचरितंहरेरस्यानुवर्तिनां ॥ पुंसामीशकथाःप्रोक्ताःनानाख्यानोपबृंहिताः ॥५॥

भा० द्वि० ४४ एकमेकतराभावे इति तेषां अन्योन्यसापेक्ष्यसिद्धित्वेनात्मवत्वं दर्शयति तथाहि दृश्यं विना तत्प्रतीत्यनुमेयं करणं न सिध्यति नापि द्रष्टा न च तद्विना करणप्रवृत्त्यनुमेयस्तदधिष्ठातास्त्यादिः न च तं विना करणं प्रवर्तते न च तद्विना दृश्यमित्येवमेकतरस्याभावे एकं नोपलभामहे तत्र तदा तत्त्रितयं आलोचनात्मकेन प्रत्ययेन यो वेद साक्षितया पश्यति स परमात्मा आश्रयः तेषामपि परस्परमाश्रयत्वमस्त्येवेति तद्व्यवच्छेदार्थं विशेषणं स्वाश्रयः अनन्याश्रयः स चासावन्येषामाश्रयश्चेति तथा च लिंगवानवक्ष्यति दृश्यप्रमात्मन्च पुरत्ररंध्रे परस्परं सिध्यति
भू ति यः स्वतः खे आत्मा यदेषां परमो य आद्यः स्वयानुभूत्याखिलसिद्धिरेति एतेनैव व्यभिचारित्वान्नेषां मायामय

एकमेकतराभावे यदा नोपलभामहे त्रितयं तत्र यो वेद स आत्मा स्वाश्रयाश्रयः ९
पुरुषोऽण्डं विनिर्भिद्य यदासौ स विनिर्गतः आत्मनोऽयनमन्विच्छन्नापोऽस्राक्षीच्छुचिः शुचीः १०

त्वमप्युक्तं अतएव ये वै लोकाः सपालाः पूर्वकल्पिताः लोकैरमुष्यावयवाः सपालैरित्यनेनोक्तो विरोधः परिहृतः ४४
९ उक्तमेवाध्यात्मादिविभागं प्रपंचयन् यदुक्तं त्वया पृष्टो वैराजात्पुरुषादिदं यथासीत्तदुपाख्यास्य इति यत्प्रति
ज्ञातं तदुत्पत्तिप्रकारमाह पुरुष इत्यादिना पुरुषो वैराजोऽण्डं विनिर्भिद्य पृथक्कृत्य विनिर्गतः पृथक् स्थित इत्यर्थः
अयनं स्थानं अन्विच्छन् विमृशन् यतः शुचिः स्वयं अतः शुचीः शुद्धाः आपः गर्भोदकसंज्ञाः अस्राक्षीत् ससर्ज १०

अस्रुवासं नारायणं निरुक्त्या स्पष्टयति तेन अप्सु वासेन यद्यस्मात्पुरुषो नरः तस्मादुद्भवो यासां ताः नाराः आपो अयनमस्येति नारायण इत्यर्थः तदुक्तं आपो नारा इति प्रोक्ता आपो वै नरसूनवः अयनं तस्य ताः पूर्वं तेन नारायणः स्मृत इति ११ तस्य प्रपंचमाह द्रव्यं उपादानं कर्मादीनि निमित्तानि जीवो भोक्ता तस्य प्रपंचः यस्यानुग्रहात् संति कार्यक्षमाः भवंतीत्यर्थः १२ योग एव तल्पं शय्या तस्मात् वीर्यं गर्भरूपं जीवो

तास्ववात्सीत्स्वसृष्टासु सहस्रपरिवत्सरान् तेन नारायणं नाम यदापः पुरुषोद्भवाः ११
द्रव्यं कर्म च कालश्च स्वभावो जीव एव च यदनुग्रहतः संति न संति यदुपेक्षया १२
एको नानात्वमन्विच्छन् योगतल्पात्समुत्थितः वीर्यं हिरण्मयो देवो मायया विसृजत्त्रिधा १३ नी
अधिदैवमथाध्यात्ममधिभूतमिति प्रभुः अथैकं पुरुषं वीर्यं त्रिधाभिद्यत तच्छृणु १४
अंतः शरीर आकाशात्पुरुषस्य विचेष्टतः ओजः सहो बलं जज्ञे ततः प्राणो महानसुः १५

हिरण्मयनिमित्तानि जीवो भोक्ता तत्प्रपंचः १३ अथेत्यादिना १४ अंतःशरीरे यः य आकाशः तस्मात्क्रि
याशक्त्या तत्र विविधं चेष्टमानस्य सतः ओजः इंद्रियशक्तिः सहो मनःशक्तिः बलं देहशक्तिः ततः शक्त्यात्मका
रूपः त्सूक्ष्मादुपात्प्राणः सूक्ष्मो महान्मुख्यः असुः प्राणः सर्वेषां १५

महत्वंदर्शयति प्राणाःइंद्रियाणि यंप्राणंतंचेष्टांकुर्वतं अनुपश्चात् प्राणंतिचेष्टांकुर्वंति अपानंतं चेष्टांत्यजं
तं अनु अपानंचेष्टांत्यजंति राजानंअनुगत्याइव २६ क्षिपता चालयिनिमित्तेनक्षुत्तृडादिकं विराजीवा
त्देनोपासनार्थमुक्तं आजायतेस्मततःजक्षतःभक्षयितुमिच्छतइत्यर्थः प्राकूप्रथमंमुख्यंनिरभिद्यत वि
वक्तमभूत् २७ तालु अधिष्ठानंजिह्वाइंद्रियं नानारसोविषयः वरुणश्चदेवताज्ञातव्यंएवंसर्वत्र अधिष्ठान

अनुप्राणंतियंप्राणाःप्राणंतंसर्वजंतुषु अपानंतमपानंतिनरदेवमिवानुगाः २६ प्राणेन
क्षिपताक्षुत्तृडंतराजायतेप्रभोः पिपासतोजक्षतश्चप्राङ्मुखंनिरभिद्यत २७ मुख
तस्तालुनिर्भिन्नंजिह्वातत्रोपजायते ततोनानारसोजज्ञेजिह्वयायोधिगम्यते २८ विवक्षो
तो मुखोभूम्नोवह्निर्वाक्व्याहृतंतयोः जलेवैतस्यसुचिरंनिरोधःसमजायत२९ नासिकेनिनि
र्भिद्येतांदोधूयतिनभस्वति तत्रवायुर्गंधवाहोघ्राणोनसिजिघृक्षतः ३०

मिंद्रियंदेवताविषयइत्येतञ्चतुष्टयंमनुक्रमप्यूह्यं २८ विवक्षोःवक्तुमिच्छोःउतएववह्निदेवतावाकूइंद्रियं
व्याहृतंभाषणंतयोरितिइंद्रियदेवताधीनत्वंदर्शयति २९ नभस्वति प्राणवायौदोधूयमाने अत्यंतंप्रचल
तिसति तत्रचनासिकायांवायुर्देवता गंधंवहतीतितथा अनेनगंधोविषयोदर्शितः घ्राणंइंद्रियंजिघृक्षतः
ह क्ष

गंधंजिघृक्षतः ३० ४५

क

श निरालोकंप्रकाशशून्यंआसीदितिशेषःनिर्मक्षिमितिवदेकवद्भावःतदाआत्मानंदेहंचकारादन्यच्चवस्तुदिदृक्षतःअ
क्षिणीस्थानंज्योतिःआदित्योदेवताचक्षुरिंद्रियंतत्गुणस्यरूपस्यग्रहणंअनेनरूपंविषयोदर्शितः ३१ ऋषिभिः
बोध्यमानस्यतत्आत्मनःप्रबोधाकूर्हिजिघृक्षतःततोगुणग्रहःशब्दग्रहणं ३२ मृदुत्वंचकाठिण्यंचलघुत्वंचगु

यदात्मनिनिरालोकमात्मानंचदिदृक्षतः निर्भिन्नेह्यक्षिणीतस्यज्योतिश्चक्षुर्गुणग्रहः ३१ बोध्य
मानस्यऋषिभिरात्मनस्तज्जिघृक्षतः कर्णौचनिरभिद्येतांदिशःश्रोत्रंगुणग्रहः ३२ वस्तुनो
मृदुकाठिण्यंलघुगुर्वत्वशीततां जिघृक्षतस्त्वक्निर्भिन्नातस्यांरोममहीरुहाः ३३

रुत्वंचउष्णत्वंच अनुष्णत्वंचइषदुष्णत्वंशीततांचेत्यर्थः यद्यप्यस्पर्शत्वमपिइंद्रियविषयएवतथापितस्यजिघृ
क्षासोभीतकोपमित्यर्थकं गुर्वुष्णेतिपाठेयथादेशमूह्यंहसः वस्तुनएतान्धर्मान्जिघृक्षतःत्वक्विनिर्भिन्नात्वगिं
द्रियाधिष्ठानंचर्मजातमित्यर्थः तस्यांरोमाणिइंद्रियंमहीरुहाश्चदेवताजाताचस्तुनिहस्तेनातोलितेलघुत्वगु
रुत्वयोर्ज्ञानंतयोरपित्वगिंद्रियविषयत्वमितिपौराणिकाः ३३ श्रीवासुदेवायनमः

भा० द्वि०
५६

तत्र त्वचि अंतर्बहिश्च वातो वृतः आवृत्य स्थितः कर्तरि निष्ठा कथंभूतः लवा लब्धो गुणः स्पर्शो येन अयमर्थः त्वगिं-
द्रियमेव बहिः कंडूतिसहितं स्पर्शग्रहणं लोमशब्देनोच्यते तत्र महीरुहाणां देवत्वं अंतर्बहिश्च स्पर्शग्रहणं तु तद्देवत-
कुशब्देनोच्यते ततः वातो देवता तथा च तृतीये वक्ष्यति त्वचमस्य विनिर्भिन्नां विविशुर्धिष्ण्यमोषधीः अंशेन रो-
मभिः कंडुं यैरसौ प्रतिपद्यते निर्भिन्नान्यस्य चर्माणि लोकपालोऽनिलो विशत् प्राणेनांशेन संस्पर्शं येनासौ प्रति-

तत्वचांडमसंतर्बहिर्वायुस्त्वचालब्धगुणोवृतः हस्तौरुरुहतुस्तस्य नानाकर्मचिकीर्षया २४
तयोस्तु बलवानिंद्र आदानमुभयाश्रयं गतिं जिगीषतः पादौ रुरुहातेभिकांक्षिकौ २५
पद्भ्यां यज्ञः स्वयं हव्यं कर्मभिः क्रियते नृभिः

पद्यत इति तत्र चर्माणीति चर्मोपलक्षिता त्वगित्यर्थः प्राणेनांशेनेति प्राणवायुव्याप्तेन त्वगिंद्रियेणेत्यर्थः वद्ध- ५६
वश्यतो त्वकूरवां शेनिर्दिष्टः त्वग्भिरभिपद्यत वो लोमानि लोमत्वः ओषधिवनस्पतय इति रुरुहतुः निर्भि-
बलिमिंद्रियं इंद्रो देवता तदुभयाश्रयं आदानं कर्म अभिकामिकां अभीष्टां विहीनामित्यर्थः सद्भ्यां सह य- न्तो २५
ज्ञो विष्णुरेव स्वयं तदधिष्ठातृरूपेण स्थितः कर्मभिरिति गत्याख्या कर्मशक्तिरिंद्रियमुक्तं हव्यं क्रियत इति गतिप्रा-
प्यं यज्ञार्थं द्रव्यं विषय इत्युक्तं नृभिरिति यष्टिजीवोपाधिरयमेव गतिर्दर्शयित्वा नाधिकारित्वं यज्ञादीनां दर्शयति २९

प्रजा अपत्यं आनंदो रतिः अमृतं स्वर्गादि तदर्थिनः शिश्नो धिष्ठानं उपस्थमिंद्रियं प्रजापतिश्चासीदिति ज्ञेयं
कामानां स्त्रीणां संभोगानां संबंधि प्रियं सुखं २६ धातुमलं भुक्तान्नादीनां मलांतरत्यक्तुमिच्छोः गुदं पायुमृत्यो-
त्सर्गोधिष्ठाने इंद्रियदेवताविषया २७ पुर्यः देहास्पुरः ५ देहांतराणि आसिसृक्षोः आसर्वतो गंतुमिच्छोः निरभि-
द्यतेत्यनुषंगः अपानतः अपगच्छतः व्यक्तं मरणं नाभ्यादीन्यधिष्ठानादीनि नाभ्यां हि प्राणापानयोर्बंधनि

निरभिद्यत शिश्नो वै प्रजानंदामृतार्थिनः उपस्थ आसीत्कामानां प्रियं तदुभयाश्रयं २६ उत्सिसृ-
क्षोर्धातुमलं निरभिद्यत वै गुदं ततः पायुस्ततो मित्र उत्सर्ग उभयाश्रयः २७ आसिसृक्षोः पुरः पु-
र्याः नाभिद्वारमपानतः तत्रापानस्ततो मृत्युः पृथक्त्वमुभयाश्रयं २८ आदित्सोरन्नपानानामा-
सन्कुक्ष्यंत्रनाड्यः नद्यः समुद्राश्च तयोः तुष्टिः पुष्टिस्तदाश्रये २९

श्लेषेण मृत्युरिति प्रसिद्धं २८ अन्नपानानामादित्सोः संग्रहेच्छोः कुक्ष्यश्च अंत्राणि च नाड्यश्च स्युः तत्र कुक्षि-
रधिष्ठानं अंत्राण्यन्नसंग्रहे करणमिंद्रियस्थानीयं नाड्यस्तु पानसंग्रहे तयोर्नद्यांत्रवर्गयोः क्रमेण नद्यः
समुद्राश्च देवते तुष्टिरुदरभरणं पुष्टिस्तु रेपयामतस्थौल्यं तदाश्रये तदुभये निमित्ते तत्रान्नसंग्रहेच्छोः कुक्ष्यं-
त समुद्र तुष्टयः पयसंग्रहेच्छोः कुक्षिनाडीनदीपुष्टय इति विवेकः २९

निदिध्यासोनितरांचिंतयितुमिछा: कामोभिलाष: हृदयंमन: चंद्रसंकल्पा: अधिष्ठानादय: ३० त्वक्चर्म
निदिध्यासोनितरांचिंतयितुमिछो: कामोभिलाष: हृदयंमन: चंद्रसंकल्पा: अधिष्ठानादय: ३० त्वक्चर्म
नदेवमधिदेवादिभेदं विभज्योक्त्वा तदंशभूतानां धात्वादीनां स्वरूपमाह त्वगिति द्वाभ्यां त्वक् स्थूलं चर्म तदुपरि
स्थितं सूक्ष्मं त्वगादयोस्थ्यंता: इंद्रैक बद्धावेननिर्दिष्टा: सप्तमे धातव: ते भूम्यप्तेजोमया: ते पांचभौतिक
त्वपि वाय्वाकाशयोराहाराद्दि रूपेण संवर्द्धकत्वाभावादेवमुक्तं ३१ गुणात्मकानि गुणेषु शब्दादिष्वात्मा
येषांविषयाभिमुखस्वभावानित्यर्थ: गुणा: शब्दादय: भूतादेरहंकारत: प्रकर्षेण प्रवर्ततीतितथा अहंकारक

निदिध्यासो रात्मना यां हृदयं निरभिद्यत ततो मनस्ततश्चंद्र: संकल्प: कामएवच ३० त्वक्चर्म
मांसरुधिरमेदोमज्जास्थिधातव: भूम्यप्तेजोमया: सप्त प्राणो व्योमांबुवायुभि: ३१ गुणात्म
कानींद्रियाणि भूतादिप्रभवा गुणा: मन: सर्वविकारात्मा बुद्धिर्विज्ञानरूपिणी ३२ एतद्भगव
तो रूपं स्थूलं ते व्याहृतं मया महादिभिश्चावरणैरष्टभिर्बहिरावृतं ३३ अत: परं सूक्ष्मतम
मव्यक्तं निर्विशेषणं अनादिमध्यनिधनं नित्यं वाङ्मनस: परं ३४

त्वितशोभनस्वभावा: नतस्थूलतस्तथेत्यर्थ: तत्रहेतु: यतो मनएव सर्वेषांविकाराणां आत्मारूपं बुद्धि स्तु तथा भूता
धीविज्ञानरूपिणी नतु परमार्थग्राहिणी तिवैराग्यार्थमुक्तं ३२ अनेनैव बुद्धि मनसो: स्वरूपं वोक्तं उपसंहर
तिएतदिति प्रकृत्यासहाष्टभि: स्थूलमुक्त्वा सूक्ष्मं समष्टि ३३ लिंगशरीरमाह अत: परं अस्य कारणभूतं
सूक्ष्ममतींद्रियं यत: अव्यक्तं तत्कुत: यतो निर्विशेषं तत्कुत: अनादिमध्यनिधनं उत्पत्तिस्थितिलयेष्वभ्यं नि

यां

तं अपक्षयादिभ्यस्यामित्यर्थ: अतएव वाङ्मनश्चे निर्दिष्टं
तस्मात्परं पासनार्थं भगवत्यारोपितं ३४

४७

रूपद्वयमपि वदति अमूनीति नगरहूतिवस्तुतो नांगीकुर्वंतियतो मायास्रष्टे। ३५ यद्रूपगुणकर्मक इतियदुक्तं
भगवताब्रह्माणं प्रति तत्प्रपंचयितुं ब्रह्मादिरूपाणि तत्कर्माणि चाह सइत्यादिना इच्छे भावे नेत्यत: प्रोक्तलेनग्रंथेन
सभगवान् ब्रह्मरूपधृक् वाच्य वाचकतया बोधकतया नामानि वाच्यतया रूपाणि क्रियाश्चधत्ते सृजतीत्यर्थ: माय
यास कर्मा सव्यापार: सन्नवस्तुत स्त्वकर्मक: ३६ एतत्प्रपंचयति प्रजापतीनिति सार्द्धैस्त्रिभि: द्वितीयांता नां धत्त

अमूनी भगवद्रूपे मयाते अनुवर्णिते उभे अपि नगृह्णंति माया सृष्टे विपश्चित: ३५ सवाच्यवाच
कतया भगवान्ब्रह्मरूपधृक् नामरूपक्रियाधत्ते सकर्माकर्मक: पर: ३६ प्रजापतीन्मनून्देवान्
षीन्पितृगणान्पृथक् सिद्धचारणगंधर्वान्विद्याध्रान्सुरगुह्यकान् ३७ किन्नरानप्सरोनागान्स
र्पान्किंपुरुषोरगान् मातृरक्ष: पिशाचांश्च प्रेतभूतविनायकान् ३८ कूष्मांडोन्मादवेतालान्या
तुधानान्ग्रहानपि खगान्मृगान्पशून्वृक्षान्गिरीन्नृपसरीसृपान् ३९

इत्यनेनान्वय: तत्र प्रजापत्यादीनि नामानि तद्वाच्यादीनि रूपाणि तत्कर्माणि चज्ञेयानि पृथक्कृतत्त्वदवतारभेदे
३७ ३८ गिरीनिति अस्यानंतरं नृपेति संबोधनं ३९ ओंनमो भगवते वासुदेवाय

द्विविधाः स्थावरजंगमरूपेण चतुर्विधाः जरायुजांडजस्वेदजोद्भिज्जाख्यानि जलस्थलनभांसि ओकांसि ये
षां तानपि धत्त इति पूर्वेणान्वयः पञ्चराज्ञा पृष्टं यावत्यः कर्मगतयो यादृशीर्द्विजसत्तमेति तस्यापि प्रसंगादनेनैवो
त्तरमाह कुशलाः उत्तमाः अकुशलाः नीचाः मिश्रा इति पदांतरं मिश्राः मध्यमाः कर्मणां पुण्यापुण्यमिश्राणां गतयः
फलानि ४० सूक्ष्मादिभेदेन कर्मगतिवैचित्र्यं प्रपंचयति सत्त्वमिति सार्द्धेन सत्त्वादयस्तिस्रो गतयः सुरादयः म
ष्यादीनामुपलक्षणार्थः अन्यान्यां गुणान्यां स्वभावः गुणः उपहन्यते अनुविधीयते ४१ ब्रह्मरूपेण स्रष्टृत्वमुक्त्वा

द्विविधाश्चतुर्विधा येऽन्ये जलस्थलनभौकसः। कुशलाकुशला मिश्राः कर्मणां गतयस्त्विमाः ४०
सत्त्वं रजस्तम इति तिस्रः सुरनृनारकाः। तत्राप्येकैकशो राजन्भिद्यंते गतयस्त्रिधा ४१ स एवेदं
जगद्धाता भगवान्धर्मरूपधृक्। पुष्णाति स्थापयन्विश्वं तिर्यङ्नरसुरात्मभिः ४२ ततः कालाग्नि
रुद्रात्मा यत्सृष्टमिदमात्मनः। संनियच्छति कालेन घनानीकमिवानिलः ४३ ४८

विष्णुरूपेण पालकत्वमाह तैरिति आत्मनः सकाशाद्यदिदं सृष्टं तत्संनियच्छति संहरति ४३ कर्तृत्वाद्य
१ स एव भगवान्तिर्यगाद्यवतारैरिदं विश्वं स्थापयन् धर्मरूपेण पुष्णाति भोगैः संवर्धयति ४२ रुद्ररूपेण
२ संहर्तृत्वमाह २ पवादेन

कर्तृत्वाद्यपवादेन दशमस्य शुद्धिमाह इत्थंभावेन स्रष्टृत्वादिरूपेण तस्माद्वा एतस्मादात्मन आकाशः संभूतः सोका
मयत बहु स्यां प्रजायेयेत्यादिश्रुत्या कथितः सूरयस्तु परं केवलमेवं रूपेणैव द्रष्टुं नार्हंति ४४ ननु किं यतः यस्य विश्व
स्य जन्मादौ कर्मणि परमेश्वरस्य जन्मादौ कर्मणि परमेश्वरस्य इत्थंभावः कर्तृत्वं नास्ति श्रुत्यापि तात्पर्येण न प्रतिपाद्यते
किंतु अनुविधीयते अनुवर्त्यते किमर्थं कर्तृत्वप्रतिषेधार्थं हि यतो मायया तदारोपितं प्रकाशितं तथा च श्रुतिः निष्कलं

इत्थंभावेन कथितो भगवान्भगवत्तमः। नेत्थंभावेन हि परं द्रष्टुमर्हंति सूरयः ४४ नास्य कर्मणि ज
न्मादौ परस्यानुविधीयते। कर्तृत्वप्रतिषेधार्थं माययारोपितं हि तत् ४५ अयं तु ब्रह्मणः क
ल्पः सविकल्प उदाहृतः। विधिः साधारणो यत्र सर्गाः प्राकृतवैकृताः ४६

निष्क्रियं शांतं निरवद्यं निरंजनं इंद्रो मायाभिः पुरुरूप ईयते इत्याद्याः ४५ उक्तमर्थमुपसंहरति अयं त्विति
ब्रह्मणः संबंधी कल्पो महाकल्पः विकल्पोऽवांतरः तत्सहितः उदाहृतः उदाहरणत्वेन संक्षेपत उक्तः कथंभूतः य
त्र महाकल्पे प्राकृता महासर्गाः अवांतरकल्पे च वैकृताः स्थावरादिसर्गादिसर्गा इत्ययं विधिः प्रकारः ४६

अन्यैर्महाकल्पादिभिः साधारणः वक्ष्यमाणं विस्तारं प्रतिजानीते परिमाणं च स्थूलत्वं च सूक्ष्मत्वं चाँ कल्पस्य लक्षणं इयान्न
एवंरूप इति तद्विग्रहं अवांतरकल्पं मन्वंतरादिरूपं विभागं च यथावद्विस्तारेण पुरस्तात् तृतीयस्कंधे व्याख्यास्यामि तत्र पा
द्मं कल्पं अथो इति कालस्येन व्याख्यायमानं शृणु ४७ तदर्थं सृष्ट्यादिनिरूपणं तदेव साक्षाच्छ्रोतुकामः कथांतरं पृ
च्छति यद्वाहेति भुवः संबंधीनि तीर्थानि यद्वा भुवः संबंधीनि क्षेत्राणि चेति कौषारवेर्मैत्रेयस्य तस्य सुहृत्त्व आत्मज्ञा

परिमाणं च कालस्य कल्पलक्षणविग्रहं यथापुरस्ताद्व्याख्यास्ये पाद्मं कल्पमथो शृणु ४७
शौनकउवाच यथाह त्वं भवान्सूत क्षत्ता भागवतोत्तमः चचार तीर्थानि भुवस्त्यक्त्वा बंधून्
सुदुस्त्यजान् ४८ कुत्र कौषारवेस्तस्य संवादोऽध्यात्मसंश्रितः यद्वा स भगवांस्तस्मै पृष्टस्तत्त्व
मुवाचह ४९ ब्रूहि नस्तदिदं सौम्य विदुरस्य विचेष्टितं बंधुत्यागनिमित्तं च तथैवागतवान्पुनः ५०
सूतउवाच राज्ञा परीक्षिता पृष्टो यदवोचन्महामुनिः तद्वोऽभिधास्ये शृणुत राज्ञः प्रश्नानुसारतः ५१ ४९

नसंश्रितः संवादः ४९ कौषारवेर्मैत्रेयस्य पुनरागतवान् तत्र च निमित्तं ब्रूहि ५० राज्ञा पृष्ट इति अयमर्थः यद्यु
यं पृष्टवथ इदमेव राजापि शुकं पृष्टवान् शुकोपि विदुरमैत्रेयसंवादपुरस्कृत्य ये पूर्वं राज्ञा कृताः प्रश्नाः तदनुसा
रेण सर्वं पुराणार्थं अवोचत् तदेवाहं तेभिधास्यामि तथैव शृणुतेति ५१ इति श्रीभागवतविरचितायां भावार्थ
दीपिकायां टीकायां द्वितीयस्कंधे दशमोऽध्यायः समाप्तोयं द्वितीयः स्कंधः श्रीवासुदेवाय नमः

भा॰टी॰

१ श्रीगणेशायनमः तृतीयेतुत्रयस्त्रिंशदध्यायैः सर्गवर्णनं ईशेक्षयागुणक्षोभात्सर्गोब्रह्माण्डसंभवः तत्रतुप्रथ
मेध्यायेबंधून्हित्वागतायुषः निर्गतस्योद्धवेनादौसंवादः क्षत्तुरुच्यते अथतृतीयस्कंधव्याख्या भगवद्ब्रह्म
संप्रोक्तंसंक्षिप्तंवर्णितंपुरा प्राहभागवतंशेषप्रोक्तंविस्तरतःपुनः द्वेधाहि भागवतसंप्रदायप्रवृत्तिः एकतःसंक्षे
पतः श्रीनारायणब्रह्मनारदादिद्वारेण अन्यतस्तुविस्तारतः शेषसनत्कुमारसांख्यायनादिद्वारेण तत्रद्विती

ॐनमोभगवतेवासुदेवाय श्रीशुकउवाच एवमेवपुरापृष्टोमैत्रेयोभगवान्किल क्षत्त्राव
नंप्रविष्टेनत्यक्त्वास्वगृहमृद्धिमत् १

येश्रीनारायणब्रह्मसंवादेन संक्षेपतः चतुःश्लोक्याश्रीभागवतंनिरूपितं तदेवब्रह्मनारदसंवादेनदशलक्ष १
णतयाकिंचिद्विस्तरेणोक्तं तदेवशेषोक्तमतिविस्तरतोवक्तुंतृतीयारंभः तत्रतृतीयेप्रथमंक्षत्तुर्मैत्रेयसंगमश्चतु
र्विंशाध्यायैस्ततोवृत्तिः सविसर्गप्रस्तावेनसप्तभिर्वाराहावतारः ततएकेनविसर्गसमाहारः तत्प्रसंगेननवभिः
कपिलावतारः ततोनवभिःकपिलाख्यानमिति त्रयस्त्रिंशदध्यायैस्तृतीयस्कंधप्रवृत्तिः तत्रद्वितीयांतेपरिमा
णंचकालस्यकल्पलक्षणविग्रहं यथापुरस्ताद्व्याख्यास्येपाद्मंकल्पमथोशृण्विति प्रतिज्ञातमर्थंविस्तरेण
निरूपयितुंइतिहासंप्रस्तौति एवमितिद्वाभ्यां ऋद्धिमत्सर्वसंपद्भिःसंपूर्णं १
सविसर्गःसर्गप्रपंचः ततो

आत्मसात्कृतं २ गृहीत्वा

किंच अतिश्लाघ्यंत्यागानर्हमित्याह यद्वैप्रसिद्धंगृहंवः पांडवानांमंत्रकृत् दौत्यकर्त्तासन् अयंश्रीकृष्णः बुद्धिसन्निधा
नादयमितिनिर्देशः पौरवेंद्रोदुर्योधनस्तस्यगृहंहित्वा अनादृत्य अविवेशतत्रहेतुः आत्मीयत्वेनकृतं २ कुत्रसंगमआ
सबभूव ३ वरीयसिश्रेष्ठे अल्पस्यार्थस्योदयोयस्मात्तथाभूतोनभवति साधुवादेनसतामनुमोदनेनउपबृंहितःसंवर्द्धि
तः यद्वासाधोर्मैत्रेयस्यवादेनोत्तरेणश्लाघितइत्यर्थः ४ त्यागानर्हस्यापिगृहस्यत्यागेहेतुत्वेनकौरवापराधानाह यदेत्ये

यद्वाअयंमंत्रकृद्वोभगवानखिलेश्वरः पौरवेंद्रगृहंहित्वाप्रविवेशात्मसात्कृतं २ राजोवाच कुत्र
क्षत्तुर्भगवतामैत्रेयेणाससंगमः कदावासहसंवादएतद्वर्णयनःप्रभो ३ नह्यल्पार्थोदयस्तस्यविदुर
स्यामलात्मनः तस्मिन्वरीयसिप्रश्नःसाधुवादोपबृंहितः ४ सूतउवाच सएवमृषिवर्यो
यंपृष्टोराज्ञापरीक्षिता प्रत्याहतंसुबहुवित्प्रीतात्माश्रूयतामिति ५ श्रीशुकउवाच यदातुराजा
स्वसुतानसाधून्पुष्णन्नधर्मेणविनष्टदृष्टिः भ्रातुर्यविष्ठस्यसुतान्विबंधून्प्रवेश्यलाक्षाभवने
ददाह ६
कादशाभिः एतेषांवंशदोषसत्ता आद्यादित्येकादशोक्रियासंबंधः यविष्ठस्यकनिष्ठस्यपांडोःविबंधून्पितृहीनान् ६
कुरुदेवस्ययुधिष्ठिरस्यदेव्याःद्रौपद्याः आत्मनःस्नुषायाःस्वीयैरस्त्रैःश्मश्रुभिःस्वकुचकुंकुमानिरिपुस्त्रीणांवा

भा०त० २

अंशे २

कुरुदेवस्य युधिष्ठिरस्य देव्याः द्रौपद्याः आत्मनः स्नुषायाः स्वीयैरस्तैः अश्रुभिः स्वकुचकुंकुमानि शिरपुरस्त्रीणां वा तद्भर्तृवधे
न हरंत्याः सत्यावतंबस्य सत्याश्रयस्य वनात् प्रत्यागतस्य समयेन पूर्वकृतेन दायं याचमानस्य यत्र यदा न प्रदात् न ददौ तन्
मोमोहं जुषमाणः पुत्रं स्नेबमानः अविवेकं चाप यानि वचनानि पुंसां तीर्थादीनां अमृतायनानि अमृतस्राविणि राजा धृ
तराष्ट्रः दुर्योधनो वा उरुबद्धनमेनेक्षतोनष्टः पुण्यलेशो यस्य सः न सुखकीर्तिधर्मादिहेतुः किंतु राज्यप्राप्तिमात्र हेतुः पुण्य

यदा सभायां कुरुदेवदेव्याः केशाभिमर्शं सुतकर्म गर्ह्यं नवारयामास नृपः स्नुषायाः स्वास्रैर्हरंत्याः कुच
कुमानि ७ द्यूते त्वधर्मेण जितस्य साधोः सत्यावलंबस्य वनागतस्य न याचतोदात्समयेन दायं
तमो जुषाणो यदजातशत्रोः ८ यदा च पार्थप्रहितः सभायां जगद्गुरुर्यानि जगाद कृष्णः न तानि पुं
सा ममृतायनानि राजोरुमेने क्षतपुण्यलेशः ९ यदोपहूतो भवनं प्रविष्टो मंत्राय पृष्टः किल पूर्व
जेन अथाह तन्मंत्रदृशां वरीयान्यन्मंत्रिणो वैदुरिकं वदंति १० अजातशत्रोः प्रतियच्छ दायं तितिक्ष
तो दुर्विषहं तवागः सहानुजो यत्र वृकोदराहिः श्वसन् रुषा यत्त्वमलं बिभेषि ११ ह २

वि
लेशः स्वासीत्तस्यानष्टत्वात् अनाहतवानित्यर्थः ९ इदानीं विदुरस्यैव कृतं पराभवं दर्शयति षड्भिः यदा पूर्वजेन मंत्राय चोपहू
तो तत्र गृहं प्रविष्टो मंत्रं पृष्टः सन् अथ अनंतरं तदाह किं मंत्रिणो द्यापि यद्वैदुरिकं विदुरवाक्यमिति प्रसिद्धं वदंति १०
तदेवाह अजातशत्रोरिति त्रिभिः आगः अपराधं सहमानस्य दायं प्रतियच्छ देहि मम अपराधे अनुजैः सह वर्तमानो वृको
दर एव अहिः क्रोधेन श्वसन् वर्तते यत् यस्मात् त्वं अत्यर्थं बिभेषि ११ श्रीवासुदेवाय

तव २ अलं २

विभ्रे

मम तादृशाः पुत्राः बहवः संतीति गर्वमा कृथाद् इत्याह पार्थांस्त्वमुकुंदः आत्मीयत्वेन गृहीतवान् सर्वदेवतात्मा भगवान्नतुषा
कृतः किंच सह क्षितिदेवैः देवैः श्रेष्ठैः द्विजैर्वर्तमानः यतो सौ तत्रैव विप्रादेवाश्चेत्यर्थः स्वस्य पुर्यामेव सुखमास्ते न त्वन्यत्र
गतः किंच यदुदेवानां देवः पूज्यः यतो सौ तत्रैव यदुप्रवीरा इत्यर्थः किंच नृदेवेषु मंडलेश्वरेषु दीव्यंति प्रकाशंत इति नृ
वा देव देवा राजानः विनिर्जिता अशेषा नृदेवा येन यतो सौ तत्रैव सर्वे राजानः अतः पार्थानां दायं देहीति १२ दुर्योधनस्त्व
न्यमन्यत इति चेत् अतआह स एष मूर्तो दोष एव गृहान्प्रविष्ट आस्ते दोषत्वे हेतुः पुरुषद्विट् श्रीकृष्णद्वेष्टा कोसौ यं त्वम स्य

पार्थांस्त्वकदेवो भगवान्मुकुंदो गृहीतवान्सक्षितिदेवदेवः आस्ते स्वपुर्यां यदुदेवदेवो विनिर्जिताशेष
नृदेवदेवः १२ स एष दोषः पुरुषद्विडास्ते गृहान्प्रविष्टो यमपत्यमत्या पुष्णासि कृष्णाद्विमुखो गत
श्रीस्त्याज्याश्वशैवं कुलकौशलाय १३ इत्यूचिवांस्तत्र सुयोधनेन प्रवृद्धकोपस्फुरिताधरेण
असत्कृतः सत्स्पृहणीयशीलः क्षत्ता सकर्णानुजसौबलेन १४ क एनमत्रोपजुहाव जिह्मं दास्याः सुतं
यद्बलिनैव पुष्टः तस्मिन्प्रतीपः परकृत्य आस्ते निर्वास्यतामाशु पुरात् श्वसानः १५
पत्यमत्या पुष्णासि न त्वपत्यमस्तो न पतत्यस्मादिति ह्यपत्यं प्राकृः गताश्रीर्यस्मात्स त्वमित्याश्राक्रोशतिअतए
वं अशैवं ममंगलं आशु त्यज कथं पुत्रस्त्याज्यस्तत्राह कुलस्य कौशलाय त्यजेदेकं कुलस्यार्थे इति न्यायः २३ इत्य
चिवान् एव मुक्तवान् असौ क्षत्ता सतां स्पृहणीयं शीलं यस्य सः कर्णदुःशासनशकुनिसहितेन दुर्योधनेन असत्कृतः २४
तिरस्कारमाह क इति दासीसुतो ज्ञात्वा नानर्हः जिह्मः कुटिलः जिह्मतामाह यस्य बलिनान्नेन पुष्टस्तस्मिन्नेव प्रतीपः प्रति
कूलः परेषां कार्ये वर्तते अतः पुरान्निर्वास्यतां श्वसानः श्वसन् जीवमानः शेष इत्यर्थः पाठांतरे श्मशानवदमंगलः १५

भा०तृ०
३८

अलक्ष्यणे। कर्णयोर्बाणवत्तविरुद्धैः परुषवाक्यैर्मर्मसु ताडितोपि गतव्यथः तत्र हेतुः मायांउरुबहुमानयन् अहो मायाया माहात्म्यमिति तामेव
तत्र हेतुं मन्यमानः तन्निःसारणात्पूर्वं स्वयमेव अयाम्निर्जगाम किं कृत्वा एतेन नूनं मैतेमरिष्यंतीति किंधनुषेति तस्य द्वारि धनुर्निधाय यद्वा श्रीमा
दिभिः संगत्य अस्मात्रियंत्स्यतीतिमाशंकीति धनुर्निधानं १६ ततो निर्गतस्य तीर्थाटनप्रकारमाह सइत्यष्टाभिः सगजाह्वयान्निर्गतः सन्
तीर्थंपादो यस्य तस्य हरेः पादानि क्षेत्राणि पुण्यचिकीर्षया अन्वाक्रमत् प्रत्यपद्यत कौरवाणां पुण्येन लब्ध इति ते यां भाग्यमेव तेन रूपेण गं
तमिति सत्त्विनं उर्व्यां सहस्रमूर्तिर्ब्रह्मरुद्राद्यनेकमूर्तिः सन् तीर्थपात् यानि श्रीभिद्यायस्थितः पुण्यानियान्युपवनादीनि तेषु कुंजं लतादिगूढस्था
नं अपंकानितोयानि येषां ते कुसरित्सरः सुसबतीर्थेषु आयतनेषु क्षेत्रेषु कीदृशेषु अनंतस्य लिंगैर्मूर्तिभिः सम्यगलंकृतेषु अन

सइत्थमत्कत्वणकर्णबाणैर्भ्रातुः पुरो मर्मसु ताडितोपि स्वयं धनुर्द्वारि निधाय मायां गतव्यथो यादुरुमानयानः १६ निर्गतः
कौरवपुण्यलब्धो गजाह्वयात्तीर्थपदः पदानि अन्वाक्रमत्पुण्यचिकीर्षयोर्व्यां स्वधिष्ठितो यानि सहस्रमूर्तिः १७ पुरेषुपु
ण्योपवनाद्रिकुंजेष्वपंकतोयेषु सरित्सरःसु अनंतलिंगैः समलंकृतेषु चचार तीर्थायतनेष्वनन्यः १८ गांपर्यटन्मेध्यविविक्तवृत्तिः सदाप्लुतो
धःशयनोवधूतः अलक्षितः स्वैरवधूतवेषो व्रतानि चेरे हरितोषणानि १९ इत्थं व्रजन्भारतमेव वर्षं कालेन यावद्गतवान्प्रभासं तावच्छशास क्षि
तिमेकचक्रामेकातपत्रामजितेन पार्थः २० तत्राथ शुश्राव सुहृद्विनष्टिं वनं यथा वेणुजवह्निसंश्रयं संस्पर्धया दग्धमथानुशोचन्सरस्वतीं प्र
त्यगियाय तूष्णीं २१ तस्यां त्रितस्योशनसो मनोश्च पृथोरथाग्नेरसितस्य वायोः तीर्थं सुदासस्य गवां गुहस्य यच्छ्राद्धदेवस्य स आसिषेवे २२
अन्यानि चेह द्विजदेवदेवैः कृतानि नानायतनानि विष्णोः प्रत्यंगमुख्यांकितमंदिराणि यद्दर्शनात्कृष्णमनुस्मरंति २३

न्यः एकाकी १८ किं च गां पर्यटन् व्रतानि चेरे अचरत् मेध्या पवित्रा विविक्ता असंकीर्णा वृत्तिर्जीविका यस्य सदाप्लुतः प्रतितीर्थं स्नातः अधःशयनं यस्य
अवधूतः असंस्कृतदेहः अवधूतवेषो वल्कलादिधारी अत एव स्वैरं लक्षितः एकस्यैव चक्रं सैन्यं यस्यां एकमेव राजचिह्नं श्वेतातपत्रं यस्यां तां
अजितेन श्रीकृष्णेन सहायेन २० तत्र प्रभासे परस्परं स्पर्धया निमित्तभूतया सुहृदां कौरवाणां विनष्टिं विनाशं मत्कृष्णोपरस्परनाशो दृष्टांतः वे
णुजं वह्निं संश्रयते यद्वनं तद्यथा दग्धं भवति तथा प्रत्यक्सरस्वत्यभिमुखं २१ त्रितादीनामेकादशतीर्थानि तत्तन्नाम्ना प्रसिद्धानि सेवितवान्
द्विजदेवैः ऋषिभिर्देवैश्च कृतानि अंगमंगं प्रति वर्तते इति प्रत्यंगानि आयुधानि तेषु मुख्यं चक्रं तेनांकितानि मूर्ध्नि यस्य हेमकुंभेषु चिह्नितानि

प्रतीतं

अतिव्रज्य अतिक्रम्य यावदुद्धवः प्राप्तस्तावत्स्वयमपि यमुनामुपेत्य विदुरः २३ प्राक्तनं पूर्वं शिष्यं नीतिशास्त्रे पा
ठांतरे। प्राप्तो नपोनीतिशास्त्रं येन तं प्रख्यातं स्वानां ज्ञातीनां भद्रमपृच्छत्। प्रश्ने हेतुः भगवतः प्रजानां पोषणे
२४ प्रथमं तावद्रामकृष्णयोः कुशलं पृच्छति। कच्चिदिति प्रश्ने। स्वनाभेर्भवः स्वनाभ्यः पाद्मो ब्रह्मा तस्यानुवृत्त्या
प्रार्थनया इहावतीर्णौ कुशलमासाते वर्तेते। क्षत्तृक्षणे दत्ताव सरौ। सर्वेषां कृतोत्सवाविति वा तयोर्नित्यकुशल

ततस्त्वतिव्रज्य सुराष्ट्रमृद्धं सौवीरमत्स्यान्कुरुजांगलांश्च कालेन तावद्यमुनामुपेत्य तत्रोद्धवं भागवतं
ददर्श २३ स वासुदेवानुचरं प्रशांतं बृहस्पतेः प्राक्तनयं प्रतीतं आलिंग्य गाढं प्रणयेन भद्रं स्वानामपृच्छ
द्भगवत्प्रजानां २४ कच्चित्पुराणौ पुरुषौ स्वनाभ्यपद्मानुवृत्त्येह किलावतीर्णौ आसात उर्व्याः कुशलं
विधाय कृतक्षणौ कुशलं शूरगेहे २५ कच्चित्कुरूणां परमः सुहृन्नो भामः स आस्ते सुखमंग शौरिः
यो वै स्वसॄणां पितृवद्ददाति वरान्वदान्यो वरतर्पणेन २६ कच्चिद्वरूथाधिपतिर्यदूनां प्रद्युम्न आस्ते
सुखमंग धीरः यं रुक्मिणी भगवतोभिलेभे आराध्य विप्रान्स्मरमादिसर्गे २७

त्वेपि उक्तविशेषणविशिष्टौ। शूरसेनस्य गृहे कच्चिदासाते इति प्रश्नः २५ यदूनां कुशलं पृच्छति नवभिः। भामः प
त्युः शौरिः वसुदेवो यद्वा भामो भागिनीभर्ता कुंती वसुदेवस्य भगिनी। अतो देवकी पांडोर्भगिनीति लोकव्यवहारः।
वरानर्थान्। वदान्यः अत्युदारः वराणां तत्पत्नीनां तर्पणेन संतोषणेन सह २६ वरूथाधिपतिः सेनानीः आदि
सर्गे पूर्वजन्मनि स्मरं कामं संतं अभिलेभे पुत्रं लब्धवती २७ श्रीगोपालकृष्णाय नमः

सात्वतादीनामधिपः स उग्रसेनः शतपत्रनेत्रः श्रीकृष्णः नृपासनाशां राज्याभिलाषं परित्यज्य प्राणभयेन दूरां स्थि
तमित्यर्थः २८ हे सौम्य हरेः सुतः तेन सदृक्षः सदृशः साधु सुखमास्ते। गुहं स्वामिकार्तिकेयं। अग्रे पूर्वजन्मनि योऽम् नि
बिकया गर्भे धृतः तं २९ युयुधानः सात्यकिः क्षेमं कुशलमास्ते। फाल्गुनाल्लब्धं धनुषो रहस्यं येन तदीयां अधो
दत्तेनाद

कच्चित्सुखं सात्वतवृष्णिभोजदाशार्हकाणामधिपः स आस्ते यमभ्यषिंचच्छतपत्रनेत्रो नृपासनाशां परिहृ
त्य दूरात् २८ कच्चिद्धरेः सौम्य सुतः सदृक्षः आस्ते ग्रणीरथिनां साधु सांबः असूत यं जांबवती व्रताढ्या
देवं गुहं योंबिकया धृतोग्रे २९ क्षेमं स कच्चिद्युयुधान आस्ते यः फाल्गुनाल्लब्धधनूरहस्यः लेभेंजसा
धोक्षजसेवयैव गतिं तदीयां यतिभिर्दुरापाम् ३० कच्चिद्बुधः स्वस्त्यनमीव आस्ते श्वफल्कपुत्रो भगव
त्प्रपन्नः यः कृष्णपादांकितमार्गपांसुष्वचेष्टत प्रेमविभिन्नधैर्यः ३१ कच्चिच्छिवं देवकभोजपुत्र्या वि
ष्णुप्रजाया इव देवमातुः या वै स्वगर्भेण दधार देवं त्रयी यथा यज्ञवितानमर्थम् ३२

क्षजसंबंधिनीं ३० श्वफल्कपुत्रोऽक्रूरः बुधो विद्वान् अतो भगवंतं प्रपन्नः। अनुरक्तः अत एव अनमीवो निः राम ४
पापः भक्तो लिंगं यो अचेष्टत व्यलुंठत्। प्रेम्णा विभिन्नं विदीर्णं धैर्यं यस्य सः स्वस्ति क्षेममास्ते ३१ देवकनामा यो
भोजः तस्य पुत्र्याः देवक्याः विष्णुः प्रजा पुत्रो यस्याः सा। तस्याः देवमातुरदितेरिव कच्चित्सुखं। यज्ञवितानरूपम
र्थं त्रयी यथा प्रकाशकतया बिभर्ति तथा दधार ३२

सात्वतानामुपासकानां कामान् दोग्धि प्रपूरयतीति कामदुघः। भगवत्त्वे हेतुः। शब्दस्य शास्त्रस्य योनिं कारणं। आमनं
ति वेदाः कुतः मनोमयं मनसः प्रवर्तकं तत्कुतः सत्वस्यांतःकरणस्य चतुर्विधस्य तुरीयं तत्वं। चतुर्थमधिदैवं चित्ताऽ
हंकारबुद्धिमनसामंतःकरणभेदानां क्रमेण वासुदेवसंकर्षणप्रद्युम्नानिरुद्धा ह्यधिष्ठातारः मनसश्च शब्दयोनि
त्वं प्रसिद्धं मनः पूर्वरूपं प्रपन्नं वागुत्तररूपं पूर्वरूपमिति तथा। अन्यो ंतर आत्मा मनोमय इति प्रकृत्य तस्य यजुरेव शि
रः ऋक् दक्षिणपक्षः सामोत्तरपक्ष इत्यादि श्रुतेः। तथा च शिक्षायां। आत्मा बुध्या समेत्यार्थान्मनो युंक्ते विवक्षया

अपि स्विदास्ते भगवान् सुखं वो यः सात्वतां कामदुघोनिरुद्धः यमामनंति स्म ह शब्दयो
निं मनोमयं सत्वतुरीयतत्वं ३३ अपि स्विदन्ये च निजात्मदैवमनन्यवृत्त्या समनुव्रता
ये हृदीकसत्यात्मजचारुदेष्णगदादयः स्वस्ति चरंति सौम्य ३४ अपि स्वदोर्भ्यां विजयाऽ
च्युताभ्यां धर्मेण धर्मः परिपाति सेतुं दुर्योधनोतप्यत यत्सभायां साम्राज्यलक्ष्म्या विजया
नुवृत्त्या ३५

मनः कायाग्निमाहंति स प्रेरयति मारुतं। मारुतस्तूरसि चरन् मंद्रं जनयति स्वरमित्यादि ३३ अपि स्वित् किंस्विद
न्ये च किं स्वस्ति चरंति निजस्य देहादिव्यतिरिक्तस्यात्मनो दैवं श्रीकृष्णं अनन्यवृत्त्या एकांतभक्तिभावेन ये सम्यगनुव्र
ताः अनुरक्ताः। हृदीकश्च सत्यभामायां आत्मजाश्च चारुदेष्णश्च गदश्च आदिर्येषां तेपि ३४ इदानीं कुरून् पृच्छति
षड्भिः। अपि किंस्विद्दोर्भ्यां स्वबाहुवद्वर्तमानाभ्यां अर्जुनकृष्णाभ्यां धर्ममार्गेण धर्मो युधिष्ठिरः सेतुं धर्ममर्यादां
परिपाति। यत्सभायां विजयानुवृत्त्या जयपरंपरया। अर्जुनस्य सेवयेति वा। एवंभूतं यस्यैश्वर्यमित्यर्थः ३५

कृष्ण य

भा॰त॰ ५ कृताघेषु कृतापकारेषु स्वकर्तृकमघं दीर्घतमं बहुकालानुचिंतितं। अहिवदमर्षी भीमः किंच्य मुंचन्नोवाच। गदायाः वि
विधं विचित्रं मार्गं विचरतः ३६ रथयूथपानां मध्ये यशोधा कीर्तिधारी। यद्वा स्वीयानां तेषां कीर्तिप्रदः। उपरता अरयो
यस्मात्। यस्य शरकूटेन बाणसमूहेन गूढः आच्छन्नः। प्रकृतस्थित् किंस्वित् ३७ यमो नकुलसहदेवौ रेमाते क्रीडि
ते इत्यर्थः। माद्र्याः सुतावपि पृथायास्तनयो पृथायाः पुत्रैर्वृतौ सुपर्णौ विवरेमाने। किंच त्वा परात् दुर्योधनादिकस्व
रिक्थं स्वीयं राज्यं उद्दाय आच्छिद्य वज्रिवक्त्रात् इंद्रस्य मुखात् स्वरिक्थ ममृतं गरुड इवेति। यद्वा सुपर्णौ वेति। यदि वि

किंवा कृताघेष्वघमत्यमर्षी भीमोहिवद्दीर्घतमं व्यमुंचत् यस्यांघ्रिपातं रणभूर्न सेहे मार्गं गदायाश्चरतो वि
चित्रं ३६ कच्चिद्यशोधा रथयूथपानां गांडीवधन्वोपरतारिरास्ते अलक्षितो यच्छरकूटगूढो मायाकिरातो
गिरिशस्तुतोष ३७ यमावुतस्वित्तनयौ पृथायाः पार्थैर्वृतौ पक्ष्मभिरक्षिणीव रेमात उद्दाय मृधे स्वरि द्वा
क्थं परात्सुपर्णाविव वज्रिवक्त्रात् ३८ अहो पृथापि ध्रियतेर्भकार्थे राजर्षिवर्येण विनापि तेन यस्त्वेकवीरो
धिरथो विजिग्ये धनुर्द्वितीयः ककुभश्चतस्रः ३९ सौम्यानुशोचे तमधःपतंतं भ्रात्रे परेताय विदुद्रुहे यः नि
र्यापितो येन सुहृत्स्वपुर्या अहं स्वपुत्रान्समनुव्रतेन ४०

द्रोणगरुडाद्यमृतमानयत्तं नर्हितद्वत् ३८ पृथायाः किं कुशलं पृच्छेयं। यतः स्वस्याः पांडुना विना प्राणधारणमेव आ राम ५
श्चर्यमित्याह। अहो इति ध्रियते जीवतीति युक्तमेवाहन वात्याश्चर्यं। यतो अर्भकार्थे ध्रियते न भोगार्थं पितृयो त्वाश्चर्य
मेवेत्याह। तेन तथाभूतेन विना तदेवाह। यस्त्विति धनुरेव सहायो द्वितीयो यस्य पृथा अर्भकार्थे जीवतीति युक्तमेव।
३९ हे सौम्य तं धृतराष्ट्रं जीवंतं अनुशोचामीति तत्किं अधःपतंतं। तत्र हेतुः। परेताय भ्रात्रे पुत्रद्रोहेण यो विदुद्रुहे।
द्रोहं कृतवान्। जीवतो पि भ्रातुर्मामपकृतवानित्याह। येन सुहृत् भ्राता अहं स्वपुर्याः सकाशान्निर्यापितः विवासितः ४०

अक्षिण्यीवेति क्षणिवादिगणत्वात्संधिः ५

शाश्चित्तवृत्ती

अहो खलु विस्मयो जातः न तोपि तत्स्येवं दुश्चेष्टितं यतः स्वं साधुरपि दुःखं प्रापितोसि इत्यत आह। सो हं हरेः प्रसादा
त्तस्य पदवीं प्रसादं महात्म्यं पश्यन् गतविस्मयः। अत्र भूतले नान्यो पलक्ष्यः गूढः सन् सुखं चरामि। कथंभूतस्य
मर्त्यविडंबनेन ऐश्वर्याच्छादकेन मनुष्यानुकरणेन नृणां दृष्टीश्चालयतः भ्रामयतः। ननु हरेः किमेवं लीलया प
तः स्वभक्तानां वनवासादिक्लेशाभवंति। स्वस्य वंद्वैत्ये बंधनो द्यमादि पराभवः। तद्धरं तेषामपराधानंतरमेव हननं
नापराधो पेक्षेत्यत आह ४१ नूनं निश्चितं। विधीमदो धनमद इत्थेवाभिजनो मदः। एते मदा मदांधानां तत एव हि
सतां त्रमाः इति त्रयो मदाः। त्रिभिर्मदैः रुन्नस्य पथा कृतानां वधाद्धेतोः प्रपन्नानामार्तिं जिहीर्षया। ईशः अद्यसमे

सोहं हरेर्मर्त्यविडंबनेन दृशो नृणां चालयतो विधातुः नान्योपलक्ष्यः पदवीं प्रसादाच्चरामि पश्यन्गतविस्म
योत्र ४१ नूनं नृपाणां त्रिमदोत्पथानां महीं मुहुश्चालयतां चमूभिः वधात्प्रपन्नार्तिजिहीर्षयेशोप्युपेक्ष
ताघं भगवान्कुरूणां ४२ अजस्य जन्मोत्पथनाशनाय कर्माण्यकर्तुर्ग्रहणाय पुंसां नत्वन्यथा को र्हति
देहयोगं परो गुणानामुत कर्मतंत्रं ४३ तस्य प्रपन्नाखिललोकपानामवस्थितानामनुशासने स्वे अर्थाय नां
जातस्य यदुष्वजस्य वार्त्तां सखे कीर्तय तीर्थकीर्तेः ४४ इति श्रीभागवते तृतीयस्कंधे प्रथमोध्यायः

य एवं हंतुं समर्थोपि कुरूणामघमुपैक्षत। तदानीमेव तेषां वधे सर्वदुष्टराजवधो न स्यादित्याशयेनेत्यर्थः ४२ सर्वदु
ष्टत्वधाद्यर्थमेव भगवतो जन्मकर्माणि नान्यथेति कैमुतिकन्यायेनाह। अजस्यापि जन्माकर्तुरपि कर्माणि पुंसां ग्रहणा
य कर्मसु प्रवृत्तये अन्यथा न वेदेवं तर्हि भगवतो जन्मादि कथा तावदास्तां। कोवान्यो पि गुणानां परो गुणातीतो देहयो
गं कर्मविस्तारं वार्हतीति ४३ तस्मादेवंभूताचिंत्यमायाविनोदस्य कथां कथयेत्याह। तस्य प्रपन्नो अखिलो येते षाव
स्थीयेनुशासने स्थितानां अर्थाय प्रयोजनाय यदुषु जातस्य तीर्थ संसारतारिणी कीर्तिर्यस्येति ४४ इति प्रथमः

त२ ये२ लोकपालाः;

भा॰ त॰ द्वितीये कृष्णविश्लेषादनुशोचन्नुद्धवः । तत्रैव बालचरित्राणि कृष्णस्यावर्णयन्नुसन्नन्दे । तं प्रियवार्तां पृष्टस्योद्धवस्य
६ श्रीकृष्णविरहोत्कंठ्यावेशेन प्रतिवचनासामर्थ्यमाह षड्भिः । इतीति । स्मारितः स्मृत ईश्वरो यस्य तं देवकीमुत्यन्यायेन प्रणं
वानिद्राभ्यां १ यः पंचवर्षोपि बाललीलये ति कृष्णं कं नित्य परिकल्प परिकल्पितैरेव साधनैः परिचर्यां कुर्वन् प्रातर्भो
जनार्थं मात्रा प्रार्थितोपि तद्भोजनं नैच्छत् २ जरसं वृद्धत्वं गतः प्राप्तः श्रीकृष्णांघ्रिसुधया तस्यामेव तीव्रेण विरहतापा साधुनिर्वृतः ४
दकेन भक्तियोगेन भृशं निमग्नः पुलकैरुद्भिन्नानि उज्जृंभितानि सर्वाण्यंगानि यस्य । मीलत्या दृशा शुचः अश्रूणि मुंच

श्रीशुक उवाच इति भागवतः पृष्टः क्षत्रा वार्तां प्रियाश्रयां प्रतिवक्तुं न चोत्सेहे औत्कंठ्यात्स्मारितेश्वरः
१ यः पंचहायनो मात्रा प्रातराशाय याचितः तन्नैच्छद्रचयन्यस्य सपर्यां बाललीलया २ स कथं सेव
या तस्य कालेन जरसं गतः पृष्टो वार्त्तां प्रतिब्रूयाद्भर्तुः पादावनुस्मरन् ३ स मुहूर्तमभूत्तूष्णीं कृष्णांघ्रि
सुधया भृशं तीव्रेण भक्तियोगेन निमग्नः साधु निर्वृतः ४ पुलकोद्भिन्नसर्वांगो मुंचन्मीलद्दृशा शुचः
पूर्णार्थो लक्षितस्तेन स्नेहप्रसरसंप्लुतः ५ शनकैर्भगवल्लोकान्नृलोकं पुनरागतः विमृज्य नेत्रे विदुरं
प्रत्याहोद्धव उत्स्मयन् ६ उद्धव उ॰ कृष्णद्युमणिनिम्लोचे गीर्णेष्वजगरेण ह किं नु नः कुशलं ब्रूयां गतश्रीषु गृहेष्वहं ७

नूतेन विदुरेण पूर्णार्थः कृतार्थो लक्षितः । यतो भगवति यः स्नेहस्तस्य प्रसरः प्रस्रवस्तस्मिन् संप्लु राम
तो निमग्नः ५ भगवानेव लोकस्तस्मान्नृलोके देहानुसंधानं । उत्स्मयन् यदुकुलसंहारादि भगवच्चातुर्यस्मर ६
णेन विस्मयं प्राप्नुवन् ६ कृष्णविरहेण संतप्यमानः प्रत्याह । श्रीकृष्ण एव द्युमणिः सूर्यः तस्य निम्लोचे अस्त
मये सति । अजगरेण कालमहासर्पेण गीर्णेषु गिलितेषु नो गृहेषु पुष्टानां बंधूनां किं नु ब्रूयां ७ श्रीराम
लत॰

अनुशोचन्नाह दुर्भगो भाग्यहीनः ये सह वसंतोपि श्रीहरिरयमिति न विदुः यथा क्षीरसमुद्रे जातमुडुपं तद्वत् तत्रत्या मीनाः
केवलं कमयः कश्चिज्जलचर इत्येव विदुः न त्वमृतमय इति तद्वत् यद्वा जले प्रतिबिंबितमुडुपं धेति ८ भाग्यहीन
त्वादेव न विदुः न तु ज्ञानसामर्थ्याभावादित्याह इंगितं चित्तस्थं जानंतीति तथा अतिशयेन प्रौढा निपुणाः एके
स्मिन्निपुणाः वस्थाने आरमंतीति तथा एवंभूता अपि भूतानामावासमीश्वरं संतं सात्वतामृषभं सात्वतश्रेष्ठं अमं

दुर्भगो बत लोकोयं यदवो नितरामपि ये संवसंतो न विदुर्हरिं मीना इवोडुपं ८ इंगितज्ञाः पुरुप्रौढा एका
रामाश्च सात्वताः सात्वतामृषभं सर्वे भूतावासममंसत ९ देवस्य मायया स्पृष्टा ये चान्यदसदाश्रिताः
भ्राम्यते धीर्न तद्वाक्यैरात्मन्युप्तात्मनो हरौ १० प्रदर्श्यातप्ततपसामवितृप्तदृशां नृणां आदायांतरधाद्य
स्तु स्वबिंबं लोकलोचनं ११ यन्मर्त्यलीलौपयिकं स्वयोगमायाबलं दर्शयता गृहीतं विस्मापनं स्व
स्य च सौभगर्द्धेः परं पदं भूषणभूषणांगं १२

न्यंत ९ ये यादवाः देवमायया व्याप्ताः यादवोयमस्मद्बंधुरिति वदंति ये च शिशुपालादयो सदेवान्यद्वैरमाश्रितानिं ब
दंति तेषां वाक्यैरात्मनि हरौ उप्तात्मनो निक्षिप्तचित्तस्य मादृशस्य बुद्धिर्न भ्राम्यते मोहं न प्राप्यते अन्ये तु मूढा एवे
त्यर्थः १० को सौ हरिरित्यपेक्षायामाह प्रदर्श्येति न तप्तं तपो यैः अतो वितृप्ता दृशो येषां तेषां स्वबिंबं मूर्तिं यावंतं
कालं दर्शयित्वा यो तर्हितवान् लोकस्य लोचनमाहाय आच्छिद्य तादृशस्यान्यस्याविलोकनीयस्याभावात् ११
न देवबिंबं वर्णयति त्रिभिः यन्मर्त्यलीलासु औपयिकं योग्यं स्वस्यापि विस्मयजनकं मतः सौभगर्द्धेः सौभाग्यातिशयस्य परं पदं पराका

भा०स्क० ७ यद्धर्मसूनोर्बतराजसूये निरीक्ष्य दृक्स्वस्त्ययनं त्रिलोकः कार्त्स्न्येन चाद्येह गतं विधातुरर्वाक्सृतौ कौशलमित्यमन्यत ३
दृशां स्वस्त्ययनं परमानंदकरं त्रिभुवनस्थो लोकः प्राणिमात्रं अद्य इदानीं इह विधेः अर्वाक्सृतौ अर्वाचीनसंसारनिर्माणे
मनुष्यनिर्माणे वा यत्कौशलं तेन पुण्यं तत्कार्त्स्न्येन गतं सुपक्षीणं नातः परं तस्य कौशलमस्तीति एवं मेने तन्मूर्तेर्विधातुः सृज्य
बालावेपि लोकस्य दृष्टिरिबमुक्ता १३ अनुरागेन प्लुतो व्याप्तो हासः रासो विनोदः लीलावलोकश्च तैः स्वकृतहासा

यस्यानुरागप्लुतहासरासलीलावलोकप्रतिलब्धमानाः व्रजस्त्रियो दृग्भिरनुप्रवृत्तधियोवतस्थुः किल
कृत्यशेषाः १४ स्वशांतरूपेष्वितरैः स्वरूपैरभ्यर्द्यमानेष्वनुकंपितात्मा परावरेशो महदंशयुक्तो ह्यजोपि
जातो भगवान्यथाग्निः १५ मां खेदयत्येतदजस्य जन्मविडंबनं यद्वसुदेवगेहे व्रजे च वासोरिभयादिव स्व
यं पुराद्व्यवात्सीद्यदनंतवीर्यः १६

यनंतरं प्रतिलब्धो मानो याभिस्ताः दृग्भिः सह अनुप्रवृत्ता आगच्छंतं तमेवानुगता धियो यासां ताः कृत्यशेषा यासां ताः अस ७
मापितकृत्या एवतस्थुः १४ एवं भूतविंबदर्शनकारणमाह स्वीयान्येवशांतान्यंशांनि वरूपाणि तच्चतेषु इतरैः पीड्यमानेषु ता शांतरूपे
अनुकंपितः कृतानुकंपः आत्मा यस्य अजोपि जातः आविर्भूतः महान्भूतरूपेण नित्यसिद्ध एव अग्निर्यथा काष्ठेषु आविर्भवति
तद्वत् अजस्य जन्मनि हेतुः महान् महत्तत्वमंशः कार्यत्वेनांशो यस्याव्यक्तस्य तन्महदंशं तद्युक्त इति १५ ननु कुतो सौ परावराणा
मीशः पारतंत्र्यप्रतीतेस्तत्राह द्वाभ्यां मामप्येतत् दुर्वितर्क्यं दुर्घटं च खेदयति तदेवाह वसुदेवगेहे बंधनागारे यज्जन्म तो विडं
बनं अनुकरणं ननु नृसिंहवदकस्मादाविर्भावः कंसभयादिव निलीय व्रजे वासश्च कालयवनादिव पुरान्मथुराया व्यवात्सी
दरिपुभयान् त् पलायत १६

एतद्धरेश्वरितं स्मरतो मम चेतः कर्म भूतं धुनोति व्यथयति तदेव दर्शयति यदाहेति हे तात हे अंब युवां प्रसीतेदं प्रसादं कुरुतं नह
तानि कृतिः शुश्रूषणं यैः तेषां नो अस्माकं इति बकुब्ध नरामाद्यभिप्रायं १७ ननु तर्ह्यनीश्वर एव किं न स्यात् तत्र तु श्रद्धामा
त्रमेतत् तत्राह त्रिभिः को वा अंघ्रिसरोजरेणुलमपि विजिघ्रन्सेवमानः विस्मरेत् ईशीत शक्नुयात् विस्फुरत् भ्रूविटपः भ्रू योगेन
लता स एव कृतांतस्तेन १८ न च तस्येश्वरत्वं साधनीयं तद्वद्भिरपि दृष्टत्वादित्याह दृष्टेति यां सिद्धिं सम्यक् योगिनः आप्नु

धुनोति चेतः स्मरतो ममैतद्यदाह पादावभिवंद्य पित्रोः ताताम्ब कंसादुरुशंकितानां प्रसीदतं नो कृतनिष्कृतीनां १७ को
वा अमुष्यांघ्रिसरोजरेणुं विस्मर्तुमीशीत पुमान्विजिघ्रन् यो विस्फुरद्भ्रूविटपेन भूमेर्भारं कृतांतेन तिरश्चकार १८
दृष्टा भवद्भिर्ननु राजसूये चैद्यस्य कृष्णं द्विषतोपि सिद्धिः यां योगिनः संस्पृहयंति सम्यक् योगेन कस्तद्विरहं
सहेत १९ तथैव चान्ये नरलोकवीरा य आहवे कृष्णमुखारविंदं नेत्रैः पिबंतो नयनाभिरामं पार्थास्त्रपूताः पदमापु
रस्य २० स्वयं त्वसाम्यातिशयस्त्र्यधीशः स्वाराज्यलक्ष्म्याप्तसमस्तकामः बलिं हरद्भिश्चिरलोकपालैः किरीटकोट्येडि
तपादपीठः २१
मिच्छंति १९ आहवे युद्धे पार्थस्यास्त्रैः पूताः निःपापाः संतः २० तदेवं परमैश्वर्ये सत्यपि यदुग्रसेनानुवर्तित्वं तद्व्यथयतीत्याह
स्वयं त्विति एवं भूतस्तस्य तत्कैंकर्यं नोस्मान् विग्लापयतीत्युत्तरेणान्वयः न साम्यातिशयौ यस्य यमपेक्ष्यान्यस्य साम्यमति
शयश्च नास्तीत्यर्थः तत्र हेतवः त्रयाणां पुरुषाणामीशः स्वाराज्यलक्ष्म्या परमानंदस्वरूपसंपत्त्यैव आप्तसमस्तभोगः बलिं करं
अर्हणं वा हरद्भिः समर्पयद्भिः चिरकालीनैर्लोकपालैः किरीटाग्रेणाईडितं स्तुतं पादपीठं यस्य प्रणमतां किरीटसंघट्टनध्वनिरे
वस्तुतित्वेनउत्प्रेक्ष्यते २१

भा०टी०
८

अंगविदुर भृतान् भृत्यान् उग्रसेने यत्किंकरत्वं तदेवाह परमेष्ठिधिष्ण्ये राजासने निषण्णं आसीनं स्वयं तिष्ठन् हे देव अवधा
रयेति न्यबोधयत् विज्ञापितवान् २२ एवमनुवृत्तिः कृपयैवेति सूचयन्नपकारिष्वपि तस्य कृपालुतां दर्शयन्नाह अहो आ
श्चर्यं कृपालुतायाः हंतुमिच्छया पिस्तनयोः संभृतं कालकूटं विषं यमपायपयत् बकी पूतना असाध्वी दुष्टापि धात्र्याः यशो दा
याः उचितां गतिं लेभे नकेवेषमात्रेणयः सद्गतिं दत्तवानित्यर्थः ततोन्यं कं वा भजेम २३ ननु भागवतानेव भगवान् नु

तत्रस्थकैंकर्यमलं भृतान्यो विज्ञापयत्यंगयदुग्रसेनं तिष्ठन्निषण्णं परमेष्ठिधिष्ण्ये न्यबोधयद्देवनिधारयेति २२
अहो बकी यं स्तनकालकूटं जिघांसयापाययदप्यसाध्वी लेभे गतिं धात्र्युचितां ततोन्यं कं वा दयालुं शरणं व्र
जेम २३ मन्येसुरान् भागवतांस्त्र्यधीशे संरंभमार्गाभिनिविष्टचित्तान् येसंयुगेचक्षततार्क्ष्यपुत्रमंसे
सुनाभायुधमापतंतं २४ वसुदेवस्य देवक्यां जातो भोजेंद्रबंधने चिकीर्षुर्भगवानस्याः शमजेनाभियाचितः २५

गृह्णातीति प्रसिद्धेः सत्यं असुरानहं भागवतानेव मन्ये यतो भागवताद्भगवतेपि भगवद्ध्यानादि निवेशो न भगवंतमप ८
रोक्षं पश्यंतीत्याह संरंभः क्रोधावेशः तेन मार्गेणाभिनिविष्टं चित्तं येषां तान् अतएव ये संग्रामे तार्क्ष्यः कश्यपस्तस्य पुत्रं गरुडं अं
से स्कंधे सुनाभ सुदर्शनं चक्रायुधो हरिर्यस्य तं अचक्षत अपश्यन् तस्मात्तेषामप्यनुग्रहो युक्त एवेत्यर्थः वक्ष्यति च तस्मात्केनाप्युपाये
न मनः कृष्णे निवेशयेदिति इदानीं तस्यां तर्ध्यानप्रकारं वक्तुमादित आरभ्य तच्चरितं संक्षेपतः कथयति वसुदेवस्य भार्या
यां जातः भोजेंद्रः कंसः तस्य बंधनागारे अस्याः पृथिव्याः शं सुखं चिकीर्षुः अजेन च याचितः सन् २५ श्रीकृष्णायनमः

आक्रीतेडे
पित्रा हेतुभूतेन नंदव्रजं इतिः गतः समाः संवत्सरान् गूढार्चिः गुप्ततेजाः २६ व्याहरत् कूजद्भिर्द्विजैः पक्षिभिः संकुलिताः व्याप्ता
अंघ्रिपाः यस्मिन् २७ रुदन्निवेतिर्ईश्वरस्य यथा योगं सर्वत्राप्यन्वयः मुग्धो बालश्चेयः सिंहस्तद्वत् अवलोकनं यस्य
२८ स एवाधिकं वयः प्राप्तः सन् लक्ष्म्याः शोभादिसंपदो निकेतनं सिता गोवृषा यस्मिन् नानावर्णगोसंघेरणन् शब्दं
कुर्वन् वेणुर्यस्य अरीरमत् रमयामास २९ व्यनुदत् जघान क्रीडनकान् तृणादिनिर्मितान् सिंहादीन् ३० यथा विप
गाव इति
न्नान् मृतान् गोपान् गाश्चोत्थाप्य तदेवं तोयं प्रकृतिस्थितं निर्विषं इंद्रपूजाभंगेन गवां पूजैव गोसवः तेन गोपराजं
कृता

ततो नंदव्रजमितः पित्रा कंसाद्विबिभ्यता एकादश समास्तत्र गूढार्चिः सबलोवसत् २६ परीतो वत्सपैर्व
त्सान् चारयन्व्याहरद्विभुः यमुनोपवने कूजद्द्विजसंकुलितांघ्रिपे २७ कैशोरीं दर्शयन् चेष्टां प्रेक्षणीयां कौमारीं
व्रजौकसां रुदन्निव हसन्मुग्धबालसिंहावलोकनः २८ स एव गोधनं लक्ष्म्या निकेतं सितगोवृषं चा
रयन्ननुगान्गोपान् रणद्वेणुररीरमत् २९ प्रयुक्तान् भोजराजेन मायिनः कामरूपिणः लीलया व्य
नुदत्तांस्तान् बालः क्रीडनकानिव ३० विपन्नान्विषपानेन निगृह्य भुजगाधिपं उत्थाप्यापाययद्गाव
स्तत्तोयं प्रकृतिस्थितं ३१ अयाजयद्गोसवेन गोपराजं द्विजोत्तमैः वित्तस्य चोरुभारस्य चिकीर्षन्सद्व्ययं वि
नंदं वित्तस्य चेति चकारादिंद्रस्य मानभंगं कुर्वन् उरुभारस्य अतिसमृद्धस्य ३२ श्रीवासुदेवायनमः मुः ३२

समानवर्णद्वयं वाचकं यस्य सः श्रियः सवर्णे ...

त्वित्येतदर्थं तत्र शिशुपालस्याज्ञानं वरत्वेन बुभूषया जरासंधादीन् तद्विवाहोत्सवेन शेषं पूर्ववत् ३

भा०त०
९
कोपाद्वर्षति गोत्रः पर्वत एव लीलातपत्रं तेन हेतुः ३३ मृष्टमुज्ज्वलं स्त्रीणां मंडलं मंडयतीति तथा ३४ इति श्रीश्रीधर

स्वामिकृतायां भावार्थदीपिकायां द्वितीयः तृतीये मथुरामेत्य ब्रजात्कंसवधादिकं यत्कृतं द्वारकायां च कृष्णेनेदम

वर्णयत् १ शमित्यव्ययं पित्रोः सुखस्य चिकीर्षयेत्यर्थः तुंगात् राजमंचात् रिपुयूथानां नाथं कंसं व्यसोरपि निष्क

र्षणं पित्रोः सुखार्थं १ ब्रह्मवेदं सविस्तरं षडंगादिसहितं पंचजनोदरविदारणद्वारा पुत्रमानीयेत्यर्थः २ भीष्मक

वर्षतीं द्विव्रजः कोपाद्भग्नमानोऽतिविह्वलः गोत्रलीलातपत्रेण त्रातोऽत्तद्धानुगृह्णता ३३ शारच्छशिकरैर्मृ

ष्टं मानयन्रजनीमुखं गायन्कलपदं रेमे स्त्रीणां मंडलमंडनः ३४ इति श्रीभागवते महापुराणे तृतीय

स्कंधे विदुरोद्धवसंवादे द्वितीयोध्यायः उद्धव उवाच ततः स आगत्य पुरं स्वपित्रोश्चिकीर्षया

शं बलदेवसंयुतः निपात्य तुंगाद्रिपुयूथनाथं हतं व्यकर्षद्व्यसुमोजसोर्व्यां १ सांदीपनेः सकृत्प्रोक्तं ब्रह्मा

धीत्य सविस्तरं तस्मै प्रादाद्वरं पुत्रं मृतं पंचजनोदरात् २ समाहुता भीष्मककन्यया ये श्रियः सवर्णेन बुभूष

येषां गांधर्ववृत्त्या मिषतां स्वभागं जह्रे पदं मूर्ध्नि दधत्सुपर्णः ३

कन्यया रुक्मिण्या ये राजानः समाहूताः ऋषभमार्षी समाहृता इति पाठे आकृष्टा इत्यर्थः केन साधनेन श्रियो लक्ष्म्याः सवर्णेन स ९

मानेन रूपेण यद्यपि तया केवलं श्रीकृष्ण एव आहूतः सर्वे तथापि तस्या लावण्यं तेषां मागमने हेतुरिति तयैवाहूता इत्युक्तं

तेषां मिषतां पश्यतां मूर्ध्नि पदं दधत् तया सह गांधर्ववृत्त्या परस्परसमयरूपया बुभूषया भवितुमिच्छया जहार कथंभूतां

स्वभागं लक्ष्म्यंशत्वात् तयास्वात्मनोपि तत्वात् सुपर्णः पतनः पक्षात् सुपर्णः स्वभागं सुधामित्यर्थः यद्वा श्रियः रुक्मिण्याः

सु

विद्धनासिकान्

ककुद्मतो वृषभान् अविद्धनासिकान् केनापि वातैर्द्वषैस्तद्दमनेन भग्नमाना ये षांतथापि तां गृध्यतः कामयमानान् अतए

वाज्ञान् शास्त्रभृतो राज्ञः तच्छस्त्रैरक्षत एव जघान ४ यदा अदित्याः कुंडले दातुं स्वर्गं गतः तदा प्रभुः स्वतंत्रोपि ग्राम्यः स्त्रीपरतं

त्र इव प्रियायाः सत्यभामायाः प्रियं विधातुमिच्छुः द्युतरुं पारिजातं आनीतवान् यदर्थं यन्निमित्तं कृष्णं वज्री स्त्रीप्रेरितः योद्धुम

भ्यधावत् स्वकार्यसाधकेन तेन युद्धोद्यमस्तस्य युक्त एवेत्याह क्रीडामृग इति अयं वज्री ५ सुनाभेन चक्रेणोन्मथितं

ककुद्मतोऽविद्धनसो दमित्वा स्वयंवरे नाग्नजितीमुवाह तद्भग्नमानानपि गृध्यतोऽज्ञान् जघ्नेऽक्षतः श

स्त्रभृतः स्वशस्त्रैः ४ प्रियं प्रभुर्ग्राम्य इव प्रियाया विधित्सुरार्च्छद्द्युतरुं यदर्थे वज्र्याद्रवत्तं सगणो रु

षांधः क्रीडामृगो नूनमयं वधूनां ५ सुतं मृधे खं वपुषा ग्रसंतं दृष्ट्वा सुनाभोन्मथितं धरित्र्या आमं

त्रितस्तत्तनयाय शेषं दत्वा तदंतःपुरमाविवेश ६ तत्राहृतास्ता नरदेवकन्याः कुजेन दृष्ट्वा हरिमार्तबंधुं उ

त्थाय सद्यो जगृहुः प्रहर्षव्रीडानुरागप्रहितावलोकैः ७ आसां मुहूर्त एकस्मिन् नानागारेषु योषितां

सविधं जगृहे पाणीननुरूपः स्वमायया ८

हतं सुतं भौमं दृष्ट्वा तस्य माता धरित्र्या भूम्या आमंत्रितः प्रार्थितः सन् तस्य तनयाय भगदत्ताय हृतशेषं राज्यं दत्वा ६ तत्रां

तःपुरे कुजेन भौमेन या आहृतास्ताः प्रहर्षश्च व्रीडा च अनुरागश्च तैः प्रहिताः प्रेरिता येऽवलोकाः तैः जगृहुः स्वीकृ

तवत्यः ७ आसां योषितां पाणीन् तत्तदनुरूपः सन् सविधिं विवाहोचितप्रकारसहितं यथा भवति ८ श्रीकृष्णायनमः

भा०टी० ९०

सर्वतः सर्वगुणैः स्वतुल्यानि प्रकृतेर्मायाया विविधं भवनं विस्तारः तदिच्छया यद्वा प्रकृतेर्हेतोर्विविधं भवितुमिच्छया
९ कालः कालयवनः रुंधतः आवृण्वतः मुचुकुंदभीमादिभिर्निमित्तमात्रैः स्वयमेव अजीघनत् घातितवान् तेषां स्वपुंसां तेनच
तेजः प्रभावं कीर्तिं वा दत्तवान् १० शंबरं द्विविदं बल्वलान्यानपि कांश्चित् प्रद्युम्न रामादिभिर्घातयत् घातयामिति अघातयत्
इति पाठः दंतवक्रादीन् स्वयमवधीत् ११ नृपान् घातयदित्यनुषंगः कथंभूतान् कुरुक्षेत्रमापततां गच्छतां येषां बलैः सेनाभिः

तास्वपत्यान्यजनयदात्मतुल्यानि सर्वतः एकैकस्यां दश दश प्रकृतेर्विबुभूषया ९ कालमागधशाल्वा
दीननीकैरुंधतः पुरं अजीघनत् स्वयं दिव्यं स्वपुंसां तेज आदिशत् १० शंबरं द्विविदं बाणं मुरं बल्वलमेव च
अन्यांश्च दंतवक्रादीन् वधीत्कांश्च घातयत् ११ अथ ते भ्रातृपुत्राणां पक्षयोः पतितान्नृपान् चचाल भूः
कुरुक्षेत्रं येषामापततां बलैः १२ स कर्णदुःशासनसौबलानां कुमंत्रपाकेन हतश्रियायुषं सुयोधनं सानु ९०
चरं शयानं भग्नोरुमूर्व्यां न ननंद पश्यन् १३ कियान् भुवोयं क्षपितोरुभारो यद्द्रोणभीष्मार्जुनभीममूलैः
अष्टादशाक्षौहिणिको मदंशैरास्ते बलं दुर्विषहं यदूनां १४
भ्यो भूः सर्वापि चचाल चकंपे १२ सकर्णेति हे श्रीः आयुश्च यस्य तं ऊर्व्यां भूमौ शयानं पश्यन्नपि न ननंद संतो
षं न प्राप १३ अभिनंदनप्रकारमेवाह कियानिति द्रोणादिभिर्मूलैः कारणभूतैः यदिति यः अष्टादशाक्षौहिणीयु
क्तः कुत्स्नमार्थं क्षपितगुरुभारो भुवः अयं कियान् अत्यल्प इत्यर्थः यस्मान्मदंशैः प्रद्युम्नादिभिर्हेतुभूतैर्दुर्विषहं

३ अनुक्रमः सह १८

नवा अन्यैरुपायः प्रभवति किंतु मध्वासवपानेन आमदः सर्वतो मदः तेन आताम्रविलोचनानामेषां विवादो यदा भविष्यति त
दा इयानेवैषां वधोपायः अतोऽन्यो नास्ति एकाग्रमनो यथा मय्युद्यते सति स्वयमेव विवादेनांतर्धीं रंस्यंतीत्यर्थः १५ एवं श्लोक
द्वयेनोक्तं क्रमेण संचिंत्य स्वराज्ये स्थापयित्वा धृतः रक्षितः १७ सांख्यं प्रकृतिपुरुषविवेकं १९ स्निग्धोयः स्मितसहितोव

मिथो यदैषां भविता विवादो मध्वामदाताम्रविलोचनानां नैषां वधोपाय इयानतोन्यो मय्युद्यतेंतर्दधते स्वयं स्म १५
एवं संचिंत्य भगवान्स्वराज्ये स्थाप्य धर्मजं नंदयामास सुहृदः साधूनां वर्त्म दर्शयन् १६ उत्तरायां धृतः पूरोर्वंशः सा
ध्वभिमन्युना स वै द्रौण्यस्त्रसंछिन्नः पुनर्भगवता धृतः १७ अयाजयद्धर्मसुतमश्वमेधैस्त्रिभिर्विभुः सोपि
क्ष्मामनुजैर्रक्षन्रेमे कृष्णमनुव्रतः १८ भगवानपि विश्वात्मा लोकवेदपथानुगः कामान्सिषेवे द्वार्वत्यामसक्तः
सांख्यमास्थितः १९ स्निग्धस्मितावलोकेन वाचा पीयूषकल्पया चरित्रेणानवद्येन श्रीनिकेतेन चात्मना २० इमं
लोकममुं चैव रमयन्सुतरां यदून् रेमे क्षणदया दत्तक्षणस्त्रीक्षणसौहृदः २१ तस्यैवं रममाणस्य संवत्सरगणान्
बहून् गृहमेधेषु योगेषु विरागः समजायत २२ दैवाधीनेषु कामेषु दैवाधीनः स्वयं पुमान् को विश्रंभेत योगेन योगेश्व
रमनुव्रतः २३
लोकस्तेन पीयूषकल्पया सुधातुल्यया पानांतरे सुधाप्रवाहरूपया आत्मना देहेन २० क्षणदया रात्र्या दत्तक्षणः अवसरः उत्स
वो वा यासां स्त्रीणां तासु क्षणं सौहृदं यस्य सः २१ गृहमेधेषु गृहधर्मेषु योगेषु कामभोगोपायेषु विरागः औदासीन्यं जातमित्यर्थः
२२ यदा स्वाधीनोपि भगवतो विरागस्तदा दैवाधीनेषु को विश्रंभेत विश्वासं प्रीतिं वा कुर्यात् योगेन चेत् योगेश्वरं श्रीकृष्णमनुव्र
तः २३

भा० त०
११

श्रेयुः शापं ददुः भगवतो मते अभिप्राये कोविदाः अभिज्ञाः २४ वयःशीलादि बहुगुणोपेताः याः गावस्ताः २६ कन्याश्च हस्ति
करी जीविकापर्याप्तो २७ भगवदर्पणं यथा भवति गोविप्रार्था असवो येषां २८ इति तृतीये तृतीयोऽध्यायः ॥ चतुर्थे बं
धुनिधनं श्रुत्वात्मज्ञानलब्धये उद्धवस्योपदेशेन क्षत्ता मैत्रेयमागमत् १ तैर्ब्राह्मणैरनुज्ञाताः वारुणीं पैष्टीं मदिरां १

पुर्यां कदाचित्क्रीडद्भिर्यदुभोजकुमारकैः कोपिता मुनयः शेपुर्भगवन्मतकोविदाः २४ ततः कतिपयैर्मासै
र्वृष्णिभोजांधकादयः ययुः प्रभासं संहृष्टा रथैर्दैवविमोहिताः २५ तत्र स्नात्वा पितॄन्देवानृषीं
श्चैव तदंभसा तर्पयित्वाथ विप्रेभ्यो गा वै बहुगुणा ददुः २६ हिरण्यं रजतं शय्यां वासांस्यजिनकंबलान्
यानं रथानिभान्कन्या धरां वृत्तिकरीमपि २७ अन्नं चोरुरसं तेभ्यो दत्वा भगवदर्पणं गोविप्रार्थासवः शू
राः प्रणेमुर्भुवि मूर्द्धभिः २८ इति श्रीभागवते महापुराणे तृतीयस्कंधे विदुरोद्धवसंवादे तृतीयो
उद्धव उवाच अथ ते तदनुज्ञाता भुक्त्वा पीत्वा च वारुणीं तया विभ्रंशितज्ञाना दुरुक्तैर्मर्म पस्पृशुः ध्यायः
१ तेषां मैरेयदोषेण विषमीकृतचेतसां निम्लोचति रवावासीद्वेणूनामिव मर्दनं २ भगवान्स्वात्ममा
याया गतिं तामवलोक्य सः सरस्वतीमुपस्पृश्य वृक्षमूलमुपाविशत् ३ अहं चोक्तो भगवता प्रप ११
न्नार्तिहरेण ह बदरीं त्वं प्रयाहीति स्वकुलं संजिहीर्षुणा ४

वारुण्येव मैरेयं तस्य दोषेण निम्लोचति सति मर्दनं कर्दनं २ उपस्पृश्य सरस्वत्या माचम्य अहं चोक्तः पूर्वमेव संहारकार्यां
४॥

कु २

तदभिप्रेतं कुलसंहारादिकं केतकेतं कृतावासं अकेतनं अनाश्रयं विरजं विरजसं विदितं लक्षितं कौशं कौशेयं ७ अधिश्रि
त्य उपरि स्थापयित्वा अपाश्रितः पृष्ठतो विष्टब्धः अर्भकः बालः स कोमलो अश्वत्थो येन तं त्यक्तं पिप्पलं विषयसुखं येन तथा
पि अकृशं आनंदपूर्णं ८ द्वैपायनः सुहृत्सखा वयस्यः स्वगुरुपुत्रत्वात्पराशरशिष्यो मैत्रेय इत्यर्थः ९ प्रमोदभा

अथापि तदभिप्रेतं जानन्नहमरिंदम पृष्ठतोऽन्वगमं भर्तुः पादविश्लेषणाक्षमः ५ अद्राक्षमेकमासीनं विचिन्व
य न्दयितं पतिं श्रीनिकेतं सरस्वत्यां कृतकेतमकेतनं ६ श्यामावदातं विरजं प्रशांतारुणलोचनं दोर्भिश्चतुर्भिर्वि
दितं पीतकौशांबरेण च ७ वाम ऊरावधिश्रित्य दक्षिणांघ्रिसरोरुहं अपाश्रितार्भकाश्वत्थमकृशं त्यक्त
पिप्पलं ८ तस्मिन्महाभागवतो द्वैपायनसुहृत्सखः लोकाननुचरन्सिद्ध आससाद यदृच्छया ९ तस्यानु
रक्तस्य मुनेर्मुकुंदः प्रमोदभारानतकंधरस्य आशृण्वतो मामनुरागहाससमीक्षया विश्रमयन्नुवाच १०
श्रीभगवानुवाच वेदाहमंतर्मनसीप्सितं ते ददामि यत्तद्दुरवापमन्यैः सत्रे पुरा विश्वसृजां वसूनां मत्सिद्धिका
मेन वसो त्वयेष्टः ११

रेणानता कंधरा यस्य सः पाठांतरे प्रमोदस्य भारेण अनुरागेण सह हासो यस्यां तया समीक्षया विश्रमयन् विगत
श्रमं कुर्वन् १० ते मनसा ईप्सितं अहं अंतःस्थितो वेद्मि दाने हेतुः विश्वसृजां वसूनां च मीलितानां सत्रे हे वसो इति पुरा
पूर्वजन्मनि त्वं वसुः अभूः तदा मत्प्राप्तिकामेन त्वया अहमिष्टः अतस्तत्साधनं ददामि दास्यामि अन्यैर्मत्पराङ्मुखैर्दुःप्रापं
११

भा०ट०
१२ तस्य भाग्यमभिनंदति स एष [illegible] भावो जन्मते भवानां मध्ये चरमः यद्यस्मिन्मदनुग्रहः आसादितः लब्धः यत्पुनर्मां रहः एकांते
विशदानुवृत्त्या एकांतभक्त्या ददृश्वान् दृष्टवानसि एतद्दिष्ट्या भद्रं जातमित्यर्थः नृलोकान् नृ[illegible] त्याद्दे नजीवास्तेषां लोका
नुत्सृजंतं वैकुंठं गच्छंतमित्यर्थः १२ ददामीति यदुक्तं तद्देवानिर्दिशति पुरा पूर्वस्मिन्पाद्मे कल्पे आदिसर्गे सर्गोपक्रमे मम म
हिमालीलावभासते येन तत् १३ इत्येवमादृतश्चासावुक्तश्चाहं प्रतिक्षणं कृपापात्रो लोकरवानुग्रहस्तस्य भाजनः पात्रभूतः

स एष साध्यो चरमो भवानामासादितस्ते मदनुग्रहो यत् यन्मां नृलोकान् रह उत्सृजंतं दिष्ट्या ददृश्वान्विशदानुवृ
त्त्या १२ पुरा मया प्रोक्तमजाय नाभ्ये पद्मे निषण्णाय ममादिसर्गे ज्ञानं परं मन्महिमावभासं यत्सूरयो भागव
तं वदंति १३ इत्यादृतोक्तः परमस्य पुंसः प्रतिक्षणानुग्रहभाजनोहं स्नेहोत्थरोमा स्खलिताक्षरस्तं मुंचन्छु
चः प्रांजलिराबभाषे १४ कोन्वीश ते पादसरोजभाजां सुदुर्लभोर्थेषु चतुर्ष्वपीह तथापि नाहं प्रवृणोमि भू
मन् भवत्पदांभोजनिषेवणोत्सुकः १५ कर्माण्यनीहस्य भवोभवस्य ते दुर्गाश्रयोथारिभयात्पलायनं काला
त्मनो यत्प्रमदायुताश्रयः स्वात्मन्रतेः खिद्यति धीर्विदामिह १६

पाठांतरे प्रतिक्षणमनुग्रहस्य पात्रमिति शुचः अश्रूणि मुंचन् आबभाषे उक्तवानस्मि १४ न हि स्वात्मज्ञाननिवृत्तिमात्रका १२
मोहं किंतु त्वन्निषेवणोत्सुकः त्वयि बाधरमानावरेयं दृष्टो मे मोहो भवति अतस्त्वं तत्त्वज्ञानं देहीति प्रार्थयितुं कोन्विति चतु भार ति
र्धुर्धर्मादिषु तथापि तानहं न प्रवृणोमि १५ अघटमानाचरणं दर्शयति कर्माण्यनीहस्य निस्पृहस्य निःक्रियस्य वा अभवस्य
जन्मनो भवो जन्म कालात्मनस्तव अरिभयात् दुर्गाश्रयः पलायनं वा स्वात्मनि रतिर्यस्य तस्य बह्वीभिः स्त्रीभिर्गृहस्थाश्रम
इति यत् इह अस्मिन्विषये विदुषामपि धीः संशयेन खिद्यति १६

किंच मंत्रेषु प्रस्तुतेषु सत्सु मामाहूय वै अहो पृच्छेः अकुंठितः कालादिना अखंडः संततः सदात्मा संशयादिरहितो बोधो वि
द्याशक्तिर्यस्य मुग्धवत् अप्रमत्तः अवहितः सन् १७ स्वात्मनस्तव रहः रहस्यं तत्त्वं तस्य प्रकाशकं कस्मै ब्रह्मणे सर्वं नामत्वमा
र्गं नोस्माकं ग्रहणाय क्षमं यदि योग्यं तर्हि वद भर्तः स्वामिन् यत् यतः वृजिनं संसारदुःखं अनायासेन तरिष्यामः १८ आवे
दितो हार्दो हृदि स्थितो ऽभिप्रायो येन तस्मै १९ आराधितपादो भगवान् स एव तीर्थं गुरुः तस्मात् अधीतः अधिगतः तत्त्वात्मविबो

मंत्रेषु मां वा उपहूय यत्त्वमकुंठिताखंडसदात्मबोधः पृच्छेः प्रभो मुग्ध इवाप्रमत्तस्तन्नो मनो मोहयतीव देव १७
ज्ञानं परं स्वात्मरहःप्रकाशं प्रोवाच कस्मै भगवान्समग्रं अपि क्षमं नो ग्रहणाय भर्तर्वदांजसा यद्वृजिनं तरेम १८
इत्यावेदितहार्दाय मह्यं स भगवान्परः आदिदेशारविंदाक्ष आत्मनः परमां स्थितिं १९ स एवमाराधितपादती
र्थादधीततत्त्वात्मविबोधमार्गः प्रणम्य पादौ परिवृत्य देवमिहागतोहं विरहातुरात्मा २० सोहं तद्दर्शनाह्लाद
वियोगार्तियुतः प्रभोः गमिष्ये दयितं तस्य बदर्याश्रममंडलं २१ यत्र नारायणो देवो नरश्च भगवानृषिः मृदु ती
व्रं तपो दीर्घं तेपाते लोकभावनौ २२ शुक उवाच इत्युद्धवादुपाकर्ण्य सुहृदां दुःसहं वधं ज्ञानेनाशम
यत्क्षत्ता शोकमुत्पतितं बुधः २३

धस्य परमार्थात्मज्ञानस्य मार्गो येन तं परिवृत्य प्रदक्षिणीकृत्य २० तस्य दर्शनेन आह्लादो वियोगेनार्तिश्च ताभ्यां युतो बदर्या
श्रमस्थानं गमिष्ये २१ परोपद्रवभून्यं तीव्रं दुःखं रंद्धं अक्रोकल्पांते पानेत पश्चरत इत्यर्थः लोकभावनौ लोकानुग्रहका
रकौ २२ ज्ञानेन विवेकेन २३

ध्याति २

श्री
२४
विश्रंभात् विश्वासात् यद्यस्मात् त्वत्कृत्य प्रयोजन साधकाः संतश्चरंति न हि स्वकृतानामन्यत्कृत्यमस्तीत्यर्थः २५ तत्ताय संरा

भा॰ टी॰ विश्रंभात् विश्वासात् यद्यस्मात् त्वत्कृत्यप्रयोजनसाधकाः ... २५ तत्ताय संरा
१३ ध्यइति अयं भावः भगवतैव स्मरणमात्रेणात्रापितत्वमुपदिष्टप्रायं केवलमसंभावनादिनिवृत्तये ज्ञानी कश्चिदाराध्यः स
तथा गौराध्यो मैत्रेयो नात्विहं ममांतिकेऽत एव तमुपदेशो तस्यादिष्टत्वादिति २६ प्लावितः अपनीतः उरुतापो यस्य स तथा मत्सखसुतुर्य

सतं महाभागवतं व्रजंतं कौरवर्षभः विश्रंभादभ्यधत्तेदं मुख्यं कृष्णपरिग्रहे २४ ज्ञानं परं स्वात्मरहःप्रकाशं य
दाह योगेश्वर ईश्वरस्ते वक्तुं भवान्नोऽर्हति यद्धि विष्णोर्भृत्याः स्वभृत्यार्थकृतश्चरंति २५ उद्धव उवाच
ननु ते तत्त्व संराध्य ऋषिः कौषारवोंऽतिमे साक्षाद्भगवतादिष्टो मर्त्यलोकं जिहासता २६ शुक उवाच इति स
ह विदुरेण विश्वमूर्तेर्गुणकथया सुधया प्लावितोरुतापः क्षणमिव पुलिने यमस्वसुस्तां समुषित औपगवि र्नि
शां ततोऽगात् २७ राजोवाच निधनमुपगतेषु वृष्णिभोजेष्वधिरथयूथपयूथपेषु मुख्यः स तु कथमवशिष्ट
उद्धवो यद्धरिरपि तत्यज आकृतिं त्र्यधीशः २८ शुक उवाच ब्रह्मशापापदेशेन कालेनामोघवांछितः
संहृत्य स्वकुलं नूनं त्यक्ष्यन्देहमचिंतयत् २९ अस्माल्लोकादुपरते मयि ज्ञानं मदाश्रयं अर्हत्युद्धव एवाद्धा सं
प्रत्यात्मवतां वरः ३०

मातुर्जायाः पुलिने तीरे तां निशां क्षणमिव समुषितः औपगविरुद्धवः २७ ब्रह्मशापेन निधनं प्राप्तेषु यस्मात्त्र
याणां ब्रह्मादीनां ईश्वरः हरिरपि आकृतिं मनुष्याकारं त्यक्तवान् २८ ब्रह्मशापः अपदेशो मिषं यस्य तेन कालेन स्वश
क्तिरूपेण अमोघं वांछितं यस्य न ह्यत्र शापः प्रभुः किंतु भगवदिच्छैवेत्यर्थः २९ मयि उपरते सति ज्ञानमर्हति ज्ञा

भागवते तृतीये ३० भा॰ टी॰ १३

समाधिना चित्तैकाग्र्येण २ अन्येषां ... ध्यानां २

मतः सकाशाद्दीषदपि न्यूनो न भवति यद्यस्माद्गुणैर्विषयैर्न क्षोभितः मद्वयुनं मद्विषयं ज्ञानं लोकस्योपदिशन् ३१ एवम
नेन नाभिप्रायेण शब्दयोनिना वेदकर्त्रा ईजे पूजयामास ३३ पशुतुल्यानां विक्लवात्मनां अधीरबुद्धीनां ३४ मानसे क्षितं वि
तितं ३५ कालिंद्याः सकाशात् सिद्ध एव विदुरः कतिपयैः दिनैः स्वःसरितं गंगां प्रापद्यत प्राप्तः ३६ इति तृतीये चतुर्थः
पंचमे भगवल्लीलां क्षत्त्रा पृष्टो महामुनिः प्रोवाच महदादीनां स र्गं तत्त्वं हरेः कृतिं १ उक्तश्चतुर्भिरध्यायैः क्षत्तुर्मैत्रेयसं

नोद्धवो ण्व पि मन्न्यूनो मद्गुणैर्नार्दितः प्रभुः अतो मद्वयुनं लोकं ग्राहयन्निह तिष्ठतु ३१ एवं त्रिलोकगुरुणा सं
दिष्टः शब्दयोनिना बदर्याश्रममासाद्य हरिमीजे समाधिना ३२ विदुरोऽप्युद्धवाच्छ्रुत्वा कृष्णस्य परमात्मनः
क्रीडयोपात्तदेहस्य कर्माणि श्लाघितानि च ३३ देहन्यासं च तस्यैवं धीराणां धैर्यवर्द्धनं अन्येषां दुष्करतरं पशूनां
विक्लवात्मनां ३४ आत्मानं च कुरुश्रेष्ठ कृष्णेन मनसेक्षितं ध्यायन्गते भागवते रुरोद प्रेमविह्वलः ३५ कालिंद्याः
कतिभिः सिद्ध अहोभिर्भरतर्षभ प्रापद्यत स्वःसरितं यत्र मित्रासुतो मुनिः ३६ इति श्रीभागवते महापुराणे
तृतीयस्कंधे विदुरोद्धवसंवादे चतुर्थोऽध्यायः शुक उवाच द्वारि द्युनद्या ऋषभः कुरूणां मैत्रेयमासीन
मगाधबोधं क्षत्तोपसृत्याच्युतभावशुद्धः पप्रच्छ सौशील्यगुणाभितृप्तः १
अगाधः

गमः संवादस्तयोः स्कंधद्वयेनाथ निगद्यते २ द्युनद्या गंगाया द्वारे आसीनं तत्कर्मव्ययं तत्र हेतुः अपरिच्छिन्नो
बोधो यस्येति मैत्रेयस्य सौशील्यं आर्जवादि गुणाश्च करुणादयस्तैरभितृप्तः पाठांतरे क्षत्तुः सौशील्यादिभिरभितृप्तं

मैत्रेयं पं २

प्रश्नानेवाह सुखायेति पंचभिः तैः कर्मभिः सुखं वान्यस्य दुःखस्योपशमं चेत्यर्थः अथवान्यद्वा न विंदेत किंतद्वि
त्यपेक्षायां तस्यैव निर्देशः उपारमं चेति ततस्तैः कर्मभिः भूयः पुनः पुनर्दुःखमेव विंदेत् अत एवंविधे संसारे नो स्माकं यत् युक्तं
कर्तुं योग्यं तत्सर्वज्ञो भवान् वदेत् निरूपयितुं दैवात् प्राचीनकर्मणो निमित्तभूतात् कृष्णात् सुखस्य अतः अधर्मशीलस्य अतः
सुदुःखितस्य जनस्यानुग्रहाय भव्यानि मंगलानि भवंतः परोपकारस्वभावा एवेत्यर्थः ३ तत्तस्मात् हे साधुवर्य शं सुखरूपं व

विदुर उवाच सुखाय कर्माणि करोति लोको न तैः सुखं वान्यदुपारमं वा विंदेत भूयस्तत एव दुःखं यदत्र युक्तं भगवा
न् वदेन्नः २ जनस्य कृष्णाद्विमुखस्य दैवादधर्मशीलस्य सुदुःखितस्य अनुग्रहायेह चरंति नूनं भूतानि भव्यानि
जनार्दनस्य ३ तत्साधुवर्यादिश वर्त्म शं नः संराधितो भगवान् येन पुंसां हृदिस्थितो यच्छति भक्तिपूते
ज्ञानं सतत्वाधिगमं पुराणं ४ करोति कर्माणि कृतावतारो यान्यात्मतंत्रो भगवांस्त्र्यधीशः यथा ससर्जाग्र इ
दं निरीहः संस्थाप्य वृत्तिं जगतो विधत्ते ५ यथा पुनः स्वे ख इदं निवेश्य शेते गुहायां स निवृत्तवृत्तिः योगेश्वराधीश्व
र एक एतदनुप्रविष्टो बहुधा यथासीत् ६

र्त्मनः आदिश कथय येन वर्त्मना संराधितो हृदि स्थितः सन् तत्वाधिगमः आत्मा परोक्षं तत्सहितं पुराणं अनादि वेदप्रमाणं
कं ४ करोति कर्माणीत्यादीनां वर्णयेति पंचमश्लोके क्रियासंबंधः यथा येन प्रकारेण पुरुषरूपेण कृतावतारः सन् त्र्यधीशः १४
त्रिगुणमायानियंता अतः स्वतंत्र एव यानि कर्माणि करोति कर्माण्येव विशेषतः पृच्छति यथेत्यादिना निरीहः निःक्रियः निः
स्पृहो वा संस्थाप्य सुस्थितं कृत्वा वृत्तिं जीविकां स्वे स्वीये खे हृदयाकाशे निवेश्य स्थापयित्वा निवृत्ता निवृत्तयो यस्य गुहायां
५

मत्स्यावतारभेदैः क्रीडन् यानि यथा कर्माणि विधत्ते पुनर्विशेषं प्रष्टुमौत्सुक्यमाविः करोति मनइति सः श्लोकाः पुण्यकीर्तयः तेषां मौलि
रिवाधिक्येनोपरि विराजमानस्येत्यर्थः ७ अधिलोकनाथः लोकनाथाधिपतिः लोकान् लोकालोकपर्वताद्बहिर्भागान् अवीक्लृ
पत् कल्पयामास यत्र येषु सर्वाणि यानि सत्वानि तेषां निकायास्ते षां भेदः अधिकृतं तत्कर्माधिकारी आश्रित इति वा ८ उत अपि
येन प्रकारेण जीवानां आत्मा स्वभावः तत्कृतं कर्म तत्कृतं रूपं तत्कृता अभिधा तासां भेदं कृतवान् विश्वसृट् स्वयं आत्मयो

क्रीडन् विधत्ते द्विजगोसुराणां क्षेमाय कर्माण्यवताररूपैः मनो न तृप्यत्यपि शृण्वतां नः सुश्लोकमौलेश्चरितामृता
नि ७ यैस्तत्वभेदैरधिलोकनाथो लोकानलोकान् सह लोकपालान् अवीक्लृपद्यत्र हि सर्वसत्वनिकायभेदोधिकृतः प्र
तीतः ८ येन प्रजानामुत आत्मकर्मरूपाभिधानां च भिदां व्यधत्त नारायणो विश्वसृडात्मयोनिरेतच्च नो वर्णय विप्रवर्य
९ परावरेषां भगवन्व्रतानि श्रुतानि मे व्याससुखाद्भीक्ष्णं अतृप्नुम क्षुल्लसुखावहानां तेषामृते कृष्णकथामृ तो
तौघात् १० कस्तृप्नुयात्तीर्थपदोभिधानात्सत्रेषु वः सूरिभिरीड्यमानात् यः कर्णनाडीं पुरुषस्य यातो भवप्रदां गेहरतिं छि
नत्ति ११

निः स्वतः सिद्धः ९ ननु महाभारते त्वया सर्वं श्रुतमेव तत्राह परेति वर्णिकाः अवरे शूद्रादयः तेषां व्रतानि धर्माः मे मया अभी
क्ष्णं पुनः पुनः तेषां श्रवणेन अतृप्नुम तृप्तास्म तेषां तुच्छसुखावहत्वात् यत्कृष्णकथामृतौघः सूचितः तस्मादृते न तत्र त
त्वबुद्धिर्नास्तीत्यर्थः १० तत्र हेतुः क इति तीर्थपदः कृष्णस्य अभिधानात् कथामृतात् सत्रेषु समाजेषु सूरिभिर्नारदादिभिः ११

भा०त०
२५

माहात्मारतस्याप्यत्रैवतात्पर्यमित्याह मुनिः श्रीकृष्णोवेदव्यासोभगवद्गुणान्मोक्षधर्मंति नारायणीयाख्यानेववक्तुमिच्छुः सन्नर्थका
माद्विवर्णनंतु हरिकथायां मतिप्रवेशार्थमेवेत्याह यस्मिन्निति नृणां मतिः ग्राम्यसुखानुवादैःद्वाराभूतैःनुनिश्चितंहरेःकथायांगृ
हीतानितिर्युक्तं इतिहासस्समुच्चये कामिनो वर्णयन्कामान्लोभंलुब्धस्यवर्णयन् नरः किंफलमाप्नोतिकूपेंधमिवपातयन्लोक
हीतानितियुक्तं इतिहासैःपवित्रार्थैः पुनस्त्वैवनिंदितो अन्यथाघोरसंसारबंधहेतूञ्जनस्यतो वर्णयन्तसकथं
विज्ञावताशर्थंवर्णयित्वात्रतेनतौ इतिहासैःपविज्ञार्थैःपुनस्त्रैवनिंदितो

मुनिर्विवक्षुर्भगवद्गुणानांसखापितेभारतमाहकृष्णः यस्मिन्नृणांग्राम्यसुखानुवादैर्मतिर्गृहीतानुहरेःकथायां १२
दृधा साश्र[illegible]नस्यविवर्धमानाविरक्तिमन्यत्रकरोतिपुंसः हरेःपदानुस्मृतिनिर्वृतस्यसमस्तदुःखात्ययमाशुधत्ते १३ तान्
शोच्यशोच्यानविदोनुशोचे हरेःकथायांविमुखानघेनेन क्षिणोतिदेवोनिमिषस्तुयेषामायुर्वृथा
वादगतिस्मृतीनां १४ तदस्यकौषारवशर्मदातुर्हरेःकथामेवकथासुसारं उद्धृत्यपुष्पेभ्यइवार्त्तबंधो
शिवायनःकीर्तयतीर्थकीर्तेः १५

विज्ञानमहाकारुणिकोमुनिः १२ श्रीहरिकथामतिप्रवेशस्यफलमाह सा कथामतिर्वा अन्यत्रग्राम्यसुखेततःकिमतआह
रि हरेरिति एवंभूतायांकथायांयेनरमंते तानशोचतिशोच्यायेतेषामपिशोच्यांश्च तत्राविदो भारततात्पर्यानभि
ज्ञान्शोच्यान्येपिज्ञात्वा हरेःकथायां विमुखास्तान्तेषामपि शोच्यानिमियोऽयं अनिमिषःकालोयेषांआयुःक्षि १५
पतिअत्रहेतुर्वृथैववादगतिःस्मृतयोवाग्देहमनोव्यापाराःयेषांतत्तस्माद्धेकौषारव अस्यविश्वस्यशिवायक
थासुसारभूतांहरेःकथामेवोद्धृत्यनःकीर्तययथापुष्पेभ्योमधु मधुपःउद्धरतितद्वदुद्धृत्य १५ श्रीवासुदेवायनमः

तानिविस्तराद्द २

विशेषतःश्रीकृष्णकथाकथनीयेत्याशयेनाह सइतियोविश्वसर्गाद्यर्थंपूर्वंगृहीतशक्तिःसएवपुरुषेषुकृतावतारःसन्पु
रुषानतिक्रम्यवर्त्तमानानियानियत्कारं १६ पुंसांनिःश्रेयसमेवार्थःप्रयोजनं तेन हेतुनापृष्टः १७ बहुमानमेवाहसाध्विति
पंचभिःअधोक्षजएवात्मामनोयस्यतस्यात्मनःस्वस्यकीर्तिंसंगारवितन्वता १८ हरिःयद्गृहीतःएतच्चित्रंनभवतिकुतः
बादरायणवीर्यजे १९ तर्हिकथंशुद्रत्वंकथंवलोकानुग्राहकत्वं तत्राहमांडव्यशापादिति भ्रातुर्विचित्रवीर्यस्यक्षेत्रेक्षेत्र

सविश्वजन्मस्थितिसंयमार्थेकृतावतारःप्रगृहीतशक्तिः चकारकर्माण्यतिपूरुषाणियानीश्वरःकीर्तयतानि
मह्यं १६ शुकउवाच सएवंभगवान्पृष्टःक्षत्राकौषारविर्मुनिः पुंसांनिःश्रेयसार्थेनतमाहबहुमानयन्
१७ मैत्रेयउवाच साधुपृष्टंत्वयासाधोलोकान्साध्वनुगृह्णता कीर्तिंवितन्वतालोकेआत्मनोधोक्षजात्मनः
१८ नैतच्चित्रंत्वयिक्षत्तर्बादरायणवीर्यजे गृहीतोनन्यभावेनयत्त्वयाहरिरीश्वरः १९ मांडव्यशापाद्भगवान्
प्रजासंयमनोयमः भ्रातुःक्षेत्रेभुजिष्यायांजातःसत्यवतीसुतात् २० भवान्भगवतोनित्यंसंमतःसानुगस्यच
यस्यज्ञानोपदेशायमादिशद्भगवान्व्रजन् २१ अथतेभगवल्लीलायोगमायोपबृंहिताः विश्वस्थित्युद्भवांतार्था
वर्णयाम्यनपूर्वशः २२

त्वेनस्वीकृतायांभुजिष्यायांदास्यांयमएवत्वंजातोसि २० किंचभवानितिकुतःयस्यतावज्ज्ञानोपदेशायमांमादिष्टवान्
वकारात्स्वयमपिस्मृत्यैवोपदिष्टवानिति २१ महदादिसृष्टिक्रमेणविश्वस्थित्यादयःअथोविषयोयासांताः २२

तत्र सृष्टिलीलां वर्णयितुं ततः पूर्वावस्थामाह इदं विश्वं अग्रे सृष्टेः पूर्वं परमात्मा भगवानेक एव आस आसीत् आत्मनां जी
वानां आत्मा स्वरूपं विभुः स्वामी च नान्यत् द्रष्टृ दृश्यात्मकं किंचिदासीत् कारणात्मना सत्त्वेपि पृथक्प्रतीत्यभावादित्याह
अनानामत्युपलक्षणः नाना द्रष्टृदृश्यादिमतिभिर्नोपलक्ष्यत इति तथा यद्वा अकारप्रश्लेषं विनैवायमर्थः यः स्र
ष्टौ नानामतिभिरुपलक्ष्यते स तदा एक एवासीदिति कुतः आत्मेच्छा माया तस्यामनुगतौ लये सति यद्वा आत्मन एकाकित्वेन अव
स्थानेच्छायामनुवृत्तायामित्यर्थः २३ तत्र प्रथमं मायोद्भवप्रकारमाह द्वाभ्यां स वै द्रष्टा सन् दृश्यं नापश्यत् यतः स एकराट्

भगवानेक आसेदमग्र आत्मात्मनां विभुः आत्मेच्छानुगतावात्मा नानामत्युपलक्षणः २३ स वा एष तदा द्र
ष्टा नापश्यद्दृश्यमेकराट् मेनेसंतमिवात्मानं सुप्तशक्तिरसुप्तदृक् २४ सा वा एतस्य संद्रष्टुः शक्तिः सदसदा
त्मिका माया नाम महाभाग ययेदं निर्ममे विभुः २५ कालवृत्त्यानु मायायां गुणमय्यामधोक्षजः पुरुषेणात्म
भूतेन वीर्यमाधत्त वीर्यवान् २६

तदात्मानं मेव
एक एव तदा प्रकाशते असंतमिव मेने दृश्याभावे द्रष्टृत्वाभावात् तदाह सुप्ता मायाद्याः शक्तयो यस्य स न त्वसंतमेव मेने य २६
तः असुप्ता दृक् चिच्छक्तिर्यस्येति २४ सा वै द्रष्टुर्दृश्यानुसंधानरूपा सदसदात्मिका कार्यकारणरूपा यद्वा सत् दृश्यं असत्
अदृश्यं आत्मस्वरूपं च तयोरात्मा यस्याः तदुभयानुसंधानरूपत्वात् २५ कालवृत्त्या कालशक्त्या गुणमय्यां क्षुभितय
यायां अधोक्षजः परमात्मा आत्मभूतेन पुरुषेण प्रकृत्यधिष्ठातृरूपेण वीर्यं चिदाभासमाधत्त वीर्यवान् चिच्छक्तियुक्तः
२६

कालप्रेरितादव्यक्तात् मायातः तत्त्वपदं परित्यज्य महतो लक्षणं अतः पुल्लिंगनिर्देशो विज्ञानात्मेति सत्त्वात्मकत्वात् प्रधा
नत्वात् स्वदेहस्थं विश्वं उच्छूनबीजगतमंकुरादिरूपं वृक्षमिव व्यंजन् प्रकाशयन् यतोसौ तमोनुदतीति तमोनुदः त

त्मा
ततोभवन्महत्तत्वमव्यक्तात्कालचोदितात् विज्ञानात्मात्मदेहस्थं विश्वं व्यंजंस्तमोनुदः
२७ सोप्यंशगुणकालात्मा भगवद्दृष्टिगोचरः आत्मानं व्यकरोदात्मा विश्वस्यास्य
सिसृक्षया २८

उक्तं सात्वततंत्रे विष्णोस्तु त्रीणि रूपाणि पुरुषाख्यान्यथो विदुः प्रथमं महतः स्रष्टृ द्वितीयं त्वंडसंस्थितं तृतीयं
सर्वभूतस्थं तानि ज्ञात्वा विमुच्यत इति २७ अहंकारोत्पत्तिमाह सार्धाभ्यां सोपीति अंशः चिदाभासो निमित्तं
गुणा उपादानं कालः क्षोभकः तदात्मा तदधीनः भगवान्सर्वाध्यक्षः तद्दृष्टिगोचरः सन् स्वयमात्मानं व्यकरोत् २८
रूपांतरमनयत्

भा०त०
१७

अहंकारस्य लक्षणमाह कार्यमधिभूतं कारणमध्यात्मं कर्तृ अधिदैवं तेषामात्माश्रयः अत्र हेतुः भूतेंद्रियमनोमयः तद्विकारवान् मन इति देवानामुपलक्षणं एतदेव विभागतः प्रपंचयति वैकारिक इत्यादिना वैकारिकः सात्विकः तै

महत्तत्वाद्विकुर्वाणादहंतत्वंव्यजायत कार्यकारणकर्त्रात्मा भूतेंद्रियमनोमयः २९
वैकारिकस्तैजसश्च तामसश्चेत्यहं त्रिधा अहंतत्वाद्विकुर्वाणान्मनो वैकारिकाद्
भूत् ३० वैकारिकाश्च ये देवा अर्थाभिव्यंजनं यतः ३१ श्रीकृष्णायनमः ॥

१७

वैकारिककार्यभूतादित्यर्थः

जसो राजसः देवाश्च वैकारिकाः सात्विकाहंकारकार्यभूता इत्यर्थः यतः येभ्यः इंद्रियाधिष्ठातृभ्यः अर्थाभिव्यंजनं
शब्दादिप्रकाशो भवति ३१

त्व
तैजसान्येवेत्यन्वयः ज्ञानमयानां सात्विकेशं कामाभूदित्येवकारः तामसो भूतसूक्ष्मस्य शब्दस्यादिः कारणं यतः शब्दात्खं

तैजसानींद्रियाण्येव ज्ञानकर्ममयानि च तामसो भूतसूक्ष्मादिर्यतः खं लिंगमात्मनः ३२

आकाशो भवति आत्मनो लिंगं स्वगुणशब्दरूपेण प्रकाशकं हृदयाकाशतया वा यद्वा लिंगशरीरं आकाशशरीरं ब्रह्मेति श्रु
तेः ३२

अनिलंवायुं

नभस्वेसेः स्मात्अनुसृतंउद्भूतंस्पर्शंविकुर्वन्रूपांतरंनयत्एवंसर्वत्रतन्मात्रद्वाराभूतोत्पत्तिरितिज्ञातव्यं ३२ नभसा

कालमायांशयोगेनभगवद्वीक्षितंनभः नभसोनुसृतंस्पर्शंविकुर्वन्निर्ममेनिलं ३२
अनिलोपिविकुर्वाणोनभसोरुबलान्वितः ससर्जरूपतन्मात्रंज्योतिर्लोकस्य
लोचनं ३३
अनिलेनान्वितंज्योतिर्विकुर्वत्परवीक्षितं आधत्तांरसमयंकालविष्णुमायांशयोगतः ३४
सहितः स्वयंवोनुबलान्वितः ततोज्योतिः तेजः लोचनप्रकाशकं ३४ ३५ ओंनमोभगवतेवासुदेवाय०
ज्योतिषांभोरूसंसृष्टंविकुर्वत्ब्रह्मवीक्षितां महींगंधगुणामाधात्कालमायांशयोगतः ३५

देभव्याविदुरपाठांतरेभाव्यंकार्यं।यद्यदवरमवरंकार्यंतेषांकार्यंपरैःकारणैः अनुसंसर्गात्।अन्वयाद्यथासंख्यं यथाक्रममुत्तरोत्तरंअधिकान्गुणान्विदुः।तथाहि।नभसःशब्दएवगुणः।अन्याच्चयाभावात्।वायोस्तु स्पर्शः आकाशान्वयाच्छब्दश्च।एवंतेजसस्तेजोवत्रूपंवा।अंभसस्तानिरसश्च।महत्यास्तेगंधश्च ३६ सर्वेदेवामहदाद्यभिमानिनः।विष्णोःकलाःअंशाः।कालःलिंगंविकृतिः।मायालिंगंविक्षेपः।अंशलिंगंचेतना।तानिविद्यंतेयेषु

भूतानांनभआदीनांयद्यद्भव्यावरावरं तेषांपरानुसंसर्गाद्यथासंख्यंगुणान्विदुः ३६ एतेदेवाःक
लाविष्णोःकालमायांशलिंगिनः नानात्वात्स्वक्रियानीशाःप्रोचुःप्रांजलयोविभुं ३७ देवाऊचुः
नमामतेनाथपदारविंदंप्रपन्नतापोपशमातपत्रं यन्मूलकेतायतयोंजसोरुसंसारदुःखंबहिरुत्क्षि
पंति ३८

अतोसमस्तेननानात्वात्।परस्परासंबंधात्।स्वक्रियायांब्रह्मांडरचनायांअनीशाःअशक्ताःसंतोविभुंपरमेश्वरंप्रोचुः ३७ मिथःस्पर्द्धिष्णवोदेवानमिलंतः।परस्परंविश्वकर्मएयनीशानानिर्विण्णाहरिमीडिरेप्रपन्नानांतापोपशमेआतपत्रंछत्रं।तत्रहेतुः।यस्यपादारविंदस्यमूलंकेतआश्रयोयेषां।बहिईरतंउत्क्षिपंति।परित्यजंति।यथापांथाःस्वगृहंप्राप्यमार्गश्रममिव ३८ श्रीवासुदेवायनमः

भा०तृ० श्रमं विनिवेदयंत आहुः। हे धातः पितः यद्यस्मात् भवे संसारे। आत्मन्। आत्मनि संबोधनं वा। शर्म सुखं। न तेय-
११९ दिति पाठेः। यत्पादभजनं विना शर्म न लभंते। ननु ज्ञानादज्ञानकृततापो निवर्तते किं मदंघ्रिछायाश्रयणेनत्रा-
हुः। सविद्यां तदाश्रयणमेव विद्याप्रापकमित्यर्थः ३९ अन्यस्याश्रयणयोग्यतां ज्ञानसाधनमाहुः। मार्गं-
ति अन्वेषयंति। यत्तीर्थपदस्तव पदं तत्त्वयं प्रपन्नाः। कैः मार्गंति। छंदः सुपर्णैः वेदपक्षिभिः। तवैव मुखपद्मं नी-

धातर्यदस्मिन्भव ईश जीवास्तापत्रयेणाभिहता न शर्म आत्मन्लभंते भगवंस्तवांघ्रि
छायां सविद्यामत आश्रयेम ३९ मार्गंति यत्ते मुखपद्मनीडैः छंदः सुपर्णैर्ऋषयो वि
विक्ते यस्याघमर्षोदसरिद्वरायाः पदं पदं तीर्थपदः प्रपन्नाः ४०

राम
६८

डं येषां। यथा पक्षिणो नीडादुद्गतास्ततस्ततः परिभ्रम्य पुनस्तत्रैव विशंति। तथा वेदा अपि त्वत्त उद्गतास्त्वय्येव
पर्यवस्यंति। अतो वेदानाश्रित्य त्वत्पदं मृगयंत इति। विविक्ते असंगे मनसि। किंच अघमर्षं अघनाशकं उदकं
यस्याः सा सरित् तासु वरायाः गंगायाः पदं उद्गमस्थानं। अतो गंगामनुसेवमाना अपि तदुद्गमस्थानं त्वत्पदं
प्राप्नुवंति ४० इत्यर्थः

ननु विषयासक्तचित्तानां कुतस्तदन्वेषणं तत्राहुः यच्छ्रद्धया हृदये अवधाय ध्यात्वा वैराग्यबलं यस्य तेन ज्ञानेन धीरा भवंति
सरागे चित्ते ध्यानमेव कुतः श्रद्धया श्रवणपूर्विकया भक्त्या च संसृज्यमाने संशोध्यमाने ४१ भक्तानुग्रहं स्मरंत आहुः विश्वस्ये-
ति ४२ अंतर्यामितया नित्यं सन्निहिते अनर्थकं व्रजनमित्याशंक्याहुः यदिति सानुबंधे सोपकरणे असति तुच्छे पूर्यां स्व-
देह एव सतोपि यत्सुदूरं दुःप्रापं ४३ ननु यदि हृदिस्थस्यापि भवदाज्ञं केषांचित्सुदूरं तर्हि अन्येषामपि तथैव स्यात् अवि-

यच्छ्रद्धयाश्रुतवत्या च भक्त्या संसृज्यमाने हृदयेवधाय ज्ञानेन वैराग्यबलेन धीरा व्रजेम तत्तेंघ्रिसरोजपीठं ४१ वि श्र व्र
श्वस्य जन्मस्थितिसंयमार्थे कृतावतारस्य पदांबुजं ते व्रजेम सर्वे शरणं यदीश स्मृतं प्रयच्छत्यभयं स्वपुंसां ४२
यत्सानुबंधेसति देहगेहे ममाहमित्यूढदुराग्रहाणां पुंसां सुदूरं वसतोपि पुर्यां भजेम तत्ते भगवन्पदाब्जं ४३ तान्वा
असद्वृत्तिभिरक्षिभिर्ये पराहृतांतर्मनसः परेश अथो न पश्यंत्युरुगाय नूनं ये ते पदन्यासविलासलक्ष्म्याः ४४

ज्ञोपादित्याशंक्याहुः तानिति असद्वृत्तिभिर्बहिर्मुखैरक्षिभिरिंद्रियैः पराहृतं परमं हृतं अंतस्थं मनो येषां ते अथो अतए-
वै ते नूनं तान्न पश्यंति वै प्रसिद्धं कुतः पुनस्तेषां त्वत्संगः स्यात् कान् ते तव पदन्यासो विक्रमस्तस्य लक्ष्मीः शोभा तस्याः ये गमनं तस्य विलासो
त्वल्लीलाकथादिरतिः शोभमानास्तान् त्वद्भक्तानित्यर्थः यथ इति लक्ष्म्या इति च पाठे त्वत्पदन्यासचिन्हा सा लक्ष्या येषां तान्
पथः त्वन्मार्गभूतान् सतः मार्गान्वा श्रवणादीन्न पश्यंतीत्यर्थः यद्वा येऽत्र भूता भागवतास्ते तानुन्मत्तान्नूनं नैव पश्यंतीत्य-
न्वयः सत्संगाभावेन हरिकथाश्रवणाभावात् हृदिस्थमपि तेषां सुदूरमिति भावः ४४ श्रीकृष्णायनमः

लोकं

जा०टी० एतदेवस्फुटयतिपानेनेतिद्वाभ्यांवैराग्यंसारोबलंयस्यबोधस्यतंलब्ध्वाअन्वीयुःप्रापुःअकुंठधिष्ण्यंवैकुंठधिष्ण्यं
२० ४५ आत्मनिसमाधिर्मनस्थैर्यंसएवयोगउपायस्तस्यबलेनज्ञानयोगतःश्रमेणमोक्षः तत्सेवातस्तत्कथाश्रवणतया ना
यासेनैव अहंममताविष्टानोतुनकथंचिदितिभावः ४६ तदेवंस्तुत्वाप्रार्थयंतेचतुर्भिः तत्तस्मात्हेआद्यतेत्वदीयावयंयस्मा
त्वया लोकानांसिसृक्षयानुसृष्टाःक्रमेणोत्पादिताःत्रिभिरात्मभिःसत्वादिस्वभावैस्तएवविरुद्धस्वभावत्वात्वियुक्ताःसंतः

पानेनतेदेवकथासुधायाःप्रवृद्धभक्त्याविशदाशयाये वैराग्यसारंप्रतिलभ्यबोधंयथांजसान्वीयुरकुंठधिष्ण्यं ४५
तथापरेचात्मसमाधियोगबलेनजित्वाप्रकृतिंबलिष्ठां त्वामेवधीराःपुरुषंविशंतितेषांश्रमःस्यान्नतुसेवयाते ४६
तत्तेवयंलोकसिसृक्षयाद्यत्वयानुसृष्टास्त्रिभिरात्मभिस्म सर्वेवियुक्ताःस्वविहारतंत्रंनशक्नुमस्तत्प्रतिहर्तवेते ४७
यावद्बलिंतेजहरामकालेयथावयंचान्नमदामयत्र यथोभयेषांतइमेहिलोकाबलिंहरंतोन्नमदंत्यनूहाः ४८

यदर्थंसृष्टाःतत्स्वविहारतंत्रंत्वत्क्रीडोपकरणंब्रह्मांडंतेतुभ्यंप्रतिहर्तवेप्रतिहर्तुंसमर्पयितुमशक्नुमः अतस्त्वंनःस्वचक्षुःपरि २०
देहीतित्रयाणांश्लोकानांचतुर्थेनान्वयः ४७ असामर्थ्यमेवप्रपंचयितुंकार्यस्यातिवैचित्र्यमाह तोभोअजकालेतत्तदवसरे
बलिंनोयुंयावत्साकल्येनतेतुभ्यंहरामसमर्पयामःयथायेनप्रकारेण अन्नमदाम भक्षयामेत्यनेनान्नमात्रंच अस्माकं
ऐश्वर्यंभोगस्तवैवेत्युक्तंउभयेषांतोएनमब्रुवन् आयतनंनःप्रजानीहियस्मिन्प्रतिष्ठिताअन्नमदामेति ४८
१ तववास्माकंचयत्रस्थित्वाइमेजीवाःअनूहाःअत्यूहोहाःनिर्विघ्नाःयद्वाअनूहाःअवितर्काःनिःसंशयाइत्यर्थः तथा १
येश्रुतिः

शक्त्यामाया

त्वत्स्वरूपंत्वत्वयास्माकमेषांचकार्योपाधीनांजीवानांवृत्तिःपरिकल्पनीयाजनकत्वादित्याहुःनोस्माकंसान्वयानांसकार्याणांयद्वाअन्वेतीत्यन्वयःकारणं
स्वरूपंवस्त्वयास्माकमेषांचकार्योपाधीनांजीवानांवृत्तिःपरिकल्पनीयाजनकत्वादित्याहुःनोस्माकंसान्वयानांसकार्याणांयद्वाअन्वेतीत्यन्वयःकारणं
तात्सहितानांत्वमेवाद्यःकारणंअन्यहेतवःकूटस्थःअविक्रियःपुरुषःअधिष्ठातापुराणःपुरातनःएतदुपपादयतित्वमितिहेदेवअजएवत्वंगुणानांसत्वा
व दीनांकर्मणांजन्मादीनांचयोनौकारणभूतायांस्वशक्त्यांमायांप्रथमंरेतःआदधेनिहितवानसीत्यर्थःकीदृशंकविंसर्वज्ञंमहत्तत्वरूपं ४९
कीदृशंकविंसर्वज्ञंमहत्तत्वरूपं ४९ ततःहेआत्मन्देवासत्प्रमुखामहदादयोवयंयदर्थंबभूविमातत्किंतेका त
र्यंकरवामस्रष्टिमितिचेत्तत्राहुःतर्हिनोस्माकंस्वचक्षुःस्वीयज्ञानशक्त्यासहपरिदेहिप्रयच्छयस्मात्त्वमेवानु
ग्रहोयेषांतेयदनुग्रहाःतेषामस्माकंक्रियार्थःइयानेवएतावाननुग्रहोयेषामित्येकंवापदंत्वदीयज्ञानानि

त्वंदेवशक्त्यांगुणकर्मयोनौरेतःस्त्वजायांकविमादधेजः ४९
त्वंनःसुराणामसिसान्वयानांकूटस्थआद्यःपुरुषःपुराणः
ततोवयंसत्प्रमुखायदर्थेबभूविमात्मन्करवामकिंते त्वंनःस्वचक्षुःपरिदेहिशक्त्यादेवक्रियार्थे
दनुग्रहाणां ५० इतिश्रीभागवतेमहापुराणेतृतीयस्कंधेपंचमोध्यायः श्रीशुकउवाच
इतितासांस्वशक्तीनांसतीनामसमेत्यसः प्रसुप्तलोकतंत्राणांनिशाम्यगतिमीश्वरः १

याशक्तिभ्यामेववयंस्रष्टोक्षमाःनान्यथेत्यर्थः ५० इतितृतीयस्कंधेपंचमोध्यायः षष्ठेतेरीश्व
राविष्टैःसृष्टिमाहविराट्तनोः अधिदैवाधिभेदंचतत्रैवभगवत्कृतं १ स्वशक्तीनांमहदादीनामसमेत्यअमी
लित्वासतीनांस्थितानांप्रसुप्तलोकतंत्रंविश्वरचनायासांयद्वाप्रसुप्तजीवोपकरणानांगतिंस्थितिंदृष्ट्वाआ
विशदित्युत्तरेणान्वयः १

भा॰त॰ कालेनसंज्ञाउद्बोधोयस्याःकालयतिक्षोभयतिस्वकार्याणीतिवा।कालसंज्ञाप्रकृतिः।तांशक्तिंप्रकृत्यासहप्रवेशात्
२५ ।त्रयोविंशातितत्वानामित्युक्तं।अंतर्यामितयाआविशत् १ चेष्टारूपेण।क्रियाशक्त्याकर्मतेषांक्रियांजीवानांअदृ
ष्टंवा २ प्रबुद्धंकर्मक्रियाशक्तिर्यस्यसः।त्रयोविंशतेर्गणः।दैवेनेश्वरेणप्रेरितःमात्राभिरंशैःअधिपुरुषंविराडूद्दे

कालसंज्ञांतदादेवीं।बिभ्रच्छक्तिमुरुक्रमः त्रयोविंशातितत्वानांगणंयुगपदाविशत् १ सोनुप्रविष्टोभग
वांश्चेष्टारूपेणतंगणं भिन्नंसंयोजयामाससुप्तंकर्मप्रबोधयन् २ प्रबुद्धकर्मादैवेनत्रयोविंशतिको
गणः प्रेरितोजनयत्स्वाभिर्मात्राभिरधिपूरुषं ३ परेणविशतास्वस्मिन्मात्रयाविश्वसृग्गणः चु
क्षोभान्योन्यमासाद्ययस्मिंल्लोकाश्चराचराः ५ हिरण्मयःसपुरुषःसहस्रपरिवत्सरान् आंडकोश
उवासाप्सुसर्वसत्वोपबृंहितः ६ श्रीगोपालकृष्णोजयतितराम्॥ ॥ ॥ ॥ ॥

राम

हं। ४ जन्मनमेवाह।परेणईश्वरेणविश्वसृजांगणःतत्वानांगणःमात्रयाचुक्षोभपरिणतः।नसर्वमित्मना
यस्मिंल्लोकाःस्थिताः ५ सपुरुषोयोधिपुरुषइत्युक्तः।आंडकोशेब्रह्मांडमध्ये।सर्वैःसत्वैरनुशायिभिर्जीवैःस
हितः ६

गर्भःकार्यरूपोविराट्देहः।दैवशक्तिर्ज्ञानशक्तिः।तयाएकधाहृदयावच्छिन्नचैतन्यरूपेणकर्मशक्तिःक्रियाशक्तिः
तयादशधाप्राणरूपेणप्राणादयःपंच।नागःकूर्मश्चकृकरोदेवदत्तोधनंजयइत्येतेपंचेवंवृत्तिभेदेनदशविधःप्रा
णः।आत्मशक्तिःभोक्तृशक्तिःतया।अध्यात्मादिभेदेनत्रिधाआत्मानंविभक्तंकृतवान् ७ एवंविभागसामर्थ्या
यतस्योत्कर्षमाह।एषहीति।अशेषसत्वानांप्राणिनामात्मा।व्यष्टीनांतदंशत्वात्।अंशोजीवः।अवतारत्वोक्ति

सवैविश्वसृजांगर्भोदेवकर्मात्मशक्तिमान् विबभाजात्मनात्मानमेकधादशधात्रिधा ७
एषह्यशेषसत्वानामात्मांशःपरमात्मनः आद्योवतारोयत्रासौभूतग्रामोविभाव्यते ८ सा
ध्यात्मःसाधिभूतश्चसाधिदैवइतित्रिधा विराट्प्राणोदशविधएकधाहृदयेनच ९ स्मर
न्विश्वसृजामीशोविज्ञापितमधोक्षजः विराजमतपत्स्वेनतेजसैषांविवृत्तये १० ॥ ॥

स्मिन्नारायणाविर्भावाभिप्रायेण ८ पूर्वश्लोकार्थंविवृणोति।साध्यात्मः।अध्यात्मानींद्रियाणितत्सहितः
विराडितिसर्वत्र ९ अध्यात्मादिभेदंप्रपंचयितुमाह।स्मरन्निति।विज्ञापितंयावद्बलिंतेजहरामेत्यादितेनतेन
जसाविवृत्त्याअतपत्।एवंकरिष्यामीत्यालोचितवान्।यस्यज्ञानमयंतपइतिश्रुतेः।विवृत्तयेविविधवृत्तिला
भाय १०

मेमत्तःशृणु ११ आयतनान्येवाह।तस्याग्निरित्यादिचतुर्दशभिः।आस्यं निर्भिन्नं पृथकूजातं।पदं स्वस्थानं।स्वां
शेन स्वरात्याावासहाविशत्।असौजीवःवक्तव्यंप्रतिपद्यते।शब्दमुच्चारयतीत्यर्थः।सर्वत्रयन्निर्भिन्नंतदधिष्ठा

अथतस्याभित प्तस्यकतिवायतनानिच निरभिद्यंतदेवानांतानिमेगदतःशृणु ११ त
स्याग्निरास्यंनिर्भिन्नंलोकपालोविशत्पदं वाचाखांशेनवक्तव्यंययासोप्रतिपद्यते १२ नि
र्भिन्नंतालुवरुणोलोकपालोविशाद्धरेः जिह्वयांशेनवरसंययाऽसोप्रतिपद्यते १३ निर्भि
न्नेअश्विनोनासेविष्णोराविशतांपदं घ्राणेनांशेनगंधस्यप्रतिपत्तिर्यतोभवेत् १४ नि
र्भिन्ने अक्षिणी त्वष्टालोकपालोविशत्प्रभोः चक्षुषांशेनरूपाणांप्रतिपत्तिर्यतोभवेत् १५
निर्भिन्नान्यस्यचर्माणिलोकपालोनिलोविशत् प्राणेनांशेनसंस्पर्शंयेनासोप्रतिपद्यते १६
कर्णावस्यविनिर्भिन्नौधिष्ण्यंस्वंविविशुर्दिशः श्रोत्रेणांशेनशब्दस्यासिद्धिंयेनप्रपद्यते १७

नं।अस्यादिप्रथमांतमधिदैवं।वागादीद्रियंतृतीयांतमध्यात्मंप्रतिपत्तव्यमधिभूतं १२ हरेःविराजः १३ १४
त्वष्टाआदित्यः १५ प्राणेनेतिप्राणवद्देहव्यापिनात्वगिंद्रियेणेत्यर्थः १६ शब्दस्यासिद्धिंज्ञानं १७ श्रीराम

राम

त्वकूचर्म।ओषधीःओषधयः।त्वगिंद्रियस्येवस्थानभेदेनाविषयद्वयंकंडूःस्पर्शश्चतत्रवायंनामभेदैश्चेतिद्धितीे
यस्कंधेएवआख्यातं १८ कःप्रजापतिः १९ २० स्वर्पतिःस्वर्गस्यपतिः।वार्त्तयाक्रयविक्रयादिरूपयावृत्तिंजी

त्वगस्यचविनिर्भिन्नाविविशुर्धिष्ण्यमोषधीः अंशेनरोमभिःकंडूंयैरसोप्रतिपद्यते १८ मेढ्रंतस्य
विनिर्भिन्नंस्वधिष्ण्यंकउपाविशत् रेतसांशेनयेनासावानंदंप्रतिपद्यते १९ गुदंपुंसोविनिर्भिन्नं
मित्रोलोकेशआविशत् पायुनांशेनयेनासोविसर्गंप्रतिपद्यते २० हस्तावस्यविनिर्भिन्नाविंद्रः
स्वर्पतिराविशत् वार्त्तयांशेनपुरुषोययावृत्तिंप्रपद्यते २१ पादावस्यविनिर्भिन्नोविष्णुर्लोकेशः
आविशत् गत्यास्वांशेनगंतव्यंययासोप्रतिपद्यते २२ हृदयंचास्यनिर्भिन्नंचंद्रमाधिष्ण्यमाविश
त् मनसांशेनयेनासोविक्रियांप्रतिपद्यते २३ आत्मानंचास्यनिर्भिन्नमभिमानोविशत्पदं कर्म
णांशेनयेनासोकर्त्तव्यंप्रतिपद्यते २४ सत्वंचास्यविनिर्भिन्नंमहान्धिष्ण्यमुपाविशत् चित्तेनां
शेनयेनासोविज्ञानंप्रतिपद्यते २५

विकां २१ २२ विक्रियांसंकल्पादिरूपां २३ आत्मानंअहंकारं।अभिमन्यतेअनेनेत्यभिमानोरुद्रःकर्मणा
अहंकृत्याकर्त्तव्यमितिक्रियां २४ सत्वमितिबुद्धिचित्तयोरभेदेननिर्देशः।महानितिब्रह्माचित्तेनचेतनया २५

भा०टी० त्रिलोकोत्पत्तिमाह। शीर्ष्ण इति त्रयः परिणामाः २६ एतदेव प्रपंचयति द्वाभ्यां। आर्त्यंतिके नर्ऊर्जितेन पणेन व्यव
२३८ हारे। पणं तेया गादिना व्यवहरंतीति पण्यो मनुष्याः। तान् अनु तदुपकारभूताये गवादयस्तेपि धरां प्रपेदिरे २७
तृतीयं तमः। तदीयेन तामसेन। उभयोर्द्यावापृथिव्योरंतरं। मध्यं व्योम अंतरिक्षं। तदेव भगवतो नाभिस्थामा

बुद्धिं चास्य विनिर्भिन्नां वागीशो धिष्ण्यमाविशत् बोधेनांशेन बोद्धव्य प्रतिपत्तिर्यतो भवेत् २६
शीर्ष्णोस्य द्यौर्धरा पद्भ्यां खं नाभेरुदपद्यत गुणानां वृत्तयो येषु प्रतीयंते सुरादयः २६ आत्यं
तिकेन सत्त्वेन दिवं देवाः प्रपेदिरे धरां रजःस्वभावेन पण्यो ये च तान् अनु २७ तार्त्तीयेन स्व
भावेन भगवन्नाभिमाश्रिताः उभयोरंतरं व्योम ये रुद्रपार्षदां गणाः २८ मुखतोवर्त्तत
तब्रह्म पुरुषस्य कुरूद्वह यस्तून्मुखत्वाद्वर्णानां मुख्योभूद्ब्राह्मणो गुरुः २९

भूतादिनां

श्रिता रुद्रपार्षदाः रुद्रस्य पार्षदानां गणाः २८ अवर्त्तत प्रवृत्तं। ब्रह्म वेदः। यस्तून्मुखत्वात्। स मुखोद्भवत्वा २३
त्। वर्णानां मुख्यः। मुखमिव प्रथमगुरुश्चाभूत्। सोपि मुखतोवर्त्ततेत्यनुषंगः। अध्यापनादिर्ब्राह्मणस्य वे
दो वृत्तिः। तया वृत्त्या सह ब्राह्मणो मुखतो जात इत्यर्थः। एवमुत्तरवर्णत्रयेपि ज्ञातव्यम् २९ ना

अनुसृतः

क्षत्रं पालनरूपा वृत्तिः तत्क्षत्रमनुव्रतः क्षत्रियोपि बाहुभ्यो वर्त्तत इत्यर्थः तदनुव्रतत्वमेवाह य इति पौरुषः पुरु
षस्य विष्णोः रंध्रः कंटकाश्चोरादयस्तेभ्यो यत्क्षतं उपद्रवं तस्मात् त्रायते रक्षत इति ३० विशः कृष्यादिव्यवसायाः लोकस्य वृत्ति
करीः जीविकाहेतवः तस्य विष्णोरूर्वोः प्रवृत्ताः तदुद्भवाः ऊरुजः वार्त्ताजीविकां यः स्ववृत्त्या संपादितवान् ३१ तस्यां निमित्त
भूतायां यस्य वृत्त्या हरिः स्वयमेव तुष्यते ३२ यद्यस्माज्जाताः गुरुत्वाज्जनकत्वात् वृत्तिप्रदत्वाच्च हरेराराधनं तेषां परो धर्म

बाहुभ्योवर्त्तत क्षत्रं क्षत्रियस्तदनुव्रतः यो जातस्त्रायते वर्णान् पौरुषः कंटकक्षतात् ३० विशोवर्त्तत तस्योर्वोर्लो
कवृत्तिकरीर्विभोः वैश्यस्तदुद्भवो वार्त्तां नृणां यः समवर्त्तयत् ३१ पद्भ्यां भगवतो जज्ञे शुश्रूषा धर्मसिद्धये त
स्यां जातः पुरा शूद्रो यद्वृत्त्या तुष्यते हरिः ३२ एते वर्णाः स्वधर्मेण यजंति स्वगुरुं हरिं श्रद्धयात्मविशुद्ध्यर्थं
यज्जाताः सह वृत्तिभिः ३३ एतत्क्षत्तर्भगवतो दैवकर्मात्मरूपिणः कः श्रद्दध्यादुपाकर्तुं योगमायाबलोदयं ३४
तथापि कीर्त्तयाम्यंग यथामति यथाश्रुतं कीर्त्तिं हरेः स्वां सत्कर्तुं गिरमन्याभिधासतीं ३५

इत्यर्थः ३३ भोः क्षत्तः दैवकर्मात्मरूपिणः कालकर्मस्वभावशक्तिमतः भगवतो योगमायाबलेनोज्जृंभितमेतद्विराड्रूपं उपा
कर्तुं साकल्येन निरूपयितुं कः श्रद्दध्यात् इच्छेत् इच्छायुक्ता व्याख्यानिरूपणं तु दूरत इत्यर्थः ३४ अंग विदुर तथापि हरेः कीर्त्तिं
कीर्त्तयामि यथाश्रुतं गुरुमुखात् तदपि न सर्वात्मना किंतु यथामति स्वमत्यनुसारेण अन्याभिधा हरिव्यतिरिक्ताभि
धानं तया असतीं मलिनां स्वीयां वाचं सत्कर्तुं पवित्रीकर्तुं ३५

भा०टी० अज्ञात्वापि यथामति कीर्तने श्रवणे वा आवश्यकं कैवल्यमित्याह एकांततो लाभं नु निश्चितमित्याहुः श्रुतेः श्रोत्रस्य उपा
स्कं ३ कृतायां निरूपितायां उपसंप्रयोगं सन्निधावर्षणं ३६ न चातीवज्ञाने निर्बंधः कर्तव्यः ब्रह्मणोपि दुर्ज्ञेयत्वादित्याह आत्म
२४ नो हरेर्महिमा योगविपक्वयापि संवत्सरसहस्रांतेपि आदिकविना ब्रह्मणापि किमवसित इति काक्वा अत एतावानिति न
ज्ञात एवेत्यर्थः ३७ यद्यस्मात्स्वयमपि आत्मा हरिः आत्मवर्त्म स्वमायागतीः एतावदिति न वेद अनंतत्वात् ३८ अतो दु

एकांतलाभं वचसो नु पुंसां सुश्लोकमौलेर्गुणवादमाहुः श्रुतेश्च विद्वद्भिरुपाकृतायां कथासुधायामुपसंप्रयो
गं ३६ आत्मनोवसितो वत्स महिमा कविनादिना संवत्सरसहस्रांते धिया योगविपक्वया ३७ अतो भगव
तो माया मायिनामपि मोहिनी यत्स्वयं चात्मवर्त्मात्मा न वेद किमुतापरे ३८ यतोप्राप्य न्यवर्तंत वाच
श्च मनसा सह अहं चान्य इमे देवास्तस्मै भगवते नमः ३९ इति श्रीभागवते महापुराणे तृतीयस्कंधे षष्ठो
ध्यायः शुक उवाच एवं ब्रुवाणं मैत्रेयं द्वैपायनसुतो बुधः प्रीणयन्निव भारत्या विदुरः प्रत्यभाषत १

र्ज्ञेयत्वात्केवलं नमस्करोति यत इति यस्य ज्ञानाय प्रवृत्ता वाचो पि मनसा सह तमप्राप्यैव न्यवर्तंत दुर्ज्ञेयत्वात न केवलं वाङ्म
नसी अहं अहंकारस्याधिष्ठाता रुद्रोपि इमे इंद्रियाधिष्ठातारो देवा अन्ये च तृतीये षष्ठः सप्तमे संशयच्छेदो प्रति नंघमु ३४
नेर्वचः पुनः क्षत्राकृता नाना प्रश्नाः सम्यगुदीरिताः १ अथ ते भगवल्लीला योगमायोपबृंहिता इत्यादिना मायागुणैर्लील
या भगवान् सृष्ट्यादि करोतीत्येवं ब्रुवाणं भारत्या प्रार्थनारूपया प्रीणयन्निवेति अतिप्रायाज्ञानेनाक्षेपात् १

४ सत्यत्वान्नान्यतः घटादिवदद्वितीयत्वात् । एवमेतैर्यस्य बोधो न लुप्यते स कथमजया युज्येत । अजा चात्राविद्यैव न माया । तस्या अवबोधेन ४३

अ२ मि०

का० ट० २४ एतज्जीवस्याविद्याश्रयत्वे घटेत ननु तत्संभवतीत्याह देशत इति यो सौ देशादिभिरविलुप्तावबोध आत्मा जीवः
ब्रह्मस्वरूपत्वात् स कथमजयाविद्यया युज्येत तत्र देशतो दीपप्रभाया इव लोपो नास्ति सर्वगत्वात् न कालतो विद्युत
इव नित्यत्वात् नावस्थातः स्मृतिवत् अविक्रियत्वात् न स्वतः स्वप्नवत् विरोधाभावात् ५ किंच ब्रह्मस्वरूपत्वादेव जी
अ३ वस्य संसारोऽपि न विद्यत इति आक्षिपति सर्वक्षेत्रेष्ववस्थितो भोक्ता वस्तुतो भगवानेव चिद्रूपत्वे न तद्व्यतिरे

देशतः कालतो योऽसाववस्थातः स्वतोऽन्यतः । अविलुप्तावबोधात्मा स युज्येताजया कथं ५
भगवानेक एवैष सर्वक्षेत्रेष्ववस्थितः । अमुष्य दुर्भगत्वं वा क्लेशो वा कर्मभिः कुतः ६ एत
स्मिन्मे मनो विद्वन्खिद्यतेऽज्ञानसंकटे । तन्नः पराणुद विभो कश्मलं मानसं महत् ७ श्रीशुक उवाच

कत्वाभावात् एवं सति अमुष्य जीवस्य दुर्भगत्वं आनंदादितिरोभावः कर्मभिर्हेतुभूतैः क्लेशो वा कुतः कर्मसंबंधाभावा २
त् अन्यथा ईश्वरस्यापि तत्प्रसंगः स्यादिति भावः ६ अज्ञानमेव संकटं दुर्गं तस्मिन् तत्तु मानसं कश्मलं मो
हं पराणुद अपाकुरु चोदितः आक्षिप्तः स्मयन्निव बोधं आविःकुर्वन्निव वस्तुतः तत्तु गतस्मयः भगवतोऽचिं
त्यशक्तेरेव चोदितः क्षत्तात्तजिज्ञासुना मुनिः । प्रत्याह भगवच्चित्तः स्मयन्निव गतस्मयः ॥ ८

अ

भगवतोऽचिंत्यशक्तेरीश्वरस्य सेयं माया न येन न तर्केण विरुध्यत इति यत् तर्के विरोधमेवानुवदति विमुक्तस्यैव पुंसो
विद्यया बंधनं कार्पण्यं चेति ९ अत्रोदाहरणमेवाह य द्यथा अर्थेन शिरश्छेदादिना विनापि उपद्रष्टुः स्वप्नसाक्षिणश्छि
न्नं इत्यादि विपर्ययः केवलं मृषैव प्रतीयते तद्वत् १० तर्हीश्वरस्यापि किं प्रतीयेत तत्राह यथा जले प्रतिबिंबितस्यै
व चंद्रमसो जलोपाधिकृतो कंपादिधर्मो दृश्यते न त्वाकाशे स्थितस्य तथा अनात्मनो देहादेर्धर्मः असन्नपि तद

मैत्रेय उवाच सेयं भगवतो माया यन्नयेन विरुध्यते । ईश्वरस्य विमुक्तस्य कार्पण्यमुत बंधनं ९ यद
र्थेन विनामुष्य पुंस आत्मविपर्ययः । प्रतीयत उपद्रष्टुः स्वशिरश्छेदनादिकः १० यथा जले चंद्रमसः कंपा
दिस्तत्कृतो गुणः । दृश्यतेऽसन्नपि द्रष्टुरात्मनोऽनात्मनो गुणः ११ स वै निवृत्तिधर्मेण वासुदेवानुकंप
या । भगवद्भक्तियोगेन तिरोधत्ते शनैरिह १२ यदेंद्रिय उपरामोऽथ द्रष्ट्रात्मनि परे हरौ । विलीयंते तदा
क्लेशाः संसुप्तस्येव कृत्स्नशः १३ अशेषसंक्लेशशमं विधत्ते गुणानुवादश्रवणं मुरारेः । कुतः पुन
स्तच्चरणारविंदपरागसेवारतिरात्मलब्धा १४

भिमानिनो द्रष्टुरात्मनो जीवस्यैव न त्वीश्वरस्येत्यर्थः तन्निवृत्त्युपायमाह स वै आत्मनो गुणः निवृत्तिधर्मेण वासुदेवा
नुकंपा तया च तस्मिन् भक्तियोगः तेन तिरोधत्ते अदृश्यो भवति शनैरित्यनेन साधनानुसारेण तु उक्तं १२ तर्हि सर्वानि
नर्थनिवृत्तिः कदेत्यपेक्षायामाह यदेंद्रियाणामुपरामो नैश्चल्यं च द्रष्टुरात्मा निर्यंतर्यामिरूपे अथ अनंतरमेव कृत्स्न
क्लेशविलयमात्रे दृष्टांतः संसुप्तस्यैवेति ननु पुनरुक्ताने १२ भक्तियोगेन क्लेशनिवृत्तिर्दर्शयिति अशेषेति गुणानामनुवा

रूप३

उत्तरमभिनंदन्नात्मनः कृतार्थतामाविःकरोति संछिन्न इति षड्भिः चिद्रूपत्वाविशेषेपि कथमीश्वरस्य जगत्कर्तृत्वादि कथं वा जीवस्य संसार इति यः संशयो ममासीत् स तव सूक्तं सो यपत्रिकं वा कृपमेवासिः खड्गस्तेन छिन्नः अतः इदानीमेव मनः उभयत्रापि ईश्वरस्वातंत्र्ये जीवपारतंत्र्ये च संप्रधावति सम्यक् प्रविशति एवं शास्त्रविलुप्तावबोधस्यात्मनः कथमविद्यया बंधः कुतो वा तन्निवृत्तिरिति संशयः उभयत्रेति बंधे मोक्षे चेत्यर्थः १५ यस्मात्त्वया साधु व्यवहृतं किं तत् हरेः शक्तिः सा आत्ममाया

विदुर उवाच संछिन्नः संशयो मह्यं तव सूक्तासिना विभो उभयत्रापि भगवन्मनो मे संप्रधावति १५ साध्वेतद्व्याहृतं विद्वन्नात्ममायायनं हरेः आभात्यपार्थं निर्मूलं विश्वमूलं न यद्बहिः १६ यश्च मूढतमो लोके यश्च बुद्धेः परं गतः तावुभौ सुखमेधेते क्लिश्यत्यंतरितो जनः १७ अर्थाभावं विनिश्चित्य प्रतीतस्यापि नात्मनः तां चापि युष्मच्चरणसेवयाहं पराणुदे १८

जीवविषया तदयनं तदाश्रयमेतत् दुर्लभत्वादिकं भातीति यद्यस्मात् स्वशिरश्छेदादिवदपार्थमवस्तु हृतं मूलशून्यं च यस्मादस्य विश्वस्य मूलं स्वाश्रयानं विना हि बहिर्नास्ति १६ अल्पज्ञत्वात्पूर्वं मम संशयो जात इत्याह यश्चेति मूढतमो देहाद्यासक्तबुद्धेः प्रकृतेः परमीश्वरं प्राप्तस्तौ सुखं यथा भवति तथा एधेते जीवत इत्यर्थः ईषत्संशयक्लेशाभावात् यस्तु दुःखानुसंधाने प्रपंचं जिहासति स्वानंदसंवेदनाभावात् हातुं न शक्नोति स तु क्लिश्यतीत्यर्थः १७ इदानीं तु कृतार्थोस्मि यतस्त्वया संशयश्छिन्नः केवलं बाधितानुवृत्तिरेवावशिष्टा सापि युष्मत्प्रसादात् निवर्ति-
ष्यत इत्याह नात्मनः अनात्मनः प्रपंचस्य प्रतीतस्यापि अर्थाभावं अर्थो नास्ति किंतु प्रतीतिमात्रं युष्मच्चरणसेव

तीव्रः नाशयति

मधुद्विषः पादयोरतिरासः प्रेमोत्सवः दुर्वारः स्वाभाविकः व्यसनं संसारमर्दयति इति तथा १९ अहो दुर्लभं प्राप्तं मयेत्यर्थः दुरापा दुर्लभा वैकुंठस्य विष्णोस्तल्लोकस्य वा वर्त्मस्थः मार्गभूतेषु महत्सेवया हरिकथाया श्रवणं ततो हरौ प्रेम तेन देहाद्यनुसं-
धानमपि निवर्तत इति तात्पर्यं २० अर्थांतरं प्रष्टुं तदुक्तमनुवदति त्रिभिः सृष्ट्वेति विकारैरिंद्रियादिभिः सहितानि उद्धृत्य तदंशैर्वैराजं सृष्ट्वा आविष्टस्य स्वरूपमाह यमिति विराजं विशिनष्टि यत्रेति इमे विश्वे सर्वे लोकाः सविकाराः आसंको

यत्सेवया भगवतः कूटस्थस्य मधुद्विषः रतिरासो भवेत्तीव्रः पादयोर्व्यसनार्दनः १९ दुरापा ह्यल्पतपसः सेवा वैकुंठवर्त्मसु यत्रोपगीयते नित्यं देवदेवो जनार्दनः २० सृष्ट्वाग्रे महदादीनि सविकाराण्यनुक्रमात् तेभ्यो विराजमुद्धृत्य तमनु प्राविशद्विभुः २१ यमाहुराद्यं पुरुषं सहस्रांघ्र्यूरुबाहुकं यत्र विश्व इमे लोकाः सविकाशं आसते २२ यस्मिन्दशविधः प्राणः सेंद्रियार्थेंद्रियस्त्रिवृत् त्वयेरितो यतो वर्णास्तद्विभूतीर्वदस्व नः २३ यत्र पुत्रैश्च पौत्रैश्च नप्तृभिः सह गोत्रजैः प्रजा विचित्राकृतय आसन्याभिरिदं ततं २४ प्रजापतीनां सपतिश्चक्लृपे कान्प्रजापतीन् सर्गांश्चैवानुसर्गांश्च मनून्मन्वंतराधिपान् २५

२३
चेतनः प्राणः हृत्यः पंच नागादयः पंचेति एवं दशविधः इंद्रियाणि अर्थाश्च इंद्रियाणि चेति पुनरुक्तिः तद्देवतोपलक्षणार्था तत्सहितः सर्वोपबृंहकत्वात् प्राणस्य तत्त्वान्तिस्यं एवं त्रिवृत् त्रिविधः तस्य विभूतीर्ब्राह्मणाद्याः विसर्गराश्च वार्याः यैस्त्रया सुहृदं विश्वं ततं व्याप्तं एवमेतत्पुराणप्रष्टो मैत्रेयो भगवान् किलेति परीक्षित्प्रश्नोत्तरतया विदुरमैत्रेयसंवादः प्रस्तावितः
२२ प्राणस्त्वयेरित उक्तः २

भा०त०
२७

हेमैत्रेय आत्मसंज्ञं स्थानं संनिवेशं सर्गाणां सव्यूहं संविभागं गार्भस्वेदद्विजोद्भिदां गर्भाः जरायुजाः स्वेदाः अण्डा
न्यां च जाताः स्वेदजाः उद्भिज्जश्च तेषां सर्गादीन् आश्रयं च सृजतः २८ रूपं लिंगं शीलमाचारः स्वभावः शमादिः
ततः विकर्षणं विभागान् वितानानि विस्तारान् नैष्कर्म्यस्य ज्ञानस्य तदुपायस्य च सांख्यस्य पथः मार्गान् तंत्रं वे
त्यर्थः पाखंडानां पंथाः प्रवृत्तिः तदेव वैषम्यं निमित्तान् उपायान् परस्पराविरोधेन ग्रहादीनां कालचक्रे संस्थितिं ये
न मार्गेण संतुष्येत् येषामिति यादृशानां अनापृष्टमिति अपृष्टमपि योग्यं वक्तव्यमिति भावः प्रतिसंक्रमः प्रल

एतेषामपि वंशांश्च वंश्यानुचरितानि च उपर्यधश्च ये लोका भूमेर्मित्रात्मजासते २६ तेषां संस्थां प्रमा य:
णं च भूर्लोकस्य च वर्णय तिर्यङ्मानुषदेवानां सरीसृपपतत्रिणां २७ वद नः सर्गसंव्यूहं गार्भस्वेदद्विजो
द्भिदां गुणावतारैर्विश्वस्य सर्गस्थित्यप्ययाश्रयं सृजतः श्रीनिवासस्य व्याचक्ष्वोदारविक्रमं २८ वर्णा
श्रमविभागांश्च रूपशीलस्वभावतः ऋषीणां जन्मकर्माणि वेदस्य च विकर्षणं यज्ञस्य च वितानानि
योगस्य च पथः प्रभो नैष्कर्म्यस्य च सांख्यस्य तंत्रं वा भगवत्स्मृतं ३० पाखंडपथवैषम्यं प्रतिलोमनि
वेशनं जीवस्य गतयो याश्च यावतीर्गुणकर्मजाः ३१ धर्मार्थकाममोक्षाणां निमित्तान्यविरोधतः वा
र्त्ताया दंडनीतेश्च श्रुतस्य च विधिः पृथक् ३२ श्राद्धस्य च विधिं सम्यक् पितॄणां सर्गमेव च ग्रहनक्षत्र
ताराणां कालावयवसंस्थितिं ३३ दानस्य तपसो वापि यच्चेष्टापूर्तयोः फलं प्रवासस्थस्य यो धर्मो य
श्च पुंस उतापदि ३४ येन वा भगवांस्तुष्येद्धर्मयोनिर्जनार्दनः संप्रसीदति वा येषामेतदाख्याहि चान २७
घ ३५

वा ३५
तत्र प्रलये इमं परमेश्वरं शयानं राजानमिव चामरग्राहिणः के अनुशेरते शयानं अनुस्वपंति पुरुषस्य संस्था
नं जीवस्य तत्त्वं परमेश्वरस्य रूपं येनांशेन तयोरैक्यं तथा ज्ञानं च नैगमं औपनिषदं यानि सूरिभिः प्रोक्तानि त
स्य ज्ञानस्य साधनानि तानि ब्रूहि ३८ गुरुविनेतन्न भवतीत्याह स्वत इति ३९ मे प्रश्नान् मे[illegible]तात स्निग्ध
त्वादिति अन्वयभेदान्न मे परस्य पौनरुक्त्यं ४० तत्त्वोपदेशेन जीवाभयप्रदानस्य ४१ पुराणे कल्पते प्रका

अनुव्रतानां शिष्याणां पुत्राणां च द्विजोत्तम अनापृष्टमपि ब्रूयुर्गुरवो दीनवत्सलाः ३६ तत्त्वा
नां भगवंस्तेषां कतिधा प्रतिसंक्रमः तत्रेमं क उपासीरन् क उस्विदनुशेरते ३७ पुरुषस्य
च संस्थानं स्वरूपं वा परस्य च ज्ञानं च नैगमं यत्तद्गुरुशिष्यप्रयोजनं ३८ निमित्तानि
च तस्येह प्रोक्तान्यनघ सूरिभिः ३८ स्वतो ज्ञानं कुतः पुंसां भक्तिर्वैराग्यमेव वा ३९ एतान्मे पृच्छ
तः प्रश्नान् हरेः कर्मविवित्सया ब्रूहि मे ज्ञस्य मित्रत्वादजया नष्टचक्षुषः ४० सर्वे वेदाश्च यज्ञा
श्च तपो दानानि चानघ जीवाभयप्रदानस्य कुर्वीरन् कलामपि ४१ शुक उवाच स इत्थमापृ
ष्टपुराणकल्पः कुरुप्रधानेन मुनिप्रधानः प्रवृद्धहर्षो भगवत्कथायां संचोदितस्तं प्रहसन्नि
वाह ४२
इति श्रीभागवते महापुराणे तृतीयस्कंधे सप्तमोध्यायः

शात इति पुराणकल्पो बहुतुलितोर्थः आपृष्टः पुराणकल्पोयं मुनिप्रधानः सः ४२ इति तृतीये सप्तमः
स

भा०टी०
२८

अष्टमे समनंदुहृतानां नाभेरूजलशायिनः तमजानन् जले विस्यन् तपसा तोषयन् विभुं १ श्रोतारमभिनं
दति सतां सेवितुं योग्यः बत अहो यद्यस्मादुं वंशो बभूविथ जातोसि कथंभूतः भगवानेव प्रधानं भूतो यस्य सः अ
त्र हेतुः अभीक्ष्णं नूतनयसि नवीनां करोषि अल्पस्य सुखाय महत् दुःखं प्राप्तानां तस्य दुःखस्य विरमाय प्रवर्त
ये समारभे २ कोसौ भगवान् केभ्यश्च ऋषिभ्यः आह कथं वक्तव्यमाप्तमित्यपेक्षायामाह आसीनमितिस

मैत्रेय उवाच सत्सेवनीयो बत पूरुवंशो यल्लोकपालो भगवत्प्रधानः बभूविथेहाजितकी
र्त्तिमालां पदे पदे नूतनयस्यभीक्ष्णं १ सोहं नृणां क्षुल्लसुखाय दुःखं महद्गतानां विरमाय त
स्य प्रवर्त्तये भागवतं पुराणं यदाह साक्षाद्भगवानृषिभ्यः २ आसीनमुर्व्यां भग
वंतमाद्यं संकर्षणं देवमकुंठसत्वं विवित्सवस्तत्वमतः परस्य कुमारमुख्या मुनयो
न्वपृच्छन् ३ स्वमेव धिष्ण्यं बहुमानयंतं यं वासुदेवाभिधमामनंति प्रत्यग्धृताक्षांबुजकोश २८
मीषदुन्मीलयंतं विबुधोदयाय ४

संनिः उर्व्यां पाताल तले अकुंठसत्वं अप्रतिहतज्ञानं अतः संकर्षणात् परस्य श्रीवासुदेवस्य ३ तमेव विशि
नष्टि स्वमेव धिष्ण्यं स्वीयमाश्रयं वासुदेवसंज्ञं परमानंदरूपं ध्यानपथे अनुभूय बहुमानयंतं प्रत्यग्धृतं सर्वोत्कर्षेण पूज
अंतर्मुखीकृतं नेत्रांबुजमुकुलं किंचिदुन्मीलयंतं कृपावलोकेन सनत्कुमारादीनामभ्युदयार्थं ४ यंतं२

मुनीनां विशेषणं सार्धेन स्वर्धुन्याः उदकेनार्द्रैरिति श्रीभागवतश्रवणार्थं सत्यलोकात् पातालं प्रत्यवतरंतो निरंतरं गंगाम
भ अत एवावतीर्णा इति भावः चरणांबुजं धीयते यस्मिन् पद्मे तदुपस्पृशंतो नमंतः कथंभूतं तदाह यत् पद्मं प्रेमसहितं यथाभ
वत्येवं नानोपस्कारैः पूजयंति वरार्थाः पतिकामाः ५ कृतानि कर्माणि गृणंतः केन अनुरागेण स्खलंति पदानि यस्मि
न् तेन वचसा तानि जानंतीति तज्ज्ञाः सहस्रमेव साहस्रं किरीटानां साहस्रं ये मणिप्रवेकाः रत्नोत्तमाः तैः प्रद्योतितं उद्दाम

स्वर्धुन्युदार्द्रैः स्वजटाकलापैरुपस्पृशंतश्चरणोपधानं पद्मं यदर्चंत्यहिराजकन्याः सप्रेमनानाबलिभि
र्वरार्थाः ५ मुहुर्गृणंतो वचसानुरागस्खलत्पदेनास्य कृतानि तज्ज्ञाः किरीटसाहस्रमणिप्रवेकप्रद्योतितो
द्दामफणासहस्रं ६ प्रोक्तं किलैतद्भगवत्तमेन निवृत्तिधर्माभिरताय तेन सनत्कुमाराय स चाह पृष्टः सांख्या
यनायांग धृतव्रताय ७ सांख्यायनः पारमहंस्यमुख्यो विवक्षमाणो भगवद्विभूतीः जगाद सोस्मद्गुरवे
न्विताय पराशरायाथ बृहस्पतेश्च ८ प्रोवाच मह्यं स दयालुरुक्तो मुनिः पुलस्त्येन पुराणमाद्यं सोहं तवैत
त्कथयामि वत्स श्रद्धालवे नित्यमनुव्रताय ९

फणानां सहस्रं यस्य तं अपृच्छन्निति पूर्वेणान्वयः ६ तेन संकर्षणेन सनत्कुमाराय प्रोक्तं पारमहंस्ये धर्मे मुख्यः वि ७
बु वक्षमाणः इत्यात्मनेपदं वादेशास्य वचेरुक्तेयपदित्वात् अन्विताय अनुगताय ८ पुलस्त्येनोक्त इत्यत्र चैवमाख्यायि
का पितरं राक्षसभक्षितं श्रुत्वा पराशरो राक्षससत्रे प्रवृत्तो वसिष्ठवचनान्निवृत्तस्ततः पुलस्त्येन स्वसंततिरक्षणात्
तुष्टेन वरो दत्तः पुराणप्रवक्ता भविष्यसीति तदेवं संकर्षणात् संप्रदायप्रवृत्तिं प्रदर्श्य विवक्षितं कथनाय प्रोद्बवक्त
माह ९

भा०त्र० उदाप्लुतं एकार्णवोदके निमग्नं यत् यदा अमीलितदृक् अतिरोहितचिच्छक्तिरेव श्रीनारायणो नेत्रे निमीलितवानित्यर्थः माया
२६ विनोदं परित्यज्य स्वात्मन्येव तोस्वरूपानंद एव कुतोसवनिरीहः निःक्रियावान् १० कालशक्तिप्रेरणं पुनः सृष्ट्यवसरे बोधनार्थं त्र२
स्वे पदे अधिष्ठाने बहिर्दृष्ट्य[illegible]भावे दृष्टांतः यथानल इति ११ स्वया चिच्छक्त्या सहवर्तमानेयोगनिद्रया स्वपन् पूर्वमेव एव३
प्रबोधनार्थं नियुक्तया स्वकालशक्त्या आसादितं प्रापितं कर्मतंत्रं क्रियाकपोलौ यस्य सः अपीतान् लीनान् ददर्श १२

उदाप्लुतं विश्वमिदं तदासीद्यन्निद्रयामीलितदृङ् न्यमीलयत् अहींद्रतल्पेधिशयान एकः कृतक्षणः स्वात्म
रतौ निरीहः १० सोंतः शरीरेर्पितभूतसूक्ष्मः कालात्मिकां शक्तिमुदीरयाणः उवास तस्मिन्सलिले पदे स्वे
यथानलो दारुणि रुद्धवीर्यः ११ चतुर्युगानां च सहस्रमप्सु स्वपन्स्वयोदीरितया स्वशक्त्या कालाख्ययासा
दितकर्मतंत्रो लोकानपीतान् ददृशे स्वदेहे १२ तस्यार्थसूक्ष्माभिनिविष्टदृष्टेरंतर्गतोर्थो रजसा तनी
यान् गुणेन कालानुगतेन विद्धः सूष्यंस्तदाभिद्यत नाभिदेशात् १३ स पद्मकोशः सहसोदतिष्ठत्का २९
लेन कर्मप्रतिबोधकेन स्वरोचिषा तत्सलिलं विशालं विद्योतयन्नर्क इवात्मयोनिः १४

लोकस्रष्ट्यर्थं अर्थसूक्ष्मे अभिनिविष्टा दृष्टिर्यस्य कालानुसारिणा रजोगुणेन विद्धः संक्षोभितः सन् तनीयान् अति
सूक्ष्मोर्थः सूष्यन् उद्भविष्यन् नाभिदेशात् उद्भूत इत्यर्थः १३ स तनीयानर्थः पद्मकोशः सन् उदतिष्ठत् कर्माणि जी
वादृष्टानि प्रबोधयति यः कालस्तेन आत्मा श्रीविष्णुर्योनिर्यस्य १४ ओं नमो भगवते वासुदेवाय० छ

तल्लोकात्मकं पद्मं सर्वान् गुणान् जीवभोग्यानर्थान् अवभासयतीति तथा तत्र यस्मात् जातं स एव विष्णुर्भूरिति संबोधने प्रावी
विशत् प्रकर्षेण लुप्तशक्तिरेवांतर्यामितया विवेश तस्मिन् विष्णुना अधिष्ठिते पद्मे विधाता ब्रह्मा अभूत् कथंभूतः स्वयमेव
वेदमयः न त्वध्ययनेन प्राप्तवेदः को सौ अदृष्टपितृत्वेन यं स्वयंभुवं वदंति सः प्राक्कल्पांते नारायणेन सह निद्रयेकीभूते भूत्वा
सीत् तस्मिंश्च प्रबुद्धे तत एव पाद्मकल्पे पद्मद्वारेणाभिव्यक्तिं प्राप्त इत्यर्थः १५ स च तस्मिन् कल्पे चतुर्मुखो भूदित्याह तस्यामि

तल्लोकपद्मं स उ एव विष्णुः प्रावीविशत्सर्वगुणावभासं तस्मिन्स्वयं वेदमयो विधाता स्वयंभुवं यं स्म वदंति सोभूत्
१५ तस्यां स चांभोरुहकर्णिकायामवस्थितो लोकमपश्यमानः परिक्रमन्व्योम्नि विवृत्तनेत्रश्चत्वारि लेभेनु
दिशं मुखानि १६ तस्माद्युगांतश्वसनावघूर्णजलोर्मिचक्रात्सलिलाद्विरूढं अपाश्रितः कंजमुलोकतत्
त्वं नात्मानमद्धाविददादिदेवः १७ क एष योसावहमब्जपृष्ठ एतत्कुतो वाब्जमनन्यदप्सु अस्ति ह्यधस्तादिह
किंचनैतदधिष्ठितं यत्र सता नु भाव्यं १८

तिपरिक्रमन् तत्र स्थ एव ग्रीवां चालयन् लोकनिरीक्षणार्थं विवृत्ते विचलिते नेत्रे यस्य १६ तस्य श्रीनारायणोपासन
येवा विस्मृतज्ञानक्रियाशक्तेर्लौकिककर्तृत्वं वात्मानं न स्वतद्गनिवक्तुं प्रथमं तस्य विमोहमाह तस्मात्सलिलात् विरूढं उद्भूतं
कंजमपाश्रितोपि स्वाकल्पेन तत्कंजं लोकतत्त्वं वात्मानं च साक्षात् न ज्ञातवान् उ इति विस्मये कथंभूतात् युगांतश्वसनः प्रलय
३अ यवायुः तेनावघूर्णं तत्र तत्र कंपितं यज्जलं तस्मात् सर्वतः ऊर्मिचक्रं यस्मिन् १७ अविदुषस्तर्कमाह योसावहं अब्जपृष्ठे
एषः कः अनन्यत् एकमेवैतदब्जं कुतो वा जातं अप्सु चैतदधिष्ठितं तेन अधस्तात् सता वर्तमानेन ननु निश्चितं भाव्यं सद्
त्रमुद्दीक्षेत्यन्वयेण अन्वयः तथा च श्रुतिः सोपश्यत् पुष्करपर्णे तिष्ठन् सोमन्यत अस्ति वै तत् यस्मिन्निदमधितिष्ठतीति १८

भा॰ त॰
३०

तस्यैव बहिर्मुखप्रवृत्त्या महतापि कालेन तदप्राप्तिमाह स इति द्वाभ्यां तस्याब्जस्य यन्नालं तस्य नाडीभिरंतश्छिद्रैः तस्य खरनाल
स्य पद्मस्य यन्नालं तस्य नाभिमधिष्ठानं विचिन्वन्नर्वाग्गतोपि तत्तदा नाविंदत १९ आत्मसर्गस्य कारणं त्रिनेमिः कालः
अजस्य विष्णोर्हेतिः सुदर्शनरूपं शस्त्रं देहभाजां नराणां भयमुत्पादयन्निति संवत्सरशतमतिक्रांतमित्युक्तं भवति २०
अंतर्मुखतया तु भगवंतं दृष्टवानित्याह द्वाभ्यां ततः अन्वेषणान्निवृत्तः अप्रतिलब्धः कामो मनोरथो येन स्वधिष्ण्यं पद्मं

सत्त्वमुद्वीक्ष्य तदब्जनालनाडीभिरंतर्जलमाविवेश नार्वाग्गतस्तत्खरनालपद्मनाभिं विचिन्वंस्तदविंदता
जः १९ तमस्यपारे विदुरात्मसर्गं विचिन्वतोभूत्सुमहांस्त्रिनेमिः यो देहभाजां भयमीरयाणः परिक्षि
णोत्यायुरजस्य हेतिः २० ततो निवृत्तोप्रतिलब्धकामः स्वधिष्ण्यमासाद्य पुनः स देवः शनैर्जितश्वास
निवृत्तचित्तो न्यषीददारूढसमाधियोगः २१ कालेन सोजः पुरुषायुषाभिप्रवृत्तयोगेन विरूढबो
धः स्वयं तदंतर्हृदयेवभातमपश्यतापश्यत यन्न पूर्वं २२ मृणालगौरायतशेषभोगपर्यंक एकं पुरु
षं शयानं फणातपत्रायुतमूर्द्धरत्नद्युभिर्हतध्वांतयुगांततोये २३

जितेन श्वासेन निवृत्तं संयतं चित्तं यस्य अत एव आरूढ आश्रितः समाधियोगो येन तथाभूतः सन्न्यषीदत् उपवि ३०
वेश २१ पुरुषायुषा संवत्सरशतेन कालेन अभिप्रवृत्तेन सुनिष्पन्नो योगस्तेन विरूढ उत्पन्नो बोधो यस्य यत्पूर्वं
विचिन्वन्नपि नापश्यत् तत्स्वयमेवांतर्हृदये अवभासंतमपश्यत् २२ यदपश्यत्तद्वर्णयति मृणालेति त्रिभिः नवरत्न
व्यपश्यदित्यस्यैवानुषंगः मृणालवद्गौरश्चासावायतश्च यः शेषस्य भोगो देहः स एव पर्यंकः तस्मिन्नकुत्रस्थि
ते पर्यंके फणातपत्रैरयुताः सर्वतोयुक्ता ये मूर्द्धानस्तेषां रत्नानि किरीटस्थानि तेषां द्युभिः प्रभाभिर्हतध्वांते युगांततो
ये २३

ऊ२
कथंभूतं पुरुषं हरितोपलाद्रेर्मरकतशिलामयपर्वतस्य प्रेक्षां शोभां क्षिपंतं स्वलावण्यातिशयेन तिरस्कुर्वंतं
संध्याभ्रं नीवी परिधानं यस्य तस्य शोभां पीतांबरेण क्षिपंतं रुक्ममूर्ध्नः अनेकस्वर्णशिखरस्य तस्य किरीटैः रत्ना
३ ओषधयश्च निच उदधाराश्च सौमनस्यानि च पुष्पसमूहाः सुमनस एव वा तेषां वनस्रजः वनमाला यस्य वेणव एव भुजा यस्य
सवासोसवतस्य अंघ्रिपा एव अंघ्रयो यस्य अयमर्थः यदि तस्मिन्माला इव स्थिता रत्नादयो भवंति वेणवश्च भुजा इव वृक्षाश्च

प्रेक्षां क्षिपंतं हरितोपलाद्रेः संध्याभ्रनीवेरुरुरुक्ममूर्ध्नः रत्नोदधारौषधिसौमनस्यवनस्रजो
वेणुभुजांघ्रिपांघ्रेः २४ आयामतो विस्तरतः स्वमानदेहेन लोकत्रयसंग्रहेण विचित्रदिव्याभर
णांशुकानां कृतश्रियापाश्रितवेषदेहं २५

पादा इव तर्हि तस्य शोभां स्वीयरत्नमुक्तातुलसीपुष्पदामभिः भुजैरंघ्रिभिश्च क्षिपंतमिति २४ किंच आ
यामतो दैर्घ्येण विस्तरतश्च स्वसमानदेहेन मीयते अनेनेति मानं उपमानदेहेन मीयते अनेनेति मानमु
पमा शोभा यस्य नश्चासावमानो निरुपमो देहस्तेन यद्वा स्वरूपं स्वमानः अपरिच्छिन्नः तेन यद्वा ताभ्यां स्वा
नुरूपप्रमाणेन अतएव लोकत्रयं संगृह्यते यस्मिन् तथा विचित्राणि नानाविधानि दिव्यान्यपूर्वाणि चाभरण
न्यंशुकानि च तेषां कृता आसमंतात् श्रीः शोभा येन तेन देहेन विशिष्टं एवं स्वतस्वातिरम्यत्वेपि आश्रितवेषः
स्वीकृतालंकारो देहो यस्य तमपश्यत् यद्वा केन प्रेक्षां क्षिपंतमित्यपेक्षायामेवंभूतेन देहेनेति संबंधः २५

56

भा० टी०
२१

दु

स्वानिलवितफलायविविक्तैर्मार्गैः श्रुद्वैः वेदोक्तैर्मार्गैरन्यर्चतां पुंसां कामदुघमंघ्रिपद्मं प्रदर्शयंतं किंचिन्नमय्य समर्पयंतं नखा एव इंदवः तेषां मयूखा रश्मयस्तैर्भिन्नाः संभिन्ना अंगुलय एव चारूणि पत्राणि यस्य तत् २६ लोकार्तिहरं स्मितं यस्मिन् तेन परिस्फुरद्भ्यां कुंडलाभ्यां मंडितेन अधरबिंबदीप्त्या शोणायमानं शोणत्वं प्राप्तेन शोभनेन नसायुक्ते नसुभ्रूणा शोभनया भ्रुवा च प्रत्यर्हयंतं पूजकान्प्रतिपूजयंतं सम्मानयंतं २७ कदंबकिंजल्कवत् पिशंगं यद्वासस्तेन मेखलया च नितंबे स्वलंकृतं हे वत्से श्रीवत्सयुक्ते यद्वक्षस्थलं तस्य वल्लभेन वक्षस्स्थलस्य अनर्घ्येण हारे २८

पुंसां स्वकामाय विविक्तमार्गैरभ्यर्चतां कामदुघांघ्रिपद्मं प्रदर्शयंतं कृपया नखेंदुमयूखभिन्नांगुलिचारुपत्रं २६ मुखेन लोकार्तिहरस्मितेन परिस्फुरत्कुंडलमंडितेन शोणायितेनाधरबिंबभासा प्रत्यर्हयंतं सुनसेन सुभ्रूणा २७ कदंबकिंजल्कपिशंगवाससा स्वलंकृतं मेखलया नितंबे हारेण चानंतधनेन वत्स श्रीवत्सवक्षःस्थलवल्लभेन २८ परार्ध्यकेयूरमणिप्रवेकपर्यस्तदोर्दंडसहस्रशाखं अव्यक्तमूलं भुवनांघ्रिपेंद्रमहींद्र ×वल्ल× भोगैरधिवीतवल्शं २९

मास्वलंकृतमित्यर्थः २८ महावंदनवृक्षरूपकेण निरूपयितुं विशिनष्टि परार्ध्यानि श्रेष्ठानि केयूराणि अंगदानि मणिप्रवेका मण्युत्तमास्तैः पर्यस्ता व्याप्ता दोर्दंडा एव सहस्रं अनंताः शाखा यस्य चंदनवृक्षोपि केयूरादितुल्यैः फलपुष्पादिभिर्व्याप्तशाखो भवति अव्यक्तं प्रधानं मूलमधोभागो यस्य यद्वा अव्यक्तं ब्रह्म मूलं यस्य ब्रह्मा[illegible]व्यक्ति रूपत्वात् वृक्षस्यापि मूलं नव्यक्तं भुवनात्मकमंघ्रिपेंद्रं अहींद्रस्यानंतस्य भोगैः फणाभिः देहावयवैर्वा अधिवीताः

[illegible] २१

तथा आविर्भवत् ३

वेक्षां क्षिपंतमित्यत्रैव पर्वतरूपेण निरूपितमपि विशेषणांतरैः पुनर्निरूपयति भगवानेव महीध्रस्तं चराचराणामोकस्थानं सोपि तथोक्तो महीध्राणां बंधुः सलिलेनोपगूढमावृतं पर्वतोपि मेनाकादिस्तथा किरीटसाहस्रमेव हिरण्यशृंगाणि यस्य सोपि मेर्वादिस्तथा यथा पर्वतस्य गर्भे किविइलमाविर्भवति स्पष्टं दृश्यमानं कौस्तुभरत्नं गर्भे मूर्तिमध्ये यस्य तं ३०
अहीद्रस्य बंधुं सोपि २

किं च वनमालया निवीतं कंठलंबिन्या व्याप्तं आम्नाया वेदा एव मधुव्रतास्तैः श्रीर्यस्यास्तया हरिमिति य

चराचरौकोभगवन्महीध्रमहींद्रबंधुं सलिलोपगूढं किरीटसाहस्रहिरण्यशृंगमाविर्भवत्कौस्तुभरत्नगर्भं ३० निवीतमाम्नायमधुव्रतश्रिया स्वकीर्तिमय्या वनमालया हरिं सूर्येंदुवाय्वग्न्यगमं त्रिधामभिः परिक्रमत्प्राधनिकैर्दुरासदं ३१ तर्ह्येव तन्नाभिसरः सरोजमात्मानमंभः श्वसनं वियच्च ददर्श देवो जगतो विधाता नातः परं लोकविसर्गदृष्टिः ३२ स कर्मबीजं रजसोपरक्तः प्रजाः सिसृक्षन्नियदेव दृष्ट्वा अस्तौद्विसर्गाभिमुखस्तमीड्यमव्यक्तवर्त्मन्यभिवेशितात्मा ३३ इति श्रीभागवते महापु
तृतीयस्कंधे अष्टमोध्यायः ८

किं च वर्तादिरूपं पश्यन् हरिरसाविति ज्ञातवानित्यर्थः सूर्यादिभिरगमं अगम्यं स्वैः पारैराकलयितुमशक्यमित्यर्थः त्रिषु पि लोकेषु धामस्फूर्तिर्येषां तैः परिक्रामद्भिः प्राधानिकैः संग्रामस्तत्र योजनैः सुदर्शनादिभिर्हेतुभूतैः दुरासदं दुःप्रापं ३१
रक्षणार्थं
यदैव हरिमपश्यत् तर्ह्येव तदैव लोकविसर्गदृष्टिः सन् तस्य नाभिसरोजं श्वसनं प्रलयवायुं वियत् आकाशं च सरसि ३ ददर्श ३२ कर्मबीजं लोकसृष्टेः कारणं उपरक्तः रजोगुणोपयुक्तः अतः प्रजाः स्रष्टुमिच्छन् इयदेव नाभिसरोजादिपंचकमेव विसर्गे पि अभिमुखः दत्तचित्तः अव्यक्तवर्त्मनि भगवति निवेशितचित्तः ३३ इति तृतीये अष्टमः
परिताधावद्भिः प्राधानिकैः ४

७ नातः परंपरमयद्भवतः स्वरूपमानंदमात्रमविकल्पमविद्धवर्चः पश्यामि विश्वसृजमेकमविश्वमात्मन्भूतेंद्रियात्मकमदस्तउपाश्रितोस्मि ३ ७

भा०टी
३२

भवमेतयसा तुष्टं दृष्ट्वा नारायणं ब्रह्मा अस्तौदेकार्णवे सीदन् लोकसर्गचिकीर्षया १ भगवत् ज्ञानेनात्मनः कृतार्थ ताम् आविःकुर्वन् अज्ञानशोकमाह ज्ञातोसीति सुचिराद्बहुकालोपासनेनाद्य नेमया ज्ञातोसि ननु अहो देहभाजामेतत् अवद्यं दोषः किं तत् यद्भगवतस्तव गतिः तत्त्वं न ज्ञायत इति तत्त्वमेव ज्ञातुं योग्यः सत्यत्वात् नान्यत् अ सत्वादित्याह त्वत्तो न्यन्नास्ति यदप्यस्ति प्रतीति प्रतिभाति तदपि शुद्धं सत्यं न भवति कथमस्ततः प्रतीतिस्तत्राह यद्य

ब्रह्मोवाच ज्ञातोसि मेद्य सुचिरान्ननु देहभाजां न ज्ञायते भगवतो गतिरित्यवद्यं नान्यत्त्वदस्ति भगवन्नपि तन्न शुद्धं मायागुणव्यतिकराद्यदुरुर्विभासि १ रूपं यदेतदवबोधरसोदयेन शश्वन्निवृत्ततमसः सदनुग्रहाय आदौ गृहीतमवतारशतैकबीजं यन्नाभिपद्मभवनादहमाविरासं २

ततः मायागुणक्षोभात् त्वमेव उरुर्बहुरूपो विभासि १ ननु त्वमपि सम्यङ् न जानासि यत्त्वयादृष्टं रूपमेतदपि गुणात्मकमेव निर्गुणं ब्रह्म त्वेवतु सत्यं तत्राह रूपमिति द्वाभ्यां अवबोधरसोदयेन चिच्छक्त्याविर्भावेन शश्वत् सदा निवृत्तं तमो यस्मात् तस्य तव यदेतद्रूपं तच्च चैतन्यात्मकं सतामुपासकानामनुग्रहाय गृहीतमाविःकृतं अवतारशतस्य शुद्धसत्वात्मकस्य यदेकं बीजं मूलं तत्प्रदर्शनार्थं गुणावतारबीजत्वं दर्शयति यन्नाभीति हे परम अविद्धवर्चः अनावृतप्रकाशं अतः अविकल्पं निर्भेदं अतएवानंदमात्रं एवंभूतं यद्भगवतः स्वरूपं तत् अतो रूपात्परं भिन्नं न पश्यामि किंतु इदमेव तत् अतः कारणात्तेन अहं इदं रूपं उपाश्रितोस्मि योग्यत्वादपीत्याह एकं उपास्येषु मुख्यं यतः विश्वसृजं अतएव अविश्वं विश्वस्मात् अन्यत् किंच भूतेंद्रियात्मकं भूतानामिंद्रियाणां चात्मानं कारणमित्यर्थः ३ ३२

नन्वेवमपि सोपाधिकमेतदर्वाचीनमेवेत्याशंक्याह तद्वैतदेवेदं हे भुवनमंगल तेन त्वया नोस्माकं उपासकानां मंगलाय ध्याने दर्शितं न ह्यव्यक्तवर्त्मा निनिवेशितचित्ता नामस्माकं त्वया सोपाधिकदर्शनं युक्तमिति भावः अतस्तुभ्यं नमोनुविधेम अनुवृत्त्या करवाम तर्हि किमिति केचिन्मां नाद्रियंते तत्राह योनादृत इति असत्प्रसंगैः निरीश्वरकुतर्कनिष्ठैः ४ आदरेण तु त्वां भजंतः कृतार्था इत्याह ये त्विति श्रुतिर्वेदः स एव वातः तेन नीतं प्रापितं नापैषि नापयासि ये त्वत्कथा

तद्वा इदं भुवनमंगल मंगलाय ध्याने स्म नो दर्शितं त उपासकानां तस्मै नमो भगवतेनुविधेम तुभ्यं योनादृतो नरकभाग्भिरसत्प्रसंगैः ४ ये तु त्वदीयचरणांबुजकोशगंधं जिघ्रंति कर्णविवरैः श्रुतिवातनीतं भक्त्या गृहीतचरणः परया च तेषां नापैषि नाथ हृदयांबुरुहात्स्वपुंसां ५ तावद्भयं द्रविणगेहसुहृन्निमित्तं शोकः स्पृहा परिभवो विपुलश्च लोभः तावन्ममेत्यसदवग्रह आर्तिमूलं यावन्न तेंघ्रिमभयं प्रवृणीत लोकः

श्रवणोपादरेण कुर्वंति तेषां हृदि नित्यं प्रकाशस इत्यर्थः ५ ततः किमत आह तावदिति द्रविण्यादौ विद्यमाने भयं गते शोकः पुनश्च स्पृहा ततः परिभवः तथापि विपुलो लोभः तस्तु पुनः कथं चित्प्राप्ते ममेत्यदाग्रहः आर्तिमूलं भयशोकादेः कारणं न प्रवृणीत नाश्रयेत त्वत्पादाश्रयणमात्रेण भयादिनिवृत्तिः किं पुनस्त्वत्साक्षात्कारे सतीति भावः ६ कू

९ अह्न्यापृतार्तकरणा निशि निःशयाना नानामनोरथधिया क्षणभग्ननिद्राः दैवाहतार्थरचना ऋषयोपि देव युष्मत्प्रसंगवि ९
मुखा इह संसरंति १०

भा०तृ० ये निष्कामा अपि संतस्त्वां नाद्रियंते ते नरकं यांतीत्युक्तं ये तु त्वत्कथाश्रवणादिविमुखाः संतः काम्यकर्मपरास्तेति
३३ मंदा इत्याह दैवेन ते हतधियः नष्टमतयः प्रसंगात् श्रवणकीर्तनादिरूपात् सर्वदुःखनिवर्तकात् विमुखानींद्रियाणि ये
षां अकुशलानि अक्षेमकराणि ७ अकुशलत्वमेव दर्शयति क्षुत्तृट् त्रिधातवश्च वातपित्तश्लेष्माणस्तैः इमाः
प्रजाः सुदुर्भरेण सुदुःसहेन कामाग्निना अच्युतया रुषा अविच्छिन्नक्रोधेन च पीड्यमानाः संपश्यतो मे मनः सी

दैवेन ते हतधियो भवतः प्रसंगात्सर्वाशुभोपशमनाद्विमुखेंद्रिया ये कुर्वंति कामसुखलेशलवाय दीना
लोभाभिभूतमनसोकुशलानि शश्वत् ७ क्षुत्तृट्त्रिधातुभिरिमामुहुरर्द्यमानाः शीतोष्णवातवर्षैरि
तरेतरश्च कामाग्निनाच्युतरुषा च सुदुर्भरेण संपश्यतो मन उरुक्रम सीदते मे ८ यावत्पृथक्त्वमिदमात्म
न इंद्रियार्थमायाबलं भगवतो जन ईश पश्येत् तावन्न संसृतिरसौ प्रतिसंक्रमेत व्यर्थापि दुःखनिवहं व
हती क्रियार्था ९

दति ८ नन्वेवंभूतायाः संसृतेरपरमार्थत्वात् किमर्थं विषादः क्रियते तत्राह आत्मन इदं पृथक्त्वं देहादिभावं भगवत ३३
स्ते इंद्रियार्थरूपा माया या तया बलमाधिक्यं यस्य तत् न प्रतिसंक्रमेत नोपरमेत् दुःखं संपादयंती क्रियाणामर्थः म
नुभव फलं यस्यां ९ नन्वेवमविवेकिनां विवेकिनस्तु मुक्ता एवेति किं तेषां भक्त्या कृत्यमत आह अह्नि आपृतानि व्या
पृतानि वतान्यार्तानि क्लिष्टानि करणानि इंद्रियाणि येषां रात्रौ विषयसुखलवोपि नास्ति यतो निःशयाना
स्वप्नदर्शनेन च क्षणे क्षणे भग्ननिद्राः दैवेनाहताः सर्वतः प्रतिहता अर्थोद्यमा अर्थरचना येषां ते १० २
त्वद्दिदमिति पाठे त्वदिति त्वत्तः पृथक् पश्येद्यावत्तावदसौ व्यर्थापि नोपरमेत्

भ
तदेवं भक्तानां संसारानिवृत्तिमुक्त्वा भक्तानां तन्निवृत्तिमाह त्वमिति भक्तियोगेन शोधिते हृत्सरोजे आस्से तिष्ठसि श्रुतेन
श्रवणेनेक्षितः पंथा यस्य किं च श्रवणं विनापि तद्भक्तमनसा यद्यत्तव वपुः रूपं स्वेच्छया ध्यायंति तैस्तैः प्रणयसे प्रकटयसि स त
तां भक्तानामनुग्रहाय ११ भक्तानां च निःकामानां भक्तानां तु निःकामानां तुल्यमति सुलभत्वं नेतरेषामित्याह नेति उपचितैस्स
र्जितैः उपचारैः पुष्पोपहारादिभिः यत् यथा असतां भक्तानां अलभ्यया दयया प्रियत्वे हेतुः एक इत्यादि १२ यतः सका

त्वं भावयोगपरिभावितहृत्सरोज आस्से श्रुतेक्षितपथो ननु नाथ पुंसां यद्यद्धिया त उरुगाय विभावयंति
तत्तद्वपुः प्रणयसे सदनुग्रहाय ११ नातिप्रसीदति तथोपचितोपचारैराराधितः सुरगणैर्हृदिबद्धकामैर्यत्स
र्वभूतदययासदलभ्ययैको नानाजनेष्ववहितः सुहृदंतरात्मा १२ पुंसामतो विविधकर्मभिरध्वराद्यैर्दानेन चो
ग्रतपसा व्रतचर्यया च आराधनं भगवतस्तव सत्क्रियार्थो धर्मोर्पितः कर्हिचिद्ध्रियते न यत्र १३

मानां भक्त्या नातिप्रसीदति अतः कामकोप्राप्तिः क्रियायां उत्तमं फलं न भवति किं तु तत्स्मरणमेव कामसंयोगस्तु अवां
तरफलं न परो वनार्थमित्याह पुंसामिति भगवतस्तवाराधनमेव संश्रयो सो क्रियार्थश्च श्रेष्ठं क्रियाफलं श्रेष्ठत्वे हेतुः
यत्र त्वय्यर्पितो धर्मो न कदाचित् ध्रियते न नश्यति कामार्थस्तु धर्मः कामं दत्वा नश्यतीत्यर्थः १३ वासुदेवाय नमः

मायार लिलार णा

भा०त० ३४ अतस्त्वामेव वयं नताः इत्याह शश्वत्सर्वदा स्वरूपवैभवेनैव निरस्तो भेदरूपो मोहो यस्मिन् बोधस्वरूपस्य विषयाविषया विद्यया क्रिया यस्य यद्वा वि
ण षणमाश्रयः अत एव परस्मै च हेतुः विश्वोद्भवादिनिमित्तं यो लीलारसः तयोरासः क्रीडा यस्य तेभ्यस्तुभ्यं इदं नमः नम
नं चकृम कृतवंतो वयं २४ नामग्रहणमात्रतः कैवल्यप्रदत्वेनैश्वर्यं व्यंजयन्नमस्करोति यस्येति अवतारादीनां वि
डंबनमनुकरणमस्ति येषु तत्रावतारविडंबनानि देवकीनंदन इत्यादीनि गुणविडंबनानि सर्वज्ञो भक्तवत्सल इत्या

शश्वत्स्वरूपमहसैव निपीतभेदमोहाय बोधधिषणाय नमः परस्मै विश्वोद्भवस्थितिलयेषु निमित्त
लीलारसाय ते नम इदं चकृमेश्वराय २४ यस्यावतारगुणकर्मविडंबनानि नामानि येसुविगमे विव
शा गृणंति ते नैकजन्मशमलं सहसैव हित्वा संयांत्यपावृतमृतं तमजं प्रपद्ये २५ यो वा अहं च गिरिश
श्च विभुः स्वयं च स्थित्युद्भवप्रलयहेतव आत्ममूलं भित्वा त्रिपाद्ववृध एक उरुप्ररोहस्तस्मै नमो भग
वते भुवनद्रुमाय २६

दीनि कर्मविडंबनानि गोवर्द्धनोद्धरणकंसारिरित्यादीनि असुविगमेपि गृणंति उच्चारयंति केवलं शमलं पापं अपा
वृतं निरस्तावरणं तं ब्रह्म प्राप्नुवंति २६ तत्र गुणावतारकर्माणि दर्शयन् प्रणमति यो वै एकः त्रिपात् त्रयः ब्रह्मादयः पा
दाः स्कंधा यस्य प्रत्येकं उरवः प्ररोहा यस्य शाखा यस्य शाखा मरीच्यादिमन्वादिरूपा यस्य तथाभूतः सन्ववृधे तस्मै भुवना
कारायद्रुमाय नमः किं कृत्वा ववृधे आत्मा स्वयमेव मूलं अधिष्ठानं यस्य तत्प्रधानं तं भित्वा गुणत्रयरूपेण विभज्य त्रिपात्त्वमेवा
ह अहं ब्रह्मा गिरिशश्च स्वयं विभुर्विष्णुश्चेति स्थित्युद्भवप्रलयहेतवो ये वयं स्वं त्रिपाद्भूत्वा ववृधे इत्यर्थः २६ द्रु
मूल २

३४ विवशा अ
पि ५

एवंगुणावतारकर्मविडंबनमुक्त्वा तस्यैव कालाख्यं स्वरूपं तत्कर्म च दर्शयन् प्रणमति लोक इति द्वाभ्यां विकर्मनिरतः विरुद्ध
कर्मनिष्ठः कुशले हिते स्वे आत्मीये त्वदुदिते त्वयैव साक्षादुक्ते न वर्त्मन स्वेपकर्मणि उक्तं हि गीतासु यत्करोषि यदश्नासि
यज्जुहोषि ददासि यत् यत्तपस्यसि कौंतेय तत्कुरुष्व मदर्पणमिति तस्मिन्नप्रमत्तः अदभ्रचित्तो यावद्वर्त्तते तावदस्य लोक
स्य अनिमिषाय कालाय १७ आस्तां तावल्लोकस्य कथा यस्मात्कालाख्यात् त्वत्तः यद्द्विपरार्द्धं विरच्या धिष्ण्यं

लोको विकर्मनिरतः कुशले प्रमत्तः कर्मण्ययं त्वदुदिते भवदर्चने स्वे यस्तावदस्य बलवानिह जीविताशां
सद्यश्छिनत्त्यनिमिषाय नमोस्तु तस्मै १७ यस्माद्बिभेम्यहमपि द्विपरार्द्धधिष्ण्यमध्यासितः सक
ललोकनमस्कृतं यत् तेपे तपो बहुसवोऽवरुरुत्समानस्तस्मै नमो भगवतेधिमखाय तुभ्यं १८
तिर्यङ्मनुष्यविबुधादिषु जीवयोनिष्वात्मेच्छयात्मकृतसेतुपरीप्सयायः रेमे निरस्तरतिरप्यवरुद्धदे
हस्तस्मै नमो भगवते पुरुषोत्तमाय १९
स्थानं तदारूढोपि बिभेमि भीतश्चसन् त्वामेवावरुरुत्समानः प्राप्तुमिच्छन् तपस्तप्तवान् कथंभूतः बहुसवः बहवः
सवाः यागाः संवत्सरा वा यस्य बहून् यागान् कृत्वापि बहून् संवत्सरान् वा तपस्तप्तवानित्यर्थः अधिमखाय मखाधि
ष्ठात्रे १८ इदानीं तत्तत्कालस्याविर्लीलावतारकर्माणि दर्शयन्नाह तिर्यगादिषु जीवयोनिषु स्वेच्छयास्वीकृतमूर्त्तिः स
ख न्रूकृतधर्ममर्यादापालनेच्छया रेमे वस्तुतः स्वानंदानुभवेनैव निरस्तविषयसुखोपि यः अतएव पुरुषोत्तमः तत्र

भा० त०
३९

इदानीं दृश्यमानामेव मूर्त्तिं प्रणमति यो विद्ययेति दशार्द्धाः पंच वृत्तयो यस्याः तया अविद्यया निद्राहेतुभूत
या अनभिभूतोपि यो निद्रामुवाह तस्मै ते नम इत्युत्तरेणान्वयः जठरीकृता उदरे धृता लोकयात्रा लोकस्थि
तिर्येन अहिरेव कशिपुः शय्या तस्याः स्पर्शो अनुकूलो यस्यास्तां निद्रां भीमा नामूर्मीणां माला विद्यंते यस्मिन् अ
न्तर्जले निद्रा यस्य विवेकिनो जनस्य निद्रासुखमीदृगिति विवृण्वन् प्रदर्शयन् उपहसन्निति स्वार्थः अत एवांतर्जलाहि

यो विद्ययानुपहतोपि दशार्द्धवृत्त्या निद्रामुवाह जठरीकृतलोकयात्रः अंतर्जलेहिकशिपुस्पर्शानुकूलां
भीमोर्मिमालिनि जनस्य सुखं विवृण्वन् २० यन्नाभिपद्मभवनादहमासमीड्य लोकत्रयोपकरणो य
दनुग्रहेण तस्मै नमस्त उदरस्थभवाय योगनिद्रावसानविकसन्नलिनेक्षणाय २१

बिशेषणानि यद्वा पूर्वकल्पे श्रांतस्य जनस्य विश्रामसुखं विवृण्वन् स्फारयन् तदा तु परोपकाराय स्वयं दुःसहमपि ३५
दुःखं सोढव्यमिति द्योतनार्थं विशेषणानि २० किंच यस्य नाभिपद्ममेव भवनं तस्मात् लोकत्रयमुपकरणं यस्य
यद्वा लोकत्रयस्य सृष्ट्यादिद्वारेणोपकरोतीति तथा तादृशोहं यदनुग्रहेणासं उदरे स्थितः भवः संसारप्रपंचो यस्य
योगनिद्रावसाने किंचित् विकसत् नलिनवदीक्षणं यस्य २१ ओं नमो भगवते वासुदेवाय छ

एवं स्तुत्वा प्रार्थति सोयमिति चतुर्भिः यत् येन सत्वेन ज्ञानेन भगेनैश्वर्येण च मृडयते सुखयति विश्वं दृशं प्रज्ञां अनु
स्पृशतात् योजयतु यथाऽहं स्रक्ष्यामि भविष्यामि यतः प्रणतप्रियोसौ अहं च प्रणतः न चान्यः प्रार्थनीयोस्ति यतः
स एव समस्तजगतां सुहृत् यतो सौ एकोऽनुस्यूत आत्मा अंतर्यामी २२ आत्मशक्त्या रमया सह यद्यत्कर्म करिष्यति
स्वविक्रमं विष्णोरेव विक्रमः प्रभावो यस्मिन् तदिदं विश्वं तदा सृजतोपि मे चेतः स एव युंजीत प्रवर्त्तयितु कर्मास

सोऽयं समस्तजगतां सुहृदेक आत्मा सत्वेन यन्मृडयते भगवान् भगेन तेनैव मे दृशमनुस्पृशताद्यथाहं
स्रक्ष्यामि पूर्ववदिदं प्रणतप्रियोसौ २२ एष प्रपन्नवरदो रमयाऽत्मशक्त्या यद्यत्करिष्यति गृहीतगुणा
वतारः तस्मिन् स्वविक्रममिदं सृजतोपि चेतो युंजीत कर्मशमलं च यथा विजह्यां २३ नाभिह्रदादिह सतो
ऽम्भसि यस्य पुंसो विज्ञानशक्तिरहमासमनंतशक्तेः रूपं विचित्रमिदमस्य विवृण्वतो मे मा रीरिषीष्ट निग
मस्य गिरां विसर्गः २४

क्तिकृतं शमलं च वैषम्यादि पापं यथा विजह्यां त्यक्ष्यामि २३ अंभसि सतो यस्य नाभिह्रदादिहासं विज्ञाने शक्ति
र्यस्य महत्तत्वात्मकस्य चित्रस्य तदभिमानी अस्य रूपमिदं विश्वं विस्तारयतो मे निगमस्यावयवभूतानां गिरां विस
र्गः उच्चारणं मा रीरिषीष्ट हन्त्वा तं ब्रह्मवर्चसमिति न्यायेन मा लुप्यतामित्यर्थः २४ वासुदेवाय नमः छ

भा०द० ३६

विहृद्दप्रेम्णास्मितेनविजृंभनयन्विश्वस्यविजयायउद्भवायचकारादस्मदनुग्रहायचोत्थाय २५ स्वस्यसंभवो
यस्मात्तं तपः शारीरं विद्याउपासना समाधिरेकाग्र्यं ते निशाम्य दृष्ट्वा यथाशक्तिस्तुत्वाश्रांतवद्विरराम २६ आ
त्मनोलोकसंस्थानविज्ञानेपरिखिद्यतोब्रह्मणोभिप्रेतमालक्ष्यतमाहेतिद्वयोरन्वयः तेनप्रलयोदकेनविषमचेतसं
२७ कश्मलंमोहं इवेतिसमस्तमोहाशमनंदर्शयति २८ हेवेदगर्भतंद्री विषाद कृतमालस्यंमागाः तेनैवमेदुश्म

उत्थायविश्वविजयायचनोविषा
सोसावदभ्रकरुणोभगवान्विहृद्दप्रेमस्मितेननयनांबुरुहंविजृंभन्
दंमाध्व्यागिराऽपनयतात्पुरुषःपुराणः २५ मैत्रेयउवाच स्वसंभवंनिशाम्यैवंतपोविद्यासमा
धिभिः यावन्मनोवचस्स्तुत्वाविरराम सखिन्नवत् २६ अथाभिप्रेतमन्वीक्ष्यब्रह्मणोमधुसूदनः वि
षण्णचेतसंतेनकल्पव्यतिकरांभसा २७ लोकसंस्थानविज्ञानआत्मनःपरिखिद्यतः तमाहागाधया
वाचाकश्मलंशमयन्निव २८ श्रीभगवानुवाच मावेदगर्भगास्तंद्रींसर्गउद्यममावह तन्मयापा
दितंह्यग्रेयन्मांप्रार्थयतेभवान् २९ भूयस्त्वंतपआतिष्ठविद्यांचैवमदाश्रयां ताभ्यामंतर्हृदिब्रह्मन् ३६
लोकान्द्रक्ष्यस्यपावृतान् ३०
नुस्मृशातास्त्यादियत्प्रार्थयतेतदग्रेपूर्वमेवसंपादितं २९ तर्हिकथमहंनजानामीत्यतआह भूयइति भक्ति
युक्तःसमाहितश्चसन्आत्मनिस्वस्मिन्लोकेचमांततंव्याप्यस्थितंद्रष्टासिद्रक्ष्यसिआत्मनोजीवांश्च ३०

यष्ठेतनपुना [illegible]

३८

सर्वत्र मद्दर्शने मोहो निवर्त्तत इत्याह यदात्विति प्रतिवक्षीत पश्येत् ३१ तदा च मिथ्याज्ञाननिवृत्तो मुच्यत इत्याह यदेति भूतादि
भिर्विरहितं आत्मानं जीवं शुद्धं त्वं पदार्थं स्वस्वरूपेण स्वस्यात्मभूतेन मया तत्पदार्थेन उपेतम् एकीभूतं पश्यन् भवति तदा स्वाराज्यं
मोक्षं प्राप्नोति ३२ यतः वर्षीयान् वृद्धतरः अत्यधिकोसीत्यर्थः ३३ अनुग्रहमेवाह ऋषिमिति चतुर्भिः यद्यतस्ते मनो मयि
निर्बद्धं ३४ यद्यस्मात् भूतैरिंद्रियैः गुणैः सत्वादिभिरात्मना अहंकारेण चायुक्तं मन्यसे ३५ तुभ्यं तव नालेन मार्गेण पुष्कर

ततआत्मनि लोके च भक्तियुक्तः समाहितः द्रष्टासि मां ततं ब्रह्मन् मयि लोकांस्त्वमात्मनः ३१ यदा तु सर्वभूतेषु दा
रुष्वग्निमिव स्थितं प्रतिवक्षीत मां लोको जह्यात्तर्ह्येव कश्मलं ३२ यदा रहितमात्मानं भूतेंद्रियगुणाशयैः स्वरू
पेण मयोपेतं पश्यन् स्वाराज्यमृच्छति ३३ नानाकर्मवितानेन प्रजा बह्वीः सिसृक्षतः नात्मावसीदत्यस्मिं
स्ते वर्षीयान्मदनुग्रहः ३४ ऋषिमाद्यं न बध्नाति पापीयांस्त्वां रजोगुणः यन्मनो मयि निर्बद्धं प्रजाः संसृजतो
पि ते ३५ ज्ञातोहं भवता त्वद्य दुर्विज्ञेयोपि देहिनां यन्मां त्वं मन्यसे युक्तं भूतेंद्रियगुणात्मभिः ३६ तुभ्यं मद्विवि
कित्सायामात्मा मे दर्शितो बहिः नालेन सलिले मूलं पुष्करस्य विचिन्वतः ३७ यच्चकर्थांग मत्स्तोत्रं मत्कथाभ्यु
दयांकितं यद्वा तपसि ते निष्ठा स एष मदनुग्रहः ३८

स्य मूलमधिष्ठानं सलिले विचिन्वतो मयि विचिकित्सायां भवितव्यमस्याश्रयेण न वद्दृश्यते ततोस्ति नास्तीति संदेहे सति आत्मा
स्वरूपं मे मया अबहिरंतर्हृदि दर्शितः ३६ अंग हे ब्रह्मन् यच्चकर्थ कृतवानसि मत्कथैवाभ्युदयः तेनांकितं स एष बंधाभावः
मयि मनो निर्बद्धं सन्मतं ज्ञानं मद्रूपस्य हृदि दर्शनं मत्स्तुतिः तपो निष्ठा चेति यत् स एष सर्वोपि मदनुग्रहः ३७ गुणमयतेन

प्रतीयमानमपि... ८९

भा०टी० ३९

तव प्रीत इति किं वक्तव्यमित्याह य इति ३९ न च मत्प्रीतेरप्यधिकं किंचिदस्तीत्याह पूर्तादिभिराद्धं निःश्रेयसं फलं तत्मत्प्रीति
रेवेति तत्त्वविदां मतं ४० अत्र हेतुमाह अहमिति आत्मनां अहंकारोपाधीनां जीवानामात्मा अतः प्रेयसामपि प्रियाणा
मपि मध्ये प्रेष्ठः प्रियतमः सन् निरवद्यः यत्कृते यदर्थं ४१ अतस्त्वं कृतार्थ एव तथापि मत्प्रियार्थं सृष्टिं कुर्वित्याह सर्व
ति आत्मा त्वं इदं त्रैलोक्यं या मय्यनुशेरते ताः प्रजा अस्स्राक्षीः केन आत्मनैवान्यनिरपेक्षेण तत्र ज्ञापकापेक्षाभावमाह

य एतेन पुमान्नित्यं स्तुत्वा स्तोत्रेण मां भजेत् तस्याशु संप्रसीदेयं सर्वकामवरेश्वरः ३९ पूर्तेन तपसा यज्ञैर्दानै
र्योगसमाधिना राद्धं निःश्रेयसं पुंसां मत्प्रीतिस्तत्त्वविन्मतं ४० अहमात्मात्मनां धातः प्रेष्ठः सन्प्रेयसामपि अ
तो मयि रतिं कुर्याद्देहादिर्यत्कृते प्रियः ४१ सर्ववेदमयेनेदमात्मनात्मात्मयोनिना प्रजाः सृज यथापूर्वं याश्च
मय्यनुशेरते ४२ मैत्रेय उवाच तस्मा एवं जगत्स्रष्ट्रे प्रधानपुरुषेश्वरः व्यज्येदं स्वेन रूपेण कंजनाभस्तिरोद
धे ४३ इति श्रीभागवते महापुराणे तृतीयस्कंधे पद्मोद्भवे विदुरमैत्रेयसंवादे नवमोऽध्यायः विदुर उवाच
अंतर्हिते भगवति ब्रह्मा लोकपितामहः प्रजाः ससर्ज कतिधा दैहिकीर्मानसीर्विभुः १

सर्ववेदमयेनेति आत्मा अहं योनिः कारणं यस्येति ज्ञानक्रियाशक्तिना यं सृजयति यथापूर्वमिति तवाभ्यासोप्यस्ती
त्युक्तं मय्यनुशेरत इति स्थितानामभिव्यक्तिमात्रमेव कर्तव्यमित्यनायासत्वमुक्तं ४२ इदं स्रष्टव्यं व्यज्य प्रकाश्य पद्मना
भः श्रीनारायणरूपेण तिरोदधे ऽदृश्यो ऽभवत् ४३ इति तृतीये नवमः दशमे कालसंप्रश्नं प्रतिवक्तुं तदुद्भवः प्राकृतादिविता ३७

त्रिवा२
मे मया यावदस्य वदता सयत्स्वे १ संचोदितः प्रार्थितः हृदिस्थानेवाहनतु ते प्रश्नास्तेन विस्मृता इत्यर्थः ३ आत्मनि श्रीनारायणे
आत्मानं मन आवेश्य ४ अब्जसंभूतो ब्रह्मा यदधिष्ठाय स्थितः कर्णरिक्तः तत्पद्मं अंभश्च विलोक्य कथंभूतं पद्मसंभव
श्वसतेन प्रलयकालेन कृतं वीर्यं यस्य तेन वायुना कंपितं न्यपादित्युत्तरेणान्वयः ५ विवृद्धं विज्ञानबलं यस्य स न्यपात् स्वंपीत
वान् ६ पुष्करं पद्मं प्राक्लीनाश्चीर्ह्लोकान्कल्पितास्मि स्रक्ष्यामि ७ भगवता स्वयंकरणीये कर्मणि चोदितो नियुक्तः स

ये चमे भगवन्पृष्टास्त्वय्यर्थावकुवित्तम तान्वदस्वानुपूर्व्येण छिंधि नः सर्वसंशयान् २ श्रीसूत उवाच एवं
संचोदितस्तेन क्षत्रा कौषारवो मुनिः प्रीतः प्रत्याह तान्प्रश्नान्हृदिस्थानथ भार्गव ३ श्रीमैत्रेय उवाच विरिं
चोऽपि तथा चक्रे दिव्यं वर्षशतं तपः आत्मन्यात्मानमावेश्य यदाह भगवानजः ४ तद्विलोक्याब्जसंभूतो वायुना यद
धिष्ठितः पद्ममंभश्च तत्कालकृतवीर्येण कंपितं ५ तपसा ह्येधमानेन विद्यया चात्मसंस्थया विवृद्धविज्ञानब
लो न्यपाद्वायुं सहांभसा ६ तद्विलोक्य वियद्व्यापि पुष्करं यदधिष्ठितं अनेन लोकान्प्राग्लीनान्कल्पि
तास्मीत्यचिंतयत् ७ पद्मकोशं तदाविश्य भगवत्कर्मचोदितः एकं व्यभांक्षीदुरुधा त्रिधा भाव्यं द्विसप्तधा ८

न तदा पद्मकोशं प्रविश्य तमेकमेव त्रिधा लोकत्रयरूपेण व्यभांक्षीत् विभक्तवान् एकेन कमलमुकुलेन कथं लोकत्रयस्य
स्थितिरित्यसंभावनां वारयितुं तस्य विशालतामाह द्विसप्तधा चतुर्दशधा लोकरूपेण उरुधा ततोपि बहुप्रकारेण भाव्यं भा
वयितुं योग्यं अतो न तेन त्रिलोकीकरणं चित्रमित्यर्थः ८

भा०त०
३८

त्रिलोकीरूपेणैवविभागेहेतुमाह एतावान्त्रिलोकीरूपःजीवलोकस्यजीवानांभोगस्थानस्यप्रत्यहंसृज्यस्यसंस्था
भेदोरचनाविशेषउक्तः ननुपरमेष्ठिनोपिजीवत्वाविशेषाद्ब्रह्मलोकस्यापिकिमितिप्रत्यहंसृष्टिर्नभवतितत्राह हिय
स्मात् अनिमित्तस्यनिष्कामस्यधर्मस्यविपाकःफलरूपोसौउपलक्षणमेतत्सत्यलोकस्यमहःप्रभृतिलोकानांतद्वासिनां
चत्रैलोक्यस्यकाम्यकर्मफलत्वात्प्रतिकल्पमुत्पत्तिविनाशौभवतःमहःप्रभृतीनांतुउपासनासमुच्चितनिष्कामधर्मफलत्वा

एतावान्जीवलोकस्यसंस्थाभेदःसमाहृतः धर्मस्यह्यनिमित्तस्यविपाकःपरमेष्ठ्यसौ ९ विदुरउवाच य
दात्थबहुरूपस्यहरेरद्भुतकर्मणः कालाख्यंलक्षणंब्रह्मन्यथावर्णयनःप्रभो १० मैत्रेयउवाच गुण
व्यतिकराकारोनिर्विशेषोप्रतिष्ठितः पुरुषस्तदुपादानमात्मानंलीलयासृजत् ११

द्द्विपरार्द्धपर्यंतंननाशः तत्रस्थानांचततःपरंप्रायेणमुक्तिरितिभावः ९ कालभेदेनलोकसृष्टिभेदंश्रुत्वातमेवका
लंजिज्ञासुःपृच्छति यत्कालाख्यंलक्षणंस्वरूपंआत्थअब्रवीःकथंकालःकल्प्यतेकिंवातस्यसूक्ष्मंस्थूलंवारूपमितिय
थावद्वर्णयेत्यर्थः १० तत्रसामान्यतःकालस्यस्वरूपमत्रोच्यतेउत्तराध्यायेतुविशेषतः गुणानांव्यतिकरोमहदादिःप ३८
रिणामःतेनैवक्रियतेयःसकालइतिशेषः वक्ष्यतेवैकादशेगुणव्यतिकरःकालःस्वभावःसूत्रमेवचेति स्वतस्तुनिर्वि
शेषः अप्रतिष्ठितःक्वाप्यपर्यवसितःआद्यंतशून्यइत्यर्थः एतदेवदर्शयितुमीश्वरःसृष्ट्यादितेननिमित्तभूतेनकरोती
त्याह पुरुषइति उपादीयतेनिमित्ततयास्वीक्रियतइत्युपादानं सकालउपादानंनिमित्तंयस्मिन्तंआत्मानमेववि
श्वरूपेणासृजत् स्वव्यतिरेकेणसृज्यस्याभावात् एतच्चवस्तुकथनमात्रंकालेननिमित्तेनासृजदित्येतावदेवविव

स्वव्यतिरिक्तसृज्याभावंदर्शयन्कालस्यसृष्टिनिमित्ततांदर्शयति विश्वमिति विष्णुमाययासंस्थितंसंहृतंब्रह्मतन्मात्रंसद्विश्वंई
श्वरेणकर्त्राकालेननिमित्तेनपरिच्छिन्नंपृथक्प्रकाशितं अव्यक्तामूर्तिःस्वरूपंयस्येतिस्वतोनिर्विशेषतादर्शिता १२ अप्रति
ष्ठितत्वंसंदर्शयितुंतत्कार्यविश्वस्यप्रवाहस्यानिष्ठामाह यथेदानीमस्तितथाग्रेपूर्वमप्यासीत्पश्चादपिभविष्यतिएवंसामा
न्यतःकालंनिरूप्यविशेषतोनिरूपयिष्यन्तन्निमित्तस्यसर्गस्यपूर्वोक्तानवभेदाननुवदति सर्गइति यस्तुप्राकृतोवैकृतश्च

विश्वंवैब्रह्मतन्मात्रंसंस्थितंविष्णुमायया ईश्वरेणपरिच्छिन्नंकालेनाव्यक्तमूर्तिना १२ यथेदानींतथाग्रेचप
श्चादप्येतदीदृशं सर्गोनवविधस्तस्यप्राकृतोवैकृतस्तुयः १३ कालद्रव्यगुणैरस्यत्रिविधःप्रतिसंक्रमः आ
द्यस्तुमहतःसर्गोगुणवैषम्यमात्मनः १४ द्वितीयस्त्वहमोयत्रद्रव्यज्ञानक्रियोदयः भूतसर्गस्तृतीयस्तुत
न्मात्रोद्रव्यशक्तिमान् १५ चतुर्थऐंद्रियःसर्गोयस्तुज्ञानक्रियात्मकः वैकारिकोदेवसर्गःपंचमोयन्मयंमनः १६

सदशमः १३ तन्निमित्तमेवत्रिविधंप्रलयमाह कालेनैवकेवलेननित्यःप्रलयः द्रव्येणसंकर्षणाग्न्यादिनानैमित्तिकः गुणैः
स्वस्वकार्यग्रसद्भिःप्राकृतिकः तानेवसर्गान्प्रपंचयति आद्यइत्यादिना यावदध्यायसमाप्ति महतोलक्षणं आत्मनोहरेः
सकाशात्गुणानांवैषम्यमिति १४ अहमःअहंकारस्यतस्यलक्षणंयत्रेति द्रव्यादयोवक्ष्यमाणास्त्रयःसर्गाः तन्मात्रो
भूतसर्गःभूतसूक्ष्मसर्गइत्यर्थः द्रव्यशक्तिमान्महाभूतोत्पादकः १५ ज्ञानकर्मेंद्रियात्मकश्चतुर्थः १६ भू

भा० त० ३९ तमसः पंचपर्वाविद्यायाः अबुद्धिर्जीवानामावरणं विक्षेपश्च तां करोतीत्यबुद्धिकृत् तस्य मे मत्तः शृणु १७ अनुद्वेगेन श्रोतव्यता
माह यद्विषया मेधा संसारं हरति तस्य हरेर्लीला यद्वा इयमिति तम आदिसर्गरूपा रजोभाज इति ब्रह्मरूपस्येत्यर्थः अस्मिन्पक्षे
अबुद्धिकृत इति प्रथमान्तं अनवधानकृत इत्यर्थः मुखमिव प्रथमं कृतो मुख्यसर्गः तस्थुषां स्थावराणां १८ षड्विधत्वमेवाह येपु
ष्पं विना फलंति ते वनस्पतयः ओषधयः फलपाकान्ताः लताः आरोहणापेक्षाः त्वक्सारा वेण्वादयः लता एव काठिन्येनारोह

षष्ठस्तु तमसः सर्गो यस्त्वबुद्धिकृतः प्रभो षडिमे प्राकृताः सर्गा वैकृतानपि मे शृणु १७ रजोभाजो भगवतो
लीलेयं हरिमेधसः सप्तमो मुख्यसर्गस्तु षड्विधस्तस्थुषां च यः १८ वनस्पत्योषधिलतात्वक्सारा वीरुधो द्रु
माः उत्स्रोतसस्तमःप्राया अंतःस्पर्शा विशेषिणः १९ तिरश्चामष्टमः सर्गः सोऽष्टाविंशद्विधो मतः अविदो भू
रितमसो घ्राणज्ञा हृद्यवेदिनः २० गौरजो महिषः कृष्णः सूकरो गवयो रुरुः द्विशफाः पशवश्चेमे अविरुष्ट्रश्च सत्तम २१

णानपेक्षा वीरुधः ये पुष्पैः फलंति ते द्रुमाः तेषां साधारणं लक्षणमाह ऊर्ध्वस्रोत आहारसंचारो येषां तमःप्राया अव्यक्तचैतन्याः ३९
अंतःस्पर्शाः स्पर्शमेव जानंति नान्यत् तदप्यंतरेव न बहिः विशेषिणः अव्यवस्थितपरिणामाद्यनेकभेदवंतः १९ तिर्यक्स्रोतसां
सर्गमाह तिरश्चामिति स चाष्टाविंशतिभेदः तिरश्चां लक्षणं अविदः श्वस्तनादिज्ञानशून्याः भूरितमसः आहारादिमात्रनिष्ठाः घ्रा
णेनैवेष्टमर्थं जानंति हृद्यवेदिनः दीर्घानुसंधानशून्याः तथा च श्रुतिः अथेतरेषां पशूनां अशनापिपासे एवाभिविज्ञानं न वि
ज्ञातं वदंति न विज्ञातं पश्यंति न विदुः श्वस्तनं न लोकालोकाविति २० अष्टाविंशतिभेदानेवाह गवादयो उष्ट्रांता द्विशफा द्विखुरान
व २१

खरादय एकशफाः षट् २२ श्वादयो गोधांताः पंचनखाः द्वादश एवमेते भूचराः सप्तविंशतिः मकरादयो जलचराः २३ कं
कादयश्च खगा जलचरत्वेनैकीकृत्य गृहीताः तदेवमष्टाविंशतिभेदा भवंति तेषु कृष्णरुरुगौरा मृगविशेषाः अन्येषाम
पि तिर्यक्प्राणिनां यथायथमेतेष्वेवांतर्भावः २४ अथ आहारसंचारो यस्य सोऽर्वाक्स्रोताः दुःखमार्षं नृणां सर्गः नृणां ल
क्षणं रज अधिकं ये सुते २५ एते त्रयो वैकृता एव न कौमारवदुभयात्मकाः देवसर्गश्च वैकृत इत्यनुषंगः वैकारिकस्तु देवस

खरोऽश्वोऽश्वतरो गौरः शरभश्चमरी तथा एते चैकशफाः क्षत्तः शृणु पंचनखान्पशून् २२ श्वा सृगालो वृको व्या
घ्रो मार्जारः शशशल्लकौ सिंहः कपिर्गजः कूर्मो गोधा च मकरादयः २३ कंकगृध्रबकश्येनभासभल्लूकब
र्हिणः हंससारसचक्राह्वकाकोलूकादयः खगाः २४ अर्वाक्स्रोतस्तु नवमः क्षत्तरेकविधो नृणां रजोधिकाः
कर्मपरा दुःखे च सुखमानिनः २५ वैकृतास्त्रय एवैते देवसर्गश्च सत्तम वैकारिकस्तु यः प्रोक्तः कौमारस्तूभया
त्मकः २६ देवसर्गश्चाष्टविधो विबुधाः पितरोऽसुराः गंधर्वाप्सरसः सिद्धा यक्षरक्षांसि चारणाः २७

र्गः प्राकृतेषु पूर्वमेव प्रोक्तः अयं तु ततो न्यूनत्वाद्वैकृतः देवसर्गत्वाच्च इतरभूतश्च सनत्कुमारादीनां सर्गस्तु प्राकृतो वैकृ
तश्च देवत्वेन मनुष्यत्वेन च सृज्यत इत्यर्थः वैकृतश्च देवसर्गोऽष्टविधः तत्र विबुधादयस्त्रयो भेदाः गंधर्वाप्सरस एकः य
क्षरक्षांस्येकः २७ ओं नमो भगवते वासुदेवाय छू

भा० तृ० ४० दि

भूतप्रेतपिशाचा एकः सिद्धचारणविद्याधरा एकः किंनरादय एकः आदिशब्दात् किंपुरुषाश्वमुखादयः एतत्सर्वं दशमेऽध्याये स्पष्टं भविष्यति २८ २९ तृतीये दशमः ततः एकादशे कालः परमाण्वादिलक्षणे युगमन्वन्तरादिभ्यः कल्पमानो वर्ण्यते १ तदेवं सामान्यतः कालस्योपलक्षणभूतं गुणव्यतिकरं दशविधं निरूप्येदानीं तस्यैव विशेषं निरूपयितुं तत्परिच्छेद्यं वस्तु लक्षयति द्वाभ्यां सतः कार्यस्य विशेषाणामंशानां यश्चरम अंत्यः यस्यांशो नास्ति अनेकः कार्यावस्थामप्राप्तः असंयुतः समुदायाव

भूतप्रेतपिशाचाश्च विद्याध्राः किंनरादयः दशैते विदुराख्याताः सर्गास्ते विश्वसृक्कृताः २८ अतः परं प्रवक्ष्यामि वंशान्मन्वन्तराणि च एवं रजःप्लुतः स्रष्टा कल्पादिष्वात्मभूर्हरिः सृजत्यमोघसंकल्प आत्मैवात्मानमात्मना २९ इति श्रीभागवते महापुराणे तृतीयस्कंधे दशमोऽध्यायः मैत्रेय उवाच चरमः सद्विशेषाणामनेकोऽसंयुतः सदा परमाणुः स विज्ञेयो नृणामैक्यभ्रमो यतः १ सत एव पदार्थस्य स्वरूपावस्थितस्य यत् कैवल्यं परममहानविशेषो निरंतरः २

२ स्थां वा प्राप्तः अत एव सदाकार्यसमुदायावस्थयोरपगमेऽप्यस्तीति स परमाणुर्विज्ञेयः किं तत्र प्रमाणमत आह यतः येभ्यः समुदितेभ्यः नृणां व्यवहर्तॄणामैक्यभ्रमः अवयविबुद्धिः तथा च पंचमे अवयविनिराकरणे वक्ष्यति येषां समूहेन कृतो विशेष इति कार्यानुपपत्त्या कल्प्यत इति भावः १ सूक्ष्ममुक्त्वा स्थूलमाह सत एवेति यस्य चरमोंशः परमाणुः तस्यैव सतः कार्यमात्रस्य स्वरूपावस्थितस्य परिणामांतरमप्राप्तस्य यत्कैवल्यं ऐक्यं स परममहान् पुंस्त्वं तु परमाणुप्रतियोगित्वात् ननु नानाविशेषवान् परस्परं भिन्नश्च सर्वः पदार्थः कथमैक्यं तस्य तत्राह अविशेषः विशेषविवक्षारहितः निरंतरः भेदविवक्षारहितश्च स ४०

श्रीमद्भागवते

यथा सूक्ष्मः स्थूलश्चायं पदार्थः एवं कालोऽपि अनुमितः चकारान्मध्यमावस्था गृह्यते संस्थानं परमाण्वाद्यवस्था तस्य भुक्तिः व्याप्तिः तया भगवानिति हरेः शक्तिः स्वनो व्यक्तः व्यक्तं भुंक्ते व्याप्नोति परिच्छिनत्तीति तथा विभुः उत्पत्त्यादिषु दक्षः २ एतदेव प्रपंचयति स इत्यादिना स तस्य प्रपंचस्य परमाणुतां परमाण्ववस्थां यो भुंक्ते स कालः परमाणुः तस्यैव अविशेषसाकल्यं यो भुंक्ते स परममहान् अयमर्थः ग्रहर्क्षताराचक्रस्थ इत्यादिना यत्सूर्यपर्यटनं वक्ष्यते तत्र सूर्यो यावता परमाणुदेशम

एवं कालोऽप्यनुमितः सौक्ष्म्ये स्थौल्ये च सत्तम संस्थानभुक्त्या भगवानव्यक्तो व्यक्तभुग्विभुः ३ स कालः परमाणुर्वै यो भुंक्ते परमाणुतां सतोऽविशेषभुग्यस्तु स कालः परमो महान् ४ अणुर्द्वौ परमाणू स्यात् त्रसरेणुस्त्रयः स्मृतः जालार्करश्म्यवगतः खमेवानुपतन्नगात् ५ त्रसरेणुत्रिकं भुंक्ते यः कालः स त्रुटिः स्मृतः शतभागस्तु वेधः स्यात्तैस्त्रिभिस्तु लवः स्मृतः ६

तिक्रामति तावान् कालः परमाणुः यावता च द्वादशराश्यात्मकं सर्वं भुवनकोशं अतिक्रामति स परमो महान् संवत्सरात्मकः कालः तस्यैवाहत्या युगमन्वंतरादिक्रमेण द्विपरार्धांतत्वमिति तथा च पंचमे सूर्यगत्यैव कालादिविभागं वक्ष्यति ४ इदानीं द्व्यणुकादिलक्षणपूर्वैर्लघुत्वेन खमेवानुपतन्नगात् गतः ऽ कं मध्यमकालावस्थां कथयति द्वौ परमाणू अणुः स्यात् त्रयोऽणवस्त्रसरेणुः स तु प्रत्यक्ष इत्याह जालार्केति गवाक्षे प्रविष्टेष्वर्करश्मिषु अवगतः कोऽसौ योऽतिलघुत्वेन खमेवानुपतन्नगात् गतः पाठांतरे खमेवानुपतन्नवगतः ननु गां पृथ्वीं ५ शतं भागाः त्रुटिरूपा यस्मिन् स वेधः तैर्वेधैः ६ श्रीवासुदेवाय नमः २

भा०त० तेनिमेषास्त्रयः क्षण इत्याम्नाताः ताः काष्ठाः पंचदश एकं लघु ७ नाडिकाः षट् सप्त वा प्रहरः स एव यामो दिनस्य रात्रेश्च चतुर्थो
४१ भागः ह्रासे षट् वृद्धौ सप्त संध्यांशमुहूर्तद्वयं विनेति ज्ञातव्यं तत्राप्यनियमार्थो वाशब्दः प्रत्यहं तद्भेदानां गणयितुमशक्य
त्वात् ८ नाडिकाया उन्मानमाह उन्मीयते अनेनेत्युन्मानं पात्रं षट्पलताम्रविरचितं पंचगुंजामाषः तैश्चतुर्भिश्चतुरं
गुलायामशलाकारूपेण रचितैः कृतमूलछिद्रं तेन छिद्रेण यावत्प्रस्थपरिमितं जलं प्रविशति तेन चप्लुतं निमग्नं भवति

निमेषस्त्रिलवो ज्ञेय आम्नातास्ते त्रयः क्षणः क्षणान्पंच विदुः काष्ठां लघुता दश पंच च ७ लघूनि वै समाम्नाता
दश पंच च नाडिका द्वे ते मुहूर्तः प्रहरः षड्यामः सप्त वा नृणां ८ द्वादशार्धपलोन्मानं चतुर्भिश्चतुरंगुलैः स्वर्णमा
षैः कृतछिद्रं यावत्प्रस्थजलप्लुतं ९ यामाश्चत्वारश्चत्वारो मर्त्यानामहनी उभे पक्षः पंचदशाहानि शुक्लः कृष्णश्च मा
नद १० तयोः समुच्चयो मासः पितॄणां तदहर्निशं द्वौ तावृतुः षडयनं दक्षिणं चोत्तरं दिवि ११ अयने चाहनी प्राहु
र्वत्सरो द्वादश स्मृतः संवत्सरशतं नृणां परमायुर्निरूपितं १२ ग्रहर्क्षताराचक्रस्थः परमाण्वादिना जगत् संव
त्सरावसानेन पर्येत्यनिमिषो विभुः १३
तावान्कालो नाडिका अत्र पलछिद्रयोराधिक्ये शीघ्रं निमज्जेत् अल्पत्वे च विलंबेनेति पलशलाकयोर्नियमः ९ अहनी ४१
अहोरात्रे १० षण्मासा अयनं दिवीत्युत्तरेणान्वयः ११ देवानामहोरात्रे प्राहुः द्वादश मासाः १२ अनेन क्रमेणासौ सूर्यो
नित्यमायुः क्षपयतीत्याह ग्रहाश्चंद्रादयः ऋक्षाण्यश्विन्यादीनि ताराः अन्यानि नक्षत्राणि तदुपलक्षितं यत्कालचक्रं तत्र
स्थितः अनिमिषः कालात्मा विभुरीश्वरः सूर्यः जगत् द्वादशराश्यात्मकं भुवनकोशं पर्येति पर्यटति १३ वासुदेवायनमः

दिना
संवत्सरादिभेदश्च सौरबार्हस्पत्यसावनचांद्रमासनाक्षत्रमासभेदेन द्रष्टव्यः केचित्पुनरेवमाहुः यदा शुक्लपक्षप्रतिपदि संक्रांतिर्भवति
तदा सौरचांद्रमासयोर्युगपदुपक्रमो भवति स संवत्सरः ततः सौरमानेन वर्षे षट् दिनानि वर्धंते चांद्रमानेन च षट् निर्ह्रसंतीति द्वादश दिनव्यव
धानादुभयोरग्रपश्चाद्भावो भवति एवंव्यवधानतारतम्येन पंचवर्षाणि गच्छंति तन्मध्ये द्वौ मलमासौ भवतः ततः पुनः षष्ठः संवत्सरो भवतीति १४
एवंभूतः कालात्मा नित्यमप्रमत्तैः पूजनीय इत्याह य इति स उन्नं कार्यमंकुरादि तद्विषयां बीजादीनां शक्तिं कालरूपया स्वशक्त्या

संवत्सरः परिवत्सर इडावत्सर एव च अनुवत्सरो वत्सरश्च विदुरैवं प्रभाष्यते १४ यः सृज्यशक्तिमुरुधोच्छ्वसय
न्स्वशक्त्या पुंसोऽभ्रमाय दिवि धावति भूतभेदः कालाख्यया गुणमयं क्रतुभिर्वितन्वंस्तस्मै बलिं हरत वत्सरपंचका
य १५ विदुर उवाच पितृदेवमनुष्याणामायुः परमिदं स्मृतं परेषां गतिमाचक्ष्व ये स्युः कल्पाद्बहिर्विदः १६ भगव
न्वेद कालस्य गतिं भगवतो ननु विश्वं विचक्षते धीरा योगराद्धेन चक्षुषा १७

बहुधा उच्छ्वसयन् कार्योन्मुखीकुर्वन् दिवि अंतरिक्षे धावति कोऽसौ भूतभेदः महाभूतविशेषस्तेजोमंडलरूपी सूर्यः किम
र्थं धावति पुंसः पुरुषस्य अभ्रमाय भ्रमो मोहः तन्निवृत्तये आयुरादिक्षयेन विषयासक्तिं निवर्तयन्नित्यर्थः सकामानां
तु गुणमयं स्वर्गादिफलं क्रतुभिर्विस्तारयन् तस्मै संवत्सरपंचकप्रवर्तकाय पूजां कुरुत १५ इदं स्वस्वमानेन वर्षशतगणितं
आयुर्मानं प्रत्यहं कल्प्यते सृज्यत इति कल्पस्त्रैलोक्यं तस्माद्बाह्यतः विदो ज्ञानिनः १६ योगराद्धेन योगसिद्धेन १७

भा०द० द्वादशभिर्वर्षसहस्रैरित्युत्तरश्लोकसामर्थ्यात् ज्ञातव्यं अवधीयत इत्यवधानं संध्यांशाभ्यां सहितं ८ कृतयुगे चत्वारि सहस्रा
४२ णि संध्यांशयोश्चत्वारि चत्वारीत्यष्टौ शतानि एवं त्रेतादिष्वपि योज्यं १९ युगस्यादौ संध्या अंते संध्यांशः उक्तानि शतानि संध्या
संख्यायोः तयोरंतरेण मध्ये युगं तस्य विशेषमाह यत्रेति भगवान् आदिधर्मविशेषो यत्र विधीयत इत्यर्थः साधारणधर्मस्तु संध्यां
शयोरप्यस्त्येव २० चतुष्पात् संपूर्णः त्रेतादिषु पादेन पादेन व्येति ह्रसति पादेन पादेन वर्धमानेनाधर्मेण हेतुना एतच्च स्वरूपक
कृतं त्रेता द्वापरं च कलिश्चेति चतुर्युगं दिव्यैर्द्वादशभिर्वर्षैः सावधानं निरूपितं १८ चत्वारि त्रीणि
मैत्रेय उवाच द्वे चैकं कृतादिषु यथाक्रमं संख्यातानि सहस्राणि द्विगुणानि शतानि च १९ संध्यांशयोरंतरेण यः कालः शत
संख्ययोः तमेवाहुर्युगं तज्ज्ञा यत्र धर्मो विधीयते २० धर्मश्चतुष्पान्मनुजान् कृते समनुवर्तते स एवान्येष्वधर्मे
ण व्येति पादेन वर्धता २१ त्रिलोक्या युगसाहस्रं बहिराब्रह्मणो दिनं तावत्येव निशा तात यन्निमीलति विश्वसृ
क् २२ निशावसान आरब्धो लोककल्पोनुवर्तते यावद्दिनं भगवतो मनून् भुंजंश्चतुर्दश २३ स्वं स्वं कालं म
नुर्भुंक्ते साधिकां ह्येकसप्ततिं मन्वंतरेषु मनवस्तद्वंश्या ऋषयः सुराः भवंति चैव युगपत्सुरेशाश्चानु ये च तान् २४
एष दैनंदिनः सर्गो ब्राह्मस्त्रैलोक्यवर्तनः तिर्यङ्नृपितृदेवानां संभवो यत्र कर्मभिः २५
धनमात्रं वैराग्यार्थं न तु धर्मसंकोचार्थं २१ त्रिलोक्या बहिर्महर्लोकप्रभृति ब्रह्मलोकमभिव्याप्य चतुर्युगसहस्रमेकं दिनं य ४२
तयस्यां विश्वसृक् ब्रह्मा निमीलति स्वपिति २२ तत्र दिनस्थितिमाह निशावसान इत्यादि सार्द्धैश्चतुर्भिः चतुर्दश मनू
भुंजन् पालयन् व्याप्नुवन्नित्यर्थः २३ किंचिदधिकं युगानामेकसप्ततिं मनुवंशाः पृथ्वीपालकाः क्रमेण भवंति सप्तर्षि
नतयस्तु युगपत्समकालमेव भवंति सुरेशाः इंद्राः ये ताननुवर्तंते ये गंधर्वादयस्तेपि २४ त्रैलोक्यं वर्तयतीति तथा २५

दैमानेनसंख्या
कृ त्रे द्वा क
४८०० । ३६०० । २४०० । १२००
एवं चतु १२०००

स्वमूर्तिभिर्मन्वंतरावतारैर्मन्वादिभिर्द्वारभूतैरात्मविष्कृतपुरुषाकारः सन् विश्वं रक्षति २६ रात्रिगतां स्थितिमाह पंचभिः तम
सोमात्रां लेशां प्रतिसंरुद्धः प्रत्याहृतो विक्रमो येन अनुगतमनुप्रविष्टमशेषं यस्मिन् २७ तदेव स्पष्टयति तमेवेति अपिधी
यंत इति कर्मकर्तरि प्रयोगः तिरोहिता भवंतीत्यर्थः कथं निर्मुक्ताः रहिताः शशी भास्करश्च यया भवति तथा २८ भगवच्छ
मन्वंतरेषु भगवान् बिभ्रत्सत्त्वं स्वमूर्तिभिः मन्वादिभिरिदं विश्वमवत्युदितपौरुषः २६ तमोमात्रामुपादाय प्रतिसंरु
द्धविक्रमः कालेनानुगताशेष आस्ते तूष्णीं दिनात्यये २७ तमेवान्वपिधीयंते लोका भूरादयस्त्रयः निशायाम
नुवृत्तायां निर्मुक्तशशिभास्करं २८ त्रिलोक्यां दह्यमानायां शक्त्या संकर्षणाग्निना यांत्यूष्मणा महर्लोकाज्ज
नं भृग्वादयोर्दिताः २९ तावत्त्रिभुवनं सद्यः कल्पांतैधितसिंधवः प्लावयंत्युत्कटाटोपचंडवातेरितोर्मयः
३० अंतः स तस्मिन्सलिल आस्तेनंतासनो हरिः योगनिद्रानिमीलाक्षः स्तूयमानो जनालयैः ३१ एवंवि
धैरहोरात्रैः कालगत्योपलक्षितैः अपक्षितमिवास्यापि परमायुर्वयःशतं ३२ यदर्द्धमायुषस्तस्य परार्द्धम
भिधीयते पूर्वः परार्द्धोपक्रांतो ह्यपरोद्य प्रवर्तते ३३
क्तिरूपो यः संकर्षणमुखाग्निस्तेन उष्मणा अर्दिताः संतः जनलोकं यांति २९ कल्पांतेन एधिताः सिंधवः समुद्राः उ
त्कर आटोपः क्षोभो येषां ते च ते चंडवातेरीरितोर्मयश्च ३० जनलोकआलयो येषां महर्लोकाद्गतानामन्येषां च
तैः ३१ वैराग्यार्थमाह एवंविधैरहोरात्रैर्वर्षशतं सर्वेषां प्राणिनां मायुषः परमधिकं अस्य ब्रह्मणो यदायुस्तदप्यपक्षि
तं अपक्षीणं इवेति लोकोक्तिः गतप्रायमित्यर्थः ३२ तदेवाह यदिति ३३

भा० तृ०
४३

पूर्वस्य परार्द्धस्याद्यावितित्रिभिर्वस्तुकथनमात्रं ३४ पाद्मत्वे हेतुः यदिति ३५ अयंतु द्वितीयस्यादौ कथितः ३६ तदेवं कालेन निमित्तेन संख्यानामायुःपरिमाणमुक्त्वा कालपरिच्छेदरहितं तत्वमाह कालोयमिति पंचभिः उपवर्ण्यते केवलं न तत्वेन नापि क्रमेणायुर्गणनं तस्येत्याह अव्याकृतस्य कार्योपाधिशून्यस्य अतएवानंतस्य अनादेश्च जगदात्मनो जगत्कारणस्य ३७ तत्परिच्छेदे कालस्यासामर्थ्यादित्याह कालोयमीश्वरः समर्थोपि त्वन्न्नः परिपूर्णस्येशितुं नैवप्र

पूर्वस्यादौ परार्द्धस्य ब्राह्मो नाम महानभूत् कल्पो यत्राभवद्ब्रह्मा शब्दब्रह्मेति यं विदुः ३४ तस्यैव चांते कल्पो न्यूद्यं पाद्ममभिचक्षते यद्धरेर्नाभिसरस आसील्लोकसरोरुहं ३५ अयं तु कथितः कल्पो द्वितीयस्यापि भारत वाराह इति विख्यातो यत्रासीच्छूकरो हरिः ३६ कालोयं द्विपरार्द्धाख्यो निमेष उपवर्ण्यते अव्याकृतस्यानंतस्य अनादेर्जगदात्मनः ३७ कालोयं परमाण्वादिर्द्विपरार्द्धांत ईश्वरः नैवेशितुं प्रभुर्भूम्न ईश्वरो धाममानिनां ३८ विकारैः सहितो युक्तैर्विशेषादिभिरावृतः आंडकोशो बहिरयं पंचाशत्कोटिविस्तृतः ३९ दशोत्तराधिकैर्यत्र प्रविष्टः परमाणुवत् लक्ष्यतेंतर्गताश्चान्ये कोटिशो ह्यंडराशयः ४०

तुः समर्थः यतो धाममानिनां देहगेहाभिमानिनामेवेश्वरः ३८ भूम्न इत्युक्तं तत्प्रपंचयन्नाह विकारैः षोडशभिर्युक्तैः सहितः तदारब्ध इत्यर्थः अयमांडकोशः यत्र प्रविष्टः परमाणुवल्लक्ष्यत इत्युत्तरेणान्वयः कीदृशः अंतः पंचाशत्कोटियोजनविस्तृतः बहिश्च विशेषादिभिः सप्तभिरावृतः ३९ कीदृशैः आंडकोशप्रमाणात् दशगुणमुत्तरोत्तराधिकैः येषु तैः न केवलमयमेक एव अपितु अन्येपि लक्ष्यंते ४० ॥ श्रीं नमो भगवते वासुदेवाय ॥ ४३

पृथिव्यादिभिः

अष्टप्रकृतिसंयुक्तैः ३

सर्वेषां कारणानां कारणं धाम स्वरूपं ४१ इति तृतीये एकादशः ॥ द्वादशे तु कुमारादिमनःसर्गाः समेधनात् कायद्वैधेन योनस्तु मनुसर्गोनुवर्ण्यते १ अथ इति ब्रह्मा स्वसृष्टेः प्रथममविद्यावृत्तीः ससर्ज तत्र तमो नाम स्वरूपाप्रकाशः मोहो देहाद्यहंबुद्धिः महामोहो भोगेच्छा तामिस्रं तत्प्रतिघाते क्रोधः अंधतामिस्रं तन्नाशेऽहमेव मृतोस्मीति बुद्धिः तदेवोक्तं वेभवे तमो विवेको मोहः स्यादंतःकरणविभ्रमः महामोहस्तु विज्ञेयो ग्राम्यभोगसुखैषणा मरणं ह्यंधतामिस्रं तामि

तदाहुरक्षरं ब्रह्म सर्वकारणकारणं विष्णोर्धाम परं साक्षात्पुरुषस्य महात्मनः ४१ इति श्रीभागवते महापुराणे तृतीयस्कंधे एकादशोध्यायः ॥ श्रीमैत्रेय उवाच ॥ इति ते वर्णितः क्षत्तः कालाख्यः परमात्मनः महिमा वेदगर्भोथ यथास्राक्षीन्निबोध मे १ ससर्जाग्रेंधतामिस्रमथ तामिस्रमादिकृत् महामोहं च मोहं च तमश्चाज्ञानवृत्तयः २ दृष्ट्वा पापीयसीं सृष्टिं नात्मानं बह्वमन्यत भगवद्ध्यानपूतेन मनसान्यां ततोसृजत् ३ सनकं च सनंदं च सनातनमथात्मभूः सनत्कुमारं च मुनीन्निष्क्रियानूर्ध्वरेतसः ४ तान्बभाषे स्वभूः पुत्रान्प्रजाः सृजत पुत्रकाः तन्नैच्छन्मोक्षधर्माणो वासुदेवपरायणाः ५ सोवध्यातः सुतैरेवं प्रत्याख्यातानुशासनैः क्रोधं दुर्विषहं जातं नियंतुमुपचक्रमे ६ धिया निगृह्यमाणोपि भ्रुवोर्मध्यात्प्रजापतेः सद्योजायत तन्मन्युः कुमारो नीललोहितः ७

स्रः क्रोध उच्यते अविद्या पंचपर्वैषा प्रादुर्भूता महात्मन इति पातंजलेप्येत एवोक्ताः अविद्याऽस्मितारागद्वेषाभिनिवेशाः पंच क्लेशा इति श्रीविष्णुस्वामिप्रोक्ता वा अज्ञानविपर्यासत्वेद्दत्रयशोकाः तदुक्तं स्वादृस्तु विपर्यासस्याद्दि २ न बह्वमन्यत नाभ्यनंदत ३ यद्यपि प्रतिकल्पं सनकादिसृष्टिर्नास्ति तथापि ब्राह्मसर्गत्वादिहोच्यते वस्तुतस्तु मुख्यसर्गादय एव प्रतिकल्पं भवंति सनकादयस्तु ब्राह्मकल्पसृष्टा एवानुवर्तंते ४ स्वभूर्ब्रह्मा अवध्यातः अवज्ञातः प्रत्याख्यातमनु

भा०त० यथा शोच्यमानं वाराहरूपं ब्रह्मणो नसस्तस्तथा वायं भ्रुवोर्मध्यात्तस्मा देवानां ब्रह्मविष्ण्वादीनां पूर्वजो भगवान्भव
४४ ति यस्मात्सर्वैर्विभ्राम्यते भवः एतादृशस्यलीलोच्यते ८।९ बालकइव १० अग्रे पूर्वमेवमया कृतानि ११ भवता नाम्नाक
रोषि त्रिवर्ति पालयसि कालेति संहारयसि १२।१३ सयोषणः सस्त्रीकः एभिः स्थानैर्नामभिश्च युक्तः १४ सत्वं

स वै रुरोद देवानां पूर्वजो भगवान्भवः नामानि कुरु मे धातः स्थानानि च जगद्गुरो ८ इति तस्य वचः पाद्मो भग
वान्परिपालयन् अभ्यधाद्भद्रया वाचा मा रोदीस्तत्करोमि ते ९ यदरोदीः सुरश्रेष्ठ सोद्वेग इव बालकः
ततस्त्वामभिधास्यन्ति नाम्ना रुद्र इति प्रजाः १० हृदिन्द्रियाण्यसुर्व्योम वायुरग्निर्जलं मही सूर्यश्चन्द्रस्तप
श्चैव स्थानान्यग्रे कृतानि ते ११ मन्युर्मनुर्महिनसो महाञ्छिव ऋतध्वजः उग्ररेता भवः कालो वामदेवो धृ न
तव्रतः १२ धीर्धृतिरुशनोमा च नियुत्सर्पिरिलाम्बिका इरावती सुधा दीक्षा रुद्राण्यो रुद्र ते स्त्रियः १३
गृहाणैतानि नामानि स्थानानि च सयोषणः एभिः सृज प्रजा बह्वीः प्रजानामसि यत्पतिः १४ इत्या
दिष्टः सगुरुणा भगवान्नीललोहितः सत्त्वाकृतिस्वभावेन ससर्जात्मसमाः प्रजाः १५ रुद्राणां रुद्रसृष्टा
नां समन्ताद्ग्रसतां जगत् निशाम्यासंख्यशो यूथान्प्रजापतिरशंकत १६ अलं प्रजाभिः सृष्टाभिरीदृ ४४
शीभिः सुरोत्तम मया सह दहन्तीभिर्दिशश्चक्षुर्भिरुल्बणैः १७ तप आतिष्ठ भद्रं ते सर्वभूतसुखावहं त
पसैव यथापूर्वं स्रष्टा विश्वमिदं भवान् १८ तपसैव परं ज्योतिर्भगवन्तमधोक्षजं सर्वभूतगुहावासमञ्जसा वि
बलं आकृतिर्नीललोहितता स्वभावस्तीव्रतातेन १५ रुद्राणां यूथानि दृष्ट्वा १६ १७ स्रष्टा न्दतेपुमान् १९
स्रक्ष्यति १९ २०

६
अधरच्छदात् अधरोष्ठात् २६ २७ देहान्तरेण कृतं सर्गं वक्तुं तद्देहत्यागे कारणमाह वाचमित्यादिना २८ २९ तत्रत्वत्तो
मैत्रेय उवाच एवमात्मभुवादिष्टः परिक्रम्य गिरां पतिं बाढमित्यमुमामन्त्र्य विवेश तपसे वनं २० अथाभिध्याय
तः सर्गं दश पुत्राः प्रजज्ञिरे भगवच्छक्तियुक्तस्य लोकसंतानहेतवः २१ मरीचिरत्र्यङ्गिरसौ पुलस्त्यः पुलहः क्रतुः
भृगुर्वसिष्ठो दक्षश्च दशमस्तत्र नारदः २२ उत्सङ्गान्नारदो जज्ञे दक्षोऽङ्गुष्ठात्स्वयंभुवः प्राणाद्वसिष्ठः संजातो भृगुस्त्व
चःकरात्क्रतुः २३ पुलहो नाभितो जज्ञे पुलस्त्यः कर्णयोरृषिः अङ्गिरा मुखतोऽक्ष्णोऽत्रिर्मरीचिर्मनसोऽभवत् २४
धर्मः स्तनाद्दक्षिणतो यत्र नारायणः स्वयं अधर्मः पृष्ठतो यस्मान्मृत्युर्लोकभयंकरः २५ हृदि कामो भ्रुवः क्रो
धो लोभश्चाधरदच्छदात् आस्याद्वाक्सिन्धवो मेढ्रान्निर्ऋतिः पायोरघाश्रयः २६ छायायाः कर्दमो जज्ञे देवहू
त्याः पतिः प्रभुः मनसो देहतश्चेदं जज्ञे विश्वकृतो जगत् २७ वाचं दुहितरं तन्वीं स्वयंभूर्हरतीं मनः अकामां
चकमे क्षत्तः सकाम इति नः श्रुतं २८ तमधर्मे कृतमतिं विलोक्य पितरं सुताः मरीचिमुख्या मुनयो विश्रम्भात्प्र
त्यबोधयन् २९ नैतत्पूर्वैः कृतं त्वद्य न करिष्यन्ति चापरे यत्त्वं दुहितरं गच्छेरनिगृह्याङ्गजं प्रभुः ३० तेजीयसामपि
ह्येतन्नसुश्लोक्यं जगद्गुरो यद्वृत्तमनुतिष्ठन्वै लोकः क्षेमाय कल्पते ३१ तस्मै नमो भगवते य इदं स्वेन रोचि
षा आत्मस्थं व्यञ्जयामास स धर्मं पातुमर्हसि ३२ स इत्थं गृणतः पुत्रान्पुरो दृष्ट्वा प्रजापतीन् प्रजापतिपतिस्तन्वं
तत्याज व्रीडितस्तदा ३३
ये पूर्वे ब्रह्मादयोऽन्ये वा तैरेतन्न कृतं अङ्गजं कामं ३० तेजीयसां अभितेजस्वि नामपि सुश्लोक्यं सत्कीर्तिदं न भवति येषां ते
जीयसां वृत्तं ३१ तन्वं तनुं ३२

भा॰ तृ॰
४५

कथं स्रक्ष्याम्यहमित्याध्यायतः स्रष्टुर्लक्षणश्चतुःसंख्यायुक्तान्मुखान् समवेतान् सुसंगतान् ३४ चातुर्होत्रं होत्रादीनां चतुर्णां कर्म
कर्मतंत्रं यज्ञविस्तारः उपवेदैः न्यायैश्च सह आश्रमास्तद्वृत्तयश्च आसन् ३५ मुखतः मुखेभ्यः ३६ चातुर्होत्रस्य सृष्टिक्रममा

तां दिशो जगृहुर्घोरां नीहारं यद्विदुस्तमः कदाचिद्ध्यायतः स्रष्टुर्वेदा आसंश्चतुर्मुखात् ३४ कथं स्रक्ष्याम्यहं
लोकान्समवेतान्यथापुरा ३५ चातुर्होत्रं कर्मतंत्रमुपवेदनयैः सह धर्मस्य पादाश्चत्वारस्तथैवाश्रमवृत्तयः
३६ विदुर उवाच स वै विश्वसृजामीशो वेदादीन्मुखतोऽसृजत् यद्यद्येनासृजद्देवस्तन्मे ब्रूहि तपो
धन ३७ मैत्रेय उवाच ऋग्यजुःसामाथर्वाख्यान्वेदान्पूर्वादिभिर्मुखैः शस्त्रमिज्यां स्तुतिस्तो
मं प्रायश्चित्तं व्यधात्क्रमात् ३८ ~~उपवेदक्रममाह~~ आयुर्वेदं धनुर्वेदं गांधर्वं वेदमात्मनः स्थापत्यं चासृ
जद्वेदं क्रमात्पूर्वादिभिर्मुखैः ३९ इतिहासपुराणानि पंचमं वेदमीश्वरः सर्वेभ्य एव वक्त्रेभ्यः ससृजे
सर्वदर्शनः ४० षोडश्युक्थौ पूर्ववक्त्रात्पुरीष्यग्निष्टुतावथ आप्तोर्यामातिरात्रौ च वाजपेयं सगोस
वं ४१

ह शस्त्रं अप्रगीतमंत्रस्तोत्रं होतुः कर्म इज्यां अध्वर्योः कर्म स्तुति स्तोमः स्तुतिः संगीतं स्तोमं तदर्थमिरुक्समुदा
यं त्रिवृत् स्तोमो भवतीत्यादिविहितमुद्गातृप्रयोज्यं प्रायश्चित्तं ब्रह्मत्वं ३७ उपवेदक्रममाह आयुर्वेदमि
ति आत्मनो मुखैः स्थापत्यं विश्वकर्मणः शास्त्रं ३९ कर्मतंत्रक्रममाह षोडश्युक्थाविति पुरीषीचयनं ४५

विद्येति शौचं क्षेत्रज्ञस्येश्वरज्ञानाद्विशुद्धिः परमा मतेति स्मृतेः दानमिति दयाभूताभयप्रदानस्य कलां नार्हति षोडशी
मिति वचनात् एवं च तपः शौचं दया सत्यमिति पादाः कृते कृताइति प्रथमस्कंधोक्तेरविरोधः ४२ सावित्रं ब्रह्मचर्यं उप
नयनाद्दारभ्य गायत्रीमधीयानस्य त्रिरात्रं प्राजापत्यं व्रतान्याचरतः संवत्सरं ब्राह्मं वेदग्रहणांतं बृहत् नैष्ठिकं वा
र्ता अनिषिद्धकृष्यादिवृत्तिः संचयो याजनादिवृत्तिः शालीनं अयाचितवृत्तिः शिलोंछ नं पतितकणिशकणवृत्तिः

विद्या दानं तपः सत्यं धर्मस्येति पदानि च आश्रमांश्च यथासंख्यमसृजत्सह वृत्तिभिः ४१ सावित्रं प्राजा
पत्यं च ब्राह्मं चाथ बृहत्तथा वार्तासंचयशालीनशिलोंछ इति वै गृहे ४२ वैखानसा बालखिल्यौदुंबराः
फेनपा वने न्यासे कुटीचकः पूर्वं बह्वोदो हंसनिष्क्रियौ ४३

एकवचनमार्षं इसे तां गृहे वृत्तय इति यद्वा शिलोंछ इति द्वंद्वैक्ये सप्तमी एवं वृत्तिभेदेन सति गृहे स्थिता भवंतीत्य
र्थः ४३ वने स्थिताश्चत्वारः तत्र वैखानसा अकृष्टपच्यवृत्तयः वालखिल्याः नवेन्ने लब्धे पूर्वसंचितान्नत्या
गिनः औदुंबराः प्रातरुत्थाय यां दिशं प्रथमं पश्यंति ततआहृतैः फलादिभिर्जीवंतः फेनपाः स्वयं पतितैः
फलादिभिर्जीवंतः कुटीचकः स्वाश्रमकर्मप्रधानः बह्वोदकः कर्मोपसर्जनीकृत्य ज्ञानप्रधानः हंसो ज्ञा
नाभ्यासनिष्ठः निष्क्रियः प्राप्ततत्वः एते च सर्वे यथोत्तरं श्रेष्ठाः ४३ ओं नमो भगवते वासुदेवाय

न्यायादीनांपूर्वादिक्रमेणोत्पत्तिमाह आन्वीक्षिकीति आन्वीक्षिक्याद्यामोक्षधर्मकामार्थविद्याः भूर्भुवःस्वरि
तिव्यस्तास्तिस्त्रःसमस्ताश्चतुर्थीयथाहाश्वलायनः एवंव्याहृतयःप्रोक्ताव्यस्ताःसमस्ताइति यद्वामहइतिचतुर्थी
तथाचश्रुतिः भूर्भुवस्वरितिवाएतास्तिस्रोव्याहृतयःतासामुहस्मैतांचतुर्थीमाहाचमस्यःप्रवेदयतेमहइतीति हृत्खतः
हृदयाकाशात् ४४ स्फुतःत्वायुतःअनुष्टुप्प्रत्वावोनीतिश्रुतेः ४९ महाकल्पेब्रह्मा शब्दब्रह्मरूपोभवदित्यर्कं तदेवद

आन्वीक्षिकीत्रयीवार्तादंडनीतिस्तथैवच एवंव्याहृतयश्चासन्प्रणवोह्यस्यहृत्खतः ४४ तस्योष्णिगासी
ल्लोमभ्योगायत्रीचत्वचोविभोः त्रिष्टुप्मांसात्स्नुतोनुष्टुप्जगत्यस्थ्नःप्रजापतेः ४५ मज्जायाःपंक्तिरुत्पन्ना
बृहतीप्राणतोभवत् स्पर्शस्तस्याभवज्जीवःस्वरोदेहउदाहृतः ४६ ऊष्माणमिंद्रियाण्याहुरंतःस्थाबलमात्म
नः स्वराःसप्तविहारेणभवंतिस्मप्रजापतेः ४७ शब्दब्रह्मात्मनस्तस्यव्यक्ताव्यक्तात्मनःपरः ब्रह्मावभातिवि
ततोनानाशक्त्युपबृंहितः ततोपरामुपादायससर्गायमनोदधे ४८

शब्दानवर्णानामुत्पत्तिमाह स्पर्शइतिसार्द्धेन स्पर्शःकादिवर्गपंचकं स्वरःअकारादिः ४६ ऊष्माणंशषसहचतुष्कं अंतस्थाः ४६
यरलवाः स्वराःसप्तस्वराःषड्जादयःविहारेणक्रीडया ४७ अतएवशब्दतनुत्वात् ब्रह्मणःपरमेश्वरोनित्यप्रकाशतइत्याह व्य
क्तावैखरी अव्यक्तःप्रणवः तदात्मनस्तस्यब्रह्मणःपरःपरमेश्वरःआभाति कीदृशः ब्रह्मपरिपूर्णःतत्राव्यक्तात्म
नोब्रह्मरूपोविततोवभाति व्यक्तात्मनोनानाशक्त्युपबृंहितइंद्रादिरूपोवभाति यापूर्वंविसृष्टासतीनीहारंत
मोभवत् ततोपरांअनिषिद्धकामासक्तांतनुं शब्दब्रह्मतनुस्तुसदास्त्येव ४८

तन्वंतरग्रहणेकारणमाह ऋषीणामित्यादिना ४९ ५० युक्तकृतः यथोचितंकुर्वतः अतएवकस्यब्रह्मणःइदंद्विधाकृत
मित्याश्चर्यात्कायमध्याप्यत्तिचक्षते ५१ यास्त्रीसास्यमहिष्यासीत् एधांवभूविरेवृद्धिंजाताः ५३ तदेवाह सचापी
ति ५४ यतःयासांसंततिभिः ५५ इतितृतीयेद्वादशः त्रयोदशोसिसृक्षायांमानोशकस्मिकाद्भुतं धरामुद्धर्तुमु

ऋषीणांभूरिवीर्याणामपिसर्गमविस्तृतं ज्ञात्वातद्धृदयेभूयश्चिंतयामासकौरव ४९ अहोअद्भुतमेतन्मे
व्यापृतस्यापिनित्यदा नह्येधंतेप्रजानूनंदैवमत्रविघातकं ५० एवंयुक्तकृतस्तस्यदैवंचावेक्षतस्तदा कस्यरू
पमभूद्द्वेधायत्कायमभिचक्षते ५१ ताभ्यांरूपविभागाभ्यांमिथुनंसमपद्यत यस्तुतत्रपुमान्सोभून्मनुःस्वायं
भुवःस्वराट् ५२ स्त्रीयासीच्छतरूपाख्यामहिष्यस्यमहात्मनः तदामिथुनधर्मेणप्रजाह्येधांबभूविरे ५३
सचापिशतरूपायांपंचापत्यान्यजीजनत् प्रियव्रतोत्तानपादौतिस्रःकन्याश्चभारत ५४ आकूतिर्देवहूति
श्चप्रसूतिरितिसत्तम आकूतिंरुचयेप्रादात्कर्दमायतुमध्यमां दक्षायादात्प्रसूतिंचयतआपूरितंजगत्
५५ इतिश्रीभागवतेमहापुराणेतृतीयस्कंधेद्वादशोध्यायः श्रीशुकउवाच निशम्यवाचंव
दतोमुनेःपुण्यतमांनृप भूयःपप्रच्छकौरव्योवासुदेवकथादृतः १ श्रीविदुरउवाच सवैस्वायंभु
वःसम्राट्प्रियःपुत्रःस्वयंभुवः प्रतिलभ्यप्रियांपत्नींकिंचकारततोमुने २

भूतात्कोडाद्दैत्यानुसूदनं १ स्वयंभुवःपुत्रःतद्देहांशत्वात्सः २ ओंनमोभगवतेवासुदेवाय॰ छू

विष्वक्सेनो हरिरेव आश्रयो यस्य ३ अतस्तस्य चरितं श्रोतव्यमित्याह सुचिरं श्रमो यस्मिन् तस्य पुंसां कृतस्य अयमेवार्थ इति तः स्मृतः ननु तेषां हृदयेषु स्थिते षां भागवतानां गुणानुश्रवणं ४ सहस्रशीर्षा श्रीकृष्णस्तस्य चरणावुपधीयेते यस्मिन् श्रीकृष्णः प्रीत्या यस्योत्संगे चरणौ प्रसारयतीत्यर्थः तमन्यवदद् अन्यन्नोवत प्रणीयमानः तेन प्रवर्त्यमानः ५।६ त्वमे

चरितं तस्य राजर्षेरादिराजस्य सत्तम ब्रूहि मे श्रद्दधानाय विष्वक्सेनाश्रयो ह्यसौ ३ श्रुतस्य पुंसां सुचिरश्रमस्य
नन्वंजसा सूरिभिरीडितोऽर्थः तत्तद्गुणानुश्रवणं मुकुंदपादारविंदं हृदयेषु येषां ४ श्रीशुक उवाच इति ब्रुवा
णं विदुरं विनीतं सहस्रशीर्ष्णश्चरणोपधानं प्रहृष्टरोमा भगवत्कथायां प्रणीयमानो मुनिरभ्यचष्ट ५ मैत्रेय उवाच
यदा स्वभार्यया साकं जातः स्वायंभुवो मनुः प्रांजलिः प्रणतश्चेदं वेदगर्भमभाषत ६ त्वमेकः सर्वभूतानां जन्मकृद्
वृत्तिदः पिता अथापि नः प्रजानां ते शुश्रूषा केन वा भवेत् ७ तद्विधेहि नमस्तुभ्यं कर्मस्वीड्यात्मशक्तिषु यत्कृत्वेह
यशो विष्वगमुत्र च भवेद्गतिः ८ श्रीब्रह्मोवाच प्रीतस्तुभ्यमहं तात स्वस्ति स्ताद्वां क्षितीश्वर यन्निर्व्यलीके
न हृदा शाधि मेत्यात्मनार्पितं ९ एतावत्यात्मजैर्वीर कार्या ह्यपचितिर्गुरौ शक्त्याप्रमत्तैर्गृह्येत सादरं गतमत्सरैः

वैकः पिता सर्वेषां यतो जन्मकृद्वृत्तिदः यो यकश्च त्वमेव अतस्तव यद्यप्यन्यापेक्षा नास्ति अथाप्यस्माकं ते शुश्रूषा केन कर्मणा भवेत् तद्विधे
हीत्यन्तरेणान्वयः ७ हे ईड्य आत्मशक्तिषु अस्मत् शक्येषु कर्मसु मध्ये केन कर्मणा भवेत् तद्विधेहि इदं कर्तव्यमिति कथय यत्कृत्वा
यस्मिन् कृते सति विष्वक्सर्वतः ८ वां युवाभ्यां स्वस्ति भद्रं स्तात् भूयात् यद्यतः मा मां शाधि अनुशिक्षयेति आत्मना स्वयमेवार्पितं निवे
दितं अतः प्रीतोस्मि ९ अपचितिः पूजा गृह्येत आज्ञेति शेषः सनकादयो न कुर्वंति वयं किमिति करिष्याम इति एवं भूतो गतो मत्सरो येभ्यः
१०

गां शाधि पालयेत्यर्थः पुरुषं हरिं ११ प्रजापालकस्य ते तुष्टो भविष्यति १२ यज्ञलिंगः यज्ञमूर्तिः अपगतो
यो यस्मात् स केवलं श्रम एवेत्यर्थः यद्यस्मात् त्वात्मैव स्वयं नादृतः। तस्मिन्नतुष्टे स्वार्थस्यैवासिद्धेः सर्वात्म

स त्वमस्यामपत्यानि सदृशान्यात्मनो गुणैः उत्पाद्य शाधि धर्मेण गां यज्ञैः पुरुषं यज ११ परं शुश्रू
षणं मह्यं स्यात्प्रजारक्षया नृप भगवांस्ते प्रजाभर्तुर्हृषीकेशोऽनुतुष्यति १२ येषां न तुष्टो भगवान्
यज्ञलिंगो जनार्दनः तेषां श्रमो ह्यपार्थाय यदात्मा नादृतः स्वयं १३ मनुरुवाच आदे
शेऽहं भगवतो वर्तेयामीवसूदन स्थानं त्विहानुजानीहि प्रजानां मम च प्रभो १४ यदोकः सर्वस
त्वानां मही मग्ना महांभसि अस्या उद्धरणे यत्नो देव देव्या विधीयतां १५ मैत्रेय उवाच
परमेष्ठी त्वपां मध्ये तथा सन्नामवेक्ष्य गां कथमेनां समुन्नेष्य इति दध्यौ धिया चिरम् १६

त्वाच्च तस्य १३ वर्तेय वर्तिष्ये अमीवसूदन पापनाशन अनुजानीहि अत्र स्थातव्यमिति अनुज्ञां देहि १४
महीं चेत् अत आह यदोकः स्थानं सा मही हे देव अस्या देव्याः १५ पूर्वं पानेष्ट ते पि पुनरकांड एवोद्धृतानाम
पां मध्ये सन्नां अवसन्नां निमग्नां कथं समुन्नेष्य उद्धरिष्यामि १६

भा०टी० चिंतामेवाह स्वजतः सतः वार्भिः अद्भिः रसं रसातलं ईश्वरेण सर्गे नियुक्तैः १७ मे अनुष्ठेयं स एव विदधातु
५८ संपादयतु १८ वराहतोकः सूक्ष्मो वराहः खस्थः आकाशस्थितः सन् १८ चित्रधा अनेकधा १९ पूर्वम

स्रजतो मे क्षितिर्वार्भिः प्लाव्यमाना रसां गता अथात्र किमनुष्ठेयमस्माभिः सर्गयोजितैः १८ य
स्याहं हृदयादासं स ईशो विदधातु मे इत्यभिध्यायतो नासाविवरात्सहसानघ वराहतोको निरगा
दंगुष्ठपरिमाणतः १८ तस्याभिपश्यतः खस्थः क्षणेन किल भारत गजमात्रं ववृधे तदद्भुत
मभून्महत् १९ मरीचिप्रमुखैर्विप्रैः कुमारैर्मनुना सह दृष्ट्वा तत्सौकरं रूपं तर्कयामास चित्र
धा २० किमेतत्सौकरव्याजं सत्वं दिव्यमवस्थितं अहो बताश्चर्यमिदं नासाया मे विनिःसृतं
२१ दृष्टोंगुष्ठशिरोमात्रः क्षणाद्गंडशिलासमः अपि स्विद्भगवानेष यज्ञो मे खेदयन्मनः २२
इति मीमांसतस्तस्य ब्रह्मणः सह सूनुभिः भगवान्यज्ञपुरुषो जगर्जागेंद्रसन्निभः २२ राम
५८

गुष्ठाग्रप्रमाणो दृष्टः गंडशिला स्थूलपाषाणः तत्समः यज्ञो विष्णुः निजरूपतिरोधानेन मे मनः खेदयन् २१
इति मीमांसमानस्य सतः जगर्ज गिरींद्रतुल्यः २२ श्रीवासुदेवाय नमः श्रीराम
अगजीत्

१ गर्जनप्रयोजनमाह ब्रह्माणमिति २४ घुर्घुरितं तज्जात्यनुकरणध्वनिं अनिश्चयेन यः खखेदस्तस्य क्षयिष्णुः क्षपयिष्णु
ना ब्राकं तेइति पुनरुक्तिः प्रसिद्धिख्यापनार्थं त्रिभिः पवित्रैः ऋग्यजुः साममंत्रैरस्तुवन् २५ वेदैर्वितन्यते स्तूयते मूर्तिर्य
स्य सः अतएवात्मनो गुणाननुवदती ति तथा तत्तेषां ब्रह्मउच्चारितं वेदमवधार्य ज्ञात्वा २६ कथंभूतः सन्नादिवेत्युत्पे

ब्रह्माणं हर्षयामास हरिस्तांश्च द्विजोत्तमान् स्वगर्जितेन ककुभः प्रतिस्वनयिता विभुः २४ निशम्य ते घुर्घुरि
तं स्वखेदक्षयिष्णु मायामयसूकरस्य जनस्तपः सत्यनिवासिनस्ते त्रिभिः पवित्रैर्मुनयो गृणन्स्म २५ तेषां
सतां वेदवितानमूर्तिर्ब्रह्मावधार्यात्मगुणानुवादं विनद्य भूयो विबुधोदयाय गजेंद्रलीलो जलमाविवेश २६ उत्क्षि
प्तवालः खचरः कठोरः सटा विधून्वन्खररोमशत्वक् खुराहताभ्रः सितदंष्ट्र ईक्षाज्योतिर्बभासे भगवान्महीध्रः
२७

क्षायामाह द्वाभ्यां उत्क्षिप्तो वालः पुच्छं येन खचरः आकाशचारी कठोरः कठिनः सटाः स्कंधवालान् खराणिती
क्ष्णानि रोमाणि यस्यां सा त्वक् यस्य खुरैराहतानि अभ्राणि येन सितदंष्ट्रः अतिशुक्लदंष्ट्रः ईक्षा निरीक्षणमेव ज्यो
तिः आलोको यस्य तदा प्रकाशांतरातावात् बभासे अशोभत महीध्रः पृथिव्याः उद्धर्ता २७ वासुदेवाय नमः

भा०त० क्रोडापदेशः वाराहच्छद्मा स्वयमध्वरांगो पि पशुरिव घ्राणेन विजिघ्रन् गणतः स्तोतॄन् विप्रान् उद्वीक्ष्य ऊर्ध्वं वीक्ष्य कं जलमा
४९ विशत् २८ तदानीं तनं समुद्रध्वनिमुत्प्रेक्षते स उद्धन्वान् समुद्रः आर्तं इव स्तनयन् शब्दं कुर्वन् नो यज्ञेश्वर मां पाहि मामवेत्येवं
वुक्रोशेव आर्तसादृश्यमाह उत्सृष्टाः प्रसारिता दीर्घा ऊर्मय एव भुजा येन सो विशिष्टः आर्तत्वे हेतुः वज्रकूटो वज्रमयः पर्वतः
तद्वदंगं यस्य भगवतः तस्य निपात वेगेन विशीर्णकुक्षिर्यस्य २९ तदा रसायां रसातले गां पृथ्वीं ददर्श कः त्रिपरुः त्रीणि प

घ्राणेन पृथ्व्याः पदवीं विजिघ्रन् क्रोडापदेशः स्वयमध्वरांगः करालदंष्ट्रोप्यकरालदृग्भ्यामुद्वीक्ष्य विप्रान् गृ
णतो विशत्कं २८ स वज्रकूटांगनिपातवेगविशीर्णकुक्षिः स्तनयन्नुदन्वान् उत्सृष्टदीर्घोर्मिभुजैरिवार्तश्चुक्रो
श यज्ञेश्वर पाहि मेति २९ खुरैः क्षुरप्रैर्दरयंस्तदाप उत्पारपारं त्रिपरू रसायां ददर्श गां तत्र सुषुप्सुरग्रे यां जी
वधानीं स्वयमभ्यधत्त ३० स्वदंष्ट्रयोद्धृत्य महीं निमग्नां स उत्थितः संरुरुचे रसायाः तत्रापि दैत्यं गदयाप
तंतं सुनाभसंदीपिततीव्रमन्युः ३१
त्रीणि सवनात्मकानि पर्वाणि यस्य यज्ञमूर्तिरित्यर्थः किं कुर्वन् क्षुरप्रायताग्राः क्षुरास्तत्सदृशैः खुरैः आपो दरयन् । क ४९
थं उत्पारपारं उत्पाराणां पारशून्यानामप्यपां पारं अवसानं यथा भवति तथा विदारयन् कथंभूतं अग्रे प्रलयसम
ये तत्र तामसुषुप्सुः शिशयिषुः सन् जीवाधीयंते यस्यां सर्वजीवाधारभूतां यां स्वयं अभ्यधत्त आत्मिमुख्ये
न दधार जठरे धृतवानित्यर्थः अनेन तदुद्धरणे नायासं द्योतयति ३० रसायाः सकाशादुत्थितः सः संरुरुचे सम्यग
शोभत तत्रापि आत्मसि गदया सुदर्शनया गच्छंतं ३१ ॥ ओं नमो भगवते वासुदेवाय ॥

रुंधानं प्रतिघ्नंतं न सह्यः सहनानर्हो विक्रमो यस्य तं दैत्यं सुनाभं चक्रं तद्वत् संदीपितस्तीव्रो मन्युर्यस्य । यद्वा मयि वि
घ्यमाने किमिति पराभवं सहस्व इति सुनाभेन संदीपिततीव्रमन्युः स भगवान् इह गजमिव लीलया जघान ।
गजेंद्रो जगतीं क्रीडया विदारयन् गैरिकया यथा अरुणगंडतुंडो भवति तथा तस्य रक्तमेव पंकस्तेनांकितो गंडो तुंडं यय
स्य जघानेति पूर्वेणैवान्वयः ३२ प्रणाय आलक्ष्य अनुवाको वैदिकं सूक्तं तत्सदृशैर्वाक्यैस्तुष्टुवुः ३३ जो आजितं ते वपाजि
तं जितमिति संभ्रमे वीप्सा यज्ञैर्भाव्यते आक्रियत इति तथा त्रयीवेदमयी निलिल्युर्लीनप्राया कारणं पृथिव्युद्धरणं तेन स्
करात् ३४ यज्ञात्मतां प्रपंचयंतः स्तुवंति रूपमित्यादि चतुर्भिः छंदांसि गायत्र्यादीनि यज्ञांगभूतछंदः आद्यनुवादेन भगवद

जघान रुंधानमसह्यविक्रमं स लीलयेभं मृगराडिवांभसि तद्रक्तपंकांकितगंडतुंडो यथा गजेंद्रो जगतीं विभिंद
न् ३२ तमालनीलं सितदंतकोट्या क्ष्मामुत्क्षिपंतं गजलीलयांग प्रज्ञाय बद्धांजलयोनुवाकैर्विरिंच्यमु
ख्या उपतस्थुरीशं ३३ ऋषय ऊचुः जितं जितं ते जितयज्ञभावन त्रयीं तनुं स्वां परिधुन्वते नमः यद्रोमगर्तेषु नि
लिल्युरध्वरास्तस्मै नमः कारणसूकराय ते ३४ रूपं तवैतन्ननु दुष्कृतात्मनां दुर्दर्शनं देव यदध्वरात्मकं छंदां
सि यस्य त्वचि बर्हिरोमस्वाज्यं दृशि त्वंघ्रिषु चातुर्होत्रं ३५ स्रुक्तुंड आसीत्स्रुव ईश नासयोरिडोदरे चम
साः कर्णरंध्रे प्राशित्रमास्ये ग्रसने ग्रहास्तु ते यच्चर्वणं ते भगवन्नग्निहोत्रं ३६
वयता विधीयते बर्हिः शब्दे दीर्घाभाव आर्षः दृशि चक्षुषि चातुर्होत्रं होत्रादिकर्मचतुष्टयं ३५ स्रुक् जुहूः तुंडे मुखाग्रे स्रुवो
नासिकयोः इडाभक्षणपात्रं चमसा ग्रहाश्च सोमपात्राणि प्राशित्रं ब्रह्मभागपात्रं ग्रसने ने नेति ग्रसनं मुखांतर्वर्ति [illegible]

भा०त० ५० दीक्षा दीक्षणीयेष्टिः अनुजन्म वारं वारं समन्त्रितव्यक्तिः उपसदस्तिस्र इष्टयः शिरोधरं ग्रीवा प्रायणीया दीक्षानंतरेष्टिः उदयनीया
संमाप्तेष्टिः ते एव दंष्ट्रे यस्य प्रवर्ग्यो महावीरः घर्म्यकपसंदं पूर्वं क्रियते सभ्यो होमरहितोग्निः आवसथ्यं औपासनाग्निः तयो
र्द्वैक्यं तत्र व क्रतुरूपस्य शीर्षकं शिरः चितय इष्टिकाचयनानि पंच असवः प्राणाः ३७ प्रातःसवनादीनि अवस्थितिः आस
नवाल्या घ्यवस्थावा अग्निष्टोमो अत्यग्निष्टोम उक्थ्य षोडशी वाजपेयो ऽतिरात्रो आप्तोर्याम इति सप्त संस्था विच्छेदास्त्व

दीक्षानुजन्मोपसदः शिरोधरं त्वं प्रायणीयोदयनीयदंष्ट्रः जिह्वा प्रवर्ग्यस्तव शीर्षकं क्रतोः सभ्यावसथ्यं चित
योसवो हि ते ३७ सोमस्तु रेतः सवनान्यवस्थितिः संस्था विभेदास्तव देव धातवः सत्राणि सर्वाणि शरीरसंधि
स्त्वं सर्वयज्ञः क्रतुरिष्टिबंधनः ३८ नमो नमस्तेऽखिलमंत्रदेवताद्रव्याय सर्वक्रतवे क्रियात्मने वैराग्यभ
क्त्यात्मजयानुभावितज्ञानाय विद्यागुरवे नमो नमः ३९

ड्मांसादि सप्त धातवः सत्राणि द्वादशाहादीनि बहुयागसंघातरूपाणि असोमा यज्ञाः ससोमाः क्रतवः तद्रूपस्त्वं इष्टिर्यज ५०
नमनुष्ठानं तदेव बंधनं यस्य सः ३८ पूर्वोक्तमेव सपरिकरं कीर्तयंतः प्रणमंति नमो नम इति अखिलमंत्रादिरूपा
य क्रियात्मने सामान्यव्यापाररूपाय किं च वैराग्ययुक्तकर्मसाध्या सत्वशुद्धिः ततो भक्तिः तत आत्मजयः चित्तस्थैर्यं ते
न अनुभावितं साक्षात्कृतं यत् ज्ञानं तस्मै एवंभूतज्ञानप्रदाय गुरवे च ३९ ओं नमो भगवते वासुदेवाय छू

८ मंत्रतोग्निमरणाविव अधाः निहितवानसि ४२
हे भूधर सभूधरा सपर्वता वनात् उदकान्निर्गच्छतो गजेंद्रस्य दता दंतेन ४० त्वया धृता भूर्विराजत इत्युक्तं इदानीं भूमंडलेन त्व
द्रूपं विराजत इत्याह त्रयीति अथेत्यर्थांतरे ते इदं रूपं दंतेन धृतं यद्भूमंडलं तेन चकास्ति शृंगेण ऊढो धृतो यो घनस्ते
न भूयसा अतिमहता चित्रमो विलासः ४१ लोकाय वासस्थानार्थं ते पत्नीं जगतां मातरं यतस्त्वं पितासि एवं सति तत्र स्थिता
नां तः त्वया पित्रा सह अस्यै मात्रे नमसा विधेम नमनं करिष्यामः नमस्कारेण परिचरेमेति वा स्वतेजः धारणाशक्तिं याज्ञिका

दंष्ट्राग्रकोट्या भगवंस्त्वया धृता विराजते भूधर भूः सभूधरा यथा वनान्निःसरतो दता धृता मतंगजेंद्रस्य सपत्रपद्मिनी
४० त्रयीमयं रूपमिदं च सौकरं भूमंडलेनाथ दता धृतेन ते चकास्ति शृंगोढघनेन भूयसा कुलाचलेंद्रस्य यथैव वि
भ्रमः ४१ संस्थापयैनां जगतां सतस्थुषां लोकाय पत्नीमसि मातरं पिता विधेम चास्यै नमसा सह त्वया
यस्यां स्वतेजोऽग्निमिवारणावधाः ४२ इदं त्वया अतिदुष्करं कृतमित्याह कश्चिति हे प्रभो तव त्वया कृतं भुव उ
द्विबर्हणं उद्धरणं त्वदन्यः कः श्रद्दधीत संभावयेत् अध्यवस्येदित्यर्थः त्वयि पुनरसौ विस्मयो न भवति यतो वि
श्वे सर्वे विस्मया अस्मिन् कुतः यो भवान् अतिविस्मयं अत्यद्भुतं इदं विश्वं क्रियाविशेषणं वा ससृजे स
ष्टवान् ४३
कः श्रद्दधीतान्यतमस्तव प्रभो रसां गताया भुव उद्विबर्हणं न विस्मयोऽसौ त्वयि विश्वविस्मये यो माययेदं ससृजेऽतिवि
स्मयं ४३

भा०त०३ बिस्मयंदर्शयंतः प्रार्थयंते विधुन्वते निश्वाभ्यां सटानां शिखाभिः रथ्यैः उद्भूताः उच्छलिताः ये शिवाम्बुबिंदवः तैः सिंच्यमाना वयं
५२ पवित्रीकृताः ४४ तवकर्मणां पारं य एष ते अवलोकयति ज्ञातुमिच्छतीत्यर्थः यस्य तव योगमायया गुणैः सह योगस्तेन मोहितं
अतो विश्वस्य शंमंगलं विधेहि यथा त्वाम विज्ञाय नंतशक्तिं ज्ञात्वा भजेत् तथानुगृहाणेत्यर्थः ४५ उपस्थीयमानः स्तूयमानः
स्व खुराक्रांतइति जले पि धारणशक्त्याधानं दर्शयति अविता रक्षकः ४६।४७ कथनीयानि मायिनि मायावंति चरित्राणि

विधुन्वता वेदमयं निजं वपुर्जनः स्तपः सत्यनिवासिनो वयं सटाशिखोद्धूतशिवाम्बुबिंदुभिर्विमृज्यमाना भृश
मीशपाविताः ४४ स वै बत भ्रष्टमतिस्तवैष ते यः कर्मणां पारमपारकर्मणः यद्योगमायागुणयोगमोहितं विश्वं
समस्तं भगवन् विधेहि शं ४५ मैत्रेय उवाच इत्युपस्थीयमानस्तैर्मुनिभिर्ब्रह्मवादिभिः सलिले स्व
खुराक्रांतउपाधत्तावितावनिं ४६ स इत्थं भगवानुर्वीं विष्वक्सेनः प्रजापतिः रसाया लीलयोन्नीतामप्सु न्य
स्य ययौ हरिः ४७ य एवमेतां हरिमेधसो हरेः कथां सुभद्रां कथनीयमायिनः शृण्वीत भक्त्या श्रवयेत वोशतीं
जनार्दनोस्याशु हृदि प्रसीदति ४८ तस्मिन्प्रसन्ने सकलाशिषां प्रभौ किं दुर्लभं ताभिरलं लवात्मभिः अनन्य
दृष्ट्या भजतां गुहाशयः स्वयं विधत्ते स्वगतिं परः परां ४९ ५२
यस्य श्रवयेत् कस्य मार्षं उशतीं कमनीयां हृदि प्रसीदति स्वमनसि संतुष्यतीत्यर्थः ४८ यद्यपि सकलत्रा तथापि न प्रार्थनी
या इत्याह ताभिराशीभिरलं लवात्मभिः क्षुद्राभिः न च तदा भजनस्य वैफल्यं शंकनीयमित्याह भगवद्भजनव्यतिरेकेण
फलांतरदृष्टिं विना भजतां स्वपदप्राप्तिं स्वयमेव विधत्ते गुहाशयत्वादहैतुकीं भक्तिं जनन् ४९ बादरायणनः छू

मृत्योः पाशं विशातयतिमोचयतीति ३

अतः को नाम पुराकथानां पूर्ववृत्तानां मध्ये कथंचिदापीय विरज्येत विरमेत् नरेतरं पशुं विना ५० इति तृतीये त्रयोदशः
चतुर्दशे निदानं तु तद्वधे वक्तुमुच्यते संध्यायां कश्यपाज्जन्मसंभवः कामतो दितेः १ तेनैव येन भूमिरुद्धृता अनुशुश्रुम ल
भ्रुखवात् २ मृधो युद्धं ३ साधुत्वे हेतुः यद्यस्मात्त्वं हरेरवतारकथां पृच्छसीति तथा ४ तदेव दर्शयति यया कथया उत्तानपदः पु
त्रो ध्रुवः मुनिना नारदेन अर्भक एव यदा ध्रुवाय सुनंदादिभिर्विमानमानीतं तदा स्य देहत्यागोपेक्षितः स्यादिति मत्वाह

को नाम लोके पुरुषार्थसारवित्पुराकथानां भगवत्कथासुधां आपीय कर्णांजलिभिर्भवापहामहो विरज्येत वि
ना नरेतरं ५० इति श्रीभागवते महापुराणे तृतीयस्कंधे सूकररूपानुवर्णने त्रयोदशोध्यायः
श्रीशुक उवाच निशम्य कौषारविणोपवर्णितां हरेः कथां कारणसूकरात्मनः पुनः स पप्रच्छ तमुद्यतांज
लिर्न चातितृप्तो विदुरो धृतव्रतः १ श्रीविदुर उवाच तेनैव तु मुनिश्रेष्ठ हरिणा यज्ञमूर्तिना आदिदैत्यो हि
रण्याक्षो हत इत्यनुशुश्रुम २ तस्य चोद्धरतः क्षोणीं स्वदंष्ट्राग्रेण लीलया दैत्यराजस्य च ब्रह्मन् कस्माद्धेतोरभू
न्मृधः ३ मैत्रेय उवाच साधु वीर त्वया पृष्टमवतारकथां हरेः यत्त्वं पृच्छसि मर्त्यानां मृत्युपाशविशातनीं
४ ययोत्तानपदः पुत्रो मुनिना गीतयार्भकः मृत्योः कृत्वैव मूर्ध्न्यंघ्रिमारुरोह हरेः पदं ५
मृत्यावासन्नेपि देहं न तत्याज किंतु सोपानइव तस्य मूर्ध्नि पदं दत्त्वा विमानमारुह्य विष्णुपदमारूढः वक्ष्यति हि परीत्या
भ्यर्च्य धिष्ण्याग्र्यं कृत स्वस्त्ययनो द्विजैः इयेष तदधिष्ठातुं बिभ्रद्रूपं हिरण्मयमिति ५ ओं नमो भगवते वासुदेवाय

तयोः संग्रामे हेतुं वक्तुमितिहासं प्रस्तौति अथेति अनुपृच्छतां देवानां ब्रह्मणा वर्णित इतिहासो मया श्रुतः ६ देवप्रश्न
प्रस्तावाय प्रथमं हिरण्याक्षहिरण्यकशिपूत्पत्तिप्रसंगमाह दितिरित्यादिनायावदध्यायसमाप्ति मरीचेः पुत्रं ह
च्छयः कामस्तेनार्दिता अतः संध्यायामेव कामितवती ७ तदप्यग्निहोत्रशालायां तत्रापि समाहितं अग्निर्जिह्वा यस्य यं

अथात्रापीतिहासोयं श्रुतो मे वर्णितः पुरा ब्रह्मणा देवदेवेन देवानामनुपृच्छतां ६ दितिर्दाक्षायणी क्षत्त
मारीचं कश्यपं पतिं अपत्यकामा चकमे संध्यायां हृच्छयार्दिता ७ इष्ट्वाग्निजिह्वं पयसा पुरुषं यजुषां पतिं
निम्लोचत्यर्क आसीनमग्न्यागारे समाहितं ८ दितिरुवाच एष मां त्वत्कृते विद्वन्काम आत्तशरासनः
दुनोति दीनां विक्रम्य रंभामिव मतंगजः ९ तद्भवान्दह्यमानायां सपत्नीनां समृद्धिभिः प्रजावतीनां भद्रं
ते मय्यायुंक्तामनुग्रहं १० भर्तर्याप्तोरुमानानां लोकानाविशते यशः पतिर्भवद्विधो यासां प्रजया ननु जाय
ते ११ पुरा पिता नो भगवान्दक्षो दुहितृवत्सलः कं वृणीत वरं वत्सा इत्यपृच्छत नः पृथक् १२

जुषां यज्ञानां पतिं पुरुषं श्री विष्णुं ८ कृपणां बहुभाषिणीमिति वक्ष्यति नत्वेष मामिति द्वाभ्यां कार्पण्यं भर्तरीति चतुर्भि ५२
श्च बहुभाषणं वर्ण्यते दुनोति पीडयति विक्रम्य शौर्यमाविर्भाव्य रंभां कदलीं ९ आयुंक्तां सर्वतो युनक्तु सम्यक्करोतु
१० भर्तरि आप्तबहुमानानां स्त्रीणां आविशते व्याप्नोति प्रजया पुत्ररूपेण तज्जाया जाया भवति यदस्यां जायते पुनरि
ति श्रुतेः ११ नोस्माकं पिता नोस्मान् पृथक्पृथगपृच्छत् १२ ओं नमो भगवते वासुदेवाय छू

अयं भावः त्रयोदशानामपत्यकर्तृत्वयाभावसाम्ये वैषम्याचरणं तवानुचितमिति

५१३ मोघं न भवति हि महीयसि त्वादृशे महत्तमे १४ प्रहृष्टानंगेन कश्मलं मोहो यस्यास्तां १५ संध्याकालवं
चनाय भार्याप्रशंसा एषेति पंचभिः यतः यस्याः सकाशात् १६ सर्वाश्रमानुपादाय पतितानपि अन्नादिदानेन
ह्यच्छत् तारयन् स्वयं तरतीत्यर्थः १७ आत्मनो देहस्यार्द्धं कर्मसु द्वयोः सहाधिकारात् यच्छ्रद्धानां तां त्वामि

स विदित्वात्मजानां नो भावं संतानभावनः त्रयोदशाददत्तासां यास्ते शीलमनुव्रताः १३ अथ मे
कुरु कल्याण कामं कंजविलोचन आर्तोपसर्पणं भूमन्नमोघं हि महीयसि १४ मैत्रेय उवाच
इति तां वीर मारीचः कृपणां बहुभाषिणीं प्रत्याहानुनयन्वाचा प्रवृद्धानंगकश्मलां १५
कश्यप उवाच एष तेहं विधास्यामि प्रियं भीरु यदिच्छसि तस्याः कामं न कः कुर्यात्सिद्धिस्त्रैव
र्गिकी यतः १६ सर्वाश्रमानुपादाय स्वाश्रमेण कलत्रवान् व्यसनार्णवमत्येति जलयानैर्यथार्ण
वं १७ यामाहुरात्मनो ह्यर्धं श्रेयस्कामस्य मानिनि यस्यां स्वधुरमध्यस्य पुमांश्चरति विज्वरः १८

तित्रतीयश्लोकेन संबंधः स्वधुरं द[illegible]दृष्टकर्मभारं विज्वरः निश्चिंतः हेलाभिः लीलाभिः जयेमेति सभार्य
स्येंद्रियाणि प्रायेण इतरस्त्रतो न सर्पंतीति भावः १८ श्रीकृष्ण श्रीलक्ष्मीरमणाय नमः

तां

भा०त० अनेकोपकारकर्त्री त्वां कार्त्स्न्येन अनुकर्तुं प्रत्युपकारैस्त्वत्सदृशी भवितुं न प्रभवः न समर्थाः। ये चान्ये गुणगृध्नवः

५३ गुणप्रियास्तेपि न समर्थाः सम्पूर्णेनाप्यायुषा २० वाशब्दाज्जन्मांतरैरपि न प्रभव इत्युक्तं। यद्यपि त्वदनुक

रणमशक्यं प्रजात्यै पुत्रोत्पत्त्यै नातिवोचंति न निंदयंति प्रतिपालय प्रतीक्षस्व २१ निंदामगणयंती भीषयन्नु

आरुद्रमनुवर्णयति एषेति सप्तभिः। घोराणामेषा वेला स्वयं घोरदर्शना २२ भूतपर्षद्भिः भूतगणैः २३ तर्हि

यामाश्रित्येंद्रियारातीन् दुर्जयानितराश्रमैः वयं जयेम हेलाभिर्दस्यून् दुर्गपतिर्यथा १९ न वयं प्रभव

स्तां त्वामनुकर्तुं गृहेश्वरि अप्यायुषा वा कार्त्स्न्येन ये चान्ये गुणगृध्नवः २० अथापि काममेतं ते प्रजात्यै

करवाण्यलं यथा मां नातिवोचंति मुहूर्तं प्रतिपालय २१ एषा घोरतमा वेला घोराणां घोरदर्शना चरं

ति यस्यां भूतानि भूतेशानुचराणि ह २२ एतस्यां साध्वि संध्यायां भगवान् भूतभावनः परीतो भूतपर्षद्भि

र्वृषेणाटति भूतराट् २३ श्मशानचक्रानिलधूलिधूम्रविकीर्णविद्योतजटाकलापः भस्मावगुंठामलरु राम

क्मदेहो देवस्त्रिभिः पश्यति देवरस्ते २४

तत्संमुखत्वमात्रं वर्जनीयमिति वेत्तत्राह। श्मशाने यश्चक्रानिलः वातमंडली यस्मिन् या धूलिः तया धूम्रः विकी

र्णो विक्षिप्तः विद्योतो द्युतिमान् जटाकलापो यस्य भस्मनावगुंठः प्रावृतः अमलः रुक्मवद्देहो यस्य स देवः त्रिभिः सो

मार्काग्निनेत्रैः पश्यतीति। यस्योत्तरश्लोकत्रयेष्वनुषंगः। एकस्य जामातरः परस्परं भ्रातरो व्यवह्रियंते अतो मम भ्राता

सोतः त्वदेवरस्तेन इति लज्जार्थमुक्तं २५

५८

ननु देवरश्चेत्ततस्माद्बिभेमीत्याशंक्याह। न यस्येति। ननु तथापि महत्वेनादरणीयस्य स्वजनस्य च तव सर्वं क्षमेत। ए

वं तत्राह। यस्य स्वजनादिर्नास्ति समत्वादीश्वरस्य ऐश्वर्यमेवाह। येन चरणे नापविद्धां निर्माल्यवत् दूरतस्त्यक्तां ते

न भुक्तभोगामजां मायां तन्मयीं विभूतिं महाप्रसाद इत्याशास्महे। व्रतैस्तमाराध्य २५ अनिषिद्धसुखत्यागा

द सौ पिशाचवदित्युपहासो न कार्य इत्याह द्वाभ्यां। यस्य अनवद्यं विषयासक्तिशून्यं आचरितं बिभित्स्वः भेत्तुमि

न यस्य लोके स्वजनः परो वा नात्यादृतो नोत कश्चिद्विगर्ह्यः वयं व्रतैर्यच्चरणापविद्धामाशास्महेऽजां ब

त भुक्तभोगाम् २५ यस्यानवद्याचरितं मनीषिणो गृणंत्यविद्यापटलं बिभित्सवः निरस्तसाम्यातिशयोपि यत्स्वयं पिशाचचर्यामचरद्गतिः सतां २६ हसंति यस्याचरितं हि दुर्भगाः स्वात्मन्रतस्याविदुषः

समीहितं यैर्वस्त्रमाल्याभरणानुलेपनैः श्वभोजनं स्वात्मतयोपलालितं २७ ब्रह्मादयो यत्कृतसेतुपालायत्कारणं विश्वमिदं च माया आज्ञाकरी तस्य पिशाचचर्या अहो विभूम्नश्चरितं विडंबनम् २८

च्छवः २६ समीहितं अभिप्रेतं लोकशिक्षारूपं अविदुषः अविद्वांसः यद्वा न विद्वान् यस्मादिति तस्य सर्वज्ञस्येत्यर्थः

दुर्भगानेवाह यैरिति। श्वभोजनं शुनां भोज्यं शरीरं स्वात्मतया अयमेवात्मेति बुध्या २७ अहो अतर्क्यं तस्याचरण

मित्याह। ब्रह्मादयो ये नृकृतान् सेतून् स्वस्वाधिकारान् पालयंति या कारणं यस्या ये न कृता मिदं विश्वं। माया च य

स्याज्ञाकरी विभूम्नः परमेश्वरस्य विडंबनमनर्थ्यमित्यर्थः २८

भा०तृ० ५५

पा

भर्त्रानिरूपकेणएवंसंविदितेङ्गापितेपिसतिदृष्टपत्नीवदेश्येव २९ विकर्मणिनिषिद्धेदिष्टायदैवतुल्यायईश्वरायउपविवे
शेतिमैथुनंलक्ष्यते ३० उपस्पृश्यस्नात्वाभर्गशब्दवाच्यंविरजंज्योतिःध्यायन्सनातनंब्रह्मगायत्रींप्रणवंवा
जजाप ३१ कर्मावद्येनकर्मदोषेण ३२ अवधीत्माहंत्वितियर्थः।वधेशंकाबीजमाहरुद्रइति।अंहसंअंहः

मैत्रेयउवाच सैवंसंविदितेभर्त्रामन्मथोन्मथितेंद्रिया जग्राहवासोब्रह्मर्षेर्वृषलीवगतत्रपा २९
सविदित्वाथभार्यायास्तंनिर्बंधंविकर्मणि नत्वादिष्टायरहसितयाथोपविवेशह ३० अथोपस्पृश्य
सलिलंप्राणानायम्यवाग्यतः ध्यायन्जजापविरजंब्रह्मज्योतिःसनातनं ३१ दितिस्तुव्रीडितातेन
कर्मावद्येनभारत उपसंगम्यविप्रर्षिमधोमुख्यभ्यभाषत ३२ दितिरुवाच नमेगर्भमिमं
ब्रह्मन्भूतानामृषभोवधीत् रुद्रःपतिर्हिभूतानांयस्याकरवमंहसम् ३३ नमोरुद्रायमहतेदेवा
योग्रायमीढुषे शिवायन्यस्तदंडायधृतदंडायमन्यवे ३४ राम ६६५

अपराधंअकरवंकृतवत्यास्मि ३३ रुतदुःखंद्रावयतीतिरुद्रः।तस्मै।उग्रायअनतिलंघ्याय।मीढुषेसका
मेषुफलसेचनकर्त्रे।निष्कामेषुशिवाय।वक्रतोन्यस्तदंडायदुष्टेषुधृतदंडायसंहारेमन्यवे ३४ श्रीकृष्णायनमः

भामोभगिनीभर्त्ताउरुरनुग्रहोयस्यव्याधस्यनिर्दयस्यापिसतीपतिरित्यनेनस्त्रीणांस्वभावंस्वयमपिवेत्तीतिसू
चयति ३५ स्वगर्भस्यस्वसंतानस्यआशिषंशुभंलोक्यांलोकद्वयार्हांसंध्यायांयोनियमःसनिवृत्तोयस्य ३६
तेआत्मनश्चित्तस्याप्रायत्यादशुचित्वात्मोहूर्तिकात्संध्यारूपात् उतअपिममनिर्देशस्याज्ञायाअतिवारेण

सा
सनःप्रसीदतांभामोभगवानुर्वनुग्रहः व्याधस्याप्यनुकंप्यानांस्त्रीणांदेवःसतीपतिः ३५ मैत्रेयउ
वाच स्वगर्भस्याशिषंलोक्यामाशासानांप्रवेपतीं निवृत्तसंध्यानियमोभार्यामाहप्रजापतिः ३६
कश्यपउवाच अप्रायत्यादात्मनस्तेदोषान्मौहूर्तिकादुत मन्निर्देशातिचारेणदेवानांचैवहेलना
त् ३७ भविष्यतस्तवाभद्रावभद्रेजाठराधमौ लोकान्सपालांस्त्रींश्चंडिमुहुराक्रंदयिष्यतः ३८
प्राणिनांहन्यमानानांदीनानामकृतागसां स्त्रीणांनिगृह्यमाणानांकोपितेषुमहात्मसु ३९ त
दाविश्वेश्वरःक्रुद्धोभगवान्लोकभावनः हनिष्यत्यवतीर्यासौयथाद्रीन्शतपर्वधृक् ४० दितिरुवा
च वधंभगवतासाक्षात्सुनाभोदारबाहुना आशासेपुत्रयोर्मह्यंमाक्रुद्धाद्ब्राह्मणात्प्रभो ४१

त निक्रमेणदेवानांरुद्रानुचराणां ३७ एतैःपंचभिर्हेतुभिःजाठराधमौपुत्रावपसदौ।हेचंडिकोपने ३८ हन्यमा
नानांसतां ३९ शतपर्वधृक्वज्रधरःइंद्रः ४० सुनाभेनोदारोबाहुर्यस्यमह्यंममकोपितेषित्युक्तत्वात्शंकि
तविन्नासतीप्रार्थयतेब्राह्मणात्माभूदिति ४१ श्रीवासुदेवायनमः

भा॰टी॰ नारकाअपितिर्यग्योनिंमसोगतोभवंतिनत्रच्छाश्चनानुग्रहंलभतिकृपांनकुर्वंति ४२ कृतोयोपराधस्तेनशोकस्तेनोनु
५५ तापः तेनप्रत्यवमर्शनात्युक्तायुक्तविचारात् ।भगवतिहरौभवेश्रीरुद्रेएतेःपंचभिःकारणैः ४३ पुत्रस्यहिरण्य
कशिपोःपुत्राणांमध्येएकःसतांसंमतोभविष्यतितमेववर्णयतिगास्यंतीतिसार्द्धैःपंचभिः ४४ समंसहसंदर्शं

नब्रह्मदंडदग्धस्यनभूतभयदस्यच नारकाश्चानुगृह्णंतियांयांयोनिमसौगतः ४२ कश्यपउवाच
कृतशोकानुतापेनसद्यःप्रत्यवमर्शनात् भगवत्युरुमानाच्चभवेमय्यपिचादरात् ४३ पुत्रस्यै
वतुपुत्राणांभवितैकःसतांमतः गास्यंतियद्यशःशुद्धंभगवद्यशसासमं ४४ योगैर्हेमेवदुर्वर्णंभाव
यिष्यंतिसाधवः निर्वैरादिभिरात्मानंयच्छीलमनुवर्तितुम् ४५ यत्प्रसादादिदंविश्वंप्रसीदतिय
दात्मकं सस्वदृग्भगवान्यस्यतोष्यतेऽनन्ययादृशा ४६

राम

वा हीनवर्णंहेमयथायोगैर्दाहादिभिरुपायैःशोध्यंतेतथायस्यशीलंस्वभावंअनुवर्तितुंअनुगंतुंप्राप्तुंनिर्वैरादिभि
र्योगैःआत्मानंभावयिष्यंति ४५ विश्वप्रसादेहेतुःयदात्मकंस्वदृक्आत्मासाक्षीयस्याऽनन्ययाभगवानेवस
इत्येवंभूतयादृशातोष्यतेतोषंप्राप्स्यते ४६ श्रीलक्ष्मीनारायणाभ्यांनमः
शोधयिष्यंति २

तत्रहेतुःसवाइति।महात्माअपरिछिन्नदृष्टिः।महानुभावःमहाप्रभावःमहतामपिमध्येमहिष्टःअतिशयेनम
हान्।प्रवृद्धयाभक्त्यानुभाविते शोधितेचित्तेवैकुंठंहरिंनिवेश्यदेहाद्यभिमानंत्यक्ष्यति ४७ महाभागवतत्
वमाह।अलंपटइति।शीलधरःसुस्वभावःगुणानांधैर्यादीनांआकरोजन्मभूमिः।परेषांसमृध्याहृष्टःपरेषुदुः
खितेषुसत्सुदुःखितः।नभूतोजातःशत्रुर्यस्यनिदाघभवंतापंचंद्रोयथाहरति।एवंजगतःशोकहर्ताभविष्य

सवैमहाभागवतोमहात्मामहानुभावोमहतांमहिष्ठः प्रवृद्धभक्त्याह्यनुभाविताशयेनिवेश्यवैकुंठमि
मंविहास्यति ४७ अलंपटःशीलधरोगुणाकरो हृष्टःपरर्ध्याव्यथितोदुःखितेषु अभूतशत्रुर्जगतःशो
कहर्तानैदाघिकंतापमिवोडुराजः ४८ अंतर्बहिश्चामलमब्जनेत्रंस्वपूरुषेच्छानुगृहीतरूपम् पौत्रस्त
वश्रीललनाललामंद्रष्टास्फुरत्कुंडलमंडिताननं ४९ मैत्रेयउवाच श्रुत्वाभागवतंपौत्रममोद
तदितिर्भृशं पुत्रयोश्चवधंकृष्णाद्विदित्वासीन्महामनाः ५० इतिश्रीभागवतेमहापुराणेतृती
यस्कंधेदितिकश्यपसंवादेचतुर्दशोऽध्यायः १४

ति ४८ अपरिछिन्नदृष्टित्वमाह।अंतरितिस्वपुरुषाणामिछयापुनःपुनःगृहीतानिरूपाणियेन।श्रीरेवललना
सं॰ सुंदरीवतस्याःललामंमंडनंद्रष्टाद्रक्ष्यति ४९ महामनासोत्साहचित्ता।हरिणासहयुद्धेनमरणेपुत्रयोःकीर्तिः
सद्गतिश्चभवेदिति ५० इतिश्रीभागवतेमहापुराणेतृतीयस्कंधदीपिकायांचतुर्दशोध्यायः १४

भा० तृ० हतप्रभैः सुरैः पृष्टः प्राह प्रपंचवदंशो विधिः तद्बीजं विप्रशापादि वैकुंठे विप्रच्छुभ्रत्यपोः १ तदेवं देवानां ब्रह्मणश्च संवाद
प्रस्तावमुक्त्वेदानीं तं संवादं वक्तुमाह ॥ प्राजापत्यं काश्यपं तेजो वीर्यं । परेषां तेजो हंतीति तथा आर्षकस्य पुत्राभ्यां करिष्य
तेपत्सुराणां अर्दनं पीडनं तस्माच्छंकमाना १ तेन गर्भतेजसा हतालोके निरस्तसूर्यादिप्रकाशे हततौजसः । हतप्रभा
वाः ध्वांतेन व्यतिकरं संकरं २ वेत्थ जानासि किं विचारयसि । यद्यतो वयं संविग्नाः भीताः अव्यक्तं अज्ञातं अस्पृष्टवर्त्म
वि

मैत्रेय उवाच प्राजापत्यं तु तत्तेजः परतेजोहनं दितिः दधार वर्षाणि शतं शंकमाना सुरार्दनात् १
लोके तेन हतालोके लोकपाला हतौजसः न्यवेदयन् विश्वसृजे ध्वांतव्यतिकरं दिशां २ देवा ऊचुः
तम एतद्विभो वेत्थ संविग्ना यद्वयं भृशम् न ह्यव्यक्तं भगवतः कालेनास्पृष्टवर्त्मनः ३ देवदेव जग
द्धातर्लोकनाथशिखामणे परेषामपरेषां त्वं भूतानामसि भाववित् ४ नमो विज्ञानवीर्याय मायये
दमुपेयुषे गृहीतगुणभेदाय नमस्तेऽव्यक्तयोनये ५ वी

रामं
६८

ज्ञानप्रकारो यस्य ३ ब्रह्माणं परमेश्वरत्वेन स्तुवंतः प्रार्थयंते देवदेवेति सप्तभिः । लोकनाथानां शिखामणे भाववि
त् अभिप्रायज्ञोसि केनाभिप्रायेण । दितेर्गर्भो विवर्धत इति ज्ञानासीत्यर्थः ४ विज्ञानं वीर्यं बलं यस्य इदं ब्रह्मदेहमुपे
युषे प्राप्तवते । गृहीतो गुणभेदः रजोगुणो येन अव्यक्तस्य प्रपंचस्य योनये नैकारणाय । अव्यक्ताकेनापि प्रमाणेन विज्ञा
तायो निर्यस्येति वा ५

सकामतया अतिक्षिणं दुःखमनुभवंतो निष्कामभक्तान् स्तुवंत आहुः द्वाभ्यां ये त्वा त्वां अनन्येन निष्कामेन भावेन भ
क्त्या ध्यायंति आत्मनो जीवान् भावयतीति तथा त्वच्छस्मिन् प्रोतानि ग्रथितानि भुवनानि येन चेतनाचेतनप्रपंचकारण
मित्यर्थः तत्र हेतुः सदसदात्मकं कार्यकारणरूपं वस्तुतस्तात्त्यां परं ६ जितः श्वासः इंद्रियाणि आत्मा मनश्च यैः अतः सुप
क्वयोगाः अत एव प्राप्तो युष्मत्प्रसादो यैः तेषां ७ अन्ये तु नित्यं कर्मक्लेशिन इत्याहुः यस्येति तंत्या मेद्री त्या आयत्ता आ
दा
ये त्वानन्येन भावेन भावयंत्यात्मभावनं आत्मनि प्रोतभुवनं परं सदसदात्मकं ६ तेषां सुपक्वयोगानां जि
तश्वासेंद्रियात्मनां लब्धयुष्मत्प्रसादानां न कुतश्चित्पराभवः ७ यस्य वाचा प्रजाः सर्वा गावस्तंत्येव यंत्रिताः
हरंति बलिमायत्तास्तस्मै मुख्याय ते नमः ८ स त्वं विधत्स्व शं भूमन् लोकानां लुप्तकर्मणां अदभ्र
दयया दृष्ट्या आपन्नानर्हसीक्षितुं ९ एष देव दितेर्गर्भ ओजः काश्यपमर्पितं दिशस्तिमिरयन्सर्वा वर्धतेग्नि
रिवैधसि १० मैत्रेय उवाच स प्रहस्य महाबाहो भगवान् शब्दगोचरः प्रत्याचष्टात्मभूर्देवान् प्रीणन् रुचिरया
गिरा ११
धीनाः मुख्याय नियंत्रे प्राणरूपायेति वा तथा च श्रुतिः तस्य वाक् तंतिर्नामानि दामानि इत्यादि ८ तमसा अहोरात्रविभा
गाभावेन लुप्तानि कर्माणि येषां आपन्नान् आपद्गतान् अस्मान् ९ आपत्कारणमाहुः एष गर्भः तस्य विशेषणं अर्पितं निक्षि
प्तं काश्यपमोजो वीर्यं दिशस्तिमिरयन् तमोव्याप्ताः कुर्वन् १० दितेः कुचेष्टितं ज्ञात्वा प्रहस्य देवानां ये शब्दा विज्ञप्तिवाक्यानि तेषां
गोचरो विषयभूतः प्रत्यभाषत ११

युष्मत्सकाशात्पूर्वजाः पूर्वजाताः १२ वैकुंठाख्यं लोकं ययुः १३ तं वर्णयति वसंतीत्यादि द्वादशभिः वैकुंठस्य हरेरिव मूर्तिर्येषां ते निमित्तं फलं निमित्तं प्रवर्तकं यस्मिन् निष्कामेन धर्मेणेत्यर्थः आराधयन् आराधितवंतः १४ शब्दगोचरः वेदांतैकवेद्यः विरजं सत्त्वं मूर्तिं विष्टभ्य धृत्वा वृषो धर्ममूर्तिः स्वानां स्वान् १५ तत्रत्यं वनं विशिनष्टि यत्रेति चतुर्भिः सर्वर्तुषु श्रीः पुष्पादिसंपद्येषां तैः १६ चरितानि चरित्राणि भर्तुः प्रभोः अनुविकसंत्यः मधुमकरंदः तद्युक्ता माधव्यो वासंत्यो

ब्रह्मोवाच मानसा मे सुता युष्मत्पूर्वजाः सनकादयः चेरुर्विहायसा लोकान् लोकेषु विगतस्पृहाः १२ त एकदा भगवतो वैकुंठस्यामलात्मनः ययुर्वैकुंठनिलयं सर्वलोकनमस्कृतं १३ वसंति यत्र पुरुषाः सर्वे वैकुंठमूर्तयः येऽनिमित्तनिमित्तेन धर्मेणाराधयन् हरिम् १४ यत्र चाद्यः पुमानास्ते भगवान् शब्दगोचरः सत्त्वं विष्टभ्य विरजं स्वानां नो मृडयन् वृषः १५ यत्र नैःश्रेयसं नाम वनं कामदुघैर्द्रुमैः सर्वर्तुश्रीभिर्विभ्राजत्कैवल्यमिव मूर्तिमत् १६ वैमानिकाः सललनाश्चरितानि यत्र गायंति लोकशमलक्षपणानि भर्तुः अंतर्जलेऽनुविकसन्मधुमाधवीनां गंधेन खंडितधियोऽप्यनिलं क्षिपंतः १७ ५७

ताः यद्वा अनुविकसन्मधवः प्रसरन्मकरंदाः माधव्यः मधुकाल्लीनाः सुमनसः तासां गंधेन खंडिता विक्षिप्ता धीर्येषां तेऽपि तद्गंधप्रापकमनिलं क्षिपंतः तिरस्कुर्वंतो गायंति अनेन भगवत्पार्षदानां निरतिशयविषयसुखेऽपि भगवद्गुणानंदासक्तिर्दर्शिता १७ वासुदेवाय नमः

अन्यभृताः कोकिलाः दात्यूहः चातकः अचिरमात्रं क्षणमात्रं विरमति अनेन तत्रत्यपक्षिणामपि हरिकथाश्रवणादिपरमानंदो दर्शितः १८ मंदारपारिजातौ सुरतरुविशेषौ कुरबकैस्तिलकवृक्षः उत्पलं रात्रिविकासि अंबुजं दिनविकासि नागो नागकेसरः एताः सुमनसः पुष्पजातयः सुगंधा अपि तुलसिकाभरणेन श्रीहरिणा तुलस्या गंधेऽर्चिते सति यस्मिन् वने तस्यास्तपो बहु मानयंति अनेन तत्रत्या गुणग्राहिण एव न मत्सरिण इत्युक्तं एवं भूतं वनं यत्र तद्वैकुंठं ययुरिति पूर्वे

पारावतान्यभृतसारसचक्रवाकदात्यूहहंसशुकतित्तिरिबर्हिणां यः कोलाहलो विरमतेऽचिरमात्रमुच्चैर्भृंगाधिपे हरिकथामिव गायमाने १८ मंदारकुंदकुरबोत्पलचंपकार्णपुन्नागनागबकुलांबुजपारिजाताः गंधेऽर्चिते तुलसिकाभरणेन तस्या यस्मिन्तपः सुमनसो बहु मानयंति १९ यत्संकुलं हरिपदानतिमात्रदृष्टैर्वैदूर्यमारकतहेममयैर्विमानैः येषां बृहत्कटितटाः स्मितशोभिमुख्यः कृष्णात्मनां न रज आदधुरुत्स्मयाद्यैः २०

पूर्वेणान्वयः १९ पुनर्वैकुंठमेव विशिनष्टि यत्संकुलं व्याप्तं भवति कैः हरिपदयोरानतिः प्रणामः तावन्मात्रेण दृष्टैः प्राप्तैः न कर्मादिप्राप्यैः वैदूर्यमारकतैर्हेममयैश्च विमानैः बृहंति कटितटानि यासां स्मितशोभीनि मुखानि यासां ता अपि कृष्ण आत्मा येषां रजः कामं उत्स्मयाद्यैः परिहासादिभिः न आदधुः न जनयामासुः २० वासुदेवाय नमः

 श्रीर्लक्ष्मीः रूपिणी मूर्त्तिधारिणी सती श्रीहरेः सद्मनि संमार्जनं कुर्वतीव यस्मिन्लोके संलक्ष्यते चरणारविं
दं क्वणयती नूपुरेण शब्दयंती विमुक्तो दोषश्चांचल्यं यया यद्वा मुक्तेन दोषाङ्गसारितेन बाहुना कीदृशे सद्म
नि स्फटिकमयानि कुड्यानि यस्मिन् मध्ये मध्ये च शोभार्थं उपेतं संयुक्तं हेम यस्मिन् यस्या अनुग्रहणे श्रीर
नुग्रहं करोत्वेतदर्थमन्येषां ब्रह्मादीनां यत्नः सा अयं भावः यद्यपि तत्र रजो नास्त्येव तथापि स्वर्णपट्टिका

 श्रीरूपिणी क्वणयती चरणारविंदं लीलांबुजेन हरिसद्मनि मुक्तदोषा संलक्ष्यते स्फटिककुड्य
उपेतहेम्नि संमार्जतीव यदनुग्रहणेऽन्ययत्नः २१ वापीषु विद्रुमतटास्वमलामृताप्सु प्रेष्या
न्विता निजवने तुलसीभिरीशं अभ्यर्चती स्वलकमुन्नसमीक्ष्य वक्त्रमुच्छेषितं भगवतेत्यम
ङ्गगयच्छ्रीः २२
वछिन्नभित्तिभागेषु बहुधा प्रतिबिंबिता सती लीलांबुजं भ्रामयंती विनयभक्ति
भ्यां तथा लक्ष्यत इति २१ अंग हे देवाः यद्यस्मिन्लोके श्रीरेवं अमत अमंस्त मेने किं कुर्वती विद्रुममयानि
तटानि यासां अमलामृततुल्या आपो यासां तासु वापीषु निजवने लक्ष्मीवने परिचारिकाभिरन्विता
तुलसीभिः श्रीविष्णुं पूजयंती तदा उदके प्रतिबिंबितं शोभनालकयुक्तं उन्नतनासिकायुक्तं च स्वं वक्त्रं वी
क्ष्य भगवता उच्छेषितं चुंबितमित्यमन्यत अनेन लक्ष्म्या अपि सौभाग्यसुखं भगवदनुग्रहेणैवेति द्योति
तं २२

पुनः कथंभूतं तत् यद्वैकुंठं न व्रजंति के ये कुकथाः शृण्वंति कास्ताः अघं भिनत्तीत्यघभित् तस्य हरेः रचनासृष्ट्यादि लीला तस्या अनुवादादन्यविषयाः अर्थकामादिवार्त्ताः मतिघ्नं त्रिकाः तेषामव्रजने हेतुः याः कुहतभाग्यैर्नरैः श्रुताः
सत्यः तांस्तान् श्रोतॄन् अशरणेषु निराश्रयेषु तमःसु नरके क्षिपंति हंत खेदे कथंभूताः आत्तःसारः श्रोतॄणां पु
पुण्यं याभिस्ताः २३ प्रसंगात् भारतभूमौ जातिनोऽस्माभिः ब्रह्मादिभिरप्यभ्यर्थितां भगतिं मनुष्यजातिं प्रपन्नाः प्रा

यन्न व्रजंत्यघभिदो रचनानुवादाच्छृण्वंति येऽन्यविषयाः कुकथा मतिघ्नीः याः तु श्रुता हतभगैर्नृ
भिरात्तसारास्तांस्तान् क्षिपंत्यशरणेषु तमःसु हंत २३ येऽभ्यर्थितामपि च नो नृगतिं प्रपन्ना ज्ञानं च
तत्वविषयं सह धर्म यत्र नाराधनं भगवतो वितरंत्यमुष्य संमोहिता विततया बत मायया ते २४

प्ताः संतोपि हरेराराधनं न कुर्वंति कीदृशीं नृगतिं यत्र यस्यां धर्मसहितं तत्वविषयं ज्ञानं भवति तदुभयसाध
कत्वात्तस्याः तेऽमुष्य भगवतो विस्तृतया मायया संमोहिता बत निखेदे यदि चैवं संबंधः न केवलं ते न वैकुंठं व्रजंति
किंतु ये भगवदाराधनं न कुर्वंति ते पि तेषां मायामोहितत्वादिति २४ ओं नमो नारायणाय॰

भा० टी० पुनः कथंभूतं यत्र नः उपरिस्थिता व्रजंति के अनिमिषां देवानां ऋषभाः श्रेष्ठो हरिस्तस्यानुवृत्त्या दूरेयमो येषां
५९ यद्वा दूरीकृतयमनियमाः पाठांतरे दूरीकृता हंकारा इत्यर्थः स्पृहणीयं करुणादिशीलं येषां किंच नर्तुर्हरेर्यत्सू
यशः तस्य मिथः कथने यो ऽनुरागस्तेन वैक्लव्यं वैवश्यं तेन बाष्पकलातया सह पुलकीकृतमंगं येषां यद्वानउ
परीति व्रजतां विशेषणं निरहंकारत्वादस्मत्तो पि ये ऽधिकास्ते यत्र व्रजंतीत्यर्थः २५ तत्तदापूर्वं विकुंठं अथो आनं

यत्र व्रजंत्यनिमिषामृषभानुवृत्त्या दूरेयमा ह्युपरि नः स्पृहणीयशीलाः भर्तुर्मिथः सुयशसः कथनानु
रागवैक्लव्यबाष्पकलया पुलकीकृतांगाः २५ तद्विश्वगुर्वधिकृतं भुवनैकवंद्यं दिव्यं विचित्रविबुधाग्र्यवि
मानशोचिः आपुः परां मुदमपूर्वमुपेत्य योगमायाबलेन मुनयस्तदथो विकुंठं २६ तस्मिन्नतीत्य मुनयः
षडसज्जमानाः कक्षाः समानवयसावथ सप्तमायां देवावचक्षत गृहीतगदौ परार्ध्यकेयूरकुंडलकिरीटवि
टंकवेषौ २७

तदुपेत्य मुनयः परामुत्कृष्टां मुदमापुः अपूर्वत्वे हेतवः विश्वगुरुणा हरिणा अधिकृतं अधिष्ठितं भुवनानामेकमेव वं ५९
द्यं दिव्यमलौकिकं विचित्राणि विबुधाग्र्याणां विमानानि तेषां शोचिर्दीप्तिर्यस्मिन् योगमायाबलेनेति अष्टांगयोगप्र
भावेनोपेत्य परमेश्वरे तु योगमायेति विच्छित्तिविलासः इति द्रष्टव्यं २६ तस्मिन् विकुंठे षट् कक्षाः प्राकारद्वाराणि असज्ज
मानाः भगवद्दर्शनोत्कंठया तत्रत्याद्भुतदर्शने आसक्तिमकुर्वाणाः द्वारपालौ देवावपश्यन् समानं वयो ययोः गृहीते गदे याभ्यां प
रार्ध्यैः केयूरादिभिः विटंकः सुंदरो वेषो ययोः २७

तावेव वर्णयति मत्ताद्विरेफा यस्यां तया वनमालया निवीतौ कंठलंबिन्या अलंकृतौ असिताः नीलाः चतुष्टये चतुःसं
ख्याका बाहवस्तेषां मध्ये विन्यस्तया वक्रं च मनाग्भ्रूसंकिंचित्क्षुब्धं दधानौ स्फुटौ उत्फुल्लौ निर्गमौ श्वासमार्गौ नासापु
टे ताभ्यां २८ एतयोर्मिषतोः पश्यतोः तावनादृत्य पृष्टेवयाः पूर्वाः षट् द्वारः पुरटालंकृतवज्रमय्यः कपाटिका याः सुतो
यथा विविशुः तथा सप्तमायामपि द्वारि ते विविशुः अत्र हेतुः सर्वत्र ये अविहिताः अनिवारिताः संचरंति निःशंकं

मत्तद्विरेफवनमालिकया निवीतौ विन्यस्तयासितचतुष्टयबाहुमध्ये वक्त्रं भ्रुवा कुटिलया स्फुटनिर्गमाभ्यां
प्रसं रक्तेक्षणेन च मनाग्रभसं दधानौ २८ द्वार्येतयोर्निविविशुर्मिषतोरपृष्ट्वा पूर्वा यथा पुरटवज्रकपाटिका याः
सर्वत्र ते विषमया मुनयः स्वदृष्ट्या ये संचरंत्यविहता विगताभिशंकाः २९ तान्वीक्ष्य वातरसनांश्चतुरः कुमा
रान्वृद्धान्दशार्धवयसो विदितात्मतत्वान् वेत्रेण चास्खलयतामतदर्हणांस्तौ तेजो विहस्य भगवत्प्रतिकू
लशीलौ ३०

लहेतुः अविषमया स्वदृष्ट्येति २९ वातरसनान् नग्नान् वृद्धानपि पंचवर्षबालकवत् प्रतीयमानान् वकारादास्यात्
अस्खलयतां निवारितवंतौ न तत्स्खलनमर्हंतीति तथा तान् अहो अत्रापि धाष्ट्र्यमित्येवं तेषां तेजो विहस्य भगव
तो ब्रह्मण्यदेवस्य प्रतिकूलं शीलं ययोः ३०

भा० तृ०
९०
हरेर्द्वारपालपतिभ्यां देवेषु यद्यत्स्ववार्यमाणास्ते मुनयः को वां इत्यादिश्लोकत्रयीमूचुः सुहृत्तमः श्रीहरिः तस्य दिदृक्षि
तं दर्शनेच्छा तस्य भंगे सति। कामस्यानुजः क्रोधः तेन सहसा द्राक् कस्माद्देवउपप्लुतानि क्षुभितान्यक्षीणि येषां ते सुष्ठु पू
ज्यतमा अपीति निषेधानर्हत्वे क्रोधानर्हत्वे वा हेतुः ३१ उच्चैर्महत्या भगवत्परिचर्यया एतत्प्राप्य इह वैकुंठे निवसतां
तद्धर्मणां भगवद्धर्मिणां समदर्शिनां मध्ये वां युवयोरेव कोयं विषमः स्वभावः केश्चित्स्वेष्टव्यं केश्चिन्नेत्येवं भूतः स्वामि

ताभ्यां मिषत्स्वनिमिषेषु निषिध्यमानाः स्वर्हत्तमा ह्यपि हरेः प्रतिहारपाभ्यां ऊचुः सुहृत्तमदिदृक्षितभंग ईष
त्कामानुजेन सहसा तउपप्लुताक्षाः ३१ मुनय ऊचुः को वामिहैत्य भगवत्परिचर्ययोच्चैस्तद्धर्मिणां नि
वसतां विषमः स्वभावः तस्मिन्प्रशांतपुरुषे गतविग्रहे वां को वात्मवत्कुहकयोः परिशंकनीयः ३२
न ह्यंतरं भगवतीह समस्तकुक्षावात्मानमात्मनि नभो नभसीव धीराः पश्यंति यत्र युवयोः सुरलिंगि
नोः किं व्युत्पादितं ह्युदरभेदि भयं यतोस्य ३३ ९०

नोरक्षार्थं द्वारपालयोरेष स्वभावो गुण एवेति चेत्तत्राहुः तस्मिन्निति कुहकयोः कपटयोः आत्मवत् स्वदृष्टांतेन
यथा आवां कपटौ तथान्योपि कश्चित्कपटी प्रवेक्ष्यतीति अयं भावः न ह्यत्र भगवद्भक्तं विना कश्चिदागच्छति न वेश्व
रे प्रशांते तत्वादविद्यमानविरोधे भयशंका अतो युवां केवलं धूर्तावेवेति ३२ भयशंकाबीजं च भेदः स च कस्याप्यस्मि
न्नास्तीत्याहुः नहीति समस्तं विश्वं कुक्षौ यस्य यत्र यदा इह भगवति धीरा विद्वांस आत्मनोंतरं भेदं न पश्यंति किंत्वस्मि
न्परमात्मन्यात्मानमंतर्भूतं पश्यंति महाकाशे घटाकाशमिव तदा यथान्यस्य राजादेः उदरभेदि छिद्रं भेदयुक्तं भयं भवति
तथास्य श्रीहरेः तादृग्भयं यतः येन कारणेन सुरवेषधारिणोर्युवयोर्विशेषेणोत्पादितं तत्किं न किंचिदित्यर्थः ३३

इति
तत्तस्मादमुष्य वैकुंठनाथस्य भृत्याभ्यां युवाभ्यां प्रकृष्टं भद्रमेव कर्तुमिच्छास्मिन्नपराधे यत्कृत्तं तदीमहि चिंतयेम तदेवाहुः
अंतरस्य भावः सत्त्वा तद्दर्शिनेन इतः वैकुंठलोकात् व्रजतं यत्र ये पुं लोकेषु अस्य पापीयसो त्रयः इमे कामः क्रोधस्त
था लोभ इति गीतोक्ताः शत्रयो रिपवो भवंति पापीयसो लोकानिति वा ३४ तेषामीरितं भाषणं घोरमवधार्य तं च ब्रह्मदंडं
ब्रह्मशापमधार्यतं वास्त्रसमस्तहेरप्यनिवार्यमवधार्य हरेरनुचरौ अतिकातरेण अतिकातर्येण भयेन तत्पादग्रह

तद्वाममुष्य परमस्य विकुंठभर्तुः कर्तुं प्रकृष्टमिह धीमहि मंदधीभ्यां लोकानितो व्रजतमंतरभाववृष्ट्या पापीय
सस्त्रय इमे रिपवोऽस्य यत्र ३४ तेषामितीरितमुभाववधार्य घोरं तं ब्रह्मदंडमनिवारणमस्त्रपूगैः सद्यो हरेर
स्त नुचरावुरु बिभ्यतस्तत्पादग्रहावपततामतिकातरेण ३५ भूयादघोनि भगवद्भिरकारि दंडो यो नौ हरेत सुरहेल
प नमप्यशेषं मा वोनुतापकलया भगवत्स्मृतिघ्नो मोहो भवेदिह तु नौ व्रजतोरधोधः ३६

णं कुर्वतोः सतोर्दंडवत् पततां कथंभूतस्य हरेः एवं भूतेभ्यो मुनिभ्यः ताभ्यामपि उरु अधिकं बिभ्यतः भयं भावयतः ३५
नु अहो अपराद्धमस्माभिरित्येतत्प्रमानान् प्रत्यूचतुः अघोनि अघवति यद्भवितो दंडः स एव भवद्भिरकारि नान्यद्भवता
मपराधः कश्चित् अतो सौ नौ आवयोर्भूयात् यः अशेषमपि सुरहेलनं ईश्वराज्ञातिक्रमरूपं पापं हरेत् किंतु यु
ष्माकं यः कृपानिमित्तो नुतापस्तस्य लेशेन नो अधोधो मूढयोनीर्व्रजतोरपि भगवत्स्मृतिप्रतिघातको मोहो न भवेत्
किंतु मोहोपि स्मृतिमेव प्रवहतादिति प्रार्थना ३६

भा०त०
६१

एवं स्वानां महत्सु अतिक्रममपराधं तत्क्षणमेव विबुध्य तस्मिन् यत्र ते रुद्धास्तं देशं ययौ आर्याणां हृद्यः मनोज्ञः चरणौ चलयन्निति अयं भावः मच्चरणदर्शनिच्छति घातज्ञं क्रोधं तौ दर्शयन् शमयिष्यामीति त्वराव्याजेन पद्भ्यामेव ययौ श्रीसाहि त्यं चानिष्कामानामपि विभूतिभिः पूरयित्वा क्षमापयितुं ३७ तत्र तं दृष्ट्वा देवमनुवर्णयंति पंचभिः तं तु आगतं अचक्षत अपश्यन् आर्पंतमादिदमेव क्रियापदं स्वपुंभिः शीघ्रं प्रतिहृतं आनीतं औपयिकं गमनोचितं छत्रपादुकादि यस्य क

एवं तदैव भगवानरविंदनाभः स्वानां विबुध्य सदतिक्रममार्यहृद्यः तस्मिन् ययौ परमहंसमहामुनीना मन्वेषणीयचरणौ चलयन् सहश्रीः ३७ तं त्वागतं प्रतिहृतौपयिकं स्वपुंभिस्तेऽचक्षताक्षविषयं स्वसमाधि भाग्यं हंसश्रियोर्व्यजनयोः शिववायुलोलच्छुभ्रातपत्रशशिकेसरशीकरांबुं ३८ कृत्स्नप्रसादसु मुखं स्पृहणीयधाम स्नेहावलोककलया हृदि संस्पृशंतं श्यामे पृथावुरसि शोभितया श्रिया स्वश्चूडामणिं सुभगयंतमिवात्मधिष्ण्यं ३९ ६१

थं भूतं स्वसमाधिना भाग्यं भजनीयं फलं यद्वा स्तदेवाक्षविषयं हंसवत् श्रीर्य योस्तयोरुन्नयत् चलतो व्यजनयोर्यः शिवोऽनुकूलो वायुः तेन लोलं चंचलं तं तः शुभ्रातपत्र शशिकेसराः शुभ्रं य दातपत्रं तदेव शशिसादृश्याच्छशी तस्य केसरा मुक्ताहारविलंबाः ते भ्यो गलंती शीकरांबुनि यस्मिन् तं शीकरांबुकणः ३८ कृत्स्नस्य द्वारपालमुनिवृंदस्य प्रसादे सुमुखं स्पृहणीयानां गुणानां धाम स्थानं स्नेहावलोककलया सप्रेमकटा क्षेण हृदि संस्पृशंतं सुखयंतं त्रैलोक्यविवक्षया यद्वा सत्यलोकपर्यंतः स्वर्गस्तस्य चूडामणिवत् स्थितं स्वधिष्ण्यं वैकुं ठं सुभगयंतं शोभयंतं ३९

पृथु नितंबः आश्रयत्वेन विद्यते यस्य तस्मिन् पीतांशुके अलिभिर्नादितया वनमालया च युक्तं सुभगयंतमिति पूर्वेणैव वासं बंधः वल्गु सुप्रकोष्ठेषु वलयानि यस्य विन्यस्तः एको हस्तो येन इतरेणान्येन अब्जं धुनानं भ्रामयंतं विन्यस्येति पाठे च वलित्यादिहस्तस्य विशेषणं ४० स्वकांत्या विद्युतः क्षिपंती ये मकराकारे कुंडले तयोर्मंडनस्यार्हे गंडस्थ ले यस्मिन् तच्च तदुन्नसं च मुखं यस्य मणियुक्तं किरीटं यस्य दोर्दंडानां षंडः समूहस्तस्य विवरमध्ये स्थितेन हरता मनो

पीतांशुके पृथुनितंबिनि विस्फुरंत्या कांच्यालिभिर्विरुतया वनमालया च वल्गुप्रकोष्ठवलयं विनतासुतां सेविन्यस्तहस्तमितरेण धुनानमब्जं ४० विद्युत्क्षिपन्मकरकुंडलमंडनार्हगंडस्थलोन्नसमुखं मणिमत् किरीटं दोर्दंडषंडविवरे हरता परार्ध्यहारेण कंधरगतेन च कौस्तुभेन ४१ अत्रोपसृष्टमिति चोत्स्मितमिंदिरायाः स्वानां धिया विरचितं बहुसौष्ठवाढ्यं मह्यं भवस्य भवतां च भजंतमंगं नेमुर्निरीक्ष्य न वितृप्तदृशो मुदा कैः ४२ उत्तरार्द्ध

हरेण विहरतेति वा परार्ध्यः उत्कृष्टः ते न हारेण कंधरायां स्थितेन ४१ किं बहुना इंदिराया उत्स्मितं अहमेव सर्वसौंद र्यनिधिरित्यहंकरणं अत्र भगवत्सौंदर्ये उपसृष्टं अस्तंगतमिति स्वानां भक्तानां धिया विरचितं भक्त्यैः स्वमनस्येवं वित र्कितमित्यर्थः कुतः बहुसौष्ठवेन सौंदर्येण आढ्यं युक्तं किं च मह्यं मम भवस्येश्वरस्य भवतां च भजते अंगं भजंतं मूर्तिं कुर्वंतं अवलोक्य निरीक्ष्य कैः शिरोभिर्मुदा नेमुः नमश्चक्रुः न वितृप्ता सादृशो नेत्राणि येषां ते ४२

भा०त० तेस्यारविंदनयनस्यपदारविंदकिंजल्कमिश्रतुलसीमकरंदवायुः अंतर्गतःस्वविवरेणचकारतेषांसंक्षोभमक्षरजु
६२ षामपिचित्ततन्वोः ४३ स्वरूपानंदादपितेषांभजनाधिक्यमाह तस्यपादारविंदकिंजल्कैःकेसरैर्मिश्रायातुलसीतस्या
मकरंदेनयुक्तोवायुःस्वविवरेणनासाछिद्रेणअक्षरजुषांब्रह्मानंदसेविनामपिसंक्षोभंचित्तेतिहर्षंतनौरोमांचं ४३
हर्षकारितंसंभ्रममाह द्वाभ्यां तेवैकिल अमुष्यवदनमेवासितपद्मस्यकोशोंतर्भागिस्तंअसितपद्मकोशमित्यत्र

ते वा अमुष्यवदनासितपद्मकोशमुद्वीक्ष्यसुंदरतराधरकुंदहासं लब्धाशिषःपुनरवेक्ष्यतदीयमंघ्रिद्वंद्वंन
खारुणमणिश्रयणंनिदध्युः ४४ पुंसांगतिंमृगयतामिहयोगमार्गैर्ध्यानास्पदंबहुमतंनयनाभिरामं पौं
स्नंवपुर्दर्शयानमनन्यसिद्धैरौत्पत्तिकैःसमगृणन्युतमष्टभोगैः ४५

तोपमासुंदरतरे अरुणे अधरोष्ठेकुंदवद्धासोयस्मिन्तं उत्ऊर्ध्वंवीक्ष्यलब्धमनोरथाःसंतः नखाएवअरुणमण ६२
यस्तेषांश्रयणंआश्रयभूतंअंघ्रिद्वंद्वंपुनरवेक्ष्यअधोदृष्ट्यावीक्ष्यपुनःपुनरेवंदृष्ट्येनिरीक्ष्ययुगपत्सर्वंगिलावण्यग्र
हणाशक्तेःपश्चात्निदध्युःध्यातवंतः ४४ योगमार्गैर्गतिंमृगयतांपुंसांध्यानस्यविषयभूतंबहुमतंअत्यादरास्प
दंबहूनांतत्वदृशांसंमतमितिवा पौंस्नंपौरुषं।वपुर्दर्शयंतं अन्येष्वसिद्धैरसाधारणैरौत्पत्तिकैर्नित्यैरणिमाद्यष्टे
श्वर्यैर्युतंसमगृणन्सम्यगस्तुवन् ४५

नित्यंब्रह्मरूपेणप्रकाशसे नतश्चित्रं इदानींतुपरममंगलविशुद्धसत्वमूर्त्याप्रत्यक्षोसि अहोभाग्यमस्माकमित्या
हुः हेअनंतयस्त्वंदुष्कृतोपिदुरात्मनामंतर्हितोनस्फुरसि सनोस्माकमंतर्हितोनभवसिनयनमूलंत्वद्येवराहः प्राप्तो
सि अंतर्ह्यनाभावेहेतुःभवतःसकाशादुद्भवोयस्यतेनास्मत्पित्रायर्हियदैवअनुवर्णितरहाःउपदिष्टरहस्यःतदैवनःकर्णमा
र्गेणगुहांबुद्धिंगतःप्राप्तोसीति ४६ ननुपित्रोपदिष्टंभवतामद्वयमात्मतत्वंअहंत्वन्यएवस्यांदृश्यत्वात् नैवं अस्म

श्रीकुमाराऊचुः योंतर्गतोहृदिगतोपिदुरात्मनांत्वंसोद्यैवनोनयनमूलमनंतराद्धः यर्ह्येवकर्णविवरेणगुहांग
तोनःपित्रानुवर्णितरहाभवदुद्भवेन ४६ तंत्वांविदामभगवन्परमात्मतत्वंसत्वेनसंप्रतिरतिंरचयंतमेषां
यत्तेनुतापविदितैर्दृढभक्तियोगैरुद्ग्रंथयोहृदिविदुर्मुनयोविरागाः ४७

त्प्रत्यभिज्ञयाभेदनिरासादित्याहुः तमितिहेभगवन् आत्मतत्वमेवपरंतंत्वांविदामविद्मःप्रत्यभिजानीमः ननुनि
रूपाधेरात्मतत्वस्यकथमीदृशमैश्वर्यंस्यात् अतआहुः सत्वेनविशुद्धसत्वमूर्त्याएषांभक्तानांसम्यक्प्रतिक्षणंरतिःसंप्र
तिरतिःतांरचयंतं आत्मतत्वमेवाहुः तेऽनुतापःकृपातेनविदितैःज्ञातैर्दृढैर्भक्तियोगैःश्रवणादिभिःमुनयोहृदियाह्युद्दीः
द्ग्रंथाःउद्ग्रंथयोनिरहंमानाअतएवविगतरागाः ४७ ओंनमोभगवतेवासुदेवाय॥ छ

भा० तृ० स्वयमपि भक्तिं प्रार्थयितुं भक्तानां सुखातिशयमाहुः आत्यंतिकं मोक्षाख्यमपि तव प्रसादं ते न गणयंति नाद्रियंते किं तु कि-
६२ मुत अन्यत् इंद्रादिपदं ते भ्रुव उन्नयैः रुज्जृंभैः अर्पितं निहितं भयं यस्मिन् तत् के अंग हे भगवन् ये भवतः कथाया रसज्ञाः कथं-
भूतस्य रमणीयत्वेन पावनीयत्वेन च कीर्तन्यं कीर्तनार्हं तीर्थं च यशो यस्य ४८ इदानीं स्वापराधं द्योतयंतो कामम् इति हे भक्तिं प्रार्थयंति ते
भगवन् इतः पूर्वमस्माकं वृजिनं नाभवत् इदानीं सर्वाण्यपि जातानि यतस्त्वद्भक्तो शप्तो अतस्तैः वृजिनैर्निरयेषु कामं नोस्माकं

त स्व

नात्यंतिकं विगणयंत्यपि ते प्रसादं किं त्वन्यदर्पितभयं भ्रुव उन्नयैस्ते ये ऽंग त्वदंघ्रिशरणा भवतः कथायाः कीर्त-
न्यतीर्थयशसः कुशला रसज्ञाः ४८ कामं भवः स्ववृजिनैर्निरयेषु नः स्ताच्चेतोलिवद्यदि नु ते पदयो रमेत वाचश्च नस्तु-
लसिवद्यदि तेंघ्रिशोभाः पूर्येत ते गुणगणैर्यदि कर्णरंध्रः ४९

भवो जन्म स्तात् स्यात् नु वितर्के यदि तु नश्चेतस्ते पदयोः रमेत अलिर्यथा कंटकैराविध्यमानोपि पुष्पेषु रमते तद्वत् विघ्ना- ६२
नविगणय्य यदि रमेत अंघ्रिभ्यां शोभा यासां यथा वा तुलसी स्वगुणैर्नैरपेक्ष्येण त्वदंघ्रिसंबंधेनैव शोभते तथा यदि नो
वाचः शोभेरन् यदि च ते गुणगणैः पूर्येत कर्णरंध्र इत्यल्पस्य पूरणमिव याचकरीत्या प्रार्थयंते अयं भावः कर्णरं-
ध्रस्याकाशत्वात् गुणगणानां चामूर्तत्वान्न कदाचित्पूरणमतो नित्यमेव श्रवणं फलिष्यतीति ४९ श्रीवासुदेवाय०

अद्य वयं कृतार्थाः स्म इत्याहुः हे पुरुहूत विपुलकीर्ते यदिदं प्रादुश्चकर्थ प्रकटीकृतवानसि दृशो नेत्राणि अनात्मनामजि-
तेंद्रियाणां दुरुदयः अप्रकटोपि इतइत्थं यः प्रतीतोसि तस्मै तुभ्यमिदं नमो विधेम ५० इति तृतीये पंचदशः हरिणा सांत्विते
विप्रैरनुतप्तैस्तु षोडशे तयोस्तु स्नावेपि कृतोनुग्रह ईर्यते इति गृणतां तेषां तद्वाक्यं प्रतिनंद्येदं जगाद एतावित्येकादश-
भिः १ यद्यस्मात् मां कदर्थीकृत्य तुच्छीकृत्य बहु यथा भवति तथा अतिक्रमं वः कृतवंतौ २ तस्मात्स एव दंडोंगीकृतः ३

प्रादुश्चकर्थ यदिदं पुरुहूत रूपं तेनेश निर्वृतिमवापुरलं दृशो नः तस्मा इदं भगवते नम इद्विधेम योनात्मनां दुरुदयो
भगवान्प्रतीतः ५० इति श्रीभागवते महापुराणे तृतीयस्कंधे पंचदशोध्यायः श्रीब्रह्मोवाच इति तद्गृ-
णतां तेषां मुनीनां योगधर्मिणां प्रतिनंद्य जगादेदं विकुंठनिलयो विभुः १ श्रीभगवानुवाच एतौ तौ पा-
र्षदौ मह्यं जयो विजय एव च कदर्थीकृत्य मां यद्वो बह्वक्रातामतिक्रमं २ यस्त्वेतयोर्धृतो दंडो भवद्भिर्मामनुव्रतैः
स एवानुमतोस्माभिर्मुनयो देवहेलनात् ३ तद्वः प्रसादयाम्यद्य ब्रह्म दैवं परं हि मे तद्धीत्यात्मकृतं मन्ये यत्स्वपुंभि-
रसत्कृताः ४

हि यस्मात् ब्रह्म ब्राह्मणा एव मे परं दैवतं तत्तस्मात् अद्य वः प्रसादयामि तव कोपराध इति चे-
त्तत्राह तद्धीति मदीयैः पुंभिः सत्कृताः तिरस्कृता इति यत् तदात्मकृतमेव मन्ये ४

भा०टी०
६५ किंच ममैवैताभ्यां अनिष्टं कृतमित्याह यस्य स्वामिनो नामानि तस्य कीर्त्तिं आमयो चर्मेव कुष्ठं ५ यस्येति यस्य मे अमृतरूपे अ
मले यशसि श्रवणेनावगाहः प्रवेशः श्वपचमभिव्याप्य जगत् सद्य स्तत्क्षणमेव पुनाति सोहं विकुंठः भवद्भ्यो हेतुभूतेभ्यः उपलब्धा
बा प्राप्ता सुष्ठुशोभना तीर्थरूपा कीर्त्तिर्येन सः स्वं बाहुं रक्षणीयं लोकेश्वरमपि हन्यां काऽन्यस्य कथेत्यर्थः स्वगुणानुवर्णनं तु ब्राह्मणोत्क
र्षार्थमेव ६ चरणपद्मयोः स्थितः पवित्रो रेणुर्यस्य अत एव क्षतो निरस्तः अखिलस्य लोकस्य मलो येन यद्वा चरणयश्चासौ

यन्नामानि च गृह्णाति लोको भृत्ये कृतागसि सोऽसाधुवादस्तत्कीर्त्तिं हंति त्वचमिवामयः ५ यस्यामृतामल
यशःश्रवणावगाहः सद्यः पुनाति जगदाश्वपचाद्विकुंठः सोहं भवद्भ्य उपलब्धसुतीर्थकीर्त्तिश्छिंद्यां स्वबाहुमपि
वः प्रतिकूलवृत्तिं ६ यत्सेवया चरणपद्मपवित्ररेणुं सद्यः क्षताऽखिलमलं प्रतिलब्धशीलं न श्रीर्वि
रक्तमपि मां विजहाति यस्याः प्रेक्षालवार्थ इतरे नियमान्वहंति ७ नाहं तथाद्मि यजमानहविर्विताने श्च्योतद्घृत
प्लुतमदन् हुतभुङ्मुखेन यद्ब्राह्मणस्य मुखतश्चरतोनुघासं तुष्टस्य मय्यवहितैर्निजकर्मपाकैः ८ ६५

पवित्रो रेणुर्यस्मिन्निति क्षतोऽखिलो मलो यस्येति च विग्रहः प्रतिलब्धं प्राप्तं शीलं येन येषां सेवया एते गुणा मम अत एव श्रीर्मां न
विजहाति प्रेक्षालवार्थं अवलोकनलेशार्थं इतरे ब्रह्मादयः तेषां वः प्रतिकूलवृत्तिं छिंद्यामिति पूर्वेणैव संबंधः ७ किंच ब्राह्म
णो ममैव श्रेष्ठं मुखं अतो युष्मद्वर्जया मम मुखतिरस्कार एव कृत इत्याह नाहमिति विताने यज्ञे यजमानस्य हविश्चरुपुरोडाशादि हुतभुगग्नि
स्तेन मुखेन अदन् अश्नन्नपि तथा नाद्मि नाश्नामि यद्यथा श्च्योतता क्षरता घृतेन प्लुतं विलोडितं पायसादि प्रतिग्रासं रसास्वादपूर्व
कं चरतो भुंजानस्य ज्ञानिनो वा ब्राह्मणस्य मुखतो श्नामि मय्यर्पितैः कर्मफलैस्तुष्टस्य निष्कामस्येत्यर्थः ८

किंच येषाममलमंघ्रिरजः अहं किरीटैर्बिभर्मि तान् विप्रानपकुर्वतोपि कोन्यो न विषहेत कथंभूतोहं अखंडः न विच्छिन्ना
विकुंठा अप्रतिहता च योगमाया विलासभूता विभूतिर्यस्य तथा यस्य ममार्हणांभः पादोदकं चंद्रललामेनेश्वरेण सहितान्
लोकान् सद्यः पुनाति एवं परमेश्वरः परमपावनोपि सन्नहं बिभर्मि ९ किंच मे तनूः अधिष्ठानानि कास्ताः द्विजवरान् दुहतीः
दोग्ध्रीर्गा इत्यर्थः दुहितॄरिति पाठे पिता एव विष्णुरूपात् सूर्यादुत्पन्नत्वात् सूर्यसुताश्च गाव इति वचनात् अलब्धशरणानि

येषां बिभर्म्यहमखंडविकुंठयोगमायाविभूतिरमलांघ्रिरजः किरीटैः विप्रांस्तु को न विषहेत यदर्हणांभः सद्यः
पुनाति सहचंद्रललामलोकान् ९ ये मे तनूर्द्विजवरान्दुहतीर्मदीया भूतान्यलब्धशरणानि च भेदबुद्ध्या द्रक्ष्यं
त्यघक्षतदृशो ह्यहिमन्यवस्तान् गृध्रा रुषा मम कुषंत्यधिदंडनेतुः १० ये ब्राह्मणान्मयि धिया क्षिपतोर्चयंतस्तु
ष्यद्धृदः स्मितसुधोक्षितपद्मवक्त्राः वाण्यानुरागकलयात्मजवद्गृणंतः संबोधयंत्यहमिवाहमुपाहृतस्तैः ११

रक्षकहीनानि भेदबुद्ध्या मदधिष्ठानं न भवंतीति पृथक् दृष्ट्या ये द्रक्ष्यंति अघेन क्षता नष्टा दृष्टिर्येषां तान् मदीयोऽधिकृतो दं
डनेता यो यमः तस्य गृध्राकारा दूताः अहिवन्मन्युर्येषां ते रुषा क्रोधेन कुषंति चखुंति छिंदंति १० एवंभूतास्तु मां वशीकुर्वंती
त्याह ये क्षिपतः परुषं भाषमाणानपि ब्राह्मणान् बोधयंति मयि या धीस्तया वा स्नेहेव दृष्ट्या अर्चयंतः तुष्यद्धृदः प्रीयमाणचि
त्ताः स्मितमेव सुधा तया उक्षितं पद्मतुल्यं वक्त्रं येषां अनुरागकलया प्रेमश्लोकनया वा वाचा गृणंतः स्तुवंतः यथा कुपितमात्म
जं स्निग्धः पिता सत्पुत्रो वा पितरं अहमिव [illegible] तैरहमुपाहृतो वशीकृतः ११
सं

भा०तृ०
६५

तत्तस्मात् मेऽवसायमभिप्रायं अलक्षमाणौ अजानंतौ युष्मदपराधोचितां गतिं सद्यः प्राप्य मत्समीपं इतां प्राप्तौ तदिति सम्मेऽनु
ग्रहः तमेवाह यत्‌ यतः भृतयोर्भृत्ययोर्विवासः अचिरतः शीघ्रं कल्प्यतां संपद्यतां समाप्यतामिति १२ उशतीं प्रियां देवीं द्योतमा
नां ऋषिकुल्यां ऋषयो मंत्राः तद्रूपां ऋषिकुलयोग्यामिति वा सरस्वतीं वाचं आस्वाद्य तन्माधुर्यमनुभूय सर्वप्रायेणामन्यु
नादष्टानामपि क्रोधविषव्याप्तानां हि मनो रसानुभवाभावात् श्रियमाणमपि न सहते तेषां तु आत्मा मनः नातृप्यत् अल

तन्मे स्वभर्तुरवसायमलक्षमाणौ युष्मद्व्यतिक्रमगतिं प्रतिपद्य सद्यः भूयो ममांतिकमितां तदनुग्रहो मे यत्क
ल्पतामचिरतो भृतयोर्विवासः १२ ब्रह्मोवाच अथतस्योशतीं देवीमृषिकुल्यां सरस्वतीं नाऽस्वाद्य मन्युद
ष्टानां तेषामात्माप्यतृप्यत १३ सतीं व्यादाय शृण्वंतो लघ्वीं गुर्वर्थगह्वरां विगाह्यागाधगंभीरां न विदुस्तच्चिकीर्षि
तं १४ ते योगमाययारब्धपारमेष्ठ्यमहोदयं प्रोचुः प्रांजलयो विप्राः प्रहृष्टाः क्षुभितत्वचः १५ ६५

मितिनामन्यत १३ सतीं श्रेष्ठां व्यादाय प्रसार्य कर्णद्वयेनेत्यर्थः लघ्वीं मिताक्षरां गुर्वर्थैर्गह्वरां दुःप्रवेशां अगाधाम
भिप्रायतः गंभीरां मर्थतः विगाह्य विचार्यापि किमस्मानभिनंदति निंदति वा अस्मत्कृतं दंडं वा संकोचयतीति न विदुः १४
ततश्चाभिनंदतीति ज्ञात्वा ते प्रहृष्टाः संतः प्रोचुः क्षुभिता रोमांचिता त्वक् येषां कुपितेति पाठे संजातरोमकूपा स्वारोमांचितत्वमे
वोक्तं आरब्धः आविष्कृतः पारमेष्ठ्यस्य परमैश्वर्यस्य महोदयः परमोत्कर्षो येन तं अधिराजत्वमाविष्कृत्य राजशिक्षार्थं ब्राह्म
णान्मानयतीति ज्ञात्वेत्यर्थः १५

अध्यक्षः सर्वेश्वरः सन् तद्गीत्यात्मकृतं मन्य इति उक्त्वा मयाऽपराधः कृत इति तथा तदनुग्रहो म इत्यादिवचनेन ममानुग्रहश्चेति यत्स्त्र
त्वा भाषसे तेन यच्चिकीर्षितं तन्न विद्मः १६ किल इतिलोकशिक्षार्थं सूचितं परमार्थमाहुः विप्राणामिति देवदेवानां देववत्पूज्यानामपि भग
वानात्मदैवतं च १७ लोकशिक्षार्थतां प्रपंचयंति त्वत्त इत्यष्टभिः धर्मस्त्वत्त एव भवति रक्ष्यते च तव तनुभिः अवतारैः परमः फलरूपः अतए
व गुह्यः गोप्यः न च स्वर्गादिफलवद्विकारी किंतु निर्विकारो मतः अतएवं भूतस्य तवेदं लोकशिक्षामात्रमिति भावः १८ विपरीतं चे

ऋषय ऊचुः न वयं भगवन्विद्मस्तव देव चिकीर्षितं कृतो मेऽनुग्रहश्चेति यदध्यक्षः प्रभाषसे १६ ब्रह्मण्यस्य परं दैवं
ब्राह्मणाः किल ते प्रभो विप्राणां देवदेवानां भगवानात्मदैवतं १७ त्वत्तः सनातनो धर्मो रक्ष्यते तनुभिस्तव धर्मस्य पर
मो गुह्यो निर्विकल्पो भवान्मतः १८ तरंति ह्यंजसा मृत्युं निवृत्ता यदनुग्रहात् योगिनः स भवान् किंस्विदनुगृह्येत यत्परैः यै ग
१९ यं वै विभूतिरुपयात्यनुवेलमन्यैरर्थार्थिभिः स्वशिरसा धृतपादरेणुः धन्यार्पितांघ्रितुलसीनवदामधाम्नो लोकं म
धुव्रतपतेरिव कामयाना २०

दमित्याहुः तरंतीति यस्यानुग्रहाद्देवनिवृत्ताः विरक्ता योगिनश्च संतो मृत्युं तरंति स भवान् परैरनुगृह्येतेति किंस्वित् न किंचिदित्य
र्थः १९ यशोक्तं यत्सेवया चरणपद्मपवित्ररेणुं सद्यः क्षताखिलमलं प्रतिलब्धशीलमित्यादि तद्दर्शयंतः संभावितमित्याहुः यं वै
यं वै विभूतिर्लक्ष्मीः अनुवेलं अवसरेऽवसरे उपयाति सेवते धृतः पादरेणुर्यस्याः धन्यैः भक्तैरभिरर्पितं अंघ्रौ यत् तुलस्या नवं दा
म माला तदेव धाम स्थानं यस्य तस्य मधुव्रतपतेः भ्रमरमुख्यस्य लोकं स्थानं मंघ्रिं कामयमानेव २०

ना०ट०
६६
विविक्तचरितैः विशुद्धैः परिचरणैः अनुवर्त्तमानां सेवमानामपि यो नात्याद्रियत् नातीवादृतवान् स एवंभूतस्त्वं अयं भा
वः इत्थं नामातितिलं पदतया लक्ष्मीस्त्वां सेवते कथं एवं हि सा मेने अयं हि सारग्राही मधुव्रतः चंचलश्च स्वांघ्रिगतायां तुलस्यां स
परिवारो निश्चलः सन् रमते अतोंघ्रिलावण्यमत्यधिकं स्यात् ततोहं वक्षसि स्थितापि योगिजनादिवकुलेवकसंघर्ष
णमंगीकृत्यापि तुलस्याः सहसापत्न्येनापि चरणौ सेविष्यामीति तदेवमत्योत्सुक्येनानुवर्त्तमानामपि तां त्वं नातीवाद्रिय

यस्तां विविक्तचरितैरनुवर्त्तमानां नात्याद्रियत्परमभागवतप्रसंगः सत्वं द्विजानुपथपुण्यरजः
पुनीतः श्रीवत्सलक्ष्म किमगा भगभाजनस्त्वं २१

से यतः परमभागवतेष्वेव प्रकृष्टसंगवान् स एव परमसौभाग्यनिधिस्त्वं अतो ब्राह्मणप्रसादात् मां श्रीर्न विजहाति ६६
इत्यलभ्यलाभत्वेन निर्दिष्टो न स्मर्जस इति किंच स्वत एव त्वं भगभाजनः भजनीयानां गुणानामाश्रयः परम ईश्वर
तं त्वां द्विजानामनुपथं पथि पथि लग्नं यत्पुण्यरजः तथा श्रीवत्सलक्ष्म वा किं पुनीतः पवित्रीकुरुतः किं किमर्थं वा ते उक्ते
अगाः प्राप्तः भूषणत्वेन स्वीकृतवानसि अतो यत्सेवया चरणपद्मपवित्ररेण्वित्यादि वचनं लोकसंग्रहमात्रमित्यर्थः
२१

धर्ममूर्तेश्च तवेदमुचितमेवेत्याहुः धर्मस्येति त्रिभिः त्रिष्वेव युगेषु आविर्भवतीति त्रियुगः यद्वा त्रीणि युगलानि त्रियुगाः ष
ड्गुणाः भगवच्छब्दवाच्याः संत्यस्येति त्रियुगः हे त्रियुग धर्मरूपस्य तव त्रिभिः पद्भिः स्वैरसाधारणैः तपःशौचदयाभिः सत्यस्य
धर्मविप्लवेपि कलावनुवर्त्तमानत्वात् त्रिभिरित्युक्तं नूनं भृतं पालितं किं कृत्वा नोस्माकं वरदया सत्वेन तनुवा तन्वा स
त्वमूर्त्या तदभिघातिते षां पादानामभिघातकं रजस्तमश्च निरस्य निराकृत्य द्विजानां देवतानां च प्रयोजनार्थं नूनं भृतं

धर्मस्य ते भगवतस्त्रियुग त्रिभिः स्वैः पद्भिश्चराचरमिदं द्विजदेवतार्थं नूनं भृतं तदभिघाति रजस्तमश्च स
त्वेन नो वरदया तनुवा निरस्य २२ न त्वं द्विजोत्तमकुलं यदि हात्मगोपं गोप्ता वृषः स्वर्हणेन ससूनृतेन
तर्ह्येव नंक्ष्यति शिवस्तव देव पंथा लोकोग्रहीष्यदृषभस्य हि तत्प्रमाणं २३

यद्वा हित्नोपेक्ष्य पं निरस्येति अस्माकं तन्निवर्त्तयेत्यर्थः २२ आत्मगोपं त्वयैव रक्षणीयं द्विजोत्तमानां कुलं यदि ह स्फुर
टं त्वं न गोप्ता न रक्षितात्वं तदस्य यांतत्वात् न षष्ठीप्रयोगः वृषः श्रेष्ठः हे देव पंथा वेदमार्गो नंक्ष्यति नाशं यास्यति ऋषभस्य
श्रेष्ठस्य हि यस्मात् तत् अनर्हणं असूनृतं च अग्रहीष्यत् तदुक्तं गीतासु यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः स यत्प्रमाणं
कुरुते लोकस्तदनुवर्त्तते इति २३

यं वान्यं दण्डं विधास्यति ४

भा० त० ६७ नश्यतीति चेत्तत्राह । तद्धि दमार्गेना शानं इवेति तत्तो कोक्तिः सत्वनिधित्वात् तानायक्षेमं शं विधातुमिष्टः अत एव निजशक्ति
भिः राज्यादि भिरुत्थापितधर्मप्रतिपक्षस्य अतस्तव ब्रह्मकुले इवनतिर्युक्तैव ननु मह तोन्येष्व वनतिस्तेजो हानिकरी तत्रा
ह । एतावता नु धर्मत्राणप्रयोजनेन अवनतस्य मम नैरुक्तवत स्तवतेजः स्वभावः नष्टं नक्षीणं यतः स्वनमनादिस्ते विनो
दः २४ शापाग्रहं परित्यज्य विज्ञापयंति भवान्हृत्तिं नु अधिकां जीविकां वा तत्सर्वं मनुमन्यामहे ये वयं निरपराधा वै तौ

तत्तेन नीढमिव सत्वनिधे विधित्सोः क्षेमं नाजाय निजशक्तिभिरुद्धृतारेः नैतावता त्र्यधिपते बत विश्वभर्तुस्तेजः
क्षतं त्ववनतस्य स तो विनोदः २४ यं वानयो दममधीश भवान्विधत्ते वृत्तिं नु वा तदनुमन्महि निर्व्यलीकं अस्मा
स्व वा य उचितो ध्रियतां स दण्डो येनागसो वयम युक्ष्महि किल्बिषेण २५ श्री भगवानुवाच एतौ सुरेतर
गतिं प्रतिपद्य सद्यः संरंभसंभृतसमाध्यनुबद्धयोगौ भूयः सकाशमुपयास्यत आशु यो वः शापो मयैव नि
मितस्तदवेत विप्राः २६ श्री ब्रह्मोवाच अथ ते मुनयो दृष्ट्वा नयनानंदभाजनं वैकुंठं तदधिष्ठानं विकुंठं च स्वयं ६७
प्रभं २७

किल्बिषेण शापेना युक्ष्महि योजितवंतः २५ मत्कारित्वाच्छापस्य युष्माकं नापराध इत्याश्वासयन्नाह एतौ सद्य एवासु
र योनिं प्राप्य भूयो य्या श्रुमत्समीपमागमिष्यतः संरंभेण क्रोधावेशेन संभृतः संहृद्धो यः समाधिः एकाग्रता तेनानुबद्धो द
ढीकृतो योगो ययोः हे विप्राः यो वः शापः युष्मत्कृतः शापः तद्धि नि समयैव निमितः निर्मितः इत्यवेत जानीत २६ नेत्रोत्स
वजनकं विकुंठं हरिं तन्निवासं च वैकुंठलोकं स्वयंप्रकाशं प्रकाशीतरानपेक्षं सत्वपरिणामत्वात् २७

धो

अनुमान्य अनुज्ञाप्य २८ ममैव तु मतं संमतं इदमत्र तत्वं यद्यपि सनकादीनां क्रोधो न संभवति न च भगवत्पार्षदयोस्त
यो ब्राह्मणप्रातिकूल्यं न च भगवतः स्वभक्तोपेक्षा न च वैकुंठगतानां पुनर्जन्म तथापि भगवतः सिसृक्षादिवत् क दाचिद्युयुत्सा
समजनि तदा न्ये नो मत्यबलत्वात् स्वपार्षदानां तुल्यबलत्वेपि प्रतिपक्ष्यानुपपत्ते रेवं च ब्राह्मणनिवारणे प्रवर्त्य ते भुव
क्रोधमुद्दीप्य तच्छापव्याजेन प्रतिपक्षौ विधाय युद्ध कौतुकं संपादनीयमिति भगवतैवं व्यवसितं अतः सर्वं संगच्छते तदि

भगवंतं परिक्रम्य प्रणिपत्यानुमान्य च प्रतिजग्मुः प्रमुदिताः शंसंतो वैष्णवीं श्रियं २८ भगवाननुगावाह या
तं मा भैष्टमस्तु शं ब्रह्मतेजः समर्थोपि हंतुं नेच्छे मतं तु मे २९ मयि संरंभयोगेन निस्तीर्य ब्रह्म हेलनं प्रत्येष्य
तं निकाशं मे कालेनाल्पीयसा पुनः ३० द्वास्थावादिश्य भगवान्विमानश्रेणिभूषणं सर्वातिशयया लक्ष्म्या
जुष्टं स्वं धिष्ण्यमाविशत् ३१ तौ तु गीर्वाणऋषभौ दुस्तराद्धरिलोकतः हतश्रियौ ब्रह्मशापादभूतां विगतस्मयौ
३२ तदा विकुंठधिषणात्तयोर्निपतमानयोः हाहाकारो महानासीद्विमानाग्र्येषु पुत्रकाः ३३ तावेव ह्यधुना
प्राप्तौ पार्षदप्रवरौ हरेः दितेर्जठरनिर्विष्टं काश्यपं तेज उल्बणं ३४

मुक्तं शापो मयैव निमित इति माभैष्टमिति अस्तु शमिति हंतुं नेच्छे मतं तु म इत्यादि च २९ प्रत्येष्यतं प्रत्येष्यथः निकाशं
समीपं ३० दुस्तरात् ब्रह्मशापात् हरिलोकतः पतंतावितिशेषः हरिलोकतः एव हतश्रिया वभूतामिति वा विगतस्मयौ
नष्टगर्वौ च विकुंठस्य धिषणात् स्थानात् पुत्रकाः देवाः ३३ काश्यपं तेजो वीर्यं प्राप्तौ सहैव गर्भे प्रविष्टौ यमौ ३४
हे

भा०त्र०
६८

तयोर्यत्तेजः आक्षिप्तं तिरस्कृतं न चात्र प्रतिविधिः शक्यः यत एतर्हि इदानीं भगवानेव तद्देवविधातुमिच्छति ३५ तथा
पि कोप्युपायो विचार्यतामिति चेत् तत्राह विश्वस्येति त्रयाणां गुणानामीशः स एव सत्त्वोत्कर्षकालेन नः क्षेमं विधास्यति
निरूपणेन विमर्शेन ३६ तृतीये षोडशोऽध्यायः ततः सप्तदशे जन्म तयोर्लोकभयंकरं हिरण्याक्षप्रतापश्च वर्ण्यते दिग्जि

तयोरसुरयोरद्य तेजसा यमयोर्हि वः आक्षिप्तं तेज एतर्हि भगवांस्तद्विधित्सति ३५ विश्वस्य यः स्थिति
लयोद्भवहेतुराद्यो योगेश्वरैरपि दुरत्यययोगमायः क्षेमं विधास्यति स नो भगवांस्त्र्यधीशस्तत्रास्मदी
यविमृशेन कियानिहार्थः ३६ इति श्रीभगवते महापुराणे तृतीयस्कंधे षोडशोऽध्यायः
मैत्रेय उवाच निशम्यात्मभुवा गीतं कारणं शंकयोज्झिताः ततः सर्वे न्यवर्तंत त्रिदिवाय दिवौकसः १
दितिस्तु भर्तुरादेशादपत्यपरिशंकिनी पूर्णे वर्षशते साध्वी पुत्रौ प्रसुषुवे यमौ २ उत्पाता बहवस्तत्र
निपेतुर्जायमानयोः दिवि भुव्यंतरिक्षे च लोकस्योरुभयावहाः ३

यद्युतः १ क्षेमं विधास्यतीति ब्रह्मवचनानंतरं शंकया त्यक्ताः १ भर्तुरादेशात् लोकान् सपालान् त्रीन् चंडि मुहुरा
क्रंदयिष्यत इति वाक्यात् स्वापत्याभ्यां परिशंकिनी देवोपद्रवं शंकमाना २ तत्र तदा निपेतुः उद्बभूवुः ३
६८

१५

अचलैः सहिताः भुवः प्रदेशाः केतवश्च उदयं चक्रुरिति शेषः ४ फूत्कारानिति तीव्रवायुशब्दानुकरणं नगपतीन् महावृक्षान्
वात्या एव अनीकं यस्य रज एव ध्वजो यस्य ५ उच्चैर्हसंत्य इव तडितो येषु तेषां मंबुदानां घटया समूहेन नष्टो भगणः सूर्यादिभा
नां समूहो यस्मिन् पदं स्थानं न व्यादृश्यते स्म ईषदं नादृत ६ वार्द्धिः समुद्रः विमना इव उद्धृताः ऊर्मयो यस्मात् क्षुभिता उदरस्था म
करादयो यस्मिन् उदपानैर्वापीकूपादिभिः सहिताः शुष्काणि पंकजानि यासु ७ परिधयः परिवेषाः सराह्वोः राहुग्रस्तयोर्नि

सहाचला भुवश्चेलुर्दिशः सर्वाः प्रजज्वलुः सोल्काश्चाशनयः पेतुः केतवश्चार्तिहेतवः ४ ववौ वायुः सुदुःस्पर्शः फू
त्कारानीरयन्मुहुः उन्मूलयन्नगपतीन् वात्यानीको रजोध्वजः ५ उद्धसत्तडिदंभोदघटया नष्टभागणे व्योम्नि प्र
विष्टतमसा न स्म व्यादृश्यते पदं ६ चुक्रोश विमना वार्धिरुदूर्मिः क्षुभितोदरः सोदपानाश्च सरितश्चु
क्षुभुः शुष्कपंकजाः ७ मुहुः परिधयोऽभूवन् सराह्वोः शशिसूर्ययोः निर्घाता रथनिर्ह्रादा विवरेभ्यः प्रजज्ञिरे ८ घो
अंतर्ग्रामेषु मुखतो वमंत्यो वह्निमुल्बणं शृगालोलूकटंकारैः प्रणेदुरशिवाः शिवाः ९ संगीतवद्रोदनवदुन्नमय्य
शिरोधरां व्यमुंचन्विविधा वाचो ग्रामसिंहास्ततस्ततः १० खराश्च कर्कशैः क्षत्तः खुरैर्घ्नंतो धरातलं खार्काररभसा
मत्ताः पर्यधावन्वरूथशः ११

र्घाताः निरभ्रगर्जितानि रथनिर्ह्रादतुल्याः ध्वनयः विवरेभ्यः गिरिगुहाभ्यः शृगालानामुलूकानां च टंकारैर्ध्वनिभिः स
ह ९ ग्रामसिंहाः श्वानः १० कर्कशैः तीक्ष्णैः हे क्षत्तः खार्करो गर्दभजातिशब्दस्तस्मिन् रभसः संभ्रमो येषां वरूथशः
संघशः ११

रासभास्त्रस्ताः सर्वतः क्रोशंतः १२ गावो त्रसन् असृग्दोहाश्च बभूवुः देवलिंगानि व्यरुदन् प्रतिमानं अश्रुस्राव आसीदि
त्यर्थः १३ पुण्यतमान् गुरुबुधादीन् भगणान् बहूनि नक्षत्राणि अन्ये क्रूरग्रहा भौमादयः अतिचेरुः अतिक्रम्य जग्मुः वक्रग
त्याग्रत्याहत्य युयुधुश्च १४ ब्रह्मपुत्रान् ऋते विनोते षां सनकादीनां ज्ञानार्थं १५ व्यज्यमानं आत्मपौरुषं पूर्वसिद्धं स्वपौरुषं य
योः १६ निरुद्धा व्याप्ताः काष्ठा दिशो याभ्यां स्फुरंत्यं गदानि येषु ते भुजा ययोः अंगदे तिदावंतत्वमार्षं श्रोणीनां कांचीय स्यांत

रुदंतो रासभास्त्रस्ता नीडादुदपतन् खगाः घोषेरण्ये च पशवः शकृन्मूत्रमकुर्वत १२ गावो त्रसन्नसृग्दोहास्तोय
दाः पूयवर्षिणः व्यरुदन्देवलिंगानि द्रुमाः पेतुर्विनानिलं १३ ग्रहान्पुण्यतमानन्ये भगणांश्चापि दीपिताः
अतिचेरुर्वक्रगत्या युयुधुश्च परस्परं १४ दृष्ट्वान्यांश्च महोत्पातान् अतत्तत्त्वविदः प्रजाः ब्रह्मपुत्रानृते भी
ता मेनिरे विश्वसंप्लवं १५ तावादिदैत्यौ सहसा व्यज्यमानात्मपौरुषौ ववृधाते श्मसारेण कायेनाद्रिपती इ
व १६ दिविस्पृशौ हेमकिरीटकोटिभिर्निरुद्धकाष्ठौ स्फुरदंगदाभुजौ गां कंपयंतौ चरणैः पदे पदे कट्या सुकां
च्यार्कमतीत्य तस्थतुः १७

याकट्या १७ प्रजापतिर्नाम तयोरकार्षीद्यः प्राक्स्वदेहाद्यमयोरजायत तं वै हिरण्यकशिपुं विदुः प्रजा यं तं हिरण्याक्ष
मसूत साग्रतः १८ यमयोर्मध्ये यः स्वदेहात् प्रथमम् अजायत तं यथा हिरण्यकशिपुं विदुः साग्रतः प्रथमं यं असूत तं हि
रण्याक्षं यथा विदुः तथा नाम कृतवानित्यर्थः अयं भावः यदा हि गर्भाधानसमये योनि पुष्पं विशद्वीर्यं द्विधा विविक्तं आ
दिपश्चाद्भावेन प्रविशति तदा यमौ भवतः तयोश्च पितृतः प्रवेशक्रमविपर्ययेण मातृतः प्रसूतिः यदा विशेत् द्विधा भूतं
बीजं पुष्पं परिक्षरत् द्वौ तदा भवतो गर्भौ सूतिर्वेशविपर्ययात् इति पिंडसिद्धिस्मरणात् अतः स्वदेहात्पूर्वं यो जातस्य हिरण्यकशिपुरिति दि

दोर्भ्यां भुद्धतः ब्रह्मवरेण अकुतोमृत्युः १९ रणं युद्धं २० मनसा शौर्येण वीर्येण बलेन वरेण च उत्सिक्तं गर्वितं असृण्यं निरंकुशं निलि
ल्यिरे लीना बभूवुः २२ स्वेन महसा तेजसा तिरोहितान् दृष्ट्वा ज्ञात्वा क्षीबान् मत्तान् क्लीबानिति पाठे पौरुषहीनान् २३ सन्ना
अवसन्ना धीर्येषां वर्चसा प्रधर्षिता अभिभूताः संतः २५ महोर्मीन् अभिजघ्ने मौर्व्या मारयतीति मूर्वकाष्ठीयसंतं मय्या

चक्रे हिरण्यकशिपुर्दोर्भ्यां ब्रह्मवरेण च वशे सपालांल्लोकांस्त्रीन् अकुतोमृत्युरुद्धतः १९ हिरण्याक्षोनुजस्तस्य प्रियः प्री
तिकृदन्वहं गदापाणिर्दिवं यातो युयुत्सुर्मृगयन्रणं २० तं वीक्ष्य दुःसहजवं रणत्कांचननूपुरं वैजयंत्या स्रजा जुष्ट
मंसन्यस्तमहागदं २१ मनोवीर्यवरोत्सिक्तमसृण्यमकुतोभयं भीता निलिल्यिरे देवास्तार्क्ष्यत्रस्ता इवाहयः २२
स वै तिरोहितान् दृष्ट्वा महसा स्वेन दैत्यराट् सेंद्रान्देवगणान् क्षीबानपश्यन्व्यनदद्भृशं २३ ततो निवृत्तः क्रीडिष्य
न्गंभीरं भीमनिस्वनं विजगाहे महासत्त्वो वार्धिं मत्त इव द्विपः २४ तस्मिन्प्रविष्टे वरुणस्य सैनिका यादोगणाः स
न्नधियःससाध्वसाः अहन्यमाना अपि तस्य वर्चसा प्रधर्षिता दूरतरं प्रदुद्रुवुः २५ स वर्षपूगानुदधौ महाबलश्च
रन्महोर्मीन् श्वसनेरिता मुहुः मौर्व्याभिजघ्ने गदया विभावरीमासेदिवांस्तात पुरीं प्रचेतसः २६ तत्रोपलभ्यासु

यद्वा मूर्वा नाम तृणविशेषः तन्मयरज्वा दृढनिबद्धयेत्यर्थः विभावरीसंज्ञां आसेदिवान् प्राप्तः २६ असुराणां लो
कः पातालं तत्पालकं प्रलब्धुं उपहसितुं प्रणिपत्य २७ (रलोकपालकं यादोगणानामृषभं प्रचेतसं स्मयन्
प्रलब्धुं प्रणिपत्य नीचवज्जगाद मे देह्यधिराज संयुगं २७

त्वंलोकपालोधिपतिर्बृहच्छ्रवावीर्यापहोदुर्मदवीरमानिनां विजित्यलोकेखिलदैत्यदानवान्यद्राजसूयेनपुरायजत्प्रभो २८
सएवमुत्सिक्तमदेनविद्विषादृढंप्रलब्धोभगवानपांपतिः रोषंसमुत्थंशमयन्स्वयाधियाव्यवोचदङ्गोपशमंगतावयं २९

भा० तृ० ७० यद्यस्माद्राजसूयेनभवानयजत् २८ उपशमंयुद्धादिकौतुकादुपरमं २९ युद्धमार्गनिपुणंत्वांयस्तोषयिष्यति तमिहि
गच्छ गृणते स्तुवंति ३० आरात् शीघ्रं विस्मयःनष्टगर्वः वीरशयेरणांगणे रूपाणिवराहाद्यवतारान् ३१ इतितृतीये
सप्तदशः अष्टादशेहिरण्याक्षधरोद्धर्तृवराहयोः निर्विशेषंमहायुद्धंदेवक्षोभिनिरूप्यते १ प्रतियोद्धारंक्षमहात्म
नाःशयिष्यसइतियदुक्तंतत्विगणय्य अगणयित्वा यतोदुर्मदः १ अजितोजयतीत्यभिजित्तंश्रीहरिं प्रकर्षेणोद्धनी

श्रीमैत्रेयउवाच तदेवमाकर्ण्यजलेशभाषितंमहामनास्तद्विगणय्यदुर्मदः हरेर्विदित्वागतिमंगनारदाद्रसातलंनिर्वि
विशेत्वरान्वितः १ ददर्शतत्राभिजितंधराधरंप्रोन्नीयमानावनिमग्रदंष्ट्रया मुष्णंतमक्ष्णास्वरुचोरुणश्रियाज
हासचाहोवनगोचरोमृगः २ आहैनमेह्यज्ञमहींविमुंचनोरसौकसांविश्वसृजेयमर्पिता नस्वस्तियास्यस्यनयाममे
क्षतःसुराधमासादितभूकराकृते ३

यमानांउन्नीयमानाअवनिर्येनअग्रदंष्ट्रयादंष्ट्राग्रेणस्वरुचःहिरण्याक्षतेजांसिअरुणश्रियायुक्तंयत्तेनाक्ष्णानेत्रेणमुष्णंतंतिरस्कुर्वंतं ७०
हो अचिंत्यं वनगोचरोमृगःवारिचरोवराहः २ एहि आगच्छ रसौकसांपातालवासिनांनोस्माकंसमर्पिता अन्यथापातालाव
तरणमस्मानघटतइतिभावः हिरण्याक्षेणाधिक्षेपार्थंप्रयुक्तापिभारती वस्तुतोभगवंतंस्तौति तथाहिवनगोचरःजल
शयानःश्रीनारायणःसएवयोगिभिर्मृग्यतेदुष्टान्हंतुंमृगयतइतिमृगः अज्ञ नास्तिज्ञोयस्मात्सर्वज्ञेत्यर्थः सुराधम
यस्मात्हेसुरोत्तम ममेक्षमाणस्यापिसतःमामनादृत्यापित्वमनयासहवर्तमानः नः अस्मदीयंस्वस्तिसमस्तमंगलं
राज्यंयास्यसि प्राप्स्यसि नात्रसंदेहःतथाप्यस्मत्कृपयाविमुंचेत्यर्थः आसादितालीलयास्वीकृतासूकराकृतिर्येन
पश्यामिनान्यंपुरुषात्पुरातनाद्यःसंयुगेवारणमार्गकोविदं आराधयिष्यत्यसुरर्षभेहितंमनस्विनोयंगृणतेभवादृशाः ३० तंवीर २
मारादभिपद्यविस्मयःशयिष्यसेवीरशयेश्वभिर्वृतः यस्त्वद्विधानामसतांप्रशांतयेरूपाणिधत्तेसदनुग्रहेच्छया ३१ इतिश्रीभा० हिरण्या

अभवायनाशायत्वतःपुष्टः वस्तुतस्तुमोक्षाय भृतोधृतः आश्रितइत्यर्थः योभवान्परोक्षेण वीर्येणजयतीति तथावस्तुतस्तु
दूरतएवस्थित्वाजयतीतिसंस्थाप्यहत्वा वस्तुतस्तुयोगमायारूपमचिंत्यंबलंयस्य अत्यंपौरुषंयस्मात् तंत्वांसम्यक्स्थापयित्वाभक्त्या
हृदिस्थिरीकृत्येत्यर्थः हेमूढअमूढान्प्राति आप्यायतीतितथा प्रावृत्तौविनियातुःसुहृदांशुचःसंसारदुःखानिस्त्रजे नाशयामि
यतस्त्वंस्मर्तुर्बाधवानपिमोचयसीतिभावः ४ अस्मद्भुजच्युतयापिगदयाअशीर्णशीर्षेयस्यतथाभूतेत्वयिस्वस्थेसतियेतु

त्वंनःसपत्नैरभवायकिंभृतोयोमाययाहंत्यसुरान्परोक्षजित् त्वांयोगमायाबलमल्पपौरुषंसंस्थाप्यमूढप्रम
जेसुहृच्छुचः ४ त्वयिसंस्थितेगदयाशीर्णशीर्षण्यस्मद्भुजच्युतयायेचतुभ्यं बलिंहरंत्यृषयोयेचदेवाःस्वयंस
र्वेनभविष्यंत्यमूलाः ५ सतुद्यमानोरिदुरुक्तितोमरैर्दंष्ट्राग्रगांगामुपलक्ष्यभीतां तोदंमृषन्निरगादंबुमध्याद्ग्रा
हाहतःसकरेणुर्यथेभः ६

भ्यमधुनाबलिंहरंहरंति नवीनाभक्तायेपूर्वभक्ताः ऋषयोदेवाश्चतेसर्वेस्वयमेवउद्यमंविनैवअमूलाभभविष्यंति
किंतुदृढमूलाश्चभविष्यंतीत्यर्थः ५ सहरिःअरेर्दुरुक्तान्येवतोमराःअस्त्रविशेषाःतैस्तुद्यमानोव्यथ्यमानःदं
ष्ट्राग्रगतांपृथ्वींभीतामालक्ष्यतोदंदुरुक्तव्यथांदृष्ट्वा अनुकंपयाक्षान्सहमानएवनिर्गतःकरेणुर्हस्तिनीवस्तुतस्तु अ
रिदुरुक्तितःअमरैर्निमित्तभूतैस्तुद्यमानःप्रार्थ्यमानःयथाकृतार्थयाहिणोब्रह्मादीनांव्यथांदृष्ट्वा अनुकंपयापीड्यमानइत्य
र्थः तोदंमृषन्इत्यस्याप्ययमेवार्थः ६

भा०तृ०
७१ ७ तं निःसरंतं सलिलादनुद्रुतो हिरण्यकेशो द्विरदं यथा झषः करालदंष्ट्रोऽशनिनिःस्वनोऽब्रवीद्गतह्रियां किं त्वसतां विगर्हितं ७
सलिलान्निर्गच्छंतं अनुगतः सन् हिरण्यवत्कपिशाः केशा यस्य दैत्यस्य झषो मकरः करालादंष्ट्रा यस्य अशनिनिःस्वनो य
सलिलान्निर्गच्छंतं अनुगतः सन् हिरण्यवत्कपिशाः केशा यस्य दैत्यस्य झषो मकरः करालादंष्ट्रा यस्य अशनिनिन्निःस्वनो य
स्य निर्लज्जानामसतां किं विगर्हितमस्ति निंदास्पदत्वाभावात् पलायनं नायुक्तमित्यर्थः वस्तुतस्तु गतह्रियः प्राप्तह्रियः न संतो
यो येभ्यः तेषां कृपालूनां किंचिद्विगर्हितं न किंचित् अतः कृपालुत्वादहं श्रितजनरक्षणार्थं किंचित्पलायनमपि न निंदितमित्यर्थः
यद्वा लोकोपकाराय भुवमुद्धरतोऽनुद्रवणमनुचितं मन्वानो दैत्य आत्मानमेवाधिक्षिपति गतह्रियां स्वार्थैकपराणां असताम्

सगामुदस्तात्सलिलस्य गोचरे विन्यस्य तस्यामदधात्स्वसत्त्वं अभिष्टुतो विश्वसृजा प्रसूनैरापूर्यमाणो विबुधैः
पश्यतोरेः ८ परानुषक्तं तपनीयोपकल्पं महागदं कांचनचित्रदंष्ट्रं मर्माण्यभीक्ष्णं प्रतुदंतं दुरुक्तैः प्रचंडमन्युः
प्रहसंस्तं बभाषे ९

स्माकं किं विगर्हितमस्ति अपितु नास्त्येवेति गस्मानित्यब्रवीदित्यर्थः ७ स भगवान् विश्वसृजाऽभिष्टुतो विबुधैश्च प्र ७२
सूनैरापूर्यमाणः पाठांतरे विश्वसृजां प्रसूतैर्विबुधैरभिष्टुत इति सलिलस्योदस्तात्तदुपरि व्यवहारगोचरे देशे गां विन्य
स्य स्वसत्त्वमाधारशक्तिं निहितवान् अरेस्तस्य पश्यत एव ८ पराक्पृष्ठतोऽनुषक्तं लग्नं तपनीयोपकल्पं सुवर्णाभरणं
कांचनमयं चित्रं दंष्ट्राः कवचं यस्य तं दैत्यं प्रचंडमन्युत्वं अधिक्षेपादिकं वानुकरणमात्रं दैत्यवाक्यरीतानां देवानां भयनि
वृत्तये वस्तुतस्तेन तथाऽनुक्तत्वेन कोपादिहेत्वभावात् ९

ग्रामसिंहान् श्वुनः प्रतिमुक्तस्य बद्धस्य विकत्थनं श्लाघां १० न्यासहराः निक्षेपहराः द्राविताः पलायनं कारिताः अथापि
असमर्थां अपि तिष्ठामः तत्किं यतः स्थेयं स्थातव्यमेवास्माभिः तत्किमित्याह क्व यामः गंतव्यदेशाभावात् ११ पद्रथानां पदाती
नां ये यूथपास्तेषामधिपः मुख्य इत्यर्थः अस्वस्तये पराभवार्थं आशु घटस्व यतस्व अनूहो निर्वितर्कः यो नातिपिपर्ति न

श्रीभगवानुवाच सत्यं वयं भो वनगोचरा मृगा युष्मद्विधान्मृगये ग्रामसिंहान् न मृत्युपाशैः प्रतिमुक्त
स्य धीरा विकत्थनं तव गृह्णंत्यभद्र १० एते वयं न्यासहरा रसौकसां गतह्रियो गदया द्राविताः ते तिष्ठामहेथा
पि कथंचिदाजौ स्थेयं क्व यामो बलिनोत्पाद्य वैरं ११ त्वं पद्रथानां किल यूथपाधिपो घटस्व नो स्वस्तय आ
श्वनूहः संस्थाप्य चास्मान् प्रमृजाश्रु स्वकानां यः स्वां प्रतिज्ञां नातिपिपर्त्यसभ्यः १२ श्रीमैत्रेय उ
वाच सोधिक्षिप्तो भगवता प्रलब्धश्च रुषा भृशं आजहारोल्बणं क्रोधं क्रीड्यमानोहिराडिव १३
सृजन्नमर्षितः श्वासान्मन्युप्रचलितेंद्रियः आसाद्य तरसा दैत्यो गदयाभ्यहनद्धरिं १४

पूरयति पालयति वा असौ असभ्यः सभायामनर्हः १२ सोधिक्षिप्तः सत्यं वयमिति श्लोकेन रुषा प्रलब्धः उपहसि
तश्च एते वयमिति द्वाभ्यां क्रीडां कार्यमाणोहिराट् महासर्प इव १३ मन्युना प्रचलितानि क्षुभितानींद्रियाणि यस्य १४

अंतकं मृत्युं १५ सौम्य विदुर तां गदां अप्राप्तामेवाहन् १७ हर्यक्षो हिरण्याक्षः १८ स्पृधोः स्पर्धमानयोः तिग्माभ्यां गदाभ्यां आहतान्यंगानि ययोः क्षताद्आस्रवतीति क्षतास्रवं रुधिरं तस्य घ्राणं अवघ्राणं तेन विवृद्धो मन्युर्ययोः विचित्रान्मार्गान् गदायुद्धक्रमणभेदान् इलागोः तस्या निमित्तभूतायां शुष्मिणोर्मत्तयोर्बलवतोः प्रसक्तेपि इला पृथ्वी तदर्थं द्विषतोर्हरिबलुबद्धानि दिनानि संयधितो शृंगशृंगसंघर्षविदीर्णगलल्लुधिरौ परस्परोपमर्द्दव्यग्रौ असंरंभो बमत्कारितगजयूथपौ युद्ध्यमानौ इति

एवं गदाभ्यां गुर्वीभ्यां हर्यक्षो हरिरेव च जिगीषया सुसंरब्धावन्योन्यमभिजघ्नतुः १८

भगवांस्तु गदावेगं विसृष्टं रिपुणोरसि अवंचयत्तिरश्चीनो योगारूढ इवांतकं १५ पुनर्गदां स्वामादाय भ्रामयंतमभीक्ष्णशः अभ्यधावद्धरिः क्रुद्धः संरंभाद्दष्टदच्छदं १६ ततश्च गदयारातिं दक्षिणस्यां भ्रुवि प्रभुः आजघ्ने स तु तां सौम्य गदया कोविदोहनत् १७ तयोः स्पृधोस्तिग्मगदाहतांगयोः क्षतास्रवघ्राणविवृद्धमन्व्योः विचित्रमार्गांश्चरतोर्जिगीषया व्यभादिलायामिव शुष्मिणोर्मृधः १९ दैत्यस्य यज्ञावयवस्य मायागृहीतवाराहतनोर्महात्मनः कौरव्य मह्यां द्विषतोर्विमर्दनं दिदृक्षुरागादृषिभिर्वृतः स्वराट् २० आसन्नशौंडीरमपेतसाध्वसं कृतप्रतीकारमहार्यविक्रमं विलक्ष्य दैत्यं भगवान्सहस्रणीर्जगाद नारायणमादिसूकरं २१ ७२

भृतइतिप्रसिद्धं १९ यज्ञाएवावयवा यस्य तस्य च मह्यां मही निमित्तं द्विषतोः २० आगत्य च नारायणमाह किं कृत्वा दैत्यं विलक्ष्य कथंभूतं आसन्नं प्राप्तं शौंडीरं शौर्यमदो येन अपेतं साध्वसं यस्मात् कृतः प्रतीकारो येन अहार्यः अप्रतीकार्यो विक्रमो यस्य सहस्रणीः सहस्राणां ऋषिसहस्राणां नेता २१

हे देव तेंऽघ्रिमूलं प्राप्तानां देवादीनां असुरः २२ आगस्कृत् वृथैवापराधारोपकः तत्परिहाराय प्रवृत्तौ भयकृत् भीतं ज्ञात्वा दुःखं अर्थप्राणादिहर्ता अस्मत्तो राद्धो लब्धो वरो येन अन्वेषन् प्रतिरथमलभमानो कयन् अप्रतिरथः प्रतिपक्षशून्यः २३ यद्यस्मात् एवंभूतो यं तस्मादेनं माक्रीडय हे देव यथा उत्थितं कुपितं आशीविषं सर्पं बालः पुच्छाकर्षणादिना क्रीडयति तद्वत् २४ स्वां आसुरीं हे देव स्वां मायां अघं पापरूपं २५ वेलामेवाह एषेति लोकानां छंबट्करी विनाशकरी छंबडित्यव्ययं विनाशे वर्तते २६

ब्रह्मोवाच । एष ते देव देवानामंघ्रिमूलमुपेयुषां विप्राणां सौरभेयीणां भूतानामप्यनागसां २२ आगस्कृद्भयकृद्दुष्कृदस्मद्राद्धवरोसुरः अन्वेषन्नप्रतिरथो लोकानटति कंटकः २३ मैनं मायाविनं दृप्तं निरंकुशमसत्तमं आक्रीड बालवद्देव यथाशीविषमुत्थितं २४ न यावदेष वर्द्धेत स्वां वेलां प्राप्य दारुणः स्वां देव मायामास्थाय तावज्जह्यघमच्युत २५ एषा घोरतमा संध्या लोकछंबट्करी प्रभो उपसर्पति सर्वात्मन् सुराणां जयमावह २६ अधुनैषोऽभिजिन्नाम योगो मौहूर्तिको ह्यगात् शिवाय नस्त्वं सुहृदामाशु निस्तर दुस्तरं २७ दिष्ट्या त्वां विहितं मृत्युमयमासादितः स्वयं विक्रम्यैनं मृधे हत्वा लोकानाधेहि शर्मणि २८ इति श्रीभागवते महापुराणे तृतीयस्कंधे हिरण्याक्षवधेऽष्टादशोऽध्यायः

अभिजित्मध्याह्नः स एव मौहूर्तिको योगः सन् मुहूर्तश्चांद्रः कालः अगात् गतप्रायः अतो यावन्मुहूर्तशेषोस्ति ताव देव स्फुदुस्तरमेनं निस्तर जहि २७ त्वां मृत्युं त्वयैव शापानुग्रहकाले विहितं निर्मितं आसादितः प्राप्तः शर्मणि सुखे स्थापय २८ तृतीयेऽष्टादशः

भा॰ टी॰ ७३

ऊनविंशे विरिंच्याद्यर्थितेन महामृधे वाराहेण हिरण्याक्षवधः श्लाघ्योऽनुवर्ण्यते १ निर्व्यलीकं च तदमृतं च पाठांतरे नि
ष्कपटम् अभिप्रायं च ततः अतं च कालात्मनोऽपि मम मुहूर्तं बलमुपदिशतीति प्रहस्य अपांगालोकनेन स्वीकृतवान् १
मुखतः अभिमुखे हनौ कपोलस्याधोभागे अक्षजः ब्रह्मणो घ्राणेंद्रियादाविर्भूतः २ सा स्वगदया तेन हता ततो विह

मैत्रेय उवाच ॥ अवधार्य विरिंचस्य निर्व्यलीकामृतं वचः प्रहस्य प्रेमगर्भेण तदपांगेन सोऽग्रहीत् १ ततः सप
त्नं मुखतश्चरंतमकुतोभयं जघानोत्पत्य गदया हनावसुरमक्षजः २ सा हता तेन गदया विहता भगवत्क
रात् विघूर्णितापतद्रेजे तदद्भुतमिवाभवत् ३ स तदा लब्धतीर्थोऽपि न बबाधे निरायुधं मानयन्स मृ
धे धर्मं विष्वक्सेनं प्रकोपयन् ४ गदायामपविद्धायां हाहाकारे विनिर्गते मानयामास तद्धर्मं सुनाभं चा
स्मरद्विभुः ५ तं व्यग्रचक्रं दितिपुत्राधमेन स्वपार्षदमुख्येन विषज्जमानं चित्रा वाचोऽतद्विदां खेचराणां तत्रास्मा
सन्स्वस्ति तेऽमुं जहीति ६ स तं निशाम्यात्तरथांगमग्रतो व्यवस्थितं पद्मपलाशलोचनं विलोक्य चामर्षपरिप्लुते
द्रियो रुषा स्वदंतच्छदमादशच्छ्वसन् ७ करालदंष्ट्रश्चक्षुर्भ्यां संचक्षाणो दहन्निव अभिप्लुत्य स्वगदया हतोऽसीत्या
हनद्धरिं ८

ता विधूता सती विघूर्णिता भ्रमन्ती पतत् रेजे च तत् भगवत्करात्पतनं यद्वा तत्पदस्याद्भुतस्यारेज
इत्यनेनापि संबंधः तत् दैत्यपौरुषं रेजे इति ३ लब्धतीर्थो लब्धावसरः स च न बबाधे न प्राहरत् समानयन्बहु वेति
वाक्यभेदाय स्पष्टस्यापौनरुक्त्यं ४ ५ व्यग्रं ससंभ्रमं चक्रं यस्य विषज्जमानं विशेषणसंगं प्राप्नुवंतं अंगेति अतद्विदां तत्
प्रभावमजानतां आसमंतादासन्नभूत् ६ स दैत्यस्तमात्तचक्रं निशाम्य दृष्ट्वा अग्रतो व्यवस्थितं च विलोक्य अमर्षेण क्रोधेन
परिप्लुतानि क्षुभितानींद्रियाणि यस्य सः आदशत् दष्टवान् ७ चक्षुर्भ्यां दहन्निव संचक्षाणः पश्यन्निवेति वस्तुतः क्रोधाभाव

बातरंहसं वायुवेगां ९ घटस्व उद्यमं कुरु यतस्त्वं जेतुमिच्छसि १० ११ हतो मानो गर्वो यस्य १२ ज्वलन् यो ज्वलनः
लोलुपं ग्रसनव्यग्रं यज्ञाय विष्णुमालक्ष्य अकार्यकरत्वे दृष्टांतः विप्रमुद्दिश्याभिचारं कुर्वन् यथा १३ अंतःखे आकाशेन

पदा सव्येन तां साधो भगवान्यज्ञसूकरः लीलया मिषतः शत्रोः प्राहरद्वातरंहसं ९ आह चायुधमाधत्स्व घटस्व
त्वं जिगीषसि इत्युक्तः स तदा भूयस्ताडयन्व्यनदद्भृशं १० तां स आपततीं वीक्ष्य भगवान्समवस्थितः जग्राह लील
या प्राप्तां गरुत्मानिव पन्नगीं ११ स्वपौरुषे प्रतिहते हतमानो महासुरः नैच्छद्गदां दीयमानां हरिणा विगतप्रभः
१२ जग्राह त्रिशिखं शूलं ज्वलज्ज्वलनलोलुपं यज्ञाय धृतरूपाय विप्रायाभिचरन्यथा १३ तदोजसा दैत्यम
हाभटार्पितं चकासदंतःख उदीर्णदीधिति चक्रेण चिच्छेद निशातनेमिना हरिर्यथा तार्क्ष्यपतत्रमुज्झितं १४ वृ
क्णे स्वशूले बहुधारिणा हरेः प्रत्येत्य विस्तीर्णमुरो विभूतिमत् प्रवृद्धरोषः स कठोरमुष्टिना नदन्प्रहृत्यांतरधी
यतासुरः १५

ध्ये च काशात् प्रकाशमानं उदीर्णा उत्कटा दीधितिर्दीप्तिर्यस्य निशातनेमिना निशितधारेण हरिरिंद्रो यथा तार्क्ष्यस्य
पत्रमुज्झितं चिच्छेद देवान्विनिर्जित्य अमृतकलशं नयता गरुडेनेंद्रप्रयुक्तवज्रस्यामोघस्य मानं दातुं पिच्छमेकं त्यक्तं तत्
यथा इंद्रश्चिच्छेद छिन्नं चकार तत् यथा खे प्रकाशात् तद्वत् प्रकाशमानमित्यपि संबंधः १४ अराः संत्यस्येति अरि चक्रं ते
न बहुधा वृक्णे छिन्ने सति प्रत्येत्य अभिमुखमागत्य हरेरुरः वक्षः प्रहृत्य १५

८ ७३

भा० त०
७४

मनाक् ईषदपि क्वाप्यंगे १६ अस्य जगतः उपसंयमं प्रलयं १७ पांसुकृतं तमश्च प्रेरितवंतः क्षेपणैः यंत्रैः १८ नष्टो भ-
गणो नक्षत्रसमूहो यस्यां अनेन दैत्यबलातिरेकात् ब्रह्मदत्तमुहूर्तातिक्रमो गम्यते अह्नि नक्षत्राणामसंभवात्
नानायुधानि मुंचंतीति तथा यातुधान्यश्च प्रत्यदृश्यंत २० हिंस्राः छिंधि भिंधीत्येवंरूपाः अतिवैशसा अतिदु-

तेनेत्थमाहतः क्षत्तर्भगवानादिसूकरः नाकंपत मनाक् क्वापि स्रजा हत इव द्विपः १६ अथोरुधाऽसृजन्मा-
यां योगमायेश्वरे हरौ यां विलोक्य प्रजास्त्रस्ता मेनिरेऽस्योपसंयमं १७ प्रववुर्वायवश्चंडास्तमः पांस-
वमैरयन् दिग्भ्यो निपेतुर्ग्रावाणः क्षेपणप्रहिता इव १८ द्यौर्नष्टभगणाभ्रौघैः सविद्युत्स्तनयित्नु-
भिः वर्षद्भिः पूयकेशासृग्विण्मूत्रास्थीनि वासकृत् १९ गिरयः प्रत्यदृश्यंत नानायुधमुचोऽनघ दि-
ग्वाससो यातुधान्यः शूलिन्यो मुक्तमूर्धजाः २० बहुभिर्यक्षरक्षोभिः पत्त्यश्वरथकुंजरैः आतताथि-
भिरुत्सृष्टा हिंस्रा वाचोऽतिवैशसाः २१ प्रादुःकृतानां मायानामासुरीणां विनाशयत् सुदर्शनास्त्रं भ- ७४
गवान् प्रायुंक्त दयितं त्रिपात् २२ तदा दितेः समभवत्सहसा हृदि वेपथुः स्मरंत्या भर्तुरादेशं स्तनाच्चासृक् प्रसुस्रुवे २३

श्रावाचः दुःस्पृष्टा इत्यत्रैव वाक्यसमाप्तिः २१ प्रादुःकृतानामिति प्रकटितामायाविनाशयत् विनाशनमिति पाठे
यथाश्रुतैव षष्ठी त्रिपात् त्रीणि सवनानि पादा यस्य यज्ञमूर्तेरित्यर्थः त्रयो अस्य पादा इति श्रुतेः २२ भर्तुरादेशं
त्वत्पुत्रौ भगवान् हनिष्यतीत्येवंभूतं २३ ~~उपगूहमानः बाहुभ्यां तं निधाय सं~~

विनष्टासु स्वमायासु भूयश्चाव्रज्य केशवं रुषोपगूहमानोऽमुं ददृशेऽवस्थितं बहिः २४

उपगूहमानः बाहुभ्यां तं निधाय संघट्टयन् २४ अहन् जघान त्वाष्ट्रं वृत्रं मरुत्पतिरिंद्रः २५ परितो भ्रमत् गात्रं
शरीरं यस्य उदस्ते बहिर्निर्गते लोचने यस्य विशीर्णा बाह्वादयो यस्य नगेंद्रो महाद्रुमः लुलितः उन्मूलितः नभस्व-
ता वायुना २६ संस्थितिं मृत्युं २७ असतः आरोपितात् लिंगशरीरात् मोक्तुमिच्छया वराहस्य पूर्वपादयोरेव करत्वात्

तं मुष्टिभिर्विनिघ्नंतं वज्रसारैरधोक्षजः करेण कर्णमूलेऽहन् यथा त्वाष्ट्रं मरुत्पतिः २५ स आहतो विश्वजिता ह्य-
वज्ञया परिभ्रमद्गात्र उदस्तलोचनः विकीर्णबाह्वंघ्रिशिरोरुहोऽपतद्यथा नगेंद्रो लुलितो नभस्वता २६ क्षितौ श-
यानं तमकुंठवर्चसं करालदंष्ट्रं परिदष्टदच्छदं अजादयो वीक्ष्य शशंसुरागता अहो इमं को नु लभेत संस्थितिं २७
यं योगिनो योगसमाधिना रहो ध्यायंति लिंगादसतो मुमुक्षया तस्यैष दैत्यर्षभः पदाहतो मुखं प्रपश्यंस्तनु-
मुत्ससर्ज ह २८ एतौ तौ पार्षदावस्य शापाद्यातावसद्गतिं पुनः कतिपयैः स्थानं प्रपत्स्येते ह जन्मभिः २९ श्रीदेवा ऊचुः
नमो नमस्तेऽखिलयज्ञतंतवे स्थितौ गृहीतामलसत्वमूर्तये दिष्ट्या हतोऽयं जगतामरुंतुदस्त्वत्पादभक्त्या वयमीश
निर्वृताः ३० श्रीमैत्रेय उवाच एवं हिरण्याक्षमसह्यविक्रमं स सादयित्वा हरिरादिसूकरः जगाम लोकं स्वमखं-
डितोत्सवं समीडितः पुष्करविष्टरादिभिः ३१

करेणाहन्निति पदाहत इति वा विरुद्धं २८ अखिलयज्ञानां तंतवे विस्ताराय कारणायेति वा अरुंतुदः मर्मच्छेत्ता ३० सा-
दयित्वा हत्वेत्यर्थः पुष्करविष्टरादिभिर्ब्रह्मादिभिः संस्तुतः ३१ ओं नमो भगवते वासुदेवाय

यथानूक्तं गुरुरुक्तिमनतिक्रम्य मया अवादि त्वकथितं हे सुमित्र यथा येन प्रकारेण ३२ हे द्विज शौनक ३३ कथां उपश्रु
त्य ३४ भक्तिमात्रेण पशूनामपि सुलभः अन्यथा देवानामपि दुर्लभ इति तत्कथाश्रवणे कस्यानंदो न स्यादित्याह द्वाभ्यां
रुषो या हः को शांतीनां सतीनामिति कृपालुत्व मुक्तं संकटादमोचयत् ३५ कारणेन पृथिव्युद्धरणादिना सूकररूपस्य ३६

मयाय यथानूक्तमवादि ते हरेः कृतावतारस्य सुमित्र चेष्टितं यथा हिरण्याक्ष उदारविक्रमो महामृधे क्रीडनवन्निरा
कृतः ३२ श्रीसूत उवाच इति कौषारवाख्याता माश्रुत्य भगवत्कथां क्षत्तानंदं परं लेभे महाभागवतो द्विज
३३ अन्येषां पुण्यश्लोकानामुद्दामयशसां सतां उपश्रुत्य भवेन्मोदः श्रीवत्सांकस्य किं पुनः ३४ यो गजेंद्रं झष
ग्रस्तं ध्यायंतं चरणांबुजं क्रोशंतीनां करेणूनां कृच्छ्रतोऽमोचयद्द्रुतं ३५ तं सुखाराध्यमृजुभिरनन्यशरणैर्नृभिः
कृतज्ञः को न सेवेत दुराराध्यमसाधुभिः ३६ यो वै हिरण्याक्षवधं महाद्भुतं विक्रीडितं कारणसूकरात्मनः शृणोति
गायत्यनुमोदते ऽंजसा विमुच्यते ब्रह्मवधादपि द्विजाः ३७ एतन्महापुण्यमलं पवित्रं धन्यं यशस्यं पदमायुरा
शिषां प्राणेंद्रियाणां युधि शौर्यवर्द्धनं नारायणोंऽते गतिरंग शृण्वतां ३८ इति श्रीभागवते महापुराणे
तृतीयस्कंधे एकोनविंशोऽध्यायः ७५
एतद्धरेर्विक्रीडितं शृण्वतामंते श्रीनारायणो गतिर्भवति महापुण्यं स्वर्गादिप्रदं अलं पवित्रं अतिशयेन शोधकं
धन्यं धनावहं यशस्यं कीर्तिकरं आयुषश्चाशिषां च पदं स्थानं परित्राणं वा प्राणानामिंद्रियाणां च पदं अंग शौनक
३८ इति तृतीये एकोनविंशः

विंशे ब्रह्माह जन्मादि यद्वधानादथादितः सर्गोनु स्मायते वक्तुमन्वयं प्रस्तुतं मनोः १ प्रतिष्ठां स्थानं अध्यस्य प्राप्य सौते सूतस्य
रोमहर्षणस्य पुत्र स्य अवरं अर्वाचीनं जन्म येषां तेषां ईश्वरे लीनानां मार्गाय निर्गमाय कानि द्वाराणि कृतवान् अर्वाचीना
न् प्राणिनः कैरुपायैः सृष्टवानित्यर्थः १ विदुरमैत्रेयसंवादेनैवैतद्ज्ञास्यत इति तमेव संवादं प्रष्टुमाह क्षत्तेति पंचभिः श्री
शौनक उवाच महीं प्रतिष्ठामध्यस्य सौते स्वायंभुवो मनुः कान्यन्वतिष्ठद्द्वाराणि मार्गायावरजन्मनां १
क्षत्ता महाभागवतः कृष्णस्यैकांतिकः सुहृत् यस्तत्याजाग्रजं कृष्णे सापत्यमघवानिति २ द्वैपायनादनवरो
महित्वे तस्य देहजः सर्वात्मना श्रितः कृष्णं तत्परांश्चाप्यनुव्रतः ३ किमन्वपृच्छन्मैत्रेयं विरजास्तीर्थसेवया उप
गम्य कुशावर्त्त आसीनं तत्त्ववित्तमं ४ तयोः संवदतोः सूत प्रवृत्ता ह्यमलाः कथाः आपो गांगा इवाघघ्नीर्ह
रेः पादांबुजाश्रयाः ५ ता नः कीर्त्तय भद्रं ते कीर्त्तन्योदारकर्म्मणः रसज्ञः को नु तृप्येत हरिलीलामृतं पिबन् ६
एवमुग्रश्रवाः पृष्ट ऋषिभिर्नैमिषायनैः भगवत्यर्पिताध्यात्मस्तानाह श्रूयतामिति ७
कृष्णस्य सुहृत्त्वे हेतुः य इति दुर्योधनादिभिः सापत्यैः सहितमग्रजं धृतराष्ट्रं अघवान् कृतापराध इति हेतोः श्रीकृष्णोक्तमंत्रानादरात्य
क्तवान् २ अनवरः न न्यूनः महित्वे महिम्नि ३ कुशावर्त्ते गंगाद्वारे ४ यत्किमपि पृच्छत् तु किं तद्वेति चेत् तत्राह तयोरिति अघ
घ्नः कथाः नूनं प्रवृत्ताः ५ कीर्त्तन्यानि कीर्त्तनार्हाणि उदाराणि कर्म्माणि यस्य हरेः ६ एवमिति व्यासवाक्यं उग्रश्रवाः रोमहर्ष
णपुत्रः नैमिषमयनमाश्रयो येषां अर्पितमध्यात्मं मनो येन ७

गोरुद्धरणं लीलां हिरण्याक्षं चावज्ञयाहतं निशम्य भारतो विदुरः ८ यस्मात्त्वमव्यक्तमार्गवित् ब्रह्मणो वा विशेषणं ९ एतज्ज
गत् अभावयन् उत्पादयामासुः १० सद्वितीयाः सभार्याः स्वतंत्राः भार्यानपेक्षाः कर्मसु प्रजासर्गादिषु संहताः परस्परापेक्षाः
इदं जगत् ११ ब्रह्मा किमारभतेति प्रश्नस्य यक्षादीनसृष्टवानित्युत्तरं वक्तुं पूर्वोक्तां सृष्टिमनुस्मारयति दैवेनेति त्रिभिः सत्वा
दिप्रश्नानां तूत्तराध्यायमारभ्योत्तरं भविष्यति दुर्वितर्केण दैवेन जीवादृष्टेन परेण प्रकृत्यधिष्ठात्रा महापुरुषेण अनिमिषेण

सूत उवाच हरेर्धृतक्रोडतनोः स्वमायया निशम्य गोरुद्धरणं रसातलात् लीलां हिरण्याक्षमवज्ञया हतं संजात
हर्षो मुनिमाह भारतः ८ श्रीविदुर उवाच प्रजापतिपतिः सृष्ट्वा प्रजासर्गे प्रजापतीन् किमारभत मे ब्रह्मन्
प्रब्रूह्यव्यक्तमार्गवित् ९ ये मरीच्यादयो विप्रा यस्तु स्वायंभुवो मनुः ते वै ब्रह्मण आदेशात् कथमेतदभावयन्
१० सद्वितीयाः किमसृजन् स्वतंत्रा उत कर्मसु आहोस्वित्संहताः सर्व इदं स्म समकल्पयन् ११ श्रीमैत्रेय उवाच
दैवेन दुर्वितर्केण परेणानिमिषेण च जातक्षोभाद्भगवतो महानासीद्गुणत्रयात् १२ रजःप्रधानान्महतस्त्रिलिं ७६
गो दैवचोदितात् जातः ससर्ज भूतादिर्वियदादीनि पंचशः १३

कालेन च हेतुना भगवतो निर्विकारात् जातक्षोभं यत् गुणत्रयं प्रधानं तस्मान्महानासीत् तदुक्तं तंत्रे विष्णोस्तु त्रीणि रूपाणि
पुरुषाख्यान्यथो विदुः प्रथमं महतः स्रष्टृ द्वितीयं त्वंडसंस्थितं तृतीयं सर्वभूतस्थं तानि ज्ञात्वा विमुच्यत इति १२ महतो जातो
भूतादिरहंकारः त्रिलिंगः त्रिगुणः रजःप्रधानादिति स्वतः सत्वप्रधानस्यापि महतोऽहंकारोत्पत्तिकाले कार्योन्मुखत्वे रजः
प्रधानत्वं भवतीति भावः पंचशः तन्मात्राणि महाभूतानि ज्ञानेंद्रियाणि कर्मेंद्रियाणि तद्देवताश्चेति पंच पंच ससर्जेत्य
र्थः १३

भौतिकं हैममंडं एकैकशः प्रत्येकं स्रष्टुमसमर्थानि संतीति संहत्य ससृजुः १४ अन्ववात्सीत् अधिष्ठितवान् १५ सहस्रार्कोरु
मिवोरुर्दीधितिर्यस्य तत् सर्वजीवनिकायानामोकः स्थानं पद्मं स्वराट् ब्रह्मा १६ यः सलिलाशये गर्भोदके स्यातः शेते तेन भग
वतानुविष्टोऽधिष्ठितः सन् स स्वराट् स्वया संस्थया नामरूपादिक्रमेण १७ छायाप्रता प्रतियोगिनीतया अबुध्येत्यर्थः

तानि चैकैकशः स्रष्टुमसमर्थानि भौतिकं संहत्य दैवयोगेन हैममंडमवासृजन् १४ सोऽशयिष्टाब्धिसलिले
आंडकोशो निरात्मकः साग्रं वै वर्षसाहस्रमन्ववात्सीत्तमीश्वरः १५ तस्य नाभेरभूत्पद्मं सहस्रार्कोरुदीधिति
सर्वजीवनिकायौको यत्र स्वयमभूत्स्वराट् १६ सोऽनुविष्टो भगवता यः शेते सलिलाशये लोकसंस्थां यथापू
र्वं निर्ममे संस्थया स्वया १७ ससर्ज छायया विद्यां पंचपर्वाणमग्रतः तामिस्रमंधतामिस्रं तमो मोहो महा
तमः १८ विससर्जात्मनः कायं नाभिनंदंस्तमोमयं जगृहुर्यक्षरक्षांसि रात्रिं क्षुत्तृट्समुद्भवां १९
क्षुत्तृड्भ्यामुपसृष्टास्ते तं जग्धुमभिदुद्रुवुः मा रक्षतैनं जक्षध्वमित्यूचुः क्षुत्तृडर्दिताः २०

यस्त्वबुद्धिकृतः प्रजोरित्यकृत्वात् महातम इति महामोहः स्वरूपनिर्देशमात्रविवक्षया मोह इति प्रथमाप्रयोगः १८
तदेवं प्रथमोक्तां साधारणां सृष्टिमनूद्य केनचिद्विशेषेणासाधारणां सृष्टिमाह विससर्जेत्यादिना यावत्समाप्ति त
द्विसृष्टं कायं रात्रिरूपं तत एव जातानि यक्षरक्षांसि जगृहुः क्षुत्तृषोः समुद्भवो यस्यां तां अत्र च यास्य सा तनूरासीत्तता
मयो हत् सा तामिस्रा तद्वदित्यादिश्रुतिरनुसंधेया १९ उपसृष्टा अभिभूताः जग्धुं अत्तुं भक्षयितुं यतो वयं क्षुत्तृड्भ्यामर्दि
ताः अत एनं पिबतेति रूपया मा रक्षत इत्येके अन्ये तु जक्षध्वं भक्षयतेति ब्रुवंतः यक्ष भक्ष हसनयोरिति धातुः २०

भा० टी० ११ देवो ब्रह्मा संविग्नो भीतः सन् मां मा यक्षत न भक्षयत किंतु रक्षत अहो हे यक्षरक्षांसि यूयं मे प्रजाः सुताः बभूविथ जाताः स्थ एवमु
यस्त्वन्नावायक्षराक्षसा जाता इत्यर्थः तत्र ये यक्षध्वमित्यूचुः ते यक्षाः ये तु मा रक्षतेति ते राक्षसा इति ज्ञेयं एवमिति तिर्यगादितामससर्ग
स्याप्युपलक्षणं २१ प्रभया दीव्यन् द्योतमानः याया देवता एवेति मत्वा सात्विक्यः तास्ताः प्रमुखतः प्राधान्येनासृजत्तद्देवाः देव
नाशितस्त्रीते न निर्दिष्टेनाम यथार्थमात्रविवक्षया तदिति पुंस्त्वेन प्रतिनिर्देशः एवं यक्षरक्षांसीत्यत्रापि ज्ञेयं तेन विसृष्टां त्यक्तां प्रतीतां अ

देवस्तानाहसंविग्नो मा मां यक्षत रक्षत अहो मे यक्षरक्षांसि प्रजा यूयं बभूविथ २१ देवताः प्रभया या या दीव्यन् प्रमुखतो
१ सृजत् ते हार्षुर्देवयंतो विसृष्टां तां प्रभामहः २२ देवो देवान् जघनतः सृजति स्मातिलोलुपान् त एनं लोलुपतया मै
थुनायाभिपेदिरे २३ ततो हसन् स भगवान् असुरैर्निरपत्रपैः अन्वीयमानस्तरसा क्रुद्धो भीतः परायतत् २४ स उपव्रज्य
वरदं प्रपन्नार्तिहरं हरिं अनुग्रहाय भक्तानामनुरूपात्मदर्शनं २५ पाहि मां परमात्मंस्ते प्रेषणेनासृजं प्रजाः
ता इमा यभितुं पापा उपाक्रामंति मां प्रभो २६ त्वमेकः किल लोकानां क्लिष्टानां क्लेशनाशनः त्वमेकः क्लेशदस्तेषामना ११
सन्नपदां तव २७ सोवधार्यास्य कार्पण्यं विविक्ताध्यात्मदर्शनः विमुंचात्मतनुं घोरामित्युक्तो विमुमोच ह २८

हः दिवसरूपां सतीं देवयंतः क्रीडयंतः अहार्षुर्जगृहुः २२ अदेवानिति छेदः स जघनादसुरानसृजतेति श्रुतेः अतिलोलु
पान् स्त्रीत्वं यत् अभिपेदिरे प्राप्ताः २३ परायतत् पलायत २४ भक्तेच्छानुरूपमात्मानं दर्शयतीति तथा तं उपव्रज्य २५ विवि
पाहीति द्वाभ्यां प्रार्थितवान् यभितुं मैथुनेन धर्षयितुं २६ लोकानां जनानां तव अनासन्नोऽनाश्रितो पादो यैः तेषां २७ विवि
क्तं असंदिग्धं अध्यात्मदर्शनं परचित्तज्ञानं यस्य हरेः घोरां कामकश्मलां स्वतनुं विमुंचेति उक्तवानिति शेषः इत्युक्तश्च ब्रह्मा तां
तनुं विमुमोच सर्वत्र तनुत्यागो नाम तत्तन्मनोभावत्यागो विवक्षितः ग्रहणं च तत्तद्भावापत्तिरिति द्रष्टव्यं २८

सा अहोरात्रयोः संधिरूपत्वादिति श्रुतेः सा तेन विसृष्टा तनुः सायंतनी संध्या बभूव सा च कामोद्रेकवेला असुराश्च राजसत्वात्स्त्री
लंपटाः अतस्तां संध्यामेव स्त्रियं कल्पयित्वा ते संमोहं प्राप्ता इत्याह तामिति त्रिभिः नूपुराभ्यां क्वणंती चरणांभोजे यस्याः मदेन
विह्वले लोचने यस्याः कांचीकलापेन विलसता दुकूलेन च्छन्नं रोधः कटितटं यस्याः तां २९ अन्योन्यश्लेषया उपमर्दनहेतुना उत्तुंगौ
निरंतरौ पयोधरौ यस्याः सुद्विजां सुदतीं स्निग्धहासो लीलाविलोकनं च यस्याः ३० गूहंतीं वस्त्रांचलेनात्मानं नीलानामलकानां

तां क्वणच्चरणांभोजां मदविह्वललोचनां कांचीकलापविलसद्दुकूलच्छन्नरोधसं २९ अन्योन्यश्लेषयोत्तुंगनिरंत
रपयोधरां सुनासां सुद्विजां स्निग्धहासलीलावलोकनां ३० गूहंतीं व्रीडयात्मानं नीलालकवरूथिनीं उपलभ्या
सुरा धर्म सर्वे संमुमुहुः स्त्रियं ३१ अहो रूपमहो धैर्यमहो अस्या नवं वयः मध्ये कामयमानानामकामेव विसर्पति ३२
वितर्कयंतो बहुधा तां संध्यां प्रमदाकृतिं अभिसंभाव्य विश्रंभात्पर्यपृच्छन् कुमेधसः ३३ कासि कस्यासि रंभोरु को वा
र्थस्तेऽत्र भामिनि रूपद्रविणपण्येन दुर्भगान्नो विबाधसे ३४ या वा काचित्त्वमबले दिष्ट्या संदर्शनं तव उत्सुनोषी
क्षमाणानां कंदुकक्रीडया मनः ३५

वरूथस्तोमो विद्यते यस्याः हे धर्म तां स्त्रियमुपलभ्य मत्वा ३१ संमूढानां विलापना क्रममाह अहो इति ३२ अभिसंभाव्य
सत्कृत्य विश्रंभात् प्रणयात् कुबुद्धयस्ते तां पप्रच्छुः ३३ कासीति त्रिभिः कासि जात्या कस्य वा कन्या हे भामिनि को यनेन रूपमे
व द्रविणं अनर्घ्यं वस्तु तदेव पण्यं क्रयार्हं तेन तदसमर्पणेन विबाधसे ३४ किं जातिकुलादिप्रश्नेन या वा कावित्त्वं वादि
ष्ट्या इदं तावत् नः जातं यत्तव दर्शनं किंतु केवलं नो मनः उत्सुनोषि विमथ्नासि ३५

कुन्तितचित्तानां वाक्यं हे शालिनि श्लाघ्ये एकत्र न जयति न स्थिरी भवति यद्वा नैकत्र अनेक गतिविलासेषु जयति सर्वोत्कर्षेण वर्त्त
ते पतत्पतंगं उच्छलंतं कंदुकं हे हतोस्तनयोः भारात् भीतं तव कष्टं मध्यं विषीदति श्राम्यति शांता मंथरेव प्रसरति स्फुरच्छिखासमूहः शोभनः
केशकलापस्ते पाठांतरे स्फुरच्छिखाः शोभनान् केशान् अवकीर्यमाणान् न समूहवधानेति अन्वयः असंगच्छन् सूर्य एव पतत्पतंगः मध्यविवे
द्रोमध्यविषादः तारकरूपा दृष्टिः तम एव केशा इत्याहुरुह्यं ३६ प्रमदेवाचरंतीं स्त्रियं मत्वा जगृहुः ३७ प्रहस्यात्मानमात्मना जिघ्रंत्या

नैकत्र ते जयति शालिनि पादपद्मं घ्नंत्या मुहुः करतलेन पतत्पतंगं मध्यं विषीदति बृहत्स्तनभारभीतं शांतेव दृष्टिरमला
सुशिखासमूहः ३६ इति सायंतनीं संध्यामसुराः प्रमदायतीं प्रलोभयंतीं जगृहुर्मत्वा मूढधियः स्त्रियं ३७ प्रह
स्य भावगंभीरं जिघ्रंत्यात्मानमात्मना कांत्या ससर्ज भगवान् गंधर्वाप्सरसां गणान् ३८ विससर्ज तनुं तां वै ज्योत्स्नां
कांतिमतीं प्रियां त एव चाददुः प्रीत्या विश्वावसुपुरोगमाः ३९ सृष्ट्वा भूतपिशाचांश्च भगवानात्मतंद्रिणा दिग्वास
सो मुक्तकेशान् वीक्ष्य चामीलयद्दृशौ ४० जगृहुस्तद्विसृष्टां तां जृंभणाख्यां तनुं प्रभोः निद्रामिंद्रियविक्लेदो यया भू
तेषु दृश्यते ४१ ७८
येनोच्छिष्टान् धर्षयंति तमुन्मादं प्रचक्षते ४२

कांत्या सौंदर्येण प्रहसनमात्माच्छायां च सौंदर्यानुभावचातुर्यविकारः ३८ ज्योत्स्नां चंद्रिकारूपां त एव गंधर्वादिगणा विश्वावसुः
पुरोगमो मुख्यो येषु ३९ आत्मनस्तंद्रिणा आलस्येन तांश्च मुक्तकेशान् वीक्ष्य नेत्रे निमीलितवान् ४० इंद्रियाणां विक्ले
दः स्नावो यया तां निद्रां प्रचक्षते ४१ येन इंद्रियविक्लेदेन हेतुना उच्छिष्टांश्चस्पृष्टतः धर्षयंति भ्रांतान् कुर्वंति तं भूतादिगणं उन्मादं प्र
वक्षते तं द्राज्जृंभिका निद्रोन्मादहेतुत्वेन भूतादीनां तनूनां चातुर्विध्यमुक्तं ४२

ऊर्जस्वंतं बलवंतं परोक्षेणादृश्यरूपेण ४३ आत्मनः सर्गो यस्मात्तं यत् येन कायेन संप्रदानत्वनिमित्तेन कवयः कर्मकोविदाः
साध्येभ्यः पितृभ्यश्च स्वपितृरूपेभ्यः वितन्वते श्राद्धादिना हव्यं कव्यं च ददति ४४ तिरोधानेन अदृश्यत्वे सत्यपि भ्रांतर्द्धान व्याख्या
४५ प्रत्यात्म्येन प्रतिबिंबेन आत्माभासं प्रतिबिंबं आत्मनो मानः प्रतिबिंबदर्शिनः सुंदरस्य शिरःकंपादिचेष्टा अत एव तत्स्रष्टा नामि
षः संमानेन नित्यं मिथुनीभावः ४६ तत्प्रतिबिंबरूपं कर्मभिस्तत्पराक्रमानुवर्णनैः ४७ भोग आभोगो विस्तारः पादादिप्रसा

ऊर्जस्वंतं मन्यमान आत्मानं भगवानजः साध्यान् गणान् पितृगणान् परोक्षेणासृजत्प्रभुः ४३ तं वात्मसर्गं तं कायं पितरः
प्रतिपेदिरे साध्येभ्यश्च पितृभ्यश्च कवयो यद्वितन्वते ४४ सिद्धान् विद्याधरांश्चैव तिरोधानेन सोऽसृजत् तेभ्योऽददात्त
मात्मानमंतर्द्धानाख्यमद्भुतं ४५ स किन्नरान् किंपुरुषान् प्रत्यात्म्येनासृजत्प्रभुः मानयन्नात्मनात्मानमात्माभासं विलोक
यन् ४६ ते तु तज्जगृहू रूपं त्यक्तं यत्परमेष्ठिना मिथुनीभूय गायंतस्तमेवोषसि कर्मभिः ४७ देहेन वै भोगवता शयानो
बहुचिंतया सर्गेनुपचिते क्रोधादुत्ससर्ज ह तद्वपुः ४८ ये हीयंतामुतः केशा अहयस्तेंग जज्ञिरे सर्पाः प्रसर्पतः क्रूराः
नागा भोगोरुकंधराः ४९ स आत्मानं मन्यमानः कृतकृत्यमिवात्मभूः तदा मनून् ससर्जांते मनसा लोकभावनान् ५०

रणं तद्वता देहेन अनुपचिते वृद्धिमप्राप्ते तद्भोगक्रोधादियुक्तं ४८ अमुतः अमुष्मात् देहात् ये केशा अहीयंत प्रच्युतास्ते अह
यो जाताः प्रसर्पतः पादाद्याकुंचनैः प्रचलतो मुख्यास्सर्पाः एत एव अगा न भवंतीति नागाः अतिवेगवंत इत्यर्थः भोगवतो जातत्वा
त् भोगेन फणेन उरुर्विस्तीर्णा कंधरा येषां सर्वचित्ते क्रोधयोगात् क्रूरास्तेषां मवांतरजातिभेदः सर्पसिद्धांते प्रसिद्धः ४९
यदा मन्यमानो भूत् तदा मनून् ससर्ज ५०

तेभ्यः स्त्रीयं पुरुषाकारं पुरं देहं अत्यसृजत् दहो तान् मनून् ५१ तेत्वया कृतं सुकृतत्वमाहुः यस्मिन्ननुसर्गे क्रिया अग्निहोत्रादि
धाः अतोस्मिन् सर्वे वयं साकं सह अन्नं हविर्भागादि अदाम भक्षयामहे ब्रह्मन् ५२ कार्यसृष्टिमुक्त्वा ऋषीणां सृष्टिमाह तपसेति
विद्या उपासना योगो भासनादिः सुसमाधि वैराग्यैश्वर्यादियुक्तः समाधिः तेन वयुक्तः हृषीकेशः स्ववशेन्द्रियः सन् ऋषिबृन्दा
ऋषीन् प्रजाः ससर्ज ५३ किं तद्देहं यस्यांशमदादित्यत आह यदिति समाधिश्च योगर्द्धिश्च ऐश्वर्यं तपश्च विद्या च विरक्तिश्च विधं

तेभ्यः सोऽसृजत्स्वीयं पुरं पुरुषमात्मवान् तान्दृष्ट्वा ये पुरा सृष्टाः प्रशशंसुः प्रजापतिं ५१ अहो एतज्जगत्स्रष्टः सु
कृतं बत ते कृतं प्रतिष्ठिताः क्रिया यस्मिन्साकमन्नमदाम हे ५२ तपसा विद्यया युक्तो योगेन सुसमाधिना ऋषीनृ
षीन्हृषीकेशः ससर्जाभिमताः प्रजाः ५३ तेभ्यश्चैकैकशः स्वस्य देहस्यांशमदादजः यत्तत्समाधियोगर्द्धितपोवि
द्याविरक्तिमत् ५४ इति श्रीभागवते महापुराणे तृतीयस्कंधे विंशतितमोऽध्यायः विदुर उवाच स्वायंभुवस्य च
मनोर्वंशः परमसंमतः कथ्यतां भगवन्यत्र मैथुनेनैधिरे प्रजाः १ प्रियव्रतोत्तानपादौ सुतौ स्वायंभुवस्य वै यथाध
र्मं जुगुपतुः सप्तद्वीपवतीं महीं २ तस्य वै दुहिता ब्रह्मन्देवहूतीति विश्रुता पत्नी प्रजापतेरुक्ता कर्दमस्य त्वयानघ ३ ७१
तस्यां स वै महायोगी युक्तायां योगलक्षणैः ससर्ज कतिधा वीर्यं तन्मे शुश्रूषवे वद ४

तेयस्मिन् तत् ५४ तृतीये विंशः एकविंशे तपो विधातोषितेन तु विष्णुना कर्दमस्य मनोः पुत्र्या विवाहश्च भण्यते १
एधिरे वृधां चक्रिरे १ धर्मं मही च यथा जुगुपतुः रक्षतुः तन्मे वदेति तृतीयेनान्वयः ३ योगलक्षणैर्यमादिभिर्युक्तायां क
तिधा वीर्यं ससर्ज कति पुत्रानुत्पादयामासेत्यर्थः ४

त्ता मनोः कन्यां आकूतिं प्रसूतिं च भार्यात्वे लब्ध्वा यथा भूतानि ससर्ज तद्वदेति चकारस्यार्थः ५ सहस्राणां समानां सहस्राणि संवत्सरानित्य
र्थः ६ ततस्तस्मिन् पसिक्रियायोगेन भूत्वा प्रकारेण संप्रपेदे सिषेवे प्रपन्नेभ्यो भक्तेभ्यो वरदातारं ७ शब्दैकवेद्यं यद्ब्रह्म तन्म
यं वपुर्दधत् तं प्रत्यदर्शयामास ८ स कर्दमस्तं खेऽवस्थितं दृष्ट्वा ११ मूर्ध्ना क्षितावपतत् गीर्भिश्चाभ्यगृणादिति चतुर्णाम
न्वयः पद्मोत्पले दिनरात्रिविकासे सितानां च पद्मानामुत्पलानां च स्रग्यस्य तं स्निग्धा नीलाश्च येऽलकास्तेषां व्रातो वक्त्राब्जे य

रुचिर्यो भगवान्ब्रह्मन्दक्षो वा ब्रह्मणः सुतः यथा ससर्ज भूतानि लब्ध्वा भार्यां च मानवीं ५ श्रीमैत्रेय उवाच प्र
जाः सृजेति भगवान् कर्दमो ब्रह्मणोदितः सरस्वत्यां तपस्तेपे सहस्राणां समा दश ६ ततः समाधियुक्तेन क्रि
यायोगेन कर्दमः संप्रपेदे हरिं भक्त्या प्रपन्नवरदाशुषं ७ तावत्प्रसन्नो भगवान्पुष्कराक्षः कृते युगे दर्शयामास
तं क्षत्तः शाब्दं ब्रह्म दधद्वपुः ८ स तं विरजमर्काभं सितपद्मोत्पलस्रजं स्निग्धनीलालकव्रातवक्त्राब्जं विरजोम्बरं
९ किरीटिनं कुंडलिनं शंखचक्रगदाधरं श्वेतोत्पलक्रीडनकं मनःस्पर्शस्मितेक्षणं १० विन्यस्तचरणांभोज
मंसदेशे गरुत्मतः दृष्ट्वा खेऽवस्थितं वक्षःश्रियं कौस्तुभकंधरं ११ जातहर्षोऽपतन्मूर्ध्ना क्षितौ लब्धमनोरथः गी
र्भिस्त्वभ्यगृणात्प्रीतिस्वभावात्मा कृतांजलिः १२

यस्य श्वेतोत्पलं क्रीडनकं यस्य मनःस्पर्शि मनस आनंदजनकं स्मितमीक्षणं च यस्य वक्षसि श्रीर्यस्य कौस्तुभः कंध
रायां यस्य प्रीतिरेव स्वभावः स्वतः सिद्धो धर्मो यस्य स तथाविधः आत्मा मनो यस्य १२

त्वामृतेयरमानंदं धिगन्यवरकामुकं अथाभिरूपणं मातुग्रहाणवरदानतः बतेतिहर्षे हेईअनोस्माकंतिः समग्रसत्वनिधे स्तव दर्शनात् अद्याक्ष्णोः सांसिध्यं साफल्यं जुष्टं सेवितं त्वद्दर्शनमेव महाफलंनिस्केपपाद्यति यस्यतव दर्शनं स द्भिरुत्तरोत्तरमापादितप्रकर्षैर्जन्मभिः रूढो योगो येस्तेपि १३ सकामभक्तान् विगर्हयन्नाह यइतिहेईश येनिरयेपि स्युः तेषांकामानांलवाय येत्वन्मायया नष्टबुद्धयस्त्वखोपासते त्वं तु तेषां तान् कामानपि रासि ददासि १४ यः सकामान्

अयिरुवाच जुष्टं बताद्याखिलसत्वराशेः सांसिध्यमक्ष्णोस्तवदर्शनान्नः यद्दर्शनं जन्मभिरीड्यसद्भि राशासते योगिनो रूढयोगाः १३ येमायया तेहतमेधसस्त्वत्पादारविंदं भवसिंधुपोतं उपासते कामलवाय तेषां रासीश कामान्निरयेपि ये स्युः १४ तथा स चाहं परिवोढुकामः समानशीलां गृहमेधधेनुं उपेयिवान् मूलमशेषमूलं दुराशयः कामदुघांघ्रिपस्य १५ प्रजापतेस्ते वचसाधीश तंत्या लोकः किलायं कामहतो नुबद्धः अहं च लोकानुगतो वहामि बलिं च शुक्लानिमिषाय तुभ्यं १६

निंदामि सोहमपि तादृश एवेत्याह तथेति गृहमेधो गृहाश्रमः तत्र धेनुं त्रिवर्गदोग्ध्रीं भार्यां परिवोढुकामः परिणेतुमिच्छ न् कामदुघांघ्रिपस्य कल्पद्रुमस्य तव मूलमंघ्रिं सेउपेयिवान् उपगतोस्मि न तु कामाद्यर्थं अन्यत्किमप्युपास्यता न य तः अशेषस्य पुरुषार्थस्य मूलमेतदेव १५ ननु तर्हि मुक्त्यर्थमेव किं न भजसि अनधिकारादित्याह हे अधीश यस्त्वं प्रजापतिस्तस्य तव वचसा तंत्या अयं कामहतो लोकः पशुवद्बद्धः हे शुक्ल धर्ममूर्ते अहं च किल लोकानुगतः अतस्तुभ्यं बलिं हरामि कर्ममयीं त्वदाज्ञामनुवर्ते अनिमिषाय कालात्मने तदर्थं भार्यां च कामीति चकारस्यार्थः न केवलं लोका

य

नि निमिषाय ते अनेन कालात्मकात् त्वत्तो भीतः कर्म करोमीत्युक्तं एतत्तु त्वद्भक्तानां नास्तीत्याह द्वाभ्यां लोकान् कामा भिभूतान् तान् अनुसृतान् पशूंश्च विवेकेसत्यपि पुनः कर्मजडान् मादृशान् हित्वा अनादृत्य ये तव चरणरूपमातपत्रं श्रिता ताने वाह त्वद्गुणानां वादः कथा तदेव सीधु संसारविस्मारकत्वात् पीयूषं अविवेकरत्वात् ते न नियापिता विस्तापिता देहधर्माः क्षुत् पिपासादयो येः येषामित्युत्तरेणान्वयः १७ तवं यत् त्रिनाभिकालचक्रं तत् जगदाछिद्य आकृष्य धावदपि एषां त्वद्भ क्तानां आयुराछिद्य धावन्न भवति कथं भूतं अजरं अक्षे तस्मिन् क्षरत्येभ्रमिः भ्रमणं भ्रमादिति वक्तव्ये अतिभ्रमणशील

लोकांश्च लोकानुगतान् पशूंश्च हित्वा श्रितास्ते चरणातपत्रं परस्परं त्वद्गुणवादसीधुपीयूषनिर्यापितदेहधर्माः १७ नते जराक्षभ्रमिरायुरेषां त्रयोदशारं त्रिशतं षष्टिपर्व षण्नेम्यनंतच्छदि यत्त्रिणाभि करालस्रोतो जग दाछिद्य धावत् १८ एकः स्वयं सन् जगतः सिसृक्षया द्वितीययात्मन्नधियोगमायया सृजस्यदः पासि पुनर्ग्रसिष्यसे यथोर्णनाभिर्भगवान् स्वशक्तिभिः १९

तात् उपचारेण भ्रमिरित्यभेदनिर्देशः अधिकमासेन सह त्रयोदश मासा अरा यस्य त्रिशतं षष्टिश्च अहोरात्राः पर्वाणि यस्य द्वादश राशि विभक्ते खलु गार्षः षड् ऋतवो नेमयो यस्य अनंताः क्षणलवादयः छदाः पत्राणि पत्राकाराः धाराः संति यस्य त्रीणि चातुर्मास्यानि नाभयः आधारभूतानि वलयानि यस्य करालस्रोतस्तीव्रवेगं एतैर्विशेषणैः संव त्सरात्मकं चक्रमुक्तमिति द्रष्टव्यं १८ ननु निरुपाधिमुदासीनं मां किं यावत्से तथापि मायया सृष्ट्यादिकर्तृत्वात् त्वमेव या च इत्याह स्वयमेकएव सन्नपि आत्मन्यधिकृतया योगमायया हेतुना याः स्वीकृताः शक्तयः सत्वाद्याः ताभिः अदो विश्वं स्वव्यतिरिक्तसाधनानपेक्षत्वे दृष्टांतः यथेति १९

विश्व

यद्यपि मायिकत्वात् भक्तेभ्यो विषयसुखं दातुं नेच्छसि तथाप्यस्मदभिप्रायानुसारेण तत्संपादयेत्याह नैतदिति हे अधीश ना
स्माकं भजतां भूतसूक्ष्मरूपं पदं शब्दादिविषयसुखं मायया तनुषे विस्तारयसीति यत् एतत्तव यद्यपीप्सितं न भवति तथाप्यस्म
स्मदनुग्रहाय तत्क्षणं भयोपाकरणानंतरमेवापवर्गाय भवत्वित्यर्थः यर्हि यतः मायया परिच्छिन्न इव लसंत्या तुलस्या यु
क्तस्त्वं विलक्षितोसि एवं भूतस्य तव दर्शनं यतो भुक्तिमुक्तिप्रदमित्यर्थः २० तं त्वां भुक्तिमुक्तिप्रदं नमामि भुक्तित्वे हेतुः अ

नैतद्बताधीश पदं तवेप्सितं यन्मायया नस्तनुषे भूतसूक्ष्मं अनुग्रहायास्त्वपि यर्हि मायया लसत्तुलस्या तनुवा
विलक्षितः २० तं त्वानुभूत्योपरतक्रियार्थं स्वमायया वर्तितलोकतंत्रं नमाम्यभीक्ष्णं नमनीयपादसरोजम
ल्पीयसि कामवर्षं २१ मैत्रेय उवाच इत्यव्यलीकं प्रणुतोब्जनाभस्तमाबभाषे वचसामृतेन
सुपर्णपक्षोपरि रोचमानः प्रेमस्मितोद्वीक्षणविभ्रमद्भ्रूः २२ श्रीभगवानुवाच विदित्वा तव चैत्यं मे पु
रैव समयोजि तत् यदर्थमात्मनियमैस्त्वयैवाहं समर्चितः २३ न वै जातु मृषैव स्यात्प्रजाध्यक्ष मदर्हणं भवद्वि
धेष्वतितरां मयि संगृभितात्मनां २४

नुभूत्या ज्ञानेन उपरतः क्रियार्थः कर्मफलभोगो यस्मिन् भोगदत्वे हेतुः स्वमायया आवर्तितं लोकतंत्रं विश्वोपकरणं
येन अतः सकामैर्निःकामैश्च नमनीयं पादसरोजयुगं यस्य तं अल्पीयसि सकामे पुंसि भजने वा कामान् वर्षतीति तथा
तं २१ अमृतेन सुखकरेण प्रेमस्मितान्यामीक्षणेन विभ्रमंती भ्रूर्यस्य २२ चैत्यं हार्दं भावं मे मया समयोजि तं घ
टितं यदर्थमेवाहं समर्चितस्तत् २३ मयि संगृभीताः संगृहीताः एकाग्रीकृता आत्मानश्चित्तं यैस्तेषां यन्मदर्हणं त्वादृशेषु
त

विख्यातं मंगलं अभ्युदयसदाचारादिलक्षणं यस्य २५ हे विप्र महिष्या सह २६ यत्र यस्यां भार्यायां समाहितं अभिसंधानेन स्थि
तं नृपवधूः राजकन्या २८ ते वीर्यं आत्मनि भूतं धृतं या प्रसविष्यति सा भजिष्यति वीर्ये वीर्यप्रसूता एककन्यास्त अंजसा आत्म
नः पुत्रान् आधास्यंति २९ निदेशं आज्ञां उत्प्लुतमः शुद्धसत्वः तीर्थपात्रं तेन दानं लक्ष्यते मयि समर्पितं सर्वकर्मफलं इत्यर्थः ३० गार्ह
स्थ्येदयां कृत्वा सन्यासेनाभयं दत्वा मयि आत्मानं जगद्भिः सह एकीभूतं द्रक्ष्यसि ३१ त्वद्वीर्येण सह देवहूत्यां अवतीर्येति शेषः

प्रजापतिसुतः सम्राड्मनुर्विख्यातमंगलः ब्रह्मावर्तं योधिवसन् शास्ति सप्तार्णवां महीं २५ स चेह विप्र राजर्षि
महिष्या शतरूपया आयास्यति दिदृक्षुस्त्वां परश्वो धर्मकोविदः २६ आत्मजामसितापांगीं वयःशीलगुणान्वितां
मृगयंतीं पतिं दास्यत्यनुरूपाय ते प्रभो २७ समाहितं ते हृदयं यत्रेमान्परिवत्सरान् सा त्वां ब्रह्मन्नृपवधूः काममा
शु भजिष्यति २८ या त आत्मभृतं वीर्यं नवधा प्रसविष्यति वीर्ये त्वदीये ऋषय आधास्यंत्यंजसात्मनः २९ त्वं च स
म्यगनुष्ठाय निदेशं म उशत्तमः मयि तीर्थीकृताशेषक्रियार्थो मां प्रपत्स्यसे ३० कृत्वा दयां च जीवेषु दत्वा चाभयमा
त्मवान् मय्यात्मानं सह जगद्द्रक्ष्यस्यात्मनि चापि मां ३१ सहाहं स्वांशकलया त्वद्वीर्येण महामुने तव क्षेत्रे देवहू
त्यां प्रणेष्ये तत्वसंहितां ३२ श्रीमैत्रेय उवाच एवं तमनुभाष्याथ भगवान्प्रत्यगक्षजः जगाम बिंदुसरसः सरस्व
त्या परिश्रितात् ३३

३२ प्रत्यग्भूते अक्षे भुज्यायते आविर्भवतीति प्रत्यगक्षजः सरस्वत्या नद्या परिश्रितात् परिवेष्टितात् ३३ श्रीकृष्णाय नमः

अत्रोषैस्तपोमंत्रादिसिद्धेश्वरैः अभिष्टुतः सिद्धमार्गो वैकुंठमार्गो यस्य यद्वा अत्रोषसिद्धेश्वराभिष्टुतश्चासौ सिद्धैर्मृग्यत इति सिद्धमार्ग
श्च स यया यो पत्ररथेंद्रो गरुडस्तस्य पक्षैरुदीर्णमभिव्यक्तं सामा कर्णयन् हृदयंगमत्वात् उदीर्णं तरे पक्षा विति श्रुतेः उच्चारितं स्तोमं वस्माधारभू
तानामृचां समुदायं शृण्वन् स्तोम आत्मेति श्रुतेः समासपाठे उच्चारितः स्तोमः स्तोत्रीयः ऋक्समुदायो यस्य साम्न इति ३४ तं कालं
परश्वः कं प्रतीक्षमाणः ३५ शातकौंभाः सौवर्णाः परिकरा यस्मिन् तं रथमास्थाय दुहितरं चारोप्य करान्वेषणार्थं पर्यटन् ३६

निरीक्षतस्तस्य ययावशेषसिद्धेश्वराभिष्टुतसिद्धमार्गः आकर्णयन् पत्ररथेंद्रपक्षैरुच्चारितं स्तोममुदीर्णसाम
३४ अथ संप्रस्थिते शुक्ले कर्दमो भगवानृषिः आस्ते स्म बिंदुसरसि तं कालं प्रतिपालयन् ३५ मनुः स्यंदनमास्थाय
शातकौंभपरिच्छदं आरोप्य स्वां दुहितरं सभार्यः पर्यटन्महीं ३६ तस्मिन्सुधन्वन्नहनि भगवान्यत्समादिश
त् उपायादाश्रमपदं मुनेः शांतव्रतस्य तत् ३७ यस्मिन् भगवतो नेत्रान्न्यपतन्नश्रुबिंदवः कृपया संपरीतस्य प्र
पन्नेर्पितया भृशं ३८ तद्वै बिंदुसरो नाम सरस्वत्या परिप्लुतं पुण्यं शिवामृतजलं महर्षिगणसेवितं ३९ पुण्य
द्रुमलताजालैः कूजत्पुण्यमृगद्विजैः सर्वर्तुफलपुष्पाढ्यं वनराजिश्रियान्वितं ४०

हे सुधन्वन् विदुर यत् अहः ३७ तत्प्रवेशमात्रेण परमानंदप्राप्तिरिति दर्शयितुं आश्रमं वर्णयति यस्मिन्नित्यादिसप्तभिः
श्लोकैः प्रपन्ने कर्दमे ३८ शिवमारोग्यममृतवत्स्वादु जलं यस्मिन् ३९ कूजंतः पुण्याः मृगा द्विजाश्च येषु तैः पु
ण्यद्रुमलताजालैः समृद्धेर्युक्तं ४०

मत्तद्विजगणैर्घुष्टं मत्तभ्रमरविभ्रमं मत्तबर्हिनटाटोपमाह्वयन्मत्तकोकिलं ४१ कदंबचंपकाशोककरंजबकुलासनैः कुंदमंदारकुटजैश्चूतपोतैरलं
कृतं ४२ कारंडवैः प्लवैर्हंसैः कुररैर्जलकुक्कुटैः सारसैश्चक्रवाकैश्च चकोरैर्वल्गु कूजितं ४३ तथैव हरिणक्रोडैः श्वाविद्गवयकुंजरैः गोपुच्छैर्हरि
मत्ता
घुष्टं नादितं मत्तभ्रमराणां विभ्रमो विनोदो यस्मिन् मत्ता बर्हिण एव नटास्तेषामाटोपो नृत्यसंभ्रमो यस्मिन् आह्वयंतो मिथो मत्ताः
कोकिला यस्मिन् ४१ कदंबादिभिर्वृक्षैरलंकृतं ४२ कारंडवादिभिः पक्षिभिर्वल्गु यथा तथा कूजितं ४३ हरिणादिभिर्वृतं तत्र क्रो
डः सूकरः श्वावित् शल्लकः गोपुच्छा गोपुच्छाः हरिर्वानरः सिंहो वा नाभिः कस्तूरीमृगः ४४ कृतो कृताशनो ब्रह्मचारियो
ग्यो येन ४५ उद्योग युक्तयोगो यस्य तेन वपुषा विद्योतमानं ४६ तस्य भगवतो व्याहृतं भाषणमेवामृतकला अमृतमयस्य चंद्रस्य क

प्रविश्य तत्तीर्थवरमादिराजः सहात्मजः ददर्श मुनिमासीनं तस्मिन्हुतहुताशनं ४५ विद्योतमानं वपुषा तपस्यु
ग्रयुजा चिरं नातिक्षामं भगवतः स्निग्धापांगविलोकनात् ४६ तद्व्याहृतामृतकलापीयूषश्रवणेन च प्रांशुं पद्मप
लाशाक्षं जटिलं चीरवाससं ४७ उपसंसृत्य मलिनं यथार्हणमसंस्कृतं अथोटजमुपायातं नृदेवं प्रणतं
पुरः ४८ सपर्यया प्रत्यगृह्णात् प्रतिनंद्यानुरूपया ४८ गृहीतार्हणमासीनं संयतं प्रीणयन्मुनिः स्मरन्भ
गवदादेशं इत्याह श्लक्ष्णया गिरा ४९ नूनं चंक्रमणं देव सतां संरक्षणाय ते वधाय चासतां त्वं हरेः शक्तिर्हि पालिनी
५०
लात्मकं यत्पीयूषं तस्य श्रवणेन च नातिक्षामं तपसा कृशं तथाप्यकृशं प्रांशुमुन्नतं ४७ उपसंसृत्य समीपं गत्वा मलिनं दृष्ट्वेति
पूर्वैव क्रिया अर्हति नेनेत्यर्हणं महारत्नं तत् असंस्कृतं अनिर्णिक्तं यथा मलिनं दृश्यते तद्वत् ४८ उटजं पर्णशालां प्राप्तं पु
रः पादसमीपे प्रणतं आशीर्भिरभिनंद्य समर्च्यपूजया प्रत्यगृह्णात् सत्कृतवान् ४९ ते चंक्रमणं पर्यटनं हि यस्मात् ५०
४८
निर्मक्षैर्नकुलैर्नाभिभिर्वृतं ४४

भा०त०
८३

गो दैदिग्नीइवायूनांयमधर्मप्रचेतसां रूपाणि स्थान आदधेत स्मै शुक्लायतेनमः ५१
मनुस्तं विष्णुं प्रणमति यइति स्थाने तत्कार्यावसरे शुक्लाय विष्णवे ५१ नयदेति यं वा नामयमर्थः यद्यपि धर्मरक्षार्थं सर्वतः पर्यटतः
तवप्रसंगाद्दष्यागमनं संभवति तथापि विशेषकार्यं चेदस्ति तत् कथ्यतामिति जैत्रं जयप्रदं मणिगणा अर्पिता यस्मिन् तं रथ
मारुह्य त्वं यदा भुवो मंडलं न पर्यटसि तदा सेतवो भिद्येरन्निति त्रयाणामन्वयः विस्फूर्जत् शब्दं कुर्वत् चंडं कोदंडं यस्य ५२ स्वसै

न्ययदा रथमास्थाय जैत्रं मणिगणार्पितं विस्फूर्जच्चंडकोदंडो रथेन त्रासयन्नघान् ५२ स्वसैन्यचरणक्षुण्णं वेपय
न्मंडलं भुवः विकर्षन् बृहतीं सेनां पर्यटस्यंशुमानिव ५३ तदैव सेतवः सर्वे वर्णाश्रमनिबंधनाः भगवद्रचिता
राजन् भिद्येरन् बत दस्युभिः ५४ अधर्मश्च समेधेत लोलुपैर्व्यंकुशैर्नृभिः शयाने त्वयि लोकोयं दस्यु
ग्रस्तो विनंक्ष्यति ५५ अथापि पृच्छे त्वां वीर यदर्थं त्वमिहागतः तद्वयं निर्व्यलीकेन प्रतिपद्यामहे हृदा ५६
इति श्रीभागवते महापुराणे तृतीयस्कंधे कापिलेये एकविंशतिमोध्यायः श्रीमैत्रेय उवाच एवमावि ८३
ष्कृताशेषगुणकर्मोदयो मुनिं सव्रीड इव तं सम्राडुपारतमुवाच ह १

न्यस्य चरणैः क्षुण्णं संघट्टितं ५३ वर्णाश्रमाणां निबंधनं यैः बत अहो ५४ निरंकुशैर्नृभिर्निमित्तभूतैः शयाने निर्व्या
ते ५५ निर्व्यलीकेन सहर्षेण प्रतिपद्यामहे स्वीकुर्यामिहे तृतीये एकविंशः द्वाविंशे कर्दमायाद्यथादिष्टं हि विष्णु
ना मनुर्दुहितरं देवहूतिमित्यपवर्ण्यते १ एवमाविःकृतः अशेषाणां गुणानां कर्मणां च उदयः उत्कर्षो यस्य सम्राट् म
नुः सव्रीड इव स्वकीर्तिश्रवणात् प्रत्याख्यानशंकया वा तं मुनिमुवाच उपारतं निवृत्तं निरंतरं १

मदीया कन्या त्वया परिणेयेति विज्ञापयिष्यन् युष्मदस्मत्संबंधस्तावदीश्वरेण पूर्वमेव घटित इत्याह ब्रह्मेति सार्द्धद्वाभ्यां आत्मनः प
परीप्सया पर्याप्तुमिच्छया छंदोमयस्यात्मनः पर्याप्तिः पालनं वेदप्रवर्त्तनं तस्येच्छया युष्मान् ब्राह्मणान् २ तत्त्राणाय ब्राह्मणपालना
य ब्रह्म ब्राह्मणजातिः क्षत्रं क्षत्रजातिः एवं स देवः रक्षति स्म को सोयः सदसदात्मकः सर्वात्मकः तथाप्यव्ययो निर्विकारः तं विज्ञा

मनुरुवाच ब्रह्मासृजत्स्वमुखतो युष्मानात्मपरीप्सया छंदोमयस्तपोविद्यायोगयुक्तानलंपटान् २ तत्त्राणायासृ
जच्चास्मान् दोःसहस्रात्सहस्रपात् हृदयं तस्य हि ब्रह्म क्षत्रमंगं प्रचक्षते ३ अतो ह्यन्योन्यमात्मानं ब्रह्म क्षत्रं च
रक्षतः रक्षति स्माव्ययो देवः स यः सदसदात्मकः ४ तव संदर्शनादेव च्छिन्ना मे सर्वसंशयाः यत्स्वयं भगवान्
प्रीत्या धर्ममाह रिरक्षिषोः ५ दिष्ट्या मे भगवान् दृष्टो दुर्दर्शो योकृतात्मनां दिष्ट्या पादरजः स्पृष्टं शीर्ष्णा मे भवतः
शिवं ६ दिष्ट्या त्वयानुशिष्टोहं कृतश्चानुग्रहो महान् अपावृतैः कर्णरंध्रैर्जुष्टा दिष्ट्योशतीर्गिरः ७ स भवा
न्दुहितृस्नेहपरिक्लिष्टात्मनो मम श्रोतुमर्हसि दीनस्य श्रावितं कृपया मुने ८ प्रियव्रतोत्तानपदोः स्वसेयं
दुहिता मम अन्विच्छति पतिं युक्तं वयःशीलगुणादिभिः ९x

पयितुमेव तद्दर्शनादिकमभिनंदति तवेति त्रिभिः ५ ६ अनुग्रहोनुशासनादिरूप एव उशतीः उशत्यः ७ विज्ञापयति स
भवानिति सप्तभिः दुहितुः स्नेहेन परिक्लिष्ट आत्मा यस्य श्रावितं विज्ञापनं प्रियव्रतोत्तानपदोः स्वसेति पुत्रिकाकर
णशंका निरस्ता ममस्फुतेति क्षत्रकन्या तव योग्येति दर्शितं ९ यदा तु भवतः शीलश्रुतरूपवयोगुणान्॥ अशृणोन्नार x
x रदादेषा त्वय्यासीत्कृतनिश्चया॥१०॥x

भा० त०
८४

प्रतीच्छ स्वीकुरु ११ उद्यतस्य स्वतः प्राप्तस्य विषयस्य प्रतिवादः प्रत्याख्यानं १२ कीनाशं कृपणं अवज्ञयापशयमानेन
१३ यस्य सा वधिब्रह्मचर्यं सि उपकुर्वाणः प्रत्तां मया दत्तां १४ अप्रतार्येति मयैव कृतनिश्चयात् कस्मैचित् प्रति श्रुतानत्त्वती
त्यर्थः आद्यः प्रथमः ततः पूर्वं विवाहात् नाना तमुख्य इति वा १५ भूयात् भवेत् प्रतीतः ग्रंथामिते सोऽभगत्वाय हस्ते मया पत्त्ये क्षादि

तत्प्रतीच्छ गुणाढ्ये मां श्रद्धयोपहृतां मया सर्वात्मनानुरूपां ते गृहमेधेषु कर्मसु ११ उद्यतस्य हि कामस्य प्रतिवादो
न शस्यते अपि निर्मुक्तसंगस्य कामरक्तस्य किं पुनः १२ य उद्यतमनादृत्य कीनाशमभियाचते क्षीयते तद्यशः
स्फीतं मानश्चावज्ञया हतः १३ अहं त्वाश्रृणवं विद्वन् विवाहार्थं समुद्यतं अतस्त्वमुपकुर्वाणः प्रत्तां प्रतिगृहाण
मे १४ ऋषिरुवाच बाढमुद्वोढुकामोहमप्रत्ता च तवात्मजा आवयोरनुरूपोसावाद्यो वैवाहिको विधिः
१५ कामः स भूयान्नरदेव तेस्याः पुत्र्याः समाम्नायविधौ प्रतीतः क एव ते तनयां नाद्रियेत स्वयैव कांत्या क्षिपतीमि
व श्रियं १६ यां हर्म्यपृष्ठे क्वणदंघ्रिशोभां विक्रीडतीं कंदुकविह्वलाक्षीं विश्वावसुर्न्यपतत्स्वाद्विमानाद्विलो
क्य संमोहविमूढचेताः १७ तां प्रार्थयंतीं ललनाललामममसेवितश्रीचरणैरदृष्टां वत्सां मनोरुच्चपदः स्व
सारं को नाभिमन्येत बुधोभियातां १८

मंत्रः प्रसिद्धः स्वयांगकांत्यैव श्रियं भूषणादिशोभां १६ यां विलोक्य न्यपतत् संमोहेन विमूढं व्याकुलं चेतो यस्य क्वण
द्भ्यां अंघ्रिभ्यां शोभा यस्या १६ ललनानां ललामं भूषणं भूतं असेवितो श्रियश्चरणौ यैस्तैरदृष्टां द्रष्टुमप्ययोग्यां
उच्चपदः उत्तानपादस्य अभियातां स्वयं प्राप्तां १७

यावदात्मनो मम वते जो गर्भे बिभृयात्
भजिष्ये स्वीकरिष्ये यावदपत्योत्पत्तिस्तावद्गार्हस्थ्यं ततः परं संन्यास इति भाषाबंधः समयः तमेवाह यावदात्मनो मम ऋतेऽन्य भुक्ते न विष्णुना साक्षात् प्रकर्षेणोक्तान्
यद्दा मम आत्मनो देहात्तेजो वीर्यं बिभृयादिति अतः परं पारमहंस्यं ज्ञानं तस्मिन् मुख्यान् भुक्ते न विष्णुना साक्षात् प्रकर्षेणोक्तान् भ
विहिंस्रान् हिंसारहितान् शमादीन् बहु यथा भवति एवमनुष्ठेयान् मन्ये १९ ननु तव पितुः प्रजापतेरौ सृष्टावेव न संन्यासे तत्राह य

अतो भजिष्ये समयेन साध्वीं यावत्तेजो बिभृयादात्मनो मे अतो धर्मान् पारमहंस्यमुख्यान् शुक्लप्रोक्तान् ब
हु मन्ये विहिंस्रान् १९ यतो भवद्विश्वमिदं विचित्रं संस्थास्यते यत्र च वावतिष्ठते प्रजापतीनां पतिरेष मह्
यं परं प्रमाणं भगवाननंतः २० श्रीमैत्रेय उवाच स उग्रधन्वन्नियदेवाबभाषे आसीच्च तूष्णीमरविं
दनाभं धियोपगृह्णन् स्मितशोभितेन मुखेन चेतो लुलुभे देवहूत्याः २१ सोनुज्ञात्वा व्यवसितं महिष्या दु
हितुः स्फुटं तस्मै गुणगणाढ्याय ददौ तुल्यां प्रहर्षितः २२ शतरूपा महाराज्ञी पारिबर्हान्महाधनान् दंपत्योः
पर्यदात्प्रीत्या भूषावासः परिच्छदान् २३ प्रत्तां दुहितरं सम्राट् सदृक्षाय गतव्यथः उपगुह्य च बाहुभ्या
मौत्कंठ्योन्मथिताशयः २४

तद्धि संस्थास्यते लयं यास्यति नावतिष्ठते एवार्थे ऋणत्रयापाकरणानंतरं संन्यास एव मामदृशानां भगवतोक्त इत्यर्थः
२० हे उग्रधन्वन् लुलुभे मुनेर्मुखेन प्रलोभ्य तस्मिन् यद्वा मुखे प्रलोभितवान् २१ स मनुः अनु अनंतरं महिष्याश्च व्य
वसितं निश्चयं ज्ञात्वा २२ पारिबर्हान् विवाहकाले प्रदेयान् भूषणानि च वासांसि च परिच्छदान् गृहोपकरणानि
च २३ प्रत्तां प्रदत्तां सदृक्षाय सदृशाय गता निवृत्ता व्यथा यस्य औत्कंठ्येनोन्मथितः क्षुभित आशयो यस्य २४

भा

तस्याविरहंसोढुंहेअंबहेवत्सेतिब्रुवन्संधिरार्द्रः शिखाः केशानासिंचन् २५ ऋषिकुलहितायाउभयोः स्वरोधसोः शोभननत
टयोः २६ अभिप्रेत्यज्ञात्वाब्रह्मावर्तात्देशात्प्रजाः प्रजापतिंप्रत्युज्जग्मुः २७ कोसौब्रह्मावर्तइत्यपेक्षायामाह यत्रबर्हि
ष्मतीनामपुरीतिसापिकुत्रयत्रयज्ञवराहस्यरोमाणिन्यपतन् यत्रेतिसर्वत्रसंबध्यते २८ बर्हिष्मतीनामनिरुक्तिंब्रुवन्प्रसं

अशक्नुवंस्तद्विरहंमुंचन्बाष्पकलांमुहुः आसिंचदंबवत्सेतिनेत्रोदैर्दुहितुःशिखाः २५ आमंत्र्यतंमुनिवरमनु
ज्ञातःसहानुगः प्रतस्थेरथमारुह्यसभार्यःस्वपुरंनृपः २६ उभयोरृषिकुल्यायाःसरस्वत्याःसुरोधसोः ऋ
षीणामुपशांतानांपश्यन्नाश्रमसंपदः २७ तमायातमभिप्रेत्यब्रह्मावर्तात्प्रजाःपतिं गीतसंस्तुतिवादित्रैः
प्रत्युदीयुःप्रहर्षिताः २८ बर्हिष्मतीनामपुरीसर्वसंपत्समन्विता न्यपतन्यत्ररोमाणियज्ञस्यांगंविधुन्वतः २९
कुशाःकाशास्तएवासन्शश्वद्धरितवर्चसः ऋषयोयैःपराभाव्ययज्ञघ्नान्यज्ञमीजिरे ३० कुशकाशमयंबर्हि
रास्तीर्यभगवान्मनुः अयजद्यज्ञपुरुषंलब्धास्थानंयतोभुवं ३१ बर्हिष्मतीनामविभुर्यांनिर्विश्यसमावसत् ८५
तस्यांप्रविष्टोभवनंतापत्रयविनाशनं ३२

गादृशस्यश्रेष्ठमाह द्वाभ्यांकुशाःकाशाश्चासन् शश्वन्नित्यंहरितंवर्चोवर्णोयेषां यज्ञघ्नान्राक्षसादीन्पराभाव्यनीत्वा
२९ यज्ञंविष्णुं यत इति यत्रअयजत् भुवंस्थानंलब्ध्वेतिल्यपूप्रत्यययांतंलब्धवान्सन्नित्यर्थः यतोलब्धवान् तंयज्ञपु
रुषमितिवा स्वर्गादपिभूमिःश्रेष्ठातत्रापितत्स्थानंश्रेष्ठमित्यर्थःक्तंभवति ३१ प्रकृतमाह यांबर्हिष्मतींनामपुरींसमा
वसत् पूर्वंयस्यामुषितस्तस्यांनिर्विश्यभवनंप्रविष्टःसन्भोगान्बुभुजइत्यन्वयः ३२

श्रीः
अन्येषांधर्मादीनामविरोधेन ३३ प्रत्यूषेषु उषःसु संगीयमानासत्कीर्तिर्यस्यतथापिस्वयंहरेरेवकथांशृण्वन् भोगान्बुभु
जे उक्तंच गृहेष्वाविशतांपुंसांविषयाणिषसेवतां महात्मयातयामानांनबंधायगृहामताः ३४ योगमायास्तु ऐहिकभोगस्थाना
स्तु यद्यतःआत्मनःशयितुंईषदपिभंशयितुंअभिभवितुं ३५ औयातोयामोयस्यपक्वान्नस्यतद्गतसारंभवति अतोन्यदपिगत
सारंयातयाममुच्यते अयातयामाअगतसाराआसन् स्वांतरंतदीयंमन्वंतरंनयंतियेयामाःकालावयवाःकुर्वतःस्ववाक्ये

सभार्यःसप्रजःकामान्बुभुजेन्याविरोधतः संगीयमानसत्कीर्तिःसस्त्रीभिःसुरगायकैः ३३ प्रत्यूषेष्वनुबद्धेनहृ
दाशृण्वन्हरेःकथां निष्णातंयोगमायासुमुनिंस्वायंभुवंमनुं यदाभ्रंशयितुंभोगानशेकुर्भगवत्परं ३४ अयातया
मास्तस्यासन्यामाःस्वांतरयापनाः शृण्वतोध्यायतोविष्णोःकुर्वतोब्रुवतःकथां ३५ सएवंस्वांतरंनिन्येयुगाना
मेकसप्ततिं वासुदेवप्रसंगेनपरिभूतगतित्रयः ३६ शारीरामानसादिव्यावैयासेयेचमानुषाः भौतिकाश्च
कथंक्लेशाबाधंतेहरिसंश्रयं ३७ यःपृष्टोमुनिभिःप्राह धर्मान्नानाविधान्शुभान् नृणांवर्णाश्रमाणांचसर्वभू
तहितःसदा ३८ एतत्तआदिराजस्यमनोश्चरितमद्भुतं वर्णितंवर्णनीयस्यतदपत्योदयंशृणु ३९ इतिश्रीभागव
तेमहापुराणेतृतीयस्कंधेद्वाविंशोऽध्यायः

रूपनिबध्नतः ३६ परिभूतंगतित्रयंजाग्रदादिसात्विकादिवायेन दिव्याआंतरिक्षाःमानुषाःशत्रुप्रभवाःभौतिकाःशी
तोष्णादिप्रभवाःवैयासेविदुर तस्यज्ञानातिशयमाह यइतिनृणांसाधारणधर्मान् तस्ययदपत्यंदेवहूतिःतस्योदयंप्रभा
वं ३९ तृतीयेद्वाविंशः

त्रयोविंशेतयोयोगनिर्मितसर्वसंपदि विमानेकामगेविहृतयोरतिरुदीर्यते १ प्रस्थितेगमनेकृतेसति १ २ दंभंकपटंअ
घंनिषिद्धाचरणंतेजीयांसंअतितेजस्विनं ३ दैवाद्गरीयसःदैवादपिगुरुतरात्दैवमप्यन्यथाकर्तुंसमर्थादित्यर्थः ४ व्रतचर्ययाक
र्शितांतन्नाधिन्नसाकालेनअतिक्षामामित्यर्थः ५ सुहृत्प्रियःमदर्थेक्षपयितुंनावेक्षितोनगणितःसमुचितःश्लाघ्योपिमत्से
वासक्त्याउपेक्षितइत्यर्थः ६ तपश्चसमाधिश्चविद्याचउपासनातासुयत्रात्मयोगःचित्तैकाग्र्यंतेनविजिताःप्राप्ताभगवत्प्र

श्रीमैत्रेयउवाच पितृभ्यांप्रस्थितेसाध्वीपतिमिंगितकोविदा नित्यंपर्यचरत्प्रीत्याभवानीवभवंप्रभुं १ विश्रंभे
णात्मशौचेनगौरवेणदमेनच शुश्रूषयासौहृदेनवाचामधुरयाचभो २ विसृज्यकामंदंभंचद्वेषंलोभमघंम
दं अप्रमत्तोद्यतानित्यंतेजीयांसमतोषयत् ३ सवैदेवर्षिवर्यस्तांमानवींसमनुव्रतां दैवाद्गरीयसःप
त्युराशासानांमहाशिषः ४ कालेनभूयसाक्षामांकर्शितांव्रतचर्यया प्रेमगद्गदयावाचापीडितःकृप
याब्रवीत् ५ तुष्टोहमद्यतवमानविमानदायाःशुश्रूषयापरमयापरयाचभक्त्या योदेहिनामयमतीवसुहृ
त्सदेहोनावेक्षितःसमुचितःक्षपयितुंमदर्थे ६ येमेस्वधर्मनिरतस्यतपःसमाधिविद्यात्मयोगविजिताभगव
त्प्रसादाः तानेवतेमदनुसेवनयावरुद्धान् दृष्टिंप्रपश्यवितराम्यभयानशोकान् ७ अन्येपुनर्भगवतोभ्रुव
उद्विजृंभविभ्रंशितार्थरचनाःकिमुरुक्रमस्य सिद्धासिभुंक्ष्वविभवान्निजधर्मदोहान्दिव्यान्नरैर्दुरधिगमान्नृ पविक्रियाभिः ८

सादाःदिव्याभोगाः तानेवतेअवरुद्धान्त्वयावशीकृतान्पश्यतेदिव्यांदृष्टिंवितरामिययाद्र
क्ष्यसि ७ अन्येपुनर्भोगाः किंनोकिमपिअतितुच्छाइत्यर्थः तत्रहेतुःभगवतउरुक्रमस्यभ्रुवःतस्याउद्विजृंभ
वक्रीभावःतेनविभ्रंशिताअर्थरचनामनोरथायेषुनिजधर्मेणपातिव्रत्येनदुह्यंतइतितथातान्दुरधिगमान्दुःप्राप

८६

अखिलायोगमायायाश्चविद्यायाश्चतत्तदुपासनायास्तासुविचक्षणंनिपुणं एवंब्रुवाणंपतिमवेक्ष्यगताधिःनिश्चिन्ताजाताःसं
प्रश्रयोविनयःप्रणयःप्रेमताभ्यांविह्वलागद्गदायातयागिराईषत्व्रीडासहितोयोवलोकस्तेनविलसद्धसितमाननंय
स्याःसाआह ९ बतेतिहर्षेद्विजवृषद्विजश्रेष्ठहेभर्तःत्वयिएतत्सर्वंराद्धंसिद्धमेवतदहमवैमिजानामि किंतुयस्तेत्व

एवंब्रुवाणमबलाखिलयोगमायाविद्याविचक्षणमवेक्ष्यगताधिरासीत् संप्रश्रयप्रणयविह्वलयागि
रेषद्व्रीडावलोकविलसद्धसिताननाह ९ अन्येपुनर्भगवतोभ्रुवउद्विजृंभविभ्रंशितार्थरचनाः
देवहूतिरुवाच राद्धंबतद्विजवृषैतदमोघयोगमायाधिपेत्वयिविभोतदवैमिभर्तः यस्तेभ्यधायिसमयःस
कृदंगसंगोभूयाद्गरीयसिगुणःप्रसवःसतीनां १० तत्रेतिकृत्यमुपशिक्षयथोपदेशंयेनैषमेकर्शितोतिरिरंस
यात्मा सिद्ध्येततेकृतमनोभवधर्षितायादीनस्तदीशभवनंसदृशंविचक्ष्व ११

यासमयोभिहितःसतावद्भूयात्सकृदितिगर्भमात्रपर्यंतइत्यर्थः यस्माद्गरीसिश्रेष्ठेभर्तरिहेतुभूतेस्त्रीणांप्रसवोगुणायमह
त्त्वायभवतः समासपाठेगरीयसिपत्यौसतिसतीनांयतोगुणप्रसवःगुणविस्तारोभवति अतःपुत्रोत्पत्त्यामममगुणविस्तारेजाते
पश्चात्त्वदुक्तंसर्वंभवत्वितिभावः १० अंगसंगार्थंचप्रथममितिकर्तव्यतांसंपादयेत्याह हेईश तत्रअंगसंगेइतिकृत्यंसाधनं
यथोपदेशंकामशास्त्रानुसारेणउपशिक्षसंजानीहिउपकल्पयेत्यर्थः येनसाधनेनाभ्यंगभोजनयानादिनाअतीवरंतुमिच्छ
याकर्शितोदीनश्चममैषआत्मादेहःसिद्ध्येतरतिसमर्थोभवेत्कथंभूतायाःतेत्वयैवकृतःक्षोभितोयोमनोभवस्तेनधर्षितायाः
ततस्तनोनुरूपंभवनंविचक्ष्वआलोचयविचारयेतियावत् ११

भा०तृ० ८७ तर्हितत्क्षणमेव आविरचीकरत् आविर्भावयांबभूव १२ तदेव विशिनष्टि सर्वकामदुघमिति नवभिः सर्वैश्च रत्नादिभिः समन्वि
तं सर्वर्द्धीनां सर्वसंपदां उपचयस्तस्य उदर्कः उत्तरोत्तराभिवृद्धिर्यस्मिन् उपस्कृतं शोभितं १३ उपस्करणं परिकरः पट्टिका अल्पविस्तार
पट्टवस्त्रविशेषाः पताका विस्तृतास्ताभिः १४ विचित्राणि माल्यानि पुष्पाणि यासु मंजु यथा तथा क्वणंतः षडंघ्रयो यासु
ताभिः स्रग्भिः १५ उपर्युपरि विरचितगृहेषु कशिपुभिः शय्याभिः कांतं कमनीयं पर्यंकादिभिश्च कांतं १६ द्वाःस्थ द्वारेषु

श्रीमैत्रेय उवाच प्रियायाः प्रियमन्विच्छन्कर्दमो योगमास्थितः विमानं कामगं क्षत्तस्तर्ह्येवाविरचीकरत् १२ स
र्वकामदुघं दिव्यं सर्वरत्नसमन्वितं सर्वर्द्ध्युपचयोदर्कं मणिस्तंभैरुपस्कृतं १३ दिव्योपस्करणोपेतं सर्वकालसु
खावहं पट्टिकाभिः पताकाभिर्विचित्राभिरलंकृतं १४ स्रग्भिर्विचित्रमाल्याभिर्मंजुसिंजत्षडंघ्रिभिः दुकूल
क्षौमकौशेयैर्नानावस्त्रैर्विराजितं १५ उपर्युपरि विन्यस्तनिलयेषु पृथक्पृथक् क्षिप्तैः कशिपुभिः कांतं पर्यंक
व्यजनासनैः १६ तत्र तत्र विनिक्षिप्तनानाशिल्पोपशोभितं महामरकतस्थल्या जुष्टं विद्रुमवेदिभिः १७ द्वाःसु
विद्रुमदेहल्या भातं वज्रकपाटवत् शिखरेष्विंद्रनीलेषु हेमकुंभैरधिश्रितं १८ चक्षुष्मत्पद्मरागाग्र्यैर्वज्र ८७

विद्रुमनिर्मिता देहली उदुंबरः तया भातं शोभितं वज्रखचितकपाटयुक्तं इंद्रनीलमयेषु शिखरेषु प्रासादाग्रभागेषु १८
चक्षुष्मंत इव ये पद्मरागाग्र्यास्तैः यद्वा चक्षुष्मद्भिहितकैः पद्मरागाग्र्यैर्विचित्रैर्वैतानैर्वितानसमूहैः १९

भित्तिषु निर्मितैः जुष्टं विचित्रवैतानैः सहारैर्हेमतोरणैः १९

धिरुह्य

कृत्रिमानपि हंसादीन् स्वान् स्वजातीयान् मन्यमानैस्तत्र तत्राधिरुह्याधिरुह्य विकूजितं २० विहारस्थानं क्रीडाप्रदेशः विश्रामः
शयनगृहं संवेशः उपभोगस्थानं प्रांगणं गृहाद्बहिः अजिरं प्राकाराद्बहिः यथोपजोषं यथासुखं आत्मनः स्वस्य मायाया वि
नोपि विस्मयजनकमिव २१ नातिप्रीतेन मलिनदेहत्वात्परिचारकाभावाच्च २२ अस्मिन् ह्रदे बिंदुसरसि आरुह अधि
रोह शुक्लेन विष्णुना कृतं आनंदबिंदुनिपातनेन यापकं नाशकं २३ समादाय आहृत्य सरजं मलिनं २४ शबलौ विवर्णौ

हंसपारावतव्रातैस्तत्र तत्र विकूजितं कृत्रिमान्मन्यमानैः स्वानधिरुह्याधिरुह्य च २० विहारस्थानविश्रामसंवे
शप्रांगणाजिरैः यथोपजोषं रचितैर्विस्मापनमिवात्मनः २१ ईदृक्गृहं तत्पश्यंतीं नातिप्रीतेन चेतसा सर्व
भूताशयाभिज्ञः प्रावोचत्कर्दमः स्वयं २२ निमज्ज्यास्मिन्ह्रदे भीरु विमानमिदमारुह इदं शुक्लकृतं तीर्थ
माशिषां यापकं नृणां २३ सा तद्भर्तुः समादाय वचः कुवलयेक्षणा सरजं बिभ्रती वासो वेणीभूतांश्च मूर्द्धजा
न् २४ अंगं च मलपंकेन संछन्नं शबलस्तनं आविवेश सरस्वत्याः सरः शिवजलाशयं २५ सांतःसरसि
वेश्मस्थाः शतानि दश कन्यकाः सर्वाः किशोरवयसो ददर्शोत्पलगंधयः २६

स्तनौ यस्मिन् तत् सरस्वत्याः शिवानि जलानि आशेरते यस्मिन् शिवा जलाशया जलचरा यस्मिन्निति वा २५ सा
तत्र निमग्ना सती विस्मयं ददर्शेतिमाह सांतःसरसीत्यादि द्वाभ्यां २६ ओं नमो भगवते वासुदेवाय॰

उत्पन्नगंधयः स्त्रियः प्रोचुः तव कर्मकरीः परिचारिका वयं अस्मानाज्ञापयेति २७ ततश्च स्नानेन स्नानयोग्यतैलादिना २८
पराद्ध्यानि उत्कृष्टानि वरीयांसि तत्क्रियाणि दीप्तिमंति च पानं पेयं अमृतं स्वादु आसवं मादकं २९ आदर्शे स्वमात्मानं ददर्श
विशेषः आत्मानं विशिनष्टि चतुर्भिः कृतं स्वस्त्ययनं मंगलं यस्य पुंस्त्वमात्मशब्दसामानाधिकरण्यात् ३० विरजनित्यस्य
प्रपंचः स्नातं उद्वर्त्य क्षालितं कृतं शिरःस्नानमभ्यंगो येन भूषितत्वमेवाह निष्कं पदकं ग्रीवायां यस्य ३१ बद्धूनि रत्नानि

तां दृष्ट्वा सहसोत्थाय प्रोचुः प्रांजलयः स्त्रियः वयं कर्मकरीस्त्वं शाधि नः करवाम किं २७ स्नानेन तां महार्हेण
स्नापयित्वा मनस्विनीं दुकूलैर्निर्मलैर्नूत्नैर्ददुरस्यै च मानदाः २८ भूषणानि पराद्ध्यानि वरीयांसि द्युमंति
च अन्नं सर्वगुणोपेतं पानं चैवामृतासवं २९ अथादर्शे स्वमात्मानं स्रग्विणं विरजोंबरं विरजं कृतस्व
स्त्ययनं कन्याभिर्बहु मानितं ३० स्नातं कृतशिरःस्नानं सर्वाभरणभूषितं निष्कग्रीवं वलयिनं कूजत्कांचन ८८
नूपुरं ३१ श्रोण्योरध्यस्तया कांच्या कांचन्या बहुरत्नया हारेण च महार्हेण रुचकेन च भूषितं ३२ सुदता सु
भ्रुवा श्लक्ष्णस्निग्धापांगेन चक्षुषा पद्मकोशस्पृधा नीलैरलकैश्च लसन्मुखं ३३

यस्यां तया रुचकेन मंगलद्रव्येण कुंकुमादिना तदुक्तं विश्वप्रकाशे रुचकं मंगलद्रव्ये ग्रीवाभरणहंतयोरिति ३२ सु
दता सुभ्रुवा चक्षुषेति जातावेकवचनानि एतैर्लसत् शोभमानं मुखं यस्य कथंभूतेन चक्षुषा श्लक्ष्णो मनोहरः स्नि
ग्धोपांगो नेत्रप्रांतो यस्य पद्मकोशेन स्पर्द्धत इति पद्मकोशस्पृत् तेन ३३ श्रीं नमो भगवते वासुदेवाय०

तं चेद्दृष्ट्वा यदा चपतिं संस्मार तदा यत्रासौ तत्रैव स्वयमप्यास्ते ३४ आत्मानं निशाम्य दृष्ट्वा तांश्च तस्य योगगतिं प्रभा
वं दृष्ट्वा संशयं किमिदमिति विस्मयं ३५ स मुनिः विवाहात् प्राक् यदात्मनो रूपं तदेव पुनर्बिभ्रतीं संवीतो आवृतो रुचि
रो स्तनौ यस्याः पात्रांतरे तु रूपविशेषणं ३६ शोभनेवाससी यस्याः जातो भावः प्रेम यस्य हे अमित्रहन् जितका
म ३७ तस्मिन्विमाने मुनिर्बभ्राजे न लुप्तो महिमा स्वातंत्र्यं यस्य उपचीर्णं शुश्रूषितं वपुर्यस्य विकासितकुमुद

भर्त्तुः स्मारन्सप्तमृषीणां दयितं पतिं तत्रचास्ते सहस्त्रीभिर्यत्रास्ते स प्रजापतिः ३४ भर्त्तुः पुरस्तादा
त्मानं स्त्रीसहस्त्रवृतं तदा निशाम्य तद्योगगतिं संशयं प्रत्यपद्यत ३५ स तां कृतमलस्नानां विभ्राजं
तीमपूर्ववत् आत्मनो बिभ्रतीं रूपं संवीतरुचिरस्तनीं ३६ विद्याधरीसहस्रेण सेव्यमानां सुवास
सं जातभावो विमानं तदारोहयदमित्रहन् ३७ तस्मिन्नलुप्तमहिमा प्रियया नुरक्तो विद्याधरीभिरु
पचीर्णवपुर्विमाने बभ्राज उत्कचकुमुद्गणवानपीच्यस्ताराभिरावृत इवोडुपतिर्नभस्थः ३८

गणवान् अपीच्यो अतिसुंदरः पूर्णचंद्र इव मुनिः नभ इव विमानं तारा इव ताः स्त्रियः कुमुदानीव तासां नेत्राणीति ज्ञेयं
३८

तेन विमानेन अष्टलोकपालानां विहारो यस्मिन् कुलाचलेंद्रे मेरौ तस्य द्रोणीषु दरीषु अनंगस्य सखा यो मारुतः शीत
सुगंधमंदानिलः तेन सौभगं सौभाग्यं सौंदर्यं यासु सिद्धैर्नुतः सन् द्युधुनिर्गंगा तस्याः पातेन शिवः स्वनो या
सु तासु रेमे ललनावरूथी स्त्रीरत्नसमूहवान् ३९ वैश्रंभकादिषु देवोद्यानेषु मानसे चैत्ररथ्ये सरसि रतः प्रीतः सन्
४०

तेनाष्टलोकपविहारकुलाचलेंद्रद्रोणीष्वनंगसखमारुतसौभगासु सिद्धैर्नुतो द्युधुनिपातशिवस्व
नासु रेमे चिरंधनदवल्ललनावरूथी ३९ वैश्रंभके सुरसने नंदने पुष्पभद्रके मानसे चैत्ररथ्ये च स रे
मे रामया रतः ४० भ्राजिष्णुना कामगेन विमानेन महीयसा वैमानिकानत्यशेत चरन् लोकान्यथा
निलः ४१ किं दुरापादनं तेषां पुंसामुद्दामचेतसां यैराश्रितस्तीर्थपदश्चरणो व्यसनात्ययः ४२
प्रेक्षयित्वा भुवो गोलं पत्न्यै यावान्स्वसंस्थया बह्वाश्चर्यं महायोगी स्वाश्रमाय न्यवर्तत ४३ वि
भज्य नवधात्मानं मानवीं सुरतोत्सुकां रामां निरमयन् रेमे वर्षपूगान्मुहूर्तवत् ४४

अत्यशेत अतिक्रम्य स्थितः ४१ उद्दामचेतसां धीराणां व्यसनं संसारः तस्यात्ययो यस्मात् ४२ प्रेक्षयि
त्वा दर्शयित्वा गोलं मंडलं स्वसंस्थया द्वीपवर्षादिरचनया यावान् तावंतं बह्वन्याश्चर्याणि यस्मिंस्तं ४३
विभज्य नवधा नवधा भेदेनात्मानं कृत्वा ४४ ४५
तस्मिन् विमान उत्कृष्टां शय्यां रतिकरीं श्रिता ॥ न चाबुध्यत तं कालं पत्यापीच्येन संगता ॥४५॥

शरदः संवत्सराः मनाक् ईषदिव व्यतीयुः ४६ आत्मना स्वदेहार्धरूपेण अतिप्रीत्या भावयन् तथा सति सदपत्यं भवेदिति नो
धा वे नवधा सर्वसंकल्पविदिति तस्या बह्वपत्यसंकल्पं जानन्नित्यर्थः विभुस्तथा कर्तुं समर्थश्च आत्मविदिति च तस्यामनास
क्तत्वात् स्त्रियो जाता इति भावः पुमान् पुंसोधिके शुक्रे स्त्री भवत्यधिके स्त्रिया इति स्मृतेः ४७ अतः अनंतरमेव सद्यः

एवं योगानुभावेन दंपत्यो रममाणयोः शतं व्यतीयुः शरदः कामलालसयोर्मनाक् ४६ (आत्मना स्वदेहार्द्धरूपेण)
तस्यामाधत्त रेतस्तां भावयन्नात्मनात्मवित् नोधा विधाय रूपं स्वं सर्वसंकल्पविद्विभुः ४७ अतः सा सुषुवे
सद्यो देवहूतिः स्त्रियः प्रजाः सर्वास्ताश्चारुसर्वांग्यो लोहितोत्पलगंधयः ४८ पतिं सा प्रव्रजिष्यंतं तदालक्ष्यो
शती सती स्मयमाना विक्लवेन हृदयेन विदूयता ४९ लिखंत्यधोमुखी भूमिं पदा नखमणिश्रिया उवा
च ललितां वाचं निरुध्याश्रुकलां शनैः ५० सर्वं तद्भगवान्मह्यमुपोवाह प्रतिश्रुतं अथापि मे प्रपन्नाया अ
भयं दातुमर्हसि ५१

एकस्मिन्नेवाहनि चारूणि सर्वाण्यंगानि यासां ४८ प्रव्रजिष्यंतं आलक्ष्य वितर्क्य स्मयमाना बहिः अंतस्तु वि
क्लवेन व्याकुलेन विदूयता संतप्यमानेन हृदयेन उवाचेत्युत्तरेणान्वयः ४९ नखा एव मणयस्तैः श्रीः शोभा यस्य
तेन पदा भुवं लिखंती तिष्ठंती चिंतालक्षणं ५० उपोवाह संपादितवान् अभयमिति भाविनो दैन्यात् संसाराच्च यद्भयं
तन्निवर्तयेत्यर्थः ५१

तत्र दैन्यं निवेदयति तुभ्यं तव दुहितृभिः स्वयमेवात्मनः समा योग्याः पतयो विमृग्या इति दैन्यं प्राप्तं संसारत्रयमुररीकृत्याह कश्चि
दिति विशोकाय ज्ञानोपदेशाय स्त्रीभिः ऋणानपाकरणात् कंचित्कालं त्वं हन्त स्थानेन ब्रह्मवित् पुत्रः कश्चित् किं स्यादित्यर्थः ५२ वि
षयान् तुह्यत्व किं ब्रह्मविषयेति तत्राह एतावता अलं पर्यंतं परित्यक्तः पर आत्मा यया तस्या मम ५३ केवलं तमनुशोचत्याह इं
द्रियार्थेष्विति चतुर्भिः मे मया परं भावं त्वं ब्रह्मविदिति ५४ प्रसंगः कथमभावायास्तत्राह संगइति अधिया अज्ञानेन
५५

ब्रह्मन्दुहितृभिस्तुभ्यं विमृग्याः पतयः समाः कश्चित्स्यान्मे विशोकाय त्वयि प्रव्रजिते वनं ५२ एतावतालं कालेन
व्यतिक्रांतेन मे प्रभो इंद्रियार्थप्रसंगेन परित्यक्तपरात्मनः ५३ इंद्रियार्थेषु सज्जंत्या प्रसंगस्त्वयि मे कृतः अ
जानंत्या परं भावं तथाप्यस्त्वभयाय मे ५४ संगो यः संसृतेर्हेतुरसत्सु विहितो धिया स एव साधु
पुरुषोभिः संगत्यायाकल्पते ५५ नेह यत्कर्म धर्माय न विरागाय कल्पते न तीर्थपदसेवायै जीवन्नपि मृतो ९०
हि सः ५६ साहं भगवतो नूनं वंचिता मायया दृढं यत्त्वां विमुक्तिदं प्राप्य न मुमुक्षेय बंधनात् ५७ इति श्रीभा
गवते महापुराणे तृतीयस्कंधे त्रयोविंशोध्यायः

स्वभावतः प्रवृत्तं यस्य कर्म धर्माय न कल्पते धर्मास्तु सुखं न भवेत् तत्रापि निःकामधर्मद्वारा विरागाय न कल्पते तत्तु द्वारा
न तीर्थपदस्य हरेः सेवार्थं न पर्यवस्येदित्यर्थः ५६ न मुमुक्षेयं मोक्षमिच्छां न कृतवत्यस्मि ५७ इति तृतीये त्रयोविंशः

त्र
चतुर्विंशे ततो जन्म कपिलस्याहतत्पितुः प्रव्रज्यांतमनुज्ञाप्य ऋणत्रयविमोक्षतः १ शालिनीं श्लाघ्यां शुक्लेनाभिव्याहृतं सह
हं स्वांशकलयेत्यादि १ दुःखं मा खिदः खेदं माकार्षीः आत्मानं प्रति अहं भाग्यहीनेति अदूरात् शीघ्रं २ दमेन इंद्रियसंयमेन
नियमेन स्वधर्मेण तपांसि द्रविणदानानि व्रतैः ३ हृदयग्रंथिं चिज्जडात्मकमहंकारलक्षणं बंधं छेत्ता छेत्स्यति औदर्यः पुत्रः स
न ब्रह्मभावयति उपदिशतीति तथा ४ श्रद्धाय विश्वस्य ५ बहुतिथे बहुतरे काले अतिक्रांते ६ घनाघनाद्येकं पदं वर्त्म तोमे
श्रीमैत्रेय उवाच निर्वेदवादिनीमेवं मनोर्दुहितरं मुनिः दयालुः शालिनीमाह शुक्लाभिव्याहृतं स्मरन् १ ऋषिरुवाच
मा खिदो राजपुत्रीत्थमात्मानं प्रत्यनिंदिते भगवांस्तेक्षरो गर्भमदूरात्संप्रपत्स्यते २ धृतव्रतासि भद्रं ते दमेन निय
मेन च तपोद्रविणदानैश्च श्रद्धया चेश्वरं भज ३ स त्वयाराधितः शुक्लो वितन्वन्मामकं यशः छेत्ता ते हृदयग्रंथिमौ
दर्यो ब्रह्मभावनः ४ श्रीमैत्रेय उवाच देवहूत्यपि संदेशं गौरवेण प्रजापतेः सम्यक् श्रद्धाय पुरुषं कूटस्थमभ
जद्गुरुं ५ तस्यां बहुतिथे काले भगवान्मधुसूदनः कार्दमं वीर्यमापन्नो जज्ञेग्निरिव दारुणि ६ अवादयंस्तदा व्योम्नि
वादित्राणि घनाघनाः गायंति तं स्म गंधर्वा नृत्यंत्यप्सरसो मुदा ७ पेतुः सुमनसो दिव्याः खेचरैरपवर्जिताः प्र
सेदुश्च दिशः सर्वा अंभांसि च मनांसि च ८ तत्कर्दमाश्रमपदं सरस्वत्या परिश्रितं स्वयंभूः साकमृषिभिर्मरीच्यादि
भिरभ्ययात् ९ भगवंतं परं ब्रह्म सत्वेनांशेन शत्रुहन् तत्वसंख्यानविज्ञप्त्यै जातं विद्वानजः स्वराट् १०
वाः गायंति स्म नृत्यंति स्म ७ अपवर्जिताः मुक्ताः ८ परिश्रितं वेष्टितं ९ आगत्य किं कृतवान् तदाह भगवंतमिति द्वाभ्यां
तत्वानां संख्यानं यस्मिन् तस्य सांख्यस्य विज्ञप्त्यै विशेषेण ज्ञापनाय भगवंतं जातं विद्वान् अजो ब्रह्मा स्वराट् स्वतःसिद्ध
ज्ञानः १०

भा० तृ०
९१

तस्यचिकीर्षितंसभाजयन् पूजयन् प्रहृष्यमाणैरक्षभिरिंद्रियैः उपलक्षितः कर्दमं चेदमभ्यधादितिद्वयोरन्वयः चकाराद्देवहूतिं
च ११ तत्रत्वयेतिपंचभिः कर्दमंप्रत्याह अपचितिः पूजाकृतायत् यस्मात्त्वं निःकपटं सम्यक् गृहीतवान् १२ अनुमन्येतेतियत्
एतावत्येव १३ अनेकधाप्रजाभेदैर्वंशो बृंहयिष्यंति वर्द्धयिष्यंति १४ ऋषिमुख्येभ्योमरीच्यादिभ्यः १५ पुत्ररूपसाक्षादीश्व

सभाजयन् विशुद्धेनचेतसातच्चिकीर्षितं प्रहृष्यमाणैरक्षभिः कर्दमंचेदमभ्यधात् ११ श्रीब्रह्मोवाच त्वयामे
अपचितिस्तातकल्पितानिर्व्यलीकतः यन्मेसंजगृहेवाक्यंभवान्मानदमानयन् १२ एतावत्येवशुश्रूषाकार्यापित
रिपुत्रकैः बाढमित्यनुमन्येतगौरवेणगुरोर्वचः १३ इमादुहितरःसभ्यतववत्ससुमध्यमाः सर्गमेतंप्रभावैःस्वै
र्बृंहयिष्यंत्यनेकधा १४ अतस्त्वमृषिमुख्येभ्योयथाशीलंयथारुचि आत्मजाःपरिदेह्यद्यविस्तृणीहियशोभु
वि १५ वेदाहमाद्यंपुरुषमवतीर्णंस्वमायया भूतानांशेवधिंदेहंबिभ्राणंकपिलंमुने १६ ज्ञानविज्ञान
योगेनकर्मणामुद्धरन्जटाः हिरण्यकेशःपद्माक्षः पद्ममुद्रापदांबुजः १७ एषमानवितेगर्भंप्रविष्टःकैटभा ९१
र्दनः अविद्यासंशयग्रंथिंछित्वागांविचरिष्यति १८

स्तुवत्याह वेदाहमितित्रिभिः शेवधिंनिधिंसर्वार्थीभूतं १६ देवहूतिंप्रत्याहत्रिभिः ज्ञानंशास्त्रोक्तंविज्ञानमपरोक्षंचतेएव
योगउपायस्तेनकर्मणांजटाम्मूलानिवासनाउद्धरन् उत्पाटयिष्यन् पद्ममुद्रायुक्तेपदांबुजेयस्य १७ हेमानवि अ
विद्यास्वरूपाज्ञानंसंशयाःमिथ्याज्ञानानितन्मयंतवहृदयग्रंथिं १८

सुसंमतःसुसंपूजितःसनगंताप्रख्यास्यसिते १९ कुमारैःसहेतिशेषःसहनारदोनारदसहितश्च मरीच्यादीन् विवाहार्थमवस्थाप्य
नैष्ठिकैरेतैःपंचभिःसहितोहंसोब्रह्मायया त्रिधामतृतीयंधामस्वर्गःतस्यपराकाष्ठासत्यलोकं २० शतधृतौब्रह्मणि २२ यु
क्तांयोग्यांअयच्छत् अदात् २३ वितन्यतेसमृद्धःक्रियतेशांत्यधिष्ठात्रीदेवतामित्यर्थःसमलालयत्संतोषितवान् २४

अयंसिद्धगणाधीशःसांख्याचार्यैःसुसंमतः लोकेकपिलइत्याख्यांगंतातेकीर्तिवर्द्धनः १९ श्रीमैत्रेयउवाच
तावाश्वास्यजगत्स्रष्टाकुमारैःसहनारदः हंसोहंसेनयानेनत्रिधामपरमंययौ २० गतेशतधृतौक्षत्तःक
र्दमस्तेननोदितः यथोदितंस्वदुहितॄःप्रादाद्विश्वसृजांततः २१ मरीचयेकलांप्रादात् अनसूयामथात्रये
श्रद्धामंगिरसेयच्छत्पुलस्त्यायहविर्भुवं २२ पुलहायगतिंयुक्तांक्रतवेचक्रियांसतीं ख्यातिंचभृगवेयच्छ
द्वसिष्ठायाप्यरुंधतीं २३ अथर्वणेददाच्छांतिंययायज्ञोवितन्यते विप्रर्षभान्कृतोद्वाहान्सदारान्सम
लालयत् २४ ततस्तेऋषयःक्षत्तःकृतदारानिमंत्र्यतं प्रातिष्ठन्नंदिमापन्नाःस्वंस्वमाश्रममंडलं २५ सचाव
तीर्णंत्रियुगमाज्ञायविबुधर्षभं विविक्तउपसंगम्यप्रणम्यसमभाषत २६ अहोपापच्यमानानांनिरयेस्वै
रमंगलैः कालेनभूयसानूनंप्रसीदंतीहदेवताः २७ बहुजन्मविपक्वेनसम्यग्योगसमाधिना द्रष्टुंयतंतेयतयः
शून्यागारेषुयत्पदं २८

निमंत्र्यपृष्ट्वा नंदिंहर्षंप्रापाः संतः २५ सचमुनिःत्रियुगंविष्णुंविविक्तेरहसि २६ पापच्यमानानां दंदह्यमानानां
निरयेसंसारेस्वैःयैरमंगलैःपापैः २७ कुतःसर्वदेवताःप्रसन्नाइतिज्ञातं अतोन्यत्ताभ्यांहित्याह द्वाभ्यां बहुजन्म
सुविपक्वेनसुसिद्धेनसम्यक् योगोनाकेयोगस्तस्मिन्समाधिरेकाग्र्यंतेनशून्यागारेषुविविक्तस्थानेषुयस्यत
त्पदं २८

भा०त० ९२

हेलनमवज्ञां लाघवं न गणय्य अगणयित्वा उचितमेव तवैतदित्याह यस्त्वं स्वानां भक्तानां पक्षं पुष्णासीति तथासः २९ एतत्प्र
पंचयतिक्षान्त्यां स्वयमेवावतीर्णोऽसि स्ववाक्यं तव पुत्रो भविष्यामीति यत्तत्सत्यं कर्तुं ज्ञानं ज्ञानसाधनं सांख्यं विकीर्षुः स्वक ३०
यानि तवालौकिकानि चतुर्भुजादिरूपाणि तान्येव ते अभिरूपाणि योग्यानि यानि च स्वजनानां रोचंते मनुष्यसरूपाणि
तान्यपि ते रोचंत इत्यर्थः अरूपिणः प्राकृतरूपरहितस्य ३१ अभिवाद्यार्हं पादपीठं यस्य ऐश्वर्यादिभिः पूर्त्तं पूर्णं ३२

स एव भगवानद्य हेलनं न गणय्य नः गृहेषु यातो ग्राम्याणां यः स्वानां पक्षपोषणः २९ स्वीयं वाक्यमृतं कर्तुमव
तीर्णोऽसि मे गृहे विकीर्षुर्भगवान् ज्ञानं भक्तानां मानवर्द्धनः ३० तान्येव तेऽभिरूपाणि रूपाणि भगवंस्तव यानि
यानि च रोचंते स्वजनानामरूपिणः ३१ त्वां सूरिभिस्तत्त्वबुभुत्सयाद्धा सदाभिवादार्हणपादपीठं ऐश्वर्यवै
राग्ययशोवबोधवीर्यश्रिया पूर्त्तमहं प्रपद्ये ३२ परं प्रधानं पुरुषं महांतं कालं कविं त्रिवृतं लोकपा
लं आत्मानुभूत्यानुगतप्रपंचं स्वच्छंदशक्तिं कपिलं प्रपद्ये ३३ आस्माभिपृच्छेऽद्य पतिं प्रजानां त्वया
वतीर्णर्ण उताप्तकामः परिव्रजत्पदवीमास्थितोऽहं चरिष्ये त्वां हृदि युंजन् विशोकः ३४ श्रीभगवानुवाच

ऐश्वर्यादिकं विशेषयन्नाह परं परमेश्वरं तत्र हेतुः स्वच्छंदाः स्वाधीनाः शक्तयो यस्य तादृशमाह प्रधानं प्रकृतिरूपं पुरुषं
तदधिष्ठातारं महांतं महत्तत्त्वरूपं कालं तेषां क्षोभकं त्रिवृतं अहंकाररूपं लोकात्मकं तत्पालात्मकं च तदेवं मायया प्रधा
नादिरूपतामुक्त्वा चिच्छक्त्या निःप्रपंचतामाह आत्मानुभूत्या चिच्छक्त्या अनुगतः स्वस्मिन् लीनः प्रपंचो यस्य तं कविं
सर्वज्ञं प्रधानाद्याविर्भावविलयसाक्षिणमित्यर्थः ३३ संन्यासानुज्ञां प्रार्थयते आस्माभि पृच्छे [illegible] पृच्छा
मीत्यर्थः त्वया पुत्ररूपेणावतीर्णानि निःशेषाणि ऋणानि यस्य सः आप्तकामश्चाहं परिव्रजतां संन्यासिनां पदवीमार्गमा

देवादिरूपाणि

अहं तावत् ज्ञानोपदेशायैव त्वद्गृहेऽवतीर्णः अतस्तव गृहे वसतोऽपि मुक्तिः सुलभैव यद्यप्यरण्यं गंतव्यमेवेत्याग्रहः तथापि मामेवा
नुस्मरन् विचरिष्यामीच्छेत्याशयेनाह मयेति षड्भिः सत्यलौकिके वैदिके लौकिके च कृत्ये स्वोक्तस्य प्रामाण्यमभिप्रेत्याह यन्मे यस्मा
त्तुभ्यं तव पुत्रो भविष्यामीत्यवोचं अथातस्तदृतं यथा भवति तथा मयाऽजनि जन्म स्वीकृतं ३५ दुराशया लिंगात्मनुमुक्षूणां मु
नीनामात्मदर्शने संमताय तत्त्वानां प्रसंख्यानाय विहितेत्युत्तरस्यानुषंगः ३६ नन्वयमात्मज्ञानमार्गः पूर्वसिद्ध एव नेदानीमपूर्वव

श्रीभगवानुवाच मया प्रोक्तं हि लोकस्य प्रमाणं सत्यलौकिके अथाजनि मया तुभ्यं यदवोचमृतं मुने ३५ एत
न्मे जन्म लोकेऽस्मिन् मुमुक्षूणां दुराशयात् मया प्रोक्तं हि लोकस्य प्रमाणं सत्यलौकिके प्रसंख्यानाय तत्त्वानां संम
तायात्मदर्शने ३६ एष आत्मपथोऽव्यक्तो नष्टः कालेन भूयसा तं प्रवर्तयितुं देहमिमं विद्धि मया भृतं ३७
गच्छ कामं मयाऽऽपृष्टो मयि संन्यस्तकर्मणा जित्वा सुदुर्जयं मृत्युममृतत्वाय मां भज ३८ मामात्मानं स्वयंज्यो
तिः सर्वभूतगुहाशयं आत्मन्येवात्मना वीक्ष्य विशोकोऽभयमृच्छसि ३९

तत्प्रवर्तनीयस्तच्चाह एष इति अव्यक्तः सूक्ष्मः ३७ कामं यथेष्टं आपृष्टोऽनुज्ञातः यद्वा यथा त्वं गंतुं मां पृष्टवान् तथा चावश्यं
तुं मया मित्त्वमापृष्ट इत्यर्थः मयि संन्यस्तेन समर्पितेन कर्मणा अविद्यया मृत्युं तीर्त्वा विद्ययाऽमृतमश्नुते इति श्रुतेः
३८ तत्र च मां परमात्मानं आत्मनि स्वस्मिन् आत्मना मनसा अन्वीक्षमाणोऽभयं मोक्षं प्राप्स्यसि ३९

९३

मात्रे देवहूत्यै आत्मनीं मुन्मूलिनीं तयंतरिष्यति परमानंदं च प्राप्स्यतीति तरकारार्थः ४० समुदितः सम्यग्युक्तः स नतं प्रदक्षि
णीकृत्य ४१ मुनीनां व्रतं मौनेन महिंसालक्षणं ४२ सदसतः परं यत् तत् तस्मिन् ब्रह्मणि गुणावभासके निर्गुणे एकांत ऽभया
अव्यभिचारिण्या भक्त्या अनुभाविते परोक्षीकृते ४३ अतो देहादिष्वहंकाररहितः अत एव निर्द्वंद्वः शीतोष्णाद्यनाकु
लः समदृक् न ग्राह्यादृक् किं तु स्वदृक् स्वयमेव पश्यन् प्रत्यक्प्रवणा प्रशांताविक्षेपरहिता धीर्यस्य ४४ तदेवं विवि

मात्रे आध्यात्मिकीं विद्यां शमनीं सर्वकर्मणां वितरिष्ये यया चासौ भयं चातितरिष्यति ४० श्रीमैत्रेय उवाच एवं
समुदितस्तेन कपिलेन प्रजापतिः दक्षिणीकृत्य तं प्रीतो वनमेव जगाम ह ४१ व्रतं स आस्थितो मौनमात्मैकशर
णो मुनिः निःसंगो व्यचरत् क्षोणीमनग्निरनिकेतनः ४२ मनो ब्रह्मणि युंजानो यत्तत्सदसतः परं गुणाव
भासे विगुणे एकभक्त्यानुभाविते ४३ निरहंकृतिर्निर्ममश्च निर्द्वंद्वः समदृक् स्वदृक् प्रत्यक्प्रशांतधीर्धी ९३
रः प्रशांतोर्मिरिवोदधिः ४४ वासुदेवे भगवति सर्वज्ञे प्रत्यगात्मनि परेण भक्तिभावेन लब्धात्मा मुक्तबंध
नः ४५ आत्मानं सर्वभूतेषु भगवंतमवस्थितं अपश्यत् सर्वभूतानि भगवत्यपि चात्मनि ४६

त्पितोपाधिविनिवृत्तिमुक्त्वा परमेश्वरपदप्राप्तिमेवमाह वासुदेव इति त्रिभिः प्रतीचो जीवस्यात्मनि लब्ध आत्मावि
र्भावो येन यतः मुक्तं बंधनमज्ञानं यस्य ४५ लब्धात्मतामेवाह आत्मानमिति ४६

तद्देवं तेन भागवती गतिः प्राप्ता पाठांतरे स एव तां गतिं प्राप्त इति ४७ इति तृतीये चतुर्विंशोऽतितमोऽध्यायः पंचविंशे जनन्या तुष्ट
ष्टो बंधविमोचनं आदावाह परं भक्तिलक्षणं कपिलः स्फुटः १ कपिलो नार्थिता मात्रे गूढभाव नियंत्रिता योगमाणिक्यमं
त्र या स्फुटमुद्घाट्यते ऽधुना २ उक्तानुवादपूर्वकं कापिलं योगं पृच्छति कपिल इति त्रिभिः तत्वानां संख्याता गणकः सांख्य
प्रवर्तक इत्यर्थः अत एव स्वयं जातः आत्मप्रज्ञप्तये आत्मतत्त्वज्ञापनाय १ पुंसां मध्ये वर्ष्मणः वृद्धस्य उत्तमस्येत्यर्थः

इच्छाद्वेषविहीनेन सर्वत्र समचेतसा भगवद्भक्तियुक्तेन प्राप्ता भागवती गतिः ४७ इति श्रीभागवते महा
पुराणे तृतीयस्कंधे चतुर्विंशतितमोऽध्यायः शौनक उवाच कपिलस्तत्वसंख्याता भगवानात्ममायया
जातः स्वयमजः साक्षादात्मप्रज्ञप्तये नृणां १ न ह्यस्य वर्ष्मणः पुंसां वरिम्णः सर्वयोगिनां विश्रुतौ श्रुतदेव
स्य भूरि तृप्यंति मेऽसवः २ यद्यद्विधत्ते भगवान् स्वच्छंदात्मात्ममायया तानि मे श्रद्दधानस्य कीर्तन्यान्य
नुकीर्तय ३ सूत उवाच द्वैपायनसखस्त्वेवं मैत्रेयो भगवांस्तथा प्राहेदं विदुरं प्रीत आन्वीक्षिक्यां प्रचो
दितः ४

सर्वयोगिनां मध्ये वरिम्णः वरस्य भावो वरिमा भवति प्रधानोऽयं निर्देशः वरिष्ठस्येत्यर्थः यद्वा वरीयस्त्वादित्यर्थः विश्रुतौ कीर्तौ
असवः इंद्रियाणि भूरि अत्यंतं न तृप्यंति श्रुतेन श्रवणेन दीव्यति द्योतत इति तथा तस्य यद्वा भूरि बहु त्रः श्रुतो देवो येन तस्यापि मे
असव इति संबंधः २ स्वानां छंदेन इच्छया आत्मा देहो यस्य सः यद्यत्कर्म विधत्ते तानि तानि कर्माणि अनुकीर्तय ३ यथा त्वं मां
प्रचोदयसि एवं प्रचोदितः सन् तथा तत्प्रश्नानुसारेण आन्वीक्षिक्यां आत्मविद्यायां ४

भा०त० बिंदुसरे बिंदुसरसि ५ तत्वमार्गस्याग्रं पारं दर्शयतीति तथा एवमानवित्ते गर्भप्रविष्टइत्यादि धातुर्वचः ६ असतामिंद्रियाणां
९४ तर्षणात् विजयात्सिलात् जातनिर्विण्णाश्चास्मि येनसंसाध्यमानेनसंसेव्यमानेन ७ पारंगमयतीति पारगं त्वमेव श्रेष्ठं
बहुकर्मयालब्धंत्वदनुग्रहात् जन्मनामंते लब्धेसति ८ तत्प्रपंचयति यइति भगवान् चक्षुरूपउदितः सूर्योयथा ९ अ
स

मैत्रेयउवाच पितरिप्रस्थितेरण्यं मातुःप्रियचिकीर्षया तस्मिन्बिंदुसरेवात्सीत्
भगवान्कपिलः किल ५ तमासीनमकर्माणंतत्वमार्गाग्रदर्शकं स्वसुतंदेवहूत्याह
धातुःसंस्मरतीवचः ६ निर्विण्णानितरांभूमन्नसदिंद्रियतर्षणात् येनसंभाव्यमा
नेनप्रपन्नांधंतमःप्रभो ७ तस्यत्वंतमसोंधस्यदुःपारस्याद्यपारगं सच्चक्षुर्जन्म
नामंतेलब्धंमेत्वदनुग्रहात् ८ यआद्योभगवान्पुंसामीश्वरोवैभवान्किल लो ९४
कस्यतमसांधस्यचक्षुःसूर्यइवोदितः ९ अथमेदेवसंमोहमपाक्रष्टुंत्वमर्हसि यो
वग्रहोहंममेतीत्येतस्मिन्योजितस्त्वया १०

पाक्रष्टुंम्पनेतुंकोसौसंमोहस्तमाह एतस्मिन्देहा
हीत्वयैवयोजितोयोहंममेत्यवग्रहः आग्रहोद्वितीयइति शाद्वस्तत्कार्यरागादिग्रहणार्थः १० रामकृष्ण

प्रकृतेःपुरुषस्यचजिज्ञासयात्वामहंशरणंगतास्तीनमामीत्यन्वयः कुठारं छेत्तारं ११ अपवर्गवर्द्धनंमोक्ष
रतिजनकं ईषत्स्मितेनशोभितमाननंयस्य १२ आध्यात्मिक आत्मनिष्ठः यत्रयस्मिन् १३ १४ नस

तंत्वागताहंशरणंशरण्यंस्वभृत्यसंसारतरोःकुठारं जिज्ञासयाप्रकृतेः
मे पूरुषस्यनमामिसद्धर्मविदांवरिष्ठं ११ मैत्रेयउवाच इतिस्वमातुर्नि
रवद्यमीप्सितंनिशम्यपुंसामपवर्गवर्द्धनं धियाभिनंद्यात्मवतांसतांग
तिर्बभाषईषत्स्मितशोभिताननः १२ श्रीभगवानुवाच योगआध्या
त्मिकःपुंसांमतोनिःश्रेयसायमे अत्यंतोपरतिर्यत्रदुःखस्यचसुखस्य
१३ तमिमंतेप्रवक्ष्यामियमवोचंपुरानघे ऋषीणांश्रोतुकामानांयोगंस
र्वांगनैपुणं १४

भा०त०
९५

यथा च चित्तसंयमे पुरुषार्थसिद्धिस्तद्दर्शयति अहमिति त्रिभिः मलैर्वर्तितं विरहितं यदा शुद्धं मनो भवति म
तत्सर्वो गतैः पुरुषयं चित्तसंयमाधीनमिति दर्शयन्नाह चेत इति अस्यात्मनो जीवस्य गुणेषु विषयेषु पुंसि प
रमेश्वरे वा रागद्रक्तं रागशब्दार्थः १५ ततः शुद्धेः फलमाह अदुःखमिति १६

चेतः खल्वस्य बंधाय मुक्तये चात्मनो हितं गुणेषु सक्तं बंधाय रतं वा पुंसि
मुक्तये १५ अहं ममाभिमानोत्थैः कामलोभादिभिर्मलैः वीतं यदा मनः शुद्ध
मदुःखमसुखं समं १६ तदा पुरुष आत्मानं केवलं प्रकृतेः परं निरंतरं स्व
यंज्योतिरणिमानमखंडितं १७ ९५

निरंतरं निर्भेदं अणिमानं सूक्ष्मं अखंडितमपरिछिन्नं १७ ओं नमो भगवते वासुदेवाय०

काचिदिति कस्विदित्यर्थः उचिता योग्या तत्रापि मम स्त्रियाः कीदृशी गोचरा योग्या निर्वाणं मोक्षात्मकं तव पदं स्व
रूपं अन्वाश्नवै अनंतरमेव प्राप्स्यामि अंजसा लेति पाठे अहं त्विति संबंधः २८ भगवद्बाणः भगवंतं यो लक्षीक
रोतीत्यर्थः यतो यस्मात् योगात् २९ विजानीहि विशेषेण ज्ञापय सुखं अनायासेन ३० दुर्लभमातुरर्थं प्र

देवहूतिरुवाच काचित्त्वय्युचिता भक्तिः कीदृशी मम गोचरा यया पदं ते निर्वाणमंजसान्वाश्नवा
अहं २८ यो योगो भगवद्बाणो निर्वाणात्मंस्त्वयोदितः कीदृशः कति चांगानि यतस्तत्वावबोध
नं २९ तदेतन्मे विजानीहि यथाहं मंदधीर्हरे सुखं बुध्येय दुर्बोधं योषा भवदनुग्रहात् ३० श्री
मैत्रेय उवाच विदित्वार्थं कपिलो मातुरित्थं जातस्नेहो यत्र तन्वाभिजातः तत्वाम्नायं यत्प्रवदंति
सांख्यं प्रोवाच वै भक्तिवितानयोगं ३१

योजनं विदित्वा जातस्नेहत्वे हेतुः यत्र यस्यां तन्वा देहेनाविर्भूतः तत्वान्याम्नायंते अनुक्रम्यंते यस्मिन् किं
तत् यत्सांख्यं प्रवदंति तत् प्रोवाच भक्तिवितानं च योगं च ३१

भा० तृ० कार्विश्वप्युचिता भक्तिरिति दृष्टा मुत्तमां भक्तिं लक्षयति गुणा विषया लिंग्यंते ज्ञाप्यंते यैस्तेषां देवानां द्योतनात्मकानां
९७ मिंद्रियाणां तदधिष्ठातॄणां वा सत्वे सत्वमूर्त्तौ हरावेव या वृत्तिः सा भक्तिः सिद्धेर्मुक्तेरपि गरीयसीत्यन्तरेणान्वयः कथंभूता
अनिमित्ता निःकामा स्वाभाविकी अयत्नसिद्धा तेषामेवंविधवृत्तौ हेतुमाह गुरोरुच्चारणमनुश्रूयत इत्यनुश्रवो वेदः
स्तद्विहितमानुश्रविकं तदेव कर्म येषां अतएव एकं एकरूपमविकृतं मनो यस्य पुंसः शुद्धसत्वस्येत्यर्थः ३२ मुक्ति

श्रीभगवानुवाच देवानां गुणलिंगानामानुश्रविककर्मणां सत्वएवैकमनसो वृत्तिः स्वाभाविकी तु या ३२
अनिमित्ता भागवती भक्तिः सिद्धेर्गरीयसी जरयत्याशु या कोशं निगीर्णमनलो यथा ३३ नैकात्मतां
मे स्पृहयंति केचिन्मत्पादसेवाभिरता मदीहाः येन्योन्यतो भागवताः प्रसज्य सभाजयंते मम पौरुषाणि
३४ ९७

श्चासांगिकी भवत्येवेत्याह याभक्तिः कोशं लिंगशरीरं जरयति क्षपयति स्वप्रयत्नं विनैव सिद्धो दृष्टांतः निगीर्णं
भुक्तमन्नं अनलो जठरो यथा जरयति तद्वत् ३३ भक्तेर्गरिष्ठत्वमेवोपपादयति नैकात्मतामिति पंचभिः एका
त्मतां सायुज्यमोक्षं मदर्थमीहाः क्रिया येषां प्रसज्य आसक्तिं कृत्वा पौरुषाणि वीर्याणि ३४

ऐश्वर्यं स्फुरयति मद्भयादिति श्रुतिश्च भीषास्माद्वातः पवते भीषोदेति सूर्यः भीषास्मादग्निश्चेंद्रश्च मृत्युर्धावति पंचम
इति ४२ भजनादेव मोक्ष इत्यत्र सदाचारं प्रमाणयति ज्ञानेति ४३ उपसंहरति एतावानिति मय्यर्पितं सत् मनः स्थि
रं भवतीति यत् एतावानेव ४४ तृतीये पंचविंशः षड्विंशे पुंप्रकृत्योस्तु विवेकायोपवर्ण्यते सांख्येन सर्वतत्वानां ज

मद्भयाद्वाति वातोयं सूर्यस्तपति मद्भयात् वर्षतींद्रो दहत्यग्निर्मृत्युश्चरति मद्भयात् ४२ ज्ञानवैरा
ग्ययुक्तेन भक्तियोगेन योगिनः क्षेमाय पादमूलं मे प्रविशंत्यकुतोभयं ४३ एतावानेव लो
केस्मिन् पुंसां निःश्रेयसोदयः तीव्रेण भक्तियोगेन मनो मय्यर्पितं स्थिरं ४४ इतिश्रीभाग
वते महापुराणे तृतीयस्कंधे पंचविंशतिमोध्यायः श्रीभगवानुवाच अथ ते संप्रवक्ष्यामि
तत्वानां लक्षणं पृथक् यद्विदित्वा विमुच्येत पुरुषः प्राकृतैर्गुणैः १

न्म लक्षणभेदतः १ धात्रा पुत्राय यत्प्रोक्तं छत्रेमित्रासुतेन यत् मात्रे सांख्यं तदध्यात्मं प्राधान्येनाह तत्ववित् २
तत्वाम्नायं यत्प्रवदंति सांख्यमित्यत्र सांख्यं भक्तियोगश्चेति द्वयमुपक्षिप्तं तत्र भक्तिमुक्त्वा इदानीं सांख्यमाह अ
थेति ननु मुक्तिरात्मज्ञानादेव न तु तत्वलक्षणज्ञानात् तमेव विदित्वाति मृत्युमेतीति श्रुतेः अत आह १

भा० टी०
९९ ज्ञानमिति आत्मदर्शनरूपं ज्ञानं अत एव हृदयग्रंथिछेदनं अहंकारनिवर्त्तकं निःश्रेयसप्रयोजनाय यदाहुः तत्ते वर्णयामि तत्व
लक्षणादेव विविक्तात्मज्ञानं भवतीति भावः २ तत्र पुरुषं लक्षयति अनादिरिति आत्मैव पुरुषः कोसावात्मा प्रत्यक्प्रति
ज्ञोमंधाम स्फूर्तिर्यस्य क्षणिकपक्षं व्यावर्त्तयति अनादिरिति संसारित्वपक्षं व्यावर्त्तयति प्रकृतेः पर इति परः अन्यः अ
संगः ज्ञानादिगुणत्वं वारयति निर्गुणः मीमांसकाद्यभिमतं ज्ञानविषयत्वं वारयति स्वयंज्योतिः अनेनैव प्रकाशा

ज्ञानं निःश्रेयसार्थाय पुरुषस्यात्मदर्शनं यदाहुर्वर्णये तत्ते हृदयग्रंथिभेदनं २ अनादिरात्मा पुरुषो निर्गुणः
प्रकृतेः परः प्रत्यग्धामा स्वयंज्योतिर्विश्वं येन समन्वितं ३ स एष प्रकृतिं सूक्ष्मां दैवीं गुणमयीं विभुः यदृ
च्छयैवोपगतामभ्यपद्यत लीलया ४

भिन्नतं ज्ञानाधारत्वेन स्फुरणमपि निरस्तं स्वयंज्योतिष्ट्वे हेतुः विश्वं येन समन्वितं प्रकाशितमिति शेषः एतैरेव हेतुभिः ९९
पुरुषस्य प्रकृतेः परत्वमपि सिद्धं ३ आवरणविक्षेपशक्तिभेदेन प्रकृतिर्द्विधा तत्रावरणशक्त्या सैव जीवोपाधिर
विद्या विक्षेपशक्त्या सैव माया पारमेश्वरी पुरुषश्च जीवेश्वरस्वरूपेण द्विविधः तत्र यः प्रकृत्यविवेकेन संसरति
स जीवः यस्तु प्रकृतिं वशीकृत्य विश्वसृष्ट्यादि करोति स परमेश्वरः तत्र प्रकृत्यविवेके जीवस्य संसारप्रकारमाह
स एष इति पंचभिः सूक्ष्मां अव्यक्तां दैवीं देवस्य विष्णोः शक्तिं लीलया उपगतां यदृच्छयैवाभ्यपद्यतेत्यन्वयः ४

तस्याः लीलामाह गुणैरिति ज्ञानं गूहति आवृणोतीति ज्ञानगूहा तया तथा च श्रुतिः अजामेकां लोहि
तकृष्णवर्णां शुक्लकृष्णां बह्वीः प्रजाः जनयंतीं सरूपां अजो ह्येको जुषमाणोनुशेते जहात्येनां भुक्तभोगाम
जोन्य इति मुमुहे आत्मानं विस्मृतवान् ५ पराभिध्यानं प्रकृत्यध्यासः तेन प्रकृतेर्गुणैः कर्मसु क्रि

गुणैर्विचित्राः सृजतीं सरूपाः प्रकृतिं प्रजाः विलोक्य मुमुहे सद्यः स इह ज्ञानगूहया ५
एवं पराभिध्यानेन कर्तृत्वं प्रकृतेः पुमान् कर्मसु क्रियमाणेषु गुणैरात्मनि मन्यते ६
तदस्य संसृतिर्बंधः पारतंत्र्यं च तत्कृतं भवत्यकर्तुरीशस्य साक्षिणो निर्वृतात्मनः ७

यमाणेषु कर्तृत्वमात्मनि मन्यते ६ तदिति कर्तृत्वाभिमानमेवास्य साक्षिमात्रत्वादकर्तुरेव सतः कर्म
कृतो भिर्बंधः ईशस्य अपारतंत्र्यस्यैव कर्मबंधकृतं भोगे पारतंत्र्यं निर्वृतात्मनः सुखात्मकस्यैव संसृ
तिः जन्ममृत्युप्रवाहः प्रकृत्यविवेककृतमेतत्सर्वं भवतीत्यर्थः ७ गोविंद माधव नारायण

भा०टी०
१२१

ननुचैतन्यसामानाधिकरण्येनैवकर्तृत्वादिप्रतीतेस्तस्यैवतदंगीक्रियतांनेत्याह।कार्यंशरीरंकरणमिंद्रियंकर्तृ
देवतावर्गः।तद्भावापन्नोपुरुषस्यप्रकृतिंकारणंविदुः।कूटस्थस्यस्वतोविकाराभावात्प्रकृतिपरिणामभूतदेहाद्य
हंकारकृतमेवकर्तृत्वादिकमित्यर्थः।भोक्तृत्वेतुपुरुषंकारणंविदुरित्यस्यायंभावः।यद्यप्यहंकारगतमेवकर्
तृत्वादिकंभोक्तृत्वंवातथापिविकारस्यजडावसानत्वादुपाधिप्राधान्यंभोगस्यचिदवसानत्वादुपहितप्रा

॥ ॥कार्यकारणकर्तृत्वेकारणंप्रकृतिंविदुः भोक्तृत्वेसुखदुःखानांपुरुषंप्रकृतेःपरं ८ ॥ देवहू
तिरुवाच प्रकृतेःपुरुषस्यापिलक्षणंपुरुषोत्तम ब्रूहिकारणयोरस्यसदसच्चयदात्मकं ९
श्रीभगवानुवाच यत्तत्त्रिगुणमव्यक्तंनित्यंसदसदात्मकं प्रधानंप्रकृतिंप्राहुरविशेषंविशेषवि
त् १०

धान्यमिति ८ तदेवंसंसारिणंपुरुषंतद्धेतुंप्रकृतिंचज्ञात्वेदानींजगत्कारणमीश्वरंतत्प्रकृतिंचपृच्छति।प्र राम १२१
कृतेरिति।अस्यविश्वस्यसदसच्चस्थूलंसूक्ष्मंचकार्यंयदात्मकंतयोःप्रकृतिपुरुषयोः ९ तत्रप्रकृतिंलक्षय
ति।यत्प्रधानंतदेवप्रकृतिंप्राहुः।किंतत्प्रधानंतत्स्वतोविशेषंविशेषवत्।विशेषाणामाश्रयः।तर्हिकिंब्रह्म
न।त्रिगुणंकिंमहत्तत्वादिन।अव्यक्तंअकार्यंकिंकालादिन।सदसदात्मकं।कार्यकारणरूपं।किंजीवप्रकृतिः
नानित्यं १०

अन्येषांतत्वानांलक्षणंवक्तुंतानिगणयतिपंचभिरित्यादि।सांख्यभेदेनचतुर्विंशतिकं।एतानिचतुर्विंशतिर्य
स्मिन्गणेतंगणंप्राधानिकंप्रधानकार्यात्मकंब्रह्मसगुणंविदुः ११ एतद्विवृणोतिमहाभूतानीतित्रिभिः।ता
वंतिपंचैव १२ अंतरात्मकंअंतःकरणंरूपयाव्यवच्छेदिकया १३ यावन्मयाप्रोक्तःएतावानेवसंख्यातः
लक्षणे

पंचभिःपंचभिर्ब्रह्मचतुर्भिर्दशभिस्तथा एतच्चतुर्विंशतिकंगणंप्राधानिकंविदुः ११ महाभूतानि
पंचैवभूरापोग्निर्मरुन्नभः तन्मात्राणिचतावंतिगंधादीनिमतानिमे १२ इंद्रियाणिदशश्रोत्रंत्व
ग्दृग्रसनानासिका वाक्करौचरणौमेढ्रंपायुर्दशमउच्यते १३ मनोबुद्धिरहंकारश्चित्तमित्यंतरा
त्मकं चतुर्धालक्ष्यतेभेदोवृत्त्यालक्षणरूपया १४ एतावानेवसंख्यातोब्रह्मणःसगुणस्यह
संनिवेशोमयाप्रोक्तोयःकालःपंचविंशकः १५ प्रभावंपौरुषंप्राहुःकालमेकेयतोभयं अहंकार
विमूढस्यकर्तुःप्रकृतिमीयुषः १६ प्रकृतेर्गुणसाम्यस्यनिर्विशेषस्यमानवि चेष्टायतःसभगवा
न्कालइत्युपलक्षितः १७

गणितःतत्वज्ञैः।कालेतुमतद्वयमाह।यःकालःसःपंचविंशतिकःप्रकृतेरेवावस्थाविशेषइत्यर्थः १५ एकेतु
पौरुषंपुरुषस्येश्वरस्यप्रभावंविक्रमंकालमाहुः।तमेवकालंद्वेधालक्षयतियतोभयंभवति।कस्यप्रकृ
तिमीयुषःप्राप्तस्यअतएवदेहेअहंकारेणविमूढस्यकर्तुर्जीवस्यानेनसंहारकत्वेनलक्षितः १६ सृष्टि
हेतुत्वेनलक्षयतिप्रकृतेरिति १७

कोसौभगवानृत माह। अंतः सर्वप्राणिनां यः पुरुषरूपेण नियंतृत्वेन समन्वेतीति। सम्यकृतद्विकाररहित एवा
नुस्यूतो वर्त्ततेबहिश्चकालरूपेणएषभगवान् यद्वा यः पुरुष इति प्रसिद्धः कालः सपंचविंशः। एकेतु पुरुषस्य
प्रभावंकालमाहुः। प्रभावस्यैलक्षणं अंतरिति। पुरुषस्यैवकालत्वेहेतुः प्रकृतेरिति। उभयथाविवक्षायां हेतुः
अंतरितिशेषंसमानं। तदेवंप्रकृतेश्चतुर्विंशतिभेदाः। जीवेश्वरयोश्चैक्यविवक्षायां अतनः पंचविंशतितत्वा
निभवंतितयोर्भेदविवक्षायांतुषड्विंशतिर्भवंति १८ इदानींतत्वानामुत्पत्तिपूर्वकंलक्षणान्याह। दैवादि

अंतः पुरुषरूपेणकालरूपेणयोबहिः समन्वेत्येषसत्वानांभगवानात्ममायया १८
दैवात्क्षुभितधर्मिण्यांस्वस्यांयोनौपरः पुमान् आधत्तवीर्यंसासूतमहत्तत्वंहिरण्मयं १९
विश्वमात्मगतंव्यंजन्कूटस्थोजगदंकुरः स्वतेजसापिबत्तीव्रमात्मप्रस्वापनंतमः २०

त्यादिना। एतान्यसंहृत्यपदे(ई सेयतः)त्यनेनप्राकृतेनग्रंथेनतत्वस्योत्पत्तिपूर्वकंलक्षणमाह। चतुर्भिः दैवाज्जीवादृ
ष्टत्वात्क्षुभिताः धर्माः गुणाः यस्याः। योनौ अभिव्यक्तिस्थाने प्रकृतौ वीर्यं चिच्छक्तिं सा प्रकृतिर्महत्तत्वमसू
तमहत्तः स्वरूपमाह। हिरण्मयं प्रकाशबहुलं १९ विश्वं अहंकारादिप्रपंचं आत्मगतं स्वस्मिन्सूक्ष्मरू
पेणस्थितं व्यंजन् व्यंजयन्। महान् तमोऽपिबत्। कूटस्थः लयविक्षेपशून्यः आत्मानं प्रस्वापयतीति तथा य
न्पूर्वप्रलयसमये महान्प्रकृतौ विलापयामासेत्यर्थः २०

प्रसंगाच्चतुर्व्यूहोपासनमाह। यत्तदिति। सर्वागमप्रसिद्धत्वमाह। स्वच्छं विशदं शांतं रागादिरहितं भगव
तः पदमुपलब्धिस्थानं अतएव वासुदेवाख्यं यदाहुः। अयमर्थः। अधिभूतरूपेण तस्यैव महानिति संज्ञा।
अध्यात्मरूपेणचित्तमिति उपास्यरूपेणवासुदेव इति। अधिष्ठाता तु तस्य क्षेत्रज्ञः। एवमहंकारे संकर्ष
ण उपास्यः रुद्रोधिष्ठाता मनस्यनिरुद्ध उपास्यः चंद्रोधिष्ठाता बुद्धौप्रद्युम्न उपास्यः ब्रह्माधिष्ठातेति ज्ञा

यत्तत्सत्वगुणंस्वच्छंशांतं भगवतः पदं यदाहुर्वासुदेवाख्यंचित्तंतन्महदात्मकं २१ स्वच्छत्वमवि
कारित्वंशांतत्वमितिचेतसः वृत्तिभिर्लक्षणंप्रोक्तंयथापांप्रकृतिःपरा २२ महत्तत्वाद्विकुर्वाण
द्भगवद्वीर्यसंभवात् क्रियाशक्तिरहंकारस्त्रिविधःसमपद्यत २३ वैकारिकस्तैजसश्चतामस
श्चयतोभवः मनसश्चेंद्रियाणांचभूतानांमहतामपि २४ सहस्रशिरसंसाक्षाद्यमनंतंप्रच
क्षते संकर्षणाख्यंपुरुषंभूतेंद्रियमनोमयं २५

तव्यं २१ स्वच्छत्वं भगवत्प्रतिबिंबग्राहित्वं अविकारित्वं लयविक्षेपराहित्यं। अपां प्रकृतिः फेनतरंगादिसाहि
तावस्था परा भूयसंसर्गात्प्राकृती साप्यथा मधुरा स्वच्छा शांता च तद्वदित्यर्थः २२ अहंकारस्योत्पत्तिपू
र्वकंलक्षणमाह। महत्तत्वादिति चतुर्भिः। क्रियासु शक्तिर्यस्य स क्रियाशक्तिः २३ त्रैविध्यमाह वैकारिक
इति। तस्य कार्यमाह। यतः यस्मात् मनआदीनां भवः उत्पत्तिः २४ तस्मिन्नुपास्यव्यूहमाह सहस्रशिर
समिति २५

कर्तृत्वंदेवतादिरूपेणकरणत्वमिंद्रियरूपेणकार्यत्वंभूतरूपेणशांतत्वादिकंतुतत्कारणगुणत्रयरू
पेण २६ मनसउत्पत्तिपूर्वकंलक्षणमाह।वैकारिकादितिद्वाभ्यां।संकल्पश्चिंतनंविशेषोविकल्पोविंत
नंयस्यमनसःसंकल्पविकल्पाभ्यांकामसंभवोवर्त्ततइतिकामरूपाद्वृत्तिलक्षणत्वेनोक्तानतुप्रद्युम्नव्यू
होत्पत्तिःतस्यसंकल्पादिकार्यत्वाभावात्उपास्यव्यूहस्यवानिरुद्धस्योक्तेः २७ शारदंशरत्कालीनंइंदी

कर्तृत्वंकरणत्वंचकार्यत्वंचेतिलक्षणं शांतघोरविमूढत्वमितिवास्यादहंकृतेः २६ वैका
रिकाद्विकुर्वाणान्मनस्तत्वमजायत यत्संकल्पविकल्पाभ्यांवर्त्ततेकामसंभवः २७ यद्वि
दुर्ह्यनिरुद्धाख्यंहृषीकाणामधीश्वरं शारदेंदीवरश्याममंसंराध्यंयोगिभिःशनैः २८ तैज
सात्तुविकुर्वाणाद्बुद्धितत्वमभूत्सति द्रव्यस्फुरणविज्ञानमिंद्रियाणामनुग्रहः २९

त २८

वरंनीलोत्पलंतद्वत्श्याममंपत्शनैःसंराध्यंवशीकर्तुंयोग्यं २८ दुर्ग्रहत्वाद्बुद्धेरुत्पत्तिपूर्वकंलक्षण
माह।तैजसादितिद्वाभ्यां।हेसति।द्रव्यस्फुरणरूपंविज्ञानमितिविज्ञव्याहत्यर्थमुक्तं।इंद्रियाणामनुग्र
हइतिसविकल्पकज्ञाने।हृषीकाणामधीश्वरंइतियदुक्तंतत्तुनिर्विकल्पकज्ञाने २९

राम
१४३

द्रव्यस्फुरणस्यैवप्रपंचःसंशयादिः।विपर्यासोमिथ्याज्ञानं।निश्चयःप्रमाणज्ञानं।स्वापोनिद्रा।प्रमाणविप
र्ययविकल्पनिद्रास्मृतयइतिपातंजलोक्तेः ३० इंद्रियाणामुत्पत्तिमाह।तैजसानितैजसाहंकाराज्जाता
नित्वानेंद्रियाणांवैकारिकत्वशंकानिरस्त्यर्थमेवकारःद्विविधान्यपींद्रियाणितैजसान्येवेत्यन्वयः।तत्रहेतुः
प्राणस्येति।हियस्मात्प्राणस्यक्रियाशक्तिःबुद्धेश्चविज्ञानशक्तिता।अतःप्राणस्यतैजसत्वात्क्रियाशक्तिमतां
मिंद्रियाणांतैजसत्वं।तथाबुद्धेस्तैजसत्वात्तदीयज्ञानशक्तिमतामपींद्रियाणांतैजसत्वमित्यर्थः ३१ त

संशयोथविपर्यासोनिश्चयःस्मृतिरेवच स्वापइत्युच्यतेबुद्धेर्लक्षणंवृत्तितःपृथक् ३० तै
जसानींद्रियाण्येवक्रियाज्ञानविभागशः प्राणस्यहिक्रियाशक्तिर्बुद्धेर्विज्ञानशक्तिता ३१
तामसाच्चविकुर्वाणाद्भगवद्वीर्यचोदितात् शब्दमात्रमभूत्तस्मान्नभःश्रोत्रंतुशब्दगं ३२
अर्थाश्रयत्वंशब्दस्यद्रष्टुर्लिंगत्वमेवच तन्मात्रत्वंचनभसोलक्षणंकवयोविदुः ३३

न्मात्रोत्पत्तिपूर्वकमाकाशादिमहाभूतोत्पत्तिंलक्षणंचाह।तामसादितिपंचदशभिः।श्रोत्रंतुशब्दगमित्या
दिभिर्विषयोत्पत्त्यनंतरंसंबंधमात्रंकथ्यते।नतूत्पत्तिःप्रागेवोत्पन्नत्वात्।शब्दंगच्छतिप्राप्नोतीतिशब्द
गं।शब्दस्यलक्षणमाह।अर्थाश्रयत्वंअर्थवाचकत्वंद्रष्टुर्लिंगत्वं।भित्त्यंतरितस्यवक्तुर्ज्ञापकत्वं।तदुक्तं॥
लिंगंयद्द्रष्टुदृश्ययोरिति।नभसस्तन्मात्रत्वंसूक्ष्मत्वं।शब्दस्यलक्षणमित्यन्वयः ३३

छिद्रदातृत्वं अवकाशदातृत्वंबहिरंतरव्यवहारास्पदत्वं।आत्ममनःप्राणादीनांधिष्ण्यत्वमाश्रयत्वं कूना
ड्यादिछिद्ररूपेण वृत्तिःकार्यमेवलक्षणं।वृत्तिलक्षणं।एवमुत्तरत्रापि एके नश्लोकेन तन्मात्रमहाभूतयोरु
त्पत्तिः।द्वितीयेनतन्मात्रलक्षणं।तृतीयेनमहाभूतलक्षणमित्यनुसंधेयं ३४ कालात्मक।स्पर्शस्यसं
ग्रहःसम्यग्ग्रहणं।यथापुंस्त्वंनियतलिंगत्वात्।यद्वास्पर्शस्यसंग्रहस्ततोभवतीतिशेषः।शब्दतन्मात्रा

भूतानांछिद्रदातृत्वंबहिरंतरमेवच प्राणेंद्रियात्मधिष्ण्यत्वंनभसोवृत्तिलक्षणं ३४ नभ
सःशब्दतन्मात्रात्कालगत्याविकुर्वतः स्पर्शोभवत्ततोवायुस्त्वक्स्पर्शस्यचसंग्रहः ३५ मृ
दुत्वंकठिणत्वंचशैत्यमुष्णत्वमेवच एतत्स्पर्शस्यस्पर्शत्वंतन्मात्रत्वंनभस्वतः ३६ चालनं
व्यूहनंप्राप्तिर्नेतृत्वंद्रव्यशब्दयोः सर्वेंद्रियाणामात्मत्वंवायोःकर्माभिलक्षणं ३७

दित्यादितन्मात्राणामुत्तरोत्तरान्वयार्थमुक्तं ३५ स्पर्शत्वंस्वरूपलक्षणमित्यर्थः।नभस्वतोवायोस्तन्मा
त्रत्वं ३६ चालनंवृक्षशाखादेः।व्यूहनंमेलनंतृणादेः।प्राप्तिःसंयोगःद्रव्यस्य।गंधवतोघ्राणंप्रति।।त
थाशेत्यादितेमः।स्पर्शनंप्रतिशब्दस्यश्रोत्रंप्रतिनेतृत्वं।सर्वेंद्रियाणामात्मत्वमुपोद्बलकत्वं।कर्म
णाकार्येणाभिलक्षणं।भावेल्युट्।कर्मैर्वाभिलक्षणमितिविग्रहेनतुकरणे ३७

३८ द्रव्याकृतित्वंद्रव्यस्याकारसमर्पकत्वं।गुणता द्रव्योपसर्जनप्रतीतिः।शब्दस्यैत्वातंत्र्येणैवप्रतीतिः।अप्र
त्यक्षद्रव्यस्पर्शादेरपिस्वातंत्र्येणैवप्रतीतिः।रूपस्यतुनैवमितितस्यायंविशेषउक्तः।व्यक्तिसंस्थात्वंद्रव्यस्य
यासंस्थासन्निवेशःसैवसंस्थायस्यद्रव्यपरिणामतयाप्रतीतिरित्यर्थः।तेजसस्तेजसस्त्वमसाधारणत्वं ३९
द्योतनंप्रकाशनंपचनंतंदुलादेःक्षुत्तृडशना।।पिपासाचतद्वारेणपानंअदनंच ४० जिह्वारसनेंद्रियंर

वायोश्चस्पर्शतन्मात्राद्रूपंदैवेरितादभूत् समुत्थितंततस्तेजश्चक्षूरूपोपलंभनं ३८ द्रव्याकृतित्वंगु
णताव्यक्तिसंस्थात्वमेवच तेजस्त्वंतेजसःसाध्विरूपमात्रेणवृत्तयः ३९ द्योतनंपचनंपानमदनंहि
ममर्दनं तेजसोवृत्तयस्त्वेताःशोषणंक्षुत्तृडेवच ४० रूपमात्राद्विकुर्वाणात्तेजसोदैवचोदितात् र
समात्रमभूत्तस्मादंभोजिह्वारसग्रहः ४१ कषायोमधुरस्तिक्तःकट्वाम्लइतिनैकधा भौतिकानांविका
रेणरसएकोविभिद्यते ४२ क्लेदनंपिंडनंतृप्तिःप्राणनाप्यायनोदनं तापापनोदोभूयस्त्वमंभसोवृ
त्तयस्त्विमाः ४३

सोग्रह्यतेनयेतिरसग्रहः।यद्वारसग्रहस्ततोभवतीतिशेषः ४१ कषायादिषुलवणोपि
द्रष्टव्यः।भौतिकानांसंसर्गिद्रव्याणांयएकोमधुरएवसन्नेवमनेकधाभिद्यतेसरसइत्यर्थः ४२ क्लेदनंआ
र्द्रीकरणंपिंडनंमृदादेःपिंडीकरणंतृप्तिःतृप्तिदातृत्वंप्राणनंजीवनं।आपोमयःप्राणइतिश्रुतेः।आप्याय
नंतद्देहकृच्छ्यानिवर्त्तनंउंदनंमृदुकरणं।ओंदनमितिपाठेसएवार्थः।भूयस्त्वंकूपादावुद्धृतस्यापिपुनरुद्गमः ४३
पुनः

अमूः विशिष्यादेः २

भा०कु० गंधगः गंधं प्राप्नोति ४४ करंभो मिश्रगंधः यथा व्यंजनादीनां हिंग्वादिसंस्कारैः पूतिः दुर्गंधः सौरभ्यं कर्पूरा
१२६ देः शांतः शतपत्रादेः उग्रो लसुनादेः संसर्गिणां द्रव्यावयवानां वैषम्यात् एवं भिद्यते स गंधः इत्यर्थः ४५
ब्रह्मणो भावनं प्रतिमादिरूपेण साकारतापादानं छादनं जलादिविलक्षणतया नैरपेक्ष्येण स्थितिः धारणं ज
लाद्याधारत्वं सत्तामाकाशादीनां विशेषणमवच्छेदकत्वं सर्वेषां सत्वानां प्राणिनां तद्गुणानां च पुंस्त्वादीनाम्

रसमात्राद्विकुर्वाणादंभसो दैववोदितात् गंधमात्रमभूत्तस्मात्पृथ्वी घ्राणस्तु गंधगः ४४ करंभपूति
सौरभ्यशांतोग्राम्लादिभिः पृथक् द्रव्यावयववैषम्याद्गंध एको विभिद्यते ४५ भावनं ब्रह्मणः स्थानं धा
रणं सद्विशेषणं सर्वसत्वगुणोद्भेदः पृथिवीवृत्तिलक्षणं ४६ नभोगुणविशेषोर्थो यस्य तच्छ्रोत्रमुच्य
ते वायोर्गुणविशेषोर्थो यस्य तत्त्वक्स्पर्शनं विदुः ४७ तेजोगुणविशेषोर्थो यस्य तच्चक्षुरु
च्यते अंभोगुणविशेषोर्थो यस्य तद्रसनं विदुः ४८ भूमेर्गुणविशेषोर्थो यस्य स घ्राण उच्यते पर राम
स्य दृश्यंते धर्मो ह्यपरस्मिन्समन्वयात् ४९ १२५

उद्भेदः परिणामविशेषैः प्रकटीकरणं ४६ श्रोत्रादीनां शब्दादिग्राहकत्वमुक्तं तेषां च लक्षणं तदेवेत्याह पंच
भिः श्लोकार्धैः नभसो गुणः विशेषः शब्दो यस्यार्थो विषयः ४७ ४८ गुणविशेषशब्दव्यावर्त्यं दर्शयति प
रस्य कारणस्य धर्मः शब्दादिः अपरस्मिन्कार्ये वाय्वादौ कारणान्वयाद्दृश्यते ४९ श्रीगोपालो जयति

यथा
अतो भावनामाकाशादीनां विशेषो गुणः सर्वोपि शब्दादिर्भूमावेवोपलक्ष्यते वस्तुतस्तु तत्रान्वयात् जलादिषु गुणं
चतुष्टयमेव न सर्वः आकाशे त्वन्यासामन्वयाभावादेक एवेति एवं कारणोत्पत्तिमुक्त्वा कार्योत्पत्तिमाह सार्द्धैस्त्रिभिः
एतान्यसंहत्य अमिलित्वा यदा स्थितानि तदा जगदादिरीश्वरः प्राविशत् सप्तेति च प्राधान्याभिप्रायेणोक्तं प्रव
शास्तु सर्वेष्वपि विवक्षित एव ४८ अनुविद्धेभ्यः क्षुभितेभ्यः दंडादसौ विराट्पुरुष उदतिष्ठत् ४९ भगवतो रूप
मुक्तेभ्यो मिलितेभ्योंऽडमुत्पन्नेत्यर्थः

अतो विशेषो भावानां भूमावेवोपलक्ष्यते एतान्यसंहत्य यदा महदादीनि सप्त वै कालकर्मगुणोपेतो ज
गदादिरुपाविशत् ४८ ततस्तेनानुविद्धेभ्यो युक्तेभ्योंऽडमचेतनं उत्थितं पुरुषो यस्मादुदतिष्ठदसौ वि
राट् ४९ एतदंडं विशेषाख्यं क्रमवृद्धैर्दशोत्तरैः तोयादिभिः परिवृतं प्रधानेनावृतं बहिः ५० यत्र
लोकवितानोयं रूपं भगवतो हरेः हिरण्मयादंडकोशादुत्थाय सलिलेशयात् तमाविश्य महादेवो ब
हुधा निर्बिभेद खं ५१ निरभिद्यतास्य प्रथमं मुखं वाणी ततोभवत् वाण्या वह्निरथो नासे प्राणोतो घ्राण
एतयोः ५२ घ्राणाद्वायुरभिद्येतामक्षिणी चक्षुरेतयोः तस्मात्सूर्यो न्वभिद्येतां कर्णौ श्रोत्रं ततो दिशः ५३

मिति पुरुषाभेदाभिप्रायेण ५० तस्मिन्नध्यात्मादिविभागमाह हिरण्मयादिति नवभिः उत्थाय औदासीन्यं
विहाय तमाविश्य अधिष्ठाय महांश्चासौ देवश्च स्वं छिद्रं ५१ वाण्या सह वह्निरभवत् प्राविशत् नासे निर
भिद्यतां प्राणोतः प्राणेनायतः स च घ्राणः एतयोर्नासिकयोरभवदित्यनुषंगः ५२ घ्राणादनंतरं वायुश्च प्रा
णेन इति विशेषणं सर्वेंद्रियेष्वपि द्रष्टव्यं निरभिद्यतां अन्वभिद्येतामिति पाठद्वयेप्येक एवार्थः ५३

भा०तृ० ततोदिशःप्राविशन्नआदिशब्देनकेशाः ५६ ५७ स्वराडिंद्रः ५८ हरिर्विष्णुःआप्तंजातं ५९ बुध्यादिषु

निर्बिभेदविराजस्त्वग्रोमश्मश्र्वादयस्ततः ततओषधयश्चासन्शिश्नंनिर्बिभिदेततः ५६ रेतस्तस्मादा
पआसन्निरभिद्यतवैगुदं गुदादपानोपानाच्चमृत्युर्लोकभयंकरः ५७ हस्तौचनिरभिद्येतांबलंता
भ्यांततःस्वराट् पादौचनिरभिद्येतांगतिस्ताभ्यांततोहरिः ५८ नाड्योस्यनिरभिद्यंततांभ्योलोहि
तमाभृतं नद्यस्ततःसमभवन्नुदरंसमभिद्यत ५९ क्षुत्पिपासेततःस्यातांसमुद्रस्त्वेतयोरभूत् ५९
अथास्यहृदयंभिन्नंहृदयान्मनउत्थितं मनसश्चंद्रमाजातोबुद्धिर्बुद्धेर्गिरांपतिः अहंकारस्ततोरु
द्रश्चित्तंचैत्यस्ततोभवत् ६० एतेह्यभ्युत्थितादेवानैवास्योत्थापनेशकन् पुनराविविशुःखानितमु
त्थापयितुंक्रमात् ६१ वह्निर्वाचामुखंभेजेनोदतिष्ठत्तदाविराट् घ्राणेननासिकेवायुर्नोदतिष्ठत्त
दाविराट् ६२ अक्षिणीचक्षुषादित्योनोदतिष्ठत्तदाविराट् श्रोत्रेणकर्णौचदिशोनोदतिष्ठत्ततोवि राम
राट् ६३ त्वचंरोमभिरोषध्योनोदतिष्ठत्तदाविराट् रेतसाशिश्नमापस्तुनोदतिष्ठत्तदाविराट् ६४ १२६
गुदंमृत्युरपानेननोदतिष्ठत्तदाविराट् हस्ताविंद्रोबलेनैवनोदतिष्ठत्ततोविराट् ६५ विष्णुर्गत्यै
वचरणौनोदतिष्ठत्ततोविराट् नाडीर्नद्योलोहितेननोदतिष्ठत्ततोविराट् ६६

हृदयमेवाधिष्ठानं।गिरांपतिर्ब्रह्मा।चैत्यःक्षेत्रज्ञः ६० अन्वयव्यतिरेकाभ्यांक्षेत्रज्ञंविवेक्तुंसर्वेषांपुनःप्रवे
शमाहएतइतिनवभिः ६६

विराड्देहस्यव्यष्टिदेहेदृष्टांतत्वेनदर्शयन्संख्यानुकथनस्यप्रयोजनमाह।यथेतिद्वाभ्यां ७० प्रथमंपरमे
श्वरेभक्तिस्ततोन्यत्रविरक्तिःततोयोगप्रवृत्ताधीःएकाग्रंचित्तंततोयत्ज्ञानंतेनप्रत्यगात्मानंक्षेत्रज्ञंअस्मि
न्नात्मनिकार्यकारणसंघातेविविच्यचिंतयेत् ७१ इतितृतीयेषड्विंशतितमः सप्तविंशेततःस

क्षुत्तृड्भ्यामुदरंसिंधुर्नोदतिष्ठत्ततोविराट् हृदयंमनसाचंद्रोनोदतिष्ठत्ततोविराट् ६७ बुद्ध्याब्र
ह्मापिहृदयंनोदतिष्ठत्ततोविराट् रुद्रोभिमत्याहृदयंनोदतिष्ठत्ततोविराट् ६८ चित्तेनहृदयं
चैत्यःक्षेत्रज्ञःप्राविशद्यदा विराट्तदैवपुरुषःसलिलादुदतिष्ठत ६९ यथाप्रसुप्तंपुरुषंप्राणें
द्रियमनोधियः प्रभवंतिविनायेननोत्थापयितुमोजसा ७० तमस्मिन्प्रत्यगात्मानंधियायो
गप्रवृत्तया भक्त्याविरक्त्याज्ञानेनविविच्यात्मनिचिंतयेत् ७१ इतिश्रीभागवतेमहापुरा
णेकापिलेयेतत्वज्ञानविचारेषड्विंशतितमोध्यायः श्रीभगवानुवाच प्रकृतिस्थो
पिपुरुषोनाज्यतेप्राकृतैर्गुणैः अविकारादकर्तृत्वान्निर्गुणत्वाज्जलार्कवत् १

प्यक्तबद्धसाधनयोगतः।पुंप्रकृत्योर्विवेकेनमोक्षइतीतिनिरूप्यते १ विवेकज्ञानेनमोक्षमुपपादयितुं
शुद्धस्यैवपुरुषस्यप्रतीतिप्रकृत्यविवेकतःसंसारमनुस्मारयति।प्रकृतिस्थोपीतित्रिभिः।देहस्थोपिनाज्य
तेनलिप्यते।गुणैःतत्कृतैःसुखदुःखादिभिः।निर्गुणत्वादकर्तृत्वंततोविकारित्वंतस्मात् १

ग

भा०तृ० १२६ १ अनिर्वृतः सन् प्रकृतिसंस्कृतेः सदसन्मिश्रयोनिषु देवतिर्यङ्नरादिषु संसारपदवीमाप्नोति ३ ननु
तर्ह्यवास्तवत्वात्संसृतेः किं तन्निवृत्तिप्रयासेन तत्राह। अर्थेहीति ४ यतो विषयध्यानमनर्थहेतुरतो म
नो नियंतव्यमित्याह। अत एवेति। असतामिंद्रियाणां पथि विषयमार्गे तीव्रेण दृढेन विरक्त्या वतीव्रया ५

सएषयर्हिप्रकृतेर्गुणेष्वभिविषज्जते अहंक्रियाविमूढात्मा कर्तास्मीत्यभिमन्यते २ तेन संसारप
दवीमवशोभ्येत्यनिर्वृतः प्रासंगिकैः कर्मदोषैः सदसन्मिश्रयोनिषु ३ अर्थे ह्यविद्यमानेपि
संसृतिर्न निवर्तते ध्यायतो विषयानस्य स्वप्नेऽनर्थागमो यथा ४ अतएव शनैश्चित्तं प्र
सक्तमसतां पथि भक्तियोगेन तीव्रेण विरक्त्या च नयेद्वशमं ५ यमादिभिर्योगपथैरभ्य
सेच्छ्रद्धयान्वितः मयि भावेन सत्येन मत्कथाश्रवणेन च ६ सर्वभूतसमत्वेन निर्वैरेणाप्र
संगतः ब्रह्मचर्येण मौनेन स्वधर्मेण बलीयसा ७ यदृच्छयोपलब्धेन संतुष्टो मितभुङ्मु राम
निः विविक्तशरणः शांतो मैत्रः करुण आत्मवान् ८ १२६

ज्ञानेन / वहि:
भक्तिविरक्त्योस्तीव्रत्वे कारणं निरूपयन् मोक्षप्रकारमाह। यमादिभिः योगमार्गैश्चित्तमभ्यसन् पुनः पुनरेका
ग्रीकुर्वन् आत्मानमुपलभ्य सर्वानुस्यूतमद्वयं परमात्मानं प्रतिपद्यत इति षष्ठेनान्वयः। सत्येन निष्कपटे
न भावेन प्रेम्णा ६ अप्रसंगतः संगत्यागेन बलीयसा ईश्वरार्पितेन ७ विविक्तशरणः एकांतवासी ८

असदाग्रहं अहंममतां। प्रकृतेः पुरुषस्य च दृष्टं तत्त्वं येन तेन ज्ञानेन ९ निवृत्ता निवुध्यवस्थाना निजाग्रदा
द्यवस्था यस्य सः। अत एव दूरीभूतमन्यदर्शनं यस्य आत्मना अहंकारावच्छिन्नेन आत्मानं शुद्धमुपलभ्य। एक
देशिनियस्य सः। अत एव दूरीभूतमन्यदर्शनं यस्य आत्मना अहंकारावच्छिन्नेनार्केण गगनस्थमर्कमिव ए
स्यैवावच्छेदानवच्छेदाभ्यां करणत्वकर्मत्वे दृष्टांतमाह। चक्षुषा चक्षुरवच्छिन्नेनार्केण गगनस्थमर्कमिव ए
वमात्मदृक् शुद्धमात्मानं पश्यन् १० मुक्तलिंगं निरुपाधिकं। असति मिथ्याभूतेऽहंकारे सदाभासं सद्रू

सानुबंधे च देहेऽस्मिन्नकुर्वन्नसदाग्रहं ज्ञानेन दृष्टतत्त्वेन प्रकृतेः पुरुषस्य च ९ निवृत्तबु
द्ध्यवस्थानो दूरीभूतान्यदर्शनः उपलभ्यात्मनात्मानं चक्षुषेवार्कमात्मदृक् १० मुक्तलिं
गं सदाभासमसति प्रतिपद्यते सतो बंधुमसच्चक्षुः सर्वानुस्यूतमद्वयम् ११ यथा जल
स्थ आभासः स्थलस्थेनावदृश्यते स्वाभासेन तथा सूर्यो जलस्थेन दिवि स्थितः १२

पेणाभासमानं ब्रह्म प्राप्नोति। शुद्धजीवस्वरूपाद्विशेषमाह। सतः कारणस्य प्रधानस्य बंधुमधिष्ठानं अस
तः कार्यस्य चक्षुरिव प्रकाशकं सर्वेषु कार्यकारणेष्वनुस्यूतं अद्वयं परिपूर्णं ११ अहंकारोपहितेन शुद्धब्र
ह्मप्रतिपत्तिं सदृष्टांतमाह। यथेति जले स्थितः आभासः सूर्यप्रतिबिंबो यदा गृहांतर्वर्त्तिभित्तौ स्फुरति तदा
गृहकोणस्थितैः पुरुषैः भित्यादौ स्थले स्थितेन स्वाभासेन सूर्यप्रतिबिंबेन यथा प्रथमं जलस्थ आभासोऽवदृ
श्यते। लक्ष्यते गगनस्थस्य गृहमध्ये प्रतिबिंबायोगात्। वार्थे यथा शब्दः। यथा चेत्यर्थः। यथा च जलस्थेन दिवि
स्थितः सूर्यो लक्ष्यते १२

भा०टी० १२६

१ (अनिर्वृत्तः सन् प्रकृतिसंगकृतैः सदसन्मिश्रयोनिषु देवतिर्यङ्नरादिषु संसा) एवंभूतेंद्रियमनोभिर्देहें
द्रियमनोभिश्छिन्नैः स्वाभासैः आत्मप्रतिबिंबैः त्रिगुणोहंकारः सत्तो ब्रह्मणः आभासो यस्मिन्। तेन रूपेण ल
क्षितः अहंकारस्याभासं विना विषयाभासानुत्पत्तेः। अनेन चाहंकारेण सदाभासवता सत्यदृक् परमार्थज्ञ
प्तिरूपः आत्मा लक्षित इत्यर्थः १३ इदानीं सुषुप्तिसाक्षित्वेन शुद्धात्मप्रतिपत्तिमनुभवतो दर्शयति त्रि
भिः। भूतादिषु असति असत्तुल्ये व्याकृते निद्रया लीनेषु सत्सु यस्तत्र तदा विनिद्रो निरहंक्रियस्तमात्मानं

एवंत्रिवृदहंकारो भूतेंद्रियमनोमयैः स्वाभासैर्लक्षितोनेन सदाभासेन सत्यदृक् १३
भूतसूक्ष्मेंद्रियमनोबुद्ध्यादिष्विह निद्रया लीनेष्वसति यस्तत्र विनिद्रो निरहंक्रियः १४
मन्यमानस्तदात्मानमनष्टो नष्टवन्मृषा नष्टेहंकरणे द्रष्टा नष्टवित्त इवातुरः १५ राम

प्रतिपद्यत इति तृतीयेनान्वयः १४ ननु यदि तदा विनिद्रोसावस्ति तर्हि जाग्रत्स्वप्नयोरिव स्फुटः किं नावभा १२६ १०७
सते तत्राह। एवं सिद्धदृष्टांतो द्रष्टृत्वेन सविकल्पतया स्फुटं प्रतीतेः। सुषुप्तौ तु भूतादेरहंकारविषयस्य लीनत्वा
त्। तद्विषये अहंकारे नष्टे सति। स्वयमनष्टोपि मृषैवात्मानं नष्टवन्मन्यमानो यः। अन्यस्य नाशेन्यस्य नष्ट
तुल्यत्वे दृष्टांतः। नष्टवित्तो यथा आतुरो विवशः नष्टवद्भवतीत्यर्थः १५

ननु सुषुप्तौ न किंचिदनुभूयते मैवं। सुखमहमस्वाप्सं न किंचिदवेदिषमिति विशेषज्ञानं विना केवलस्यात्मनः
प्रतिसंधानादित्याह एवमिति। ननु प्रतिसंधानेन साहंकारस्य प्रतीतेः। कथं निरहंक्रियत्वं तत्राह साहंका
रस्य द्रव्यस्य कार्यकारणसंघातस्य अनुग्रहः प्रकाशकः अवस्थानं च द्रव्यविशेषणतया अहंकारस्यापि
दृश्यत्वाच्च तत् द्रष्टात्मा तद्व्यतिरिक्तः तमात्मानमित्यन्वयः १६ भक्तिविरक्तिभ्यां सत्यपि विवेके प्रकृति

एवंप्रत्यवमृश्यासावात्मानं प्रतिपद्यते साहंकारस्य द्रव्यस्य योवस्थानमनुग्रहः १६ देवहू
तिरुवाच पुरुषं प्रकृतिर्ब्रह्मन्न विमुंचति कर्हिचित् अन्योन्यापाश्रयत्वाच्च नित्यत्वादनयोः
पृथक् १७ यथा गंधस्य भूमेश्च न भावो व्यतिरेकतः अपां रसस्य च यथा तथा बुद्धेः परस्य च।
१८ अकर्तुः कर्मबंधोयं पुरुषस्य यदाश्रयः गुणेषु सत्सु प्रकृतेः कैवल्यं तेष्वतः कथं १९

पुरुषयोः परस्परत्यागाभावात् कथं मुक्तिरिति पृच्छति पुरुषमिति चतुर्भिः १७ व्यतिरेकाभावमात्रे दृष्टांतः
यथा व्यतिरेकतो भावः सत्ता नास्ति गंधस्य कदाचिदपृथक्प्रदर्शनात्। दृष्टांतांतरं। अपामिति बुद्धेः प्रकृतेः
पुरुषस्य परस्य च १८ ततः किमत आह। अकर्तुरिति। ये गुणाः आश्रयो यस्य सः तेषु प्रकृतेः गुणेषु सत्सु
पुरुषस्य कैवल्यं कथं १९

भा०त०
१५९

अतएववक्कचिन्निवृत्तप्रायस्यापिसंसारभयस्यपुनरुद्भवोदृश्यतइत्याहक्कचिदिति २० नप्रकृतिसंबंधमात्रंबं
धहेतुः किंतुगुणबुध्यातदासक्तिःतन्निवृत्तौसत्यांमोक्षोघटतेक्कचिदुद्भवस्तुसाधनवैकल्यादित्यभिप्रेत्यसा
धनातिशयंकथयन्परिहरतित्रिभिः। निमित्तंफलंतन्निमित्तंप्रवर्तकंयस्मिन्निष्कामेणधर्मेणअमलात्मना-
निर्मलेनमनसाश्रुतेनकथाश्रवणेनसंभृतयापुष्टया २१ २२ दह्यमानाअभिभूयमानातिरोहिताभवति २३

कचिन्तत्वावमर्शेननिवृत्तंभयमुल्बणं अनिवृत्तनिमित्तत्वात्पुनःप्रत्यवतिष्ठते २० श्रीभगवानु
अनिमित्तनिमित्तेनस्वधर्मेणामलात्मना तीव्रयामयिभक्त्याचश्रुतसंभृतयाचिरं २१ ज्ञानेनदृष्टत
त्वेनवैराग्येणबलीयसा तपोयुक्तेनयोगेनतीव्रेणात्मसमाधिना २२ प्रकृतिःपुरुषस्येहदह्यमा-
नात्वहर्निशं तिरोभवित्रीशनकैरग्नेर्योनिरिवारणिः २३ भुक्तभोगापरित्यक्ताहृष्टदोषाचनित्यशः
नेश्वरस्याशुभंधत्तेस्वेमहिम्निस्थितस्यच २४ यथाह्यप्रतिबुद्धस्यप्रस्वापोबह्वनर्थभृत् सएवप्रतिबु
द्धस्यनवैमोहायकल्पते २५ एवंविदिततत्वस्यप्रकृतिर्मयिमानसं युंजतोनापकुरुतेआत्मारामस्य राम
(कर्हिचित् २६ १५९

एवंचसतिपुनरुद्भवोनास्तीत्याह। भुक्तोभोगोयस्याःनित्यशःसदादृष्टोदोषोयस्याःअत
एवपरित्यक्तासतीईश्वरस्यापरतंत्रस्यस्वेमहिम्निस्थितस्यस्वानंदप्राप्तस्य २४ अविवेकावस्थायामनर्थहे
तुरपिविवेकानंतरंभवतीतिसदृष्टांतमाह। यथेतिद्वाभ्यां। प्रस्वापःस्वप्नःबह्वनर्थान्बिभर्तिपुष्णाति। प्रति
बुद्धस्यसंस्कारवशेनस्फुरन्नपि २५ २६

अहैतुकीफलानुसंधानशून्या अव्यवहिता भेददर्शनरहिताच मद्गुणश्रुतिमात्रेणमयिपुरुषोत्तमेमनोगतिरितियात्त
क्तिःसानिर्गुणस्यभक्तियोगस्यलक्षणमित्यन्वयः लक्षणंस्वरूपं १२ भक्तानांनिःकामतांकैमुत्यन्यायेनाह सालोक्यं
मयासहएकस्मिँल्लोकेवासं सार्ष्टिंसमानैश्वर्यंसामीप्यंनिकटवर्तित्वं सारूप्यंसमानरूपत्वंएकत्वंसायुज्यंउतअपि
दीयमानमपिगृह्णंतिकुतस्तत्कामनेत्यर्थः १३ किमितितर्हिभजंतेभक्तेरेवपरमफलत्वादित्याह सएवेति ननुत्रैगुण्यं

अहैतुक्यव्यवहितायाभक्तिःपुरुषोत्तमे १२ सालोक्यसा
लक्षणंभक्तियोगस्यनिर्गुणस्यह्युदाहृतं
र्ष्टिसामीप्यसारूप्यैकत्वमप्युत दीयमानंनगृह्णंतिविनामत्सेवनंजनाः १३ सएवभक्तियोगाख्य
आत्यंतिकउदाहृतः येनातिव्रज्यत्रिगुणंमद्भावायोपपद्यते १४ निषेवितेनानिमित्तेनस्वधर्मेणम
हीयसा क्रियायोगेनशस्तेननातिहिंस्रेणनित्यशः १५ मद्धिष्ण्यदर्शनस्पर्शपूजास्तुत्यभिवंदनैः
भूतेषुमद्भावनयासत्वेनासंगमेनच १६
हित्वाब्रह्मप्राप्तिःपरमंफलंप्रसिद्धं सत्यंतत्त्वानुषंगिकमित्याह येनभक्तियोगेनमद्भावायब्रह्मत्वाय १४
एवंभूतायाःभक्तेःसाधनान्याहपंचभिः निषेवितेनसम्यगनुष्ठितेन अनिमित्तेनस्वधर्मेणनित्यनैमित्तिकेनमही
यसाश्रद्धादियुक्तेनक्रियायोगेनपंचरात्राद्युक्तपूजाप्रकारेणशस्तेननिःकामेन १५ मद्धिष्ण्यंमत्प्रतिमा
दितस्यदर्शनादिभिःसत्वेनधैर्येणअसंगमेनवैराग्येण १६ १७ १८ ॥ महतांबहुमानेनदीनानामनुकंपया।
मैत्र्याचैवात्मतुल्येषुयमेननियमेनच॥१७॥आध्यात्मिकानुश्रवणान्नामसंकीर्तनाच्चमे॥ आर्जवेनार्यसंगेननिरहंक्रिययातथा॥१८
तुभ४

मद्धर्मणः भगवद्धर्मानुष्ठातुः पुरुषस्याशयश्चित्तं १९ अयत्नं विनैवप्राप्तोदृष्टांतः वातोरथः आपकोयस्यगंधस्य आश्र
यात् स्थानात् आहंके आत्मसात्करोति एवं अविकारिसमं यच्चेतः २० चित्तशुद्धिश्चसर्वभूतात्मदृष्ट्यैव भवतीति

मद्धर्मणोगुणैरेतैः परिसंशुद्ध आशयः पुरुषस्यांजसाभ्येति श्रुतमात्रगुणंहिमाम् १९ यथावातरथो
घ्राणमाहंक्ते गंध आश्रयात् एवंयोगरथंचेत आत्मानमविकारियत् २० अहंसर्वेषु भूतेषु भूतात्मा
वस्थितःसदा तमवज्ञायमांमर्त्यःकुरुतेर्चाविडंबनं २१ योमांसर्वेषुभूतेषुसंतमात्मानमीश्वरं हि
त्वार्चांभजतेमौढ्यात् भस्मन्येवजुहोतिसः २२ द्विषतःपरकायेमांमानिनोभिन्नदर्शिनः भूतेषुबद्धवै
रस्यनमनःशांतिमृच्छति २३ अहमुच्चावचैर्द्रव्यैः क्रिययोत्पन्नयानघे नैवतुष्येर्चितोर्चायांभूतग्रा
मावमानिनः २४ अर्चादावर्चयेत्तावदीश्वरंमांस्वकर्मकृत् यावन्नवेदस्वहृदि सर्वभूतेष्ववस्थितं २५

वक्तुं केवलं प्रतिमादिनिष्ठांनिंदन्नाह अहमितिसार्धत्रिभिः अर्चैवविडंबनमनुकरणं अर्चायांपूजाविडंबनमि
तिवा अवज्ञोपेक्षाद्वेषनिंदाः क्रमेणचतुर्भिर्निषिध्यंते २२ हित्वाउपेक्ष्य २३ द्रव्यैरुत्पन्नयाक्रियया भूतग्राम
वमानिनःतन्निंदकस्य २४ तर्हिकिमर्चादावर्चनमनर्थकमेवनेत्याह अर्चादाविति सर्वभूतेष्ववस्थितंमांस्वहृदि
यावन्नवेदस्वकर्मकृत् कर्माविरोधेनयथावकाशं अनेनकर्मनिष्ठायाअपिसस्वावधिरित्युक्तं भवति २५

अंतरा अंतरंभेदं उत अपि अरं अल्पं अल्पमपि भेदं यः पश्यतीत्यर्थः यद्वा अंतरा मध्ये उदरं शरीरं मृत्युरहं तस्य भयं वि
दधे करोमि २६ अथ अतः सर्वेषु भूतेषु कृतालयं कृतावासं तत्र हेतुः भूतानामात्मानमंतर्यामिणं अभिन्नेन च
क्षुषा समदर्शनेन २७ तत्रापियथोत्तरंमानाद्यतिशयः कर्तव्य इति वक्तुं तारतम्यमाह जीवा इति सार्धैः षड्भिः अ
जीवानां अचेतनेभ्यः ततःतेष्वपिप्राणभृतः प्राणवृत्तिमंतःसचित्ताः ज्ञानवंतः इंद्रियाणां वृत्तयो येषु इंद्रियवृत्त

आत्मनश्चपरस्यापियःकरोत्यंतरोदरं तस्यभिन्नदृशोमृत्युर्विदधेभयमुल्बणं २६ अथमांस
र्वभूतेषुभूतात्मानंकृतालयं अर्हयेद्दानमानाभ्यांमैत्र्याभिन्नेनचक्षुषा २७ जीवाः श्रेष्ठाह्य
जीवानांततःप्राणभृतःशुभे ततःसचित्ताःप्रवरास्ततश्चेंद्रियवृत्तयः २७ तत्रापिस्पर्शवेदि
भ्यःप्रवरारसवेदिनः तेभ्योगंधविदःश्रेष्ठास्ततःशब्दविदोवराः २८ रूपभेदविदस्तत्रततश्चो
भयतोदतः तेषांबहुपदाःश्रेष्ठाश्चतुष्पादस्ततोद्विपात् २९

योहंतयोर्वृक्षाणामपिसूक्ष्माः संत्येव तथाहिमहाभारते मोक्षधर्मेषु स्मर्यंते तस्मात्पश्यंतिपादपाः तस्माज्जिघ्रंति
तिपादपाःइत्यादिषु सिद्धास्तेरुषुभगवतात्वस्पष्टोंद्रियवृत्तिरेव २८ अतस्तेभ्यः स्पर्शविद्भ्योरसवेदिनो मत्स्यादह
यःश्रेष्ठागंधविदोभ्रमरादयः शब्दविदः सर्पादयः रूपभेदविदः काकादयः उभयतोदंतायेषां अपादेभ्यस्तेभ्यो बहुपादाः
२९

तेभ्यःश्रेष्ठाः पादहीनाः ततोद्विपान्मनुष्याः २८

ततस्तेषु वर्णाः ३० संशयछेत्ता मीमांसकः ततोपि केवलात् स्वधर्मकृत् मुक्तसंगस्य लक्षणं आत्मनो धर्ममदोग्धा निःकाम इ
त्यर्थः ३१ अर्पिता अशेषाः क्रिया अर्थाश्च तत्फलानि आत्मा देहश्च येन अतएव निरंतरः अव्यवहितः ३२ अकर्तुः क
र्तृत्वाभिमानशून्यात् ३३ जीवानां कलया परिकलनेन अंतर्यामितया प्रविष्ट इति दृष्ट्वेत्यर्थः ३४

ततो वर्णाश्च चत्वारस्तेषां ब्राह्मण उत्तमः ब्राह्मणेष्वपि वेदज्ञो अर्थज्ञो ह्यधिकस्ततः ३० अर्थज्ञा
त्संशयच्छेत्ता ततः श्रेयान् स्वकर्मकृत् मुक्तसंगस्ततो भूयानदोग्धा धर्ममात्मनः ३१ तस्मान्म
य्यर्पिताशेषक्रियार्थात्मा निरंतरः ३२ मय्यर्पितात्मनः पुंसो मयि संन्यस्तकर्मणः न पश्यामि
परं भूतमकर्तुः समदर्शनात् ३३ मनसैतानि भूतानि प्रणमेद्बहुमानयन् ईश्वरो जीवकलया
प्रविष्टो भगवानिति ३४ भक्तियोगश्च योगश्च मया मानव्युदीरितः ययोरेकतरेणैव पुरुषः
पुरुषं व्रजेत् ३५

उक्तं भक्तियोगं पूर्वोक्तेनाष्टांगयोगेन सहोपसंहरति भक्तियोगश्चेति हे मानवि पुरुषं परमेश्वरं ३५

बाह्यवायोरंतःप्रवेशनं पूरकः। प्रवेशितधारणं कुंभकः। धृतस्य बहिर्निःसारणं रेचकः। प्रतिकूलेन रेचकपूर
ककुंभकैः यद्वा ईडया पूर्य पिंगलया रेचनं पिंगलया पूर्य इडया रेचनमिति एवं प्रतिकूलेन वा शब्दः एवार्थे स्थि
रं सत् पुनरपि चंचलं यथा न भवति तथा शोधयेत् ९ ध्मातं सुतप्तमित्यर्थः लोहं सुवर्णं यथा मलं त्यज
ति तथा मनो विरजं स्यात्। ततश्चाचंचलं स्यादिति भावः १० प्राणायामादीनां समाधौ उद्धारकार्पण्याह

प्राणस्य शोधयेन्मार्गं पूरकुंभकरेचकैः प्रतिकूलेन वा चित्तं यथा स्थिरमचंचलं ९ मनोचि
रात्स्याद्विरजं जितश्वासस्य योगिनः वाय्वग्निभ्यां यथा लोहं ध्मातं त्यजति वै मलं १० प्रा
णायामैर्दहेद्दोषान् धारणाभिश्च किल्बिषान् प्रत्याहारेण संसर्गान् ध्यानेनानीश्वरान् गुणान्
११ यदा मनः स्वं विरजं योगेन सुसमाहितं काष्ठां भगवतो ध्यायेत्स्वनासाग्रावलोकनः १२

प्राणायामैरिति। दोषान् वातश्लेष्मादीन् संसर्गान् विषयसंगान्। अनीश्वरान् रागादीन् वायुना सह मनसः
स्थिरीकरणं धारणा स्थिरस्य वृत्तिसंततिर्ध्यानं। वृत्तिनिरोधः समाधिरिति भेदः ११ सुसमाहितं स्थिरं ज्ञा
तं काष्ठां कलां मूर्तिमित्यर्थः। स्वनासाग्रे अवलोकनं यस्य एतच्चलनविक्षेपयोः परिहाराय १२

ध्येयं हरिमाह सप्तभिः। प्रसन्नं वदनांभोजं यस्य तं ध्यायेदिति षष्ठेनान्वयः। पद्मगर्भवदरुणे ईक्षणे नेत्रे यस्य
नीलोत्पलवं दलवत् श्यामं १३ लसत्पंकजस्य किंजल्कवत्पीते कौशेये वाससी यस्य श्रीवत्सो लांछनं वक्ष
सि यस्य भ्राजत्कौस्तुभेनामुक्ता संश्लिष्टा कंधरा यस्य १४ मत्तद्विरेफाणां कलो मधुरो घोषो निर्यस्यां तया परी
तं व्याप्तं। परार्ध्यानि अमूल्यानि हारादीनि यस्य १५ कांचीगुणेनोल्लसंती श्रोणी यस्य। भक्तानां हृदयांभो

प्रसन्नवदनांभोजं पद्मगर्भारुणेक्षणं नीलोत्पलदलश्यामं शंखचक्रगदाधरं १३ लसत्पंकजकिंज
ल्कपीतकौशेयवाससं श्रीवत्सवक्षसं भ्राजत्कौस्तुभामुक्तकंधरम् १४ मत्तद्विरेफकलया परी
तं वनमालया परार्ध्यहारवलयकिरीटांगदनूपुरम् १५ कांचीगुणोल्लसच्छ्रोणिं हृदयांभोज
विष्टरम् दर्शनीयतमं शांतं मनोनयनवर्द्धनम् १६ अपीच्यदर्शनं शश्वत्सर्वलोकनमस्
स्कृतम् संतं वयसि कैशोरे भृत्यानुग्रहकातरम् १७ कीर्तन्यतीर्थयशसं पुण्यश्लोकयशस्क रामः ११०
रं ध्यायेद्देवं समग्रांगं यावन्न च्यवते मनः १८

जमेव विष्टरमासनं यस्य। भक्तानां मनोनयनानि वर्धयति हर्षयतीति तथा १६ अपीच्यमिति सुंदरं भक्तिवि
षयं दर्शनं यस्य। कैशोरे तारुण्ये वयसि स्थितं। भृत्यानामनुग्रहे कातरं व्यग्रं १७ कीर्तन्यं कीर्तनार्हं ती
र्थं यशो यस्य। पुण्यश्लोकाः बलिप्रमुखास्तेषां यशस्करं। समग्राण्यंगानि यस्मिन्। न च्यवते नापयाति १८
न पर्यंति

नि
प्रसन्नानि वक्त्राणि अरुणानि लोचनानि येषु तैः मद्रूपैः साकं सह नित्यं परमेश्वरानुभवसुखं भक्तावधिकमिति भावः
३५ आत्मानंदस्वरूपं भावीत्याह। तैरिति। दर्शनीया मनोहरा अवयवा मुखनेत्रादयो येषु तैः। हृतः आत्मा
चित्तं येषां। हृता आकृष्टाः प्राणाश्चेंद्रियाणि येषां तान् भजतः। अनिच्छतः इच्छाहीनानपि अपवर्गं गतिं मुक्तिं प्र

ते
पश्यंति मे रुचिराण्यंब संतः प्रसन्नवक्त्रारुणलोचनानि रूपाणि दिव्यानि वरप्रदानि साकं वाचं स्पृ
हणीयां वदंति ३५ तैर्दर्शनीयावयवैरुदारविलासहासेक्षितवामसूक्तैः हृतात्मनो हृतप्राणांश्
च भक्तिरनिच्छतो मे गतिमण्वीं प्रयुंक्ते ३६ अथो विभूतिं मम मायाविनस्तामैश्वर्यमष्टांगमनुप्र
वृत्तां श्रियं भागवतीं वास्पृहयंति भद्रां परस्य मे तेऽश्नुवते तु लोके ३७

युंक्ते प्रापयति। कैः साधनैः हृतात्मनः उदारैः विलासादिभिः। तत्र विलासो लीला। वामं मनोहरं। सूक्तं मधुरं भाष
णं ३६ विभूत्यादिकं च तत्राधिकमित्याह। अथो अविद्यानिवृत्त्यनंतरं विभूतिं सत्यलोकादिगतां भोगसं
पत्तिं। अणिमाद्यष्टांगमैश्वर्यं अनुप्रवृत्तं भक्तिमनुसृतं एव प्राप्त[illegible]मपि भागवतीं च श्रियं वैकुंठस्थां सं
पत्तिं स्पृहयंति ते यद्यपि न स्पृहंतीत्यर्थः। तथापि तु लोके वैकुंठे अश्नुवते प्राप्नुवंत्येव ३७

भा०टी० नन्वेवं तर्हि लोकत्वाविशेषात्स्वर्गादिवद्भोग्यानां कदाचिद्विनाशः स्यात्तत्राह। नेशांतरूपे प्रशांतं शुद्ध

११९ सत्वं तद्रूपे वैकुंठे मत्पराः कदाचिदपि न नंक्ष्यंति भोग्यहीना न भवंति। अनिमेषो हेतिः मदीयं कालचक्रं च नो लेढि ता

९८ न् ग्रसति। तत्र हेतुः येषामिति। सुतइव स्नेहविषयः सखेव विश्वासास्पदं। गुरुरिवोपदेष्टा। सुहृदिव हितका
री। इष्टं देवमिव पूज्यः। एवं सर्वभावेन ये मां भजंति तान् मदीयं कालचक्रं न ग्रसतीत्यर्थः ३८ एवंभूतां तु
त

न कर्हिचिन्मत्पराः शांतरूपे नंक्ष्यंति नो ऽनिमिषो लेढि हेतिः येषामहं प्रिय आत्मा सुतश्च स
खा गुरुः सुहृदो दैवमिष्टं ३८ इमं लोकं तथैवामुमात्मानमुभयायिनं आत्मानमनु ये चेह
ये रायः पशवो गृहाः ३९ विसृज्य सर्वानन्यांश्च मामेकं विश्वतोमुखं भजंत्यनन्यया भक्त्या तो
न्मृत्योरतिपारये ४० नान्यत्र मद्भगवतः प्रधानपुरुषेश्वरात् आत्मनः सर्वभूतानां भयं तीव्रं नि
वर्त्तते ४१ राम

११९

मुक्तिं एकांतभक्तेभ्यो ददामीत्याह इममिति द्वाभ्यां। उभयायिनं लोकद्वयगामिनं। आत्मानं सोपाधिकं अनु ये
पुत्रकलत्रादयः ये च पश्वादयः रायः धनानि। अन्यांश्च परिग्रहान् मृत्योः संसारात् अतिपारये। अतितारया
मि ४० अभक्तानां तु न कथंचिदपि मोक्ष इत्याह। नेति। मद्भगवतो न्यत्र भगवतो मत्तो विना सर्वभूताना
मात्मनः भगवदादिविशेषेणत्रयेण सामर्थ्यं निरपेक्षत्वं हितकारित्वं चोक्तं ४१

म तस्य पुण्यपापाख्ये द्वे गती तत्र पापगतिमाह यमदूताविति आदिना यावत्समाप्ति सरत्नसंसक्रोधमीक्षणं ययोस्तौ दृष्ट्वा
१९ आहृत्य निरुध्य २० तयोस्तर्जनैर्निर्भिन्नं हृदयं यस्य आर्त्तः सन् चलतीति द्वितीयेनान्वयः २१ क्षुत्तृड्भ्यां परीतो
व्याप्तः तप्ता वालुका यस्मिन् निर्गतम् आश्रमो विश्रामस्थानम् उदकं च यस्मिन् २२ यमसादनं नीतो भवति २३ त

यमदूतौ तदा प्राप्तौ भीमौ सरभसेक्षणौ स दृष्ट्वा त्रस्तहृदयः शकृन्मूत्रं विमुंचति १९ यातनादेह आवृत्य
पाशैर्बद्ध्वा गले बलात् नयतो दीर्घमध्वानं दंड्यं राजभटा यथा २० तयोर्निर्भिन्नहृदयस्तर्जनैर्जातवेप
थुः पथि श्वभिर्भक्ष्यमाण आर्त्तोघं स्वमनुस्मरन् २१ क्षुत्तृट्परीतोर्कदवानलानिलैः संतप्यमा
नः पथि तप्तवालुके कृच्छ्रेण पृष्ठे कशया च ताडितश्चलत्यशक्तोपि निराश्रमोदके २२ तत्र तत्र पत
न् श्रांतो मूर्छितः पुनरुत्थितः यथा पापीयसा नीतस्तमसा यमसादनं २३ योजनानां सहस्राणि
नवतिं नव चाध्वनः त्रिभिर्मुहूर्त्तैर्द्वाभ्यां वा नीतः प्राप्नोति यातनाः २४ आदीपनं स्वगात्राणां वेष्टयि
त्वोल्मुकादिभिः आत्ममांसादनं क्वापि स्वकृत्तं परतोपि वा २५

त्रैव विशेषमाह अध्वनः संबंधिनां योजनानां नवतिं नव सहस्राणि पापाधिक्ये द्वाभ्यां नीतः सन् २४ यातनाः
संक्षेपतो दर्शयति चतुर्भिः आदीपनं प्रज्वलनं प्राप्नोति स्वेन कृत्तं अन्येन वा कृत्तं छिन्नं यत्स्वस्य मांसं तस्य भ
क्षणमित्यर्थः २५

भा०त०

१२० आत्मनो वैशसं पीडां २६ भिदापनं भेदापनं २७ २८ न चैतदसंभावितं अत्रापि दृश्यमानत्वादित्याह २९ अत्रैवेति
उभयं कुटुंबं स्वदेहं च ३० पापार्जितं धनं भुंजते बहवः कर्तैव नरकं यातीत्याह एक इति भूतद्रोहेण यत्स्वतं ततस्थूल
कलेवरं इहैव हित्वा कुशलादितरत्पापं तदेव पाथेयं भोग्यं यस्य ३१ ननु कुटुंबपोषणपापमपि विहाय गच्छतु तत्रा

जीवतश्चांत्राभ्युद्धारः श्वगृध्रैर्यमसादने सर्पवृश्चिकदंशाद्यैर्दशद्भिश्चात्मवैशसं २६ कृंतनं चावय
वशो गजादिभ्यो भिदापनं पातनं गिरिशृंगेभ्यो रोधनं चांबुगर्तयोः २७ यास्तामिस्रांधतामिस्ररौ
रवाद्याश्च यातनाः भुंक्ते नरो वा नारी वा मिथः संगेन निर्मिताः २८ अत्रैव नरकः स्वर्ग इति मातः प्रच
क्षते या या तना वै नारक्यस्ता इहाप्युपलक्षिताः २९ एवं कुटुंबं बिभ्राण उदरंभर एव वा विसृज्ये
होभयं प्रेत्य भुंक्ते तत्फलमीदृशं ३० एकः प्रपद्यते ध्वांतं हित्वेदं स्वं कलेवरं कुशलेतरपाथेयो भू
तद्रोहेण यद्भृतं ३१ दैवेनासादितं तस्य शमलं निरये पुमान् भुंक्ते कुटुंबपोषस्य हृतवित्त इवातुरः १२०
३२ केवलेन ह्यधर्मेण कुटुंबभरणोत्सुकः याति जीवोंधतामिस्रं चरमं तमसः पदं ३३

ह दैवेनेति तस्य कुटुंबपोषणस्य शमलं पापं दैवेन ईश्वरेण प्रापितं भुंक्ते ३२ ननु कुटुंबपोषणं वि
हितमेव तत्राह केवलेनेति तमसो नरकस्य चरमं पदं स्थानं ३३ ओं नमो भगवते वासुदेवाय

पुनर्मनुष्यशरीरप्राप्तिप्रकारमाह नरलोकस्य मनुष्यदेहस्य प्राप्तेरधस्तात् अर्वाक् यावत्यो यातनाः आदिशब्दे
न श्वशूकरादियोनयश्च ताः सर्वाः क्रमेण संप्राप्य भोगेन क्षीणपापः शुचिः सन् अत्र च पुनर्नरत्वं प्राप्नोतीत्यर्थः
३४ तृतीये त्रिंशतितमः एकत्रिंशे विमिश्रैस्तु पुण्यपापैरिहांतरा मनुष्ययोनिसंप्राप्तिर्वर्ण्यते राजसी गतिः
१ पुनराव्रजेदित्युक्तं तदेव विशेषतो दर्शयति कर्मणा पूर्वकृतेन दैवं ईश्वरः तदेव नेत्रं नेतृ प्रवर्तकं यस्य प्रविष्टो

अधस्तान्नरलोकस्य यावतीर्यातनादयः क्रमशः समनुक्रम्य पुनरत्राव्रजेच्छुचिः ३४ इति श्रीभाग
वते महापुराणे तृतीयस्कंधे त्रिंशत्तमोध्यायः श्रीभगवानुवाच कर्मणा दैवनेत्रेण जंतुर्देहो
पपत्तये स्त्रियाः प्रविष्ट उदरं पुंसो रेतःकणाश्रयः १ कललं त्वेकरात्रेण पंचरात्रेण बुद्बुदं दशाहेन तु
कर्कंधूः पेश्यंडं वा ततः परं २ मासेन तु शिरो द्वाभ्यां बाह्वंघ्र्याद्यंगविग्रहः नखलोमास्थिचर्माणि लिं कु
गच्छिद्रोद्भवस्त्रिभिः ३ चतुर्भिर्धातवः सप्त पंचभिः क्षुत्तृडुद्भवः षड्भिर्जरायुणा वीतः कुक्षौ भ्राम्यति दक्षिणे ४

भवति १ कललं शुक्रशोणितं मिश्रितं भवति बुद्बुदं वर्तुलं भवति कर्कंधुर्बदरीफलं तदाकारं कठिनं पेशी मांस
पिंडाकारं अंडं वा योन्यंतरे २ बाह्वंघ्र्याद्यंगानां विग्रहो विभागः लिंगं च छिद्राणि च तेषामुद्भवः ३ जरायुणा ग
र्भवेष्टनेन वीतः प्रावृतः ४

मातुः जग्धेन नत्रसिते नान्नेन पानाद्यैश्च एधमाना धातवो यस्य तं तन्मांसं नवो यस्मिन् तस्मिन्नसंमते गर्त्ते शेते तथा च मार्कंडेयपुराणे नाडी चाप्यायनी नाम नाभ्यां तस्य निबध्यते स्त्रीणां तथांत्रसुषिरे सा निबद्धोपजायते क्रमंते भुक्तपीतानि स्त्रीणां गर्भोदरे तथा तैराप्यायितदेहो सौ जंतुर्वृद्धिमुपैति वै इति ५ तत्रत्यैः कृमिभिः खादितैः सो कुमार्यति

मातुर्जग्धान्नपानाद्यैरेधद्धातुरसंमते शेते विण्मूत्रयोर्गर्त्ते स जंतुर्जंतुसंभवे ५ कृमिभिः क्षतसर्वांगः सौकुमार्यात्प्रतिक्षणं मूर्च्छामाप्नोत्युरुक्लेशस्तत्रत्यैः क्षुधितैर्मुहुः ६ कटुतीक्ष्णोष्णलवणरूक्षाम्लादिभिरुल्बणैः मातृभुक्तैरुपस्पृष्टः सर्वांगोत्थितवेदनः ७ उल्बेन संवृतस्तस्मिन्नंत्रैश्च बहिरावृतः आस्ते कृत्वा शिरः कुक्षौ भुग्नपृष्ठशिरोधरः ८ अकल्पः स्वांगचेष्टायां शकुंत इव पंजरे तत्र लब्धस्मृतिर्दैवात् कर्म जन्मशतोद्भवं स्मरन् दीर्घमनुच्छ्वासं शर्म किं नाम विंदते ९ आरभ्य सप्तमान्मासाल्लब्धबोधोपि वेपितः नैकत्रास्ते सूतिवातैर्विष्ठाभूरिव सोदरः १० १२१

कोमलत्वेन क्षतानि सर्वाण्यंगानि यस्य ६ उल्बणैर्दुःसहैः सर्वेष्वंगेषु उत्थिता वेदना यस्य सः आस्ते इत्यन्तरेणान्वयः ७ उल्बेन जरायुणा भुग्नं कुटिलीकृतं पृष्ठं शिरोधरा ग्रीवा च यस्य ८ दैवात्पूर्वकर्मवशात् लब्धा स्मृतिर्येन सः दीर्घं चिरंतनमनुच्छ्वासं यथा भवति तथा तत्र स्थितः सन् ९ सूतिहेतुभिर्वातैर्वेपितः सोदरः समानोदरजन्मा विष्ठाजः कृमिरिव १०

नाथमानो याचमानः सः उपतप्यमान इति वा ऋषिः देहात्मदर्शी भीतः पुनर्गर्भवासात् सप्तवध्रयो बंधनभूता धातवो यस्य विक्लवया आकुलया ११ उपसन्नं जगत् रक्षितुं स्वेच्छया गृहीतनानामूर्तेर्भगवतश्चरणारविंदं मकुतोभयं सोहं शरणं व्रजामि भुवि चलत् इति श्रीकृष्णावताराभिप्रायेण असतो मे अनुरूपा योग्या येन ईदृशी गतिर्गर्भवासलक्षणा गतिर्दर्शिता तस्य १२ ननु कोसौ यं शरणं व्रजसि को वा तव तस्य विशेषः येन सेव्यसेवकत्वमित्यपेक्षायामाह अत्रमा

नाथमान ऋषिर्भीतः सप्तवध्रिः कृतांजलिः स्तुवीत तं विक्लवया वाचा येनोदरेर्पितः ११ जीव उवाच तस्योपसन्नमवितुं जगदिच्छयात्तनानातनोर्भुवि चलच्चरणारविंदं सोहं व्रजामि शरणं ह्यकुतोभयं मे येनेदृशी गतिरदर्श्यसतोनुरूपा १२ यस्त्वत्र बद्ध इव कर्मभिरावृतात्मा भूतेंद्रियाशयमयीमवलंब्य मायां आस्ते विशुद्धमविकारमखंडबोधमातप्यमानहृदयेवसितं नमामि १३

तु देहे भूतेंद्रियाशयमयीं देहाद्याकारपरिणतां मायामवलंब्य आश्रित्य कर्मभिरावृतस्वरूप इव बद्ध इव च य आस्ते सोहं यस्तु अत्रैवास्ते तं नमामि कथंभूतमित्यपेक्षायां तु शब्दोक्तं विशेषं दर्शयति आतप्यमाने हृदयेऽवसितं प्रतीतं एवमप्यविकारं कुतः विशुद्धं निरुपाधिं तत्कुतः अखंडो बोधो यस्य तं १३

भा० द०
१२२

ननु त्वमपि नश्यतः शुद्ध एव असंगो ह्ययं पुरुष इत्यादिश्रुतेः तत्कथं युवयोरेषं विशेषस्तत्राह यः पंचभिर्भूतैररचिते शरीरे
अयथाभिथ्यैव छन्नः न वस्तुतः यतस्तेन शरीरेण रहितः असंगः अतो यथैव इंद्रियगुणार्थचिदात्मकः इंद्रियाणि गुणा
श्च अर्थाश्च चिदाभासश्च तदात्मकः सोहं तं वंदे कथंभूतं तेन शरीरेण अविकुंठो महिमा यस्य तं अवगुंठेति पाठे अव
सन्नं गुंठनमावरणं यस्य स महिमा यस्येत्यर्थः तत्र हेतुः प्रकृतिपुरुषयोः परं नियंतारं कुतः ऋषिं सर्वज्ञं विधात्रा

यः पंचभूतरचिते रहितः शरीरे छन्नो यथेंद्रियगुणार्थचिदात्मकोहं तेनाविकुंठमहिमानमृषिं तमेनं
वंदे परं प्रकृतिपूरुषयोः पुमांसं १४ यन्मायया उरुगुणकर्मनिबंधनेस्मिन् सांसारिके पथि चरंस्तदभिश्रमे
ण नष्टस्मृतिः पुनरयं प्रवृणीत लोकं युक्त्या कया महदनुग्रहमंतरेण १५

क्लिमित्यर्थः विद्याविद्याकृतो विशेष इति भावः १४ ननु ज्ञानेनायं बंधो निवर्त्स्यते किं परमेश्वरवंदनेन तत्राह यस्य १२२
मायया नष्टस्मृतिः सन् संसारसंबंधिनि पथि तदभिश्रमेण तत्कृतेन क्लेशेन चरन् अयं जीवः महतस्तस्यैवेश्वरस्या
नुग्रहं विना पुनः कया युक्त्या लोकं निजस्वरूपं प्रवृणीत लभेत् अभिश्रमहेतुत्वेन पंथानं विशिनष्टि उरूणि
गुणनिमित्तानि कर्माणि नितरां बंधनानि यस्मिन् ईश्वरस्य प्रसादं विना ज्ञानाभावात्स एव सेव्य इत्यर्थः १५

ईश्वर एव ज्ञानद इत्युपपादयन्नाह यदेतत्त्रिकालविषयं ज्ञानं तत्तं विना कतमो मय्यदधात् न कोपि किंतु सदैव
ईश्वर एव अन्यः प्रकृष्टो जीवो दधातु नेत्याह जीवरूपां कर्मपदवीं अनुवर्तमाना वयमिति तद्व्यतिरेकेण न कोपि स
मर्थ इत्यर्थः अन्यस्यासंभवमुक्त्वा तस्य संभवमाह स्थिरेषु चरेषु च अंतर्यामिरूपेणानुवर्तितो अंशो येन तं भ
जेम १६ स्वदुःखं विज्ञापयन्नाह देहीति अन्यदेहविवरे योसृग्विण्मूत्रकूपस्तस्मिन् पतितस्तत्र जठराग्निना
मातुरुदरकुहरे

ज्ञानं यदेतददधात्कतमः स देवस्त्रैकालिकं स्थिरचरेष्वनुवर्तितांशः तं जीवकर्मपदवीमनुवर्तमानास्ता
पत्रयोपशमनाय वयं भजेम १६ देह्यन्यदेहविवरे जठराग्निनासृग्विण्मूत्रकूपपतितो भृशतप्तदेहः इच्छ
न्नितो विवसितुं गणयन्स्वमासान्निर्वास्यते कृपणधीर्भगवन्कदा नु १७ येनेदृशीं गतिमसौ दशमास्य
ईश संग्राहितः पुरुदयेन भवादृशेन स्वेनैव तुष्यतु कृतेन स दीननाथः को नाम तत्प्रति विनांजलिमस्य कु र्यात् १८

दग्धं तप्तो देहो यस्य अत एव कृपणधीः इतो विवरात् विवसितुं निर्गंतुमिच्छन् स्वमासान् असौ कदा नु अहो बहि
र्निर्वास्यते १७ तत्कृतमुपकारं स्मरन्नाह येनेदृशीं गतिं ज्ञानं भवादृशेन निरूपमेनेत्यर्थः स्वकृतेनैव स्वयं
तुष्यतु अंजलिमात्रं विना तत्कृतोपकारे प्रत्युपकारं कः कुर्यादित्यर्थः १८

तु ८

भा०त०
१२३

ईदृशीं गतिमित्यनेन ज्ञात्यंतरविलक्षणं ज्ञानं प्रापितवानित्युक्तं तदेव वैलक्षण्यमाह पश्यतीति अयमपरः पश्वादिः स
सप्तवध्रिर्जीवः स्वदेहे शारीरके शरीरजन्ये सुखदुःखे केवलं ननु पश्यति अहं पुनर्यद्दृष्ट्या धिषणया यद्दत्तेन विवेक
ज्ञानेन इमं शरीरी देहमित्युपलक्षणं शमदमादियुक्तशरीरवान् आसन्नजनवं तमेव च पुराणं अनादिं पुरुषं पूर्णं बहिश्च
हृदि च पश्ये पश्येयम् इत्यामीत्यन्वयः अकथंअपरोक्षतया प्रतीतं चैत्यमिव अहंकारास्पदं तोकारमिवेत्यर्थः १९ वि

पश्यत्ययं धिषणया ननु सप्तवध्रिः शारीरके दमशरीर्यपरः स्वदेहे यत्सृष्टयासं तमहं पुरुषं पुराणं पश्ये ब
हिर्हृदि च चैत्यमिव प्रतीतं १९ सोऽहं वसन्नपि विभो बहुदुःखवासं गर्भान्न निर्जिगमिषे बहिरंधकूपे यत्रो
पयातमुपसर्पति देवमाया मिथ्या मतिर्यदनु संसृतिचक्रमेतत् २०

वेकज्ञानकृतं संसारोद्वेगमनुवदन् मोक्षमार्गमेवाध्यवस्यति सोहमिति द्वाभ्यां हे विभो बहुदुःखवासं यथा गर्भे व १२३
सन्नपि सोहं गर्भाद्बहिर्न निर्गंतुमिच्छामि तत्र हेतुः अंधकूपप्राये यत्र बहिरुपयातं प्राणिनं देवस्य तव माया उप
सर्पति व्याप्नोति यदनु यां मायामनु मिथ्या मतिर्देहे अहंबुद्धिः संसृतिचक्रं च कलत्रबंधुजनसंबंधादुपसर्पति २०

तस्मादत्रैव स्थितोपि विगतविक्लवः अव्याकुलः सन् सुहृदा आत्मना सारथिरूपया बुद्ध्येव आत्मानं तमसः संसारादुद्ध
रिष्यामि अनेकरंध्रं नानागर्भवासरूपमेतत् व्यसनं दुःखं यथा मे मा त्रविष्यत् न भविष्यति तथा कात्र तव साधनसाम
ग्रीत्याह उपसादितो हृदयं प्रापितो विष्णोः पादो येन मया सः २१ दशमासाः परिच्छेदका यस्येति प्रसूतिपूर्वक्षणे पल्लह
पां ऋषिर्जीवः सद्यस्तत्क्षणमेव अवाचीनमवाङ्मुखं सूतिहेतुर्मारुतः क्षिपति नुदति २२ अवसृष्टः अधः क्षिप्तः सन्

तस्मादहं विगतविक्लव उद्धरिष्य आत्मानमाशु तमसः सुहृदात्मनैव भूयो यथा व्यसनमेतदनेकरंध्रं मा मे भविष्य
दुपसादितविष्णुपादः २१ श्रीकपिल उवाच एवं कृतमतिर्गर्भे दशमास्यः स्तुवन्नृषिः सद्यः क्षिपत्यवा
चीनं प्रसूत्यै सूतिमारुतः २२ तेनावसृष्टः सहसा कृत्वावाक्शिर आतुरः विनिष्क्रामति कृच्छ्रेण निरुच्छ्वा
सो हतस्मृतिः २३ पतितो भुवि विण्मूत्रे विष्ठाभूरिव चेष्टते रोरूयति गते ज्ञाने विपरीतां गतिं गतः २४ पर
च्छंदं न विदुषा पुष्यमाणो जनेन सः अनभिप्रेतमापन्नः प्रत्याख्यातुमनीश्वरः २५ शायितोऽशुचिपर्यंके जंतुः स्वे
दजदूषिते नेशः कंडूयनेऽङ्गानामासनोत्थानचेष्टने २६

२३ रोरूयति रोरूयते २४ परस्य छंदमभिप्रायमविदुषा मनभिप्रेतं स्तन्यार्थं रोदने उदरव्यथां प्रकल्प्य निंबरस
पानं उदरव्यथया रोदने स्तनपानमित्यादि २५ आसनोत्थानचेष्टने वा नीशः सन् रोरूयतीत्यनुषंगः २६

आमा कोमलत्वक्कृयस्यतं गर्भेजातंज्ञानं विगतंयस्य २७ त्रैत्र एवं पंचवर्षाणि ततःपौगंडं यौवनादर्वाक् तत्र चाध्यय
नादिदुःखं यौवनं च दुःखमाह सहै त्रिभिः अलब्धाभीप्सितत्वेन शुचार्पितो व्याप्तः अज्ञानाद्धिद्दीप्तोमन्युर्यस्यसः
२८ देहेन सह एव वर्द्धमानेन अभिमानेन मन्युना च विग्रहं विरोधं करोति आत्मनो नाशनाशाय २९ अज्ञानं प्रपंचय
ति भूतैरारब्धे देहेऽसद्ग्रहो अहं ममेति मतिं करोति ३० तदर्थं देहार्थं यत्र येन कर्मणा बद्धः यो देहः अनुयाति पुनः पुन

तुदंत्यामत्वचं दंशा मशका मत्कुणादयः रुदंतं विगतज्ञानं कृमयः कृमिकं यथा २७ इत्येवं शैशवं भुक्त्वा
दुःखं पौगंडमेव च अलब्धाभीप्सितोऽज्ञानादिद्धमन्युः शुचार्पितः २८ सह देहेन मानेन वर्द्धमानेन म
न्युना करोति विग्रहं कामी कामिष्वंताय चात्मनः २९ भूतैः पंचभिरारब्धे देहे देह्यबुधोऽसकृत् अहं ममे
त्यसद्ग्राहः करोति कुमतिर्मतिं ३० तदर्थं कुरुते कर्म यद्बद्धो याति संसृतिं योऽनुयाति ददत्क्लेशमविद्या
कर्मबंधनः ३१ यद्यसद्भिः पथि पुनः शिश्नोदरकृतोद्यमैः आस्थितो रमते जंतुस्तमो विशति पूर्ववत् ३२ १२४
सत्यं शौचं दया मौनं बुद्धिर्ह्रीः श्रीर्यशः क्षमा शमो दमो भगश्चेति यत्संगाद्याति संक्षयं ३३

शयाति अनुवर्त्तत इति वा कुतः अविद्याकर्मभ्यां बध्यत इति तथा ३१ यद्यसद्भिरास्थितः अधिष्ठितः सन् ते
षां पथि रमते पथि सन्मार्गे आस्थितोऽपि यद्यसद्भिः सह रमत इति वा तर्हि यातना देह आद्यत्येत्यादिना पूर्वोक्त
प्रकारेण नरकं प्रविशति ३२

ऽसत्संगं निंदति सत्यमिति त्रिभिः ३३ खंडितात्मसु देहात्मबुद्धिषु योषितां क्रीडामृगवदधीनेषु ३४ यथा योषित्संगिनां संग
तो बंधः तथान्यप्रसंगतो न भवेत् ३५ योषित्संगस्यानर्थहेतुतां प्रपंचयति प्रजापतिरिति सप्तभिः रोहिद्भूतां मृगीभूतां स्वसु
ऋक्षरूपी मृगाकारः सन् हतत्रपो निर्लज्जः ३६ तेन ब्रह्मणा सृष्टा मरीच्यादयः तैः सृष्टाः कश्यपादयः तैरपि देवमनु
ष्यादयः तेषु को नु पुमान् अखंडितधीः अनाकृष्टमनाः ३८ दिग्जयिनः शूरानपि ३७ प्रतिलब्ध आत्मभूपो लक्ष्मीर्ये

तेष्वशांतेषु मूढेषु खंडितात्मस्वसाधुषु संगं न कुर्याच्छोच्येषु योषित्क्रीडामृगेषु च ३४ न तथास्य भवेन्मोहो बं
धश्चान्यप्रसंगतः योषित्संगाद्यथा पुंसो यथा तत्संगिसंगतः ३५ प्रजापतिः स्वां दुहितरं दृष्ट्वा तद्रूपधर्षितः रो
हिद्भूतां सोऽन्वधावदृक्षरूपी हतत्रपः ३६ तत्सृष्टसृष्टसृष्टेषु को न्वखंडितधीः पुमान् ऋषिं नारायणमृते यो
षिन्मय्येह मायया ३७ बलं मे पश्य मायायाः स्त्रीमय्या जयिनो दिशां या करोति पदाक्रांतान् भ्रूविजृंभेण केवलं ३८ सं
गं न कुर्यात्प्रमदासु जातु योगस्य पारं परमारुरुक्षुः मत्सेवया प्रतिलब्धात्मलाभो वदंति या
निरयद्वारमस्य ३९ योपयाति शनैर्माया योषिद्देवविनिर्मिता तामीक्षेतात्मनो मृत्युं तृणैः कूपमिवावृतं ४०

यां मन्यते पतिं मोहान्मन्मायामृषभायतीं स्त्रीत्वं स्त्रीसंगतः प्राप्तो वित्तापत्यगृहप्रदं ४१
न अस्य मुमुक्षोर्या प्रमदाः निरयद्वारं वदंति योगिनः ३९ शनैः शुश्रूषादिमिषेण उपयाति समीपमायाति या योषि
द्रूपा मायैत्युक्तं प्रतिकूलं इक्षेत ४० मुमुक्षुः स्त्रियं प्रत्येत देवाह द्वाभ्यां यामिति ऋषभायतीं पुरुषवदाचरंतीं मम मायां
वित्तादिप्रदं पतिं मन्यते स्त्रीसंगतः अंतकाले स्त्रीध्यानेन स्त्रीत्वं प्राप्तो जीवः ४०

तांपत्यादिरूपंमर्त्यंविजानीयात् मृगयोर्लुब्धकस्य गायनमनुकूलत्वेनप्रतीयमानमपि यथामृगस्यमृत्युः ४१ तदेवंजीवस्य
संसृतिः प्रपंचिता तत्र यतस्य कर्मवशेन लोकाल्लोकांतरगमनंजन्ममरणं चोक्तं तत्रैवंशंक्यते ननुव्यापकस्य कथंलोकाल्लो
कांतरगमनंनित्यस्य च कथंजन्ममरणे भोगेन कर्मक्षये च सति जन्ममरणे चेष्येते तत्कुतः पुनरपि तस्य कर्मसंभव इति इत्या
ह लोकाल्लोकांतरगमनंकर्म च संभवतीत्याह देहेनेति जीवस्योपाधितया भूतेन जातेन लिंगदेहेन लोकांतरमनुव्रजन् अ

तामात्मनोविजानीयात्प्रत्यग्गृहात्मकं दैवोपसादितंमृत्युं मृगयोर्गायनंयथा ४१ देहेनजीवभूतेनलोका
ल्लोकमनुव्रजन् भुंजानएवकर्माणिकरोत्यविरतंपुमान् ४२ जीवोस्यानुगतोदेहोभूतेंद्रियमनोमयः तन्निरो
धोस्यमरणमाविर्भावस्तुसंभवः ४३ द्रव्योपलब्धिस्थानस्यद्रव्येक्षायोग्यतायदा तत्पंचत्वमहंमानादु
त्पत्तिर्द्रव्यदर्शनं ४४ यथाक्ष्णोर्द्रव्यावयवदर्शनायोग्यतायदा तदैवचक्षुषोद्रष्टुर्द्रष्टृत्वायोग्यतानयोः ४५

विरतंभिककर्माणि करोतीति कर्मणामसमाप्तिरुक्ता ४२ जन्ममरणसंभवमाह जीवोजीवोपाधिर्लिंगदेहः अस्यात्मनोनुगतः अ
नुवर्ती भूतेंद्रियमनोमयः स्थूलभूतादिविकारो देहः भोगायतनं तयोर्निरोधः कार्यायोग्यता तदस्यजीवस्य मरणमुच्यते आ
विर्भावस्तु संभवो जन्मोच्यते ४३ एतदेव दृष्टांतेनस्पष्टयति द्रव्योपलब्धिस्थानस्य नेत्रगोलकादेर्द्रव्येक्षायां रूपादिदर्शने
काचकामलादिदोषेण यदा अयोग्यता भवति तदैव चक्षुष इंद्रियस्याप्ययोग्यता अनयोस्त्थानचक्षुषोर्यदायोग्यता तदैव
द्रष्टुर्जीवस्य द्रष्टृत्वायोग्यता एवं स्थूलदेहवैकल्ये लिंगस्य वैकल्यं तदेव जीवस्य मरणं न स्वतइत्यर्थः ४४ क्वचिदेकश्लोको
धिकः पठ्यते तत्रायमर्थः द्रव्योपलब्धिस्थानस्य स्थूलशरीरस्य द्रव्येक्षायां यदायोग्यता तत्पंचत्वं मरणं अहंमानात् इदमहमे
वेत्यभिमानात् द्रव्यस्य स्थूलशरीरस्य दर्शनमुत्पत्तिः अक्ष्णोर्गोलकयोर्द्रव्यावयवस्य रूपादेर्दर्शनेयोग्यता शेषंसमानं ४५

तस्मान्नकार्यःसंत्रासोनकार्पण्यंनसंभ्रमः॥ बुध्वाजीवगतिंधीरोमुक्तसंगश्चरेदिह ४६

यस्मान्नवस्तुतो जन्ममरणादि तस्मात् मरणात्संत्रासोनकार्यः जीवने च न कार्पण्यं दैन्यं कार्यं संभ्रमश्च जीवनप्रयत्ने ४६
ननु सर्वथा मुक्तसंगत्वे कथंजीवितमत आह सम्यक् पश्यति विचारयतीति सम्यक् दर्शना तया बुध्या मायाविरचिते लोके
कलेवरंन्यस्य विक्षिप्य तस्मिन्नासक्तिं त्यक्त्वा चरेदित्यर्थः ४७ तृतीये एकत्रिंशे द्वात्रिंशेस्मात्त्विकैर्धर्मैरूर्ध्वंगतिरु
दीर्यते तत्वज्ञानविहीनस्य ततश्च पुनरागतिः तदेवं पापकर्मणो गतिरुक्ता इदानीं काम्यकर्मणोगतिमाह अथेतिच

सम्यग्दर्शनयाबुध्यायोगवैराग्ययुक्तया मायाविरचितेलोकेचरेन्न्यस्यकलेवरं ४७ इतिश्रीभागवते
महापुराणेतृतीयस्कंधेकापिलेयेएकत्रिंशोध्यायः श्रीकपिलउवाच अथयोगृहमेधीयान्धर्मानेवा
वसन्गृहे काममर्थंचधर्मांश्चदोग्धिभूयःपिपर्तितान् १ सचापिभगवद्धर्मात्काममूढःपराङ्मुखः यज
तेक्रतुभिर्देवान्पितॄंश्चश्रद्धयान्वितः २ तच्छ्रद्धयाक्रांतमतिःपितृदेवव्रतःपुमान् गत्वाचांद्रमसंलोकंसो
मपाःपुनरेष्यति ३ यदाचाहींद्रशय्यायांशेतेनंतासनोहरिः तदालोकालयंयांतितएतेगृहमेधिनां ४ ये

तुभिः योगृहएवावसन्स्वान्धर्मान्दोग्धि दोहमाह काममर्थं च तान् दुग्ध्वा न् धर्मान् भूयः पिपर्ति पूरयति अनुतिष्ठति
सोपि भगवदाराधनरूपाद्धर्मात्पराङ्मुखः सन् प्राकृतानपि देवान् पितॄंश्च यजते २ ततः किं तत्राह तेषां श्रद्धयाक्रांताव्या
प्तामतिर्यस्य पित्रर्थं देवार्थं च व्रतं नियमो यस्य सोमपाः तत्र सोमं पीत्वेत्यर्थः ३ लोके तिष्ठत्यपि पुण्यक्षयादपायात्
मुक्तलोकानामपि लयमाह यदा चाहरहः प्रलये ४

भा०टी०
१२६

भगवद्धर्मनिष्ठानांतत्प्राप्तिमेवगतिमाह त्रिभिः येतुकामार्थप्रयोजनायस्वधर्मान्नदुह्यंतिनदुहंतिनिःसंगाअनासक्ताः
न्यस्तानिईश्वरेर्पितानिकर्माणियैः ५।६ विश्वतोमुखंपरिपूर्णंपुरुषंयांति तथाचश्रुतिः सूर्यद्वारेणतेविरजाःप्रयांति यत्रा
मृतःपुरुषोह्यव्ययात्मेति प्रकृतिमुपादानकारणंउत्पत्त्यंतभावनंनिमित्तकारणं ७ परमेश्वरदृष्ट्या हिरण्यगर्भोपासकाना
मपिक्रमेणतत्प्राप्तिमाह द्विपरार्धावसानइतित्रिभिः परस्यहिरण्यगर्भस्य परचिंतकाः परमेश्वरदृष्ट्या हिरण्यगर्भोपास

येस्वधर्मान्नदुह्यंतिधीराःकामार्थहेतवे निःसंगान्यस्तकर्माणःप्रशांताःशुद्धचेतसः ५ निवृत्तधर्मनिरतानि
र्ममानिरहंकृताः स्वधर्माख्येनसत्त्वेनपरिशुद्धेनचेतसा ६ सूर्यद्वारेणतेयांतिपुरुषंविश्वतोमुखं परावरे
शंप्रकृतिमस्योत्पत्त्यंतभावनं ७ द्विपरार्धावसानेयःप्रलयोब्रह्मणस्तुते तावदध्यासतेलोकंपरस्यपर
चिंतकाः ८ क्ष्मांभोऽनलानिलवियन्मनइंद्रियार्थभूतादिभिः परिवृतंप्रतिसंजिहीर्षुः अ १२६
व्याकृतंविशतियर्हिगुणत्रयात्मा कालंपराख्यमनुभूयपरःस्वयंभूः ९

व

काः क्ष्मादीनिपंचमहाभूतानिमनश्चइंद्रियाणि अर्थाश्च शब्दादयः भूतादिश्च अहंकारएवमादिभिः
परियुक्तैः वृतं ब्रह्मांडं प्रतिसंहर्तुमिच्छुःसन् अव्याकृतमीश्वरंपराख्यंद्विपरार्धलक्षणंकालं ९

परेत्यदूरंगत्वा भगवंतमनुप्रविष्टायेयोगिनः अमृतंपरानंदरूपंप्रधानंउत्कृष्टंब्रह्मतेनैवसहोपयांति नतुपूर्ववयतस्तदा अ
गताभिमानाः तथाचश्रुतिः ब्रह्मणासहतेसर्वेसंप्राप्तेप्रतिसंचरे परस्यांतेकृतात्मानःप्रविशंतिपरंपदमिति भगवदु
पासकास्तुसाक्षादेवतंप्राप्नुवंति नतुक्रमेण १० अतस्त्वंसाक्षात्तमेवभजेत्याह अथतस्मात् भावेनप्रेम्णा ११ एवं
भगवद्भक्तानांनिरंतरमेवतत्प्राप्तिः भगवदभेदेनहिरण्यगर्भोपासकानांतुक्रमेणेत्युक्तं भेदेनोपासनेतुब्रह्माद

एवंपरेत्यभगवंतमनुप्रविष्टायेयोगिनोजितमरुन्मनसोविरागाः तेनैवसाकममृतंपुरुषंपुराणंब्रह्मप्रधा
नमुपयांत्यगताभिमानाः १० अथतंसर्वभूतानांहृत्पद्मेषुकृतालयं श्रुतानुभावंशरणंव्रजभावेनभामि
नि ११ आद्यःस्थिरचराणांयोवेदगर्भःसहर्षिभिः योगेश्वरैःकुमाराद्यैःसिद्धैर्योगप्रवर्तकैः १२
भेददृष्ट्याभिमानेननिःसंगेनापिकर्मणा कर्तृत्वात्सगुणंब्रह्मपुरुषंपुरुषर्षभं १४ ऐश्वर्यंपारमेष्ठ्यंचते
पिधर्मविनिर्मितं निषेव्यपुनरायांतिगुणव्यतिकरेसति १५

योप्यावर्ततेकिमुतान्यइत्याह आद्यइतिचतुर्भिः योवेदगर्भःसोपिगुणव्यतिकरेजातेपूर्वंयथाब्रह्मयदधिकृतः
सन्प्रजायते नकेवलंसएवैकः किंतुऋषिभिर्मरीच्यादिभिश्चसह १२ जन्मनिहेतुद्वयंभेददृष्ट्याभिमानेनकर्तृ
त्वादितिच यथापूर्वत्वेहेतुः निःसंगेननिःकामेनकर्मणेति १३ १४ किंकृत्वाप्रजायते प्रथमंपारमेष्ठ्यमैश्वर्यं
निषेव्यपश्चात्प्रलयेसगुणंगुणाधिष्ठातारंप्रथमावताररूपंपुरुषंसंसृत्यप्राप्य तेपिऋषिप्रमुखाःस्वकर्मनि

यदा ब्रह्मोपासकानामपि नेदृग्दर्शनाभिमानाच्चापुनरेवमावृत्तिः तदा काम्यकर्मिणां किंवक्तव्यमिति तान्निंदन्नाह
बद्धिः येत्विहकर्मस्वासक्तमनसः संतः अप्रतिषिद्धानि काम्यानि नित्यानि च कर्माणि कृत्स्नानि कुर्वंति ते अर्यम्णो दक्षि
णेन पथा धूममार्गेण पितृलोकं व्रजंतीति पंचमेनान्वयः १६ मध्ये तन्निंदामाह रजसेत्यादिना हरति संसारं मेधाय
स्य कथनीया उरवो विक्रमा यस्य तस्य मधुद्विषः कथायां विमुखाः संतो ये त्रैवर्गिकाः १८ ये चाच्युतस्य कथासुधां

येत्विहासक्तमनसः कर्मसु श्रद्धयान्विताः कुर्वंत्यप्रतिषिद्धानि नित्यान्यपि च कृत्स्नशः १६ रजसा कुं
ठमनसः कामात्मानोजितेंद्रियाः पितॄन्यजंत्यनुदिनं गृहेष्वभिरताशयाः १७ त्रैवर्गिकास्ते पुरुषा
विमुखा हरिमेधसः कथायां कथनीयोरुविक्रमस्य मधुद्विषः १८ नूनं दैवेन विहता ये चाच्युतकथा
सुधां हित्वा शृण्वंत्यसद्गाथाः पुरीषमिव विड्भुजः १९ दक्षिणेन पथार्यम्णः पितृलोकं व्रजंति ते प्रजा १२७
मनु प्रजायंते श्मशानांतक्रियाकृतः २० ततस्ते क्षीणसुकृताः पुनर्लोकमिमं सति पतंति विवशा दे
वैः सद्यो विभ्रंशितोदयाः २१ तस्मात्त्वं सर्वभावेन भजस्व परमेष्ठिनं तद्गुणाश्रयया भक्त्या भजनीयपदांबुजं

हित्वा असतां गाथाः शृण्वंति ते नूनं दैवेन विहता इत्यन्वयः १९ पितृलोकात्पुनः प्रजामनु पुत्रादिषु प्रजायंते
ते गर्भाधानादारभ्य श्मशानांताः क्रियाः कृतवंतः यथोक्तकारिण इत्यर्थः २० कथं प्रजायंते तदाह ततस्ते पुनरिमं लो
कं प्रति पतंति विभ्रंशित उदयो भोगसाधनं येषां २१ परमेष्ठिनं परमेश्वरं प्रीत्या तस्य गुणानाश्रयते या भक्तिस्त
या २२ भजने च ज्ञानवैराग्ये स्वत एव भवत इत्याह वासुदेव इति २२

भजने च ज्ञानवैराग्ये स्वत एव भवत इत्याह वासुदेव इति ५
तदेव उपपादयति यदास्य भक्तस्य चित्तं भगवद्गुणानुरागेण तस्मिन्नेव निश्चलं सत् इंद्रियवृत्तिभिर्वैषम्यमर्थेषु न गृह्णाति २४
तदैवात्मनात्मानं स्वप्रकाशमीक्षते कथंभूतं समं च तद्दर्शनं च तत्कुतः निःसंगं संगाद्धि वैषम्यं भवति निःसंगत्वे हेतुः हेयोपादे
यरहितं तत्कुतः यदव्यवसितमारूढं परमानंदोहमिति निश्चयं प्राप्तमित्यर्थः २५ समेष्वर्थेष्वित्युक्तं तदेव साम्यं दर्शयति ज्ञा
नमात्रमेव परब्रह्मादिशब्दैः प्रसिद्धं दृश्यादिभिः द्रष्टृदृश्यकरणरूपेण पृथक् प्रतीयते ज्ञानमात्रत्वेन समेष्वित्यर्थः २६

वासुदेवे भगवति भक्तियोगः प्रयोजितः जनयत्याशु वैराग्यं ज्ञानं यद्ब्रह्मदर्शनं २३ यदास्य चित्तमर्थेषु समेष्विं
द्रियवृत्तिभिः न विगृह्णाति वैषम्यं प्रियमप्रियमित्युत २४ स तदैवात्मनात्मानं निःसंगं समदर्शनं हेयोपादे
यरहितमारूढं पदमीक्षते २५ ज्ञानमात्रं परं ब्रह्म परमात्मेश्वरः पुमान् दृश्यादिभिः पृथग्भावैर्भगवानेक
ईयते २६ ननु ज्ञानमात्रमात्मनः स्वरूपत्वान्नित्यप्राप्तमेवेति एतावानेव योगेन समग्रेणेह योगिनः युज्यते
ऽभिमतो ह्यर्थो यदसंगस्तु कृत्स्नशः २७ ज्ञानमेकं पराचीनैरिंद्रियैर्ब्रह्म निर्गुणं अवभात्यर्थरूपेण भ्रांत्या
शब्दादिधर्मिणा २८

ननु ज्ञानमात्रमात्मनः स्वरूपत्वान्नित्यप्राप्तमेवेति किमनेकसाधनसाध्येन योगेन प्राप्यते तदाह एतावानिति युज्य
ते प्राप्यते प्रपंचासंगः स एव योगफलमित्यर्थः २७ ननु कथं प्रत्यक्षादिप्रतीतः प्रपंचो व्युदसितुं शक्यते प्रतीते
र्भ्रांतत्वादित्याह ज्ञानमिति पराचीनैः पराङ्मुखैः शब्दादिर्धर्मो यस्य तेनार्थरूपेण ज्ञानरूपं निर्गुणं ब्रह्मैवावभाति न त्व
र्थः २८

भा० तृ०
१२८

अर्थरूपत्वमेवोदाहृत्य दर्शयति यथेति अहंरूप अहंकारः स च त्रिवृत् गुणात्मकः पुनश्च भूतरूपेण पंचविधः इंद्रियरूपेणैकादशविधश्च स्वराट् जीवरूपश्च तस्य जीवस्य वपुरंडं जगद्यतो येन्योमहदादिभ्यस्तथावर्तत इति २९ ननु तर्हि जनः किमित्येवं न प्रत्येति तत्राह एतदिति ३० उक्तमेवार्थं स्कंधेति पत्स्यर्थं संक्षेपेणानुवदति इतीति हेतुर्विपूज्ये ३१ अनेन च ज्ञानयोगेन भगवानेव प्राप्यो यथा भक्तियोगेनेत्याह नैर्गुण्यो ज्ञानयोगश्च मन्निष्ठो भक्तिलक्षणश्च यो योगः तयोर्द्वयोरप्येक

यथा महानहंरूपस्त्रिवृत्पंचविधः स्वराट् एकादशविधस्तस्य वपुरंडं जगद्यतः २९ एतद्वै श्रद्धया भक्त्या योगाभ्यासेन नित्यशः समाहितात्मा निःसंगो विरक्त्या परिपश्यति ३० इत्येतत्कथितं गुर्वि ज्ञानं तद्ब्रह्मदर्शनं येनानुबुध्यते तत्त्वं प्रकृतेः पुरुषस्य च ३१ ज्ञानयोगश्च मन्निष्ठो नैर्गुण्यो भक्तिलक्षणः द्वयोरप्येक एवार्थो भगवच्छब्दलक्षणः ३२ यथेंद्रियैः पृथग्द्वारैरर्थो बहुगुणाश्रयः एको नानेयते तद्वद्भगवान् शास्त्रवर्त्मभिः ३३ क्रियया क्रतुभिर्दानैस्तपःस्वाध्यायमर्शनैः आत्मेंद्रियजयेनापि संन्यासेन च कर्मणां ३४

एवार्थः प्रयोजनं कोसौ भगवच्छब्दो लक्षणं ज्ञापकं यस्य तदुक्तं गीतासु ते प्राप्नुवंति मामेव सर्वभूतहिते रता इति ३२ ननु ज्ञानयोगस्यात्मलाभः फलं शास्त्रेणावगम्यते भक्तियोगस्य तु भगवत्प्राप्तिः कुतस्तयोरेकार्थत्वमित्याशंक्य दृष्टांतेनोपपादयति यथा बहूनां रूपरसादीनां गुणानामाश्रयो गुडक्षीरादिः एक एवार्थो मार्गभेदं प्रवृत्तैरिंद्रियैर्नाना प्रतीयते चक्षुषा शुक्ल इति रसनेन मधुर इति स्पर्शनेन शीतल इत्यादि तथा भगवानेव तत्तद्रूपेणावगम्यते ३३ शास्त्रमार्गानेव प्रपंचयति क्रिययेति त्रिभिः क्रियया पूर्वरूपया क्रतुभिर्यागैः मर्शनं मीमां १२८

भा० स्कं० ३ टी० अ० २९

उभय चिह्नेन सकाम निःकाम लक्षणेन तमेवाहयश इति ३५ सकामधर्म प्राप्यं स्वर्गाद्यपि भगवत एव तत एव सगुणं स्वरूपमिति भावः एभिर्वर्त्मभिः स्वदृक् स्वप्रकाशः ३६ तदेवं ज्ञानयोगमु

योगेन विविधांगेन भक्तियोगेन चैव हि धर्मेणोभयचिह्नेन यः प्रवृत्तिनिवृत्तिमान् ३५
आत्मतत्त्वावबोधेन वैराग्येन दृढेन च ईयते भगवानेभिः सगुणो निर्गुणः स्वदृक् ३६
प्रावोचं भक्तियोगस्य स्वरूपं ते चतुर्विधं कालस्य चाव्यक्तगतेर्योंतर्धावति जंतुषु ३७
जीवस्य संसृतीर्बह्वीरविद्याकर्मनिर्मिताः यास्वंग प्रविशन्नात्मा न वेद गतिमात्मनः ३८

पसंहृत्य तस्य च भक्तियोगेन च समानार्थत्वमुक्त्वा भक्तियोगाद्युपसंहरति प्रावोचमिति द्वाभ्यां। चतुर्विधं सगुण निर्गुण भेदेन। अंतर्धावति उत्पत्तिनिधानादि करोति। ३७ अंग हे मातः ३८ श्रीगिरिजावल्लभः शरणं

भा०त उपदेशानधिकारिणोदर्शयतिनैतदितिद्वाभ्यांखलायपरोद्वेजकायभिन्नायउराचारायधर्मध्वजायदां
१२९

नैतत्खलायोपदिशेन्नाविनीतायकर्हिचित् नस्तब्धायनभिन्नायनैवधर्मध्वजायच ॥ ३९
नलोलुपायोपदिशेन्नगृहारूढचेतसे नाभक्तायमेजातुनमद्भक्तद्विषामपि ॥ ४०
श्रद्दधानायभक्तायविनीतायानसूयवे भूतेषुकृतमैत्रायशुश्रूषाभिरतायच ॥ ४१
बहिर्जातविरागायशांतचित्तायदीयते निर्मत्सरायशुचयेयस्यांप्रेयसांप्रियः ॥ ४२
हं

शिव
१२९

भिकाय ३९ । ४० । अधिकारिणआह । श्रद्दधानायेति द्वाभ्यां ४१ । ४२ श्रीशिवार्पणमस्तु ॥

हतौजसंक्षीणबलं १८ मनःशुद्धौचभक्तिरेवांतरंगसाधनमित्याहनेति १९ अस्यसर्वस्यापिसत्संगोमू
लमित्याह।प्रसंगमिति।अपावृतंनिरावरणं २० साधूनांलक्षणमाह।तितिक्षवइतिचतुर्भिः।साधवःशा

ज्ञानवैराग्ययुक्तेनभक्तियुक्तेनचात्मना परिपश्यत्युदासीनंप्रकृतिंचहतौजसं १८ नयुज्यमान
याभक्त्याभगवत्यखिलात्मनि सदृशोस्तिशिवःपंथायोगिनांब्रह्मसिद्धये १९ प्रसंगमजरंपाश
मात्मनःकवयोविदुः सएवसाधुषुकृतोमोक्षद्वारमपावृतं २० तितिक्षवःकारुणिकाःसुहृदःसर्व
देहिनां अजातशत्रवःशांताःसाधवःसाधुभूषणाः २१ मय्यनन्येनभावेनभक्तिंकुर्वंतियेदृढां म
त्कृतेत्यक्तकर्माणस्त्यक्तस्वजनबांधवाः २२ मदाश्रयकथामृष्टाःशृण्वंतिकथयंतिच तपंतिविवि
धास्तापानैतान्मद्गतचेतसः २३ तएतेसाधवःसाध्विसर्वसंगविवर्जिताः संगस्तेष्वथतेप्रार्थ्यःसं
गदोषहराहिते २४

स्वानुवर्तिनः।साधुषुशीलंतदेवभूषणंयेषां २१ २२ एतान्उक्तलक्षणान्तापाआध्यात्मिकादयोनत
पंतिनव्यथयंति।कुतः मद्गतंचेतोयेषांतान् २३ येतापैर्नाभिभूयंतेतेसाधवइत्यर्थः २४ श्रीराम

भा०ट० सत्संगस्य भक्त्यंगतामुपपादयति। सतामिति। वीर्यस्य सम्यग्वेदनं यासु ताः वीर्यसंविदः। हृत्कर्णयोः रसायनाः
११९६ सुखदाः। तासां जोषणात्सेवनात्। अपवर्गो विद्या निवृत्तिः वर्त्म यस्मिन् तस्मिन् हरौ प्रथमं श्रद्धा ततो रतिः। ततो भ
क्तिः अनुक्रमिष्यति क्रमेण भविष्यतीत्यर्थः २५ ततः किमत आह। भक्त्येति। मम रचनायाः सृष्ट्यादि लीलात

सतां प्रसंगान्मम वीर्यसंविदो भवंति हृत्कर्णरसायनाः कथाः तज्जोषणादाश्वपवर्गवर्त्मनि श्रद्धा
रतिर्भक्तिरनुक्रमिष्यति २५ भक्त्या पुमान्जातविराग ऐंद्रियाद्दृष्टश्रुतान्मद्रचनानुचिंतया वि
त्तस्य यत्तो ग्रहणे योगयुक्तो यतिष्यते ऋजुभिर्योगमार्गैः २६ असेवयायं प्रकृतेर्गुणानां ज्ञाने
न वैराग्यविजृंभितेन योगेन मय्यर्पितया च भक्त्या मां प्रत्यगात्मानमिहावरुंधे २७ राम
११९६

स्या अनुचिंतया या भक्तिस्तया ऐंद्रियात्सुखात् जातविरागः सन्। दृष्टश्रुतात् ऐहिकामुष्मिकात्। ततो यत्तः
उद्युक्तः सन् चित्तस्य ग्रहणे यतिष्यति। ऋजुभिर्भक्तिप्रधानत्वादनायासैः २६ तदेवं प्रकृतेर्गुणानामसे
वया ज्ञानादिभिश्च अयं जीवः इहैव देहे। मामेवरुंधे प्राप्नोति २७ श्रीवासुदेवाय नमः
वौ

एकोनत्रिंशके भक्तियोगस्क बहुधोच्यते॥ कालस्य च बलं घोरा संसृतिश्च विरक्तये॥ उक्तानुवादपूर्वकं भक्ति
मार्गभेदान्पृच्छति। लक्षणं महदादीनां यथा सांख्येषु कथितं। येन लक्षणेन तत्पारमार्थिकं परस्परं विभक्त
मित्यर्थः १ यो भक्तियोगो मूलं प्रयोजनं यस्य तत्। यन्मूलं तत् कथितं तस्य भक्तियोगस्य मार्गप्रकारं वि
स्तरतो मे ब्रूहि २ येन संसृतीनां आख्यानेन विगतरागो भवेत् ३ ईश्वररूपस्य महाप्रभावस्य परेषां म

देवहूतिरुवाच लक्षणं महदादीनां प्रकृतेः पुरुषस्य च स्वरूपं लक्ष्यते मीषां येन तत्पारमार्थिकं
१ यथा सांख्येषु कथितं यन्मूलं तत्प्रचक्षते भक्तियोगस्य मे मार्गं ब्रूहि विस्तरशः प्रभो २ विरागो
येन पुरुषो भगवन्सर्वतो भवेत् आचक्ष्व जीवलोकस्य विविधा लोकसंसृतीः ३ कालस्येश्वररूप
स्य परेषां च परस्य ते स्वरूपं बत कुर्वंति यद्धेतोः कुशलं जनाः ४ लोकस्य मिथ्याभिमतेरचक्षुषश्चि
रं प्रसुप्तस्य तमस्यनाश्रये श्रांतस्य कर्मस्वनुविद्धया धिया त्वमाविरासीः किल योगभास्करः ५
मैत्रेय उ इति मातुर्वचः श्लक्ष्णं प्रतिनंद्य महामुनिः आबभाषे कुरुश्रेष्ठ प्रीतस्तां करुणार्दितः ६

हतां ब्रह्मादीनां परस्य ते त्वदात्मकस्य कालस्य यद्धेतोः यद्भयात्। कुशलं पुण्यं कुर्वंति ४ अचक्षुषः अज्ञस्य
अतो मिथ्याभूते देहादावभिमतिरहंकारो यस्य अतः कर्मस्वनुविद्धया आसक्तया धिया श्रांतस्य अत एव च अ
नाश्रये अपारे तमसि संसारे चिरं प्रसुप्तस्य लोकस्य प्रबोधनाय त्वं योगप्रकाशको भास्करः किलाविर्भूतोसि
५ श्लक्ष्णं सुंदरं ६

भा०त्र० मार्गैः प्रकारविशेषैस्तानेवाह। स्वभावभूता ये गुणास्तेषां मार्गेण प्रवृत्तिभेदेन भावः अभिप्रायः फलकल्पभेदात्तु भ
१२६ क्तिभेद इत्यर्थः ७ अभिसंधाय संकल्प्य। संरंभी क्रोधी भिन्नदृक् भेददर्शी। यो भावं भक्तिं कुर्यात्स विहादि विधो
पि सतामसः। पृथग्भावः भेददर्शी ८ ९ कर्मनिर्हारं पापक्षयं परस्मिन्परमेश्वरे तदर्पणं भगवत्प्रीतिमुद्दिश्ये
कर्मार्पणं

श्रीभगवानुवाच भक्तियोगो बहुविधो मार्गैर्भामिनि भाव्यते स्वभावगुणमार्गेण पुंसां भावो वि
भिद्यते ७ अभिसंधाय यो हिंसां दंभं मात्सर्यमेव वा संरंभी भिन्नदृग्भावं मयि कुर्यात्स तामसः ८
विषयानभिसंधाय यश ऐश्वर्यमेव वा अर्चादावर्चयेद्यो मां पृथग्भावः स राजसः ९ कर्मनि
र्हारमुद्दिश्य परस्मिन्वा तदर्पणम् यजेद्यष्टव्यमिति वा पृथग्भावः स सात्त्विकः १० मद्गुणश्रु
तिमात्रेण मयि सर्वगुहाशये मनोगतिरविच्छिन्ना यथा गंगांभसोंबुधौ ११

कीर्तना
त्यर्थः। यष्टव्यमिति विधिसिद्धिमुद्दिश्येत्यर्थः। भेददर्शित्वं अर्चादावर्चनं च त्रिष्वपि समानं १० तदेवं तामसा राम
दिषु भक्तिषु त्रयस्त्रयो भेदाः। तासु च यथोत्तरं श्रैष्ठ्यं एवं च श्रवणादयो नवापि प्रत्येकं नव नव भेदाः। तदेवं सगु १२६
णा भक्तिरेकाशीतिभेदा निर्गुणा तु भक्तिरेकविधैव। तामाह। मद्गुणश्रुतिमात्रेणेति द्वाभ्यां अविच्छिन्ना संत
ता ११

तस्य जीवन्मुक्तिमाह देहं चेति द्वाभ्यां। चरमः उक्तलक्षणः सिद्धो देहमपि न विपश्यति कुतः सुखदुःखे। आसन
ना दुत्थितं उत्थाय तत्रैव स्थितं। ततः स्थानादपेतं ततो दैववशात्पुनरपि उपेतं वा न विपश्यति यतः स्वरूपं प्राप्तः
यतो देहात्स्वरूपमध्यगमत्तं देहमिति वा सतोप्यननुसंधाने दृष्टांतः वासः परिहितं कटितटपरिवेष्टितं। स्थि
तं गतं वा मदिरामदेनांधो यथा न पश्यतीति ३७ ननु तर्हि देहस्य कथं प्रवृत्तिनिवृत्ती जीवनं च तत्राह। देहो

देहं च तं न चरमः स्थितमुत्थितं वा सिद्धो विपश्यति यतोध्यगमत्स्वरूपं दैवादुपेतमुत दैववशादपेतं वासो
यथा परिकृतं मदिरामदांधः ३७ देहोपि दैववशगः खलु कर्म यावत्स्वारंभकं प्रतिसमीक्षत एव सा
सुः तं सप्रपंचमधिरूढसमाधियोगः स्वाप्नं पुनर्न भजते प्रतिबुद्धवस्तुः ३८ यथा पुत्राच्च वित्ताच्च पृथ
ङ्मर्त्यः प्रतीयते अप्यात्मत्वेनाभिमताद्देहादेः पुरुषस्तथा ३९

पीति। दैवं पूर्वसंस्कारस्तद्वशे न गच्छन् यावत्स्वारंभकं कर्मास्ति तावत्प्रतिसमीक्ष्यते। जीवत्येव। सासुः सेंद्रियः। न
नु तर्हि तस्मिन्पुनः संगः स्यात्तत्राह। तं देहं स्वाप्नदेहादितुल्यं सप्रपंचं पुत्रादिसहितं पुनर्न भजते। अहं ममेति
नाभिमन्यते। आरूढः प्राप्तः समाधिपर्यंतो योगो येन। अत एव प्रतिबुद्धं आत्मतत्त्वं येन सः ३८ प्रतिबोध
प्रकारमाह षड्भिः। यथेति। अतिस्नेहवशादात्मत्वेनाभिमतादपि पुत्रादेर्मर्त्यः पित्रादिः पुरुषो देहादेर्द्रष्टा ३९

पृथगवस्थाभावेपिभेदंसदृष्टांतमाह। यथोल्मुकात् इंधनात् ज्वलतः काष्ठात् स्वसंभवात् अग्नेः संभूतात् आ
त्मत्वेन अग्नेः स्वरूपत्वेनाभिमतादपि अत्यंताविवेकिनोहिधूमेप्यग्यभिमानोस्ति। उल्मुकात्पूर्वसिद्धादपित
द्दाहकःप्रकाशकश्चाग्निःपृथगेव ४० भूतादेर्द्दष्टातेभ्यःपृथक् तस्मादपिजीवसंज्ञितात् ब्रह्मसंज्ञितःपृथक्
तयाप्रधानादपितत्प्रवर्तकोभगवान्पृथगित्यर्थः ४१ उपाधितोविवेकमुक्त्वातस्यैक्यमाह। सर्वभूतेष्विति।

॥ यथोल्मुकाद्विस्फुलिंगाद्धूमाद्वापिस्वसंभवात् अप्यात्मत्वेनाभिमताद्यथाग्निःपृथगुल्मुकात् ४०
भूतेंद्रियांतःकरणात्प्रधानाज्जीवसंज्ञितात् आत्मातथापृथक्द्रष्टाभगवान्ब्रह्मसंज्ञितः ४१ स
र्वभूतेषुचात्मानंसर्वभूतानिचात्मनि ईक्षेतानन्यभावेनभूतेष्विवतदात्मतां ४२ स्वयोनिषुयथा
ज्योतिरेकंनानाप्रतीयते योनीनांगुणवैषम्यात्तथात्माप्रकृतौस्थितः ४३ तस्मादिमांस्वांप्रकृ
तिंदैवींसदसदात्मिकाम् दुर्विभाव्यांपराभाव्यस्वरूपेणावतिष्ठते ४४ इतिश्रीभागवते
महापुराणेतृतीयस्कंधेकापिलेयेअष्टाविंशोध्यायः राम

भूतेषुचतुर्विधेषु। तदात्मतांमहाभूतात्मतां ४२ धर्मभेदस्याप्यौपाधिकतांसदृष्टांतमाह। स्वयोनिषुज्यो १९५
तिरग्निःगुणवैषम्यात्दीर्घह्रस्वादिभेदात्। प्रकृतौदेहे ४३ स्वांप्रकृतिजीवस्यबंधहेतुंदैवींदेवस्यविष्णोः
शक्तिंपराभाव्यतत्प्रसादेनैवजित्वा। स्वरूपेणब्रह्मत्वेनावतिष्ठते ४४ इतितृतीयेअष्टाविंशोध्यायः

मंदहासध्यानमुक्त्वास्फुटहासध्यानमाह। विष्णोःप्रहसितंउच्चैःप्रहसितंध्यायेत्। कीदृशंध्यानायनंअतिसुं
दरतयाप्रयत्नंविनैवध्यानस्यविषयभूतं। सौंदर्यमेवाह। बकुलयाअधिकयाअधरोष्ठस्यभासाकांत्याअ
रुणीभूताअतनवःसूक्ष्माःद्विजाएवकुंदमुकुलानितेषांपंक्तिःस्फुरतीयस्मिन् तत्। कुहरेहृदयाकाशेअवसि स्वेदे
तस्यज्ञानस्यप्रेमरसेनार्द्रयाभक्त्यातस्मिन्नेवार्पितमनाःनपृथक्तद्व्यतिरिक्तंद्रष्टुंनैच्छेतनचित्तंविचाल
येदित्यर्थः ३३ समाधिमाहएवमितिद्वाभ्यां। निर्बीजःसबीजश्चेतिद्विविधोयोगःतत्रनिर्बीजयोगो ३४
यतोयतोनिश्चलतिमनश्चंचलमस्थिरं। ततस्ततोनियम्यैतदात्मन्येववशंनयेदितिगीताद्युक्तमार्गेणक्रि

ध्यानायनंप्रहसितंबकुलाधरोष्ठभासारुणायिततनुद्विजकुंदपंक्ति ध्यायेत्स्वदेहकुहरेव
सितस्यविष्णोर्भक्त्यार्द्रयार्पितमनानपृथग्दिदृक्षेत् ३३ एवंहरौभगवतिप्रतिलब्धभावो
भक्त्याद्रवद्धृदयउत्पुलकःप्रमोदात् औत्कंठ्यबाष्पकलयामुहुरर्द्यमानस्तच्चापिचित्तबडिशं

यमाणोपिदुष्करःसमाधिः। सबीजेतुसुकरः। तत्रहिपरमानंदमूर्तौहरौध्यायमाने। यत्नतएवचित्तोपरमोभ
वति। तदुक्तं। हृतात्मनोहृतप्राणांश्चभक्तिरनिच्छतोगतिमण्वींप्रयुंक्तइतिसएव अतःसएवोपदिश्यतेः। योग
स्यलक्षणंवक्ष्येसबीजस्येति। तदेवायत्नसिद्धंदर्शयति। एवंध्यानमार्गेणहरौप्रतिलब्धःभावःप्रेमयेन
तयाभक्त्याद्रवत् हृदयंयस्य। प्रमोदाद्उद्गतानिपुलकानियस्य। औत्कंठ्यप्रवृत्ताश्रुकलयाचमुहुरर्द्यमानः
आनंदसंप्लवेनिमज्जमानःदुर्ग्रहस्यभगवतोग्रहणेबडिशंमत्स्यबंधनमिवोपायभूतंचित्तमपिध्येयाद्धियुं
क्तेतद्धारणेशिथिलप्रयत्नोभवतीत्यर्थः ३४

भा० टी० यर्हि यदा एवं निर्विषयं भवति अतएव मुक्ताश्रयं च ध्येयसंबंधं विना ध्यातर्यवस्थानासंभवात् नत्वपूर्ववत् श
११३ ब्दादिविषयः स्यात् । यतस्तत्र विरक्तं परमानंदानुभवेन अतो निर्वाणं निलयमृच्छति वृत्तिरूपतां परित्यज्य ब्र
ह्माकारेण परिणमत इत्यर्थः । यथार्चिज्वाला आश्रयविषयापगमे महाभूतज्योतीरूपेण परिणमते । अत्र
अस्यां दशायां अव्यवधानं । ध्यातृध्येयविभागशून्यं एकं अखंडमात्मानमनुगतमीक्षते । अत्र हेतुः प्रतिनि
वृत्तोपगतो गुणप्रवाहो देहाद्युपाधिर्यस्य ३५ नच सुप्तोत्थितवत् पुनः संसरतीत्यत आह । सोपि स एव

मुक्ताश्रयं यर्हि निर्विषयं विरक्तं निर्वाणमृच्छति मनः सहसा यथार्चिः । आत्मानमत्र पुरुषोऽव्यवधानमे
कमन्वीक्षते प्रतिनिवृत्तगुणप्रवाहः ३५ सोप्येतया चरमया मनसो निवृत्त्या तस्मिन्महिम्न्यवसितः
सुखदुःखबाह्ये हेतुत्वमस्यसति कर्तरि दुःखयोर्यत्स्वात्मन्विधत्त उपलब्धपरात्मकाष्ठः ३६

पुरुषः तस्मिन्महिम्नि ब्रह्मरूपे अवसितः अवसानं निष्ठां प्राप्तः कया मनसो निवृत्त्या चरमया अविद्यारहितये राम
ति सुषुप्ताद्विशेषः तत्र ह्यविद्यास्ति । नत्विदानीं अत्र हेतुः एतया योगाभ्यासकृतयेत्यर्थः । नन्वेवमपि सुख ११३४
दुःखयोरात्मधर्मत्वे कुतो ब्रह्मैक्यं तत्राह । दुःखयोः सुखदुःखयोः हेतुत्वं भोक्तृत्वं यत्पूर्वमासीत्तदपि अ
विद्याकृतं कर्तरि अहंकारे विधत्ते तन्निष्ठमेव पश्यतीत्यर्थः । यतः उपलब्धपरात्मकाष्ठः अपरोक्षीकृतात्म
तत्त्वः ३६

ऋषभस्य श्रेष्ठस्य महाविभूतेर्महालक्ष्म्या अधिवासस्थानं वक्षः कंठं च मनसि कुर्यात् । कथंभूतं कंठं । कौस्तु
भमणेरपि भूषणार्थं धृतं तस्य अधिकं भूषणमर्थः प्रयोजनं यस्य कौस्तुभमणिमेव स्वयमलंकुर्वंतमि
त्यर्थः । पुंसां स्मर्तॄणां च मनोनयनानां निर्वृतिमादधानमित्युभयोर्विशेषणं २६ निर्णिक्तानि उ
ज्ज्वलीकृतानि बाहुवलयान्यंगदानि येषु अधिश्रिताः लोकपालाः येषु । दशशतारं चक्रं । नसह्यं तेजो
दृष्टॄणां

वक्षोऽधिवासमृषभस्य महाविभूतेः पुंसां मनोनयननिर्वृतिमादधानं कंठं च कौस्तुभमणेरधिभू
षणार्थं कुर्यान्मनस्यखिललोकनमस्कृतस्य २६ बाहूंश्च मंदरगिरेः परिवर्तनेन निर्णिक्त
बाहुवलयानधिलोकपालान् संचिंतयेद्दशशतारमसह्यतेजः शंखं च तत्करसरोरुहराजहं
सं २७ कौमोदकीं भगवतो दयितां स्मरेत दिग्धामरातिभटशोणितकर्दमेन मालां मधु
व्रतवरूथगिरोपघुष्टां चैत्यस्य तत्त्वममलं मणिमस्य कंठे २८

यस्य करसरोरुहे राजहंसमिव २७ अरातयो ये भटा योद्धारस्तेषां शोणितमेव कर्दमस्तेन दिग्धां लि
प्तां । अस्य कंठे मालां मणिं च स्मरेत् । मधुव्रतानां वरूथस्य गिरा उपघुष्टां नादितां । चैत्यस्य जीवस्य त
त्त्वं तदुक्तं चैवं वे । आत्मानमस्य जगतो निर्लेपमगुणामलं । बिभर्ति कौस्तुभमणिं [illegible] भगवान्ह स्वरूपं
रिरिति २८

भृत्येष्वनुकंपिता कृतानुकंपा यया धीस्तया गृहीता मूर्तिर्येन तस्य। विस्फुरंती ये मकरकुंडले तयोर्वल्गितेन (चलनेन) विद्यो
तितौ अमलौ कपोलौ यस्मिन् तत्। उदारा उन्नता नासा यस्मिन् तत् २९ यच्च स्वया भूत्या शोभया अलि
भिः परिसेव्यमानं मीनद्वयाश्रयं च श्रीनिकेतनं पद्ममधिक्षिपद्भवति तत् ध्यायेत्। तत्र कुंतलैरलीनामधिक्षे
पः नेत्रद्वयेन मीनद्वयस्येति द्रष्टव्यं। अब्जे इव नेत्रे यस्मिन् इत्युपमानांतरं। उद्भ्रसंत्यौ भ्रुवौ यस्मिन् मनोमयं

भृत्यानुकंपितधियोपगृहीतमूर्तेः (मुद्दार) संचिंतयेद्भगवतो वदनारविंदं यद्विस्फुरन्मकरकुंडलवल्गितेन वि
द्योतितामलकपोलमुदारनासं २९ यच्छ्रीनिकेतमलिभिः परिसेव्यमानं भूत्या स्वया कुटिलकुंतलवृंदजुष्टं
मीनद्वयाश्रयमधिक्षिपदब्जनेत्रं ध्यायेन्मनोमयमतंद्रित उल्लसद्भ्रु ३० तस्यावलोकमधिकं कृपया
तिघोरतापत्रयोपशमनाय निसृष्टमक्ष्णोः स्निग्धस्मितानुगुणितं विपुलप्रसादं ध्यायेच्चिरं वित
तभावनया गुहायां ३१ हासं हरेरवनताखिललोकतीव्रशोकाश्रुसागरविशोषणमत्युदारम्
संमोहनाय रचितं निजमाययास्य भ्रूमंडलं मुनिकृते मकरध्वजस्य ३२

मनस्याविर्भवत्। ३० कृपयाधिकमित्यर्थः। अक्षिभ्यां निसृष्टं प्रयुक्तं। स्निग्धस्मितेनानुगुणितं संयुक्तं वि
पुलः प्रसादो यस्मिन् गुहायां हृदि ३१ अवनता ये अखिललोकास्तेषां तीव्रशोकेन यान्यश्रूणि तेषां साग
रं विशोषयतीति तथा तं हरेर्हासं हास्यं अस्य अत्युदारं भ्रूमंडलं च ध्यायेत्। कथंभूतं निजमायया मकरध्व
जस्यापि संमोहनाय रचितं मुनिकृते मुनीनामुपकाराय। मुनीनां संमोहने प्रवृत्तं कामं मेव मोहयितुमित्यर्थः ३२

प्रेक्षणीयं ईहितं लीला यस्य १९ तदेवं समग्रं ध्यानमुक्त्वा एकैकावयवध्यानमाह। तस्मिन् लब्धं पदं स्थिति
र्येन तच्चित्तं विलक्ष्य विशेषेण विलक्षीकृत्य एकैकत्र एकैकस्मिन्नंगे इत्यर्थः २० तदेव पादादिक्रमेणाह च
योदशभिः। सम्यक् संचिंतयेत् पादतले रेखात्मकानि वज्रादीनि लांछनानि तैराढ्यं युक्तं। उत्तुंगाश्च रक्ताश्च वि
लसंतो नखाः तेषां चक्रवालं मंडलं तस्य ज्योत्स्नाभिराहतो महत् तांध्यातॄणां हृदयांधकारो येन। एतच्च सर्व

स्थितं व्रजंतमासीनं शयानं वा गुहाशयं प्रेक्षणीयेहितं ध्यायेच्छुद्धभावेन चेतसा १९ तस्मिन् लब्ध
पदं चित्तं सर्वावयवसंस्थितं विलक्ष्यैकत्र संयुज्यादंगे भगवतो मुनिः २० संचिंतयेद्भगवतश्चर
णारविंदं वज्रांकुशध्वजसरोरुहलांछनाढ्यं उत्तुंगरक्तविलसन्नखचक्रवालज्योत्स्नाभिराहतम
हद्धृदयांधकारं २१ यच्छौचनिःसृतसरित्प्रवरोदकेन तीर्थेन मूर्ध्न्यधिकृतेन शिवः शिवोभूत्
ध्यातुर्मनःशमलशैलनिसृष्टवज्रं ध्यायेच्चिरं भगवतश्चरणारविंदम् २२

मुपादेयविशेषणं ध्येयत्वेनैवोच्यते २१ किं च (यस्य) शौचेन क्षालनेन निःसृता याः सरित्प्रवरा यागंगा तस्या उद
केन तीर्थेन संसारतारकेण मूर्ध्नि अधिकृतेन शिवोपि शिवोभूत्। अत्यधिकं सुखं प्रापेत्यर्थः। ध्यातुः मनसि
यः शमलं शैलः पापपर्वतः तस्मिन् निसृष्टं क्षिप्तं वज्रमिव यत्। यद्वा शमलशैले निसृष्टं स्वलांछनरूपं वज्रं येन
तत् २२

विभोर्जानुद्वयं तत्पर्यंतं जंघाद्वयं। अखिलस्य विधातुर्ब्रह्मणो जनन्या लक्ष्म्याः लालितं। स्पर्शवातुर्य
एणं सेवितं संसारित्वमिव प्रतीतं वारयति अभवस्येति हृदि कुर्यात् ध्यायेत् २३ सुपर्णस्य भुजयोः
स्कंधयोः अधि उपरि ओजसो बलस्य निधी आधारो। अतसिकायाः कुसुमवत्कांत्यावभासमानो॥
व्यालंबि आगुल्फं लंबमानं यत्पीतांबरं वासः तस्मिन्वर्तमानो यः कांचीकलापः तेन परिरंभः संश्लेषो

जानुद्वयं जलजलोचनया जनन्या लक्ष्म्याखिलस्य सुरवंदितया विधातुः ऊर्वोर्निधाय करपल्लवरोचिषा यत्संलालितं हृदि विभोरभवस्य कुर्यात् २३ ऊरू सुपर्णभुजयोरधिशोभमानावोजोनिधी अतसिकाकुसुमावभासौ व्यालंबिपीतवरवाससि वर्तमानकांचीकलापपरिरंभिनितंबबिंबं २४ नाभिह्रदं भुवनकोशगुहोदरस्थं यत्रात्मयोनिधिषणाखिललोकपद्मं व्यूढं हरिन्मणिवृषस्तनयोरमुष्य ध्यायेद्द्वयं विशदहारमयूखगौरं २५

विद्यते यस्य तत्तद्विभोर्नितंबबिंबं च हृदि कुर्यात् इति पूर्वेणैवान्वयः २४ अमुष्य हरेर्नाभिह्रदं ध्यायेत्। कथंभूतं भुवनानां कोशस्य समूहस्य गुहा अधिष्ठानं यदुदरं तत्र स्थितं। यत्र नाभिह्रदे आत्मयोनेर्ब्रह्मणो धिषणं धिष्ण्यं। अखिललोकात्मकं पद्मं व्यूढं उत्थितं। तथा हरिन्मणिवृषो मरकतमणिश्रेष्ठाविव यौ स्तनौ तयोर्द्वयं ध्यायेत्। विशदहाराणां मयूखैर्गौरं श्वेतं २५

यत्र गार्हस्थ्ये क्षीरफेननिभाः मृदुशुभ्राः शय्याः आस्तरणानि कांति दंतघटिता मंचकाश्च स्वर्णमयाः परिकराः आसनानि पीठादीनि स्फस्पर्शान्यास्तरणानि येषु १६ १७ बकुलिरपरद्रुमैरम्यं १८ यत्रोद्याने प्रविष्टं आत्मानं देवहूतिं १९ आखंडलः इंद्रः तस्य योषितः तासामीप्सिततमं भाग्यं भ्रमिष्टतमं तत् हित्वा तत्राभिमानं त्यक्त्वा २० सुहृद्वियोगस्य दुःसहतामाह वनमिति नष्टे वत्से वत्सला गौरिवारूत् २१ विरहकृतध्यानफलमाह निस्पृहा निर्वासिना वत्स विदुर २२ ततः स्व

पयःफेननिभाः शय्या दांता रुक्मपरिच्छदाः आसनानि च हैमानि सुस्पर्शास्तरणानि च १६ स्वच्छस्फटिककुड्येषु महामारकतेषु च रत्नप्रदीपा आभांति ललनारत्नसंयुताः १७ गृहोद्यानं कुसुमितै रम्यं बह्वमरद्रुमैः कूजद्विहंगमिथुनं गायन्मत्तमधुव्रतं १८ यत्र प्रविष्टमात्मानं विबुधानुचराः [illegible] वाप्यामुत्पलगंधिन्यां कर्दमेनोपलालितं १९ हित्वा तदीप्सिततममप्याखंडलयोषितां किंचिच्चकार वदनं पुत्रविश्लेषणातुरा २० वनं प्रव्रजिते पत्यावपत्यविरहातुरा ज्ञाततत्त्वाप्यभून्नष्टे वत्से गौरिव वत्सला २१ तमेव ध्यायती देवमपत्यं कपिलं हरिं बभूवाचिरतो वत्स निस्पृहा तादृशे गृहे २२ ध्यायती भगवद्रूपं यदाह ध्यानगोचरं सुतः प्रसन्नवदनं समस्तव्यस्तचिंतया २३

सुतः कपिलो यदाह तद्भगवतो रूपं ध्यायंती तदा आत्मानं च विश्वतोमुखं सर्वतोगतं ध्यायंती ब्रह्मण्यवस्थितमतिर्बभूवेति पूर्वस्यैवानुषंगः केन ध्यायती विशुद्धेनात्मना मनसा २३ ओं नमो भगवते वासुदेवाय० छ

भा० टी०
१३१

विशुद्धौ कारणान्याह भक्तिप्रवाहरूपेण योगेन वैराग्येण च युक्तानुष्ठानेन जातं यत् ज्ञानं तेन च युक्तानुष्ठानं च गीता
सूक्तं युक्ताहारविहारस्य युक्तचेष्टस्य कर्मसु युक्तस्वप्नावबोधस्य योगो भवति दुःखहा इति ब्रह्महेतुना ब्रह्म
त्वापादकेन २४ विश्वतोमुखत्वे हेतुः स्वानुभूत्या स्वरूपप्रकाशेन तिरोभूतं मायागुणैर्विशेषणं परिच्छेदो य
स्य २५ कथंभूते ब्रह्मणि आत्मनां जीवानां संश्रये भगवति तस्याः जीवन्मुक्तिमाह सार्द्धैस्त्रिभिः तदा च निवृत्ता

भक्तिप्रवाहयोगेन वैराग्येण बलीयसा युक्तानुष्ठानजातेन ज्ञानेन ब्रह्महेतुना २४ विशुद्धेन त
दात्मानमात्मना विश्वतोमुखं स्वानुभूत्या तिरोभूतमायागुणविशेषणं २५ ब्रह्मण्यवस्थितम
तिर्भगवत्यात्मसंश्रये निवृत्तजीवापत्तित्वात्क्षीणक्लेशाप्तनिर्वृतिः २६ नित्यारूढसमाधित्वा
त्परावृत्तगुणभ्रमा न सस्मार तदात्मानं स्वप्ने दृष्टमिवोत्थितः २७ तद्देहः परतः पोषोप्यकृशः
श्चाध्यसंभवात् बभौ मलैरवच्छन्नः सधूम इव पावकः २८ १३१

जीवापत्तिर्जीवित्वं यो यस्यास्तस्या भावस्तत्वं तस्मात् विगतक्लेशा प्राप्ता निर्वृतिश्च सती आत्मानं देहं न स
स्मार इत्यन्तरेणान्वयः २६ ननु तथापि गुणानां विद्यमानत्वात् कथमस्मरणं तत्राह नित्यारूढो लब्धप्रतिष्ठः स
माधिर्यस्याः तस्या भावस्तत्वं तस्मात् परावृत्तः शांतो गुणनिमित्तो भ्रमो यस्याः सा २७ परतः परान्निरेव कर्दम
सृष्टविद्याधरीभिः पोषः पोषणं यस्य आधिर्मनोग्लानिस्तदसंभवात् अकृशः मलैरवच्छन्नो पि बभौ २८

२ चतुर्विधं सगुणनिर्गुणभेदेन अंतर्यामित्वात् उत्पत्तिनिधनादि करोति ३७ अंगदेहमातः ३८ उपदेशानधिकारिणो दर्शयति नैतदिति
उक्तमपि विद्वेन सकामेन निःकामलक्षणेन भक्ते वाहयति ३५ सकामधर्मजाव्यं स्वर्गादि यमिति भगवतश्च सगुणं स्वरूपमिति भा
वः एभिर्वर्गैर्भिः स्वदृक्स्वप्रकाशः ३६ तदेवं ज्ञानयोगमुपसंहृत्य तस्य च भक्तियोगेन समानार्थत्वमुक्त्वा भक्तियोगामु
पसंहरति प्रावोचमिति द्वाभ्यां खलाय परो ह्रेजकाय भिन्नाय दुराचाराय धर्मध्वजाय हांभिकाय ३९ ४० अधिका
रिण आह श्रद्दधानायेति द्वाभ्यां ४१ एतत् श्रवणकीर्तनपरस्यापि मत्पदप्राप्तिरेव फलमित्याह य इति अप्यर्थे
य इदं शृणुयादंब श्रद्धया पुरुषः सकृत् यो वाभिधत्ते मच्चित्तः स ह्येति पदवीं च मे ४२ इति श्रीभागवते महा
पुराणे तृतीयस्कंधे द्वात्रिंशत्तमोध्यायः मैत्रेय उवाच एवं निशम्य कपिलस्य वचो जनित्री सा क
र्दमस्य दयिता किल देवहूतिः विस्रस्तमोहपटला तमभिप्रणम्य तुष्टाव तत्वविषयांकितसिद्धिभूमिं १
चकारः सोपि मत्पदवीमेति हि निश्चितं ४२ तृतीये द्वात्रिंशः त्रयस्त्रिंशे तु तस्यैव कपिलस्योपदेशतः ज्ञानभा
वेन तन्मातुर्जीवन्मुक्तिरुदीर्यते विस्रस्तं मोहरूपं पटलमावरणं यस्याः सा तत्वान्येव विषयः तेनांकिता सिद्धिः
सांख्यज्ञानं तस्य भूमिं क्षेत्रं प्रवर्तकं १ अथेति वाक्यांतरे अजोपि न च वपुः केवलं दध्यौ न तु दृष्टवान् स च स्वयं साक्षा
द्यस्य तव जठरात् जातः स भवानेव विश्वसर्गादि विधत्ते न तु तव सर्गादिकर्त्ता कश्चिदस्ति एवंभूतस्त्वं मम या कथं जठ
रेणाधत्त इति त्रयाणामन्वयः कथंभूतं वपुः सत्वव्यक्तं तत्र हेतुः अंतः सलिले शयानं कीदृशं भूतानींद्रियाणि च
देवहूतिरुवाच अथाप्यजोंतःसलिले शयानं भूतेंद्रियार्थात्ममयं वपुस्ते गुणप्रवाहं सदशेषबीजं दध्यौ
स्वयं यज्जठराब्जजातः २

नैतदिति दाभ्यां [illegible] २

भा० तृ०
१२९

कथंभूतो भवान् सर्गादि विधत्ते गुणप्रवाहरूपेण विसृष्टवीर्यशक्तिर्येन सः शक्तिद्वारेण विधत्ते न साक्षादित्यर्थः यतः अनीहः निःक्रियः तर्हि कथं शक्तिद्वारेणापि सर्गादिविधानं अवितथाभिसंधिः सत्यसंकल्पः किमर्थं विधत्ते आत्मनां जीवानामीश्वरः जीवानां भोगार्थमित्यर्थः ननु कथं विचित्रान् भोगान् एक एव विदध्यात् अतर्क्याः सहस्रमपरिमिताः शक्तयो यस्य ३ किंच प्रलये यस्योदरे एतद्विश्वमासीत् स त्वं मया जठरेण कथं धृतः ननु शिशो

स एव विश्वस्य भवान् विधत्ते गुणप्रवाहेण विभक्तवीर्यः सर्गाद्यनीहो वितथाभिसंधिरात्मेश्वरो तर्क्यसहस्रशक्तिः ३ स त्वं भृतो मे जठरेण नाथ कथं नु यस्योदर एतदासीत् विश्वं युगांते वटपत्र एकः शेते स्म मायाशिशुरंघ्रिपानः ४ त्वं देहतंत्रः प्रशमाय पाप्मनां निदेशभाजां च विभो विभूतये यथावतारास्तव सूकरादयस्तथायमप्यात्मपथोपलब्धये ५

मयि किमेतदुच्यते तत्राह वटपत्र इति अंघ्रिं पादांगुष्ठं पिबतीत्यंघ्रिपानः इदमपि शिशुत्वं मायैव यस्योदरे तद्वदेव मायेति भावः ४ अथवा न त्वं मया अपत्यांतरवत् जठरे धृतः किंतु वराहाद्यवतारवदिच्छयैवाविर्भूतोसीत्याह त्वं देहतंत्रो देहपरिकरः स्वीकृतमूर्तिरसि पाप्मनां दुष्टानां निदेशभाजां आज्ञावर्त्तिनां विभूतये समृद्धये आत्मपथोपलब्धये ज्ञानमार्गप्रदर्शनाय ५ १२९

अतस्त्वद्दर्शनादहं कृतार्थास्मीति कैमुत्यन्यायेनाह। यन्नामधेयश्रवणानुकीर्त्तनं तस्मात् क्वचित् कदाचिदपि श्वादः सोपि सवनाय सोमयागाय कल्पते योग्यो भवति। अनेन पूज्यत्वं लक्ष्यते ६ तदुपपादयति। अहो बतेत्याश्चर्ये यस्य जिह्वाग्रे तव नाम वर्त्तते स श्वपचोपि अतः अस्मादेव हेतोर्गरीयान् यः यस्माद्वर्त्तते अत इति वा कुत इत्यत आह। त एव तपस्तेपुः जुहुवुः होमं कृतवंतः सस्नुः तीर्थेषु स्नाताः आर्याः त एव सदा

यन्नामधेयश्रवणानुकीर्त्तनाद्यत्प्रह्वणाद्यत्स्मरणादपि क्वचित् श्वादोपि सद्यः सवनाय कल्पते कुतः पुनस्ते भगवन्नु दर्शनात् ६ अहो बत श्वपचोतो गरीयान् यज्जिह्वाग्रे वर्त्तते नामधेयं तेपुस्तपस्ते जुहुवुः सस्नुरार्या ब्रह्मानूचुर्नाम गृणंति ये ते ७ तं त्वामहं ब्रह्म परं पुमांसं प्रत्यक्स्रोतस्यात्मनि संविभाव्यं स्वतेजसा ध्वस्तगुणप्रवाहं वंदे विष्णुं कपिलं वेदगर्भम् ८ मैत्रेय उवाच ईडितो भगवानेवं कपिलाख्यः परः पुमान् वाचाविक्लवयेत्याह मातरं मातृवत्सलः ९

चाराः ब्रह्म वेदं अनूचुः अधीतवंतः। त्वन्नामकीर्त्तनेन तप आद्यं न भूतमतस्ते पुण्यतमा इत्यर्थः। यद्वा जन्मांतरे तैस्तपोहोमादि सर्वं कृतमिति त्वन्नामकीर्त्तनेन महाभाग्योदयादवगम्यत इत्यर्थः ८ प्रत्यक्स्रोतसि प्रत्याहृते आत्मनि मनसि संविभाव्यं संचिंत्यं वेदाः गर्भे यस्य सः। अविक्लवया गंभीरया वाचा ९

भा॰त॰ तेनवसुसेव्येनमेमयाउदितेनअनुष्ठितेनपरांकाष्ठांजीवन्मुक्तिंअवरोत्स्यसिप्राप्स्यसि १० यायाःयास्य
१५३० सि।अतच्छिदःमन्मतमविद्वांसः ११ अनुमतःअनुज्ञातः १२ सरस्वत्याःआपीडेपुष्पमुकुटतुल्येसरस्व
त्येतिपाठेमुकुटेनसंवेष्टितेबिंदुसरसिसमाहिताबभूव १३ कथंभूतासतीसमाहितातत्राह।अभीक्ष्णं

कपिलउवाच मार्गेणानेनमातस्तेसुसेव्योनोदितेनमे आस्थितेनपरांकाष्ठामचिरादवरोत्स्य
सि १० श्रद्धत्स्वैतंमतंमह्यंजुष्टंयद्ब्रह्मवादिभिः येनमामभवंयायामृत्युमिच्छन्त्यतद्विदः ११
मैत्रेयउवाच इतिप्रदर्श्यभगवान्सतींतामात्मनोगतिं स्वमात्राब्रह्मवादिन्याकपिलोनुमतो
ययौ १२ सावापितनयोक्तेनयोगादेशेनयोगयुक् तस्मिन्नाश्रमआपीडेसरस्वत्याःसमाहिता
१३ अभीक्ष्णावगाहकपिशान्जटिलान्कुटिलालकान् आत्मानंचोग्रतपसाबिभ्रतीचीरिणं
कृशं १४ प्रजापतेःकर्दमस्यतपोयोगविजृंभितं स्वगार्हस्थ्यमनौपम्यंप्रार्थ्यंवैमानिकैरपि १५ राम १५३०

त्रिषवणमवगाहःस्नानंतेनकपिशान्पिशंगान्स्वतएवकुटिलान्केशान्।तथाआत्मानंदेहं।चीरधारि
णंकृशंचबिभ्रती १४ प्रजापतेःकर्दमस्यतपोयोगाभ्यांविजृंभितंअतिशायितंस्वगार्हस्थ्यंहित्वापुत्रभू
तेश्वरविरहातुरासतीवदनंकिंचिदनिर्वाच्यंशोकव्याकुलंचकारेतिषष्ठेनान्वयः १५

पदन्यत्स्पृष्टंजीवस्यसंसृतीःकालस्यस्वरूपंचावक्ष्वेतितत्राह।एतदितिसार्धेन।तत्सर्वनियंतृयद्भगवतो
रूपंकीदृशंप्रधानपुरुषात्मकंपरंतद्व्यतिरिक्तंचएतदेवदैवमित्यभिधीयते।कीदृशंकर्मणाविवेष्टितंनाना
संसृतिलक्षणंयस्मात्तद्दैवप्रेरितकर्मकृताःसंसृतयोविचित्राइत्यर्थः।तदेवभगवतोरूपंकालइतिचाभि

एतद्भगवतोरूपंब्रह्मणःपरमात्मनः परंप्रधानंपुरुषंदैवकर्मविचेष्टितं रूपभेदास्पदंदिव्यंका
लइत्यभिधीयते ३६ भूतानांमहदादीनांयतोभिन्नदृशांभयं योंतःप्रविश्यभूतानिभूतैरत्य
खिलाश्रयः ३७ सविष्णवाख्योधियज्ञोसौकालःकलयतांप्रभुः ३८ नचास्यकश्चिद्दयितोन
द्वेष्योनचबांधवः आविशत्यप्रमत्तोसौप्रमत्तंजनमंतकृत् ३९ यद्भयाद्वातिवातोयंसूर्यस्त
पतियद्भयात् यद्भयाद्वर्षतेदेवोभगणोभातियद्भयात् ४० यद्वनस्पतयोभीतालताः
ओषधिभिःसह स्वेस्वेकालेभिगृह्णंतिपुष्पाणिचफलानिच ४१

धीयते।कीदृशंरूपभेदस्यवस्तूनामन्यथात्वस्यआस्पदंआश्रयःकारणं।उक्तंहि।कालाद्गुणव्यतिकरइति
वक्ष्यतेचगुणव्यतिकरःकालइतिदिव्यंअद्भुतप्रभावं ३६ तदेवाहभूतानामितियावत्समाप्तिःमहदादी
नांतत्तदभिमानिनां३७ भयहेतुत्वमाहयइति।भूतैरेवभूतोत्पत्तिंसंहरतिअधियज्ञःयज्ञफलदाता।क
जीवानां लयतांवशीकुर्वतां ३८ ४० यद्भयाद्वातीत्यादि ४१

यतयस्माद्भीताः

भा०टी० १३९ यतोभीताः सरितः प्रस्रवंति। इंधो दीप्यते। सह गिरिभिर्भूः ४२ अदोनियमाद्य नभः यन्नियमात् यस्यास्तया
महान् महत्तत्वं अंकुरात्मकं स्वदेहं लोकत्वेन तनुते विस्तारयति ४३ गुणाभिमानिनो गुणानियंतारो देवाः
ब्रह्मादयः अस्य विश्वस्य सर्गादिषु प्रवर्त्तंते। अनुयुगं वारंवारमित्यर्थः ४४ जनेन पित्रादिना जनं पुत्रादि
जनयन् नादिकृत्। मृत्युना अंतकमपि मारयतीत्यंतकरः। स्वयं चलनादिरनंतोव्ययश्च ४५ इति टीकायां

स्रवंति सरितो भीता नोत्सर्पत्युदधिर्यतः। अग्निरिंधे सगिरिभिर्भूर्न मज्जति यद्भयात् ४२ नभो ददाति
श्वसतां मार्गं यन्नियमाददः। लोकं स्वदेहं तनुते महान् सप्तभिरावृतं ४३ गुणाभिमानिनो देवाः सर्गा
दिष्वस्य यद्भयात्। वर्त्तंतेनुयुगं येषां वश एतच्चराचरं ४४ सोनंतोंतकरः कालोनादिरादिकृदव्ययः
जनं जनेन जनयन्मारयन्मृत्युनांतकं ४५ इतिश्रीभागवते महापुराणे तृतीयस्कंधे कपिलो
पाख्याने एकोनत्रिंशोध्यायः कपिल उवाच तस्यैतस्य जनो नूनं नायं वेदोरुविक्रमं
काल्यमानोपि बलिनो वायोरिव घनावलिः १

कोनत्रिंशोध्यायः त्रिंशे तु कायकांतादिलालनाकुलचेतसां॥ कामिनां तामसीं पापादधोगतिरुदीर्य राम १३९
ते॥ कालप्रभाववर्णनपूर्वकं वैराग्याय विचित्रकर्मकृतां संसृतिमध्यायत्रयेण प्रपंचयति। तस्यैतस्य ब
लिनः कालस्य बलिनेति वा पाठः काल्यमानः विचाल्यमानोपि वायोर्विक्रमं यथा मेघपंक्तिर्न वेद १

उपसंहरति यदेवमिति त्रिभिः बहूनि जन्मानि यस्मिन् काले २७ प्रतिबुद्धार्थः विदितात्मतत्वः केवल्याख्यं स्व
संस्थानं देहादिव्यतिरिक्तं स्वरूपं मदाश्रयं निःश्रेयसं निरतिशयानंदं २८ स्वदृशा आत्मज्ञानेनच्छिन्नाः संश
याः मिथ्याज्ञानानि यस्य। लिंगाद्विनिर्गमे लिंगशरीरनाशे सतीत्यर्थः २९ तदानु अणिमादिसिद्धयोंतरा
यरूपा भवंति तासु योगेनोपचितासु। नयोगादन्यो हेतुर्यासां तासु। यदासिद्धस्य चेतो न विषज्जते अबद्धमा

यदेवमध्यात्मरतः कालेन बहुजन्मना सर्वत्र जातवैराग्य आब्रह्मभुवनान्मुनिः २७ मद्भक्तः प्रति
बुद्धार्थो मत्प्रसादेन भूयसा निःश्रेयसं स्वसंस्थानं केवल्याख्यं मदाश्रयं २८ प्राप्नोतीहांजसा धी
रः स्वदृशाच्छिन्नसंशयः यद्गत्वा न निवर्त्तेत योगी लिंगविनिर्गमे २९ यदा न योगोपचितासु चे
तो मायासु सिद्धस्य विषज्जतेंग अनन्यहेतुष्वथ मे गतिः स्यादात्यंतिकी यत्र न मृत्युहासः ३०
इतिश्रीभागवते महापुराणे तृतीयस्कंधे सप्तविंशतितमोध्यायः श्रीभगवानुवाच योग
स्य लक्षणं वक्ष्ये सबीजस्य नृपात्मजे मनो येनैव विधिना प्रसन्नं याति सत्पथं १

तः। अथ तदा अंतमतिक्रांतो मृत्योहासो न भवति विषयासक्तो तु सिद्धो यो हं तत्संबंधिनी। यत्र यस्यां गतौ मृत्योर्हासो न भवति। विषयासक्तो तु सिद्धो
...

तत्र नियमानाह। त्रिभिरक्षरद्वयाधिकैः शक्त्या स्वधर्माचरणं १ ग्राम्यस्त्रैवर्गिको धर्मस्तस्मान्निवृत्तिः। मितं वन्यमे
ध्यं वस्तु इंद्रवत्तस्यादनं। तत्र मितं नाम। द्वौ भागौ पूरयेदन्नैस्तोयेनैकं प्रपूरयेत्। मारुतस्य प्रचारार्थं चतुर्थमवशेष
येदिति स्मृतिप्रसिद्धं। विविक्तं विजनं क्षेमं निर्बाधं तस्य स्थानस्य सेवनं ३ यावतार्थः प्रयोजनं तावन्मात्रस्य प
रिग्रहः ४ आसनादीन्यंगान्याह त्रिभिः सत्तः आसनस्य जयेन स्थैर्यं ५ स्वधिष्ठ्यानां प्राणस्थानानां मूला

स्वधर्माचरणं शक्त्या विधर्माच्च निवर्तनं देवाल्लब्धेन संतोष आत्मविच्चरणार्चनं १ ग्राम्यधर्मनिवृत्ति
श्च मोक्षधर्मरतिस्तथा मितमेध्यादनं शश्वद्विविक्तक्षेमसेवनं ३ अहिंसा सत्यमस्तेयं यावदर्थप
रिग्रहः ब्रह्मचर्यं तपः शौचं स्वाध्यायः पुरुषार्चनं ४ मौनं सदासनजयः स्थैर्यं प्राणजयः शनैः प्र
त्याहारश्चेंद्रियाणां विषयान्मनसा हृदि ५ स्वधिष्ण्यानामेकदेशे मनसा प्राणधारणं वैकुंठली
लाभिध्यानं समाधानं तथात्मनः ६ एतैरन्यैश्च पथिभिर्मनो दुष्टमसत्पथं बुद्ध्या युंजीत शनकैर्जि
तप्राणो ह्यतंद्रितः ७ शुचौ देशे प्रतिष्ठाप्य विजितासन आसनं तस्मिन्स्वस्ति समासीन ऋजुकायः राम
समभ्यसेत् ८ १३९

धारादीनां मध्ये एकस्मिन्देशे मनसा सह प्राणस्य धारणं। आत्मनो मनसश्च समाधानं
आत्माकारता ६ अन्यैश्च व्रतदानादिभिः पथिभिरुपायैः ७ आसनादीनि प्रपंचयति शुचाविति याव
त्समाप्तिः। आसनं चैलाजिनकुशोत्तरं प्रतिष्ठाप्य स्वस्तिकासनेन यथासुखमिति वा समभ्यसेत् प्रणवमिति
शेषः। ऊरुजंघांतराधाय पादाग्रे जानुमध्यगे। योगिनो यदवस्थानं स्वस्तिकं तद्विदुर्बुधाः ८

कुशाजिनचैलोत्तरं २

विक्रममेवाह। यं यमर्थं दुःखेन प्रयासेनोपादत्ते। आपादयति। तं तं भगवान्कालो धुनोति विनाशयति। यत्त
तेयन्निमित्तं १ शोके हेतुः। यद्यस्मात्सानुबंधस्य कलत्रादिसहितस्य देहस्य संबंधी निग्रहादीनि ध्रुवाद्
व्यं। अनुक्तसमुच्चयार्थश्चकारः ३ दुर्मतित्वं दर्शयन्दुःखप्रपंचयति जंतुरिति चतुर्दशभिः ४ नारक्यां

यं यमर्थमुपादत्ते दुःखेन सुखहेतवे तं तं धुनोति भगवान्पुमान्शोचति यत्कृते १ यदध्रुवस्य देहस्य
सानुबंधस्य दुर्मतिः ध्रुवाणि मन्यते मोहाद्गृहक्षेत्रवसूनि च ३ जंतुर्वै भव एतस्मिन्यां यां योनि
मनुव्रजेत् तस्यां तस्यां स लभते निर्वृतिं न विरज्यते ४ नरकस्थोऽपि देहं वै न पुमांस्त्यक्तुमिच्छति
नारक्यां निर्वृतौ सत्यां देवमायाविमोहितः ५ आत्मजायासुतागारपशुद्रविणबंधुषु निरूढ
मूलहृदय आत्मानं बहु मन्यते ६ संदह्यमानसर्वांग एषामुद्वहनाधिना करोत्यविरतं मूढो दु
रितानि दुराशयः ७ आक्षिप्तात्मेंद्रियः स्त्रीणामसतीनां च मायया रहोरचितयालापैः शिशूनां
कलभाषिणां ८ गृहेषु कूटधर्मेषु दुःखतंत्रेष्वतंद्रितः कुर्वन्दुःखप्रतीकारं सुखवन्मन्यते गृही ९

नरकाहारादिभिर्जातायां ५ निरूढमूलं प्ररूढमनोरथं हृदयं यस्य बहु मन्यते कृतार्थोऽहमिति श्लाघते ६
उद्वहनाधिना पोषणचिंतया ७ दुराशयत्वमाह। आक्षिप्तः आत्मा इंद्रियाणि च यस्य। कया। असतीनां पुंश्च
लीनामपि रहसि रचितया संभोगादिरूपया। मधुरभाषिणां शिशूनामालापैश्च सुखवन्मन्यत इत्युत्तरेणान्व
यः ८ कूटाः विप्रशाठ्यादिबहुलाधर्मा येषु दुःखप्रधानेषु ९

भा०त० येषांपोषणेनाधोयातितान्पुष्णाति।शेषभुगितिभोगोपित्तस्यदुर्लभइत्यर्थः १० वार्त्तायांजीविकायांनिःस
२४९ त्वःअशक्तःपरार्थेपरस्वे ११ अकल्पःअसमर्थः १२ पूर्वयथाआद्रियंतेतथाआदरंनकुर्वंति।कीनाशाः
कृपणाःकृषीवलाःगोजरंवृद्धंबलिवर्दं १३ भ्रियमाणःपुष्यमाणः १४ अवमत्याअवज्ञयाउपन्यस्तंस

अर्थैरापादितैर्गुर्व्याहिंसयेतस्तत्श्चतान् पुष्णातियेषांपोषेणशेषभुग्यात्यधःस्वयं १० वार्त्तायांलु
प्यमानायामारब्धायांपुनःपुनः लोभाभिभूतोनिःसत्वःपरार्थेकुरुतेस्पृहां ११ कुटुंबभरणाकल्पो
मंदभाग्योवृथोद्यमः श्रियाविहीनःकृपणोध्यायन्श्वसितिमूढधीः १२ एवंस्वभरणाकल्पंतत्कल
त्रादयस्तदा नाद्रियंतेयथापूर्वंकीनाशाइवगोजरं १३ तत्राप्यजातनिर्वेदोभ्रियमाणःस्वयंभृतैः
जरयोपात्तवैरूप्योमरणाभिमुखोगृहे १४ आस्तेवमत्योपन्यस्तंगृहपालइवाहरन् आमयाव्यप्रदीप्ता
ग्निरल्पाहारोल्पचेष्टितः १५ वायुनोत्क्रमतोत्तारःकफसंरुद्धनाडिकः कासश्वासकृतायासः
कंठेघुरघुरायते १६ शयानःपरिशोचद्भिःपरिवीतःस्वबंधुभिः वाच्यमानोपिनब्रूतेकालपाश
वशंगतः १७ एवंकुटुंबभरणेव्यापृतात्माजितेंद्रियः म्रियतेरुदतांस्वानामुरुवेदनयास्तधीः १८ राम
२४९

मापेप्रक्षिप्तं।गृहपालःश्वाआहरन्भुंजानः।आमयावीरोगी १५ उत्तारोबहिर्निर्गतनेत्रः।कफेनसंरुद्धा
नाड्योमार्गभूतायस्यतेनकासश्वासाभ्यांकृतःआयासोयस्यघुरघुरइतिशब्दंकरोति।१६ परिवीतःप
परिवेष्टितः।वाच्यमानःबंधोनातेत्याहूयमानः १७ अस्तधीर्नष्टमतिः १८

भा०त० देवगुप्तंप्रारब्धकर्मपालितं २९ निर्वाणंनित्यमुक्तं ३० हेवीर विदुरउपेयुषीप्राप्ता ३१ हेसौम्यतस्यास्तन्मर्त्यश
१३२ रीरंसरिद्भूत् कथंभूतं योगेनविधुताविलीनामार्त्यादैहिकाधातुमलायस्य ३२ कपिलोययावित्यक्तं तद्दे

त्यांगंतपोयोगमयंमुक्तकेशंगतांबरं दैवगुप्तंनबुबुधेवासुदेवप्रविष्टधीः २९ एवंसाकपिलोक्तेनमार्गे टी
णाचिरात्परं आत्मानंब्रह्मनिर्वाणंभगवंतमवापह ३० तद्वीरासीत्पुण्यतमंक्षेत्रंत्रैलोक्यविश्रुतं
नाम्नासिद्धपदंयत्रसासंसिद्धिमुपेयुषी ३१ तस्यास्तद्योगविधुतमार्त्यंमर्त्यमभूत्सरित् स्रोतसांप्रव
रासौम्यसिद्धिदासिद्धसेविता ३२ कपिलोपिमहायोगीभगवान्पितुराश्रमात् मातरंसमनुज्ञाप्यप्रा
गुदीचींदिशंययौ ३३ सिद्धचारणगंधर्वैर्मुनिभिश्चाप्सरोगणैः स्तूयमानःसमुद्रेणदत्तार्हणनिकेत
नः ३४ आस्तेयोगंसमास्थायसांख्याचार्यैरभिष्टुतः त्रयाणामपिलोकानांमुपशांत्यैसमाहितः ३५ १३२
एतन्निगदितंतातयत्पृष्टोहंतवानघ कपिलस्यचसंवादोदेवहूत्याश्चपावनः ३६ यइदमनुशृणोतियो
भिधत्तेकपिलमुनेर्मतमात्मयोगगुह्यं भगवतिकृतधीःसुपर्णकेतावुपलभतेभगवत्पदारविंदं ३७
इतिश्रीभागवतेमहापुराणेतृतीयस्कंधेत्रयस्त्रिंशत्तमोध्यायः

वप्रपंचयतिकपिलोपीतित्रिभिः समनुज्ञाप्यअनुज्ञांसंप्राप्यदत्तमर्हणमर्घंनिकेतनंचयस्मै ३४ उपशांत्य
र्थंसमाहितस्त्वास्ते ३५ प्रकरणार्थमुपसंहरति एतदितितवत्वया ३६ एतच्छ्रवणकीर्तनफलमाह यइतिसुपर्णकेतौ
उपलभतेप्राप्नोति ३७ तृतीयेत्रयस्त्रिंशः श्रीरस्तु०

ऊनविंशो। किंपुरुषे भारते चोपवर्ण्यते। सेव्यसेवकभावश्च भारतश्रैष्ठ्यमुच्यते। भर्त्रा वा सो भगवांश्च तस्य कथां २॥
आर्याणि लक्षणानि शीलं व्रतं च यस्मिन् उपशिक्षिता त्मने संयतचित्ताय। उपासितो नुसृतो लोको येन। साधु
वादः साधुत्वप्रसिद्धिः तस्य निकषणाय निकषाश्मवन्निर्द्धारस्थानाय परमसीम्न इत्यर्थः॥३॥ श्रीरामं परमा
र्थरूपेण प्रणमति। यदेकं वेदांतेषु प्रसिद्धं तत्त्वं तत्प्रपद्ये। कथंभूतं। विशुद्धश्चासावनुभवश्च स एव मात्रा स्वरूपं

श्रीशुक उवाच॥ ॥ किंपुरुषे वर्षे भगवंतं आदिपुरुषं लक्ष्मणाग्रजं सीताभिरामं रामं तच्चरणसंनिक
र्षाभिरतः परमभागवतो हनुमान् सह किंपुरुषैरविरतभक्तिरुपास्ते॥ १॥ आर्ष्टिषेणेन सह गंधर्वैरनुगीय
मानां परमकल्याणीं भर्तृभगवत्कथां समुपशृणोति स्वयं चेदं गायति॥ २॥ ॐ नमो भगवते उत्तमश्लो
काय नम आर्यलक्षणशीलव्रताय नम उपशिक्षितात्मने उपासितलोकाय नमः साधुवादनिक
षणाय नमो ब्रह्मण्यदेवाय महापुरुषाय महाराजाय नम इति॥ ३॥ यत्तद्विशुद्धानुभवमात्रमेकं स्व
तेजसा ध्वस्तगुणव्यवस्थं॥ प्रत्यक्प्रशांतं सुधियोपलंभनं ह्यनामरूपं निरहं प्रपद्ये॥ ४॥
यस्य। विशुद्धत्वे हेतुः। प्रशांतं। तत्रापि हेतुः। स्वतेजसा स्वरूपप्रकाशेन ध्वस्ताः गुणानां विविधा जाग्र
दाद्यवस्था यस्मिन् अनुभवमात्रत्वे हेतुः। प्रत्यक् दृश्याद्न्यत्। तत्कुतः अनामरूपं। ननु बस्तुतस्त्वेवं तू तस्यापि जीवस्यो
क्तसर्वविपर्ययो दृश्यते तत्राह। निरहं अहंकाराभावान्न तथा वैपरीत्यमित्यर्थः। ननु श्रीरामस्वरूपं नैवं प्रतीयते तत्राह

०भा०
शादशसाहस्रो द्वादशस्कंधसम्मितः॥ हयग्रीवब्रह्मविद्या यत्र वृत्रवधस्तथा॥ गायत्र्या च समारंभस्तद्वै भागवतं विदुः
ब्रह्मपुराणे च॥ अंबरीषं प्रति गौतमवचनं॥ अंबरीष शुकप्रोक्तं नित्यं भागवतं शृणु। पठस्व स्वमुखेनापि यदीच्छसि
भवक्षयमिति। अत एव भागवतं नाम अन्यपुराणवदित्यपि न शंकनीयं। इदानीं श्रोतृप्रवर्त्तनाय श्रीभागवतस्य कांड
श्र
त्रयविषयेभ्यो वेदेभ्यः सर्वशास्त्रेभ्यश्च श्रैष्ठ्यं दर्शयति॥ धर्म इति। अत्र श्रीमति सुंदरे भागवते परमो धर्मो निरूप्य
ते। परमत्वे हेतुः। प्रकर्षेण उज्झितं कैतवं फलाभिसंधिलक्षणं कपटं यस्मिन् सः प्रशब्देन मोक्षाभिसंधिरपि निरस्तः
केवलमीश्वराराधनलक्षणो धर्मो निरूप्यत इति। अधिकारितोपि धर्मस्य परमत्वमाह। निर्मत्सराणां
परोत्कर्षासहनं मत्सरः। तद्रहितानां सतां भूतानुकंपिनां एवं कर्मकांडविषयेभ्यः शास्त्रेभ्यः
श्री
२
श्रैष्ठ्यमुक्तं ज्ञानकांडविषयेभ्योऽपि श्रैष्ठ्यमाह। वेद्यमिति। वास्तवं परमार्थभूतं वस्तु वेद्यं न तु वै
शेषिकाणामिव। द्रव्यगुणादिरूपं। यद्वा वास्तवशब्देन वस्तुनोंऽशो जीवः श्री
२

निर्विकारस्यक्रियानिर्गुणस्यचगुणाः कथंलीलयेत्युक्तिः प्रयोजनाभावंपरिहरति नवरूक्विरोधइतिभावः २ अर्भक
वल्लीलापिनयुज्यतेवैषम्यादित्याह उद्यमयतिप्रवर्त्तयतीत्युद्यमः अर्भकस्यक्रीडायांप्रवृत्तिहेतुःकामोस्ति अन्यतस्तु
वस्त्वंतरेणबालांतरप्रवर्त्तनेनवातस्यक्रीडेच्छाभवति ईश्वरस्यतुस्वतस्तृप्तस्यकथंकामः अन्यतस्तुसदानिवृत्तस्यवाअ
संगाद्द्वितीयस्यकथमन्यतश्चिक्रीडिषेत्यर्थः ३ प्रश्नोक्तंस्मरन्विश्वसृजामीशोविज्ञापितमधोक्षजइत्यादिनाअवि

विदुरउवाच ब्रह्मन्कथंभगवतश्चिन्मात्रस्याविकारिणः लीलयाचापियुज्येरन्निर्गुणस्यगुणाःक्रियाः २
क्रीडायामुद्यमोर्भस्यकामश्चिक्रीडिषान्यतः स्वतस्तृप्तस्यचकथंनिवृत्तस्यसदान्यतः ३ अस्राक्षीद्भग
वान्विश्वंगुणमय्यात्ममायया तयासंस्थापयत्येतत्भूयःप्रत्यपिधास्यति ४

द्योपाधेर्जीवस्यभोगार्थमीश्वरःसृष्ट्यादिकरोतीतितद्व्याख्येमनुवदति अस्राक्षीदिति गुणमयीआत्मनोजीवस्यक
३ या र्तृत्वभोक्तृत्वादिमोहोत्यादिकामायातयासृष्टवान् तदुक्तंप्रथमे ययासंमोहितोजीवआत्मानंत्रिगुणात्मकं परो
पिमनुतेनर्थंतत्कृतंचाभिपद्यतइत्यादिना अतोभगवतीमायामायिनामपिमोहिनीति संस्थापयतिपालयति
प्रत्यपिधास्यतिप्रातिलोम्येनतिरोहितंकरिष्यति पाठांतरेप्रातिलोम्येनात्मनिधारयिष्यति ४ वासुदेवायनमः

अत्रर २

श्रीमन्महागणपति

आ चू
आध

चित्तविक्षेपकत्वेनभक्तेरात्यंतिकलाभयोगादन्यत्रेभयेणामपिभगवतिमनोवृत्तेर्गंगाप्रवाहवदविच्छिन्नतदभावात्
सत्वएकमनसःपुंसोगुणलिंगानामितिविशिष्योक्तौरभिप्रायः॥ संभावनमात्राभिप्रायेणोक्तमित्येतावतोसत्तोन्यूनातिरेकभावो
नकल्पनीयः॥ हृषीकाकारिलेनतस्मीतिहेतुलात्तदेवज्ञातिमात्रंपरिहार्यंगुणलिंगानामिति॥ कल्पाद्यावत्तदयंत्रयेआ
नुश्राविककर्मणामिति॥ वेदोक्तानुष्ठाननियमासिवानां॥ उक्तविशेषणवतांदेवनांसतेभगवत्येकमनसोवृत्तिर्भक्तिरि
त्युक्तेःधमाधिकारिभिः क्रियमाणायाअभक्तिकमात्यंतिकत्वाभावश्चास्यात तस्मात्क्रोडीकृतसर्वगोचरेतिपृष्टत्ला

अनिमित्ताभगवतिभक्तिःसिद्धेर्गरीयसी जरयत्याशुयाकोशंनिगीर्णमनलोयथा ३३ देवअ॰

यथाधयाधउत्तापितेभ्या

देवप्रदेप्रसामदवीतयेतिधुर्नपिये[illegible]

सत्त्वाद्विहाराय[illegible]भागोवत्[illegible]येषांसत्वएमनसोवृत्तिरिति तदेवसामान्यभक्तिलक्षणं आनुश्राविककर्मणामि
ति सर्वसामान्यभक्तिलक्षणं आनुश्राविककर्मणामिति सर्वसामान्यलक्षणं स्वाभाविक्यनिमित्तेति सर्वत्रसममधमा
धिकारिभिः क्रियमाणाभक्तिःदृष्टश्रीसिद्धेर्मुक्तेर्गरीयसीप्रधानसाधनभूता ३३

भा०३ केनं आसं तिकभक्तिकर्तारः सधेन सङ्क्ते मुक्तेर्गदीयितत्वं स्या। दमितत्राह। नैकात्म्यतामपि। ये भागवता अन्योन्यतः प्रसज्जमा। विना मम पोरुषाणि
१५४ प्रकामा अभी भा अर्थे ते संभाष्यवदंति॥ श्रृण्वंति च॥ ते मे मयादीयमानं। अस्रो कात्म्यतं मुक्तिं न स्पृहयंति॥ नेच्छंति॥ यदि भक्तिसंतुष्टो हा। किं किमपि ददाति॥
तदपि तदाज्ञा लेनैव गृह्णंति। नतु भक्तिफलत्वेन ह। दीयमानं वा कोपि सन्न किमुत अपेक्षावान्। अतद्दस भगवता कथ्यते न तु तला मतिमंदा शंकां ने
छंति॥ मा तु व्यभिचि फलत्वेन हरियंति। दद। निमक्ति संतुष्ट। आज्ञा त्वेनैव गृह्णंति॥ मह [illegible] नी [illegible] पुनः [illegible] मे निष्कामं [illegible] ने न परिहंत
ति। कुतो नेच्छंतित आह॥ मत्पादसेवा भगवत् चरणनिषेवायाः पूर्णानंदहेतुत्वा दित्यर्थः॥ भगवदाघसेवायाः पूर्णानंदहेतुत्वं कथं तदता
नाभयान्यपरत्वाहुः [illegible] सेवा [illegible] तउक्तं॥ मदीहा इति। अनेन प्रासंगिकान्यपदार्थ [illegible] तेमदर्पणेन सापि यतः भवतु॥

श्रीगणेशाय नमः॥ कमकन्हूतनमयामुखपंकजं [illegible] अाध
वसतु ते कलाकरपंन्कने॥ वपुषि तारमतांकम
कांगडप्रातिदिनं हृदये कमकापति औवंद
नेने प्रवस्पश [illegible] रणांति नाः [illegible] तनकस्याभूह [illegible] घ. [illegible] निरप्य विरायाक्तिता
यत स्वस्य [illegible] श्रयान्माने २. श्रीरामनारायणवासुदेवगो। विदनेकु [illegible] दर्कस श्रीकेशवानंतन्
लिदविलामा [illegible] संसारं जगद् [illegible] अतोहलादेलघोपाप
नेहदूशिशकाति तितुचतथासि

श्रीगणेशायनमः

88

॥०४१ श्रीगणेशायनमः॥ ॥श्रीपरमहंसास्वादितचरणकमलचिन्मकरंदायभक्तजनमानसनिवासायश्रीरामायनमः॥ श्रीकृष्णायन
[...]चतुर्थेकत्रिंशताध्यायैर्विसर्गोस्फुर्यईर्यते॥ विसर्गस्त्वीश्वराधीनैर्ब्रह्ममन्वादिभिःकृतः। तत्रतुप्रथमाध्यायेमनुकन्यान्व
यःस्फुटः। वर्ण्यतेयज्ञदत्तादिमूर्तिभिःप्रभवोहरेः॥ मनुकन्यान्वयंविस्तरेणवक्तुमाहमनोरिति। इकारात्तोपुत्रोव १
तुशब्दादन्यतोपिपुत्रलाभःसूचितस्तद्दर्शयितुमाह। पुत्रिकाधर्ममाश्रित्येति। भ्रातृकांप्रदास्यामितुभ्यंकन्यामलं

श्रीमैत्रेयउवाच॥ ॥मनोस्तुशतरूपायांतिस्रःकन्याश्चजज्ञिरे। आकूतिर्देवहूतिश्चप्रसूतिरितिविश्रु
ताः॥१॥ आकूतिंरुचयेप्रादादपिभ्रातृमतींनृपः। पुत्रिकाधर्ममाश्रित्यशतरूपानुमोदितः॥२॥ प्रजापतिः
सभगवान्रुचिस्तस्यामजीजनत्। मिथुनंब्रह्मवर्चस्वीपरमेणसमाधिना॥३॥ यस्तयोःपुरुषःसाक्षाद्विष्णु
र्यज्ञस्वरूपधृक्। यास्त्रीसादक्षिणाभूतेरंशभूतानपायिनी॥४॥ आनिन्येस्वगृहंपुत्र्याःपुत्रंविततरो
चिषं॥ स्वायंभुवोमुदायुक्तोरुचिर्जग्राहदक्षिणां॥५॥

कृतां। अस्यांयोजायतेपुत्रःसमेपुत्रोभवेदितिभाषाबंधेनकन्यादानंपुत्रिकाधर्मः। सचभ्रातृकायांकन्यायांकुर्या
न्नत्वप्रसिद्धस्तथापिपुत्रबाहुल्यकामस्तथाकृतवानित्याह। भ्रातृमतीमपीति॥२॥ ब्रह्मवर्चस्वीब्रह्मतेजस्वी
मिथुनंपुरुषंस्त्रियंच। समाधिनाईश्वरध्यानेन।३। भूतेर्लक्ष्म्याअंशभूता। अनयोर्विवाहोपियुक्तइतिभावः॥४॥ ॥५॥ ॥

यजुषांयज्ञानांमंत्राणांवापतिर्विष्णुः।६। द्विषट्द्वादश।७। प्रसंगात्स्वायंभुवमन्वंतरगतंषट्कमाह। तुषितादितिद्वाभ्यां। मन्वंतरंमनुर्दे
वामनुपुत्राःसुरेश्वरः। ऋषयोंशावतारश्चहरेःषड्विधमुच्यतइतिवक्ष्यति। तत्रस्वायंभुवोमनुः। तुषितादेवाः। मरीचिप्रमुखाःसप्तर्षि
यः। यज्ञोहरेरवतारः। सएवसुरगणेश्वरइंद्रः।८। प्रियव्रतोत्तानपादौमनुपुत्रौपृथ्वीपालकौ। तदेवंयज्ञस्यदेहरूपेणषड्विधत्वंत
तो। पुत्रपौत्रनप्तॄणांवंशैरनुवृत्तंयाभ्यांपालितंतन्मन्वंतरं।९। श्रुतप्रायंबाहुल्येनश्रुतं। तत्कन्यावंशानामश्रुतत्वात्सायय

तांकामयानांभगवानुवाहयजुषांपतिः। तुष्टायांतोषमापन्नोजनयद्द्वादशात्मजान्॥६॥ तोषःप्रतोषः
संतोषोभद्रःशांतिरिडस्पतिः। इध्मःकविर्विभुःस्वह्नःसुदेवोरोचनोद्विषट्॥७॥ तुषितानामतेदेवाआसन्स्वा
यंभुवांतरे। मरीचिमिश्राऋषयोयज्ञःसुरगणेश्वरः॥८॥ प्रियव्रतोत्तानपादौमनुपुत्रौमहौजसौ। तत्पुत्रपौ
त्रनप्तॄणामनुवृत्तंतदंतरं॥९॥ देवहूतिमदात्तातकर्दमायात्मजांमनुः। तत्संबंधिश्रुतप्रायंभवतागदतोम
म॥१०॥ दक्षायब्रह्मपुत्रायप्रसूतिंभगवान्मनुः। प्रायच्छद्यत्कृतःसर्गस्त्रिलोक्यांविततोमहान्॥११॥ याःक
र्दमसुताःप्रोक्तानवब्रह्मर्षिपत्नयः। तासांप्रसूतिप्रसवंप्रोच्यमानंनिबोधमे॥१२॥ पत्नीमरीचेस्तुकला
सुषुवेकर्दमात्मजा। कश्यपंपूर्णिमानंचययोरापूरितंजगत्॥१३॥ पूर्णिमासूतविरजंविश्वगंचपरंतप। देवकु
ल्यांहरेःपादशौचाद्याभूत्सरिद्दिवः॥१४॥ देवकुल्यानामकन्यायाहरेःपादप्रक्षालनाज्जन्मांतरेयादिवःसरिद्गंगाभूत्तां।१४

हणं।१०।११। प्रसूतिप्रसवंपुत्रपौत्रादिभिर्विस्तारं।१२। ययोर्वंशेनापूरितं।१३। कश्यपस्यवंशंषष्ठेवक्ष्यतीतिद्वितीयस्यवंशमाहपूर्णिमेति।

आत्मेशब्रह्मसंभवान् विष्णुरुद्रब्रह्मणामंशैः संभृतान्।१५। किंचितकिंस्वित्।१६। ऋक्षंनामकुलाद्रिं। तपसिस्थितःसन्।१७। तस्मिन्कुल
द्रौप्रसूनानांस्तबकायेषुपलाशाशोकेषुतेषांकानने। निर्विंध्यानामनदीतस्याःस्रवद्भिर्वारिभिरुद्घुष्टेनादिते।१८।१९।२०। प्राणाया
मेधःसंदीपकोयस्यतेन। मुनेर्मूर्द्ध्नोनिर्गतेनाग्निनातप्यमानंसमीक्ष्यतदाश्रमपदंययुरित्यन्वयः।२१। अप्सरःप्रमुखैर्वितांय
मानंविस्तार्यमाणंयशोयेषांते।२२। तेषांप्रादुर्भावःप्राकट्यंतस्यसंयोगःसन्निधिस्तेनविद्योतितंमनोयस्यउत्तिष्ठन्। उत्कर्षे

अत्रेःपत्न्यनसूयात्रीन्जज्ञेसुयशःसुतान्। दत्तंदुर्वाससंसोममात्मेशब्रह्मसंभवान्॥१५॥ ॥विदुरउवाच॥ अ
त्रेर्गृहेसुरश्रेष्ठाःस्थित्युत्पत्त्यंतहेतवः। किंचिच्चिकीर्षवोजाताएतदाख्याहिमेगुरो॥१६॥ ॥श्रीमैत्रेयउवाच॥ ब्र
ह्मणाचोदितःसृष्टावत्रिर्ब्रह्मविदांवरः। सहपत्न्याययावृक्षंकुलाद्रिंतपसिस्थितः॥१७॥ तस्मिन्प्रसूनस्तबकपलाशा
शोककानने। वार्भिःस्रवद्भिरुद्घुष्टेनिर्विंध्यायाःसमंततः॥१८॥ प्राणायामेनसंयम्यमनोवर्षशतंमुनिः। अतिष्ठ
देकपादेननिर्द्वंद्वोऽनिलभोजनः॥१९॥ शरणंतंप्रपद्येहंयएवजगदीश्वरः। प्रजामात्मसमांमह्यंप्रयच्छत्वि
तिचिंतयन्।२०। तप्यमानंत्रिभुवनंप्राणायामैधसाग्निना। निर्गतेनमुनेर्मूर्द्ध्नःसमीक्ष्यप्रभवस्त्रयः॥२१॥
अप्सरोमुनिगंधर्वसिद्धविद्याधरोरगैः। वितायमानयशसस्तदाश्रमपदंययुः॥२२॥ तत्प्रादुर्भावसंयोगवि
द्योतितमनामुनिः। उत्तिष्ठन्नेकपादेनददर्शविबुधर्षभान्॥२३॥ प्रणम्यदंडवद्भूमावुपतस्थेऽर्हणांजलिः। वृषहंस
सुपर्णस्थान्स्वैःस्वैश्चिह्नैश्चचिह्नितान्॥२४ २

तिष्ठन्।२३। अर्हणंपुष्पादिकमंजलौयस्य। उपतस्थेपूजयामास। वृषाद्यारूढान्। स्वैःस्वैश्चिह्नैस्त्रिशूलकमंडलुचक्रादिभिः।२४

कृपयावलोकोयस्मिन्हसद्वदनंवतेनउपलंभितान्प्रसन्नत्वेनज्ञापितान्। तेषांरोचिषादीप्त्या।२५। श्लक्ष्णयामधुरया। सूक्त
यागंभीरार्थया।२६। अनुयुगंकल्पेकल्पेविभज्यगृहीतोदेहोयैःतेप्रसिद्धाब्रह्मविष्णुगिरिशायूयं। वःयुष्माकंमध्ये। नेभ्यः
सकाशादेकएवमेमयाउपहूतःशरणंतंप्रपद्येइत्येकस्यैवनिर्दिष्टत्वात्। सचयुष्माकंकइतियुष्माभिरेवकथ्यतामित्य
र्थः।२७। अस्यप्रपंचएकइति। विविधैःप्रधानैरूपचारैःविबुधप्रधानइतिवापाठः। प्रजननायपुत्रोत्पत्त्यैचित्तीकृतःचित्ते

कृपावलोकेनहसद्वदनेनोपलंभितान्। तद्रोचिषाप्रतिहतेनिमील्यमुनिरक्षिणी॥२५॥ चेतस्तत्प्रवणंयुज
न्नस्तावीत्संहतांजलिः। श्लक्ष्णयासूक्तयावाचासर्वलोकगरीयसः॥२६॥ ॥अत्रिरुवाच॥ ॥विश्वोद्भव
स्थितिलयेषुविभज्यमानैर्मायागुणैरनुयुगंविगृहीतदेहाः। तेब्रह्मविष्णुगिरिशाःप्रणतोस्म्यहंवस्तेभ्यःकएवभ
वतांमइहोपहूतः॥२७॥ एकोमयेहभगवान्विविधप्रधानैश्चित्तीकृतःप्रजननायकथंनुयूयं। अत्रागतास्तनु
भृतांमनसोपिदूराद्ब्रूतप्रसीदतमहानिहविस्मयोमे॥२८॥ ॥श्रीमैत्रेयउवाच॥ ॥इतितस्यवचःश्रुत्वात्रय
स्तेविबुधर्षभाः। प्रत्याहुःश्लक्ष्णयावाचाप्रहस्यतमृषिंप्रभो॥२९॥ ॥देवाऊचुः॥ ॥यथाकृतस्तेसंकल्पो
भाव्यंतेनैवनान्यथा। सत्संकल्पस्यतेब्रह्मन्यद्वैध्यायतितेवयं॥३०॥ वैकंतत्वं नास्माकंभेदोस्तीत्यर्थः।३०॥ ॥

कथंनीतःमनसोपिदूराःअगोचराःसंतःकथंनुअत्रयोप्यत्रागताः।२८।२९। तेत्वयायथाकृतःसंकल्पस्तेनतथैवभाव्यंनान्यथा। यतःसत्सं
कल्पस्यतेसंकल्पःतर्हिकथमेकस्मिन्ध्यायमानेत्रयःप्रतीताःअतआहुःयदेकंजगदीश्वराख्यंतत्त्वंभवान्ध्यायति। तएतेवयंत्रयोपितदे

विस्रक्ष्यंति विस्तारयिष्यंति। अंतर्भूर्द्धितणंतस्य स्वरूपगतावित्यस्य स्वरूपं।३१। ताभ्यां स्मरारूपं मानिताः पूजितास्संतः ततः स्थानात्प्र
तिजग्मुः।३२। निबोध बुध्यस्व।३३। ताः कन्या निर्दिशति सिनीवालीति।३४। पुलस्त्यस्य हविर्भुवि पत्न्यामित्यन्वयः। सोमस्य दं

अथास्मदंशभूतास्ते आत्मजा लोकविश्रुताः। भवितारोंग भद्रं ते विस्रक्ष्यंति च ते यशः॥३१॥ एवं कामवरं दत्वा प्रतिज
ग्मुः सुरेश्वराः। सभाजितास्तयोः सम्यग्दंपत्योर्मिषतोस्ततः॥३२॥ सोमोऽभूद्ब्रह्मणोंऽशेन दत्तो विष्णोस्तु योगवित्।
दुर्वासाः शंकरस्यांशो निबोधांगिरसः प्रजाः॥३३॥ श्रद्धात्वंगिरसः पत्नी चतस्रोऽसूत कन्यकाः। सिनीवाली कुहू
राका चतुर्थ्यनुमतिस्तथा॥३४॥ तत्पुत्रावपरावास्तां ख्यातौ स्वारोचिषेंतरे। उतथ्यो भगवान्साक्षाद्ब्रह्मिष्ठश्च बृ
हस्पतिः॥३५॥ पुलस्त्योऽजनयत्पत्न्यामगस्त्यं च हविर्भुवि। सोन्यजन्मनि दह्राग्निर्विश्रवाश्च महातपाः॥३६॥
तस्य यक्षपतिर्देवः कुबेरस्त्विलिविडासुतः। रावणः कुंभकर्णश्च तथान्यस्यां विभीषणः॥३७॥ पुलहस्य गतिर्भा
र्या त्रीनसूत सती सुतान्। कर्मश्रेष्ठं वरीयांसं सहिष्णुं च महामते॥३८॥ क्रतोरपि क्रिया भार्या वालखिल्या
नसूयत। ऋषीन्षष्टिसहस्राणि ज्वलतो ब्रह्मतेजसा॥३९॥ ऊर्जायां जज्ञिरे पुत्रा वसिष्ठस्य परंतप। चित्रकेतु
प्रधानास्ते सप्त ब्रह्मर्षयोऽमलाः॥४०॥ चित्रकेतुः सुरोचिश्च विरजा मित्र एव च। उल्बणो वसुभृद्यानो द्युमान्शक्त्याद

दह्राग्निर्जठराग्निः। विश्रवाश्च पुलस्त्यस्य सुत इति शेषः ३६। योपरे॥४१॥ तस्य विश्रवसः इलिविडायां जातः सुतः कुबेरः। अन्यस्यां २
भार्यायां केशिन्यां रावणादयस्त्रयः सुताः।३७।३८। ज्वलतः प्रकाशमानान्।३९। चित्रकेतुप्रमुखा जज्ञिरे। ते च सप्त ब्रह्मर्षयो जाताः।
तानेवाह चित्रकेतुरिति वसुभृद्यानो नामैकः शक्त्यादयोऽपरे अन्यस्याः पुत्राः ४१

४२ ख्यात्यां पत्न्यां। पुत्रान् पुत्रीं च। तानेवाह धातारमिति।४३। तयोः धातृविधात्रोः ४४॥ कविश्च भार्गवः भृगोः पुत्रः।४५॥

चित्तिस्त्वथर्वणः पत्नी लेभे पुत्रं धृतव्रतं। दध्यंचमश्वशिरसं भृगोर्वंशं निबोध मे॥४२॥ भृगुः ख्यात्यां महाभागः पत्न्यां पु
त्रानजीजनत्। धातारं च विधातारं श्रियं च भगवत्परां॥४३॥ आयतिं नियतिं चैव सुते मेरुस्तयोरदात्। ताभ्यां
तयोरभवतां मृकंडः प्राण एव च॥४४॥ मार्कंडेयो मृकंडस्य प्राणाद्वेदशिरा मुनिः। कविश्च भार्गवो यस्य भगवा
नुशनाः सुतः॥४५॥ सर्वे ते मुनयः क्षत्त लोकान्सर्गैरभावयन्। एष कर्दमदौहित्रसंतानः कथितस्तव। शृण्वतः
श्रद्दधानस्य सद्यः पापहरः परः॥४६॥ प्रसूतिं मानवीं दक्ष उपयेमे ह्यजात्मजः। तस्यां ससर्ज दुहितृः षो
डशामललोचनाः॥४७॥ त्रयोदशादाद्धर्माय तथैकामग्नये विभुः। पितृभ्य एकां युक्तेभ्यो भवायैकां भ
वच्छिदे॥४८॥ श्रद्धा मैत्री दया शांतिस्तुष्टिः पुष्टिः क्रियोन्नतिः। बुद्धिर्मेधा तितिक्षा ह्रीर्मूर्तिर्धर्मस्य पत्न
यः॥४९॥ श्रद्धासूत शुभं मैत्री प्रसादमभयं दया। शांतिः सुखं मुदं तुष्टिः स्मयं पुष्टिरसूयत॥५०॥ योगं क्रियो
न्नतिर्दर्पमर्थं बुद्धिरसूयत। मेधा स्मृतिं तितिक्षा तु क्षेमं ह्रीः प्रश्रयं सुतं॥५१॥ मूर्तिः सर्वगुणोत्पत्तिर्नरना
रायणावृषी। ययोर्जन्मन्यदो विश्वमभ्यनंदत्सु[illegible] निर्वृतं॥५२॥ मनांसि ककुभो वाताः प्रसेदुः सरितोऽद्रयः।
दिव्यवाद्यंत तूर्याणि पेतुः कुसुमवृष्टयः॥५३॥

४६ अजात्मजः ब्रह्मपुत्रः॥४७॥ युक्तेभ्यो मिलितेभ्यो वा॥४८॥५१॥ सर्वेषां गुणानामुत्पत्तिर्यस्यां सा॥५२५३॥

उपतस्थुः भेजुः ५४॥ निजया माययायस्मिन्नात्मनि। खे गगने रूपभेदं गंधर्वनगरमिवेदं विश्वं विरचितं। तस्यात्मनः प्रतिरक्ष
णाय प्रकाशनाय। आत्मानं योद्यप्रादुश्चकार प्रकटितवान् तस्मै पुरुषाय नमः। केन रूपेण प्रादुश्चकार। ऋषेर्मूर्त्या निराकारो

मुनयस्तुष्टुवुस्तुष्टाः जगुर्गंधर्वकिन्नराः। नृत्यंति स्म स्त्रियो देव्य आसीत्परममंगलं। देवा ब्रह्मादयः सर्वे उपत
स्थुरभिष्टवैः॥५४॥ यो माययाविरचितं निजयात्मनीदं खे रूपभेदमिव तत्प्रतिचक्षणाय। एतेन धर्मसदने ऋ
षिमूर्त्तिनाद्य प्रादुश्चकार पुरुषाय नमः परस्मै॥५५॥ सोयं स्थितिव्यतिकरोपशमाय सृष्टान् सत्वेन नः सुरग
णाननुमेयतत्वः। दृश्याददभ्रकरुणेन विलोकनेन यच्छ्रीनिकेतममलं क्षिपतारविंदं॥५६॥ एवं सुरगणैस्तात
भगवंतावभिष्टुतौ। लब्धावलोकैर्ययतुरर्चितौ गंधमादनं॥५७॥ ताविमौ वै भगवतो हरेरंशाविहागतौ। भा
रव्ययाय च भुवः कृष्णौ यदुकुरूद्वहौ॥५८॥ स्वाहाभिमानिनश्चाग्नेरात्मजांस्त्रीनजीजनत्। पावकं
पवमानं च शुचिं च हुतभोजनं॥५९॥ तेभ्योग्नयः समभवन् चत्वारिंशच्च पंच च। त एवैकोनपंचाशत्साकं पितृ
पितामहैः॥६०॥ वैतानिके कर्मणि यन्नामभिर्ब्रह्मवादिभिः। आग्नेय्य इष्टयो यज्ञे निरूप्यंतेग्नयस्तु ते॥६१॥

यस्मिन्नेतेन रूपेण॥५५॥ सोयं सो स्मान्सुरगणान् अनल्पकरुणायुक्तेन विलोकनेन कृपाविशिष्टनेत्रेण दृश्यात्पश्यतु। कथंभूतेन। यच्छ्रीनिकेत
ममलमरविंदं तत्क्षिपिता तिरस्कुर्वता कथंभूतः अनुमेयं शास्त्रतो विचार्य नतु स्मा... ...पूतं तत्वं यस्य। कथंभूतान् स्मान्। स्थितेर्लंगन्म
र्यादायाः व्यतिकरो ऽन्यथात्वं तस्योपशमाय सत्वेन गुणेन सृष्टान्॥५६॥ लब्धावलोकाः स्वैः सुरगणैः तैरभिष्टुतौ ययतुः॥५७॥ भुवो भार ४
स्य व्ययाय नाशाय चकार एकवाक्यत्वार्थः। तौ च संप्रतमिहागताविर्त्यर्थः। तदुक्तं तंत्रे। अर्जुनेतु नरावेशः कृष्णो नारायणः स्वयमिति॥ उत्तरपंक्ते

यदूद्वहः श्रीकृष्णः कुरूद्वहो र्जुनः उभावपि कृष्णनामानौ॥५८॥ अग्न्यभिमानिनो देवात् स्वाहानाम तस्य भार्या हुतभोजनमिति त्रयाणां विशेष
णं।५९। पितरस्त्रयः पितामहएकः साकं सह॥६०॥ वैतानिके वैदिके कर्मणि येषां नामभिरग्निदेवताका इष्टयो निरूप्यंते क्रियंते। तएते ग्नयो नलौ
किकाः अतो बहूनां नैवेश्यमर्थ्यमिति भावः॥६१॥ सोम्याः सोमपाः येषामग्नौ करणमस्ति ते साग्नयः तद्दुहितास्त्वनग्नयः॥६२॥ तयोस्तु सं
ततिर्नाभवत् जीवन्मुक्तत्वादित्याह उभे ते इति॥६३॥ गुणशीलतः आत्मनः सदृशं देवमनुव्रतापि सती पुत्रं न लेभे॥६४॥ तत्र हेतुः स्वपितरि द

अग्निष्वात्ता बर्हिषदः सोम्याः पितर आज्यपाः। साग्नयोनग्नयस्तेषां पत्नी दाक्षायणी स्वधा॥६२॥ तेभ्यो दधार क
न्ये द्वे वयुनां धारिणीं स्वधा। उभे ते ब्रह्मवादिन्यौ ज्ञानविज्ञानपारगे॥६३॥ भवस्य पत्नी तु सती भवं देवमनुव्रता।
आत्मनः सदृशं पुत्रं न लेभे गुणशीलतः॥६४॥ पितर्यप्रतिरूपे स्वे भवायानागसे रुषा। अप्रौढैवात्मनात्मानमज
हाद्योगसंयुता॥६५॥ ॥ इतिश्रीभागवते महापुराणे चतुर्थस्कंधे दाक्षायणं नाम प्रथमोध्यायः॥ ॥विदुर
उवाच॥ ॥ भवे शीलवतां श्रेष्ठे दक्षो दुहितृवत्सलः। विद्वेषमकरोत्कस्मादनादृत्यात्मजां सतीं॥१॥ कस्तं चराच
रगुरुं निर्वैरं शांतविग्रहं। आत्मारामं कथं द्वेष्टि जगतो दैवतं महत्॥२॥

प्रमहोयस्य। कुतः आत्मन्येवारामो रतिर्यस्य तं। यद्वा कः प्रजापतिर्दक्षः कथं द्वेष्टि। एवंभूते तस्मिन् द्वेषो ऽयुक्तो ऽशक्यश्चेत्यर्थः॥२॥ श्रीः

क्षे अप्रतिरूपे असदृशे प्रतिकूले सतीत्यर्थः॥ आत्मना स्वयमेवात्मानं देहं अजहात् त्यक्तवती। योगसंयुता योगमाश्रित्येति॥६५॥
॥ ॥इति चतुर्थे प्रथमः॥ ॥ द्वितीये प्रथमाध्यायोपक्षिप्तभवदक्षयोः। विद्वेषवर्ण्यते हेतुर्विश्वसृग्यज्ञसंभवः॥१॥ सती सतीनाम्नी॥१
न वा सो कस्य विद्वेषार्हः इत्याह क इति। चराचरगुरुं जगतो देवतं चतं को द्वेष्टि कथं वा निर्वैरं द्वेष्टि। निर्वैरत्वे हेतुः शांतो विग्रहः शांतिर्यस्य

भा०४ यतो हेतोर्विद्विषः। यतो विद्वेषात्प्राणांस्तत्याज। एतदाख्याहि। अतदेवाख्यातुमितिहासं प्रस्तौति। पुरेति समेता आसन्। ४। प्रविष्टं
५ दक्षमिति शेषः महत्सदः महती सभा। ५। स्वधिष्ण्येभ्यः स्वीयासनेभ्यः। ६। प्राक्स्वोपवेशनात्सर्वमेव निषण्णं उपविष्टं मृडं शिवं। तद
नादृतः तेनाभ्युत्थानादिभिरकृतादरः नामृष्यत् नासहत। वाम्यवक्रं यथा भवति तथाऽभिवीक्ष्य। ८। मे वचनं श्रूयतां। अज्ञाना

एतदाख्याहि मे ब्रह्मन् जामातुः श्वशुरस्य च। विद्वेषस्तु यतः प्राणांस्तत्यजे दुस्त्यजान्सती॥३॥ ॥श्रीमैत्रेय उवाच॥ पुरा विश्वसृजां सत्रे समेताः परमर्षयः। तथामरगणाः सर्वे सानुगा मुनयोऽग्नयः॥४॥ तत्र प्रविष्टमृषयो दृष्ट्वार्कमिव रोचिषा। भ्राजमानं वितिमिरं कुर्वन्तं तन्महत्सदः॥५॥ उदतिष्ठन्सदस्यास्ते स्वधिष्ण्येभ्यः सहाग्नयः। ऋते विरिञ्चं शर्वं च तद्भासाक्षिप्तचेतसः॥६॥ सदसस्पतिभिर्दक्षो भगवान्साधु सत्कृतः। अजं लोकगुरुं नत्वा निषसाद तदाज्ञया॥७॥ प्राङ्निषण्णं मृडं दृष्ट्वा नामृष्यत्तदनादृतः। उवाच वामं चक्षुर्भ्यामभिवीक्ष्य दहन्निव॥८॥ श्रूयतां ब्रह्मर्षयो मे सहदेवाः सहाग्नयः। साधूनां ब्रुवतो वृत्तं नाज्ञानान्न च मत्सरात्॥९॥ अयं तु लोकपालानां यशोघ्नो निरपत्रपः। सद्भिराचरितः पन्था येन स्तब्धेन दूषितः॥१०॥ एष मे शिष्यतां प्राप्तो यन्मे दुहितुरग्रहीत्। पाणिं विप्राग्निमुखतः सावित्र्या इव साधुवत्॥११॥ ५

न्न मत्सराद्ब्रुवतः॥९॥ स्तब्धेन उचितक्रियाभ्रंशेन ध्वस्तेनेति पाठे भ्रष्टेन॥१०॥ तदेवाह। एष इति। यद्यस्मात् वि
प्राग्निसमक्षं सावित्रीतुल्यायां मे दुहितुः पाणिमग्रहीत्॥११॥ ॥ॐ नमो भगवते वासुदेवाय॥

मृगशावस्य हरिणबालस्य अक्षिणी इव अक्षिणी यस्याः। प्रत्युत्थानाभिवादार्हे मयि उचितं सन्मानं वाचापि नाकरोत्। १२
अनर्हाय कन्या दत्तेत्यनुतप्यमान आह। लुप्तक्रियायेति सार्धैश्चतुर्भिः उशतीं वेदलक्षणां गिरं। १३। प्रेतावासेषु श्मशा
नेषु व्युप्ता विकीर्णाः केशा यस्य। १४। चिताभस्मना कृतं स्नानं येन। प्रेतानां स्रजो माल्यानि यस्य स प्रेतस्रक्। नृणाम
स्थीनि भूषणानि यस्य। शिव इत्यपदेशो नाममात्रं यस्य। तमोमात्रात्मकः केवलं तमोरूप आत्मा स्वभावो येषां। १५। उ

गृहीत्वा मृगशावाक्ष्याः पाणिं मर्कटलोचनः। प्रत्युत्थानाभिवादार्हे वाचाप्यकृत नोचितं॥१२॥ लुप्तक्रियायाऽशुचये मानिने भिन्नसेतवे। अनिच्छन्नप्यदां बालां शूद्रायेवोशतीं गिरं॥१३॥ प्रेतावासेषु घोरेषु प्रेतैर्भूतगणैर्वृतः। अटत्युन्मत्तवन्नग्नो व्युप्तकेशो हसन्रुदन्॥१४॥ चिताभस्मकृतस्नानः प्रेतस्रङ्न्रस्थिभूषणः। शिवापदेशो ह्यशिवो मत्तो मत्तजनप्रियः॥ पतिः प्रमथभूतानां तमोमात्रात्मकात्मनां॥१५॥ तस्मा उन्मादनाथाय नष्टशौचाय दुर्हृदे। दत्ता बत मया साध्वी चोदिते परमेष्ठिना॥१६॥

न्मादा भूतविशेषास्तेषां नाथाय। दुर्हृदे दुष्टचित्ताय। बतेति खेदे। वास्तवस्त्वयमर्थः॥ लुप्ताः क्रियाः यस्मिन् ब्रह्मरूपत्वात्।
अतएव नास्ति शुचिर्यस्मात्। अमानिने अभिन्नसेतवे इति छेदः। तस्य परमेश्वरस्य मदीया मानुषी कन्या कथं योग्या स्या
दिति लज्जादिना दातुमनिच्छन्नपि तत्संबंधलोभेन दत्तवान्। शूद्रायेवेति नर्हत्वमात्रे दृष्टांतः नहीनत्वे पूर्वापरस्त्वव
न विरोधापत्तेः। एतदुक्तं भवति। यथा कश्चिच्छूद्राय वेदमर्थलोभेन ददाति तद्वदिति। प्रेतावासेष्वित्यादि सर्वं विडंबनमात्रमिति स्वयं

भा०४
६

मेवाह।उन्मत्तवदिति अन्यथा उन्मत्त इत्येवावक्ष्यत्।अशिवः नास्ति शिवो यस्मात् प्रमत्तो प्रमत्तजनप्रियः इति न छेदः।पतिः प्रमथभूतानामिति भक्तवात्सल्यमाह।तामसानपि दोषमपनीय पातीति।नष्टा नामविशेषा यस्मात् दुर्धियः यस्मात्।दुष्टेष्वपि एते मया नुकंप्या इति हृत्
मनो यस्य सद्हृत् तस्मै।वृतेति हर्षे।ब्रह्मणो वाक्यात् लज्जाभयादिकं परित्यज्य प्रदत्ते त्यर्थः॥१६॥अप्रातीपं अप्रतिकूलं यथा भ
वत्येवमवस्थितमपि विनिंद्य॥१७॥देवानां यजनं समवे देवैः सह भागं न लभतां।किंतु तेभ्यः पूर्वमेव लभतां अग्रभोजित्वात् यद्वा
तेषु भुक्तवत्सु लभतां।सर्वपोषकत्वात्।अत्र हेतुः देवगणेषु अधमो यस्मात् सः॥१८॥सदस्यैस्तस्मात् स्थानाद्विनिक्रम्य जगाम [illegible]

श्रीमैत्रेय उवाच॥ ॥विनिंद्यैवं स गिरिशमप्रतीपमवस्थितं।दक्षोथाप उपस्पृश्य क्रुद्धः शप्तुं प्रचक्रमे॥१७॥अ
यं तु देवयजन इंद्रोपेंद्रादिभिर्भवः।सह भागं न लभतां देवैर्देवगणाधमः॥१८॥निषिध्यमानः स सदस्यमुख्यैर्दक्षो
न्य गिरित्राय विसृज्य शापं।तस्माद्विनिःक्रम्य विवृद्धमन्युर्जगाम कौरव्य निजं निकेतनं॥१९॥विज्ञाय शापं गिरिशा
नुगाग्रणीर्नंदीश्वरो रोषकषायदूषितः।दक्षाय शापं विससर्ज दारुणं ये चान्वमोदंस्तदवाच्यतां द्विजाः॥२०॥य ए
तन्मर्त्यमुद्दिश्य भगवत्यप्रतिद्रुहि।द्रुह्यत्यज्ञः पृथग्दृष्टिस्तत्त्वतो विमुखो भवेत्॥२१॥

च॥१९॥गिरिशस्यानुगानामग्रणीर्मुख्यः रोष एव कषायस्तेन दूषितः आरक्तनेत्र इत्यर्थः॥तस्य गिरिशस्यावाच्यतां वचना
र्हतां।निंद्यतामित्यर्थः॥तेभ्योपि शापं विससर्ज॥२०॥दक्षं त्रापतिसार्द्धैस्त्रिभिः।एतन्मर्त्यं दक्षशरीरं उद्दिश्य अभिमत्वा ६
अप्रतिद्रुहि प्रतिद्रोहमकुर्वति।पृथक् दृष्टिर्भेददर्शी॥तत्त्वतः परमार्थात्॥२१॥ ॥ॐनमो भगवते वासुदेवाय

अज्ञत्वमेवाह।गृहेष्विति।कर्मतंत्रं कर्मपरिकरं।वेदे ये अर्थवादाः अक्षय्यं ह वै चातुर्मास्ययाजिनः सुकृतं भवतीत्यादयः तैर्विपन्ना
विनष्टा धीर्यस्य।२२।परो देहादिः तमेवात्मत्वेनाभितोध्यातुं शीलं यस्यास्तया बुद्ध्या विस्मृता आत्मनो गतिस्तत्त्वं येन अतः पशु
तुल्यः।अतितरां स्त्रीकामोस्त्विति द्वितीयः शापः बस्तस्य मेषस्य मुखमिव मुखं यस्य स इति तृतीयः शापः।२३॥अयं च शापो
ऽस्यानुरूप एवेत्याह।विद्या बुद्धिः इयमेव तत्त्वबुद्धिर्यस्य।अतो सौ जड एव।द्विजान् शपति संसरंत्विति सार्द्धैः शर्वमवमन्यत इति
तथा तमनु दक्षं ये चानुवर्त्तंते ते संसरंतु जन्मविद्येति x मरणाद्यनुभवंत्वित्येकः शापः २४।श्रुतायाः वेदरूपायाः पुष्पिण्याः पु
गृहेषु कूटधर्मेषु सक्तो ग्राम्यसुखेच्छया।कर्मतंत्रं वितनुते वेदवादविपन्नधीः॥२२॥बुद्ध्या पराभिध्यायि
न्या विस्मृतात्मगतिः पशुः।स्त्रीकामः सोस्त्वतितरां दक्षो बस्तमुखोचिरात्॥२३॥विद्याबुद्धिरविद्यायां
कर्ममय्यामसौ जडः॥संसरंत्विह ये चामुमनु शर्वावमानिनं॥२४॥गिरः श्रुतायाः पुष्पिण्या मधुगंधेन भू
रिणा।मथ्ना चोन्मथितात्मानः संमुह्यंतु हरद्विषः॥२५॥सर्वभक्ष्या द्विजा वृत्त्यै धृतविद्यातपोव्रताः।वित्तदेहें
द्रियारामा याचका विचरंत्विह॥२६॥तस्यैवं वदतः शापं श्रुत्वा द्विजकुलाय वै।भृगुः प्रत्यसृजच्छापं ब्रह्मदं
डं दुरत्ययं॥२७॥ x प्रत्यसृजत् प्रत्यदात् शापरूपं ब्रह्मदंडं।२७॥
प्पाणीवार्थवादाः मनःक्षोभकत्वात्।अर्थवादा बहुला या इत्यर्थः मधुगंधतुल्येन प्ररोचनेन मथ्ना मनःक्षोभकेण उन्म
थित आत्मा मनो येषां ते।संमुह्यंतु कर्मस्वासक्ता भवंत्विति द्वितीयः॥२५॥सर्वभक्ष्याः भक्ष्याभक्ष्यविचाररहित्याः वृत्त्यै
देहादिपोषणाय।धृतानि विद्यातपोव्रतानि यैस्ते वित्तादिष्वारामो रतिर्येषां ते।याचकाः संतो विचरंत्विति शापत्रयं २६

सच्छास्त्रस्यपरिपंथिनः प्रतिकूलाः २८ सुरागौडीपैष्टीमाध्वीच आसवस्तालादिसंभवंमद्यंद्वंद्वैकात्तषंढत्वं। यद्यत्रदेवं एतद्यंदेवताव
दादरणीयमितिवा। २९ ब्रह्मवेदःकथंभूतंसेतुंमर्यादारूपं। तदेवाह। पुंसांवर्णाश्रमाचारवतांविधारणंधारकं। ३० सेतुत्वंप्रपंच
यतिद्वाभ्यां। एषवेदलक्षणएवशिवः पंथाःयंपूर्वेऋषयः अनुसंतस्थुः आश्रितवंतः। यत्रयस्मिञ्जनार्दनः प्रमाणंमूलं ३१
भूतराट्भूतानांतामसानांपतिः। ३२। अन्योन्यशापेनोभयोर्नाशाद्विमनाइवेतितथापिभगवदनुगृहीतानांनाशोन

भवव्रतधरायेचयेचतान्समनुव्रताः। पाषंडिनस्तेभवंतुसच्छास्त्रपरिपंथिनः॥२८॥ नष्टशौचामूढधियो
जटाभस्मास्थिधारिणः। विशंतुशिवदीक्षायांयत्रदेवंसुरासवं॥२९॥ ब्रह्मचब्राह्मणांश्चैवयद्यूयंपरिनिंद
थ। सेतुंविधारणंपुंसामतः पाषंडमाश्रिताः॥३०॥ एषएवहिलोकानांशिवःपंथाःसनातनः। यंपूर्वेचानुसं
तस्थुर्यत्प्रमाणंजनार्दनः॥३१॥ तद्ब्रह्मपरमंशुद्धंसतांवर्त्मसनातनं। विगर्ह्ययातपाषंडंदैवंवोयत्रभूतराट् ३२
॥श्रीमैत्रेयउवाच॥ ॥तस्यैवंवदतःशापंभृगोःसभगवान्भवः। निश्चक्रामततःकिंचिद्विमनाइवसानुगः ३३
तेपिविश्वसृजःसत्रंसहस्रपरिवत्सरान्। संविधायमहेष्वासयत्रेज्यऋषभोहरिः॥३४॥ आप्लुत्यावभृथं
यत्रगंगायमुनयान्विता। विरजेनात्मनासर्वेस्वंस्वंधामययुस्ततः॥३५॥ ॥इतिश्रीभाग० चतु० द्वितीयः
श्रीमैत्रेयउवाच॥ ॥सदाविद्विषतोरेवंकालेवैध्रियमाणयोः। जामातुःश्वशुरस्यापिसुमहानतिचक्रमे॥१॥ ॥

स्यादिभावः। ३३। ऋषभः सर्वश्रेष्ठोहरिर्यस्मिन्सत्रेइज्यः पूज्यः ततसत्रंसम्यग्विधाय। हेमहेष्वास। ३४। यत्रप्रयागेअन्वितातत्रावभृथ
स्नानंकृत्वाततःस्थानात्ययुः। ३५॥ ॥इतिचतुर्थेद्वितीयः॥ ॥तृतीयेतुसतीतातयज्ञोत्सवदिदृक्षया। गमिष्यंतीमहेशेन ८

रुद्रविहीनोयज्ञोनास्त्येव। तथापिदक्षस्यरुद्रपरित्यागोद्वेषाद्गर्वाच्च। तत्रद्वेषेहेतुरुक्तः। गर्वेहेतुमाह। यदात्तुप्रजापतीनामाधि
पत्येभिषिक्तः तदातस्यस्मयोगर्वोभवत्। २। गर्वाद्देवसेश्वरान्ब्रह्मनिष्ठान्नभिभूयतिरस्कृत्य। वाजपेयेनेष्ट्वा बृहस्पतिस
वेनयजेतेतिश्रुतेः। वाजपेयेनेष्ट्वासमारेभे। ३। कृतस्वस्त्ययनाःकृतमंगलाःसभर्तृकाइतिदक्षिणाद्युद्धिभिःप्रथमम
र्हितानामपिपत्न्यर्हणेपुनरर्हणत्वमुक्तं। ४। तत्तदाखेचराणांप्रजल्पतांसतीपितृयज्ञमहोत्सवंश्रुत्वा। ५। तत्रवल्गं

यदाभिषिक्तोदक्षस्तुब्रह्मणापरमेष्ठिना। प्रजापतीनांसर्वेषामाधिपत्येस्मयोभवत्॥२॥ इष्ट्वासवाजपेये
नब्रह्मिष्ठानभिभूयच। बृहस्पतिसवंनामसमारेभेक्रतूत्तमं॥३॥ तस्मिन्ब्रह्मर्षयःसर्वेदेवर्षिपितृदे
वताः। आसन्कृतस्वस्त्ययनास्तत्पत्न्यश्चसभर्तृकाः॥४॥ तदुपश्रुत्यनभसिखेचराणांप्रजल्पतां। सतीदा
क्षायणीदेवीपितुर्यज्ञमहोत्सवं॥५॥ व्रजंतीःसर्वतोदिग्भ्यउपदेववरस्त्रियः। विमानयानाःसप्रेष्ठाःनि
ष्ककंठीःसुवाससः॥६॥ दृष्ट्वास्वनिलयाभ्यासेलोलाक्षीर्मृष्टकुंडलाः। पतिंभूतपतिंदेवमौत्सुक्यादभ्यभाष
त॥७॥ ॥सत्युवाच॥ ॥प्रजापतेस्तेश्वशुरस्यसांप्रतंनिर्यापितोयज्ञमहोत्सवःकिल। वयंचतत्राभिसरामवा रा
मतेयद्यर्थितामीविबुधाव्रजंतिहि॥८॥ ×सांसियासां। ६। लोलानिचंचलानिअक्षीणियासांउज्वलानियासांताः ७॥× कुंडलानि२

तीरूपदेवानांगंधर्वादीनांवरस्त्रियश्चस्वस्यनिलयस्याभ्यासेसमीपेदृष्ट्वाऔत्सुक्यात्पतिमभ्यभाषतेतित्रयाणामन्व
यः। कथंभूतास्त्रियोदृष्ट्वा विमानानियानानियासांताः प्रेष्ठैःसहिताःनिष्कानिपदकानिकंठेषुयासांशोभनानिवा

भा० त०

निर्यापितः प्रवर्त्तितः हे वामशिव। ते यद्यर्थिता इच्छा तर्हि वयं वत तत्राभिसराम गच्छाम। न वाध्या पियागो निवृत्तः यतोऽमी विबुधा व्रजंति। ८॥ औत्सुक्यं प्रकथटयंत्याह। तस्मिन्निति षड्भिः। पितृभ्यामुपनीतं दत्तं परिबर्हमलंकारादि द्रव्यं भवता सह अर्हितुं स्वीकर्तुं कामये अर्हितमिति पाठे सत्कृतं परिबर्हमिच्छामीति॥ ८॥ स्वसृर्भगिनीः भर्तृभिः संमिताः सदृशीः

तस्मिन्भगिन्यो मम भर्तृभिः स्वकैर्ध्रुवं गमिष्यंति सुहृद्दिदृक्षवः। अहं च तस्मिन्भवता च कामये सहोपनीतं परिबर्हमर्हितुं॥ ९॥ तत्र स्वसॄर्मे ननु भर्तृसंमिता मातृस्वसॄः क्लिन्नधियं च मातरं। द्रक्ष्ये चिरोत्कंठमना महर्षिभिरुन्नीयमानं च मृडाध्वरध्वजं॥ १०॥ त्वय्येतदाश्चर्यमजात्ममायया विनिर्मितं भाति गुणत्रयात्मकं॥ अथाप्यहं योषिदतत्त्वविच्च ते दीना दिदृक्षे भव मे भवक्षितिं॥ ११॥ ॥

मित्कामि।११

क्लिन्नधियं स्नेहार्द्रचित्तां चिरमुत्कंठमुत्सुकं मनो यस्याः सा हं द्रक्ष्यामि। हे मृड। उन्नीयमानं प्रवर्त्यमानं अध्वरेषु ध्वजमिव दृश्यं श्रेष्ठमध्वरं। यद्वा उत्क्षिप्यमानं यज्ञे केतुं पूर्वं वा॥ १०॥ अहो किं तत्राश्चर्यं येन त्वं वैतदौत्सुक्यमिति चेदत आह। त्वयीति हे अज एतद्विश्वमाश्चर्यरूपं त्वय्येव त्वन्मायया रचितं विभाति अतो यद्यपि तव नाश्चर्यबुद्धिः तथाप्यहं योषिदुत्सुकस्वभावा तव तत्त्वं न जानामि। अतो दीना कृपणा सती हे भव मे भवक्षितिं जन्मभूमिं दिदृक्षे द्रष्टु

दिदृक्षामेव कैमुत्यन्यायेन व्यनक्ति पश्येति द्वाभ्यां। हे अभवेति सुहृद्वियोगदुःखं त्वया नास्वादितमिति भावः। अन्यायोषितः संबंधरहिता अपि प्रयांतीः पश्य कांतसखाः भर्तृसहिताः वरूथशः संघशः कथंभूताः यासां विमानैर्नभो मंडितं ताः

पश्य प्रयांतीरभवान्ययोषितोऽप्यलंकृताः कांतसखाः सहस्रशः॥ यासां व्रजद्भिः शितिकंठ मंडितं नभो विमानैः कलहंसपांडुरैः॥ १२॥ कथं सुतायाः पितृगेहकौतुकं निशम्य देहः सुरवर्य नेंगते॥ अनाहूता अप्यभियंति सौहृदं भर्तुर्गुरोर्देहकृतश्च केतनं॥ १३॥ श्रीगोपालाय नमः॥

हे शितिकंठ नीलकंठेति परानुग्रहाय त्वया विषमपि भक्षितमिति सूचयति॥ १२॥ तदा हे सुरश्रेष्ठ पितृगेहोत्सवं निशम्य सुतायाः देहः कथं नेंगते द्रष्टुं न प्रचलति। तथाप्यनाहूताः संतः कथं गच्छाम तत्राह। सोहृदं सुहृदः केतनं गृहं तथा भर्त्रादीनां च गृहं अनाहूता अप्यभियंति संतः। द्रष्टुमर्हसि॥ १३॥

भा・स्क० हे अमर्त्य तत्तस्मात्प्रसीद। इदं मे वांछितं कर्त्तुं भवानर्हति कारुणिकत्वमेवाह। अदभ्रचक्षुषा अनल्पज्ञानेनापि त्व
६ या आत्मनो देहस्यार्द्धं हं निरूपिता धृता॥ यतोर्द्धनारीश्वर इति ख्यातोसि अतो मामां अनुग्रहाणयावितः सन्

तन्मे प्रसीदेदममर्त्य वांछितं कर्त्तुं भवान्कारुणिको बतार्हति॥ त्वयात्मनोर्द्धेहमदभ्रचक्षुषा नि
रूपिता माऽनुग्रहाणयावितः॥१४॥ ॥ऋषिरुवाच॥ ॥ एवं गिरित्रः प्रियया भिभाषितः
प्रत्यभ्यधत्त प्रहसन्सुहृत्प्रियः॥ संस्मारितो मर्मभिदः कुवागिषून्याना ह को विश्वसृजां समक्षतः
॥१५॥

॥१४॥ अभिभाषितो यावितः कः दक्षः यानाह मर्मभिदं तिये तान्कुवागिषून्दुरुक्ति बाणान्संस्मारितः सन्॥१५॥ ६

[illegible]
अनादृता अपि इति त्वया यदुदितं उक्तं तच्छोभनमेव किंतु अनात्म्यं देहादाव हंकारस्तत्कृतेन मदेन मन्युना सतेबं
धवो यद्यनुत्पादितदोषदृष्टयो भवंति तर्हि न उत्पादिते आरोपिते दोषे दृष्टिर्येषां ते॥१६॥ ननु विद्यादिगुणयु
क्ते दक्षस्त्वादृशेषु महत्सु कथं दोषदृष्टिर्भवेत् तत्राह। विद्यादिभिरेवस्मृतौ हतायां विवेकज्ञाने नष्टे सति भू

॥श्रीभगवानुवाच॥ त्वयोदितं शोभनमेव शोभने अनादृता अप्यभियंति बंधुषु॥ ते यद्यनुत्पा
दितदोषदृष्टयो बलीयसानात्म्यमदेन मन्युना॥१६॥ विद्यातपोवित्तवपुर्वयःकुलैः सतां गु
णैः षड्भिरसत्तमेतरैः॥ स्मृतौ हतायां भृतमानदुर्दृशः स्तब्धा न पश्यंति हि धाम भूयसां॥१७॥

भूयसां महत्तमानां धाम तेजो न पश्यंति हि। ननु गुणैः कथं विवेकनाशस्तत्राह। सतां गुणैर्विवेकहेतुभिर
पि असत्तमानामितरैर्दोषभूतैः अत एव तैर्भृतः धृतः पुष्टो वा अहं विद्वान्तापस इत्यादिमानो गर्वस्तेन दुष्टा
दृष्टिर्येषां ते॥१७॥

भा०४

१०

स्वजनव्यपेक्षया बंधुदृक्षया गृहान्न प्रतीयात् नावलोकयेत् । अनवलोकने हेतुं तत्त्वमेवाह । ये वक्रधियाकुटिलया बुध्या पश्यंति । आरोपिताउन्नमिता भ्रूर्येषु तान्यारोपितभ्रूणि तैः अमर्षणेः सक्रोधैरक्षिभिः । आरोपिभितो भ्रूभिरिवा ॥१८॥ ननु स्वजनानां गृहसु हृद्भिर्गंतव्यं तेषां दुश्चेष्टितं च सोढव्यं । न तस्य दुःसहत्वाद्रित्याह ॥

नैतादृशानां स्वजनव्यपेक्षया गृहान्प्रतीयादनवस्थितात्मनां ॥ येभ्यागतान्वक्रधियाभिचक्षते आरोपितभ्रूभिरमर्षणाक्षिभिः ॥१८॥ तथारिभिर्नव्यथते शिलीमुखैः शेतेर्दितांगो हृदयेन दूयता ॥ स्वानां यथा वक्रधियां दुरुक्तिभिर्दिवा निशं तप्यति मर्मताडितः ॥१९॥ छ

तथेति ॥ अरिभिः शिलीमुखैः अर्दितांगः खंडितगात्रोपि तथा न व्यथते ॥ यतः शेते स्वपिति । स्वानां दुरुक्तिभिर्मर्मसु ताडितो यथा दूयता व्यथमानेन हृदा दिवा निशं तप्यति ॥१९॥ ॐ नमो नारायणाय १०

मयि तत्र गतायां नेयं शंकेति चेत्तत्राह व्यक्तं । निश्चितं उत्कृष्टा गतिर्यस्य तस्यात्मजानां कन्यानां मध्ये त्वं प्रियेति मे संमतासि पितुः सकाशात् मानं न लप्स्यसे मदाश्रयात् मत्संबंधात् २० ननु भगवन्त्वया किमिति दक्षस्तिरस्कृतः यतो सौ त्वां द्वेष्टि अत आह । पापच्यमानेन अलं दह्यमानेन हृदा दुःखितेंद्रियः काभिः पुरुषो जीवस्तस्य बुद्धिस्थितं तत्साक्षिणां निरहंकाराणां तु त्यर्थः समृद्धिभिः पुण्यकीर्त्यादिभिः एषां पदं स्थानमैश्वर्यं प्राप्तुमकल्पः अशक्तः स

व्यक्तं त्वमुत्कृष्टगतेः प्रजापतेः प्रियात्मजानामसि सुभ्रुसंमता अथापि मानं न पितुः प्रपत्स्यसे मदाश्रयात्कः परितप्यते यतः २० पापच्यमानेन हृदातुरेंद्रियः समृद्धिभिः पुरुषबुद्धिसाक्षिणां अकल्प एषामधिरोढुमंजसा पदं परं द्वेष्टि यथासुरा हरिं २१ प्रत्युद्गमप्रश्रयणाभिवादनं विधीयते साधु मिथः सुमध्यमे प्राज्ञैः परस्मै पुरुषाय चेतसा गुहाशयायैव न देहमानिने २२

न परं द्वेष्टि असुरा यथा हरिं केवलं द्विषंति २१ ननु त्वया प्रत्युत्थानविनयाद्यकरणात् अवज्ञात एवासौ तत्राह । हे सुमध्यमे प्रत्युद्गमादिकं मिथो जनैर्यद्विधीयते तत्प्राज्ञैः साधु विधीयते । साधुत्वमेवाह । परस्मै श्रीवासुदेवाय गुहाशयाय अंतर्यामिण एव तद्वचेतसैव परिपूर्णेन तस्मिन् कायिकव्यापारायोगात् । अतोंतर्यामिदृष्ट्या मनसा सर्वं कृतमिति भावः २२

भा०च० ११ किंच न केवलमभ्यागते ष्वेव वासुदेवदृष्ट्या नमनं क्रियते। किंतु नित्यमेव मनसि वासुदेवश्चिंत्यत इति आह। विशुद्धं
सत्वमंतःकरणं सत्वगुणो वा वसुदेवशब्दितं वसुदेवशब्देनोक्तं कुतः यद्यस्मात्तत्र तस्मिन्सत्वे पुमान्वासुदेव ईयते।
प्रकाशते। अपगतमावृतमावरणं यस्मात्सः अयमर्थः। वसुदेवे भवति प्रतीयत इति हि वासुदेवः परमेश्वरः प्रसि
द्धः स च विशुद्धे सत्वे प्रतीयते अतः प्रत्ययार्थेन प्रसिद्धेन प्रकृत्यर्थो निर्धार्यते। तत्तश्च वासयति देवमिति व्युत्पत्या
वा वसत्यस्मिन्निति वासुदेवः। दीव्यते द्योतत इति वा वसुभिः पुण्यैर्दीव्यति प्रकाशत इति वा। वसुदेवशब्दवाच्यं

सत्वं विशुद्धं वसुदेवशब्दितं यदीयते तत्र पुमानपावृतः सत्वे च तस्मिन्भगवान्वासुदेवो
ह्यधोक्षजो मे मनसा विधीयते २३ तत्ते निरीक्ष्यो न पिताऽपि देहकृद्दक्षो मम द्विट् तदनु
व्रताश्च यो विश्वसृग्यज्ञगतं वरोरु मामनागसं दुर्वचसाऽकरोत्तिरः २४ राम ११

शुद्धं सत्वं ततः किमत आह। सत्वे च तस्मिन्मे मया नमः सानमस्कारेणानुविधीयते सेव्यत इत्यर्थः। मनसेति
पाठे मनसा विशेषेण विधीयते धार्यते चिंत्यत इत्यर्थः। यतः अधोभूतेषु प्रत्याहृतेष्वक्षेषु जायते प्रकाशते इंद्रि
यागोचर इत्यर्थः २३ तस्मात्त्वया न निरीक्ष्यः देहकृदपि तिपोषकत्वादिभिरोपचारिकपितृत्वात् इत्यर्थः हि
द्विशत्रुः तदेवाह। हे वरोरु यो दक्षः विश्वसृजां यज्ञगतं मां निरपराधं तिरोकरोत् तिरस्कृतवान् २४

विपक्षे दोषमाह यदीति। मद्वाक्यातिहाय अतिक्रम्य यतः संभावितस्य सुप्रतिष्ठितस्य यदा पराभवो भवति तदा स पराभवस्तस्य
मरणाय कल्पते ॥२५॥ ॥इति चतुर्थे तृतीयोऽध्यायः॥ ॥ चतुर्थे तु पतिं हित्वा गताऽपि त्रावमानिता। रुषा निर्भर्त्स्यतं
यज्ञे जहौ देहमितीर्यते ॥१॥ उभयत्र अनुज्ञाने बलान्निवारणे च। सुहृद्दिदृक्षुः निःक्रामती भवात्परिशंकिता पुनर्नि
विशंती च तदा सा सती द्विधा आस बभूव ॥१॥ सुहृदां दिदृक्षायाः प्रतिघातेन दुर्मनाः। अश्रूणां कलाभिर्लेशैरतिविक्ल

यदि व्रजिष्यस्यतिहाय मद्वचो भद्रं भवत्या न ततो भविष्यति। संभावितस्य स्वजनात्पराभवो यदा स सद्यो मरणाय
कल्पते ॥२५॥ ॥इति श्रीभागवते महापुराणे चतुर्थस्कंधे उमारुद्रसंवादे तृतीयोऽध्यायः॥ ॥श्रीमैत्रेय उवाच॥
एतावदुक्त्वा विरराम शंकरः पत्न्यंगनाशं ह्युभयत्र चिंतयन्॥ सुहृद्दिदृक्षुः परिशंकिता भवान्निष्क्रामती निर्विशती
द्विधाऽऽस सा ॥१॥ सुहृद्दिदृक्षाप्रतिघातदुर्मनाः स्नेहाद्रुदत्यश्रुकलातिविह्वला॥ भवं भवान्यप्रतिपूरुषं रुषा प्र
धक्ष्यतीवैक्षत जातवेपथुः ॥२॥ ततो विनिःश्वस्य सती विहाय तं शोकेन रोषेण च दूयता हृदा॥ पित्रोरगात्स्त्रैण
विमूढधीर्गृहान्प्रेम्णाऽऽत्मनो योऽर्धमदात्सतां प्रियः ॥३॥ स्त्रैण्यं स्त्रीस्वभावः तेन विमूढा धीर्यस्याः सा ॥३॥

लाव्याकुला। अप्रतिपूरुषं स्वसमानपुरुषांतररहितं प्रधक्ष्यतीव भस्मीकरिष्यतीव। रुषा जातो वेपथुः कंपो
यस्याः ॥२॥ ततस्तं विहाय पित्रोर्गृहानगात् कथंभूतं यः प्रीत्या तस्यै आत्मनो देहस्यार्धमदात्॥ त्यागे हेतुः॥

भा०व० द्रुतविक्रमां शीघ्रं गच्छंतीं सपहपार्षदैः यक्षैश्च वर्तमानाः मणिमान्मदश्च आदिर्येषां ते पुरःसरो येषां वृषेंद्रो येषां ते गतव्यथा निर्भयाः
रूढाति क्रमेण तस्याः गमनादागतव्यथा इतिवा ॥४॥ तां वृषेंद्रमारोप्य सारिकादिभिः क्रीडोपकरणैः श्वेतातपत्रादिभिश्च। महारा
१२ जविभूतिभिश्च सहविटंकिताः शोभिताः ययुः ॥ सारिकापठननिरूपिता पक्षिणी। गीतायनैः गीताश्रयैः ॥५॥ आसमंताद्ब्रो

तामन्वगच्छन्द्रुतविक्रमां सतीमेकां त्रिनेत्रानुचरैः सहस्रशः ॥ सपार्षदयक्षा मणिमन्मदादयः पुरो वृषेंद्रास्तरसा गतव्यथाः ८
॥४॥ तां सारिकाकंदुकदर्पणांबुजश्वेतातपत्रव्यजनस्रगादिभिः ॥ गीतायनैर्दुंदुभिशंखवेणुभिर्वृषेंद्रमारोप्य विटं
कितायुयुः ॥५॥ आब्रह्मघोषोर्जितयज्ञवैशसं विप्रर्षिजुष्टं विबुधैश्च सर्वशः ॥ मृद्दार्वयःकांचनदर्भचर्मभिर्निसृ
ष्टभांडं यजनं समाविशत् ॥६॥ तामागतां तत्र न कश्चनाद्रियद्विमानितां यज्ञकृतो भयाज्जनः ॥ ऋते स्वसॄर्वै
जननीं च सादराः प्रेमाश्रुकंठ्यः परिषस्वजुर्मुदा ॥७॥

वेदघोषस्तेनोर्जितं शोभमानं यज्ञसंबंधि पशुविशसनं यस्मिन्। यद्वा तेनोर्जितं। अतिशयितं यज्ञे वैशसं परस्परस्पर्द्धा
यस्मिंस्तद्यजनं यज्ञस्थानं समाविशत् देवी। विबुधैश्च जुष्टं। मृदादिभिर्निसृष्टानि निर्मितानि भांडानि पात्राणि यस्मिन्
॥६॥ कश्चन नाद्रियत्। नादृतवान् यज्ञकृतो दक्षाद्भयं तस्मात्तत्र हेतुः। तेन विमानितां स्वसॄः जननीं च ऋते विना। तास्तु सा १२
दराः परिषस्वजुः आलिंगितवत्यः प्रेमाश्रुभिः निरुद्धकंठा यासां ॥ ७॥ ॐ नमो भगवते वासुदेवाय॥ ॥

अप्रतिनंदिता अनादृता सती नादत्त न गृहीतवती। कथं सोदर्येण सोदरत्वेन भगिनीनां यः संप्रश्नः तत्र समर्था
योग्या या वार्त्ता तया सह तां च। नादत्त नाभ्यनंददित्यर्थः ८ नाविद्यते रुद्रस्य भागो यस्मिंस्तं देवे रुद्रे कृतं हेलनं अ
वज्ञानमाज्ञानाद्यकारणात् ९ जगर्ह निंदितवती अमर्षेण कोपेन विपन्ना अव्यक्ता तया शिवं द्वेष्टि शिवद्विट्
तं धूमपथः कर्ममार्गः तत्र श्रमो अभ्यासस्तेन स्मयो गर्वो यस्य दक्षस्य वधाय समुत्थितान् स्वाज्ञया निगृह्य निवार्य।

सौदर्यसंप्रश्नसमर्थवार्त्तया मात्रा च मातृष्वसृभिश्च सादरं दत्तां सपर्यां वरमासनं च सा नादत्त पित्राप्रति
नंदिता सती ८ अरुद्रभागं तमवेक्ष्य चाध्वरं पित्रा च देवे कृतहेलनं विभो अनादृता यज्ञसदस्यधीश्वरी चु
कोप लोकानिव धक्ष्यती रुषा ९ जगर्ह सामर्षविपन्नया गिरा शिवद्विषं धूमपथश्रमस्मयं स्वतेजसा भूत
गणान्समुत्थितान्निगृह्य देवी जगतोभिशृण्वतः १० देव्युवाच नयस्य लोकेस्त्यतिशायिनः प्रियस्त
थाप्रियो देहभृतां प्रियात्मनः तस्मिन्समस्तात्मनि मुक्तवैरके ऋते भवंतं कतमः प्रतीपयेत् ११

१० निंदामेवाह नयस्येति। त्रयोदशभिः मुक्तवैरके त्यक्तविरोधे तस्मिन् शिवे भवंतं त्वत्तो विना कतमः प्रतीपयेत्।
प्रतिकूलमाचरेत्। वैराभावे हेतवः यस्य लोके अतिशायिनः अतिशायितो नास्ति तथा प्रियश्च अप्रियश्च नास्ति समा
सपाठे तु अतिशायेन प्रियो नास्ति देहभृतां प्रियो यमात्मा तस्य समस्तास्यात्मनि करणभूते समस्तान् पद्यतिवा ११

नस्यव प्रतिकूलकरणं द्विधा महत्तमद्रोहेण साक्षात् द्रोहेण च तत्र पुरुषाणां चातुर्विध्यं वदन्ति महत्तमद्रोहमाह दो
षानिति द्वाभ्यां। हे द्विजेत्यधिक्षेपः भवादृशाः त्वद्विधाः असूयकाः परेषां गुणेषु दोषानेव गृह्णन्ति न तु गुणान्। केचिन्म
ध्यस्थाः गुणेषु दोषान्न गृह्णन्ति किंतु यथास्थितान् गुणदोषान् विवेकेन गृह्णन्ति ते तु महान्तः उच्यन्ते साधवस्तु केवलं
गुणानेव गृह्णन्ति न तु दोषान् ते तु महत्तरास्तु दोषान्न गृह्णन्ति। ये च प्रत्युत फल्गून् बहुलीकुर्वन्ति करिष्ण वो भवन्तीति

दोषान्परेषां हि गुणेषु साधवो गृह्णन्ति केचिन्न भवादृशा द्विज गुणांश्च फल्गून् बहुलीकरिष्ण
वो महत्तमास्तेषु विदङ्गवानघं १२ नाश्चर्यमेतद्यदसत्सु सर्वदा महद्विनिंदाकुणपात्मवादिषु।
सेर्ष्यं महापूरुषपादपांसुभिर्निरस्ततेजःसु तदेव शोभनम् १३

षु भवान् अघमविदत् विदितवान् कल्पितवान् भवानित्यर्थः। तच्च ब्रह्मनिष्ठानभिभूय कल्पितवानित्ययेनेनस्तु वितं १२
एतच्च दुर्जनेषु युक्तमेवेत्याह नेति। कुणपं जडं शरीरं तदेवात्मेति वदन्ति। ये ते षु ईर्ष्याक्षिप्तातिः सेर्ष्यं यथा भवत्येवं महता
विनिंदितिवरं पतन्। एतदाश्चर्यं न भवति सेर्ष्यं निरस्ततेजः प्रभावो येषामिति वा यद्यपि महापुरुषाः स्वनिंदां सहन्ते तथा
पि तत्पादरेणव स्तदहसहमानाः तेषां तेजः। षां तेजो निरस्यंतीति। अतः शास्त्रेषु महान्निंदनदेवो व्यवहृत्यर्थः १३

तद्देवमहं द्रोहमुक्त्वा तस्मिन्नेव वक्तं द्रोहमाह यदिति द्वाभ्यां। यत् यस्य द्व्यक्षरमात्रं शिव इति तत्प्रसिद्धं नाम नराणां स
र्वेषामघं सर्वं हंतीति केवलं गिरैवेरितं उच्चारितं न तु मनःपूर्वकं तु सकृदपि प्रसंगादपितं शिवं द्वेष्टि। नलंघ्यं शासन
माज्ञा यस्य अहो शिवेतरः अमंगलरूपः १४ पापहरत्वमुक्त्वा भुक्तिमुक्तिप्रदत्वेन शिवं वर्णयन्नाह। यस्य पाद
पद्मं मनांस्येवालयस्तैर्ब्रह्मसरो ब्रह्मानंदः स एवासवो मकरंदः तदर्थिभिः यद्वार्थिनः सकामस्य लोकस्य ताः आ

यद्व्यक्षरं नाम गिरेरितं नृणां सकृत्प्रसंगादघमाशु हंति तत् पवित्रकीर्तिमलंघ्यशासनं भवानहो द्वेष्टि शिवं शिवेतरः १४ यत्पादपद्मं महतां मनोऽलिभिर्निषेवितं ब्रह्मरसासवार्थिभिः लोकस्य यद्वर्षति चाशिषोऽर्थिनस्तस्मै भवान् द्रुह्यति विश्वबंधवे १५ किं वाशिवाख्यमशिवं न विदुस्त्वदन्ये ब्रह्मादयस्तमवकीर्य जटाः श्मशाने तन्माल्यभस्मनृकपालवसत्पिशाचैर्ये मूर्धभिर्दधति तच्चरणावसृष्टं १६

शिषो वर्षति १५ यदुक्तं शिवापदेशो ह्यशिव इति यच्चोक्तं प्रेतावासेष्वित्यादि तदाक्षिपन्नाह किं वेति। यो जटा अवकी
र्य श्मशाने अवसत् वसति स्म तस्य श्मशानस्य माल्यानि नृकपालानि च भूषणत्वेन संति यस्य तं त्वत्तोऽन्ये न विदुः
किं ते विदन्त्येवेति चेत् न तथा सति तेषां तद्दास्यानुपपत्तेरित्याह। तच्चरणादवसृष्टं गलितं निर्माल्यं ये मूर्धभिर्द
धति धारयंति १६

भा०च० १४ रुदानी देहंत्यक्तुकामा धर्मतत्वमाह। कर्णौ वाच्छाद्यानिर्गच्छेत्। यद्यदि भर्त्तुं मारयितुं वा कल्पो न भवति कदा धर्मा
वितरि धर्मरक्षके ईशे स्वामिनि असृणिभिर्निरंकुशैर्नृभिरस्यमाने अधिक्षिप्यमाणे प्रभुः शक्तश्चेत् उशतीं अ
कल्याणवादिनीं प्रसह्य बलात् छिंद्यात्। ततो विपत्स्वयं प्राणान् विसृजेदिति यत्स धर्मः १७ तव त्वत्तः उत्प
न्नां शितिकंठो नीलकंठस्तन्निंदकात् प्रमादादापन्नस्यापवित्रस्य त्यागं विना न शुद्धिरिति दृष्टांतेनाह। जग्धस्य

कर्णौ पिधाय निरयाद्यदकल्प ईशे धर्मावितर्यसृणिभिर्नृभिरस्यमाने छिंद्यात्प्रसह्य रुशतीमसतीं प्र
भुश्चेज्जिह्वामसू। नपि ततो विसृजेत्स धर्मः १७ अतस्तवोत्पन्नमिदं कलेवरं न धारयिष्ये शितिकंठग
र्हिणः जग्धस्य मोहाद्धि विशुद्धिमंधसो जुगुप्सितस्योद्धरणं प्रचक्षते १८ न वेदवादाननुवर्त्तते म
तिः स्व एव लोके रमतो महामुनेः यथा गतिर्देवमनुष्ययोः पृथक् स्व एव धर्मे न परं क्षिपेत् स्थितः १९ राम १४

भक्षितस्यान्नस्योद्धरणं वमनमेव पुंसः शुद्धिं प्रचक्षते। १८ यदुक्तं लुप्तक्रियायाशुचय इति तत्रत्याह नेति वेद
वादान् विधिनिषेधरूपान् स्व एव लोके आत्मन्येव रममाणस्य महतो मुनेः सम्यग्गिरक्षमतिर्नानुवर्त्तते निवृत्ता
धिकारित्वात् अधिकारिभेदे दृष्टांतः। तथा देवानां गतिराकाश एव मनुष्याणां पृथिव्यामेव अतः स्वधर्म एव प्रवृ
त्तिलक्षणे निवृत्तिलक्षणे वा स्थितः सन् परमन्यधर्मं पुरुषं वा न क्षिपेत्। व्यवधिताधिकारित्वेनोभयोः सत्यत्वा
न्न क्षिपेदेवेति वान्वयः १९

तदेवोपपादयन्नाह। प्रवृत्तमग्निहोत्रादि निवृत्तं शमदमादि तत्सत्यमेव यतः वेदे आश्रितं विहितं तत्र विविच्य व्यव
स्थया आश्रितं न तु विशेषेण व्यवस्थामेवाह। उभयं रागवैराग्यलक्षणं लिंगं चिह्नमधिकारिविशेषणं यस्मिन् तत्
ननु यावज्जीवमग्निहोत्रं जुहोति शांतो दांत इत्यादिषु नैवं व्यवस्था प्रतीयते सत्यं तथाप्युभयोरेकाधिकारविरोधा
त्तया पर्यवस्यतीत्याह। युगपद्भावो यौगपद्यं यौगपद्ये नैकस्मिन् कर्त्तरि कर्मद्वयं विरोधि ननु तर्हि निवृत्तं कर्मापि वे
नापि कर्त्तव्यमेव नेत्याह। ब्रह्मणि सदाशिवे किंचिदपि कर्म नर्छति न प्राप्नोति। अतो यथा प्रवृत्तनिवृत्तयोः परस्परं ध

कर्म प्रवृत्तं च निवृत्तमप्यृतं वेदे विविच्योभयलिंगमाश्रितं विरोधि तद्यौगपदैककर्त्तरि द्वयं
तथा ब्रह्मणि कर्म नर्छति २० मा वः पदव्यः पितरस्मदास्थिता या यज्ञशालासु न धूमवर्त्म
भिः तदन्नतृप्तैरसुभृद्भिरीडिता अव्यक्तलिंगा अवधूतसेविताः २१

र्माकरणे न दोषः। तथेश्वरे तदुभयकर्माकरणेऽपीति भावः २० स्विता भस्मकृतस्नानः तथा न यज्ञ इत्यादिना यो भो
गाद्यभावः उक्तस्तत्राह। हे पितः अस्माभिरास्थिताः आश्रिताः पदव्यः अणिमादिसमृद्धयः वो युष्माकं मानसंती
त्यर्थः अतो वः पदव्यो यज्ञशालास्वेव भवंति। ताश्च तदन्नेन यज्ञगतेनान्नेन तृप्तैः केवलमीडिता धूमवर्त्मभिश्च
भुज्यंते या अस्मत्पदव्यस्ता स्वासु नैवंभूताः किंतु अव्यक्तलिंगा अव्यक्तं लिंगं हेतुर्यासां इच्छामात्रप्रभावत्वात्।
अवधूतैर्ब्रह्मविद्भिः सेविताः अतो हमाद्यो रुद्रो दरिद्र इति सर्वमाकथ्यादिति भावः २१ श्रीगोपालो जयति

भा०च० किंबहुनोक्तेन रदं देहं त्यक्ष्याम्येवेत्याह द्वाभ्यां। एतेन नालं पर्याप्तं किं अपि त्वलमेव। कथंभूतेन कुजन्मना।
१५ तदेवाह। हरेः कृतापराधस्य तव देहादुद्भूतेन ननु श्लाघ्योयं देहः कथं त्याज्य स्तत्राह कुजनकस्य तव प्रसंगतः संबं
धात् मम लज्जा अभूत् अतो यो महतामप्रतिकर्ता तस्माज्जन्म तद्धिक् तत्संबंधात् श्लाघ्यमित्यर्थः २२ किं

नैतेन देहेन हरे कृतागसो देहोद्भवेनालमलं कुजन्मना व्रीडा ममाभूत्कुजनप्रसंगतस्तज्जन्म धिग्यो
महतामवद्यकृत् २२ गोत्रं त्वदीयं भगवान्वृषध्वजो दाक्षायणीत्याह यदा सुदुर्मना: व्यपेतनर्म
स्मि स्मितमाशु तद्ध्यहं व्युत्स्रक्ष्य एतत्कुणपं त्वदंगजं २३ मैत्रेय उवाच इत्यध्वरे दक्षमनूद्य शत्रुह
न्क्षितावुदीचीं निषसाद शांतवाक् स्पृष्ट्वा जलं पीतदुकूलसंवृता निमील्य दृग्योगपथं समाविशत्
२४ राम १५

वपरिहासादिषु विनोदेनापि दाक्षायणीति संबोधयन् त्वदीयं त्वत्संबंधवाचिकं गोत्रं नाम यदा वृषभध्वज
आह स्म हास्यरहिततदाहं व्यपेतनर्मस्मितं यथा भवत्येवं सुदुर्मना अतिदुःखिता खिन्ना भवामि। ततस्मात् हि निश्चितं एत
त्कुणपप्रायं व्युत्स्रक्ष्ये त्यक्ष्यामि २३ दक्षं प्रत्यनुवादं कृत्वा शत्रून् क्रोधादिरिपून् हंतीति उदीच्यां दि
शि पाठांतरे उदङ्मुखी शांतवाक् गृहीतमौना जलं स्पृष्ट्वा आचम्य दृग्दृशं २४

योगमार्गमेवाह कृत्वेति। अनिलो प्राणापानो ऊर्ध्वाधोवृत्तिकरौ निरोधेन समानौ एकरूपौ नाभिचक्रे कृत्वा ततनुदा
नमुत्थाप्य धिया सह हृदि स्थापयित्वा कंठमार्गेण भ्रुवोर्मध्यमनयत् २५ महतां पूजनमेव २६ चरणांबुजे आ
सवं मजनानंदं भर्तुरपरं न ददर्श देहश्च सद्यः प्रज्वलितो भूत्। समाधिना योग्निस्तेन २७ खे भुवि च हाहेत्यादि वा

कृत्वा समानावनिलौ जितासना सोदानमुत्थाप्य च नाभिचक्रतः शनैर्हृदि स्थाप्य धियोरसि स्थितं कंठाद्भ्रुवो
र्मध्यमनिंदितानयत् २५ एवं स्वदेहं महतां महीयसा मुहुः समारोपितमंकमादरात् जिहासती दक्षरुषा
मनस्विनी दधार गात्रेष्वनिलाग्निधारणां २६ ततः स्वभर्तुश्चरणांबुजासवं जगद्गुरोश्चिंतयती न चापरं
ददर्श देहो हतकल्मषः सती सद्यः प्रजज्वाल समाधिजाग्निना २७ तत्पश्यतां खे भुवि चाद्भुतं महद्धाहेति वा
दः सुमहानजायत हंत प्रिया दैवतमस्य देवी जहावसून्केन सती प्रकोपिता २८ अहो अनात्म्यं महदस्य प
श्यत प्रजापतेर्यस्य चराचरं प्रजाः जहावसून्यद्विमताऽऽत्मजा सती मनस्विनी मानमभीक्ष्णमर्हति २९
सोयं दुर्मर्षहृदयो ब्रह्मध्रुक् च लोकेपकीर्तिं महतीमवाप्स्यति। यदंगजां स्वां पुरुषद्विड़ुद्यतां न प्रत्यषेध
न्मृतयेपराधतः ३०
दः तमेवाह हंतेति विषादे। दैवतमस्य प्रत्युत मस्य प्रिया केन दक्षेण प्रकोपिता सती
२८ महदनात्म्यं दौर्जन्यं अस्य सर्वत्र स्नेह एव न्याय्यः त्याज्यः यस्येति येन विमता अवज्ञाता २९ दुर्मर्षं अत्यस
हनं हृदयं यस्य लोके जनानां मध्ये वशा द्रात्नरकं च यद्यतः स्वीयमंगजां सुतां अपराधतः स्वावज्ञया मृतये मरणाय उ
द्यतां विनिवारितवान् पुरुषद्विट् शिवद्वेषी ३०

भा०व० अद्भुतंदक्षाय ३१ यज्ञघ्नान्हंतीतियत्तघ्नस्तेनअपहतंरक्षइत्यादिना ३२ अध्वर्युणाभृगुणोग्रेणतपसासोमं
१६ प्राप्ताऋभवोनामदेवाउच्छ्रिताः ३३ ब्रह्मतेजसाउशाङ्किर्दीप्यमानैः ३४ इतिचतुर्थेचतुर्थः पंचमे
तुसतीदेहत्यागमाकर्ण्यशंकरःवीरभद्रंरुषोत्पाद्यतेनदक्षमघातयत् १ प्रजापतेर्हेतोर्निधनंकुतःतेना

वदत्येवंजनेसत्याद्दृष्ट्वासंत्यागमद्भुतं दक्षंतत्पार्षदाहंतुमुदतिष्ठन्नुदायुधाः ३१ तेषामापततां
वेगंनिशम्यभगवान्भृगुः यज्ञघ्नघ्नेनयजुषादक्षिणाग्नौजुहावह ३२ अध्वर्युणाहूयमानेदेवा
उत्पेतुरोजसा ऋभवोनामतपसासोमंप्राप्ताःसहस्रशः ३३ तैरलातायुधैःसर्वैःप्रमथाःसहगु
ह्यकाः हन्यमानादिशोभेजुरुशद्भिर्ब्रह्मतेजसा ३४ इतिश्रीभा०चतुर्थस्कंधेसतीदेहोत्सर्गं
श्चतुर्थोध्यायः मैत्रेयउवाच भवोभवान्यानिधनंप्रजापतेरसत्कृतायाअवगम्यना[illegible]रदात् राम १६
स्वपार्षदसैन्यंचतदध्वरर्भुभिर्विद्रावितंक्रोधमपारमादधे १ क्रुद्धःसुदष्टौष्ठपुटःसधूर्जटिर्जटांत
डिद्वह्निसटोग्ररोचिषं उत्कृत्यरुद्रःसहसोत्थितोहसन्गंभीरनादोविससर्जतांभुवि २

सत्कृतायाःतस्याध्वरेयेऋभवोदेवास्तैः १ सधूर्जटिःरुद्रःघोरःसन् जटामुत्कृत्योत्पाट्योत्थितःसन्तांभुवि
विससर्ज। संदष्टओष्ठपुटोयेन। तडितांवह्नीनांसटाःज्वालाःतद्वत्उग्रंरोचिर्यस्याः २ गोपालायनमः

ततोजटायाःसकाशात्अतिकायोवीरभद्रोजातइतिशेषः।तनुवातत्वादेहेनदिवंस्पृशन् अत्युच्चइत्यर्थः।घनरुक्
घनवर्णःत्रयःसूर्याइवदृशोयस्यकरालाश्चक्रेंगाःदंष्ट्रायस्यज्वलदग्निरिवमूर्धजायस्यकपालमालायुक्तःविविधान्यु
द्यतानिआयुधानियस्य ३ हेरुद्रहेभटयुद्धकुशलमद्भटानांत्वमग्रणीःसन्सयज्ञंदक्षंजहिब्रह्मतेजोदुर्जय
मितिमामंस्थाःयतस्त्वंमेअंशकः ४ मन्युनारुद्रेणपरिचक्रमेप्रदक्षिणंचकार।असंगंअप्रतीघातंयत्रंहो

ततोतिकायस्तनुवास्पृशन्दिवंसहस्रबाहुर्घनरुक्त्रिसूर्यदृक् करालदंष्ट्रोज्वलदग्निमूर्धजःकपालमालीविवि
धोद्यतायुधः ३ तंकिंकरोमीतिगृणंतमाहबद्धांजलिंभगवान्भूतनाथः दक्षंसयज्ञंजहिमद्भटानांत्वम
ग्रणीरुद्रभटांशकोमे ४ आज्ञप्तएवंकुपितेनमन्युनासदेवदेवंपरिचक्रमेविभुं मेनेतदात्मानमसंगरंह
सामहीयसांतातसहःसहिष्णुं ५ अन्वीयमानःसहरुद्रपार्षदैर्भृशंनदद्भिर्व्यनदत्सुभैरवं उद्यम्यशूलं
जगदंतकांतकंसंप्राद्रवद्घोषणभूषणांघ्रिः ६ अथर्त्विजोयजमानःसदस्याःककुभ्युदीच्यांप्रसमी
क्ष्यरेणुं ततःकिमेतत्कुतएतद्रजोभूदितिद्विजाद्विजपत्न्यश्चदध्युः ७

वेगःतेनभोतातमहीयसांबलीयसांअपिसहःसहिष्णुबलंसोढुंक्षमंमेने ५ जगदंतकोमृत्युःतस्याप्यंतकंशूलं
घोषयंतिशब्दंकुर्वंतीतिघोषणानिनूपुरादीनिभूषणानियस्यसः ६ ककुभिदिशितमोनभव
तिकिंतुरजइतिज्ञात्वाआहुःरजएवकुतोभूत्इतदध्युश्चिंतयामासुः ७ श्रीरामकृष्णायनमः

भा०च० हेतुं न रासंभवेनोत्पातिकं कल्पयंति वाता इति। दस्युनामधेये हेतुः। प्राचीनबर्हिष्मदानीं तनो राज्ञा जीवति न का
२७ ल्यंते न शीघ्रं नीयंते ८ प्रसूतिर्दक्षपत्नी सा मिश्रा मुख्या येषां तासां विपाकः फलं पश्यंतीनामिति। तस्याः दुःखाधि
क्ये हेतुः अवदध्यौ अवज्ञातवान् अनागां अनागसं ९ नवेदं सतीवचनमात्रं किंतु रुद्रावज्ञानं अनेनाभ
द्रं भविष्यतीत्याहुः यस्त्विति द्वाभ्यां। व्युप्तो विकीर्णो जटाकलापो यस्य। स्वशूलस्य सूच्या अग्रे अर्पिताः प्रोता दि

वाता न वांति न हि संति दस्यवः प्राचीनबर्हिर्जीवति होग्रदंडः (करालदंष्ट्रोज्ज्वलदग्निमूर्धजः कपालमा
ली विविधोद्यतायुधः ७) गावो न काल्यंत इदं कुतो रजो लोकोऽधुना किं प्रलयाय कल्पते ८ प्रसूति
मिश्राः स्त्रिय उद्विग्नचित्ता ऊचुर्विपाको वृजिनस्यैव तस्य यत्पश्यंतीनां दुहितॄणां प्रजेशः सुतां सतीम
वदध्यावनागां ९ यस्त्वंतकाले व्युप्तजटाकलापः स्वशूलसूच्यर्पितदिग्गजेंद्रः वितत्य नृत्यत्युदिता
स्त्रदोर्ध्वजानुच्चाट्टहासस्तनयित्नुभिन्नदिक् १० अमर्षयित्वा तमसह्यतेजसं मन्युप्लुतं दुर्विषहं भ्रुकुट्या राम २७
करालदंष्ट्राभिरुदस्तभागणं स्यात्स्वस्ति किं कोपयतो विधातुः ११

गजेंद्रा यस्य। उदितानि उन्नामितानि अस्त्राणि येषु दोषो बाहव एव ध्वजास्तान् वितत्य हर्षेण नृत्यति उच्चः अट्ट
हासः कठोरो हासः स एव स्तनयित्नुर्गर्जितं तेन भिन्ना विदीर्णा दिशो येन १० अमर्षयित्वा असहनं प्राप्तं कृत्वा
मन्युप्लुतं क्रोधव्याप्तं उदस्तः विक्षिप्तो भगणो नक्षत्रसंघो येन पुनश्च तं कोपयतो विधातुः अपि किं स्वस्ति
स्यात् नस्यादेव कान्यस्य कथा ११

उद्विग्नात् प्रचलितात् हृदयस्य। जनेन बहुधा यथा भवत्येवमुच्यमाने सति उत्पातुत्तमा महोत्पाता उत्थिताः पर्यक् सर्वतश्च
न्द्रभूता महात्मनो दक्षस्य भयावहाः ॥१२॥ नानायुधानि येषां। वामनकैः ह्रस्वैः उद्यतायुधैः पिंगैः कपिलैः पिशंगैः पीतैः
मकरस्येवोदरमाननं येषां तैः परीतो धावद्भिः। अवरुद्धः ॥१३॥ यज्ञशालायाः पूर्वपश्चिमस्तंभयोः अर्पितं पूर्वपश्चिमा
यतं काष्ठं प्राग्वंशः तं। यज्ञशालायाः पश्चिमतः पत्नीशाला यज्ञशालायाः पुरतः स्थितं सदो मंडपं। सदसः पुरतो ह

वद्भेवमुद्विग्नदृशोच्यमाने जनेन दक्षस्य मुहूर्महात्मनः॥ उत्पेतुरुत्पाततमाः सहस्रशो भयावहा
दिवि भूमौ च पर्यक्॥१२॥ तावत्स रुद्रानुचरैर्मखो महान्नानायुधैर्वामनकैरुदायुधैः॥ पिंगैः पिशं
गैर्मकरोदराननैः पर्याद्रवद्भिर्विदुरान्वरुध्यत॥१३॥ केचिद्बभंजुः प्राग्वंशं पत्नीशालां तथापरे।
सद आग्नीध्रशालां च तद्विहारं महानसं॥१४॥ रुरुजुर्यज्ञपात्राणि तथैकेऽग्नीननाशयन्॥
कुंडेष्वमूत्रयन्केचिद्बिभिदुर्वेदिमेखलाः॥१५॥ अबाधंत मुनीनन्ये एके पत्नीरतर्जयन्॥ अपरे जगृ
हुर्देवान्प्रत्यासन्नान्पलायितान्॥१६॥ भृगुं बबंध मणिमान्वीरभद्रः प्रजापतिं॥ चंडीशः पूषणं
देवं भगं नंदीश्वरो ग्रहीत्॥१७॥ ×बभंजुः। उत्तरवेद्या मेखलाः सीमासूत्राणि ॥१५॥१६॥१७॥
विर्धानं। तस्योत्तरत आग्नीध्रशालां। तद्विहारं यजमानगृहं। माहानसं पाकभोजनशालां ॥१४॥ रुरुजुः बभं

ग्रावभिरर्द्यमानाः नैकधाद्रुवुः ॥१८॥ स्रुवो हस्ते यस्य। भवो वीरभद्रः लुलुंचे उत्पाटितवान् ॥१९॥ उद्दहार उद्धृतवान्। सदस्थः स
भायांस्थितः सन् शपंतं शिवनिंदां कुर्वंतं दक्षं अक्षिनिकोचेन अस्मसुवत् प्रेरितवान् ॥२०॥ कलिंगदेशराजस्य अनिरुद्धाद्युद्धे
भद्रेय थाद्यूते दंतान्पातितवान् गरिमणि गुरुतरे रुद्रे निंद्यमाने दतः दंतान्दर्शयन् यो जहास। पूष्णो रितिपाठे द्विवचनमेव

सर्व एवर्त्विजो दृष्ट्वा सदस्याः सदिवौकसः। तैरर्द्यमानाः सुभृशं ग्रावभिर्नैकधाद्रवन् ॥१८॥ जुह्वतः स्रुव
हस्तस्य श्मश्रूणि भगवान्भवः। भृगोर्लुलुंचे सदसि योऽहसत् श्मश्रु दर्शयन् ॥१९॥ भगस्य नेत्रे
भगवान् पातितस्य रुषा भुवि ॥ उज्जहार सदस्थोऽक्ष्णा यः शपंतमसूसुवत् ॥२०॥ पूष्णश्चापातयद्दंता
न्कालिंगस्य यथा बलः ॥ शप्यमाने गरिमणि योऽहसद्दर्शयन्दतः ॥२१॥ धिष्यतीत्यर्थः ॥२१॥ ॥

पौष्णश्चरुर्भवतीत्यत्र तत्तस्य हि तस्यापि पूष्णो दंतपात प्राप्त्यर्थं सूचितवान्। तर्हि यो पूषा प्रपिष्टभागोऽदंतको हि
तं देवा अब्रुवन्निति विहितस्य पेषणस्य द्विर्वचनस्याभावात्। तत्र तस्य दंताः संतीति वक्तव्यं स्यात्। न वैतत्संगच्छत इत्या
शंक्य तत्रापि तस्य दंतपातो अवस्थाभेदे प्रवृत्तेन द्विवचनेन ज्ञाप्यते। अत एव पूष्णोनुग्रहं द्वेधा वक्ष्यति। एषा ... १८
तु यजमानस्य दद्भिर्जक्षतु पिष्टभुगिति। केवलश्चेत्प्रपिष्टभुग्भविष्यति। अन्यसहितश्चेद्यजमानस्य दद्भिर्भक्ष

छिंदन्नपीत्यत्र शिरः इत्युपरि व्यक्तीभविष्यति। त्र्यंबको वीरभद्रः ॥२२॥ अस्त्रान्वितैर्मंत्रसहितैः न निर्भिन्ना त्वक् यस्य तथा
भूतं दृष्ट्वेति शेषः ॥२३॥ सपशूनां पतिः मखे संज्ञपनं योगं कंठनिष्पीडनादिरूपं मारणोपायं दृष्ट्वा तेनोपायेनाहरत् २४
अन्येषां ब्राह्मणादीनां तद्विपर्ययः असाधुवादः अभूदिति शेषः ॥२५॥ गुह्यकालयं कैलासं ॥२६॥ चतुर्थे पंचमः ॥ ॥

आक्रम्योरसि दक्षस्य शितधारेण हेतिना। छिंदन्नपि तदुद्धर्तुं नाशक्नोत् त्र्यंबकस्तदा ॥२२॥ शस्त्रैर
स्त्रान्वितैरेवमनिर्भिन्नत्वचं हरः। विस्मयं परमापन्नो दध्यौ पशुपतिश्चिरं ॥२३॥ दृष्ट्वा संज्ञपनं योगं पशूनां
स पतिर्मखे। यजमानपशोः कस्य कायात्तेनाहरच्छिरः ॥२४॥ साधुवादस्तदा तेषां कर्म तत्तस्य पश्य
तां ॥ भूतप्रेतपिशाचानामन्येषां तद्विपर्ययः ॥२५॥ जुहावैतच्छिरस्तस्मिन्दक्षिणाग्नावमर्षितः
॥ तद्देवयजनं दग्ध्वा प्रातिष्ठद्गुह्यकालयं ॥२६॥ ॥ इति श्रीभागवते महापुराणे चतुर्थस्कं
धे दक्षयज्ञविध्वंसनो नाम पंचमोऽध्यायः ॥ ॥ श्रीमैत्रेय उवाच ॥ अथ देवगणाः सर्वे रुद्रानी
कैः पराजिताः। शूलपट्टिशनिस्त्रिंशगदापरिघमुद्गरैः ॥१॥ वैन्यवेदयन्निति द्वितीयेनान्वयः। शूलादिभिः

षष्ठे तु देवसंघेन सह गत्वा भवं विधिः। सांत्वयामास दक्षादिजीविताद्यर्थमादरात् ॥ अथ देवगणाः स्वयं

भा० ४ संछिन्नानि त्रुटितानि भिन्नानि विदीर्णानि अंगानि येषां ॥ सह ऋत्विग्भिः सभ्यैश्च वर्तमानाः ॥२॥ कस्य दक्षस्य नेयतुः न ज
१९ ग्मतुः ॥ ३ ॥ विभुर्ब्रह्मा तेजीयसि अतितेजस्विनि पुरुषे कृतागसि सत्यपि स्वयं तत्र कृतागसां बुभूषतां अपराधं कर्तुमिच्छ
तां सा तथा बुभूषा तेषां क्षेमाय न भूयात् । प्रायेणेति लोकोक्तिः न भवेदेवेत्यर्थः ॥४॥ अथापि सप्रसादयध्वं क्षमापयत । ये
भवंतः बर्हिषो यज्ञस्य भागभाजं परादुः दूरादेव खंडितवंतः । प्रगृहीतौ अंघ्रिपद्मौ पादौ प्रगृह्येत्यर्थः ॥५॥ अध्वरस्य जीवितं

संछिन्नभिन्नसर्वांगाः सर्त्विक्सभ्या भयाकुलाः । स्वयंभुवे नमस्कृत्य कार्त्स्न्येनैतन्निवेदयन् ॥ २ ॥ उपल
भ्य पुरैवैतद्भगवानब्जसंभवः । नारायणश्च विश्वात्मा न कस्याध्वरमीयतुः ॥ ३ ॥ तदाकर्ण्य विभुः प्राह तेजी
यसि कृतागसि । क्षेमाय तत्र सा भूयान्न प्रायेण बुभूषतां ॥ ४ ॥ अथापि यूयं कृतकिल्बिषा भवं ये बर्हिषो भा
गभाजं परादुः । प्रसादयध्वं परिशुद्धचेतसा क्षिप्रप्रसादं प्रगृहीतांघ्रिपद्मं ॥ ५ ॥ आशासाना जीवितमध्व
रस्य लोकः सपालः कुपिते न यस्मिन् । तमाशु देवं प्रियया विहीनं क्षमापयध्वं हृदि विद्धं दुरुक्तैः ॥ ६ ॥ नाहं
न यज्ञो न च यूयमन्ये ये देहभाजो मुनयश्च तत्त्वं । विदुः प्रमाणं बलवीर्ययोर्वा यस्यात्मतंत्रस्य क उपायं विधित्सेत् ॥ ७ १९

पुनः संधानं प्रार्थयमानाः संतः यस्मिन् कुपिते सति सपालो लोकः न भवेत् नश्येदित्यर्थः ॥६॥ वयं तु तत्त्वं तु बिभिन्नः त
मेव कं विदुपायं विधित्सेत् वेदितुमाह । नेति यज्ञः हरिः न इंद्रः तस्य तत्त्वं बलवीर्ययोः प्रमाणमियत्तां वा न विदुः वीर्यपराक्रमं
पापमिति पाठे अपराधं ॥७॥

॥८॥ कैलासं वर्णयति जन्मौषधीत्यादि चतुर्दशभिः । नरेतरैर्देवैर्जुष्टं ॥९॥ शृंगैः रमणं रतिप्रदमित्युत्तरेणान्वयः । कथंभूतैर्नाना
धातुभिर्विचित्रितैः । नानाद्रुमलतागुल्मा येषु ॥१०॥ नाना अमलानि प्रस्रवणानि येषु । नाना कंदराः सानवश्च येषु रमणैः स
ह क्रीडंतीनां ॥११॥ मयूराणां केकाभिः स्वनैर्नादितं । मदांधैरलिभिर्विमूर्छितं मूर्छना रागगतिविशेषः तद्युक्तं कृतं । रक्त

स इत्थमादिश्य सुरानजस्तैः समन्वितः पितृभिः सप्रजेशैः । ययौ स्वधिष्ण्यान्निलयं पुरद्विषः कैलासमद्रिप्रवरं प्रियं प्र
भोः ॥ ८ ॥ जन्मौषधितपोमंत्रयोगसिद्धैर्नरेतरैः । जुष्टं किन्नरगंधर्वैरप्सरोभिर्वृतं सदा ॥ ९ ॥ नानामणिमयैः शृंगै
र्नानाधातुविचित्रितैः ॥ नानाद्रुमलतागुल्मैर्नानामृगगणावृतैः ॥ १० ॥ नानामलप्रस्रवणैर्नाना
कंदरसानुभिः । रमणं विहरंतीनां रमणैः सिद्धयोषितां ॥ ११ ॥ मयूरकेकाभिरुतं मदांधालिविमूर्छितं । प्लावितै
रक्तकंठानां कूजितैश्च पतत्त्रिणां ॥ १२ ॥ आह्वयंतमिवोद्धस्तैर्द्विजान्कामदुघैर्द्रुमैः । व्रजंतमिव मातंगैर्गृणंत
मिव निर्झरैः ॥ १३ ॥ मंदारैः पारिजातैश्च सरलैश्चोपशोभितं । तमालैः शालतालैश्च कोविदारासनार्जुनैः ॥ १४ ॥
चूतैः कदंबनीपैश्च नागपुन्नागचंपकैः । पाटलाशोकबकुलैः कुंदैः कुरबकैरपि ॥ १५ ॥ असरंध्रत्वेन भेदः ॥ १५ ॥

कंठानां कोकिलानां प्लावितैः प्लुतवन्नीतैः स्वरैः अन्येषां पतत्रिणां च कूजितैः ॥१२॥ उद्धस्तैः उन्नतशाखैः द्रुमैः द्विजान् पक्षिणः आह्वयंत
मिव । लोके हि हस्तं हि मुत्क्षिप्योच्चैः स्वरेणाह्वानमर्थिनां कुर्वंति । अद्रिश्चोत्क्षिप्तहस्ताकारैर्द्रुमैस्तत्रत्यपक्षिस्वनैश्च तथा लक्ष्यत
इत्यर्थः । व्रजद्भिर्मातंगैर्व्रजंतमिव । निर्झरध्वनिभिर्गृणंतं स्तुवंतमिव ॥१३।१४॥ नीपादयोऽवांतरजातिभेदः । वेणुकीचकयोः अनीरं

वेणुकजातिभिरित्यत्र वेणुकाएला जातिर्मालती १८।१७ द्रुमजातिभिरित्यत्र जातिरवांतरभेदसामान्यं।१८ कुमुदादिसमृद्धिभिर्हेतुभिर्नलिनी
पुरसः सुकलं मधुरं यथा भवत्येवं कूजंतिया न्निपक्षिवृंदानि तै रूपशोभितं।१९ मृगादिभिर्निर्जुष्टं निषेवितं। नाभिः कस्तूरिमृगः। पूर्वमृग
गणाः मृगविशेषणत्वेनोक्ताः। इदानीं स्वातंत्र्येणोत्यपोनरुक्त्यं। कदलीखंडैः संरुद्धानि आवृतानि। नलिनीनां पुलिनानि तैः श्रीः शोभा

स्वर्णार्णशतपत्रैश्च वरवेणुकजातिभिः। कुरबकैर्मल्लिकाभिश्च माधवीभिश्च मंडितं॥१६॥ पनसोदुंबराश्वत्थप्लक्षन्यग्रोधहिं
गुभिः। भूर्जैरोषधिभिः पूगैः राजपूगैश्च जंबुभिः॥१७॥ खर्जूराम्रातकाम्राद्यैः प्रियालमधूकें गुदैः। द्रुमजातिभिरन्यैश्च
राजितं वेणुकीचकैः॥१८॥ कुमुदोत्पलकल्हारशतपत्रवनर्द्धिभिः। नलिनीषु कलं कूजत्खगवृंदोपशोभितं॥१९॥ मृगैः
शाखामृगैः क्रोडैर्मृगेंद्रैर्ऋक्षशल्लकैः। गवयैर्नाभिभिर्व्याघ्रैर्निर्जुष्टं महिषादिभिः॥२०॥ कदलीखंडसंरुद्धनलि
नीपुलिनश्रियं। पर्यस्तं नंदया सत्याः स्नानपुण्यतरोदया॥२१॥ विलोक्य भूतेशगिरिं विबुधा विस्मयं
ययुः॥२१॥ ददृशुस्तत्र ते रम्यामलकां नाम वै पुरीं। वनं सौगंधिकं चापि यत्र तन्नाम पंकजं॥२२॥ नंदा चालकनंदा
च सरितौ बाह्यतः पुरं। तीर्थपादपदांभोजरजसातीव पावने॥२३॥ ययोः सुरस्त्रियः क्षत्तरवरुह्य स्वधिष्ण्यतः।
क्रीडंति पुंसः सिंचंत्यो विगाह्य रतिकर्शिताः॥२४॥ तीर्थपादस्य हरेः पादांभोजरजसा २३ ययोर्विगाह्य प्रविश्य क्रीडंति २४

यस्मिन्॥२०॥ नंदया गंगया पर्यस्तं परिवेष्टितं। सत्याः भवान्याः स्नानेन पुण्यतरमतिसुगंधमुदकं यस्यां॥२१॥ तत्र गिरौ
नं ददृशुः। तत्र वने तन्नाम सौगंधिकं पंकजं भवति। जातावेकवचनं।२२ पुरीं बाह्यतः। नंदा चेति चतुर्भिः सरितौ पुराद्बाह्यतो भवतः

ययोरंभो विगततर्षो पि गजाः पिबंति तत्र हेतुः। तासां सुरस्त्रीणां स्नानेन भ्रष्टं गलितं यन्नवं कुंकुमं तेन पिंज
रं पीतवर्णं गजीः करिणीः २५ तारः रौप्यं तारादिमय विमानानां शतैः संकुलं। तडिद्भिः स्त्रीणां घनैर्विमाना
नां खेन पुर्याः सादृश्यं २६ यक्षेश्वरपुरीं हित्वा अतिक्रम्य तद्वनं ददृशुस्तदेव आराद्दूराद्दृष्टं ददृशुरिति चतुर्थे
नान्वयः। कथंभूतं वनं चित्राणि माल्यानि छदाश्च येषु तैः द्रुमैः हृद्यं सुखकरं २७ रक्तकंठखगानामनीकस्य

ययोस्तत्स्नानविभ्रष्टनवकुंकुमपिंजरं। वितृषोपि पिबंत्यंभः पाययंतो गजा गजीः २५ तारहेममहा
रत्नविमानशतसंकुला। जुष्टां पुण्यजनस्त्रीभिर्यथा खं सतडिद्घनं २६ हित्वा यक्षेश्वरपुरीं वनं सौगं
धिकं च तत्। द्रुमैः कामदुघैर्हृद्यं चित्रमाल्यफलच्छदैः २७ रक्तकंठखगानीकस्वरमंडितषट्पदं कल
हंसकुलप्रेष्ठं खरदंडजलाशयं २८ वनकुंजरसंघुष्टहरिचंदनवायुना। अधिपुण्यजनस्त्रीणां मुहुरुन्म
थयन्मनः २९ वैदूर्यकृतसोपाना वाप्य उत्पलमालिनीः। प्राप्तं किंपुरुषैर्दृष्ट्वा त आराद्ददृशुर्वटं ३०

स्वरैर्मंडिताः षट्पदाः षट्पदस्वरा यस्मिन्। कलहंसानां कुलस्य प्रेष्ठं। खरदंडानि पद्मानि तैर्युक्ता जलाशया
यस्मिन् २८ वनकुंजरैः संघुष्टा ये हरिचंदनद्रुमाः तत्संबंधिना वायुना पुण्यजनस्त्रीणां मनः अधि अधिक
मुन्मथयत् २९ यत्र च उत्पलमालिन्यो वाप्यस्ताः किंपुरुषैः प्राप्तं वनं च दृष्ट्वा पाठांतरे किंपुरुषैः प्राप्ता वा
प्यो दृष्ट्वेत्यर्थः ३०

भा० व० योजनशतमुत्सेधं उच्छ्रायो यस्य पादोनैः सर्वतः पंचशतयोजनप्रमाणो विटपैः शाखाभिराहृतो विस्तृतः पर्यंकः
२१ सर्वतः कृता अचला छाया येन निर्गतं नीडं यस्मात् ३१ मुमुक्षूणां शरणे आश्रये। त्यक्तामर्षं तिक्तमिव तुल्यं ३२
सर्वतः कृता अचला छाया येन निर्गतं नीडं यस्मात् ३१ मुमुक्षूणां शरणे आश्रये। त्यक्तामर्षं तिकं स्तुत्यं ३२
तं विशिनष्टि सनंदनाद्यैरिति पंचभिः। सख्या कुबेरेणोपास्यमानं ३३ विद्या उपासना तपश्चित्तैकाग्र्यं
तं विशिनष्टि सनंदनाद्यैरिति पंचभिः। सख्या कुबेरेणोपास्यमानं ३३ विद्या उपासना तपश्चित्तैकाग्र्यं
योगः समाधिः तेषां पंथानं प्रवर्त्तनद्वारा लोकस्य मंगलं हितं। तपो वात्सल्यात् स्नेहादाचरितं ३४ संध्या

स योजनशतोत्सेधः पादोनविटपायतः पर्यक्कृताचलच्छायो निर्नीडस्तापवर्जितः ३१ तस्मिन्महायो
गमये मुमुक्षुशरणे सुराः ददृशुः शिवमासीनं त्यक्तामर्षमिवांतकं ३२ सनंदनाद्यैर्महासिद्धैः शांतैः सं
शांतविग्रहं उपास्यमानं सख्या च भर्त्रा गुह्यकरक्षसां ३३ विद्यातपोयोगपथमास्थितं तमधीश्वरं
चरंतं विश्वसुहृदं वात्सल्याल्लोकमंगलं ३४ लिंगं च तापसाभीष्टं भस्मदंडजटाजिनं अंगेन संध्याभ्र
रुचा चंद्रलेखां च बिभ्रतं ३५ उपविष्टं दर्भमय्यां बृस्यां ब्रह्म सनातनं नारदाय प्रवोचंतं पृच्छते शृण्वतां राम
सतां ३६ कृत्वोरौ दक्षिणे सव्यं पादपद्मं च जानुनि बाहुं प्रकोष्ठेऽक्षमालामासीनं तर्कमुद्रया ३७ २१
श्ररुचा रक्तवर्णेनांगेन भस्मादि लिंगं चंद्रलेखां च बिभ्रतं ३५ वृसी नामासनं बृसी तस्यां ब्रह्म प्रवोचंतं। सव्यं पा
दपद्मं दक्षिणे ऊरौ कृत्वा विन्यस्य जानुनि च सव्ये बाहुं कृत्वा दक्षिणबाहुप्रकोष्ठे मणिबंधस्थाने अक्षमालां कृ
त्वा दक्षिणहस्तकृतया तर्कमुद्रया उपलक्षितमासीनमित्यर्थः। तदुक्तं योगशास्त्रे। एकं पादमथैकस्मिन् विन्य
स्योरुसंस्थितं। इतरस्मिंस्तथा बाहुं वीरासनमिदं स्मृतं। तर्कमुद्रा चोक्ता। तर्जन्यंगुष्ठयोरग्रे मिथः संयोज्य चांगु
लीः प्रसार्य बंधनं प्राहुस्तर्कमुद्रेति मांत्रिका इति ३७

ब्रह्मनिर्वाणं ब्रह्मानंदः। तत्र समाधिरेकाग्र्यं दीक्षितं। योगकक्षं योगपट्टं च वामजानु दृढकरणार्थं विशेषेणोपा
श्रितवंतं। मननशीला मनवस्तेषामाद्यं मुख्यं ३८ अर्हन्नमो विष्णुर्वामनमूर्त्तिर्यथा कश्यपस्य ३९ मह
र्षिभिः सहिताः ये नीललोहितमनुवर्तंते तेपि तस्मै वंदनं चक्रुः एवं सर्वैर्नमस्कृतः प्रणामो देवैर्यस्मै तं ४० य

तं ब्रह्मनिर्वाणसमाधिमाश्रितं व्युपाश्रयं गिरिशं योगकक्षं सलोकपाला मुनयो मनूनामाद्यं मनुं
प्रांजलयः प्रणेमुः ३८ स तूपलभ्यागतमात्मयोनिं सुरासुरेशैरभिवंदितांघ्रिः उत्थाय चक्रे शिरसा
भिवंदनमर्हत्तमः कस्य यथैव विष्णुः ३९ तथापरे सिद्धगणा महर्षिभिर्ये वै समंतादनु नीललो
हितं नमस्कृतः प्राह शशांकशेखरं कृतप्रणामं प्रहसन्निवात्मभूः ४० ब्रह्मोवाच जाने
त्वामीशं विश्वस्य जगतो योनिबीजयोः शक्तेः शिवस्य च परं यत्तद्ब्रह्म निरंतरम् ४१ त्वमेव भग
वानेतच्छिवशक्त्योः स्वरूपयोः विश्वं सृजसि पास्यत्सि क्रीडन्नूर्णपटो यथा ४२

द्यपि त्वं नीलवर्ण्मा नमः करोषि तथापि त्वैश्वर्यमहं वेद्मीत्याह जानद्गाने। विश्वस्येशं जाने तत्र हेतुः जगतो यो
निर्या शक्तिः प्रकृतिर्बीजं च शिवः पुरुषः तयोः कारणं तथापि निर्भेदं यद्ब्रह्म निर्विकारं तद्देवत्वमिति जाने ४१
ननु विरुद्धमेतत्तत्राह त्वमेव सत्वरूपयोरविभक्तयोः शिवशक्त्योः क्रीडन् विश्वसृष्ट्यादि करोषि ऊर्णनाभिरि
व स्वरूपयोरिति पाठे स्वांशयोः अतो न विरोधः ४२

भा० च० धर्ममर्थंच यादोग्धि या त्रयी तस्याः अभिपत्तये रक्षणाय अध्वरं सृष्टवानसि। यद्वा हे धर्मार्थदुघ धर्माद्यभिपत्तये त
२२ त्वमपि दक्षेण सूत्रेण निमित्तेन सेतवो वर्णाश्रममर्यादाश्च अवसिताः निबद्धाः निरूपिता इति वा। श्रद्दधते श्रद्धया
अनुतिष्ठंति ४३ सर्वकर्मफलदातापि त्वमेवेत्याह। हे मंगल शुभानां कर्मणां कर्तुः स्वर्गं परं मोक्षं वा तनुषे
अमंगलानां अशुभानां कर्मणां कर्तुश्च तामिस्रं नरकं तनुषे। तत्र केन हेतुना तद्देव तस्मिन्नेव कस्यचिद्विप

त्वमेव धर्मार्थदुघाभिपत्तये दक्षेण सूत्रेण समर्जिताध्वरं त्वयैव लोकेवसिताश्च सेतवो यान् ब्राह्मणाः
संदधते धृतव्रताः ४३ त्वं कर्मणां मंगल मंगलानां कर्तुः स्वलोकं तनुषे स्वः परं वा अमंगलानां च त
मिस्रमुल्बणं विपर्ययः केन तदेव कस्यचित् ४४ न वै सतां त्वच्चरणार्पितात्मनां भूतेषु सर्वेष्वभिप
श्यतां तव भूतानि चात्मन्यपृथग्दिदृक्षतां प्रायेण रोषोभिभवेद्यथा पशुं ४५ पृथग्धियः कर्मदृशो दु राम
राशयाः परोदयेनार्पितहृद्रुजोनिशं परान् दुरुक्तैर्वितुदंत्यरुंतुदास्तान्मावधीद्दैववधान्भवद्विधः ४६ २२

र्ययो भवति। ४४ त्वत्कोपोत्र हेतुरित्यसंभावितमिति कैमुत्यन्यायेनाह। न वै सतां त्वत्तः रोषोभिभवेत्। त
व त्वां द्वितीयार्थे षष्ठी। पशुं अज्ञं यथाभिभवति तद्वत् ४५ अतः ये पृथग्धियः भेददृशः अतः कर्मण्येव दृष्टि
र्येषां दुष्ट आशयो येषां परेषामुदयेन संपदा अर्पिता हृदि रुक् येषां। अरुंतुदाः मर्मभेत्तारः दैवेनैव वधो ये
षां तान् भवद्विधः निरुपमः साधुः मावधीत् न हन्यात् ४६ श्रीगोपालकृष्णाय नमः

प्रत्युत साधूनां वृत्तमालोक्य अनुग्रहमेव कर्तुमर्हसीत्याह द्वाभ्यां। यस्मिन् देशे यदा काले स्पृष्टधियो मोहित
चित्ताः पृथग्दृशो भवंति तत्रापराधे साधवो हि अनुकंपया अनंतरमेव परदुःखासहिष्णुतया चित्तप्रकंपेन कृ
पां कुर्वंति न क्रमं पराक्रमं कुतः दैवबलात् कृतेर्थे ८ ममैव दैवमेवंभूतं कोत्रापराधः तेषामिति मत्वा हन

यस्मिन्यदा पुष्करनाभमायया दुरंतया स्पृष्टधियः पृथग्दृशः कुर्वंति तत्र ह्यनुकंपया कृपां न साधवो दै
व बलात्कृते क्रमं ४७ भवांस्तु पुंसः परमस्य मायया दुरंतयास्पृष्टमतिः समस्तदृक् तया हतात्मस्व म
नुकर्मचेतःस्वनुग्रहं कर्तुमिहार्हसि प्रभो ४८ कुर्वध्वरस्योद्धरणं हतस्य भोः त्वयासमाप्तस्य मनो
प्रजापतेः न यत्र भागं तव भागिनो ददुः कुयज्वनो येन मखो निनीयते ४९ जीवताद्यजमानो
यं प्रपद्येताक्षिणी भगः भृगोः श्मश्रूणि रोहंतु पूष्णो दंताश्च पूर्ववत् ५० देवानां भग्नगात्राणामृत्वि
जां चायुधाश्मभिः भवतानुगृहीतानामाशु मन्योस्त्वनातुरं ५१

नं न कुर्वंत इत्यर्थः ४७ भवांस्तु अस्पृष्टमतिः अतः समदृक् सर्वज्ञः तया मायया हत आत्मा येषां तेषु अत ए
व कर्मानुगतचित्तेषु इहापराधे अनुग्रहं कर्तुमर्हसि ४८ एवं सामान्येनोक्त्वा प्रकृतमाह कुर्विति त्रिभिः।
त्वया हतस्य अत एव असमाप्तस्य प्रजापतेरध्वरस्य हे मनो यत्राध्वरे कुयाज्ञिकाः भागिनोपि भागं न ददुः। भागा
र्हं त्वमाह। येन त्वया मखो निनीयते फलं प्राप्यते ४९ हे मन्यो अनातुरमारोग्यमस्तु ५१

भा०व० भागश्चनवास्त्वित्याह।एषइति।हेरुद्रयावदित्यर्थेयदित्यव्ययं।यज्ञेहृतेयावानुच्छिष्टः अवशिष्टोर्थः तावानेषत
२३ वभागोस्तुहेरुद्रतेनभागेनाद्ययज्ञः कल्पतां ५२ इतिचतुर्थेषष्ठः सप्तमेविष्णुरुद्धृतः क्रतोर्दक्षमवादि
भिः यज्ञंप्रवर्त्तयामासदक्षेणेतिनिरूप्यते।।अजेनयोअनुनीतः प्रार्थितोभवस्तेनाभिहितंहेमहाबाहोविदु
र १ अघमपराधं २ स्वपराधमपहत्यानुगृह्णाति।दग्धंशीर्षयस्यप्रजापतेः अजस्यमुखंयस्मिन् तथाभू

एषतेरुद्रभागोस्तुयदुच्छिष्टोध्वरस्यवै यज्ञस्तेरुद्रभागेनकल्पतामद्ययज्ञहन् ५२ इतिश्रीभा०च
तुर्थस्कंधेरुद्रसांत्वनंसषष्ठोध्यायः मैत्रेयउवाच इत्यजेनानुनीतेनभवेनपरितुष्यता अभ्या
धायिमहाबाहोप्रहस्यश्रूयतामिति १ महादेवउ० नाघंप्रजेशबालानांवर्णयेनानुचिंतये देव
मायाभिभूतानांदंडस्तत्रधृतोमया २ प्रजापतेर्दग्धशीर्ष्णोभवत्वजमुखंशिरः मित्रस्यचक्षुषेक्षेत राम
भागंस्वंबर्हिषोभगः ३ पूषातुयजमानस्यदद्भिर्जक्षतुपिष्टभुक् देवाःप्रकृतसर्वांगायेमउच्छेषणंददुः २३
: ४ बाहुभ्यामश्विनोःपूष्णोहस्ताभ्यांकृतबाहवः भवंत्वध्वर्यवश्चान्येबस्तश्मश्रुर्भृगुर्भवेत् ५

तंशिरोस्तुबर्हिषः संबंधिनंभागंमित्रनाम्नोदेवस्य ३ प्रकर्षेणकृतानिभग्नान्यंगानियेषांतेभवंतुअध्व
र्यवः उच्छेषणंयज्ञावशिष्टंयेषांत्वंगानिविनष्टानितेतुअश्विनोर्बाहुभ्यांकृतबाहवः पूष्णोहस्ताभ्यांकृत
हस्ताश्चभवंतुअध्वर्यवः अन्येचऋत्विजः बस्तस्यश्मश्रूण्येवश्मश्रूणियस्य ५ श्रीवासुदेवायनमः

मीढुष्टमःशिवःतेनउक्तं।परितुष्टेस्त्रितैः ६।मीढ्वांसंशिवंत्वयागत्यसर्वंकार्यंइत्यामंत्र्यसंप्रार्थ्यसुनासीरादेवाःसहमी
ढुषांवेधसावर्त्तमानाःसमीद्धेद्धसः ।७।कात्स्न्येनचक्रेहस्तबाह्वादिसाधारण्यंविधाय।८।९।एवंवृषध्वजेद्वेषेणक
लिलःकलुषीकृतआत्मायस्यसः।तदाशरत्कालीनोह्रदइवामलोभवत्।।१०।११।१२।यद्यपियद्यपिविप्रलब्धः पर
मृतोमयाभवान्तथापित्वयादंडोमृतः शिक्षाकृता।नतूपेक्षितोस्मि।युक्तमेवेतदित्याह।ब्रह्मबंधुषुचब्राह्मणाभास

श्रीमैत्रेयउवाच।। ।।तदासर्वाणिभूतानिश्रुत्वामीढुष्टमोदितं।परितुष्टात्मभिस्तातसाधुसाध्वित्यथाब्रुवन्।
६।।ततोमीढ्वांसमामंत्र्यसुनासीराःसहर्षिभिः।भूयस्तद्देवयजनंसमीढ्वद्वेधसोययुः।। ७।।विधायकार्त्स्न्येन
चतद्यथाहभगवान्भवः।संदधुःकस्यकायेनसवनीयपशोःशिरः।।८।।संधीयमानेशिरसिदक्षोरुद्राभिवीक्षि
तः।सद्यःसुप्तइवोत्तस्थौददृशेचाग्रतोमृडं।।९।।तदावृषध्वजद्वेषकलिलात्माप्रजापतिः।शिवावलोकादभ
वच्छरद्धृदइवामलः।।१०।।भवस्तवायकृतधीर्नाशक्नोदनुरागतः।औत्कंठ्याद्बाष्पकलयासंपरेतांसुतां
स्मरन्।।११।।कृच्छ्रात्संस्तभ्यचमनःप्रेमविह्वलितःसुधीः।शशंसनिर्व्यलीकेनभावेनेशंप्रजापतिः।।१२।। ।।
दक्षउवाच।। ।।भूयाननुग्रहअहोभवताकृतोमेदंडस्त्वयामयिभृतोयदपिप्रलब्धः।।नब्रह्मबंधुषुचवांभग
वन्नवज्ञातुभ्यंहरेश्चकुतएवधृतव्रतेषु।।१३।।(१)यद्यपितुभ्यंतवहरेश्चेतिवांयुवयोश्चवज्ञाउपेक्षानास्ति।।१३।।

आत्मत त्वं अवितुं [illegible] संप्र
तत्र हेतुमाह विद्येति ब्रह्माभूत्वात्मनस्त्राक् अस्त्रक्षी। किमर्थमात्मतत्त्वमवितुं यद्ब्रह्म वेदं
तत्र हेतुमाह विद्येति ब्रह्माभूत्वा त्वमस्त्राक् अस्त्रक्षीः। किमर्थमात्मतत्त्वमवितुं यद्वा ब्रह्म वेदं आत्मतत्त्वं अवितुं संप्र
दायप्रवर्त्तनेन ज्ञापयितुमित्यर्थः। तत्तस्मात् हे परम उत्कृष्ट ॥१४॥ अत्र प्रत्युपकारो नास्तीत्याह योसाविति। अविदित तत्त्व
दृशा अप्राप्त तत्त्वज्ञानेन। तद्विगणय्य विस्मृत्य। अर्हत्तमस्य निंदया अर्वाग् अधः पतंतं मामपाद्रक्षितवान्। स्वकृतेनैव परानु
ग्रहेणैव तुष्येत्। न मया प्रति कर्त्तुं शक्यमित्यर्थः ॥१५॥ अनुमंत्रितो अनुज्ञातः उपाध्यायसहितैः ऋत्विगादिभिः अनुवर्त्तयामास ॥१६

विद्यातपोव्रतधरान्मुखतः स्म विप्रान्ब्रह्मात्मतत्त्वमवितुं प्रथमं त्वमस्राक्। तद्ब्राह्मणान्परम सर्वविपत्सु पासि पालः
पशूनिव विभो प्रगृहीतदंडः ॥१४॥ योसौ मयाऽविदिततत्त्वदृशा सभायां क्षिप्तो दुरुक्तिविशिखैरगणय्य तन्मां। अर्वा
क्पतंतमर्हत्तमनिंदयापाद्दृष्ट्यार्द्रया स भगवान्स्वकृतेन तुष्येत् ॥१५॥ ॥श्रीमैत्रेय उवाच॥ ॥क्षमाप्यैवं स
मीढ्वांसं ब्रह्मणा चानुमंत्रितः। कर्मसंतानयामास सोपाध्यायर्त्विगग्निभिः ॥१६॥ वैष्णवं यज्ञसंतत्यै त्रिकपालं द्वि
जोत्तमाः। पुरोडाशं निरवपन्वीरसंसर्गशुद्धये ॥१७॥ अध्वर्युणात्तहविषा यजमानो विशांपते। यथा विशुद्धया
दध्यौ तथा प्रादुरभूद्धरिः ॥१८॥ तदा स्वप्रभया तेषां द्योतयंत्या दिशो दश। मुष्णंस्तेज उपानीतस्तार्क्ष्येण स्तोत्र
वाजिना ॥१९॥ २४
x इत्यंतरे पक्षाविति श्रुतेः ॥१९॥

वीराणां प्रमथादीनां संसर्गकृतदोषस्य शुद्धये निरवपन्नित्यर्थः ॥१७॥ उपात्तहविषा अध्वर्युणा सह विशुद्धया बुद्ध्या दध्यौ हे विशांप
ते हे विदुर ॥१८॥ स्वया प्रभया तेषां तेजो मुष्णन् तिरस्कुर्वन् उपानीतः समीपं प्रापितः स्तोत्रे बृहद्रथंतरे वाजौ पक्षौ यस्य तेन। बृह

तमेवानुवर्णयति। श्याम इति द्वाभ्यां। हिरण्यवद्रसनायस्येति वस्त्रं लक्ष्यते। अर्कतुल्येन किरीटेन जुष्टः। नीलालका एव भ्रमरास्तै
र्मंडितं कुंडलयुक्तमास्यं यस्य। कंब्वादिभिस्त्रिभिरायुधैर्भक्तरक्षार्थं यच्चये हिरण्मये भुजैः पुष्पितः कर्णिकार इव शोभमानः। भुजानां
हिरण्मयत्वं केयूरकंकणमुद्रिकाद्यलंकारैः ॥२०॥ वक्षसि अधिश्रिता वधूर्लक्ष्मीर्यस्य स उदारो हासोऽवलोकश्च तयोः
कलया लेशेन पार्श्वे उभयतो भ्रमंती व्यजने चामरे चामरव्यजने एव राजहंसो यस्मिन्सः रज्यमानः शोभातिशयं नीयमानः २१

श्यामो हिरण्यरसनोऽर्ककिरीटजुष्टो नीलालकभ्रमरमंडितकुंडलास्यः। कंबुब्जचक्रशरचापगदासिचर्मव्यग्रैर्हि
रण्मयभुजैरिव कर्णिकारः ॥२०॥ वक्षस्यधिश्रितवधूर्वनमाल्युदारहासावलोककलया रमयंश्च विश्वं। पार्श्वभ्र
मद्व्यजनचामरराजहंसः श्वेतातपत्रशशिनोपरि रज्यमानः ॥२१॥ तमुपागतमालक्ष्य सर्वे सुरगणादयः। प्रणे
मुः सहसोत्थाय ब्रह्मेंद्रत्र्यक्षनायकाः ॥२२॥ तत्तेजसा हतरुचः सन्नजिह्वाः ससाध्वसाः। मूर्ध्ना धृतांजलिपु
टा उपतस्थुरधोक्षजं ॥२३॥ अप्यर्वाग्वृत्तयो यस्य महि त्वात्मभुवादयः। यथामति गृणंति स्म कृतानुग्रह
विग्रहम् ॥२४॥

ब्रह्मेंद्रत्र्यक्षा नायका मुख्या येषां ते ॥२२॥ हतरुचः तिरस्कृतप्रभाः। सन्नजिह्वाः गद्गदवाचः। तन्महिम्ना क्षुभितचित्ताः
उपतस्थुः तुष्टुवुः ॥२३॥ यस्य महिमानं प्रति तु अर्वागेव वृत्तिर्येषां तेपि यथामति गृणंति स्म अस्तुवन्। कुतः प्रकटीकृतोऽनु
ग्रहार्थं विग्रहो येन तं। यद्वा तेषां अर्वाग्वृत्तित्वे हेतुः। ते तु तस्य महिमहिम्ना विक्षतिमात्ररूपा इत्यर्थः ॥२४॥

तत्रतावद्दक्षस्तुतिप्रकारमाह॥ दक्षइति॥ गृहीतमर्हणसादनोत्तमं येनतं। उत्तमेपात्रेआसाद्य अर्हणोपुसमर्पितिपुप्रीत्या गृहीतमर्हणसादनोत्तमंयथाभवतितथा। तद्गृहीत्वाप्रपेदइत्यर्थः। अर्हणंपात्रमेवयेनगृहीतमित्यर्थः। यद्वाकथंप्रपेदे। गृहीतमर्हणसादनोत्तमंयथाभवतितथा। तद्गृहीत्वाप्रपेदइत्यर्थः।

दक्षोगृहीतार्हणसादनोत्तमंयज्ञेश्वरंविश्वसृजांपरंगुरुं॥
सुनंदनंदाद्यनुगैर्वृतंमुदागृणन्प्रपेदेप्रयतःकृतांजलिः॥२५॥

हीत्वेतिपाठस्तुसुगमः॥ गृणन्स्तुवन्प्रपेदेशरणंजगाम। दक्षस्तुतिस्तद्दस्येत्राभ्रगुब्रह्मेंद्रयोषितः। ऋषयश्चतथासिद्धाः यजमानीचलोकपाः॥ योगिब्रह्माग्निदेवाश्चस्तुवंतिजगदीश्वरं। तथागंधर्वविद्याधब्राह्मणाश्चस्तुवंतियज्ञतेः॥२५॥ राम: २५

ननुसाक्षात्परमेश्वरएवरुद्रः तस्यब्रह्मपुत्रत्वेनजीवत्वमनुकारमात्रं। हंतकिमिति त्वयाभेददृष्ट्यासोवज्ञातइतिमांभगवानाक्षेप्स्यतीतिआशंक्य। अप्रच्युतस्वरूपस्यजीवधर्मनाद्यंतवेवसंगच्छतेनान्यस्येत्याह। शुद्धमिति। स्वधाम्निस्वस्वरूपेतिष्ठन्भवानस्तु द्वितीयांचिन्मात्रंचैतन्यघनः। शुद्धत्वेहेतुः उपरतानिरस्तानिवृत्ताअखिलाबुद्ध्यवस्थायस्मात्तत्। अतःएकंभेदशून्यं। अतएवअभयं

दक्षउवाच॥ ॥शुद्धंस्वधाम्न्युपरताखिलबुद्ध्यवस्थंचिन्मात्रमेकमभयंप्रतिषिध्यमायां॥ तिष्ठंस्तयैवपुरुषत्वमुपेत्यतस्यामास्तेभवानपरिशुद्धइवात्मतंत्रः॥२६॥

द्वैतयंभवतीतिश्रुतेः। जीवस्यापिवस्तुतएवंभूतत्वात्तद्देलक्ष्यार्थमुक्तं। मायांप्रतिषिध्यअभिभूयस्वतंत्रएवसन्तयामाययापुरुषत्वंमनुष्यनाट्यमुपेत्यतस्यांमायायांतिष्ठन्अपरिशुद्धइवरागादिमानिवास्ते। रामकृष्णादयवतारेतथाप्रतीयतइत्यर्थः। अन्येतावितोपाधयोमाययालिप्ताः संसरंति। अतस्त्वमेवश्वरोनरुद्रादयइतिभावः। अतएवमांभेददृष्टिंभगवान्वारयिष्यति अहंब्रह्मा च शर्वश्चजगतःकारणंपरमित्यादिना॥२६॥ ॥श्रीकृष्णःशरणंममेतिपरमोमंत्रोयमष्टाक्षरः॥ ॥६॥

भा० च०
२६

ऋत्विजोपिस्वापराधंपरिहरंतःस्तुवंति।भोअनंजनउपाधिमलशून्ययद्यपित्वमेवरुद्रादिदेवतारूपःतथापिनंदीश्वरशा
पात्कर्मण्येवअवग्रहधियःसंतस्त्वत्तत्त्वंनविद्मः।किंतुधर्मस्यापूर्वस्योपलक्षणभूतंत्रिवृत्त्रयीप्रतिपाद्यंअध्वराख्यंतव

ऋत्विज ऊचुः॥ ॥तत्त्वंनतेवयमनंजनरुद्रशापात्कर्मण्यवग्रहधियोभगवन्विदा
मः॥धर्मोपलक्षणमिदंत्रिवृदध्वराख्यंज्ञातंयदर्थमधिदैवमदोव्यवस्थाः॥२७॥

रूपमस्माभिर्ज्ञातंकीदृशंयदर्थंयस्यसिद्ध्येअधिदैवंदेवताधिकारेणअदोव्यवस्थाअमूर्त्येवस्थाःअत्रइयमेवदेवताना
न्यत्येवंस्तुतानियमाइत्यर्थः।यद्वाव्यवस्थाइत्याख्यातंअडागमाद्यभावआर्षःयदर्थंअरइदंइंद्राद्यधिदैवंरूपंविशेषेणा २६
स्थितवानसीत्यर्थः॥२७॥ ॥ ॥श्रीः॥ ॥ ॥कृष्णः॥ ॥ ॥शरणं॥ ॥ ॥मम

सदस्यास्तुनिरीश्वरेपिदक्षाध्वरेपिधनलोभेनस्वप्रवृत्तिमनुचिंत्यअनुतप्ताविरक्तिमाशासानाःस्तुवंति।हेशरणदआ
श्रयप्रदउत्पत्त्यध्वनिसंसारमार्गेवर्तमानोअज्ञानांसार्थःसमूहस्तेपादौकःतवपादरूपंनिवासंकदायास्यति।अशरणेविश्रा
मस्थानशून्ये।उरुक्लेशाएवदुर्गमस्थानानियस्मिन्।अंतकएवोग्राव्यालास्तैरन्विष्टेलक्षीकृते।विषयरूपामृगतृष्णिका

सदस्या ऊचुः॥ ॥उत्पत्त्यध्वन्यशरणउरुक्लेशदुर्गेंतकोग्रव्यालान्विष्टेविषयमृगतृष्ण्या
त्मगेहोरुभारः॥द्वंद्वश्वभ्रेखलमृगभयेशोकदावेज्ञसार्थःपादौकस्तेशरणदकदायातिकामो
पसृष्टः॥२८॥

यस्मिन्।आत्माहंकारास्पदंशरीरंममत्वास्पदंगेहंतत्सएवउरुर्भारोयस्यसः।द्वंद्वानिसुखदुःखादीन्येवश्वभ्राणिगर्ताय
स्मिन्।खलाएवमृगाःव्याघ्रादयस्तेभ्योभयंयस्मिन्।शोकएवदावाग्निर्यस्मिन्।कामेनोपसृष्टःपीडितः॥२८॥ ॥

श्रीरुद्रस्तत्पूर्वं मम निंदादुःसहासीत् इदानीं तु तां न गणयामीत्याह। तवेति। आशिषा कामेन असंतैर्निःकामैः रचितधियं अ
भिनिवेशितचित्तं अविद्यः विद्याहीनो लोकः यदि अपविद्धं जपति आ चारभ्रष्टं जल्पति तत् जल्पनं तवयः परानुग्रहः तत्पर
भिनिर्वशितचित्तं अविद्यः विद्याहीनो लोकः यदि अपविद्धं जपति आ चारभ्रष्टं जल्पति

रुद्र उवाच॥ ॥तव वरद वरांघ्रावाशिषेहाखिलार्थेह्यपि मुनिभिरसक्तैरादरेणार्हणीये॥ यदि रचित
धियं माविद्यलोको पविद्धं जपति न गणये तत्त्वत्परानुग्रहेण॥ २९ ॥ ॥भृगुरुवाच॥ ॥
यन्मायया गहनयापहृतात्मबोधा ब्रह्मादयस्तनुभृतस्तमसि स्वपंतः॥ नात्मन्श्रितं तव विदंत्यधुनापि त
त्त्वं सोयं प्रसीदतु भवान्प्रणतात्मबंधुः॥ ३० ॥

तां वायो नुग्रहस्तेन॥ २९ ॥ भृगुस्तु स्वभावतस्तत्त्वज्ञानहीना जीवा अतो ज्ञानकृतं मदुश्चेष्टितं क्षमस्वेत्याह। यन्मायये २७
ति। आत्मना आत्मनि स्थितं अनुगतं तव तत्त्वं न विदंति। प्रणतानां आत्मा बंधुश्च॥ ३०॥ ॥श्रीकृष्णाय नमः॥ ॥

ब्रह्मादयो न विदंतीति भृगुणोक्ते तदसहमानो ब्रह्मा तत्त्वज्ञानमाविष्कुर्वन्निवारनैतदिति। पदार्थभेदके ग्राहकैरिंद्रियै गुणस्य
इंद्रियस्य यद्वा ज्ञानार्थयोः कारणस्य सत्वादेः॥ ३१॥ इंद्रस्तु इंद्रियविषयः सर्वोपि मिथ्येति ब्रह्मणोक्तमसहमान आह। इदंन ३२
वपुरपि उपपन्नमेव न तु प्रपंचवदनिर्वचनीयतयानुपपन्नं। सुराणां विद्विषः क्षपयंतीति तथा तैर्भुजदंडैरुपलक्षितं ३२

ब्रह्मोवाच॥ ॥ नैतत्स्वरूपं भवतोसौ पदार्थभेदग्रहैः पुरुषो यावदीक्षेत्। ज्ञानस्य चार्थस्य गुणस्य
चाश्रयो मायामयाद्व्यतिरिक्तो यतस्त्वं॥ ३१॥ ॥इंद्र उवाच॥ ॥इदमप्यच्युत विश्वभावनं वपुरानं
दकरं मनोदृशां॥ सुरविद्विट्क्षपणैरुदायुधैर्भुजदंडैरुपपन्नमष्टभिः॥ ३२॥ ॥पत्न्य ऊचुः॥ य
ज्ञोयं तव यजनाय केन सृष्टो विध्वस्तः पशुपतिनाद्य दक्षकोपात्॥ तं नस्त्वं शवशयनाभशांतमे
धं यज्ञात्मन्नलिनरुचा दृशा पुनीहि॥ ३३॥ मेति संबोधनं वा।३३॥

ऋत्विजां पत्न्य स्तु वंति। यज्ञोयं तव यजनाय त्वां यष्टुं केन ब्रह्मणा पूर्वं सृष्टः। हे यज्ञात्मन्। तं नो यज्ञं नलिनकांत्याद
शा नेत्रेण पुनीहि पवित्रं कुरु। कथंभूतं यज्ञं। शवाः शेरते यस्मिन्निति शवशयनं श्मशानं तद्वदाभा प्रतीतिर्यस्य
स वासौ शांतमेधश्च उपरतोत्सवः मेधशब्देन पशुहिंसाद्युत्सवो लक्ष्यते। शवमुदकं तत्र शेते इति तथा पयंतन्ना

ऋषयस्तु कर्माण्यनुतिष्ठंतस्तैस्तु पुण्येन तत्फले न च युज्यंते भगवति तु तदभावमालक्ष्य विस्मिताः स्तुवंति। अनन्वितं
अघटमानं। यद्यस्मात् आत्मना स्वयं कर्म आचरसि अनुतिष्ठसि। न त्वज्यसे लिप्यसे। यतश्च अन्ये विभूतये संपदे ईश्व
रीं लक्ष्मीं उपसेदुः भेजुः। यद्वा यत इति सार्वविभक्तिकस्तसिः यामित्यर्थः। भवांस्तु स्वयमेवानुवर्तमानां तां नानुम
न्यते नाद्रियते॥ ३४॥ सिद्धास्तु त्वत्कथासुखमभिनंदंतः स्तुवंति। अयं नो मनोगजः त्वत्कथैव मृष्टं शुद्धं पीयूषं तन्म

ऋषय ऊचुः॥ ॥अनन्वितं ते भगवन्विचेष्टितं यदात्मना चरसि हि कर्म नाज्यसे। विभूतये यत उपसेदु
रीश्वरीं न मन्यते स्वयमनुवर्ततीं भवान्॥ ३४॥ ॥सिद्धा ऊचुः॥ ॥अयं त्वत्कथामृष्टपीयूषनद्यां
मनोवारणः क्लेशदावाग्निदग्धः। तृषार्तोऽवगाढो न सस्मार दावं न निष्क्रामति ब्रह्मसंपन्नवन्नः॥
३५॥ यजमान्युवाच॥ ॥स्वागतं ते प्रसीदेश तुभ्यं नमः श्रीनिवास श्रिया कांतया त्राहि नः। त्वामृ
ते धीश नांगैर्मखः शोभते शीर्षहीनः कबंधो यथा पूरुषः॥ ३६॥ ×नः श्रिया सह त्रायस्व त्वद्
कांतु [illegible] ३६॥×

य्यां नदी तस्यां अवगाढः प्रविष्टः दावाग्नितुल्यं संसारतापं न संस्मरति न च ततो निर्गच्छति। ब्रह्मसंपन्नवन्नः ब्रह्मले २८
कं प्राप्त इव॥ ३५॥ यजमानी दक्षपत्नी स्तौति। ते स्वागतं भद्रमागमनं जातं। हे अधीश यथा शिरसा रहितः कबं
धनामा नः पूरुषांगैः करचरणाद्यवयवैः शोभनैरपि न शोभते। तथा त्वां विना केवलं प्रयाजाद्यंगैर्मखो न शोभते अतो

लोकपालास्त्वीश्वरत्वाभिमानारूढा भगवतस्तत्त्वमपश्यंत ऊचुः। दृष्टः किं न दृष्ट इत्यर्थः। कुतः असद्ग्रहैः पुंस्त्वमा[illegible]लिंगत्वा
दसत्प्रकाशरूपाभिर्दृग्भिरिंद्रियैः। अयं भावः शुद्धसत्त्वानां त्वं शुद्धसत्त्वमूर्तिर्भासि। अस्माकं तु बहिर्मुखेंद्रियाणां पंचभूतो
पलक्षितो जीवविशेष इवाभासि अतस्त्वमस्मदिंद्रियगोचरो न भवसि धिगस्मज्जीवितमिति॥ ३७॥ योगेश्वरास्तु अभेदेन

लोकपाला ऊचुः॥ दृष्टः किं नो दृग्भिरसद्ग्रहैस्त्वं प्रत्यग्द्रष्टा दृश्यते येन विश्वं॥ माया ह्येषा भवदीया हि
भूमन्यस्त्वं षष्ठः पंचभिर्भासि भूतैः॥ ३७॥ ॥योगेश्वरा ऊचुः॥ ॥प्रेयान्न तेऽन्योऽस्त्यमुतस्त्वयि प्रभो वि
श्वात्मनीक्षेन्न पृथग्य आत्मनः॥ अथापि भक्त्येश तयोपधावतामनन्यवृत्त्यानुगृहाण वत्सल॥ ३८

×वत्सल भक्तप्रिय॥ अनन्यवृत्त्या भक्त्या अव्यभिचारिभक्त्या भजतोऽनुगृहाणेत्यर्थः॥×३८॥ ॐ नमो नारायणाय
भजतामनुग्रहभाक्त्वं मन्यमानाः स्वामिभृत्यभावेन भजतामप्यनुग्रहं प्रार्थयमानाः स्तुवंति॥ प्रेयानिति द्वाभ्यां।
विश्वात्मनि परब्रह्मणि त्वयि य आत्मनः पृथक्त्वं नेक्षेत अमुतः अमुष्मात्ते प्रेष्ठो नास्ति। आत्मनो जीवात्पृथक् नेक्षेतेति वा।
×दन्यः×

अव्यभिचारिणी भक्तिः कथं स्यात्। भजनीयानां बहुत्वादित्याशंक्याहुः॥ जगदुद्भवादिषु निमित्तेषु दैवतः क्रीडादृष्टात् बहुधा भिद्यमा
ना गुणा यस्याः तया स्वमायया आत्मनि स्वस्वरूपे रचिता ब्रह्मादिभेद[illegible]मतिर्येन तस्मै। स्वसंस्थया केवलस्वरूपास्थानेन स्वनिवर्तिता
भेदभ्रमो गुणाश्च तद्भूतेव आत्मनि येन तस्मै॥ ३९॥ शब्दब्रह्म स्तौति। नमस्ते इति श्रितं स्वीकृतं सत्त्वं येन। अतः भक्त्यादिफल
प्रसवित्रे। सत्त्वगुणत्वे निर्गुणत्वं चैकस्य कथमित्याशंक्याह। यस्य काष्ठां न त्वं नाहं वेद्मि। अपरे ब्रह्मादयश्च न विदुः तस्मै॥ ४०

जगदुद्भवस्थितिलयेषु दैवतो बहुभिद्यमानगुणयात्ममायया॥ रचितात्मभेदमतये स्वसंस्थया विनिव
र्तितभ्रमगुणात्मने नमः॥ ३९॥ ॥ब्रह्मोवाच॥ नमस्ते श्रितसत्त्वाय धर्मादीनां च सूतये॥ निर्गुणाय च
यत्काष्ठां नाहं वेद्मि परेपि च॥ ४०॥ ॥अग्निरुवाच॥ ॥ यत्तेजसाहं सुसमिद्धतेजा हव्यं वहे स्वध्वर आज्य
सिक्तं॥ तं यज्ञियं पंचविधं च पंचभिः स्विष्टं यजुर्भिः प्रणतोस्मि यज्ञं॥ ४१॥ [illegible] ॥

x विष्णुः प्रसीदतु॥ ४१॥ x

अग्निस्तस्य यज्ञमूर्तिं प्रणमति॥ यस्य तेजसाहं सुसमिद्धतेजाः सुष्ठु समिद्धं तेजो यस्य प्रशस्ते अध्वरे हविर्वहामि। तं यज्ञियं यज्ञाय हितं
पालकं यज्ञं यज्ञमूर्तिं पंचविधत्वं तैत्तिरेयक उक्तं। स एष यज्ञः पंचविधोग्निहोत्रं दर्शपूर्णमासौ चातुर्मास्यानि पशुः सोम इति। पंच
भिर्यजुर्भिर्यज्ञमंत्रैः सुस्विष्टं सुपूजितं। तथा च श्रुतिः॥ आश्रावयेति चतुरक्षरमस्तु श्रौषडिति चतुरक्षरं यजेति द्व्य
क्षरं ये यजामहे इति पंचाक्षरं। द्व्यक्षरो वषट्कार इति। स्मृतिश्च॥ चतुर्भिश्च चतुर्भिश्च द्वाभ्यां पंचभिरेव च॥ हूयते च पुनर्द्वाभ्यां स मे

२९

देवास्तु सत्यं वयमिति देवाः तथापि जगदाद्यंतयोस्त्वमेव नान्यः कश्चिदित्याहुः पुरेति॥ कल्पापाये विहृतं कार्यं जातं उरीकृत्य
संहृत्य त्वमेवाद्यः पुमान् उरगेंद्र एव अधिकं शायनं शय्या तस्मिन् शेषे शयनं करोषि॥ सिद्धैर्निर्लोकादिवा x दे x सिभि
र्विमृशिता विविंचिता अध्यात्मपदवी ज्ञानमार्गो यस्य। स एव त्वं यदिदानीमक्ष्णोः पथि चरसि प्रत्यक्षोसि। अत्र वसि

॥ देवा ऊचुः॥ पुरा कल्पापाये स्वकृतमुदरीकृत्य विकृतं त्वमेवाद्यस्तस्मिन्सलिल उरगेंद्रा
धिशयने॥ पुमाञ्छेषे सिद्धैर्हृदि विमृशिताध्यात्मपदविः स एवाद्याक्ष्णोर्यः पथि चरसि भृत्यानव
सिनः॥ ॥ गंधर्वा ऊचुः॥ ॥ अंशांशास्ते देव मरीच्यादय एते ब्रह्मेंद्राद्या देवगणा रुद्रपुरोगाः॥
क्रीडाभांडं विश्वमिदं यस्य विभूमन् तस्मै नित्यं नाथ नमस्ते करवाम॥ ४२॥ ॥ ४३॥ ॥

त्वमेव तु परमेश्वर अ
रक्षसि॥ ४२॥ गंधर्वाप्सरसस्तु वयं प्रिया केवलं सर्वानपि परमेश्वरत्वेनोपश्लोकयामः त्वमेव तु परमेश्वर अ
अन्ये तु त्वदंशा एवेत्याहुः॥ अंशांशा इति हे विभूमन् महत्तम क्रीडाभांडं क्रीडोपकरणं विश्वं ब्रह्मांडं यस्य तस्मै ते न
मनं कुर्मः॥ ४३॥

विद्याधरास्तु केवलं विद्याभिः संपदः प्राप्यंते अहंकारादिव्यामोहनिवृत्तिस्तु त्वत्कथाश्रवणं विना नास्तीत्याहुः
अर्थपुरुषार्थसाधनं कलेवरं अभिपद्य प्राप्य। त्वन्मायया अस्मिन्ममेत्यहमिति चाभिमानं कृत्वा इममात्ममोहयु

॥ ॥विद्याधरा ऊचुः॥ ॥त्वन्माययार्थमभिपद्य कलेवरेस्मिन् कृत्वा ममाहमिति दुर्मतिरु
त्पथैः स्वैः॥ क्षिप्तोप्यसद्विषयलालस आत्ममोहं युष्मत्कथामृतनिषेवक उद्व्युदस्येत्॥४४
ब्राह्मणा ऊचुः॥ ॥त्वं क्रतुस्त्वं हविस्त्वं हुताशः स्वयं त्वं हि मंत्रः समिद्दर्भपात्राणि च ॥
त्वं सदस्यर्त्विजो दंपती देवता अग्निहोत्रं स्वधा सोम आज्यं पशुः॥ ४५॥ ॥श्रीकृष्ण॥

युष्मत्कथामृतनिषेवकः। उत उच्चैर्व्युदस्येत्परित्यजेत् नान्यः न नुस्वैः पुत्रादिभिरधिक्षिप्तो दुःखितः सन् ३०
परिस्मिन्ने देवने त्याहुः॥ क्षिप्तोपि दुर्मतिः॥ असत्सु विषयेष्वेव लालसा तृष्णा यस्य सः॥४४॥ ब्राह्मणास्तु
वंति त्वमिति त्रिभिः॥ सदस्याश्च ऋत्विजश्च॥ ४५॥

गां पृथ्वीं रसायाः रसातलात् दंष्ट्रया व्युज्जहर्थ विशेषेणोद्धृतवानसि। योगिभिः स्तूयमानः हे त्रयीगात्र वेदमूर्ते यज्ञो
याग: स यूपस्तद्विशेषः क्रतुस्तद्रूपी यज्ञसंकल्परूप इति वा यज्ञः क्रतुः कर्म यस्येति वा ४६ स त्वमस्माकं त्वद्दर्श
नमाकांक्षतां प्रसीद अस्मद्यत्नं मप्युद्धरेत्यर्थः। न वाशक्यं तत्र वेतन रूपं तत्स्तवनाम्नि कीर्त्यमाने एव यज्ञविघ्नाः क्षयं यां

त्वं पुरा गां रसाया महासूकरो दंष्ट्रया पद्मिनीं वारणेंद्रो यथा स्तूयमानो नदल्लीलया योगिभिर्व्युज्जहर्थ त्र
यीगात्र यज्ञक्रतुः ४६ स प्रसीद त्वमस्माकमाकांक्षतां दर्शनं ते परिभ्रष्टसत्कर्मणां कीर्त्यमाने नृभिर्ना
म्नि यज्ञेश ते यज्ञविघ्नाः क्षयं यांति तस्मै नमः ४७ मैत्रेय उवाच इति दक्षः कविर्यज्ञं भद्र रुद्राभिम
र्शितं कीर्त्यमाने हृषीकेशे सन्निन्ये यज्ञभावने ४८ भगवान्स्वेन भावेन सर्वात्मा सर्वभागभुक् दक्षं ब
भाष आभाष्य प्रीयमाण इवानघ ४९ भगवानुवाच अहं ब्रह्मा च शर्वश्च जगतः कारणं परं आ
त्मेश्वर उपद्रष्टा स्वयंदृगविशेषणः ५० श्रीवासुदेवाय नमः

ति। एवं प्रभावो यस्य तस्मै नमः ४७ इत्यनेन प्रकारेण सर्वैः कीर्त्यमाने हे भद्र अविदुर संनिन्ये प्रवर्तयामास ४८
सर्वात्मतया सर्वभागभोक्तापि भगवान् निजानंदतृप्तोपि स्वेन भागेन त्रिकपालपुरोडाशेन प्रीयमाण इव दक्षं
माभाष्य संबोध्य बभाषे ४९ योहं जगतः कारणं आत्मा ईश्वरश्च उपद्रष्टा साक्षी स्वप्रकाशश्च निरुपाधि
श्च स एव ब्रह्मा च शर्वश्चेत्यन्वयः ५०

भा० ४० कुत इत्यत आह। अहमेवात्ममायया मामधिष्ठाय जगत्सृष्ट्यादि कुर्वन् सर्वशक्तियोजितां संज्ञां धारयामि ५१ त
३१ स्मिन् केवले अद्वितीये समानासमानजातीयभेदरहिते ब्रह्मणि मयि ब्रह्मरुद्रौ भूतानि च भेदेनाज्ञः पश्यतीत्यर्थः
५२ विद्वांस्तु भेदं न पश्यतीति सदृष्टान्तमाह ५३ तस्मादेवमैक्यं पश्यन् कृतार्थो भवतीत्याह ५४ त्रयाणामेको

आत्ममायां समाविश्य सोहं गुणमयीं द्विज सृजन्रक्षन्हरन्विश्वं दध्रे संज्ञां क्रियोचितां ५१ तस्मिन्ब्रह्मण्य
द्वितीये केवले परमात्मनि ब्रह्मरुद्रौ च भूतानि भेदेनाज्ञोनुपश्यति ५२ यथा पुमान्न स्वांगेषु शिरःपा
ण्यादिषु क्वचित् पारक्यबुद्धिं कुरुते एवं भूतेषु मत्परः ५३ त्रयाणामेकभावानां यो न पश्यति वै भिदां स
र्वभूतात्मनां ब्रह्मन् स शांतिमधिगच्छति ५४ मैत्रेय उवाच एवं भगवतादिष्टः प्रजापतिपतिर्ह राम
रिं अर्चित्वा क्रतुना स्वेन देवानुभयतोयजत् ५५ रुद्रं च स्वेन भागेन ह्युपाधावत्समाहितः कर्मणोदव ३१
सानेन सोमपानितरानपि ५६ उदवस्य सहर्त्विग्भिः सस्नाववभृथं ततः तस्मा अप्यनुभावेन स्वेनैवा
वाप्तराधसे धर्म एव मतिं दत्वा त्रिदशास्ते दिवं ययुः ५७ एवं दाक्षायणी हित्वा सती पूर्वकलेवरं
जज्ञे हिमवतः क्षेत्रे मेनायामिति शुश्रुम ५८

भावः स्वरूपं येषां ५४ स्वेन क्रतुना त्रिकपालेष्ट्यानुभयतः अंगैः प्रधानेन च ५५ स्वेन भागेन यज्ञावशिष्टेन
उदवस्य तं समाप्य तेनैनेत्युदर्कं तेन कर्मणा सोमपानितरानपि उपाधावदित्यनुषंगः ५६ ततश्च उदव
स्य कर्म समाप्य अवभृथरूपं यथा भवति तथा स्नातवान् स्वेनैवानुभावेनाप्तराधसे प्राप्तसिद्धये तस्मा अपि ५७ ५८
वसा२

आचंक्षत भजते स्म। अनन्यभावा नामैकैव गतिः। यस्तं प्रलयकाले सुप्ता शक्तिरीश्वरमिव ५९। बृहस्पतेः शिष्यात् मया श्रुतं। ६० प
रं पवित्रं यस्मात् एवं तथानुकीर्तयेत्स आत्मनः परस्यापि। अघं संसारव्यसनं सर्वदा धुनोति। ६१॥ ॥ इति श्रीचतुर्थे सप्तमः
दक्षकन्यान्वये प्राप्ताद्दक्षयज्ञकथोदिता। मनुपुत्रान्वये प्राप्ता ध्रुववर्यास्य पंचभिः॥१॥ अष्टमे गुरुदारोक्तिरोषमत्सरतः

तमेव दयितं भूय आवृंक्ते पतिमंबिका॥ अनन्यभावैकगतिं शक्तिः सुप्तेव पूरुषं॥५९॥ एतद्भगवतः शंभोः कर्म दक्ष
स्याध्वरद्रुहः॥ श्रुतं भागवताच्छिष्यादुद्धवान्मे बृहस्पतेः॥ ६०॥ इदं पवित्रं परमीशचेष्टितं यशस्यमायुष्यमघौघ
मर्षणं॥ यो नित्यदाकर्ण्य नरोनुकीर्तयेद्धुनोत्यघं कौरव भक्तिभावतः॥६१॥ ॥ इति श्रीभागवते
महापुराणे चतुर्थस्कंधे दक्षयज्ञसंधानं नाम सप्तमोध्यायः॥ ॥ श्रीमैत्रेय उवाच॥ ॥ सनकाद्या
नारदश्च ऋभुर्हंसोऽरुणिर्यतिः॥ नैते गृहान्ब्रह्मसुता ह्यावसन्नूर्ध्वरेतसः॥ १॥ मृषाधर्मस्य भार्या
सीद्दंभं मायां च शत्रुहन्॥ असूत मिथुनं तत्तु निर्ऋतिर्जगृहेऽप्रजः॥ २॥ ४ एवमुपर्यपि। अप्रजः अपुत्रः॥ २ ×
पुरात्॥ निर्गतेन ध्रुवेण हतपसा तोषणं हरेः॥ ४॥ एवं तावन्मनुकन्यान्वयो तत्रैव मरीच्यादीनां ब्रह्मपुत्राणां वंशाः वर्णि
ताः। तत्रावशिष्टं किंचिदाह। सनकाद्या इति नावसन्नाश्रिताः ऊर्ध्वरेतसो नैष्ठिकाः अतस्तेषां वंशो नास्ति॥१॥ अधर्मोपि ब्र
ह्मपुत्रस्तस्य वंशमाह। मृषेति चतुर्भिः। दंभः परप्रतारणं। माया तदुचिता चेष्टा तयोः सोदरयोरपि दांपत्यमधर्मांशतया

निकृतिः शठता। यत्तयाम्यां कलिश्च। तस्य स्वसा दुरुक्तिश्चेत्यर्थः॥ ३॥ यातना तीव्रवेदना॥ ४॥ प्रतिसर्गो नुसर्ग एव। यद्वा प्रतिसर्गः
निकृतिः शठता। यत्तयाम्यां कलिश्च। तस्य स्वसा दुरुक्तिश्चेत्यर्थः। एतमधर्मवंशं पुण्यमिति वर्जनाद्वारा पुण्यहेतुत्वात्॥ ५॥ मनोः पुत्रवंशं
प्रलयः॥ अधर्मस्य प्रलयहेतुत्वात् प्रतिसर्गत्वं एतमधर्मवंशं पुण्यमिति वर्जनाद्वारा पुण्यहेतुत्वात्

दुरुक्तौ कलिरा
तयोऽसमभवल्लोभो निकृतिश्च महामते॥ ताभ्यां क्रोधश्च हिंसा च यद्दुरुक्तिः स्वसा कलिः॥ ३॥
तयोऽसमभवल्लोभो निकृतिश्च महामते॥ ताभ्यां क्रोधश्च हिंसा च यद्दुरुक्तिः स्वसा कलिः॥ ३॥ दुरुक्तौ कलिरा
धत्त भयं मृत्युं च सत्तम। तयोश्च मिथुनं जज्ञे यातना निरयस्तथा॥ ४॥ संग्रहेण मया ख्यातः प्रतिसर्गस्तवा
नघ। त्रिः श्रुत्वैतत् पुमान् पुण्यं विधुनोत्यात्मनो मलं॥ ५॥ अथातः कीर्तये वंशं पुण्यकीर्तेः कुरूद्वह॥ स्वा
यंभुवस्यापि मनोर्हरेरंशांशजन्मनः॥ ६॥ प्रियव्रतोत्तानपादौ शतरूपापतेः सुतौ॥ वासुदेवस्य कलया
रक्षायां जगतः स्थितौ॥ ७॥ जाये उत्तानपादस्य सुनीतिः सुरुचिस्तयोः॥ सुरुचिः प्रेयसी पत्युर्नेतरा यत्सु
तो ध्रुवः॥ ८॥ एकदा सुरुचेः पुत्रमंकमारोप्य लालयन्॥ उत्तमं नारुरुक्षन्तं ध्रुवं राजाभ्यनंदत॥ ९॥ तथा
चिकीर्षमाणं तं सपत्न्यास्तनयं ध्रुवं। सुरुचिः शृण्वतो राज्ञः सेर्ष्यमाहातिगर्विता॥ १०॥

३२

हरेरंशो ब्रह्मा तस्यांशाद्दृह्मा जन्म यस्य च। जगतो रक्षायां स्थितौ। ७। सुनीतिः सुरुचिश्च जाये तयोर्मध्ये। ८। तयोः प्रिया प्रिये
प्रपंचयन् ध्रुवचरित्रमाह पंचाध्यायैः। सुरुचेः पुत्रमुत्तमसंज्ञं लालयन्। ९। तथा अंकारोहणं चिकीर्षमाणं॥ १०॥ ॥

गर्वोक्तिमेवाह त्रिभिः। नेति। नृपतेर्धिष्ण्यमासनं नृपात्मजोऽपि भवान्नारोढुमर्हति। ११। १२। पुरुषमीश्वरं। १३। मिषंतं पश्यंतं सन्न
वास्यं कुंठितवावं। १४। उद्धृत्य आरोप्य। अंतःपुरजनमुखाच्छ्रुत्वा। १५। शोकरोदवद्दावाग्निस्तेन दवाग्निनालतेव स्थिता सा बाला विलापं
चकार। १६। वृजिनस्य दुःखस्य। अमंगलमपराधं परेषु मामंस्थाः। यद्यतः परेभ्यो दुःखं ददातीयः स स्वदत्तमेव दुःखं भुंक्ते। १७

३३

न वत्स नृपतेर्धिष्ण्यं भवानारोढुमर्हति। न गृहीतो मया यत्त्वं कुक्षावपि नृपात्मजः॥ ११॥ बालोऽसि बत ना
त्मानमन्यस्त्रीगर्भसंभृतं। नूनं वेद भवान्यस्य दुर्लभेऽर्थे मनोरथः॥ १२॥ तपसाराध्य पुरुषं तस्यैवानुग्रहेण
मे। गर्भे त्वं साधयात्मानं यदीच्छसि नृपासनं॥ १३॥ ॥श्रीमैत्रेय उवाच॥ ॥मातुः सपत्न्याः सुदुरुक्तिवि
द्धः श्वसन्रुषा दंडहतो यथाहिः॥ हित्वा मिषंतं पितरं सन्नवाचं जगाम मातुः प्ररुदन्सकाशं॥ १४॥ तं निः
श्वसंतं स्फुरिताधरोष्ठं सुनीतिरुत्संग उदूह्य बालं। निशम्य तत्पौरमुखान्नितांतं सा विव्यथे यद्गदितं सप
त्न्याः॥ १५॥ सोत्सृज्य धैर्यं विललाप शोकदावाग्निना दावलतेव बाला। वाक्यं सपत्न्याः स्मरती सरोजश्रिया दृशा
बाष्पकलामुवाह॥ १६॥ दीर्घं श्वसंती वृजिनस्य पारमपश्यती बालकमाह बाला। मामंगलं तात परेषु मंस्था
भुंक्ते जनो यत्परदुःखदस्तत्॥ १७॥ सत्यं सुरुच्याभिहितं भवान्मे यद्दुर्भगाया उदरे गृहीतः। स्तन्येन वृद्ध
श्च विलज्जते यां भार्येति वा वोढुमिडस्पतिर्मां॥ १८॥ x वा शब्दाद्दासीत्यपि॥ १८॥ x
दुर्भगया मया उदरे गृहीतः। तस्या एव स्तन्येन वृद्धश्च दुर्भगत्वमेवाह। यां मामिडस्पतिर्भूपतिर्भार्येति वोढुं स्वीकर्तुं विलज्जते

पित्नं भार्यात्वेन समामा त्रा मातुः सपत्नीतया पियद्रुक्तं तपसाराध्य पुरुषमित्यादि तत्र आतिष्ठ कुरु। अध्यासनं यदीछसि।१८
परिस्विर्यं निषेव्य। विश्वस्य विभावनाय पालनाय। आत्तस्वीकृता गुणाभिपत्तिः सत्वगुणाधिष्ठानं येन तस्य अंघ्रिं आत्मामनः
प्रसनः प्राणाश्च येः तैरभिवंद्यं।।२०।। एकमत्यासर्वांतर्यामिदृष्ट्या।।२१।। मृग्यापदाब्जयोः पद्धतिर्मार्गो यस्य तमेवाश्रयशरणं

आतिष्ठ तत्तात विमत्सरस्त्वमुक्तं समात्रापि यदव्यलीकं। आराधयाधोक्षजपादपद्मं यदीछसेध्यासनमु
त्तमो यथा।।१९।। यस्यांघ्रिपद्मं परिचर्य विश्वविभावनायात्तगुणाभिपत्तेः। अजोध्यतिष्ठत्खलु पारमेष्ठ्य
पदं जितात्मश्वसनाभिवंद्यं।।२०।। तथा मनुर्वो भगवान्पितामहो यमेकमत्या पुरुदक्षिणैर्मखैः।।
इष्ट्वाभिपेदे दुरवापमन्यतो भौमं सुखं दिव्यमथापवर्ग्यं।।२१।। तमेव वत्साश्रय भृत्यवत्सलं मुमुक्षुभिर्मृ
ग्यपदाब्जपद्धतिं।। अनन्यभावे निजधर्मभाविते मनस्यवस्थाप्य भजस्व पूरुषं।।२२।। नान्यं ततः प
द्मपलाशलोचनाद्दुःखच्छिदं ते मृगयामि कंचन।। यो मृग्यते हस्तगृहीतपद्मया श्रियेतरैरंग विमृ
ग्यमाणया।।२३।। ।।श्रीमैत्रेय उवाच।। ।। एवं संजल्पितं मातुराकर्ण्यार्थागमं वचः।। संनियम्या
त्मनात्मानं निश्चक्राम पितुःपुरात्।।२४।। नारदस्तदुपाकर्ण्य ज्ञात्वा चास्य चिकीर्षितं। स्पृष्ट्वा मूर्द्धन्यघघ्ने ३३
X णपाणिना प्राह विस्मितः।।२५।। भाविते शोभिते।।२२।। तमेवं वृत्येनेनस्व
व्रजततो भजस्व। नान्यस्मिन्भावो यस्य तस्मिन्निर्बंध
वितं सर्वांतर्यामित्वं प्रपंचयति नान्यमिति। हस्तगृहीतं दीपवत्पद्मं यया। इतरैर्ब्रह्मादिभिः।।२३।२४। संजल्पितं विलापितं ततः अर्थस्यागमो
यस्मात्तथाभूतं वच आकर्ण्य।।२५।। ।

विस्मितः इत्युक्तं तदेवाह। अहो तेजः प्रभावः।२६। स्वच्छया विकल्पे मानापमानविवेके सत्यपि भिन्नान संति। किंतु मोहकल्पिता एव तं
इत्यर्थः। कुतः यत्सुखं दुःखं वा तन्निजकर्मभिरेव भवति यतः।२८। उपशमोपदेशेनानिवर्तयति परितुष्येदिति षड्भिः ईश्वरग
तिं वीक्ष्य ईश्वरानुकूल्यं विना नोद्यमाः फलहेतवः इति ज्ञात्वा।२९। दुष्करश्चातव समुद्यम इत्याह अथेति द्वाभ्यां। यस्य प्र

अहो तेजः क्षत्रियाणां मानभंगममृष्यतां। बालोप्ययं हृदा धत्ते यत्समातुरसद्वचः।।२६।। ।।श्रीनारदउः
नाधुनाप्यवमानं ते सन्मानं नापि पुत्रक। लक्षयामः कुमारस्य सक्तस्य क्रीडनादिषु।।२७।। विकल्पे
विद्यमानेपि न ह्यसंतोषहेतवः।। पुंसो मोहमृते भिन्ना यल्लोके निजकर्मभिः।।२८।। परितुष्येत्त
तस्तात तावन्मात्रेण पूरुषः।। दैवोपसादितं यावद्वीक्ष्येश्वरगतिं बुधः।।२९।। अथ मात्रोप
दिष्टेन योगेनावरुरुत्ससि।। यत्प्रसादं स वै पुंसां दुराराध्यो मतो मम।।३०।। मुनयः पदवीं यस्य निः
संगेनोरुजन्मभिः।। न विदुर्मृगयंतोपि तीव्रयोगसमाधिना।।३१।। अतो निवर्ततामेष निर्बंधः
स्तव निष्फलः।। यतिष्यति भवान्काले श्रेयसां समुपस्थिते।।३२।। X श्रेयसां काले कृद्धत्वे।।३२

मार्गं न विदुः स देवो दुराराध्यः।३१।
सादमवरोद्धुं प्राप्तुमिच्छसि।३०। निःसंगेन तीव्रयोगयुक्तेन समाधिना मृगयंतोपि यस्य पदवीं मार्गं न विदुः स देवो दुराराध्यः।३१।

सुखदुःखयोर्मध्ये। सुखे सति पुण्यं क्षीयते इति दुःखे सति पापं क्षीयत इत्यात्मानं तोषयन् तमसः पारं मोक्षं प्राप्नोति। ३३। किंच
 गुणैरधिकात्पुंस इतिल्यब्लोपे पंचमी। तं दृष्ट्वा प्रीतिं कुर्यात् न तु असूयामित्यर्थः। अनुक्रोशं कृपां लिप्सेत न तु तिरस्कारं। समा

यस्य यद्दैवविहितं स तेन सुखदुःखयोः॥ आत्मानं तोषयन्देही तमसः पारमृच्छति॥ ३३॥ गुणाधि
कान्मुदं लिप्सेदनुक्रोशं गुणाधमात्॥ मैत्रीं समानादन्विच्छेन्न तापैरभिभूयते॥ ३४॥ ध्रुव उवाच
सोऽयं शमो भगवता सुखदुःखहतात्मनां॥ दर्शितः कृपया पुंसां दुर्दर्शोऽस्मद्विधैस्तु यः॥ ३५॥ अ
थापि मेऽविनीतस्य क्षात्रं घोरमुपेयुषः॥ सुरुच्या दुर्वचोबाणैर्न भिन्ने श्रयते हृदि॥ ३६॥ पदं
त्रिभुवनोत्कृष्टं जिगीषोः साधु वर्त्म मे॥ ब्रूह्यस्मत्पितृभिर्ब्रह्मन्नन्यैरप्यनधिष्ठितं॥ ३७॥
नूनं भवान्भगवतो योऽङ्गजः परमेष्ठिनः॥ वितुदन्नटते वीणां हिताय जगतोऽर्कवत्॥ ३८॥ इत्यु
दाहृतमाकर्ण्य भगवान्नारदस्तदा॥ प्रीतः प्रत्याह तं बालं सद्वाक्यमनुकंपया॥ ३९॥ श्रीराम
X वान्। तत्र वीणां वितुदन् वादयन् हिताय अटति॥ ३८॥ ३९॥ X

नात् मैत्रीं न तु स्पर्द्धां॥ ३४॥ ३५॥ क्षात्रं स्वभावं प्राप्तवतः अत एव अविनीतस्य दुर्वाक्यबाणैर्भिन्ने हृदि न श्रयते न तिष्ठति। ३६
अन्यैरनधिष्ठितं त्रिभुवने उत्कृष्टं पदं जेतुमिच्छोर्मे साधु वर्त्म मार्गं ब्रूहि। ३७ अंकज इति पाठे उत्संगाज्जातो येन नारदः सभ

निःश्रेयसस्य अभिप्रेतार्थस्य पंथाः कोसावित्यत आह। भगवान्वासुदेवः अत एव तं भज त्वं ४०॥ ४१ मधुवनाख्यं तटं गच्छ। यत्र मधुवने ४२॥ अ
ध्ययनाद्यवस्थावेपि आत्मन उचितानि योग्यानि दैवतानमस्कारादीनि कृत्वेति यमनियमा उक्ताः। आसनकल्पनं तु कुशाभिरिदं स्वस्तिका
दिभिश्च। ४३। प्राणेंद्रियमनसां मलं दोषं व्युदस्येति। प्राणायाम प्रत्याहारो। धारणामाह। अभिध्यायेदिति षड्भिः गुरुणा धीरेण मनसा

श्रीनारद उवाच॥ ॥ जनन्याभिहितः पंथाः स वै निःश्रेयसस्य ते। भगवान्वासुदेवस्तं भज तत्प्रवणात्मना॥ ४०॥
धर्मार्थकाममोक्षाख्यं य इच्छेच्छ्रेय आत्मनः। एकं ह्येव हरेस्तत्र कारणं पादसेवनं॥ ४१॥ तत्तात गच्छ भद्रं ते यमुना
यास्तटं शुचि। पुण्यं मधुवनं यत्र सान्निध्यं नित्यदा हरेः॥ ४२॥ स्नात्वानुसवनं तस्मिन्कालिंद्याः सलिले शिवे।
कृत्वोचितानि निवसन्नात्मनः कल्पितासनः॥ ४३॥ प्राणायामेन त्रिवृता प्राणेंद्रियमनोमलं॥ शनैर्व्युदस्या
भिध्यायेन्मनसा गुरुणा गुरुं॥ ४४॥ प्रसादाभिमुखं शश्वत्प्रसन्नवदनेक्षणं॥ सुनासं सुभ्रुवं चारुक
पोलं सुरसुंदरं॥ ४५॥ तरुणं रमणीयांगमरुणोष्ठेक्षणाधरं। प्रणताश्रयणं नृम्णं शरण्यं करुणार्णवं।
॥ ४६॥ श्रीवत्सांकं घनश्यामं पुरुषं वनमालिनं॥ शंखचक्रगदापद्मैरभिव्यक्तचतुर्भुजं॥ ४७॥ कि
रीटिनं कुंडलिनं केयूरवलयान्वितं। कौस्तुभाभरणग्रीवं पीतकौशेयवाससं॥ ४८॥ X रणं ग्रीवा यस्य। ४७। ४८। X
गुरुं श्रीहरिं। ४४। सुरेषु सुंदरं। ४५। रमणीयान्यंगानि यस्य अोष्ठश्च ईक्षणे च ईक्षणं च अरुणे ओष्ठे क्षणे धारयतीति तथा तं। अरुणं ओष्ठ
मीक्षणं वा धारयतीति वा। नृम्णं सुखकरं यद्वा नृम्णं धनं सर्वपुरुषार्थनिधिमित्यर्थः। ४६। पुरुषं पुरुषलक्षणैर्युक्तं कौस्तुभ आभरणं

कांचीकलापेन पर्यस्तं परिवेष्टितं। मनोनयनयोर्वर्द्धनं हर्षकरं ४९ हृत्पद्मकर्णिकायां धिष्ण्यं मध्यस्थानं तदाक्रम्य समर्वंतामा
त्मनि मनसि स्थितं ५० ध्यानमाह स्मयमानमिति। नियतेन प्रागुक्तया धारणया सुस्थिरेण अत एकभूतेन एकाग्रेण। धारणा

कांचीकलापपर्यस्तं लसत्कांचननूपुरं। दर्शनीयतमं शांतं मनोनयनवर्द्धनं ॥४९॥ पद्मां न खमणि
श्रेण्या विलसद्भ्यां समर्चतां। हृत्पद्मकर्णिकाधिष्ण्यमाक्रम्यात्मन्यवस्थितं ॥५०॥ स्मयमानमभिध्या
येत्सानुरागावलोकनं। नियतेनैवभूतेन मनसा वरदर्षभं ॥५१॥ एवं भगवतो रूपं सुभद्रं ध्यायतो म
नः। निर्वृत्या परया तूर्णं संपन्नं न निवर्तते ॥५२॥ जपश्च परमो गुह्यः श्रूयतां मे नृपात्मज ॥ यं
सप्तरात्रं प्रपठन्पुमान्पश्यति खेचरान् ॥५३॥ ॐ नमो भगवते वासुदेवाय मंत्रेणानेन देव
स्य कुर्याद्द्रव्यमयीं बुधः ॥ [illegible] सपर्यां विविधैर्द्रव्यैर्देशकालविभागवित् ॥५४॥ सलिलैः शुचि
भिर्माल्यैर्वन्यैर्मूलफलादिभिः। शस्तांकुरांशुकैश्चार्चेत्तुलस्या प्रियया विभुं ॥५५॥ लब्ध्वा द्र
व्यमयीमर्चां क्षित्यंब्वादिषु वार्चयेत् ॥ आभृतात्मा मुनिः शांतो यतवाङ्मितवन्यभुक् ॥५६॥

कानि विशेषणानि ध्याने पि द्रष्टव्यानि यद्वा यथोक्तमात्रमेव। तदुक्तमेकादशस्कंधे। नान्यानि चिंतयेद्भूयः सुस्मितं भावयेन्मुख
मिति ५१ समाधिमाह एवमिति तूर्णं शीघ्रं संपन्नं सत् ५२ जपो मंत्रः ५३। ५४ द्रव्याण्याह सलिलैरिति। शस्तैर्दूर्वांकुरैः वन्यैर्वा अंशु
कैः भूर्जत्वगादिभिः ५५ अधिष्ठानमाह। लब्ध्वा संपाद्य। द्रव्यमयीं शिलादिभिर्निर्मितां। पूजा साद्गुण्यहेतून् आह सार्द्धाभ्यां। आ

यत्करिष्यतीति तदानीमवतारप्राचुर्याभावात् ५७ पूर्वसेविताः सेवनं कारिताः कार्यत्वेन विहिता इत्यर्थः मंत्रहृदयेन द्वादशाक्षरेण ५८
एवमुक्तरीत्या मनोगतं यथा भवति तथा कायादिभिर्भक्तिमत्या परिचर्यया परिचर्यमाणो धर्मार्थकामेषु यदभिमतं तद्धि श्रेयो दिशतीति
द्वयोरन्वयः। ५९। ६० विरक्तो भजेत् किमर्थं विमुक्तये ६१ हरेश्चरणाभ्यां चर्चितं मंडितं ६२ अर्हितं सत्कृत्य समर्पितं अर्हणम
स्वेच्छावतारचरितैरचिंत्यनिजमायया। करिष्यत्युत्तमश्लोकस्तद्ध्यायेद्धृदयंगमं ॥५७॥ परिचर्या
भगवतो यावत्यः पूर्वसेविताः। ताः मंत्रहृदयेनैव प्रयुंज्यान्मंत्रमूर्तये ॥५८॥ एवं कायेन मनसा वच
सा च मनोगतं। परिचर्यमाणो भगवान्भक्तिमत्या परिचर्यया ॥५९॥ पुंसाममायिनां सम्यग्भजतां
भाववर्द्धनः। श्रेयो दिशत्यभिमतं यद्धर्मादिषु देहिनां ॥६०॥ विरक्तश्चेंद्रियरतो भक्तियोगेन भू
यसा। तं निरंतरभावेन भजेताद्धा विमुक्तये ॥६१॥ इत्युक्तस्तं परिक्रम्य प्रणम्य च नृपार्भकः
ययौ मधुवनं पुण्यं हरेश्चरणचर्चितं ॥६२॥ तपोवनं गते तस्मिन्प्रविष्टोंतःपुरं मुनिः अर्हितार्
हणको राज्ञा सुखासीन उवाच ह ॥६३॥ ॥श्रीनारद उवाच॥ राजन्किं ध्यायसे दीर्घं मुखेन प
रिशुष्यता ॥ किं वा न रिष्यते कामो धर्मो वार्थेन संयुतः ॥६४॥ ॥राजोवाच॥ ॥सुतो मे बालको
ब्रह्मन्स्त्रैणेनाकरुणात्मना। निर्वासितः पंचवर्षः सह मात्रा महान्कविः ॥६५॥ ॥श्रीरामकृष्णौ॥
णादि यस्मै ६३ किं वा न रिष्यते न नश्यतीति सवितर्कः प्रश्नः ॥६४॥ ६५॥

मा त्रासहर्निर्वासित इति तस्या अप्यनादृतत्वात् ६५। मा स्मदंति किंस्वित्न खादंतीत्यर्थः ६६।६७। यस्य यशो जगत् प्रावृंक्ते व्या
प्नोति ६८। विपुलयन्विस्तारयन् ६९।७०। ध्रुवो मधुवने किमकरोदित्यपेक्षायामाह। तत्रेत्यादिना अभिषिक्तः स्नातः यस्यां प्रा

अप्यनाथं वने ब्रह्मन्मा स्मदंत्यर्भकं वृकाः। श्रांतं शयानं क्षुधितं परिम्लानमुखांबुजं ॥६६॥ अहो मे बत
दौरात्म्यं स्त्रीजितस्योपधारय। योंकं प्रेम्णारुरुक्षंतं नाभ्यनंदमसत्तमः ॥६७॥ ॥श्रीनारद उवाच॥ मा
मा शुचः स्वतनयं देवगुप्तं विशांपते। तत्प्रभावमविज्ञाय प्रावृंक्ते यद्यशो जगत् ॥६८॥ सुदुःकरं कर्म कृत्वा
लोकपालैरपि प्रभुः। एष्यत्यचिरतो राजन्यशो विपुलयंस्तव ॥६९॥ ॥श्रीमैत्रेय उवाच॥ इति
देवर्षिणा प्रोक्तं विश्रुत्य जगतीपतिः। राजलक्ष्मीमनादृत्य पुत्रमेवान्वचिंतयत् ॥७०॥ तत्राभिषि
क्तः प्रयतस्तामुपोष्य विभावरीं। समाहितः पर्यचरदृष्यादेशेन पूरुषं ॥७१॥ त्रिरात्रांते त्रिरात्रांते क
पित्थबदराशनः। आत्मवृत्त्यनुसारेण मासं निन्येर्चयन्हरिं ॥७२॥ द्वितीयं च तथा मासं षष्ठे षष्ठे
र्भको दिने ॥ तृणपर्णादिभिः शीर्णैः कृतान्नोभ्यर्चयद्विभुं ॥७३॥ तृतीयं चानयन्मासं नवमे नवमेह
नि ॥ अब्भक्ष उत्तमश्लोकमुपाधावत्समाधिना ॥७४॥ ×यः प्रतिमासमाहरसंकोचं तं तपोतिरिक्तं कृतवानित्यर्थः
हातः तां ७१ कपित्थानि बदराणि अशनं यस्य आत्मवृत्तिः देहस्थितिः तदनुसारेण ७२।७३ तृतीयं चानयन् दिवं नयन् उपाधावदित्यन्व

३६

७५।७६। भूतानि शब्दादीनि इंद्रियाणि च आशेरते यस्मिन् तत्मन आकृष्य ब्रह्म ध्यायन् ।७७। धारयमाणस्य सकः तस्य तेजः सोढुं
अशक्नुवंतः कंपिताः ।७८। तस्यांगुष्ठेन निपीडिता आक्रांता सती मही तत्र तदा अर्धं ननाम ॥७९॥ अन्यदप्याश्चर्यमाह। तस्मिन्
चतुर्थमपि वै मासं द्वादशे द्वादशेहनि। वायुभक्षो जितश्वासो ध्यायन्देवमधारयत् ॥७५॥ पंचमे मास्यनुप्राप्ते
जितश्वासो नृपात्मजः ॥ ध्यायन्ब्रह्म पदैकेन तस्थौ स्थाणुरिवाचलः ॥ ७६॥ सर्वतो मन आकृष्य हृदि भूतें
द्रियाशयं। ध्यायन्भगवतो रूपं नाद्राक्षीत्किंचनापरं ॥ ७७॥ आधारं महदादीनां प्रधानपुरुषेश्वरं ॥
ब्रह्म धारयमाणस्य त्रयो लोकाश्चकंपिरे ॥७८॥ यदैकपादेन स पार्थिवार्भकस्तस्थौ तदंगुष्ठनिपीडि
ता मही॥ ननाम तत्रार्धमिभेंद्रधिष्ठिता तरीव सव्येतरतः पदे पदे ॥७९॥ तस्मिन्नभिध्यायति विश्वमा
त्मनो द्वारं निरुध्यासुमनन्यया धिया। लोका निरुच्छ्वासनिपीडिता भृशं सलोकपालाः शरणं ययु
र्हरिं ॥८०॥ ॥देवा ऊचुः॥ ॥नैवं विदामो भगवन्प्राणरोधं चराचरस्याखिलसत्वधाम्नः। विधेहि त
न्नो वृजिनाद्विमोक्षं प्राप्ता वयं त्वां शरणं शरण्यं ॥८१॥ इ पिन विद्मः। अखिलसत्वधाम्नः सर्वप्राणिशरीरस्य
×तत्तस्मात् वृजिनात् लोकात् ८१॥×
ध्रुवे विश्वं विश्वात्मकं विष्णुं आत्मनः सकाशात् अनन्यया धिया आत्माभेददृष्ट्या अभिध्यायति सति। किं कृत्वा। असुं प्रा
णं तत्द्वारं च निरुध्य विश्वमात्मन्येकीकृतवतस्तत्प्राणनिरोधे कृते विश्वस्य प्राणनिरोधो जात इति भावः ।८०। एवं प्राणनिरोधं कदापि

यतोबालात्कोसौबालकः कथंवतस्मात्प्राणनिरोधइत्यत आह। उत्तानपादस्यपुत्रोमयिविश्वरूपेसंगतात्माएकांत्राप्तोवर्त्ततइति।८२॥ ॥चतुर्थेष्टमः॥ ॥नवमेतुहरिंसंक्षिलालब्ध्वातस्माद्वरान्ध्रुवः। प्रत्यागत्याकरोद्राज्यंपित्रादत्तमितीर्यते।१।एवंभगवद्वाक्येनगतस्रमयाः।१।सवैध्रुवःयोगविपाकेनदार्ढ्येननिश्चलयाबुद्ध्याधिरूढं पुरतःस्थितमपियदांतर्दृष्ट्यादर्शोना

श्रीभगवानुवाच॥ ॥माभैष्टबालंतपसोदुरत्ययान्निवर्त्तयिष्ये प्रतियातस्वधाम। यतोहिवःप्राणनिरोध
आसीदौत्तानपादिर्मयिसंगतात्मा॥८२॥ ॥इतिश्रीभागवतेमहापुराणे चतुर्थस्कंधे ध्रुवचरितेऽ
ष्टमोध्यायः॥ ॥७॥ ॥श्रीमैत्रेयउवाच॥ ॥तएवमुत्सन्नभयाउरुक्रमेकृतावनामाःप्रययुस्त्रि
विष्टपं॥ सहस्रशीर्षापितेतोगरुत्मतामधोर्वनंभृत्यदिदृक्षयागतः॥१॥ सवैधियायोगविपाकती
व्रयाहृत्पद्मकोशेस्फुरितंतडित्प्रभं॥तिरोहितंसहसैवोपलक्ष्यबहिःस्थितंतदवस्थंददर्श॥२॥
तद्दर्शनेनागतसाध्वसःक्षिताववंदतांगंविनमय्यदंडवत्। दृग्भ्यांप्रपश्यन्प्रपिबन्निवार्भकश्चुं
बन्निवास्येनभुजैरिवाश्लिषन्॥३॥ ×निवप्रवंदतभुजाभ्यामाश्लिष्यन्निवअवंदतेत्यर्थः॥३॥×

पश्यत्तदाभगवतेवांतःस्वरूपमाकृष्टं अततस्तिरोहितमुपलक्ष्यव्युत्थितःसन्तदवस्थंयाद्दर्गतःस्फुरितःतादृशं
॥२॥आगतसाध्वसःजातसंभ्रमःविनमय्यआनतंकृत्वा। संभ्रममेवाह। दृग्भ्यांप्रपिबन्निवपश्यन्नवंदत। आस्येनचुंब

विवक्षंततदजानत्वकुमिकंतंअतद्विदंरक्तयादिकर्त्तुमजानंतं। अस्यध्रुवस्यचहृद्यवस्थितत्वात् ज्ञात्वा। ब्रह्ममयेनवेदात्मकेनशंखेन।४॥भगवताप्रतिपादितांगिरं प्रतिपद्य तिशेषः प्रतिपद्यतामितिपाठेतांवेदात्मिकांपरिज्ञातः परात्मनोरीश्वरजीवयोर्निर्णयोयेनसः अतएवभक्त्याभावःप्रेमयस्यअसत्वरंस्थैर्येणपरितःश्रुतंविख्यातंउरुश्र

सतंविवक्षंतमतद्विदंहरिर्ज्ञात्वास्यसर्वस्यचहृद्यवस्थितः। कृतांजलिंब्रह्ममयेनकंबुना
पस्पर्शबालंकृपयाकपोले॥४॥ सवैतदैवप्रतिपद्यतांगिरंदैवीपरिज्ञातपरात्मनिर्णयः।
तंभक्तिभावोभ्यगृणादसत्वरंपरिश्रुतोरुश्रवसंध्रुवक्षितिः॥५॥ ॥ध्रुवउवाच॥ ॥
योंतःप्रविश्यममवाचमिमांप्रसुप्तांसंजीवयत्यखिलशक्तिधरःस्वधाम्ना॥ अन्यांश्च
हस्तचरणश्रवणत्वगादीन्प्राणान्नमोभगवतेपुरुषायतुभ्यं॥६॥ ॥श्रीकृष्ण॥

वःकीर्त्तिर्यस्यतं। ध्रुवाक्षितिःस्थानंयस्येतिभाविनिर्देशः॥ ॥ईशानुग्रहसंप्राप्तवागाद्यद्भुतहत्ति
भिःद्वादशाद्विरसंकाशैःश्लोकैरस्तौद्धरिंध्रुवः। योमेप्रसुप्तांवांलीनांवाचंअन्यांश्चप्राणानिंद्रिया
णिस्वधाम्नाचित्शक्त्यासंजीवयति। यतः अखिलाश्चक्षुरादिक्रियाशक्तीर्धारयतीतितथा। पुरुषायअंतर्यामि
णे॥६॥
×हान×

भा० व ननु वागादींद्रियशक्तिधरा वह्न्यादयः प्रसिद्धाः नाहमित्यत आह एक इति। अनुविश्य पुरुषांतर्यामी त्वमेक एव तस्या मायायाः
असत्सु गुणेष्विंद्रियादिषु स्थितः सन् तत्तद्देवरूपो नानेव भासि। न तु त्वद्व्यतिरेकेण ज्ञानक्रियाशक्तिधरः कश्चिदस्तीत्यर्थः ७
३८ अपि च किं वक्तव्यं वह्न्यादयो ज्ञानादिशक्तिधरा न भवंतीति यस्माद्ब्रह्मणोपि ज्ञानं त्वदधीनमेवेत्याह। त्वद्दत्तया वयुनया ज्ञा
नेन भवंतं शरणं प्रपन्नो ब्रह्मा इदं विश्वं अवष्ट अपश्यत्। कथं सुप्तः पुरुषः प्रबुद्धः सन् यथा पश्यति तद्वत् अत आपवर्ग्यः

एकस्त्वमेव भगवन्निदमात्मशक्त्या मायाख्ययोरुगुणया महदाद्यशेषं॥ सृष्ट्वानुविश्य पुरुषस्तदसद्गुणे
षु नानेव दारुषु विभावसुवद्विभासि॥ ७॥ त्वद्दत्तया वयुनयेदमवष्ट विश्वं सुप्तप्रबुद्ध इव नाथ भवत्प्रपन्नः
तस्यापवर्ग्यशरणं तव पादमूलं विस्मर्यते कृतविदा कथमार्तबंधो॥ ८॥ नूनं विमुष्टमतयस्तव मायया
ते ये त्वां भवाप्ययविमोक्षणमन्यहेतोः। अर्चंति कल्पकतरुं कुणपोपभोग्यमिच्छंति यत्स्पर्शजं नर
केपि नृणां॥ ९॥

मुक्तास्तेषामपि शरणं। प्रपन्नोऽकृता कृतविदा सर्वेंद्रियजीवनेन त्वत्कृतमुपकारं जानता कथं विस्मर्यते। एवंभूतं त्वामभजं
तः कृतघ्ना इत्यर्थः। ८। येऽस्मादृशाः कामाद्यर्थं भजंति तेपि मूढा इत्याह। नूनमिति॥ भवाप्यययोर्जन्ममरणयोस्तद्विमोक्षहेतुं त्वा ३९
मन्यहेतोः कामाद्यर्थं भजंति ते नूनं विमुष्टमतयः। वंचितचित्ताः यतस्ते कल्पतरुं त्वामर्चंति ततः कुणपतुल्ये न देहेनोप
भोग्यसुखमिच्छंति न वेच्छायोग्यं तदित्याह। यत्स्पर्शजं विषयसंबंधजं यत्सुखं तन्नरकेपि भवति॥ ९॥ ॥श्रीकृष्ण॥

ननु स्वर्गादिसुखं सकामैः प्राप्यते निष्कामभजनेन तन्नास्त्यारित्याह येति स्वमहिमनि निजानंदरूपेपि मा भूत् न भवतीत्यर्थः
ननु स्वर्गादिसुखंसकामैः प्राप्यते निष्काम भजनेन तन्नास्त्याशंक्याह। अंतकस्यासिना कालेन लुलिता खंडिताद्विमानात्पततां सा नास्तीति किं वक्तव्यं॥ १०॥ अतः कथाश्रवणाय सत्संगं देहीत्याह। भ
क्तिं त्वयि प्रवहतां सां तत्से न कुर्वतां न नु मोक्षः किं न यावत्से अत आह। येन महत्प्रसंगेन अंजसा य त्वतएव उरुणि व्यसनानि
यस्मिन्। तं नेष्येपारं गमिष्यामि। भवद्गुणकथैवामृतं तस्य पानेन मत्तः सन्॥ ११॥ कथामृतपानस्य माहात्म्यमाह। ते अतितरां

या निर्वृतिस्तनुभृतां तव पादपद्मध्यानाद्भवज्जनकथाश्रवणेन वा स्यात्। सा ब्रह्मणि स्वमहिमन्यपि नाथ मा भू
त्किं त्वंतकासिलुलितात्पततां विमानात्॥ १०॥ भक्तिं मुहुः प्रवहतां त्वयि मे प्रसंगो भूयादनंत महताममलाशया
नां। येनांजसोल्बणमुरुव्यसनं भवाब्धिं नेष्ये भवद्गुणकथामृतपानमत्तः॥ ११॥ ते न स्मरंत्यति
तरां प्रियमीश मर्त्यं ये चान्वदः सुतसुहृद्गृहवित्तदाराः॥ ये त्वब्जनाभ भवदीयपदारविंदसौगंध्यलुब्ध
हृदयेषु कृतप्रसंगाः॥ १२॥

प्रियमपि मर्त्यं देहं न स्मरंति नानुसंधत्ते। ये च सुतादयः अदः मर्त्यमनु संबद्धाः तानपि। के ते न स्मरंति। ये कृतप्रसंगाः। के
षु भवदीयपदारविंदसौगंध्ये लुब्धं हृदयं येषां तेषु तु शब्देनान्येषां केवलयोगादिनिष्ठानां देहाभिमानानिवृत्तिं दर्शयति॥ १२॥

भा०स्क० नन्वेवंविद्वानपि त्वं किमित्यभिमानं वहसि अत आह। तिर्यगिति। तिर्यङ्नगादिभिः परिचितं व्याप्तं संतोऽसंतश्च विशेषाय
स्य महदादीन्यनेकानि कारणानि यस्य। हे परम अज ते इदं स्थविष्ठं विराट् रूपं केवलं वेद्मि। अतः परमीश्वरस्वरूपं न वेद्मि।
३९॥ यत्र वादः शब्दव्यापारो नास्ति तद्ब्रह्मस्वरूपं च न वेद्मि। अतोऽभिमानो न निवर्त्तत इति भावः॥१३॥ तदेव भगवदनुकंप

तिर्यङ्नगद्विजसरीसृपदेवदैत्यमर्त्यादिभिः परिचितं सदसद्विशेषं॥ रूपं स्थविष्ठमज ते महदाद्य
नेकं नातः परं परम वेद्मि न यत्र वादः॥१३॥ कल्पांत एतदखिलं जठरेण गृह्णन् शेते पुमान्स्वदृग
नंतसखस्तदंके॥ यन्नाभिसिंधुरुहकांचनलोकपद्मगर्भे द्युमान्भगवते प्रणतोस्मि तस्मै॥१४॥

यातद्रूपद्वयं ज्ञात्वेश्वररूपमनुवर्णयन्नमस्करोति कल्पांत इति। एतत्त्रैलोक्यं यः पुमान् शेते। स्वस्मिन्नेव दृक् न वहिर्य राम
स्य योगनिद्रारूढत्वात्। अनंतसखः शेषसहायः। तदंके शेषोत्संगे। यस्य नाभिरेव सिंधुः समुद्रः तस्मिन्रोहतीति तथा ३९
तस्मिन्कांचनलोकपद्मे यस्य गर्भे कर्णिकायां द्युमान् तेजस्वी ब्रह्म। भवति तं प्रणतोस्मीत्यर्थः॥१४॥ श्रीगोपालाय नमः

नन्वहमपि स्वापाद्यवस्थावत्वेको जीवद्विशेष इत्यत आह। त्वं तु व्यतिरिक्तः जीवविलक्षणः आस्से तिष्ठसि। वैलक्षण्यमेवाह त्वं नित्य
मुक्तः जीवस्त्वत्प्रसादान्मुच्यते। त्वं परिशुद्धः स तु मलिनः। त्वं विबुद्धः स त्वज्ञः त्वमात्मा स तु जडः। त्वं कूटस्थः स तु विकारी। त्वमादिपुरु
षः स त्वादिमान्। त्वं तु भगवान् स तु भगहीनः। त्वं त्रयाणां गुणानां अधीशः स तु परतंत्रः। कुत एतद्वैलक्षण्यं यद्यतः बुध्यवस्थि
तिं बुद्धेस्तां तामवस्थां अखंडितया स्वदृष्ट्या विच्छिन्नया द्रष्टा पश्यसि द्रष्टेति तृन्प्रत्ययांतः। अतो बुध्यवस्थितिमित्यत्र षष्ठ्यभावः॥

त्वं नित्यमुक्तपरिशुद्धविबुद्ध आत्मा कूटस्थ आदिपुरुषो भगवांस्त्र्यधीशः॥ यद्बुध्यवस्थितिमखंडितया स्वदृष्ट्या द्रष्टा
स्थितावधिमखो व्यतिरिक्त आस्से॥१५॥ यस्मिन्विरुद्धगतयो ह्यनिशं पतंति विद्यादयो विविधशक्तय आनुपूर्व्यात्॥ त
द्ब्रह्म विश्वभवमेकमनंतमाद्यमानंदमात्रमविकारमहं प्रपद्ये॥१६॥ सत्याशिषो हि भगवंस्तव पादपद्ममाशीस्तथा
नुभजतः पुरुषार्थमूर्तेः। अप्येवमार्य भगवान्परिपाति दीनान्वाश्रेव वत्सकमनुग्रहकातरोऽस्मान्॥१७॥ ॥श्रीराम॥

तथाभूतः एवं त्वं स्थितौ पालने अधिमखः यज्ञाधिष्ठाता श्रीविष्णुः।१५। तमेव ब्रह्मरूपेण शास्तं नमस्करोति यस्मिन्निति पतंति आकस्मादुद्भवं
ति। विश्वस्य भवो यस्मात्। एकमखंडं आद्यं अनादि।१६। सकामभक्तानामपि मोक्षमाशासान आह। हे भगवन्पुरुषार्थः परमानंदः सर
वमूर्त्तिर्यस्य तस्य तव पादपद्मं आशिषो राज्यादेः सकाशात् सत्या आशीः परमार्थफलं हि निश्चितं। कस्य तथा तेन प्रकारेण त्वमेव पु
रुषार्थ इत्येवं निष्कामतया अनुभजतः। यद्यप्येवं तथापि हे आर्य स्वामिन् दीनान् सकामानप्यस्मान् भगवान्भवान्परिपाति संसार
भयाद्रक्षत्येव। यतः अनुग्रहे हिताचरणे कातरः परवशः। य[...]था नवप्रसूता वास्ना धेनुर्वत्सं क्षीरं पाययति वृकादिभ्यो रक्षति च तद्वत्॥१७॥

भा० व० १९ व्यवसितं संकल्पितं।१९। तत्त्वयच्छामीत्युक्तं किं तदित्यपेक्षायामाह। नान्यैरिति सार्द्धाभ्यां। हे भद्र ध्रुवाक्षितिर्निवासो यस्मिन् आ
५०
हितमर्पितं।२०। धान्याक्रमणाय भ्राम्यमाणानां पशूनां बंधनस्तंभो मेढी तस्यां बलीवर्दसमूहवत्। अवांतरकल्पवासिनां

श्रीमैत्रेय उवाच॥ ॥अथाभिष्टुत एवं वै सत्संकल्पेन धीमता। भृत्यानुरक्तो भगवान्प्रतिनंद्येदमब्रवीत्॥१८॥ ॥
श्रीभगवानुवाच॥ ॥वेदाहं ते व्यवसितं हृदि राजन्यबालक॥ तत्प्रयच्छामि भद्रं ते दुरापमपि सुव्रत॥१९॥ नान्यैरधि
ष्ठितं भद्र यद्भ्राजिष्णु ध्रुवक्षिति। यत्र ग्रहर्क्षताराणां ज्योतिषां चक्रमाहितं॥२०॥ मेढ्यां गोचक्रवत्स्थास्नु परस्ता
त्कल्पवासिनां॥ धर्मोऽग्निः कश्यपः शक्रो मुनयो ये वनौकसः। चरंति दक्षिणीकृत्य भ्रमंतो यत्सतारकाः॥२१
प्रस्थिते तु वनं पित्रा दत्त्वा गां धर्मसंश्रयः। षट्त्रिंशद्वर्षसाहस्रं रक्षिताव्याहतेंद्रियः॥२२॥ त्वद्भ्रातर्युत्तमे नष्टे मृ
गयायां तु तन्मनाः। अन्वेषंती वनं माता दावाग्निं सा प्रवेक्ष्यति॥२३॥ ×सा सुरुचिः प्रवेक्ष्यति॥ २३॥ ॥

परस्तादपि स्थास्नु कल्पलोकत्रयनाशेप्यनश्वरं। धर्माग्न्यादयो नक्षत्ररूपाः वनौकसः सप्तर्षयः। यत्प्रदक्षिणीकृत्य भ्र
मंतश्चरंति॥२१॥ एतच्च राज्यानंतरं भविष्यतीत्याह। प्रस्थित इति पृथ्वीं दत्त्वा वनं प्रस्थिते भावे क्तः। वनं प्रति दीर्घ ५०
गमने कृते सति रक्षिता रक्षिष्यसि।२२॥ त्वया असंकल्पितमपि मद्भक्तस्य तव द्रोहादेवं भविष्यतीत्याह। त्वद्भ्रातरीति॥

क्विंच इष्ट्वा मां यज्ञो हृदयं प्रिया मूर्तिर्यस्य तं।२४। यतः स्थानात्।२५। अतिदिश्य दत्त्वा।२६। संकल्पजं मनोरथं पादसेवया प्रापितं संक
ल्पस्य निर्वाणं समाप्तिर्यस्मात्॥२७॥ मायाविनः सकामस्य यद्यत्सुदुर्लभं हरेः पदं तद् एकेनैव जन्मना लब्ध्वापि स्वमात्मानं मनः अ
इष्ट्वा मां यज्ञहृदयं यज्ञैः पुष्कलदक्षिणैः। भुक्त्वा चेहाशिषः सत्या अंते मां संस्मरिष्यसि॥२४॥ ततो गंतासि मत्स्था
नं सर्वलोकनमस्कृतं। उपरिष्टादृषिभ्यस्त्वं यतो नावर्तते यतिः॥२५॥ ॥श्रीमैत्रेय उवाच॥ ॥इत्यर्चितः स भग
वानतिदिश्यात्मनः पदं। बालस्य पश्यतो धाम स्वमगाद्गरुडध्वजः॥२६॥ सोपि संकल्पजं विष्णोः पादसेवोपसादि
तं। प्राप्य संकल्पनिर्वाणं नातिप्रीतोऽभ्यगात्पुरं॥२७॥ ॥विदुर उवाच॥ ॥सुदुर्लभं यत्परमं पदं हरेर्माया
विनस्तच्चरणार्चनार्जितं॥ लब्ध्वाप्यसिद्धार्थमिवैकजन्मना कथं स्वमात्मानममन्यतार्थवित्॥२८॥
श्रीमैत्रेय उवाच॥ ॥मातुः सपत्न्या वाग्बाणैर्हृदि विद्धस्तु तान्स्मरन्। नैच्छन्मुक्तिपतेर्मुक्तिं तस्मात्तापमुपेयि
वान्॥२९॥ ॥ध्रुव उवाच॥ ॥ समाधिना नैकभवेन यत्पदं विदुः सनंदादय ऊर्ध्वरेतसः। मासैरहं षड्भि
रमुष्य पादयोः छायामुपेत्यापगतः पृथङ्मतिः॥३०॥ अहो बत ममानात्म्यं मंदभाग्यस्य पश्यत। भवच्छिदः
पादमूलं गत्वा याचे यदंतवत्॥३१॥ ×सन्न्हा कष्टमिति भावः।३०॥ अनात्म्यं आत्मशून्यत्वं अज्ञत्वं भवच्छेत्तुः यदंतवत्तद्याचे ४५
सिद्धार्थं अप्राप्तमनोरथमिव कथममन्यत पुरुषार्थविदपि।२८।२९। तापमेवाह सार्द्धैः षड्भिः नैके अनेके भवा यस्मिन् बहुजन्मसा
स्तेनेत्यर्थः। प्राणामस्तत्यादिसमये गरुडाधिरूढस्य हरेः पादच्छायायां स्थितमात्मानं स्मरन्नाह। छायामुपेत्येति पृथग्मतिः भेददृष्टिः

ताविमवानासिमा॥ ३१॥

भा० ४०
४१

मतिर्विदूषिता देवैः पतद्भिरसहिष्णुभिः। यो अङ्गले कारणं संभावयति मतिरिति। पतद्भिर्मदपेक्षया अधः प्राप्नुवद्भिः अतएवासहनशी
लैः नाधुनाप्यवमानं तद्दृत्यादि सत्यमपि नारदस्य वचो यो न गृहीतवानस्मि। तस्य मे मतिर्विदूषिता। ३२। किंच दैवीमिति।
प्रसुप्तः स्वप्ने भिन्नं पश्यन्। द्वितीये असत्यपि भ्रातैव भ्रातृव्यः शत्रुरिति हृद्या हृद्रुजा हृदयशोकेन तप्ये तापमनुभवामि

मतिर्विदूषिता दैवैः पतद्भिरसहिष्णुभिः। यो नारदवचस्तथ्यं नाग्रहीषमसत्तमः॥ ३२॥ दैवीं मायामुपाश्रित्य प्र
सुप्त इव भिन्नदृक्। तप्ये द्वितीये प्यसति भ्रातृभ्रातृव्यहृद्रुजा॥ ३३॥ मयैतत्प्रार्थितं व्यर्थं चिकित्सेव गतायुषि
प्रसाद्य जगदात्मानं तपसा दुःप्रसादनं। भवच्छिदमयाचेहं भवं भाग्यविवर्जितः॥ ३४॥ स्वाराज्यं यच्छतो मौ
ढ्यान्मानो मे भिक्षितो बत। ईश्वरात्क्षीणपुण्येन फलीकारानिवाधनः॥ ३५॥ ॥श्रीमैत्रेय उवाच॥
न वै मुकुंदस्य पदारविंदयो रजोजुषस्तात भवादृशा जनाः। वांछंति तद्दास्यमृते र्थमात्मनो यदृच्छया लब्ध
मनःसमृद्धयः॥ ३६॥ ×अन्यमर्थमात्मनो न नवै वांछंति यदृच्छयैव लब्धेन मनसः समृद्धिर्येषां ते॥ ३६॥ श्रीकृष्ण॥

३३॥ किंच। मया प्रसाद्य यत्प्रार्थितं तद्व्यर्थं प्रार्थितमाह। भवच्छिदमिति॥ ३४॥ एतदेव सदृष्टांतमाह। स्वाराज्यं निजानंदं प्र ४१
यच्छतः सकाशादभिमानः क्षीणपुण्येन मया भिक्षितः याचितः क्षीणेन वा पुण्येनेति वा दृष्टांतेनैव संबंधः। यथाऽधनः ईश्वरा
च्चक्रवर्तिनः। फलीकारान् सतुषतंदुलकणान् याचते तद्वत्॥ ३५॥ एवं निस्पृहत्वं तस्य युक्तमित्याह। तस्य दास्यं विना

यथा न श्रद्दधे विश्वासं न चकार। अभद्रस्य मम भद्रं कुत इति मत्वा। ३७॥
प्रस्तुतमाह आकर्ण्येति। संपरेत्य मृत्वा आगतमाकर्ण्य ३९॥ ४०॥ अस्य राज्ञो महिष्यौ मध्ये उत्तमं निधायै
ए बध्यात्यविरत इति देवर्षेर्वाक्यं श्रद्धाय। ३८॥ ब्राह्मणादिभिः पर्यस्तः परिवृतः। विषक्सेनांघ्रिसंस्पर्शेन हतमशेषमघबंधनं यय
कामे वशिबिकां नरविमानमारुह्य॥ ४१॥ उपवनस्याभ्याशे समीपे॥ ४२॥

आकर्ण्यात्मजमायांतं संपरेत्य यथागतं। राजा न श्रद्दधे भद्रमभद्रस्य कुतो मम॥ ३७॥ श्रद्धाय वाक्यं देवर्षेर्ह
र्षवेगेन धर्षितः। वार्ताहर्तुरभिप्रीतो हारं प्रादान्महाधनं॥ ३८॥ सदश्वं रथमारुह्य कार्तस्वरपरिष्कृतं। ब्राह्म
णैः कुलवृद्धैश्च पर्यस्तोमात्यबंधुभिः॥ ३९॥ शंखदुंदुभिनादेन ब्रह्मघोषेण वेणुभिः॥ निश्चक्राम पुरात्तूर्णमा
त्मजाभीक्षणोत्सुकः॥ ४०॥ सुनीतिः सुरुचिश्चास्य महिष्यौ रुक्मभूषिते। आरुह्य शिबिकां सार्द्धमुत्तमेनाभि
जग्मतुः॥ ४१॥ तं दृष्ट्वोपवनाभ्याश आयांतं तरसा रथात्। अवरुह्य नृपस्तूर्णमासाद्य प्रेमविह्वलः॥ ४२॥ प
रिरेभेंगजं दोर्भ्यां दीर्घोत्कंठमनाः श्वसन्। विष्वक्सेनांघ्रिसंस्पर्शहताशेषाघबंधनं॥ ४३॥ अथाजिघ्रन्मुहुर्मू
र्ध्नि शीतैर्नयनवारिभिः। स्नापयामास तनयं जातोद्दाममनोरथः॥ ४४॥ अभिवंद्य पितुः पादावाशीर्भिरभिमंत्रितः। न
नाम मातरौ शीर्ष्णा सत्कृतः सज्जनाग्रणीः॥ ४५॥ सुरुचिस्तं समुत्थाप्य पादावनतमर्भकं। परिष्वज्याह जीवेति बा
ष्पगद्गदया गिरा॥ ४६॥

अभिमंत्रितः पितुराशीर्भिः सह तेन कृतसंभाषणः॥ ४६॥
स्य॥ ४३॥ जात उद्दामो महान्मनोरथो यस्य॥ ४४॥

भा०च० सुरुच्याः प्रीतिर्नो संभाविते त्याह। यस्येति। नमंति अनुसरंति आपो यथा स्वयमेव निम्नं देशमवतरंति। ४७। ऊरू तु उधतुः ४८
४९। हे वीर वीरसु बोध्रुवमातुः अभिषिच्यमानाभ्यां स्तनाभ्यां पयस्तदा सुस्राव। ५०। चिरं नष्टः शरदं नमप्राप्तः रक्षितारक्षिया
४२ यस्य प्रसन्नो भगवान्गुणैर्मैत्र्यादिभिर्हरिः। तस्मै नमंति भूतानि निम्नमाप इव स्वयं॥४७॥ उत्तमश्च ध्रुव
श्चाभावन्योन्यं प्रेमविह्वलौ। अंगसंगादुत्पुलकावस्रौघं मुहुरूहतुः॥४८॥ सुनीतिरस्य जननी प्राणेभ्यो
पि प्रियं सुतं॥ उपगुह्य जहावाधिं तदंगस्पर्शनिर्वृता॥४९॥ पयः स्तनाभ्यां सुस्राव नेत्रजैः सलिलैः शिवैः॥
तदाभिषिच्यमानाभ्यां वीर वीरसुवो मुहुः॥५०॥ तां शशंसुर्जना राज्ञीं दिष्ट्या ते पुत्र आर्तिहा। प्रतिलब्ध
श्चिरं नष्टो रक्षिता मंडलं भुवः॥५१॥ अभ्यर्चितस्त्वया नूनं भगवान्प्रणतार्तिहा। यदनुध्यायिनो धीरा मृत्युं
जिग्युः सुदुर्जयं॥५२॥ लाल्यमानं जनैरेवं ध्रुवं सभ्रातरं नृपः। आरोप्य करिणीं हृष्टः स्तूयमानो वि
शत्पुरं॥५३॥ तत्र तत्रोपसंक्लृप्तैर्लसन्मकरतोरणैः। सवृंदैः कदलीस्तंभैः पूगपोतैश्च तद्विधैः॥५४॥
ति। ५१। ५२। एवमिति व्यवहितं पित्राद्युपलालनं परो मध्य तत्र जनैः स्तूयमानः। ५३। पुरं वर्णयति। तत्र त
त्रेति चतुर्भिः सवृंदैः फलमंजरीयुक्तैः पूगानां पोतैर्बालवृक्षैस्तद्विधैः सवृंदैः उपस्कृतं। प्रतिद्वारमित्युत्तरेणा ४२
न्वयः॥५४॥

४३
भा०च०
वृतपल्लवाश्च वासांसि वस्त्राणि स्रजश्च मुक्तादामानि च तेषां विशिष्टं लंबनं यस्ति येषु कुंभेषु। ५५। गोपुरैरगारैश्च शातकुंभाः परिच्छदाः परिक
रायेषु। विमानानामिव तद्वत्तिर्यषां॥५६॥ चत्वराणि अंगणानि रथ्या महामार्गाः। अट्टो वसस्योपरि निर्मिता भूमिका मार्गो वीतरं भ्रष्टाः संमा
र्जिता अत्वरादयो यस्मिन्॥५७॥ सिद्धार्थाः श्वेतसर्षपाः अक्षतायवाः॥५८॥ उपकुर्त्य किरन्त्यः सतीः सत्यः॥५९॥६०॥६१॥
चूतपल्लववासस्रङ्मुक्तादामविलंबिभिः। उपस्कृतं प्रतिद्वारं अपां कुंभैः सदीपकैः॥५५॥ प्राकारैर्गोपुरागारैः शातकुंभपरि
च्छदैः। सर्वतोलंकृतं श्रीमद्विमानशिखरद्युभिः॥५६॥ मृष्टचत्वररथ्याट्टमार्गं चंदनचर्चितं। लाजाक्षतैः पुष्पफलैस्तंदु
लैर्बलिभिर्युतं॥५७॥ ध्रुवाय पथि दृष्टाय तत्र तत्र पुरस्त्रियः। सिद्धार्थाक्षतदध्यंबुदूर्वापुष्पफलानि च॥५८॥ उपजह्रुः
प्रयुंजाना वात्सल्यादाशिषः सतीः॥ शृण्वंस्तद्वल्गुगीतानि प्राविशद्भवनं पितुः॥५९॥ महामणिव्रातमये स तस्मिन्
भवनोत्तमे॥ लालितो नितरां पित्रा न्यवसद्दिवि देववत्॥६०॥ पयःफेननिभाः शय्या दांता रुक्मपरिच्छदाः
आसनानि महार्हाणि यत्र रौक्मा उपस्कराः॥६१॥ यत्र स्फटिककुड्येषु महामारकतेषु च॥ मणिप्रदीपा आभांति लल
लनारत्नसंयुताः॥६२॥ उद्यानानि च रम्याणि विचित्रैरमरद्रुमैः॥ कूजद्विहंगमिथुनैर्गायन्मत्तमधुव्रतैः॥
६३॥ वाप्यो वैडूर्यसोपानाः पद्मोत्पलकुमुद्वतीः॥ हंसकारंडवकुलैर्जुष्टाश्चक्राह्वसारसैः॥६४॥ उत्तानपादो
राजर्षिः प्रभावं तनयस्य तं॥ श्रुत्वा दृष्ट्वाद्भुततमं प्रपेदे विस्मयं परं॥६५॥ ॥ॐ नमो नारायणाय।
यत्र भवनोत्तमे॥६२॥६३॥ कुमुत कुमुदं पद्यादिमसो वाप्यः॥६४॥६५॥ ॥ॐ नमो भगवते वासुदेवाय॥

भा०च०
४३

ऊढवयसंप्राप्तयौवनं।अनुरक्ताःप्रजायस्मिन्॥६६॥प्रवयसंवृद्धं॥६७॥ ॥इतिचतुर्थेनवमः॥ ॥दशमेभ्रातृहंतॄणांयक्षाणां
मकरोद्दृढं।एकएवालकांगतायस्यविक्रमउच्यते॥१॥योषिद्रत्नमिवातिमनोहरंकन्यारत्नंवेतिवा॥२॥यक्षेणाद्रौहिमवति

वीक्ष्योढवयसंपुत्रंप्रकृतीनांचसंमतं।अनुरक्तप्रजंराजाध्रुवंचक्रेभुवःपतिं॥६६॥ आत्मानंचप्रवयस
माकलय्यविशांपतिः।वनंविरक्तःप्रातिष्ठद्विमृशन्नात्मनोगतिं॥६७॥ ॥इतिश्रीभागवतेमहापुराणेच
तुर्थस्कंधेनवमोध्यायः॥ ॥श्रीमैत्रेयउवाच॥ प्रजापतेर्दुहितरंशिशुमारस्यवैध्रुवः।उपयेमेभ्रमिंनाम
तत्सुतौकल्पवत्सरौ॥१॥ इलायामपिभार्यायांवायोःपुत्र्यांमहाबलः।पुत्रमुत्कलनामानंयोषिद्रत्नम
जीजनत्॥२॥ उत्तमस्त्वकृतोद्वाहोमृगयायांबलीयसा॥हतःपुण्यजनेनाद्रौतन्मातास्यगतिंगता॥३॥ ध्रु
वोभ्रातृवधंश्रुत्वाकोपामर्षशुचार्पितः।जैत्रंस्यंदनमास्थायगतःपुण्यजनालयं॥४॥ गत्वोदीचींदिशंराजा
रुद्रानुचरसेवितां॥ददर्शहिमवद्द्रोण्यांपुरींगुह्यकसंकुलां॥५॥ दध्मौशंखंमहाबाहुःखंदिशश्चानुनादय
न्।येनोद्विग्नधियःक्षत्तरुपदेव्योऽत्रसन्भृशं॥६॥ ४३

हतः।आज्ञावितिपाठेयुद्धे।अस्यगतिंगतामृतेत्यर्थः॥३॥कोपामर्षशुचांद्वंद्वैक्यं।तेनार्पितोव्याप्तः।जैत्रंजयहेतुं।पुण्य
जनालयंअलकां॥४॥ रुद्रानुचराःभूतादयः॥दध्मौवादितवान्।येनशंखनादेन।हेक्षत्तः।उपदेव्योयक्षस्त्रियः॥६॥

७॥एकैकंत्रिभिस्त्रिभिःकृत्वैकंसर्वान्त्रयोदशायुतानियक्षान्युगपदहन्जघान॥८॥९॥तेपितत्कर्मासहमानाअमुमवि
ध्यन्।द्विगुणंयथाभवत्येवंषड्भिःषड्भिःप्रतिकर्तुमिच्छवः॥१०॥चित्रवाजैःचित्रपक्षैः॥११॥१२॥धारासंपातेनछन्नोगि

ततोनिःक्रम्यबलिनउपदेव[struck]महाभटाः॥असहंतस्तन्निनादमभिपेतुरुदायुधाः॥७॥सतानाप
ततोवीरउग्रधन्वामहारथः।एकैकंयुगपत्सर्वानहन्बाणैस्त्रिभिस्त्रिभिः॥८॥तेवैललाटलग्नैस्तैरिषु
८ भिःसर्वएवहि।मत्वानिरस्तमात्मानमाशंसन्कर्मतस्यतत्॥९॥तेपिचामुममृष्यंतःपादस्पर्शमिवोर
गाः॥शरैरविध्यन्युगपद्द्विगुणंप्रचिकीर्षया॥१०॥ततःपरिघनिस्त्रिंशैःप्रासशूलपरश्वधैः।शक्त्यृष्टिभि
र्भुशुंडीभिश्चित्रवाजैःशरैरपि॥११॥अभ्यवर्षन्प्रकुपिताःसरथंसहसारथिं।इच्छंतस्तत्प्रतीकर्तुमयु
तानांत्रयोदश॥१२॥औत्तानपादिःसतदाशस्त्रवर्षेणभूरिणा।नउपादृश्यतच्छन्नःआसारेणयथागि
रिः॥१३॥हाहाकारस्तदैवासीत्सिद्धानांदिविपश्यतां॥हतोयंमानवःसूर्योमग्नःपुण्यजनार्णवे॥
१४॥नदत्सुयातुधानेषुजयकाशिष्वथोमृधे॥उदतिष्ठद्रथस्तस्यनीहारादिवभास्करः॥१५॥ ॥

रिरिवनैवादृश्यत॥१३॥सूर्यतुल्यः॥१४॥यातुधानेषुराक्षसेषुजयकाशिषुजितंजितमितिजयप्रकाशकेषुसत्सु॥१५॥

भा०च०
४४

व्यधमत्संचूर्णयामास ॥१६॥ वर्माणि कवचानि १७। शिरःप्रभृतिभिरास्तृताः प्रकीर्णा रेजुरिति द्वयोरन्वयः ॥१८॥१९॥ प्रायः बाहु
ल्येन चित्रक्रणाः संछिन्ना अवयवा येषां ॥२०॥ आततायिनं शस्त्रपाणिनं ॥२१॥ इति ब्रुवन्निति यत्रापि नमायिनामिषावरैरनुप
धनुर्विस्फूर्जयन्नुग्रं द्विषतां खेदमुद्वहन्। अस्त्रौघं व्यधमद्बाणैर्घनानीकमिवानिलः ॥१६॥ तस्य ते चापनि
र्मुक्ता भित्त्वा वर्माणि रक्षसां। काया नाविविशुस्तिग्मा गिरीनशनयो यथा ॥१७॥ भल्लैः संछिद्यमानानां
शिरोभिश्चारुकुंडलैः। ऊरुभिर्हेमतालाभैर्दोर्भिर्वलयवल्गुभिः ॥१८॥ हारकेयूरमुकुटैरुष्णीषैश्च महाधनैः
आस्तृतास्ता रणभुवो रेजुर्वीरमनोहराः ॥१९॥ हतावशिष्टा इतरे रणाजिराद्रक्षोगणाः क्षत्रियवर्य
सायकैः। प्रायो विवृक्णावयवा विदुद्रुवुर्मृगेंद्रविक्रीडितयूथपा इव ॥२०॥ अपश्यमानः स तदाततायिनं महामृधे कंचन मानवोत्तमः। पुरीं दिदृक्षन्नपि नाविशद्द्विषां न मायिनां वेद चिकीर्षितं जनः ॥२१॥ इति ब्रु
वन्चित्ररथः स्वसारथिं यत्तः परेषां प्रतियोगशंकितः। शुश्राव शब्दं जलधेरिवेरितं नभस्वतो दिक्षु रजोन्व
पश्यत ॥२२॥ क्षणेनाच्छादितं व्योम घनानीकेन सर्वतः। विस्फुरत्तडिता दिक्षु त्रासयत्स्तनयित्नुना ॥२३
४४

गः चित्ररथो ध्रुवः यत्तः यत्नवान् प्रतियोगः पुनरुद्योगः तस्माच्छंकितः नभस्वतो वायोर्हेतोः ॥२२॥ विस्फुरंत्यो तडि
तो यस्मिन् तेन त्रासयता स्तनयित्नवो अशनयो यस्मिन् ॥२३॥ ॥ॐ नमो भगवते वासुदेवाय ॥ ॥श्रीः

वर्षुः सृजत्यतिशरीरमिल्वस्य रुद्ररश्लेष्मादिमेदसः पुंस्त्वमार्षमिदं हांसि। अस्याग्रतो निपेतुः ॥२४। सा श्म वर्षि
णः अश्मसहितं यद्वर्षं तद्वंतः ॥२५॥ अशनिवन्निश्वासो येषां ॥२६। ॥२७। त्रासना निभयंकराणि तिग्मा क्रूरा गतिः प्रवृत्तिर्येषां असु
ततः खे दृश्यत गिरिः ॥२४॥ ततः खेदृश्यत गिरि
र्वव्रषू रुधिरौघासृक्पूयविण्मूत्रमेदसः। निपेतुर्गगनादस्य कबंधान्यग्रतोनघ ॥२४॥ ततः खेदृश्यत गिरि
र्निपेतुः सर्वतो दिशं। गदापरिघनिस्त्रिंशमुसलाः साश्मवर्षिणः ॥२५॥ अहयोशनिनिःश्वासा वमंतोग्नि
रुषाक्षिभिः। अभ्यधावन्गजा मत्ताः सिंहव्याघ्राश्च यूथशः ॥२६॥ समुद्र ऊर्मिभिर्भीमः प्लावयन्सर्वतो भुवं
आससाद महाह्रादः कल्पांत इव भीषणः ॥२७॥ एवंविधान्यनेकानि त्रासनान्यमनस्विनां। ससृजुस्ति
ग्मगतय आसुर्या मायया सुराः ॥२८॥ ध्रुवे प्रयुक्तामसुरैस्तां मायामतिदुस्तरां। निशाम्य तस्य मुनयः
शमाशंसन्समागताः ॥२९॥ ॥मुनय ऊचुः॥ औत्तानपाद भगवांस्तव शार्ङ्गधन्वा देवः क्षिणोत्ववन
तार्तिहरो विपक्षान्। यन्नामधेयमभिधाय निशम्य वाद्धा लोकोंजसा तरति दुस्तरमंग मृत्युं ॥३०॥
॥ ॥इति श्रीभागवते महापुराणे चतुर्थस्कंधे ध्रुवचरिते दशमोध्यायः॥ ॥श्रीकृष्ण॥

ता राक्षसादिशब्दैर्दूरांतरत्वेन यक्षा एवोच्यंते ॥२८॥ तस्य शं कल्याणं आशंसन् प्रार्थितवंतः ॥२९॥ तव विप
क्षान् शत्रून् नाशयतु अद्धा साक्षात् अंजसा सुखेनैव मृत्युं तरति ॥३०॥ ॥ इति चतुर्थस्कंधटीकायां दशमोध्या
यः॥

एकादशे तु यक्षाणां क्षयं दृष्ट्वा मनुः स्वयं। आगत्य वारयामास ध्रुवं तत्त्वोपदेशतः।१। एवं गदतां वचनमुपदेशमिव निशम्य। उपस्पृ
भा० च० श्य यन्नारायणनिर्मितं नारायणास्त्रं संदधे।१। क्लेशा रागादयो यथा॥२॥ किंच। तस्यार्षास्त्रं ऋषेर्नारायणादुद्भूतमस्त्रं प्रयुंज
४५ तः संदधतः सतः सुवर्णमयाः पुंखाः मूलप्रांता येषां कलहंसा नो वासांसि पक्षा येषां ते शरा विनिःसृता इति द्रष्टव्यं। उपरिस्था
श्रीमैत्रेय उवाच॥ ॥निशम्य गदतामेवमृषीणां धनुषि ध्रुवः। संदधेऽस्त्रमुपस्पृश्य यन्नारायणनिर्मितं॥१॥
संधीयमान एतस्मिन्माया गुह्यकनिर्मिताः॥ क्षिप्रं विनेशुर्विदुर क्लेशा ज्ञानोदये यथा॥२॥ तस्यार्षास्त्रं धनु
षि प्रयुंजतः सुवर्णपुंखाः कलहंसवाससः॥ विनिःसृता आविविशुर्द्विषद्बलं यथा वनं भीमरवाः शिखंडिनः
॥३॥ तैस्तिग्मधारैः प्रधने शिलीमुखैरितस्ततः पुण्यजना उपद्रुताः॥ तमभ्यधावन्कुपिता उदायुधाः सु
पर्णमुन्नद्धफणा इवाहयः॥४॥ स तान्पृषत्कैरभिधावतो मृधे निकृत्तबाहूरुशिरोधरोदरान्॥ निनाय
लोकं परमर्कमंडलं व्रजंति निर्भिद्य यमूर्ध्वरेतसः॥५॥ तान्हन्यमानानभिवीक्ष्य गुह्यकाननागसश्चित्र
रथेन भूयसा॥ औत्तानपादिं कृपया पितामहो मनुर्जगादोपगतः सहर्षिभिः॥६॥
शिलीमुखग्रहणात्॥३॥ प्रधने युद्धे। उन्नद्धा उच्छ्रिताः फणा येषां ते सर्पाः॥४॥ पृषत्कैर्बाणैर्निकृत्ता बाह्वादयो येषां तान् ४५
परलोकं निनाय। कथंभूतं। ऊर्ध्वरेतसः संन्यासिनोऽर्कमंडलं निर्भिद्य यं व्रजंति तं॥५॥ तान् अनागसो निरपराधान्॥६॥

तमसो नरकस्य द्वारेण रोषेण।७।८॥ ननु मद्भ्रातृहंतारः कथमकृतैनसोऽत आह नन्विति।९। सत्यप्यपराधे तवैतदुचितं न भवती
त्याह नायमिति। पराग्गृह्य पराग्भूतं देहमात्मानं गृहीत्वा पशवो यथा देहाभिमानादन्योन्यं घ्नंति तथा भूतानां वैशसं हिंसेति य
त्।१०। त्वं च बाल्ये साधुः सन्निदानीं कथमन्यथा कृतवानसीत्याह सर्वभूतात्मभावेनेति द्वाभ्यां॥११॥ अनुध्यातः हरेर्हृदि स्थि
मनुरुवाच॥ ॥अलं वत्सातिरोषेण तमोद्वारेण पाप्मना॥ येन पुण्यजनानेतानवधीस्त्वमनागसः॥७॥ नास्मत्कुलोचि
तं तात कर्मैतत्सद्विगर्हितं। वधो यदुपदेवानामारब्धस्तेऽकृतैनसां॥८॥ नन्वेकस्यापराधेन प्रसंगाद्बहवो हताः॥ भ्रातु
र्वधाभितप्तेन त्वयांग भ्रातृवत्सल॥९॥ नायं मार्गो हि साधूनां हृषीकेशानुवर्तिनां॥ यदात्मानं पराग्गृह्य प
शुवद्भूतवैशसं॥१०॥ सर्वभूतात्मभावेन भूतावासं हरिं भवान्। आराध्याप दुराराध्यं विष्णोस्तत्परमं पदं॥
११॥ स त्वं हरेरनुध्यातस्तत्पुंसामपि संमतः। कथं त्ववद्यं कृतवाननुशिक्षन्सतां व्रतं॥१२॥ तितिक्षया करु
णया मैत्र्या चाखिलजंतुषु॥ समत्वेन च सर्वात्मा भगवान्संप्रसीदति॥१३॥ संप्रसन्ने भगवति पुरुषः प्राकृ
तैर्गुणैः। विमुक्तो जीवनिर्मुक्तो ब्रह्म निर्वाणमृच्छति॥१४॥ ×निर्मुक्तः सन्निर्वाणं सुखात्मकं ब्रह्म प्राप्नोति।१४।×
तः ज्ञातो वा तत्पुंसां हरिदासानामपि साधुत्वेन संमतः॥१२॥ सतां व्रतमेवाह। महत्सु तितिक्षया नीचेषु करुणया समेषु मैत्र्या
अखिलेषु जंतुषु समत्वेन च।१३। ततश्च कृतार्थो भवतीत्याह। संप्रसन्ने सति गुणैर्मुक्तोऽत एव तत्कार्येण जीवेन लिंगशरीरेण

भा०च भ्रातृहंतृत्वमंगीकृत्योक्तं। इदानीं तु नात्मनो भ्रातृपुत्रादिसंबंधः। न चान्योन्यहंतृत्वादिकमपीत्याह। भूतैरिति दशभिः। भूतैः पंचभि
४६ रारब्धैर्देहाद्याकारेण परिणतैर्योषित्पुरुषश्च प्रसिद्धः तयोर्व्यवायान्मैथुनात्संभूतिरन्ययोर्योषित्पुरुषयोरिह संसारे भवति।।१५
एवं तावत्सर्गः प्रवर्त्तते। एवं पालकाकारेण परिणतैर्भूतैरेव स्थितिः। हंतृदेहाकारपरिणतैः संयमः सर्व परमात्मनो मायया गुणा
नां व्यतिकरात्क्षोभात् न तु स्वतः।।१६।। ननु जडानां देहानां गुणानां वा कथं सर्गादिहेतुत्वं तत्राह। निमित्तमात्रं पुरुषर्षभ ईश्वरः। यत्र य

भूतैः पंचभिरारब्धैर्योषित्पुरुष एव हि। तयोर्व्यवायात्संभूतिर्योषित्पुरुषयोरिह।।१५।। एवं प्रवर्त्तते सर्गः स्थि
तिः संयम एव च। गुणव्यतिकराद्राजन्मायया परमात्मनः।।१६।। निमित्तमात्रं तत्रासीन्निर्गुणः पुरुषर्षभः
व्यक्ताव्यक्तमिदं विश्वं यत्र भ्रमति लोहवत्।।१७।। स खल्विदं भगवान्कालशक्त्या गुणप्रवाहेण विभक्तवी
र्यः।। करोत्यकर्त्तैव निहंत्यहंता चेष्टा विभूम्नः खलु दुर्विभाव्या।।१८।। शक्तिः दुर्विभाव्या अचिंत्या।।१८।।

स्मिन्निमित्ते सति कार्यकारणात्मकं विश्वं भ्रमति परिवर्त्तते। यथायस्कांते निमित्ते सति लोहं परिवर्त्तते तद्वत्।।१७।। ४६
ननु चेत्स एव निमित्तं तर्हि तस्याविशेषाद्युगपदेव सर्गाद्यं भवेत् अत आह स खल्विति कालशक्त्या क्रमेण गुणानां प्रवाहः
क्षोभः तेन विभक्तं सृष्ट्यादिविषयं वीर्यं शक्तिर्यस्य। ननु कालोपि गुणान्युगपदेव क्षोभयतु। तत्राह। चेष्टा कालश

ननु पित्रादिः सृजति पालयति राजादिः निहंति चोरादिः न त्वीश्वरस्तत्राह स इति। जनेन पित्रादिना जनं पुत्रादिं जनयन् आदि
कृत्। अंतकं चोरादिकं तं मृत्युहेतुना मारयन् अंतकरः स्वयं तु अनंतो नादिश्च अव्ययः अक्षीणशक्तिः। अयं भावः पित्रा
दयो न तु उत्पत्त्यादिमंतो न स्वातंत्र्येण कारणं। किं त्वीश्वर एव तन्नियंता सर्वकारणमिति।१९।। न चैवं कुर्वतोपि वैषम्यप्रसक्तिः
पक्षपाताभावादित्याह द्वाभ्यां न वै इति। मृत्युरूपस्य समं यथा भवति तथा प्रजाः कर्मभूता विशतः तस्य साम्येपि भूतेषु फ

सोनंतोंतकरः कालोनादिरादिकृदव्ययः।। जनं जनेन जनयन्मारयन्मृत्युनांतकं।।१९।। न वै स्वपक्षोस्य विप
क्ष एव वा परस्य मृत्योर्विशतः समं प्रजाः।। तं धावमानमनुधावंत्यनीशा यथा रजांस्यनिलं भूतसंघाः
।।२०।। आयुषोपचयं जंतोस्तथैवोपचयं विभुः।। उभाभ्यां रहितः स्वस्थो दुःस्थस्य विदधात्यसौ।।२१।। केचि
त्कर्म वदंत्येनं स्वभावमपरे नृप।। एके कालं परे दैवं पुंसः काममुतापरे।।२२।। ।।श्रीगोपालाय नमः

लवैषम्यं तत्कर्मतथात्वादिति सदृष्टांतमाह। तं धावंतमनुधावंति अनीशाः कर्माधीनाः भूतसंघाः धावंति। अनिलं धावंत
मनु रजांसीव। तत्र यथा रजांसि तमःप्रकाशबलाग्न्यादिप्रवेशेपि नानिलस्य वैषम्यं एवमीश्वरस्यापीति भावः।।२०।। अप
चयं अकालमृत्युं उपचयं कालमृत्योरपि रक्षां। यद्वा अपचयं मशकादौ उपचयं देवादौ। स्वस्थत्वात्। उपचयापचयाभ्यां
रहितोसौ विभुः दुःस्थस्य कर्माधीनस्य विदधाति।२१। एवंभूतश्चेश्वरः सर्ववादिसंमतः विवादस्तु नाममात्र इत्याह
केचिदिति पुंसः। कामं वात्स्यायनादयः। श्रुतिश्च। कामोकार्षीत्कामः करोति कामः कर्त्ता कामः कारयितेत्यादि।।२२।। श्रीः

भा० टी०
४७

ननु कर्मादीनां उरुत्वादिना स्वरूपतो भिन्नत्वात्कथमेकमस्यंतत्राह। अव्यक्तस्य अतएवाप्रमेयस्य तथापि सत्त्वेहेतुः नानाशक्ती नामुदयो यस्मात्। चिकीर्षितमेव तावत्कोपि न वेद। अथ स्वस्य संभवो यस्मात्तमीश्वरं कोवेद न कोपि वेद। अद्वेतिपाठे साक्षात्अतस्तत्वज्ञानाभावाद्विशेषांशे विवाद इत्यर्थः। तथा च श्रुतिः। को अद्धा वेद क इह प्रवोचत्कुत आजाता कुत इयं विसृष्टिः अर्वाग्देवा अस्य विसर्जनेनाथाको वेद यत आबभूवेत्यादि।२३॥ ईश्वरवादस्य प्रकृतोपयोगमाह। नवैते भ्रातुर्हंतारः उक्त

अव्यक्तस्याप्रमेयस्य नानाशक्त्युदयस्य च॥ न वै चिकीर्षितं तात को वेदाद्धा स्वसंभवं॥२३॥ न वै ते पुत्रक भ्रातु
र्हंतारो धनदानुगाः। विसर्गादानयोस्तात पुंसो दैवं हि कारणं॥२४॥ स एव विश्वं सृजति स एवावति हंति
च। अथापि ह्यनहंकारान्नाज्यते गुणकर्मभिः॥२५॥ एष भूतानि भूतात्मा भूतेशो भूतभावनः। स्वशक्त्या
मायया युक्तः सृजत्यत्ति च पाति च॥२६॥ तमेव मृत्युममृतं तात दैवं सर्वात्मनोपेहि जगत्परायणं। यस्मै
२७ बलिं विश्वसृजो हरंति गावो यथा वै नसि दामयंत्रिताः॥२७॥ × क्रोधितं कर्म कुर्वतीत्यर्थः॥२७॥×॥

मेव हेतुमनुवदति। विसर्गादानयोर्मृत्युजन्मनोः यद्वा विसर्गः सृष्टिः आदानं संहारः। दैवमीश्वर एव कारणं॥२४॥
तथापि निर्लेपतामाह। स एवेति॥२५॥ अनहंकारत्वे हेतुमाह। एष इति॥२६॥ सत्यमीश्वर एव कर्ता तथापि
हंकारादिमयानत्यक्तुं शक्यमिति वेदत आह। तमेवेति सत्तुभिः। मृत्युमभक्तानां भक्तानाममृतं। उपेहि शरणं गच्छ। न
मेवेत्यवधारणे हेतुः। यस्मै नसि नासिकायां दामभिर्बद्धा गाव इव विश्वसृजोपि नामभिर्यंत्रिता बद्धाः संतो बलिं हरंति तं ४७

तदाराधनं च तव सुशकमेवेत्याह। यः पंचवर्षः सत्वं यमाराध्य त्रिलोक्या मूर्ध्नि पदं स्थानं लेभे लब्धवानसि इदानीं तमेवान्विच्छ अवलो
कयेत्युत्तरेणान्वयः। प्रत्यंचि अक्षाणि अयस्मिन् क्रियाविशेषणं वा।२८। हरिं ध्यायंतं प्रत्याह। अंग ध्रुव मुक्तविग्रहे आत्मनि
मनसि व्यपाश्रितं अवस्थितं आत्मदृक् प्रत्यग्दृष्टिः सन्। अपंभेदाय स्मिन् तदिदं भेदमसदेव विश्वं यस्मिन्प्रतीयते तं॥२९

यः पंचवर्षो जननीं त्वं विहाय मातुः सपत्न्या वचसा भिन्नमर्मा। वनं गतस्तपसा प्रत्यगक्षमाराध्य लेभे
मूर्ध्नि पदं त्रिलोक्याः॥२८॥ तमेवमंगात्मनि मुक्तविग्रहे व्यपाश्रितं निर्गुणमेकमक्षरं। आत्मानमन्विच्छ वि
मुक्तमात्मदृग्यस्मिन्निदं भेदमसत्प्रतीयते॥२९॥ त्वं प्रत्यगात्मनि तदा भगवत्यनंत आनंदमात्र उपप
न्नसमस्तशक्तौ। भक्तिं विधाय परमां शनकैरविद्याग्रंथिं विभेत्स्यसि ममाहमिति प्ररूढं॥३०॥
संयच्छ रोषं भद्रं ते प्रतीपं श्रेयसां परं। श्रुतेन भूयसा राजन्नगदेन यथामयं॥३१॥ येनोपसृष्टात्पुरु
षाल्लोक उद्विजते भृशं। न बुधस्तद्वशं गच्छेदिच्छन्नभयमात्मनः॥३२॥

तदन्वेषणफलमाह। त्वं तदा अन्वेषणकाल एव।३०। उपदेशसारमाह संयच्छेति द्वाभ्यां। प्रतीपं प्रतिकूलं। अ
गदेनौषधेन यथा रोगं नियच्छति॥३१॥ येन रोषेणोपसृष्टात् व्याप्तात्॥३२॥ ॐ नमो भगवते वासुदेवाय॥

भा०च
४८

अन्यथा त्वया कार्यमित्याह हेलनमिति द्वाभ्यां ॥ यद्यतः जघ्निवान् घातितवान् ॥३३॥३४॥३५॥ ॥इति चतुर्थे एकादशः ॥ द्वादशे
धनदेनाभिनंदितः पुरमागतः । यशो रिष्टा हरेः स्थानमारुरोहेति कीर्त्यते ॥१॥ वैशसाद्धान्निवृत्तं ज्ञात्वा । क्षत्रियदायाद क्षत्रियपुत्र अ
त्यजः स कृतवानसि ।२। न त्वेवैतस्य कारणमस्तीत्याह न भवानिति अप्ययभावयोः मृत्युजन्मनोः ॥३॥ कथं तर्हि अहं हतोस्मीति बुद्धि

या ॥ हेलनं गिरिशभ्रातुर्धनदस्य त्वया कृतं । यज्जघ्निवान्पुण्यजनान्भ्रातृघ्नानिमर्षितः ॥३३॥ तं प्रसादय वत्साशु संनत्या
प्रश्रयोक्तिभिः ॥ न यावन्महतां तेजः कुलं नोभिभविष्यति ॥३४॥ एवं स्वायंभुवः पौत्रमनुशास्य मनुर्ध्रुवं । तेनाभिवं
दितः साकमृषिभिः स्वपुरं ययौ ॥३५॥ ॥ इति श्रीभागवते महापुराणे चतुर्थस्कंधे एकादशोध्यायः ॥११॥ ॥ छ ॥
श्रीमैत्रेय उवाच ॥ ॥ ध्रुवं निवृत्तं प्रतिबुध्य वैशसादपेतमन्युं भगवान्धनेश्वरः । तत्रागतश्चारणयक्षकिन्नरैः संस्तू
यमानोभ्यवदत्कृतांजलिं ॥१॥ धनद उवाच ॥ ॥ भो भोः क्षत्रियदायाद परितुष्टोस्मि तेनघ । यस्त्वं पितामहादेशा
द्वैरं दुस्त्यजमत्यजः ॥२॥ न भवानवधीद्यक्षान्न यक्षा भ्रातरं तव । काल एव हि भूतानां प्रभुरप्ययभावयोः ॥३॥ अहं त्वमि
त्यपार्था धीरज्ञानात्पुरुषस्य हि । स्वाप्नीवाभात्यतद्ध्यानाद्यया बंधविपर्ययौ ॥४॥ × दुःखादिः ॥४॥४ ॥श्री॥ ॥ ४८

स्तत्राह । अहं त्वमिति । आभाति प्रकाशते जायत इत्यर्थः । अतद्ध्यानात् देहानुसंधानात् । यया धिया बंधः कर्मबंधः विपर्ययौ

तत्तस्माद्गच्छ गत्वा च भज त्वं ल्युत्तरेणान्वयः । सर्वभूतात्मको विग्रहो यस्य सः ॥५॥६॥ कामम् असंकोचेन । अविशंकितः निर्भयः अनंतरं
अतिनिकटं ॥७॥ स वरायेत्यादि इत्यनुवादरूपं पृथग्वाक्यं । अतः स वव्रे इति तत्र पुनरुक्तं ॥८॥९॥ द्रव्यक्रियादेवतानां
कर्मसाध्यं फलरूपं कर्मफलप्रदं चेत्यर्थः ॥१०॥ सर्वस्यात्मनि । असर्वे सर्वोपाधिवर्जिते ॥११॥१२॥ अभोगैर्यज्ञाद्यनुष्ठानैः ॥१३
तद्गच्छ ध्रुव भद्रं ते भगवंतमधोक्षजं । सर्वभूतात्मभावेन सर्वभूतात्मविग्रहं ॥५॥ भजस्व भजनीयांघ्रिमभवाय भवच्छिदं । यु
क्तं विरहितं शक्त्या गुणमय्यात्ममायया ॥६॥ वृणीहि कामं नृप यन्मनोगतं मत्तस्त्वमौत्तानपदे विशंकितः । वरा
र्हमंबुजनाभपादयोरनंतरं त्वां वयमंग शुश्रुम ॥७॥ ॥श्रीमैत्रेय उवाच ॥ ॥ स राजराजेन वराय चोदितो ध्रु
वो महाभागवतो महामतिः ॥ हरौ स वव्रेऽचलितां स्मृतिं यया तरत्ययत्नेन दुरत्ययं तमः ॥८॥ तस्य प्रीतेन मन
सा तां दत्त्वैडविडस्ततः । पश्यतोंतर्दधे सोपि स्वपुरं प्रत्यपद्यत ॥९॥ अथायजत यज्ञेशं क्रतुभिर्भूरिदक्षि
णैः ॥ द्रव्यक्रियादेवतानां कर्म कर्मफलप्रदं ॥१०॥ सर्वात्मन्यच्युतेसर्वे तीव्रौघां भक्तिमुद्वहन् । ददर्शात्मनि
भूतेषु तमेवावस्थितं विभुं ॥११॥ तमेवं शीलसंपन्नं ब्रह्मण्यं दीनवत्सलं । गोप्तारं धर्मसेतूनां मेनिरे पितरं प्र
जाः ॥१२॥ षट्त्रिंशद्वर्षसाहस्रं शशास क्षितिमंडलं ॥ भोगैः पुण्यक्षयं कुर्वन्नभोगैरशुभक्षयं ॥१३॥ ए
ऊ वं बहुसवं कालं महात्माविकलेंद्रियः ॥ त्रिवर्गौपयिकं नीत्वा पुत्रायादान्नृपासनं ॥१४॥ श्रीकृष्ण

बहवः सवाः यागाः संवत्सरा वा यस्मिन् तं कालं त्रिवर्गसाधकं नीत्वा अविकलानि संयतानि इंद्रियाणि यस्य ॥१४॥ ॥

इदं देहादि भगवन्मायया आत्मनि स्वस्मिन्नरचितं मन्यमानः। अत्राविद्यास्वप्नदृष्टांतयति। अविद्यारचितेति।१५। आत्मा देहः आत्मादि
मायिकमपि पुनः काले नोपसृष्टमनित्यमाकलय्य विविक्त्य विशालां बदरिकाश्रमं।१६। तत्र नलकृतमष्टांगयोगमाह। तस्यां शिववार्
उदकं विगाह्य प्रविश्य निस्नानादि नियमाउक्ताः। विशुद्धकरण इति शिमादयो यमाः। आसनानि दीस्फुटमेवोक्तानि। जितो मरुत्

मन्यमान इदं विश्वं मायारचितमात्मनि॥ अविद्यारचितस्वप्नगंधर्वनगरोपमं॥१५॥ आत्मास्त्रपत्यसुहृदो बलमृद्
कोशमंतःपुरं परिविहारभुवश्च रम्याः॥ भूमंडलं जलधिमेखलमाकलय्य कालोपसृष्टमिति सप्रययौ विशालां॥१६॥ तस्यां
विशुद्धकरणः शिववार्विगाह्य बध्वासनं जितमरुन्मनसाहृताक्षः॥ स्थूले दधार भगवत्प्रतिरूप एतद्ध्यायंस्तदव्यवहि
तो व्यसृजत्समाधौ॥१७॥ भक्तिं हरौ भगवति प्रवहन्नजस्रमानंदबाष्पकलया मुहुरर्द्यमानः॥ विक्लिद्यमानहृदयः पुल
काचितांगो नात्मानमस्मरदसाविति मुक्तलिंगः॥१८॥ स ददर्श विमानाग्र्यं नभसोवतरद्ध्रुवः॥ विभ्राजयद्दशदिशो रा
कापतिमिवोदितं॥१९॥ ४ द्रवत् हृदयं यस्य। पुलकैर्व्याप्तांगः॥ १८॥ ४१६॥ ॐ नमो भगवते वासुदेवाय॥ ॥

नि
णायेन। आहृतान्यक्षाणि येन भगवतः प्रतीौ घिभ्रते स्थूले विराड्रूपे एतन्मनो दधार। ध्यायन्नव्यवहितो ध्यातृध्येयभेदशू
न्यः सन् समाधौ स्थितः। तत्स्थूलं व्यसृजत्॥१७॥ एवमजस्रं नित्यं हरौ भक्तिं प्रकर्षेण वहन् असौ ध्रुवो हमिति आत्मानं नास्मा
र। यतो मुक्तलिंगः त्यक्तशरीराभिमानः। तत्र हेतवः। आनंदबाष्पस्य कलया बिंदुप्रवाहेणाभिभूयमानः। विक्लिद्यमानं

अनुश्रुतं तद्देवप्रवरौ ददर्श त्यनुषंगः। गदामवष्टभ्य स्थितौ किरीटादिभिः सहितौ चारुणी कुंडले ययोः॥२०॥ उत्तमगायः उत्तमश्लोकस्तस्य
किंकरौ तौ विज्ञाय मधुद्विषः पार्षदप्रधानौ विति हेतोः साध्वसेन संभ्रमेण विस्मृतः पूजाक्रमः केवलं तस्य नामानि गृणन्ननाम॥ २२।२२॥
व तत्रानु देवप्रवरौ चतुर्भुजौ श्यामौ किशोरावरुणांबुजेक्षणौ॥ स्थितावष्टभ्य गदां सुवाससौ किरीटहारांगदचारुकुंडलौ॥
॥२०॥ विज्ञाय तावुत्तमगायकिंकरावभ्युत्थितः साध्वसविस्मृतक्रमः। ननाम नामानि गृणन्मधुद्विषः पार्षत्प्रधानावि
ति संहतांजलिः॥२१॥ तं कृष्णपादाभिनिविष्टचेतसं बद्धांजलिं प्रश्रयनम्रकंधरं॥ सुनंदनंदावुपसृत्य सस्मितं प्र
त्यूचतुः पुष्करनाभसंमतौ॥२२॥ ॥श्रीसुनंदनंदावूचतुः॥ ॥भोभो राजन्सुभद्रं ते वाचं नोवहितः शृणु॥ यः पंचवर्ष
स्तपसा भवान्देवमतीतृपत्॥२३॥ तस्याखिलजगद्धातुरावां देवस्य शार्ङ्गिणः॥ पार्षदाविह संप्राप्तौ नेतुं त्वां भ
गवत्पदं॥२४॥ सुदुर्जयं विष्णुपदं जितं त्वया यत्सूरयोप्राप्य विचक्षते परं॥ आतिष्ठ तच्चंद्रदिवाकरादयो ग्रहर्क्षता
राः परियंति दक्षिणं॥२५॥ अनास्थितं ते पितृभिरन्यैरप्यंग कर्हिचित्॥ आतिष्ठ जगतां वंद्यं तद्विष्णोः परमं पदं॥
२६॥ एतद्विमानप्रवरमुत्तमश्लोकमौलिना। उपस्थापितमायुष्मन्नधिरोढुं त्वमर्हसि॥२७॥ ॥श्रीमैत्रेय उवा०

२३
सुभद्रं त इति सशरीरस्यैव विष्णुपदारोहाभिप्रायं अतीतृपत् तर्पितवान्॥ आवां तस्य पार्षदौ।२४। सुदुर्जयत्वे हेतुः सूरयः सप्तर्षयोपि
यत्प्राप्य केवलमधः स्थिताः पश्यंति यच्चंद्रादयः प्रदक्षिणं यथा भवति एवं परिक्रामंति तदातिष्ठ अधितिष्ठ॥२५।२६। आयुष्मन्निति

॥३०॥ [illegible]

भा०४० मधुच्युतं वचनेस्रवतीति मधुच्युत्तां। पाठांतरे मधुच्युतं यस्यां तां मधुमत्तत्स्राविणीमित्यर्थः॥ कृतं नित्यं कर्म मंगलं वालंकरणं येन अभ्यवादय
५० त वाचयामास॥२८॥ तद्रूपं हिरण्मयं बिभ्रत् तत्रारोढुमियेष ऐच्छत्॥२९॥ ३१॥ दीनां हित्वा अगं दुर्गमं त्रिविष्टपं यास्यामीत्यनुस्मरन् उ
सिन व्यवसितमभिप्रायं व्यवसाय ज्ञात्वा देवयानेन देवमार्गेण विमानेन नीतवा॥३२॥ मुनीन् सप्तर्षीन् अतिपतितः परस्ताद्यद्विष्णोः पदं तस्य गतिः

श्रीमैत्रेय उवाच निशम्य वैकुंठनियोज्यमुख्ययोर्मधुच्युतां वाचमुरुक्रमप्रियः॥ कृताभिषेकः कृतनित्यमंगलो मु
नीन्प्रणम्याशिषमभ्यवादयत्॥२८॥ परीत्याभ्यर्च्य धिष्ण्याग्र्यं पार्षदावभिवंद्य च॥ इयेष तदधिष्ठातुं बिभ्रद्रू
पं हिरण्मयं॥२९॥ तदा दुंदुभयो नेदुर्मृदंगपणवादयः। गंधर्वमुख्याः प्रजगुः पेतुः कुसुमवृष्टयः॥३०॥ स च स्व
र्लोकमारोक्ष्यन्सुनीतिं जननीं ध्रुवः। अन्वस्मरदगं हित्वा दीनां यास्ये त्रिविष्टपं॥३१॥ इति व्यवसितं तस्य व्यव
साय सुरोत्तमौ। दर्शयामासतुर्देवीं देवयानेन गच्छतीं॥३२॥ तत्र तत्र प्रशंसद्भिः पथि वैमानिकैः सुरैः। अ
वकीर्यमाणो ददृशे कुसुमैः क्रमशो ग्रहान्॥३३॥ त्रिलोकीं देवयानेन सोऽतिव्रज्य मुनीनपि। परस्ताद्यद्ध्रुवग
तिर्विष्णोः पदमथाभ्यगात्॥३४॥ यद्भ्राजमानं स्वरुचैव सर्वतो लोकास्त्रयो ह्यनु विभ्राजंत एते। यन्नाव्रजन्जंतु
षु येऽननुग्रहाः व्रजंति भद्राणि चरंति येऽनिशं॥३५॥ शांताः समदृशः शुद्धाः सर्वभूतानुरंजनाः। यांत्यंजसाऽ
च्युतपदमच्युतप्रियबांधवाः॥३६॥ ×अच्युतप्रियो बांधवो येषां ३६॥× ५०
ध्रुवा गतिर्यस्य॥३४॥ यत् भ्राजमानमनु यस्य वा रुचा लोका विभ्राजंते ये ऽननुग्रहा निष्कृपाः ते यन्नाव्रजन् न गतवंतः॥३५॥

३७ अनिमिषं अनलसं ज्योतिषां चक्रं यस्मिन्नाहितं अर्पितं सद्भ्रमति। मेढ्यामाहितो गंभीरवेगो गवां गण इव ३८ आतोद्यं वीणां वि
तुदन् वादयन् प्रचेतसां ब्रह्मसत्रे भगवन्माहात्म्यप्रसंगेन ध्रुवमहिमप्रतिपादनपरान् श्लोकानगायत्॥३९॥ नूनमिति प
तिरेव देवता यस्याः तस्याः सुतस्य यस्तपःप्रभावः तस्य तां गतिं फलमधिगंतुं वेदवादनशीला ब्रह्मर्षयोऽपि नैव प्रभवंति। अभ्युपा

इत्युत्तानपदः पुत्रो ध्रुवः कृष्णपरायणः। अभूत्त्रयाणां लोकानां चूडामणिरिवामलः॥३७॥ गंभीरवेगोऽनिमिषं
ज्योतिषां चक्रमाहितं॥ यस्मिन्भ्रमति कौरव्य मेढ्यामिव गवां गणाः॥३८॥ महिमानं विलोक्यास्य नारदो भग
वानृषिः। आतोद्यं वितुदन्श्लोकान्सत्रेऽगायत्प्रचेतसां॥३९॥ ॥श्रीनारद उवाच॥ ॥नूनं सुनीतेः पति
देवतायाः तपःप्रभावस्य सुतस्य तां गतिं। दृष्ट्वाभ्युपायानपि वेदवादिनो नैवाधिगंतुं प्रभवंति किं नृपाः॥४०॥
यः पंचवर्षो गुरुदारवाक्शरैर्भिन्नेन यातो हृदयेन दूयता। वनं मदादेशकरोऽजितं प्रभुं जिगाय तद्भक्तगुणैः प
राजितं॥४१॥ यः क्षत्रबंधुर्भुवि तस्याधिरूढमन्वारुरुक्षेदपि वर्षपूगैः॥ षट्पंचवर्षो यदहोभिरल्पैः प्र
साद्य वैकुंठमवाप तत्पदं॥४२॥ ॥श्रीमैत्रेय उवाच॥ ॥एतत्तेऽभिहितं सर्वं यत्पृष्टोऽहमिह त्वया। ध्रुवस्यो उद्दामं उत्कृष्टं यशो यस्य ४३×
द्दामयशसश्चरितं संमतं सतां॥४३॥ ×अहोभिर्वासरैः वैकुंठं प्रसाद्य तस्य पदमवाप तत्॥४२
अभ्युपायान् भगवद्धर्मान् दृष्ट्वापि किंपुनर्नृपाः॥४०॥ तपःप्रभावं गतिं च विशिनष्टि द्वाभ्यां। गुरुदाराः पितृपत्नी सुरुचिस्तस्या वाक्शरैर्निर्भि
न्नेन हृदये न वनं यातः सन् अजितमपि योऽजिगाय वशीकृतवान्॥४१॥ तस्याधिरूढं तेन प्राप्तं पदं यो भुवि क्षत्रबंधुः क्षत्रियो भवेत्सः
तमनु वर्षसमूहैरपि आरोढुमिच्छेदपि किंतु तत्कल्पोऽप्यशक्यः दूरतः आरोहणमित्यर्थः। कथंभूतं पदं षड्वा पंचवा वर्षाणि यस्य सः

भा०च
५१

ध्रुवादेर्निमित्तं। श्रेयः ध्रुवस्थानप्रापकं। प्रशस्यं प्रशंसार्हं। अघमर्षणं पापनाशनं॥४४ अच्युतप्रियस्य ध्रुवस्य चेष्टितं श्रुत्वा यो व
र्ततेतस्य भक्तिर्भवेत्॥४५॥ तीर्थं महत्वावाप्तिस्थानं। गुणाः यत्र भवंति॥४६॥ समवाये सभायां॥४७॥ नेच्छन्निष्कामः। तत्र श्रव
णे आत्मनैवात्मानं प्रति संतुष्टो भवतीति हेतोः सिद्धिमाप्नोति॥४९ किंच सत्पथे भगवन्मार्गे अमृतरूपं ज्ञानं यो दद्यात ५०॥

धन्यं यशस्यमायुष्यं पुण्यं स्वस्त्ययनं महत्। स्वर्ग्यं ध्रौव्यं सौमनस्यं प्रशस्यमघमर्षणं॥४४॥ श्रुत्वैतच्छ्र
द्धयाभीक्ष्णमच्युतप्रियचेष्टितं। भवेद्भक्तिर्भगवति यया स्यात्क्लेशसंक्षयः॥४५॥ महत्वमिच्छतां तीर्थं श्रोतुः
शीलादयो गुणाः॥ यत्र तेजस्तदिच्छूनां मानो यत्र मनस्विनां॥४६॥ प्रयतः कीर्तयेत्प्रातः समवाये द्विजन्म
नां। सायं च पुण्यश्लोकस्य ध्रुवस्य चरितं महत्॥४७॥ पूर्णिमास्यां सिनीवाल्यां द्वादश्यां श्रवणेऽथवा। दिन
क्षये व्यतीपाते संक्रमेऽर्कदिनेऽपि वा॥४८॥ श्रावयेच्छ्रद्दधानानां तीर्थपादपदाश्रयः॥ नेच्छंस्तत्रात्मना
त्मानं संतुष्ट इति सिध्यति॥४९॥ ज्ञानमज्ञाततत्वाय यो दद्यात्सत्पथेऽमृतं। कृपालोर्दीननाथस्य
स्य देवास्तस्यानुगृह्णते॥५०॥ इदं मया तेऽभिहितं कुरूद्वह ध्रुवस्य विख्यातविशुद्धकर्मणः॥ हित्वा
र्भकः क्रीडनकानि मातुर्गृहं च विष्णुं शरणं यो जगाम॥५१॥ ॥छ॥ ॥ ॥ इति श्रीभाग ५१

ध्रुवस्य चरितं मया तेऽभिहितं। मातुर्गृहं च हित्वा।५१। इति चतुर्थे द्वादशः॥ ॥भागवते महापु० च० ध्रुवचरिते द्वादशः॥

एवं पंचभिरध्यायैर्ध्रुवचर्यानुवर्णिता। अथैकादशभिश्चित्रैः पृथुचारित्रमुच्यते॥१॥ तत्र त्रयोदशे वक्तुं पृथोर्जन्म ध्रुवान्वये। अंगो वेन
पिता पुत्रकौर्यद्भिन्न इतीर्यते। २॥ प्ररूढो भावो भक्तिर्यस्य।१। अन्ववाये वंशे।२। नारदेन प्रचेतसां सत्रे वर्णिताः कथाः प्रष्टुं तन्महि
मानमाह मन्य इति। देवस्य दर्शनं यस्य हरेः परिचर्याप्रकारः क्रियायोगः पंचरात्रेणेन प्रोक्तः स्वधर्मशीलैः प्रचेतोभिः।।४।५।।

श्रीसूत उवाच॥ ॥निशम्य कौषारविणोपवर्णितं ध्रुवस्य वैकुंठपदाधिरोहणं॥ प्ररूढभावो भगवत्यधोक्ष
जे प्रष्टुं पुनस्तं विदुरः प्रचक्रमे॥१॥ ॥श्रीविदुर उवाच॥ ॥ के ते प्रचेतसो नाम कस्यापत्यानि सुव्रत। कस्या
न्ववाये प्रख्याताः कुत्र वा सत्रमासत॥२॥ मन्ये महाभागवतं नारदं देवदर्शनं॥ येन प्रोक्तः क्रियायोगः परिचर्यावि
धिर्हरेः॥३॥ स्वधर्मशीलैः पुरुषैर्भगवान्यज्ञपूरुषः। इज्यमा×तं×नो भक्तिमता नारदेनेरितः किल॥४॥ यास्ता दे
वर्षिणा तत्र वर्णिता भगवत्कथाः। मह्यं शुश्रूषवे ब्रह्मन्कार्त्स्न्येनाचष्टुमर्हसि॥५॥ ॥श्रीमैत्रेय उवाच॥ ध्रु
वस्य चोत्कलः पुत्रः पितरि प्रस्थिते वनं। सार्वभौमश्रियं नैच्छदधिराजासनं पितुः॥६॥ स जन्मनोपशांतात्मा
निःसंगः समदर्शनः॥ ददर्श लोके विततमात्मानं लोकमात्मनि॥७॥

ध्रुवस्य वंशे तेजाता इति वक्तुं ध्रुवस्य वंशमनुक्रामति ध्रुवस्येत्यादिना। पितुः सार्वभौमश्रियं नैच्छत् अधिराजा
सनं च। अनिच्छायां हेतुमाह। स इति चतुर्भिः॥६॥७॥

भा॰४
५२
आत्मानं स्वरूपभूतं ब्रह्म अवरुंधानः॥ आत्मनुसंदधानः। आत्मनो नान्यं तं दैक्षत। स्वयं तु सर्वस्मादन्यः सन्। कथंभूतं ब्रह्म निर्वाणं शांतं।
अवबोधरसेनैकात्म्यं यस्य। कथंभूतः अविच्छिन्नो योयोगः स एवाग्निस्तेन दग्धः कर्ममल आशयो वासनायस्य ९॥ जडादीनामिव
आकृतिर्यस्य। तथाभूतो लक्षितः। अतन्मतिः न तेषामिव मतिर्यस्य। सर्वज्ञत्वात्प्रशांतान्यर्चिंषि ज्वाला यस्यानलस्य तद्वत्स्थितः १०

आत्मानं ब्रह्म निर्वाणं प्रत्यस्तमितविग्रहं॥ अवबोधरसैकात्म्यमानंदमनुसंततं॥८॥ अव्यवच्छि-
न्नयोगाग्निदग्धकर्ममलाशयः॥ स्वरूपमवरुंधानो नात्मनोन्यं तदैक्षत॥९॥ जडांधबधिरोन्मत्त-
मूकाकृतिरतन्मतिः॥ लक्षितः पथि बालानां प्रशांतार्चिरिवानलः॥१०॥ मत्वा तं जडमुन्मत्तं कुलवृ-
द्धाः समंत्रिणः॥ वत्सरं भूपतिं चक्रुर्यवीयांसं भ्रमेः सुतं॥११॥ स्ववीथिर्वत्सरस्येष्टा भार्यासूत
षडात्मजान्॥ पुष्पार्णं तिग्मकेतुं च इषमूर्जं वसुं जयं॥१२॥ पुष्पार्णस्य प्रभा भार्या दोषा च
द्वे बभूवतुः॥ प्रातर्मध्यंदिनं सायं इति ह्यासन्प्रभासुताः॥१३॥ प्रदोषो निशिथो व्युष्ट इति दो-
षासुतास्त्रयः॥ व्युष्टः सुतं पुष्करिण्यां सर्वतेजसमादधे॥१४॥ स चक्षुः सुतमाकूत्यां पत्न्यां म-
नुमवाप ह॥ मनोरसूत महिषी विरजान्नड्वला सुतान्॥१५॥ पुरुं कुत्सं त्रितं द्युम्नं सत्यवंतमृ-
तं व्रतं॥ अग्निष्टोममतीरात्रं प्रद्युम्नं शिबिमुल्मुकं॥१६॥ उल्मुकोजनयत्पुत्रान्पुष्करिण्यां षडु-
त्तमान्॥ अंगं सुमनसं ख्यातिं क्रतुमंगिरसं गयं॥१७॥
यवीयांसं उत्कलात्कनिष्ठं॥११॥ इष्टा प्रिया भार्या १२।१३॥ निशिथः निशीथः।१४। स सर्वतेजाः चक्षुः संज्ञं मनुं सुतमवाप

मनोः महिषी नड्वला विरजान् ... तानसूत ॥१५॥१६॥१७॥
५२

१८ अंग विदुर। वा गेव वज्रं येषां।१९। मथने हेतुः अराजक इति। आद्यः पुरग्रामादीनां तेन रचितत्वात्॥२०॥ यद्यस्याः प्रजाया हेतोर्विमनाः
सन्ययौ।२१। किं वा अंगः अपराधं वेनं उद्दिश्य आलक्ष्य।२२। यतोयमधर्मं इत्याह। नावध्येयः अवज्ञेयोपि न भवति।२३। पराव-

सुनीथांगस्य या पत्नी सुषुवे वेनमुल्बणं॥ यद्दौःशील्यात्स राजर्षिर्निर्विण्णो निरगात्पुरात्॥१८॥ यमंग शेपुः कुपिताः
वाग्वज्रा मुनयः किल। गतासोस्तस्य भूयस्ते ममंथुर्दक्षिणं करं॥१९॥ अराजके तदा लोके दस्युभिः पीडिताः प्रजाः
जातो नारायणांशेन पृथुराद्यः क्षितीश्वरः॥२०॥ ॥विदुर उवाच॥ ॥ तस्य शीलनिधेः साधोर्ब्रह्मण्यस्य म-
हात्मनः। राज्ञः कथमभूद्दुष्टा प्रजा यद्विमना ययौ॥२१॥ किं वांहो वेन उद्दिश्य ब्रह्मदंडमयूयुजन्। दंडव्रतधरे
राज्ञि मुनयो धर्मकोविदाः॥२२॥ नावध्येयः प्रजापालः प्रजाभिरघवानपि। यदसौ लोकपालानां बिभर्त्यो-
जः स्वतेजसा॥२३॥ एतदाख्याहि मे ब्रह्मन्सुनीथात्मजचेष्टितं। श्रद्दधानाय भक्ताय त्वं परावरवित्तमः॥२४
श्रीमैत्रेय उवाच॥ ॥ अंगोश्वमेधं राजर्षिराजहार महाक्रतुं। नाजग्मुर्देवतास्तस्मिन्नाहूता ब्रह्मवादिभिः॥
२५॥ तमूचुर्विस्मितास्तत्र यजमानमथर्त्विजः। हवींषि हूयमानानि न ते गृह्णंति देवताः॥२६॥ राजन्ह-
वींष्यदुष्टानि श्रद्धयासादितानि ते। छंदांस्ययातयामानि योजितानि धृतव्रतैः॥२७॥
राष्ट्रदां मध्ये अतिश्रेष्ठः।२४॥ अभावी पुत्रः काम्यकर्मणा बलाद्दापादितो न सुखाय भवेदिति द्योतयन्नंगस्य पुत्रोत्पत्तिक्रममाह
अंग इत्यादिना।२५।२६। अयातयामानि अगतवीर्याणि।२७।

भा० ४
५३

२८। यद्वेग्रहीतमौनोपिवाचंव्यसृजत्। प्रायुंक्त। २९। आहुता आहूताः ग्रहान्सोमपात्राणि इह यज्ञे न गृह्णंति। ३०। इह जन्मनि
तावन्मनाक् ईषदपि अघंनास्थितं। कथंविज्ञातस्याघस्यसद्य एव प्रायश्चित्तैःक्षालनात्। किंतु प्राक्तनमेकमघमस्तिय

नविदामेहदेवानांहेलनंवयमण्वपि। यन्नगृह्णंतिभागान्स्वान्येदेवाःकर्मसाक्षिणः॥२८॥ ॥श्रीमैत्रेय उवाच॥
अंगोद्विजवचःश्रुत्वायजमानःसुदुर्मनाः। तत्प्रष्टुंव्यसृजद्वाचंसदस्यांस्तदनुज्ञया॥२९॥ नागच्छंत्याहुतादे
वानगृह्णंतिग्रहानिह। सदसस्पतयोब्रूतकिमवद्यंमयाकृतं॥३०॥ सदसस्पतयऊचुः॥ नरदेवेहभव
तोनाघंतावन्मनाक्स्थितं। अस्त्येकंप्राक्तनमघंयदिहेदृक्त्वमप्रजः॥३१॥ तथासाधयभद्रंते आ
त्मानंसुप्रजंनृप। इष्टस्तेपुत्रकामस्यपुत्रंदास्यतियज्ञभुक्॥३२॥ तथास्वभागधेयानिग्रहीष्यंतिदिवौ
कसः। यद्यज्ञपुरुषःसाक्षादपत्यायहरिर्वृतः॥३३॥ तांस्तान्कामान्हरिर्दद्याद्यान्यान्कामयतेजनः
आराधितोयथैवैषतथापुंसांफलोदयः॥३४॥ इतिव्यवसिताविप्रास्तस्यराज्ञःप्रजातये। पुरोडा
शंनिरवपंछिपिविष्टायविष्णवे॥३५॥ ×शिपिषुयज्ञरूपेण प्रविष्टाय तथा च श्रुतिः यज्ञो वै विष्णुः पशवः शिपिर्यज्ञ एव
पशुषु प्रतितिष्ठतीति ॥३५॥

यस्मात् ईदृक् गुणाधिकोपि त्वं प्रजारहितः। ३१। अतो यथा देवा हविर्गृह्णंति तथात्मानं सुप्रजं साधय। कथं साधनीयं
तथाह। इष्ट इति। ३२। तथा सति स्वभागान्ग्रहीष्यंति। यद्यतो हरिः साक्षाद्वृतः स्यात् अतस्तेन सह वै देवा आगमि ५३
ष्यंतीर्थः। ३३। ननु तितुच्छान्कामान्हरिः कथं दद्यात्तत्राह। तांस्तानिति॥ ३४। प्रजातये पुत्रोत्पत्तये। शिपिविष्टाय शि

तस्मादिति योग्यतयाग्नेः। ३६। पत्न्यै प्रादात्। ३७। पुमांसं सूतेनेनेति तथा। तत्प्राश्य पत्युःसकाशाद्गर्भमादधे अप्रजा सती
३८। मातामहं मृत्युं। मृत्योर्हि पुत्री सुनीथा। ३९। मृगयुर्लुब्धकःसन्। तं दृष्ट्वा वेनोसावागच्छतीति जनः सर्वोप्यरौत् चुक्रोश॥४०

तस्मात्पुरुषउत्तस्थौहेममाल्यमलांबरः। हिरण्मयेनपात्रेणसिद्धमादायपायसं॥३६॥ सविप्रानुमतोराजागृ
हीत्वांजलिनौदनं। अवघ्रायमुदायुक्तःप्रादात्पत्न्याउदारधीः॥३७॥ सातत्पुंसवनंराज्ञीप्राश्यवैपत्युराद
धे। गर्भंकालउपावृत्तेकुमारंसुषुवेप्रजा॥३८॥ सबालएवपुरुषोमातामहमनुव्रतः। अधर्मांशोद्भवंमृत्युं
तेनाभवदधार्मिकः॥३९॥ सशरासनमुद्यम्यमृगयुर्वनगोचरः। हंत्यसाधुर्मृगान्दीनान्वेनो
सावित्यरौज्जनः॥४०॥ आक्रीडेक्रीडतोबालान्वयस्यानतिदारुणः। प्रसह्यनिरनुक्रोशःपशुमारममा
रयत्॥४१॥ तंविचक्ष्यखलंपुत्रंशासनैर्विविधैर्नृपः। यदानशासितुंकल्पोभृशमासीत्सुदुर्मनाः॥४२॥
प्रायेणाभ्यर्चितोदेवोयेप्रजागृहमेधिनः। कदपत्यभृतंदुःखंयेनविंदंतिदुर्भरं॥४३॥ यतःपापीयसीकी
र्तिरधर्मश्चमहान्नृणां। यतोविरोधःसर्वेषांयतआधिरनंतकः॥४४॥ कस्तंप्रजापदेशंवैमोहबंधनमा
त्मनः। पंडितोबहुमन्येतयदर्थाःक्लेशदागृहाः॥४५॥

आक्रीडे क्रीडास्थाने बालान्पशुवन्निवध्य मारयत्। ४१। विचक्ष्य दृष्ट्वा। ४२। दुर्मनसस्तस्य कुपुत्रनिंदावाक्यान्याह। प्रायेणेति त्रिभिः। अ
प्रजायैरभ्यर्चितः। तत्र हेतुः। कुत्सितैरपत्यैःसंभृतं दुर्भरं धारयितुमशक्यं दुःखं येन विंदंति। ४३। सर्वेषां सर्वैःसह आधिर्मानसी व्य
था। ४४। तं प्रजापदेशं पुत्रनाममात्रमपि आत्मनो मोहेन बंधनं। यदर्थाः यन्निमित्ताः क्लेशदा गृहा भवंति॥ ४५॥ छ

भा०टी
५४

इदानीं निर्वेदहेतुत्वेन कुत्सितमेवापत्यमभिनंदति। कदपत्यमिति। शुचां पदाः शोकानां स्थानानां। वरत्वे हेतुः। निर्विद्यतेति। न कुतः यद्यतः
कदपत्यात् ह्रतः क्लेशनिवहाः भवंति।४६। महतामुदयानां विभूतीनां उदयो यस्मिन् तस्मात् ह्रतात्। ततः। यावनं सूतेस्म तत्।४७। प्रजाः पुरो
हिताद्यश्च अविविक्युः अन्वेषितवतः। तं तु तत्रैव संतमपि नापश्यन्निति दृष्टांतेनाह। यथेति।४८। साश्रवः रुदंतः भर्तुर्विप्लवं नाशं अद

कदपत्यं वरं मन्ये सदपत्याच्छुचां पदात्। निर्विद्येत गृहान्मर्त्यो यत्क्लेशनिवहा गृहाः॥४६॥ एवं स निर्विण्णमना नृपो
गृहान्निशीथ उत्थाय महोदयोदयात्। अलब्धनिद्रोऽनुपलक्षितो नृभिर्हित्वा गतो वेनसुवं प्रसुप्तां॥४७॥ विज्ञा
य निर्विद्य गतं पतिं प्रजाः पुरोहितामात्यसुहृद्गणादयः। विचिक्युरुर्व्यामतिशोककातरा यथा निगूढं पुरुषं कुयो
गिनः॥४८॥ अलक्षयंतः पदवीं प्रजापतेर्हतोद्यमाः प्रत्युपसृत्य ते पुरीं। ऋषीन्समेतानभिवंद्य साश्रवो न्य
वेदयन्पौरव भर्तृविप्लवं॥४९॥ ॥ इति श्रीभागवते महापुराणे चतुर्थस्कंधे त्रयोदशोध्या
यः॥ ॥श्रीमैत्रेय उवाच॥ ॥भृग्वादयस्ते मुनयो लोकानां क्षेमदर्शिनः। गोप्तर्यसति वै नृणां पश्यंतः पशुसा
म्यतां॥१॥ वीरमातरमाहूय सुनीथां ब्रह्मवादिनः। प्रकृत्यसंमतं वेनमभ्यषिंचत्पतिं भुवः॥२॥ श्रुत्वा नृपासनग
तं वेनमत्युग्रशासनं। निलिल्युर्दस्यवः सद्यः सर्पत्रस्ता इवाखवः॥३॥ ×चोरा लीना बभूवुः॥३॥

र्शनमित्यर्थः॥४९॥ इति चतुर्थे त्रयोदशः॥ ॥चतुर्दशे तु दुष्पुत्रभयादंगे गते गोद्विजैः। अभिषिक्तस्य वेनस्य रोषात्तैर्वध उच्यते। ५४
क्षेमदर्शिनः क्षेमचिंतकाः पशुसमानरूपतां पश्यंतः।१। अमात्यादीनां प्रकृतीनामसंमतमपि पाठांतरे प्रकृत्या स्वभावेनासंमतं।२।

आरूढं नृपस्थानं राजासनं येन। अष्टविभूतिभिर्लोकपालैश्वर्यैः।४।५।६। सत्रिणः मिलिताः संतः।७। मूलत आग्रतश्च दीप्ते ज्वलिते
काष्ठे तन्मध्यवर्त्तिनां पिपीलिकादीनां यथा उभयतो व्यसनं। एवं तस्करेभ्यः पालकाच्च दुःखप्राप्तमित्यर्थः।८। तदेवाह। अराजकभ

स आरूढनृपस्थान उन्नद्धोऽष्टविभूतिभिः। अवमेने महाभागांस्तब्धः संभावितः स्वतः॥४॥ एवं मदांध उत्सिक्तो निरं
कुश इव द्विपः। पर्यटन्रथमास्थाय कंपयन्निव रोदसी॥५॥ न यष्टव्यं न दातव्यं न होतव्यं द्विजाः क्वचित्। इति न्यवारयद्धर्मं
भेरीघोषेण सर्वतः॥६॥ वेनस्यावेक्ष्य मुनयो दुर्वृत्तस्य विचेष्टितं। विमृश्य लोकव्यसनं कृपयोचुः स्म सत्रिणः॥७॥ अ
हो उभयतः प्राप्तं लोकस्य व्यसनं महत्। दारुण्युभयतो दीप्ते इव तस्करपालयोः॥८॥ अराजकभयादेष कृतो राजा
तदर्हणः। ततोप्यासीद्भयं त्वद्य कथं स्यात्स्वस्ति देहिनां॥९॥ अहेरिव पयःपोषः पोषकस्याप्यनर्थ[illegible]त्। वेनः
प्रकृत्यैव खलः सुनीथागर्भसंभवः॥१०॥ निरूपितः प्रजापालः स जिघांसति वै प्रजाः। तथापि सांत्वयेमामुं नास्मा
स्तत्पातकं स्पृशेत्॥११॥ तद्विद्वद्भिरसद्वृत्तो वेनोऽस्माभिः कृतो नृपः। सांत्वितो यदि नो वाचं न ग्रहीष्यत्यधर्मकृत्
॥१२॥ लोकधिक्कारसंदग्धं दहिष्यामः स्वतेजसा। एवमध्यवसायैनं मुनयो गूढमन्यवः। उपव्रज्याब्रुवन्वेनं सां
त्वयित्वाथ सामभिः॥१३॥ ×शे हितुः तत्पातकं त्वं विद्वद्भिः।१२। गूढमन्युर्येषां। सामभिः। प्रियोक्तिभिः॥१३॥ श्री

यादि अनतर्हणः राज्यानर्हः।९। अस्माकमप्यनिष्टं जातमित्याह। अहेर्यथा पयःपोषः क्षीरेण पोषणं पोषकस्याप्यनर्थं बिभर्त्ति पुष्णा
ति। तदेवाह। वेन इति।१०। निरूपितः नियुक्तोऽस्माभिः। सांत्वयेम। उपपत्तिभिः प्रार्थयिष्यामः तस्य पातकं।११। स्वस्य तस्य पातकस्प

१४। निष्कामानां आनंत्यं मोक्षमपि। १५। मा विनशेत् मा विनश्यतु। १६। असाधवो ये अमात्याः तेभ्यः यथायथा शास्त्रं १७। २। स
र्वान् लोकान् अतत्पालान् अमरान् अतत्प्राषकान्य ज्ञांश्च संगृह्णाति नियच्छतीति तथा तं। विचित्रैः द्रव्ययज्ञादिभिः भवाय समृद्धये। स्व

मुनयऊचुः॥ ॥नृपवर्य निबोधैतद्यत्ते विज्ञापयाम भोः। आयुःश्रीबलकीर्तीनां तव तात विवर्द्धनं॥१४॥ धर्म आच
रितः पुंसां वाङ्मनःकायबुद्धिभिः। लोकान्विशोकान्वितरत्यथानंत्यमसंगिनां॥१५॥ स ते मा विनशेद्वीर प्रजानां
क्षेमलक्षणः। यस्मिन्विनष्टे नृपतिरैश्वर्यादवरोहति॥१६॥ राजन्नसाध्वमात्येभ्यश्चोरादिभ्यः प्रजा नृपः। र
क्षन्यथा बलिं गृह्णन्निह प्रेत्य च मोदते॥१७॥ यस्य राष्ट्रे पुरे चैव भगवान्यज्ञपूरुषः। इज्यते स्वेन धर्मेण जनै
र्वर्णाश्रमात्मकैः॥१८॥ तस्य राज्ञो महाभाग भगवान्भूतभावनः। परितुष्यति विश्वात्मा तिष्ठतो निजशास
ने॥१९॥ तस्मिंस्तुष्टे किमप्राप्यं जगतामीश्वरेश्वरे। लोकाः सपाला ह्येतस्मै हरंति बलिमादृताः॥२०॥ तं
सर्वलोकामरयज्ञसंग्रहं त्रयीमयं द्रव्यमयं तपोमयं। यज्ञैर्विचित्रैर्यजतो भवाय ते राजन्स्वदेशाननुरोद्धु
मर्हसि॥२१॥ यज्ञेन युष्मद्विषये द्विजातिभिर्वितायमानेन सुराः कला हरेः। स्विष्टाः सुतुष्टाः प्रदिशंति वांछितं
तद्धेलनं नार्हसि वीर चेष्टितुं॥२२॥ वेन उवाच॥ ॥बालिशा बत यूयं वा अधर्मे धर्ममानिनः। ये वृत्तिदं पतिं हित्वा
जारं पतिमुपासते॥२३॥ ४ बालिशाः अज्ञाः वृत्तिदं अन्नादिप्रदं मां हित्वा॥२३॥ ५५
देशान् तद्वासिनो जनान् अनुरोद्धुं अनुवर्तितुं। २१। युष्मद्विषये त्वद्देशे हरेः कलाः अंशाः सुराः तेषां सुराणां हेलनं अवज्ञां। २२।

२४। भर्तृस्नेहो विदूरे येषां २५। २६। देहे भवंति नृपतेः। अतो नृपतिरेवेश्वरः। इत्येतदंशाद् इति भावः। २७। बलिं करादिकं आग
भुक् आराध्यः। २८। २९। तेन असत्कृताः भग्नायां याञ्चायां। ३०। ३१। ३२। परिचक्षीत विनिंदेत्। अशुभं वेनं विना। कृतघ्न

अवजानंत्यमी मूढा नृपरूपिणमीश्वरं। नानुविंदंति ते भद्रमिह लोके परत्र च॥२४॥ को यज्ञपुरुषो नाम यत्र
वो भक्तिरीदृशी। भर्तृस्नेहविदूराणां यथा जारे कुयोषितां॥२५॥ विष्णुर्विरिंचो गिरिश इंद्रो वायुर्यमो रविः
पर्जन्यो धनदः सोमः क्षितिरग्निरपांपतिः॥२६॥ एते चान्ये च विबुधाः प्रभवो वरशापयोः। देहे भवंति नृप
तेः सर्वदेवमयो नृपः॥२७॥ तस्मान्मां कर्मभिर्विप्रा यजध्वं गतमत्सराः। बलिं च मह्यं हरत मत्तोऽन्यः कोऽग्रभु
क् पुमान्॥२८॥ ॥श्रीमैत्रेय उवाच॥ ॥ इत्थं विपर्ययमतिः पापीयानुत्पथं गतः। अनुनीयमानस्त
द्याञ्चां न चक्रे भ्रष्टमंगलः॥२९॥ इति तेऽसत्कृतास्तेन द्विजाः पंडितमानिना। भग्नायां भव्ययाञ्चायां तस्मै वि
दुर कुद्धाः॥३०॥ हन्यतां हन्यतामेष पापः प्रकृतिदारुणः। जीवन् जगदसावाशु कुरुते भस्मसाद्ध्रुवं॥३१॥
नायमर्हत्यसद्वृत्तो नरदेववरासनं। योऽधियज्ञपतिं विष्णुं विनिंदत्यनपत्रपः॥३२॥ को वैनं परिचक्षीत वेन
मेकमृतेऽशुभं। प्राप्त ईदृशमैश्वर्यं यदनुग्रहभाजनः॥३३॥ इत्थं व्यवसिता हंतुमृषयो रूढमन्यवः। वि
जघ्नुर्हुंकृतैर्वेनं हतमच्युतनिंदया॥३४॥
तामाहुः। यदनुग्रह विषयः सन् ईदृशमैश्वर्यं यः प्राप्तः। रूढं गूढमन्यवः इदानीं रूढमन्यवः हुंकृतैः हुंकारैः॥३४॥ ॥

स्वाश्रमपदं प्रति ऋषिभिर्गते गमनं कृते । विद्यायोगेन मंत्रसहितया युक्त्या । ३५ । पुंवद्भावश्चार्षः सरस्वत्याः सलिले आप्लुता इत्यर्थः । ३६
तदोत्पातान्वीक्ष्य भुवो भद्रं न भवेत्किमित्याहुश्च ॥ ३७ ॥ एवं मृशंतस्त ऋषयः स्थिताः तदा धावतां चोराणां भूरिः पांसुः समुत्थितः ॥ ३८

ऋषिभिः स्वाश्रमपदं गते पुत्रकलेवरं । सुनीथा पालयामास विद्यायोगेन शोचती ॥ ३५ ॥ एकदा मुनयस्ते तु सरस्व
त्सलिलाप्लुताः ॥ हुत्वाग्नीन्सत्कथाश्चक्रुरुपविष्टाः सरित्तटे ॥ ३६ ॥ वीक्ष्योत्थितान्महोत्पातानाहुर्लोकभयंक
रान् । अप्यभद्रमनाथाया दस्युभ्यो न भवेद्भुवः ॥ ३७ ॥ एवं मृशंत ऋषयो धावतां सर्वतोदिशं । पांसुः समुत्थितो भू
रिश्चोराणामभिलुंपतां ॥ ३८ ॥ तदुपद्रवमाज्ञाय लोकस्य वसु लुंपतां । भर्तर्युपरते तस्मिन्नन्योन्यं च जिघां
सतां ॥ ३९ ॥ चोरप्रायं जनपदं हीनसत्वमराजकं । लोकान्नावारयंछक्ता अपि तद्दोषदर्शिनः ॥ ४० ॥ ब्रा
ह्मणः समदृक् शांतो दीनानां समुपेक्षकः । स्रवते ब्रह्म तस्यापि भिन्नभांडात्पयो यथा ॥ ४१ ॥ नांगस्य वंशो
राजर्षेरेष संस्थातुमर्हति । अमोघवीर्या हि नृपा वंशेस्मिन्केशवाश्रयाः ॥ ४२ ॥

ततस्तदा तेषां लोकस्य धनं लुंपतां जिघांसतां चोपद्रवमाज्ञाय ॥ ३९ ॥ तथा चोरप्रायमराजकं हीनसत्वं च जनपदमाज्ञाय श
क्ताश्च यवारणे दोषदर्शिनोपि जनान् लुंपतो लोकान् नावारयन्नित्यन्वयः ॥ ४० ॥ शक्तानां क्षत्रियाणामवारणे दोष
इति किं वक्तव्यं समदृगपि शांतोपि ब्राह्मणोपि यदि दीनानां समुपेक्षको भवेत् तर्हि तस्यापि ब्रह्म तपः स्रवति ॥ ४१ ॥ ४२ ॥ ५६

अतउपेक्षादोषपरिहाराय नांगस्येत्यादि विनिश्चित्य महीपतेरूरुं तरसा ममंथुरित्यन्वयः संस्थातुं नाशं गंतुं । यद्वा ऋषय एवलुं
पतो लोकान्नावारयन् । कथंभूताः हुंकारेणैव वेनं निवारयितुं शक्ता अपि । तर्हि तस्मिन्निवारणे तन्मरणादिदोषदर्शिनः । न चोद्भू
सत । चोरोपद्रुतदीनोपेक्षायां तपोहानिप्रसंगात् । नरान्यं तन्निवारकं राजानमकुर्वन् । अंगवंशोच्छेदस्यानर्हत्वात् अतो

विनिश्चित्यैवमृषयो विपन्नस्य महीपतेः । ममंथुरूरुं तरसा तत्रासीद्बाहुको नरः ॥ ४३ ॥ काककृष्णोतिह्रस्वां
गो ह्रस्वबाहुर्महाहनुः । ह्रस्वपान्निम्ननासाग्रो रक्ताक्षस्ताम्रमूर्द्धजः ॥ ४४ ॥ तं तु तेवनतं दीनं किं करोमीति वा
दिनं । निषीदेत्यब्रुवन्तात स निषादस्ततोभवत् ॥ ४५ ॥ तस्य वंश्यास्तु नैषादा गिरिकाननगोचराः । येनाहर
ज्जायमानो वेनकल्मषमुल्बणं ॥ ४६ ॥ ॥ इति श्रीभागवते महापुराणे चतुर्थस्कंधे नैषादोत्पत्तिर्ना
म चतुर्दशोध्यायः ॥ ॥ श्रीमैत्रेय उवाच ॥ ॥ अथ तस्य पुनर्विप्रैरपुत्रस्य महीपतेः ॥ बाहुभ्यां मथ्यमा
नाभ्यां मिथुनं समपद्यत ॥ १ ॥ तद्दृष्ट्वा मिथुनं जातमृषयो ब्रह्मवादिनः । ऊचुः परस्परं तुष्टा विदित्वा भगव
त्कलां ॥ २ ॥ ×पपरमसंतुष्टा । २

वेनस्यैव देहं ममंथुरिति योयं बाहुको वामनः । ४३ । तमेवाह । काक इव कृष्णः । महत्यौ हनू कपोलप्रांतौ यस्य । ह्रस्वौ पा
दौ यस्य । ४४ । ४५ । गिरिः काननं च गोचर आश्रयो न तु पुरादिप्रवेशो येषां ते । तत्र हेतुः । येन कारणेनासावहरत् । तत
स्तस्य वंश्यास्तथाभूताः । ४६ । चतुर्थे चतुर्दशः ॥ ततः पंचदशे विप्रैर्मथ्यमानाद्धि वेनबाहुतः । जातस्य तु पृथोरूक्तमभिषेकादि ॥

भा०४ किमृत्वुरित्यत आह एष इति चतुर्भिः। लक्ष्म्याः संभूतिः कला।३। अत्रयः पुमान्सतु महाराजो भविष्यति।४। सुदती शोभमान
५७ दंतवती। गुणानां भूषणानां च भूषणा भूषणरूपा अवरुंधती भर्तृत्वेन भजंती भविष्यति।५। अत्र हेतुः। एष इति। लोकस्य
रिरक्षया रिरक्षयिषया।६। स्वः स्त्रियः अप्सरसो नृत्यंति स्म।७।८। दैवैः सह सृत्य आगत्य वैन्यस्य पृथोः चिह्नं रे

ऋषय ऊचुः॥ ॥एष विष्णोर्भगवतः कला भुवनपालिनी। इयं च वै लक्ष्म्याः संभूतिः पुरुषस्यानपायिनी॥३॥ अ
यं तु प्रथमो राज्ञां पुमान्प्रथयिता यशः। पृथुर्नाम महाराजो भविष्यति पृथुश्रवाः॥४॥ इयं देवी सुदती गुणभूष
णभूषणा। अर्चिर्नाम वरारोहा पृथुमेवावरुंधती॥५॥ एष साक्षाद्धरेरंशो जातो लोकरिरक्षया। इयं च तत्प
रा हि श्रीरनुजज्ञेनपायिनी॥६॥ प्रशंसंति स्म तं विप्रा गंधर्वप्रवरा जगुः। मुमुचुः सुमनोधाराः सिद्धा नृत्यंति स्वः
६ स्त्रियः॥७॥ शंखतूर्यमृदंगाद्या नेदुर्दुंदुभयो दिवि। तत्र सर्व उपाजग्मुर्देवर्षिपितृणां गणाः॥८॥ ब्रह्मा जगद्गुरु
र्देवैः सहासृत्य सुरेश्वरैः। वैन्यस्य दक्षिणे हस्ते दृष्ट्वा चिह्नं गदाभृतः॥९॥ पादयोररविंदं च तं वै मेने हरेः कलां
यस्याप्रतिहतं चक्रमंशः स परमेष्ठिनः॥१०॥ तस्याभिषेक आरब्धो ब्राह्मणैर्ब्रह्मवादिभिः। आभिषेचनिका
न्यस्मै आजह्रुः सर्वतो जनाः॥११॥ सरित्समुद्रा गिरयो नागा गावः खगा मृगाः। द्यौः क्षितिः सर्वभूतानि समाज ५७
ह्रुरुपायनं १२॥
रवात्मकं चक्रं।९। अप्रतिहतं रेखांतरैरभिन्नं चक्रं यस्य चिह्नं स परमेश्वरस्यांशः।१०। आभिषेचनिकानि अभिषेकसाधनानि ११।१२।

१३। हे वीर। वरासनं उत्तमासनं। सलिलस्य स्रावो यस्मात्।१४। हे वालव्यजने।१५। ब्रह्ममयं वर्म कवचं। तत्पत्नी श्रीः श्रियं संपदं।१६
दश चंद्राकाराणि बिंबानि कोशे यस्य तं असिं खड्गं। शतचंद्रं वर्म। रूपाश्रयं अतिसुंदरं।१७। अतस्य गोश्च शृंगाभ्यां निर्मितं चापं। यो ५८
सोभिषिक्तो महाराजः सुवासाः साध्वलंकृतः। पत्न्यार्चिषालंकृतया विरेजेग्निरिवापरः॥१३॥ तस्मै जहार धनदो हैमं वी
र वरासनं। वरुणः सलिलस्रावमातपत्रं शशिप्रभं॥१४॥ वायुश्च वालव्यजने धर्मः कीर्तिमयीं स्रजं। इंद्रः किरीटमुत्कृ
ष्टं दंडं संयमनं यमः॥१५॥ ब्रह्मा ब्रह्ममयं वर्म भारती हारमुत्तमं। हरिः सुदर्शनं चक्रं तत्पत्न्यव्याहतां श्रियं॥१६॥
दशचंद्रमसिं रुद्रः शतचंद्रं तथांबिका। सोमोमृतमयानश्वांस्त्वष्टा रूपाश्रयं रथं॥१७॥ अग्निराजगवं चापं सूर्यो र
श्मिमयानिषून्। भूः पादुके योगमय्यौ द्यौः पुष्पावलिमन्वहं॥१८॥ नाट्यं सुगीतं वादित्रमंतर्द्धानं च खेचराः। ऋ
षयश्चाशिषः सत्याः समुद्रः शंखमात्मजं॥१९॥ सिंधवः पर्वता नद्यो रथवीथिर्महात्मनः। सूतोथ मागधो बंदी
तं स्तोतुमुपतस्थिरे॥२०॥ स्तावकांस्तानभिप्रेत्य पृथुर्वैन्यः प्रतापवान्। मेघनिर्ह्रादया वाचा प्रहसन्निदम
ब्रवीत्॥२१॥ ॥पृथुरुवाच॥ ॥भोः सूत हे मागध सौम्य बंदिंल्लोकेधुनास्पष्टगुणस्य मे स्यात्। किं
माश्रयो मे स्तव एष योज्यतां मा मय्यभूवन्वितथा गिरो वः॥२२॥ मा एतः स्तवः अमेमदन्यस्य योज्यतां न तु मे। वितथाभि
गमय्यौ पादस्पर्शमात्रेणाभीष्टदेशप्रापिके।१८। नाट्यादिकौशलं खेचराः। आत्मजं स्वप्रभवं।१९। तं स्तोतुमुपस्थिताः।२०
स्तावकान् स्तोतुमुद्यतान्। अभिप्रेत्य ज्ञात्वा २१। लोके स्पष्टगुणस्य सतो मे स्तुतिः स्यात्। अधुना तु किमाश्रयो मे स्त
वो योज्यतां। अतो वो गिरो धनाम यि वितथा मा भूवन्। यद्वा लोके अधुना अस्पष्टगुणस्य मे किमाश्रयः स्तवः स्यात्। अत एषा क्रिय
धानायतैपितव्यर्थाः।२२।
५८ भा०४

भा०४ तस्मात्परोक्षे काळांतरे स्पष्टेषु गुणेषु सत्सु अस्मास्वनुपश्चिनान्नियशांसि प्रति स्तोत्रं अलमत्यर्थं करिष्यथ। हे अपीच्यवा
५८ वः। मधुरगिरः। सभ्येः प्रेरितावयं त्वामेव स्तुमइति वे त्तत्राह। उत्तमश्लोकस्य गुणानुवादे कार्ये सति जुगुप्सितमर्वाचीनं न
स्तावयंति। २३। ननु संभावितैरेव गुणैरात्मानं जनस्तावयतीति चेत्। तत्राह। महतां गुणानात्मनि संपादयितुं शक्तोपि अ
सतो गुणान्संभावनामात्रेण कस्तावयते। यद्वा। आदावेव सतोपि कः स्तावयते स्वतएव प्रख्यातिसिद्धेः। अन्यस्तु मिथ्या

तस्मात्परोक्षेस्मदुपाकृतान्यलं करिष्यथ स्तोत्रमपीच्यवाचः। सत्युत्तमश्लोकगुणानुवादे जुगुप्सितं न स्तवयं
ति सभ्याः॥ २३॥ महद्गुणानात्मनि कर्तुमीशः कः स्तावकैः स्तावयतेऽसतोपि। तेस्याभविष्यन्निति विप्रलब्धो
जनावहासं कुमतिर्न वेद॥ २४॥ प्रभवो ह्यात्मनः स्तोत्रं जुगुप्संत्यपि विश्रुताः। ह्रीमंतः परमोदाराः पौरुषं
वा विगर्हितं॥ २५॥ वयं त्वविदिता लोके सूताद्यापि वरीमभिः। कर्मभिः कथमात्मानं गापयिष्याम बालव
त्॥ २६॥ ॥ इति श्रीभागवते महापुराणे चतुर्थस्कंधे पृथुचरित्रे पंचदशोध्यायः॥ ॥ श्रीमैत्रेय उवाच

गुणस्तु तिश्लाघी मंदइत्याह। तद्विति। यस्त्वयं शास्त्राभ्यासादिकमकरिष्यत् तर्ह्यस्यैते विद्यादयो गुणा अभविष्यन्निति क्रिया
स्तुतिपत्या विप्रलब्धो जनानामवहासं न वेद। २४। किंच प्रभवोपि विश्रुता अपि ह्रीमंतो जुगुप्संति। चेतिदृष्टांतेयथा अति
स्तुतौ क्रियमाणायां विगर्हितं ब्राह्मणवधादि पौरुषं निंदंतितथा उचितामपि स्तुतिं न सहंत इत्यर्थः। २५ वरीमभिरिति ५८
दीर्घमार्षं। भावित्व प्रधानश्चायं निर्देशः। वरिष्ठैः कर्मभिरविदिता इत्यर्थः॥ २६॥ ॥ इति चतुर्थे पंचदशः॥ ॥ श्रीः

के षोडशे सर्वलोकेशः सत्कृतं भार्यया युतं। मुनिप्रयुक्ताः सूताद्याः स्तुवंति स्मेति वर्ण्यते। गायकाः सूतादयः। १। नालं न समर्थाः। यो भ
वान्। अवतारेषु अस्याधिक्यमाहुः। वेनस्यांगाज्जातस्य ते पौरुषाणि प्रति अवितर्क्यतया ब्रह्मादीनामपि धियो बभ्रमुः
कुतः पुनर्वयं तद्वर्णने समर्था भवेम॥ २॥ अथापि यथावद्वर्णयितुमशक्ता अपि कथामृते सादराः मुनिभिरुपदेशं योगबलेन

श्रीमैत्रेय उवाच॥ ॥ इति ब्रुवाणं नृपतिं गायका मुनिचोदिताः। तुष्टुवुस्तुष्टमनसस्तद्वागमृतसेवया॥ १॥ नालं
वयं ते महिमानुवर्णने यो देववर्योवततार मायया। वेनांगजातस्य च पौरुषाणि ते वाचस्पतीनामपि बभ्रमुर्धि
यः॥ २॥ अथाप्युदारश्रवसः पृथोर्हरेः कलावतारस्य कथामृतादृताः। यथोपदेशं मुनिभिः प्रचोदिताः श्लाघ्या
नि कर्माणि वयं वितन्महि॥ ३॥ एष धर्मभृतां श्रेष्ठो लोकं धर्मेनुवर्तयन्। गोप्ता च धर्मसेतूनां शास्ता तत्परिप
न्थिनां॥ ४॥ एष वै लोकपालानां बिभर्त्येकस्तनौ तनूः। काले काले यथाभागं लोकयोरुभयोर्हितं॥ ५॥ वसु
काल उपादत्ते काले चायं विमुंचति। समः सर्वेषु भूतेषु प्रतपन्सूर्यवद्विभुः॥ ६॥ दत्तेविमुंचति च वर्षासु तद्वत्। ६

न हृदि प्रकाशनं तदनतिक्रम्य वृतन्महि विस्तारयामः। ३। ४। तनौ स्वदेहे लोकपालानां तनूर्मूर्तीः काले काले बिभर्ति। यथाभा
गं पालनपोषणानुरंजनादिकार्यानुसारेण यज्ञादिप्रवर्तनेन स्वर्गस्य हितं। वृष्ट्यादिना च भूर्लोकस्य हितं यथा भवति तथा ५॥
स्वर्यादि तनु धारणमेवाहाष्टभिः। वसु धनं करादानकाले आदत्ते दुर्भिक्षादिकाले विमुंचति च। अष्टौ मासान्सूर्यो यथा वसु जलमा

मस्तके पादेन आक्रमतामप्यार्त्तानां भूतानामतिक्रमं सहिष्यते। क्षितेर्वृत्तिः सर्वसहत्वं सा वृत्तिर्यस्यास्ति स तथा।७। देवेऽवर्ष
त्येषकृच्छ्रगताः प्राणा यासां ताः प्रजाः स्वयं वृष्टिं कृत्वा रक्षिष्यति। अत्र हेतुः। असौ नरदेववपुर्हरिरिति।८। वदनमेवामृतमूर्त्ति
श्चंद्रः तेन। तेन सानुरागोऽवलोको यस्मिन्। विशदं स्मितं तेन चारुणा। अत्र वृक्ष विद्यत्तमानं निर्देशो वर्त्तमानसामीप्ये वर्त्त
मानवद्वेति। भूतनिर्देशश्च आशंसायां भूतवच्चेति द्रष्टव्यः।९। न व्यक्तं वर्त्म प्रवेशनिर्गमयोर्मार्गो यस्य। निगूढं निष्प

तितिक्षत्यक्रमं वैन्य उपर्याक्रमतामपि। भूतानां करुणः शश्वदार्त्तानां क्षितिवृत्तिमान्॥७॥ देवेऽवर्षत्यसौ देवो नर
देववपुर्हरिः। कृच्छ्रप्राणाः प्रजा ह्येष रक्षिष्यत्यंजसेंद्रवत्॥८॥ आप्याययत्यसौ लोकं वदनामृतमूर्त्तिना। सानुरा
गावलोकेन विशदस्मितचारुणा॥९॥ अव्यक्तवर्त्मैष निगूढकार्यो गंभीरवेधा उपगुप्तवित्तः। अनंतमाहात्म्य
गुणैकधामा पृथुः प्रचेता इव संवृतात्मा॥१०॥ दुरासदो दुर्विषह आसन्नोऽपि विदूरवत्। नैवाभिभवितुं शक्यो वे
नारण्युत्थितोऽनलः॥११॥ अंतर्बहिश्च भूतानां पश्यन्कर्माणि चारणैः। उदासीन इवाध्यक्षो वायुरात्मेव देहिनां॥१२॥

न्नं पूर्वमज्ञातं कार्यं यस्य तच्च कार्यं गंभीरं किमर्थमिति तत्कृतमित्यन्यैरज्ञाताभिप्रायं विधत्त इति। तथा उपगुप्तं सुरक्षितं वित्तं यस्य
अनंतमाहात्म्यश्चासौ गुणानामेकं धाम विस्फूर्तिर्यस्मिन्। अनंतमाहात्म्यापेता गुणास्तेषामेकं धाम स्थानं यस्येति वा। संवृता ५९
त्मा संयतमूर्त्तिः समुद्रवरत्वेन वरुणस्याप्येते गुणा द्रष्टव्याः॥१०। दुरासदः शत्रोर्मनसापि प्राप्तुमशक्यः। दुर्विषहः शत्रुभिः सोढुम
शक्यः। विदूरवत्सो तुंगेनाभिभवितुमशक्यः। वेनरण्यारणितस्मादुत्थितः।११। चारणैर्गुप्तभृत्यैः पश्यन्नपि स्वस्तुतिनिंदादौ न्युदासीन इव व
र्त्तिष्यते। यथा देहिनामध्यक्षो विहितः प्राणभूतो वायुस्तद्वदात्मा न तद्वत्।१२।

आत्मद्विषां सुतमपि सुतग्रहणं स्वात्मजसाम्यार्थं धर्मपथे यमस्येव तत्र स्थितः।१३। चक्रं आज्ञा सेना वा रथस्य वा चक्रं मानसाचल
मभिव्याप्य प्रवर्त्तते। किं पर्यंतमित्यत आह। अर्को रश्मिगणैर्यावत्तपति तावत्।१४। यद्यस्माद्रंजयिष्यति अथ तस्मात् मनो
रंजनैर्हेतुभिरमुं राजानमाहुः। मनोरंजनकैरिति चेष्टितविशेषणं वा।१५।१६। मातरीव भक्तिर्भजनं यस्य। आत्मनो देहस्या

नादंड्यं दंडयत्येष सुतमात्मद्विषामपि। दंडयत्यात्मजमपि दंड्यं धर्मपथे स्थितः॥१३॥ अस्याप्रतिहतं चक्रं पृ
थोरामानसाचलात्। वर्त्तते भगवानर्को यावत्तपति गोगणैः॥१४॥ रंजयिष्यति यल्लोकमयमात्मविचेष्टितैः। अथा
मुमाहू राजानं मनोरंजनकैः प्रजाः॥१५॥ दृढव्रतः सत्यसंधो ब्रह्मण्यो वृद्धसेवकः। शरण्यः सर्वभूतानां मान
दो दीनवत्सलः॥१६॥ मातृभक्तिः परस्त्रीषु पत्न्यामर्द्ध इवात्मनः। प्रजासु पितृवत्स्निग्धः किंकरो ब्रह्मवादिनां
॥१७॥ देहिनामात्मवत्प्रेष्ठः सुहृदां नंदिवर्द्धनः। मुक्तसंगप्रसंगोऽयं दंडपाणिरसाधुषु॥१८॥ अयं तु साक्षाद्भ
गवान्त्र्यधीशः कूटस्थ आत्मा कलयावतीर्णः। यस्मिन्नविद्यारचितं निरर्थकं पश्यंति नानात्वमपि प्रतीतं
॥१९॥ अयं भुवो मंडलमोदयाद्रेर्गोप्तैकवीरो नरदेवनाथः। आस्थाय जैत्रं रथमात्तचापः पर्यस्यते दक्षिणतो यथार्कः॥२०

र्द्ध इव पत्न्यां प्रीतिमान्।१७। नंदिं सुखं वर्द्धयतीति तथा। मुक्तसंगेषु प्रकृष्टः संगो यस्य। दंडपाणिरित्यपराधानुपेक्षणमुच्यते। न
दंड्यमित्यत्र तु पक्षपाताभाव उक्तः।१८। अयं त्विति तु शब्देन निरुपमत्वं दर्शयति। कोऽसावात्मा तमाह। यस्मिन्प्रतीतमपि नानात्व
मर्थशून्यं पश्यति।१९। आउदयाद्रेस्तत्पर्यंतं गोप्ता गोपायिष्यति। प्रदक्षिणीकरिष्यतीत्यर्थः॥२०॥ ॥श्रीगोपाल

अस्मै तथा प्रदक्षिणं कुर्वते। मंस्यंते ज्ञास्यंति। तस्य यशः उद्धरंत्यः उदाहरंत्यः कीर्तयंत्यः। २१। इंद्र इवाद्रीन्विभिंदन्। २२। लांगू
लमुन्नमय्य यथा मृगेंद्रः अरति। यथा धनुर्विस्फूर्जयन् यदा क्ष्मामचरत्। २३। यत्र प्रादुरभावि प्रादुरभूता कर्मकर्तरि रिविण्। त

अस्मैन्नृपालाः किल तत्र तत्र बलिं हरिष्यंति सलोकपालाः। मंस्यंत एषां स्त्रिय आदिराजं चक्रायुधं तद्यश उद्धरंत्यः॥
२१॥ अयं महीं गां दुदुहेधिराजः प्रजापतिर्वृत्तिकरः प्रजानां। यो लीलयाद्रीन्स्वशरासकोट्या भिंदन्समां गामक
रोद्यथेंद्रः॥ २२॥ विस्फूर्जयन्नाजगवं धनुः स्वयं यदाचरत्क्ष्मामविषह्यमाजौ॥ तदा निलिल्युर्दिशि दिश्यसंतो
लांगूलमुद्यम्य यथा मृगेंद्रः॥ २३॥ एषोश्वमेधान्शतमाजहार सरस्वती प्रादुरभावि यत्र। अहार्षीद्यस्य
हयं पुरंदरः शतक्रतुश्चरमे वर्तमाने॥ २४॥ एष स्वसद्मोपवने समेत्य सनत्कुमारं भगवंतमेकं। आराध्य भक्त्या
लभतामलं तज्ज्ञानं यतो ब्रह्म परं विदंति॥ २५॥ तत्र तत्र गिरस्तास्ता इति विश्रुतविक्रमः। श्रोष्यत्यात्माश्रि
ता गाथाः पृथक् पृथक्पराक्रमः॥ २६॥ दिशो विजित्याप्रतिरुद्धचक्रः स्वतेजसोत्पाटितलोकशल्यः। सुरासु
रेंद्रैरुपगीयमानमहानुभावो भविता पतिर्भुवः॥ २७॥ ॥ इति श्रीभागवते महापुराणे चतुर्थस्कंधे षोड
शोध्यायः॥ ॥मैत्रेय उवाच॥ ॥एवं स भगवान्वैन्यः ख्यापितो गुणकर्मभिः। छंदयामास तान्कामैः प्रतिपूज्याभि
नंद्य च॥ १॥ कक्कुधाः प्रशमयन्पृथुः। अस्तवीज्जां महीं हंतुं यत्नो भीत्या तया स्तुतः। छंदयामास तोषितवान्॥ ॥ ६०

नाहार्षीत्। २४। २५। विश्रुता विक्रमा यस्य। गाथाः प्रबंधान्। २६। उपगीयमानो महानुभावो यस्य। चतुर्थे षोडशः॥ ततः सप्तदशेतो

भृत्यानमात्यान्पुरोधसः पुरोहितांश्च श्रेणीः तैलिकतांबूलिकादीन्पौरविशेषान् प्रकृतीः नियोगिनः। २। दोहनं पात्रं। ३। मेध्यं य
ज्ञार्हं। ४। सविज्ञानं अपरोक्षज्ञानसहितं। ५। पूर्वदेहः ध्रुवावतारः तत्कथाश्रयं। सुष्ठु श्रवो यस्य। ६। अदुह्यत दुग्धवान्। ७। ८।

ब्राह्मणप्रमुखान्वर्णान्भृत्यामात्यपुरोधसः। पौरान्जानपदान्श्रेणीः प्रकृतीः समपूजयत्॥ २॥ ॥विदुर उवाच॥ क
स्माद्दधार गोरूपं धरित्री बहुरूपिणी। यां दुदोह पृथुस्तत्र को वत्सो दोहनं च किं॥ ३॥ प्रकृत्या विषमा देवी कृता तेन समा क
थं। तस्य मेध्यं हयं देवः कस्य हेतोरपाहरत्॥ ४॥ सनत्कुमाराद्भगवतो ब्रह्मन्ब्रह्मविदुत्तमात्। लब्ध्वा ज्ञानं सविज्ञा
नं राजर्षिः कां गतिं गतः॥ ५॥ यच्चान्यदपि कृष्णस्य भवान्भगवतः प्रभोः। श्रवः सुश्रवसः पुण्यं पूर्वदेहकथाश्रयं॥
॥ ६॥ भक्ताय मेनुरक्ताय तव चाधोक्षजस्य च। वक्तुमर्हसि योदुह्यद्वैन्यरूपेण गामिमां॥ ७॥ ॥सूत उवाच॥ चो
दितो विदुरेणैवं वासुदेवकथां प्रति। प्रशस्य तं प्रीतमना मैत्रेयः प्रत्यभाषत॥ ८॥ ॥मैत्रेय उवाच॥ ॥यदाभि
षिक्तः पृथुरंग विप्रैरामंत्रितो जनतायाश्च पालः। प्रजा निरन्ने क्षितिपृष्ठ एत्य क्षुत्क्षामदेहाः पतिमभ्यवोचन्॥ ९॥ वयं
राजन्जाठरेणाभितप्ता यथाग्निना कोटरस्थेन वृक्षाः। त्वामद्य याताः शरणं शरण्यं यः साधितो वृत्तिकरः पतिर्नः॥ १०॥

जनतायास्त्वं पाल इत्यामंत्रितो नियुक्तस्तदा निरन्ने क्षितितले सति क्षुधा क्षामाः क्षीणाः देहाः यासां ताः प्रजाः एत्य पतिं पृ
थुमब्रुवन्। ९। जाठरेणाग्निनाभितप्ताः यः साधितः विप्रैर्मथनेन संपादितः। तं त्वां शरणं याताः। १०। ॐ नमो नारायणाय

भा०४ नत्तस्मान्नोस्माकं अन्नं रातवे रातुं दातुं ईहतुां यत्नं करोतु। उज्झितोर्जास्त्यक्तान्नाः सत्यः वार्त्तायाः जीविकायाः पतिः।११।परिदे
६१ वितं विलापं निमित्तं हेतुं अन्वपद्यत। ज्ञातवान्।१२।पृथिव्याः ओषधीबीजानि इति व्यवसितो निश्चितवान् सन्।१३।मृग

शम्
तन्नो भवानीहतु रातवेन्नं क्षुधार्दितानां नरदेवदेव। यावन्न नंक्ष्यामह उज्झितोर्जा वार्त्तापतिस्त्वं किल लोक
पा॥११॥ ॥श्रीमैत्रेय उवाच॥ ॥पृथुः प्रजानां करुणं निशम्य परिदेवितं। दीर्घं दध्यौ कुरुश्रेष्ठ निमित्तं सो
न्वपद्यत॥१२॥इति व्यवसितो बुद्ध्या प्रगृहीतशरासनः। संदधे विशिखं भूमेः क्रुद्धस्त्रिपुरहा यथा॥१३॥प्र
वेपमाना धरणी निशम्योदायुधं च तं। गौः सत्यपाद्रवद्भीता मृगीव मृगयुद्रुता॥१४॥ तामन्वधावत्तद्वैन्यः कु
पितोत्यरुणेक्षणः। शरं धनुषि संधाय यत्र यत्र पलायते॥१५॥सा दिशो विदिशो देवी रोदसी चांतरं तयोः
धावंती तत्र तत्रैनं ददर्शानूद्यतायुधं॥१६॥लोके नाविंदत त्राणं वैन्यान्मृत्योरिव प्रजाः। त्रस्ता तदा निव
वृते हृदयेन विदूयता॥१७॥ उवाच च महाभागं धर्मज्ञापन्नवत्सल॥ त्राहि मामपि भूतानां पालनेवस्थि
तो भवान्॥१८॥स त्वं जिघांससे कस्माद्दीनामकृतकिल्बिषां। अहनिष्यत्कथं योषां धर्मज्ञ इति यो मतः॥१९
प्रहरंति न वै स्त्रीषु कृतागस्स्वपि जंतवः। किमुत त्वद्विधा राजन्करुणा दीनवत्सलाः॥२०॥ ६१

मृगयुना द्रुता अनुगता मृगीव।१४।१५।रोदसी द्यावापृथिव्यौ तयोरंतरं मंतरिक्षं अनुपृष्ठतः उद्यतमायुधं येन तं।१६।१८।यो धर्मज्ञ इति मतः
संभवान्। योषां मां कथमहनिष्यत् हनिष्यति।१९।२०।

अजरां दृढां धास्यसि धारयिष्यसि।२१।बर्हिषि यज्ञे या भवती देवतारूपेण भागं वृंक्ते भजते। वसु धान्यादि।२२।गोरूपेण [illegible]
जग्धि अत्तीत्यर्थः। पयस्तु नैव दोग्धि दुग्धं न स्नवति। अत्र अस्मिन्नपराधे।२३।आत्मनि देहे रुद्धानि।२४।मद्धैसवैधा अन्नेन
स्यादिति वेदनं आह। अमूषां प्रजानां। मेदसा मांसेन।२५।यदुक्तं योषां कथं हनिष्यतीति तत्राह। पुमानिति। तस्य वधो वध एव।२६

मां विपाद्याजरां नावं यत्र विश्वं प्रतिष्ठितं। आत्मानं च प्रजाश्चेमाः कथमंभसि धास्यसि॥२१॥ श्रीपृथुरुवाच॥ वसु
धे त्वां वधिष्यामि मच्छासनपराङ्मुखीं। भागं बर्हिषि या वृंक्ते न तनोति च नो वसु॥२२॥ यवसं जग्ध्यनुदिनं नैव दोग्ध्यौ
धसं पयः। तस्यामेवं हि दुष्टायां दंडो नात्र न शस्यते॥२३॥ त्वं खल्वोषधिबीजानि प्राक्सृष्टानि स्वयंभुवा। नमुंच
स्यात्मरुद्धानि मामवज्ञाय मंदधीः॥२४॥ अमूषां क्षुत्परीतानामार्त्तानां परिदेवितं। शमयिष्यामि मद्बाणैर्भिन्ना
यास्तव मेदसा॥२५॥ पुमान्योषिदुत क्लीब आत्मसंभावनोधमः। भूतेषु निरनुक्रोशो नृपाणां तद्वधोऽवधः॥
२६॥ त्वां स्तब्धां दुर्मदां नीत्वा मायागां तिलशः शरैः। आत्मयोगबलेनेमा धारयिष्याम्यहं प्रजाः॥२७॥ एवं मन्यु
मयीं मूर्त्तिं कृतांतमिव बिभ्रतं॥ प्रणता प्रांजलिः प्राह मही संजातवेपथुः॥२८॥

६२ यद्योक्तं कथमंभसि धास्यतीति तत्राह। त्वामिति। तिलशः तिलप्रमाणानि खंडानि इत्येवंभूतामवस्थां नीत्वा॥२७
भा०४ मन्युमयीं मूर्त्तिं बिभ्रतं। तत्तुल्यत्वमुच्यते। न तु कृतांतस्य मन्युमयी मूर्त्तिरिति॥२८॥ श्रीगोपालाय नमः॥

शुद्धसत्वतनुं देवमकस्मादतिदारुणं । वीक्षमाणा पृथ्वी तुष्टाव करुणोक्तिभिः । मायया विन्यस्तार चिताना नाद्यो रादितनं घोये
न । गुणात्मनेगुणमयत्वेन प्रतीयमानाय । ग्रस्त तस्तत्त निर्धूता निरस्ता द्रव्यक्रियाकारकेषु अधिभूताद्यात्माधिदैवेषु वि
भ्रमो हंकारस्तन्निमित्ताउर्मयो रागद्वेषादयो यस्मिन्नत्तस्मै । २८ । अहो सर्वज्ञो वा अयं त्वं न स्रष्टा मां कथं हंतुं प्रवर्त्तत इत्याह ।
येन विधात्रा आत्मनां जीवानां मायतनं महं विनिर्मिता यतः यस्यां मयि गुणसर्गस्य चतुर्विधभूतग्रामस्य संग्रहः । धारणं स्वराट् स्व

धरोवाच ॥ ॥ नमः परस्मै पुरुषाय मायया विन्यस्तनानातनवे गुणात्मने । नमः स्वरूपानुभवेन निर्धुतद्रव्यक्रि
याकारकविभ्रमोर्मये ॥ २८ ॥ येनाहमात्मायतनं विनिर्मिता धात्रा यतोयं गुणसर्गसंग्रहः । स एव मां हंतुमुदायुधः
स्वराडुपस्थितोन्यं शरणं कमाश्रये ॥ ३० ॥ य एतदादावसृजच्चराचरं स्वमाययात्माश्रयया वितर्क्यया । तयैव सोयं
किल गोप्तुमुद्यतः कथं नु मां धर्मपरो जिघांसति ॥ ३१ ॥ नूनं बतेशस्य समीहितं जनैस्तन्मायया दुर्जययाऽकृ
तात्मभिः ॥ न लक्ष्यते यस्त्वकरोदकारयद्योनेक एकः परतश्च ईश्वरः ॥ ३२ ॥

तंत्रः । ३० । सृष्टिसंहारकर्तृकोहमेवेति चेत् । तथापि प्रजापालने प्रवृत्तस्यैतत्तेमद्वधोऽनुचित एवेत्याह । य एतदिति आत्माश्र ६२
यया जीवविषयिण्या । ३१ । अतो दुर्ज्ञेयमीश्वरचेष्टितमित्याह नूनमिति । अकृतात्मभिः । विक्षिप्तचित्तैः । यः ईश्वरः स्व
तंत्रः अकरोद्ब्रह्माणं परत इति तेन ब्रह्मणा चराचरमकारयत् । यश्च स्वत एक परतो मायया अनेक ॥ ३२ ॥ ॥ श्री

तस्माद चिंत्यशक्तये केवलं नम इत्याह । सर्गादि जन्मास्थितिभंगं अस्य जगतः अनुरुणद्धि अनुवर्त्तते करोति । द्रव्याणि महाभूतानि । क्रि
या इंद्रियाणि । कारका देवाः चेतना बुद्धिः आत्मा हंकारः तैः स्वशक्तिरूपैः । समुन्नद्धाः समुत्कटा निरुद्धाः शक्तयो यस्य । ३३ । प्राणिनां
धारणार्थं मां रसातलादुद्धृत्य इदानीं प्रजारक्षणे प्रवृत्तस्य मद्वधो न युक्त इति सकरुणमाह द्वाभ्यां । हे अज । यः स्रष्टवान्स एव भवान्
निर्मितं चराचरं जगत्संस्थापयितुं आदिसूकरः सन्मामभ्युज्जहार । ३४ । स एव धराधरो वराहोऽद्य अपामुपस्थे उपरि मयि नावि

सर्गादि योस्यानुरुणद्धि शक्तिभिर्द्रव्यक्रियाकारकचेतनात्मभिः । तस्मै समुन्नद्धनिरुद्धशक्तये नमः परस्मै पुरुषाय वेधसे
॥ ३३ ॥ स वै भवानात्मविनिर्मितं जगद्भूतेंद्रियांतःकरणात्मकं विभो । संस्थापयिष्यन्नज मां रसातलादभ्युज्जहारांभस आदिसू
करः ॥ ३४ ॥ अपामुपस्थे मयि नाव्यवस्थिताः प्रजा भवानद्य रिरक्षिषुः किल । स वीरमूर्तिः समभूद्धराधरो यो मां पयस्युग्रशरो
जिघांससि ॥ ३५ ॥ नूनं जनैरीहितमीश्वराणामस्मद्विधैस्तद्गुणसर्गमायया । न ज्ञायते मोहितचित्तवर्त्मभिस्तेभ्यो नमो वी
रयशस्करेभ्यः ॥ ३६ ॥ ॥ इति श्रीभागवते महापुराणे चतुर्थस्कंधे पृथुविजये धात्रीनिग्रहः सप्तदशोध्यायः ॥ ॥

आधारभूतायामवस्थिताः प्रजाः रक्षितुमिच्छुः वीरमूर्त्तिः पृथुरूपः समभूत् । य एवंभूतः स त्वं पयसि निमित्ते मां जिघांससीति चित्रमित्यर्थः
॥ ३५ ॥ तस्मादीश्वरचेष्टितं दुर्ज्ञेयमिति कैमुत्यन्यायेनोपसंहरति । नूनमिति । तस्येश्वरस्य गुणसर्गरूपया मायया मोहितं चित्तमेव वर्त्म येषां
मोहिता नि चित्तवर्त्मानि येषामिति वा । तैर्जनैः ईश्वराणां हरिभक्तानामेव तावदीहितं न ज्ञायते । किं पुनस्तस्य परमेश्वरस्येव । अतः प
रमेश्वराय तेभ्योपि नमः एव केवलं । वीराणां जितेंद्रियाणां यशः कुर्वंति ये तेभ्यः यथा वीराणां यशो वर्द्धते तथा चेष्टतां न तु यथेष्टमिति भावः । ३६ । । चतुर्थे

अष्टादशे मह्या वाक्याद्वत्सपात्रादिभेदतः । पृथ्व्यादिभिस्तु क्रमशः सा वसुधा वितीर्यते ॥ १ ॥ हे अभिभो प्रभो यद्वा भो देव अभि अभयं यथा भवसे
वं मन्युं संनियच्छ । श्रावितं विज्ञापितं मन्महाक्येऽनादरः कर्तव्य इत्याह । बुधो हि सर्वतः सारमादत्ते । २ । मयि जीर्णा ओषधीरूपायेन
गृहाण इति वक्तुं उपायेन सर्वं सिध्यति नान्यथेत्याह अस्मिन्निति त्रिभिः । पुंसां श्रेयसः पुरुषार्थस्य प्रसिद्धये अस्मिंल्लोके कृष्यादयः

आमैत्रेय उवाच ॥ ॥ इत्थं पृथुमभिष्टूय रुषा प्रस्फुरिताधरं । पुनराहावनिर्भीता संस्तभ्यात्मानमात्मना ॥ १ ॥
संनियच्छाभिभो मन्युं निबोध श्रावितं च मे । सर्वतः सारमादत्ते यथा मधुकरो बुधः ॥ २ ॥ अस्मिंल्लोकेऽथवामुष्मिन्मु
निभिस्तत्वदर्शिभिः । दृष्टा योगाः प्रयुक्ताश्च पुंसां श्रेयःप्रसिद्धये ॥ ३ ॥ तानातिष्ठति यः सम्यगुपायान्पूर्वदर्शि
तान् । अवरः श्रद्धयोपेत उपेयान्विंदतेंजसा ॥ ४ ॥ ताननादृत्य योऽविद्वानर्थानारभते स्वयं । तस्य व्यभिचरंत्यर्था
आरब्धाश्च पुनः पुनः ॥ ५ ॥ पुरा सृष्टा ह्योषधयो ब्रह्मणा या विशांपते । भुज्यमाना मया दृष्टा असद्भिरधृतव्र
तैः ॥ ६ ॥ अपालिता नादृता च भवद्भिर्लोकपालकैः । चोरीभूतेऽथ लोकेऽहं यज्ञार्थेऽग्रसमोषधीः ॥ ७ ॥ नूनं ता वी
रुधः क्षीणा मयि कालेन भूयसा । तत्र दृष्टेन योगेन भवानादातुमर्हति ॥ ८ ॥ ग्रासेनासिध्येरन्निति भावः ३ क्षीणा जीर्णाः ८

अमुष्मिंश्च लोके अग्निहोत्रादयो योगा उपाया दृष्टाः प्रयुक्ताः अनुष्ठिताश्च ॥ ३ । पूर्वैर्दर्शितान् अवरोऽर्वाचीनः ४ । अविद्वान्विद्वान
पि इति वा व्यभिचरंति न सिध्यंति । ५ । सहेतुकमुपायमाह पुरेति षड्भिः । ६ । भवद्भिरिति राजसामान्याभिप्रायेण । अपालिता चोराद्य
निवारणात् । अनादृता यज्ञादिप्रवर्तनाभावात् । यज्ञार्थे अग्रसं मिलितवती । अन्यथा अद्य तत्र तैर्भुक्ताः न प्रसोष्यंते । ततश्च

वत्सं दोहनं पात्रं दोग्धारं चोपकल्पय । धोक्ष्ये प्रस्रयिष्यामि । ९ । भूतानामभीप्सितमन्नं ऊर्जस्वत् बलप्रदं । १० । अपगतेपि वर्षर्तौ । यथा मे स
र्वतो वर्तेत । ११ । १२ । प्रसंगादर्थांतरमाह तथेति यथा पृथुः एवं सर्वत्र वाक्ये परेपि सारमाददते । प्रस्तुतमनुवर्तयति । ततोन्ये च ऋष्या

वत्सं कल्पय मे वीर येनाहं वत्सला तव । धोक्ष्ये क्षीरमयान्कामाननुरूपं च दोहनं ॥ ९ ॥ दोग्धारं च महाबाहो भूतानां भूतभावन ।
अन्नमीप्सितमूर्जस्वद्भगवान्वांछते यदि ॥ १० ॥ समां च कुरु मां राजन्देववृष्टं यथा पयः । अपर्तावपि भद्रं ते उपावर्तेत
मे विभो ॥ ११ ॥ इति प्रियं हितं वाक्यं भुव आदाय भूपतिः । वत्सं कृत्वा मनुं पाणावदुहत्सकलौषधीः ॥ १२ ॥ तथापरे च
सर्वत्र सारमाददते बुधाः । ततोन्ये च यथाकामं दुदुहुः पृथुभाविताम् ॥ १३ ॥ ऋषयो दुदुहुर्देवीमिंद्रियेष्वथ सत्तम । वत्सं
बृहस्पतिं कृत्वा पयश्छंदोमयं शुचि ॥ १४ ॥ कृत्वा वत्सं सुरगणा इंद्रं सोममदूदुहन् । हिरण्मयेन पात्रेण वीर्य
मोजो बलं पयः ॥ १५ ॥ दैतेया दानवा वत्सं प्रह्लादमसुरर्षभं । विधायादूदुहन्क्षीरमयःपात्रे सुरासवं ॥
१६ ॥ गंधर्वाप्सरसोऽधुक्षन्पात्रे पद्ममये पयः । वत्सं विश्वावसुं कृत्वा गांधर्वं मधु सौभगं ॥ १७ ॥ वत्सेन पितरोऽर्य
म्णा कव्यं क्षीरमधुक्षत । आमपात्रे महाभागाः श्रद्धया श्राद्धदेवताः ॥ १८ ॥ प्रकल्प्य वत्सं कपिलं सिद्धाः संकल्प
नामयीं । सिद्धिं नभसि विद्यां च ये च विद्याधरादयः ॥ १९ ॥ पात्रे खेचरत्वादिरूपां विद्यां दुदुहुः । १९ । ॥

दयः पृथ्वदः शदुदुहुः । पृथुना भाविता वशीकृतां १३ । देवीं पृथ्वीं वाङ्मनःश्रवणौर्वदत्यहणे इंद्रियाणां पात्रत्वं । १४ । सोमममृतं वीर्यं मनःशक्तिं । ओज इंद्रि
यशक्तिं बलं देहशक्तिं तत्रैव पयः ॥ १५ । सुरा आसवं च तालादिमद्यं १६ । मधु वाङ्माधुर्यं सौभगं सौंदर्यं तत्सहितौ । १७ । कथं पितृणामर्य
आमपात्रे अपक्वमृन्मये अधुक्षत दुदुहुः । १८ । संकल्पनामयीं । अणिमादिसिद्धिं । ये विद्याधरादयः ते च तमेव वत्सं प्रकल्प्य नभसि च

अन्येचकिंपुरुषादयः। अंतर्द्धानेनाद्भुतात्मनां संबंधिनीं मायां धारणामयीं संकल्पमात्रप्रभवां। २०। भूतेशोरुद्रः सएववत्सो
येषां क्षतजं रुधिरं तदेवासवं। २१। अहयोनिष्फणाः दंदशूकाः वृश्चिकादयः। सर्पाः सफणाः। तएवकद्रूसंततिजानागाः बिल

अन्येचमायिनोमायामंतर्द्धानाद्भुतात्मनां। मयंप्रकल्प्यवत्संते दुदुहुर्धारणामयीं॥ २०॥ यक्षरक्षांसिभूता
निपिशाचाः पिशिताशनाः। भूतेशवत्साद्दुदुहुः कपालेक्षतजासवं॥ २१॥ तथाहयोदंदशूकाः सर्पानागाश्च
तक्षकं। विधायवत्सं दुदुहुर्बिलपात्रेविषंपयः॥ २२॥ पशवोयवसंक्षीरं वत्संकृत्वाचगोवृषं। अरण्यपात्रेचा
धुक्षन्मृगेंद्रेणचदंष्ट्रिणः॥ २३॥ क्रव्यादाः प्राणिनः क्रव्यं दुदुहुः स्वेकलेवरे। सुपर्णवत्साविहगाश्चरंचाच
रमेवच॥ २४॥ वटवत्सावनस्पतयः पृथग्रसमयंपयः। गिरयोहिमवद्वत्सानानाधातून्स्वसानु
षु॥ २५॥ सर्वेस्वमुख्यवत्सेनस्वेस्वेपात्रेपृथक्पयः। सर्वकामदुघांपृथ्वीं दुदुहुः पृथुभाविताम्॥ २६॥
एवंपृथ्वादयः पृथ्वीमन्नादाः स्वन्नमात्मनः। दोहवत्सादिभेदेन क्षीरभेदंकुरूद्वह॥ २७॥ ततोमहीपतिः
प्रीतः सर्वकामदुघांपृथुः। दुहितृत्वेचकारेमां प्रेम्णादुहितृवत्सलः॥ २८॥ चूर्णयन्स्वधनुष्कोट्यागि
रिकूटानिराजराट्॥ भूमंडलमिदं वैन्यः प्रायश्चक्रेसमंविभुः॥ २९॥ दंदुदुहुः दोहः पात्रं। २०। इमांपृथ्वीं २१

पात्रेमुखे। २२। यवसं तृणं। गोवृषं रुद्रवाहं वृषभंमृगेंद्रेणोत्युत्तरेणान्वयः। २३। क्रव्यंमांसं। चरंकीटादि अचरंफलादि
२४। २५। अनुक्तसंग्रहार्थमाह। सर्वेस्वजातौयोमुख्यः तेनवत्सेन। २६। उपसंहरतिएवमिति। स्वन्नं अभीष्टमन्नंतमेवक्षीरमें

६४

३०। ग्रामाहट्टादिशून्याः पुरोहट्टादिमत्यः। ताएवमहत्यः पत्तनानि दुर्गाणिविविधानि। यथाहबृहस्पतिः औदकंपार्वतंवार्क्ष्यं
मैरिणंधान्वनंतथेति। घोषान् आभीराणांनिवासान् व्रजान् गवांनिवासान्। शिबिरं सेनानिवासस्थानं। तत्सहितान्।
आकरान्स्वर्णादिस्थानानि। खेटाः कर्षकग्रामाः। खर्वटाः पर्वतप्रांतग्रामाः तांश्च॥ ३१। ३२॥ इतिचतुर्थेष्टादशः॥ ॥ऊनविंशे

अथास्मिन्भगवान्वैन्यः प्रजानांवृत्तिदः पिता। निवासान्कल्पयांचक्रे तत्रतत्रयथार्हतः॥ ३०॥ ग्रामान्पुरः पत्तना
निदुर्गाणिविविधानिच। घोषान्व्रजान्सशिबिरान् आकरान्खेटखर्वटान्॥ ३१॥ प्राक्पृथोरिहनैवैषा पुर
ग्रामादिकल्पना। यथासुखंवसंतिस्म तत्रतत्राकुतोभयाः॥ ३२॥ ॥ इतिश्रीभागवतेमहापुराणेचतुर्थ
स्कंधेपृथुविजयेऽष्टादशोध्यायः॥ ॥श्रीमैत्रेयउवाच॥ ॥अथादीक्षितराजातुहयमेधशतेनसः॥
ब्रह्मावर्तेमनोःक्षेत्रेयत्रप्राचीसरस्वती॥ १॥ तदभिप्रेत्यभगवान्कर्मातिशयमात्मनः। शतक्रतुर्नममृषे
पृथोर्यज्ञमहोत्सवं॥ २॥ यत्रयज्ञपतिःसाक्षाद्भगवान्हरिरीश्वरः। अन्वभूयतसर्वात्मासर्वलोकगुरुःप्रभुः॥ ३

ऽश्वमेधांत्यहयापहरणात्पृथोः॥ इंद्रंहंतुंप्रवृत्तस्यधात्रावारणमुच्यते। हयमेधशतेननिमित्तेन अदीक्षितदीक्षितोभू
त्। शताश्वमेधसंकल्पमकरोदित्यर्थः। ब्रह्मावर्ते सरस्वतीदृषद्वत्योर्देवनद्योर्यदंतरं तंदेवनिर्मितंदेशंब्रह्मावर्तंप्र
चक्षते। आत्मनः स्वस्यकर्मातिशेतइति अतिशयं अभिप्रेत्यज्ञात्वा तदितितंपृथोर्यज्ञमहोत्सवं नममर्षेनसेहे। २।
अतिशयमेवदर्शयति। यत्रेतिसप्तभिः। साक्षादन्वभूयत प्रत्यक्षेणादृश्यत। ३॥

भा०४
६५

४। सिद्धादयश्चतं हरिमन्वीयुरित्युत्तरेणान्वयः। ५। ६। धर्मदुघा हविर्दोग्ध्री धेनुः सती। ७। ऊढुः वहंति स्म। सर्वरसान् इक्षु
द्राक्षादिरसान्। क्षीरं च दधि च अन्नं च पानकादि गोरसाः घृततक्रनवनीतादयः। भूरीणि विस्तृतानि वर्ष्माणि शरीराणि येषां
ते फलादि प्रासूयंत। मधुच्युतः मधुस्राविणः सन्तः। ८। चतुर्विधं भक्ष्यं भोज्यं चोष्यं लेह्यं च। ९। अधोक्षज ईशो नाथो यस्य

अन्वितो ब्रह्मशर्वाभ्यां लोकपालैः सहानुगैः। उपगीयमानो गंधर्वैर्मुनिभिश्चाप्सरोगणैः॥४॥ सि
द्धा विद्याधरा दैत्या दानवा गुह्यकादयः। सुनंदनंदप्रमुखाः पार्षदप्रवरा हरेः॥५॥ कपिलो नारदो दत्तो योगेशाः
सनकादयः। तमन्वीयुर्भागवता ये च तत्सेवनोत्सुकाः॥६॥ यत्र धर्मदुघा भूमिः सर्वकामदुघा सती॥ दोग्धि
स्माभीप्सितानर्थान्यजमानस्य भारत॥७॥ ऊहुः सर्वरसान्नद्यः क्षीरदध्यन्नगोरसान्। तरवो भूरिवर्ष्मा
णः प्रासूयंत मधुच्युतः॥८॥ सिंधवो रत्ननिकरान्गिरयोन्नं चतुर्विधं। उपायनमुपाजह्रुः सर्वे लोकाः स
पालकाः॥९॥ इति चाधोक्षजेशस्य पृथोस्तु परमोदयं। असूयन्भगवानिंद्रः प्रतिघातमचीकरत्॥१०॥
चरमेणाश्वमेधेन यजमाने यजुष्पतिं। वैन्ये यज्ञपशुं स्पर्द्धन्नपोवाह तिरोहितः॥११॥

परम उदयो अभिवृद्धिर्यस्मिन्। तत्कर्म असूयन् असहमानः प्रतिघातं विघ्नं चकारेत्यर्थः॥१०॥ वैन्ये यजुःपतिं वि
ष्णुं यजमाने सति। स्पर्द्धमान इंद्रस्तिरोहितः सन् अपहृतवान्॥११॥ ॐ नमो भगवते वासुदेवाय॥ ६५

त्वरमाणं धावंतं। आमुक्तः प्रतिमुक्तः अपिनद्धश्चापिनद्धवत्। सन्नद्धो वर्मितः सज्जः इत्यमरः। पाषंडवेषं कवचमिव गृहीतवंत
मित्यर्थः। अधर्मे धर्मविभ्रमः। धर्मोयमिति भ्रांतिकरो यः। १२। १३। न मुंचति स्म। १४। हंतवे हंतुं। यज्ञहनं यज्ञहतवंतं॥१५

तमत्रिर्भगवानैक्षत्त्वरमाणं विहायसा। आमुक्तमिव पाषंडं यो धर्मे धर्मविभ्रमः॥१२॥ अत्रिणा चोदितो
हंतुं पृथुपुत्रो महारथः। अन्वधावत संक्रुद्धः तिष्ठ तिष्ठेति चाब्रवीत्॥१३॥ तं तादृशाकृतिं वीक्ष्य मेने धर्मं श
रीरिणं। जटिलं भस्मनाच्छन्नं तस्मै बाणं न मुंचति॥१४॥ वधान्निवृत्तं तं भूयो हंतवेत्रिरचोदयत्। जहि
यज्ञहनं तात महेंद्रं विबुधाधमं॥१५॥ एवं वैन्यसुतः प्रोक्तस्त्वरमाणं विहायसा। अन्वद्रवदभिक्रुद्धो रा
वणं गृध्रराडिव॥१६॥ सोश्वं रूपं च तद्धित्वा तस्मा अंतर्हितः स्वराट्। वीरः स्वपशुमादाय पितुर्यज्ञमुपे
यिवान्॥१७॥ तत्तस्याद्भुतं कर्म विचक्ष्य परमर्षयः। नामधेयं ददुस्तस्मै विजिताश्व इति प्रभो॥१८॥
उपसृष्टस्तमस्तीव्रं जहाराश्वं पुनर्हरिः। चषालयूपतश्छन्नो हिरण्यरशनं विभुः॥१९॥

१६। तस्मै हित्वा तदर्थमुत्सृज्य। १७। विचक्ष्य दृष्ट्वा। १८। उपसृष्टमुत्पादितं तमः। तेन छन्नः सन् चषालयूपाग्रे निक्षिप्तः काष्ठकटकः तद्युक्तात् यूपात्। हिरण्यनिर्मिता रशना यस्य तं। रसनाया दृढत्वेन छेदाशक्त्या रशनासहितमेवाश्वं यूपादा
नीतवानित्यर्थः। विभुः समर्थः॥१९।

२०।२१। अवद्यं निंदितं रूपं मंदप्रज्ञाः जगृहुः। २२। तदेव पाषंडनाम निरुक्त्या दर्शयति यानीति बहुवचनेन चान्यानपि गृहीतानित्युक्तं। २३। तत्प्रभृति पाषंडमार्गाः प्रवृत्ता इत्याह। एवमिति तेन गृहीतेषु पुनर्विसृष्टेषु। २४। नग्ना जैना रक्तपटा बौद्धाः

अत्रिः संदर्शयामास त्वरमाणं विहायसा। कपालखट्वांगधरं वीरो नैनमबाधत ॥२०॥ अत्रिणा चोदितस्तस्मै संदधे विशिषं रुषा। सोऽश्वं रूपं च तद्धित्वा तस्थावंतर्हितः स्वराट् ॥२१॥ वीरश्चाश्वमुपादाय पितृयज्ञमथाव्रजत्। तदवद्यं हरे रूपं जगृहुर्ज्ञानदुर्बलाः ॥२२॥ यानि रूपाणि जगृहे इंद्रो हयजिहीर्षया। तानि पापस्य षंडानि लिंगं षंडमिहोच्यते ॥२३॥ एवमिंद्रे हरत्यश्वं वैन्ययज्ञजिघांसया। तद्गृहीतविसृष्टेषु पाषंडेषु मतिर्नृणां ॥२४॥ धर्म इत्युपधर्मेषु नग्नरक्तपटादिषु। प्रायेण सज्जते भ्रांत्या पेशलेषु च वाग्मिषु ॥२५॥ तदभिज्ञाय भगवान्पृथुः पृथुपराक्रमः। इंद्राय कुपितो बाणमादत्तोद्यतकार्मुकः ॥२६॥ तमृत्विजः शक्रवधाभिसंधितं विचक्ष्य दुःप्रेक्ष्यमसह्यरंहसं। निवारयामासुरहो महामते न युज्यतेऽत्रान्यवधः प्रचोदितात् ॥
२७॥

आदिशब्देन कापालिकादयः। तेषु उपधर्मेषु धर्मोपमेषु धर्म एवायमिति मतिः सज्जति। इति द्वयोरन्वयः। पेशलेषु आपाततो रम्येषु वाग्मिषु हेतूक्तिचतुरेषु। २५। २६। शक्रवधेभिसंधितं कृताभिप्रायं प्रचोदितात्पशोर्वधात् अन्यस्य वधस्त्वत्र न युज्यते २७

तद्वधं त्वं तु वयं करिष्यामः त्वया दुः। वयमिह यज्ञनाशकं त्वत्कीर्त्यैव हतप्रभमिंद्रमाह्वयामहे कैः अयातयामैः गतवीर्यैः राह्वानमंत्रैः अनंतरं तत एवाहितं जुहवाम होष्यामः। २८। अस्य पृथोः स्रुक् हस्ते येषां तान्। २९। यमिंद्रं यज्ञेन जिघांसथ यो यज्ञेनेष्टाः सर्वे सुरा यस्य तत्र वः स इंद्रो भवतां वधार्हो न भवति। यद्यस्मादयं यज्ञो नामायमिंद्रो भगवतस्तनुः अवतारः। ततः सप्तम आकूत्यां रुचेर्यज्ञोऽभ्यजायत। स यामाद्यैः सुरगणैरपात्स्वायंभुवांतरमित्युक्तत्वात्। ३०। अतो बलीयसा तेन सख्यमे

वयं मरुत्वंतमिहार्थनाशनं ह्वयामहे त्वच्छ्रवसा हतत्विषं। अयातयामोपहवैरनंतरं प्रसह्य राजन्जुहवाम तेऽहितं ॥२८॥ इत्यामंत्र्य क्रतुपतिं विदुरास्यर्त्विजो रुषा। स्रुग्घस्ताञ्जुह्वतोऽभ्येत्य स्वयंभूः प्रत्यषेधत ॥२९॥ न वध्यो भवतामिंद्रो यद्यज्ञो भगवत्तनुः। यं जिघांसथ यज्ञेन यस्येष्टास्तनवः सुराः ॥३०॥ तदिदं पश्यत महद्धर्मव्यतिकरं द्विजाः। इंद्रेणानुष्ठितं राज्ञः कर्मैतद्विजिघांसता ॥३१॥ पृथुकीर्तेः पृथोर्भूयात्तर्ह्येकोनशतक्रतुः। अलं ते क्रतुभिः स्विष्टैर्यद्भवान्मोक्षधर्मवित् ॥३२॥ नैवात्मने महेंद्राय रोषमाहर्तुमर्हसि। उभावपि हि भद्रं ते उत्तमश्लोकविग्रहौ ॥३३

व कर्तव्यं अन्यथा भूयः पाषंडं स्रक्ष्यतीत्याशयेनाह। तदिदमिंद्रेणानुष्ठितं महदन्यायं पश्यत। किमित्यपेक्षायामाह। धर्मस्य व्यतिकरं विपर्ययं पाषंडप्रथं। ३१। नहि किमत्र युक्तमित्यत आह। पृथुकीर्तिरिति। एकेनोनं शतं यस्मिन् तादृशः क्रतुः क्रतुप्रयोगः पृथोर्भूयात्। पृथुकरिति पाठे एकोनशतं क्रतवो यस्य तादृशोऽपि महेंद्रात्पृथुकीर्तिर्भूयादित्यर्थः। तदेवमृत्विजः प्रयुक्ताः पृथुं प्रत्येवाह। अलमिति। ३२
आत्मनैवात्मने महेंद्राय रोषं कर्तुं नार्हसि। तत्र हेतुः उभावपीति। ३३। ॥ श्रीकृष्णनारायणवासुदेव॥ ॥१॥

तथापि क्रतुसमाप्तिमेव ध्यायंतं प्रत्याह। अस्मिन्यज्ञविघ्ने चिंतां मास्म कृथाः। यद्यस्माद्दैवहतं कार्यं कर्तुं ध्यायतो मनः नु निश्चितं अति
रुष्टं सत् अंधं तमो मोहं विशति न तु शांतिं लभते। ३४। अतएव तव क्रतुर्विरमतु। नन्विंद्रः किं न निवार्यते अत आह। यतो देवेषु दुरा
ग्रहो भवतीति। यत्र क्रतौ। ३५॥ इंद्रदुराग्रहकृतमनर्थं पश्येत्याह। एभिरिंद्रेणोपसृष्टैरधिष्ठितैः हारिभिश्चित्ताकर्षकैः। यः इं
द्रः तं अश्वं मुष्णातीति तथा। यज्ञाय द्रुह्यतीति तथा तेन स्रष्टैः। ३६। ततो मम किमिति विलक्षं त्वाह भवानिति द्वाभ्यां। सांख्ययो

मास्मिन्महाराज कृथाः स्म चिंतां निशामयास्मद्वच आदृतात्मा। यद्ध्यायतो दैवहतं नु कर्तुं मनोतिरुष्टं विशते तमोंधं
३४॥ क्रतुर्विरमतामेष देवेषु दुरवग्रहः। धर्मव्यतिकरो यत्र पाषंडैरिंद्रनिर्मितैः॥ ३५॥ एभिरिंद्रोपसंसृष्टैः पाषंडै
र्हारिभिर्जनं। ह्रियमाणं विचक्ष्वैनं यस्ते यज्ञध्रुगश्वमुट्॥ ३६॥ भवान्परित्रातुमिहावतीर्णो धर्मं जनानां समया
नुरूपं। वेनापचारादवलुप्तमद्य तद्देहतो विष्णुकलासि वैन्य॥ ३७॥ स त्वं विमृश्यास्य भवं प्रजापते संकल्प
नं विश्वसृजां पिपीपृहि। ऐंद्रीं च मायामुपधर्ममातरं प्रचंडपाषंडपथं प्रभो जहि॥ ३८॥ श्रीमैत्रेय उवाच॥
इत्थं स लोकगुरुणा समादिष्टो विशांपतिः। तथा च कृत्वा वात्सल्यं मघोनापि च संदधे॥ ३९॥ रामरामराम

गाभ्यादि नानासिद्धांतानुरूपं धर्मं वेनस्यान्यायाल्लुप्तं परित्रातुं तद्देहात् विष्णोः कला एवत्वमवतीर्णोसि। ३७। अस्य विश्वस्यो
द्भवं विचार्य ये रुत्पादितोसि तेषां विश्वसृजां संकल्पं पिपीपृहि। आर्षः प्रयोगः। पूरयेत्यर्थः। प्रचंडोयः पाषंडमार्गः सैवेंद्री
माया उपधर्मजननी तां जहि। ३८॥ तथा कृत्वा यज्ञाग्रहं हित्वा वात्सल्यं स्नेहं च कृत्वा इंद्रेण सहसंधानं च कृतवान्॥ ३९॥

कृतमवभृथ संबंधि स्नानं येन स तस्मै। ४०। ४१। तुष्टानां वाक्यं त्वयेति। ४२॥ चतुर्थे एकोनविंशः॥ ॥विंशे तु विष्णुना साक्षात्पृथोर्यज्ञे
नुशासनं। वरदानप्रसंगेन प्रीतिश्चान्योन्यमीर्यते। मघवता साकं इंद्रेण सह वर्तमानः। १। आत्मानं त्वां क्षमां कारयतामुष्य। २। यहि
यस्मात्कलेवरमात्मा न भवति। अतस्तदभिमानेन भूतानि नाभिद्रुह्यंति। ३। ४। अविद्यास्वरूपाज्ञानं ततः कामः ततः कर्म तैरारब्ध

कृतावभृथस्नानाय पृथवे भूरिकर्मणे। वरान्ददुस्ते वरदा ये तद्बर्हिषि तर्पिताः॥ ४०॥ विप्राः सत्याशिषस्तुष्टाः श्रद्धया लब्ध
दक्षिणाः। आशिषो युयुजुः क्षत्तरादिराजाय सत्कृताः॥ ४१॥ त्वयाहूता महाबाहो सर्व एव समागताः। पूजिता दानमाना
भ्यां पितृदेवर्षिमानवाः॥ ४२॥ ॥इति श्रीभागवते महापुराणे चतुर्थस्कंधे पृथुविजये एकोनविंशोध्यायः॥ ॥
॥श्रीमैत्रेय उवाच॥ ॥भगवानपि वैकुंठः साकं मघवता विभुः। यज्ञैर्यज्ञपतिस्तुष्टो यज्ञभुक्तमभाषत॥ १॥ ॥श्रीभगवानु
वाच॥ एष ते कारषीद्भंगं हयमेधशतस्य ह। क्षमापयत आत्मानममुष्य क्षंतुमर्हसि॥ २॥ सुधियः साधवो लोके नरदेव नरोत्तमाः
नाभिद्रुह्यंति भूतेभ्यो यर्हि नात्मा कलेवरं॥ ३॥ पुरुषा यदि मुह्यंति त्वादृशा देवमायया। श्रम एव परं जातो दीर्घया वृद्धसे
वया॥ ४॥ अतः कायमिमं विद्वानविद्याकामकर्मभिः। आरब्ध इति नैवास्मिन्प्रतिबुद्धोनुषज्जते॥ ५॥ असंसक्तः शरी
रेस्मिन्नमुनोत्पादिते गृहे। अपत्ये द्रविणे वापि कः कुर्यान्ममतां बुधः॥ ६॥ कइति॥ ६॥ श्रीगोपालाय नमः

इति विद्वान्। अतएव प्रतिबुद्धः आत्मज्ञ अस्मिन्नैवानुषज्जते। ५। तथापि पुत्रादिममत्वेन भूतद्रोह एव संगो भवेत्तत्राह। असंस

प्रतिबोधक्रमं विवृण्वन्देहेनुषंगाभावमाह। एक इति द्वाभ्यां असावात्मा आत्मनो देहादेः परो भिन्नः तत्र नवधा वैलक्षण्येन भेदं साधयति। एक इति नवभिः पदैः देहोहि बाल्ययुवादिभेदादनेकः मलिनश्च। जडश्च सगुणश्च स्वकारणभूतगुणाश्रितश्च परिच्छिन्नश्च गृहादिभिरावृतश्च दृश्यश्च सात्मा च आत्मा तु नैवं अतो भिन्नः। ७। आत्मस्थश्च स्मिन्स्थितं प्रकृतिस्थोपि देहस्थोपि तद्धि

एकः शुद्धः स्वयंज्योतिर्निर्गुणोसौ गुणाश्रयः। सर्वगोनावृतः साक्षी निरात्मात्मात्मनः परः॥ ७॥ य एवं संतमात्मानमात्मस्थं वेद पूरुषः। नाज्यते प्रकृतिस्थोपि तद्गुणैः स मयि स्थितः॥ ८॥ यः स्वधर्मेण मां नित्यं निराशीः श्रद्धयान्वितः। भजन्शनकैस्तस्य मनो राजन्प्रसीदति॥ ९॥ परित्यक्तगुणः सम्यग्दर्शनो विशदाशयः। शांतिं मे समवस्थानं ब्रह्म कैवल्यमश्नुते॥ १०॥ उदासीनमिवाध्यक्षं द्रव्यज्ञानक्रियात्मनां। कूटस्थमिममात्मानं यो वेदाप्नोति शोभनं॥ ११॥ भिन्नस्य लिंगस्य गुणप्रवाहो द्रव्यक्रियाकारकचेतनात्मनः। दृष्टासु संपत्सु विपत्सु सूरयो न विक्रियंते मयि बद्धसौहृदाः॥ १२॥ × विदाभासः अतो दृष्टासु प्राप्तासु। हर्षशोकादिभिर्न विक्रियंते॥ १२॥ × अनन्तमो नारायणाय॥

कारैर्न लिप्यते। यतः स मयि ब्रह्मणि स्थितः ८। इयमवस्था कस्यास्यादित्यपेक्षायामाह। यः स्वधर्मेणेति चतुर्भिः। ९। यर्हि विशदाशयः प्रसन्नमनाः तदा परित्यक्तगुणः सन् सम्यग्दर्शनो भूत्वा शांतिमश्नुते। शांतिमेवाह। मम सम्यगौदासीन्येनावस्थानमेव ब्रह्म तदेव कैवल्यमश्नुते १०। सम्यग्दर्शनमेवाह। उदासीनमेवात्मानं द्रव्यज्ञानक्रियात्मनां देहज्ञानकर्मेंद्रियमनसामध्यक्षमिव स्थितमात्मानं यो वेद। ११। संसारिणः कथं कूटस्थत्वमत आह। भिन्नस्य लिंगस्य देहस्य गुणप्रवाहः संसारः भिन्नत्वे हेतुः। द्रव्याद्यात्मकस्य तच्चेतना

तं च स्फूरेः। अतः सुखदुःखे च समः सन्समाना उत्तममध्यमाधमा यस्य। जितानींद्रियाण्याशयश्च येन सत्वं अखिललोकरक्षणं विधत्स्व कथमेकेन मया कर्तुं शक्यं तत्राह। मयेश्वरेण उपकॢप्ताः संपादिता येऽखिललोका अमात्यादयः तैर्युतः। १३। ननु रक्षणं दंडादिसापेक्षं अतस्तपोन्यद्वा पुण्यं करिष्यामीति चेदत आह। श्रेय इति। यद्यस्मात्सां परायेऽपरलोके प्रजाभिः कृतात्सुकृतात्षष्ठमंशं हर्ता हरति। अरक्षणे दोषमाह। अथान्यथा प्रजाभिर्हृतं पुण्यं यस्य सः प्रजानामघमत्ति पापं भुंक्ते। अन्यथेत्यस्य विवरणं

समः समानोत्तममध्यमाधमः सुखे च दुःखे च जितेंद्रियाशयः। मयोपकॢप्ताखिललोकसंयुतो विधत्स्व वीराखिललोकरक्षणं॥ १३॥ श्रेयः प्रजापालनमेव राज्ञो यत्सांपराये सुकृतात्षष्ठमंशं। हर्तान्यथा हृतपुण्यः प्रजानामरक्षिता करहारोघमत्ति॥ १४॥ एवं द्विजाग्र्यानुमतानुवृत्तधर्मप्रधानोऽन्यतमोवितास्याः। ह्रस्वेन कालेन गृहोपयातान्द्रष्टासि सिद्धाननुरक्तलोकः॥ १५॥ वरं च मत्कंचन मानवेंद्र वृणीष्व तेहं गुणशीलयंत्रितः। नाहं मखैर्वै सुलभस्तपोभिर्योगेन वा यः समचित्तवर्ती॥ १६॥ ॥ श्रीमैत्रेय उवाच॥ ॥ स इत्थं लोकगुरुणा विष्वक्सेनेन विश्वजित्। अनुशासितआदेशं शिरसा जगृहे हरेः॥ १७॥

करहारः सन्नरक्षिता चेत्। १४। एवं च मोक्षोप्यनायासेन भविष्यतीत्याह। द्विजाग्र्याणामनुमतश्चासावनुवृत्तश्च परंपराप्राप्तो यो धर्मः स एव प्रधानं अर्थकामौ तु प्रासंगिकौ यस्य। अन्यतमः अतिशयेनान्यः धर्मादिष्वनासक्त इत्यर्थः। एकपद्यपाठे धर्मप्रधानाद्वन्यतमो अर्थकामौ यस्येत्यर्थः। अस्याः पृथिव्याः अविता सन् अल्पेन कालेन गृहागतान्सनकादीन्द्रक्ष्यसि। अनुरक्तो लोको यस्मिन्सः। १५। मत्तः सकाशात्कंचिद्वरं वृणीष्व गुणाः शमादयः शीलं निर्मत्सरत्वादिस्वभावः तैरहं यंत्रितो वशीकृतः तद्धि हि ते मखादिभिर्नाहं सुलभः यतः समचित्तं येषां तेषु च वर्तितुं शीलं यस्य सोहं १६। १७

क्षमापयितुं पादयोः स्पृशंतं स्वेन कर्मणा अश्वापहरणेन व्रीडितं प्रेम्णा परिष्वज्य।१८।भगवान्प्रस्थानाभिमुखोपि अनुग्रहेण विलंबितः
सन्नप्रतस्थे प्रयाणं न कृतवानिति द्वयोरन्वयः।कथंभूतः उपहृतं अर्पितं अर्हणं यस्मै।समुज्जिहानया समुद्गच्छंत्या वर्द्धमानया भक्त्या
गृहीतचरणांबुजं यस्य।१९।पद्मपलाशवदक्षिणी यस्य तथाभूतः सन् एनं पृथुं पश्यन्।२०।भगवतस्तत्कृपातिरेकमुक्त्वा तस्य
भक्त्युद्रेकमाह।स इति द्वाभ्यां।बाष्पविक्लवत्वेन तूष्णीमवस्थितः सन् अमुं हरिं हृदोपगृह्य आधात् धृतवान्।२१।अथ तत्त्योर्दृशो गोचरं विषयभूतं

स्पृशंतं पादयोः प्रेम्णा व्रीडितं स्वेन कर्मणा।शतक्रतुं परिष्वज्य विद्वेषं विससर्ज ह॥१८॥भगवानथ विश्वात्मा पृथुनोपहृतार्हणः।
समुज्जिहानया भक्त्या गृहीतचरणांबुजः॥१९॥प्रस्थानाभिमुखोप्येनमनुग्रहविलंबितः।पश्यन्पद्मपलाशाक्षो न प्र
तस्थे सुहृदां सतां॥२०॥स आदिराजो रचितांजलिर्हरिं विलोकितुं नाशकदश्रुलोचनः।न किंचनोवाच सबाष्पविक्लवो हृ
दोपगुह्यामुमधादवस्थितः॥२१॥अथावमृज्याश्रुकला विलोकयन्नतृप्तदृग्गोचरमाह पूरुषं।पदा स्पृशंतं क्षितिमंस उन्नते वि
न्यस्तहस्ताग्रमुरंगविद्विषः॥२२॥ पृथुरु०॥वरान्विभो त्वद्वरदेश्वराद्बुधः कथं वृणीते गुणविक्रियात्मनां।ये नारकाणामपि संति देहि
नां तानीश कैवल्यपते वृणे न च॥२३॥ नौ

पदा क्षितिं स्पृशंतमित्ययं भावः।न खलु देवाः पदा भुवं स्पृशंति अतः कृपापरवशो नूनं हरिरात्मानं विस्मृतवानिति।अत एव स्खलनपरि
हारायैव गरुडस्योन्नते स्कंधे विन्यस्तं हस्ताग्रं येन तं।२२।वरं वृणीष्वेति यदुक्तं तदसहमान आह।हे विभो वरदानां ब्रह्मादीनामीश्वरात्
वरप्रदात्त्वत्तः सकाशात् बुधः कथं वरान् वृणीते।कीदृशान् गुणविक्रियत इति गुणविक्रियोऽहंकारः स एवात्मा येषां तेषां ब्रह्मादीनां संबंधीन्
देहाभिमानिनां भोग्यानिति वा तथा च बुध एव न भवतीत्यर्थः जुगुप्सितत्वादपीत्याह य इति बुध एवाहमपि न वृणे इति समुच्चयार्थश्चकारः॥२३॥ ॥

कैवल्यपत इति संबोधनात्कैवल्यं वरिष्यतीति माशंकीत्याह।महत्तमानामंतर्हृदयान्मुखद्वारेण निर्गतो भगवत्पादांभोजमकरंदो य
शः श्रवणादि सुखं यत्र नास्ति तादृशं चेत्कैवल्यं तर्हि तत्कैवल्यं कदाचिदपि न कामये।तर्हि किं कामयसे तदाह।यशःश्रवणाय
कर्णानामयुतं विधत्स्व।ननु कोप्येवं न वृतवान्।किमन्यच्चिंतयेत्याह।एष मे वरः।२४।ननु तर्हि केवलं व्याभावे रागद्वेषा

न कामये नाथ तदप्यहं क्वचिन्न यत्र युष्मच्चरणांबुजासवः॥महत्तमांतर्हृदयान्मुखच्युतो
विधत्स्व कर्णायुतमेष मे वरः॥२४॥स उत्तमश्लोक महन्मुखच्युतो भवत्पदांभोजसुधाक
णानिलः॥स्मृतिं पुनर्विस्मृततत्त्ववर्त्मनां कुयोगिनां नो वितरत्यलं वरैः॥२५॥ राम

द्याकुलानां भक्तिसुखमपि न स्यादित्याशंक्याह।स इति।भवत्पदांभोजसुधायाः कणो लेशः तत्संबंधीयोऽनिलः स
एव दूरादपि किं विद्यशः श्रवणमात्रमित्यर्थः।विस्मृतं तत्त्ववर्त्म यैः कुयोगिभिस्तेषामपि पुनः स्मृतिं आत्मज्ञानं
वितरति।अतो न खलु भक्तानां रागादिसंभवः अतो नोऽस्माकं सारग्राहिणां अन्यैश्च वरैरलं।भक्तावेव मोक्षादि सर्व
सुखांतर्भावादिति भावः॥२५॥

भा०४०
७० नुनैभक्तिर्मुक्तिफलैव। अतः फलंविहायसाधनेभवतः कोयमाग्रह इत्याशंक्याह सुश्रवः मंगलकीर्त्तेतिशिवंयशः स
तांसंगमेयः सकृदपियदृच्छयापिउपश्रृणोति गुणज्ञश्चेत्सः पशुंविनान्यः कथंविरमेत्। गुणातिशयंस्पृहयाति
श्रीर्यत्यशएवप्रकर्षेणवृतवती। गुणानांसर्वपुरुषार्थानांसंग्रहःस्वस्मिन्समाहारस्तदिच्छया ॥२६॥ अतोल

यशःशिवंसुश्रव आर्यसंगमेयदृच्छयाचोपश्रृणोति तेसकृत् ॥ कथंगुणज्ञोविरमेद्विना
पशुंश्रीर्यत्प्रवव्रे गुणसंग्रहेच्छया ॥२६॥ अथाभजेत्वाखिल पूरुषोत्तमं गुणालयंप
द्मकरेवलालसः। अप्यावयोरेकपतिस्पृधोःकलिर्नस्यात्कृतत्वच्चरणैकतानयोः २७

क्ष्मीरिवान्यपरत्यागेनत्वामेवाहंभजइत्याह। अथेति। लालसः उत्सुकः सन् कर्मणिक्रियमाणेयथेष्टंद्वंद्वसहक
लिःएवंभक्तावपिलक्ष्म्यासहकलिःस्यादितिवितर्कयति। एकस्मिन्पत्यौस्पर्द्धमानयोरावयोरपिकिंकलिर्नस्या
दितिकाक्वावितर्कः। ननुपर्यायेणसेवायांनस्यात्तत्रैवं। कृतस्त्वच्चरणयोरेवैकस्तानोमनोविस्तारोयाभ्यांतयोः २७ ७०

भवतुवाकलिःतथापिभजेयमेवेत्याह। जगज्जनन्यांवैशसंविरोधःस्यादेव। तत्रहेतुःअस्याःकर्मणिनःसमीहितंइच्छाभवतितथापि
९१ द्विविरोधेमत्पक्षपातवदत्रापितवपक्षपातएवस्यादित्याह। फल्गुतुच्छमपिउरुबहुकरोषि यतोदीनेषुवत्सलः। स्वेस्वरूपएव
रतस्यते तयाकिंप्रयोजनंतांनाद्रियस इत्यर्थः। २८। यतस्त्वंदीनवत्सलः अतएवसाधवोनिष्कामाः। अथज्ञानानंतरम
पित्वांभजंति। कथंभूतंमायागुणानांविभ्रमोविलासस्तस्यादयःकार्यंसनिरस्तोयस्मिन् तंतेकिमर्थंभजंतितत्राह। भ

जगज्जनन्यांजगदीशवैशसंस्यादेवयत्कर्मणिनःसमीहितं। करोषिफल्ग्वप्युरुदीनवत्सलःस्वएवधिष्ण्येभिर
तस्यकिंतया ॥२८॥ भजंत्यथत्वामतएवसाधवोव्युदस्तमायागुणविभ्रमोदयं। भवत्पदानुस्मरणादृतेसतां
निमित्तमन्यद्भगवन्नविद्महे ॥२९॥ मन्येगिरंतेजगतांविमोहिनींवरंवृणीष्वेतिभजंतमात्थयत्। वाचानु
तंत्यायदितेजनोसितःकथंपुनःकर्मकरोतिमोहितः ॥३०॥ त्वन्माययाद्धाजनईशखंडितोयदन्यदा
शास्तऋतात्मनोऽबुधः। यथाचरेद्बालहितंपितास्वयंतथात्वमेवार्हसिनःसमीहितुं ॥३१॥ छ

गवत्पदानुस्मरणाद्विनान्यत्तेषांनिमित्तंफलंनविद्मः। २९। वरैःप्रलोभनंवक्तृपालोस्तवानुचितमित्याह। मन्यइति। नुअहोतेवा
चातंत्यायदिजनोयंअसितःअबद्धःस्यात्तर्हिपुनःपुनःफलैर्मोहितःसन्कथंकर्मकरोति। ३०। त्वन्माययाखंडितस्यत्वयापु
नःखंडनंनकर्तव्यंकिंतुहितंचेष्टितव्यमित्याह। त्वन्माययाऋतादात्मनःत्वत्तःखंडितःपृथक्कृतः यद्यतोन्यत्पुत्रादिक
माशास्ते। अतःस्वयंअविज्ञापितएवहितंचेष्टितुमर्हसि। ३१। ७१

३३।३२।३४।३५।वाग्वितांजलिभिः भक्तितःपूजिताःसंतःवैकुंठानुगताःपार्षदाश्च।३६।३७।अदृष्टायलोचनपथमतिक्रांतायापिसंद
र्शितआत्मायेनतस्मै।३८॥ इतिश्रीचतुर्थस्कंधेविंशतितमः॥ ॥एकविंशेतुपृथुनाप्रजानामनुशासनं।महासत्रेसु

मैत्रेयउवाच॥ ॥इत्यादिराजेननुतःसविश्वदृक्तमाहराजन्मयिभक्तिरस्तुते।दिष्ट्येदृशीधीर्मयितेकृतायययामायांमदीयां
तरतिस्मदुस्त्यजां॥३२॥ तत्वंकुरुमयादिष्टमप्रमत्तःप्रजापते।मदादेशकरोलोकःसर्वत्राप्नोतिशोभनं॥३३॥ ॥
श्रीमैत्रेयउवाच॥ ॥इतिवैन्यस्यराजर्षेःप्रतिनंद्यार्थवद्वचः।पूजितोनुगृहीत्वैनंगंतुंचक्रेच्युतोमतिं॥३४॥देवर्षि
पितृगंधर्वसिद्धचारणपन्नगाः।किंनराप्सरसोमर्त्याःखगाभूतान्यनेकशः॥३५॥यज्ञेश्वरधियाराज्ञावाग्वित्तांजलि
भक्तितः।सभाजिताययुःसर्वेवैकुंठानुगतास्ततः॥३६॥भगवानपिराजर्षेःसोपाध्यायस्यचाच्युतः।हरन्निवम
नोमुष्यस्वधामप्रत्यगात्प्रभुः॥३७॥ अदृष्टायनमस्कृत्यनृपःसंदर्शितात्मने।वासुदेवायदेवानांदेवायस्वपुरंय
यौ॥३८॥ ॥इतिश्रीभागवतेमहापुराणेचतुर्थस्कंधेविंशोध्यायः॥ ॥मैत्रेयउवाच॥ ॥मौक्तिकैःकु
सुमस्रग्भिर्दुकूलैःस्वर्णतोरणैः।महासुरभिभिर्धूपैर्मंडितंतत्रतत्रवै॥१॥चंदनागरुतोयार्द्ररथ्याचत्वरमार्गवत्।
पुष्पाक्षतफलैस्तोक्मैर्लाजैरर्चिभिरर्चितं॥२॥

रादीनांमहासदसिवर्ण्यते॥पुरंयथावित्युक्तंतत्पुरमनुवर्णयतिमौक्तिकैरितित्रिभिः॥१॥चंदनागरुयुक्तैस्तो ७२
येरार्द्राःरथ्यादयस्तैर्युक्तंतोक्मैर्हरितयवैः।अंकुरैरितिवा।अर्चिभिःदीपैः॥२॥ ॥श्रीकृष्णचंद्रकु

३।संभृतानिअशेषाणिमंगलानिदध्यादीनितैःसह।अभिजग्मुः।मृष्टाउज्वलाःकन्याश्च।४।गतस्मयोनिरहंकारः।५।प्रिया
न्वरान्प्रददातिइतितथा।६।गुणैर्महान्।अतएवमहत्तमःश्रेष्ठतमः।७।गुणैर्विजृंभितंऊर्जितंगुणवद्भिःसभाजितंस

सवृंदैःकदलीस्तंभैःपूगपोतैःपरिष्कृतं।तरुपल्लवमालाभिःसर्वतःसमलंकृतं॥३॥प्रजास्तंदीपबलिभिःसंभृ
ताशेषमंगलैः।अभीयुर्मृष्टकन्याश्चमृष्टकुंडलमंडिताः॥४॥शंखदुंदुभिघोषेणब्रह्मघोषेणचर्त्विजां।विवेश
भवनंवीरःस्तूयमानोगतस्मयः॥५॥पूजितःपूजयामासतत्रतत्रमहायशाः।पौरान्जानपदांस्तांस्तान्प्रीतः
प्रियवरप्रदः॥६॥सएवमादीन्यनवद्यचेष्टितःकर्माणिभूयांसिमहान्महत्तमः।कुर्वन्शशासावनिमंडलं
यशःस्फीतंनिधायारुरुहेपरंपदं॥७॥ सूतउवाच तदादिराजस्ययशोविजृंभितंगुणैरशेषैर्गुणवत्स
भाजितं।क्षत्तामहाभागवतःसदस्पतेकौषारविंप्राहगृणंतमर्चयन्॥८॥ विदुरउवाच सोभिषिक्तः
पृथुर्विप्रैर्लब्धाशेषसुरार्हणः।बिभ्रत्सवैष्णवंतेजोबाह्वोर्याभ्यांदुदोहगां॥९॥कोन्वस्यकीर्तिंनशृणो
त्यभिज्ञोयद्विक्रमोच्छिष्टमशेषभूपाः।लोकाःसपालाउपजीवंतिकाममद्यापितन्मेवदकर्मशुद्धं॥१०॥

कृतंयशोगृणंतमर्चयन्नाह।सदस्पतेशौनक॥८॥लब्धान्यशेषसुराणामर्हणानियेनसः।किमकरोदितिशेषः।
९।श्रवणोत्सुकमानाविःकुर्वन्प्रार्थयतेकोन्विति।यस्यविक्रमःपृथ्वीदोहनंतुस्योच्छिष्टतुल्यंकामंतत्तस्यकर्मवद।१०।

भा०च०

७३

प्राचीनकर्मभिः प्रारब्धानेव बुभुजे। न तु भोगांतरार्थं कर्माणि करोति तदपि भोगेन पुण्यक्षपणेच्छया न तु सुखासक्त्येत्यर्थः।११।
अस्खलितः अप्रतिहतः आदेशः आज्ञा यस्य सप्तद्वीपेष्वेक एव दंडं धारयतीति तथा। किं सर्वत्र नेत्याह। ब्रह्मकुलव्यतिरि
केण। अच्युतगोत्रप्रवर्तकं तुल्यायेषां वैष्णवानां तद्व्यतिरेकेण च।१२। एकदा तस्य महान्सत्रदीक्षा आसीत्। तत्र सत्रे

मैत्रेय उवाच॥ गंगायमुनयोर्नद्योरंतरा क्षेत्रमावसन्। आरब्धानेव बुभुजे भोगान्पुण्यजिहासया॥११॥
सर्वत्रास्खलितादेशः सप्तद्वीपैकदंडधृक्। अन्यत्र ब्राह्मणकुलादन्यत्राच्युतगोत्रतः॥१२॥ एकदासीन्महा
सत्रदीक्षा तत्र दिवौकसां। समाजो ब्रह्मर्षीणां च राजर्षीणां च सत्तम॥१३॥ तस्मिन्नर्हत्सु सर्वेषु स्वर्चिते
षु यथार्हतः। उत्थितः सदसो मध्ये ताराणामुडुराडिव॥१४॥ प्रांशुः पीनायतभुजो गौरः कंजारुणेक्षणः
सुनासः सुमुखः सौम्यः पीनांसः सुद्विजस्मितः॥१५॥ व्यूढवक्षा बृहच्छ्रोणिर्वलिवल्गुदलोदरः। आ
वर्तनाभिरोजस्वी कांचनोरुरुदग्रपात्॥१६॥ सूक्ष्मवक्रासितस्निग्धमूर्द्धजः कंबुकंधरः। महाधने दुकूलाग्र्ये
परिधायोपवीय च॥१७॥

देवादीनां समाज आसीदित्यर्थः।१३। तस्मिन्पूज्येषु स्वर्चितेषु सत्सु सदसो मध्ये उत्थितः सन्समंततः समैक्षतेति षष्ठेनान्वयः।१४
प्रांशुः उन्नतः पीनावायतौ च भुजौ यस्य कंजवदरुणे ईक्षणे यस्य शोभना द्विजाः स्मितं च यस्य।१५। व्यूढं विस्तीर्णं वक्षो यस्य
वल्लीभिस्त्रिसृभिर्वलिभिः सुंदरं दलवत् अश्वत्थपत्रमिवोपरि विस्तृतमधस्तात्संकुचितमुदरं यस्य आवर्तवन्निम्ना नाभिर्यस्य। कांचनव ७३
दुज्ज्वलावूरू यस्य उदग्रौ उन्नतौ पादौ यस्य।१६। सूक्ष्माश्च ते वक्राश्च असिताश्च स्निग्धाश्च मूर्धजा यस्य। कंबुवत्त्रिरेखांकिता कंधरा य
स्य परिधाय वसित्वा उपवीय उत्तरीयं कृत्वा॥१७॥

७३

नियमे निमित्ते न्यस्तानि त्यक्तानि भूषणानि येन सः अत एव तैरनावृतत्वाद्व्यंजिता अशेषगात्रेषु श्रीः स्वाभाविकी शोभा ये
न कृतान्युचितानि कर्माणि येन।१८। शिशिरे संतापहरे स्निग्धे च तारे ययोस्ते अक्षिणी यस्य। इदं वक्ष्यमाणं वाक्यमुक्त
वांश्च। चारु श्रोत्रप्रियं चित्राणि पदानि यस्मिन्। श्लक्ष्णं प्रशस्तं मृष्टं शुद्धं गूढं गंभीरार्थं अविक्लवं अव्याकुलं।१९

व्यंजिताशेषगात्रश्रीर्नियमे न्यस्तभूषणः। कृष्णाजिनधरः श्रीमान्कुशपाणिः कृतोचितः॥१८॥ शिशिरस्निग्धता
राक्षः समैक्षत समंततः। ऊचिवानिदमुर्वीशः सदः संहर्षयन्निव॥ चारु चित्रपदं श्लक्ष्णं मृष्टं गूढमविक्ल
वं॥१९॥ ॥राजोवाच॥ ॥सभ्याः शृणुत भद्रं वः साधवो य इहागताः। सत्सु जिज्ञासुभिर्धर्ममावेद्यं स्वमनीषि
तं॥२०॥ अहं दंडधरो राजा प्रजानामिह योजितः। रक्षिता वृत्तिदः स्वेषु सेतुषु स्थापिता पृथक्॥२१॥ तस्य
मे तदनुष्ठानाद्यानाहुर्ब्रह्मवादिनः। लोकाः स्युः कामसंदोहा यस्य तुष्यति दिष्टदृक्॥२२॥

भाषणे हेतुः धर्मं जिज्ञासुभिः पुंभिः सत्सु स्वमनीषितमावेद्यं वक्तव्यं। अतः प्रजानुशासनमिषेण जिज्ञासैव क्रियते न
युष्मान्प्रति धर्मप्रवचनमिति भावः।२०। इदानीं प्रजाः शिक्षयिष्यन्प्रजाशिक्षणादिकं ममावश्यकमित्याह। अहमि
ति त्रिभिः। पृथक् सेतुषु स्थापयिता।२१। दिष्टदृक् प्राक्कर्मसाक्षी ईश्वरो यस्य तुष्यति तस्य वेदवादिनो यान्लो
कानाहुः प्रजारक्षणाद्यनुष्ठानात्ते लोका मे स्युः कथंभूताः कामानां सम्यक् दोहः प्रपूरणं येषु॥२२॥ श्रीराम

भा०४०
७४
अन्यथात्वनिष्टं स्यादित्याह य इति । शमलं पापं भगमैश्वर्यं ॥२३॥ तत्तस्मात् हे प्रजाः भर्तुर्ममापि उपार्थं पिंडदानवत्परलोकहितार्थं स्वकार्यमेव कुरुत धर्ममेवानुतिष्ठत । अधोक्षजे धीर्येषां ताहशाः संतः वासुदेवार्पणबुद्ध्येत्यर्थः । अनुग्रहः कृतो भवेदिति शेषः ॥२४॥ शास्तुः शिक्षयितुः अनुज्ञातुः अनुमोदितुश्च प्रेत्य परलोके यत्फलं तत्तुल्यं ॥२५॥ कर्मैव कर्तव्यमित्यनुमोदामहे । ननु वासुदेवे कर्पणीयमिति वेनादिभिस्तदनंगीकारादित्येवंवादिनः शनैः संबोधयन्नाह । हे अर्हसत्तमाः

य उद्धरेत्करं राजा प्रजा धर्मेष्वशिक्षयन् । प्रजानां शमलं भुंक्ते भगं च स्वं जहाति सः ॥२३॥ तत्प्रजा भर्तृपिंडार्थं स्वार्थमेवानसूयवः । कुरुताधोक्षजधियस्तर्हि मेऽनुग्रहः कृतः ॥२४॥ यूयं तदनुमोदध्वं पितृदेवर्षयोऽमलाः । कर्तुः शास्तुरनुज्ञातुस्तुल्यं यत्प्रेत्य तत्फलं ॥२५॥ अस्ति यज्ञपतिर्नाम केषांचिदर्हसत्तमाः । इहामुत्र च लक्ष्यंते ज्योत्स्नावत्यः क्वचिद्भुवः ॥२६॥ मनोरुत्तानपादस्य ध्रुवस्यापि महीपतेः । प्रियव्रतस्य राजर्षेरंगस्यास्मत्पितुः पितुः ॥२७॥ ईदृशानामथान्येषां अजस्य च भवस्य च । प्रह्लादस्य बलेश्चापि कृत्यमस्ति गदाभृता ॥२८॥

यज्ञपतिर्नाम परमेश्वरः केषांचिन्मते तावदस्ति । तथापि विप्रतिपत्तेर्न तत्सिद्धिरित्याशंक्य जगद्वैचित्र्यान्यथानुपपत्तिं ७४
प्रमाणयति । इहामुत्र च ज्योत्स्नावत्यः कांतिमत्यः भुवो भोगभूमयः शरीराणि च ॥२६॥ ननु विचित्रं कर्म वैचित्र्याद्देवैस्त्यति तथापि विद्वनुद्भवे नेश्वरसिद्धिरित्याह । मनोरिति त्रिभिः । अस्मत्पितामहस्यांगस्य २७ कृत्यमस्ति अवश्यं कर्मफलदातृत्वाभावमिति तेषां मतमित्यर्थः ॥२८॥

मृत्योर्दौहित्रादीन्वेनादीन्विना । धर्मविमोहितान् अतः शोच्यान् । ननु कर्मैव फलं स्यात्तिविध्युद्देशगता वा देवता किं परमेश्वरेण तत्राह । वर्गेति । वर्गो त्रिवर्गाः । स्वर्गो धर्मस्य फलं अपवर्गो मोक्षः तेषामैकात्म्येन एकरूपेण सर्वानुगतेन हेतुना तत्रापि प्रायेण हेतुना अयं भावः । न तावज्जडस्य कर्मणः फलदातृत्वं घटते न वा वाग्देवतानां स्वातंत्र्यं अतंत्यनिकृतेः न वा तत्कर्मसाम्ये फलतारतम्यं कचित्तदसिद्धिश्च संभवति । अतः स्वतंत्रेण कर्तुमकर्तुमन्यथाकर्तुं समर्थेन परमेश्वरेण भाव्य

दौहित्रादीन्ते मृत्योः शोच्यान्धर्मविमोहितान् । वर्गस्वर्गापवर्गाणां प्रायेणैकात्म्यहेतुना ॥२९॥ यत्पादसेवाभिरुचिस्तपस्विनामशेषजन्मोपचितं मलं धियः । सद्यः क्षिणोत्यन्वहमेधती सती यथा पदांगुष्ठविनिःसृता सरित् ॥३०॥ विनिर्धुताशेषमनोमलः पुमानसंगविज्ञानविशेषवीर्यवान् । यदंघ्रिमूले कृतकेतनः पुनर्न संसृतिं क्लेशवहां प्रपद्यते ॥३१॥ तमेव यूयं भजतात्मवृत्तिभिर्मनोवचःकायगुणैः स्वकर्मभिः । अमायिनः कामदुघांघ्रिपंकजं यथाधिकारावसितार्थसिद्धयः ॥३२॥ ती

मिति २९ । किंच जीवानां मोक्षदः परमेश्वर एव नार्वाग्देवतानामपि जीवत्वाविशेषादित्याशयेनाह त्रिभिः । यस्य पादयोः सेवायामभिरुचिस्तपस्विनां संसारतप्तानां अशेषजन्मभिः संवृद्धं धियो मलं सद्यः क्षपयति तमेव भजतेति तृतीयेनान्वयः । कथंभूता अहन्यहनि वर्द्धमाना सती सात्विकी तत्पादसंबंधस्यैव षमाहिमेति दृष्टांतेनाह यथेति । ३० । विनिर्धूता अशेषा मनोमला यस्य असंगो वैराग्यं तेन विज्ञानस्य विशेषः साक्षात्कारः तदेव वीर्यं यस्य । यस्य अंघ्रिमूले कृताश्रयः सन् । ३१ । आत्मवृत्ति ९ जनरष्टे

भा०च भिरध्यापनादिभिः मनोवचःकायानां गुणैः ध्यानस्तुतिपरिचर्याभिः अमायिनः निःकपटाः संतः। ननु ब्रह्मादिभिः सेव्येषु किमस्म
७५ च्छ्रुत्या भविष्यति तत्राह। यथाधिकारमेवावसितानिश्चितानि समाम्नातावार्थसिद्धिर्येषां।३२॥ स्वकर्मभिर्यागादिभिर्भजंतस्तु
ष्टं। तत्र ब्रह्मार्पणं ब्रह्म हविरिति न्यायेन सर्वेषु यागतदंगतत्फलेषु भगवद्दृष्ट्या कर्म कर्तव्यं न भिन्नदृष्ट्येति वक्तुं तेषां भगव
द्रूपतामाह द्वाभ्यां। असौ भगवानेव स्वरूपतो विशुद्धविज्ञानघनोपि अगुणो निर्विशेषणोपि सन्निहि कर्ममार्गे नैकगुणः
नानाविशेषणवान् अध्वरो यज्ञः संपद्यते। यज्ञो वै विष्णुरिति श्रुतेः। अनेकगुणत्वमेवाह। पृथग्विधानि यानि द्रव्यादीनि

असाविहानेकगुणोऽगुणोध्वरः पृथग्विधद्रव्यगुणक्रियोक्तिभिः। संपद्यतेर्थाशयलिंगनामभिर्विशुद्धवि
ज्ञानघनः स्वरूपतः॥३३॥ प्रधानकालाशयधर्मसंग्रहे शरीर एष प्रतिपद्य चेतनां। क्रियाफलत्वेन विभु
र्विभाव्यते यथानलो दारुषु तद्गुणात्मकः॥३४।

तैः तत्र द्रव्याणि व्रीह्यादीनि गुणाः शुक्लादयः क्रिया अवघातादयः उक्तयो मंत्राः अर्थो गसाध्य उपकारः आशयः संकल्पः
लिंगं पदार्थानां शक्तिः नामज्योतिष्टोमादि तैरध्वरः संपद्यते।३३। यागफलस्यापि भगवद्रूपतामाह। प्रधानेति। एष विभुः
परमानंदोपि शरीरे चेतनां विषयाकारां बुद्धिं प्रतिपद्य तद्भिर्व्यंग्यानंदरूपः सन् क्रियाफलत्वेन प्रतीयते। एतस्यैवानं
दस्यान्यानि भूतानि मात्रामुपजीवंतीति श्रुतेः। यथानलो दारुषु स्थितः तद्गुणात्मकः दारुधर्मदैर्घ्यवक्रत्वादिमा ७५
न् तद्वत्। कथंभूते शरीरे प्रधानं अव्यक्तं कालः क्षोभकः आशयो वासना धर्मोऽदृष्टं तैः संगृह्यते जन्यत इति तथा तस्मिन्।३४

तदेवमप्रवृत्तान् भगवद्भजने प्रवर्त्य स्वतः प्रवृत्तानां प्रवृत्तिमभिनंदनेन दृढयति अहो इति वितरंति कुर्वंति।३५। इदानीं हरि
भक्तिदार्ढ्याय ब्राह्मणभक्तिं विधत्ते मा जातु इति त्रिभिः। महत्स्वश्वता ऋद्ध्यश्च तभिर्यद्राजकुलस्य तेजः तत्। तस्मात्स्वका
यात् द्विजानां कुले। अजितो देवता येषां वैष्णवानां तेषां च कुले मा जातु प्रभवेत् कदाचिदपि प्रभावं न करोतु। कथंभूते स

अहो ममामी वितरंत्यनुग्रहं हरिं गुरुं यज्ञभुजामधीश्वरं। स्वधर्मयोगेन यजंति मामका निरंतरं क्षोणितले दृढ
व्रताः॥३५॥ मा जातु तेजः प्रभवेन्महर्द्धिभिस्तितिक्षया तपसा विद्यया च। देदीप्यमानेऽजितदेवतानां कुले स्व
यं राजकुलाद्द्विजन्मनां॥३६॥ ब्रह्मण्यदेवः पुरुषः पुरातनो नित्यं हरिर्यच्चरणाभिवंदनात्। अवाप लक्ष्मी
मनपायिनीं यशो जगत्पवित्रं च महत्तमाग्रणीः॥३७॥ यत्सेवयाशेषगुहाशयः स्वराड् विप्रप्रियस्तु
ष्यति काममीश्वरः॥ तदेव तद्धर्मपरैर्विनीतैः सर्वात्मना ब्रह्मकुलं निषेव्यतां॥३८॥ श्रीकृष्णराम

महद्भिर्विनापि स्वयमेव तितिक्षादिभिर्देदीप्यमाने।३६। ब्राह्मणान् स्तुवन्नाह। यच्चरणाभिवंदनाद्धरिर्लक्ष्मीं यश
श्च अवाप। यत्सेवया चेश्वरस्तुष्यति। तदेव ब्रह्मकुलं निषेव्यतामिति द्वयोरन्वयः।३७। हरेर्लोकसंग्रहरूपो यो
धर्मः तत्परैः।३८।

भा०४० ननुब्रह्मकुलएवनित्यंसेव्यमानेसर्वदेवतामुखभूते अग्नौयज्ञाद्यनुष्ठानंनस्यात्तर्हितेनविनाचित्तशुद्धिःनतयाविना
मोक्षःस्यादित्याशंक्याह।पुमानितिद्वाभ्यां।यस्यब्रह्मकुलस्यनित्यसंबंधेननिषेवयापुमान्स्वयमेवज्ञानाभ्यासा
७६ दिकंविनापिअत्यंतंशममोक्षंलभेत।कुतःयत्सेवयास्वतएवअनतिवेलंशीघ्रंप्रसीदतःशुद्ध्यतःआत्मनश्चित्तात्त
तःपरंश्रेष्ठंदेवानांकिंमुखमस्ति।ब्राह्मणसेवयैवयज्ञादिफलंतत्सर्वंभवतीत्यर्थः।३९। हरेरपितदेवपरंमुखमित्या

पुमाल्लभेतानतिवेलमात्मनःप्रसीदतोत्यंतशमंस्वतःस्वयं।यन्नित्यसंबंधनिषेवयाततःपरंकिम
त्रास्तिमुखंहविर्भुजां॥३९॥ अश्नात्यनंतःखलुतत्वकोविदैःश्रद्धाहुतंयन्मुखइज्यनामभिः।नवै
तथाचेतनयाबहिःकृतेहुताशनेपारमहंस्यपर्यगुः॥४०॥
ससासोसनपारमहंस्यपर्यगुःज्ञानरूपःसर्वांतर्यामीत्यर्थः॥४०॥

ह।अश्नातीति।इज्यानामिंद्रादीनांनामभिर्यस्यमुखेश्रद्धयाहुतंहविरनंतोयथाश्नातितथाचेतनयारहितेहुता
शनेहुतंनाश्नाति।कैर्हुतमश्नातितत्वकोविदैः।सर्वदेवमयश्चेतन्यमूर्त्तिरनंतइतितत्वविद्भिःद।कुतएवंभूतोऽसौ ७६
तत्राह।पारमहंस्यंज्ञानंतत्परानर्हंतिअधिकुर्वंतीतिपारमहंस्यपर्याः।तागावोवाचोयस्मिन्।उपनिषद्भिःज्ञान
घत्वेनोक्तइत्यर्थः।यद्वापरमहंसानांज्ञाननिष्ठानांगम्यःपारमहंस्यःपरितानगच्छंतिगावोयस्मासपर्यगुःइंद्रियानियंता

नकेवलंचेतनत्वेनहुताशनाद्विशेषःकिंतुवेदज्ञानादपीत्याह।यदित्सव्ययं।येब्रह्मवेदंनित्यंबिभ्रति।तेषामित्युत्तरेणान्व
यः।मंगलंनामप्रशस्ताचरणंनित्यमप्रशस्तस्यवर्जनं।एतद्धिमंगलंप्रोक्तमृषिभिस्तत्वदर्शिभिः।मौनमध्ययनादिरोधि
ग: वार्त्तात्यो।समाधिनाचित्तस्थैर्येण अर्थदृष्टयेवेदार्थमपिविचारयंतीत्यर्थः।यत्रवेदइदंविश्वं।४१।यह आर्याः आयुर्य
यद्ब्रह्मनित्यंविरजंसनातनंश्रद्धातपोमंगलमौनसंयमैः।समाधिनाबिभ्रतिहार्थदृष्टयेयत्रेदमादर्शइवाव
भासते॥४१॥तेषामहंपादसरोजरेणुमार्यावहेयाधिकिरीटमायुः।यंनित्यदाबिभ्रतआशुपापंनश्यत्य
मुंसर्वगुणाभजंति॥४२॥गुणायनंशीलधनंकृतज्ञंवृद्धाश्रयंसंवृणतेनुसंपदः।प्रसीदतांब्रह्मकुलं
गवांचजनार्दनःसानुचरश्चमह्यं॥४३॥ मैत्रेयउवाच इतिब्रुवाणंनृपतिंपितृदेवद्विजातयः।तुष्टुवु
र्हृष्टमनसःसाधुवादेनसाधवः॥४४॥ पुत्रेणजयतेलोकानितिसत्यवतीश्रुतिः।ब्रह्मदंडहतःपापोय
द्वेनोत्यतरत्तमः॥४५॥ हिरण्यकशिपुश्चापिभगवन्निंदयातमः।विविक्षुरत्यगात्सूनोःप्रह्लादस्यानुभावतः॥४६
वज्जीवंअधिकिरीटंमुकुटस्योपरिवहेयेतिप्रार्थनायांलिङ्।यंरेणुं।४२।गुणाभजनस्यफलमाह।गुणायनंअन्वनु
संपदःसंवृणतेसम्यग्भजंतितस्मात्प्रसीदतांप्रसीदतु।गवांचकुले।४३।४४।साधुवादमाह।पुत्रेणेतिषड्भिः।यद्यतःवेनोपितमो
नरकमत्यतरत् अतितताार॥४५॥४६॥
...बुध
...शतिदश

४७। मुकुंदनाथाः स्मः। त्वन्नाथत्वमेव मुकुंदनाथत्वे पर्यवसितमित्यर्थः। तत्र हेतुः। य इति। ४८। आजीविनां सेवकानां अंग्रीं अनु
शासनं। प्रजास्वनुरागः प्रकृतिः स्वभावः। ४९। पारात् आदितः प्रापितः। कर्मभिर्भ्राम्यतां। ५०। ईश्वरदृष्ट्या विप्रादयोपि प्रणमं
ति। नम इति ब्रह्म आविश्य ब्राह्मणजातिमधिष्ठाय क्षत्रं क्षत्रियं बिभर्त्ति। क्षत्रं वाविश्य ब्रह्म बिभर्त्ति तदुभयं वाविश्य इदं वि

वीरवर्य पितः पृथ्व्याः समाः संजीव शाश्वतीः। यस्येदृश्यच्युतभक्तिः सर्वलोकैकभर्त्तरि। ४७। अहो वयं ह्यद्य
पवित्रकीर्त्ते त्वयैव नाथेन मुकुंदनाथाः। य उत्तमश्लोकतमस्य विष्णोर्ब्रह्मण्यदेवस्य कथां व्यनक्ति। ४८। ना
त्यद्भुतमिदं नाथ तवाजीव्यानुशासनं। प्रजानुरागो महतां प्रकृतिः करुणात्मनां। ४९। अद्य नस्तमसः
पारस्त्वयोपासादितः प्रभो। भ्राम्यतां नष्टदृष्टीनां कर्मभिर्दैवसंज्ञितैः। ५०। नमो विवृद्धसत्वाय पुरुषाय
महीयसे। यो ब्रह्म क्षत्रमाविश्य बिभर्त्तीदं स्वतेजसा। ५१। ॥ इति श्रीभागवते महापुराणे चतुर्थस्कं
धे एकविंशोध्यायः॥ श्रीमैत्रेय उवाच ॥ जनेषु प्रगृणत्स्वेवं पृथुं पृथुलविक्रमं। तत्रोपजग्मुर्मु
नयश्चत्वारः सूर्यवर्चसः। १। तांस्तु सिद्धेश्वरान् राजा व्योम्नोवतरतोर्चिषा। लोकानपापान्कुर्वत्या सा
नुगोचष्ट लक्षितान्। २। x शदितीयते। १। अर्चिषा लक्षितान् सनकादय इति ज्ञापितान्। अचष्ट। अपश्यत्। २। ७८
श्वं बिभर्त्ति ५१॥ ॥ इति चतुर्थे एकविंशः॥ ॥ द्वाविंशे तु परं ज्ञानं पृथवे हरिशासनात्। सनत्कुमारो भगवानुपादि

तेषां दर्शनेनोद्गतान्प्राणानाप्तुमिच्छुरिव। अयं भावः। ऊर्ध्वं प्राणा ह्युत्क्रामंति यूनः स्थविर आयति प्रत्युत्थानाभिवादा
भ्यां पुनस्तान्प्रतिपद्यते इति स्मृतेः। प्राणास्तावत्तत्तेजसाक्षिप्तास्तान्मृत्युमिच्छंति। अतः स्वयमेव नु गच्छतः प्राणान्नि
स्यादिति भयादिव ससंभ्रमं प्रत्युद्गमनं करोति। सहसदस्यैरनुगैश्च वर्तमानः। इंद्रियेशो जीवः गुणान् गंधादीन्प्रति यथोद्ग

तद्दर्शनोद्गतान्प्राणान्प्रत्यादित्सुरिवोत्थितः। ससदस्यानुगो वैन्य इंद्रियेशो गुणानिव। ३। गौरवाद्यंत्रि
तः सभ्यः प्रश्रयानतकंधरः। विधिवत्पूजयांचक्रे गृहीताध्यर्हणासनान्। ४। तत्पादशौचसलिलैर्मार्जि
तालकबंधनः। तत्र शीलवतां वृत्तमाचरन्मानयन्निव। ५। हाटकासन आसीनान्स्वधिष्ण्येष्विव पा
वकान्। श्रद्धासंयमसंयुक्तः प्रीतः प्राह भवाग्रजान्। ६। पृथुरुवाच अहो आचरितं किं मे मंग
लं मंगलायनाः। यस्य वो दर्शनं ह्यासीद्दुर्दर्शानां च योगिभिः। ७। किं तस्य दुर्लभतरमिह लोके परत्र
वा। यस्य विप्राः प्रसीदंति शिवो विष्णुश्च सानुगः। ८। ॥ भिः हे मंगलायना मंगलमप्ययेषां मया किं मं
गलमाचरितं यस्य मे योगिभिरपि दुर्दर्शाना। ७। ८।
छतीत्योत्कंठ्य दृष्टांतः। ३। यंत्रितो वशीकृतः। ४। गृहीतमध्यर्हणं अर्घ्यमासनं च यैस्तान्। ४। मार्जितं क्षालितमलकबंध
नं यस्य मानयन्निव स्वयं चचार। ५। भवस्याग्रजत्वेन मान्यान्। ६। प्रीतः प्राहेत्युक्तं तदेव प्रीतिपूर्वकं वचनमाह। अहो इति द्वा

दुर्दर्शत्वमेवाह नैवेति। सर्वदृशामात्मानं यथा सर्वदृश्या न लक्षयंते येस्य विश्वस्य हेतवो हेतवो महदादयो मन्वादयो वा। यद्वा कथंभू
तान् येस्य सर्वदृगात्मदर्शनस्य हेतवस्तान्। ९। येषां साधूनां गृहाः अर्हणा पूज्यानां वर्याः वरणीयाः स्वीकारार्हाः अंब्वादयो येषु ता
दृशाः अंबुतृणावनिभूमिश्वराः ईश्वरोगृहस्वामी च अवराः भृत्यादयश्च। १०। या लोलामालयाः कुमाः एवंते अरिक्ताः पूर्णाः अखिलाः
संपदो येषु तादृशा अपि ये गृहाः तीर्थपादीयाः वैष्णवास्तेषां पादतीर्थेन विवर्जिताः। ११। स्वागतं भद्रमागमनं जातं यस्माद्वा

नैव लक्ष्यते लोको लोकान्पर्यटतोपि यान्। यथा सर्वदृशः सर्व आत्मानं येस्य हेतवः॥ ९॥ अधना अपि ते धन्याः
साधवो गृहमेधिनः। यद्गृहा ह्यर्हवर्याम्बुतृणभूमीश्वरावराः॥ १०॥ व्यालालयद्रुमा वैतेष्वरिक्ताखिलसंपदः।
यद्गृहास्तीर्थपादीयपादतीर्थविवर्जिताः॥ ११॥ स्वागतं वो द्विजश्रेष्ठाय द्व्रतानि मुमुक्षवः। चरंति श्रद्धया धीरा
बाला एव ब्रुवंति वै॥ १२॥ कच्चिन्नः कुशलं नाथा इंद्रियार्थार्थवेदिनां। व्यसनावाप एतस्मिन्पतितानां स्वकर्म
भिः॥ १३॥ भवत्सु कुशलप्रश्न आत्मारामेषु नेष्यते। कुशलाकुशला यत्र न संति मतिवृत्तयः॥ १४॥ तदहं कृतविश्रंभः
सुहृदो वस्तपस्विनां। संपृच्छे भव एतस्मिन्क्षेमः केनांजसा भवेत्॥ १५॥ सः सन्तपस्विनां संततानां सुहृदो युष्मान्स्पृच्छामि १५ ७८

ला एव भवंतीति ब्रुवंति। व्रतानि चरंति। यद्वा येषां वो व्रतानि अन्ये बालाः चरंति। १२। इंद्रियार्थमेवार्थं पुरुषार्थं वदंति तेषां नः व्यस
नान्युप्यंते यस्मिन् तस्मिन्संसारे। १३। ननु आत्मारामाणां कुशलं पृच्छ्यते लोके न त्वात्मनस्तत्राह भवत्स्विति। १४। तत्तस्मात्कृतविश्वा

नखलु त्वन्ययोगितुल्या यूयं किंतु साक्षाद्भगवानेवेत्याह। व्यक्तं निश्चितं आत्मवतां धीराणां आत्मत्वेन प्रकाशमानः। आत्मानं भा
वयति प्रकाशयतीति तथा इमां पृथिवीं चरति। १६। सूक्तं शोभनं वचनं सारं न्याय्यं। सुष्टु गंभीरार्थं। मितमल्पाक्षरं मधु श्रोत्र
प्रियं मुखप्रसत्त्या स्मयमान इव प्रतीयमानः। १७। १८। स्वयमपि पृथोः संगममभिनंदति। संगम इति। उभयेषां वक्तॄणां श्रोतॄणां
चपेषां संभाषणसहितः संप्रश्नः सर्वेषां शं सुखं विस्तारयति। १९। तदेव संगमं प्रश्नं चाभिनंद्यानुवादमुखेनैव मोक्षसाधन

व्यक्तमात्मवतामात्मा भगवानात्मभावनः। स्वानामनुग्रहायेमां सिद्धरूपी चरत्यजः॥ १६॥ श्रीमैत्रेय उवाच पृ
थोस्तत्सूक्तमाकर्ण्य सारं सुष्टु मितं मधु। स्मयमान इव प्रीत्या कुमारः प्रत्युवाच तं॥ १७॥ श्रीसनत्कुमार उवाच॥
साधु पृष्टं महाराज सर्वभूतहितात्मना। भवता विदुषा चापि साधूनां मतिरीदृशी॥ १८॥ संगमः खलु सा
धूनामुभयेषां च संमतः। यत्संभाषणसंप्रश्नः सर्वेषां वितनोति शं॥ १९॥ अस्त्येव राजन्भवतो मधुद्विषः पा
दारविंदस्य गुणानुवादने। रतिर्दुरापा विधुनोति नैष्ठिकी कामं कषायं मलमंतरात्मनः॥ २०॥ शास्त्रेष्वियानेव सु
निश्चितो नृणां क्षेमस्य सध्यग्विमृशेषु हेतुः। असंग आत्मव्यतिरिक्त आत्मनि दृढा रतिर्ब्रह्मणि निर्गुणे च या २१

मुपदिशति। अस्त्येवेति। गुणानामनुवादने प्रश्नद्वारेणानुवादप्रवर्तने श्रवणादि इत्यर्थः। आत्मनो मनसोंतःस्थं कामात्मकं मलं विधुनोति
कषायं धातुरागवदनिवर्त्यं। २०। चित्तशुद्धौ च बहिर्वैराग्यमात्मनि रतिश्च भवति न च ततोधिकं साधनमस्ति शास्त्रेषु तयोरेव मोक्षहेतुत्वनिश्चया
दित्याह। शास्त्रेष्विति सध्यग्विमृशेषु सम्यग्विचारवत्सु। क्षेमस्य हेतुरेतावानेव सुनिश्चितः को सौ आत्मव्यतिरिक्ते असंगो वैराग्यं
आत्मनि च रतिः। आत्मनो विशेषणं निर्गुणे ब्रह्मणीति २१॥

भा० ४ नन्वेतदेव दुर्लभमित्याशंक्योत्तमाधिकारिणः श्रवणमात्रेण भवति। अन्यस्य तु चित्तशुद्ध्यनुसारेण साधनतारतम्यतो वर्द्धमान
७१ याभक्त्येत्यभिप्रेत्याह सेति चतुर्भिः। सा ब्रह्मणि रतिरसंगश्च श्रद्धादिभिः स्यादिति चतुर्थेनान्वयः। जिज्ञासया तत्त्वविशेषबुभु
त्सया। पुण्यं श्रवो यशो यस्य तस्य हरेः पुण्यया कथया च ॥२२॥ अर्थारामा अर्थनिष्ठास्तामसाः इंद्रियारामाः कामनिष्ठाः राज
साः तैः सह या गोष्ठी तस्यामतृष्णया तेषां च ये संमता अर्थाः कामाश्च तेषामपरिग्रहेण। विविक्ते विजने या रुचिस्तया। आत्मन्येव

साश्रद्धया भगवद्धर्मचर्यया। जिज्ञासयाध्यात्मिकयोगनिष्ठया। योगेश्वरोपासनया च नित्यं पुण्यश्रवःकथया पु
ण्यया च ॥२२॥ अर्थेंद्रियारामसगोष्ठ्यतृष्णया तत्संमतानामपरिग्रहेण च। विविक्तरुच्या परितोष आत्मन्विना
हरेर्गुणपीयूषपानात् ॥२३॥ अहिंसया पारमहंस्यचर्यया स्मृत्या मुकुंदाचरिताग्र्यसीधुना। यमैरकामै धु
र्नियमैश्चाप्यनिंदया निरीहया द्वंद्वतितिक्षया च ॥२४॥ हरेर्मुहुस्तत्परकर्णपूरया गुणाभिधानेन वि
जृंभमानया। भक्त्या ह्यसंगः सदसत्यनात्मनि स्यान्निर्गुणे ब्रह्मणि चांजसा रतिः ॥२५॥ श्रीरामराम

परितोषे च मतिः स्यात्। किंतु हरेर्गुणपीयूषपानाद्विना तस्मिन्सति विविक्तरुचिर्न कार्या। न चात्मनि परितोषः कार्य इत्यर्थः ॥२३॥
पारमहंस्यचर्यया उपशमादिप्रधानया वृत्त्या। स्मृत्या आत्महितानुसंधानेन। मुकुंदाचरितमेवाग्र्यं सीधु श्रेष्ठममृतं तेन चरित
स्मृतिसुखेनेत्यर्थः। मार्गांतरस्यानिंदया निरीहया योगक्षेमार्थक्रियाराहित्येन शीतोष्णादिद्वंद्वसहनेन ॥२४॥ कथयेत्युक्तम ७१
पि कथनं भक्तावंतरंगत्वेन पुनरुच्यते। तत्परा हरिभक्ताः तेषां कर्णपूराः कर्णालंकारभूता ये हरेर्गुणाः तेषामभिधानेन। सदसति
कार्यकारणात्मके ॥२५॥

भवत्यन्यत्रासंग आत्मरतिश्च ततः किमत आह। यदा निष्ठां प्राप्ता रतिर्भवति तदाचार्यवान्सन् ज्ञानवैराग्ययोर्वेगेन अवीर्यं निर्वासनं स
लिंगजीवस्य कोशमावरकं हृदयं पुमान्दहति। तत्कथंभूतं पंचमहाभूतप्रधानं यद्वा अविद्यास्मितारागद्वेषाभिनिवेशाः पंच क्लेशास्त
दात्मकं। उत्थितोऽग्निर्ज्वलितोऽग्निर्योनिमरणिमिव। यद्वा यदा रतिराचार्यानुग्रहश्च तदा ज्ञानविरागयोर्वेगेनोत्थितः साक्षात्कारः
अवीर्यं पुनःप्ररोहक्षमं यथा न भवत्येवं दहति। शेषं समानं ॥२६॥ ततः किमत आह। दग्ध आशयो हृदयमुपाधिर्यस्य। अत एव
मुक्ताः समस्तास्तद्गुणाः कर्तृत्वादयो येन। आत्मनः सकाशाद्बहिर्घटादि अंतः सुखदुःखादि नैव विविष्टे न पश्यति। कुत इत्यपे

यदा रतिर्ब्रह्मणि नैष्ठिकी पुमानाचार्यवान्ज्ञानविरागरंहसा। दहत्यवीर्यं हृदयं जीवकोशं पंचात्मकं योनिमिवोत्थितो
ऽग्निः ॥२६॥ दग्धाशयो मुक्तसमस्ततद्गुणो नैवात्मनो बहिरंतर्विचष्टे। परात्मनोर्यद्व्यवधानं पुरस्तात्स्वप्ने य
था पुरुषस्तद्विनाशे ॥२७॥ आत्मानमिंद्रियार्थं च परं यदुभयोरपि। सत्याशय उपाधौ वै पुमान्पश्यति नान्यदा ॥२८
भयं रकं तन्नाशे द्वैतनाशनइति २९

क्षायां द्रष्टृदृश्यप्रतीतेरंतःकरणहेतुत्वादित्याह। परो दृश्यः आत्मा द्रष्टा तयोर्यद्व्यवधानं भेदकं पूर्वमासीत्तस्य विनाशे सति य
था स्वप्ने राजाहमित्यारोपितं सैन्यादि द्रष्टारं दृश्यं सैन्यं च स्वप्नावस्थानाशे न पश्यति तद्वत् ॥२७॥ द्रष्टृदृश्यभेदप्रतीतेरंतःकर
णहेतुत्वमन्वयव्यतिरेकाभ्यामुपपादयति। आत्मानमिति आत्मानं द्रष्टारं इंद्रियार्थं दृश्यं उभयोस्तयोः परं संबंधहेतुमहंकारं
च आशयेंतःकरणे सत्येव जाग्रत्स्वप्नयोः पश्यति। अन्यदा सुषुप्तौ। तदुक्तं दृश्यानुरंजितं द्रष्टृ दृश्यं द्रष्टनुरंजितं। अहंत्वो

भा॰ प एकस्मिन्नात्मनि दृश्यादिभेदप्रतीतिरौपाधिकीति दृष्टांतेन स्पष्टयति निमित्त इति । लोके बिंबस्य सर्वत्र जलदर्पणादौ भेदनिमित्ते सत्येव आ
८० त्मनो बिंबभूतस्य परस्य प्रतिबिंबस्य च भेदं पश्यति न तु जलाद्यभावे । २८ तदेवं सतु भिस्संगात् मरसो मोक्षहेतुत्वमुक्तं । इदानी
मनात्मरतेः संसारहेतुत्वमाह । इंद्रियैरितिचतुर्भिः । ध्यायतां गुणारोपेण स्मरतां पुंसामिंद्रियाणि अस्मिन्ते विषयेष्वाकृष्यंते ते
श्च मन आकृष्य ते विषयासक्तिं प्राप्यते । तच्च बुद्धेः सकाशात् तद्धर्मं चेतनां विचारसामर्थ्यं हरति । एतच्चाक्लिवेनानुलक्ष्यत इति के
निमित्ते सति सर्वत्र जलादावपि पूरुषः । आत्मनश्च परस्यापि भिदां पश्यति नान्यदा ॥ २९ ॥ इंद्रियैर्विषयाकृष्टैराक्षि
प्तं ध्यायतां मनः । चेतनां हरते बुद्धेः स्तंबस्तोयमिव ह्रदात् ॥ ३० ॥ भ्रश्यत्यनुस्मृतिश्चित्तं ज्ञानभ्रंशः स्मृतिक्षये । तद्रो
धं कवयः प्राहुरात्मापह्नवमात्मनः ॥ ३१ ॥ नातः परतरो लोके पुंसः स्वार्थव्यतिक्रमः । यदध्यन्यस्य प्रेयस्त्वमा
त्मनः स्वव्यतिक्रमात् ॥ ३२ ॥ अर्थेंद्रियार्थाभिध्यानं सर्वार्थापह्नवो नृणां । भ्रंशितो ज्ञानविज्ञानाद्येनाविशति मुख्यतां
३३ ॥
×स्याभिध्यानं सर्वार्थनाशः । ज्ञानं विज्ञानं च परोक्षापरोक्षं येन ध्यानेन मुख्यतां स्थावरतां । ३३ ॥

दृष्टांतेनाह । तीरजः शोकुं दृस्तंबो यथा मूलैस्तोयं ह्रदादपहरति तद्वत् । ३० चित्तं चेतनामनु तस्यामपहृतायां स्मृतिः पूर्वापरानु
संधानं भ्रश्यति । एवं तद्रोधं ज्ञानभ्रंशं आत्मन एव हेतोरात्मनोपह्नवं नाशं प्राहुः ॥ ३१ ॥ एवंभूतो नाशो भवतु ततश्च किमिति ८०
अत आह । यदप्रियमधिकृत्यान्यस्य विषयस्य प्रियत्वमलं । आत्मनस्तु कामाय सर्वं प्रियं भवतीति श्रुतेः । तस्यात्मनः स्वेनैव व्य
यतिक्रमोऽपह्नवः तस्माद्यः स्वार्थनाशः अतः परतरः स्वार्थनाशो नास्ति । ३२ कुत इत्यत आह । अर्थस्याभिध्यानं इंद्रियार्थः कामस्त

अनात्मरतेरनर्थहेतुत्वमुक्तं । संगस्याप्यानीति । यदुक्तं धर्मादीनां विघातकं तस्मिन्संगं तमः संसारं । ३४ तुल्यवन्निर्देशात् पुरुषार्थ
साम्य भ्रांतिं वारयति । तत्रापीति । कृतांतः कालः । ३५ भयसंयुतत्वमेवाह । परे ब्रह्मादयः अवरे अस्मदादयः गुणक्षोभाद्नु पश्चाद्भवं
ति । ईशः कालः तेन विध्वंसिता आशिषो येषां । ३६ यस्मादनात्मरतिरनर्थहेतुः न तस्माज्जगतां जंगमानां तस्थुषां स्थावराणां
च देहादिभिरात्मनाहंकारेणावृतानां हृदये यश्चकास्ति प्रकाशते तमवेहि । कथं सोऽस्मीति सोऽस्मीति पाठे स एव कोऽस्ति ततोऽन्य
न कुर्यात्कर्हिचित्संगं तमस्तीव्रं तितीरिषुः । धर्मार्थकाममोक्षाणां यदत्यंतविघातकं ॥ ३४ ॥ तत्रापि मोक्ष एवार्थ
आत्यंतिकतयेष्यते । त्रैवर्ग्योऽर्थो यतो नित्यं कृतांतभयसंयुतः ॥ ३५ ॥ परेऽवरे च ये भावा गुणव्यतिकराद
नु । न तेषां विद्यते क्षेममीशविध्वंसिताशिषां ॥ ३६ ॥ तत्त्वं नरेंद्र जगतामथ तस्थुषां च देहेंद्रियासुधिषणा
त्मभिरावृतानां । यः क्षेत्रवित्तपतया हृदि विश्वगाविः प्रत्यक्चकास्ति भगवांस्तमवेहि सोऽस्मि ॥ ३७ ॥ ॥

दसदित्यर्थः । ननु जीवो हृदि चकास्ति नान्यस्तत्राह । क्षेत्रविदं जीवं तपति नियमयतीति क्षेत्रवित्तपः तस्य भावस्तत्ता त
या अंतर्यामिरूपेण । यद्वा क्षेत्रवित्ते अहंममतास्पदे पातीति क्षेत्रवित्तपः तेन रूपेण जीवस्य पारतंत्र्यान्न पाति । ननु कर्म
जीवं नियच्छति । न । आविः प्रत्यक्षः तर्हि बुद्धिः न । प्रत्यक्प्रतिलोमं चकास्ति । बुद्धिस्तु पराक् विषयाकारेण । तर्ह्यहंकारः
नं विश्वक् व्याप्तत्वेन । स तु परिच्छिन्नः एवंभूतो यो भगवांस्तं अवेहीति ॥

भा०४ स्थावरजंगमादीनांदृश्विकास्तीत्युक्तेतेषांसत्वंतत्संबधादीश्वरस्यमालिन्यंचप्रसक्तंनिराकुर्वन्नुद्दिष्टंभक्त्यातंप्रणम॥त॥
८१ दंविश्वंसदसदात्मकतयाउत्कृष्टनिकृष्टभावेनकार्यकारणभावेनवामायैवभातितंप्रपद्ये।मायात्वेहेतुःविवेकेनविधुतिर्निराकृतिर्य
स्यतत्।स्रजिवेतिवाशब्दोदृष्टांतेनित्यमुक्तं।यतःपरिशुद्धंतत्कुतःविशुद्धंतत्वंसत्वं।अतएवप्रत्यूढाअभिभूताकर्मभिःकलिला
मलिनाप्रकृतिर्येनतं।३८।तमेवेहीतिज्ञानमुपदिश्यंतस्यदुष्करत्वेनभक्तिमुपदिशतिद्वाभ्यां।यस्यपादपंकजयोःपलाशा

यस्मिन्निदंसदसदात्मतयाविभातिमायाविवेकविधुतिस्रजिवाहिबुद्धिः।तंनित्यमुक्तपरिशुद्धविशुद्धतत्वंप्रत्यू
ढकर्मकलिलप्रकृतिंप्रपद्ये॥३८॥यत्पादपंकजपलाशविलासभक्त्याकर्माशयंग्रथितमुद्ग्रथयंतिसंतः।तद्वन्नरि
क्तमतयोयतयोपिरुद्धस्रोतोगणास्तमरणंभजवासुदेवं॥३९॥कृछ्रोमहानिहभवार्णवमप्लवेशां
षड्वर्गनक्रमसुखेनतितीर्षयंति।तत्त्वंहरेर्भगवतोभजनीयमंघ्रिंकृत्वोडुपंव्यसनमुत्तरदुस्तरार्णं॥४०॥

नि अंगुलयःतेषांविलासःकांतिःतस्यभक्त्यासमृत्याकर्माशयंअहंकाररूपंहृदयग्रंथिंकर्मभिरेवग्रथितं।रिक्तानिर्विषयामतिर्ये
षां।रुद्धःप्रत्याहृतःस्रोतोगणःइंद्रियवर्गोयैः।अरणंशरणं।३९।ननुब्रह्मविदाप्नोतिपरमितिश्रुतेःकथंयतयोनोत्तरं
यंतीत्युच्यतेतत्राह।कृछ्रइति।अप्लवेशांनप्लवःतरणहेतुःईट्ईशायेषांतेषांमहानिहतरणेकष्टःक्लेशःतेहिअसुखेन ८१
योगादिनाइंद्रियषड्वर्गग्राहंभवार्णवंतितीर्षंति।तत्तस्माद्उडुपंप्लवंदुस्तरार्णवमित्यर्थः॥यद्वाअर्णशब्दसकाराभावआर्षः
दुस्तरादकरूपव्यसनमित्यर्थः॥४०॥

आत्ममेधसाब्रह्मविदादर्शिताआत्मनोगतिस्तत्वंयस्मैसः।४१।ब्रह्मन्नितिसंबोधनंप्राधान्यादेकस्य।यूयमित्युक्तिःसर्वा
न्प्रति।४२।आत्मनादेहेनसहसर्वंराज्यादिकमदोयत्साधूछिष्टंसाधुभिःस्वीयसन्मध्ये प्रसादरूपेणादत्तं।अतस्तत्र
ममसत्ताभावात्।गुरुदक्षिणार्थंकिंददे।नहिपित्रादिदत्तंमोदकादितस्मैदानरूपेणप्रत्यर्प्यते।४३।निवेदनं
उत्तरीयस्येवसमर्पणंयथाभृत्योराज्ञसेवारूपेणतांबूलादिकंअर्पयति।तथामयापिसर्वंनिवेदितं।स्वीकुरुत
श्रीमैत्रेयउवाच॥ ॥सएवंब्रह्मपुत्रेणकुमारेणात्ममेधसा।दर्शितात्मगतिःसम्यक्प्रशस्योवाचतंनृ
पः॥४१॥ श्रीराजोवाच ॥कृतोमेनुग्रहःपूर्वंहरिणार्तानुकंपिना।तमापादयितुंब्रह्मन्भगवन्यूयमा
गताः॥४२॥निष्पादितश्चकार्त्स्न्येनभगवद्भिर्घृणालुभिः।साधूछिष्टंहिसर्वंमेआत्मनासहकिं
ददे॥४३॥प्राणादाराःसुताब्रह्मन्गृहाश्चसपरिछदाः।राज्यंबलंमहीकोशइतिसर्वंनिवेदितं॥४४॥
सेनापत्यंचराज्यंचदंडनेतृत्वमेवच।सर्वलोकाधिपत्यंचवेदशास्त्रविदर्हति॥४५॥स्वमेवब्राह्मणोभुंक्तेस्वं
वस्तेस्वंददातिच।तस्यैवानुग्रहेणान्नंभुंजतेक्षत्रियादयः।४६॥लंभुंजतेनवुदानेस्वतंत्रता॥४६॥

साहप्राणादइति॥४४॥आत्मनःस्वत्वाभावंप्रपंचयतिसेनापत्यंचेतिद्वाभ्यां॥४५॥वस्तेपरिधत्तेअन्नमात्रंकेवं

सत्स्वपि सत्सु सर्वस्वेनापि गुरोः प्रत्युपकर्तुमशक्य मित्याह। यैरिति। आत्मवादे अध्यात्मविचारे एकांततः निश्चयेन निगमिभिः वेदवि
द्भिः तेनित्यमनल्पकरुणाः स्वकृतेनैव दक्षिणादक्षिणा कर्मणा तुष्यंतु। कोनाम तत्कृतमुपकारं प्रति स्वयमुपकरोति। उदपात्रमंजलिं वि
नामयांजलिरेव तेभ्यो बद्ध इत्यर्थः। यद्वा विनोदपात्रं उपहासास्पदं प्रत्युपकारे प्रवृत्तोजनानामुपहासास्पदं भवेदित्यर्थः॥४७॥

येरीदृशी भगवतो गतिरात्मवादे एकांततो निगमिभिः प्रतिपादितानः। तुष्यंत्वदभ्रकरुणाः स्वकृतेन नित्यं कोनाम तत्प्रति
करोति विनोदपात्रं॥४७॥ तत्रात्मयोगमतय आदिराजेन पूजिताः। शीलं तदीयं शंसंतः खे भूवन्मिषतां नृणां॥४८
वैन्यस्तु धर्यो मनुजां संस्थित्याध्यात्मशिक्षया। आप्तकाममिवात्मानं मेन आत्मन्यवस्थितः॥४९॥ कर्माणि च यथा
कालं यथादेशं यथाबलं। यथोचितं यथावित्तमकरोद्ब्रह्मसात्कृतं॥५०॥ फलं ब्रह्मणि विन्यस्य निर्विषंगः समा
हितः। कर्माध्यक्षं च मन्वान आत्मानं प्रकृतेः परं॥५१॥ गृहेषु वर्त्तमानोपि स साम्राज्यश्रिया न्वितः। नासज्जतेंद्रि
यार्थेषु निरहंमतिरर्कवत्॥५२॥ एवमध्यात्मयोगेन कर्माण्यनुसमाचरन्। पुत्रानुत्पादयामास पंचार्चिष्यात्मसं
मतान्॥५३॥ विजिताश्वं धूम्रकेशं हर्यक्षं द्रविणं वृकं। सर्वेषां लोकपालानां दधारैकः पृथग्गुणान्॥५४॥
तेषु तरेपा[illegible]या॥५१॥५२॥ अर्चिषि भार्यायां॥५३॥५४॥
खे अभूवन् आकाशमार्गेणोद्गताः॥४८॥ धर्यो मुख्यः अध्यात्मशिक्षया संस्थितिरेकाग्रतातया। आत्मन्यवस्थितः सन् मेने॥४९॥ ब्रह्मसा ८२
त्कृतं ब्रह्मण्यर्पितं यथा भवति॥५०॥ निर्विषंगः कर्मसु च नासक्तः। कर्माध्यक्षं कर्मसाक्षिणं उदासीनं मन्वानो करोदिति पूर्वेणान्वयः। नासज्ज

५५। सोमः आसौ राजा वसइव भुवो वसु धनं गृह्णन् विसृजंश्चासीत् सूर्यवत्। राज्ञः प्रतपनमाज्ञाकरणं॥५६॥ अग्निरिव दुर्धर्षः द्योः स्व
र्ग इव॥५७॥ समुद्रो यथा गांभीर्येणेतावानिति न बुध्यते तथासावभिप्रायतो दुर्बोधः अचलराट् मेरुरिव॥५८॥५९॥ सर्वात्मा स

गोपीथाय जगत्सृष्टेः काले स्वे स्वे च्युतात्मकः। मनोवाग्वृत्तिभिः सौम्यैर्गुणैः संरंजयन् प्रजाः॥५५॥ राजेत्यधान्ना
मधेयं सोमराजइवापरः। सूर्यवद्विसृजन् गृह्णन्प्रतपंश्च भुवो वसु॥५६॥ दुर्धर्षस्तेजसेवाग्निर्महेंद्रइव दुर्जयः। ति
तिक्षया धरित्रीव द्यौरिवाभीष्टदो नृणां॥५७॥ वर्षति स्म यथाकामं पर्जन्यइव तर्पयन्। समुद्रइव दुर्बोधः सत्वे
नाचलराडिव॥५८॥ धर्मराडिव शिक्षायामाश्चर्ये हिमवानिव। कुबेरइव कोशाढ्यो गुप्तार्थो वरुणो यथा॥
५९॥ मातरिश्वेव सर्वात्मा बलेन सहसौजसा। अविषह्यतया देवो भगवान्भूतराडिव॥६०॥ कंदर्पइव सौंदर्ये म
नस्वी मृगराडिव। वात्सल्ये मनुवन्नृणां प्रभुत्वे भगवानजः॥६१॥ बृहस्पतिर्ब्रह्मवादे आत्मवत्त्वे स्वयं हरिः। भ
क्त्या गोगुरुविप्रेषु विष्वक्सेनानुवर्तिषु। ह्रियाप्रश्रयशीलाभ्यामात्मतुल्यः परोद्यमे॥६२॥ कीर्त्योर्ध्वगीतया पुं
भिस्त्रैलोक्ये तत्र तत्र ह। प्रविष्टः कर्णरंध्रेषु स्त्रीणां रामः सतामिव॥६३॥ ॥इति श्रीभागवते महापुराणे चतु
र्थस्कंधे पृथुचरिते द्वाविंशोध्यायः॥ × नैवतुल्यः निरूपमः॥६२॥ पुंभिः सत्पुरुषैः रामः सीतापतिर्यथा सतां कर्णरंध्रेषु प्रविष्टः॥६३॥

सर्वत्र संचारशक्तिर्बलादिभिर्मातरिश्वेव भूतराट् श्रीरुद्रः॥६०॥ अजो ब्रह्मेव॥६१॥ आत्मवत्त्वे जितेंद्रियत्वे भक्त्यादिभिः परार्थोद्यमे आत्म

त्रयोविंशे सभार्यस्य वने नित्य समाधितः। विमानमधिरुह्याथ वैकुंठगतिरीर्यते। प्रवयसं वृद्धं दृष्ट्वा तपोवनमगात् इति तृतीयेना
न्वयः। स्वकृतोनुसर्गः अन्नादिसर्गः पुरग्रामादिसर्गश्च वर्द्धितः अशेषः स्वानुसर्गो येन। १। निष्पादितः ईश्वरादेशः प्रजापा
लनादिर्येन। जज्ञिवान् जातः। २। आत्मजां पृथिवीं। विमनःसु चिंतातुरासु सदारः सभार्यः। ३। अदाभ्याः विघ्नैर्नाशयितुम

श्रीमैत्रेय उवाच॥ ॥ दृष्ट्वात्मानं प्रवयसमेकदा वैन्य आत्मवान्। आत्मना वर्द्धिताशेषस्वानुसर्गः प्रजापतिः॥
१॥ जगतस्तस्थुषश्चापि वृत्तिदो धर्मभृत्सतां। निष्पादितेश्वरादेशो यदर्थमिह जज्ञिवान्॥ २॥ आत्मजेष्वात्म
जां न्यस्य विरहाद्रुदतीमिव। प्रजासु विमनःस्वेकः सदारोगात्तपोवनं॥ ३॥ तत्राप्यदाभ्यनियमो वैखानस
सुसंमते। आरब्ध उग्रतपसि यथा स्वविजये पुरा॥ ४॥ कंदमूलफलाहारः शुष्कपर्णाशनः क्वचित्। अब्भक्षः
कतिचित्पक्षान्वायुभक्षस्ततः परं॥ ५॥ ग्रीष्मे पंचतपा वीरो वर्षास्वासारषाण्मुनिः। आकंठमग्नः शिशिरे उद
के स्थंडिलेशयः॥ ६॥ तितिक्षुर्यतवाग्दांत ऊर्द्ध्वरेता जितानिलः। आरिराधयिषुः कृष्णमचरत्तप उत्तमं॥ ७॥

शक्या नियमा यस्य। वानप्रस्थानां सुसंमते। उग्रे तपसि आरब्धः प्रवृत्तः कर्तरि क्तः स्वस्य धरामंडलस्य विजये पूर्वं यथा महता प्रय
त्नेन प्रवृत्तः। ४। उग्रं तपो दर्शयति। कंदमूलेति त्रिभिः। क्वचित्कदाचित्। ५। चतुर्दिक्षु चत्वारोऽग्नयः उपरि सूर्य इति पंचाग्नि
तपः संतापो यस्य स पंचतपाः। आसारं सहते इति आसारषाट् शिशिरे स्थंडिलेशयः भूमिशयनः सर्वदा। ६॥ ७॥ ॥

तेन तपसा क्रमानुसिद्धेन शनैः प्राप्तेन ध्वस्तानि कर्माणि यस्य अतः अमल आशयो यस्य छिन्नानि बंधनानि वासना यस्य। ८।
९। १०। परिकर्मणा परिचर्यया शुद्धसत्व आत्मा मनो यस्य तस्य ज्ञानमभूत्। कीदृशं येन निजमुपाधिं जीवकोशं हृदयग्रंथिं संश
यानां असंभावनादीनां पदमाश्रयं चिच्छेद। कीदृशेन अनया भक्त्या निशितेन। कथंभूतया तस्य भगवत अनु अनुसंस्मरणे
नानुपूर्तिः संपूर्तिर्यस्याः तया निशितेन। ११। किंच छिन्ना अन्यधीर्देहात्मबुद्धिर्यस्य। यतोधिगतात्मगतिः अतएव निरीहः। प्राप्त

तेन क्रमानुसिद्धेन ध्वस्तकर्ममलाशयः। प्राणायामैः सन्निरुद्धषड्वर्गश्छिन्नबंधनः॥ ८॥ सनत्कुमारो भगवान्यदाहा
ध्यात्मिकं परं। योगं तेनैव पुरुषमभजत्पुरुषर्षभः॥ ९॥ भगवद्धर्मिणः साधोः श्रद्धया यततः सदा। भक्तिर्भगवति ब्रह्म
ण्यनन्यविषया भवत्॥ १०॥ तस्यानया भगवतः परिकर्मशुद्धसत्वात्मनस्तदनुसंस्मरणानुपूर्त्या। ज्ञानं विरक्तिमदभू
न्निशितेन येन चिच्छेद संशयपदं निजजीवकोशं॥ ११॥ छिन्नान्यधीरधिगतात्मगतिर्निरीहस्तत्तत्यजेच्छिनदिदं वयुने
नयेन। तावन्न योगगतिभिर्यतिरप्रमत्तो यावद्गदाग्रजकथासु रतिं न कुर्यात्॥ १२॥ एवं स वीरप्रवरः संयोज्यात्मानमात्मनि॥
ब्रह्मभूतो दृढं काले तत्याज स्वं कलेवरं॥ १३॥ संपीड्य पायुं पार्ष्णिभ्यां वायुमुत्सारयन्शनैः। नाभ्यां कोष्ठेष्ववस्थाप्य हृदुरःकंठशी
र्षणि १४

सुसिद्धिषु निस्पृहः। येन वयुनेन ज्ञानेन इदं संशयपदं चिच्छेद। तदपि तत्याज इत्युक्तवान्। तत्प्रयत्नादप्युपरमे हेतुरित्यर्थः। तस्य योगसिद्धिष्वपि निःस्पृह
त्वं युक्तमेवेत्याह। तावन्नाप्रमत्तः किंतु प्रमत्तो भवति तस्य श्रीकृष्णकथारततान्नतासु लोभो जात इत्यर्थः। १२। १३। देहत्यागप्रकारमाह।
संपीड्येति पंचभिः पायुं गुदं संपीड्येति मुक्तासनेन सूचितं। संपीड्य सीवनीं सूक्ष्मां गुल्फेनैव तु मध्यतः। सव्येतरेण गुल्फेन मुक्तासनमितीरितं।
मूलाधारात् वायुमुत्सारयन् ऊर्द्ध्वं नयन् नाभ्यामवस्थाप्य ततः कोष्ठेष्ववस्थाप्य अग्रे उपरि उत्सारयन्निति अन्वयः। कोष्ठान्येवाह। हृदादीनां द्वंद्वैक्यं शीर्षं भ्रूमध्यं तस्मिन् १४

भा० च०
८४

तंवायुंप्राणांतरेएवमसून्प्राणानुत्सर्पयन्क्रमेणमूर्ध्नि ब्रह्मरंध्र आवेश्यततोदेहारंभकपंचभूतानिसमष्टिभूतेषुविलापितवान्। तदाह वायुंमहावायौ अयूयुजत् एकीकृतवान्। कायंदेहगतंकठिनांशंक्षितौ।१५। खानिइंद्रियच्छिद्राणि। द्रवांशंतोये। तदेवंदेहत्रविलाप्याक्षितीयात्मप्रतिपत्त्यर्थंमहाभूतानामपिलयमाह। क्षितिंअंभस्येकीकृतवान्। तदंभः। अदस्तेजः अमुंवायुं।१६। तदेवंतामसाहंकारकार्यस्याकाशपर्यंतस्यलयमुक्त्वासात्विकराजसाहंकारकार्याणांलयमाह। इंद्रियेषुमनइतिदेवानामप्युपलक्षणं। सविकल्पकज्ञानेमनसः इंद्रियैराकर्षणात्तेषुलयाभिधानंनतुकार्यत्वात्। तदुक्तंगीतासु। इंद्रियाणांहिचरतांयन्मनोनुविधीयतेइति। अत्रचइंद्रियैर्विषयान्क्षेराक्षिप्तंध्यायतांमन

उत्सर्पयन्नसून्मूर्ध्निक्रमेणावेश्यनिःस्पृहः। वायुंवायौक्षितौकायंतेजस्तेजस्ययूयुजत्॥१५॥ राम
खान्याकाशेद्रवंतोयेयथास्थानंविभागशः। क्षितिमंभसितत्तेजस्यदोवायौनभस्यमुम्॥१६॥ राम
इंद्रियेषुमनस्तानितन्मात्रेषुयथोद्भवं॥ भूतादिनाऽमून्युत्क्षिप्यमहत्यात्मनिसंदधे॥१७॥ राम

इति। इंद्रियेषुनभइतिपाठेप्ययमर्थः। भट्टादीनांमतेनभश्चाक्षुषंकेषांचिन्मतेसं। आनुमानिकत्वमतेपींद्रियव्यापारोऽस्त्येव। नभोगुणश्चशब्दःश्रोत्रग्राह्यः अतइंद्रियग्राह्यत्वादिंद्रियेषुनभोविलापितमिति। तानींद्रियाणियथोद्भवंउद्भवोत्पत्तिलाभःस्वविषयाधीनइतिश्रोत्रादीनांविशेषेणशब्दादिषुलयः। यद्वातन्मात्रकार्याण्येवेंद्रियाणिमनोप्यपंचीकृतपंचतन्मात्रकार्यं। आहंकारिकत्वाभिधानंतदधीनत्वविवक्षयेत्यविरोधः। भूतादिनाहंकारेणप्रागवशिष्टेनभःसहितानींद्रियाण्युत्क्षिप्यपरतोनीत्वाभूतादेश्चि ८४
त्वातेनसहमहत्तत्वेसंदधइत्यर्थः।१७।

सर्वेषांगुणानांकार्याणांविन्यासःस्थितिर्यस्मिन्तंमहांतंमायामयेमायोपाधिप्रधानेजीवेतंचानुशयमुपाधिंयःपूर्वमनुशयीपुमान्जीवःअसौपृथुःब्रह्मणिस्थितःसन्नजहादित्यर्थः।१८। वनप्रवेशमारभ्यराज्ञ्याःकथामाह अर्चिर्नामेतित्रिभिः अनु

ग तंसर्वगुणविन्यासंजीवेमायामयेन्यधात्। तंचानुशयमात्मस्थमसावनुशयीपुमान्। ज्ञानवैराग्यवीर्येणस्वरूपस्थोजहात्प्रभुः॥१८॥ अर्चिर्नाममहाराज्ञीतत्पत्न्यनुगतावनं। सुकुमार्यतदर्हाचयत्पद्भ्यांस्पर्शनंभुवः॥१९॥ अतीवभर्तुर्व्रतधर्मनिष्ठयाशुश्रूषयाचार्षदेहयात्रया। नाविंदतार्तिंपरिकर्षितापिसाप्रेयस्करस्पर्शनमाननिर्वृतिः॥२०॥ देहंविपन्नाखिलचेतनादिकंपत्युःपृथिव्यादयितस्यचात्मनः। आलक्ष्यकिंचिच्चविलप्यसासती। चितामथारोपयदद्रिसानुनि॥२१॥

गता अनुजगाम। अतदर्हातदपिनार्हयोग्या। किंतत्पद्भ्यांभुवःस्पर्शनमितियत्।१९। भर्तुर्व्रतंयद्भूमिशयनादितस्मिन्धर्मेयानिष्ठातया। ऋषीणामियमार्षदेहयात्राकंदमूलादिवृत्तिस्तयाच आर्त्तिंदुःखंनप्राप। तत्रहेतुः प्रेयसःकरेणस्पर्शनंमानश्चताभ्यांनिर्वृतिर्यस्याः।२०। पृथिव्याःपत्युःदुहितृत्वात्तुतस्याःदेवतारूपेणविपन्नंनष्टमखिलंचेतनादिकंयस्मिन्तथाभूतंदेहमालक्ष्यतद्देहंचितामारोपयत्।२१।

भा०व कृत्यंतत्कालोचितं विधाय। कृदिन्याः जले आप्लुता स्नाता सती भर्त्तुरुदकं दत्वा दिविस्थं तरिक्षस्थितान्नत्वा वह्निं त्रिः प्र

८५ दक्षिणीकृत्य ॥२२॥ देवैःसहिताः ॥२३॥ गृणंतिस्म आभाषंत ॥२४॥२५॥२६॥ भगवान्पद्यतेगम्यतेऽनेने

विधायकृत्यं कृदिनीजलाप्लुता दत्वोदकं भर्त्तुरुदारकर्मणः। नत्वा दिविस्थांस्त्रिदशान्त्रिःपरीत्य विवेश

वह्निं ध्यायती भर्तृपदं ॥२२॥ विलोक्यानुगतां साध्वीं पृथुं वीरवरं पतिं। तुष्टुवुर्वरदा देवैर्देवपत्न्यः स

हस्रशः ॥२३॥ कुर्वत्यः कुसुमासारं तस्मिन्मंदरसानुनि। नदत्स्वमरतूर्येषु गृणंतिस्म परस्परं

२४॥ देव्यऊचुः ॥ अहोइयंवधूर्धन्या यावैवं भूभुजां पतिं। सर्वात्मना पतिं भेजे यज्ञेशं श्रीर्वधूरिव

२५॥ सैषा नूनं व्रजत्यूर्ध्वमनुवैन्यं पतिंसती। पश्यताऽस्मानतीत्यार्चिर्दुर्विभाव्येन कर्मणा ॥२६॥ ते

षां दुरापं किंत्वन्यन्मर्त्यानां भगवत्पदं। भुवि लोलायुषो ये वै नैष्कर्म्यं साधयंत्युत ॥२७॥ सवंचितो

बतात्मध्रुक्कृच्छ्रेण महता भुवि। लब्ध्वापवर्ग्यं मानुष्यं विषयेषु विषज्जते ॥२८॥

८५

तितथा तन्नैष्कर्म्यं ज्ञानं येस्वल्पायुषोपि साधयंति तेषामन्यद्देवादिपदं किं दुर्लभं न किंचिदित्यर्थः ॥२७॥ आभक्षं शोवं

तिसवंचितइति। यतआत्मनेद्रुह्यतीतियोऽपवर्गसाधनंमानुष्यंलब्ध्वापि विषयेष्वासक्तिं याति २८ रामराम

२९।३०।३१। विशांपश्वादीनां ~~धिप~~ श्वा ~~पि~~ वैश्यादीनां वा पतिः स्यात्। ३२।३३।३४।३५।३६। यद्यपि बद्धूनिफ

श्रीमैत्रेय उवाच ॥ ॥ स्तुवंतीष्वमरस्त्रीषु पतिलोकं गता वधूः। यं वा आत्मविदां वर्यो वैन्यः प्राप

च्युताशयः ॥२९॥ इत्थंभूतानुभावोसौ पृथुः स भगवत्तमः। कीर्तितं तस्य चरितमुद्दामचरितस्य

ते ॥३०॥ य इदं सुमहत्पुण्यं श्रद्धयावहितः पठेत्। श्रावयेच्छृणुयाद्वापि स पृथोः पदवीमियात्

॥३१॥ ब्राह्मणो ब्रह्मवर्चस्वी राजन्यो जगतीपतिः। वैश्यः पठन्विट्पतिः स्याच्छूद्रः सत्तमतां

मियात् ॥३२॥ त्रिःकृत्व इदमाकर्ण्य नरो नार्यथवादृतः। अप्रजः सुप्रजतमो निर्द्धनो धनवत्त

मः ॥३३॥ अस्पष्टकीर्त्तिः सुयशा मूर्खो भवति पंडितः। इदं स्वस्त्ययनं पुंसाममंगल्यनिवारणं ३४

धन्यं यशस्यमायुष्यं स्वर्ग्यं कलिमलापहं। धर्मार्थकाममोक्षाणां सम्यक्सिद्धिमभीप्सुभिः ३५

भा०४० लानि भवंति तथापि मुक्तान्यसंग एव श्रवणादि कुर्यात् ॥ ३७॥ महतो भगवतो माहात्म्यस्य सूचकं । पार्थिवीं

८६

अह्न्येतदनुश्राव्यं चतुर्णां कारणं परं ॥ विजयाभिमुखो राजा श्रुत्वैतदनुयाति यान् ॥ ३६॥
बलिं तस्मै हरंत्यग्रे राजानः पृथवे यथा ॥ मुक्तान्यसंगो भगवत्यमलां भक्तिमुद्वहन् ॥ ३७॥
वैन्यस्य चरितं पुण्यं शृणुयाच्छ्रावयेत्पठेत् ॥ वैचित्रवीर्याभिहितं महन्माहात्म्यसूचकं ॥ ३८॥
अस्मिन्कृतमतिर्मर्त्यः पार्थिवीं गतिमाप्नुयात् ॥ ३८॥ अनुदिनमिदमादरेण शृण्वन्
पृथुचरितं प्रथयन्विमुक्तसंगः ॥ भगवति भवसिंधुपोतपादे स च निपुणां लभते रतिं मनुष्यः
॥ ३९॥ ॥ इति श्रीभागवते महापुराणे चतुर्थस्कंधे पृथ्वुपाख्यानं नाम त्रयोविंशोऽध्यायः ॥

८६

पृथुसंबंधिनीं पार्थिवीमिति वा पाठः ॥ ३८॥ प्रथयन् कीर्तयन् । भवसिंधोः पोतः पादो यस्य ३९ चतुर्थे त्रयोविंशः

एकादशभिरध्यायैः पृथोश्चरितमीरितं । प्रचेतसामथाष्टाभिस्तन्मध्ये पंचभिः पितुः । चतुर्विंशे प्रपौत्रात्तु पृथोः प्राचीनबर्हिषः ।
प्रचेतसां जनिस्तोत्रं रुद्रगीतं च वर्ण्यते । अधिराज आसीदित्यर्थः । यवीयोभ्यः कनिष्ठेभ्यः काष्ठा दिशः । तुर्यां चतुर्थीं ॥१॥ शक्रा
लब्धा पृथोरश्वमेधेऽश्वविजयावसरे ॥३॥ अपत्यत्रयमेवाह पावक इति । पुण्यः शापस्तस्मान्मनुष्येषूत्पन्नाः संतः योगगतिं

श्रीमैत्रेय उवाच
विजिताश्वोऽधिराजासीत्पृथुपुत्रः पृथुश्रवाः । यवीयोभ्यो ददात्काष्ठा भ्रातृभ्यो भ्रातृवत्सलः ॥१॥ हर्यक्षाय
दिशत्प्राचीं धूम्रकेशाय दक्षिणां । प्रतीचीं वृकसंज्ञाय तुर्यां द्रविणसे विभुः ॥२॥ अंतर्धानगतिं शक्राल्लब्ध्वांतर्धानसंज्ञितः । अ
पत्यत्रयमाधत्त शिखंडिन्यां सुसंमतं ॥३॥ पावकः पवमानश्च शुचिरित्यग्नयः पुरा । वसिष्ठशापादुत्पन्नाः पुनर्योगगतिं ग
ताः ॥४॥ अंतर्धानो नभस्वत्यां हविर्धानमविंदत । य इंद्रमश्वहर्तारं विद्वानपि न जघ्निवान् ॥५॥ राज्ञां वृत्तिं करादानदंडशु
ल्कादिदारुणां ॥ मन्यमानो दीर्घसत्रव्याजेन विससर्ज ह ॥६॥ तत्रापि हंसं पुरुषं परमात्मानमात्मदृक् । यजंस्तल्लोकतामा
प कुशलेन समाधिना ॥७॥ हविर्धानाद्धविर्धानी विदुरासूत षट्सुतान् । बर्हिषदं गयं शुक्लं कृष्णं सत्यं जितव्रतं ॥८॥

अग्नित्वं प्राप्ताः ॥४॥ नभस्वत्यां अन्यस्यां भार्यायां अंतर्धानविशेषणं य इति । एतेन शक्रादंतर्धानगतिलाभे कारणमुक्तं
॥५॥ स चांतर्धानो राज्ञां वृत्तिं करादानादिभिर्दारुणां परपीडात्मिकां मन्यमानो विससर्ज ॥६॥ हंति स्वानां स्वके शमिति
हंसः तं पुरुषं पूर्णं कुशलं पूर्णं तद्रूपेण समाधिना ॥७॥८॥

स्मयंप्राप्ताः। पागंतरेमृदंगपणवादि अवतरक्षत तेषांध्वनिमितिरक्तुर्वेदित्यर्थः।२३। तेच त्रिलो चनंवीक्ष्यजातार्श्चर्याः
प्रणेमुरित्युत्तरेणान्वयः।२४। तस्तहेमराशिसदृशकांतिं शितिकंठः कंठोयस्यतं।२५।२६॥ वेदिषदःबर्हिषदः चिकीर्षितं
भगवदाराधनंविदितं।२७। अनुग्रहकारणमाह। यःसाक्षाद्वासुदेवंप्रपन्नः सहिमेप्रियः कथंभूतंरहसः सूक्ष्मात्त्रिगु
त्रगांधर्वमाकर्ण्यदिव्यमार्गमनोहरं। विसिस्मूराजपुत्रास्ते मृदंगपणवाद्यनु॥२३॥ तद्देवसरसस्तस्मान्निःक्रामं
तंसहानुगं। उपगीयमानममरप्रवरं विबुधानुगैः॥२४॥ तप्तहेमनिकायाभं शितिकंठं त्रिलोचनं। प्रसादसुमु
खंवीक्ष्यप्रणेमुर्जातकौतुकाः।२५॥ सतान्प्रपन्नार्तिहरो भगवान्धर्मवत्सलः। धर्मज्ञान्शीलसंपन्नान्प्रीतान्
प्रीतउवाचह॥२६॥ श्रीरुद्रउवाच॥ ॥यूयंवेदिषदःपुत्रा विदितंवश्चिकीर्षितं। अनुग्रहायभद्रंवएवंमेदर्शनंकृ
तं॥२७॥ यःपरंरहसःसाक्षात्त्रिगुणाज्जीवसंज्ञितात्। भगवंतंवासुदेवंप्रपन्नःसप्रियोहिमे॥२८॥ स्वधर्मनि
ष्ठःशतजन्मभिःपुमान्विरिंचतामेतिततःपरंहिमां। अव्याकृतंभागवतोथवैष्णवंपदंयथाहंविबुधाःकलात्यये॥२९॥
णात्प्रधानात्जीवसंज्ञितात् पुरुषाच्चपरं प्रकृतिपुरुषयोर्नियंतारमित्यर्थः।२८। ततःकिं तस्यमहत्त्वमत आदित्याह। स्व
धर्मनिष्ठःपुमान्बहुभिर्जन्मभिर्विरिंचतांप्राप्नोति। ततोपिपुण्यातिशयेनमामेति। भागवतस्तु अथदेहांते अव्याकृतंप्र
पंचातीतंवैष्णवंपदमेति। यथाहंरुद्रोभूत्वा आधिकारिकं वृत्तमानः विबुधादेवाश्चाधिकारिकाः कलात्ययेआधिकारां
तेलिंगभंगेसत्येष्यंति॥२९॥

अथभागवतत्वाद्यूयंमेप्रियाःस्थ। भवद्भिरपिमयिप्रीतिःकार्येत्याशयेनाह। मदन्योभागवतानांचप्रेयान्नास्ति॥३०॥
अतइदंजप्तव्यंश्रूयतामिति। विविक्तम संकीर्णं पवित्रं भवति॥३१॥३२॥ सृष्ट्यादौब्रह्मणा दक्षापुत्रेभ्यः प्रोक्तमिदं
स्तोत्रंप्राह प्रचेतोभ्यः कृपया भगवान्छिवः। तेजितंतवेत्यादि। आत्मविदुर्याणां स्वस्तये शोभनसत्तायै स्वानंदला भायेत्
त्यर्थः। अतोमेस्वस्तिस्वानंदसत्तास्तु। ननुममोत्कर्षोमदर्थएवकिंनस्यात् तत्राह भगवताराधसास्वानंदरूपेणराद्धं सिद्धंत्वं प
अथभागवतायूयंप्रियाःस्थभगवान्यथा। नमद्भागवतानांचप्रेयानन्योस्तिकर्हिचित्।३०॥ इदंविविक्तंजप्तव्यंपवित्रंमंग
लंपरं। निःश्रेयसकरंचापिश्रूयतांतद्वदामिवः।३१॥ मैत्रेयउवाच॥ इत्यनुक्रोशहृदयो भगवानाहतान्शिवः। बद्धांजलीन्
राजपुत्रान्नारायणपरोवचः।३२॥ ॥श्रीरुद्रउवाच॥ जितंतआत्मविद्धुर्यस्वस्तयेस्वस्तिरस्तुमे। भवताराधसाराद्धं
सर्वस्माआत्मनेनमः।३३। नमःपंकजनाभाय भूतसूक्ष्मेंद्रियात्मने। वासुदेवायशांतायकूटस्थायस्वरोचिषे॥३४॥
रमानंदरूपेणैवनित्यंसिद्धइत्यर्थः। अतएवं भूताया त्मनेतुभ्यंनमः। सर्वस्मैसर्वरूपाय च॥३३॥ सर्वरूपत्वंप्रपंचयन्प्र
णमतिसार्द्धैर्दशभिः। पंकजंलोकात्मकंनाभौयस्य तस्मैकारणात्मनेनमः। कारणत्वादेवसूक्ष्माणांप्राणिनांपउपाधयः
भूतानिस्थूलानिसूक्ष्माणितन्मात्राणि इंद्रियाणिच तेषामात्मनेनियंत्रे। अंतःकरणचतुष्टयाधिष्ठातृत्वेनप्रणमति
चतुर्भिःश्लोकार्धैः। वासुदेवायचित्ताधिष्ठात्रे कूटस्थायनिर्विकारायचित्तस्यैकरूपत्वात्॥३४॥ ॥

भाग.
८९

संकर्षणाय अहंकाराधिष्ठात्रे। सूक्ष्माय अव्यक्ताय। दुरंताय अनंताय। अंतकाय मुखाग्निना लोकदाहकाय।
विश्वस्य प्रबोधो यस्मात्। अंतरात्मने बुध्यधिष्ठात्रे। ३५॥ हृषीकाणामीशं परं इंद्रियं मनः तदात्मने। स्वर्य
रूपेण प्रणमति। परमहंसाय स्वयाय। पूर्णाय तेजसा विश्वव्यापिने निभृतात्मने क्षयवृद्धिशून्याय॥३६ स्वर्गाप
वर्गयोः द्वाराय च। शुचिन्नियतः करणे निषीदति। तिष्ठति शुचिषत् तस्मै। हंसः शुचिषदिति श्रुतेः। हिरण्यवीर्यं यस्य त
स्मै। अग्निरूपाय चातुर्होत्रं कर्म तस्मै तत्साधनायेत्यर्थः। कुतः तंतवे तद्विस्तारकाय॥३७॥ सोमत्वमाह। ऊर्जं
संकर्षणाय सूक्ष्माय दुरंतायांतकाय च। नमो विश्वप्रबोधाय प्रद्युम्नायांतरात्मने॥३५॥ नमो नमो निरुद्धाय
हृषीकेशेंद्रियात्मने। नमः परमहंसाय पूर्णाय निभृतात्मने। ३६। स्वर्गापवर्गद्वाराय नित्यं शुचिषदे नमः
नमो हिरण्यवीर्याय चातुर्होत्राय तंतवे। ३७ नम ऊर्ज इषे त्रय्याः पतये यज्ञरेतसे। तृप्तिदाय च जीवानां नमः स
र्वरसात्मने॥३८॥ सर्वसत्वात्मदेहाय विशेषाय स्थवीयसे। नमस्त्रैलोक्यपालाय सह ओजो बलाय च॥३९
पितॄणामन्नाय। इषे देवानामन्नाय। यज्ञरेतसे सोमाय। स हि पितॄणां देवानां चान्नं। एवंरूपाये। त्रय्याः पतये। रूपेण ८९
मः॥ सूर्याग्निसोमत्वेनैव तेजस्त्वं हि आदिरूपाय। स हि प्राणरूपेण त्रैलोक्यं पालयति। स हि आदिधमात्र॥३९॥
× ऊर्जं। ऊर्जत्वमाह। सर्वरसात्मने ऊर्जरूपाय। ३८। विशेषाय पृथ्वीरूपाय। सर्वेषां सत्वानां प्राणिनां ये आत्मनस्तेषां देहाय। स्थवीयसे विराड्रूपाय च। ×१
× त्रैलोक्यपालाय वायवे स ×१

नभसे च आकाशाय। अर्थानां लिंगाय ज्ञापकाय शब्दगुणत्वात्। अंतर्बहिरात्मने अंतर्बहिर्व्यवहारालंबनाय। एवं महान्
९० नभसे च आकाशाय। अर्थानो लिंगाय ज्ञापकाय॥ शब्दगुणत्वात्। अंतर्बहिरात्मने अंतर्बहिर्व्यवहारालंबनाय। एवंमहान्
त-रूपत्व मुक्तं। अमुष्मै स्वर्गाय। नरिवर्चसे। एषवै ज्योतिष्मंतं पुण्यं लोकं याति तिश्रुतेः॥४०॥ प्रवृत्ताय च निवृत्ताय च
कर्मणे। पितृदेवाय यथाक्रमं पितृदेवप्राप्तिफलाय। अधर्मफलरूपाय मृत्यवे॥४१॥ हे ईश आशिषां कारणात्मने। सर्वक
र्मफलदात्रे। मनवे सर्वज्ञाय। मंत्रात्मकाय तिवा। विष्णुत्वेन प्रणमति बृहते धर्माय। परमधर्मात्मने कृष्णाय॥४२॥ रुद्ररूपे
अर्थलिंगाय नभसे नमोंतर्बहिरात्मने। नमः पुण्याय लोकाय अमुष्मै नरिवर्चसे॥४०॥ प्रवृत्ताय निवृत्ताय पितृदेवाय क
र्मणे। नमोऽधर्मविपाकाय मृत्यवे दुःखदाय च॥४१॥ नमस्त आशिषामीश मनवे कारणात्मने। नमो धर्माय बृहते कृष्णायाकुं
ठमेधसे॥४२॥ पुरुषाय पुराणाय सांख्ययोगेश्वराय च। शक्तित्रयसमेताय मीढुषेऽहंकृतात्मने। चेतआकूतिरूपाय नमो
वाचो विभूतये॥४३॥ दर्शनं नो दिदृक्षूणां देहि भागवतार्चितं। रूपं प्रियतमं स्वानां सर्वेंद्रियगुणांजनं॥४४॥
ण प्रणमति। मीढुषे रुद्राय। अहंकृत महंकारस्तदात्मने स्वकर्तृकरणकर्मशक्तित्रयसमेतस्तस्मै। ब्रह्मत्वेन प्रणमति।
चेतो ज्ञानं आकूतिः क्रिया तद्रूपाय। वाचो विविधा भूतिः स्फूर्तिर्यस्मात्तस्मै॥४३॥ एवं नमस्कृत्य दर्शनं प्रार्थयते दर्शनमि
९० तिनवभिः। भागवतैः सत्कृतं दर्शनं देहीत्यस्य विवरणं रूपमित्यादि प्रदर्शयेत्युक्तं। स्वानां भक्तानां प्रियतमं रूपं प्रदर्शि
श्री०ध० यतिनवमेनान्वयः। सर्वेषामिंद्रियाणां ये गुणाः विषयास्तेषां मंजनं व्यंजकं सर्वेंद्रियविषयं विषयिरूपमित्यर्थः। सर्वेंद्रि
याणि स्वगुणेरनक्तिरंजयतीति वा ८४

स्निग्धः प्रावृषि यो घनस्तद्वत् श्यामं। सर्वेषां सौंदर्याणां संग्रहो यस्मिन्। चारवः आयताश्च त्वारो बाहवो यस्मि
न्। सुजातं यथोचितसर्वावयवं रुचिरमाननं यस्मिन्॥४५॥ पद्मस्य कोशमध्ये यानि पलाशानि तद्वद् अक्षिणी यस्मि
न्। सुकपोलमास्यं यस्मिन्। समौ कर्णौ विभूषणौ यस्य। कुंडलयोरग्रे वक्ष्यमाणत्वात्॥४६॥ प्रीत्या प्रहसिता विवा
पांगा यस्मिन्॥४७॥ स्फुरंति किरीटादीनि यस्मिन्। शंखादिभिः उत्तमर्द्धिर्लक्ष्मीः यद्वा एतैरुत्तमा ऋद्धिरुत्कर्षो य
स्यास्ति तत्॥४८॥ सौभगयुक्ता ग्रीवा येन। सिंहस्य स्कंधे परितः प्रसरंतः केसरा एव त्विषः तादृशीः सर्वतः त्विषो बिभ्र

स्निग्धप्रावृड्घनश्यामं सर्वसौंदर्यसंग्रहं। चार्वायतचतुर्बाहु सुजातरुचिराननं॥४५॥ पद्मकोशपलाशाक्षं सुंदरभ्रु सु
नासिकं। सुद्विजं सुकपोलास्यं समकर्णविभूषणं॥४६॥ प्रीतिप्रहसितापांगमलकै रूपशोभितं। लसत्पंकजकिंज
ल्कदुकूलं मृष्टकुंडलं॥४७॥ स्फुरत्किरीटवलयहारनूपुरमेखलं। शंखचक्रगदापद्ममालामण्युत्तमर्द्धिमत्॥४८
सिंहस्कंधत्विषो बिभ्रत्सौभगग्रीवकौस्तुभं। श्रियानपायिन्याक्षिप्तनिकषाश्मोरसोल्लसत्॥४९॥

त्। असौ सौभगग्रीवः कौस्तुभो यस्मिन् यद्वा सिंहस्येव यो स्कंधौ तयोः त्विषः कुंडलहारादिदीप्तीः बिभ्रदिति पृथग्विशेषणं १०
। सौभगयुक्ता ग्रीवा येन स कौस्तुभो यस्मिन्। श्रिया हेतुभूतया क्षिप्तस्तिरस्कृतो निकषाश्मा सुवर्णरेखांकितो निकषण
पाषाणो येन तादृशेनोरसा उल्लसच्छोभमानं॥४९॥

श्वासोच्छ्वासाभ्यां संविग्नाश्चंचला वलयस्तैः। निर्वल्गु दलवदश्वत्थपत्रसदृशमुदरं यस्मिन्। प्रतिसंक्रामयतः
यतो निर्गतं तेनैव द्वारेण पुनः प्रवेशयदिव॥५०॥ श्याम श्रोण्याधिकं रोचिष्णु यत्। तं दुकूलं तत्र स्वर्णमयी मेखला
यस्मिन्। अंघ्री च जंघे च ऊरू च। निम्ने अनुन्नते जानुनी च समैश्चारुभिरेतैः शोभनं दर्शनं यस्य समाश्चारवो घ्र्याद
यो यस्मिन्। निम्ने जानुनी यस्मिन्। शोभनं दर्शनं यस्येति पदत्रयं वा॥५१॥ पदादीपस्थानीयेन। यद्वा एवंभूतेन

पूररेचकसंविग्नवलिवल्गुदलोदरं। प्रतिसंक्रामयद्विश्वं नाभ्यावर्तगभीरया॥५०॥ श्यामश्रोण्यधिरोचिष्णु
कूलस्वर्णमेखलं। समचार्वंघ्रिजंघोरुनिम्नजानुसुदर्शनं॥५१॥ पदा शरत्पद्मपलाशरोचिषा नखद्युभि
र्नोंतरघं विधुन्वता। प्रदर्शय स्वीयमपास्तसाध्वसं पदं गुरो मार्गगुरुस्तमोजुषां॥५२॥ एतद्रूपमनुध्येयमा
त्मशुद्धिमभीप्सतां। यद्भक्तियोगोऽभयदः स्वधर्ममनुतिष्ठतां॥५३॥ भवान् भक्तिमता लभ्यो दुर्लभः सर्वदेहि

पदोपलक्षितं रूपं पदं शरणं प्रदर्शयेत्यर्थः। शरदियत्पद्मं त नां। स्वाराज्यस्याप्यभिमत एकांतेनात्मविद्गतिः॥५४
स्य पलाशं तद्वद्रोचिर्यस्य तेन। नखद्युभिर्नोंतरघमंतर्मनोगतं तमो ज्ञानं विधुन्वता। स्वीयं रूपं पदं शरणं प्रदर्शय। अ
पास्तं प्रक्षालितं साध्वसं येन तत्। हे गुरो यतस्त्वमेव तमोजुषामज्ञानां मार्गप्रदर्शको गुरुः॥५२॥ अतिदुर्लभमिदम
या प्रार्थितमिति निश्चितैत्याह। एतद्रूपमनुध्येयं ध्यानार्हमेव न तु प्रत्यक्षतः प्राप्यमित्यर्थः॥५३॥ तर्हि किं केनापि प्राप्यते न

भा॰च॰ तत्राह भवानिति दुर्लभत्वमेवाह। स्वर्गराज्यं यस्य तस्याप्यभिमतः स्पृहणीयः। किंच एकांतेन य आत्मवित्तस्या
७१ पि गतिर्गम्यः॥५४॥ अतस्त्वद्व्यतिरेकेण न किंचिद्वांछामीत्याह। तं त्वामेकांतभक्त्या आराध्य बहिः स्वर्गादि सुखं॥
५५॥ तत्र हेतुः। यत्र पादमूले शरणं प्रविष्टं कृतांतः कालो ममायं वश्य इति। नाभिमानं करोति। किं कुर्वन् वीर्यप्रभा
वः शौर्यमुत्साहः ताभ्यां विस्फूर्जितया क्षुभितया भ्रुवा विश्वं विध्वंसयन्नपि॥५६॥ त्वत्पादमूले प्रविष्टस्य कृतांत

तं दुराराध्यमाराध्य सतामपि दुरापया। एकांतभक्त्या को वांछेत्पादमूलं विना बहिः॥५५॥ यत्र निर्विष्ट
मरणं कृतांतो नाभिमन्यते। विश्वं विध्वंसयन्वीर्यशौर्यविस्फूर्जितभ्रुवा॥५६॥ क्षणार्द्धेनापि तुलये न स्व
र्गं नापुनर्भवं। भगवत्संगिसंगस्य मर्त्यानां किमुताशिषः॥५७॥ अथानघांघ्रेस्तव कीर्तितीर्थयोरंतर्ब
हिः स्नानविधूतपाप्मनां॥ भूतेष्वनुक्रोशसुसत्वशीलिनां स्यात्संगमोनुग्रह एष नस्तव॥५८॥

भयाभावः। कियान् ये लाभः। यतः लब्धभक्तसंग एव सकलपुरुषार्थश्रेणिशिरसि नरीनर्त्तीत्याह। भगवतस्तव संगिनां
संगस्य क्षणार्द्धेनापि न स्वर्गं तुलये समं न गणयामि न चापुनर्भवं मोक्षं। मर्त्यानामाशिषो राज्याद्याः किमुत॥५७
अथ अतो हेतोः अनघौ अघहरावंघ्री यस्य तस्य तव कीर्तिश्च तीर्थं गंगा तयोः क्रमेणांतर्बहिः स्नानाभ्यां विधूत ७१
पाप्मा येषां। अत एव भूतेष्वनुक्रोशः कृपा सुसत्वं रागादिरहितं चित्तं शीलं आर्जवादि विद्यते येषां तेषां संगमोस्मा
कं स्यात्। एष एव नस्तवानुग्रहः॥५८

तत्वज्ञानं च भक्तसंगादेव भवतीत्याह। न यस्येति। येषां सतां। भक्तियोगेनानुगृहीतं शुद्धं सद्यस्य चित्तं बाह्या
र्थविक्षिप्तं न भवति तमोरूपायां गुहायां च नाविशत लयं न प्राप। तत्र तदा स मुनिस्त्वद्गतिं तत्त्वं पश्यति॥५९॥ कीदृशं तत्
त्वं तदाह यत्रेति॥६०॥ जगत उपादानत्वेन तत्त्वं लक्षितं निमित्तत्वेनापि तद्दर्शयन्नाह। य इदं विश्वं स्वपरमा
र्थमिवासृजत। कथंभूतया। यया बुद्धिभेदोन्येषां भवति तया आत्मनि लयिदुःस्थया स्वकार्यं कर्तुमसमर्थया। तं त्वां

न यस्य चित्तं बहिरर्थविभ्रमं तमोगुहायां च विशुद्धमाविशत्। यद्भक्तियोगानुगृहीतमंजसा मुनिर्विचष्टे ननु तत्र ते ग
तिं॥५९॥ यत्रेदं व्यज्यते विश्वं विश्वस्मिन्नवभाति यत्। तत्त्वं ब्रह्म परं ज्योतिराकाशमिव विस्तृतं॥६०॥ यो माययेदं
पुरुरूपयासृजत् बिभर्ति भूयः क्षपयत्यविक्रियः। यद्भेदबुद्धिः सदिवात्मदुःस्थया तमात्मतंत्रं भगवन्प्रतीमहि
६१॥ क्रियाकलापैरिदमेव योगिनः श्रद्धान्विताः साधु यजंति सिद्धये। भूतेंद्रियांतःकरणोपलक्षितं वेदे च तंत्रे च तं
त एव कोविदाः॥६२॥

निरस्तभेदं प्रतीमहि जानीमः॥६१॥ यद्यपि त्वमेवं निर्भेदं ब्रह्म तथापि प्रागुक्तं साकारं त
व रूपं ये इदं यजंति त एव वेदागमतत्त्वज्ञा इत्याह। क्रियाकलापैः कर्मयोगिनः पूजयंति त एव कोविदाः। न त्वेतदना
दृत्य केवलज्ञाने प्रवृत्ताः। तंत्रे आगमे। कथंभूतमिदं। भूतेंद्रियांतःकरणैस्त्वत्तत्त्वैः यदुपलक्ष्यते नियंतृरूपं तत्॥६२॥

भा.च. नन्वभिन्नेमयिभेदं कुर्वंतः संतः कथंतेकोविदाः। नहितैर्भेदः क्रियते त्वयैव क्रीडार्थं चेतनाचेतनात्मको भेदः
७२ कृतइत्याह। त्वमिति आद्यस्त्वमेक एव। सुप्तामायाख्याशक्तिर्यस्य। पश्चात्तयाशक्त्यारजःसत्वतमसां द्वैधं क्रि
यते रज आदेः महानहंकारः खं च मरुदग्निर्वा धराश्च वाः उदकं। सुराश्च ऋषयश्च। भूतगणाश्च एवमिदं जगद्य
तो भवतितर्हि भिद्यतइत्यन्वयः॥६३॥ एतदुपपादयति। सृष्टमिति जरायुजांडजस्वेदजोद्भिज्जरूपेण चतुर्विधं। स्वां

त्वमेक आद्यः पुरुषः सुप्तशक्तिस्तयारजःसत्वतमोविभिद्यते। महानहं खं मरुदग्निवार्धराः सुरर्षयो भूतग
णाइदंयतः॥६३॥ सृष्टं स्वशक्त्येदमनुप्रविष्टश्चतुर्विधं पुरमात्मांशकेन। अथोविदुस्तं पुरुषं संतमंतर्भुंक्ते
हृषीके मधुसारघं यः॥६४॥ सएषलोकानतिचंडवेगो विकर्षसित्वं खलुकालयानः। भूतानि भूतैरनुमेयतत्वो घना
वलीर्वायुरिवाविषह्यः॥६५॥

शेन प्रविष्टः। अथोऽतिहेतोः पुरस्यांतः संतमंशं विदाभासं। पुरिशयनात् पुरुषं विदुः तर्हि किमीश्वरमेव संसारिणं विदुर्ने
त्याह। सारघं मधुमक्षिकास्ताभिः सृष्टं मधिव क्षुल्लकं विषयसुखं अविद्यावृतः सन्यो भुंक्ते तं जीवं विदुः। तथाच श्रुतिः।
तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्योअभिचाकशीतीति। निर्णीतं च। गुहां प्रविष्टावात्मानौहि तद्दर्शनादित्यत्र॥६४॥ ७२
भवतु सर्वे नियंतुः कुतः संसारइत्याह। यास्वशक्त्येदं सृष्टवान् सएष त्वं खलु भूतैरेव भूतानि मेघपंक्तीर्वायुरिव कालयानः विचालयन् लोकान्
विकर्षसि। संहरसि अनुमेयतत्वः अलक्ष्यस्वरूपः॥६५॥

विकर्षणप्रकारमाह। प्रमत्तमिति। इतिकृत्यएवमेवमिदं कर्तव्यमिति चिंतयोच्चैः प्रमत्तं तत्र हेतुः विषयेषु लालसं अतिकामुकं
प्राप्तेपि विषये प्रवृद्धलोभं। अंतकस्त्वमभिपद्यसे आक्रमसि। क्षुधा लेलिहानः जिह्वयोष्ठप्रांतौ स्पृशन् सर्पो मूषकमिव॥६६॥ अ
तः कस्त्वत्पदाब्जं त्यजेत् पंडितश्चेत्। कथंभूतः यस्ते तवामानो नादरस्तेन व्ययमानं केतनं शरीरं यस्य सः यदस्माकं गुरुर्ब्रह्मार्चति ७३

प्रमत्तमुच्चैरितिकृत्यचिंतया प्रवृद्धलोभं विषयेषु लालसं। त्वमप्रमत्तः सहसाभिपद्यसे क्षुल्लेलिहानोऽहिरिवाखु
मंतकः॥६६॥ कस्त्वत्पदाब्जं विजहाति पंडितो यस्तेवमानव्ययमानकेतनः। विशंकयास्मद्गुरुरर्चतिस्म यद्विनोपप
त्तिं मनवश्चतुर्दश॥६७॥ अथत्वमसि नो ब्रह्मन्परमात्मन्विपश्चितां। विश्वंरुद्रभयध्वस्तमकुतश्चिद्भया गतिः॥६८
इदंजपत भद्रंवो विशुद्धा नृपनंदनाः। स्वधर्ममनुतिष्ठंतो भगवत्यर्पिताशयाः॥६९॥ तमेवात्मानमात्मस्थं सर्वभूते
ष्ववस्थितं। पूजयध्वंगृणंतश्च ध्यायंतश्चासकृद्धरिं॥७०॥ योगादेशमुपासाद्य धारयंतो मुनिव्रताः। समाहितधियः
सर्वएतदभ्यसतादृताः॥७१॥ इदमाहपुरास्माकं भगवान्विश्वसृक्पतिः। भृग्वादीनामात्मजानां सिसृक्षुः संसिसृक्षतां ७२

स्मेति सर्वेषां स्तोतॄणां वाक्यं विशंकया नाशशंकया। विनोपपत्तिं इति दृढविश्वासेन मनवश्चार्चंतिस्म॥६७॥ उपसंहरति अथेति
रुद्रभयेन ध्वस्तं अतः न कुतश्चिद्भयं यस्यां तादृशी गतिरसि॥६८॥६९॥७०॥ योगादेशं नाम एतत्स्तोत्रमुपासाद्य प्राप्य म
नसा धारयंतः अभ्यासेन जपतः ७१ विश्वसृजां पतिर्ब्रह्मा॥७२॥

भा०च० सस्सूक्ष्मः सस्थूलः ७३ युक्तः एकाग्रचित्तः ७४ ज्ञानमेव नौर्यस्य ७५ योधीयानो भवति ७६ असावमुष्माद्धरेः । असत्वरन्
७३ स्थिरः सन् । मद्गीतं श्लोकत्रैतेन गीतात् स्तोत्रात् । एक एव वल्लभः प्रियः आश्रयस्तस्मात् ॥७७॥ कल्पे उषसि ॥७८॥ तपश्चरत ।
तपसांते ईप्सितं प्राप्स्यथ ॥७९॥ ॥ चतुर्थे चतुर्विंशः ॥ प्रचेतःसुतपस्यत्सु तत्पित्रे नारदो घृणी । प्राचीनबर्हिषेध्यालंपा
रोक्ष्यणाह पंचभिः १ पुरंजनकथाव्याजात् पंचविंशे तु नारदः । आत्मनो बुद्धिसंयोगे विविधामाह संसृतिं १ प्रचेतःसुतपस्तीव्रं तप्यमा

नेवयं नोदिताः सर्वे प्रजासर्गे प्रजेश्वराः । अनेनध्वस्ततमसः सस्पृक्ष्मो विविधाः प्रजाः ७३ अथेदं नित्यदा युक्तो ज
पन्नवहितः पुमान् । अचिराछ्रेय आप्नोति वासुदेवपरायणः ७४ श्रेयसामिह सर्वेषां ज्ञानं निःश्रेयसं परं । सु
खं तरति दुःपारं ज्ञाननौर्व्यसनार्णवं ७५ य इमं श्रद्धया युक्तो मद्गीतं भगवत्स्तवं । अधीयानो दुराराध्यं हरिमा
राधयत्यसौ ७६ विंदते पुरुषोमुष्माद्यद्यदिछत्यसत्वरात् । मद्गीतगीतात्सुप्रीताछ्रेयसामेकवल्लभात् ७७
इदं यः कल्प उत्थाय प्रांजलिः श्रद्धयान्वितः । शृणुयाच्छ्रावयेन्मर्त्यो मुच्यते कर्मबंधनैः ७८ गीतं मयेदं नरदेवनं
दनाः परस्य पुंसः परमात्मनः स्तवं । जपंत एकाग्रधियस्तपो महच्चरध्वमंते तत आप्स्यथेप्सितं ॥७९॥ ॥इति श्री
भागवते महापुराणे चतुर्थस्कंधे रुद्रगीतं नाम चतुर्विंशोध्यायः ॥ ॥श्रीमैत्रेय उवाच ॥ ॥इति संदिश्य भगवान् ७३
बार्हिषदैरभिपूजितः । पश्यतां राजपुत्राणां तत्रैवांतर्दधे हरः १ रुद्रगीतं भगवतः स्तोत्रं सर्वे प्रचेतसः । जपंतस्ते तपः स्तेपु
र्वर्षाणामयुतं जले ॥२॥
नेषु नारदः ॥ पुरंजनकथाकूटं प्राह प्राचीनबर्हिषे ॥२॥

प्रचेतस्सु तपश्चरत्सु नारदः प्राचीनबर्हिषं बोधितवान् । अतः प्रचेतसां कथामसमाप्यैव तत्पितुर्वृत्तमाह । प्राचीनबर्हिषं
मिति ।३। श्रेयः फलं मिमिकीः ईहसे इच्छसि । इह कर्माणि तनु यं नेष्यति क्विरिकेः ।४। परं श्रेयः मोक्षं । कर्मभिरपविद्धा विक्षि
स्ताधीयस्य ।५। किंच । गृहेषु स्थितः पुत्रादिषु वपुरुषार्थधीर्यस्य ।६। कर्मफलेषु वैराग्यमुत्पाद्य ब्रह्मविद्यामुपदेष्टुं योग

प्राचीनबर्हिषं सक्तं कर्मस्वासक्तमानसं नारदोध्यात्मतत्वज्ञः कृपालुः प्रत्यबोधयत् ३ श्रेयस्त्वं कतम
द्राजन्कर्मणात्मन ईहसे । दुःखहानिः सुखावाप्तिः श्रेयस्तन्नेह चेष्यते ।४॥ ॥राजोवाच ॥ न जानामि महा
भाग परं कर्मापविद्धधीः । ब्रूहि मे विमलं ज्ञानं येन मुच्येय कर्मभिः ॥५॥ गृहेषु कूटधर्मेषु पुत्रदारधनार्थधीः ।
न परं विंदते मूढो भ्राम्यन्संसारवर्त्मसु ।६॥ ॥श्रीनारद उवाच ॥ भो भोः प्रजापते राजन् पशून्पश्य त्वयाध्वरे ।
संज्ञापितान्जीवसंघान्निर्घृणेन सहस्रशः ७ एते त्वां संप्रतीक्षंते स्मरंतो वैशसं तव । संपरेतमयः कूटैश्छिंदं
त्युत्थितमन्यवः ॥८॥ अत्र ते कथयिष्यामि इतिहासं पुरातनं । पुरंजनस्य चरितं निबोध गदतो मम ॥९॥ ॥
नुभावेन यज्ञपशून्प्रत्यक्षं प्रदर्श्याह । भो भो इति संज्ञापितान् मारितान् ॥७॥ एते त्वां संपरेतं मृतं संप्रतीक्षंते वैशसं त्व
त्कृतां पीडां स्मरंतः । ततश्चापः कूटैर्लोहयंत्रमयैः शृंगैः छिंदंति छेत्स्यंति ।८। अत्रास्मिन्संकटे निस्तारकमितिहासं क
थयिष्यामि ॥९॥

मा॰च॰ तत्रजीवस्यविषयासक्त्यासंसारःसचेश्वरानुग्रहेणनिवर्त्ततइति।नचकुं विपर्ययग्रहीतस्य साक्षाद्बोधयितुम
७५ शक्तेःपुरंजनवृत्तांतमिवाह।आसीदिति।पुरंजनादीन्स्वयमेवतःपंचमेध्याये व्याख्यास्यति।तथापिसुखग्रहणाय
यथोपयोगंकिंचित्किंचिद्व्याख्यास्यामः ततःस्वकर्मभिः पुरंजनयतीतिपुरंजनोजीवःनविज्ञातंनामयस्य।नचवि
ज्ञातंचेष्टितंयस्यसईश्वरस्तस्यसखा।यद्वाविज्ञातंचेष्टितंजीवप्रेरणादिलक्षणंयस्य।जीवपारतंत्र्यस्यानुभ
आसीत्पुरंजनोनामराजाराजन्बृहच्छ्रवाः।तस्याविज्ञातनामासीत्सखाविज्ञातचेष्टितः १० सोन्वेषमा
णः शरणंबभ्रामपृथिवींप्रभुः।नानुरूपंयदाविंदद्भूत्सविमनाइव ११ नसाधुमेनेताःसर्वाभूतले
यावतीःपुरः।कामान्कामयमानोसौतस्यतस्योपपत्तये १२ सएकदाहिमवतोदक्षिणेष्वथसानुषु।दद
र्शनवभिर्द्वार्भिःपुरंलक्षितलक्षणां॥१३॥ ॥
वसिद्धत्वात्।१०।शरणंभोगायतनंदेहं॥११॥यावत्यःपुरःताःतस्यतस्यकामस्योपपत्तयेप्राप्त्यैसाधुनमेने।नवाद्धदे
हानामैहिकपारलौकिकभोगभोग्यत्वाभावात्।तथाचश्रुतिः।ताभ्योगामानयत्ताअब्रुवन्नवैनोऽयमलमितिताभ्यो
ऽश्वमानयत्ताअब्रुवन्नवैनोयमलमितीति।१२।हिमवतोदक्षिणेषुसानुषुकर्मक्षेत्रेभारतवर्षेपुरंमनुष्यशरीरंलक्षि ७५
तानिदृष्टानिसर्वाणिलक्षणानियस्यां।अंधपंगुत्वादिदोषरहितामित्यर्थः १३

नामनुवर्णयतित्रिभिः।अत्रकिंचित्किंचित्सादृश्यमवलंब्यकथासौंदर्यार्थंप्राकारादीनिवर्ण्यंते।परिखैरितिपुंस्त्व
मार्षं।अक्षाणिगवाक्षाः त्वगाद्यःशरीरावयवाःप्राकारादिपुरावयवत्वेन रूप्यंते।स्वर्णादिशृंगैःशिखरैर्युक्तायेगृहास्तैः
संकुलामिति।आधारादिचक्राणिगृहाःशृंगाणिचरजसादिस्वभावाविवक्षिता॥१४॥नीलादिभिःक्लृप्ताहर्म्यस्थलीय
स्यां।अरुणमाणिक्यंस्थलीहर्म्याणांज्योतिलादिभावेनरूप्यंतेतत्तद्विषयवासनावा।भोगवतीनागानांपुरीमिव॥१५॥
प्राकारोपवनाट्टालपरिखैरक्षतोरणैः।स्वर्णरौप्यायसैःशृंगैःसंकुलांसर्वतोगृहैः॥१४॥नीलस्फटिकवै
दूर्यमुक्तामरकतारुणैः।क्लृप्तहर्म्यस्थलींदीप्तांश्रियाभोगवतीमिव॥१५॥सभाचत्वररथ्याभिराक्रीडायतनापणैः।
चैत्यध्वजपताकाभिर्युक्तांविद्रुमवेदिभिः॥१६॥पुर्यास्तुबाह्योपवनेदिव्यद्रुमलताकुले।नदद्विहंगालि
कुलकोलाहलजलाशये १७ हिमनिर्झरविप्रुष्मत्कुसुमाकरवायुना।चलत्प्रवालविटपनलिनीतटसंपदि १८
सभासमाजस्थानंचत्वरंचतुष्पथः।रथ्याराजमार्गः।आक्रीडायतनंद्यूतादिस्थानं।आपणाहट्टाः।चैत्यंजनानांविश्रामस्था
नंध्वजेषुपताकाःताभिर्युक्तां॥१६॥अत्रचविषयनिष्ठबुद्धियोगेनजीवस्यदेहसंबंधइतिविवक्षयाविषयवर्गंबाह्योपवनत्वे
नरूपयति।तद्विशेषान्स्वकूजनादीन्दिव्यद्रुमलतादिभावेनशेषःकथालंकारः।बाह्योपवनेप्रमदांददर्शेतिचतुर्थेनान्व
यः।नदतांविहंगालिकुलानांकोलाहलोयेषुतेजलाशयायस्मिन्॥१७॥हिमनिर्झराणांविप्रुषोबिंदवःतद्वताकुसुमाकरसं
बंधिनावायुनाचलंतःप्रवालाविटपःशाखाश्रयेषांतेवृक्षाःनलिनीनांसरसीनांतटेषुसंपत्समृद्धिर्यस्मिन्॥१८॥ ॥

भा॰स्कं॰ अनाबाधेतत्कृतबाधरहिते। मुनिव्रतैरहिंस्रैः आत्मानमाहूतं मन्यते यत्र॥१८॥ तत्र प्रमदोत्तमां विवेकवतीं बु
१५ द्धिं ददर्श। यदृच्छयागतामिति तयोः संबंधस्य दुर्निरूपत्वं दर्शयति॥१९॥ तामनुवर्णयति सार्द्धैश्चतुर्भिः दशभिर्ज्ञान
कर्मेंद्रियैः एकैकं प्रत्येकं शतं अनंता वृत्तयस्ताः सां नायकेः पतिभिः सह। पाठांतरे नायिकाः स्त्रियो येषां ते॥२०॥ पंच
शीर्षाणि वृत्तयो यस्य तेन अहिना प्राणेन प्रतिहारेण पालकेन गुप्तां। ऋषभं भर्त्तारं॥२१॥ गंधज्ञानादिभिर्बुद्ध्यावयवैस्सु
नानारण्यमृगव्रातैरनाबाधे मुनिव्रतैः। आहूतं मन्यते पांथो यत्र कोकिलकूजितैः॥१८॥ यदृच्छयागतां त
त्र ददर्श प्रमदोत्तमां। भृत्यैर्दशभिरायांतीमेकैकशतनायकैः॥२०॥ पंचशीर्षाहिना गुप्तां प्रतिहारेण सर्वतः। अ
न्वेषमाणामृषभमप्रौढां कामरूपिणीं॥२१॥ सुनासां सुदतीं बालां सुकपोलां वराननां। समविन्यस्तकर्णाभ्यां
बिभ्रतीं कुंडलश्रियं॥२२॥ पिशंगनीवीं सुश्रोणीं श्यामां कनकमेखलां। पद्भ्यां क्वणद्भ्यां चलंतीं नूपुरैर्देवतामिव॥२३॥
स्तनौ व्यंजितकैशोरौ समवृत्तौ निरंतरौ॥ वस्त्रांतेन निगूहंतीं व्रीडया गजगामिनीं॥२४॥
नासत्वादि स्पृश्यते। समं विन्यस्तौ रचितौ ताभ्यां कुंडलशोभां दधतीं॥२२॥ अन्नमयं हि सोम्य मन इति यत्कृष्णं तदन्न
स्येत्यादिश्रुत्यनुसारेण श्यामामित्युक्तं। नूपुरैः क्वणद्भ्यां नूपुरेण पादांगुलीयकानाम प्युपलक्षणाद् कुर्वद्भ्यां॥२३॥
स्तनौ व्यंजितकैशोरौ ~~समवृत्तौ~~ यौवनोपक्रमो याभ्यां समौ वृत्तौ च॥२४॥ ॥ॐ नमो भगवते वासुदेवाय॥ ॥ १५

तामाहेति तयोः संवादोक्तिः संबंधद्वय पि। अपांग एव पुंखो मूलप्रांतो यस्य कटाक्षस्य बाणस्य तेन स्पृष्टो विद्धः
प्रेम्णा उद्भ्रमंत्या भ्रुवौ धनुस्थानीये यस्मिन् तेन॥२५॥ कुतः स्थानादिहागतासि इहसति। पुर्याः समीपस्था उपपुरी
भूता मालक्ष्य किं कर्तुमिच्छसीत्यर्थः॥२६॥ तव ये नृपथा अनुवर्त्तिन एते के। एकादशो महाभटो बृहद्बलेन व
क्ष्यमाणो येषु दशसु ते। बुद्धेर्मनसः पृथगुपादानं बुद्धिपरिवारकेंद्रियसहायतया तत्परिचारकत्वविवक्षया॥२७॥
तामाह ललितं वीरः सव्रीडं स्मितशोभनां। स्निग्धेनापांगपुंखेन स्पृष्टः प्रेमोद्भ्रमद्भ्रुवा॥२५॥ का त्वं
कंजपलाशाक्षि कस्यासीह कुतः सति। इमामुपपुरीं भीरु किं चिकीर्षसि शंस मे॥२६॥ क एते नुपथा ये त
एकादश महाभटाः। एता वा ललनाः सुभ्रु को यं ते हि पुरःसरः॥२७॥ त्वं ह्रीर्भवान्यस्यथ वाग्रमा पतिं विवि
न्वती किं मुनिवद्रहो वने। त्वदंघ्रिकामाप्तसमस्तकामं क्व पद्मकोशः पतितः कराग्रात्॥२८॥ ॥
त्वं ह्रीः किं पतिं धर्मं विचिन्वती। अथवा भवानी पतिं शिवं विचिन्वती। किं वाक् सरस्वती पतिं ब्रह्माणं। रमा पतिं विष्णुं।
मुनिरिव संयताः सती कथं भूतं पतिं। त्वदंघ्रिकामेनैव लब्धतया त्वदंघ्रिकामनयैव प्राप्ताः समस्ताः कामा येन तं॥२८॥

भा०च. हे वरोरु आसां मध्ये त्वमन्यतमाऽपि न भवसि। यतो भुविस्पृक् न हि देवता भुवं स्पृशति। वीरवरेण मया। परं वैकुंठं रम
७६ यद्यस्मात्तवापांगेन विखंडितमिंद्रियं मनो यस्य तं मां मनोभवो बाधते। अथ तस्मादनुग्रहेण सव्रीडं यद्भ्रावेन प्रे
म्णा स्मितं तेन विभ्रमंती या भ्रूः तया उपसृष्टः प्रेरितः॥३०॥ यद्व्रीडया संमुखं न भवति तदाननमुन्नीय दर्शय।
शोभने भ्रुवो यस्मिन्। सुतारे शोभनकनीनिके यस्मिन्। व्यालंबिनो दीर्घा ये अलकास्तेषां वृंदेन संवृतं। वल्गूनि वा
नासां वरोर्वन्यतमा भुविस्पृक् पुरीमिमां वीरवरेण साकं। अर्हस्यलंकर्तुमदभ्रकर्मणा लोकं परं श्रीरिव
यज्ञपुंसा॥२९॥ यदेष मापांगविखंडितेंद्रियं सव्रीडभावस्मितविभ्रमद्भ्रुवा। त्वयोपसृष्टो भगवान्मनो
भवः प्रबाधतेथानुगृहाण शोभने॥३०॥ त्वमाननं सुभ्रु सुतारलोचनं व्यालंबिनीलालकवृंदसंवृतं। उन्नी
य मे दर्शय वल्गुवाचकं यद्व्रीडया नाभिमुखं शुचिस्मिते॥३१॥ इत्थं पुरंजनं नारी याचमानमधीरवत्। अभ्यनं
दत तं वीरं हसंती वीरमोहिता॥३२ न विदाम वयं सम्यक् कर्तारं पुरुषर्षभ। आत्मनश्च परस्यापि गोत्रं नाम च यत्कृतं ३३
चकानि वाक्यानि यस्मिन्।३१। हे वीर अद्य सापि तं दृष्ट्वा मोहिता सती तमाह। यत्पृष्टं कस्यासीत्यनेन कस्य पुत्री गो
त्रं कोतिकाल मिति च किंनामासीति तत्राह। आत्मनो मम परस्य तवापि कर्तारं सम्यग्न विद्मः। गोत्रं नाम च यत्कृतं ७६
भवति तं च न विद्मः॥३३॥

आत्मनो मम शरणमियं पुरी येन निर्मिता तं च न विद्मः॥३४॥ यत्पृष्टं क एते अनुपथा इति तत्राह एत इति।३५।
आस्तां नाम गोत्रादि यदत्रागतोसि एतद्दिष्ट्या भद्रं तावत् ग्राम्यानर्थानीप्सया माहान् उद्वहिष्यामि संपादयिष्यामि
स्वबंधुभिः सखीभिः॥३६॥ समाः संवत्सरान् मनुष्यदेहप्रवेशाच्छतमित्युक्तं॥३७॥ प्रवृत्तिस्वभावत्वान्निवृत्ति
निंदापूर्वकं तत्संगमभिनंदति पंचभिः। त्वत्तोन्यं कं नु रमये अरतिज्ञं नैष्ठिकं। अकोविदं अनिषिद्धसुखत्या
इहाद्य संतमात्मानं विदाम न ततः परं। येनेयं निर्मिता वीर पुरी शरणमात्मनः॥३४॥ एते सखायः सख्यो मे
नरा नार्यश्च मानद। सुप्तायां मयि जागर्ति नागोयं पालयन्पुरीं॥३५॥ दिष्ट्यागतोसि भद्रं ते ग्राम्यान्कामानभी
प्सते। उद्वहिष्यामि तांस्तेहं स्वबंधुभिररिंदम॥३६॥ इमां त्वमधितिष्ठस्व पुरीं नवमुखीं विभो। मयोपनीता
न् गृह्णानः कामभोगान् शतं समाः ३७ कं नु त्वदन्यं रमये ह्यरतिज्ञमकोविदं। असंपरायाभिमुखमश्वस्तन
विदं पशुं ३८ धर्मो ह्यत्रार्थकामौ च प्रजानंदोऽमृतं यशः। लोका विशोका विरजा यान्न केवलिनो विदुः॥३९॥
गिनं। संपरायो मृत्युस्तदनभिमुखं परलोकचिंताशून्यं। अश्वस्तनविदं श्वः इदं कर्तव्यमिति नीहलोकचिंताशून्यं पशु
तुल्यं॥३८॥ अत्र गार्हस्थ्ये प्रजानंदः पुत्रसुखं। अमृतं मोक्षः। केवलिनो यतयः॥३९॥ श्रीभगवते वासुदेवाय॥

भा॰ स॰ गृहाश्रम इति यत्। एतत् क्षेमाहुः शरणमाश्रयं वदंति॥४०॥ भोगिभोगयोः सर्पदेहाकारयोः तव भुजयोर्यन्न
९७ सज्जेत एवं भूतं कस्याः स्त्रियाः मनः स्यात् न कस्या अपि यो भवान् अनाथवर्गादीन स्तोमाः तेषामाधिं अ
लमत्यर्थं अपोहितुं सर्वं चरति। केनापोहितुं। घृणया उद्धतः अतिशायितो यः स्मितपूर्वकोऽवलोकस्तेन॥४२॥
समुद्य समुदीर्य। समाः संवत्सरान्॥४३॥ तत्र जाग्रदवस्थां संक्षेपेणाह उपगीयमान इति। सुषुप्त्यवस्थामाह।

पितृदेवर्षिमर्त्यानां भूतानामात्मनश्च ह। क्षेमं वदंति शरणं भवेऽस्मिन्यद्गृहाश्रमः॥४०॥ का नाम वीर वि
ख्यातं वदान्यं प्रियदर्शनं। न वृणीत प्रियं प्राप्तं मादृशी त्वादृशं स्वयं॥४१॥ कस्या मनस्ते भुवि भोगिभोगयोः
स्त्रिया न सज्जेत् भुजयोर्महाभुज। यो नाथवर्गाधिमलं घृणोद्धतस्मितावलोकेन चरत्यपोहितुं॥४२॥ नारद उ॰
इति तौ दंपती तत्र समुद्य समयं मिथः। तां प्रविश्य पुरीं राजन्मुमुदाते शतं समाः॥४३॥ उपगीयमानो ललितं
तत्र तत्र च गायकैः। क्रीडन्परिवृतः स्त्रीभिर्ह्रदिनीमाविशच्छुचौ॥४४॥ सप्तोपरिकृता द्वारः पुरस्तस्यास्तु द्वे अधः।
॥ पृथग्विषयगत्यर्थं तस्यां यः कश्चनेश्वरः॥४५॥ ९७

ह्रदिनीं ह्रद्याकाशं स्वापस्थानं। शुचौ निदाघे॥४४॥ इदानीं नव
द्वारप्रदर्शनपूर्वकं जाग्रदवस्थां प्रदर्शयति। सप्तेति यावदध्यायसमाप्ति। तस्याः पुर उपरि कृताः द्वारः सप्त। कृता इति
पाठे संवृताः नेत्रे नासिके श्रोत्रे मुखं चेति सप्त। अधो द्वे द्वारौ गुदलिंगे। यः कश्चनेति आत्मनः सम्यग्विज्ञानादनियतत्वात्
॥४५॥

तासु [illegible] पंच द्वारः पौरस्त्याः पूर्वदिग्भवाः॥४६॥ खद्योतवदल्पप्रकाशात् वामनेत्ररूपा। आविर्मुखी प्रकटं मु
खं यस्याः सा बहुप्रकाशत् दक्षिणनेत्रलक्षणा तस्मात् दक्षिणार्द्धमात्मनो वीर्यवत्त्वात् इति श्रुतेः। स्वानुभवाच्च तत्प्र
काशाधिक्यं। एकत्र संलग्ने। विभ्राजितं रूपं द्युमत् सखः चक्षुःसहितः॥४७॥ नळनाळशब्दौ छिद्रवचनौ। तद्वती नळि
नी नाळिनी च वामदक्षिणनासिके। अत्रापि संज्ञाभेदादेव कार्यं न्यूनाधिक्यं पूर्ववत् ज्ञेयं। अवधूतो वायुर्धिष्ठितो प्राणः।

पंच द्वारस्तु पौरस्त्या दक्षिणैका तथोत्तरा। पश्चिमे द्वे अमूषां ते नामानि नृप वर्णये॥४६॥ खद्योताविर्मुखी च प्रा
क् द्वारावेकत्र निर्मिते। विभ्राजितं जनपदं याति ताभ्यां द्युमत्सखः॥४७॥ नळिनी नाळिनी च प्राक् द्वारावेकत्र
निर्मिते। अवधूतसखस्ताभ्यां विषयं याति सौरभं॥४८॥ मुख्या नाम पुरस्ताद्वास्तयापणबहूदनौ। विषयौ या
ति पुरराड्रसज्ञविपणान्वितः॥४९॥ पितृहूर्नृप पुर्या द्वाः दक्षिणेन पुरंजनः। राष्ट्रं दक्षिणपंचालं याति श्रुतधरान्वितः॥५०॥

सौरभं गंधं॥४८॥ मुख्या प्रधाना आस्यं। आपणो भाषणं। बहूदनं चित्रमन्नं बह्वोदन इत्यनुक्तिः। परोक्षवादत्वाय। र
सज्ञं रसनेंद्रियं। विपणो वागिंद्रियं। ताभ्यामन्वितः॥४९॥ दक्षिणेनेति च नत्वती पार्किंतु दक्षिणस्यां दिशि इत्यस्मिन्नर्थे
न इति धमेनप्रत्ययोऽव्ययसंज्ञः एवमुत्तरेणेति। अयमर्थः पंचानां विषयाणां मध्ये तो न गता नाप्रकाशना यालभि

भा०च० तिपं चालं शास्त्रं श्रवणकालेचबलाधिक्याद्दक्षिणकर्णः प्रथमंप्रवर्त्तते।शास्त्रेच प्रथमं श्रोतव्यं कर्मकांडमित्येता
१८ वता साम्येन प्रवृत्तसंज्ञस्य कर्मकांडस्य दक्षिणकर्णेन श्रवणमिष्यते ५० ततस्तदर्थमनुष्ठाय पितृभिराकृतः
पितृलोकप्रापकं पितृयानं प्रपद्यते। तदनेन प्रकारेण पितृणामाह्वानमनेन भवतीति पितृहूर्दक्षिणः कर्णः। एवंत
द्वैपरीत्येनोत्तरतः कर्णो देवहूः तथा च व्याख्यास्यति। पितृहूर्दक्षिणः कर्ण उत्तरो देवहूः स्मृतः। प्रवृत्तं च निवृत्तं च
शास्त्रं पंचालसंज्ञितं। पितृयानं देवयानं श्रोत्राच्छ्रुतधराद्व्रजेदिति ॥५०॥५१॥ असुरा इंद्रियारामाः तेषामियमासु
देवहूर्नाम पुर्या द्वा उत्तरेण पुरंजनः। राष्ट्रमुत्तरपंचालं याति श्रुतधरान्वितः ॥५१॥ आसुरी नाम पश्चाद्द्वास्त
या याति पुरंजनः। ग्रामकं नाम विषयं दुर्मदेन समन्वितः ॥५२॥ निर्ऋतिर्नाम पश्चाद्द्वास्तया याति पुरंजनः। वैशसं
नाम विषयं लुब्धकेन समन्वितः ५३ अंधावमीषां पौराणां निर्वाक्पेशस्कृतावुभौ। अक्षण्वतामधिपतिस्ताभ्यां याति क
रीशिश्नद्वाः ग्रामकं ह्यग्रामस्थजनानां कं सुखं यत्रायं। दुर्मदेन गुह्येंद्रियेण ५२ निर्ऋतिर्नाम गुदः मृत्युद्वा रोति च ५४
रत्वात् वैशसं मलविसर्गं लुब्धकेन पायुना। तेनोत्क्रांतस्य दुःखप्राप्तेर्लुब्धकसाम्यं ५३ अमीषां मध्ये निर्वाक्पादः पेशस्कृ १८
न्हस्तः तावुभौ बंधौ छिद्राभावात्। स्वतो ज्ञानक्रियाशक्त्यभावाच्च। अक्षण्वतां इंद्रियवतां देहानामधिपतिः पुरंजनः। ल
गिंद्रियस्यानुक्तिः सर्वेष्वंतर्भावात् ५४

अंतःपुरं हृदयं गतः। विषूचीनं सर्वतोमुखं मनः मोहप्रसादहर्षास्तमः सत्वरजःकार्याणि जायाबुद्धिः आत्मजा इंद्रि
यपरिणामास्तदुद्भवं ॥५५॥५६॥ जक्षंत्यां भक्षयंत्यां ॥५७॥५८॥ आसती आसीनां ॥५९॥६०॥१॥ सर्वा असंगत्वादि
लक्षणा प्रकृतिः स्वभावो वंचितायस्य। सर्वया प्रकृत्या वंचित इति वा। नेच्छन्नु अनिच्छन्नपि क्लैब्यात् पारवश्यात् ६२ इति चतुर्थे पंचविंशोध्यायः॥
स यर्ह्यंतःपुरगतो विषूचीनसमन्वितः। मोहं प्रसादं हर्षं वा याति जायात्मजोद्भवं ॥५५॥ एवं कर्मसु संसक्तः का
मात्मा वंचितोऽबुधः। महिषी यद्यदीहेत तत्तदेवान्ववर्त्तत ५६॥ क्वचित्पिबंत्यां पिबति मदिरां मदविह्वलः। अश्नं
त्यां क्वचिदश्नाति जक्षंत्यां सहजक्षिति ॥५७॥ क्वचिद्गायति गायंत्यां रुदत्यां रुदति क्वचित्। क्वचिद्धसंत्यां हस
ति जल्पंत्यामनुजल्पति ॥५८॥ क्वचिद्धावति धावंत्यां तिष्ठंत्यामनुतिष्ठति। अनुशेते शयानायामन्वास्ते
क्वचिदासतीं ॥५९॥ क्वचिच्छृणोति शृण्वंत्यां पश्यंत्यामनुपश्यति। क्वचिज्जिघ्रति जिघ्रंत्यां स्पृशंत्यां स्पृश
ति क्वचित् ॥६०॥ क्वचिच्च शोचतीं जायामनु शोचति दीनवत्। अनुहृष्यति हृष्यंत्यां मुदितामनुमोदते ॥६१॥ विप्र
लब्धो महिष्यैवं सर्वप्रकृतिवंचितः। नेच्छन्ननुकरोत्यज्ञः क्लैब्यात्क्रीडामृगो यथा ॥६२॥ ॥इति श्री भागव
ते महापुराणे चतुर्थस्कंधे पुरंजनोपाख्याने पंचविंशोध्यायः ॥२५॥ ॥श्रीवासुदेवो जयतु॥ ॥छ॥

॥षड्विंशेमृगयाव्याजात्स्वप्नजागरणोक्तितः।मद्बुद्धित्यागयोगाभ्यांसंसृतिःसाप्रपंच्यते।तदेवमात्मनउपाधि
कृतांसुषुप्तावस्थांजाग्रदवस्थांचोक्त्वेदानींस्वप्नावस्थामाहसएकदेतिदशभिः।महानिष्वासोधनुःकर्तव्यमौक
त्वाद्यभिनिवेशोयस्यसरथमारुह्यपंचप्रस्थंवनमगादितितृतीयेनान्वयः।रथंतदानीमेवविधृतंस्वप्नदेहं।जाग्रद्देहस्य
शतसंवत्सरोपभोग्यपुरत्वेनोक्तत्वात्।पंचज्ञानेंद्रियाण्यश्वायस्यआशुगंशीघ्रगतिं।द्वेअहंताममतेईषेदंडिकेयस्य
द्वेपुण्यपापेचक्रेयस्य।एकंप्रधानमक्षोयस्य।त्रयोगुणावेणवोध्वजोयस्य।पंचप्राणाबंधुराणिबंधनानियस्य॥१॥

श्रीनारदउवाच सएकदामहेष्वासोरथंपंचाश्वमाशुगं द्वीषंद्विचक्रमेकाक्षंत्रिवेणुंपंचबंधुरं॥१॥ ॥
एकरश्म्येकदमनमेकनीडंद्विकूबरं॥पंचप्रहरणंसप्तवरूथंपंचविक्रमं॥२॥

एकंमनोरश्मिःप्रग्रहोयस्य।एकाबुद्धिःदमनःसूतोयस्य।तंचतंच।एकंहृदयंनीडंरथिनउपवेशस्थानंयस्य।द्वौशोक
मोहौकूबरौयुगबंधनस्थानंयस्य।पंचशब्दादयोविषयाःप्रक्रियंतेप्रक्षिप्यंतेयस्मिन्।अस्यव्याख्यानंभविष्यति।पं ७७
चेंद्रियार्थप्रक्षेपइति।सप्तधातवोवरूथाःरक्षार्थंचर्माद्यावरणानियस्य।पंचकर्मेंद्रियाणिविक्रमागतिप्रकारायस्य२

मा०व हेमोपस्करंसोवर्णाभरणं।स्वर्णवर्मावर्मकवचं।रजोगुणावृतः अक्षेषुधिः इषुधिर्निषंगः।अनंतवासनाहंकारोपाधिः
१०० एकादशोमनोरूपश्चमूनाथःसेनापतिर्यस्य।वासनामयस्यमनसःप्रग्रहत्वात्संकल्पविकल्पात्मकस्यदृढत्वेनव
क्ष्यमाणस्यचमूनाथत्वमितिविभागः।पंचशब्दादयोविषयाःप्रस्थाःसानवोयस्मिन्तद्वनंगहनीयंदेशमगात्॥३॥आ
त्तागृहीताइषवोरागादिरूपाःकार्मुकंचभोगाद्यभिनिवेशरूपंयेन।जायांविवेकवतींबुद्धिंविहायअतदर्हांत्यागानर्हां॥श्ला

हेमोपस्करमारुह्यस्वर्णवर्माऽक्षयेषुधिः।एकादशचमूनाथःपंचप्रस्थमगाद्वनं॥३॥ चचारमृगयांतत्रदृप्तआ
त्तेषुकार्मुकः।विहायजायामतदर्हांमृगव्यसनलालसः॥४॥आसुरींवृत्तिमाश्रित्यघोरात्मानिरनुग्रहः।न्यह
नन्निशितैर्बाणैर्वनेषुवनगोचरान्॥५ तीर्थेषुप्रतिदृष्टेषुराजामेध्यान्पशून्वने।यावदर्थमलंलुब्धोहन्यादितिनियम्यते॥६

नत्वासुरींवृत्तिमाश्रित्येतिकिमितिमृगयानिंद्यतेकथापक्षेतावद्राज्ञांविहितैवसा।अध्यात्मपक्षेपिजीवस्यविषयभोगोवि
हितएवेत्याशंक्याह।तीर्थेष्वितित्रिभिः।अयंभावः।नहिमृगयाविधीयतेरागप्राप्तत्वात्।किंतुनियम्यतेप्रवृत्तिःसंकोच्यते।
नियममेवषड्विधंदर्शयति।यद्यलमत्यर्थंलुब्धोरागीसन्हन्यात्तर्हितीर्थेषुश्राद्धादिष्वेवतत्रापिप्रतिदृष्टेषुप्रख्यातेष्वेव १००
ननित्यश्राद्धादिषु।तत्रापिराजैवमेध्यानेववनएवयावदुपयोगमेवेति।एवंजीवस्यविषयसेवापियावदुपयोगंनयथेष्टमिति
नियमएवेत्यर्थः॥६॥

अतोनावश्यकमित्याहयइति।एवंनियतंकर्मविद्वान्तेनेत्युपलक्षणंतेनान्येनैवकर्मणैवमनुष्ठितेनयज्ज्ञानंभवतितेनज्ञानेन
हेतुनासोनुष्ठातानलिप्यते॥७॥अन्यथानियमोल्लंघनेनअंतःकरणशुद्ध्यभावात्कर्तृत्वाभिमानमारूढःकर्मभिरनुबध्यते।त
तश्चगुणप्रवाहपतितोधोव्रजति॥८॥प्रासंगिकंपरिसमाप्यपुनर्मृगयामेवानुवर्तयति।तत्रेति।विस्त्रावाणाःपक्षाग्रयेषांतैः।विस्त्रो
॥९॥१०॥तदेवंस्वप्नावस्थादर्शिता।इदानींपुनरपिविवेकवृत्त्याबुध्यारममाणस्यपुत्रादिसं
नाशात्करुणात्मनोकृपालुत्वाद्दुःसहः।कर्मणातेनराजेंद्रज्ञानेन।नसलिप्यते॥७॥अन्यथाकर्मकुर्वाणोमानारूढोनिबध्यते।
यएवंकर्मनियतंविद्वान्कुर्वीतमानवः।तत्रनिर्भिन्नगात्राणांचित्रवाजैःशिलीमुखैः।विप्लवोभूद्दुःखितानांदुःसहःकरुणात्मनां॥९॥
गुणप्रवाहपतितोनष्टप्रज्ञोव्रजत्यधः॥८॥ शशान्वराहान्महिषान्गवयान्रुरुशल्लकान्।मेध्यानन्यांश्चविविधान्विनिघ्नन्श्रममध्यगात्॥१०॥ततःक्षुत्तृट्परिश्रांतोनिवृत्तो
गृहमेयिवान्।कृतस्नानोचिताहारःसंविशद्गतक्लमः॥११॥आत्मानमर्हयांचक्रेधूपालेपस्रगादिभिः।साध्वलंकृतसर्वांगो
महिष्यामादधेमनः॥१२॥तृप्तोहृष्टःसुदृप्तश्चकंदर्पाकृष्टमानसः।नव्यचष्टवरारोहांगृहिणींगृहमेधिनीं॥१३॥अंतःपुरस्त्रियो
पृच्छद्विमनाइववेदिषत्।अपिवःकुशलंरामाःसेश्वरीणांयथापुरा॥१४॥नतथैतर्हिरोचंतेगृहेषुगृहसंपदः।यदिनस्याद्गृहेमातापत्नीवा
पतिदेवता।व्यंगेरथइवप्राज्ञःकोनामासीतदीनवत्॥१५॥
तत्तिंप्रपंचयितुंनकथासौंदर्यायतस्याःप्रणयकुपितायाःअनुनयंप्र — आगतःकृतंस्नानमुचितआहारश्चयेनसंविवेशशय्यामाश्रितः॥११॥
स्त्वावसहितमाह।ततइत्यारभ्ययावदध्यायसमाप्ति।आईयिवान्आगतःकृतंस्नानमुचितआहारश्चयेनसंविवेशशय्यामाश्रितः।सेश्वरीणांस्वामि
१२।गृहमेधिनींसात्विकींबुद्धिंराजस्यांबुद्ध्यांवर्तमानोनापश्यत्॥१३॥वेदिषत्हेप्राचीनबर्हिः।अंतःपुरःस्त्रियःतत्तस्त्रियःसेश्वरीणांस्वामि
नीसहितानां।यथापुरेत्यादिइत्थंवाक्यं१४।व्यंगेवक्रा दिहीने१५

१६। निरवस्तारे आस्तरणरहिते। १७। अवधूतां त्यक्तदेहादरां। तत्संगेनोन्मथितं व्याकुलं ज्ञानं यस्य॥१८॥ प्रेमसंरंभः प्रणयकोपस्तस्य लिंगं कुटिलदृष्ट्यादि स्वस्मिन्नलब्धवान् १९ उत्संगमारोप्य लालितां। २०। कृतमागो अपराधो येस्ते तेषु आत्मसात्कृत्वा अस्मदधीनोयमिति मत्वा शिक्षार्थं दंडं न कुर्वीतेति भृत्या मंदभाग्या॥२१॥ यतः परमो नुग्रहो दंडः यस्य दंडितो विषीदति सो हि इत्याह बाल इति। बंधुकृत्यं शिक्षाकरणं। अमर्षणा क्रोधी। २२। हे सुदति हे सुभ्रु हे मनस्विनि सा त्वमस्माकं स्वामिनि। अतः स्वानां

कस्त्वत्ते सा ललना मज्जंतं व्यसनार्णवे। या मामुद्धरते प्रज्ञां दीपयंती पदे पदे॥१६॥ ॥रामाकुचः॥ ॥नरनाथ न जानीम
कस्त्वत्ते सा ललना मज्जंतं व्यसनार्णवे। या मामुद्धरते प्रज्ञां दीपयंती पदे पदे॥१६॥ ॥रामाकुचः॥ ॥नरनाथ न जानीम
स्त्वत्प्रियाय व्यवस्यति। भूतले निरवस्तारे शयानां पश्य शत्रुहन्॥१७॥ पुरंजनः स्वमहिषीं निरीक्ष्यावधुतां भुवि
तत्संगोन्मथितज्ञानो वैक्लव्यं परमं ययौ॥१८॥ सांत्वयन् श्लक्ष्णया वाचा हृदयेन विदूयता। प्रेयस्याः स्नेहसंरं
भलिंगमात्मनि नाभ्यगात्॥ अनुनिन्येथ शनकैर्वीरोनुनयकोविदः। पस्पर्श पादयुगलमाह चोत्संगलालि
तां॥२०॥ नूनं त्वकृतपुण्यास्ते भृत्या येषीश्वराः शुभे। कृतागःस्वात्मसात्कृत्वा शिक्षादंडं न युंजते॥२१॥ परमो
नुग्रहो दंडो भृत्येषु प्रभुणार्पितः॥ बालो न वेद तत्तन्वि बंधुकृत्यममर्षणः॥२२॥ तस्मिन्दधेदममहं तव वीरपत्नि
योन्यत्र भूसुरकुलात्कृतकिल्बिषस्तं। पश्ये न वीतभयमुन्मुदितं त्रिलोक्यामन्यत्र वै मुररिपोरितरत्र दासात्॥२४॥

×१० सा त्वं मुखं सुदति सुभ्र्वनुरागभारव्रीडाविलंबविलसद्धसितावलोकं। नीलालकालिभिरुपस्कृतमुन्नसन्नः स्वानां प्रदर्शय मनस्विनि वल्गुवाक्यं॥२३॥× १०१॰
मुखं दर्शय। कीदृशं अनुरागभारेण व्रीडया यो विलंबः मंथरता तेन विलसत् हसितावलोको यस्मिन्। नीला अलका एव अलयः तैरुपस्कृतं भूषितं
उन्नसन् नासिकं। वल्गु वाक्यं यस्मिन् तत्॥२३॥ हे वीरपत्नि। वीरस्य मम भार्ये। यस्ते कृतापराधस्तस्मिन् हे ब्राह्मणकुलादन्यत्र अन्यस्मिन् मुररिपु
दासादितरत्र इदं दमं दधे दंडं करोमि। किं तु तं विगतभयं उन्मुदितं त्रिलोक्यामन्यत्र वै लोकत्रयाद्बहिरपि न पश्यामि। मत्तो भयाद्वा सोपसर्पिष्यति। त्यथः २४॥

तैव क्व मित्रः पूर्वं कदाचिदपि विगतितिलकं न पश्यामि। संरंभेण कोपावेशेन भीमं भयंकरं। अविमृष्टमनुज्वलमपेतरागं स्ने
हशून्यं तथा ते सुजातौ शोभनौ स्तनावपि शोकाश्रुभिरुपहतौ न पश्यामि। तथा बिंबफलाकारमधरं च विगतः कुंकुमपंक
तुल्यस्ताम्बूलरागो यस्मात्तादृशं न पश्यामीदानीं कुत एवं जातमिति शेषः। पाठांतरे एवं मुखं स्तनौ च पश्यन् नृशंन विदामी

वक्त्रं न ते वितिलकं मलिनं विहर्षं संरंभभीमविमृष्टमपेतरागं। पश्ये स्तनावपि शुचोपहतौ सुजातौ बिंबा
धरं विगतकुंकुमपंकरागं॥२५॥ तन्मे प्रसीद सुहृदः कृतकिल्बिषस्य स्वैरं गतस्य मृगयां व्यसनातुरस्य॥का
देवरं वशगतं कुसुमास्त्रवेगविस्रस्तपौंस्यमुशती न भजेत कृत्ये॥२६॥ ॥इति श्रीभागवते महापु
राणे चतुर्थस्कंधे पुरंजनोपाख्याने षड्विंशोध्यायः॥

त्यन्वयः। विगतः कुंकुमपंकरागो याभ्यामिति स्तनयोर्विशेषणं॥२५॥ तत्तस्मात्कृतं किल्बिषं अपराधो येन तस्य। कि
ल्बिषमेवाह। स्वैरं स्वातंत्र्येण त्वामपृष्ट्वा मृगयां गतस्य। देवो देवनं क्रीडा तां राति ददातीति देवरः कांतस्तं। कामवेगेन वि
स्रस्तं गतं पौंस्यं पौरुषं धैर्यं यस्य तं। उशती कामयमाना कृत्ये कर्तुं योग्ये अर्थे कान भजेत्॥२६॥ इति चतुर्थे षड्विंशः॥

समर्विशेप्रियापुत्राद्यासक्त्या विस्मृतात्मनः। कालकन्याद्युपाख्यानैर्जरारोगाद्युदीर्यते। तदेवं जीवस्यानुनयादि कथा सौंदर्येण त्यंतं उपाधिवश्यत्वमुक्त्वा तन्निमित्तां संसारपरंपरां निरूपयितुमाह इत्थमिति। अत्र च प्रतिपदं कथं ता विदध्यात्मपक्षे पियोजयितुं शक्यमेव। श्रीनारदेन तु जीवस्य स्त्रीपुरुषवासनादार्ढ्येन विचित्रा संसृतिर्भवतीत्येतावदेव कथातात्पर्यं दर्शितं। क्वचित्पुमान् क्वचिच्च स्त्री क्वचिन्नोभयं मंदधीः। देवो मनुष्यस्तिर्यग्वा यथाकर्मगुणं भवेदिति

श्रीनारद उवाच ॥ इत्थं पुरंजनं सध्र्यक्वशमानीय विभ्रमैः। पुरंजनी महाराज रेमे रमयती पतिं ॥१॥ स राजा महिषीं राजन् सुस्नातां रुचिराननां। कृतस्वस्त्ययनां तृप्तामभ्यनंददुपागतां ॥२॥ ॥

विदता। तत्रादौ पुंस्त्वेन संसृतिरध्यायत्रयेणोक्ता। ततश्चैकेनाध्यायेन स्त्रीत्वेन संसृतिं प्रदर्श्येश्वरप्रसादलब्धज्ञानेन मोक्ष इत्युक्तं ततस्तदेव यथोपयोगं व्याख्यातं इति पंचाध्यार्थः प्रतीयते। प्रतिपदमध्यात्मयोजनात्तु दुर्घटानि प्रयोजनाभावेनि। स्वप्रौढिप्रख्यापनमनादृत्य यथोपयोगमेव व्याख्यास्यामः। सध्र्यक् सम्यक् प्रविश्य विभ्रमैर्विलासैः ॥१॥ १०२
कृतस्वस्त्ययनं मंगलं कुंकुमसिंदूरादिभिर्यस्याः ॥२॥

उपगूढः परिरब्धः। परिरब्धा कंधरा यस्या येन। रहः एकांते। अनुमंत्रैः अनुकूलैः गुह्यभाषणैः अपकृष्टचेतना विवेके यस्याः कालरंहः आयुर्व्ययं। प्रमदैव परिग्रहो ज्ञानसाधनं यस्य। ३। महार्हतल्पे उत्कृष्टशय्यायां शयानः महिष्या भुज उपधिः उपाधानमुच्छीर्षकं यस्य। अविसर्गपाठे शयनक्रियाविशेषणं। तां महिषीमेव परं पुरुषार्थममन्यत। नतु यन्निजं रूपं ब्रह्म तत्। तमसा अज्ञानेनाभिभूतो यतः।४।५। पुत्रानिंद्रियपरिणामान्। दुहितॄः तदनंतरं बुद्धिवृत्तीः। पुत्रसं

तयोपगूढः परिरब्धकंधरो रहोनुमंत्रैरपकृष्टचेतनः। न कालरंहो बुबुधे दुरत्ययं दिवानिशेति प्रमदापरिग्रहः ॥३॥ शयान उन्नद्धमदो महामना महार्हतल्पे महिषीभुजोपधिः। तामेव वीरो मनुते परं यतस्तमोभिभूतो न निजं परं च यत् ॥४॥ तयैवं रममाणस्य कामकश्मलचेतसः। क्षणार्द्धमिव राजेंद्र व्यतिक्रांतं नवं वयः ॥५॥ तस्यामजनयत्पुत्रान्पुरंजन्यां पुरंजनः। शतान्येकादश विराडायुषोर्द्धमथात्यगात् ॥६॥ दुहितॄर्दशोत्तरशतं पितृमातृयशस्करीः। शीलौदार्यगुणोपेताः पौरंजन्यः प्रजापते ॥७॥ स पंचालपतिः पुत्रान्पितृवंशविवर्द्धनान्। दारैः संयोजयामास दुहितॄः सदृशैर्वरैः ॥८॥

ख्यात बाहुल्यमात्रविवक्षया। दुहितृसंख्यातु पुत्रेभ्यो न्यूनत्वेन गार्हस्थ्यसौंदर्यार्थं विराट् सम्राट् आयुषोर्द्धमित्याद्यपि कथासौंदर्यार्थमेव।६। पुरंजनकन्याः पौरंजन्यः हे प्रजापते।७। दारैः परिणामानंतरं हिताहितचिंताभिः वैरूप्येन विषयभोगैः

भा०४
१०३

पुत्राणांपुत्राः कर्माणि। पंचालेषु शब्दादिविषयेषु।९। तेषु पुत्रादिषु तेषामपि ये रिक्थहराः पुत्रास्तेषु च।१०।११। युक्तेषु
अत्महितेषु कर्मस्वनवहितस्य। सर्वैकालः जरासमयः।१२। चंडवेगः संवत्सरः एव वर्तमानेनोपलक्षितः। गंधर्वा दिवसाः।१३।

पुत्राणांचाभवन्पुत्रा एकैकस्य शतंशतं। यैर्वैपौरंजनोवंशः पंचालेषुसमेधितः॥९॥ तेषुतद्रिक्थहारेषुगृह
कोशानुजीविषु। निरूढेनममत्वेनविषयेष्वनुबध्यत॥१०॥ ईजेचक्रतुभिर्घोरैर्दीक्षितःपशुमारकैः। देवान्पि
तॄन्भूतपतीन्नानाकामोयथाभवान्॥११॥ युक्तेष्वेवंप्रमत्तस्यकुटुंबासक्तचेतसः। आससादसवैकालोयोऽप्रि
यःप्रिययोषितां॥१२॥ चंडवेगइतिख्यातोगंधर्वाधिपतिर्नृप। गंधर्वास्तस्यबलिनःषष्ट्युत्तरशतत्रयं॥१३
गंधर्व्यस्तादृशीरस्यमैथुन्यश्चसितासिताः। परिवृत्त्याविलुंपंतिसर्वकामविनिर्मितां॥१४॥ तेचंडवेगानुचराः
पुरंजनपुरंयदा। हर्तुमारेभिरेतत्रप्रत्यषेधत्प्रजागरः॥१५॥ ससप्तभिःशतैरेकोविंशत्याचशतंसमाः। पुरंजन
पुराध्यक्षोगंधर्वैर्युयुधेबली॥१६॥ क्षीयमाणेस्वसंबंधएकस्मिन्बहुभिर्युधा। चिंतांपरांजगामार्तःसराष्ट्रपु
रबांधवः॥१७॥

गंधर्व्योरात्रयः। तादृशीः तादृश्यः मैथुन्यः दिवसैर्मैथुनीभूयास्थिताः सिताश्चासिताश्च शुक्लकृष्णपक्षीयाः परिभ्र १०३
मणेन। सर्वैःकामैःसह विनिर्मितांपुरीमपहरंति।१४। प्रजागरः प्राणः।१५। विंशत्याचसह।१६। स्वसंबंधे स्वसंबंधिनि प्राणे
१७

स एवं मधुभुक् ऋद्धसुखभोक्ता। स्वपार्षदैरिंद्रियैः। नाविदत् नालोचितवान्।१८। कालस्यदुहिता जरा। तां न प्रत्यनंदत् नै
च्छत्। बर्हिष्मन् हे प्राचीनबर्हिः।१९। पूरवे ययातिपुत्राय तेन दत्ता सती वरम् अदात्। ययातिः शुक्रशापाज्जरां प्राप्य पुत्रा
नुवाच इमां गृह्णीतेति तां ज्येष्ठाश्चत्वारो न जगृहुः। पुरुस्तु जगृहे। ततो ययातिस्तस्मै राज्यं ददौ। [illegible]तुं कौतिजरे वाद

सएवपुर्यांमधुभुक्पंचालेषुस्वपार्षदैः। उपनीतंबलिंगृह्णन्स्त्रीजितोनाविदद्भयं॥१८॥ कालस्यदुहिताका
चित्त्रिलोकींवरमिच्छती। पर्यटंतीनबर्हिष्मन्प्रत्यनंदतकश्चन॥१९॥ दौर्भाग्येनात्मनोलोके विश्रुतादुर्भगे
तिसा। यातुष्टाराजर्षयेतु वृतादात्पूरवेवरं॥२०॥ कदाचिदटमानासाब्रह्मलोकान्महींगतं। वव्रेबृहद्व्रतंमां
तुजानतीकाममोहिता॥२१॥ मयिसंरभ्यविपुलमदाच्छापसुदुःसहं। स्थातुमर्हसिनैकत्रमद्याच्ञाविमु
खोमुने॥२२॥ ततोविहतसंकल्पाकन्यकायवनेश्वरं। मयोपदिष्टमासाद्यवव्रेनाम्नाभयंपतिं॥२३॥ ऋ
षभंयवनानांत्वांवृणेवीरेप्सितंपतिं। संकल्पस्त्वयिभूतानांकृतःकिलनरिष्यति॥२४॥ द्वाविमावनुशो
चंतिबालावसदवग्रहौ। यल्लोकशास्त्रोपनतंनरातिनतदिच्छति॥२५॥

दित्युक्तं।२०।२१। अत्यंतवक्ति मयि संरभ्य क्रोधं कृत्वा नैकत्र स्थातुमर्हसीति शापमदात्।२२। आधयो व्याधयश्च यवनाः
तेषामीश्वरं भयनामानं वव्रे।२३। हे वीर त्वामीप्सितं पतिं वृणे न रिष्यति न नश्यति।२४। लोकतो वेदतश्च यद्दैवतेन याद्दच्छ
न वउपनतं प्राप्तं तद्याच्यमानं यो न ददाति यश्चादीयमानं नेच्छति न गृह्णाति इमौ द्वौ कर्मभ्रष्टावनुशोचंति संतः।२५॥

स्था२

पुरुषेणकर्तव्योधर्मःपौरुषः।२६। देवगुह्यंमरणं।तद्धिप्राणिनांवैराग्यानुदयायदैवैर्गोप्यते।२७।तुभ्यंतव।आत्म
समाधिनाज्ञानदृष्ट्यायाच्यमानोयंलोकस्त्वांनेछति।२८। अतोव्यक्तगतिःकुतः।प्राप्तेत्यलक्षितगतिःसतीलोक
माक्रम्यभुंक्ष्व।एवंसर्वोपिलोकस्तवपतिःस्यादित्यर्थः।नवैवंत्वयाशंकनीयंमांप्रतिकूलांदृष्ट्वालोकोहनिष्यतीति।

अथोभजस्वमांभद्रभजंतीमेदयांकुरु। एतावान्पौरुषोधर्मोयदार्त्ताननुकंपते॥२६॥ कालकन्योदितवचो
निशम्ययवनेश्वरः। चिकीर्षुर्देवगुह्यंसससस्मितंतामभाषत॥२७॥ मयानिरूपितस्तुभ्यंपतिरात्मसमाधि
ना।नाभिनंदतिलोकोयंत्वामभद्रामसंमतां॥२८॥ त्वमव्यक्तगतिर्भुंक्ष्वलोकंकर्मविनिर्मितं॥याहिमेपृ
तनायुक्ताप्रजानाशंप्रणेष्यसि॥२९॥ प्रज्वारोयंममभ्राताल्वंचमेभगिनीभव।चराम्युभाभ्यांलोकेस्मि
न्नव्यक्तोभीमसैनिकः॥३०॥ ॥इतिश्रीभागवतेमहापुराणेचतुर्थस्कंधेपुरंजनोपाख्यानेसप्तविं
शोध्यायः॥ ॥नारदउवाच॥ ॥सैनिकाभयनाम्नोयेबर्हिष्मन्दिष्टकारिणः।प्रज्वारकालकन्याभ्यांविचे
रुरवनीमिमां॥१॥ हत्यवेरुमनिइत्यंतेन दिष्टंदैवंकुर्वंतिअधिकुर्वंतीतितथा।मत्सोरादेशकारिणइतिवा॥१॥ ॥

यस्मात्त्वमेवप्रजानांनाशंकरिष्यसीत्याह।याहीति।यौमदीयायवनपृतनातयायुक्ता।२९।किंप्रज्वारइतिमारकोवैष्णवोज्वर- १०४
माहेश्वरस्यव्याध्यंतःपातित्वाद्भीमाःघोराःसैनिकायस्य।३०। चतुर्थेसप्तविंशः॥ ।अष्टाविंशेतुवैदर्भ्याख्यानेनस्त्रीविचिंतया।
स्त्रीत्वंप्राप्तस्यदैवेनसदाविन्मुक्तिरुच्यते।इदानींपुरंजनस्यदेहत्यागप्रकारपूर्वकंस्त्रीत्वप्रकारमाह।सैनिकाइत्यादिराजर्षि

जरत्पन्नगेनजीर्णप्राणेनपालितां।२।३। द्वार्भिश्चज्वरादिरोगरूपेणप्रविश्य।४।५।कन्ययाजरयोपगूढःसन्नत्सातिकि
यांनत्वेभइति तृतीयेनान्वयः।हृतैश्वर्यउत्थानादिषशक्तिः।६। प्रतिकूलान्अनपेक्षितविषयप्रापणान्। अनादृतान्
आदरमकुर्वाणान्स्वाधीनत्वाभावात्। अनुगाइंद्रियाणि।अमात्याःइंद्रियदेवाः।गतसौहृदा।अध्यवसायाभावात्।७।

तएकदातुरभसापुरंजनपुरंनृप।रुरुधर्भौमभोगाढ्यांजरत्पन्नगपालितां॥२॥कालकन्यापिबुभुजेपु
रंजनपुरंबलात्।ययाभिभूतःपुरुषःसद्योनिःसारतामियात्॥३॥तयोपभुज्यमानांवैयवनाःसर्वतोदि
शं।द्वार्भिःप्रविश्यसुभृशंप्रार्दयन्सकलांपुरीं॥४॥तस्यांप्रपीड्यमानायामभिमानीपुरंजनः।अवापो
रुविधांस्तापान्कुटुंबीममताकुलः॥५॥कन्योपगूढोनष्टश्रीःकृपणोविषयात्मकः।नष्टप्रज्ञोहृतैश्वर्योगं
धर्वयवनैर्बलात्॥६॥विशीर्णांस्वपुरींवीक्ष्यप्रतिकूलाननादृतान्। पुत्रान्पौत्रानुगामात्यान्जायांचग
तसौहृदां॥७॥आत्मानंकन्ययाग्रस्तंपंचालानरिदूषितान्।दुरंतचिंतामापन्नोनलेभेतत्प्रतिक्रियां
॥८॥ कामानभिलषन्दीनोयातयामांश्चकन्यया॥विगतात्मगतिःस्नेहात्सुतदारांश्चलालयन्
॥९॥

रिभिर्विघ्नादिभिर्दूषितान्।८॥ कालकन्ययाहेतुभूतयायातयामान्निःसारानपिकामान्।अभिषेलन्।विग
तात्मनोगतिःपारलौकिकीऐहिकःपुत्रादिस्नेहश्चयस्य।स्नेहादितिवापाठः॥९॥ॐनमोनारायणाय

सरापुरंजनो हातुं प्रचक्रमे उपक्रांतवानिति द्वयोरन्वयः। अनिकामतः अनिच्छयापि।।१०।।११।। सपरिच्छदः भृत्यवर्ग
सहितः। कुटुंबेन दीव्यतीति कौटुंबिकः कुटुंबिन्यासाधिर्नात्र विवक्षितः। सान्वयः पुत्रादिसहितः।१२। यवनैरुपरु

गंधर्वयवनाक्रांतां कालकन्योपमर्दितां। हातुं प्रचक्रमे राजा तां पुरीमनिकामतः।।१०।। भयनाम्नोग्रजो भ्रा
ता प्रज्वारः प्रत्युपस्थितः। ददाह तां पुरीं कृत्स्नां भ्रातुः प्रियचिकीर्षया।।११।। तस्यां संदह्यमानायां सपौरः
सपरिच्छदः। कौटुंबिकः कुटुंबिन्या उपातप्यत सान्वयः।।१२।। यवनोपरुद्धायतनो ग्रस्तायां कालकन्यया
पुर्यां प्रज्वारसंसृष्टः पुरपालोन्वतप्यत।।१३।। नशेके सोवितुं तत्र पुरुकृच्छ्रोरुवेपथुः। गंतुमैच्छत्ततो वृक्ष
कोटरादिव सानलात्।।१४।। शिथिलावयवो यर्हि गंधर्वैर्हृतपौरुषः। यवनैररिभी राजन्नुपरुद्धो रुरो
दह।।१५।। दुहितॄः पुत्रपौत्रांश्च जामिजामातृपार्षदान्। स्वत्वावशिष्टं यत्किंचिद्गृहकोशपरिच्छदं।।१६
अहं ममेति स्वीकृत्य गृहेषु कुमतिर्गृही। दध्यौ प्रमदया दीनो विप्रयोग उपस्थिते।।१७।। गेवक्षीणाः।१६।१७

द्धान्यायतनानि स्येयेस पुरपालः।१३। पुरुबकृच्छ्रं तेन उरुर्वेपथुर्यस्य। वृक्षकोटरादिव सर्पः।१४। कंठे उपरुद्धे। रुरो १०५
द घुरुघुरुध्वनिं चकार।१५। दुहित्रादीन्दध्याविति उत्तरेणान्वयः। जामयो स्नुषाः। स्वत्वमात्रेणावशिष्टभोगरक्तप्रा

१७। ध्यानमेवाह। अनाशिते अभोजिते भर्त्सिते भर्त्सने कृते। यतवाग्भवति।१९। अविज्ञं अविवेकिनं मां। प्रोषिते देशांत
रगते गृहमेधीयं वर्त्म गृहधर्मं अपि किं नेष्यति अनुवर्तयिष्यति। युक्तमेतत्। एतावीरसूः पुत्रवती किं वा मद्विरहमसह

लोकांतरं गतवति मय्यनाथा कुटुंबिनी। वर्तिष्यते कथं त्वेषा बालकाननुशोचती।।१८।। न मय्यनाशिते
भुंक्ते नास्नाते स्नाति मत्परा। मयि रुष्टे सुसंत्रस्ता भर्त्सिते यतवाग्भयात्।।१९।। प्रबोधयति माविज्ञं प्रोषि
ते शोककर्शिता। वर्त्मैतद्गृहमेधीयं वीरसूरपि नेष्यति।।२०।। कथं नु दारका दीना दारिकावापरायणाः।
वर्तिष्यंते मयि गते भिन्ननाव इवोदधौ।।२१।। एवं कृपणया बुद्ध्या शोचंतमतदर्हणं। ग्रहीतुं कृतधीरेनं
भयनामाभ्यपद्यत।।२२।। पशुवद्यवनैरेष नीयमानः स्वकं क्षयं। अन्वद्रवन्ननुपथाः शोचंतो भृशमा
तुराः।।२३।। पुरीं विहायोपगत उपरुद्धो भुजंगमः। यदा तमेवानुपुरी विशीर्णा प्रकृतिं गता।।२४।। वि
कृष्यमाणः प्रसभं यवनेन बलीयसा। नाविंदत्तमसाविष्टः सखायं सुहृदं पुरः।।२५।।

मानास्मरिष्यत्येवेत्यर्थः।२०। न विद्यते परमयनमाश्रयो येषां ते अपरायणाः पुत्राः कश्चान्यो यद्वा पराश्रयाः कन्या।
भिन्ना नौर्येषां।२१। अतदर्हणं वस्तुतस्य ब्रह्मत्वात्।२२। एष यदा क्षयं स्थानं नीयमानः तदा अनुपथाः प्राणा इंद्रि
याणि च। तथाच श्रुतिः। तमनुक्रामंतं प्राणोनुक्रामति प्राणमनुक्रामंतं सर्वे प्राणा अनुक्रामंतीति।२३। प्रकृतिं म
हाभूततां गता।२४। नाविंदत न सस्मार। पुरः पूर्वं सखायं संतमीश्वरं।२५।

अदयालुना काम्यकर्मसु ये संज्ञप्ताः हताः अमी वं पापं कौर्यं वा। २६। शाश्वतीः समाः आर्तिमनुभूय। २७। अंतकाले तां भार्यामेव
मनसा गृह्णन् स्मरन् अनंतरं विदर्भस्य वेश्मनि प्रमदोत्तमा बभूव। अतः परमस्मिन्प्रकरणे एतावदेव प्रकृतोपयोगि विवक्षितं। स्त्री
ध्यानेन स्त्रीत्वप्राप्तावपि पतिव्रता ध्यानेन पूर्वादृष्टेन वा धार्मिकाद्विदर्भाज्जन्माभूत्। धार्मिकसंगेन च विशुद्धस्य भागवतेन मल
यध्वजेन संगोऽभूत् ततो विष्णुभक्तिस्ततो वैराग्यं ततस्तमेव भर्तृरूपं गुरुं पातिव्रत्यधर्मेण भजतो भगवत्प्रसादाल्लब्धज्ञानेन

तं यज्ञपशवोऽनेन संज्ञप्ता येऽदयालुना। कुठारैश्चिच्छिदुः क्रुद्धाः स्मरंतोऽमीवमस्य तत्॥ २६॥ अनंतपा
रे तमसि मग्नो नष्टस्मृतिः समाः। शाश्वतीरनुभूयार्तिं प्रमदासंगदूषितः॥ २७॥ तामेव मनसा गृह्ण
न्बभूव प्रमदोत्तमा। अनंतरं विदर्भस्य राजसिंहस्य वेश्मनि॥ २८॥ उपयेमे वीर्यपणां वैदर्भीं म
लयध्वजः॥ युधि निर्जित्य राजन्यान्पांड्यः परपुरंजयः॥ २९॥

मोक्ष इति। अन्यत्तु कथालंकारमात्रं। तथापि किंचिद्वृत्तिसामान्येन द्योजयिष्यामः। विदर्भस्य विशिष्टधर्मोपलक्षित
स्य कर्मप्रधानस्य राजसिंहस्य धर्मेण हि प्रजापालनेन यज्ञादिना च क्षत्रिया राजंते तेषु श्रेष्ठस्य वेश्मनि। २८। मल
योपलक्षिते दक्षिणदेशे ध्वज इव दर्शनीयः। सहि श्रीविष्णुप्रधानो देशः तत्र मुख्यो महाभागवत इत्यर्थः। पंडा नि
श्चयबुद्धिः तामर्हतीति पांड्यः स उपयेमे पुरंजनो ×भक्ति× भागवतसंगं प्राप्त इत्यर्थः॥ २९॥ रामराम १०६

आत्मजां श्रीकृष्णसेवारुचिं तत्संगेन भगवद्धर्मरुचिरभूदित्यर्थः। असितस्य श्रीकृष्णस्येक्षणं यया तां। यवीयसः सप्तसुता
न्। श्रवणं कीर्तनं विष्णोः स्मरणं पादसेवनं। अर्चनं वंदनं दास्यमिति भक्तिप्रकारान्। सख्यात्मनिवेदनयोस्तु पदार्थज्ञानोत्त
रकालत्वात्। तस्य च भगवतैवोत्तरत्रोपदेक्ष्यमाणत्वादिदानीमनुत्पत्तेः सप्तेत्युक्तं। भगवद्धर्मरूप्यात श्रवणकीर्तनादिकं
तमित्यर्थः। द्रविडभूमिपालकान्। द्रविडभूमिर्हि श्रवणादिभक्तिभिरेव सुरक्षितास्तीति प्रसिद्धं। ३०। अर्बुदमिति श्रवणादीनां
प्रत्येकमनेकप्रकारा अभवन्नित्यर्थः। तदुक्तं। भक्तियोगो बहुविधो मार्गैर्भामिनि भाव्यत इति। येषां वंशधरैः यतः प्रवृत्तेः सं

तस्यां स जनयांचक्र आत्मजामसितेक्षणां। यवीयसः सप्त सुतान्सप्त द्रविडभूभृतः॥ ३०॥ एकैकस्याभव
त्तेषां राजन्नर्बुदमर्बुदं। भोक्ष्यते यद्वंशधरैर्मही मन्वंतरं परं॥ ३१॥ अगस्त्यः प्राग्दुहितरमुपयेमे धृतव्र
तां। यस्यां दृढच्युतो जात इध्मवाहात्मजो मुनिः॥ ३२॥ दृढच्युत इत्यर्थः। नह्यविरक्तस्य गुरूपसत्तिः संभवति। कथापक्षे यथा
श्रुतमेव ३२

प्रदायपर्यंदैः। कृत्स्नां मही मन्वंतरं ततः परं च भोक्ष्यते। अविद्याकामकर्मभ्योरोपिक्षिष्यते। ३१। अगस्त्यः अगानि निष्क्रियाणि
गात्राणि स्त्यायति संघातयतीति इति अगस्त्यो मनः स प्राक् प्रथमं जातां दुहितरं कृष्णसेवारुचिमुपयेमे। तस्याः मनः कृष्णे
दृढां रतिं बबंधेत्यर्थः। धृतानि शमदमादीनि व्रतानि यया तां रतिं। दृढेभ्यः सत्यलोकादिभोगेभ्योऽपि च्युतस्तदुहितः कृ
ष्णरताविहामुत्रभोगविरागो जात इत्यर्थः। स एवोपशमात्मकत्वान्मुनिः। कथंभूतः इध्मवाहः आत्मजो यस्य सः। तादृशा
नार्थं स गुरुमेवाभिगच्छेत्समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठं इत्यादिश्रुतिप्रसिद्धा समिद्वहनोपलक्षिता गुरूपसत्तिर्वैराग्या

क्ष्मां विभज्य तत्र श्रवणादिभक्तिभेदं व्यवस्थाप्य।३३ इदानीं पुरंजनस्य स्त्रीभावं प्राप्तस्य सर्वतो विरक्तस्य पतिरेव गुरुः स्त्री
णामिति वचनात्पतिसेवया गुरुशुश्रूषाप्रकारं दर्शयितुमाह। हित्वेत्यादिना मनोद्ध इत्यंतेन ग्रंथेन। मदयतीति मदिरं ई
क्षणं यस्याः।३४। तत्र चंद्रवसाद्या नद्यः। तासां पुण्यैः सलिलैः उभयत्र अंतर्बहिश्च आत्मनो मलं क्षालयन्तपः आस्थित इत्यु

विभज्य तनयेभ्यः क्ष्मां राजर्षिर्मलयध्वजः। आरिराधयिषुः कृष्णं स जगाम कुलाचलं ॥३३॥ हित्वा गृहान्सु
तान्भोगान्वैदर्भी मदिरेक्षणा। अन्वधावत पांड्येशं ज्योत्स्नेव रजनीकरं ॥३४॥ तत्र चंद्रवसा नाम ताम्रपर्णी
वटोदका। तत्पुण्यसलिलैर्नित्यमुभयत्रात्मनो मृजन् ॥३५॥ कंदाष्टिभिर्मूलफलैः पुष्पपर्णैस्तृणोद
कैः। वर्त्तमानः शनैर्गात्रकर्षणं तप आस्थितः ॥३६॥ शीतोष्णवातवर्षाणि क्षुत्पिपासे प्रियाप्रिये। सुख
दुःखे इति द्वंद्वान्यजयत्समदर्शनः ॥३७॥ तपसा विद्यया पक्वकषायो नियमैर्यमैः। युयुजे ब्रह्मण्यात्मा
नं विजिताक्षानिलाशयः ॥३८॥ आस्ते स्थाणुरिवैकत्र दिव्यं वर्षशतं स्थिरः। वासुदेवे भगवति नान्यद्वेदो
द्वहन्रतिं ॥३९॥ नस्य दुःसाधनतां दर्शयति अत एव भक्तिं कृतवानित्याह। वासुदेवे रतिमुद्वहन्। अन्यद्देहादिकं न वेद।३९।

तरेणान्वयः।३५। अस्यते भूमौ क्षिप्यत इत्यष्टिर्बीजं।३६।३७। विद्यया उपासनया पक्वकषायः दग्धकामादिवासनः युयुजे आत्मनो १०७
ब्रह्मतां भावयामास। अक्षाणींद्रियाणि। अनिलः प्राणः आशयश्चित्तं विजिता अक्षादयो येन।३८। आस्ते स्म वर्षशतमिति श्लो

स एवं वर्त्तमानः आत्मन्यात्मानं विद्वान् अन्यस्मादुपरराम॥ कथं विद्वान् व्यतिरिक्ततया देहादिव्यतिरिक्तत्वेन। कुतः व्यापकतया देहादि
प्रकाशकत्वेन। ननु देहाद्याकारो विमर्श एतत् प्रशोकायति न तु निराकारः आत्मा अत आह। आमर्शस्यापि साक्षिणं। अयं भावः विमर्शो
नामांतःकरणवृत्तिः सा च जडत्वादात्मप्रकाश्यैवेति। यथा स्वप्ने मम देहः शिरश्छिन्नमित्यादिप्रतीतौ। तद्व्यतिरिक्तमात्मानं वेत्ति
तद्वत्॥४०॥ केन विद्वानित्यत आह। साक्षाद्धरिरेव यो गुरुस्तेनोक्तेन। सर्वतोमुखं यथा तथा स्फुरता अनवच्छिन्नेन ज्ञानेन॥४१॥ तदेवा
ह पर इति। ब्रह्मैवाहं न संसारीति ब्रह्मण्यात्मन ईक्षणे शोकादिनिवृत्तिः। अहमेव ब्रह्मेत्यात्मनि ब्रह्मण ईक्षणे ब्रह्मपारोक्ष्यनिवृ

स व्यापकतयात्मानं व्यतिरिक्ततयात्मनि। विद्वान्स्वप्न इवामर्शसाक्षिणं विरराम ह॥४०॥ साक्षाद्भगवतोक्तेन गुरुणा
हरिणा नृप। विशुद्धज्ञानदीपेन स्फुरता विश्वतोमुखं ॥४१॥ परे ब्रह्मणि चात्मानं परं ब्रह्म तथात्मनि। ईक्षमाणो वि
हायेक्षामस्मादुपरराम ह ॥४२॥ पतिं परमधर्मज्ञं वैदर्भी मलयध्वजं। प्रेम्णा पर्यचरद्धित्वा भोगान्सा पतिदेवता
॥४३॥ चीरवासा व्रतक्षामा वेणीभूतशिरोरुहा। बभावुपपतिं शांता शिखा शांतमिवानलं ॥४४॥ अजानती प्रि
यतमं यदोपरतमंगना। सुस्थिरासनमासाद्य यथापूर्वमुपाचरत्॥४५॥

त्तिः अतो व्यतिहारेणेक्षमाणः अस्मात्संसारादुपरराम। नन्वेवमपि जीवस्य कुतो ब्रह्मतापत्तिः। ईक्षणस्यैव व्यवधायकत्वादित्याशं
क्याह। ईक्षां विहाय दग्धेंधनानलवत्तस्याः स्वयमेवोपशांतेरिति भावः।४२। उपपतिं पत्युः समीपे। यद्वा पत्युः किंचिन्मात्रं न्यूनात्तस्
मान्नासतीव बभावित्यर्थः। उप अधिके चेति कर्मप्रवचनीयः। तद्योगे च द्वितीया। शांतमंगारावस्थं अनलं उपशांता शुद्धा ज्वाला यथा
भवति तद्वत्।४४। तदानीमपि सुस्थिरमासनं यस्य। अत एवाजानती यदा तदा यथापूर्वमसेवत॥४५॥ ॥श्रीरामराम

पत्युरंघ्रिमर्दयंतीयदातुक्लिन्नंश्चावृभ्रागंनापश्यत ।४६। अबंधंपतिरहितं अश्रुभिरासिंच्य ।४७। सत्रबंधुभ्यः अधार्मिकक्ष
त्रियेभ्योपि ।४८। अवर्त्तयत् प्रवर्त्तयामास ।४९। तस्यांनिधाय अग्निरानेनादीप्य ।५०। पूर्वतरः अनादिरीश्वरः सखा ।
द्वासुपर्णाविविश्रुतैः । साम्नाप्रियवाक्येनसंबोधयन् ।५१। यस्यशोचसि अग्रेस्ष्टेः पूर्वंविवर्षहंमयिस्थितत्वेनस
ख्यसुखं अनुभूतवानसि ।५२। यद्यपिमांनजानासितथाप्यात्मानंत्वामविज्ञातसखं अविज्ञातःकश्चिन्मेसखा आसी

यदानोपालभेतांघ्रिंवुभ्रागंपत्युरवर्तती । आसीत्संविग्नहृदयायूथभ्रष्टामृगीयथा ।। ४६ ।। आत्मानंशोच
तीदीनमबंधुंविक्लवाश्रुभिः । स्तनावासिंच्यविपिनेसुस्वरंप्ररुरोदसा ।। ४७ ।। उत्तिष्ठोत्तिष्ठराजर्षेइमामुद
धिमेखलां । दस्युभ्यःक्षत्रबंधुभ्योबिभ्यतींपातुमर्हसि ।। ४८ ।। एवंविलपतीबालाविपिनेनुगतापतिं । प
तितापादयोर्भर्तुरुदंत्यश्रूण्यवर्त्तयत् ।। ४९ ।। चितिंदारुमयींचित्वातस्यांपत्युःकलेवरं । आदीप्यचानुम
रणेविलपंतीमनोदधे ।। ५० ।। तत्रपूर्वतरःकश्चित्सखाब्राह्मण आत्मवान् । सांत्वयन्वल्गुनासाम्नातामा
हरुदतींप्रभो ।। ५१ ।। कात्वंकस्यासिकोवायंशय्यानोयस्यशोचसि । जानासिकिंसखायंमांयेनाग्रेविचचर्थह ।।
५२ ।। अपिस्मरसिचात्मानमविज्ञातसखंसखे । हित्वामांपदमन्विच्छन्भौमभोगरतोगतः ।। ५३ ।। ।।

पदंस्थानं५३
दित्येवंकिंस्मरसिसख इतिपुंस्त्वनिर्देशः प्राक्तनपुंस्त्वस्मरणाय । सख्यंस्मारयन्त्वद्वियोगकृतमनर्थमाह हित्वेतिसार्द्धैः षड्भिः

हंसौशुद्धौमानसंहृदयमयनंययोः कथापक्षेमानससरसिस्थितौपक्षिणावभूतांजातौ । ओकोगृहं अंतराविनैव । चाशब्द एव
र्थे । सहस्रपरिवत्सरान्महाप्रलयोयावत् ।५४। हेबंधो ग्राम्येसुखेमतिर्यस्य । स्त्रियामायया ।५५। पंचारामाउपवनानियु
स्मिन् । नवद्वाराणिप्राणाश्छिद्राणियस्मिन् । एकःप्राणःपालोयस्मिन् । त्रीणिपृथिव्यप्तेजांसिकोष्ठानिप्राकारायस्मि
न् । षट्ज्ञानेंद्रियमनांसिकुलानिअभीष्टविषयसमर्पकावणिजोयस्मिन् । पंचविपणाहट्टाः कर्मेंद्रियाणियस्मिन्यं

हंसावहंचत्वंचार्यसखायौमानसायनौ । अभूतामंतरावौकःसहस्रपरिवत्सरान् ।। ५४ ।। सत्वंविहायमांब
धोगतोग्राम्यमतिर्महीं । विचरन्पदमद्राक्षीःकयाचिन्निर्मितंस्त्रिया ।। ५५ ।। पंचारामंनवद्वारमेकपालंत्रिकोष्ठ
कं । षट्कुलंपंचविपणंपंचप्रकृतिस्त्रीधवं ।। ५६ ।। पंचेंद्रियार्था आरामाःद्वारःप्राणानवप्रभो । तेजोवन्नानिकौ
ष्ठानिकुलमिंद्रियसंग्रहः ।। ५७ ।। विपणस्तुक्रियाशक्तिर्भूतप्रकृतिरव्यया । शक्त्यधीशःपुमानत्रप्रविष्टो
नावबुध्यते ।। ५८ ।। तस्मिंस्त्वंरामयास्पृष्टोरममाणोऽश्रुतस्मृतिः । तत्संगादीदृशींप्राप्तोदशांपापीयसींविभो ।। ५९

भूतानिप्रकृतिः उपादानकारणंयस्य । स्त्रीबुद्धिरेवधवःपतिःस्वामिनीयस्मिन् ५६ स्वयमेवंश्लोकंव्याचष्टेपंचेंद्रियार्था इति । ष
ट्कुलमितिचस्पष्टत्वान्नव्याख्यातं ५७ भूतान्येवअव्ययाप्रकृतिरूपादानंयस्य । स्त्रीधवमित्यस्यव्याख्यानं । शक्ति
रधीशायस्य तद्वशःसन्निस्पर्थः ।५८। स्पृष्टः अभिभूतः अतोनविद्यतेश्रुतेब्रह्मत्वेस्मृतिर्यस्य ।। ५९ ।। श्रीराम

तत्वमुपदिशतितत्वमितित्वतुर्भिः। सुहृत्ख्यातिः। नवद्वारेपुरेययारुद्धोसितस्याः। ६० पुमांसंपूर्वजन्मस्त्रियंमन्यथाः। इदानीं
वसंतीश्रृणुत्स्त्रियंयन्मन्यसेएषामाया। यतउभयमपिवस्तुतोनास्ति। यस्मादावांहंसौशुद्धौतौ अवयोर्वक्ष्यमाणांगतिंस्व
रूपंपश्य। तत्वंपदार्थयोस्त्रिदंशेनैक्यमाह। हेअंगेमेवभवान्। उपचारंवारयति। नवान्यइतिव्यतिहारोपदेशः। उक्ताभिप्रायः

नत्वंविदर्भदुहितानायंवीरःसुहृत्तव। नपतिस्त्वंपुरंजन्यारुद्धोनवमुखेयया॥ ६०॥ मायाह्येषामयासृष्टा
यत्पुमांसंस्त्रियंसती। मन्यसेनोभयंयद्वैहंसौपश्यावयोर्गतिं॥ ६१॥ अहंभवान्नचान्यस्त्वंत्वमेवाहंविचक्ष्व
भोः। ननौपश्यंतिकवयश्छिद्रंजातुमानागपि॥ ६२॥ यथापुरुषआत्मानमेकमादर्शचक्षुषोः। द्विधाभूत
मवेक्षेततथैवांतरमावयोः॥ ६३॥ एवंसमानसोहंसेनप्रतिबोधितः। स्वस्थस्तद्व्यभिचारेणनष्टामा हंसो
पपुनःस्मृतिं॥ ६४॥ बर्हिष्मन्नेतदध्यात्मंपारोक्ष्येणप्रदर्शितं। यत्परोक्षप्रियोदेवोभगवान्विश्वभावनः॥ ६५
॥ ॥ इतिश्रीभागवतेमहापुराणेचतुर्थस्कंधेअष्टाविंशतितमोध्यायः॥ ॥

छिद्रमंतरं। ६२। तर्हिकथमावयोरज्ञत्वसर्वज्ञत्वादिधर्मभेदस्तत्राहयथेति। आत्मानंदेहमादर्शेनिर्मलंमाहांतंस्थिरं १००
वावेक्ष्यते। परस्यचक्षुषीव तद्विपरीतं। विद्याविद्योपाधिकृतोधर्मभेदइत्यर्थः॥ ६३॥ तद्व्यभिचारेणईश्वरवियोगेन। इ
कथामात्रमितिबुद्धिंवारयतिबर्हिष्मन्निति। पारोक्ष्येणराजकथाभिषेण। तत्रहेतुःयद्यस्मात्॥ ६५ चतुर्थेष्टाविंशः॥ ॥

पुनस्त्रिंशेपरोक्षार्थव्याख्यानेनोपसंहृतं॥ स्त्रीसंगतोभवस्त्वीशसंगान्मुक्तिरितिस्फुटं॥ कवयःअध्यात्मविदः १ व्यनक्ति
लिपतिचेतनीकरोतीत्यर्थः॥ यद्वाव्यनक्तिप्रकटयतिततश्चस्वकर्मणापुरंजनयतीतिपुरंजनपदंव्याख्यातं। भवति

प्राचीनबर्हिरुवाच॥ ॥भगवंस्तेवचोस्माभिर्नसम्यगवगम्यते॥ कवयस्तद्विजानंतिनवयंकर्ममोहिताः १ श्री
नारदउवाच पुरुषंपुरंजनंविद्याद्यद्व्यनक्त्यात्मनःपुरं एकद्वित्रिचतुष्पादंबहुपादमपादकं २ योविज्ञाताहृ
तस्तस्यपुरुषस्यसखेश्वरः यंनविज्ञायतेपुंभिर्नामभिर्वाक्रियागुणैः ३ यदाजिघृक्षन्पुरुषःकार्त्स्न्येनप्र
कृतेर्गुणान् नवद्वारंद्विहस्तांघ्रितत्रामनुतसाध्विति ४ बुद्धिंतुप्रमदांविद्यान्ममाहमितियत्कृतं यामः
धिष्ठायदेहेऽस्मिन्पुमान्भुंक्तेक्षभिर्गुणान् ५ सखायइंद्रियगणाज्ञानंकर्मचयत्कृतं सख्यस्तद्वृ
त्तयःप्राणःपंचवृत्तिर्यथोरगः ६ बृहद्बलंमनोविद्यादुभयेंद्रियनायकं पंचालाःपंचविषयाःयन्मध्ये
नवखंपुरं ७

एकद्व्यादयःपादायस्य २ अविज्ञानशब्देनआहृतःव्याहृतःउक्तोयःसईश्वर अविज्ञातनामनिरुक्तिःयद्यस्मात्पुंभि
र्नामादियोगेननविज्ञायते ३ तत्रतेषुपुरेषुमध्ये ४ अक्षभिरिंद्रियैः ५ पंचवृत्तित्वात्पंचशिराःसर्पइवप्राणः
६ एकादशमहाभटइत्यनेनएकादशोमहाभटोनायकउक्तस्तंदर्शयति बृहद्बलंयस्यतन्मनः नवखा
निद्वाराणियस्य ७

क्रमतस्तस्त्र्यादेरर्थं संक्षेपेणाह यस्तदिंद्रियसंयुतः स आत्मा ताभिर्द्वार्भिर्बहिर्यातीति ८ पुरः पूर्वभागे कृताः ९
नेत्रे इति रूपमिति चक्षुषेति स्वद्योदीनां व्याख्यानं शेषोनुवाद ईश्वरः पुरंजनः १० नासे इति व्याख्या अवधू
नोतीत्यवधूतो वायुस्तदात्मके नो द्वासेन सहैकस्थानत्वात् घ्राणो वधूतः आस्यमिति व्याख्या रसज्ञविपणान्वि

अक्षिणी नासिके कर्णौ मुखं शिश्नगुदाविति द्वे द्वे द्वारौ बहिर्याति यस्तदिंद्रियसंयुतः ८ अक्षिणी ना
सिके आस्यमिति पंच पुरः कृताः दक्षिणा दक्षिणः कर्णः उत्तरा चोत्तरः स्मृतः ९ पश्चिमे इत्यधो द्वा
रौ गुदं शिश्नमिहोच्यते खद्योताविर्मुखी चात्र नेत्रे एकत्र निर्मिते रूपं विभ्राजितं ताभ्यां विचष्टे चक्षुषे
श्वरः १० नलिनी नालिनी नासे गंधः सौरभ उच्यते घ्राणोवधूतो मुख्यास्यं विपणो वाग्रसविद् वि
द्रसः ११ आपणो व्यवहारोत्र चित्रमंधो बहूदनं पितृहूर्दक्षिणः कर्णः उत्तरो देवहूः स्मृतः १२
प्रवृत्तं च निवृत्तं च शास्त्रं पंचालसंज्ञितं पितृयानं देवयानं श्रोत्राच्छ्रुतधराद्व्रजेत् १३ आसुरी
मेढ्रमर्वाग्दुर्वाग्व्यवायो ग्रामिणां रतिः उपस्थो दुर्मदः प्रोक्तो निर्ऋतिर्गुद उच्यते १४ वैशसं न
रकं पायुर्लुब्धकोऽंधौ तु मे शृणु हस्तपादौ पुमान् ताभ्यां युक्तो याति करोति च १५ अंतःपुरं

तदित्यत्र रसज्ञशब्दनिर्दिष्टस्य रसविदित्यनुवादः रस इति व्याख्या रसनेंद्रियमित्यर्थः विपणो वाग्रसविद्रसः ११०
इत्येव पाठः आर्षत्वान्न दोषः ११ अंधः अन्नं १२ १३ ग्रामकमित्यस्यानुवादः ग्रामिणां रतिरिति तस्या व्या
ख्या व्यवाय इति १४ १५

विषूचीन पदार्थानुवादो विषूचीरिति। तद्गुणैर्मनोगुणैस्तमः सत्वरजोभिः १६॥ महिषीयद्यदीहेतेत्यादेरर्थं संगृह्या
ह। यथा यथा बुद्धिः स्वप्ने विक्रियते। जागर्ति विकरोति वा इंद्रियाणि परिणमयति तस्या गुणैरक्तो लिप्त आत्मा
तथा तथा तस्या वृत्तीः दर्शनस्पर्शनाद्याः केवलमुपद्रष्टैव सन् बलादनुकार्यते १७ आशुगमित्येतत् व्या
चष्टे। संवत्सरस्येव अप्रतिहतो रयो वेगः प्रतीतिर्यस्य स संवत्सररयः। वस्तुतः अगतिः। स्वप्नशरीरादेर्बद्धा

अंतःपुरं च हृदयं विषूचीर्मन उच्यते तत्र मोहं प्रसादं वा हर्षं प्राप्नोति तद्गुणैः १६ यथा यथा विक्रियते गुण
क्तो विकरोति वा तथा तथोपद्रष्टात्मा तद्वृत्तीरनुकार्यते १७ देहो रथस्त्विंद्रियाश्वः संवत्सररयोगतिः
द्विकर्मचक्रस्त्रिगुणध्वजः पंचासुबंधुरः १८ मनोरश्मिर्बुद्धिसूतो हृन्नीडो द्वंद्वकूबरः पंचेंद्रियार्थप्रक्षे
पः सप्तधातुवरूथकः १९ आकूतिर्विक्रमो बाह्यो मृगतृष्णां प्रधावति एकादशेंद्रियचमूः पंचसू
नाविनोदकृत् संवत्सरश्चंडवेगः कालो येनोपलक्षितः २० तस्याहानीह गंधर्वा गंधर्व्यो रात्रयः
स्मृताः हरंत्यायुः परिक्रांत्या षष्ट्युत्तरशतत्रयं २१

वैव विवृत्तत्वेन देशांतरगत्यभावात् पाठांतरे संवत्सरश्च तत्कृतं वयश्च ताभ्यां गतिर्यस्येति द्वीषमित्यस्य व्याना
रदेन कृता द्विचक्रमित्यस्य व्याख्या द्विकर्मचक्र इति त्रिगुणध्वज इति त्रिवेणुपद व्याख्या १८ पंचप्रहरण
मित्येतद्व्याचष्टे पंचेंद्रियार्थप्रक्षेप इति १९ पंचेंद्रियैः सूना विनोदमिवान्यायेन विषयसेवां करोतीति
पंचसूनाविनोदकृत् अनेन चचार मृगयां तत्रेत्यादि व्याख्यातं २० परिक्रांत्या परिभ्रमणेन २१ राम

भगिनीत्वेन जगृहे लोकानां क्षयाय २२ ज्वराः संचारिणः भूतानामुपसर्गे पीडायां आशु शीघ्रो मृत्युहेतुः रयो वेगो
यस्य प्रज्वारस्येति प्रशब्दव्याख्या ॥ पाठांतरे भूतकृता अरयः अनेन ज्वर आरि क्लिरूपरूद्ध इत्यरिपदं व्याख्यातं । द्विवि
धः शीतोष्णरूपेण प्रवेश निर्गम भेदात् २३ एवं परोक्षत्वेनोक्तमर्थं व्याख्याय सर्वकथातात्पर्यमाह एवमित्यादि
विरमक्रमेणेत्यंतेन । आधिदैविकादिभिः दुःखैः क्लिश्यमानो ममाहमिति देहे ॥ शतं वर्षाणि शेते वर्त्तत इति द्व

कालकन्या जरा साक्षाल्लोकस्तां नाभिनंदति स्वसारं जगृहे मृत्युः क्षयाय यवनेश्वरः २२ आधयो व्याध
यस्तस्य सैनिका यवनाश्चराः भूतोपसर्गाशुरयः प्रज्वारो द्विविधो ज्वरः २३ एवं बहुविधैर्दुःखैर्दैवभूता
त्मसंभवैः ॥ क्लिश्यमानः शतं वर्षं देहे देही तमोवृतः २४ प्राणेंद्रियमनोधर्मानात्मन्यध्यस्य निर्गुणः शेते
कामलवान् ध्यायन् ममाहमिति कर्म्मकृत् २५ यदात्मानमविज्ञाय भगवंतं परं गुरुं पुरुषस्तु विषज्जे
त गुणेषु प्रकृतेः स्वदृक् २६ गुणाभिमानी स तदा कर्म्माणि कुरुते वशः ॥ शुक्लं कृष्णं लोहितं वा यथाक
र्म्माभिजायते २७ शुक्लात्प्रकाशभूयिष्ठान् लोकानाप्नोति कर्हिचित् दुःखोदर्कान् क्रियायासान् तमः
शोकोत्कटान् क्वचित् २८

योरन्वयः २४ अशनापिपासादीन्प्राणधर्मान् ॥ अंधत्वादीनिंद्रियधर्मान् ॥ कामादीन्मनोधर्मांश्च ॥ निर्गुणोप्यात्मन्यध्य
स्य कामलवान् विषयसुखलेशान् ध्यायन् कर्म्म कृत् २५ ततः किमत आह यदेति द्वाभ्यां ॥ स्वदृक् स्वप्रकाशस्वभावो
पि २६ शुक्लं सात्विकं । कृष्णं तामसं । लोहितं राजसं । यथा कर्म तथा जायते २७ तदेवाह । शुक्लादिति द्वाभ्यां । १११
प्रकाशो भूयिष्ठो येषु । दुःखमुदर्कमुत्तरफलं येषु । क्रियायां आसो येषु तान् लोहितात् तमः शोकोत्कटो येषु तान् । कृष्णा
या
दिति ज्ञेयं २८

नोभयं न पुंसकं यथा कर्म्मगुणं कर्म्मगुणाननतिक्रम्य २९ तेषु दैववशेन सुखदुःखे प्राप्नोतीति सदृष्टांतमाह द्वाभ्यां
क्षुधापरीतो व्याप्तः । सारमेयः श्वा । दंडं दंडेन ताडनं ३० कामव्याप्त आशयो यस्य ३१ ननु तर्हि सुखस्य संभवा
त् दुःखस्य तत्प्रतीकारसंभवान्नैकांततो हेयत्वं तत्राह । दुःखेष्विति । दुःखस्य च प्रतीकारस्तावन्नास्ति स्याच्चेत्तस्य
तस्य प्रतिक्रिया । तथापि विविधेषु दुःखेषु मध्ये एकतरेणापि दुःखेन व्यवच्छेदो वियोगो नास्ति ३२ प्रतिक्रिया

क्वचित्पुमान् क्वचिच्च स्त्री क्वचिन्नोभयमंदधीः । देवो मनुष्यस्तिर्यग्वा यथा कर्म्मगुणं भवः २९ क्षुत्परीतो यथा
दीनः सारमेयो गृहं गृहं । चरन्विंदति यद्दिष्टं दंडमोदनमेव वा ३० तथा कामाशयो जीव उच्चावचपथा भ्र
मन् । उपर्यधो वा मध्ये वा याति दिष्टं प्रियाप्रियं ३१ दुःखेष्वेकतरेणापि दैवभूतात्महेतुषु । जीवस्य न व्य
वच्छेदः स्याच्चेत्तत्तत्प्रतिक्रिया ३२ यथा पुरुषो भारं शिरसा गुरुमुद्वहन् ॥ तं स्कंधेन आधत्ते तथा सर्वाः वे
प्रतिक्रियाः ३३ नैकांततः प्रतीकारः कर्म्मणां कर्म्म केवलं द्वयं ह्यविद्योपसृतं स्वप्ने स्वप्न इवानघ ३४
टि०

यथाहीति ३३ दुःखस्य मूलभूतानि तु कर्माणि प्रतिक्रियादि कर्म्मभि
र्नामपि दुःखरूपत्वादिति सदृष्टांतमाह । यथा हीति ३३ ... णामपि दुःखरूपत्वादिति सदृष्टांतमाह ।
नैवनिवर्त्तत इत्याह नैकांततः । अत्यंतं सवासनं । केवलं ज्ञानरहितं । अविद्यया उपसृतं प्राप्तं । अतोऽविरोधा
न्न निवर्त्यनिवर्त्तकत्वमिति भावः । अत्र दृष्टांतः स्वप्ने दृष्टः स्वप्नः प्रबोधं विना यथा तं स्वप्नमत्यंतं न प्रतिकरो
तीत्यर्थः ३४

ननु तर्हि अज्ञानविलसितत्वेन संसृतिहेतोर्देहादेरप्यसत्वात् किं तन्निवर्त्तनप्रयासेन तत्राह अर्थेह्यीति ॥ लिंगरू
भा०व पेण उपाधिभूतेन ३५ तदेवं संसृतिप्रकारमुक्त्वा तन्निवृत्तिप्रकारमाह ॥ अथ तस्मात् पुरुषार्थभूतस्यैवात्मनः य
११२ तोज्ञानात् मनसो वा ॥ अनर्थपरंपरारूपा संसृतिर्भवति । तस्य व्यवच्छेदो गुरुरूपे वासुदेवे भक्त्यैव ३६ ननु सं

अर्थेह्यविद्यमानेपि संसृतिर्न निवर्त्तते ॥ मनसा लिंगरूपेण स्वप्ने विवरतो यथा ३५ अथात्मनोर्थभूत
स्य यतो नर्थपरंपरा संसृतिस्तद्व्यवच्छेदो भक्त्या परमया गुरौ ३६ वासुदेवे भगवति भक्तियोगः स
माहितः सध्रीचीनेन वैराग्यं ज्ञानं च जनयिष्यति ३७ सोचिरादेव राजर्षे स्यादच्युतकथाश्रयः शृण्व
तः श्रद्दधानस्य नित्यदा स्यादधीयतः ३८ यत्र भागवता राजन्साधवो विशदाशयाः भगवद्गुणानु
कथनश्रवणव्यग्रचेतसः ३९ ×णानुकथने श्रवणे च व्यग्रं सत्वरं चेतो येषां ते ॥ ३९ ॥ ॥

संसृतिनिवृत्तिर्वैराग्यपूर्वकात् ज्ञानादेव न तु भक्त्या ॥ तरति शोकमात्मविदित्यादिश्रुतेस्तत्राह ॥ वासुदेव इति ११२
सध्रीचीनेन समीचीनेन प्रकारेण ३७ ननु सो महाफले ॥ भक्तियोगः कथं स्यात्तत्राह । स तु अच्युतस्य कथा
माश्रित्य वर्त्तमानोऽचिरात् स्यात् । कस्य स्यात्तदा शृण्वतः अधीयानस्य च ३८ कुत्र स्यात्तदाह यत्रेति । भगवतो गु×

ति२
ननु साधुसंगं विना स्वयमेव हरिकथाचिंतनादिना भक्तिर्भविष्यति देवेत्याशंक्याह । द्वाभ्यां तस्मिन्स्थाने महद्भिर्मुखप
ताः कीर्त्तिताः मधुभिदश्चरित्रमेव पीयूषं तदेव शिष्यते शेषो यासु ॥ असारांशरहितश्रुद्धामृतवाहिन्य इत्यर्थः ॥
अवितृषः । अलंबुद्धिशून्याः संतः । गाढैः सावधानैः कर्णैर्यैताः सरितश्च पिबंति सेवंते । अशनशब्देन क्षुद्ल
क्ष्यते । अशनादयस्तान्न स्पृशंति । भक्तिरसिकान्न बाधंत इत्यर्थः ४० सत्संगमंतरेण स्वयमेव कथाचिंत

तास्मिन्महन्मुखरिता मधुभिच्चरित्रपीयूषशेषसरितः परितः स्रवंति । ता ये पिबंत्यवितृषो नृप गाढकर्णैस्तान्नस्पृ
शंत्यशनतृड्भयशोकमोहाः ४० एतैरुपद्रुतो नित्यं जीवलोकः स्वभावजैः ॥ न करोति हरेर्नूनं कथामृतनि
धौ रतिं ४१ प्रजापतिपतिः साक्षाद्भगवान्गिरिशो मनुः ॥ दक्षादयः प्रजाध्यक्षा नैष्ठिकाः सनकादयः ॥
४२ मरीचिरत्र्यंगिरसौ पुलस्त्यः पुलहः क्रतुः ॥ भृगुर्वशिष्ठ इत्येते मदंता ब्रह्मवादिनः ४३ अद्यापि
वाचस्पतयस्तपोविद्यासमाधिभिः ॥ पश्यंतोपि न पश्यंति पश्यंतं परमेश्वरं ४४ ॥ ॥

नादावालस्यादिना रसावेशाभावाच्छ्रुत्यपासाद्यभिभूतस्य भक्तिर्न संभवतीत्याह एतैरिति ४१ भगव
दनुग्रहमंतरेण तु न कस्यापि ज्ञानसंभव इति कैमुत्यन्यायेनाह । चतुर्भिः ॥ प्रजापतिपतिर्ब्रह्मा ४२ मदं
ता अहं नारदो ते येषां ते ४३ वाचांपतयोऽपि । तपोविद्यासमाधिभिरुपायैः पश्यंतोपि विचिन्वंतोपि पश्यंतं स
र्वसाक्षिणं न पश्यंति ४४

अर्थतोपिपारस्थन्येतस्मिन्वर्त्तमानाः मंत्राणां लिंगैर्वज्रहस्त
भा०४ कुतइत्यतआह। शब्दब्रह्मणि वेदे उरुर्विस्तरो यस्य। अर्थतो पिपारस्थन्येतस्मिन्वर्त्तमानाः मंत्राणां लिंगैर्वज्रहस्त
त्वादिगुणयुक्तविविधदेवताभिधानसामर्थ्यैः परिछिन्नमिंद्रादिरूपं ततत्कर्म्माग्रहेण भजंतः परं परमेश्वरं न
११३ विदुः ४५ तर्ह्यन्यः कोनामकर्माद्याग्रहं हित्वा परमेश्वरमेव भजेदतआह। यदायमनुगृह्णाति। अनुग्रह
हेतुः आत्मनि भावितः सन् सतदा लोके लोकव्यवहारे। वेदे कर्म्ममार्गे परिनिष्ठितां मतिं त्यजति। ४६ अर्थ
काशिषु परमार्थत्वेन प्रकाशमानेषु। पुरुषार्थबुद्धिं माकृथाः प्ररोचनाय केवलं श्रोत्रप्रियेषु न स्पृष्टं वस्तु यैः ४७

शब्दब्रह्मणि दुःपारे चरंत उरुविस्तरे॥ मंत्रलिंगैर्व्यवछिन्नं भजंतो न विदुः परं ४५ यदा यस्यानुगृह्णाति भग
वानात्मभावितः॥ सजहाति मतिं लोके वेदे च परिनिष्ठितां॥ ४६ तस्मात्कर्मसु बर्हिष्मन्नज्ञानादर्थकाशिषु॥
मार्थदृष्टिं कृथाः श्रोत्रस्पर्शिष्वस्पृष्टवस्तुषु ४७ स्वंलोकं न विदुस्ते वै यत्र देवो जनार्दनः॥ आहुर्धूम्रधियो
वेदं सकर्मकमतद्विदः ४८ आस्तीर्य दर्भैः प्रागग्रैः कार्त्स्न्येन क्षितिमंडलं। स्तब्धो बृहद्वधान्मानी कर्म नावैषि
यत्परं। तत्कर्म हरितोषं यत्साविद्या तन्मतिर्यया ४९

ननु वेदेन स्वर्गादिसाधनत्वेनोक्तानि कर्माणीति वेदवादिनो वदंति। कथमस्पृष्टवस्तुत्वमुच्यते तत्राह। ये धूम्रधियो मलिनबु टी० अ० २९
द्धयः सकर्मकं कर्मपरं वेदमाहुस्ते अतद्विदः अवेदज्ञाः। यतस्ते स्वं स्वरूपभूतं लोकमात्मतत्वं वेदतात्पर्यगोचरं न ११३
विदुः। यत्र देवोस्ति ४८ त्वं तु महान्मूर्ख इत्याह आस्तीर्येति। इह हत्त बहु पशुवधात् मानी महायज्वाहमित्यहंका
री। अतस्तज्ञः अवनीतः सत्कर्म नावैषि। यत्परं विद्यास्वरूपं तच्च न वेत्सि। नारदः स्वयं कृपया तत् इयं निरूपयति। तद्
तोषयतीति हरितोषं यत् तदेव कर्म्म ययातस्मिन् हरौ मतिर्भवति सैव विद्या॥

धा३

कुतइत्यपेक्षायां हरेः परमफलत्वं दर्शयन्नाह द्वाभ्यां। हरिर्देहभृतामात्मा ईश्वरश्च। तत्र हेतुः स्वयं स्वातंत्र्येण प्रकृतिः
कारणं। अतस्तेषां तत्पादमूलमेव शरणं आश्रयः यतः यस्मिन्। ५० नवतद्भजने अन्यभजनवद्दुःखं भयं चेत्या
हस इति। यो वेद स एव विद्वान् स गुरुः स एव हरिश्च ५१ उक्तमुपसंहरति। एवं भवतः प्रश्नः संछिन्नः परिहृतः। त
दैवमात्मनो बंधमोक्षप्रकारे कथारूपकेण कथिते पिनातिनिर्विण्णचित्तं पुत्रगमनं प्रतीक्षमाणं संतं तत्क्षणमेव
महाभयकंपितसकलगात्रं गृहान्निर्वासयितुं हरिणरूपकमाह। अत्रेति। वदतो मे वचः शृणु ५२ क्षुद्रमल्पं

हरिर्देहभृतामात्मा स्वयं प्रकृतिरीश्वरः॥ तत्पादमूलं शरणं यतः क्षेमो नृणामिह ५० सवै प्रियतमश्चात्मा
यतो न भयमण्वपि॥ इति वेद स वै विद्वान्यो विद्वान्स गुरुर्हरिः ५१ प्रश्न एवं हि संछिन्नो भवतः पुरुषर्षभ। अ
त्र मे वदतो गुह्यं निशामय सुनिश्चितं ५२ क्षुद्रं चरं सुमनसां शरणे मिथित्वा रक्तं षडंघ्रिगणसामसु
लुब्धकर्णं॥ अग्रे वृकानसुतृपोऽविगणय्य यांतं पृष्ठे मृगं मृगय लुब्धकबाणभिन्नं॥ ५३ ॥ ॥

चरतीति तथा तं अलुक्॥ सुमनसां पुष्पाणां शरणे आश्रमे वाटिकायां। मिथिला मिथः परस्परं स्त्रिया सह टी०। ५३
मिलित्वा। तत्रैव रक्तमासक्तं। षडंघ्रयो भ्रमरास्तेषां गणास्तेषां सामसु गीतेषु लुब्धः कर्णो यस्य तं॥ परेषामसु
भिर्हतैः स्वीयानसूंस्तर्प्पयंतीत्यसुतृपः तानविगणय्य अगणयित्वा। लुब्धकस्य बाणेन भिन्नं मृगं मृगय अ

श्लोकं प्रस्तुते योजयन् व्याचष्टे। सुमनोभिः समानो धर्मः परिणाम विरसत्वं यासां स्त्रीणां। मिथित्वेत्यस्य व्याख्या
मिथुनीभूय स्त्रीभिः सहेति शेषः। रक्तमित्यस्य व्याख्या। तास्व भिनिवेशितं मनो येन। असुतृप इत्यस्य व्याख्या
आयुर्हरत इति। यांतमित्यस्य व्याख्या विहरंतमिति। अंतः नालिकायां गूढेन शरेण पराविध्यति दूरादेव ताड
यति ५४ उपदेशसारमाहस इति। विवक्ष्य विचार्य्य अंतर्हृदि वित्तं। कर्णयोर्धुनीं नदीमिव। बहिर्दृष्टिं त्रिं चित्रे नियं

सुमनः समधर्मणां स्त्रीणां शरण आश्रमे पुष्पमधुगंधवत् क्षुद्रतमं काम्यकर्म्मविपाकजं कामसुखं लवं जै
ह्वोपस्थादि विविच्य तं मिथुनीभूय तदभिनिवेशितमनसं षडंघ्रिगणसामगीतवदतिमनोहरवनिता
दिजनालापेष्वतितरामतिलोभितकर्णमग्रेऽत्र कपूर्वं दात्मन आयुर्हरतो होरात्रां तान्कालविशेषा
नविगणय्य गृहेषु विहरंतं पृष्ठत एव परोक्षमनुप्रवृत्तो लुब्धकः कृतांतोंऽतः शरेण यमिह पराविध्य
ति तमिममात्मानं महाराजन् भिन्नहृदयं द्रष्टुमर्हसीति। ५४ सत्वं विवक्ष्य मृगवेष्टितमात्मनोंऽतं
श्चित्तं नियच्छ हृदि कर्णधुनीं च चित्ते। जह्यंगनाश्रममसत्तमयूथगाथं प्रीणीहि हंसशरणं विरमक्रमे
ण ५५ राजोवाच श्रुतमन्वीक्षितं ब्रह्मन् भगवान्यदभाषत। नैतज्जानंत्युपाध्यायाः किं न ब्रूयुर्विदुर्यदि ५६

छ। एतच्च सर्वेंद्रियोपलक्षणार्थं गृहाश्रमं वजहीहि। कीदृशं। असत्तमानां अतिकामुकानां यानि यूथानि तेषां गाथा वार्त्ता य
स्मिन्। जीवानां शरणमीश्वरं। एवं क्रमेण सर्वतो विरम। ५५ अर्थांतरं प्रष्टुं पूर्वोक्तिमनुवदति। श्रुतमन्वीक्षितं विचा
रितं। ब्रह्मन् नारद। एतत्तत्त्वं दुमात्मतत्त्वं उपाध्यायाः मम कर्मोपदेष्टारः आचार्यास्ते न जानंति ।। ५६ ।।

अतस्तत्कृत उपाध्यायकृतः तद्वाक्यविरोधेनात्मत्वे संभावनारूपो महान् संशयः संछिन्नस्तस्य। अत्र तु कश्चित्सं
शयो वर्त्तते यत्रेंद्रियप्रवृत्तीनामप्रवृत्तेर्मुह्यंति ५७ संशयमाह। द्वाभ्यां। कर्माणि येन देहेन करोति तमत्रैव विहाय अमु
त्र लोकांतरे कर्मोपार्जितापि तेनान्येन देहेन जुष्टानि उपभुक्तानि जीवोऽश्नुते प्राप्नुते ५८ इतिवादः श्रूयते प्रा
प्य पुण्यकृतां लोकानिति। शरीरजैः कर्म्मदोषैः याति स्थावरतां नर इति। त्वया वोक्तं। शाश्वतीरनुभूया

संशयोऽत्र तु मे विप्र संछिन्नस्तत्कृतो महान्। ऋषयोऽपि हि मुह्यंति यत्र नेंद्रियवृत्तयः ५७ कर्म्माण्यारभ
ते येन पुमानिह विहाय तं। अमुत्रान्येन देहेन जुष्टानि स यदश्नुते।। ५८ इति वेदविदां वादः श्रूयते तत्र
तत्र ह।। कर्म्म यत्क्रियते प्रोक्तं परोक्षं न प्रकाशते।। ५९ ।।श्रीनारद उवाच ।। येनैवारभ
ते कर्म्म तेनैवामुत्र तत्पुमान्।। भुंक्ते ह्यव्यवधानेन लिंगेन मनसा स्वयं ।। ६० ।। ।।

र्तीमिति। एतच्च कर्तृभोक्तृदेहभेदेन कृतनाशाकृताभ्यागमप्रसंगान्न संगच्छत इति भावः। संशयांतरमाह। प्रोक्तं
वेदोक्तं कर्म क्रियते जनैः। तज्ज्ञानंतरक्षण एव परोक्षं अदृश्यं सन्न प्रकाशते। अतः कर्मणो नष्टत्वात्तद्भोगो
पि दुर्घट इति भावः ५९ प्रथमस्योत्तरं येनैवेति अव्यवधानेन कर्तृभोक्तृदेहविच्छेदं विना स्थूलदेहनाशेऽपि मनःप्रधान
स्य लिंगदेहस्यानाशान्नोक्तदोषप्रसंग इत्यर्थः। ६०

भा०व ११५ लिंगदेहविशिष्टस्यभोक्तृत्वंस्वप्नदृष्टांतेनस्पष्टयति। शयानमिमंजाग्रद्देहंश्वसंतंजीवंतं।उत्सृज्यतदभिमानंत्य
११५ क्त्वा।आत्मनिमनसिसंस्काररूपेणहितंकर्मयथाभुंक्ते।तादृशेनशयानदेहसदृशेनकर्म्मोपस्थापितेनदेहेनान्ये
नवापश्वादिदेहेनतथालोकांतरेपीतिभावः ६१ ननुभवतुनामलिंगविशिष्टस्यानेनदृष्टांतेनभोक्तृत्वं।कर्तृत्वं
तुदानप्रतिग्रहादिषुस्थूलदेहविशिष्टस्यैवदृश्यतेतत्राह।ममैतेपुत्रादयःअसावहंब्राह्मणइतिब्रुवन्मनसाय
द्यद्देहंगृह्णीयात्ततोदेहाद्यद्धंसिद्धंकर्मपुमान्गृह्णीयात्तेनकर्म्मणाएवमहंकारगृहीतेनपुनर्भवोभवति।

शयानमिममुत्सृज्यश्वसंतंपुरुषोयथा॥कर्मात्मन्याहितंभुंक्तेतादृशेनेतरेणवा ६१ ममैतेमनसायद्यदसा
वहमितिब्रुवन्।गृह्णीयात्तत्पुमान्राद्धंकर्मयेनपुनर्भवः ६२ यथानुमीयतेचित्तमुभयैरिंद्रियैर्हितैः।एवंप्रा
ग्देहजंकर्मलक्ष्यतेचित्तवृत्तिभिः ६३

अन्यथाजन्मानुपपत्तेः।अतोअभिमंतुर्मनोविशिष्टस्यैवकर्तृत्वं।अभिमानविषयस्यतुदेहस्यपुत्रादिदेहवत्द्वार
मात्रत्वमितिभावः ६२ यदुक्तंकर्मणोनदृष्टत्वात्नामुत्रभोगइतितत्राह।यथेति॥उभयैर्ज्ञानकर्मरूपैरिंद्रि
याणामीहितैः कदाचित्कर्म्मप्रवृत्तिभिश्चित्तमनुमीयतेसत्यपिसर्वेंद्रियविषयसंबंधेयुगपत्ज्ञानानुत्पत्तेः॥ ११५
तदुक्तमक्षपादेनयुगपत्ज्ञानानुत्पत्तिर्मनसोलिंगमिति॥एवंचित्तवृत्तिभिरपिपूर्वदेहजंकर्मलक्ष्यते॥ता
सामपियुगपदनुत्पत्तेः ६३

इतोपिकर्मलक्ष्यतइत्याह।नानुभूतमितिद्वाभ्यां।अनेनवर्तमानेनदेहेनक्वचकुत्रचिदपियन्नानुभूतं अननुभूतं अनुपभुक्तं अदृष्टंवा
श्रुतंचयद्रूपंयदात्मकंयादृक्यत्प्रकारंच।तत्कदाचित्स्वप्नमनोरथादिषुआत्मनिमनसिउपलभ्यते।६४।तेनहेतुनाअस्यलिंगिनोवा
सनाश्रयस्यजीवस्यतादृशंतदनुभवादियुक्तंपूर्वदेहसंभवंश्रद्धत्स्वनिश्चयेनमन्यस्व।नह्यननुभूतोर्थोमनःस्प्रष्टुंमनसिस्फुरितुंअ
र्हति।६५।किंचमनोवृत्त्यैवपूर्वापराणिशुभाशुभानिमित्तानिशरीराणिज्ञायंतइत्याह।मनएवेति।भद्रंतइतिसम्यगवधानार्थंमाशि

नानुभूतंक्वचानेनदेहेनादृष्टमश्रुतं।कदाचिदुपलभ्येतयद्रूपंयादृगात्मनि॥६४॥तेनास्यतादृशंराजन्लिंगिनोदेहसं
भवं।श्रद्धत्स्वाननुभूतोर्थोनमनःस्प्रष्टुमर्हति॥६५॥मनएवमनुष्यस्यपूर्वरूपाणिशंसति।भविष्यतश्चभद्रंतेत
थैवनभविष्यतः॥६६॥अदृष्टमश्रुतंवात्रक्वचिन्मनसिदृश्यते।यथातथानुमंतव्यंदेशकालक्रियाश्रयं॥६७॥सर्वे
क्रमानुरोधेनमनसींद्रियगोचराः।आयांतिवर्गशोयांतिसर्वेसमनसोजनाः॥६८॥पूर्वानांक्रमेणप्रवेशान्नास्यंतोहृष्टवरः
षाभिनंदति भविष्यतउद्भवंप्राप्स्यतःनभविष्यतःनीचत्वंप्राप्स्यतोपिभावीनिरूपाणिशंसति।मनएवोदार्यकार्पण्यादिवृत्तिभिःपूर्वं
मप्येवमेवासन्पश्चादप्येवमेवभविष्यंतीतिज्ञायतीत्यर्थः।६६।ननुकदाचिद्दर्शनानर्हमपिस्वप्नेप्रतीयतेयथापर्वताग्रेसमुद्रःदिवान
क्षत्राणिस्वशिरश्छेदइत्यादितत्राह अदृष्टमिति।अन्यदेशाश्रयंसमुद्रादिकंपर्वताग्रेनिशाश्रयंनक्षत्रादिकंदिवाअन्यगादिक्रिया
श्रयंस्वशिरःछेदनाश्रयं।निद्रादिदोषेणहिप्रतीयतइत्यनुमंतव्यं।परस्यापितदनुपपत्तेस्तत्कल्पत्वादितिभावः।६७।ननुदरिद्रःक्व
चिदात्मानंमहाराजंपश्यति।राजाचरंकमात्मानंपश्यति।तत्कथमसंभावितंसंगच्छेतत्राह।सर्वइति आयांतिभोग्यत्वेनप्रादुर्भवंति
यांतिचभोगानंतरं।यद्विकश्चिदमनाभवेत्।तर्ह्येवंनस्यान्नत्वेतदस्तीत्याह।सर्वेसमनसइति।अतःसर्वेषांसमनस्कत्वान्मनसिसर्वा

तदेवं सर्वैरपि सर्वैर्थाः क्रमेण दृश्यं तदुक्तं इदानीं युगपदपि सर्वदर्शनं कदाचिद्भवतीत्याह। सत्वैकनिष्ठे भगवत्पार्श्वव र्त्तिनि भगवद्ध्यानपरे मनसि इदं विश्वं उपरज्य संयोगमिवप्राप्यवभासते। प्रतीत्यनर्हस्यापि कदाचित्प्रतीतौ दृष्टांतः चंद्रमसि उपरज्य तमः राहुरिव। तदिदं शुद्धे मनसि सर्वविषयस्फुरणं योगिप्रत्यक्षमिति प्रसिद्धं ६९ तदेवं स्थू लदेहनाशेपि लिंगदेहस्यानाशादन्यः कर्त्तान्यो भोक्तेति नास्तीत्युक्तं। तत्रैवं शंकते। ननु लिंगदेहस्य स्थूल देहद्वारेणैव कर्त्तृत्वभोक्तृत्वे न तु केवलस्य। तत्र कदाचित्स्थूलदेहाभावे जीवस्य कर्त्तृत्वभोक्तृत्वाभावान्मुक्तिः

सत्वैकनिष्ठे मनसि भगवत्पार्श्ववर्त्तिनि। तमश्चंद्रमसीवेदमुपरज्यावभासते ६९ नाहंममेति भावोयं पुरुषे व्यवधीयते। यावद्बुद्धिमनोक्षार्थगुणव्यूहो ह्यनादिमान् ७० सुप्तिमूर्छोपतापेषु प्राणायनविघाततः। नेहते हमिति ज्ञानं मृत्युप्रज्वारयोरपि। ७१ गर्भे बाल्येप्यपौष्कल्यादेकादशविधं तदा। लिंगं न दृश्यते यूनः कुह्वांचं द्रमसो यथा ७२

प्रसज्येत तत्राह। अहंममेति भावः स्थूलदेहसंबंधः। पुरुषे जीवेन व्यवधीयते न विछिन्नो भवति। किंपर्यंतं। बुद्ध्या दीनां व्यूहः परिणामो लिंगं यावदस्ति। अनादिमान् अनादिः सन् ७० स्वापादावहंकाराद्यभावात्तद्विछेदमा शंक्याह। द्वाभ्यां। सुप्त्यादिषु। उपतापः इष्टवियोगादिदुःखं तेषु अहमिति। ज्ञानं अहंकारः नेहते न प्रकाशते। ११६
प्राणायतनानां इंद्रियाणां विघातात्। इंद्रियैरिदंकारास्पदवस्तुग्रहणे ह्यहंकारः स्फुरति नान्यथेत्यर्थः ७१
अपौष्कल्यात् असंपूर्णत्वात् प्राणायतनानामिति शेषः। यूनस्तरुणस्य यदेकादशविधं एकादशेंद्रियैः स्फुटं लिंगम हंकरणं तत्र दृश्यते गर्भादाविति शेषः। तत्र व्यनभिव्यक्तौ दृष्टांतः। कुह्वाममावास्यायां चंद्रमसो लिंगं रूपमिव ७२

तस्मादहंकारस्य दस्य स्थूलदेहस्याविछेदाद्व्यक्तभूतार्थाभावेपि संसृतिनिवृत्तिर्नास्तीत्याह अर्थे ह्यति ७३ यावल्लिंगं स्थूलदेहाविछेदात्संसारानिवृत्तिरित्येतत्प्रपंचयति। एवमिति सार्द्धैस्त्रिभिः। पंचविधं पंचतन्मात्रात्मकं। त्रिवृत् त्रिगुणं षोडशविकारात्मना विस्तृतं ७४ ७५ नन्वेवं देहं विसृज्य देहांतरप्रवेशात्पूर्वं विदेहतास्यादेवेत्यत आह।

अर्थे ह्यविद्यमानेपि संसृतिर्न निवर्त्तते। ध्यायतो विषयानस्य स्वप्नेनर्थागमो यथा॥ ७३॥ एवं पंचविधं लिं गं त्रिवृत्षोडशविस्तृतं। एष चेतनया युक्तो जीव इत्यभिधीयते॥ ७४॥ अनेन पुरुषो देहानुपादत्ते विमुंच ति। हर्षं शोकं भयं दुःखं सुखं चानेन विंदति॥ ७५॥ यथा तृणजलौकेयं नापयात्यपयाति च। नत्यजेन्म्रियमा णोपि प्राग्देहाभिमतिं जनः॥ ७६॥ यावदन्यं न विंदेत व्यवधानेन कर्मणां। मन एव मनुष्येंद्र भूतानां भवभाव नं॥ ७७॥ यदाक्षैश्चरितान्ध्यायन्कर्माण्याचिनुते सकृत्। सति कर्मण्यविद्यायां बंधः कर्मण्यनात्मनः॥ ७८॥ अतस्तदपवादार्थं भज सर्वात्मना हरिं। पश्यंस्तदात्मकं विश्वं स्थित्युत्पत्त्यप्ययाय तः॥ ७९॥

यथेति। नापयाति पूर्वतृणस्यात्यागादपयाति च तृणांतरधारणात्। तथा न त्यजेत्। ७६। अन्यं देहं कर्मणां प्राग्देहारं भकाणां व्यवधानेन विछेदेन समाप्त्या प्रकरणार्थमुपसंहरति मन एवेति भवभावनं संसारहेतुः। ७७। कथं सति तदाह यदेति। चरितान् उपभुक्तान्। यतः कर्मणि सति। नन्वसंगस्य कुतः कर्म तत्राह। अविद्यायां सत्यां अनात्मनो देहादेः कर्मणि बंधो भवति ७८
विश्वस्थित्यादयो यतो हरेर्भवंति। ७९।

भा० च हंसयोऽखिलेश्वरयोः। पुत्रानादिश्येति पुत्राणामादेशं मंत्रिणामुक्त्वा कथयित्वा। ८०। ८१। ८२। ८३। आत्मशोवं मनःशो
११७ धकं। पारमेष्ठ्यं सर्वोत्कृष्टफलप्रदं। ८४। स्त्रीबुद्धिस्तत्संगो हि ×ग्र× तस्य। अमो हंकारः छिन्नो भवति अमुत्र कर्म

श्रीमैत्रेय उवाच॥ ॥भागवतमुख्यो भगवान्नारदो हंसयोर्गतिं। प्रदर्श्य ह्यमुमामंत्र्य सिद्धलोकं त
तोऽगमत्॥८०॥ प्राचीनबर्हिराजर्षिः प्रजासर्गाभिरक्षणे। आदिश्य पुत्रानगमत्तपसे कपिलाश्रमं
॥८१॥ तत्रैकाग्रमना वीरो गोविंदचरणांबुजं। विमुक्तसंगोनुभजन्भक्त्या तत्साम्यतामगात्॥८२
एतदध्यात्मपारोक्ष्यं गीतं देवर्षिणानघ। यः श्रावयेद्यः शृणुयात्स लिंगेन विमुच्यते॥८३॥ एतन्मुकुं
दयशसा भुवनं पुनानं देवर्षिवर्यमुखनिःसृतमात्मशौचं। यः कीर्त्यमानमधिगच्छति पारमेष्ठ्यं ना
स्मिन्भवे भ्रमति मुक्तसमस्तबंधः॥८४॥ अध्यात्मपारोक्ष्यमिदं मयाधिगतमद्भुतं। एवं स्त्रियाश्र
मः पुंसः छिन्नोऽमुत्र च संशयः॥८५॥ इति श्रीभागवते महापुराणे चतुर्थस्कंधे एकोनत्रिंशोऽध्यायः॥ ११७

फलभोगः कथमिति संशयः छिन्नः। ८५॥ ॥इति श्रीभागवते चतुर्थस्कंधे टीकायामेकोनत्रिंशः॥

प्रसंगात्पूर्वमभिः प्रोक्तं वृत्तं प्राचीनबर्हिषः। वर्ण्यते च पुनर्द्वाभ्यां प्रसक्तं तत्प्रचेतसां। तत्र त्रिंशे तपस्तप्त्वा दीशाल्लु
ब्धवरास्ततः। आगत्य वाक्षरस्सुद्वाह्य राज्यं चक्रुरितीर्यते। हरिं प्रतोष्य। कां सिद्धिमापुः। १। हे बार्हस्पत्य कस्यां वि
द्यायां बृहस्पतेर्मैत्रेयः शिष्य इति ज्ञातव्यं। ते यदृच्छया गिरिशं प्राप्य तस्यैव कैवल्यनाथप्रियस्य [illegible] शिष्य

विदुर उवाच॥ ॥ये त्वया विहिता ब्रह्मन्सुताः प्राचीनबर्हिषः। ते रुद्रगीतेन हरिं सिद्धिमापुः प्रतोष्य
कां॥१॥ किं बार्हस्पत्येह परत्र वाथ कैवल्यनाथप्रियपार्श्ववर्तिनः। आसाद्य देवं गिरिशं यदृच्छ
या प्रापुः परं नूनमथ प्रचेतसः॥२॥ श्रीमैत्रेय उवाच॥ ॥प्रचेतसोंऽतरुदधौ पितुरादेशकारि
णः। जपयज्ञेन तपसा पुरंजनमतोषयन्॥३॥ दशवर्षसहस्रांते पुरुषस्तु सनातनः। तेषा
माविरभूत्कृच्छ्रं शांतेन शमयन्रुचा॥४॥ सुपर्णस्कंधमारूढो मेरुशृंगमिवांबुदः। पीतवासा
मणिग्रीवः कुर्वन्वितिमिरा दिशः॥५॥

पार्श्ववर्तिनस्तदनुगृहीताः संतो नूनं परं मोक्षं प्रापुरेव। ततः पूर्वं तु इह अथवा परत्र किं प्रापुः। २। रुद्रगीतजपरूपेण
यज्ञेन तपसा च पुरंजनं हरिं। ३। तेषां कृच्छ्रं तपःक्लेशं रुचा कांत्या शमयन्शांतेन सत्वेन वपुषा आविर्भूतः। ४। सुपर्णस्कं
धमारूढ इत्यादिना बर्हिष्मतः सुतानाहेति तृतीयेनान्वयः। ५।

कनकमयेनवर्णवताविभूषणेन भ्राजमानंकपोलंवदनंयस्य। अष्टभिरायुधैः गरुडएवकिंनरः तेनपक्षस्वनैर्गीताकीर्त्तिर्यस्य
६। पीनाश्चतेआयताअष्टौभुजास्तेषांमंडलंसमूहः तन्मध्येस्थितयालक्ष्म्यास्पर्द्धमानाश्रीःशोभायस्यास्तयावनमाल
यापरिवृत्तआद्यःपुरुषःआह। पर्जन्यस्यनादइवरुतंनादोयस्यास्तयावाचा। सघृणोअवलोकोयस्य। ७। यूयंमत्तोवृणी

काशिष्णुनाकनकवर्णविभूषणेनभ्राजत्कपोलवदनोविलसत्किरीटः। अष्टायुधैरनुचरैर्मुनिभिःसुरेंद्रैरासेवि
तोगरुडकिंनरगीतकीर्त्तिः॥६॥ पीनायताष्टभुजमंडलमध्यलक्ष्म्यास्पर्द्धच्छ्रियापरिवृतोवनमालयाद्यः। बर्हि
षतःपुरुष आह सुतान्प्रपन्नान्पर्जन्यनादरुतयासघृणावलोकः॥७॥ ॥श्रीभगवानुवाच॥ ॥वरंवृणीध्वं
भद्रंवोयूयंमेनृपनंदनाः। सौहार्देनापृथग्धर्मास्तुष्टोहंसौहृदेनवः॥८॥ योनुस्मरतिसंध्यायांयुष्माननुदि
नंनरः। तस्यभ्रातृष्वात्मसाम्यंतथाभूतेषुसौहृदं॥९॥ येतुमांरुद्रगीतेनसायंप्रातःसमाहिताः। स्तुवंत्यहंका
मवरान्दास्येप्रज्ञांचशोभनां॥१०॥ यद्यूयंपितुरादेशमग्रहीष्टमुदान्विताः। अथोवउशतीकीर्त्तिर्लोकाननुभवि
ष्यति॥११॥ ष्यतिद्रक्ष्यतिव्याप्स्यतीत्यर्थः॥११॥ ॥राम॥
ध्वंसौहार्देनहेतुना। अपृथग्धर्मायेषांतेषांसंबोधनं। वःपरस्परंसौहार्देनतुष्टोहं। ८। भूतेषुसौहृदंचभविष्यति। ९। तेभ्योदास्ये
किंपुनर्युष्मभ्यमितिशेषः। १०। अग्रहीष्टगृहीतवंतः। अथोइतिहेतोः। लोकाननुलोकेषुभविष्यति। यद्वालोकाननुभवि ११८

आत्मनोवीर्येणसंतानेन। १२। पुत्रार्थमादौभार्यासंपादयति कंडोरितित्रिभिः। तपोनाशार्थइंद्रप्रेषितयाप्रम्लोचयाकंडुर्नामऋ
षिर्बहुकालंरेमे। साचततःस्वर्गंगच्छंतीकंडोर्जातंगर्भंवृक्षेषुउत्सृज्यजगाम तदेतदुक्तं अपविद्धांत्यक्तां। १३। सप्रसिद्धावनस्प
तीनांराजासोमः अमृतस्राविणींदेशिनींतर्जनींकृत्वास्तस्यामुखेनिदधे। अनेनाप्सरोभंगसंभवेनामृताहारेणचत
स्यालावण्यंकुमस्वेदर्दौर्गंध्यादिराहित्यंचोक्तं। १४। मामनुवर्त्तमानेनपित्रानियुक्ताःसंतःतत्रप्रजासर्गनिमित्तेतामुद्वह

भविताविश्रुतःपुत्रोऽनवमोब्रह्मणोगुणैः। यएतामात्मवीर्येणत्रिलोकींपूरयिष्यति॥१२॥ कंडोःप्रम्लोचयालब्धाक
न्याकमललोचना। तांचापविद्धांजगृहुर्भूरुहानृपनंदनाः॥१३॥ क्षुत्क्षामायामुखेराजासोमःपीयूषवर्षिणीं।
देशिनींरोदमानायानिदधेसदयान्वितः॥१४॥ प्रजाविसर्गआदिष्टाःपित्रामामनुवर्त्तता। तत्रकंन्यांवरारोहां
तामुद्वहतमाचिरं॥१५॥ अपृथग्धर्मशीलानांसर्वेषांवःसुमध्यमा। अपृथग्धर्मशीलेयंभूयात्पत्न्यर्पिताशया
१६॥ दिव्यवर्षसहस्राणांसहस्रमहतौजसः। भौमान्भोक्ष्यथभोगांश्चदिव्यांश्चानुग्रहान्मम॥१७॥ अथमय्यनपा
यिन्याभक्त्यापक्वगुणाशयाः। उपयास्यथमद्धामनिर्विद्यनिरयादतः॥१८॥
त। १५। ननुबहूनांकथमेकाभार्यास्यात्तत्राह। अपृथग्धर्मःशीलंचयेषांतेषांचपत्नीभूयात्। अर्पितोभवत्सुआशयोयया। ध
र्मशीलयोरैक्यान्नद्वाक्यात्र। नदृष्टादृष्टविरोधइतिभावः। १६। अहतौजसःअप्रतिहतबलाःसंतः। १७। पक्वगुणोदग्ध
कामादिमलआशयोयेषां। अतःलोकद्वयभोगान्निरयप्रायान्निर्विद्यमत्स्थानंप्राप्स्यथ॥१८॥ श्रीरामराम॥

ननुगृहेषुप्रविष्टानामस्माकंतदासक्त्याबंधएवस्यात्कुतस्त्वद्भक्तिर्निर्वेदोवातत्राह।गृहेष्विति।कुशलंमय्यर्पितंकर्मयेषां
मद्वार्तयायातोयामःकालोयेषां।१९।तद्वार्ताश्रोतॄणांगृहैर्नबंधइतिकुतस्तत्राह।नव्यवदिति।यद्यस्मात्कथाश्रव
णात्तज्ञःसर्वज्ञोहमीश्वरःब्रह्मवादिभिःप्रवक्तृभिःनिमित्तभूतैःश्रोतॄणांहृतद्धृदयंनव्यवत्प्रतिपदंनूतनवत्अथ
प्राप्नोमिब्रह्मसाक्षात्कारोभवतीत्यर्थः।ननुत्वत्कथाश्रवणेकथंब्रह्मसाक्षात्कारस्तत्राह।योऽहंएतदेवब्रह्म।तत्रहे
गृहेष्वाविशतांचापिपुंसांकुशलकर्मणां।मद्वार्तायातयामानांनबंधायगृहामताः॥१९॥नव्यवद्धृदयेयज्ज्ञोब्रह्मै
तद्ब्रह्मवादिभिः।नमुह्यंतिनशोचंतिनहृष्यंतियतोगताः॥२०॥ मैत्रेयउवाच ॥एवंब्रुवाणंपुरुषार्थभा
जनंजनार्दनंप्रांजलयःप्रचेतसः।तद्दर्शनध्वस्ततमोरजोमलाःगिरागृणन्गद्गदयासुहृत्तमं॥२१॥ प्रचेतस
ऊचुः। नमोनमःक्लेशविनाशनायनिरूपितोदारगुणाह्वयाय।मनोवचोवेगपुरोजवायसर्वाक्षमार्गैरगता
ध्वनेनमः॥२२॥शुद्धायशांतायनमःस्वनिष्ठयामनस्यपार्थंविलसद्द्वयाय।नमोजगत्स्थानलयोदयेषुगृहीतमाया
गुणविग्रहाय॥२३॥विस्फुरितंद्वयंरूपंयस्मिन्गृहीतामायागुणैःविग्रहाःब्रह्मादिमूर्तयोयेन।२३॥ श्रीगोपालायन॰
तुःयतोगताःयंमांप्राप्ताःसंतोमोहशोकहर्षान्नप्राप्नुवंति।अतोमत्कथाश्रवणेननव्यवत्ममहृद्याविर्भावादस्यैवब्रह्मसाक्षात्कारत्वाद्गृहे
षुवसतामपिनबंधइत्यर्थः।२०।पुरुषार्थभाजयतिप्रापयतीतितथातं।२१।वेदैःसकलश्रेयःसाधनत्वेननिरूपिताउदारागुणाःआह्वया
नामानियस्य।मनोवचसोर्वेगादपिपुरोग्रतोजवोवेगोयस्यमनोवचसोरगोचरायेत्यर्थः।अतएवसर्वेषामक्षाणांमार्गैःअगतःअ
नवगतोऽध्वायस्य।तस्मैतेनमः।२२।स्वनिष्ठयास्वरूपस्थित्याशुद्धाय।अतःशांताय।मनसिनिमित्तेसति।अपार्थंव्यर्थमेवविलसते ११७

स्वतस्त्वविशुद्धसत्वरूपाय।संसारंहरतिमेधाज्ञानंयस्यतस्मै।२४।अयुंक्ष्महिलब्धवंतोवयं।२६।यदुक्तंवरंवृणीध्वमितितन्मनसिनिधा
याऽऽहुःरूपमिति।समस्तानांक्लेशानांसंक्षयोयस्मात्।नःआविःकृतंप्रकटितं।अतोन्यत्किमनुकंपितंअनुकंपा।इयमेवास्मा
कंपरमानुकंपेत्यर्थः।२७।कुतइत्यतआहुः।हेअभद्ररंधनअमंगलनाशन।त्वप्रत्ययोत्रनविवक्षितः।एतावदेवदीनेषुवत्स
लैःप्रभुभिर्भाव्यंकार्यं।किंतत्तदाह।यदिति।अस्मदीयाएतेइतिबुध्याउचितेकालेअनुस्मर्यतइतियत्त्वयानुरूपमपिद
नमोविशुद्धसत्वायहरयेहरिमेधसे।वासुदेवायकृष्णायप्रभवेसर्वसात्वतां॥२४॥नमःकमलनाभायनमःकम
लमालिने।नमःकमलपादायनमस्तेकमलेक्षण॥२५॥नमःकमलकिंजल्कपिशंगामलवाससे।सर्वभूत
निवासायनमोयुंक्ष्महिसाक्षिणे॥२६॥रूपंभगवतात्वेतदशेषक्लेशसंक्षयं।आविष्कृतंनःक्लिष्टानांकिमन्य
दनुकंपितं॥२७॥एतावत्त्वंहिप्रभुभिर्भाव्यंदीनेषुवत्सलैः।यदनुस्मर्यतेकालेस्वबुध्याभद्ररंधन॥२८
येनोपशांतिर्भूतानांक्षुल्लकानामपीहतां।अंतर्हितोऽतर्हृदयेकस्मान्नोवेदनाशिषः॥२९॥असावेववरोस्मा
कमीप्सितोजगतःपते।प्रसन्नोभगवान्येषामपवर्गगुरुर्गतिः॥३०॥दर्शकःगतिःस्वतश्चपुरुषार्थभूतः।३०। राम॥
र्शितमितिभावः।२८।येनानुस्मरणेनस्मृतानांतेषामुपशांतिःसुखंभवति।किंच।क्षुल्लकानामपिभृतानांअंतर्हृदयेःतर्हितःअं
तर्यामित्वेनस्थितोभवानीहतामिष्टतांत्वदुपासकानांनोस्माकमाशिषःकस्माद्वेत्तोर्नवेदजानात्येवेत्यर्थः।२९।तथापिवर
यंचेत्तर्हियेषामस्माकंभगवान्प्रसन्नःअसावेववरःभगवत्प्रसादएवास्माकमीप्सितोवरइत्यर्थः।अपवर्गगुरुर्मोक्षमार्गप्र

भा०च०
१२०

यद्यप्येवं अथापिहेनाथ त्वत्तः । वरमेकं वृणीमहे । कथंभूतात्परतः कारणादपिपरात् । अक्षरात्परतः पर इति श्रुतेः । अतो
यद्यपि त्वं दातुं समर्थः तव देयानां त्वद्विभूतीनां अंतोस्ति यतो ऽनंतविभूतित्वादनंत इति गीयसे । ३१ । तथापि यथा सारंगो भ्रमरः
पारिजाते सुखेन लब्धे सति सुलभमप्यस्मान्यवृक्षांतरं न सेवते तथा वयमपि साक्षात्त्वदंघ्रिमूलं प्राप्य किं किं वृणीमहि न किं

वरं वृणीमहे ऽथापि नाथ त्वत्परतः परात् । न ह्यंतस्त्वद्विभूतीनां सोऽनंत इति गीयसे ॥ ३१ ॥ पारिजातेंजसा लब्धे
सारंगोन्यं न सेवते । त्वदंघ्रिमूलमासाद्य साक्षात्किं किं वृणीमहि ॥ ३२ ॥ यावत्ते मायया स्पृष्टा भ्रमाम इह कर्म
भिः ॥ तावद्भवत्प्रसंगानां संगः स्यान्नो भवे भवे ॥ ३३ ॥ तुलयाम लवेनापि न स्वर्गं नापुनर्भवं । भगवत्संगि
संगस्य मर्त्यानां किमुताशिषः ॥ ३४ ॥ यत्रेड्यंते कथा मृष्टास्तृष्णायाः प्रशमो यतः । निर्वैरं यत्र भूतेषु
नोद्वेगो यत्र कश्चन ॥ ३५ ॥ यत्र नारायणः साक्षाद्भगवान्न्यासिनां गतिः । संस्तूयते सत्कथासु मुक्तसंगैः पुनः
पुनः ॥ ३६ ॥ तेषां विचरतां पद्भ्यां तीर्थानां पावनेच्छया । भीतस्य किं न रोचेत तावकानां समागमः ॥ ३७ ॥ गम

विदित्यर्थः । यद्वा किमन्यत्तुच्छं किमर्थं वृणीमहि । यद्वा यदि वृणीमहि तर्हि किं किं वृणीमहे । अनंतत्वेन मनोरथानां । अनवस्थानादित्य
र्थः । ३२ । अत एतावदेव प्रार्थयामह इत्याहुः यावदिति । स्पृष्टाः व्याप्ताः संतः भगवति प्रकृष्टः संगो येषां तेषां संगोस्माकं स्या
त् । ३३ । ननु राज्यभोगान्स्वर्गापवर्गौ वा विहाय किमिदं प्रार्थ्यते तत्राहुः तुलयामेति । भगवत्संगिनां संगस्य लवेनापि ३४ सत्सं १२०
गस्य श्रेष्ठ्यं प्रपंचयंति यत्रेति त्रिभिः । यत्र येषु यतः याभ्यः कथाभ्यः निर्वैरं वैराभावः । ३६ । पद्भ्यां पावनेच्छया संसाराद्भीतस्य ॥ ३७ ॥

सत्संगफलमस्माभिरेवानुभूतमित्याहुः वयं त्विति । भवस्य प्रियः सखा तस्य भवस्य । अत्यंतमचिकित्सतस्य भव
स्य जन्ममृत्योः भिषक्तमं सद्वैद्यं त्वा त्वां गतिं प्राप्ताः । ३८ । वरान्तरं वृणते यन्न इति द्वाभ्यां । नता नमस्कृताः । ३९
निरिंधसां निरन्नानां । अदभ्रं बहुकालं । ते परितोषणाय भवत्विति वृणीमहे । ४० । अज्ञानामप्यस्माकं त्वत्कृति
नोपुक्तेत्याहुः मनुरिति । यस्य तव महिम्नो न दृष्टं पारं यैः ते पि त्वां आत्मसमं स्वशक्त्यनुरूपं यथा स्तुवंति अथो अतः

वयं तु साक्षाद्भगवन्भवस्य प्रियस्य सख्युः क्षणसंगमेन । सुदुश्चिकित्स्यस्य भवस्य मृत्योर्भिषक्तमं त्वाद्य
गतिं गताः स्म ॥ ३८ ॥ यन्नः स्वधीतं गुरवः प्रसादिता विप्राश्च वृद्धाश्च सदानुवृत्त्या । आर्या नताः सुहृदो भ्रा
तरश्च सर्वाणि भूतान्यनसूययैव ॥ ३९ ॥ यन्नः सुतप्तं तप एतदीश निरंधसां कालमदभ्रमप्सु । सर्वं तदेतत्पु
रुषस्य भूम्नो वृणीमहे ते परितोषणाय ॥ ४० ॥ मनुः स्वयंभूर्भगवान्भवश्च ये ऽन्ये तपोज्ञानविशुद्धसत्वाः । अ
दृष्टपारा अपि यन्महिम्नः स्तुवंत्यथो त्वात्मसमं गृणीमः ॥ ४१ ॥ नमः समाय शुद्धाय पुरुषाय पराय च । वासुदेवा
य सत्वाय तुभ्यं भगवते नमः ॥ ४२ ॥ ॥ श्रीमैत्रेय उवाच ॥ ॥ इति प्रचेतोभिरभिष्टुतो हरिः प्रीतस्तथेत्याह शरण्य
वत्सलः ॥ अनिच्छतां यानमतृप्तचक्षुषां ययौ स्वधामानपवर्गवीर्यः ॥ ४३ ॥ ॥ अ ॥

वयमपि गृणीमः ॥ ४१ ॥ सत्वमूर्तये वासुदेवाय । ४२ । यानं स्वप्रयाणं । अनिच्छतां अपि स्मितां स्वधामयया । अनपवर्गवीर्यः
अकुंठितप्रभावः ॥ ४३ ॥ ॥

उदन्वतः सिंधोः सलिलान्निर्याय निर्गत्य। गां स्वर्गरोद्धुमिवउच्छ्रितैर्द्रुमैः गां महीं छन्नां वीक्ष्य द्रुमेभ्योऽकुप्यन्। त
दा हि प्राचीनबर्हिषः प्रव्रजितत्वाद राजकेकर्षणा द्य भावात द्रुमैर्भूमिः छन्ना अभूत्।४४। निरस्तां वीरुधोपि यस्याः।
तथा भूतां कर्तुं। संवर्त्तकः कालाग्निरुद्रः॥४५॥ नैयेर्युक्तिभिः। ४६। उज्जुडुः समर्पयामासुः॥४७॥ मारिषां वार्क्षेयीं। अ

अथ निर्याय सलिलात्प्रचेतस उदन्वतः। वीक्ष्याकुप्यन्द्रुमैश्छन्नां गां गां रोद्धुमिवोच्छ्रितैः॥४४॥ ततोग्निमा
रुतौ राजन्नमुंचन्मुखतो रुषा। महीं निर्वीरुधं कर्तुं संवर्तक इवात्यये॥४५॥ भस्मसात्क्रियमाणांस्तान्द्रुमा
न्वीक्ष्य पितामहः। आगतः शमयामास पुत्रान्बर्हिष्मतो नयैः॥४६॥ तत्रावसिष्टा ये वृक्षा भीता दुहितरं तदा।
उज्जह्रुस्ते प्रचेतोभ्य उपदिष्टाः स्वयंभुवा॥४७॥ ते च ब्रह्मण आदेशान्मारिषामुपयेमिरे। यस्यां महदवज्ञा
नादजन्यजनयोनिजः॥४८॥ चाक्षुषे त्वंतरे प्राप्ते प्राक्सर्गकालविद्रुते। यः ससर्ज प्रजा इष्टाः स दक्षो दैवचोदितः
४९॥ यो जायमानः सर्वेषां तेजस्तेजस्विनां रुचा। स्वयोपादत्त दाक्ष्याच्च कर्मणां दक्षमब्रुवन् ५०

जनयोनिर्ब्रह्मा। तस्माज्जातो दक्षो महतः श्रीमहादेवस्यावज्ञानात्पूर्वमजनयोनिजो ब्रह्मपुत्रोपि सन् क्षत्रियजातौ
यस्यामजनि जातः॥४८॥ प्राक्सर्गे पूर्वदेहे कालेन विद्रुते दैवेनेश्वरेण चोदितः सन् इष्टाः प्रजाः ससर्ज स दक्ष इति प्र १२१
सिद्धः॥४९॥ स्वया रुचा प्रभया तेज उपादत्त आच्छादितवान्। यं च कर्मदाक्ष्याद्दक्षमब्रुवन्॥५०॥ श्रीवासुदेवाय

तमभिषिच्य अनादिर्ब्रह्मा प्रजासर्गरक्षायां युयोज। स च दक्षो अन्यान् मरीच्यादीन् तत्तद्व्यापारेषु नियुक्तवान् ५१
इति चतुर्थे त्रिंशः॥ ॥ एकत्रिंशे सुते दक्षे धुरं न्यस्य वनं सतां। नारदोक्तेन मार्गेण मुक्तिरुक्ता प्रचेतसां। ततः दिव्य
वर्षसहस्राणां सहस्रस्यांते उत्पन्नविवेकज्ञानास्ते उपायास्य थमद्यामनि विद्याः निर्याद्वित्यधोक्षजभाषितं स्मरंत दत
आश्रु प्राव्रजन्॥१॥ ब्रह्मसत्रेण आत्मविमर्शेन दीक्षिताः कृतसंकल्पा बभूवुः। सर्वेषु भूतेषु आत्मेति मेधा ज्ञानं यस्मिन्
तं प्रजासर्गरक्षायामनादिरभिषिच्य तं। युयोज युयुजे न्यांश्च स वै सर्वप्रजापतीन्॥५१॥ ॥इति श्रीभागवते महा
पुराणे चतुर्थस्कंधे त्रिंशोध्यायः॥ ॥मैत्रेय उवाच॥ ॥तत उत्पन्नविज्ञाना आश्वधोक्षजभाषितं। स्मरंत ऽ
आत्मजे भार्यां विसृज्य प्राव्रजन्गृहात्॥१॥ दीक्षिता ब्रह्मसत्रेण सर्वभूतात्ममेधसा। प्रतीच्यां दिशि वेला
यां सिद्धेशोभूद्यत्र जाजलिः॥२॥ तान्निर्जितप्राणमनोवचोदृशो जितासनान् शांतसमानविग्रहान्। परे
मले ब्रह्मणि योजितात्मनः सुरासुरेड्यो ददृशे स्म नारदः॥३॥ तमागतं त उत्थाय प्रणिपत्याभिनंद्य च। पूजयि
त्वा यथादेशं सुखासीनमथाब्रुवन्॥४॥ प्रचेतस ऊचुः॥ स्वागतं ते सुरर्षेद्य दिष्ट्या नो दर्शनं गतः। तव चंक्रमणं ब्रह्मन्
तेन। वेलायां समुद्रतटे जाजलिर्नाम निर्जिताः प्राणमनोवचोदृशो यैस्तान् शांताउप अभयाय यथा रवेः॥५॥
रताः समानाः मूलाधारादारभ्य ऋजवो विग्रहाः येषां। ब्रह्मणि योजित आत्मा यैः सुरासुरैरीड्यो ददृष्टवान्॥३॥ उत्थायतं
प्रणिपत्य यथादेशं यथाविधि पूजयित्वा॥४॥५॥

आदिष्टमुपदिष्टं यदात्मतत्त्वं क्षपितं विस्मृतं ॥६॥७॥ इतिप्रचेतोभिः पृष्टः ॥८॥ अहो मुहुः प्रसक्त्या हरिसेवां विना सर्वं
जन्मकर्मादिकं व्यर्थं कृतमितितानुशोचन्नाह । तज्जन्मेतिचतुर्भिः । यतो जन्मादेर्हरिसेवैव फलं । अतस्तद्विहीनं
सर्वं व्यर्थमित्यर्थः ॥९॥ शुक्लसंबंधिजन्म विशुद्धमातापितृभ्यामुत्पत्तिः सावित्रमुपनयनेन । याज्ञियं दीक्षया ॥ विबु

यदादिष्टं भगवता ॥ शिवेनाधोक्षजेन च । तद्गृहेषु प्रसक्तानां प्रायशः क्षपितं प्रभो ॥६॥ तन्नः प्रद्योतयाध्यात्मज्ञा
नं तत्त्वार्थदर्शनं ॥ येनांजसा तरिष्यामो दुस्तरं भवसागरं ॥७॥ मैत्रेय उवाच ॥ ॥ इतिप्रचेतसां पृष्टो भगवान्ना
रदो मुनिः । भगवत्युत्तमश्लोक आविष्टात्माब्रवीन्नृपान् ॥८॥ नारद उवाच ॥ तज्जन्मतानिकर्माणितदायु
स्तन्मनोवचः । नृणां येनेह विश्वात्मा सेव्यते हरिरीश्वरः ॥९॥ किं जन्मभिस्त्रिभिर्वेह शौक्रसावित्रयाज्ञिकैः ॥
कर्मभिर्वा त्रयीप्रोक्तैः पुंसोपि विबुधायुषा ॥१०॥ श्रुतेन तपसा वा किं वचोभिश्चित्तवृत्तिभिः ॥ बुद्ध्या वा किं निपु
णया बलेनेंद्रियराधसा ॥११॥ किं वा योगेन सांख्येन न्यासस्वाध्याययोरपि । किं वा श्रेयोभिरन्यैश्च न यत्रात्मप्रदो हरिः ॥१२॥

धानामिव दीर्घायुषापि ॥१०॥ वचोभिर्वाग्विलासैः । चित्तवृत्तिभिः । नानावधानसामर्थ्यैः । इंद्रियाणां राधसा पाटवेन
॥११॥ योगेन प्राणायामादिना । सांख्येन देहादिव्यतिरिक्तात्मज्ञानमात्रेण । संन्यासवेदाध्ययनाभ्यामपि । अन्यैरपि
व्रतवैराग्यादिभिः श्रेयःसाधनैः ॥१२॥

नन्वेषां नानाफलसाधनानां हरिसेवाभावमात्रेण कुतो वैयर्थ्यं तत्राह । श्रेयसां फलानामात्मैव अवधिः परा काष्ठा । अ
र्थतः परमार्थतः । आत्मार्थत्वेनैवान्येषां प्रियत्वादित्यर्थः । भवतु नाम आत्मा अवधिः हरेः किमायातं तत्राह । सर्वेषामपीति ।
आत्मदश्चाविद्यानिरासेन स्वरूपाभिव्यंजकः । ऐश्वर्येणापि रूपेण बलिप्रभृतिभ्य इवात्मप्रदः । प्रियश्च परमानंदरूपत्वात्
॥१३॥ किं च नानाकर्मभिस्तत्तद्देवताप्रीतिनिमित्तान्यपि फलानि हरिप्रीत्या भवंति केवलं तत्तद्देवताराधनेन तु न किंचिदि
ति सदृष्टांतमाह । यथेति मूलात्प्रथमविभागाः स्कंधाः । तद्विभागा भुजाः । तेषामपि उपशाखाः उपलक्षणं । यत्र पुष्पाद
योपि तृप्यंति न तु प्रत्येकं विना स्वस्वनिषेचनेन । प्राणस्योपहारो भोजनं तस्मादेवेंद्रियाणां तृप्तिः । न तु तत्तदिं

श्रेयसामपि सर्वेषामात्मा ह्यवधिरर्थतः । सर्वेषामपि भूतानां हरिरात्मात्मदः प्रियः ॥१३॥ यथा तरोर्मूलनिषेचने
न तृप्यंति तत्स्कंधभुजोपशाखाः । प्राणोपहाराच्च यथेंद्रियाणां तथैव सर्वार्हणमच्युतेज्या ॥१४॥ यथैव सूर्यात्प्र
भवंति वारः पुनश्च तस्मिन्प्रविशंति काले । भूतानि भूमौ स्थिरजंगमानि तथा हरावेव गुणप्रवाहः ॥१५॥ ॥

द्रियेषु पृथक्पृथगन्नलेपनेन । तथाच्युताराधनमेव सर्वदेवताराधनं न पृथगित्यर्थः ॥१४॥ कुतः सर्वमूलत्वादिति सदृष्टां
तं तमाह । यथैव वारः जलानि वर्षाकाले सूर्याद्भवंति । ग्रीष्मे तस्मिन्नेव प्रविशंति । अस्याप्रसिद्धत्वेन दृष्टांतांतर
माह । यथा भूतानि भूमाविति । गुणप्रवाहः चेतनात्मकः प्रपंचः ॥१५॥ ॥ ॐ नमो भगवते वासुदेवाय ॥

ना० च० ननु हरावेव गुणप्रवाह इत्युक्ते तदाधारत्वेन सोपाधिकत्वं हरेः स्यादित्याशंक्याह एतदिति। एतद्विश्वं विलोक्य तन्न
१२३ र्वशास्त्रप्रसिद्धं परं पदं सर्वोपाधिरहितं। तदुत्पन्नाज्जगतः पृथगित्यर्थः। तर्हि कथमन्यथा भाति तत्राह सकृदिति
सकृत् कदाचिद्विभातं स्फुरितं गंधर्वनगरवत्। यथा सवितुः प्रभा न ततो भिन्ना। यथा च जाग्रति असव इंद्रियाणि
स्फुरंति। सुषुप्तौ तु सुप्तशक्तयो भवंति न भवंतीत्यर्थः। कथंभूतो सो हरिः द्रव्यादीनां त्रिविधाहंकारकार्याणां तन्नि
मित्तस्य भेदभ्रमस्य चात्ययो यस्मात्सः। यद्वा आजाग्रति सुषुप्तौ असवः सुप्ताः शक्तयो येषां ते भवंति। द्रव्यादेः

एतत्पदं तज्जगदात्मनः परं सकृद्विभातं सवितुर्यथा प्रभा।। यथासवो जाग्रति सुप्तशक्तयो द्रव्यक्रियाज्ञा
नभिदाभ्रमात्ययः।।१५।। यथा नभस्यभ्रतमःप्रकाशा भवंति भूपा न भवंत्यनुक्रमात्। एवं परे ब्रह्मणि श
क्तयस्त्वमू रजस्तमः सत्त्वमिति प्रवाहः।।१६।। तेनैकमात्मानमशेषदेहिनां कालं प्रधानं पुरुषं परेशं। स्वतेजसा
ध्वस्तगुणप्रवाहमात्मैकभावेन भजध्वमद्धा।।१७।। दयया सर्वभूतेषु संतुष्ट्या येन केन वा। सर्वेंद्रियोपशांत्या च तुष्य

प्रत्ययो भवति सवितुः प्रभेत्युक्तो दृष्टांत इति।।१५।। नन्वसंगे हरौ कथं प्रपंचोत्पत्ति त्याशु जनार्दनः।।१८।।
लयौ तत्राह। यथेति। अभ्रतमःप्रकाशा आगमापायिनो रजस्तमःसत्त्वस्थानीयाः हे भूपाः प्रचेतसः अमूः शक्तयः उद्भ
वंति न भवंति लीयंते। इति एवमयं जगत्प्रवाहः।।१६।। तेन सर्वकारणत्वेन हेतुना कालो निमित्तं प्रधानमुपादानं पुरुषः क १२३
र्ता एवं त्रिनियात्मकत्वात्सर्वकारणं परमीश्वरं। अद्धा साक्षाद्भजध्वं। कथं आत्मैकभावेन अभिन्नत्वेन।।१७।। साधनमाह। दया

नतो न कदाचित्त्यजतीत्याह। अपहता निरस्ताः सकला एषणाः कामा यस्मात् स चासावमल आत्मा मनः तस्मिन्
सतां मनसि निरंतरमेधितया भावनया उपहूतः सन् अक्षरो हरिः छिद्रवत् नभस्याकाशवत् ततो न सरति नापयाति हि।
किं कुर्वन्। आत्मनो निजजनवशगत्वं स्वभक्ताधीनत्वमयन् अवगच्छन्।।१९।। सतामेवं वश्यो सो असतां तु पूजामपि

अपहतसकलैषणामलात्मन्यविरतमेधितभावनोपहूतः। निजजनवशगत्वमात्मनोऽयन्न स
रति छिद्रवदक्षरः [illegible] सतां हि।।१९।। न भजति कुमनीषिणां स इज्यां हरिरधनात्मधनप्रियो रसज्ञः।
श्रुतधनकुलकर्मणां मदैर्ये विदधति पापमकिंचनेषु सत्सु।।२०।। श्रियमनुचरतीं तदर्थिनश्च द्वि
पदपतीन्विबुधांश्च यत्स्वपूर्णः। न भजति निजभृत्यवर्गतंत्रः कथममुमुद्विसृजेत्पुमान्कृतज्ञः।।२१।।

न गृह्णातीत्याह नेति। कुमनीषिणां कुत्सितमतीनां। अधना श्रुते आत्मधना भगवद्धनाः ते प्रिया यस्य। रसज्ञः भ
क्तिसुखज्ञः। के कुमनीषिणस्तानाह। श्रुतादिनिमित्तैर्मदैर्ये सत्सु पापं तिरस्कारं कुर्वंति।।२०।। भक्ताधीनत्वं प्रपंचय
न्नाह। अनुवर्तमानामपि श्रियं तदर्थिनः सकामान् द्विपदपतीन् नरेंद्रान् विबुधान् देवान् पियानानुवर्तते। यतः स्वेनैव पू
र्णः। अतः स्वभृत्यवर्गानुरक्त एव एवंभूतममुं ईषदपि कथं परित्यजेत्।।२१।। ।।श्रीनारायणो जयतु।। ।।

भा.च. प्रचेतसः कर्मभूतान्। अन्याश्चनूनंमुनीतेरित्यादि कृष्णवचरितं ताप्या स्तेत्रे अगायत प्रचेतसामित्युक्तत्वात्। २२॥
प्रचेतसांनारदस्यच संवादरूपमेतदाख्यानं तेनिहितं हरेः कीर्त्तनं यस्मिन्नुतत्॥ २४॥ य एषवंशः सोनुवर्णितः।
१२४ २५। यः प्रियव्रतः २६। २७। २८। स्वान्ज्ञातीन्दिदृक्षुः २९ राज्ञां चरितमितिशेषः ३०   इतिश्रीभागवतमा

मैत्रेयउवाच   इतिप्रचेतसोराज्ञन्नन्याश्चभगवत्कथाः। श्रावयित्वाब्रह्मलोकंययौस्वायंभुवोमनुः २२
तेपितन्मुखनिर्यातंयशोलोकमलापहं। हरेर्निशम्यतत्पादंध्यायंतस्तद्गतिंययुः २३ एवंतेभिहितंक्षत्तर्य
न्मांत्वंपरिपृष्टवान्। प्रचेतसांनारदस्यसंवादंहरिकीर्त्तनं २४ श्रीशुकउवाच यएषउत्तानपदोमान
वस्यानुवर्णितः। वंशः प्रियव्रतस्यापिनिबोधनृपसत्तम २५ योनारदादात्मविद्यामधिगम्यपुनर्महीं। भु
क्त्वाविभज्यपुत्रेभ्यऐश्वरंसमगात्पदं २६ इमांतुकौषारविणोपवर्णितांक्षत्तानिशम्याजितवादसत्क
थां। प्रवृद्धभावोश्रुकलाकलोमुनेर्दधारमूर्ध्नाचरणंहृदाहरेः २७ श्रीविदुरउवाच सोयंतातमहा
योगिन्भवताकरुणात्मना। दर्शितस्तमसःपारोयत्राकिंचनगोहरिः। २८ इत्यानम्यतमामंत्र्यविदुरोगज
साह्वयं। स्वानांदिदृक्षुःप्रययौज्ञातीनांनिर्वृताशयः २९ एतद्यःशृणुयाद्राजन्राज्ञांहर्यर्पितात्मनां। आ १२४
युर्द्धनंयशःस्वस्तिगतिमैश्वर्यमाप्नुयात् ३०   इतिश्रीभागवतेमहापुराणेचतुर्थस्कंधेऽष्टादशसाह

वार्थपददीपिकायांचतुर्थस्कंधे एकत्रिंशोध्यायः ३१

स्यांसंहितायांप्रचेतसोपाख्यानंनामैकत्रिंशोऽध्यायः ३१

भाग.चतु.
१२५

१२५

२ लनाख्यमनेकधा॥२

भा०पं० १ श्रीकृष्णाय नमः॥ ॥ ॐ नमः परमहंसास्वादितचरणकमलचिन्मकरंदाय भक्तजनमानसनिवासाय श्री
रामाय॥ अथातः पंचमस्कंधव्याख्यानेकविशेषवान्॥ प्रियव्रतान्वयो यत्र सप्रपंचः प्रपंच्यते॥१॥ षड्विंश
त्याधुनाध्यायैः पंचमे स्थानमीर्यते॥ लोकद्वीपादिमर्यादा पाल्यंते राजभिः पृथक्॥ पृथिव्युपर्यधो लोके
मर्यादा त्रिविधा मता॥ पुनश्चैकैकशस्तेषु मर्यादा बहुधा मता॥३॥ भुवि द्वीपादिमर्यादाः पा॰ भूमेरुपरि
देवाद्यैस्ततश्चाधोऽसुरादिभिः॥४॥ तत्राध्यायैस्त्रिविंशत्या प्रियव्रतपुरःसरैः॥ भुवो द्वीपादिमर्यादाः पालि

॥ ॥राजोवाच॥ ॥ प्रियव्रतो भागवत आत्मारामः कथं मुने॥ गृहेऽरमत यन्मूलः कर्मबं
धः पराभवः॥१॥ न नूनं मुक्तसंगानां तादृशानां द्विजर्षभ॥ गृहेष्वभिनिवेशोऽयं पुंसां भ
वितुमर्हति॥२॥

ता इति वर्ण्यते॥ त्रिभिः सूर्यादिभिर्ज्योतिश्चक्रादिभिरिति कीर्त्यते॥ अतलादिषु दैत्याद्यैः पालनं ततस्त्रिभिः॥ राम १
६॥ तत्र तु प्रथमेऽध्याये ज्ञानिनो राज्यनिर्वृतिः॥ पुनश्च ज्ञाननिष्ठेति प्रियव्रतकथाद्भुता॥७॥ वंशः प्रियव्रतस्यापि
निबोध नृपसत्तम। यो नारदादात्मविद्यामधिगम्य पुनर्महीं॥ भुक्त्वा विभज्य पुत्रेभ्य ऐश्वरं समगात्पदमिति पूर्व
स्कंधांते उक्तं प्रियव्रतस्य प्रथममात्मविद्या ततो गृहाश्रमः। ततः सर्वसंगत्यागेन मोक्ष इत्युक्तं। तत्र विस्मि
तः पृच्छति। प्रियव्रतो भागवतः अत एवात्मारामः गृहे कथमरमत। रमतां को दोष इति चेत्तत्राह। कर्मणा बंधः प

राभवश्च। स्वस्वरूपतिरस्कारो यन्मूलो भवति यद्गृहं मूलं यस्य॥१॥ गृहेषु रतिश्च तत्राभिनिवेशात् स्यात्। स च भागवता
नां न संभवति। इत्याह। न नूनमिति॥२॥ गृहासक्तिर्हि कुटुंबादिस्पृहया भवति सा च तेषां नास्तीत्याह महतामि
ति। उत्तमश्लोकपादयोः छायया कामादिसंतापापहारिण्या निर्वृतं चित्तं येषां तेषां स्पृहायुक्ता मतिर्नास्ति॥३॥ दा

महतां खलु विप्रर्षे उत्तमश्लोकपादयोः॥ छायानिर्वृतचित्तानां न कुटुंबे स्पृहामतिः॥३॥ संश
योऽयं महान् ब्रह्मन् दारागारसुतादिषु॥ सक्तस्य यत्सिद्धिरभूत्कृष्णे च मतिरच्युता॥४॥ ॥
श्रीशुक उवाच॥ ॥ बाढमुक्तं भगवत उत्तमश्लोकस्य श्रीमच्चरणारविंदमकरंदरस आवेशि
तचेतसो भागवतपरमहंसदयितकथां किंचिदंतरायविहतां स्वां शिवतमां पदवीं न प्रायेण हि
न्वंति॥५॥

राद्यासक्तस्य तु मोक्षः श्रीकृष्णेऽस्खलिता मतिश्चाभूदिति यत् अयं च महान् संशय इत्याह। संशय इति॥४॥ अंगी
कृत्य परिहरति। बाढं अभिनिवेशादिकं नास्तीति सत्यमेव। तथापि विघ्नवशेन तेषां प्रवृत्तिः पूर्वाभ्यासबलेन पुन
र्निवृत्तिश्च संगच्छत इत्याह। भगवतः श्रीमच्चरणारविंदमकरंदरूपो यो रसस्तस्मिन्नावेशितं चेतो यैस्ते एकेन चिदंत
रायेण विघ्नेन विहता अपि स्वां शिवतमां पदवीं मार्गं न हि न्वंति। कां तां भागवता एव परमहंसास्तेषां दयितस्य श्रीवासुदे
वस्य कथां न त्यजंति॥५॥

मा॰ पं॰ २

प्रियव्रतस्य ब्रह्मा स्वैवांतरायरूपा बभूवेति स प्रसंगमाह। यर्हीत्यादिना विमुक्तसंगः प्रकृतिं भजस्वेत्यं तेन । य
र्हि वाव ह यदा हि । वा वेति प्रसिद्ध्यादौ हइति च । सः स्वपित्रा मनुना अवनितलपरिपालनायोपामंत्रितो नियुक्तो
नैवाभ्यनंदत नैच्छत् । अथ ह तदैव भगवानादिदेवो ब्रह्मा स्वभवनादवततारेत्यन्वयः । उपामंत्रणे हेतुः आम्नाताः रा
रांशास्त्रेणोक्ताः ये प्रवराः श्रेष्ठा गुणास्तेषां गणस्यैकांतभाजनतया नियताश्रयत्वेन । अनिच्छायां हेतुः । परमार्थ

यर्हि वाव ह राजन्स राजपुत्रः प्रियव्रतः परमभागवतो नारदस्य चरणोपसेवयांजसावगतपरमार्थस
तत्त्वो ब्रह्मसत्रेण दीक्षिष्यमाणोऽवनितलपरिपालनायाऽऽम्नातप्रवरगुणगणैकांतभाजनतया स्वपित्रो
पामंत्रितो भगवति वासुदेव एवाव्यवधानसमाधियोगेन समावेशितसकलकारकक्रियाकलापो नैवा
भ्यनंदद्यद्यपि तदप्र त्याम्नातव्यं तदधिकरण आत्मनोन्यस्माद् सतोपि पराभवमन्वीक्षमाणः॥ ६॥

स तत्त्वं आत्मयाथात्म्यं अवगतं तद्येन स तथा अतः ब्रह्मसत्रेणात्मध्यानेन कार्येण दीक्षिष्यमाणः नियमं ग्रही राम २
ष्यन्। प्रागपि वासुदेव एव निरंतरसमाधियोगेन चित्तैकाग्र्येण समावेशितः समर्पितः सकलकारकाणामिंद्रि
याणां याः क्रियास्तासां कलापो येन सः । यद्यपि तत्पित्रोक्तं न प्रत्याख्येयं तथापि तदधिकरणे राज्याधिकारे अ
सतोपि मिथ्याभूतादपि राज्यप्रपंचादात्मनः पराभवमालोचयन्नाभ्यनंदत् ॥ ६॥

७ अथ ह भगवानादिदेव एतस्य गुणविसर्गस्य परिबृंहणानुध्यानव्यवसितसकलजगदभिप्राय आत्मयोनिरखिलनिगमनिजगणपरिवेष्टितः स्वभवनाद
वततार ॥ ७॥

गुणविसर्गस्य गुणसृष्टेः परिबृंहणं समृद्धिस्तदनुचिंतं यद्व्यवसितः सकलजगतामभिप्रायो येन सः । यथा राज्ञा चा
रैर्मंडलेश्वराणामभिप्रायो निश्चीयते तद्वत् । अखिलैर्निगमैर्मूर्तिमद्भिर्वेदैर्निजगणैश्च मरीच्यादिभिः परिवृतः सत्यलोका
दवतीर्णः ॥ ७॥ स च ब्रह्मा तत्र तत्र उडुपतिश्चंद्र इव प्रकाशमानो गंधमादनस्य द्रोणीं दरीमवकाशं पश्यन्नुपससर्पेत्यन्वयः । अ
मरपरिवृढैर्देवेंद्रादिभिः ॥ ८॥ हंसयानेनोपलक्ष्यमाणेन एनं पितरमुपलभमानः प्रत्यिता यमितिलक्षयन्पिता पुत्राभ्यां
सह नारदः कृतांजलिः सन् सहसैवाभ्यर्च्छा अर्हणेन पूजया सहोपतस्थे तुष्टाव । प्रियव्रतं तदा मंदरद्रोण्यां नारद

तत्र ह वा एनं देवर्षिर्हंसयानेन पितरं भगवंतं हिरण्यगर्भमुपलभमानः सहसैवोत्थायार्हणेन सह पिता
पुत्राभ्यामवहितांजलिरुपतस्थे ॥ ९॥ भगवानपि भारत उपनीतार्हणः सूक्तवाकेनातितरामुदितगुणगणा
वतारसुजयः प्रियव्रतमादिपुरुषस्तं सदयहासावलोक इति होवाच ॥ १०॥ ॥ श्रीभगवानुवाच ॥ ॥ निबोध
तातेदमृतं ब्रवीमि मासूयितुं देवमर्हस्यप्रमेयं । वयं भवस्ते तत एष महर्षिर्वहाम सर्वे विवशा यस्य दिष्टं ॥ ११॥

पदिश्यतिमनु श्वतं नेतुमागतोस्मीति ज्ञातव्यं ॥ ९॥ हे भारत भगवानादिपुरुषो ब्रह्मा पितरं प्रियव्रतमितिहोवाचेत्यन्वयः ॥ ते
न नारदेनोपनीतमर्हणं यस्य सः । सूक्तवाकेन यथोचितवाक्येन अतिशयेन उदिता वर्णिता गुणगणाः अवताराः
सुजयाः सर्वोत्कर्षाश्च यस्य ॥ १०॥ अहं त्वन्निनिषिद्धं महत्कार्यं प्रतिकूलं मत्वा मयस्मूयां करिष्यतीति शंकमानो नाहमेवं
वदामि । किंतु मन्मुखेन हरिरेव त्वामाज्ञापयतीति विदन्नप्रकृतिनिरुपत्विरहस्यमाह । निबोधेति न वत्तिः । ऋतं सत्यं
अप्रमेयं देवं अस्मत्पितुर्हरिमसूयितुं दोषारोपेण द्रष्टुं नार्हसि । ते न वयं ततः तात तत एव त्वं रुद्रश्च महर्षिः दिष्टं आदिष्टं आज्ञां विवशाः [illegible] ॥ ११॥

८ स तत्र तत्र भगवत उडुपतिरिव विमानावलिभिरनुपथममरपरिवृढैरभिपूज्यमानः पथि पथि च वरूथशः सिद्धगंधर्वसाध्यचारणमुनिगणैरुपगीयमानो गंधमा
दनद्रोणीमवभासयन्नुपससर्प ॥ ८॥

भा०पं० ३ नेति। तस्य कृतं तेन निर्मितं तनुभृत् जीवः तपआदिभिर्विहंतुं अन्यथा कर्तुं न विभूयात् प्रभुर्न भवेत्। मनीषया स्वामादिबुद्धिबलेन। परतः बलवदाश्रयात्॥१२॥ तत्र देहयोगे तावत्पारतंत्र्यं प्रसिद्धमित्याह भवायेति। भवो जन्म भवाद्यर्थं अव्यक्तेनेश्वरेण दिष्टं दत्तं देहयोगं जनता जीवसमूहः सदा धत्ते न तु अन्यथा कर्तुं शक्नोति। अंग हे प्रियव्रत॥१३॥ कर्मकरणेऽपि पारतंत्र्यमाह। यद्वाचीति। यस्य वाचि वेदलक्षणायां तंत्यां दाममन्यां गुणाः सत्वादयः त

न तस्य कश्चित्तपसा विद्यया वा न योगवीर्येण मनीषया वा। नैवार्थधर्मैः परतः स्वतो वा कृतं विहंतुं तनुभृद्विभूयात्॥१२॥ भवाय नाशाय च कर्म कर्तुं शोकाय मोहाय सदा भयाय। सुखाय दुःखाय च देहयोगमव्यक्तदिष्टं जनतांग धत्ते॥१३॥ यद्वाचि तंत्यां गुणकर्मदामभिः सुदुस्तरैर्वत्स वयं सुयोजिताः। सर्वे वहामो बलिमीश्वराय प्रोता नसीव द्विपदे चतुष्पदः॥१४॥ ईशाभिसृष्टं ह्यवरुंध्महेऽङ्ग दुःखं सुखं वा गुणकर्मसंगात्। आस्थाय तत्तद्यदयुंक्त नाथश्चक्षुष्मतांधा इव नीयमानाः॥१५॥

त्पूर्वकाणि वश्यानि कर्माणि तन्निबंधनैर्दामभिः ब्राह्मणादिशब्दैः सुदुस्तरैः स्फुटदृढैः हे वत्स वयं सर्वे सुयोजिताः निबद्धाः संतस्तस्मै ईश्वराय बलिं वहामः तदिच्छया कर्म कुर्मः। नसि नासिकायां प्रोताः बद्धाः संतश्चतुष्पदो बलीवर्दाः यथा द्विपदेभ्यः राम ३
ईश्रा ३ पुरुषाय॥१४॥ भोगेषु पारतंत्र्यमाह। ईश्वरेण अभिसृष्टं दत्तमेव अंग प्रियव्रत अवरुंध्म[illegible]हे स्वीकुर्मः। यथा स्वामिना दत्तमेव कणिकादि बलीवर्दाः भक्षयंति न स्वेच्छया तद्वत् न चैवं वैषम्यमीश्वरस्य। यतो गु[illegible]ण कर्मसंगात् नाथो यद्यद्देवतिर्यगादिलक्षणं देहं अयुंक्त योजितवान् तत्तदास्थाय स्वीकृत्य। यथांधाः चक्षुष्मता छा[illegible]यामातपं वा नीयमानाः संतः॥१५

नन्वेतत्सर्वमविदुष एव न त्वात्मविद इत्याशंक्याह मुक्तोऽपीति। यावत्प्रारब्धं कर्म तावत्। यथा स्वप्ने अनुभूतं प्रतियातनिद्रः गतनिद्रः अभिमानशून्य एवानुस्मरति। तर्हि भोगसाधनया पुनर्जन्म भवेत्तत्राह। किंतु देहांतरारंभकान् कर्माणि वासनाश्च न वृंक्ते न संभजते॥१६॥ ननु गृहे वर्तमानस्य भोगान् भुंजानस्य कुतोऽभिमानाभावो मोक्षो वा अतस्तत्त्यागेन वनवास एव युक्तस्तत्राह। भयं संसारः स्यादेव प्रमत्तस्य अजितेंद्रियस्य वनेष्वपि निःसंगक्रियावना

मुक्तोऽपि तावद्बिभृयात्स्वदेहमारब्धमश्नन्नभिमानशून्यः। यथानुभूतं प्रतियातनिद्रः किंत्वन्यदेहाय गुणान्न वृंक्ते॥१६॥ भयं प्रमत्तस्य वनेष्वपि स्याद्यतः स आस्ते सहषट्सपत्नः। जितेंद्रियस्यात्मरतेर्बुधस्य [illegible] गृहाश्रमः किं नु करोत्यवद्यं॥१७॥ यः षट् सपत्नान्विजिगीषमाणो गृहेषु निर्विश्य यतेत पूर्वं। अत्येति दुर्गाश्रित ऊर्जितारीन् क्षीणेषु कामं विचरेद्विपश्चित्॥१८॥

द्वनांतरं गतोऽपीत्यर्थः। स हि षट् सपत्नाः शत्रवो मनोबुद्धींद्रियाणि वयस्यस्य तथाभूत एव वनेष्वपि यत आस्ते। बुधत्वेन जितेंद्रियत्वादात्मरतेरात्मारामस्य अवद्यं रागादिदोषं किं करोति न करोत्येव॥१७॥ ननु गृहे वसतः पुरुषस्य रागादयः संभवंति न तु वन इत्याशंक्याह। य इति। यः षट् वैरिणः षडिंद्रियाणि विजिगीषमाणः स पूर्वं गृहेषु स्थित्वा तेषामत्यंतं निरोधमकुर्वन् जेतुं यतेत। क्षीणेषु रिपुषु कामं गृहेऽन्यत्र वा विचरेत्। यतो लोके ऊर्जितारीन् दुर्गाश्रित एवात्येति जयति। पश्चात् दुर्गे वान्यत्र वा वर्तेत। युध्येतेति पाठे प्रहरेदित्यर्थः॥१८॥

इदं सर्वं दुर्गाश्रयणं ज्ञातानां। त्वं तु अब्जनाभस्यांघ्रिसरोजकोश एव दुर्गं तदाश्रित अत एव निर्जितषट्सपत्न
श्च तथापि पुरुषेणेश्वरेणातिदिष्टान् दत्तान् भोगांस्तावद्भुंक्ष्व पश्चाद्विमुक्तसंगः सन् प्रकृतिं स्वरूपं भजस्व आ
त्मनिष्ठो भवेत्यर्थः॥१९॥ आत्मनः ततोऽलघुतया अल्पतया। तदनुशासनमंगीचकार। यद्वा आत्मनोऽयं तदनुशास
नं तत् अलघुतया गौरवेण बाढं तथा करिष्यामीति अवनतकंधरः सन् जग्राह॥२०॥ मनुना संतुष्टेन उपकल्पि

त्वं त्वब्जनाभांघ्रिसरोजकोशदुर्गाश्रितो निर्जितषट्सपत्नः। भुंक्ष्वेह भोगान्पुरुषातिदिष्टान्विमुक्त
संगः प्रकृतिं भजस्व॥१९॥ ॥श्रीशुक उवाच॥ ॥इति समभिहितो महाभागवतो भगवतस्त्रिभुवन
गुरोरनुशासनमात्मनो लघुतयावनतशिरोधरो बाढमिति सबहुमानमुवाह॥२०॥ भगवानपि म
नुना यथावदुपकल्पितापचितिः प्रियव्रतनारदयोरविषममभिसमीक्षमाणयोरात्मसमवस्थानमवा
ङ्मनसं क्षयमव्यवहृतं प्रवर्तयन्नगमत्॥२१॥

ता पूजा यस्य। प्रियव्रतस्य योगभ्रंशात् नारदस्य च शिष्यनाशात् अकुटिलमीक्ष्यमाणं संजनितं तन्नास्तीत्याह। अवि राम
षमं यथा तथा तयोरभिसमीक्षमाणयोः सतोः आत्मनः सम्यगवस्थानं अवाङ्मनसं गाम्भीर्येन सयोरविषमं क्ष ४
यं निवासं जगाम। पाठांतरे अवाङ्मनसामगोचरं। कथंचिन्मनसः क्षयं विषयं। अव्यः अव्यवहृतं व्यवहारशून्यं स्थ व
लं। निवृत्तं प्रवर्तयन् व्यवहाराद्विषमः सन् व्यवहारातीतं स्वरूपं चिंतयन् अंतर्हित इत्यर्थः॥२१॥

पुत्रं राज्येऽभिषिच्य वनं यास्यामीत्येवं यो मनोरथः सः परेण ब्रह्मणैव प्रतिसंधितः संपादितो यस्य सः। नारदस्यानुम
तेन राज्ये स्थापयित्वा। अतिविषमो दुस्तरो यो विषयविषजलाशयो गृहं तस्य आशा आदिकृष्णदृष्टिवासना भोगेच्छा वा
तस्या उपरतो हृत॥२२॥ यत्स्पृष्टं गृहे कथमरमत तत्रोक्तं मुक्तत्वमुपसंहरति इति ह वाव इत्थमेव हि। अधिनिवेशितः आ
पितः कर्माधिकारो यस्य। अखिलस्य जगतो बंधध्वंसनः परोऽनुभावो यस्य तस्य यदंघ्रियुगलं तस्यानवरतं ध्या

मनुरपि परेणैवं प्रतिसंधितमनोरथः सुरर्षिवरानुमतेनात्मजमखिलधरामंडलस्थितिगुप्तय आस्था
प्य स्वयमतिविषमविषयविषजलाशयाशाया उपरराम॥२२॥ इति ह वाव स जगतीपतिरीश्वरेच्छयाधि
निवेशितकर्माधिकारोऽखिलजगद्बंधध्वंसनपरानुभावस्य भगवत आदिपुरुषस्यांघ्रियुगलानवर
तध्यानानुभावेन परिरंधितकषायाशयोऽवदातोऽपि मानवर्धनो महतां महीतलमनुशशास॥२३॥ अ
थ च दुहितरं प्रजापतेर्विश्वकर्मण उपयेमे बर्हिष्मतीं नाम। तस्यामु ह वाव आत्मजानात्मसमानशीलगुणक
र्मरूपवीर्योदारान् दश भावयांबभूव कन्यां च यवीयसीमूर्जस्वतीं नाम॥२४॥

नं तदनुभावेन परिरंधितकषायो दग्धरागादिमल आशयो यस्य अतः अवदातः शुद्धोऽपि महतां ब्रह्मादीनामाज्ञा
पालनेन मानवर्धनः॥२३॥ उ इति विस्मये। ह इति प्रसिद्धौ। वाव इति निश्चये। आत्मनः समानैः शीलादिभिरुदारान् म
हतो दश पुत्रान् जनयामास॥२४॥

तानाह। आग्नीध्रः। इध्मजिह्वः। यज्ञबाहुः। महावीरः। हिरण्यरेताः। घृतपृष्ठः। सवनः। मेधातिथिः। वीतिहोत्रः। कवि-
श्चेति। अग्नीनां नामानि येषां ते ॥२५॥ अर्भभावात् बाल्यादारभ्य ॥२६॥ तस्मिन् पारमहंस्याश्रमे श्रीमच्चरणार-

आग्नीध्रेध्मजिह्वयज्ञबाहुमहावीरहिरण्यरेतोघृतपृष्ठसवनमेधातिथिवीतिहोत्रकवय इति सर्व एवा-
ग्निनामानः ॥२५॥ एतेषां कविर्महावीरः सवन इति त्रय आसन्नूर्ध्वरेतसस्त आत्मविद्यायामर्भभा-
वादारभ्य कृतपरिचयाः पारमहंस्यमेवाश्रममभजन् ॥२६॥ तस्मिन्नु ह वा उपशमशीलाः परमर्षयः स-
कलजीवनिकायावासस्य भगवतो वासुदेवस्य भीतानां शरणभूतस्य श्रीमच्चरणारविन्दाविरतस्मर-
णाविगलितपरमभक्तियोगानुभावेन परिभावितान्तर्हृदयाधिगते भगवति सर्वेषां भूतानामात्मभू-
ते प्रत्यगात्मन्येवात्मनस्तादात्म्यमविशेषेण समीयुः ॥२७॥ अन्यस्यामपि जायायां त्रयः पुत्रा आ-
सन्नुत्तमस्तामसो रैवत इति मन्वन्तराधिपतयः ॥२८॥ राम ५

विंदयोरविरतस्मरणेनाविगलितः अखंडितो यः परमो भक्तियोगस्तस्यानुभावेन विशोधितांतःकरणेऽप्र-
तीतो यो भगवांस्तस्मिन्नात्मनः त्वंपदार्थस्य तादात्म्यं अविशेषेण विशेषो देहाद्युपाधिस्तद्रहितं आपुः।
॥२८॥

उपशमायनेषु सत्सु। जातकोटिभिरेकमर्बुदं एतादृशानि वर्षाणामेकादशार्बुदानि जगतीं बुभुजे इत्यन्वयः।
राज्ञो धर्मपालनविषये भोगप्रभावे कर्तव्यं। तत्र नानायासेनैव धर्मपालनमाह। अव्याहता अखिलाः पुरुषकाराः
पौरुषाणि यस्मात् तेन सारेण बलेन संभृतौ पूर्णौ दोर्दण्डौ तयोर्युगलं तेनापीडित आकृष्टो मौर्वीगुणस्तस्य स्त-

एवमुपशमायनेषु स्वतनयेष्वथ जगतीपतिर्जगतीमर्बुदान्येकादश परिवत्सराणामव्याहताखिल-
पुरुषकारसारसंभृतदोर्दण्डयुगलापीडितमौर्वीगुणस्तनितविरमितधर्मप्रतिपक्षो बर्हिष्मत्या-
श्चानुदिनमेधमानप्रमोदप्रसरणयौषिण्यव्रीडाप्रमुषितहासावलोकरुचिरक्ष्वेल्यादिभिः पराभू-
यमानविवेक इवानवबुध्यमान इव महामना बुभुजे ॥२९॥

नितं टंकारस्तेनैव युद्धं विना विरमिता निरस्ता धर्मप्रतिपक्षा येन। भोगातिशयमाह। बर्हिष्मत्याः स्वभा-
र्यायाः अनुदिनमेधमानैः प्रमोदादिभिः पराभूयमानविवेक इव अत एव विषयासक्त्या आत्मानमनवबु-
ध्यमान इव बुभुजे। तत्र प्रमोदः पतिं दृष्ट्वा हर्षः ततः प्रसरणमभ्युत्थानादिलीला। ततो यौषिण्यं योषित्स्वभावः शृं-
गारानुभावप्रकाशनं। ततो व्रीडया प्रमुषिताः संकोचिताः हासावलोकाः। ततो रुचिरक्ष्वेल्यादयः परिहा-
सवाक्यादीनि तैः ॥२९॥

प्रभावातिशयमाह। यावद्वसुधातलं च लोकालोकपर्यंतमवभासयति मेरुं प्रदक्षिणीकुर्वन्नादित्यः तस्मिन्न
र्द्धे नैवोपलक्षितं प्रतपति। अर्द्धेन वा वच्छादयति तमसा आवृणोति। तदा द्वितीयः पतंगः सूर्य इव पर्यक्रामत्। नव
द्रमसंभावितं। यतो भगवदुपासनेनोपचितः अतिपुरुषः पुरुषानतिक्रांतः प्रभावो यस्य॥ ३०॥ ये वै उह अ

यावदवभासयति सुरगिरिमनुपरिक्रामन्भगवानादित्यो वसुधातलमर्द्धेनैव प्रतपत्यर्द्धेनाव
च्छादयति तदा हि भगवदुपासनोपचितातिपुरुषप्रभावस्तदनभिनंदन्समजवेन रथेन ज्योतिर्मये
नज्योतिर्मयेन रजनीमपि दिनं करिष्यामीति सप्तकृत्वस्तरणिमनुपर्यक्रामत् द्वितीय इव पतंगः
३०॥ ये वा उह तद्रथचरणनेमिकृतपरिखातास्ते सप्त सिंधव आसन्। यत एव कृताः सप्त भुवो द्वीपाः
जंबूप्लक्षशाल्मलिकुशक्रौंचशाकपुष्करसंज्ञाः। तेषां परिमाणं पूर्वस्मात्पूर्वस्मा[illegible] उत्तरोत्तरो यथासंख्यं द्विगुणमानेन॥ ३१॥
बहिः समंततः उपक्लृप्ताः॥ ३२

तिप्रसिद्धास्तस्य रथचक्राग्रकृताः परिखा ता गर्ताः। यतः यैः कृतास्ते॥ ३१॥ तानाह। तेषां परिमाणं भ्रूणवि राम
तिप्रसिद्धास्तस्य रथचक्राग्रकृताः परिखा ता गर्ताः। यतः यैः कृतास्ते॥ ३१॥ तानाह। तेषां परिमाणं भ्रूणवि राम
तिन्नोषः। पूर्वस्य यद्विस्तारमानं उत्तरस्ततो द्विगुणेन विस्तारमानेनेत्येवं सिंधुभ्यो बहिः समंतत उपक्लृप्ता रचि ६
ता॥ ३१॥

यथा सिंधुभ्यो बहिरेकैकशो द्वीपाः एवं द्वीपानामपि बहिः सिंधव इत्याह। क्षारोदेति। दधिमंडो मथितं दधि। एते
सप्त जलधयः सप्तद्वीपानां परिखा इवाभ्यंतरे तैः संवेष्टिता ये द्वीपाः तैः समाना विस्तारतः बहिर्बहिर्नीताः पृथक्
असंकीर्णतया॥ ३२॥ अहो आश्चर्यं राज्ञः सामर्थ्यमिति परीक्षिदृतिआयज्ञो भगवान्बादरायणिराह नेवमिति

क्षारोदेक्षुरसोदसुरोदघृतोदक्षीरोदधिमंडोदशुद्धोदाः सप्त जलधयः सप्तद्वीपपरिखा इवाभ्यंतरद्वीप
समाना एकैकश्येन यथानुपूर्वं सप्तस्वपि बहिर्द्वीपेषु पृथक्परित उपकल्पितास्तेषु जंबादिषु बर्हिष्मतीपति
रनुव्रतानात्मजानाग्नीध्रेध्मजिह्वयज्ञबाहुहिरण्यरेतोघृतपृष्ठमेधातिथिवीतिहोत्रसंज्ञान्यथासंख्ये
नैकैकस्मिन्नेकमेवाधिपतिं विदधे॥ ३२॥ दुहितरं चोर्जस्वतीं नामोशनसे प्रायच्छद्यस्यामासीद्देवया
नी नाम काव्यसुता॥ ३३॥ नैवंविधः पुरुषकार उरुक्रमस्य पुंसां तदंघ्रिरजसा जितषड्गुणानां। चित्रं विदूर
विगतः सकृदाददीत यन्नामधेयमधुना स जहाति बंधं॥ ३४॥

जिताः षड्गुणा इंद्रियाणि षडूर्मयो वा यैः तेषामेवंविधः पुरुषकार इति न चित्रं नासंभावितं। यतो विदूरविगतः अं
त्यजोऽपि यस्योरुक्रमस्य नाम सकृदुच्चारयेद्यः सत्त्रधनात्तत्क्षणमेव बंधं संसारं। तत्त्वमिति पाठेऽप्ययमेवार्थः। पा
गं नरेतत्वं चंडालत्वं जहाति भुक्तो भवतीत्यर्थः॥ ३४॥

तस्यपराक्रममुपसंहरन्निवृत्तिक्रममाह।सएवमिति।देवर्षिचरणयोरनुशयनमुपसत्तिः।तदनुपतितोयोगुण
विसर्गोराज्यादिप्रपंचःतत्संसर्गेण।[illegible]त्मनिमनसिनिर्वेदोयस्य॥३५॥तमाहमया असाध्वनुष्ठितं।यद्य
तोभिनिवेशितःतत्तस्मादलमलंविषयैः।विनोदमृगंमर्कटं॥३६॥परदेवतायाःहरेःप्रसादेनाधिगतःआत्मीय

सएवमपरिमितबलपराक्रमएकदातुदेवर्षिचरणानुशयनानुपतितगुणविसर्गसंसर्गेणानिर्वृत
मिवात्मानंमन्यमानआत्मनिर्वेदइदमाह॥३५॥अहोअसाध्वनुष्ठितं।यदभिनिवेशितोहमिंद्रियैरवि
द्यारचितविषमविषयांधकूपेतदलमलममुष्यावनितायाविनोदमृगंमांधिग्धिगितिगर्हयांचकार॥३६॥
परदेवताप्रसादाधिगतात्मप्रत्यवमर्शेनानुप्रवृत्तेभ्यःपुत्रेभ्यइमांयथादायंविभज्यभुक्तभोगांचमहिषीं
मृतकमिवसहमहाविभूतिमपहायस्वयंनिहितनिर्वेदोहृदिगृहीतहरिविहारानुभावोभगवतोनार
दस्यपदवींपुनरेवानुससार॥३७॥

आत्मप्रत्यवमर्शोविवेकस्तेननारदस्यपदवींतदुपदिष्टमार्गमेवपुनरनुससारेत्यन्वयः।किंकृत्वा।अनुगतेभ्यः रामु ७
पुत्रेभ्यइमांपृथिवींविभज्य।भुक्तोभोगोयस्याःतां।महाविभूतिसाम्राज्यसंपत्तत्सहितांमहिषींमृतशरीरमि
वपरित्यज्य।तत्रहेतुः।हृदिनिहितोनिर्वेदोयेन।हरीत्यस्योत्तरत्राप्यन्वयः।हृदिगृहीतोनिश्चितोहरिविहारस्तेन
नुभावस्त्यागसामर्थ्यंयस्य॥३७॥

तस्यमहिमोपनिबंधनश्लोकाः।पूर्व[illegible]सिद्धाःकथ्यंते।यथावेदेनदृष्टएषश्लोकोभवतीति।कोनुकोना
मकुर्यात्।छायांघ्नन्तमोनिरस्यन्॥३८॥भूसंस्थानंद्वीपैःकृतं।सरिद्गिरिवनादिभिःसीमाचयेनकृता।भू

तस्यहवाएतेश्लोकाः।प्रियव्रतकृतंकर्मकोनुकुर्याद्विनेश्वरं।योनेमिनिम्नैरकरोत्
छायांघ्नन्सप्तवारिधीन्॥३८॥भूसंस्थानंकृतंयेनसरिद्गिरिवनादिभिः॥सीमा
चभूतनिर्वृत्यैद्वीपेद्वीपेविभागशः॥३९॥

संस्थानंद्वीपैःकृतं।सरिद्गिरिवनादिभिः।सीमाचयेनकृता।भूतानांनिर्वृत्यैसुखायअविवादाय
३९॥

त्रोमं पातालजं। दिव्यं। स्वर्गजं। मानुषं मर्त्यलोकजं। महित्वं वैत्रबं। यो निरयतुल्यं मेने। पुरुषानुजनाः विष्णुजनास्त एव प्रियाय स्येति ॥४०॥ ॥इति पंचमे प्रथमः॥ ॥द्वितीये त्वाग्नीध्रं चरित्रं स्त्रैणसंमतं॥ पत्न्यां हि
पूर्वचित्त्यां योनाम्नि सुरव्या नज्ञीजनत्॥१। अस्मिन्वंशे प्रसिद्धो यमाग्नीध्रः स्त्रैणपुंगवः। विहसन्निव तस्येदं च

त्रोमं दिव्यं मानुषं च महित्वं कर्मयोगजं। यश्चक्रे निरयोपम्यं पुरुषानुजनप्रियः॥४०॥ ॥ इति श्री
भागवते महापुराणे पंचमस्कंधे नुवनकोशे प्रियव्रतविजये प्रथमोध्यायः॥ ॥श्रीशुक उवाच॥ ५
एवं पितरि संप्रवृत्ते तदनुशासने वर्त्तमान आग्नीध्रो जंबूद्वीपौकसः प्रजा औरसवद्धर्मावेक्षमाणः पर्यगोपाय
त॥१॥ स च कदाचित्पितृलोककामः सुरवरवनिताक्रीडाचलद्रोण्यां भगवंतं विश्वसृजां पतिमाभृत
परिचर्योपकरण आत्मैकाग्र्येण तपस्वी आराधयांबभूव॥२॥ तदुपलभ्य भगवान् आदिपुरुषः सदसि गा
यंतीं पूर्वचित्तिं नामाप्सरसमभियापयामास॥३॥

रितं मुनिरब्रवीत्॥२॥ जंबूद्वीपमोको यासां ता: प्रजाः पुत्रत्पालयामास। धर्मावेक्षमाणः धर्ममवेक्षमाण इत्य श्रीराम ८
र्थः॥१॥ पितृलोककामः पुत्रकामः। सुरवराणां वनितास्ता सामा क्रीडाचलो मंदरः तस्य द्रोण्यां। आभृतानि संपादि
तानि परिचर्योपकरणानि पुष्पादीनि येन॥२॥ तदुपलभ्य ज्ञात्वा। ब्रह्मा अभियापयामास संप्रेषयामा
गा॰ स॥३॥

सा च तदाश्रमोपवनमुपबभ्रामेत्यन्वयः। रमणीयत्वमेवाह। विविधाश्च निबिडाश्च ये विटपिनस्तेषां विटपाः तेषां नि
कराः तैः संश्लिष्टाः पुरटलताः सुवर्णवल्यः तास्वारूढाः स्थलविहंगाः मयूरादयस्तेषां मिथुनैः प्रोच्यमानाभिः श्रुति
भिः उच्चार्यमाणैः षड्जादिस्वरैः प्रतिबोध्यमाना ये सलिलकुक्कुटादयस्तैर्विचित्रं यथा तथोपकूजितानादितास्त्र

सा च तदाश्रमोपवनमतिरमणीयं विविधनिबिडविटपिविटपनिकरसंश्लिष्टपुरटलतारूढस्थलविहं
गममिथुनैः प्रोच्यमानश्रुतिभिः प्रबोध्यमानसलिलकुक्कुटकारंडवकलहंसादिभिर्विचित्रमुपकूजिता
मलजलाशयकमलाकरमुपबभ्राम ४ तस्याः सुललितगमनपदविन्यासगतिविलासायाश्चानुपदं
खणखणायमानरुचिरचरणाभरणस्वनमुपाकर्ण्य नरदेवकुमारः समाधियोगेनामीलितनयनन
लिनमुकुलयुगलमीषद्विकचय्य व्यचष्ट ५

मलाजलाशयास्तेषु कमलानि तेषामाकरमुपवनं ४ सुललिते गमने ये पदविन्यासास्तैर्गतो विलासो यस्याः
तस्या अनुपदं खणखणायमानं रुचिरचरणाभरणस्य स्वनं। आमीलिते नयने ए
वकारस्तस्याश्चेत्येकवाक्यत्वाय। खणखणेति ध्वनिं कुर्वतो रुचिरस्य चरणाभरणस्य स्वनं। आमीलिते नयने ए
वनलिनमुकुले तयोः युगलमीषद्विकचय्य किंचिदुन्मील्य व्यचष्ट ददर्श ५ श्रीवासुदेवाय नमः

तामेवदेवीमकरध्वजस्यवशमुपनीतः सजडवदितिहवक्ष्यमाणान् दशश्लोकानुवाच। जाड्यानुकरणंस्ववेदग्ध्ये
नतद्वशीकारार्थंदिविजानांदेवानांमनुजानांपानिमनांसितनयनानित्वत्तेषामाह्लादादुच्चैर्गत्यादिभिर्नयणांमन
सिकामस्यविवरंप्रवेशद्वारंविदधत्तीगतिश्चविहारश्चक्रीडाविनययुक्तोऽवलोकश्चसुस्वराण्यक्षराणिचश्रव
यवाश्चनेत्रादयस्तैः ६ निजमुखाद्विगलितममृतमिवस्वादुआसवद्रवमादकंपत्सहासंभाषणंवा। तस्मिन्आ

तामेवाविद्दूरेमधुकरीमिवसुमनसउपजिघ्रत्ती दिविजमनुजमनोनयनाह्लादादुच्चैर्गतिर्विहारविनया
वलोकसुस्वराक्षरावयवैर्मनसिन् णांकुसुमायुधस्याविदधत्ती विवरं ६ निजमुखविगलितामृतासव
सहासभाषणामोदमदांधमधुकरनिकरोपरोधेनद्रुतपदविन्यासेनवल्गुस्पंदनमन्नकलशकबरभा
ररशनांदेवीं तल्लब्धावलोकनेनविद्दृताश्रवरस्यभगवत्तोमकरध्वजस्यवशमुपनीतोजडवदितिहोवाच ७
कात्वंविकीर्षसिचकिंमुनिवर्यशैलेमायाऽसिकाऽपिभगवत्परदेवतायाः विज्येबिभर्षिधनुषीसुहृदात्मनो
र्थेकिंवामृगान्मृगयसेविपिनेप्रमत्तान् ८
मोदोनिश्वासगंधः तेनमदांधायेमधुकरानिकराः तैरुपरोधआवरणंत्तेनभयात्द्रुतः शीघ्रः यः पदन्यासस्तेनवल्गु
स्पंदनंकिंचिच्चलनंस्तनयोःकबरभाररशनायांयस्याः तां। तस्याअवलोकनेनविद्दृतावरस्यदत्तावकाशस्य ७ का
त्वंशैलेगिरावस्मिन्किंविकीर्षसि। मुनिवर्येत्यादिपुंस्त्वेनसंबोधनादिजाड्यानुकारार्थं। नूनंभगवतः परदेव
ताभूतस्यमायासि। भ्रुवावालक्ष्याह। हेसुहृत्सखेविज्येनिर्गुणेधनुषीबिभर्षि। किमात्मनोर्थेतवैवाभ्यां। किंका
र्यमाह्। किंवाप्रमत्तान्अजितेंद्रियान्मृगतुल्यानस्मदादीन्मृगयसेतान्वशीकर्तुंधनुषीधारयसीत्यर्थः ८

कटाक्षावालक्ष्याह। बाणाविमौ। शतपत्रेनेत्रकमलेतेएवपत्राणिपिच्छानिययोः शांतोविभ्रमेणमंथरौपुंखाभ्यां
विनापिरुचिरौ। एवंतयाकल्पितनेत्राभ्यांपरभागस्यपुंखस्थानीयस्याभावात्। अतितिग्मौतीक्ष्णौदंतौअग्रभा
गौययोः तौकस्मैप्रयोक्तुमिच्छसीतिनविद्मः। अतोभयादेतावत्प्रार्थयामहे। तवायंविक्रमोऽस्माकंक्षेमायास्त्व
॥९॥ तदंगपरिमललोभेनानुगच्छतोभ्रमरानालक्ष्याह। शिष्याइत्ति। अजस्रंसंततं। पुष्पाच्छिखातोविलुलिताविग
लिताः सुमनसामभितोवृष्टीः गलितानिकुसुमानिभजंतीत्यर्थः। शुद्धत्वेनोपमावेदशाखाइवेति १० नूपु

बाणाविमौभगवतः शतपत्रपत्रौशांतावपुंखरुचिरावतितिग्मदंतौ कस्मैयुयुंक्षसिवनेविचरन्नविद्मः क्षेमा
यनोजडधियांतवविक्रमोस्तु ९ शिष्याइमेभगवतः परितः पठंतिगायंतिसामसरहस्यमजस्रमीशं पुष्प
च्छिखाविलुलिताः सुमनोभिवृष्टीः सर्वेभजंत्यृषिगणाइववेदशाखाः १० वाचंपरंचरणपंजरतित्तिरी
णांब्रह्मन्नरूपमुखरांशृणवामतुभ्यं लब्धाकदंबरुचिरंकविटंकबिंबेयस्यामलातपरिधिः क्वचवल्कलंते ११
रस्वनमाकर्ण्याहवाचमिति। तुभ्यंतवचरणगतपंजरयोः नूपुरयोःतित्तिराणांअंतर्गततराणां
परंकेवलंवाचंशृणुमः। कथंभूतांअरूपांअदृष्टवत्तृकांमुखरांअतिनवप्रकटांतांचतांवा। पीतंपरिधानव
स्त्रंनितंबकांतित्वेनप्रकल्प्याह। कदंबकुसुमस्यरुविदीप्तिः अंकविटंकबिंबेनितंबस्यमुदरमंडलेकलब्धा। पाठां
तरेअंगेतिसंबोधनं। मेखलामालक्ष्याह। यस्यामलातपरिधिः वर्त्तते। वस्त्रंनितंबकांतित्वेनप्रकल्प्यवस्त्रम
दृष्ट्वैवपृच्छति। क्वचतेवल्कलमिति ११

स्तनावालक्ष्या हाऽष्टंगयोस्तनयोः किंसंभृतं पूर्णमस्तिमनोहरं किंचिदस्तीत्येतावदनुजानामि । यतोमध्येकृशोऽपि
कृच्छ्रेणवहसि । यत्रवमेदृशीः दृष्टिःश्रितासंलग्नास्ति अन्यथेदंद्वयं नघटतइति भावः स्तनगतंकुंकुममालक्ष्या
हा पंकोऽरुणआत्मनस्त्वविषाणेस्तनेईदृकुअत्यपूर्वः । कुतइत्यतआह पेनपंकेन १२ लोकंस्थानं । यत्रत्योजन
नतुरसाइत्थमस्त्वावयवो बिभर्तिमनसउन्नयनोक्षोभको । पाठांतरेइत्थंभूतलक्षणेतृतीया । वक्त्रेनवबकुइतं
बिभर्तिकिंतदाह । रसोमधुरालापःरासोविलासस्ताभ्यांसहितासुधाअधरामृतं । आदिशब्दात्स्मितनर्मादि १३

किंसंभृतंरुचिरयोर्द्विजशृंगयोस्ते मध्येकृशोवहसियत्रदृशिःश्रितामे पंकोरुणःसुरभिरात्मविषाणईदृ
कयेनाश्रमंसुभगमेसुरभीकरोषि १२ लोकंप्रदर्शयसुहृत्तमतावकंमेयत्रत्यइत्थमुरसावयवावपूर्वौ
अस्मद्विधस्यमनउन्नयनौबिभर्तिबक्कुइतं सरसरासंसुधादिवक्त्रे १३ कावात्मवृत्तिरदनाद्धविरंगवा
ति विष्णोःकलाऽस्यनिमिषोन्मकरौचकर्णौ उद्विग्नमीनयुगलंद्विजपंक्तिशोचिरासन्नभृंगनिकरंसरइ
न्मुखंते १४

कावात्वलोकेआत्मनोदेहस्यवृत्तिःआहारःअंगहेसखेअदनाद्धर्वणान्नहविरितितत्संबंधी
गंधोवातिआगच्छतिइतितांबूलाभिप्रायं । अदनाद्धहिरंगभातीतिपाठेममतावद्भोजनाद्बहिर्भूतैवदृत्तिर्भाती
त्यर्थः । यतस्त्वंविष्णोःकलासि[illegible]स्तुस्थनाम्नाति । अनश्नन्नन्योअभिचाकशीतिश्रुतेः । विष्णोःकलासीत्यत्रहेतुः
तववकर्णौविष्णोरिवानिमिषोन्मकरौअनिमिषोरत्ननेत्रत्वेननिमेषशून्यो । उद्धसंतोमकरौकुंडलेययोःतौ ।
किंचतवमुखंसद्वरइव सरइवातदेवाह । उद्विग्नंचंचलंमीनयुगलमिवनेत्रद्वयंयस्मिन् । द्विजाः दंताःतेषांपं
क्तयाशोचिःशोभायस्मिन् । सरसितुद्विजाहंसाःआसन्नोभृंगनिकरएवकेशस्तोमःपरिमललुब्धभृंगस्तोमोवा

पतंगःकंदुकःभ्रमतःभ्रमाच्चिन्नस्यमेअक्षिणीएजयतेचंचलतांनयति । वक्रकेशसमूहंमुक्तबंधनंनस्मरसिनसंभाल
यसि किं । कष्टःधूर्तोनीवींहरतिएतच्चनस्मरसिकिं १५ उपलब्धंप्राप्तं । मह्यंहेममामित्रमयासहतपश्चर्तुमर्हसि ।
किंवा । सर्वभवभावनःसंहृतिविस्तारकोब्रह्मामेप्रसीदतितत्वांभार्यांकल्पयतीत्यर्थः १६ द्विजदेवेनब्रह्मणादत्तांद्द

योसौत्वयाकरसरोरुहतःपतंगो दिक्षुभ्रमन्भ्रमतएजयतेऽक्षिणीमे मुक्तंनतेस्मरसिवक्रजटावरूथंकष्टोनि
लोहरतिलंपटएषनीवीम् १५ इत्थंतपोधनतपश्चरतांतपोघ्नं ह्येतन्नुकेनतपसाभवतोपलब्धं कर्तुंतपोई
सिमयासहमित्रमह्यंकिंवाप्रसीदतिसवैभवभावनोमे १६ नत्वांत्यजामिदयितंद्विजदेवदत्तंयस्मिन्मनो
दृगपिनोनवियातिलग्नं मांचारुशृंगयसिहसिनेतुमनुव्रतंतेचित्तंयतःप्रतिसरंतुशिवाःसचिव्यः १७
श्रीशुकउवाच इतिललनानुनयातिविशारदोग्राम्यवैदग्ध्ययापरिभाषयातांविबुधवधूंविबुधमतिरा
धिसभाजयामास १८

कामनश्चलग्नंसतन्नापयाति । हेचारुशृंगियतस्तेचित्तंमांत्वदधीनंनेतुमर्हसि । सचिव्यस्तवसख्योऽपिशिवाअनुकूलाः
सत्यःमांप्रतिसरंतुअनुवर्ततां । यद्वाएतावत्पर्यंतंमेयाःसचिव्यःसख्यश्चशिवाःप्रियाःताःप्रतिसरंतुनिवर्ततु । य
द्वावनवासेसहचर्योहरिण्यःशिवाःप्रतिसरंतुप्रदक्षिणंगच्छंतु १७ ग्राम्येषुवैदग्ध्यंयस्याःबुध्यादीनांद्वंद्वैक्यं १८
फै२०सभजयामासपूजयामास १७।

स्रुत्वा प्रस्रस्पउपतस्थे अभजत् २१ आत्पत्तिके नैवस्वभावेनासंहननं दृढांगत्वं २२ कामानां भोगैः अधि अधिकंमन्य
मानः श्रुतिभिर्वेदोक्तैः कर्मभिः अवारुंधप्राप। मादयंतेमोदंते २३ इति एवंभूताः संज्ञायासांताः परिणीतवंतः २४

सा वत्तत्तस्यवीरयूथपतेर्बुद्धिशीलरूपवयःश्रियोदार्येणपराक्षिप्तमनाम्नेनसहायुतायुतपरिवत्सरोपलक्ष
णंकालंजंबुद्वीपपतिनाभौमस्वर्गभोगानूबुभुजे १९ तस्यामुहवाआत्मजानूसराजवरआग्नीध्रोनाभिकिं
पुरुषहरिवर्षेलावृत्तरम्यकहिरण्मयकुरुभद्राश्वकेतुमालसंज्ञान्नवपुत्रानजनयत् २० सासूत्वाथसुता
न्नवानुवत्सरंगृहएवापहायपूर्वचित्तिर्भूयएवाजंदेवमुपतस्थे २१ आग्नीध्रसुतास्ते मातुरनुग्रहादौत्पत्ति
केनैवसंहननबलोपेताः पित्राविभक्ताआत्मतुल्यनामानियथाभागंजंबूद्वीपवर्षाणिबुभुजुः २२ आग्नी
ध्रोराजाऽतृप्तः कामानामप्सरसमेवानुदिनमधिमन्यमानस्तस्याः सलोकतांश्रुतिभिरवारुंधयत्रपितरो राम
मादयंते २३ संपरेते पितरि नवभ्रातरो मेरुदुहितॄर्मेरुदेवीप्रतिरूपामुग्रदंष्ट्रीलतांरम्यांश्यामांनारीभ ११
द्रांदेववीतिसंज्ञानवोदवहन् २४ इतिश्रीभागवतेमहापुराणेपंचमस्कंधेआग्नीध्रवर्णनोनामद्वितीयोऽ
ध्यायः शुकउवाच नाभिरपत्यकामोऽप्रजयामेरुदेव्याभगवंतंयज्ञपुरुषमवहितात्माऽयजत्
१

इतिपंचमेद्वितीयोध्यायः तृतीयेचरितंनाभेः परमंगलमीर्यते॥यस्ययज्ञेप्रतीतस्यपुत्रोभूदृषभोहरिः॥ नाभिरा
ग्नीध्रसुतः। अपुत्रयादेव्याः मेरुदेव्याभार्ययासह १ श्रीवासुदेवायनमः श्रीगोपालोजयति श्रीराम

प्रवर्ग्यसंज्ञकेषुकर्मसुक्रियमाणेषुद्रव्यादयः। सप्तयेयोगाः उपायाः तेषामुपपत्त्यासंपत्त्या दुरधिगमोदुःप्रापोपिभा
गवतेषुकृपालुतयासुप्रतीकः शोभनावयवः सन् आत्मानमाविश्चकार। अपराजितंस्वतंत्रं। निजभक्तानांयेऽभि
प्रेतार्थास्तेषांविधित्सयागृहीतमाकृष्टंहृदयंचित्तंयस्याहृदयंगमंसुखकरं। यतःमनोनयनानांआनंदयतियेऽवय

तस्यहवावश्रद्धयाविशुद्धभावेनयजतः प्रवर्ग्येषुप्रचरत्सुद्रव्यदेशकालमंत्रर्त्विग्दक्षिणाविधानयोगोपप
त्त्यादुरधिगमोपिभगवान्भागवतवात्सल्यतयासुप्रतीकआत्मानमपराजितंनिजजनाभिप्रेतार्थविधि
त्सयागृहीतहृदयोहृदयंगमंमनोनयनानंदनावयवाभिराममाविश्चकार २ अथहतमाविष्कृतभुज
युगलद्वयंहिरण्मयंपुरुषविशेषंकपिशकौशेयांबरधरमुरसिविलसच्छ्रीवत्सललामंदरवरवनरुह
वनमालाच्छूर्यमृतमणिगदादिभिरुपलक्षितम् ३

वासैरभिराममंसुंदरं २ अथहेत्यादिनिपातबाहुल्यंवाक्यालंकारायः। आविःकृतंभुजानांयुगलद्वयंचतुष्टयंये
नाहिरण्मयंतेजोमयं। पुरुषेषुविशिष्यतइतितथापुरुषोत्तममित्यर्थः। अर्हणेनार्घ्येणसहोपतस्थुः अभजन्
इत्यन्वयः। विलसत्श्रीवत्सएवललामचिह्नंयस्य। दरवरःशंखः वनरुहंपद्मं। अच्छूरिचक्रंअमृतमणिःकौस्तु
भः। एवमादिभिःउपलक्षितम् ३

भा० पं० १२ स्फुटकिरणाये प्रवरा मणयः तन्मयानि यानि मुकुटादीन्यंगानां भूषणानि तैर्विभूषितं। बद्धमाने दृष्टांतः अधनाद्
वीत्तमं धनं निधिं ४ अर्हसीत्यादिना निगदेनक्त वंति। हे अर्हत्तम परिपूर्णोपि त्वमनुपथानां भृत्यानामस्माकमर्ह
णां मुद्ः स्वयमेव स्वीकर्तुमर्हसि। न तु वयं स्तोतुं शक्ताद्वृत्याद्ः। नमो नमइत्येतदेवास्माकं साद्धिरूपाशिक्षितं त्वद्
पस्य दुर्ज्ञेयत्वात्। तदेवाद्ः। कोर्हतीति। प्रकृतिगुणानां व्यतिकरः प्रपंचस्तस्मिन्नेवमतिर्यस्य अत एवानीशः प्रकृ

स्फुटकिरणप्रवरमणिमयमुकुटकुंडलकटककटिसूत्रहारकेयूरनूपुराद्यंगभूषणविभूषणमत्विकुसद
स्य गृहपतयोऽधनाद्वीत्तमधनमुपलभ्य सबद्धमानमर्हणेनावनतशीर्षाण उपतस्थुः ४ अर्हसि मु
द्ः अर्हत्तमार्हणमस्माकमनुपथानां नमो नमइत्येतावत्सदुपशिक्षितं। कोर्हतिपुमान् प्रकृतिगुणव्यति
करमतिरनीशईश्वरस्य परस्य प्रकृतिपुरुषयोरर्वाक्तनाभिर्नामरूपाकृतिभीरूपनिरूपणं ५ सकलज राम १२
ननिकायवृजिननिरसनशिवतमप्रवरगुणगणैकदेशकथनादृते ६

तिपुरुषयोः परस्य अत एवेश्वरस्य अर्वाक्तनाभिस्तामसष्टशंतीभिः प्रपंचांतर्गताभिः नाम च रूपं च आकृतिश्च आ
कारस्ताभिस्तु वस्वरूपनिरूपणं कर्तुं को नाम पुमानर्हति ५ सद्योतन्मात्रमेवार्हतीनाधिकमित्याद्ः। सकलज
ननिकायस्य वृजिनं निरस्यतीति तथा शिवतमाः प्रवराश्च ये गुणगणाः तेषामेकदेशः तस्य कथनाद्विना अधि
कं नार्हति ६

परिजनाः वाङ्मनो गोचरोपि त्वं भक्तानां सुखाराध्य एवेत्याद्ः। हे परमपरिजनैरनुरागेण विरचिताये शबलसंशब्दाः
गद्गदाक्षरस्क्तयः। सलिलं च सितकिशलयाश्च शुद्धपल्लवाः शिलेतिपाठे शिलं कुशादि मंजरी। एवमादिभिः संभृ
तयासंपादितया पूजयापरितुष्यसि ७ अथेति प्रकारांतरे। अन्यथानुइत्यर्थः अनयाद्द्यपायागेनापि

परिजनानुरागविरचितशबलसंशब्दसलिलसितकिशलयतुलसिदूर्वांकुरैरपि संभृतया सपर्य
या किल परम परितुष्यसि ७ अथानयापि न भवत इज्ययोरुभारभरया समुचितमर्थमिहोपलभामहे
८ आत्मन एवानुसवनमंजसाव्यतिरेकेण बोभूयमानाशेषपुरुषार्थस्वरूपस्य किंतु नाथाशिष आशासानानामे
तदभिसंराधनमात्रं भवितुमर्हति ९ तद्यथा बालिशानां स्वयमात्मनः श्रेयः परमविदुषां परमपरम
पुरुष प्रकर्षकरुणया स्वमहिमानं चापवर्गाख्यमुपकल्पयिष्यन् स्वयं नापचित एवेतरवदिहोपलक्षितः १०

उरुभारभरया अनेकांगसमृद्ध्यापि भवतः समुचितमपेक्षितं प्रयोजनं नैव पश्यामः। अत्र हेतुः। आत्मनः स्वत एव
व अनुसवनं सर्वदा अंजसा साक्षात् बोभूयमाना अतिशयेन भवंतोऽशेषाः पुरुषार्थाः स्वरूपं यस्य परमानं ११ भा० पं० १२
दस्यानवैवं सत्यपि यागानर्थक्यमित्याह किं त्विति। सकामानामस्माकमेवैतदुपयुज्यतेनन्वेत्यर्थः ९ स्वोपयो
गमेव प्रदर्शयति तद्यथेति। परमेभ्योपि परमपुरुषः प्रकर्षयुक्तया करुणया उपशिक्षयिष्यन् संपादयिष्यन् वकारा
कामितं च नापचितः अनपचितः अपूजित एव पूज्ञानपेक्षत्वात् स्वयमेवोपलक्षितः। दृष्टोसि इतरवत् सापेक्ष

यद्यपि त्वं वरान् दातुं आविर्भूतोसि तथापि। हे अर्हत्तम राजर्षेर्बर्हिषि यज्ञे निजपुरुषाणां त्वद्भक्तानामस्माकमीक्षणे
विषयो भवान् यर्हि यदा आसीत्तदायमेव वरः संजातः ११ असंगेति दर्शनस्य दुर्लभतामाहुः। असंगेन वैराग्येण
निशितं यज्ज्ञानं स एवानलस्तेन विधूता अशेषा मला येषां अतो भवत्स्वभावो येषां। तानेवाह। आत्मारामाणां
एवंभूतानां मुनीनामपि परममंगलायनं गुणगणकथनमेव न तु दर्शनं यस्य। अतस्तैरनवरतं परिगुणिता अभ्य

अथायमेव वरोह्यर्हत्तम यर्हि बर्हिषि राजर्षेर्वरदर्षभो भवान् निजपुरुषेक्षणविषय आसीत् ११ असंगनिशि
तज्ज्ञानानलविधूताशेषमलानां भवत्स्वभावानामात्मारामाणां मुनीनामनवरतपरिगुणितगुणगणपर
ममंगलायनगुणगणकथनोऽसि अथ कथंचित्स्खलनक्षुत्पतनजृंभणदुःखस्थानादिषु विवशानां नः
स्मरणाय ज्वरमरणदशायामपि सकलकश्मलनिरसनानि तव गुणकृतनामधेयानि वचनगोचराणि भ राम
वंतु १२ किंचायं राजर्षिरपत्यकामः प्रजां भवादृशीमाशासान ईश्वरमाशिषां स्वर्गापवर्गयोरपि भगव १२
न्तमुपाधावति प्रजायामर्थप्रत्ययो धनदमिवाधनः फलीकरणं १४

स्मागुणगणायस्येति संबोधनं। दर्शनेनैव कृतार्था अपि वरमेकं प्रार्थयंते। अथेति। स्मरणाय विवशानां त्वां स्मर्तुमशा
क्तानां नः १३ अन्यत्र प्रार्थनीयमस्तीत्याहुः। किंचेति। आशिषामेहिकानां स्वर्गापवर्गयोरपीश्वरं त्वामुपधावति।
प्रजायामेवार्थप्रत्ययो वपुरुषार्थ इति प्रत्ययो यस्य। अधनो यथा फलीकरणं तुषकणादिकमाशासानो धनदमुपधा
वति १४

इदं वनाति चित्रमित्याहुः। इह संसारे ऽपराजितया मायया अनवसितपदव्या अलक्षितमार्गया अपराजितः कोवेन
इदं वनाति चित्रमित्याहुः। इह संसारे तेऽपराजितया मायया अनवसितपदव्या अलक्षितमार्गया अपराजितः को वेन
कोपि। अतस्तया ऽनावृतमतिः कः अत एव विषय एव विषं तस्य रयावेगस्तैरनावृता प्रकृतीर्यस्य सः कः यद्यनुपासित
महच्चरणः अतस्त्वन्मायामोहितस्यैव माशंसा घटत इत्यर्थः १५ अदभ्रकर्त्तः हे बहुकार्यकारिन् अल्पायसे कार्या
यत्त्वं यद्यस्मादिह समाहूतोसि। तत्र प्रजायामर्थधीर्येषां मंदानां तेषां नो यद्देवहेलनं तत्सर्वान् प्रति तव साम्येन हे

कोवा इह तेऽपराजितोऽपराजितया मायया ऽनवसितपदव्या ऽनावृतमतिर्विषयविषरयानावृतप्रकृतिर्
नुपासितमहच्चरणः १५ यदुह वाव तव पुनरदभ्रकर्त्तरिह समाहूतस्तत्रार्थधियां मंदानां नस्तद्यद्देवहेलनं दे
वदेवार्हसि साम्येन सर्वान् प्रतिवोढुमविदुषां १६ इति निगदेनाभ्यात्मकस्तोत्रेणाभिष्टूयमानो भगवान
निमिषर्षभो वर्षधराभिवादिताभिवंदितचरणः सदयमिदमाह १७ श्रीभगवानुवाच अहो बताह
मृषयो भगवद्भिरवितथगीर्भिर्वरमसुलभमभियाचितो यदमुष्यात्मजो मया सदृशो भूयादिति ममाहमेवा
भिरूपः कैवल्याद्यथापि ब्रह्मवादो न मृषा भवितुमर्हति ममैव हि मुखं यद्द्विजदेवकुलम् १८

तुना प्रतिवोढुं सोढुमर्हसि १६ इति निगदेन गद्यात्मकस्तोत्रेण वर्षधरो भारतवर्षपतिर्नाभिः तेनाभिवादिताये
अलिजस्तैरभिवंदितो चरणो यस्य १७ असुलभत्वे हेतुः ममाहमेवाभिरूपः कैवल्याद्यथापि ब्रह्मवादो न मृषा
भवितुमर्हति ममैव हि मुखं द्विजदेवकुलं। द्विजेषु देवा इव ब्राह्मणास्तेषां कुलं १८ श्रीगोपालो जयति

भा० पं० आग्नीध्रीयेनाभो १९ पतिंनाभिंहेविष्णुदत्त।तस्यावरोधानेअंतःपुरेमेरुदेव्यांशुक्लयाशुद्धसत्वमूर्त्यावततार।के
१४ षांधर्मान्।वातरशनानांदिग्वाससां।पारवंडादिव्यावृत्त्यर्थमाहश्रमणानांतपस्विनांऋषीणांज्ञानिनांऊर्ध्वमंथि
नांनैष्ठिकब्रह्मचारिणां २० इतिपंचमेतृतीयः चतुर्थादित्रिभिःप्रोक्तमृषभस्येहितंमहत्।लोकार्थंयेन
सत्कर्मनैष्कर्म्यंचनिदर्शितं॥ चतुर्थेशतपुत्रस्यराज्यंतस्यापवर्ण्यते।यस्यराज्येजनःसर्वःसंतोषामृतनिर्वृ

ततःआग्नीध्रीयेंशकलयावतरिष्यामिआत्मतुल्यमनुपलभमानः १९ इतिनिशामयंत्यामेरुदेव्याःपति
मभिधायांतर्दधेभगवानूबर्हिषितस्मिन्नेवंविष्णुदत्तभगवानूपरमर्षिभिःप्रसादितोनाभेःप्रियचिकीर्षया
तदवरोधायनेमेरुदेव्यांधर्मानूदर्शयितुकामोवातरशनानांश्रमणानामृषीणामूर्ध्वमंथिनांशुक्लया
तनुवाऽवततार २० इतिश्रीभागवतेमहापुराणेपंचमस्कंधेतृतीयोध्यायः शुकउवाच राम
अथतमुत्पत्त्यैवाभिव्यज्यमानभगवल्लक्षणंसाम्योपशमवैराग्यैश्वर्यमहाविभूतिभिरनुदिनमेधमा १४
नानुभावंप्रकृतयःप्रजाब्राह्मणदेवताश्चावनितलसमवनायातितरांजगृधुः १

तः॥ अभिव्यज्यमानानिभगवल्लक्षणानिपादतलादिषुवज्रांकुशादीनियस्यामहाविभूतिःसर्वसंपत्तिःसाम्
यादिभिःसहवर्धमानप्रभावःप्रकृतयोमात्यादयःजगृधुःअभिकांक्षंतिस्म १ श्रीगोपालायनमः॥ ॥

वर्ष्मणादेहेन।तस्यविशेषणद्वयं।वरीयसाश्रेष्ठतमेन।बृहंतःश्लोकाःपद्यानिकवीनांयस्मिन्तेनच।ओजस्तेजः
वीर्यप्रभावःशौर्यंउत्साहः।एतैर्गुणैरतिश्रेष्ठत्वादृषभःश्रेष्ठइतिनामचकार २ यस्यवर्षेमंडले ३ अवरुध्य
प्राप्यास्वैरंइच्छयागृहीतोनरलोकसमानधर्मोमनुष्याकारोयेनतं।अतएवमाययास्वपुत्रइतिविलासिताम

तस्यहवाइत्थंवर्ष्मणावरीयसाबृहच्छ्लोकेनचौजसाबलेनश्रियायशसावीर्यशौर्याभ्यांचपिताऋषभइ
तीदंनामचकार २ यस्यहीन्द्रःस्पर्धमानोभगवानूवर्षेनाववर्ष।तदवधार्यभगवानृषभदेवोयोगेश्वरः
प्रहस्यात्मयोगमाययास्ववर्षमजनाभंनामाभ्यवर्षत् ३ नाभिस्तुयथाभिलषितंसुप्रजस्त्वमवरुध्या
तिप्रमोदभरविह्वलोगद्गदाक्षरयागिरास्वैरंगृहीतनरलोकसधर्मंभगवंतंपुराणपुरुषंमायाविल
सितमतिर्वत्सतातेतिसानुरागमुपलालयन्परांनिर्वृतिमुपगतः ४ विदितानुरागमापौरप्रकृति
जनपदोराजानाभिरात्मजंसमयसेतुरक्षायामभिषिच्यब्राह्मणेषूपनिधायसहमेरुदेव्याविशालायां
प्रसन्ननिपुणेनतपसासमाधियोगेननरनारायणाख्यंभगवंतंवासुदेवमुपासीनःकालेनतन्महिमा
नमवाप ५
तिर्यस्य ४ आपौरप्रकृतिपौरान्प्रकृतीश्चाभिव्याप्यविदितोनुरागोयस्मिन्।कथंभूतोनाभिःजनपदःजनाः
पौरादयःपदंप्रमाणंयस्यसःआत्मजंधर्ममर्यादारक्षार्थमभिषिच्यब्राह्मणानामुत्संगेनिधायविशालायां
बदरिकाश्रमेप्रसन्नंपरानुद्वेजकंनिपुणंचतीव्रंतेनउपासीनःसेवमानः।कालेनतन्महिमानंजीवन्मुक्तिताम
वाप ५

भा०पं० नाभेः प्रसिद्धं कर्मअनुतदनंतरं कोनुपुमानावरेत्नको पीत्यर्थः ६ मंगलैर्दक्षिणाभिः प्रजिताः संतः ओजसा
१५ मंत्रबलेन ७ अन्येषांग्रहणाय प्रदर्शितोगुरुकुलवासोयेना अनुशिक्षमाणः अनुशिक्षयन् । उभयविधं श्रु
तिस्मृतिलक्षणं कर्मअभियुंजन् अनुतिष्ठन् । जयंत्यां भार्यायां आत्मजानां शतं जनयामास ८ तं भरतमनु

तत्र ह पांडवेयश्लोकावुदाहरंति ॥ कोनु तत्कर्म राजर्षेर्नाभेरन्वाचरेत्पुमान् अपत्यतामगाद्यस्य हरिः
शुद्धेन कर्मणा ६ ब्रह्मण्योन्यः कुतो नाभेर्विप्रा मंगलपूजिताः यस्य बर्हिषि यज्ञेशं दर्शयामासुरो
जसा ७ अथ ह भगवान्नृषभदेवः स्ववर्षं कर्मक्षेत्रमनुमन्यमानः प्रदर्शितगुरुकुलवासो लब्धवरैर्गुरु
भिरनुज्ञातो गृहमेधिनां धर्माननुशिक्षमाणो जयंत्यामिंद्रदत्तायामुभयलक्षणं कर्म समाम्नायाम्ना
तमभियुंजन्नात्मजानामात्मसमानानां शतं जनयामास ८ येषां खलु महायोगी भरतो ज्येष्ठः श्रे   राम
ष्ठगुण आसीद्येनेदं वर्षं भारतमिति व्यपदिशंति ९ तमनु कुशावर्त इलावर्तो ब्रह्मावर्तो मलयः के   १५
तुर्भद्रसेन इंद्रस्पृक् विदर्भः कीकट इति नव नवति प्रधानाः १० कविर्हरिरंतरिक्षः प्रबुद्धः पिप्पलायनः
आविर्होत्रोथ द्रुमिडश्चमसः करभाजनः इति भागवतधर्मदर्शना नव महाभागवतास्तेषां सुचरितं
भगवन्महिमोपबृंहितं वसुदेवनारदसंवादमुपशमायनमुपरिष्टाद्वर्णयिष्यामः ११

कुशावर्तादयो नव पुत्रा नवतेः प्रधाना ज्येष्ठाः १० तदनंतरं कविप्रमुखा नव भागवतधर्मप्रदर्शकाः वसुदेवना
रदयोः संवादो यस्मिन् । उपरिष्टात् एकादशे ११ श्री

महाशालीना अतिविनीताः १२ केवलः शुद्धः विपरीतवत् अनीश्वरवत् कर्माणि कुर्वन् इदं अभिज्ञानां नियमय
न् नियमितवान् । पाठांतरे नितरामरमयन् । कर्मकरणे हेतुः अनुगतं उत्सन्नं धर्मस्वियमावरणेनातद्विदामुपशि
क्षयन् । कथं धर्मादीनामवरोधेन संग्रहेण । आनंदो भोगः अमृतं मोक्षः १३ शीर्षण्यः श्रेष्ठः तेनाचरितं तत्तदनुव

यवीयांस एकाशीतिर्जायंतेयाः पितुरादेशकरा महाशालीना महाश्रोत्रिया यज्ञशीलाः कर्मविशुद्धा ब्राह्मणा
बभूवुः १२ भगवानृषभसंज्ञ आत्मतंत्रः स्वयं नित्यनिवृत्तानर्थपरंपरः केवलानंदानुभव ईश्वर एव विपरी
तवत् कर्माण्यारभमाणः कालेनानुगतं धर्ममाचरणेनोपशिक्षयन्नतद्विदां सम उपशांतो मैत्रः कारुणि
को धर्मार्थयशः प्रजानंदामृतावरोधेन गृहेषु लोकं न्यरमयत् १३ यद्यच्छीर्षण्याचरितं तत्तदनुवर्तते
लोकः । यद्यपि स्वविदितं सकलधर्मं ब्राह्मं गुह्यं ब्राह्मणैर्दर्शितमार्गेण सामादिभिरुपायैर्जनतामनुश
शास १५ द्रव्यदेशकालवयः श्रद्धर्त्विग्विविधोद्देशोपचितैः सर्वैरपि क्रतुभिर्यथोपदेशं शतकृत्व इयाज
१६ भगवतर्षभेण परिरक्ष्यमाण एतस्मिन्वर्षे न कश्चन पुरुषो वांछत्यविद्यमानमिवात्मनोऽन्यस्मात्कथं
चन किमपि कर्हिचिदवेक्षते भर्तर्यनुसवनं विजृंभितस्नेहातिशयमंतरेण १७

र्ततेयतः १४ सकलो धर्मो यस्मिन् तत् ब्राह्मं गुह्यं वेदरहस्यं यद्यपि स्वेनैव विदितं तथापि ब्राह्मणान् पृष्ट्वैव करो
तीत्यर्थः १५ द्रव्यादिभिरुपचितैर्यज्ञैरिष्टवान् । तत्र वयो यौवनं पूर्ववयो धर्ममन्विच्छेदिति वचनात् विविधोद्देशाः
नानादेवतोद्देशाः यथोपदेशं यथाविधि १६ अन्यस्मात्सकाशादात्मनः कश्चिदपि किमपि कथंचनापि न वांछ
ति । इच्छानुदये दृष्टांतः अविद्यमानं खपुष्पादिकमिव न वान्यदीयमवेक्षते ऽपीत्यर्थः । भर्तरि ऋषभदेवे प्रतिक्षणमु   द्रुमितं त्वैकोद्देकं विनाय नवांछति १७

भा०पं० १६ अवहितात्मनः संयता विज्ञानपि प्रजानुशासनार्थमुपशिक्षयन्निति इह वक्ष्यमाणमुवाच १९ इति पंचमे चतुर्थः
पंचमे मोक्षधर्मोपदेशैः पुत्रानुशासनं। उक्तं पारमहंस्यं च तत्स्यद्वद्वेति तितिक्षया॥ विड्भुजामपि ये संति तान् कष्टा
न् दुःखदान् कामान् विषयान्नार्हति तद्योग्योऽयं मनुष्यदेहो न भवति। दिव्यमुत्कृष्टं येन तपसा यस्मात् शुद्ध्यन्ति सत्त्वा

सकदाचिदटमानो भगवानृषभो ब्रह्मावर्तगतो ब्रह्मर्षिप्रवरसभायां प्रजानां निशामयंतीनामात्मजानवहि
तात्मनः प्रश्रयप्रणयभरसुयंत्रितानप्युपशिक्षयन्निति होवाच १९ इति श्रीभागवते महापुराणे पंचम
स्कंधे ऋषभदेवानुचरिते चतुर्थोऽध्यायः ऋषभ उवाच नायं देहो देहभाजां नृलोके कष्टान्कामा
नर्हते विड्भुजां ये तपो दिव्यं पुत्रका येन सत्त्वं शुद्ध्येद्यस्माद्ब्रह्मसौख्यं त्वनंतं १ महत्सेवां द्वारमाहुर्विमु राम १६
क्तेस्तमोद्वारं योषितां संगिसंगं महांतस्ते समचित्ताः प्रशांता विमन्यवः सुहृदः साधवो ये २

नंतं ब्रह्मसुखं भवति १ मोक्षबंधयोर्निदानमाह महत्सेवामिति। तमसः संसारस्य द्वारं योषितां ये संगिनस्तेषां
संगं। महांतस्ते समचित्ताः प्रशांता विमन्यवः सुहृदः लक्षणमाह सार्धेन महांत इति साधवः सदाचाराः २

मय्यीशे कृतसौहृदमेवार्थः पुरुषार्थो येषां। वा शब्देनान्यनिरपेक्षस्यैवास्य लक्षणत्वं दर्शयति। देहंबिभर्तीति देहं
भरा विषयवार्ताश्च न धर्मविषया येषु तेषु जनेषु जायादिपुत्रेषु गृहेषु वा रातिर्मित्रं धनं वा। पाठांतरे जायादिप्रदेषु
यावदर्थाश्च। यावदर्थमेवार्थो येषामिति मध्यमपदलोपी समासः। देहनिर्वाहाधिकस्पृहाशून्या इत्यर्थः ३
कामान्नार्हतीति यदुक्तं तदुपपादयति नूनमिति। यदा इंद्रियप्रीतये आपृणोति व्याप्रियते तदा प्रमत्तः सन्

ये वा मयीशे कृतसौहृदार्था जनेषु देहंभरवार्तिकेषु गृहेषु जायात्मजरातिमत्सु न प्रीतियुक्ता याव
दर्थाश्च लोके ३ नूनं प्रमत्तः कुरुते विकर्म यदिंद्रियप्रीतय आपृणोति न साधु मन्ये यत आत्मनो
यमसन्नपि क्लेशद आस देहः ४ पराभवस्तावदबोधजातो यावन्न जिज्ञासत आत्मतत्त्वं या
वत्क्रियास्तावदिदं मनो वै कर्मात्मकं येन शरीरबंधः ५

विकर्म पापं नूनं कुरुते। यतो विकर्मणः प्राचीनादयं क्लेशदो देहो जातः तस्यैव पुनः करणं साधु न मन्ये॥ देहादेर्नि
श्वरत्वात् कियानयमनर्थ इत्याशंक्याह पराभव इति देहादिनास्वरूपाभिभवः अज्ञानकृतस्तावद्भवति। तत्र हेतुः। या
वत्क्रियास्तु तावदिदं मनो हि कर्मस्वभावमेव स्यात्। येन कर्मात्मकेन मनसा ५

भा०पं० उक्तमुपसंहरति।एवंपूर्वोक्तंकर्मकर्तृभूतंमनःकर्मभूतंवशंप्रयुंक्तेपुनःकर्मनिष्ठंकरोति।जीवन्मुक्तकर्मव्यावृत्त्यर्थ
१७ माहअविद्ययेति।अविद्ययाआत्मनिउपधीयमानेआच्छाद्यमानेसति।एवंमनःकर्तृपुरुषंकर्मवशंप्रयुंक्तेइति
वा ६ नकेवलंदेहयोगमात्रंअनर्थःकिंत्वित्याह।यदाणुगुणानामिंद्रियाणांईहांचेष्टांअयथामिथ्याआत्मीयान
भवतीतिविपश्चित्।विवेकीसन्नपश्यति।नुपश्यतीतिपाठेअयथाआत्मीयत्वेनेत्यर्थः।तत्रतदासहसागतस्मृ

एवंमनःकर्मवशंप्रयुंक्तेअविद्ययात्मन्युपधीयमाने प्रीतिर्नयावन्मयिवासुदेवेनमुच्यतेदेहयोगे
नतावत् ६ यदानपश्यत्ययथागुणेहांस्वार्थेप्रमत्तःसहसाविपश्चित् गतस्मृतिर्विंदतितत्र
तापानासाद्यमैथुन्यमगारमज्ञः ७ पुंसःस्त्रियामिथुनीभावमेतंतयोर्मिथोहृदयग्रंथिमा
हुः अतोगृहक्षेत्रसुताप्तवित्तैर्जनस्यमोहोऽयमहंममेति ८ राम १७

तिःस्वरूपस्मृतिशून्यःसन् अज्ञोमूढःमैथुनसुखप्रधानंगृहंप्राप्यतापान्विंदति ७ ननुयथोपयोगंस्त्रियामि
थुनीभूयसुखमात्रमनुभवतःकुतस्तापाःस्युः तत्राहपुंसइति।प्रत्येकंतयोरेकेकोहृदयग्रंथिरस्त्येवएवंमिथः
स्थूलमन्यंहृदययोःग्रंथिंदुर्भेदंवदंति।कुतइत्यतआह।अतःअस्मान्मिथुनीभावात्।प्रत्येकंहृदयग्रंथिनात्
देहेंद्रियमात्रेऽहंममेतिमोहः।अस्मात्तुगृहादिभिर्विषयभूतैर्महान्मोहोभवेदित्यर्थः ८

कदाचनहितस्यनिवृत्तिरितआह।यदाऽस्यजनस्यकर्मभिरनुबद्धोदृढोमनोरूपोहृदयग्रंथिःशिथिलोभवेत्।तदास्मा
न्मिथुनीभावान्निवर्त्तते।ततश्चहेतुमहंकारंत्यक्त्वामुक्तःसन्परंपदंयाति ९ हेतुमतिहायेत्युक्तं।तत्रपंचविंशतिसा
धनान्याहचतुर्भिः।हंसेमयिगुरौभक्तिःसेवा।अनुवृत्तिस्तत्परता।विगततृष्णयासर्वत्रलोकांतरेपिव्यसनावगत्या
दुःखानुसंधानेन।ईहानिवृत्त्याकाम्यकर्मत्यागेन १० मदर्थैःकर्मभिःअहमेवदेवोयेषांतेःसंगात्।हेपुत्राः

यदामनोहृदयग्रंथिरस्यकर्मानुबद्धोदृढआश्लथेत तदाजनःसंपरिवर्त्ततेऽस्मान्मुक्तःपरंयात्यतिहाय
हेतुं ९ हंसेगुरौमयिभक्त्याऽनुवृत्त्यावितृष्णयाद्वंद्वतितिक्षयाच सर्वत्रजंतोर्व्यसनावगत्याजिज्ञासया
तपसेहानिवृत्त्या १० मत्कर्मभिर्मत्कथयाचनित्यंमद्देवसंगाद्गुणकीर्तनान्मे निर्वैरसाम्योपशमेन
पुत्राजिहासयादेहगेहात्मबुद्धेः ११ अध्यात्मयोगेनविविक्तसेवयाप्राणेंद्रियात्माभिजयेनसध्र्यक्
सच्छ्रद्धयाब्रह्मचर्येणशश्वदसंप्रमादेनयमेनवाचां १२ सर्वत्रमद्भावविचक्षणेनज्ञानेनविज्ञान
विराजितेन योगेनधृत्युद्यमसत्वयुक्तोलिंगंव्यपोहेत्कुशलोहमाख्यम् १३

देहगेहयोरात्मबुद्धेःअहंममेतिबुद्धेः ११ अध्यात्मयोगेनअध्यात्मशास्त्राभ्यासेन।सध्र्यक्सम्यक्असंप्रमादे
नकर्तव्यस्यापरित्यागेन १२ सर्वत्रमद्भावनातत्रविचक्षणेननिपुणेन।विज्ञानविराजितेनअनुभवपर्यंतेन
ज्ञानेन।योगेनसमाधिनाधृत्युद्यमसत्वयुक्तःधैर्यप्रयत्नविवेकैःयुक्तःसन्नहंकाराख्यमुपाधिंव्यपोहेत्।निर
स्येत् १३

भा० पं० ततः साधनादुपरमेदित्याह। कर्माण्याशेरते यस्मिन्। योगेन उपायेन। यद्यपि फले सिद्धे साधनोपरमः सिद्ध एव॥
१८ तथापि यावद्देहपातं तदभ्यासशंकावारणायोक्तं। १४ किंच। पुत्रान् पिता शिष्यान्वा गुरुः नृपश्च प्रजाः एवमनु
शिक्षयेत्। मम लोकं यः कामयेत्। यद्वा मदनुग्रह एव अर्थो यस्य। विमन्युः शिक्षितस्याकरणेऽपि कोपशून्यः
अतज्ज्ञान् तत्त्वमविदुषः श्रेयोबुध्या कर्मसु मूढान्। अन्यथोपदेशे प्रत्यवायमाह १५ मनुजः काम्यकर्मसु पुरुषं

कर्माशयं हृदयग्रंथिबंधमविद्ययाऽऽसादितमप्रमत्तः अनेन योगेन यथोपदेशं सम्यग्व्यपोह्योपरमेत यो
गात् १४ पुत्रांश्च शिष्यांश्च नृपो गुरुर्वा मल्लोककामो मदनुग्रहार्थः इत्थं विमन्युरनुशिष्यादतज्ज्ञान्न यो
जयेत्कर्मसु कर्ममूढान् १५ कं योजयन्मनुजोऽर्थं लभेत निपातयन्नष्टदृशं हि गर्ते। लोकः स्वयं श्रेयसि न
ष्टदृष्टिर्योऽर्थान्समीहेत निकामकामः अन्योन्यवैरः सुखलेशहेतोरनंतदुःखं च न वेद मूढः १६ कस्तं स्व
यं तदभिज्ञो विपश्चिद् विद्यायामंतरे वर्तमानं दृष्ट्वा पुनस्तं सघृणः कुबुद्धिं प्रयोजयेदुत्पथगं यथाऽन्धं १७
गुरुर्न स स्यात्स्वजनो न स स्यात्पिता न स स्याज्जननी न सा स्यात् दैवं न तत्स्यान्न पतिश्च स स्यान्न मोचयेद्यः स
मुपेतमृत्युं १८

योजयन् गर्ते संसारकूपे पातयति स मनुजः कमर्थं पुरुषार्थं लभेत न कमपीत्यर्थः। न योजये
दित्येतदुपपादयति। लोक इति त्रिभिः। नष्टदृष्टित्वे हेतुः यदिति। निकामं अतिशयेन कामो यस्य १६ तमीदृशं कुबु
द्धिं दृष्ट्वा तत्रैव कस्तं प्रवर्तयेत् न कोऽपि। उत्पथेन गच्छंतमंधं यथा तत्रैव गच्छेति को ब्रूयात् १७ समुपेतः संप्राप्तो मृ
त्युः संसारो येन तं ततो भक्तिमार्गोपदेशेन यो न मोचयेत् स गुर्वादिर्न भवतीत्यर्थः। यद्वा यस्तं मोचयितुं न शक्नुयात्
अतस्तस्य गुर्वादिर्न स्यादिति निषेधः ततश्च पिता न स्यादिति पुत्रोत्पत्तौ यत्नो न कार्य इत्यर्थः। दैवं देवता न स्यादिति

राम १८

एवं मोक्षधर्माननुपदिश्य भ्रातृशुश्रूषणलक्षणं धर्मं स्पर्धादिनिवृत्तये तेषां जन्मकथनपूर्वकमाह द्वाभ्यां। इदमनु
ष्याकारं शरीरं मम दुर्विभाव्यमवितर्क्यं मदिच्छाविलसितं न त्वहं प्राकृतो मनुष्य इत्यर्थः। मे हृदयं तु सत्त्वं। किं तद्धृद
यं यत्र धर्मः तत् शुद्धं सत्त्वमित्यर्थः। कुतः यद्यस्मान्मयाऽधर्मो दूरादेव पृष्ठे कृतः उत्सारितः अत एव मामृषभं
श्रेष्ठमाहुः १९ भवंतश्च हृदयेन शुद्धसत्त्वमयेन जाताः। तस्मान्मत्सरं हित्वा महत्तमं सनाभं सोदरं भजध्वं। ननु
त्वत्पुत्रत्वात् त्वां वयं भजेम राजपुत्रत्वात् प्रजाश्च पालयामेति चेदत आह। तदेव मे शुश्रूषणं प्रजानां च पालनं।

इदं शरीरं मम दुर्विभाव्यं सत्त्वं हि मे हृदयं यत्र धर्मः पृष्ठे कृतो मे यदधर्म आराद् अतो हि मामृष
भं प्राहुरार्याः १९ तस्माद्भवंतो हृदयेन जाताः सर्वे महीयांसममुं सनाभं अक्लिष्टबुद्ध्या
भरतं भजध्वं शुश्रूषणं तद्भरणं प्रजानां २० भूतेषु वीरुद्भ्य उदुत्तमा ये सरीसृपास्तेषु स
बोधनिष्ठाः ततो मनुष्याः प्रमथास्ततोऽपि गंधर्वसिद्धा विबुधानुगा ये २१

भरतानुवृत्त्यैव सर्वं कृतं स्यादिति भावः २० इदानीं ब्राह्मणाश्च सेव्या इत्याशयेन तेषां सर्वेभ्यः श्रैष्ठ्यमाह पंच
भिः। भूतेषु चेतनाचेतनेषु विरोहंतीति वीरुधः स्थावराः उत् उच्चैः अतिशयेनोत्तमाः तेभ्योऽपि ये सरीसृपाः सर्प
न्तीति जंगमाः ते उदुत्तमा इति सर्वत्रानुषंगः तेष्वपि सबोधा निष्ठा स्थितिर्येषां पश्वादीनां कीटादिभ्यः। ततः तेभ्यो
ऽपि मनुष्याः ततोऽपि प्रमथा भूतप्रेतादयः ततोऽपि गंधर्वाः ततः सिद्धाः ततोऽन्ये विबुधानुगाः किंनरादयः तेभ्यो
सुराः देवा असुरेभ्यः। संधिरार्षः। देवाश्च मघवत्प्रधानाः देवेभ्य इंद्रः श्रेष्ठ इत्यर्थः २१

भा० पं० २९ देवाश्च मघवत्प्रधानाः देवेभ्य इंद्रश्रेष्ठः। ततोपि ब्रह्मसुता दक्षादयः तेषां मध्ये भवः परः श्रेष्ठः। स भवः विरिंचवीर्यः यस्य वी
र्यं शक्तिः कारणं यस्य स विरिंचवीर्यः। अतस्सृजनकत्वाद्विरिंच्यस्मत्तः परः इत्यर्थः। स विरिंचो मत्परः। अहं परो यस्य
द्विजदेवा ब्राह्मणा एव देवाः पूज्या यस्य सोहं। ब्राह्मणैरन्यद्भूतं न तुलये समं न पश्यामि। अतो ब्राह्मणात्परं तु भूतं किं
पश्यामि। न किंचिदित्यर्थः। विप्रा इति तत्रत्यानां ब्राह्मणानां संबोधनं। समस्यैवाभावादधिकं कुतस्स्यमित्यर्थः। तत्र हेतुः

देवासुरेभ्यो मघवत्प्रधाना दक्षादयो ब्रह्मसुतास्तु तेषां भवः परः सोथ विरिंचवीर्यः स मत्परोहं द्विजदेवदेवः
२२ न ब्राह्मणैस्तुलये भूतमन्यत्पश्यामि विप्राः किमतः परं तु यस्मिन्नृभिः प्रहुतं श्रद्धयाहमश्नामि का
मं न तथाऽग्निहोत्रे २३ धृता तनूरुशती मे पुराणी येनेह सत्वं परमं पवित्रं शमो दमः सत्यमनुग्रहश्च त
पस्तितिक्षाऽनुभवश्च यत्र २४ मत्तोप्यनंतात्परतः परस्मात्स्वर्गापवर्गाधिपतेर्न किंचित् येषां किमु स्या
दितरेण तेषामकिंचनानां मयि भक्तिभाजां २५ सर्वाणि मद्धिष्ण्यतया भवद्भिश्चराणि भूतानि सुता ध्रुवा राम २९
णि संभावितव्यानि पदे पदे वो विविक्तदृग्भिस्तदु हार्हणं मे २६

नाहसाधर्म्यां। यस्मिन्ब्राह्मणे श्रद्धया प्रकर्षेण हुतमन्नादिकामं यथेच्छमहमश्नामि २३ मे तनूर्मूर्तिर्वेदाख्या ये
न ब्राह्मणेन इह लोके धृता यत्र च ब्राह्मणे सत्वादयोऽष्टौ गुणाः संति ततः परं किं पश्यामीत्यन्वयः २४ निस्पृहत्व
माह। मत्तोपि येषां न किंचित्प्रार्थनीयमस्ति तेषामितरेण राज्यादिना किमु स्यात्। न किमपि २५ तदेवं ब्राह्म
णसंमानं विधायेदानीं सर्वभूतसंमानं विधत्ते। हे सुताः सर्वाणि जंगमानि स्थावराणि च भूतानि मदधिष्ठानतया वो
युष्माभिः संमाननीयानि पदे पदे क्षणे विविक्ता मत्सरादिरहिता दृष्टिर्येषां तैः। तदेव मे मार्हणं २६

सर्वकर्मणामीश्वरार्पणं विधत्ते। मनोवचोदृशामन्येषां च करणानामीहितस्य व्यापारस्य मे परिबर्हणं आराधनमेव
साक्षात्कृतं फलं। येन परिबर्हणेन विना कालपाशाद्विमोक्तुं न ईशीत न समर्थो भवेत् २७ स्वत एव शिक्षिता
नपि लोकानुशासनार्थमनुशास्य मुनीनां पारमहंस्यधर्ममुपशिक्षयिष्यन् भरतमभिषिच्य ऋषभ इत्यपदेशो

मनोवचोदृक्करणेहितस्य साक्षात्कृतं मे परिबर्हणं हि विना पुमान्येन महाविमोहात्कृतांतपाशान्न वि
मोक्तुमीशेत् २७ श्रीशुक उवाच एवमनुशास्यात्मजान्स्वयमनुशिष्टानपि लोकानुशासना
र्थं महानुभावः परमसुहृद्भगवानृषभापदेश उपशमशीलानामुपरतकर्मणां महामुनीनां भक्तिज्ञा
नवैराग्यलक्षणं पारमहंस्यधर्ममुपशिक्षमाणः स्वतनयशतज्येष्ठं परमभागवतं भगवज्जनपरायणं भर
तं धरणिपालनायाभिषिच्य स्वयं भवन एवोर्वरितशरीरमात्रपरिग्रह उन्मत्त इव गगनपरिधानः प्रकीर्ण
केश आत्मन्यारोपिताहवनीयो ब्रह्मावर्तात्प्रवव्राज २८ जडांधमूकबधिरपिशाचोन्मादकवदवधूत
वेषोऽभिभाष्यमाणोऽपि जनानां गृहीतमौनव्रतस्तूष्णीं बभूव २९

नाम यस्य स भगवान् ब्रह्मावर्तात्स्वदेशात्प्रवव्राजेत्यन्वयः। उर्वरितो वशिष्टः शरीरमात्रपरिग्रहो यस्य २८
अभिभाष्यमाणोपि जनानां मध्ये जडादिवद्वर्तमानस्तूष्णीं बभूव। अवधूतस्यैव वेषो यस्य २९ श्रीरामो जयति

भा० पं० तत्रपुरादिष्वनुपथंमार्गेमार्गेऽवनिवरापसदैर्दुर्जनैस्तर्जनादिभिःपरिभूयमाणोऽपित्तदविगणयन्नैवैकचरए
२० काकीपृथिवींपरिबभ्रामेत्यन्वयः।तत्रपुरंपत्तनंग्रामाद्दृवंतः।आकरःखानिः।खेटःकृषीवलग्रामः।वाटिः
पुष्पादिवाटिका।शिबिरंसेनायावासस्थानं।व्रजोगवांस्थानं।घोषोगोपानां।सार्थोयात्रिकजनसंघातः।आ
श्रमात्रषीणां।तर्जनंभयजननं।ताडनंप्रहारः।मेहनंउपरिमूत्रणं।ठीवनंथूत्कृत्यश्लेष्मप्रक्षेपः।ग्रावणांशद्ध

तत्रतत्रपुरग्रामाकरखेटवाटिशिबिरव्रजघोषसार्थगिरिवनाश्रमादिष्वनुपथमवनिवरापसदैःपरिभू
यमानोमक्षिकाभिरिववनगजस्तर्जनताडनावमेहनष्ठीवनग्रावशकृद्रजःप्रक्षेपपूतिवातदुरुक्तैस्तदवि
गणयन्नेवासत्संस्थानएतस्मिन्देहोपलक्षणेसदपदेशउभयानुभवस्वरूपेणस्वमहिमावस्थानेनास राम
मारोपिताहंममाभिमानत्वात्अविखंडितमनाःपृथिवीमेकचरःपरिबभ्राम ३० २०

तोरजसश्चप्रक्षेपः।पूतिवातोऽधोवायुःदुरुक्तंशापःएतैःअगणनेदृष्टांतः।मक्षिकाभिरिवेति।तत्रैवहेतुः।अस
तिमिथ्याभूतेसंस्थानेसन्निवेशेदेहइत्युपलक्षणमाकारोयस्यसदित्यपदेशमात्रंयस्यतस्मिन्।निरभिमान
त्वात्।केनहेतुनाउभयोःसदसतोर्योऽनुभवःतत्स्वरूपेणयत्स्वमहिम्न्यवस्थानंतेन।अतएवाखंडितंमनोयस्य
सः।परिबभ्राम ३०

सवत्तदाग्रहग्रहीतइवादृश्यत।तत्रहेतुःपराक्पुरतोऽवलंबमानाश्चतेकुटिलाश्चजटिलाश्चकपिशाश्चकेशाः।तेषां
भूरिभारोयस्यसः।अवधूतमनादृतंअतएवमलिनंनिजशरीरंतेन।कथंभूतोऽप्येवमदृश्यत।अतिसुकुमा
राणिकरचरणोरःस्थलानितथाविपुलाबाह्वादयः।तएवावयवाः।तेषांविशिष्टोन्यासः।तथाप्रकृत्यैवसुंद

अतिसुकुमारकरचरणोरस्थलविपुलबाह्वंसगलवदनाद्यवयवविन्यासः।प्रकृतिसुंदरःस्वभावहास
सुमुखोनवनलिनदलायमानशिशिरतारारुणायतनयनरुचिरःसदृशसुभगकपोलकर्णकंठना
सोविगूढस्मितवदनमहोत्सवेनपुरवनितानांमनसिकुसुमशरासनमुपदधानःपरागवलंबमा
नकुटिलजटिलकपिशकेशभूरिभारोऽवधूतमलिननिजशरीरेणग्रहगृहीतइवादृश्यत ३१

रः।स्वभावसिद्धोहासःतेनशोभनंमुखंयस्य।तथानवनलिनदलवदावरंतीप्येशिशिरतारेतापहारिकनीनिके
अरुणेआयतेनयनेताभ्यांरुचिरः।तथासदृशाअन्यूनाधिकाःसुभगाश्चकपोलकर्णकंठनासिकायस्य।तथा
विगूढस्मितंयद्वदनंतस्यमहोत्सवेनाविभ्रमेणपुरांगनानांमनसिकाममुद्दीपयन्।एवंभूतोऽपितथाऽदृश्यते
त्यन्वयः ३१

यर्हियदालोकंजनंयोगस्यप्रतिपक्षमाचक्षाणः पश्यन्नबभूव।तस्यप्रतिक्रियाकरणंचनिंदितमित्याचक्षाणः तदा
आजगरंव्रतमास्थितःसन्शयानएवाश्नातिस्मेत्यन्वयः।आजगरंनामव्रतंएकत्रैवस्थित्वाप्रारब्धकर्मोपभोगः।
अवमेहतिमूत्रयति।हदतिपुरीषमुत्सृजति।उत्सरितेपुरीषेवेष्टमानोविलुंठन्तेनैवादिग्धाआलिप्ताउद्देशा
देहप्रदेशायस्यसः ३२ विभत्समिवाशंक्याह।तस्येति।पुरीषस्यसुरभिनागंधेनसोगंध्यंयस्यसवायुः ३३ एवंगवा

यर्हिवावसभगवान्लोकमिमंयोगस्याऽद्धाप्रतीपमिवाचक्षाणस्तत्प्रतिक्रियाकर्मबीभत्सितमितिव्रतमा
जगरमास्थितःशयानएवाश्नातिपिबतिखादत्यवमेहतिहदतिस्मचेष्टमानउच्चरितआदिग्धोद्देशः ३२
तस्यहयःपुरीषसुरभिसौगंध्यवायुस्तंदेशंदशयोजनंसमंतात्सुरभिंचकार ३३ एवंगोमृगकाकचर्ययापा
व्रजंस्तिष्ठन्नासीनःशयानःकाकमृगगोचरितःपिबतिखादत्यवमेहतिस्म ३४ इतिनानायोगचर्याचर
णोभगवान्कैवल्यपतिऋषभोऽविरतपरममहानंदानुभवआत्मनिसर्वेषांभूतानामात्मभूतेभगवतिवा
सुदेवआत्मनोऽव्यवधानानंतरोदरभावेनसिद्धसमस्तार्थपरिपूर्णोयोगैश्वर्याणिवैहायसमनोजवांतर्धान
परकायप्रवेशदूरग्रहणादीनियदृच्छयोपगतानिनांजसानृपहृदयेनाभ्यनंदत् ३५ इतिपंचमोध्यायः

दिव्यर्यापानादिकरोतिस्मतदेवाह।व्रजन्नित्यादिकाकमृगगवामिवान्यदपिचरितंदृष्ट्वातिर्यस्यौंनानायोगचर्याआच
रतीतितथालोकयात्रापरिहाराययोगिभिरेवंवर्तितव्यमितिप्रदर्शनायतथाकृतवान्।वस्तुतस्तुभगवान्।यतःअवि
रतःपरममहान्उत्तरोत्तरशतगुणत्वेनोत्कोपआनंदःतदनुभवस्वरूपःकिंवा।वासुदेवेआत्मनोव्यवधानेनअभेदेन
नविद्यतेअन्येषामिवअंतरामध्येउदरस्यदेहोपाधेर्भावस्तेननित्यनिवृत्तोपाधित्वेनेत्यर्थःस्वतएवासिद्धैःसमस्तैरर्थैः
फलैःपरिपूर्णत्वाद्योगैश्वर्याणिनाभ्यनंदत्।विहायसंखेचरत्वंमनोजवंमनसइवदेहस्यवेगं।दूरग्रहणंदूरदर्शनं।हेनृप

राम २१

षष्ठेलीनाभिमानस्यदेहत्यागक्रमाभिधा।।प्रदहंतंदवाग्निंयःपश्यन्नपिनपश्यति।।योगैश्वर्याणिनाभ्यनंदत्इ
त्युक्तंतत्रपृच्छति।नेति।भगवःहेभगवन्योगेनसमीरितमुद्दीपितंयत्ज्ञानंतेनावभर्जितानिदग्धानिकर्मबीजा
निरागादीनियैःतेषांयदृच्छयाप्राप्तानियोगैश्वर्याणिपुनःक्लेशदानिभवितुंनार्हंति।अतःकिमितिनाभ्यनंदत्इ
1 त्यर्थःअंगीकृत्यपरिहरतिसत्यमिति।एकेबुद्धिमंतोऽनवस्थानस्यचंचलस्यमनसःविश्वासंनसंगच्छंतेनसम्य

राजोवाच ननूनंभगवआत्मारामाणांयोगसमीरितज्ञानावभर्जितकर्मबीजानामैश्वर्याणिपु
नःक्लेशदानिभवितुमर्हंतियदृच्छयोपगतानि १ ऋषिरुवाच सत्यमुक्तंकिंत्विहवाएकेन
मनसोऽद्धाविश्रंभमनवस्थानस्यशठकिरातइवसंगच्छंते २ तथाचोक्तम् नकुर्यात्कर्हि
चित्सख्यंमनसिह्यनवस्थिते यद्विश्रंभाच्चिराच्चीर्णंचस्कंदतपऐश्वरम् ३

कप्राप्नुवंति।शठःकिरातोयथाधूर्तेष्वपिमृगेषुशठेकिरातेयथामृगाइतिसम्यक्तंवा।पाठांतरेशठोवंचकःकि
रातोवाणिक्व्यवहर्तरियथाअस्मिन्वाव्यवहर्ताविश्वासंनयातिइत्यर्थः।पाक्षिकोदोषोवर्जनीयइत्युपदेष्टुंना
भ्यनंददितिभावः।यद्विश्रंभात्यस्यविश्वासात्चिराच्चीर्णंबहुकालसंचितंतपःचस्कंदसुस्रावऐश्वरं।वि
श्वामोहनीरूपदर्शनेन।यद्वाईश्वराणांसमर्थानामपिसौभरिप्रभृतीनांतपः ३ श्रीगोपालायनमः

तत्र हेतुः । नित्यमिति कृतविश्वासो यो योगी तदीयं मनः कामस्य तमनु येऽरयस्तेषां च छिद्रमवकाशं ददाति । यथा
कृतविश्वासस्य पत्युः पुंश्चली जाया जाराणामवकाशं दत्त्वा पतिं घातयति तथा मनोऽपि कामादिभिर्योगिनं भ्रंश
यतीत्यर्थः । अरीनेव कथयन्नुपसंहरति काम इति । यन्मूलः यन्निमित्तो भवति तन्मनः को नु बुधः स्वीकुर्यात् स्वाधी
नमिति मन्येत ५ प्रासंगिकं समाप्य प्रकृतमाह अथेति । अखिलानां लोकपालानां ललामो मंडनभूतोऽपि उप
रताबाधितानुवृत्तिर्यस्मात् स उपरामः देहाभिमानं जहौ । विलक्षणैरनेकप्रकारैरवधूतवेषादिभिर्नीविलक्षितो

नित्यं ददाति कामस्य च्छिद्रं तमनु येऽरयः योगिनः कृतमैत्रस्य पत्युर्जायेव पुंश्चली ४ कामो मन्युर्मदो लो
भः शोकमोहभयादयः कर्मबंधश्च यन्मूलः स्वीकुर्यात्को नु तद्बुधः ५ अथैवमखिललोकपालललामोऽपि वि
लक्षणैर्जडवदवधूतवेषभाषाचरितैरविलक्षितभगवत्प्रभावो योगिनां सांपरायविधिमनुशिक्षयन् स्वक
लेवरं जिहासुरात्मन्यात्मानमसंव्यवहितमनर्थांतरभावेनान्वीक्षमाण उपरतानुवृत्तिरुपरराम ६ त राम
स्य ह वा एवं मुक्तलिंगस्य भगवत ऋषभस्य योगमायावासनया देह इमां जगतीमभिमानाभासेन संक्रम २२
माणः ७

भगवत्प्रभावो यस्मिन् । सांपरायविधिं देहत्यागप्रकारं आधाराधेयभावव्यावृत्त्यर्थमाह । अनर्थांतरभावेन अभेदेन
उपासनाव्यावृत्त्यर्थमाह ६ असंव्यवहितं । मनसा स्वयं त्यक्तेऽप्यभिमाने केनापि संस्कारेण देहः प्रचलति । यथा
कुलालचक्रं सोऽयमभिमानाभासः तेन स च जीवन्मुक्तानामविद्यावासनया भवतीति ततो विशेषमाह । यो
गमायावासनयेति ७

कोंकादीन् देशान् गतः सन् । कयापि वासनया आस्ये कृतोऽश्मकवलो येन । असंवीतो नग्नः ८ समीरवेगेन
विधूतानां कंपितानां वेणूनां संघर्षणेन जात उग्रो दावानलः तद्वनमालेलिहानः सर्वतो ग्रसन् ९ अवधूत
वेषेण ऋषभदेवस्तत्र गत इत्येतस्य सूचकमाह । यस्य किलाश्रमातीतमनुचरितं तद्देशवासिभ्य उपाकर्ण्य अ

कोंकवेंककुटकान् दक्षिणकर्णाटकान् देशान् यदृच्छयोपगतः कुटकाचलोपवन आस्यकृताश्मकवल उन्माद
इव मुक्तमूर्धजोऽसंवीत एव विचचार ८ अथ समीरवेगविधूतवेणुविकर्षणजातोग्रदावानलस्तद्वनमा
लेलिहानः सह तेन ददाह ९ यस्य किलानुचरितमुपाकर्ण्य कोंकवेंककुटकानां राजार्हन्नामोपशिक्ष्य क
लावधर्म उत्कृष्यमाणे भवितव्येन विमोहितः स्वधर्मपथमकुतोभयमपहाय कुपथपाखंडमसमंजसं
निजमनीषया मंदः प्रवर्तयिष्यते १० येन ह वाव कलौ मनुजापसदा देवमायामोहिताः स्वविधिनियोग
शौचचारित्रविहीना देवहेलनान्यपव्रतानि निजनिजेच्छया गृह्णाना अस्नानानाचमनाशौचकेशोल्लुंच
नादीनि कलिनाऽधर्मबहुलेनोपहतधियो ब्रह्मब्राह्मणयज्ञपुरुषलोकविदूषकाः प्रायेण भविष्यंति ११

अर्हन्निति नाम यस्य स राजा स्वयं तत्र उपशिक्ष्य शिक्षापित्वा कुपथश्चासौ पाखंडश्च तं निजमनीषया संप्रवर्तयिष्यति
इत्यन्वयः । तत्र हेतुः कलावित्यादि । भवितव्येन प्राणिनां पूर्वसंचितपापफलेन १० येन प्रवर्तितेन मनुजेष्वपस
दा निकृष्टाः स्वविधिना नियोगो यस्मिन् शौचचारित्रे तद्विहीनाः देवावज्ञारूपाण्यस्नानादीनि व्रतानि गृह्णानाः
वेदादीनां विदूषका भविष्यंति ११

१२

भा० पं० तत्फलं चांधंतमः प्राप्स्यंतीत्याह तेनेति। अर्वाक्तनया अवेदमूलया निजलोकयात्रया स्वेच्छाकृतप्रवृत्त्या आश्वस्ताः कृ
२३ तविश्वासाः॥ ननु तर्हि अनर्थकारी किमर्थोऽयमृषभावतारस्तत्राह। अयमिति। रजोव्याप्तानां जनानां मोक्षमार्गोपशि
क्षणार्थः। तस्य कैवल्योपशिक्षणस्यानुरूपान् १२ अधिकं पुण्यं यस्मिन् एतद्भारतं वर्षं ऋषभाद्यवतारयुक्तानि कर्मा
णि प्रियव्रतस्य वंशः अवदातः शुद्धः यत्र वंशे यद्यस्मात् अकर्ममोक्षस्तस्य हेतुं धर्मं चचार १४ अपरः को नु योगी अ

नेव ह्यर्वाक्तनया निजलोकयात्रयांधपरंपरयाश्वस्तास्तमस्यंधे स्वयमेव प्रपतिष्यंति १२ अयमवतारो रजसो
पप्लुतकैवल्योपशिक्षणार्थः। तस्यानुगुणान् श्लोकान् गायंति॥ १३ अहो भुवः सप्तसमुद्रवत्या द्वीपेषु वर्षेष्व
धिपुण्यमेतत् गायंति यत्रत्यजना मुरारेः कर्माणि भद्राण्यवतारवंति १४ अहो नु वंशो यशसावदातः प्रैय
व्रतो यत्र पुमान् पुराणः कृतावतारः पुरुषः स आद्यश्चचार धर्मं यदकर्महेतुं १५ को न्वस्य काष्ठामपरोऽनु
गच्छेन्मनोरथेनाप्यभवस्य योगी। यो योगमायाः स्पृहयत्युदस्ता ह्यसत्तया येन कृतप्रयत्नाः १६ इति ह स्म
सकलवेदलोकदेवब्राह्मणगवां परमगुरोर्भगवत ऋषभाख्यस्य विशुद्धाचरितमीरितं पुंसां समस्तदुश्चरि राम
ताभिहरणं परममहामंगलायनमिदमनुश्रद्धयोपचितयानुशृणोत्याश्रावयति वावहितो भगवति त २३
स्मिन्वासुदेव एकांततो भक्तिरनयोरपि समनुवर्तते १७

स्य काष्ठां दिशमप्यनुगच्छेत्। यो योगी येन ऋषभेन असत्तया असत्फलेन उदस्ता निरस्ता योगमायाः सिद्धीर्वांछति। क
थंभूताः कृतः प्रयत्नो यासु। तदर्थं प्रयत्नं न करोतीत्यर्थः। यद्वा कथंभूताः। उदस्ताः कृतप्रयत्नाः सेवितुमुद्यता अपीत्य
र्थः। विशुद्धाचरितं ईरितं कथितं तत्तु समस्तदुश्चरितमभितो हरतीति तथा परममहामंगलानामयनं च। अ
वहितः सन्। अनयोरपि श्रोतृश्रावयित्रोरविशेषेण भक्तिः सम्यगनुवृत्ता भवतीत्यर्थः १७

भक्तेः परमपुरुषार्थत्वमाह। यस्यां भक्तावेव अनुयोगादिषु। अनुसवनमविरतमात्मानं स्नापयंतः स्वयमासादितं
अप्रार्थितं भगवता स्वयमेव दीयमानमपि। अनादरे हेतुः। भगवदीयत्वेनैव परितः समाप्ताः सम्यक्प्राप्ताः सर्वे पुरुषार्था यै
स्ते॥ १८॥ ननु भगवतोतिसुलभत्वदर्शनान्मोक्षस्य चातिदुर्लभत्वादियमतिस्तुतिरेवेत्याशंक्याह। हे राजन्। भवतां

यस्यामेव कवय आत्मानमविरतं विविधवृजिनसंसारपरितापोपतप्यमानमनुसवनं स्नापयंतस्तयैव
परया निर्वृत्या ह्यपवर्गमात्यंतिकं परमपुरुषार्थमपि स्वयमासादितं नो एवाद्रियंते भगवदीयत्वेनैव परिस
माप्तसर्वार्थाः॥ १८॥ राजन् पतिर्गुरुरलं भवतां यदूनां दैवं प्रियः कुलपतिः क्व च किंकरो वः। अस्त्वेवमंग भ
गवान् भजतां मुकुंदो मुक्तिं ददाति कर्हिचित्स्म न भक्तियोगं॥ १९॥

पांडवानां यदूनां च पतिः पालकः गुरुः उपदेष्टा दैवं उपास्यः प्रियः सुहृत् कुलस्य पतिः नियंता। किं बहुना क्व च कदाचि
द्दौत्यादिषु वः पांडवानां किंकरोऽपि आज्ञानुवर्ती। अस्त्वेवमेवं तथाप्यन्येषां नित्यं भजतामपि मुक्तिं ददाति
कर्हिचित्स्म न भक्तियोगं॥ १९॥

भा०पं० २४ वर्णितमृषभावतारं नमस्करोति। नित्यमनुभूतयन्निजंरूपंसएवलाभः तेननिवृत्तातृष्णायस्यसः। अतद्रचनया देहा
२४ द्यर्थमनोरथेनश्रेयसि विषये चिरंसुप्ता बुद्धिर्यस्य तस्य जनस्य करुणया निर्भयमात्मस्वरूपं य आख्यातवान् तस्मै नमः
॥२०॥ ॥इतिपंचमेषष्ठः॥ ॥अध्यायानां त्रयेणैवमृषभाख्यानमीरितं॥ अथ भिन्नैर्भरताख्यानमतः प्रस्तूयते ऽष्टतं ॥१॥
सप्तमे भरतोराज्ये चिरं यज्ञैर्हरिं यजन्। आरब्धकर्मणि निर्वाणे हरिक्षेत्रे ऽभजद्धरिं॥ २॥ संचिंतितः संकल्पेनैव राज्या दौ

नित्यानुभूतनिजलाभनिवृत्ततृष्णः श्रेयस्यतद्रचनया चिरसुप्तबुद्धेः॥ लोकस्य यः करुणयाऽभयमात्मलो
कमाख्यान्नमो भगवते ऋषभाय तस्मै॥२०॥ ॥इति श्रीभागवते महापुराणे पंचमस्कंधे ऋषभदेवानु
चरिते षष्ठोध्यायः॥ ॥श्रीशुक उवाच॥ ॥भरतस्तु महाभागवतो यदा भगवताऽवनितलपरिपालना
य संचिंतितः तदनुशासनपरः पंचजनीं विश्वरूपदुहितरमुपयेमे॥१॥ तस्यामु ह वा आत्मजान् कार्त्स्न्येना
नुरूपानात्मनः पंच जनयामास भूतादिरिव भूतसूक्ष्माणि॥ २॥ सुमतिं राष्ट्रभृतं सुदर्शनमावरणं धूम्रके राम २४
तुमिति। अजनाभं नामैतद्वर्षं भारतमिति यत आरभ्य व्यपदिशंति॥३॥

नियुक्तः॥१॥ आत्मनोऽनुरूपान्। भूतादिरहंकार इव भूतसूक्ष्माणीति संततिवृद्धौ दृष्टांतः॥ भारतमिति स्वनाम्न
स्व्यापकत्वेन धर्मातिशयः सूचितः॥३॥

विरचितांगक्रियेष्वपूर्वं यत्तत्क्रियाफलं धर्माख्यं परे ब्रह्मणि यज्ञपुरुषे सर्वदेवतालिंगानां मंत्राणामर्थनियामकतया सा
२ साक्षात्कर्तरि परदेवतायां भगवति वासुदेव एव भावयमान आत्मनैपुण्यमृदितकषायो हविःष्वध्वर्युभिर्गृह्यमाणेषु स य
बहुवित्सर्ववित्॥४॥ यज्ञा अयूपाः क्रतवः सयूपाः तद्रूपं। उच्चावचैर्महद्भिरल्पैश्च क्रतुभिः कर्मभिः श्रद्धया ईजे
च। तानेवाह। आहृताः स्वाधिकारेणात्मसात्कृताः ये अग्निहोत्रादयः तेषां प्रकृतिविकृतिभिः। अग्निहोत्रा
दयो हि द्विविधाः सकलांगयुक्ताः प्रकृतयः। विकलांगा विकृतय इति तैर्द्विविधैरपीत्यर्थः। अनुस
वनं चातुर्होत्रविधिनेत्यंतं वा गद्यं॥५॥ किंच। संप्रचरत्सु प्रवर्तमानेषु नानायागेषु विरचिता अनुष्ठिताः

स बहुविन्महीपतिः पितृपितामहवदुरुवत्सलतया स्वे स्वे कर्मणि वर्त्तमानाः प्रजाः स्वधर्ममनुवर्त्त
मानः पर्यपालयत्॥४॥ ईजे च भगवंतं यज्ञक्रतुं क्रतुभिरुच्चावचैः श्रद्धयाहृताग्निहोत्रदर्शपूर्णमासचा
तुर्मास्यपशुसोमानां प्रकृतिविकृतिभिरनुसवनं चातुर्होत्रविधिना॥५॥ संप्रचरत्सु नानायागेषु विर

अंगक्रिया येषां तेषु यदपूर्वं तद्वासुदेव एव भावयमानश्चिंतयन् स यजमानो यज्ञभाजो ये देवाः सूर्यादयस्तान्
पुरुषस्य वासुदेवस्यावयवेषु चक्षुरादिष्वभ्यध्यायत् न तु पृथक्त्वेनेत्यन्वयः। अपूर्वं यच्च द्वयं मीमांसकानां त
द्दानीमेव सूक्ष्मत्वेनोत्पन्नं फलमेवापूर्वं कालांतरफलोत्पादिका कर्मशक्तिर्वेति। तदुक्तं। यागादेव फलं तद्धि श
क्तिद्वारेण सिध्यति। सूक्ष्मशक्त्यात्मकं वापि फलमेवोपजायत इति तदेवाह। क्रियाफलं धर्माख्यमिति च। ननु
यथांगं देवताः कर्मप्रधानमिति मतं। तर्हि कि तन्निष्ठमपूर्वं स्यात्। तदुक्तं। कर्मभ्यः प्रागयोग्यस्य कर्मणः पुरुषस्य
×जमानो यज्ञभाजो देवांस्तान् पुरुषावयवेष्वभ्यध्यायत्॥६॥

वायोग्यता शास्त्रगम्या या परा सापूर्वमिष्यत इति। अथ देवताप्रधानं कर्मनु देवताराधनार्थं तदा देवताप्रसादरूप
त्वात् अपूर्वस्य देवताश्रयत्वमेव युक्तं। प्रोक्षणाद्यपूर्वस्येव व्रीह्याद्याश्रयत्वं कुतो वासुदेवाश्रयमपूर्वं भावयति। उ
च्यते। यदि कर्तृनिष्ठमपूर्वं तर्हि वासुदेवस्यांतर्यामिणः प्रवर्तकत्वेन मुख्यकर्तृत्वात्तदाश्रयमेवापूर्वं नतु तत्प्रयो
ज्ययजमानाश्रयं। शास्त्रफलं प्रयोक्तरीति न्यायात्। अन्यथा ऋत्विजामप्यपूर्वाश्रयत्वप्रसंगात्। तदेतदाह
साक्षात्कर्तरीति। देवताश्रयत्वेऽपि वासुदेवाश्रयत्वमेवेत्याह। परदेवतायामिति। परदेवतात्वे हेतुः। सर्वदेवतालिं
गानां तत्तद्देवताप्रकाशकानां मंत्राणां येऽर्था इंद्रादिदेवतास्तेषां नियामकतया तस्यैव [illegible] प्रसादनीयत्वात् फ
लदातृत्वाच्च युक्तमेवापूर्वाश्रयत्वमित्यर्थः। एवं भावनमेवात्मनो नैपुण्यं कौशलं तेन मृदिताः क्षीणाः कषाया
रागादयो यस्य। अध्वर्युभिरिति बहुवचनं नानाकर्माभिप्रायेण॥६॥

एवंभूतया कर्मविशुद्ध्या विशुद्धसत्त्वस्य भक्तिरजायतेत्यन्वयः। (क)। अंतर्हृदये य आकाशः स एव शरीरमभिव्य
क्तिस्थानं यस्य तस्मिन् ब्रह्मणि। कीदृशे। महापुरुषरूपस्योपलक्षणं आकारो यस्य तस्मिन्। किंच श्रीवत्सादिभिरु
पलक्षिते। निजपुरुषाणां नारदादीनां हृदि लिखितवन्निश्चलतया स्थिते न उक्तेन पुरुषरूपेण आत्मनि स्वमनसि

एवं कर्मविशुद्ध्या विशुद्धसत्त्वस्यांतर्हृदयाकाशशरीरे ब्रह्मणि भगवति वासुदेवे महापुरुषरूपोप
लक्षणे श्रीवत्सकौस्तुभवनमालारिदरगदादिभिरुपलक्षिते निजपुरुषहृल्लिखितेनात्मनि पुरुष
रूपेण विरोचमान उच्चैस्तरां भक्तिरनुदिनमेधमानरयाऽजायत॥७॥ एवं वर्षायुतसहस्रपर्यंतावसि
स तकर्मनिर्वाणावसरोऽधिभुज्यमानं स्वतनयेभ्यो रिक्थं पितृपैतामहं यथादायं विभज्य स्वयं सकल
संपन्निकेतात्स्वनिकेतात्पुलहाश्रमं प्रवव्राज॥८॥

विरोचमाने। कीदृशी भक्तिः। अत्यंतातिशयेन एधमानो रयो वेगः प्रकर्षो यस्याः॥७॥ एवं अनुवृत्त्या वर्षाणाम
युतानि तेषां सहस्रं तत्पर्यंतकाले वसितो निश्चितः कर्मनिर्वाणावसरः राज्यभोगादृष्टसमाप्तिसमयो येन सः
अधिकृत्य भुज्यमानं रिक्थं धनं यथाविभागं विभज्य सकलसंपदां निकेतात् आश्रयात् स्वगृहात् पुलहाश्रमं हरिक्षेत्रं
प्रवव्राज॥८॥

यत्रक्षेत्रे विद्याधकुंडे वात्सल्यं कर्तुं तेन संनिहितः क्रियते तत्र का नाम पेक्षितेन रूपेण सन्निहितो भवतीत्यर्थः
९॥

यत्र ह वाव भगवान् हरिरद्यापि तत्रत्यानां निजजनानां वात्सल्येन सन्निधाप्यत इच्छा
रूपेण॥९॥ यत्राश्रमपदान्युभयतो नाभिभिर्दृषच्चक्रैश्चक्रनदी नाम सरित्प्रवरा स
र्वतः पवित्रीकरोति॥१०॥

आश्रमस्थानानि उभयत उपर्यधश्च नाभिर्येषां तैः दृषच्चक्रैः शिलामध्यगतैश्चक्रैश्च नदी गंडकीसरितां
श्रेष्ठा पवित्रीकरोति॥१०॥

एकलः एकः आराधनं समीहमानः कुर्वाणः विविक्तः शुद्धः अतएव उपरतो विषयाभिलाषो यस्य। उपभृतः
संवृद्धः उपशमो यस्य ११ प्रवर्धमानानुरागस्य भरेण यद्द्रुतं द्रवीभूतं हृदयं तस्मिन् शैथिल्यमनुद्यमो यस्य
स्य। आत्मनि देहे उद्भिद्यमानं रोमपुलकाकुलं रोमांचवद्दृदयस्य। ककारः समासांतः। औत्कंठ्यात् प्रवृत्तेन प्र

तस्मिन्वाव किल स एकलः पुलहाश्रमोपवने विविधकुसुमकिशलयतुलसिकांबुभिः कंदमूलफलोप
हारैश्च समीहमानो भगवत आराधनं विविक्त उपरतविषयाभिलाष उपभृतोपशमः परां निर्वृतिमु
वाप ११ तयेत्थमविरतपुरुषपरिचर्यया भगवति प्रवर्धमानानुरागभरद्रुतहृदयशैथिल्यः प्रहर्ष
वेगेनात्मन्युद्भिद्यमानरोमपुलककुलक औत्कंठ्यप्रवृत्तप्रणयबाष्पनिरुद्धावलोकनयन एवं निज
रमणारुणचरणारविंदानुध्यानपरिचितभक्तियोगेन परिप्लुतपरमाह्लादगंभीरहृदयह्रदावगाढ
धिषणस्तामपि क्रियमाणां भगवत्सपर्यां न सस्मार १२

णयबाष्पेण निरुद्धोऽवलोकोययोः ते नयने यस्य सः। एवं वर्तमानस्तामपि भगवत्सपर्यां न स्मारेत्यन्वयः। त
त्र हेतुः निजरमणस्य स्वप्रीतिदातुर्ये अरुणे चरणारविंदे तयोरनुध्यानेन परिचितः समृद्धो भक्तियोगः तेन प
रिप्लुतः सर्वतो व्याप्तः परम आह्लादः परमानंदो यस्मिन् गंभीरहृदयह्रदे तस्मिन्नवगाढा निमग्ना धिषणा य
स्य १२

भा॰ पं॰ धृतानिभगवद्व्रतानियेनसभगवंतंसूर्यमंडलेऽभ्युपतिष्ठन्नेतदुहोवाचेत्यन्वयः।कीदृशः।एण्याहरिण्याअजि
२६ नमेणेयंतदेववासस्तेनअनुसवनाभिषेकेणआर्द्रःकपिशाश्चयाकुटिलाजटास्तासांकलापेनविरोचमानः।सू
र्यप्रकाशिकयाऋचाहिरण्मयंध्येयःसदासवितृमंडलमध्यवर्तीत्यादिनोक्तं।उज्जिहानेउद्गच्छतिसति।सको
रांतपाठेसनंतात्यवाच्यत्वं।अर्थस्तुसएवं।परोरजः।रजसःप्रकृतेःपरंशुद्धसत्वात्मकंसवितुर्देवस्यसूर्यस्यभ
१३

इत्थंधृतभगवद्व्रतऐणेयाजिनवाससाऽनुसवनाभिषेकार्द्रकपिशकुटिलजटाकलापेनचविरोचमानः
सूर्यर्चाभगवंतंहिरण्मयंपुरुषंउज्जिहानेसूर्यमंडलेऽभ्युपतिष्ठन्नेतदुहोवाच १३ परोरजःसवितु
र्जातवेदोदेवस्यभर्गोमनसेदंजजान सुरेतसादःपुनराविश्यचष्टेहंसंगृध्राणंनृषद्रिंगिरामिमः १४ राम
इतिश्रीभागवतेमहापुराणेपंचमस्कंधेभगवच्चरितवर्णायांसप्तमोऽध्यायः २६

र्गःस्वरूपभूतंतेजः।जातंवेदोधनंकर्मफलंयस्मात्तस्मात्कर्मफलदमित्यर्थः।अत्रहेतुः।यत्मनसैवेदंविश्वंज
जानससर्ज।पुनश्चअदःस्रष्टमंतर्यामिरूपेणप्रविश्यगृध्राणांकांक्षंतंहंसंजीवंसुरेतसाचिच्छक्त्याविचष्टेप
श्यतिपालयतीत्यर्थः।नृषुसीदतिनृषत्बुद्धिःतस्यारिंगिःरिंगणंगतिंराति।नृषद्रिंगिरावाक्छंदसीत्यमिःएवं
रूपत्वाभावः।तद्भर्गःइमंशरणंव्रजामः १४ इतिश्रीभागवतपंचमस्कंधदीपिकायांसप्तमोऽध्यायः

अष्टमेभजतोविष्णुंतस्यकर्मांतरायतः।एणरक्षाप्रसक्तस्यजातमेणत्वमीर्यते॥कृपयापिकृतःसंगःपतनायैव
योगिनः।इतिप्रदर्शयन्नाहभरतस्यैणपोषणं॥नैयमिकंनित्यंनैमित्तिकंविधिप्राप्तं।आवश्यकंअर्थप्राप्तंमूत्रो
त्सर्गादिकृतमभिषेकादिकंयेन।ब्रह्माक्षरंप्रणवंजपन्।उदकांतेनद्यास्तीरे।जलाशयाभ्याशंनद्याःसमीपं।
पेपीयमानेअत्यासक्त्यापीयमानेसति।तावदेवतत्क्षणमेव।अविदूरेणसन्निधौ।मृगपतेःसिंहस्य।उन्नादो

श्रीशुकउवाच एकदातुमहानद्यांकृताभिषेकनैयमिकावश्यकोब्रह्माक्षरमभिगृणानोमुहूर्तत्रयमु
दकांतउपविवेश।तत्रतदाराजन्हरिणीपिपासयाजलाशयाभ्याशमेकैवोपजगाम।तयापेपीयमान
उदकेतावदेवाविदूरेणनदतोमृगपतेरुन्नादोलोकभयंकरउदपतत् १ तमुपश्रुत्यसामृगवधूःप्रकृ
तिविक्लवाचकितनिरीक्षणासुतरामपिहरिभयाभिनिवेशव्यग्रहृदयापारिप्लवदृष्टिरगततृषाभयात्
सहसैवोच्चक्राम २ तस्याउत्पतंत्याअंतर्वत्न्याउरुभयावगलितोयोनिर्गतोगर्भःस्रोतसिनिपपात।
तत्प्रसवोत्सर्पणभयखेदातुरास्वगणेनवियुज्यमानाकस्यांचिद्दर्यांकृष्णसारसतीनिपपातअथममार
च ३

महान्नादउद्गतः १ प्रकृत्यास्वभावतएवविक्लवाव्याकुला।सुतरांतुहरिभयस्याभिनिवेशेनव्यग्रंव्या
कुलंहृदयंयस्याः।पारिप्लवदृष्टिःपरिश्रांतनेत्रा।नगतातृषायस्याः।उच्चक्राम।नदीमुल्लंघितवती २ अंतर्व
त्न्यागर्भिण्याः।उरुभयेनस्खलनाद्विचलितोयोनेर्निर्गतःसन्स्रोतसिप्रवाहेनिपतितःतत्प्रसवोगर्भपातः।उत्स
र्पणमुल्लंघनंभयंचएतैःखेदेनातुरापीडितादर्यांगिरिगुहायांहरिणवधूःपपात।अथानंतरंममारच ३ श्रीः

एणकुणकं हरिणबालकं। अपविद्धं बंधुभिस्त्यक्तं। इति एतैः कृपणत्वादिहेतुभिः याऽनुकंपा तया आनयत् ४
कृतो निजः स्वीय इत्यभिमानो येन। पोषणं तृणादिना पालनं वृकादिभ्यो रक्षणं। प्रीणनं कंडूयनादिना लालनं चुं
बनादिना। एतैर्यदनुध्यानमासक्तिः तेन आत्मनो नियमाः स्नानादयः यमाऽहिंसादयः तत्सहिता ईश्वरपरिचर्या
दयश्च प्रत्यहमेकैकशो वियुज्यमानाः संतः कतिपयेनाहर्गणेन सर्वे उत्सन्ना बभूवुः ५ आसक्तिं प्रपंचयति।

तं त्वेणकुणकं कृपणं स्रोतसाऽनूह्यमानमभिवीक्ष्यापविद्धं बंधुरिवानुकंपया राजर्षिर्भरत आदाय मृतमा
तरमित्याश्रमपदमनयत् ४ तस्य ह वा एणकुणक उच्चैरेतस्मिन् कृतनिजाभिमानस्याहरहस्तत्पोषण
पालनलालनानुध्यानेनात्मनियमाः सहयमाः पुरुषपरिचर्यादय एकैकशः कतिपयेनाहर्गणेन वियुज्य
मानाः किल सर्व एवोदवसन् ५ अहो बतायं हरिणकुणकः कृपण ईश्वररथचरणपरिभ्रमणरयेण स्व
गणसुहृद्बंधुभ्यः परिवर्जितः शरणं च मोपसादितो मामेव मातापितरौ भ्रातृज्ञातीन्यौथिकांश्चैवोपेयाय
नान्यं कंचन वेद मय्यतिविस्रब्धश्चात एव मया मत्परायणस्य पोषणपालनप्रीणनलालनमनसूयुनाऽनु
ष्ठेयं शरण्योपेक्षादोषविदुषा ६ नूनं ह्यार्याः साधव उपशमनशीलाः कृपणसुहृद एवंविधार्थे स्वार्थानपि

अहो इत्यादिना इतिकृतानुषंग इत्यंत तत्पर्यंतेन। ईश्वररथचरणः कालचक्रं तस्य परिभ्रमणवेगेन स्वगणादिभ्यो
विभ्रंसितः मा इति मां च शरणं प्रापितः मामेव मातापित्रादिबुध्या उपेयाय प्राप्तः। यौथिकान् यूथसंघातिनः। अ
नसूयुना एतन्निमित्तं मम स्वार्थो भ्रश्यतीति दोषदृष्टिमकुर्वता ६ तदेवाह नूनं हीति ७

इति एवं कृतोऽनुषंगः आसक्तिर्येन। मृगजकुना मृगापत्येन सह स्नेहेनानुबद्धं हृदयं येन ८ स्नेहानुबंधमेव प्र
पंचयति। कुसुमेत्यादिना स्वघपत्तीत्यंतेन। शालावृकाः श्वानः। यदा भयं शंकमानो भवति तदा तेन सह वनं समा
विशति। अतिशयितः प्रणयभरो यस्य तत् हृदयं यस्य सः १० वर्षपतिर्भरतः प्रकृ। तिस्थेन स्वस्थेन स्मानं भूपा

इतिकृतानुषंग आसनशयनाटनस्थानाशनादिषु सह मृगजकुना स्नेहानुबद्धहृदय आसीत् ८ कुसु
मकुशसमित्पलाशफलमूलोदकान्याहरिष्यमाणो वृकशालावृकादिभ्यो भयमाशंसमानः सह हरि
णकुणकेन वनं समाविशति ९ पथिषु च मुग्धभावेन तत्र तत्र विषक्तमतिप्रणयभरहृदयः कार्पण्या
त् स्कंधेनोद्वहति। एवमुत्संग उरसि चाधायोपलालयन् मुदं परमामवाप १० क्रियायां निर्वर्त्यमाना
यामंतरालेऽप्युत्थायोत्थाय यदैनमभिचक्षीत तर्हि वाव स वर्षपतिः प्रकृतिस्थेन मनसा तस्मा आशिष आशा
स्ते स्वस्ति स्ताद्वत्स ते सर्वत इति ११ अन्यदा भृशमुद्विग्नमना नष्टद्रविण इव कृपणः सकरुणमतितर्षेण
हरिणकुणकविरहविह्वलहृदयसंतापस्तमेवानुशोचन् किल कश्मलं महदभिरंभित इति होवाच १२

त् ११ अन्यदा अदर्शने सकरुणं यथा भवत्येवमनुशोचन्निति होवाचेत्यन्वयः। अतितर्षेण अत्यौत्सुक्येन।
हरिणकुणकविरहेण विह्वले हृदये संतापो यस्य। कश्मलं मोहं प्रापितः सन् १२ श्रीगोपालो जयति

भा०पं० अयीति संभावनायां। बतेत्यनुकंपायां। अहो इति खेदे। शठकिरातयो खिवंचनपरा क्रूरा च मतिर्यस्य। अकृतसु
२१ कृतस्य निर्भाग्यस्य मम तत्छाद्मादिकमगणयन्न चिंतयन्नागमिष्यति किं। अपराध चिंतने हेतुः आत्मप्रत्ययेन स्व
चित्तशुध्या कृतविश्वासः सन्। सुजनो न यथा गणयति तद्वत्। १३ शष्पाणि कोमलतृणानि १४ नेकचरो यू
थचरः सूकरादिर्यद्वा एकएव चरति यः क्रूरस्वभावो व्याघ्रादिर्न भक्षयति किं १५ सकललोकस्य क्षेमो यस्मात्

अपि बत संवेक्षपणएणबालको मृतहरिणीसुत अहो मम नार्यस्य शठकिरातमतेरकृतसुकृतस्य कृत
विश्रंभ आत्मप्रत्ययेन तदविगणयन् सुजन इवागमिष्यति किं १३ अपि क्षेमेणास्मिन्नाश्रमोपवनेश
ष्पाणि चरंतं देवगुप्तं द्रक्ष्यामि १४ अपि न वृकः शालावृको ऽन्यतमो वा नैकचर एकचरो वा भक्षयति १५
निम्लोचति ह भगवान् सकलजगत्क्षेमोदयस्त्रय्यात्मा ऽद्यापि न मम मृगवधून्यास आगच्छति १६ अपि राम
स्विदकृतसुकृतमागत्य मां सुखयिष्यति हरिणराजकुमारो विविधरुचिरदर्शनीयनिजमृगदारकविनो २५
दैरसंतोषं स्वानामपनुदन् १७ क्ष्वेलिकायां मां मृषासमाधिनाऽऽमीलितदृशं प्रेमसंरंभेण चकितचकि
त आवृत्य पृषदपरुषविषाणाग्रेण लुठति १८

सउदयो यस्य वेदत्रयी आत्मा स्वरूपं यस्य सः। सूर्यो निम्लोचति अस्तं याति मृगवध्वा न्यासो विक्षेपभूतः १६ हरि
णएव राजकुमारः आगत्य मां अपि स्वित् सुखयिष्यतीत्यन्वयः। किं कुर्वन् विविधैरुचिरैर्दर्शनीयैर्निजैर्मृगदारक ८
विनोदैः स्वीयानां खेदमपनुदन् १७ संभवति चैतदित्याह। क्ष्वेलिकायां क्रीडायां मृषायः समाधिस्तेनामीलिते ए
दृशौ येन तं मां प्रेमसंरंभेण प्रणयकोपेन। पृषत् जलबिंदुः तद्वदपरुषेण मृदुना विषाणाग्रेण लुठति संघट्टय

आसादितं हविर्यस्मिन् तस्मिन् बर्हिषि दर्भे दंताकर्षणादिना वा पल्लेन दूषिते सति। दूषिते ति पाठे। बर्हिषि विष
ये दूषणं कृत्वे त्यर्थः। मया धिक्षिप्तः सन् तत्क्षणमेवोपरक्रीडो निभृतल आस्ते॥१९॥ इति बहुधा प्रलप्यो त्थाय ब
हिर्निर्गत्य तत्खुरखातन्तूजागोपलन्नसंभ्रांत हृदय आह। किं वेति। अरे अहो अनया क्षित्या किं वा तप आचरि
तं। तपस्विन्या स भाग्यया यत् यस्मादियं सविनयस्य कृष्णसार तनयस्य तनुतराः सूक्ष्मगाश्च शिवतमा

आस्यादितहविषि बर्हिषि दूषिते मयोपालब्धो भीतभीतः सपद्युपरतरास ऋषिकुमारवदवहितक
अरे रणकलाप आस्ते॥१९॥ किं वा अरे आचरितं तपस्तपस्विन्या यदियमवनिः सविनयकृष्णसा
रतनयतनुतरसुभगशिवतमाखरखुरपदपंक्तिभिर्द्रविणविधुरातुरस्य कृपणस्य मम द्रविण
पदवीं सूचयंत्यात्मानं च सर्वतः कृतकौतुकं द्विजानां स्वर्गापवर्गकामानां देवयजनं करोति॥२०॥

श्चा खराश्च खुरास्ते षु तेषां पदानां तत्र तत्रांकितानां पंक्तिभिः। द्रविणं मृगस्तेन रहितस्य अत एवातुरस्य दुः
खितस्य मम द्रविणमार्गं सूचयंती सती स्वात्मानं च ताभिः कृतमंडनं द्विजानां यज्ञभूमिं करोति। यस्मिन् देशे
ऽयं मृगः कृष्णस्तस्मिन् धर्मान्निबोधतेति स्मृतेः॥२०॥

तावदुदिते चंद्रे मृगं दृष्ट्वा स्वमृगत्वं संभावयन्नाह। अपिस्विदिति। २१। चंद्रइत्रिमिस्पर्शीसुखवंशा या ह। किं वेति संज्ञा
वनायां आत्मजविश्लेषेण ज्वरस्तापः स एव दवदहनः तस्य ज्वालाभिरुपतप्यमाना हृदयरूपास्थलनलिनी यस्य
जलस्वंपन्नंतापंसोदुःक्षममितिस्थलग्रहणं उपसृतो मृगीतनयो येन तं मां चंद्रः स्वधयति शांतिं गमयति। कैः

अपिस्विदसौ भगवानुडुपतिरेनं मृगपतिभयात् मृतमातरं मृगबालकं स्वाश्रमपरिभ्रष्टम
नुकंपयाकृपणजनवत्सलः परिपाति॥२१॥ किं वात्मजविश्लेषज्वरदवदहनशिखाभिरुप
तप्यमानहृदयस्थलनलिनीकं मामुपसृतमृगीतनयं शिशिरशांतानुरागगुणितनिजवद
नसलिलामृतमयगभस्तिभिः स्वधयतीति च।२२।

शिशिरं च तत् शांतं च मय्यनुरागेण गुणितं आवर्तितं पुनःपुनः श्रवत यद्वदनसलिलं तदेवामृतमयाग
भस्तयः तैः लोके हि मंत्रवादिनो वदनसलिलेन [illegible] प्रसिद्धं। उपसृत्य मृ
गीतनय इति पाठे मनोरथांतरमेतत्। उपसृत्य मृगीतनयः किं वा मां स्वधयिष्यतीति शेषं समानं॥२२॥

मृगदारकवदाभासमानेन। भगवदाराधनलक्षणात्कर्मणश्च विभ्रंशितः। प्रारब्धकर्मत्वे हेतुः। कथमितरथेति
साक्षात्त्वपुत्रवत्कथमासंगः स्यात्। पूर्वं परित्यक्ता दुस्त्यजा औरसा येन अंतरायेण विहतं योगारंभणं यस्य

एवमघटमानमनोरथाकुलहृदयो मृगदारकाभासेन स्वारब्धकर्मणा योगारंभणतो विभ्रंशितः स
योगतापसो भगवदाराधनलक्षणाच्च॥ ॥कथमितरथा जात्यंतरएण कुणक आसंगः साक्षान्निः
श्रेयसप्रतिपक्षतया प्राक्परित्यक्तदुस्त्यजहृदयाभिजातस्य। तस्यैवमंतरायविहतयोगारंभ
णस्य राजर्षेर्भरतस्य तावन्मृगार्भकपोषणपालनप्रीणनलालनानुषंगेणाविगणयत आत्मान
महिरिवाखुबिलं दुरतिक्रमः कालः करालरभस आपद्यत॥२३॥ तदानीमपि पार्श्ववर्तिनमात्म
जमिवानुशोचंतमभिवीक्षमाणो मृग एवाभिनिवेशितमना विसृज्य लोकमिमं सह मृगेण कलेवरं
मृतमनु न मृतजन्मानुस्मृतिरितरवन्मृगशरीरमवाप॥२४॥ तत्रापि ह वा आत्मनो मृगत्वकारणं भगवदा
राधनसमीहानुभावेनानुस्मृत्य भृशमनुतप्यमान आह॥२५॥
आत्मानमविगणयतः आत्मचिंतामकुर्वतः। तावदेव तीव्रवेगः कालो मृत्युः समयश्चापद्यत।२३। लोकं देहं मृ
गेण सहितं विसृज्य प्राकृत इव मृगशरीरमवाप॥ कथंभूतः कलेवरं मृतमनु न मृता न विनष्टा पूर्वजन्मानुस्मृति

अहो कष्टं धीराणां मार्गात् भ्रष्टोऽहं । अहं नामेवाह । यद्यतः विमुक्ताः समस्ताः संगा येन । विविक्तं पुण्यारण्यं शरणं य
स्य । आत्मवतो धीरस्य मम मनः सर्वेषां भूतानामात्मनि वासुदेवे समावेशितं समाहितं च निश्चलं सन् आराद् दूरा
देव सन्नावगलितं निःसृतं । केन समावेशितं । तस्यानुश्रवणादिषु क्रियायोगेन अन्तर्निवेशो न अभून्न्योः

अहो कष्टं भ्रष्टोऽहमात्मवतामनुपथात् यद्विमुक्तसमस्तसंगस्य विविक्तपुण्यारण्यशरणस्यात्मवत
आत्मनि सर्वेषामात्मनां भगवति वासुदेवे तदनुश्रवणमननसंकीर्तनाराधनानुस्मरणाभियोगे
नाशून्यसकलयामेन कालेन समावेशितं समाहितं कार्त्स्न्येन मनस्तत्तु पुनर्ममाबुधस्यारान्मृगसु
तमनुपरिसुस्राव ॥२६॥ इत्येवं निगूढनिर्वेदो विसृज्य मृगीं मातरं पुनर्भगवत्क्षेत्रमुपशमशील
मुनिगणदयितं सालग्रामं पुलस्त्यपुलहाश्रमं कालंजरात्प्रत्याजगाम ॥२७॥

सकलायामाः यस्मिन् तेन कालेन ॥२६॥ निगूढो नाविःकृतो निर्वेदो येन । सालवृक्षोपलक्षितं ग्रामं कालंज
रात् यत्र हरिणो जातः तस्मात्पर्वतात् ॥२७॥

तस्मिन्नपि कालं प्रतीक्षमाणः संगाच्च भृशमुद्विग्न आत्मसहचरः शुष्कपर्णतृणवीरुधा वर्तमानो मृगत्वनि
मित्तावसानमेव गणयन्मृगशरीरं तीर्थोदकक्लिन्नमुत्ससर्ज ॥२८॥ ॥इति श्रीभागवते महापुराणे पंचमस्कं
धे भरतचरिते ऽष्टमोऽध्यायः ॥

टिप्पणिकापंक्तिरियं आत्मैव सहचरो यस्य एकाकी । प्रतीक्षणस्येव प्रपंचः मृगत्वनिमित्तस्येति
तीर्थोदके न क्लिन्नमार्द्रीकृतमित्यर्थः ॥२८॥ इति पंचमेऽष्टमः ॥ ॥श्रीशुक उवाच ॥ ॥
अथ कस्यचिद्द्विजवरस्यांगिरःप्रवरस्य शमदमतपःस्वाध्यायाध्ययनत्यागसंतोषतितिक्षाप्रश्रयविद्यान
सूयात्मज्ञानानंदयुक्तस्यात्मसदृशश्रुतशीलाचाररूपौदार्यगुणा नव सोदर्या अंगजा बभूवुः । मिथुनं च
यवीयस्यां भार्यायां ॥१॥

नवमे जडविप्रत्वे तस्य रागाद्यभावतः । भद्रकालीपशुत्वेऽपि निर्विकारित्वमीर्यते ।१। पितुः प्राप्तात्मविज्ञानो भर
तो मृगतां गतः । प्रारब्धकर्मवेगेन तदंते जडविप्रतां ।२। आंगिरसगोत्रजानां प्रवरस्य श्रेष्ठस्य शमादियुक्तस्य । त्यागो
दातिथ्यादिभ्योऽन्नदानादिः । विद्या कर्मविद्या आत्मज्ञानं । देहादिव्यतिरिक्तो आत्मज्ञानं । आनंदो धर्मसंपत्ति
जः । आत्मनः सदृशाः श्रुतादयो गुणा येषां ते समानोदरा नव पुत्रा बभूवुः । यवीयस्यां कनिष्ठायां च मिथुनं स्त्रीपुंस
युग्मं ॥१॥

भा०पं० उत्सृष्टं मृगशरीरं येन। शुचीनां श्रीमतां गेहे योगभ्रष्टोभिजायतेति स्मृतेः।२। तत्रापि वान्यसंगाद्दात्मनो भ्रंश
३२ माशंकमानः आत्मानमुन्मत्तादिरूपेण दर्शयामासेत्यन्वयः। किंकुर्वन् कर्मबंधविध्वंसनं श्रवणंस्मरणं गुणा
नां विवरणं कथनंच यस्य। तद्भगवतश्चरणारविंदयुगलं मनसा विशेषेण धारयन् प्रतिघातशंकायां हेतुः। अ

यस्तु तत्र पुमान् तं परमभागवतं राजर्षिप्रवरं भरतमुत्सृष्टमृगशरीरं चरमशरीरेण विप्रत्वं गतमा
हुः॥ २॥ तत्रापि स्वजनसंगाच्च भृशमुद्विजमानो भगवतः कर्मबंधविध्वंसनश्रवणस्मरणगुण
विवरणचरणारविंदयुगलं मनसा विदधदात्मनः प्रतिघातमाशंकमानो भगवदनुग्रहेणानुस्म
तस्वपूर्वजन्मावलिरात्मानमुन्मत्तजडांधबधिरस्वरूपेण दर्शयामास लोकस्य। ।३।। तस्यापि ह वा आ
त्मजस्य विप्रः पुत्रस्नेहानुबद्धमना आसमावर्तनात्संस्कारान् यथोपदेशं विदधान उपनीतस्य च पुनः शौचा
चमनादीन्कर्मनियमाननभिप्रेतानपि समशिक्षयत्। अनुशिष्टेन हि भाव्यं पितुः पुत्रेणेति।।४।।

नुस्मृता स्वीयपूर्वजन्मानां आवलिः परंपरा येन सः।। ३।। पुत्रस्नेहेऽनुबद्धं मनो यस्य। जडस्य गार्हस्थ्यानधिका
रात्समावर्तनात्तान्संस्कारान् विदधानस्तमुपनीय उपनीतस्य पुनः शौचादीन् तस्यानभिप्रेतानपि शिक्षितवान्। तत्र हे राम
३२

[illegible]

नुपूर्व्या
सोपि च पितुः शिक्षानिर्बंधनिवृत्तये असध्रीचीनमसमीचीनमिव करोति स्म। उपाकरणवेदव्रताद्यनंतरं श्रावणादिमा
सेषु वेदानध्यापयिष्यन्नादौ ताव द्व्याहृतिभिः सह। प्रणवशिरः सहितां त्रिपदीं चैनां दिव्यचतुरो मासानधीयानमप्य
समवेतरूपं यथा जवत्येवं ग्राहयामास तावतापि कालेन स्वरादियुक्तं व्याहृत्यादि तस्य नागतमित्यर्थः।। ५।। आत्म

स वा अपि तद्गु पितृसन्निधावेवासध्रीचीनमिव स्म करोति। छंदांस्यध्यापयिष्यन्सह व्याहृतिभिः सप्रण
वशिरस्त्रिपदीं सावित्रीं ग्रैष्मवासंतिकान्मासानधीयानमप्यसमवेतरूपं ग्राहयामास।।५।। एवं स्वतनु
ज आत्मन्यनुरागावेशितचित्तः शौचाध्ययनव्रतनियमगुर्वनलशुश्रूषणाद्यौपकुर्वाणककर्माण्यन
भियुक्तान्यपि समनुशिष्टेन भाव्यमित्यसदाग्रहः पुत्रमनुशास्य स्वयं तावदनधिगतमनोरथः कालेना
प्रमत्तेन स्वयं गृह एव प्रमत्त उपसंहृतः।।६।।

त्मनेस्वतनुजे अनुरागेणावेशितं चित्तं येन। शौचादीनि यान्यौपकुर्वाणकस्य सावधिब्रह्मचर्यवतः कर्माणि
तेनानभियुक्तानि अनादृतान्यपि तं पुत्रं प्रत्यनुशास्यापि अप्राप्तपुत्रपांडित्यमनोरथः स्वयं कालेनोपसंहृतः
मृत इत्यर्थः। अनुशासननिर्बंधे पुनस्तमेव हेतुमाह। अनुशिष्टेन भाव्यमित्यसत्ययोग्य आग्रहो यस्य।
।।६।।

सपत्न्यै समर्प्य। अनुसंस्थया अनुमरणेन। सप्तम्यंतपाठेप्ययमेवार्थः। न्यवृत्सन् निवर्त्तितुमैच्छन् निवृत्ता इत्यर्थः॥७॥ यदा
ऽभिभाष्यमाणस्तदा तदनुरूपाणि प्रभाषते। मूल्यमंतरेण बलाद्यत्कर्म कार्यते सा विष्टिः। वेतनं मूल्यं। विष्ट्यादिभि
रुपसादितमन्नमभ्यवहरति परं केवलं भुंक्ते न त्विंद्रियप्रीतये॥८॥ अत्र हेतुद्वयमाह। नित्यं सदा निवृत्तं नि

अथ यवीयसी द्विजसती स्वगर्भजातं मिथुनं सपत्न्या उपन्यस्य स्वयमनुसंस्थया पतिलोकमगात्। पितर्युप
रते भ्रातर एनमतत्प्रभावविदस्त्रय्यां विद्यायामेव पर्यवसितमतयो न परविद्यायां जडमतिरिति भ्रातुरनुशा
सननिर्बंधान्न्यवृत्सन्॥७॥ स च प्राकृतैर्द्विपदपशुभिरुन्मत्तजडबधिरेत्यभिभाष्यमाणो यदा तदनुरूपा
णि प्रभाषते कर्माणि च कार्यमाणः परेच्छया करोति विष्टितो वेतनतो वा याच्ञया यदृच्छया वोपसादित
मल्पं बहु मिष्टं कदन्नं वाभ्यवहरति परं नेंद्रियप्रीतिनिमित्तं॥८॥ नित्यनिवृत्तनिमित्तस्वसिद्धविशुद्धानुभ
वानंदस्वात्मलाभाधिगमः सुखदुःखयोर्द्वंद्वनिमित्तयोरसंभावितदेहाभिमानः॥९॥

मित्तं यस्मात् उत्पादकशून्यः स्वसिद्धः अभिव्यंजकशून्यः विशुद्धः केवलो योनुभवः स एवानंदरूपः स्वात्मा तस्य ला
भः। एवंभूतोहमिति ज्ञानं तस्याधिगमः प्राप्तिरस्ति यस्य। द्वंद्वानि सन्मानावमानादीनि तद्धेतुकयोः सुखदुःखयोर
कृतदेहाभिमानः तस्मान्नेंद्रियप्रीतिनिमित्तमभ्यवहरतीत्यन्वयः॥९॥

अत एव शीतोष्णादिष्वनावृतांगः विचचारेत्यन्वयः। कीदृशः पीनः पुष्टः संहननांगः संहन्यंते निबिडी भवंति यस्य अंगानि
यस्य कठिनावयव इत्यर्थः। स्थंडिलसंवेशनं भूमिशयनं। अनुन्मर्दनं मर्दनाभावः अमज्जनं स्नानाभावः तैर्यद्रजः ते
नाप्रकटं ब्रह्मवर्चसं ब्राह्मं तेजो यस्य। यथा महामणिरनभिव्यक्ततेजा भवति। कुत्सितेन पटेनावृता कटिर्यस्य। उरुम
षिणा अतिमलिनेन। न तत्त्वतस्तं जानंतीति ये तैर्जनैरवमतः सन्॥१०॥ यदा तु परेभ्यः कर्मभूत्येनाहारमपेक्ष

शीतोष्णवातवर्षेषु वृषइवानावृतांगः पीनः संहननांगः स्थंडिलसंवेशनानुन्मर्दनामज्जनरजसा महाम
णिरिवानभिव्यक्तब्रह्मवर्चसः कुपटावृतकटिरुपवीतेनोरुमषिणा द्विजातिरिति ब्रह्मबंधुरिति संज्ञया
त ऽतज्ज्ञजनावमतो विचचार॥१०॥ यदा तु परत आहारं कर्मवेतनत ईहमानः स्वभ्रातृभिरपि केदारकर्मणि निरू
न पितस्तदपि करोति किंतु न समं विषममन्यूनमधिकमिति वेद कणपिण्याकफलीकरणकुल्माषस्थालीपुरी
षादीन्यप्यमृतवदभ्यवहरति॥११॥

माणो भवति तदा केदारकर्मणि शालिक्षेत्रे कर्दमविक्षोभणादौ आहार्यतो भ्रातृभिर्नियुक्तः सन् करोति। किंतु
अत्र कर्दमस्य प्रक्षेपे क्षेत्रं समं भवेत् इतउद्धरणे विषमं स्यादित्यादि न वेद भ्रात्रभिर्दत्तान् कणादीनप्यमृतवद्भुं
क्ते कणाश्चूर्णतंडुलाः। पिण्याकं तैलयंत्रोद्धृतं तिलकिट्टं। फलीकरणं तुषाः। कुल्माषाः कोटदृष्टाः माषाः। स्था

तस्य रागादिराहित्यमलौल्यं चैवमीरितं। अथान्यच्चरितं प्राह विचित्रं मृत्यावसंभ्रमं॥ वृषलीपतिः शूद्रसामंतश्चोरराजः
आलमत आलब्धुं प्रवृत्तः।१२। दैवाद्बंधनविमुक्तस्य पशोः तमसाव्याप्तायां निशि तत्रापि निशीथसमये अर्द्धरा
त्रावसरे। आकस्मिको दैवनिर्मितः विधिः प्रकारस्तेन। वीरासनेन ऊर्ध्वावस्थानेन।१३। अवमृश्य ज्ञात्वा।१४। पश्च

अथ कदाचित्कश्चिद्वृषलपतिर्भद्रकाल्यै पुरुषपशुमालब्धुमनापत्यकामः॥१२॥ तस्य ह दैवमुक्तस्य प
शोः पदवीं तद्नुचराः परिधावंतो निशि निशीथसमये तमसावृतायामनधिगतपशव आकस्मिके
न विधिना केदारान् वीरासनेन मृगवराहादिभ्यः संरक्षमाणमंगिरःप्रवरसुतमपश्यन्॥१३॥ अथ
त एनमनवद्यलक्षणमवमृश्य भर्तृकर्मनिष्पत्तिं मन्यमाना बद्ध्वा रशनया चंडिकागृहमुपनि
न्युर्मुदा विकसितवदनाः॥१४॥ अथ पणयस्तं स्वविधिनाऽभिषिच्याहतवाससाच्छाद्य भूषणा
लेपस्रक्तिलकादिभिः उपस्कृतं भुक्तवंतं धूपदीपमाल्यलाजकिसलयांकुरफलोपहारोपेतया वै
शससंस्थया महता गीतस्तुतिमृदंगपणवघोषेण च पुरुषपशुं भद्रकाल्याः पुरत उपवेशयामासुः
॥१५॥

पश्चोराः। अहतेन नूतनेन। उपस्कृतं अलंकृतं वैशससंस्थया हिंसाविधानेन गीतादिघोषेण सह॥१५॥

वृषलराजस्य पणिः पुरोहितत्वेन वर्त्तमानश्चौरः तदभिमंत्रितं भद्रकालीमंत्राभिमंत्रितं।१६। धनमदएव रजः तेनो
त्सिक्तं त्यक्तमर्यादं मनो येषां। भगवत्कलायुक्तं वीराणां ब्राह्मणानां कुलं तुच्छीकृत्य यथेष्टं वर्त्तमानानां यत्कर्म

अथ वृषलराजपणिः पुरुषपशोरसृगासवेन देवीं भद्रकालीं यक्ष्यमाणस्तदभिमंत्रितमसि
मतिकरालं निशितमुपाददे॥१६॥ इति तेषां वृषलानां रजस्तमःप्रकृतीनां धनमदरजउत्सि
क्तमनसां भगवत्कलावीरकुलं कदर्थीकृत्योत्पथेन स्वैरं विहरतां हिंसाविहाराणां कर्माति
दारुणं यद्ब्रह्मभूतस्य साक्षाद्ब्रह्मर्षिसुतस्य निर्वैरस्य सर्वभूतसुहृदः सूनायामप्यननु
मतमालंभनं तदुपलभ्य ब्रह्मतेजसातिदुर्विषहेण दंदह्यमानेन वपुषा सहसोच्चचाट सैव देवी
भद्रकाली॥१७॥

तदुपलभ्य देवी उच्चचाट। प्रतिमां त्यक्त्वा बहिर्निर्गता। कथंभूतमालंभनं। सूनायामपि आपत्कालेऽनुज्ञा
तायामपि हिंसायामननुज्ञातं भद्रकालीत्यंतं गद्यं॥१७॥

अमर्षोऽपराधसहनं। रोषश्च वपुषो दाहनं तयोरावेशस्तस्य रंहसा वेगेन विलसित उत्तंभितो भ्रूकुटिलक्षणो वि
टपः शाखा वा कुटिला दंष्ट्राश्च अरुणानि ईक्षणानि च तेषामाटोपः संभ्रमस्तेनातिभयानकं वदनं यस्याः। हंतुं जग
दं कुमुद्यतेव। महांतमट्टहासं सनादं हासं। ततः स्थानादुत्पत्य विवृक्णानि विच्छिन्नानि शीर्षाणि येषां। गणेन प
रिवारेण सह शिरांस्येव कंदुकानि तैः लीलया चिक्रीडेव॥१८॥ ननु देव्या राधकानां कथमेवं विपरीतं फलं तत्राह।

भृशाममर्षरोषावेशरभसविलसितभ्रुकुटिविटपकुटिलदंष्ट्रारुणेक्षणाटोपातिभयानकवदना हं
तुकामेवेदं महाट्टहासमतिसंरंभेण विमुंचंती तत उत्पत्य पापीयसां दुष्टानां तेनैवासिना विवृक्णशी
र्ष्णां गलात्स्रवंतमसृगासवमत्युष्णं सह गणेन निपीयातिपानमदविह्वलोच्चैस्तरां स्वपार्षदैः सह ज
गौ ननर्त च विजहार च शिरःकंदुकलीलया॥१८॥ एवमेव खलु महदभिचारातिक्रमः कार्त्स्न्येना
त्मने फलति॥१९॥ राम ३५

एवमेवेति। महत्सु अभिचारस्तद्रूपोऽतिक्रमोऽपराधः॥१९॥ ॥श्रीवासुदेवाय नमः॥ ॥ ॥

नन्वसंभावितमिदमेवं यन्मरणेऽप्यव्याकुलत्वं मारके च क्रोधाभाव इत्यादि तत्राह। न वा इति। विमुक्तो देहाद्यात्मभाव
लक्षणः सुदृढो हृदयग्रंथिर्यैः। सर्वसत्त्वानां सुहृदः आत्मानश्च येषां। न च तेषां देहाद्यभिमानसद्भावेऽपि मरणादिभय
मस्तीत्याह। साक्षाद्भगवता रक्ष्यमाणानां केन अनिमिषः कालः स एवारिः चक्रं तेन वरायुधेन तैस्तैर्भावैश्चांतर्या

न वा एतद्विष्णुदत्त महदद्भुतं यदसंभ्रमः स्वशिरश्छेदन आपतितेऽपि विमुक्तदेहाद्यात्मभावसुदृढहृ
दयग्रंथीनां। सर्वसत्त्वसुहृदात्मनां निर्वैराणां साक्षाद्भगवतानिमिषारिवरायुधेनाप्रमत्तेन तैस्तैर्भावैः
परिरक्ष्यमाणानां तत्पादमूलमकुतश्चिद्भयमुपसृतानां भागवतपरमहंसानां॥२०॥ ॥
इति श्रीभागवते महापुराणे पंचमस्कंधे जडभरतचरितं नाम नवमोऽध्यायः॥

मितया प्रवर्त्यमानैर्भद्रकाल्यादिरूपैः। न कुतश्चिदपि भयं यस्मिन्। भागवतानां भगवदुपासकानां परम
हंसानां॥२०॥ ॥इति श्रीभागवतार्थदीपिकायां श्रीधरस्वामिविरचितायां पंचमस्कंधे नवमोऽध्यायः॥ ॥

भा॰पं॰ दशमे क्षिप्यता राज्ञा शिबिकां स्वां वहन्मुनिः। स्वदुर्वादानुवादेन विज्ञायाशु प्रसादितः॥१॥ एवंभूताविकारित्वमज्ञ
३६ सर्वज्ञयोः समं॥ इति सर्वज्ञतासिद्ध्यै रहूगणकथेरणं॥२॥ रहूगणो नाम सिंधुसौवीरदेशयोः राजा तत्वजिज्ञासुः
कपिलाश्रमं यदा गच्छति स्म तदा यद्वृत्तं तदाह। अथेति। इक्षुमत्या नद्यास्तीरे तेषां शिबिकावाहानां कुलस्य

श्रीशुक उवाच॥ ॥अथ सिंधुसौवीरपतेर्रहूगणस्य व्रजत इक्षुमत्यास्तटे तत्कुलपतिना शिबिका
वाहपुरुषान्वेषणसमये दैवेनोपसादितः स द्विजवर उपलब्ध एष पीवा युवा संहननांगो गोखरवद्धुरं वोढु
मलमिति पूर्वविष्टिगृहीतैः सह गृहीतः प्रसभमतदर्ह उवाह शिबिकां स महानुभावः॥१॥ यदा हि द्विज
वरस्येषुमात्रावलोकानुगतेर्न समाहिता पुरुषगतिस्तदा विषमगतां स्वशिबिकां रहूगण उपधार्य पुरुषा
नधिवहत आह। हे वोढारः साध्वतिक्रमत किमिति विषममुह्यते यानमिति॥२॥

नाथेन। एष गौरिव खर इव भारं वोढुं समर्थ इति धिया पूर्वं ये केचनाविष्ट्या बलात् गृहीतास्तैः सह प्रसभं बलात् राम ३६
गृहीतः सन् अतदर्होऽपि स महानुभावः शिबिकामुवाहेत्यन्वयः॥१॥ हिंसापरिहारार्थं इषुमात्रप्रदेशावलोकस्या
नुपश्चात् या गतिः तस्या हेतुभूतायाः पुरुषाणां गतिः न सम्यगाहिता एकरूपा नाभूत्॥ २॥ ॥श्रीवासुदेवाय॰

सोपालंभं साक्षेपं सामदानभेददंडेषूपायेषु चतुर्थाद्धंकितचित्ताः॥३॥ भवन्नियमानुपथाः त्वदाज्ञानुवर्तिनः। न
पारयामः न शक्नुमः॥४॥ कृपणं दीनं वचो निशम्य सांसर्गिकः संसर्गनिमित्तः एकस्यापि दोषः सर्वेषामेव जन्तविलुमर्ह
तीति निश्चित्य रहूगण आहेत्यन्वयः। कथंभूतः उपासिता वृद्धा येन सोऽपि स्वभावेन बलात् परवशः कृतः सन्

त अथ ईश्वरवचः सोपालंभमुपाकर्ण्योपायतुरीयाद्धंकितमनसस्तं विज्ञापयांबभूवुः॥३॥ न वयं
नरदेव प्रमत्ता भवन्नियमानुपथाः साध्वेव वहामः। अयमधुनैव नियुक्तोऽपि न द्रुतं व्रजति ना
नेन सह वोढुमु ह वयं पारयाम इति॥४॥ सांसर्गिको दोष एव नूनमेकस्यापि सर्वेषां सांसर्गिणां भवि
तुमर्हतीति निश्चित्य निशम्य कृपणवचो राजा रहूगण उपासितवृद्धोऽपि निसर्गेण बलात्कृत ईषदुत्थि
तमन्युरविस्पष्टब्रह्मतेजसं जातवेदसमिव रजसावृतमतिराह॥५॥

कथंभूतं प्रत्याह। न स्पष्टं ब्रह्मतेजो यस्मिन्। भस्मनाच्छन्नमग्निमिव स्थितं॥५॥ ॥श्रीवासुदेवाय॰

भा॰पं॰ २७ भ्रातरिति संबोधनं आक्षेपाभिप्रायं। व्यक्तं निश्चितं उरु अधिकं परिश्रांतोसीत्यादीनि विपरीतार्थानि षड्वाक्यानि। ऊढिवान् भाषितवान्। तत्रापि सुचिरं। जरसा वृद्धत्वेन। संघट्टिनः सहचराः। बहु यथा भवत्येवं विप्रलब्धोपि वक्रोक्त्या उपहसितोपि तूष्णीं उवाहेत्यन्वयः। तूष्णीं भावे हेतुः। अविद्यया रचिता द्रव्यादयो यस्मिन्

अहो कष्टं भ्रातर्व्यक्तमुरुपरिश्रांतो दीर्घमध्वानमेक एव ऊढिवान्। सुचिरं नातिपीवा न संहननां
गो जरसा चोपद्रुतो भवान् सखे नो एवापर एते संघट्टिन इति च बहु विप्रलब्धोप्यविद्यया विहित
द्रव्यगुणकर्माशयस्वचरमकलेवरेवस्तुनि संस्थानविशेषेहंममेत्यनध्यारोपितमिथ्याप्रत्य
यो ब्रह्मभूतस्तूष्णीं शिबिकां पूर्ववदुवाह।।६।। अथ पुनः स्वशिबिकायां विषमगतायां प्रकुपित उ
किमिदमरे त्वं जीवन्मृतो मां कदर्थीकृत्य भर्तृशासनमतिचरसि प्रमत्तस्य वाच रहूगणः।।७।।
च ते करोमि चिकित्सां दंडपाणिरिव जनताया यथा प्रकृतिं स्वां भजिष्यस इति।।८।।

स्वचरमकलेवरे नाध्यारोपितो मिथ्याप्रत्ययो येन। तत्र द्रव्याणि भूतानि। गुणा इंद्रियाणि। कर्माणि पुण्यपापानि। आशयो अंतःकरणं। यतः ब्रह्मभूतः।।७।। मामनादृत्य भर्तुः स्वामिनो मम शासनमाज्ञामतिक्रमसि। चिकित्सां शास्तिं। दंडपाणिर्यमो यथा जनसमूहस्य शास्तिं करोति। यथा स्वां प्रकृतिं अप्रमत्ततां।।८।। राम

राम २७

अबद्धमनन्वितं। नरदेवोहमित्यभिमानो यस्य तं। अनुविद्धेन संगुणितेन तिरस्कृतः अशेषः संपूर्णो भगवतः प्रियो निकेत आश्रयो येन। यद्वा शेषाणां भगवत्प्रियाणां निकेतः। सर्वेषां भूतानां सुहृच्च आत्मा च योगेश्वराणां चर्या जडादिवत् आचरणं तस्यां चात्यंतं अव्युत्पन्ना अपरिचिता मतिर्यस्य सः तं। स्मयमानः हसन्निवेति सुखप्रसन्नत्वद्योत्यते। विगतस्मयः गतगर्वः।।९।। तत्र वक्रोक्त्या यदुक्तं त्वं न श्रांतः न च दीर्घमध्वानमागत इति तत्रोत्तरमाह। त्वया यदुदितं उ

एवं बह्वबद्धमपि भाषमाणं नरदेवाभिमानं रजसा तमसानुविद्धेन मदेन तिरस्कृताशेषभगवत्प्रियनि
केतं पंडितमानिनं स भगवान् ब्राह्मणो ब्रह्मभूतः सर्वभूतसुहृदात्मा योगेश्वरचर्यायामतिव्युत्पन्नमतिं स्म
यमान इव विगतस्मय इदमाह।।९।। ।।ब्राह्मण उवाच।। ।।त्वयोदितं व्यक्तमविप्रलब्धं भर्तुः स मे स्याद्यदि
वीर भारः। गंतुर्यदि स्यादधिगम्यमध्वा पीवेति राशौ न विदां प्रवादः।।१०।।

कं श्रमादिर्नास्तीति तद्वक्रं स्फुटं। तत्तथैव। अविप्रलब्धं विप्रलंभो न भवति। तदेवाह। हे वीर यदि भारो नाम कश्चित्स्यात् स च भर्तुर्वोढुर्देहस्य यदि स्यात् स च मे यदि प्रसक्तः स्यात्तर्हीदानीं भाराभावात् विप्रलंभः स्यात् न त्वेतदस्ति भारस्य वोढुश्चानिरूप्यत्वात् मम च तत्संबंधाभावात् तथा गंतुरधिगम्यं प्राप्यमध्वा वा यदि स्यात्। अद्धेति पाठे साक्षात्परमार्थतः। तत्र मे यदि स्यादित्यादि योज्यं। यत्तु त्वयोक्तं नातिपीवेति तत्राह। चेतनमुद्दिश्य तु पीवेति प्रवादो विदां विदुषां न भवति किं तु मूर्खाणां यतो यं प्रवादो राशौ भूतसंघे देहे न त्वात्मनि। देह एव पीवा नाहमित्यर्थः।।१०।।

एतत्प्रपंचयति। स्थौल्यमिति। कलिः कलहः अहंकारेण मद्श्च। देहेन सह तदभिमानेन जातस्य हि भवंति। मम तु नि
रभिमानस्य न संति। यद्वा देहे जाते यो जातस्तस्यैव तान्निमम तु तत्र न जातस्य न संतीति॥११॥ यच्चोक्तं जीवन्मृतोसीति
तत्राह। जीवन्मृतत्वं न केवलं मम किंतु विकृतस्य सर्वस्य परिणामिनो दृष्टं। यद्यस्मादिकृतं प्रतिक्षण माद्यंतवत्। य
दुक्तं नर्देशासनमतिवरसीति तत्राह। स्वस्वाम्यं च तयोर्न्नवः सत्ता। हेईश्च यत्र पक्षे ध्रुवः यदि व्यवस्थितः स्यादित्य

स्थौल्यं कार्श्यं व्याधय आधयश्च क्षुत्तृड्भयं कलिरिच्छा जरा च॥ निद्रा रतिर्मन्युरहं मदः शुचो देहेन जातस्य हि
मे न संति॥११॥ जीवन्मृतत्वं नियमेन राजन्नाद्यंतवद्यद्विकृतस्य दृष्टं॥ स्वस्वाम्यभावो ध्रुव ईड्य यत्र तर्हि
उच्यतेऽसौ विधिकृत्ययोगः॥१२॥ विशेषबुद्धेर्विवरं मनाक्च पश्यामि यन्न व्यवहारतोन्यत्॥ क ईश्वरस्तत्र कि
मीशितव्यं तथापि राजन्करवाम किं ते॥१३॥

पः॥१२॥ ननु यावद्राजाहं तावत्तव स्वामी भवाम्येवेति चेत्तत्राह। विशेषो राजन्नित्यादि भेदृष्टरुद्धेर्विवरमवकाशं
व्यवहारादन्यन्न पश्यामि मनाकूर्इषदपि। अथापि तव यमभिमानश्चेत्तर्हि ब्रूहि किं ते करवामेति॥१३॥
ⅹतर्हि विधिर्नियोगः कृत्यं कर्म तयोर्योगो ध्रुव उच्यते उचितो भवति उच समवाय इति धातुः। यदि तु तव राज्य भ्रंशो मम च राज्ये स्यात्त
दा सर्वमेतद्विपरीतं स्यादित्यर्थः ⅹ२

राम
३८

ⅹउन्मत्तमत्तजडवत्स्वसंस्थां गतस्य मे वीर चिकित्सितेन अर्थः किया न्भवता शिक्षितेन स्तब्धप्रमत्तस्य च पिष्टपेषः १४ⅹ५

यत्तूक्तं प्रमत्तस्य ते चिकित्सां करोमि यथा स्वां प्रकृतिं भजिष्यस इति तत्राह। उन्मत्तादिवद्वर्तमानस्य वस्तुतः स्वसंस्थां
ब्रह्मभावं गतस्य भवता कृतेन चिकित्सितेन दंडेन शिक्षितेन वा किया नर्थः। मुक्तस्यानर्थानर्थयोरसंभवात्। यदि पुनरहं
स्तब्ध एवं गतस्य भवता कृतेन चिकित्सितेन दंडेन शिक्षितेन वा किया नर्थः। न हि जडस्य स्वभावः शिक्षया विपर्यक्तुं
न मुक्तः किंतु प्रमत्त स्तब्ध एव तथापि मम शिक्षादिकं पिष्टपेषणं व्यर्थमित्यर्थः। न हि जडस्य स्वभावः शिक्षयापि पद्गुकर्तुं
शक्यत इति॥१४॥ अनुवादरूपया परिभाषया भाषणेन तं प्रत्युत्तरं दत्वा। उपरतं अनात्म्ये देहात्मत्वे निमित्तं मभि

ⅹश्रीशुक उवाच॥ ॥एतावदनुवादपरिभाषया प्रत्युदीर्य मुनिवर उपशमशील उपरतानात्म्यनिमित्त उप
भोगेन कर्मारब्धं व्यपनयन्राजयानमपि तथोवाह॥१५॥ स चापि पांडवेय सिंधुसौवीरपतिस्तत्वजिज्ञा
सायां सम्यक्छ्रद्धयाधिकृताधिकारस्तद्धृदयग्रंथिविमोचनं द्विजवच आश्रुत्य बहुयोगग्रंथसंमतं त्व
रयावरुह्य शिरसा पादमूलमुपसृतः क्षमापयन्विगतनृपदेवस्मय उवाच॥१६॥

द्यायस्य। आरब्धफलं कर्म क्षपयन्॥१५॥ हे पांडवेय सम्यक्या श्रद्धा तयैव तत्वजिज्ञासायां प्राप्तोधिकारो ये
न। यथा दर्शपूर्णमासाधिकृतस्यैव गोदोहनेन पशुकामस्याप: प्रणयेदिति गुणफलसंबंधेप्यधिकारः। ए
वं सात्विकश्रद्धायामधिकृतस्यैवास्यामधिकार इत्यर्थः। बहुयोगग्रंथसंमतं द्विजस्य तद्वचः श्रुत्वा विगतो न्र
पदेवोधिराज इति गर्वो यस्य॥१६॥

द्विजानांमध्येकतमः।यतःसूत्रमुपवीतंविप्रर्षि।यद्वादत्तात्रेयादीनांमध्येकतमोवधूतः।इहापिकस्माद्धेतोः
आगतः।नोस्माकंक्षेमायचेत्आगतः।तर्हिशुक्लः।कपिलोमुनिर्नभवसिकिं।उनेतिवितर्के॥१७॥किमनयाचिंत
याशिबिकांतांवहहामीतिचेदतआह।नाहमिति।वित्तपःकुबेरः॥१८॥यस्मादूहांद्रांकेतस्मात्कस्त्वमि
त्यादिप्रश्नानामुत्तरंब्रूहि।निगूढंपिहितंविज्ञानरूपंवीर्यंप्रभावोयेन।अपारःअनंतमहिमानत्रहेतुः।नो

कस्त्वंनिगूढश्चरसिद्विजानांबिभर्षिसूत्रंकतमोवधूतः।कस्यासिकुत्रत्यइहापिकस्मात्क्षे
मायनश्चेदसिनोतशुक्लः॥१७॥नाहंविशंकेसुरराजवज्रान्नत्र्यक्षशूलान्नयमस्यदंडात्।नाग्न्य
र्कसोमानिलवित्तपास्त्राच्छंकेभृशंब्रह्मकुलावमानात्॥१८॥तद्ब्रूह्यसंगोजडवन्निगूढविज्ञा
नवीर्योविचरस्यपारः।वचांसियोगग्रथितानिसाधोननःक्षमंतेमनसापिभेत्तुं॥१९॥अहंचयो
गेश्वरमात्मतत्वविदांमुनीनांपरमंगुरुंवै।प्रष्टुंप्रवृत्तःकिमिहारणंतत्साक्षाद्धरिंज्ञानकलावतीर्णं॥२०॥

मनसापिभेत्तुंनक्षमंनशक्यं।किंभेत्तुमित्यपेक्षायामाह।तेववांसीति।यद्वामनसायुक्ताःसूक्ष्मदृष्टयोऽपि
भेत्तुंनशक्नुवंतीत्यर्थः॥१९॥स्वस्यज्ञानार्थितांदर्शयति।अहंचेति।इहसंसारेयत्अरणं(शरणं)तत्रकिमितिप्रष्टुं
प्रवृत्तोस्मिज्ञानशक्त्याऽवतीर्णंकपिलं॥२०॥

सएवजडवान्नकिंचिद्देवंविचरति।गृहाविष्टःकथंविचक्षीतयत्नयेत॥२१॥एवंतत्त्वस्वरूपंदृष्ट्वातदुक्तौत्तरा
पयाक्षिपति।तत्रयदुक्तंममश्रमोनास्तीति।तत्राहदृष्टइति।आत्मनोमेअनुमन्ये।अनुमिमे।अनुमानं
चैवं।भवान्भारवाहनादिनाश्रांतःकर्तृत्वात्।यःकर्तासश्राम्यतियथाहंयुद्धादिकर्तेति।नन्विदं

सवैभवाल्लोकनिरीक्षणार्थमव्यक्तलिंगोविचरत्यपिस्वित्।योगेश्वराणांगतिमंधबु
द्धिःकथंविचक्षीतगृहानुबंधः॥२१॥दृष्टःश्रमःकर्मतआत्मनोवैभर्तुर्गंतुर्भवतश्चानु
मन्ये।यथासतोदानयनाद्यभावात्समूलइष्टोव्यवहारमार्गः॥२२॥

व्यवहारमात्रंनतुसत्यंतदुक्तं।व्यवहारतोन्यन्नपरमार्थ्यामेति।तत्राहयथेति।व्यवहारमार्गःप्रपंचःस
मूलःसप्रमाणःसएवेष्टः।यथायथावत्।असताघटादिनाउदकानयनादेरभावात्।एवंप्रयोगःप्र
पंचःसत्यःअर्थक्रियाकारित्वात्।यःपुनरसत्यःनासावर्थक्रियाकारी।यथामिथ्याघटादिरिति।
॥२२॥

यदुक्तं उपाधिधर्माः स्थाल्या दयोमे न वस्तुतः संतीति। औपाधिकत्वेपि सत्यत्वं किं न स्यादित्याह। स्थाल्यात्र
ग्नितापात्पयस्यभितप्ते सति क्षीरस्य तापः तस्य तापात्तंडुलानां बहिर्गर्भस्य ततस्तंडुलस्य च रंधिः पाकः। न चात्र
किंचिन्मिथ्या एवं देहादीनां सन्निकर्षात्संबंधात्तन्निमित्ता संसृतिः पुरुषस्य भवति। असवः प्राणाः आश
यो मनः अनुरोधात्तदुपाधिधर्मानुवृत्तेः। तथाहि। निदाघादिना देहे तप्ते इंद्रियाणां तापः ततः प्राणस्य ततो

स्थाल्यग्नितापात्पयसोभितापस्तत्तापतस्तंडुलगर्भरंधिः॥ देहेंद्रियास्वाशयसन्निकर्षात्त
त्संसृतिः पुरुषस्यानुरोधात्॥ २३॥ शास्ताभिगोप्ता नृपतिः प्रजानां यः किंकरो वै न पिनष्टि पि
ष्टं। स्वधर्ममाराधनमच्युतस्य यदीहमानो विजहात्यघौघं॥ २४॥ तन्मे भवान्नरदेवाभिमानम
देन तुच्छीकृतसत्तमस्य। कृषीष्ट मैत्रीदृशमार्तबंधो यथा तरे सदवध्यानमंहः॥ २५॥

मनस इत्येवं यथायथमूह्यं॥ २३॥ यदुक्तं स्वस्वाम्यभावो ध्रुव इति तत्राह। शास्तेति। अध्रुवत्वेपि यदा यो नृपतिः
सः प्रजानां शास्ता गोप्ता च। यच्चोक्तं स्तब्धादेः शिक्षा पिष्टपेषइति तत्राह। यो व्यक्तस्य किंकरः स पिष्टं न पिनष्टि।
निष्फलं न करोति स्तब्धत्वा धनपगमेपि शास्त्रीश्वराज्ञा संपादनेनैव सफलत्वात्। तदाह। स्वधर्मरूपमच्युताराधनं कु
र्वन्यस्मादघौघं जहाति। २४। यस्मादेवं मम त्वदुक्तं विपरीतं प्रतिभाति तत्तस्मात् नरदेवाभिमानमदेन तुच्छीकृताः ति
रस्कृताः सत्तमाः भवादृशाः येन तस्य मे मैत्रीदृशा स्नेहयुक्तां दृष्टिं कृषीष्ट करोतु। सतामवज्ञारूपं पापं यथा तरिष्यामि। २५

×न विक्रिया विश्वसुहृत्सखस्य साम्येन वीताभिमतेस्तवापि महद्विमानात्स्वकृताद्धि मादृङ्नंक्ष्यत्यदूरादपि शूलपाणिः २६×५
इतिश्रीभा०पं०दशमोध्यायः॥ छ
ननु ममावज्ञाकृतविकारा मा वात् कुतः पापं तत्राह। नेति यद्यपि तव विक्रिया नास्ति विश्वस्य सुहृद्वासो सखा च त
स्य अतः सर्वत्र साम्येन स्वदेहे विगताभिमानस्य। तथापि महतामवमानात्मादृशो विनंक्ष्यति। अदूरात् क्षिप्रं शूलपाणि
रिवातिसमर्थोपीत्यर्थः। २६॥ ॥पंचमे दशमः॥ ॥एकादशेथ संप्रष्टोर हूगणमहीभृता। उपादिशत्परं ज्ञानं स योगी
तिनिगद्यते॥१॥ अकोविदः अविद्वानपि त्वं कोविदानां वादाउद्ग्रहणिकास्तत्तुल्यान्वादानेव वदसि। अथो अतः अ

×श्रीब्राह्मण उवाच॥ ॥अकोविदः कोविदवादवादान्वदस्यथो नातिविदां वरिष्ठः। न सूरयो हि व्यवहार
मेनं तत्वावमर्शेन सहामनंति॥१॥ तथैव राजन्नुरुगेहमेधवितानविद्योरुविजृंभितेषु॥ न वेदवादे
षु हि तत्ववादः प्रायेण शुद्धो नु चकास्ति साधुः॥ २॥

त। विदुषां मध्ये श्रेष्ठो न भवसि। कुतः हि यस्मात् यं स्वामिभृत्यादि लौकिकव्यवहारं सत्यमात्थ। एवं नं सूरयः तत्व
विचारेण सह न वदंति। किं त्वविचारसुंदरं वदंति। अतो न सत्यः॥१॥ वैदिकोपि कर्मव्यवहारो न सत्य इत्याह। तथैवे
ति। उरवो गार्हाः गृहसंबंधिनो मेधाः यज्ञाः तेषां वितानो विस्तारः तद्विषया या विद्या सा उरु अधिकं विजृंभितेषु
विलसितेषु वेदवादेषु तत्ववादः सुनिश्चितं न चकास्ति न प्रकाशते। तथा च श्रुतिः। नेह नानास्ति किंचनेत्यादि। शु
द्धो हिंसादिशून्यः। साधुः रागादिशून्यश्च। प्रायेणेति। ईश्वरार्पितकर्मणां परमार्थफलत्वात्प्रायेणोक्तं॥ २॥

ननु श्रुतवेदांतस्य पुंसः कर्मसु प्रवृत्तेः कथमसत्यता तत्राह नेति। साक्षात् यथावत्। तत्त्वज्ञानाय वरीयस्यो ऽपि वेदांतवाचः तस्य न सम्यगासन् न बभूवुः। स्वप्ने या निरुक्तिः तया स्वप्नदृष्टांतेन हेयत्वादिहेतुना स्वयमेव हेयत्वेनानुमितं यस्य न स्यात्॥३॥ एवं प्रपंचस्यासत्यत्वं तदुक्तं निराकृत्य संसारस्यापि तदुक्तां सत्यतां निराकर्तुं तस्य मनोनिमित्ततामाह। यावदित्यादिना यावत्समाप्ति। मनो यावद्रजआदिभिर्गुणैरनुरुद्धं वशीकृतं भवति ताव

न तस्य तत्त्वग्रहणाय साक्षाद्वरीयसीरपि वाचः समासन्। स्वप्ने निरुक्त्या गृहमेधिसौख्यं न यस्य हेयानुमितं स्वयं स्यात्॥३॥ यावन्मनो रजसा पुरुषस्य सत्त्वेन वा तमसा वानिरुद्धं। चेतोभिराकूतिभिरातनोति निरंकुशं कुशलं चेतरं वा॥४॥ स वासनात्मा विषयोपरक्तो गुणप्रवाहो विकृतः षोडशात्मा। बि

त्तन्मनो निरंकुशं सत् पुरुषस्य कुशलं धर्ममितरमधर्मं वा आतनोति। कैः चेतोभिः ज्ञानेंद्रियैः आकूतिभिः कर्मेंद्रियैश्च॥४॥ ततश्च धर्माधर्मवासनायुक्तं तदेवानेकदेहादिवैचित्र्यं करोतीत्याह। स इति पुंस्त्वमात्मशब्दविशेषणत्वेन तन्मन इत्यर्थः। वासनायुक्तः आत्मोपाधित्वादात्मा अतो विषयैरुपरक्तो ऽनुविद्धः। अतो गुणप्रवाहः गुणैरितस्ततश्चाल्यमानः। अत एव विकृतः कामादिपरिणामवान्। षोडशात्मा षोडशकलाः भूतेंद्रियरूपास मुख्यः पृथङ्नामभिः सह पृथग्रूपत्वे हं देवतिर्यगादिरूपं बिभ्रत्। अंतर्बहिष्ट्वं उत्कृष्टत्वं निकृष्टत्वं च पुरैस्तैस्तैर्देहैः हेतुभूतैस्तनोति। नामभिरित्यत्र रेफलोपे दीर्घाभाव आर्षः॥५॥ राम ४१

फलं च तदनुरूपं करोतीत्याह। दुःखं सुखं व्यतिरिक्तं च मोहं तीव्रं दुर्निवारं कालप्राप्तं फलं सर्वतो ऽभिव्यनक्ति सृजति ननु जडः कथं सृजति तत्राह। स्वदेहिनमालिंग्य आलिंगने कारणमाह। मायया रचितः अंतरात्मा जीवोपाधिः उपाधिनामाह संसृतिचक्रे कूटयतीति छलयतीति तथा। यथा ग्रामकूट इति॥६॥ एवमयं मनोनिबंधनः संसारो जीवे फलतीत्याह। तावानिति। आविः प्रकाशमानः। सदा क्षेत्रज्ञस्य साक्षिणः द्रष्टयो भवति स्थूलसूक्ष्मः जाग्रत्स्व

दुःखं सुखं व्यतिरिक्तं च तीव्रं कालोपपन्नं फलमाव्यनक्ति। आलिंग्य मायारचितांतरात्मा स्वदेहिनं संसृतिचक्रकूटः॥६॥ तावानयं व्यवहारः सदाविः क्षेत्रज्ञसाक्ष्यो भवति स्थूलसूक्ष्मः॥ तस्मान्मनो लिंगमदो वदंति गुणागुणत्वस्य परावरस्य॥७॥ गुणानुरक्तं व्यसनाय जंतोः क्षेमाय नैर्गुण्यमथो मनः स्यात्। यथा प्रदीपो घृतवर्तिमश्नन् शिखाः सधूमा भजति ह्यन्यदा स्वं॥८॥

प्नस्वरूपः। मनसः संसारहेतुत्वमुपसंहरन्मोक्षस्यापि तदेव कारणमित्याह। तस्मादिति अदो मनः लिंगं कारणं गुणत्वं गुणाभिमानित्वं अगुणत्वं तद्राहित्यं तदेव परमवरं च तस्य॥७॥ कथमेकमेव विलक्षणयोः कारणमवस्थाभेदादित्याह। गुणेति। नैर्गुण्यं निर्गुणं अथो इति कार्त्स्न्ये न दृष्टांतेन स्फुटयति। यथेति। अन्यदा तु घृतक्षये स्वं पदं शुक्लभावं स्वरूपं महाभूतात्मत्वं वा॥८॥

भा०पं० अन्यत्र अन्यदा। वृत्तीर्दर्शयति। एकादशवृत्तयआसन्। आकूतयः क्रियाकाराः पंच। धियश्च ज्ञानाकाराः पंच।
५२ अभिमानश्चेति।९॥ हे वीर भूमीः विषयान् विषयानेवाह। गंधादयः पंचज्ञानेंद्रियद्वाराधीवृत्तीनां विषयाः। आ
कृतिः रूपं श्रवः शब्दः। विसर्गादयः पंचकर्मेंद्रियद्वारा कर्माकारवृत्तीनां विषयाः। रतिः संभोगः। आर्तिः गतिः
१०॥ पुरस्याभिमानविषयत्वप्रकारमाह। एकादशं पुरं स्वीक्रियत इति स्वीकरणं। अयमर्थः। शरीरमभिमानस्य

पदं तथा गुणकर्मानुबद्धं वृत्तीर्मनः श्रयतेऽन्यत्र तत्त्वं। एकादशासन्मनसो हि वृत्तय आकूतयः पंच धियो
ऽभिमानः॥९॥ मात्राणि कर्माणि पुरं च तासां वदंति हैकादश वीर भूमीः॥ गंधाकृतिस्पर्शरसश्रवांसि
विसर्गरत्यर्त्यभिजल्पशिल्पाः॥१०॥ एकादशं स्वीकरणं ममेति शय्यामहं द्वादशमेक आहुः॥ द्र
व्यस्वभावाशयकर्मकालैरेकादशामी मनसो विकाराः॥११॥

नन्वेवं तया गंधादिवद्विषयः। नापि कार्यतया विसर्गादिवत्। किंतु ममेति भोगायतनत्वेन स्वीकार्यतया विषय इति। ए
केतु विवेकिनामेव पुरं ममत्वाभिमानविषयः न तु मूढानां अतो मूढदृष्ट्या अहं अहंकारं द्वादशं वृत्त्यंतरमाहुः। तस्य च पुर राम
मेव शय्यासंज्ञं द्वादशं विषयमाहुः। तत्र हि जीवोऽहंकारेण शेते। यतः पुरि शयनात्पुरुष इत्युच्यते। तासां वृत्तीनाम ५२
वांतरभेदैरानंत्यमाह। द्रव्याणि विषयाः स्वभावः परिणामहेतुः। आशयः संस्कारः कर्म अदृष्टं कालः क्षोभकः तैर्नि
मित्तभूतैः॥११॥

प्रथमं शतशः ततः सहस्रशः ततः कोटिशः स्युः न तु मिथः स्युः। न च स्वतः। किंतु क्षेत्रज्ञतः परमेश्वरात्। तस्य चानंतशक्तित्वा
त् अनंताः स्युरित्यर्थः। यद्वा तासां मिथ्यात्वमनेनोच्यते। कोटिशो भवंत्यस्ताः क्षेत्रज्ञत एव स्युः। तत्सत्तयैव सत्तां लभेरन्
न तु मिथो न च स्वत इति। यद्वा क्षेत्रज्ञो जीवस्तस्मान्न स्युः। तस्याविकारित्वात्। न मिथः इतरेतराश्रयापत्तेः। न स्वतः आत्मा

सहस्रशः शतशः कोटिशश्च क्षेत्रज्ञतो न मिथो न स्वतः स्युः॥१२॥ क्षेत्रज्ञ एता मनसो विभूतीर्जी
वस्य मायारचितस्य नित्याः॥ आविर्हिताः क्वापि तिरोहिताश्च शुद्धो विचष्टे ह्यविशुद्धकर्तुः॥१३॥
क्षेत्रज्ञ आत्मा पुरुषः पुराणः साक्षात्स्वयंज्योतिरजः परेशः॥ नारायणो भगवान्वासुदेवः स्व
माययात्मन्यवधीयमानः॥१४॥

श्रयापत्तेः। अतो मिथ्याभूतास्त्वेति॥१२॥ तदेवं श्लोकत्रयेण गुणकर्मानुरुद्धं मनो वृत्तीः श्रयत इति यदुक्तं तत्प्रपं
चितं। अन्यदा तत्त्वं श्रयत इति यदुक्तं तदेव तत्त्वमाह। क्षेत्रज्ञ इति जीवस्य जीवोपाधेः। अविशुद्धकर्तुर्मनसः नित्याः
प्रवाहरूपेणाविच्छिन्नाः जाग्रत्स्वप्नयोराविर्भूताः पश्यति। क्वापि सुषुप्तौ तिरोभूताः पश्यति। अवस्थात्रयसाक्षी
क्षेत्रज्ञ आत्मतत्त्वमित्यर्थः॥१[illegible]॥

क्षेत्रज्ञो द्विविधः त्वंपदार्थो जीवः तत्पदार्थ ईश्वरश्च। तत्राद्यो निरूपितः। इदानीं तत्साप्यमीश्वरं निरूपयंति। क्षेत्रज्ञ आत्मा व्यापी पुराणो जगत्कारणभूतः। पुरुषः पूर्णः साक्षादपरोक्षः स्वयंज्योतिः। ननु ज्ञानस्य विषयत्वेनाश्र यत्वेन वा परोक्षः। अजो जन्मादिशून्यः। परेषां ब्रह्मादीनामपीशः। नारं जीवसमूहः स अयनं यस्य नियंतुः। भग वानैश्वर्यादिषड्गुणवान्। वासुदेवः सर्वभूतानामाश्रयः। स्वाधीनया मायया आत्मनि जीवेष्ववधीयमानः अव

यथानिलः स्थावरजंगमानामात्मस्वरूपेण निविष्ट ईशेत्। एवं परो भगवान्वासुदेवः क्षेत्रज्ञ आ त्मेदमनुप्रविष्टः॥१५॥ न यावदेतां तनुभृन्नरेंद्र विधूय मायां वयुनोदयेन॥ विमुक्तसंगो जितष ट्सपत्नो वेदात्मतत्वं भ्रमतीह तावत्॥१६॥

स्थाप्यमानः। कर्मकर्तरि प्रयोगः। तन्नियंतृत्वेन वर्त्तमान इत्यर्थः॥ एतत्स दृष्टांतमाह यथेति। आत्मस्वरूपे ण प्राणरूपेण ईशेत नियमयति। इदं विश्वं। १५॥ तदेवमात्मनः शुद्धत्वं संसारस्य च मिथ्यात्वं प्रदर्श्येदानींत न्निवृत्तिमाह। तनुभृद्देही वयुनोदयेन ज्ञानोत्पत्त्या यावन्मायां विधूयात्मतत्वं न वेद तावदिह भ्रमति॥१६॥ राम ४३

न यावदेतन्मन आत्मलिंगं संसारतापावपनं जनस्य॥ यच्छोकमोहामयरागलोभवैरानुबंधं ममतां विधत्ते॥१७

नेति। आत्मनो लिंगं यावद्विषयानुरक्तं मन एवानर्थहेतुरिति न वेद तावन्निर्वेदाभावात्परिभ्रमत्येवेत्याह। आत्मनो लिंग मुपाधिभूतं मनः संसारतापानामावपनं क्षेत्रं यावन्न वेद तावद्भ्रमतीत्यनुषंगः। तापावपनत्वे हेतुः। यन्मनः शोकाद्यनुबंधं ममतां च विधत्ते॥१७॥ भ्रातृव्यमेनं तददभ्रवीर्यमुपेक्षयाध्येधितमप्रमत्तः। तस्माद्भ्रातृव्यं

गुरोर्हरेश्चरणोपासनास्त्रो जहि व्यलीकं स्वयमात्ममोषं॥१८॥ ॥इति श्रीभागवते महापुराणे पं चमस्कंधे ब्राह्मणरहूगणसंवादे एकादशोऽध्यायः॥ ॥रहूगण उवाच॥ ॥नमो नमः कार णविग्रहाय स्वरूपतुच्छीकृतविग्रहाय॥ नमोवधूतद्विजबंधुलिंगनिगूढनित्यानुभवाय तु भ्यं॥१॥

भ्रातृव्यं अध्येधितं संप्रवृद्धं स्वयं व्यलीकं मिथ्याभूतं तथाप्यात्मानं मुष्णातीति तथा तं। गुरुर्हरेर्वा चरणोपासनमेवास्त्रं यस्य तथाभूतः सन् जहि घातय॥१८॥ पंचमे एकादशः॥ ॥द्वादशे पुनराह पृष्टः सं दिहानमहीभृता। स योगी सर्वसंदेहानपानुदद् इतीर्यते॥१॥ कारणमीश्वरः तस्यैव लोकसंरक्षणार्थो विग्रहो यस्य। स्वरूपेण परमानंदप्रकाशेन तुच्छीकृतो विग्रहो येन। हे अवधूत योगेश्वर द्विजबंधोर्लिंगेन वेषेण नि

निगूढो नित्यानुभवो येन तस्मै नमः॥१॥

भा॰ पं॰ ४४ विशेषतः प्रष्टुं तद्वाक्यमभिनंदति। ज्वरः एवामयो रोगः तेनार्त्तस्य यथा सत् स्वादु अगदमौषधं। यथा च निदाघेन
दग्धस्य संतप्तस्य हिमांभः शीतलमुदकं गंगोदकं वा तथा हे ब्रह्मन् कुत्सिते देहे यो मानः अहंकारः स एवाहिः तेन वि
शेषेण दष्टा दृष्टिर्विवेकेक्षणं यस्य तस्य मे तवेदं वचः अमृततुल्यमौषधं॥ २॥ मम संशयविषयमर्थं पश्चात्प्र

ज्वरामयार्त्तस्य यथागदं सन्निदाघदग्धस्य यथा हिमांभः॥ कुदेहमानाहिविदष्टदृष्टेर्ब्रह्मन्वचस्तेऽ
मृतमौषधं मे॥ २॥ तस्माद्भवंतं मम संशयार्थं प्रक्ष्यामि पश्चादधुनास्तु बोधं॥ अध्यात्मयोगग्रथितं तवो
क्तमाख्याहि कौतूहलचेतसो मे॥ ३॥ यदाह योगेश्वर दृश्यमानं क्रियाफलं सद्व्यवहारमूलं। न ह्यंजसा
तत्वविमर्शनाय भवानमुष्मिन्भ्रमते मनो मे॥ ४॥

क्ष्यामि। अधुना तावत्त्वदुक्तं वचः अध्यात्मयोगेन ग्रथितं दुर्बोधं सुबोधं यथा भवत्येवं व्याख्याहि। कौतूहलयुक्तं चेतो
यस्य तस्य मम॥ ३॥ त्वयोदितं व्यक्तमविप्रलब्धमित्यादिना भारवाहनादिक्रिया च तत्फलं च भ्रमादि प्रत्यक्षादिभिर्दृश्य राम
मानं सत् अबाधितमेव व्यवहारमात्रमूलं। यद्वा सतः अबाधितव्यवहारस्य मूलं कारणमपि न ह्यंजसा तत्वविमर्शना ४४
यक्षममिति भवान् यदाह। अमुष्मिन्नर्थे मम मनो भ्रमति॥ ४॥

भा॰ पं॰ ४५ न चोत्तरोत्तरावयवाकारः पूर्वपूर्वावयवानां भवेदिति वाच्यं। तेषामप्यनिरूपणादित्याशयेनाह। यदेति। निष्ठां नाशं
भवमुत्पत्तिं विदाम विद्मः। ततश्च क्षितेरन्यस्य विकारस्याभावात्। नाममात्रादन्यत् व्यवहारस्य मूलं कारणं अर्थक्रि
ययासदित्यनुमेयं निरूप्यतां। तथा च श्रुतिः॥ वाचारंभणं विकारो नामधेयं मृत्तिकेत्येव सत्यमिति॥ ८॥ तर्हि
क्षितेः सत्यता स्यात् तत्राह। एवं क्षितिशब्दस्यापि वृत्तं वर्त्तनं अर्थं विनैव निरुक्तं। यद्वा क्षितिशब्दस्य वृत्तं वर्त्तनं

यदा क्षितावेव चराचरस्य विदाम निष्ठां प्रभवं च नित्यं॥ तन्नामतोन्यद्व्यवहारमूलं निरूप्यतां सत्क्रिय
यानुमेयं॥ ८॥ एवं निरुक्तं क्षितिशब्दवृत्तमसन्निधानात्परमाणवो ये॥ अविद्यया मनसा कल्पितास्ते
येषां समूहेन कृतो विशेषः॥ ९॥

यस्मिन् तदपि मिथ्यात्वेन निरुक्तमित्यर्थः। कुतः असत्सु सूक्ष्मेषु परमाणुषु स्वकारणभूतेषु निधानात् लया
त्। अतः परमाणुव्यतिरेकेण क्षितिर्नास्तीत्यर्थः। परमाणवस्तर्हि सत्याः स्युस्तत्राह। ते मनसा कार्यानुपपत्त्या राम
वादिभिः कल्पिताः। कल्पनाबीजमाह। येषां समूहेन विशेषः कृतः तेषां समूहः पृथ्वीबुद्ध्यालंबनमित्यर्थः। अवय ४५
विनो निरस्तत्वात् समूहग्रहणं तथापि सत्याः स्युः नं अविद्यया प्रपंचस्य भगवन्मायाविलसितत्वादज्ञानेन क
ल्पिताः॥ ९॥

अबाधितत्वमसिद्धमित्याह। हे पार्थिव यः पार्थिवो विकारः स एव कस्य हेतोः कस्माद्धेतोः कारणात् पृथिव्यां चलन् अ
यं भारवाहकादिर्जनो नाम असिद्धः यस्तु न चलति स पाषाणादिः स्यादेतावानेव भेदः। तस्य च जडत्वान्न भारः श्रमश्च।
किंच। भवेदेवं यदि श्रमस्याश्रयो निरूप्येत न त्वेतदस्ति। अवयवव्यतिरेकेणाश्रमास्पदस्यावयविनो निरूपण

ब्राह्मण उवाच॥ ॥अयं जनो नाम चलन् पृथिव्यां यः पार्थिवः पार्थिव कस्य हेतोः॥ तस्यापि चांघ्र्योरधि
गुल्फजंघाजानूरुमध्योरशिरोधरांसाः॥५॥ अंसेऽथ दार्वी शिबिका च यस्यां सौवीरराजेत्यपदेश आ
स्ते। यस्मिन् भवान् रूढनिजाभिमानो राजास्मि सिंधुष्विति दुर्मदांधः॥६॥ शोच्यानिमांस्त्वमधिक
ष्टदीनान्विष्ट्या निगृह्णन्निरनुग्रहोऽसि। जनस्य गोप्तास्मि विकत्थमानो न शोभसे वृद्धसभासु धृ
ष्टः॥७॥

दित्याशयेनाह। तस्यापि पृथिवीविकारस्यापि। अंघ्र्योः अधिक पर्युपरि गुल्फादयः। उरसः स लोप आर्षः॥५
शिबिकायामप्यवयवी नास्ति त्वय्यपि नास्तीत्याह। सौवीरराज इत्यपदेशो नाममात्रं यस्य स पार्थिवो विकारः
आस्ते। राजेति संधिरार्षः। यस्मिन् भवान् निरूढात्माभिमानः सिंधुषु राजास्मीति दुर्मदेनांधः सन्॥६॥ शोच्या
न्विष्ट्या निगृह्णन् निःकृपो वर्त्तसे। अतो मिथ्यैव गोप्तास्मीति श्लाघमानो महतां सभासु न शोभसे। यतो धृष्टः॥७॥ उपमनः
बलात्कारेण

एवमन्यदपि कृशत्वादिधर्मकं बुद्ध्या प्रतीतं द्वितीयं द्वैतं द्रव्यादिनाम्ना उपलक्षितयाऽजया मायया कृतमवेहि। तच्च कृशं
कृशत्वं स्थूलं तत्प्रतियोगि। अणु बृहतोः पृथगुपादानात्। असत्कारणं सत्कार्यं। जीवं चेतनं अजीवं जडं॥१०॥ तर्हि किं
सत्यं तदाह। ज्ञानं सत्यं। व्यावहारिकसत्यत्वं व्यावर्त्तयति। परमार्थं। वृत्तिज्ञानव्यवच्छेदार्थानि षड्विशेषणानि वि
शुद्धं तत्त्वाविषयकं। एकं तत्तु नानारूपं। अनंतरं त्वबहिः बाह्याभ्यंतरशून्यं। तत्तु विपरीतं। ब्रह्म परिपूर्णं। तत्तु परिच्छिन्नं

एवं कृशं स्थूलमणुर्बृहद्यदसच्च सज्जीवमजीवमन्यत्। द्रव्यस्वभावाशयकालकर्मनाम्नाजयावेहि कृतं
द्वितीयं॥१०॥ ज्ञानं विशुद्धं परमार्थमेकमनंतरं त्वबहिर्ब्रह्म सत्यं। प्रत्यक्प्रशांतं भगवच्छब्दसंज्ञं यद्वा
सुदेवं मुनयो वदंति॥११॥ रहूगणैतत्तपसा न याति न चेज्यया निर्वपणाद्गृहाद्वा। न छंदसा नैव जलाग्निसूर्यै
र्विना महत्पादरजोभिषेकं॥१२॥

प्रत्यक् तत्तु विषयाकारं। प्रशांतं निर्विकारं। तत्तु सविकारं। तदेव स्वरूपज्ञानं सत्यमित्युक्तं। कीदृशं तत्। ऐश्वर्या
दिषड्गुणत्वेन भगवच्छब्दः संज्ञा यस्य तत् ज्ञानं वासुदेवं वदंति॥११॥ एतत्प्राप्तिश्च महत्सेवां विना न भवतीत्याह। हे
रहूगण एतज्ज्ञानं तपसा पुरुषो न याति। इज्यया वैदिककर्मणा निर्वपणात् अन्नादिसंविभागेन गृहाद्वा तन्निमि
त्तपरोपकारेण छंदसा वेदाभ्यासेन जलाग्न्यादिभिरुपासितैः॥१२॥

भा०पं० ४६ महत्सेवायास्तत्राप्यकषायतामाह । यत्र येषु महत्सु ग्राम्यकथानां विघातो यस्मात् ॥१३॥ विषयसंगरक्तयोग
भंग्राक इति वदन् कस्त्वं निगूढश्चरसीति प्रश्नस्योत्तरमाह । अहमिति द्वाभ्यां । विमुक्तो दृष्टश्रुताभ्यां संगनिमि
त्तो बंधो येन । हतो ऽर्थः प्रयोजनं यस्य ॥१४॥ श्रीकृष्णार्चनं भ्रष्टमप्युद्धरतीत्याह । सेति । जनसंगाद्विशंकमानः ॥

यत्रोत्तमश्लोकगुणानुवादः प्रस्तूयते ग्राम्यकथाविघातः ॥ निषेव्यमाणो ऽनुदिनं मुमुक्षोर्मतिं सतीं य
च्छति वासुदेवे ॥१३॥ अहं पुरा भरतो नाम राजा विमुक्तदृष्टश्रुतसंगबंधः ॥ आराधनं भगवत ईह
मानो मृगो ऽभवं मृगसंगाद्धतार्थः ॥१४॥ सा मां स्मृतिर्मृगदेहे ऽपि वीर कृष्णार्चनप्रभवा नो जहाति ॥
अथो अहं जनसंगादसंगो विशंकमानो ऽविवृतश्चरामि ॥१५॥ तस्मान्नरो ऽसंगसुसंगजातज्ञानासि
नैवेह विवृक्णमोहः ॥ हरिं तदीहाकथनश्रुतिभ्यां लब्धस्मृतिर्यात्यतिपारमध्वनः ॥१६॥ ॥इति श्री
भागवते महापुराणे पंचमस्कंधे ब्राह्मणरहूगणसंवादे द्वादशो ऽध्यायः ॥

अविवृतः अप्रकटः ॥१५॥ असंगैर्महद्भिर्यः सुसंगः तेन जातं ज्ञानमेवासिः तेन छिन्नमोहः सन्नध्वनः संसारमा राम
र्गस्य अतिशयितं श्रेष्ठं पारं हरिं याति । यद्वा । पारमतिं अतिक्रम्य हरिं याति । अतिरतिक्रमणे वेति कर्मप्रवचनी ४६
यत्वात् द्वितीया । तस्य हरेरीहानां कथनश्रुतिभ्यां लब्धा स्मृतिर्येन सः ॥१६॥ ॥इति पंचमे द्वादशः ॥

त्रयोदशे विरक्ताय तथा तत्त्वनिरूपणं । इति वैराग्यदार्ढ्याय भवाटव्युपवर्ण्यते ॥१॥ अध्वनः पारमित्युक्तं तदे
वाध्वानं प्रसिद्धमार्गरूपकेण वैराग्याय प्रपंचयति । दुरत्यये दुस्तरे ऽध्वनि प्रवृत्तिमार्गे रजस्तमःसत्वैर्विभक्ता
नि कर्माणि कार्यतया पश्यतीति तथा । स एषः प्रसिद्धः सार्थो जीवसमूहः अर्थपरः सुखार्थः सन् यथा वणि
क्सार्थो ऽर्थार्जनाय गच्छन्नटवीं याति तद्वत् ॥१॥ अस्याध्यायस्य व्याख्यानरूप उत्तराध्यायो ऽस्ति तथापि सुख

ब्राह्मण उवाच ॥ ॥दुरत्यये ऽध्वन्यजया निवेशितो रजस्तमःसत्वविभक्तकर्मदृक् ॥ स एष सार्थो
ऽर्थपरः परिभ्रमन् भवाटवीं याति न शर्म विंदति ॥१॥ यस्यामिमे षण्नरदेव दस्यवः सार्थं वि
लुंपंति कुनायकं बलात् ॥ गोमायवो यत्र हरंति सार्थिकं प्रमत्तमाविश्य यथोरणं वृकाः ॥२॥

प्रतिपत्तये किंचिद्व्याख्यायते । यस्यां भवाटव्यां इमे इंद्रियनामानः षड् दस्यवश्चोराः कुत्सितो नायकः
सारथिर्बुद्धिर्यस्य तं सार्थं विलुंपंति । तस्य धर्म्यं धनं उपभोगेन मुष्णंतीत्यर्थः । गोमायवः शृगालतुल्या दा
रापत्यादयः त्वं मे भर्ता त्वं मे पितेत्येवं प्रविश्य प्रमत्तं सार्थिकं सार्थे स्थितं हरंति । इतस्ततः आकर्षंति । उरणं
मेषं ॥२॥

भा॰पं॰ ४७ वीरुधो लताः तृणानि च। गुल्मा निवल्लतादिजालानि प्ररूढैरेतैर्गह्वरे दुःप्रवेशाक्षेत्रे। कठोरैस्तीव्रैर्दंशैर्मक्षिका
विशेषैः मशकैश्च यथा कश्चिदुपद्रुतो भवति। एवं कामकर्मादिभिर्गह्वरे गृहाश्रमे वर्त्तमानो दुर्जनैरुपद्रुतो भवतीत्य
र्थः। गंधर्वपुरवद्घटमानमेव देहादिकं प्रकर्षेण सत्यमेवेदमिति पश्यति। क्वचित्क्वचित् क्वापि क्वापि च॥

प्रभूतवीरुत्तृणगुल्मगह्वरे कठोरदंशैर्मशकैरुपद्रुतः। क्वचित्तु गंधर्वपुरं प्रपश्यति क्वचित्क्वचिच्चाशुरयोल्मुकग्रहं॥३॥ निवासतोयद्रविणात्मबुद्धिस्ततस्ततो धावति भो अटव्यां। क्वचिच्च वात्योत्थितपांशुधूम्रा दिशो न जानाति रजस्वलाक्षः॥४॥ क्वचि

आशुरयः अतिवेग उल्मुकाकारो ग्रहः पिशाचः तत्तुल्यं सुवर्णमुपादेयत्वेन प्रपश्यतीत्यर्थः॥३॥ निवासा
दिष्वात्मा स्वभावो यस्याः सा बुद्धिः यस्य सः। ततस्ततो धावति इतस्ततोऽन्यत्र तावानेवार्थः। वात्या चक्रवातः। राम
तस्या मुत्थितः पांशुः तेन धूम्रा दिशः। रजस्वलेः रजोव्याप्ते अक्षिणी यस्य स यथा न जानाति। तथा वात्ये ४७
व भ्रमयंतीया स्त्री तस्या मुद्धतैरागादिभिः अप्रकाशमाना दिग्देवताः कर्मसाक्षिभूताः न जानातीत्य
र्थः॥४॥

अदृश्यानां झिल्लीनां भृंगारिकासंज्ञानां कीटविशेषाणां स्वनैः कर्णयोः शूलो व्यथा यस्य। उलूकाद्युका
स्तेषां वाग्भिर्व्यथितोंतरात्मा मनो यस्य। अत्र परोक्षमप्रियवक्तारो झिल्लीतुल्याः प्रत्यक्षमप्रियवक्तारो घूक
तुल्याः। येषां छायापि पापहेतुः तेऽपुण्या वृक्षाः तत्तुल्यान धार्मिकान् सेवते। मरीचितोयानीति निःफलत्वेन

अदृश्यझिल्लीस्वनकर्णशूल उलूकवाग्भिर्व्यथितांतरात्मा। अपुण्यवृक्षान् श्रयते क्षुधार्दितो मरीचितोयान्यभिधावति क्वचित्॥५॥ क्वचिद्वितोयाः सरितोऽभियाति परस्परं वालषते निरंधः। आसाद्य दावं क्वचिदग्नितप्तो निर्विद्यते क्व च यक्षैर्हृतासुः॥६॥

विज्ञातान् पिविषयान्॥५॥ वितोयाः शुष्काः सरितः पतितस्य गात्रभंगात्सद्यो दुःखं भवति न चोदकलाभः।
तद्वदिह च परत्र च दुःखदान् पाषंडानभियाति। आलषते दायादादिभ्योऽन्नादि वांछति। उभयत्रापि स एव
वार्थः। दावं दावाग्नितुल्यं दुःखदं गृहं प्राप्य शोकाग्निना तप्तो निर्विद्यते विषीदति। तत्र च यक्षराक्षसतु
ल्यै राजभिः हृतं असूवत्स्वं धनं यस्य स निर्विद्यते॥६॥

अन्यैश्चश्रूरैर्हृतं स्वं वित्तं यस्य निर्विण्णं विषण्णं चेतो यस्य। कश्मलं मूर्छां गंधर्वपुरमिव मनोरथोपगतपितृपुत्रा
दिसमाजं प्रविष्टः सन्॥७॥ कंटकादिविद्धांघ्रिरिवविघ्नैरभिहतः सन्नगतुल्यं महत्कर्मारोढुं कर्तुमिछुर्वि
मनाइव आस्ते। पदे पदे क्षणे क्षणे अभ्यंतरेण वह्निना जाठरेण॥८॥ अजगराहिना निद्रारूपेण गिलितो न

शूरै हृतस्वः क्वच निर्विण्णचेताः शोचन्विमुह्यन्नुपयाति कश्मलं॥ क्वचिच्च गंधर्वपुरं प्रविष्टः प्रमोदते
निर्वृतवन्मुहूर्तं॥७॥ चलन्क्वचित्कंटकशर्करांघ्रिर्नगारुरुक्षुर्विमना इवास्ते॥ पदे पदेभ्यंतरवह्निना
र्दितः कौटुंबिकः क्रुध्यति वै जनाय॥८॥ क्वचिन्निगीर्णोऽजगराहिना जनो नावैति किंचिद्वि
पिनेऽपविद्धः॥ दष्टः स्म शेते क्व च दंदशूकैरंधोंधकूपे पतितस्तमिस्रे॥९॥ कर्हि स्म चित्क्षुद्ररसान्
विचिन्वंस्तन्मक्षिकाभिर्व्यथितो विमानः॥ तत्रातिकृछ्रात्प्रतिलब्धमानो बलाद्विलुंपंत्यथ तं ततोन्ये।
॥१०॥

वेत्ति। विपिने त्यक्तः शव इव। दंदशूकैर्हिंस्रैर्दुर्जनैर्दृष्टः पीडितः। अंधो लुप्तविवेकः अंधकूपे मोहे पतितः। तमिस्रे
दुःखे शेते लीयते॥९॥ क्षुद्ररसान् परयोषादीन् विचिन्वन् गवेषयन् तन्मक्षिकाभिर्योषादिस्वामिभिः विमानः
अवज्ञातः ताडितः सन् व्यथितो भवति। यदि कथंचित्तत्रातिकृच्छ्रेण प्रतिलब्धमानः प्राप्तयोषादिर्भवति त
दा बलादन्येऽपहरंति तान्यदाभियुंक्ते तदा ततोप्यन्ये हरंति॥१०॥

यत्किंचित् अत्यल्पमपि मिथो व्यवहरन् क्रयादिना गृह्णन् वित्तशाठ्यात् धनवंचनात्॥११॥ शय्यादिहीनः।
आस्यतेऽस्मिन्नित्यासनं कंबलादि स्थीयतेत्रेति स्थानं गृहं विहरंत्यनेनेति विहारो यानादि। याचमानोपि यद
परस्मादप्राप्तकामस्तदा परकीयवस्तुनि दृष्टिरभिलाषो यस्य सोवमानं प्राप्नोति॥१२॥ एवमन्योन्यं वित्तव्य
तिषंगेण धनविनिमयेन विरूढो वैरानुबंधो यस्य तथाविधोपि परस्परं विवहन् विवाहादिसंबंधं कुर्वन्। उरु

क्वचिच्च शीतातपवातवर्षप्रतिक्रियां कर्तुमनीश आस्ते॥ क्वचिन्मिथो विपणन्यच्च किंचिद्विद्वेषमृच्छ
त्युत वित्तशाठ्यात्॥११॥ क्वचित् क्वचित्क्षीणधनस्तु तस्मिन् शय्यासनस्थानविहारहीनः॥ याच
न्परादप्रतिलब्धकामः पारक्यदृष्टिर्लभते वमानं॥१२॥ अन्योन्यवित्तव्यतिषंगवृद्धवैरानुबंधो विवहन्
मिथश्च॥ अध्वन्यमुष्मिन्नुरुकृछ्रवित्तबाधोपसर्गैर्विहरन्विपन्नः॥१३॥ तांस्तान्विपन्नान्स हि तत्र त
त्र विहाय जातं परिगृह्य सार्थः॥ आवर्ततेद्यापि न कश्चिदत्र वीराध्वनः पारमुपैति योगं॥१४॥

भिः कृच्छ्रैः श्रमैर्वित्तबाधैः उपसर्गैश्च द्वेषादिभिर्विपन्नः मृतप्रायो भवति॥१३॥ दुरत्ययत्वमध्वनो दर्शयति तां
स्तान् विपन्नान्मृतान् विहाय जातं जातं परिगृह्य विहरन् यतः प्रस्थितः तं प्रति नावर्तते। हे वीर अध्वनः पा
रं यो योगस्तं न कोपैति। अत्र सार्थे कश्चिदिति समासार्थः॥१५॥

भा॰पं॰ ४९

तदेवाह। मनस्विनः शूराः। निर्जिता दिग्गजेंद्रा यैः। ममेयं भूर्ममेयमिति भुवि निमित्तभूतायां बद्धं वैरं यैः। न्यस्तदंडः संन्यासी यद्विष्णोः पदमभियाति तत्तु न व्रजंति॥१५॥ सिंहावलोकनेन पुनर्भवाटवीमेवानुवर्त्तयति। असज्जति आसक्तिं करोति। कीदृशः। लतानां भुजाः शाखास्तत्स्पृक् कुमारा येस्त्रीणां भुजाः तदाश्रयः सन्। तदाश्रया अव्यक्तपदा अस्फुटाक्षराः कलभाषिणो ये द्विजाः पक्षिणः तत्तुल्येषु स्त्रीसंगप्रसक्तेषु पत्येषु स्पृहा यस्य

मनस्विनो निर्जितदिग्गजेंद्रा ममेति सर्वे भुवि बद्धवैराः॥ मृधे शयीरन्न तु तद्व्रजंति यन्न्यस्तदंडो गतवैरोभियाति॥१५॥ प्रसज्जति क्वापि लताभुजाश्रयस्तदाश्रयाव्यक्तपदद्विजस्पृहः॥ क्वचित्कदाचिद्धरिचक्रतस्त्रसन्सख्यं विधत्ते बककंकगृध्रैः॥१६॥ तैर्वंचितो हंसकुलं समाविशन्नरोचयं शीलमुपैति वानरान्॥ तज्जातिरासेन सुनिर्वृतेंद्रियः परस्परोद्वीक्षणविस्मृतावधिः॥१७॥

तादृशो भूत्वा हरिचक्रं सिंहसमूहः तत्तुल्यात् कालचक्रनिमित्ताज्जन्ममरणादेः त्रसन्। तत्परिहाराय कैश्चित् प्रलोभितो बकादिवद्दंबकैः क्षुद्रैः क्रूरैश्च पाषंडैः सह सख्यं करोति तेषु प्रविशति॥१६॥ तैर्वंचितस्तत्र फलाभावं ज्ञात्वा हंसानां ब्राह्मणानां कुलं पुनः प्रविशन् तेषां शीलं प्रायश्चित्तपूर्वकं पुनरुपनयनाद्याचारं अरोचयन् अप्रियं पश्यन् वानरतुल्यान् भ्रष्टाचारान् शूद्रप्रायाननुपैति। तज्जातिरासेन वानरजातिक्रीडया। मिथुनी

राम ५९

द्रुमवत्केवलदृष्टार्थेषु गृहेषु। व्यवायदीनः सुरतेछया कृपणः। एवं स्वस्य यद्बंधनं प्राप्तं तस्मिन्विवशः परिहर्त्तुमशक्तः। पाठांतरे तु वने संसारे वरान्नित्यर्थः। गिरिकंदरवदतिभयानके रोगादिदुःखे पतन् कंदरस्थगजतुल्यान्मृत्योर्भीतः सन् वल्लीतुल्यं प्राचीनं कर्मावलंब्यावस्थितो भवति॥१८॥ सार्थं प्रविशति यथापूर्वं प्रवृत्तिमार्गे रमते॥१९॥ त्वमपि अध्वनि निविशित इत्यनुषंगः। अतोस्याध्वनः पारमतितर असाज्जितात्माविष्णोः

द्रुमेषु रंस्यन्सुतदारवत्सलो व्यवायदीनो विवशः स्वबंधने॥ क्वचित्प्रमादाद्गिरिकंदरे पतन्वल्लीं गृहीत्वा गजभीत आस्थितः॥१८॥ अतः कथंचित्स विमुक्त आपदः पुनश्च सार्थं प्रविशत्यरिंदम॥ अध्वन्यमुष्मिन्नजया निवेशितो भ्रमन्जनोद्यापि न वेद कश्चन॥१९॥ रहूगण त्वमपि ह्यध्वनोस्य संन्यस्तदंडः कृतभूतमैत्रः॥ असज्जितात्मा हरिसेवया शितं ज्ञानासिमादाय तरातिपारं॥२०॥ ॥राजोवाच अहो नृजन्माखिलजन्मशोभनं किं जन्मभिस्त्वपरैरप्यमुष्मिन्॥ न यद्धृषीकेशयशःकृतात्मनां महात्मनां वः प्रचुरः समागमः॥२१॥

विषयेष्वनभिनिवेशितचित्तः सन् हरिसेवया शितं तीक्ष्णीकृतं॥२०॥ अखिलजन्मसु शोभनं नृजन्मैव परं श्रेष्ठं येभ्यो देवादिजन्मभ्यः तैरपि किं। अमुष्मिन् स्वर्गेपि जन्मभिः किं न किंचित्। यत् येषु जन्मसु यत्र स्वर्गेवा वो महात्मनां समागमः प्रचुरो न भवति। हृषीकेशस्यय

संन्नतमुपास्तितैः त्वत्पदाब्जरेणुभिर्हतमंहो यस्य तस्याधोक्षजे निर्मला भक्तिर्भवतीति नैवाद्भुतं। यस्य तव मुहूर्तमात्रान्न वा सत्समागममात्रादपि दुस्तर्केण बद्धमूलोऽपि मम अविवेको नष्टः॥२२॥ ब्रह्मविदः केन रूपेण विचरंतीत्यज्ञानात्सर्वान्नमस्यति नम इति। ये बटवः क्रीडारतत्वादभ्रद्वयधौरेयास्तान्प्यभिव्याप्य सर्वेभ्यो नम इत्यर्थः। स्वदृष्टांतेन राज्ञां महदवज्ञां संभाव्याह राज्ञां शिवमस्त्विति॥२३॥ उत्तरा माता यस्य हे उत्तरामातः विगण

श्रीशुक उवाच॥ ॥इत्येवमुत्तरामातः स वै ब्रह्मर्षिसुतः सिंधुपतय आत्मसतत्त्वं विगणयतः परानुभावः परमकारुणिकतयोपदिश्य रहूगणेन सकरुणमभिवंदितचरण आपूर्णार्णव इव निभृतकरणोर्म्याशयो धरणिमिमां विचचार॥२४॥ सौवीरपतिरपि सुजनसमवगतपरात्मसतत्त्व आत्मन्यविद्याध्यारोपितां देहात्ममतिं विससर्ज। एवं हि नृप भगवदाश्रिताश्रितानुभावः॥२५॥

यतः न गणयतः अवमंतर्यपि परमकरुणाकरत्वेन सिंधुपतये आत्मतत्त्वमुपदिश्य। निभृताः शांताः करणानामूर्मयो यस्मिन्स आशयो यस्य॥२४॥ सुजनात्तस्मात्सम्यगवगतं परमात्मसतत्त्वं येन तथाभूतः सन् तदानीमेव देहे आत्ममतिं विससर्ज। हे नृप भगवदाश्रितो भरतः तदाश्रितो रहूगणो यः तस्यानुभावः सद्यो देहाहंकारत्यागः॥२५॥ राम ५०

नह्यद्भुतं त्वच्चरणाब्जरेणुभिर्हतांहसो भक्तिरधोक्षजेऽमला मौहूर्तिकाद्यस्य समागमाच्च मे दुस्तर्कमूलोऽपहतोऽविवेकः २२ नमो महद्भ्योस्तु नमः शिशुभ्यो नमो युवभ्यो नम आवटुभ्यः ये ब्राह्मणा गामवधूतलिंगाश्चरंति तेभ्यः शिवमस्तु राज्ञां २३ X श्रीशुक्र

पारोक्ष्येण वणिक्सार्थकरूपेण आर्याणां विवेकिनां मनीषयैव दस्युस्थानीयानींद्रियाणि गोमायुस्थानीयान्यपत्यानीत्येवं कल्पितविषयः। अव्युत्पन्नस्य तु लोकस्य जनस्य सम्यक् अधिगम्यो न भवति। अथ अतः तदेतदेव
दी भवाध्वरूपं समवेतानुकूल्येन प्रस्तुते तत्तदनुरूपार्थोपकल्पनेन॥२६॥ इति पंचमे त्रयोदशः॥

राजोवाच॥ ॥यो ह वा इह बहुविदा महाभागवत त्वयाभिहितः पारोक्ष्येण वचसा जीवलोकभवाध्वा स ह्यार्यमनीषिकया कल्पितविषयो नांजसाऽव्युत्पन्नलोकसमधिगमः अथ तदेवैतद्दुरवगमं समवेतानुकल्पेन निर्दिश्यतामिति॥२६॥ ॥इति श्रीभागवते महापुराणे पंचमस्कंधे त्रयोदशोऽध्यायः॥

चतुर्दशे भवारण्यरूपकव्याकृतिं कृता॥ प्रस्तुते तस्य गोमायुमशकाद्यर्थकल्पनं॥१॥ यः परीक्षिता पृष्टः स श्रीशुक उवाच॥ ॥स होवाचेति सूतोक्तिः दुरत्ययेऽध्वन्यजया निवेशित इति यदुक्तं तदेव निवेशनप्रकारकथनेन प्रपंचयति॥

यएषप्रसिद्धोजीवलोकः अयंविष्णोर्मायया असुगमेध्वन्यापतितो भवाटवींगतःसन्हरिरूपस्यगुरोश्चरणारविं
देयेमधुकराःसेवकास्तेषांअनुपदवीतैरनुष्ठितंभक्तिमार्गमद्यापिनावरुंधेनसंप्राप्नोतीत्यन्वयः।मायायाःस्व
कार्यद्वारेणसंसारमार्गपातहेतुत्वमाह।देहात्ममानिनांसत्वादिगुणविशेषैर्विकल्पितानिविभक्तानियानि
कुशलाकुशलविमिश्रकर्माणितैर्विनिर्मिताभिर्विविधदेहावलिभिर्वियोगसंयोगादिर्योऽनादिःसंसारः

सहोवाच॥ ॥यएषदेहात्ममानिनांसत्वादिगुणविशेषविकल्पितकुशलाकुशलसमवहारविनिर्मित
विविधदेहावलिभिर्वियोगसंयोगाद्यनादिसंसारानुभवस्यद्वारभूतेनषडिंद्रियवर्गेणतस्मिन्दुर्गा
ध्ववदसुगमेध्वन्यापतितईश्वरस्यभगवतोविष्णोर्वशवर्तिन्यामाययाजीवलोकोयंयथावणिक्सार्थो
र्थपरःस्वदेहनिष्पादितकर्मानुभवः।श्मशानवदशिवतमायांसंसाराटव्यांगतोनाद्यापिविफलबहुप्र
तियोगेहस्तत्तापोपशमनीहरिगुरुचरणारविंदमधुकरानुपदवीमवरुंधे॥१॥यस्यामुहवाएतेषडिंद्रियनामानः
कर्मणादस्यवएवते॥२॥ राम ५१

तदनुभवस्यद्वारभूतेन।तस्मिन्संसाररूपेदुर्गमार्गवदसुगमेध्वन्यापतितःयथावणिजांसार्थःसमूहःअर्थार्जनपरः
स्वदेहनिष्पादितानांकर्मणांफलद्वारेणानुभवोयस्यविफलाश्चबहुप्रतियोगाःबहुविघ्नाश्चईहाश्चेष्टायस्यसः
तस्यांसंसाराटव्यांयेतापास्तेषांउपशमनीनाशनी॥१॥यस्यामित्यादिव्याचष्टेयस्यांभवाटव्यां॥२॥

दस्यकत्वंतेषांकर्मदर्शयतितद्यथेति।धर्मौपयिकंधर्मकारणंतमेवस्वाविशेतंधर्ममाहसाक्षादिति।तंतुसांपरा
येपरलोकार्थमुदाहरंति।तद्धर्म्यंधर्मार्हधनं।दर्शनाद्याःपंचज्ञानेंद्रियाणांवृत्तयःसंकल्पव्यवसायावंतःकरणस्यए
तेगृहेयोग्राम्यउपभोगः।तेनकुनाथस्यकुबुद्धेरजितात्मनोविलुंपंति।यथाचौराःकुपालकस्यानवहितात्मनःसार्थ
स्यधनंहरंतितद्वत्॥३॥गोमायवोयत्रेत्येतद्व्याचष्टे।अथचेति।अथचेत्यर्थांतरोपन्यासे।कर्मणानुबद्धाःश्रृगालाश्च

तद्यथापुरुषस्यधनंयत्किंचित्साक्षाद्धर्मौपयिकंबहुकृच्छ्राधिगतंसाक्षात्परमपुरुषाराधनलक्षणोयो
सौधर्मस्तंतुसांपरायउदाहरंति।तद्धर्म्यंधनंदर्शनस्पर्शनश्रवणास्वादनावघ्राणसंकल्पव्यवसायगृह
ग्राम्योपभोगेनकुनाथस्याजितात्मनोयथासार्थस्यतथाजितात्मनोविलुंपंति॥३॥अथचयत्रकौटुंबि
कादारापत्यादयोनाम्नाकर्मणावृकश्रृगालाएवअनिच्छतोपिकदर्यस्यकुटुंबिकानउरणकवत्संरक्षमाणं
मिषतोपिहरंति॥४॥यथाह्यनुवत्सरंकृष्यमाणमप्यदग्धबीजंक्षेत्रंपुनरेवावपनकालेगुल्मतृणवीरु
द्भिर्गह्वरमिवभवति।एवमेवगृहाश्रमःकर्मक्षेत्रंयस्मिन्नहिकर्माण्युत्सीदंतियदयंकामकरंडएषआवसथः॥५

कदर्यस्यातितुच्छस्य॥४॥प्ररूढनवीरुधस्तृणगुल्मगह्वरइत्येतद्व्याचष्टे।यथाहीति।नदग्धानिबीजानियस्मिन्य
द्यस्मात्योयमावसथआश्रमःएषकामानांकरंडःयथाकर्पूरभाजनेकर्पूरक्षयेपिपरिमलोनक्षीयते।एवमत्रवा
सनानामक्षीणत्वान्नकर्माण्युत्सीदंतीत्यर्थः॥५॥

पं.भा. ५२ दंशमशकतुल्यैरपसदैर्नीचैः शलभादिभिश्चोपरुध्यमानः पीड्यमानो वहिःप्राणो वित्तं यस्य तथाविधोप्यस्मिन्नध्व
निपरिभ्रमन् अविद्यादिभिरुपरक्तेन मनसा गंधर्वपुरतुल्यमघटमानं नरलोकं सत्यतया मिथ्यादृष्टिरनुपश्यति
॥६॥ अपश्यतीति प्रशाद्ध्वस्त्राचितमर्थांतरं दर्शयति। तत्र च गंधर्वपुरे क्वचिदातपोदकं मृगतृष्णाजलं तत्तुल्यान्विषयाननु
पधावतीति ॥७॥ क्वचित्क्वचिच्छ्वशुरयोल्मुकग्रह इत्येतद्व्याचष्टे। क्वचिच्चाशेषाणां दोषाणां निषदनं स्थानं पुरी

तत्रगतो दंशमशकसमापसदैर्मनुजैः शलभशकुंततस्करमूषकादिभिरुपरुध्यमानबहिःप्राणः क्वचित्प
रिवर्त्तमानोस्मिन्नध्वन्यविद्याकामकर्मभिरुपरक्तमनसानुपपन्नार्थं नरलोकं गंधर्वनगरमुपपन्नमिति
मिथ्यादृष्टिरनुपश्यति ॥६॥ क्वचिदातपोदकनिभान्विषयानुपधावति पानभोजनव्यवायादिव्यसनलोलु
पः ॥७॥ क्वचिच्चाशेषदोषनिषदनं पुरीषविशेषं तद्वर्णगुणनिर्मितमतिः सुवर्णमुपादित्सत्यग्निकामका
तर इवोल्मुकपिशाचं ॥८॥

षविशेषं अग्नेर्विष्टा। तस्य पुरीषस्येव लोहितो वर्णो यस्य रजोगुणस्य तेन निर्मिता तद्विषया मतिर्यस्य सः। सुवर्णमु राम ५२
पादातुमिच्छति। अग्निकामेन कातरः परवशः उल्मुकसदृशं पिशाचमिव दृशीतातुरो ह्यरण्येग्निवज्ज्वलमानं तत लं
स्ततो धावंतमुल्मुकपिशाचमग्निबुद्ध्यानुधावति न तु तं प्राप्नोति कथंचित्प्राप्तश्चेत्तर्हि तेन भक्षितः सन्म्रियते
एवं सुवर्णमनुधावन्नपीत्यर्थः ॥८॥

निवासतोयद्रविणेत्येतद्व्याचष्टे अथेति। निवासादिष्वनेकेष्वात्मनः उपजीव्येषु अभिनिवेशो यस्य सः ॥९॥ क्वचिच्च वा
त्यौपम्ययेत्येतद्व्याचष्टे क्वचिद्वेति। आरोहं आक्रांतः तस्मिन्काले यद्रजः रागस्तेन स्वदृष्ट्यावरकेण। रजन्यां रात्रौ भूता इव। क्व
स्वपादेरजनीभूतस्तमोमय इवातीव रजसाछन्नमतिः अत एव रजोव्याप्तचक्षुरिव दिक्षु स्थिता मर्यादातिक्रमसाक्षिभू
ता देवता न जानाति ॥१०॥ अनुपादेयमेवोपादेयतया गृह्णातीति प्रक्रमसाजात्यादुत्तरश्लोकचतुर्थपादं प्रथमं व्याचष्टे

अथ कदाचिन्निवासपानीयद्रविणाद्यनेकात्मोपजीवनाभिनिवेश एतस्यां संसाराटव्यामितस्ततः परिधा
वति ॥९॥ क्वचिच्च वात्यौपम्यया प्रमदयारोहमारोपितस्तत्कालरजसा रजनीभूत इवासाधुमर्यादो रजस्व
लाक्षोपि दिग्देवता अतिरजस्वलमतिर्न विजानाति ॥१०॥ क्वचित्सकृदवगतविषयवैतथ्यः स्वयं पराभिध्या
नेन विभ्रंशितस्मृतिस्तयैव मरीचितोयप्रायांस्तानेवाभिधावति ॥११॥

क्वचित्सकृदिति क्वचिदातपोदकनिभानित्यत्र मिथ्याविषयेषु त्वं पटत्वमुक्तं। निवासतोयेत्यत्र तदर्जनप्रयास उक्तः।
अत्र तु बाधितेष्वपि पुनः प्रवृत्तिरुच्यत इत्यपौनरुक्त्यं। स्वयमेव सकृदवगतं विषयाणां वैतथ्यं विफलत्वं येन। पराभिध्या
नेन देहाभिनिवेशेन विभ्रंशिता स्मृतिर्यस्य। तयैव विभ्रंशितया स्मृत्या स्मृतिभ्रंशाद्वेत्यर्थः ॥११॥

कौ। अदृश्यझिल्लीस्वनेत्येतद्व्याचष्टे। क्वचिदुलूकेति। अतिपरुषोरभस्तउत्साहस्तेनाटोपःसंभ्रमोयथाभव
त्येवंरिपूणांराजकुलस्यचनिर्भर्त्सितेनअतिव्यथितंकर्णमूलंहृदयंचयस्य॥१२॥ अपुण्यवृक्षानित्येतद्व्याचष्टे
सयदेति। दुग्धमुपभुक्तंपूर्वंसुकृतंयेन। कारस्करोविषतिंदुःतत्प्रमुखायेऽपुण्यद्रुमास्तथाविधालतास्तान्विषो
दपानांश्चविषकूपाःतत्तुल्यान्दृष्टादृष्टप्रयोजनशून्यधनान्॥१३॥ क्वचिद्वितोयाःसरितइत्येतद्व्याचष्टे। एक

क्वचिदुलूकझिल्लीस्वनवदतिपरुषरभसाटोपंप्रत्यक्षंपरोक्षंवारिपुराजकुलनिर्भर्त्सितेनातिव्यथि
तकर्णमूलहृदयः॥१२॥ सयदादुग्धपूर्वसुकृतस्तदाकारस्करकाकतुंडाद्यपुण्यद्रुमलताविषोदपा
नवदुभयार्थशून्यद्रविणान्जीवन्मृतान्स्वयंजीवन्म्रियमाणउपधावति॥१३॥ एकदाऽसत्प्रसंगा
न्निकृततमतिर्व्युदकस्रोतस्स्खलनवदुभयतोऽपिदुःखदंपाखंडमभियाति॥१४॥ यदातुपरबाधयां
धआत्मनेनोपनमतितदाहिपितृपुत्रबर्हिष्मतःपितृपुत्रान्वासखल्वभक्षयति॥१५॥

दाक्वचिदसतांप्रसंगात्निकृतावंचितामतिर्यस्यसः। निरुदकनदीगर्त्तपातेयथास्खलःशिरःस्फुटनिपश्चादपि
चतद्वेदनानुवर्त्ततेएवमिहपरत्रचदुःखदं॥१४॥ परस्परंबालघतेनिरंध इत्येतद्व्याचष्टे यदात्विति। अंधःअ
न्नंनोपनमतिनोपतिष्ठति। पितृपुत्राणांबर्हिःकुशःतद्वतःपितुःपुत्राणांवाकुशात्दितृणमात्रमपियेषुपरंय

पितृपुत्रबर्हिष्मताऽपि [illegible] इत्यर्थः। पितृपुत्रबर्हिष्मतामिति [illegible]

राम
५२

आसाद्यदावमित्येतद्व्याचष्टे। क्वचिदासाद्येति॥१६॥ क्वचयक्षैर्हृतासुरित्येतद्व्याचष्टे। क्वचित्कालेनविष
मितंप्रतिकूलतांनीतंयद्राजकुलंतदेवरक्षःतेनअपहृताःप्रियतमधनरूपाअसवोयस्य। विगतानिजी
वलक्षणानिहर्षादीनियस्य। म्रियते हृतास्व इत्यस्यनेनैवव्याख्यातं॥१७॥ क्वचिद्गंधर्वपुरंप्रविष्ट इत्येतद्व्याच
ष्टे। कदाचिन्मनोरथप्राप्तंपित्राद्यसदेवसदितिमत्वा। पूर्वंगंधर्वपुरवदघटमानदर्शनमुक्तं। इदानींतन्नि

क्वचिदासाद्यगृहंदाववत्प्रियार्थविधुरंअसुखोदर्कंशोकाग्निनादह्यमानोभृशंनिर्वेदमुपगच्छति॥
१६॥ क्वचित्कालविषमितराजकुलरक्षसाऽपहृतप्रियतमधनासुःप्रमृतकइवविगतजीवलक्षणआ
स्ते॥१७॥ कदाचिन्मनोरथोपगतपितृपितामहाद्यसत्सदितिस्वप्ननिर्वृतिलक्षणमनुभवति॥१८
क्वचिद्गृहाश्रमकर्मचोदनातिभरगिरिमारुरुक्षमाणोलोकव्यसनकर्षितमनाःकंटकशर्करा
क्षेत्रंप्रविशन्निवसीदति॥१९॥ क्वचिच्चदुःसहेनकायाभ्यंतरवह्निनागृहीतसारःस्वकुटुंबायक्रुध्य
ति॥२०॥

मेयाःकर्मचोद
ष्टैमित्रस्फुरवासक्तिरुच्यतइतिखेदः॥१८॥ चलनक्वचिदित्येतद्व्याचष्टे। क्वचिद्गृहाश्र
नास्तासामतिभरोतिविस्तारःसएवगिरिस्तमारुरुक्षन्तदंतेगंतुमिच्छन्॥१९॥ पदेपदेभ्यंतरवह्निनेतिव्याच
ष्टेक्वचिच्चदुःसहेति॥२०॥

क्वचिन्निगीर्ण इत्येतद्व्याचष्टे। स एवेति॥२१॥ दष्टः स्म शेत इति व्याचष्टे। कदाचिदिति। मानो गर्व एव दंष्ट्रा परपीडा
करत्वात् भग्ना मानदंष्ट्रा यस्य। अत एव न लब्धो निद्रायाः क्षणोऽपि येन॥२२॥ कर्हि स्म चित् क्षुद्ररसानित्येतद्व्या
चष्टे कर्हि स्म काममधुलवानिति। यदा निहतो भवति तदा सद्य एव निरये पतति॥२३॥ प्रसंगात् प्रवृत्तस्य क
र्मणः संसारहेतुत्वं स्फुटयति। यस्मादेवं स्यात्। अथ अनंतरमेव उभयथा इह परत्र च अस्मिन् प्रवृत्तिमा

स एव पुनर्निद्राजगरगृहीतोंऽधतमसि मग्नः शून्यारण्य इव शेते नान्यत्किंचन वेद शव इवापविद्धः॥
२१॥ कदाचिद्भग्नमानदंष्ट्रो दुर्जनदंदशूकैरलब्धनिद्राक्षणो व्यथितहृदयेनानुक्षीयमाणविज्ञा
नोंऽधकूपेंऽधवत्पतति॥२२॥ कर्हि स्म चित्काममधुलवान्विचिन्वन्यदा परदारपरद्रव्याण्यवरुंध
मानो राज्ञा स्वामिभिर्वा निहतः पतत्यपारे निरये॥२३॥ अथ च तस्मादुभयथापि हि कर्मास्मिन्ना
त्मनः संसारावपनमुदाहरंति॥२४॥ मुक्तस्ततो यदि बंधाद्देवदत्त उपाच्छिनत्ति तस्मादपि विष्णुमित्र इ
त्यनवस्थितिः॥२५॥ राम ५४

र्गे संसारस्याऽवपनं जन्मक्षेत्रं कर्मोदाहरंति॥२४॥ तत्राति कष्टं प्रतिलब्धमान इत्येतद्व्याचष्टे मुक्त इति यदि बं
धान्मुक्तो भवति तर्हि ततः सकाशादन्यो हरति। तस्मादप्यन्यः न त्वसौ भोक्तुं लभत इत्यर्थः॥२५॥ राम

ये च सक्ताः संलग्नाः सुताः दुहितरश्च कलत्रं च सैव स्त्री तेषां भाषितादिभिरपहृतं हृदयं यस्य। प्रहिणोति प्रक्षिपति॥ २९
क्वचिच्च शीतातपेत्येतद्व्याचष्टे। क्वचिच्चेति। शीतादयोऽनेके आधिदैविकाद्याया दशाः दुःखावस्थास्तासां॥२६
क्वचिन्मिथ इत्येतद्व्याचष्टे। क्वचिन्मिथो यत्किंचिद्धनं व्यवहरन्। काकिणीमात्रं विंशतिकपर्दिकामात्रं ततोऽपि न्यू
नं वा यत्किंचिदपहरन् विद्वेषमेति॥२७॥ अध्वन्यमुष्मिन्नुरुकृच्छ्रवित्तबाधोपसर्गैरित्यस्यानुपसर्गान्प्रपं
चयति। अध्वन्यमुष्मिन्निमे उरुकृच्छ्रवित्तबाधादयः तथा सुखदुःखादयश्च॥२८॥ व्युत्क्रमैः पुनरुक्तैश्च ना

क्वचिच्च शीतवाताद्यनेकाधिदैविकभौतिकात्मीयानां दशानां प्रतिनिवारणेऽकल्पो दुरंतचिंत
या विषण्ण आस्ते॥२६॥ क्वचिन्मिथो व्यवहरन्किंचिद्धनमन्येभ्यो वा काकिणिमात्रमप्यपहरन्यत्किंचि
द्वा विद्वेषमेति वित्तशाठ्यात्॥२७॥ अध्वन्यमुष्मिन्निम उपसर्गास्तथा सुखदुःखरागद्वेषभयाभिमा
नप्रमादोन्मादशोकमोहलोभमात्सर्येर्ष्यावमानक्षुत्पिपासाधिव्याधिजन्मजरामरणादयः॥२८
क्वापि देवमायया स्त्रिया भुजलतोपगूढः प्रस्कन्नविवेकविज्ञानो यद्विहारगृहारंभाकुलहृदयस्तदाश्र
याऽसक्तसुतदुहितृकलत्रभाषितावलोकविचेष्टितापहृतहृदय आत्मानमजितात्मापारेंऽधे तमसि
प्रहिणोति॥२९॥ का ख

नापावैरतः परं। दुर्गमोऽपि त्वध्वायं संप्रदायेन तीर्यते। तत्र प्रसज्जती क्वापीत्यादिना सिंहावलो
कनन्यायेनोक्तमर्थमपकृष्य क्रमेण व्याचष्टे क्वापि देवमाययेति। प्रस्कन्नं अपगतं विवेकज्ञानं यस्य। यस्याः स्त्रियाः वि
हारं गृहं क्रीडागृहं तदारंभेण आकुलं हृदयं यस्य। अनेन प्रसज्जतीति व्याख्यातं। तदाश्रयेत्यादि व्याचष्टे तस्याः आश्रै

कश्चित् कदाचिद्धरिचक्रतस्त्रसन्निंत्येतद्व्याचष्टे कदाचिदीश्वरस्येति। परमाणुरादिः द्विपरार्द्धोपवर्गोऽन्तः तदेवोपलक्षणं यस्य तस्मात् कालोपलक्षणादिति पृथक्पदत्वेन पाठे कालस्वरूपादित्यर्थः रंहसा शीघ्रेण परिवर्त्तितेन परिभ्रमणेन वयसा बाल्यादिक्रमेण ब्रह्माणमभिव्याप्य तृणस्तंबआदीनि भूतानि चक्र तःसकाशात् छिन्नस्तहृदयः सन् पाषंडदेवताश्रितिमुख्येन धत्त इत्यन्वयः। अनिमिषतः निमेषमकुर्वतः

कदाचिदीश्वरस्य भगवतो विष्णोश्चक्रात्परमाण्वादिद्विपरार्द्धापवर्गोपलक्षणात्परिवर्त्तितेन वयसा रंहसा हरत आब्रह्मतृणस्तंबादीनां भूतानामनिमिषतो मिषतां वित्रस्तहृदयस्तमेवेश्वरं कालचक्रनिजायुधं साक्षाद्भगवंतं यज्ञपुरुषमनादृत्य पाषंडदेवताः कंकगृध्रबकवटप्राया आर्यसमयपरिहृताः सांकेत्येनाभिधत्ते॥ ३०॥

राम
५५

अप्रमत्तादित्यर्थः। मिषतां प्रति कर्तुमशक्तानामित्यर्थः। कर्मणि षष्ठ्याः। कालचक्रं निजं नित्यमायुधं यस्य। सांकेत्येन मूलप्रमाणशून्येन पाषंडागमेन॥ ३०॥ ॥श्रीवासुदेवाय नमः॥

टिप्पा

तैर्वंचित इत्येतद्व्याचष्टे यदात्विति। आत्मना वंचितैः उरु अधिकं वंचितः सन्। तेषां ब्राह्मणानां यच्छीलमुपनयनादि तदरोचयं छूद्रवद्वर्त्तते निगमोक्ताचारे अशुद्धितः स्वस्य शुद्ध्यभावात्। यस्य शूद्रस्य केवलं मिथुनीभावः कुटुंबभरणं चव्यापारो नाग्निहोत्रादि॥ ३१॥ तत्रापि रासेनेत्याचष्टे। तत्रापि निरवरोधः प्रतिबाधरहितः। स्वैरेण स्वेच्छया क्रीडन् विस्मृतमृत्युकालः सन्॥ ३२॥ द्रुमेषु रंस्यन्नित्येतद्व्याचष्टे क्वचित् द्रुमवदिति। व्यवाय

यदा पाषंडिभिरात्मवंचितैस्तैरुरुवंचितो ब्रह्मकुलं समावसंस्तेषां शीलमुपनयनादिश्रौतस्मार्त्तकर्मानुष्ठानेन भगवतो यज्ञपुरुषस्य आराधनमेव तदरोचयंश्शूद्रकुलं भजते निगमाचारेऽशुद्धितो यस्य मिथुनीभावः कुटुंबभरणं यथा वानरजातेः॥ ३१॥ तत्रापि निरवरोधः स्वैरेण विहरन्नति कृपणबुद्धिरन्योन्यमुखनिरीक्षणादिना ग्राम्यकर्मणैव विस्मृतकालावधिः॥ ३२॥ क्वचिद्द्रुमवदैहिकार्थेषु गृहेषु रंस्यन् यथा वानरः सुतदारवत्सलो व्यवायक्षणः॥ ३३॥ एवमध्वन्यवरुंधानो मृत्युगजभयात्तमसि गिरिकंदरप्राये॥ ३४॥

क्षणः मिथुनोत्सवो भवति॥ ३३॥ क्वचित्प्रमादादित्येतद्व्याचष्टे। एवमध्वनि सुखदुःखाद्यवरुंधानो गिरिकंदरप्राये तमसि रोगाद्यापदि पतती निर्दोषः॥ ३४॥

क्वचिच्छीतवातेत्यादि पूर्वस्मादधिकोक्तिः। रोगाद्यापदि पतितः सन् शीतादिभिः क्लिश्यन्नास्त इत्यर्थः॥३५
तदेवं सिंहावलोकनन्यायेनोक्तमर्थं यथास्थानमपकृष्य व्याख्यायक्रमस्थमनुवर्त्तयितुं पूर्वोक्तमेवानुवदति
क्वचिन्मिथ इति वित्तशाठ्येन कदाचिद्यत्किंचिद्धनमुपयाति॥३६॥ क्वचित्क्वचित्क्षीयाधनास्त्वितिव्याचष्टे॥ क्व
८ चित्क्षीणधन इति। अप्रतिलब्धं यन्मनोरथेनोपगतं वांछितं तस्यादाने स्वीकारे निश्चितमतिः सन्॥३७॥ अ

क्वचिच्छीतवाताद्यनेकदैविकभौतिकात्मीयानां दुःखानां प्रतिनिवारणे अकल्पो दुरंतविषयविषम
आस्ते॥३५॥ क्वचिन्मिथो व्यवहरन्यत्किंचिद्धनमुपयाति वित्तशाठ्येन॥३६॥ क्वचित्क्षीणधनः
शय्यासनाशनाद्युपभोगविहीनो यावदप्रतिलब्धमनोरथोपगतादानेऽवसितमतिस्ततस्त
तोऽवमानादीनि जनादभिलभते॥३७॥ एवं वित्तव्यतिषंगविवृद्धवैरानुबंधोऽपि पूर्ववासनया मिथउ
द्वहत्यथापवहति॥३८॥ एतस्मिन्संसाराध्वनि नानाक्लेशोपसर्गबाधित आपन्नविपन्नो यत्र यस्तमुह
वा वेतरस्तत्र विसृज्य जातं जातमुपादाय शोचन्मुह्यन्बिभ्यन्विवदन्क्रंदन्संहृष्यन्गायन्नह्यमानः
साधुवर्जितो नैवावर्त्ततेऽद्यापि यत आरब्ध एष नरलोकसार्थः यमध्वनः पारमुपदिशंति॥३९॥
अन्योन्यवित्तव्यतिषंगेनेत्येतद्व्याचष्टे। एवं वित्तव्यतिषंगेति। अपवहति त्यजति। अध्वन्यमुष्मिन्नित्यादिव्याचष्टे
एतस्मिन्निति। आपन्नः आपदं प्राप्तः विपन्नो विनष्टो वा यत्र यः तमितरस्तत्रैव विसृज्य नह्यमानः साधुवर्जितः सा
बध्यमानः

राम ५६

अनाहत्तो हेतुमाह। यदिदमिति॥४०॥ मनस्विन इत्यादि व्याचष्टे यदपीति। ये वै राजर्षयस्तेऽपि नावरुंधते किं
तु परं केवलं मृधे शयीरन्। असज्जितीत्यादिगिरिकंदरं इत्यंतमपकृष्य व्याख्यातं ग्रंथमतिक्रम्य वल्लीं गृहीत्वेत्या
दिग्रंथं व्याचष्टे कर्मवल्लीमिति। एवमुपरिस्वर्गगतोऽपि नरलोकसार्थमेवोपयाति॥४१॥ तदेवं भरतोक्तिं व्याख्या

यदिदं योगानुशासनं न वा एतदवरुंधते। यन्न्यस्तदंडा मुनय उपशमशीला उपरतात्मानः समव
गच्छंति॥४०॥ यदपि दिगिभजयिनो यज्विनो ये वै राजर्षयः किंतु परं मृधे शयीरन् अस्यामेव ममे
यमिति कृतवैरानुबंधायां विसृज्य स्वयमुपसंहृताः। कर्मवल्लीमवलंब्य तद्वत्त आपदः कथंचि
न्नरकाद्विमुक्तः पुनरप्येवं संसाराध्वनि वर्त्तमानो नरलोकसार्थमुपयाति एवमुपरिगतोऽपि॥४१
तस्येदमुपगायंति। आर्षभस्येह राजर्षेर्मनसापि महात्मनः॥ नानुवर्त्मार्हति नृपो मक्षिकेव गरु
त्मतः॥४२

यतश्चरिते संग्रहश्लोकानाह। तस्येदं कर्मश्लोकैरुपगायंति। आर्षभस्य ऋषभपुत्रस्य अन्यो नृपः अनुव
र्त्म नार्हति वर्त्मानुगंतुं न शक्नोति॥४२॥

तत्र हेतुमाह यइति। सुहृद्राज्ययोर्द्वैक्यं। यो दुस्त्यजान्दारादीन्विष्ठामिव जहौ तस्यार्षभस्येति संबंधः।
दुस्त्यजत्वे हेतुः। हृदिस्पृशः मनोज्ञान्। त्यागे हेतुः उत्तमश्लोके लालसा लंपटत्वं यस्य। ४३। तस्यैवं विषय
त्यागो न चित्रमित्याह। य एवंभूतो सोन्यः सक्षित्यादीन्नैच्छदिति यत्तदुचितं। सदयावलोकं। भरतस्य दया
यथा भवत्येवमवलोको यस्याः इति परिजनावलोकः। श्रियाम् उपवर्ण्यते। यतः मधुद्विषः सेवायामनुरक्तं मनो येषां

यो दुस्त्यजान्दारसुतान्सुहृद्राज्यं हृदिस्पृशः॥ जहौ युवैव मलवदुत्तमश्लोकलालसः॥४३॥
यो दुस्त्यजान्क्षितिसुतस्वजनार्थदारान् प्रार्थ्यां श्रियं सुरवरैः सदयावलोकां॥ नैच्छन्नृपस्तदु
चितं महतां मधुद्विट्सेवानुरक्तमनसामभवोपि फल्गुः॥४४॥ यज्ञाय धर्मपतये विधिनैपुणा
य योगाय सांख्यशिरसे प्रकृतीश्वराय॥ नारायणाय हरये नम इत्युदारं हास्यन्मृगत्वमपि यः स
मुदाजहार॥४५

महता तेषां भवो पि फल्गुः। मोक्षो पि तुच्छ एव॥४४॥ तस्य सेवानुरागमेवाह। यज्ञायेति। यज्ञरूपाय। धर्मपतये य सुम
ज्ञादिफलदात्रे। विधौ नैपुण्यं यस्य तस्मै तन्मर्मानुष्ठात्रे। योगो ष्टांगः तस्मै। सांख्यं ज्ञानं तच्छिरः प्रधानं फलं य ५७
स्य तस्मै योगाय। प्रकृतीश्वराय मायानियंत्रे। अत एव नारं जीवसमूहः सः अयनमाश्रयो यस्य। सर्वजीवनि
यंत्रे एवं कर्मज्ञानदेवताकांडैः प्रतिपादिताय हरये नम इति उदारं उच्चैर्यः सम्यगुच्चारितवान्। मृगत्वं मृगदेह
मपि हास्यन् त्यक्ष्यन् य एवंभूतः तस्य तदुचितमिति वा तस्यानुवर्त्म नार्हतीति वा संबंधः॥४५॥ कृष्णाय नमः॥

भरतचरितश्रवणादिफलमाह इदमिति। भागवतैः सभाजिताः अवदाताः शुद्धा गुणाः कर्माणि च यस्य त
स्य भरतस्यानुचरितं यो नुशृणोति स आत्मन एव सकाशात्सर्वा आशिष आशास्ते स्वत एव प्राप्नोति न तु कां
चिदपि परस्मादपेक्षत इत्यर्थः॥४६॥ ॥पंचमस्कंधे चतुर्दशोध्यायः॥ ॥एवमष्टभिरध्यायैर्भरतस्योक्रमीहि
तं॥ ततः पंचदशे तस्य कीर्त्यंते वंशजा नृपाः॥ अत्र भपदवीं जीवन्मुक्तमार्गमनुवर्त्तमानं यं दृष्ट्वेति शेषः। यद्वा यं

इदं भागवतसभाजितावदातगुणकर्मणो राजर्षेर्भरतस्यानुचरितं स्वस्त्ययनमायुष्यं धन्यं यशस्यं स्व
र्गापवर्ग्यं वानुशृणोत्याख्यास्यत्यभिनंदति च सर्वा एवाशिष आत्मन आशास्ते न कांचन परत इति॥
४६॥ इति श्रीभागवते महापुराणे पंचमस्कंधे भरतोपाख्याने ब्राह्मणरहूगणसंवादे चतुर्दशो
श्रीशुक उवाच॥ ॥भरतस्यात्मजः सुमतिर्नामाभिहितो यमु ह वाव केचित्पा ध्यायः॥ खंडिनऋ
षभपदवीमनुवर्त्तमानं चानार्या अवेदसमाम्नातां देवतां स्वमनीषया पापीयस्या कलौ कल्पयि
ष्यंति॥१॥ तस्माद्वृद्धसेनायां देवताजिन्नाम पुत्रोभवत्॥२॥ अथासुर्यां तत्तनयो देवद्युम्नस्ततो धे
नुमत्यां सुतः परमेष्ठी तस्य सुवर्चलायां प्रतीह उपजातः॥३॥

सुमतिं अवेदसमाम्नातां देवतां कल्पयिष्यंति बुद्धोयं साक्षादवतीर्ण इति मंस्यंत इत्यर्थः॥१।२॥ तत्तनयः
देवताजितः पुत्रः॥३॥

आत्मविद्यां बद्धभ्य आख्याय व्याख्यानेनैव स्वयं संशुद्धोऽनुसस्मार अपरोक्षतयानुभूतवान्। प्रतिहर्त्रप्र
स्तोताउद्गातेति त्रयो यज्ञनिपुणाः सूनव आसन्। अजनिषातां जातौ॥४॥ हृदयजः पुत्रः। जगतो रिरक्षिष

यस्मादात्मविद्यामाख्याय स्वयं संशुद्धो महापुरुषमनुसस्मार। प्रतीहात् सुवर्चलायां प्रतिहर्त्रा
दयस्त्रय आसन्निज्याकोविदाः सूनवः प्रतिहर्तुः स्तुत्यामजभूमानावजनिषातां॥४॥ भू
म्न ऋषिकुल्यायामुद्गीथस्ततः प्रस्तावो देवकुल्यायां प्रस्तावान्नियुत्सायां हृदयज आसीद्विभुर्वि
भो रत्यां च पृथुषेणः तस्मान्नक्त आकूत्यां जज्ञे नक्ताद्द्रुतिपुत्रो गयो राजर्षिप्रवर उदारश्रवा अजा
यत साक्षाद्भगवतो विष्णोर्जगद्रिरक्षिषया गृहीतसत्वस्य कलात्मवत्वादिलक्षणेन महापुरुषतां प्रा
प्तः॥५॥

राम
५८

यागृहीतं सत्वं येन तस्य विष्णोः कलांशः सन्॥५॥ ॥श्रीवासुदेवाय नमः॥ परमात्मने नमः॥ ॥

महापुरुषत्वमाह स वै इति। धर्मस्तस्य द्विविधः अनिषिद्धत्वात्प्रजापालनादिरेकः गृहस्थत्वादिज्यादिश्चापरः।
द्विविधोपि भगवति सर्वात्मनार्पितः सन्परमार्थलक्षणः तेन परिभाविता संस्कृता अतिशुद्धा मतिर्यस्य। अत एवो
त परमनात्म्यं देहाद्यहंभावो यस्मिन् तस्मिन्नात्मनि चित्ते स्वयमेवोपलभ्यमानो ब्रह्मण्यात्मानुभवो यस्य तादृशोऽ

स वै स्वधर्मेण प्रजापालनपोषणप्रीणनोपलालनानुशासनलक्षणेनेज्यादिना च भगवति महापुरुषे प
रावरे ब्रह्मणि सर्वात्मनार्पितपरमार्थलक्षणेन ब्रह्मविच्चरणानुसेवयापादितभगवद्भक्तियोगेन चाभी ल
क्ष्णशः परिभावितातिशुद्धमतिरुपरतानात्म्ये आत्मनि स्वयमुपलभ्यमानब्रह्मात्मानुभवोपि निर
भिमान एवावनिमजूगुपत्॥ तस्येमां गाथां पांडवेय पुराविद उपगायंति॥६॥ गयं नृपः कः प्रतिया
ति कर्मभिर्यज्वाभिमानी बहुवित् धर्मगोप्ता। समागतश्रीः सदसस्पतिः सतां सत्सेवकोन्यो भगवत्कलामृ
ते॥७॥

पि निरभिमान एव अवनिं अजूगुपत् पालयामास॥६॥ कर्मभिर्गयं कः प्रतियाति। अनुकरोति न कोपि। अत्र हेतुः
यज्वादिरूपां भगवत्कलां गयमृतेऽन्यः क इत्यनुषंगः। अभिमानी सर्वतो मानास्पदं मनस्वीति वा समागता संज्ञा प्रा
श्रीर्येन यमिति वा सतां सदसः सभायाः पतिः। सतां सेवकः यद्वा यज्वादिरूपोपि भगवत्कलामृते गयं कोऽन्यः प्रतिया
तीत्यन्वयः॥७॥

सती:सत्य:सत्या अग्निष्वात्ता यासां ता: दक्षकन्या: श्रद्धा मैत्री दयेत्याद्या: निराशिषोपि यस्य प्रजानामाशिष:
कामान् धरा दुदुहे तस्य गुणा एव वत्स: तेन स्नुत मूधो यस्या: पृथिव्या: यच्छद्मानां तं गयं क: प्रतियातीति संबंध:॥
८॥ छंदांसि वेदास्तद्विहितकर्माणि वा दुहृकु: दुदुहु: युधि प्रत्यंचिता: बाणै: प्रतिपूजिता नृपा: यस्य बलिमाज

यमन्यपि वन्यस्या मुदा सती: सत्या दयो दक्षकन्या: सरिद्भि:। यस्य प्रजानां दुदुहे धराशिषो निरा
शिषो गुणवत्सस्नुतोधा:॥८॥ छंदांस्यकामस्य च यस्य कामान् दुदूहुराजह्रुरथो बलिं नृपा:।
प्रत्यंचिता युधि धर्मेण विप्रा यदाशिषां षष्ठमंशं परेत्य॥९॥ यस्याध्वरे भगवानध्वरात्मा मघो
नि माद्यत्युरुसोमपीथे॥ श्रद्धाविशुद्धाचलभक्तियोगसमर्पितेज्याफलमाजहार॥१०॥

कु: अर्पयामासु:। धर्मेण पालनेन दक्षिणादिभिश्च यदा प्रत्यंचिता विप्रा: तदा परेत्य लोकांतरे आशिषां ध
र्मफलानां षष्ठमंशमाजह्रु:। पुण्यषड्भागमादत्ते न्यायेन परिपालयन्निति स्मृते:॥९॥ उरुसोमपीथे बहुसो
मपाने अध्वरे मघोनि इंद्रे माद्यति मदं प्राप्नुवति सति। श्रद्धया विशुद्धो यो चलो भक्तियोगस्तेन समर्पितमिज्या
फलं आजहार अर्हणमिव प्रत्यक्षत: स्वीकृतवानित्यर्थ:॥१०॥

यत्प्रीणनात् बर्हिषि देवतिर्यङ्मनुष्यवीरुत्तृणमा विरिंच्यात्। प्रीयेत सद्य: स ह विश्वजीव: प्रीत: स्वयं प्रीतिमगाद्ग
यस्य भगवत: प्रीणनाद्देवादीनां द्वंद्वैक्यं तत्सद्य: प्रीयेत प्रीतिं गच्छेत् स विश्वजीव: सर्वांतर्यामी स्वयं प्रीति यस्य॥११
रूप एव बर्हिषि यज्ञे गयस्य ह स्फुटं प्रीतिमगात् तत्तोस्मीति प्रत्यक्षं प्रीतिमाविः कृतवानित्यर्थ:॥१२॥ सुमनसि स्त्रि
यां॥१३॥ कीर्त्या अतिशयेन अलमकरोत् भूषितवान्॥१५॥ ॥इति पंचमे पंचदश:॥

यां॥ १२॥ गयाद्गयंत्यां चित्ररथ: सुगतिरवरोधन इति त्रय: पुत्रा बभूवु:। चित्ररथादूर्णायां सम्राडजनिष्ट॥१२॥
ततउत्कलायां मरीचि: मरीचेर्बिंदुमत्यां बिंदुमाननुदपद्यत। तस्मात्सरघायां मधुनामाभवत्। मधो: सुम
नसि वीरव्रत: ततो भोजायां मंथु प्रमंथू जज्ञाते। मंथो: सत्यायां भौवन: ततो दूषणायां त्वष्टाजनिष्ट त्वष्टु
र्विरोचनायां विरज: विरजस्य पत्नी विषूच्यां शतजिन्प्रवरं पुत्रशतं कन्या च किल जातं॥१३॥ तत्रायं श्लोक:।
प्रैयव्रतं वंशमिमं विरजश्चरमोद्भव:॥ अकरोदत्यलं कीर्त्या विष्णु: सुरगणं यथा॥१४॥ ॥इति श्रीभाग
वते महापुराणे पंचमस्कंधे प्रियव्रतवंशानुकीर्तनं नाम पंचदश:॥ ॥

पूर्वोक्तं द्वीपसिंध्वादिमानं द्रष्टुं स्वस्वरूपत:। स्पष्टं प्रवक्तुमारब्धा पंचाध्यायी तत:परं॥१॥ षोडशेऽधस्तथा चोर्ध्वं
परित: संनिवेशत:। मेरो: स्थितिर्महीकंजकर्णिकात्वेन वर्ण्यते। २। प्रियव्रतचरित्रोक्तावुक्ता द्वीपादिकल्प
ना। तद्विशेषविजिज्ञासु: कथां ते परिपृच्छति॥ ३॥ उक्त इति॥

भा॰पं॰ ६० किं पर्यंतमुक्तस्तदाह। यावदादित्यस्तपति। यत्र वा सोऽयं शुक्लकृष्णपक्षयोर्नक्षत्रगणैः सह चंद्रमा वा दृश्यते तावत्॥१
यतः येभ्यः सिंधुभ्यः एतस्या भुवः सूचितः संक्षेपतो दर्शितः॥२॥ जिज्ञासाया फलमाह भगवन्निति॥३॥ यामायागुण
विभूतिस्तस्याः काष्ठां अंतं। रूपसंनिवेशः लक्षणं चिह्नं॥४॥ कुवलयं भूमंडलं तदेव कमलं तस्य कोशाः सप्त द्वीपाः ते

राजोवाच॥ ॥उक्तस्त्वया भूमंडलायामविशेषो यावदादित्यस्तपति यत्र वा सौ ज्योतिषां गणैश्चंद्रमा वा
सह दृश्यते॥१॥ तत्रापि प्रियव्रतरथचरणपरिखातैः सप्तभिः सप्त सिंधव उपक्लृप्ताः। यत एतस्याः सप्तद्वी
पविशेषविकल्पस्त्वया भगवन्खलु सूचितः। एतदेवाखिलमहं मानतो लक्षणतश्च सर्वं विजिज्ञासामि॥
२॥ भगवतो गुणमये स्थूलरूप आवेशितं मनो ह्यगुणेऽपि सूक्ष्मतम आत्मज्योतिषि परे ब्रह्मणि भगवति
वासुदेवाख्ये क्षममावेशितुं तदु हैतद्गुरोऽर्हस्यनुवर्णयितुमिति॥३॥ ॥ऋषिरुवाच॥ ॥न वै महा
राज भगवतो मायागुणविभूतेः काष्ठां मनसा वचसा वाऽधिगंतुमलं विबुधायुषापि पुरुषस्तस्मात्प्राधान्ये
नैव भूगोलकविशेषं नामरूपमानलक्षणतो व्याख्यास्यामः॥४॥ यो वायं द्वीपः कुवलयकमलकोशाभ्यंतर
कोशो नियुतयोजनविशालः समवर्तुलो यथा पुष्करपत्रं॥५॥ राम ६०

अभ्यंतरः कोशः प्रथमो जंबूद्वीपः नियुतयोजनविशालः लक्षयोजनविस्तीर्णः॥५॥ ॥श्रीवासुदेवाय नमः॥

नवयोजनसहस्रं आयामो येषां। आयामोऽत्र विस्तारो एतच्च भद्राश्वकेतुमालव्यतिरेकेण द्रष्टव्यं। तयोश्चतुस्त्रिंश
द्योजनसहस्रायामत्वात्। केचित्तु नीलनिषधयोः संलग्नयोः समुद्रप्रवेशमंगीकृत्य तयोरपि संकुचितत्वेन नवसह
स्रायामत्वं संपादयंति। संनिवेशश्च वायुनोक्तः। धनुर्वत्संस्थिते ज्ञेये द्वे वर्षे दक्षिणोत्तरे। दीर्घाणि तत्र चत्वारि
चतुरस्रमिलावृतमिति॥६॥ नाभ्यां मध्ये। द्वीपस्यायामो लक्षयोजनप्रमाणं तावान्समुन्नाह उच्छ्रायो यस्य॥७॥ मूलेषो

यस्मिन्नव वर्षाणि नवयोजनसहस्रायामान्यष्टभिर्मर्यादागिरिभिः सुविभक्तानि भवंति॥६॥ एषां मध्ये इ
लावृतं नामाभ्यंतरवर्षं यस्य नाभ्यामवस्थितः सर्वतः सौवर्णः कुलगिरिराजो मेरुर्द्वीपायामसमुन्नाहः कर्णि
काभूतः कुवलयकमलस्य॥७॥ मूर्द्धनि द्वात्रिंशत्सहस्रयोजनविततो मूले षोडशसाहस्रं तावतांतर्भू
म्यां प्रविष्टः। उत्तरोत्तरेणेलावृतं नीलः श्वेतः शृंगवानिति त्रयो रम्यकहिरण्मयकुरूणां वर्षाणां मर्यादागि
रयः प्रागायता उभयतः क्षारोदावधयो द्विसहस्रपृथव एकैकशः पूर्वस्मात्पूर्वस्मादुत्तर उत्तरो दशांशाधि
कांशेन दैर्घ्य एव ह्रसंति॥८॥

उच्चा योजनसहस्रं विततः तावता षोडशयोजनसहस्रमानेन चतुरशीतियोजनसहस्रमानेन च बहिर्दृश्यते
एवं लक्षयोजनोन्नाहः। उत्तरोत्तरेणेलावृतमिलावृतस्योत्तरोत्तरतः क्रमेण नीलादयस्त्रयो मर्यादागिरयः प्रागायताः
पूर्वतो दीर्घाः क्षारोद एवावधिर्येषां। द्विसहस्रयोजनविस्तीर्णः दशांशादीषदधिकोयोंऽशस्तेन दैर्घ्य एव ह्रसंति न
तु स्वत्वे पृथुत्वे वा। यथोक्तं विष्णुपुराणे। लक्षप्रमाणौ द्वौ मध्ये दशहीनास्तथा पर इति। एतच्च सूत्रं दृष्ट्वोक्तं। तयोरपि [illegible]॥८॥

अयुतयोजनउत्सेधः उच्छ्रायो येषां। अयं चोत्सेधो नीलादीनामपि द्रष्टव्यः। नीलादिपृथुत्वं येषामपि द्रष्टव्यं॥ यथासंख्यं मर्यादागिरय इति शेषः॥९॥ आनीलनिषधायतो उत्तरतो नीलपर्यंतं दक्षिणतो निषधपर्यंतं वदीर्घौ। पञ्च पृथु: विस्तीर्णौ भवतः॥१०॥ तावेव केतुमालभद्राश्वयोर्वर्षयोः सीमानं कुर्वाते॥११॥ नन्वेवं सति पूर्वापररेखायामिलावृतवेष्टितो मेरुर्मध्ये। ततः पूर्वापरतो गिरिद्वयं वर्षद्वयं च नातः किंचिदस्ति दक्षिणोत्तररेखायां तथैवेलावृतवेष्टितो मध्ये मेरुः उभयतस्त्रीणि त्रीणि वर्षाणि गिरयश्च। तत्कथं सर्वतो लक्षप्रमाणत्वं जंबूद्वीपस्य उच्यते। मेरोः षोडशसहस्राणि सर्वतः स्थितत्वादि

एवं दक्षिणेनेलावृतं निषधो हेमकूटो हिमालय इति प्रागायता यथा नीलादय अयुतउत्सेधा हरिवर्षकिंपुरुषभारतानां यथासंख्यं॥९॥ तथैवेलावृतमपरेण पूर्वेण च माल्यवद्गंधमादनावानीलनिषधायतौ द्विसहस्रं पप्रथतुः॥१०॥ केतुमालभद्राश्वयोः सीमानं विदधाते॥११॥ मंदरो मेरुमंदरः सुपार्श्वः कुमुद इति अयुतयोजनविस्तारोन्नाहा मेरोश्चतुर्दिशमवष्टंभगिरय उपक्लृप्ताः॥१२॥

लावृतस्याष्टादश अन्येषां षण्णां चतुःपंचाशत्। गिरीणां षण्णां द्वादश इत्येवं दक्षिणोत्तररेखायां तावल्लक्षं। पूर्वापररेखायामपि समेरोरिलावृतस्य चतुस्त्रिंशत् गिरयोश्च वारिशेषाणि द्विषष्टिसहस्राणि पूर्वापरवर्षयोः समुद्रदैर्घ्ये द्रष्टव्यानि अतो न विरोधः। अयुतयोजनप्रमाणो विस्तारोन्नाहो येषां विस्तीर्णमूर्ध्नो मेरोरवष्टंभत्वात् पूर्वपश्चिमौ गिरी दक्षिणोत्तरविस्तारौ दक्षिणोत्तरौ च पूर्वापरविस्तारौ द्रष्टव्यौ। सर्वतो दशयोजनसहस्रविस्तारांगीकारे त्विलावृतमु

[illegible]ध्यायः॥१६॥

राम
६१

अधिसहस्रमेकादशशतानि उन्नाहो येषां तावत्प्रमाणं विटपविततिर्येषां। शतयोजनं परिणाहो विस्तारो येषां॥१३॥ यदुपस्पर्शिनः यत्सेविनः॥१४॥ ललामभूषणं सुरललनानां भूषणभूताः श्रेष्ठा याः स्त्रियस्तासां यूथस्य पतयः सह संभूय येषु विहरंति॥१६॥ एकादशशतयोजनउत्तुंगो यो देवचूतस्तस्य शिरसः सकाशात्। फलप्रमाण

कुदाश्चतुर्ष्वेतेषु चूतजंबूकदंबन्यग्रोधाश्चत्वारः पादपप्रवराः पर्वतकेतव इव अधिसहस्रयोजनोन्नाहास्तावद्विटपविततयः शतयोजनपरिणाहाः॥१३॥ ह्रदाश्चत्वारः पयोमध्विक्षुरसमृष्टजला यदुपस्पर्शिन उपदेवगणा योगैश्वर्याणि स्वाभाविकानि भरतर्षभ धारयंति॥१४॥ देवोद्यानानि च भवंति चत्वारि नंदनं चैत्ररथं वैभ्राजकं सर्वतोभद्रमिति॥१५॥ येष्वमरपरिवृढाः सह सुरललनाललामयूथपतय उपदेवगणैरुपगीयमानमहिमानः किल विहरंति॥१६॥ मंदरोत्संग एकादशशतयोजनोत्तुंगदेवचूतशिरसो गिरिशिखरस्थूलानि फलान्यमृतकल्पानि पततं ति॥१७॥ तेषां विशीर्यमाणानामतिमधुरसुरभिसुगंधिबहुलारुणरसोदेनारुणोदा नाम नदी मंदरगिरिशिखरान्निपतंती पूर्वेणेलावृतमुपप्लावयति॥१८॥

मुक्तं वायुपुराणे। अरत्नीनां शतान्यष्टौ एकषष्ट्यधिकानि च। फलप्रमाणमाख्यातमृषिभिस्तत्त्वदर्शिभिरिति॥ अतिमधुरश्चासौ स्वतः सुरभिश्च सुगंधिश्च न च अन्येषां गंधैरधिवासितः॥ बहलश्चारुणश्च रसः रसएव उदमुदकं तेन॥१८॥

भा०पं० ६२ यदुपजोषणात् यस्य रसस्य सेवनात्॥१९॥ अनस्थिप्रायाणां अतिसूक्ष्मबीजानां। यत्र निपतति तत आरभ्यात्म
नो दक्षिणतः सर्वमिलावृतं व्याप्य वहतीत्यर्थः॥२०॥ तावत्सर्वतः रोधसोस्तटयोः॥२१॥ २२॥ आयामोत्र व्यायामः॥ स

यदुपजोषणाद्भवान्या अनुचरीणां पुण्यजनवधूनामवयवस्पर्शसुगंधवातो दशयोजनं समंतादनुवासय
ति॥१९॥ एवं जंबूफलानामत्युच्चनिपातविशीर्णानामनस्थिप्रायाणामिभकायनिभानां रसेन जंबूनाम
नदी मेरुमंदरशिखरादयुताधिकयोजनादवनितले निपतंती दक्षिणेनात्मानं यावदिलावृतमुपस्यंदति॥
२०॥ तावदुभयोरपि रोधसोर्या मृत्तिका तद्रसेनानुविध्यमाना वाय्वर्कसंयोगविपाकेन सदामरलोकाभ
रणं जांबूनदं नाम सुवर्णं भवति॥२१॥ यदु ह वाव विबुधादयः सह युवतिभिर्मुकुटकटककटिसूत्राद्या
भरणरूपेण खलु धारयंति॥२२॥ यस्तु महाकदंबः सुपार्श्वनिरूढो यास्तस्य कोटरेभ्यो विनिःसृताः
पंचायामपरिणाहाः पंच मधुधाराः सुपार्श्वशिखरात्पतंत्यो पश्चिमेनात्मानमिलावृतमनुमोदयंति॥२३॥
या ह्युपयुंजानानां मुखनिर्वासितो वायुः समंताच्छतयोजनमनुवासयति॥२४॥ एवं कुमुदनिरूढो यः श राम ६२
तवल्शो नाम वटस्तस्य स्कंधेभ्यो नीचीनाः पयोदधिमधुघृतगुडान्नाद्यंबरशय्यासनाभरणादयः
सर्व एव कामदुघा नदाः कुमुदाग्रात्पतंतस्तमुत्तरेणेलावृतमुपयोजयंति॥२५॥ यानुपजुषाणानां न क

व्यामो बाह्वोः सकरयोस्ततयोस्तिर्यगंतरमित्युक्तलक्षणः पंचव्यामपरिणाहः स्थौल्यं यासामित्यर्थः॥ केचित्तु पं
चव्यामं परिणाहमित्येव पठंति॥२३॥२४॥ नीचीना अधोमुखाः॥२५॥२६॥ ॥श्रीवासुदेवाय नमः॥ ॥

चतुर्दिक्षु मेरुमूलाद्योजनसहस्रांतरस्था गिरेः परितः परिधय इव जठरदेवकूटादयस्तिष्ठंति। अतो द्वादशयोजनस
यानुपजुषाणानां न कदाचिदपि प्रजानां वलीपलितक्लमस्वेददौर्गंध्यजरामयमृत्युशीतोष्णवैवर्ण्योपसर्गादयस्ता
पविशेषा भवंति। यावज्जीवं सुखं निरतिशयमेव॥२६॥ कुरंगकुररकुसुंभवैकंकत्रिकूटशिशिरपतंगरुचकनिष
धशिनीवासकपिलशंखवैडूर्यजारुधिहंसर्षभनागकालंजरनारदादयो विंशतिगिरयो मेरोः कर्णिकाया इव केसर
भूता मूलदेशे परित उपक्लृप्ताः॥२७॥ जठरदेवकूटौ मेरुं पूर्वेणाष्टादशयोजनसहस्रमुदगायतौ द्विसहस्रं पृथुतुंगौ
भवतः। एवमपरेण पवनपारियात्रौ दक्षिणेन कैलासकरवीरौ प्रागायतौ। एवमुत्तरतस्त्रिशृंगमकरावष्टभिरेतैः त
परिस्तृतोग्निरिव परितश्चकास्ति कांचनगिरिः॥२८॥ मेरोर्मूर्धनि भगवत आत्मयोनेर्मध्यत उपक्लृप्तां पुरीम
उ युतयोजनसाहस्रीं समचतुरस्रां शातकौंभीं वदंति॥२९॥ तामनुपरितो लोकपालानामष्टानां यथादिशं यथारू
पं तुरीयमानेन पुरोष्टावुपक्लृप्ताः॥३०॥ ॥इति श्रीभागवते महापुराणे पंचमस्कंधे भुवनकोशवर्णनं नाम षो
डशोध्यायः॥ ॥

हस्रं प्रमाणमत्रोक्तं। वैष्णवादिपुराणेषु परिमाणादि यत्पुनः। अन्यथा वर्णितं तत्तु कल्पभेदाद्यपेक्षया॥ द्विस
हस्रं पृथू च तुंगौ च॥२८॥२९॥ यथादिशं प्राच्यादिदिक्षु यथारूपं इंद्रादिवर्णानतिक्रमेण तुरीयमानेन सार्धद्विस
हस्रप्रमाणेन नामानि पुराणांतरात् ज्ञातव्यानि। यथोक्तं। मेरौ नव पुराणि स्युर्मनोवत्यमरावती। तेजोवती
संयमिनी तथा कृष्णांगना परा। श्रद्धावती गंधवती तथा चान्या महोदया। यशोवती च ब्रह्मेंद्रवह्न्यादीनां यथा
क्रममिति॥३०॥ पंच मे षोडशः॥

भा० पं० ६२

ततःसप्तदशेगंगागमनंतच्चतुर्दिशां।।इलावृतेबलरूढेणसंकर्षणनिषेवणं।यज्ञलिंगस्यबलेर्यज्ञेलिंगंत्रिवि
क्रममूर्त्तिर्यस्य।विक्रमतःदक्षिणेनपदाभुवंक्रांत्वावामपदमुत्क्षिपतःवामपादांगुष्ठनखेननिर्भिन्नमूर्द्ध्व
मुपरितनोगोयस्यांडकटाहस्यतस्यविवरेणांतःप्रविष्टायाबाह्यजलधारासादिवोमूर्द्धन्यवततारेत्यन्वयः।।

श्रीशुकउवाच।। ।।तत्रभगवतःसाक्षाद्यज्ञलिंगस्यविष्णोर्विक्रमतोवामपादांगुष्ठनखनिर्भिन्नो
र्ध्वांडकटाहविवरेणांतःप्रविष्टायाबाह्यजलधारातच्चरणपंकजावनेजनारुणकिंजल्कोपरंजिता
खिलजगदघमलापहोपस्पर्शनामलासाक्षाद्भगवत्पदीत्यनुपलक्षितवचोभिधीयमानाति
महताकालेनयुगसहस्रोपलक्षणेनदिवोमूर्द्धन्यवततार।।१।।

तस्ययच्चरणपंकजंतस्यावनेजनेनंक्षालनेनअरुणंतद्गतंकुंकुमंतदेवकिंजल्काःतैरुपरंजिताअतएवा राम ६२
खिलस्यजगतोऽघमलापहमुपस्पर्शनंयस्याःतथाप्यमलातन्मलसंगशून्यासाक्षाद्भगवत्पदीति।यदनु
पलक्षितंजाह्नवीभागीरथीत्याद्युपलक्षणांतररहितंवचोनामतेनाभिधीयमानातस्मिन्समयेभगवत्पदी
तिनामपश्चात्तन्नामांतराणिजातानि।।१।। ।।श्रीरामायनमः।।

यदिति
कोसौदिवोमूर्द्धितमाह।किंतद्विष्णुपदंतदाहयत्रेतिवीरव्रतःदृढसंकल्पःअस्मत्कुलदेवतायाहरेश्चरणारविंदो
दकमितिहेतोःपरमादरेणबिभर्तीत्यन्वयः।कथंभूतःसन्अतिक्षणंवर्द्धमानेनभगवद्भक्तियोगेनदृढमत्यंत
क्लिद्यमानमंतर्हृदयंयस्यअतएवऔत्कंठ्येनविवशेआमीलितेयल्लोचनयुगलंतदेवकुड्मलेताभ्यांविगलितम

यत्तद्विष्णुपदमाहुः।यत्रहवाववीरव्रतऔत्तानपादिःपरमभागवतोस्मत्कुलदेवताचरणारविंदोद
कमितियामनुसवनमुत्कृष्यमाणभगवद्भक्तियोगेनदृढंक्लिद्यमानांतर्हृदयऔत्कंठ्यविवशामीलि
तलोचनयुगलकुड्मलविगलितामलबाष्पकलयाभिव्यज्यमानरोमपुलककुलकअधुनापिप ति
रमादरेणशिरसाबिभर्ति।।२।।ततऋषयस्तत्प्रभावाभिज्ञायांननुतपसआत्यंतिकीसिद्धिरेताव
तीभगवतिसर्वात्मनिवासुदेवेनुपरतभक्तियोगलाभेनैवोपेक्षितान्यार्थात्मगतयोमुक्तिमिवागतां
मुमुक्षवइवसबहुमानमद्यापिजटाजूटैरुद्वहंति।।३।।

मलंबाष्पंतस्यकलयासहअभिव्यज्यमानंरोमपुलकानांकुलंयस्य।।२।।ततःसप्तऋषयस्तस्यागंगायाःप्रभावाभि
ज्ञाःसंतोयांजटाजूटैरुद्वहंतीत्यन्वयः।एतावत्येवनातोधिकास्तीत्यभिप्रायवंतः।तत्रहेतुःभगवतिसंततभक्तियोगला
भेनैवोपेक्षिताअन्येपुरुषार्थाआत्मज्ञानंचयैःकामिवकइवधारयंति।प्रत्यक्षंमुक्तिमिवतामगतांमुमुक्षवोजनाइवेति
।।३।।

भा० पं० ६४ ततोनेकसहस्रकोटीनांविमानानामनीकैः संकुलेनदेवयानेनाकाशमार्गेणावतरंती। सप्तऋषिभिः वीगेव धायन्त्याः
कर्मिणांगतिरितिततोर्भागेवसंकुलत्वमुक्तं। आवार्य आप्लाव्य मेरुमूर्द्धस्थेब्रह्मसदनेनिपतति॥४॥ अभिस्यंदंती

ततोनेकसहस्रकोटिविमानानीकसंकुलदेवयानेनावतरंतींदुमंडलमावार्यब्रह्मसदनेनिपतति॥४॥त
त्रचतुर्द्धाभिद्यमानाचतुर्भिर्नामभिश्चतुर्दिशमभिस्पंदंतीनदनदीपतिमेवाभिनिविशति। सीतालकनं
दाचक्षुर्भद्रेति॥५॥ सीतातुब्रह्मसदनात्केसराचलादिशिखरेभ्योधोधःप्रस्रवंतीगंधमादनमूर्द्धसु
पतित्वांतरेणभद्राश्ववर्षंप्राच्यांदिशिक्षारसमुद्रमभिप्रविशति॥६॥ एवंमाल्यवच्छिखरान्निष्प
तंतीततोनुपरतवेगाकेतुमालमभिचक्षुःप्रतीच्यांदिशिसरित्पतिंप्रविशति॥७॥ भद्राचोत्तरतोमेरुशि
रसोनिपतितागिरिशिखराद्गिरिशिखरमतिहायशृंगवतःशृंगादवस्यंदमानाउत्तरांस्तुकुरूनभितउ
दीच्यांदिशिजलधिमभिप्रविशति॥८॥

अभितोगच्छंती॥५॥ केसराचलानांमेरुसमानोच्छ्रायत्वात्प्रथमंतेषांमादिशिखरेषुमुख्यशृंगेषुपततिततः राम
स्तेभ्योधोधःप्रस्रवंतीसती॥६॥ माल्यवच्छिखरात्केतुमालाभिमुखंनिष्पतंतीचक्षुःसंज्ञा॥७॥ गिरिशि ६४
खरादिति। कुमुदशिखरादुच्छलितांश्वेतशिखरंततउच्छलिताश्वेतशिखरंतदप्यतिहायशृंगवतःशृंगाद
नील धःस्रवंती॥८॥

अतिरभसतररंहसाअस्खलिततीव्रतरवेगेन॥९॥ बहुशः बहुविधाः मेर्वादिगिरीणांदुहितरः तत्प्रसूताः दि
व्यभौमबिलभेदात्त्रिविधःस्वर्गः। तत्रभौमस्वर्गस्यपदानिस्थानानिव्यपदिशंति॥११॥ अयुतंपुरुषमाने

तथैवालकनंदादक्षिणेनब्रह्मसदनाद्बहूनिगिरिकूटान्यतिक्रम्यहेमकूटाद्धेमकूटान्हिमकू
टादतिरभसतररंहसालुठंतीभारतमभिवर्षंदक्षिणस्यांदिशिजलधिमभिप्रविशति॥९॥ यस्यां
स्नानार्थंचागच्छतःपुंसःपदेपदेश्वमेधराजसूयादीनांफलंनदुर्लभमिति। अन्येचनदानद्यश्च
वर्षेवर्षेसंतिबहुशोमेर्वादिगिरिदुहितरःशतशः॥१०॥ तत्रापिभारतमेववर्षंकर्मक्षेत्रमन्यान्य
ष्टवर्षाणिस्वर्गिणांपुण्यशेषोपभोगस्थानानिभौमानिस्वर्गपदानिव्यपदिशंति॥११॥ एषुपुरुषाणा
मयुतंपुरुषायुर्वर्षाणांदेवकल्पानांनागायुतप्राणानांवज्रसंहननबलवयोमोदप्रमुदितमहासौरत
मिथुनव्यवायापवर्गवर्षधृतैकगर्भकलत्राणांतत्रतुत्रेतायुगसमःकालोवर्त्तते॥१२॥

अयुतंपुरुषमायुर्वर्षाणियेषांवज्रवद्दृढंसंहननंशरीरंतस्मिन्बलंवयोमोदास्तैःप्रमुदितानियानि
महासौरतानिमिथुनानितेषांव्यवायापवर्गेसंभोगावसानेएकवर्षशेषेआयुषिधृतएकोगर्भोयैःतादृशानि
कलत्राणियेषां। त्रेतायुगसमःविषयसुखोत्कर्षात्। कृतयुगेहिसर्वेध्याननिष्ठाः द्वापरादौतुदुःखबहुलाः
॥१२॥

भा०पं० ६५ यत्र ह येषु हि वर्षेषु देवपतयः स्वैः स्वैः सेवकगणेषु सुखैः कृतमहोपचाराः संतः स्वैरं विहरंतीत्यन्वयः। के
षु स्थानेषु सर्वेषु ऋतुषु कुसुमस्तबकादीनां श्रिया समृद्ध्यात्यंतं नम्यमाना विटपास्तदाश्रिता लताश्च ये
षु तैर्विटपिभिरुपशुंभमानानि शोभमानानि रुचिराणि काननानि येषु तेषाश्रमायतनेषु वर्षगिरिद्रो

यत्र ह देवपतयः स्वैः स्वैर्गणनायकैर्विहितमहार्हणाः सर्वर्तुकुसुमस्तबकफलकिसलयश्रि
यानंनम्यमानविटपलताविटपिभिरुपशुंभमानरुचिरकाननाश्रमायतनवर्षगिरिद्रोणीषु
तथा चामलजलाशयेषु विकचविविधनववनरुहामोदमुदितराजहंसजलकुक्कुटकारंडव
सारसचक्रवाकादिभिर्मधुकरनिकराकृतिभिरुपकूजितेषु जलक्रीडादिभिर्विचित्रविनोदैः सुल
लितसुरसुंदरीणां कामकलिलविलासहाससलीलावलोकाकृष्टमनोदृष्टयः स्वैरं विहरंति ॥१३॥

णीषु च तथा अमलेषु जलाशयेषु च। विकचानि विविधानि यानि नवानि वनरुहाणि नीरजानि तेषामा राम ६५
मोदेन मुदितैराजहंसादिभिर्मधुकरनिकराणां च आकृतिभिः ध्वनिविशेषैरुपकूजितेषु। कामेन कलिलैः
स्फुरितैर्विलासादिभिराकृष्टं मनो दृष्टिश्च येषां ते ॥१३॥

नवस्वपि वर्षेषु ये पुरुषास्तेषां तदनुग्रहाय यस्य चासौ वक्ष्यमाणोऽनुग्रहस्तदर्थं आत्मतत्वव्यूहेन स्वमूर्तिसमूहे
न संनिधीयते संनिहितो भवति ॥१४॥ अपरः अर्वाचीनः पश्चान्नवमस्कंधे ॥१५॥ भवानीनाथाः स्वामिनो
येषां तैः स्त्रीणां गणानामर्बुदसहस्रैरवरुध्यमानः सर्वतः सेव्यमानः आत्मनः प्रकृतिं कारणं आत्मनि स

नवस्वपि वर्षेषु भगवान्नारायणो महापुरुषः पुरुषाणां तदनुग्रहायात्मतत्वव्यूहेनात्मनाद्यापि
संनिधीयते ॥१४॥ इलावृते तु भगवान् भव एक एव पुमान्न ह्यन्यस्तत्रापरो निर्विशति। भवान्याः शाप
निमित्तज्ञः यत्प्रवेक्ष्यतः स्त्रीभावस्तत्पश्चाद्वक्ष्यामि ॥१५॥ भवानीनाथैः स्त्रीगणार्बुदसहस्रैरवरुध्य
मानो भगवतश्चतुर्मूर्तेर्महापुरुषस्य तुरीयां तामसीं मूर्तिं प्रकृतिमात्मनः संकर्षणसंज्ञामात्मस
माधिरूपेण संनिधाप्यैतदभिगृणन् भव उपधावति ॥१६॥ ॥श्रीभगवानुवाच॥ ॥ॐ नमो भगवते
महापुरुषाय सर्वगुणसंख्यानायानंतायाव्यक्ताय नम इति ॥१७॥

माधिर्ध्यानं यस्य तेन रूपेण एतद्वक्ष्यमाणं मंत्रादिकं अभिगृणन् जपन् ॥१६॥ सर्वेषां गुणानां संख्यानं प्रका
शो यस्मात्। स्वयं तु अव्यक्ताय अप्रमेयाय ॥१७॥ ॥श्रीकृष्णाय नमः॥

हे भजन्य। भजनीयत्वात्त्वां परमेश्वरं भजइत्यन्वयः। अरणं शरणं पादपंकजं यस्य। कृत्स्नस्य परं[स्य] परायणं ऐश्वर्या
दिषाड्गुण्यस्य परमायनमाश्रयं। भक्तेषु अलमत्यर्थं भावितं प्रकटितं भूतभावनं स्वरूपं येन भवापहं संसार
हरं भक्तेषु इत्यनुषंगः। भवं भावयतीति तथा तं। अर्थाद्भक्तेष्विति द्रष्टव्यं।।१८।। ईश्वरत्वमुपपादयं स्तामसत्वेन प्र
प्रसक्तमनादरं वारयति नयस्येति। निरीक्षमाणस्यापि दृष्टिर्मायागुणैर्विषयैश्चित्तवृत्तिभिः करणैश्च अथव

भजे भजन्यारणपादपंकजं भगस्य कृत्स्नस्य परं परायणं।। भक्तेष्वलं भावितभूतभावनं भवापहं त्वा
भवभावमीश्वरं।।१८।। न यस्य मायागुणचित्तवृत्तिभिर्निरीक्षतो ह्यण्वपि दृष्टिरज्यते।। ईशे यथा नोऽजित
मन्युरंहसां कस्तं न मन्येत जिगीषुरात्मनः।।१९।।

भिर्दृष्टवदपि नाज्यते न लिप्यते किमर्थं निरीक्षमाणस्य। ईशे ईशनाय नियमनाय। ईशानमीट् संपदादित्वात्क्वि राम
वेक्विप्। अत्र वैधर्म्यदृष्टांतः। यथा अजितक्रोधवेगानां नोऽस्माकं दृष्टिरज्यते। न तथेति। अतः आत्मनः इंद्रिया ६६
णि जिगीषुः जेतुमिच्छुर्मुमुक्षुः तं को न मन्येत नाद्रियेत।।१९।।

ननु स्फुरामधाम्यां मत्तस्य कुतो दृष्टिर्नाज्यते तत्राह। असतीदृक्दृष्टिर्यस्य तस्य स्वमायया क्षीबा मत्तइव यो भयंकरः प्रति
भाति। मध्वासवाभ्यां आताम्रलोचन इव च। नागवधूविमोहनेन तथा प्रतिभानं युक्तमित्याहनेति। पादार्चने यस्य पादयोः
स्पर्शनेन धर्षितं मोहितमिंद्रियं मनो यासां ताः। ह्रिया लज्जया नुजाद्यर्हणेन ईशितुं न शेकुः कस्तं न मन्येतेति पूर्वेणैव

असद्दृशो यः प्रतिभाति मायया क्षीबेव मध्वासवताम्रलोचनः।। न नागवध्वोऽर्हण ईशिरे ह्रिया यत्पाद
योः स्पर्शनधर्षितेंद्रियाः।।२०।। यमाहुरस्य स्थितिजन्मसंयमं त्रिभिर्विहीनं यमनंतमृषयः।। न वेद सि
द्धार्थमिव क्वचित्स्थितं भूमंडलं मूर्द्धसहस्रधामसु।।२१।।

न्वयः।।२०।। अस्य विश्वस्य स्थितिजन्मसंयमहेतुं यमाहुः। अतएव त्रिभिः स्थित्यादिभिर्विहीनं अनंतं च यमाहुः।
ऋषयो मंत्राः छंदोनुरोधेन दीर्घपाठे अकारो देवमाता लक्ष्मीः सा वत्र ऋषयश्चेत्यर्थः। अनंतत्वं दर्शयति। मूर्द्धसहस्र
मेव धामानि स्थानानि तेषु क्वचिदेकदेशे स्थितं भूमंडलं यो न वेद सिद्धार्थं सर्षपमिव तस्मै नम इति चतुर्थेनान्वयः।।२१

तत्र जन्महेतुत्वं महदादिद्वारेण प्रपंचयति। यस्य गुणनिमित्तो महान्नाम विग्रह आसीत्। विज्ञानं सत्वं धिष्ण्यमाश्रयो यस्य सः तस्य चित्तरूपत्वेन सत्वप्रधानत्वात्। सत्वं किलाधिदैवो वासुदेवा नेद विवक्षया। भगवानजो ब्रह्मा यत्संभवः यस्माद् ब्रह्मणः संभूतः अहं रुद्रः त्रिवृता त्रिगुणेन स्वतेजसा स्वविभूतिरूपेणाहंकारेण वैकारिकं देवतावर्गं तामसं भूतवर्गं

यस्याद्य आसीद्गुणविग्रहो महान् विज्ञानधिष्ण्यो भगवानजः किल॥ यत्संभवो हं त्रिवृता स्वतेजसा वैकारिकं तामसमैंद्रियं सृजे॥२२॥ एते वयं यस्य वशे महात्मनः स्थिताः शकुंता इव सूत्रयंत्रिताः॥ महानहं वैकृततामसेंद्रियाः सृजाम सर्वे यदनुग्रहादिदं॥२३॥

ऐंद्रियं चेंद्रियवर्गं च सृजे सृजामि॥२२॥ किंच॥ एते वयं महदादयः सर्वे यस्यानुग्रहादिदं ब्रह्मांडं सृजामः। कथंभूताः यस्य महात्मनो वशे स्थिताः संतः यतः सूत्रेण क्रियाशक्त्या यंत्रिताः प्रोताः शकुंताः पक्षिण इव लोके च सूत्रेण वयमित्युक्तं तानेवाह। महानहंकारश्च वैकृतादयः पूर्वोक्ता वर्गाश्च॥२३॥ ॥श्रीकृष्णाय नमः॥ राम ६७

अहो विचित्रं भगवद्विचेष्टितं घ्नंतं जनोयं हि मिषन्न पश्यति। ध्यायन्नसद्यर्हि विकर्म सेवितुं निर्हृत्य पुत्रं पितरं जिजीविषुः॥३॥

स्थितिलयहेतुत्वं दर्शयन्नुपलक्षणमिति। येन निर्मिता मे तां मायामेवायं जनोंऽग सा वेद न तु तन्निस्तारयोगमुपायं कर्हिचिदपि वेदेति स्थितिहेतुत्वं दर्शितं। कीदृशीं। कर्माण्येव पर्वाणि ग्रंथयः तान्निनयति प्रापयतीति तथा तां। प्रलयहेतुत्वमाह विलीयते तस्मिन्निति विलयः। उदेत्यस्मादित्युदयः। विलयश्चोदयश्चात्मा स्वरूपं यस्य तस्मै नमः॥२४॥ ॥इति पंचमे सप्तदशः॥ ॥अष्टादशे ततो मेरोः पूर्वादिक्रमतस्त्रिषु। त्रिषु चोत्तरवर्षेषु सेव्यसेवकवर्णनं॥१॥ भद्राश्ववाव

यन्निर्मितां कर्ह्यपि कर्मपर्वणीं मायां जनोयं गुणकर्ममोहितः॥ न वेद निस्तारणयोगमंजसा तस्मै नमस्ते विलयोदयात्मने॥२४॥ ॥इति श्रीभागवते महापुराणे पंचमस्कंधे सप्तदशोध्यायः॥ ॥श्रीशुक उवाच॥ ॥ तथा च भद्रश्रवा नाम धर्मसुतस्तत्कुलपतयः पुरुषा भद्राश्ववर्षे साक्षाद्भगवतो वासुदेवस्य प्रियां तनुं धर्ममयीं हयशीर्षाभिधानां परमेण समाधिना संनिधाप्येदमभिगृणंत उपधावंति॥१॥ ॥भद्रश्रवस ऊचुः॥ ॥ॐ नमो भगवते धर्मायात्मविशोधनाय नम इति॥२॥ वदंति विश्वं कवयः स्म नश्वरं पश्यंति चाध्यात्मविदो विपश्चितः तथापि मुह्यंति तवाज मायया सुविस्मितं कृत्यमजं नतोस्मि तं॥३॥

र्षपतिः तस्य कुलपतयः सेवकमुख्याश्च॥१॥ भद्रश्रवस ऊचुरिति प्राणभृत उपदधातीतिवद्गुणलक्षणया तद्योगाद्गुणिषु लिंगं। अयं जनो मिषन्नपि पश्यन्नपि घ्नंतं हिंसंतं न पश्यति नावलोकयतीति भगवद्विचेष्टितमेव तत्समवायन्यायेन बहुवचनं॥२॥ ञ्चविचित्रं। अत्र दृष्टांते लिंगं। पुत्रं बालं पितरं वृद्धं मृतं निर्हृत्य दग्ध्वा स्वयं तत्संबंधनैर्जिजीविषति जीवितुमिच्छति। पागंतरे तु छंदः सामंजस्यं। किं धर्माद्यर्थं न। यर्हि यतः असत्तुच्छं विषयसुखं सेवितुं विकर्म पापमेव ध्यायन्॥३॥

भा०पं० ६८

नन्वविद्वान्नपश्यतीति किमत्र चित्रं तत्राह। नश्वरं वदंतीस्म शास्त्रतः। पश्यंति च समाधौ। हे अज तथापि मायया मुह्यंतिए
तद्भूतवत्कृत्यं चेष्टितं [illegible] तं जनोयं हि मिषंनपश्यति। स्कविस्मितं अतिविचित्रं अतः शास्त्रादिश्रमं विहाय तं त्वामजंनतो
स्मि॥४॥ विश्वोद्भवस्थाननिरोधकर्म ते ह्यकर्तुरंगीकृतमप्ययावृतः॥ युक्तं न चित्रं त्वयि कार्यकारणे सर्वात्मनि व्य
तिरिक्ते च वस्तुतः॥५

इदमपरं चित्रवत्प्रतीयमानमपि त्वयि न चित्रमित्याह। विश्वोद्भवादिकर्म अकर्तुरपि अपगता आवृत् आवरणं य
स्मात् तादृशस्यापि ते अंगीकृतं वेदेन त्वयि तन्न चित्रं यतः मायया सर्वात्मनि कार्यस्य कारणे स्वष्टरि कर्म युक्तं। वस्तु
तः सर्वव्यतिरिक्ते निरुपाधावनावृतत्वमकर्तृत्वं च युक्तं॥५॥ परमेश्वरत्वेन स्तुत्वा प्रस्तुतावतारचरितमाह। वेदानिति।

वेदान्युगांते तमसा तिरस्कृतान् रसातलाद्यो नृतुरंगविग्रहः॥ प्रत्याददे वै कवयेऽभियाचते तस्मै नमस्तेऽवित
थेहिताय इति॥६॥ हरिवर्षे चापि भगवान्नरहरिरूपेणास्ते। तद्रूपग्रहणनिमित्तमुत्तरत्राभिधास्ये। तद्दयितं रूपं
महापुरुषगुणभाजनो महाभागवतो दैत्यदानवकुलतीर्थीकरणशीलाचरितः प्रह्लादोऽव्यवधानानन्यभक्तियोगे
नसह तद्वर्षपुरुषैरुपास्ते। इदं चोदाहरति॥७ राम ६८

तमसा दैत्यरूपेण तिरस्कृतान् अपनीतान्। ना च तुरंगश्च नतुरंगौ तद्रूपो विग्रहो यस्य कवये ब्रह्मणे। तदर्थं अवितथेहि
ताय सत्यसंकल्पाय॥६॥ उत्तरत्र प्रह्लादचरिते। महापुरुषस्य गुणानां भाजनः आश्रयः दैत्यदानवकुलस्य तीर्थीकरणं
शीलमाचरितं च यस्य। फलसंकल्पेन व्यवधानशून्यश्चासावनन्यश्चाव्यभिचारी यो भक्तियोगस्तेन उपास्ते सेवते॥७

तेजसामपि तेजसे। आविराविः अतिप्रकटो भव वीर्यावा। कर्माशयान् कर्मवासनाः। कर्माश्रयानितिपाठे। रागादी
न्रंधय निर्दह। भूयिष्ठाः भूयाः॥८॥ विश्वस्य स्वस्तिप्रार्थने खलस्यापि भवेत् तच्च साधुपीडां विना नस्यात्। अन्योन्य
ममंगलं ध्यायतां च भूतानामन्योन्यघातं विना न भवेत् इत्याशंक्याह। खलः प्रसीदतु क्रौर्यं त्यजतु। भूतानि च मिथः शि

नमो भगवते नरसिंहाय नमस्तेजस्तेजसे आविराविर्भव वज्रनख वज्रदंष्ट्र कर्माशयान् रंधय रंधय तमो ग्र
स ॐ स्वाहा अभयम भयमात्मनि भूयिष्ठा ॐ क्ष्रौं॥८॥ स्वस्त्यस्तु विश्वस्य खलः प्रसीदतां ध्यायंतु भूतानि शिवं
मिथो धिया। मनश्च भद्रं भजतामधोक्षजे आवेश्यतां नो मतिरप्यहैतुकी॥९॥ मागारदारात्मजवित्तबंधुषु संगो
यदि स्याद्भगवत्प्रियेषु नः। यः प्राणवृत्त्या परितुष्ट आत्मवान्सिद्ध्यत्यदूरान्न तथेंद्रियप्रियः॥१०॥ यत्संगलब्धं नि
जवीर्यवैभवं तीर्थं मुहुः संस्पृशतां हि मानसं। हरत्यजोंतः श्रुतिभिर्गतो गजं को वै न सेवेत मुकुंदविक्रमं॥११॥

वमेव ध्यायंतु। तेषां मनश्च भद्रं उपशमादिकं भजतु। नोऽस्माकमपि मतिः अपिशब्दात् भूतानां च मतिः अहैतुकी निष्का
मास्तात्॥९॥ नः संगः क्वापि मास्यात् यदि कथंचित्स्यात् तर्हि आगारादिषु मास्यात् किंतु भगवत्प्रियेष्वेव। आगारादिसंगदोषमाह
यइति इंद्रियप्रियो गृहाद्यासक्तः॥१०॥ भगवत्प्रियसंगे गुणमाह। येषां भगवत्प्रियाणां संगात् लब्धं मुकुंदविक्रमं श्रुतिभिः श्र
वणादिभिः संस्पृशतां सेवमानानां पुंसामंतर्गतोऽजो मानसं मलं हरति। कथंभूतं विक्रमं निजमसाधारणं वीर्यवैभवं प्रभावातिशा
यो यस्य। तीर्थं तु गंगादि मुहुः संस्पृशतामंगजं मलं केवलं हरति। तान् को वै न सेवेतेत्यन्वयः॥११॥

 मानसमलापगमफलमाह। यस्येति। अकिंचनानिःकामा। मनःशुद्धो हरेर्भक्तिर्भवति। ततश्च तत्र सा दृस्सतिसर्वे देवाः
 सर्वैर्गुणैर्धर्मज्ञानादिभिः सहतत्र सम्यगासते। नित्यं वसंति। गृहाद्यासक्तस्यतु हरिभक्त्यसंभवात् कुतो महतां गुणाः
ज्ञानवैराग्यादयो भवंति। असतिविषयसुखे मनोरथेन बहिर्धावतः॥१२॥ ननु हरिविमुखस्य गृहाद्यासक्तस्यापि
लोके महत्वं दृश्यते सत्यं दृश्यते न तु परमार्थतः। सा स्पदं इतिसहेतुकमाह। हरिर्हीति। यथाऽपामंभो मीनानामीप्सितं तोयमेवात्मा

यस्यास्ति भक्तिर्भगवत्यकिंचना सर्वैर्गुणैस्तत्र समासते सुराः॥ हरावभक्तस्य कुतो महद्गुणा मनोरथेनासति धावतो बहिः॥१२॥ हरिर्हि साक्षाद्भगवाञ्छरीरिणामात्मा झषाणामिव तोयमीप्सितं॥ हित्वा महांस्तं यदि सज्जते गृहे तदा महत्त्वं वयसा दंपतीनां॥१३॥ तस्माद्रजोरागविषादमन्युमानस्पृहाभयदैन्याधिमूलं॥ हित्वा गृहं संसृतिचक्रवालं नृसिंहपादं भजताकुतोभयमिति॥१४॥

तेन विना जीवनाभावात्। महानतिप्रसिद्धोपि गृहे यदि सज्जते तदा दंपतीनां मिथुनानां श्वशुरादिष्वपि प्रसिद्धं वयसैव केवलं यन्महत्वं तद्देवतस्य भवति न तु ज्ञानादिना। मिथुनेषु पूज्यमानेषु स्त्रीभ्यः पुंसां महत्वं बालमिथुनेभ्यश्च वृद्धमिथुनानां महत्वं यथेत्यर्थः॥१३॥ यस्मादेवं तस्माद्गृहं हित्वा कुतोभयं नृसिंहपादं भजतेत्यसुरानुपदिशति। कीदृशं गृहं रजस्तद्धारागोभिनिवेशः। रजआदीनां मूलं कारणं अतएव संसृतीनां जन्ममरणादीनां चक्रवालं मंडलमविच्छेदोयस्मात्॥१४॥

केतुमालेऽपि कामदेवरूपेण आस्तइति शेषः। किमर्थमास्ते अतआह। लक्ष्म्याइति। प्रजापतिः संवत्सरः संवत्सरो वै प्रजापतिरितिश्रुतेः। तस्य दुहितरो रात्र्यभिमानिन्यो देवताः पुत्रा दिवसाभिमानिनो देवाः तेषां च प्रियचिकीर्षया। पुरुषायुषा पुरुषवर्षशतेन यान्यहोरात्राणि तैः परिसंख्यातं गणना येषां षट्त्रिंशत्सहस्राणामित्यर्थः। यासां दुहितॄणां

केतुमाले भगवान्कामदेवस्वरूपेण लक्ष्म्याः प्रियचिकीर्षया प्रजापतेर्दुहितॄणां पुत्राणां तद्वर्षपतीनां पुरुषायुषाऽहोरात्रपरिसंख्यातानां यासां गर्भा महापुरुषमहास्त्रतेजसोद्विजितमनसां विध्वस्ताव्यसवः संवत्सरांते विनियंति॥१५॥ अतीवसुललितगतिविलासविलसितरुचिरहासलेशावलोकलीलया किंचिदुत्तंभितसुंदरभ्रूमंडलसुभगवदनारविंदश्रिया रमां रमयन्निंद्रियाणि रमयते॥१६॥ तद्भगवतो मायामयं रूपं परमसमाधियोगेन रमादेवी संवत्सरस्य रात्रिषु प्रजापतेर्दुहितृभिरुपेताऽहस्सु च तद्भर्तृभिरुपास्ते इदं चोदाहरति॥१७॥

महापुरुषस्य महास्त्रं चक्रं तस्य तेजसा॥१५॥ रमां रमयन् स्वीयानींद्रियाणि रमयते। केन साधनेन रमयन् तदाह। अतीवसुललितया गत्या यो विलासस्तेन विलसितो रुचिरो हासलेशो मंदस्मितं तत्सहितो वलोक एवलीला तया किंचिदुत्तंभितं उत्तुंगितं सुंदरं यद्भ्रूमंडलं तेन सुभगं वदनारविंदं तस्य श्रिया॥१६॥ तद्भर्तृभिः दिवसाधिष्ठातृभिरुपेता॥१७॥

भा०पं० ७० सर्वैर्गुणविशेषैः श्रेष्ठवस्तुभिर्विलक्षितो लक्षीकृत आत्मा यस्य। आकूतीनां क्रियाणां चित्तीनां ज्ञानानां चेतसां संक
ल्पाध्यवसायादीनां विशेषाणां तत्तद्विषयाणां। षोडशकला अंशा एकादशेंद्रियपंचविषयलक्षणा यस्य। छंदोमयाय
वेदोक्तकर्मप्राप्याय अन्नमयाय अन्नोपष्टंभ्यत्वात्। अमृतमयाय परमानंदाविष्कारत्वात् सर्वमयाय सर्वविषयत्वा
त्। सहसे ओजसे बलाय तद्धेतुत्वात्॥१८॥ त्वत्कामेनैव त्वत्सेवकत्वात् दृहं कृतार्थाऽस्मि अन्यकामनया नु त्वामर्चत्यो न य

ॐ ह्रां ह्रीं ह्रूं ॐ नमो भगवते हृषीकेशाय सर्वगुणविशेषैर्विलक्षितात्मने आकूतीनां चित्तीनां चेतसां विशेषा
णां चाऽधिपतये षोडशकलाय छंदोमयायान्नमयायामृतमयाय सर्वमयाय सहसे ओजसे बलाय कां
॥ताय कामाय नमस्ते उभयत्र भूयात्॥१८॥ स्त्रियो व्रतैस्त्वा हृ
ते० षिकेश्वरं स्वतो ह्याराध्य लोके पतिमाशासतेऽन्यं॥ तासां न ते वै परिपांत्यपत्यं प्रियं धनायूंषि यतोऽ
स्वतंत्राः॥१९॥ स वै पतिः स्यादकुतोभयः स्वयं समंततः पाति भयातुरं जनं। स एक एवेतरथा मिथो भयं नैवा
त्मलाभादधि मन्यते परं॥ २०॥

रिपूर्णमनोरथाः स्युरित्याह। स्त्रिय इति। स्वत एव हृषीकाणामीश्वरं पतिं संतं त्वामाराध्य याः स्त्रियोऽन्यं पतिमा राम
र्थयंति। पतिकामानां हि कामाराधनं व्रतेषु प्रसिद्धं तासामपत्यादीनि ते पतयो न पांतुं शक्ताः॥१९॥ अतस्ते पतय एव न भ ७०
वंतीत्याह स वा इति। स चैवंभूतः पतिः भवानेक एव नान्यो यो भवानात्मलाभात्परमन्यदधिकं न मन्यते। इतरथाऽन्य
न्याधीनसुखस्य न स्वतंत्रता॥ स्वतंत्रनानात्वेच मंडलेश्वराणामिव मिथो भयं स्यादित्यर्थः॥२०॥

किंच। निःकामजनेऽप्रार्थिता एव सर्वे कामा भवंति। सकामस्य जने तु कामितमात्रं अनित्यं चेत्याह। या स्त्री तस्य
उक्तलक्षणस्य ते पादसरोरुहस्यार्हणं पूजामेव कामयेत न फलांतरं सा अखिलेषु कामेषु लंपटा सर्वान्कामान् प्रा
प्नोतीत्यर्थः। ईप्सितमीप्सितः फलांतरमात्रमपेक्षितः सन् अर्चितश्चेत् तर्हि तदेवैकं राशि ददासि। किंच। यद्यतः फ
लभोगानंतरं भग्नयाच्ञा याचितोऽर्थो यस्याः सा प्रतप्यते दुःखं प्राप्नोति तदेव राऽसि न तु नित्यं।॥२१॥ ननु महर्हि

या तस्य ते पादसरोरुहार्हणं निकामयेत्साऽखिलकामलंपटा। तदेव रासीप्सितमीप्सितोऽर्चितो यद्भग्नया
च्ञा भगवन्प्रतप्यते॥२१॥ मत्प्राप्तयेऽजेशसुरासुरादयस्तप्यंत उग्रं तप ऐंद्रियेधियः। ऋते भवत्पादपरा
यणान्नमां विंदंत्यहं त्वद्धृदया यतोऽजित॥२२॥

णे कुतः सर्वकामप्राप्तिः त्वमेव हि कामार्थिभिः सेव्यसे अत आह। मत्प्राप्तये ब्रह्मादयस्तपः तप्यंते कुर्वं
ति। कथंभूताः ऐंद्रिये सुखे धीर्येषां। अलुब्धसमासः। तथापि भवत्पादपरायणान् ऋते मां न विंदंति। मत्कटाक्ष
विलसिता विभूतीर्लभंते न इत्यर्थः। यतः त्वय्येव हृदयं यस्याः साऽहं तत्परतंत्रत्वात् त्वद्भक्तवर्जिनमेवावलो
कयामि नान्यमित्यर्थः॥२२॥

इदानीं कृपां प्रार्थयते सत्वमिति। यद्भज नं विना न कश्चित्पुरुषार्थः सत्वं त्वदिति त्वया यत्करांबुजं सात्वतां भक्तानां मूर्ध्नि अधायि कृपया न्यस्तं तन्ममापि मूर्ध्नि निधेहीति शेषः। कथंभूतं वंदितं सर्वकामवर्षित्वेन सद्भिः स्तुतं। न च मयि तव नादरः यतः हे वरेण्य मां वक्षसि लक्ष्मा बिभर्षि। अहो चित्रमेतत् मयि केवलमादरमात्रं। भक्तेषु तु परमा कृपा अत ईश्वरस्य तव यत् मायया ईहितं तत्को विनर्कयितुं समर्थः॥२३॥२४॥ सत्वाय सत्वं यथा

सत्वं मम प्यकृतं मूर्ध्नि वंदितं करांबुजं यत्त्वदधायि सात्वतां। बिभर्षि मां लक्ष्म वरेण्य मायया क ईश्वरस्येहितमूहितुं विभुरिति॥२३॥ रम्यके च भगवतः प्रियतमं मात्स्यमवतार रूपं तद्वर्षपुरुषस्य मनोः प्राक्प्रदर्शितं स इदानीमपि महता भक्तियोगेनाराधयतीदं चोदाहरति॥२४॥ ॐ नमो भगवते मुख्यतमाय नमः सत्वाय प्राणायौजसे सहसे बलाय महामत्स्याय नम इति॥२५॥ अंतर्बहिश्चाखिललोकपालकैरदृष्टरूपो विचरस्युरुस्वनः। स ईश्वरस्त्वं य इदं वशेऽनयन्नाम्ना यथा दारुमयीं नरः स्त्रियं॥२६॥ रामः ७१

नाय। मुख्यतमाय प्राणायसूत्रात्मने॥२५॥ उरुस्वनो वेदात्मको नादो यस्य। य इदं विश्वं ब्राह्मणादिनाम्ना विधिनिषेधालंबनभूतेन वशेऽनयत् नियमितवान्। सत्वमीश्वरः तथा च श्रुतिः। तस्य वाकृ तंति र्नामानि दामानीति॥२६॥

नन्विंद्रादयो वशं नयंति लोकपालत्वात्। कुतोऽहं तत्राह यमिति। मत्सर एव ज्वरो येषां ते। यं हित्वा द्विपदश्चतुष्पदः सरीसृपं जंगमं स्थाणु स्थावरं च यदत्र दृश्यते तत्किंचिदपि पातुं न शक्ताः सत्वमेव प्राणरूपेण पालक ईश्वरश्चेत्यर्थः। तथा च श्रुतिः। ता अहिंसंताहमुक[…]स्यहमुकुमस्मीत्यादि॥२७॥ अवतारचरितमाह

यं लोकपालाः किल मत्सरज्वरा हित्वा यतंतोऽपि पृथक् समेत्य च। पातुं न शेकुर्द्विपदश्चतुष्पदः सरीसृपं स्थाणु यदत्र दृश्यते॥२७॥ भवान् युगांतार्णव ऊर्मिमालिनि क्षोणीमिमामोषधिवीरुधां निधिं। मया सहोरु क्रमतेऽज ओजसा तस्मै जगत्प्राणगणात्मने नम इति॥२८॥ हिरण्मयेऽपि भगवान्निवसति कूर्मतनुं बिभ्राणस्तस्य तत्प्रियतमां तनुमर्यमा सह वर्षपुरुषैः पितृगणाधिपतिरुपधावति। मंत्रमिमं चानुजपति॥२९॥

र

भवानिमां क्षोणीं मया मनुना सह मत्सहितां धृत्वेत्यध्याहारः। ऊर्मिमालावति प्रलयार्णवे ओजसा क्रमते विचरति। यद्वा पातुमित्यस्यानुषंगः। क्षोणीं पातुं क्रमते उत्सहत इत्यर्थः। यतः अजः। कीदृशीं। ओषधीनां विरुधां च निधिं आश्रयभूतां तस्मै नमः। जगतो यः प्राणगणस्तस्यात्मने नियंत्रे इति॥२८॥ तत्प्रियतमां तां प्रियतमां॥२९॥

अकूपाराय कूर्माय। सर्वः संपूर्णः सत्वगुणो विशेषणं यस्य। नउपलक्षितं स्थानं यस्य वारिचरत्वात् वर्ष्म
णे वर्षश्च यसे कालानवच्छिन्नाय। मूर्ध्ने सर्वगताय। अवस्थानाय आधाराय। ३०॥ निजमायया र्पितं अ
काशितमेतदर्थस्य स्वरूपं दृश्यं पृथिव्यादि यस्यैव रूपं॥ यतः पृथग्नास्ति। कथं भूतं बकुभिः रूपैः रूपितं

ॐ नमो भगवतेऽकूपाराय सर्वसत्वगुणविशेषणायनोपलक्षितस्थानाय नमो वर्ष्मणे न
मो भूम्ने नमो नमोवस्थानायनमस्ते॥ ३०॥ यद्रूपमेतन्निजमायया र्पितमर्थस्वरूपं बकुरू
परूपितं॥ संख्या न यस्यास्त्ययथोपलंभनात्तस्मै नमस्तेऽव्यपदेशरूपिणे॥ ३१॥ ज
रायुजं स्वेदज मंडजोद्भिदं चराचरं देवर्षि पितृभूतमैंद्रियं॥ द्यौः खं क्षितिः शैलसरि
त्समुद्रद्वीपग्रहर्क्षेत्यभिधेयएकः॥ ३२

निरूपितं। यस्य च संख्या नास्ति॥ कुतः। अयथा मिथ्यैवोपलंभनात्। नहि मरीचिजलमेतावदिति संख्या राम ७२
तुं शक्यते। अव्यपदेशरूपिणे। अनिरुक्तप्रपंचाकाराय॥ ३१॥ बकुरूपत्वं दर्शयंस्तस्येश्वराद्व्यतिरेकमा
ह। जरायुजेति। द्वीपग्रहर्क्षमित्यभिधेयस्त्वमेवैकः नत्वद्व्यतिरिक्तोस्ति। सर्वं खल्विदं ब्रह्मेत्यादिश्रुतेरित्य
र्थः॥ ३२॥

सप्रपंचनाम नूद्यतन्निरासेनप्रणमति। यस्मिन्निति। असंख्येया अनंता विशेषा येषां तानि नामानि रूपाण्याकृ
तयश्च यस्य तादृशे यस्मिन् त्वयि कविभिः कपिलादिभिरियं चतुर्विंशत्यादिसंख्या कल्पितासती। यया तत्त्वदृशा
येन तत्वज्ञानेनानपनीयते तस्मै सांख्यसिद्धांतरूपायनमः परमार्थरूपायेति वा॥ ३३॥ एषा नूरूपधावति हेत्वन्वयः

यस्मिन्नसंख्येयविशेषनामरूपाकृतौ कविभिः कल्पितेयं॥ संख्यायया तत्त्वदृशापनीयते तस्मै नमः सां
ख्यनिदर्शनाय तइति॥ ३३॥ उत्तरेषु च कुरुषु भगवान् यज्ञपुरुषः कृतवराहरूप आस्ते। तं तु देवी हैषा भूः सह
कुरुभिरस्खलितभक्तियोगेनोपधावति इमां च परमामुपनिषदमावर्त्तयति॥ ३४॥ ॐ नमो भगवते मंत्रतत्व
लिंगाय यज्ञक्रतवे महाध्वरावयवाय महापुरुषाय नमः कर्मशुक्लाय त्रियुगाय नमस्ते॥ ३५॥ यस्य स्वरूपं
कवयो विपश्चितो गुणेषु दारुष्विव जातवेदसं। मथ्नंति मथ्ना मनसा दिदृक्षवो गूढं क्रियार्थैर्नम ईरितात्मने॥
॥ ३६॥
३४॥ मंत्रैस्तत्वेन लिंग्यतइति तथा तस्मै। यज्ञा अयूपाः क्रतवः सयूपाः तद्रूपाय। अतएव महांतोऽध्वरा
अवयवभूता यस्य। कर्मणा शुक्लाय शुद्धाय यज्ञानुष्ठात्रे त्रियुगाय कृतयुगे यज्ञाभावात्। यद्वा कलियुगे छन्नत्वा
त्वात्॥ ३५ कवयो विद्वांसः विपश्चितो निपुणाः गुणेषु देहेंद्रियादिषु मथ्नंति विविन्वंति मथ्ना विवेकसाधनेन म
नसा क्रियार्थैः कर्मभिः तत्फलैश्च गूढं अप्रकाशमानं दिदृक्षवः। एवं मंथनेनेरितः प्रकटित आत्मा स्वरूपं यस्य त
स्मै नमः॥ ३६॥

मथ नमेव दर्शयंस्त्याह। द्रव्यं विषयः क्रिया इंद्रियव्यापारः हेतुर्देवता। अयनं देहः ईशः कालः॥ कर्ता अहंकारः एतैर्माया
गुणैः कार्यरूपलक्षणैः वस्तुत्वेन निरीक्षितो यआत्मा तस्मै। अन्वीक्षया विचारेण अंगैर्यमनियमादिभिः अतिशय
श्या आत्मानिश्चयवती बुद्धिर्येषां तैः निरस्ता माया निमित्ता आकृतिर्यस्मात्तस्मै॥३७॥ तदेव निर्गुणरूपेण नत्वा प

द्रव्यक्रियाहेत्वयनेशकर्तृभिर्मायागुणैर्वस्तुनिरीक्षितात्मने। अन्वीक्षयांगातिशयात्मबुद्धिभिर्निर
स्तमायाकृतये नमो नमः॥३७॥ करोति विश्वस्थितिसंयमोदयं यस्येप्सितं नेप्सितमीक्षितुर्गुणैः॥ मायाय
थायोभ्रमते तदाश्रयं ग्राव्णो नमस्ते गुणकर्मसाक्षिणे॥३८॥ प्रमथ्य दैत्यं प्रतिवारणं मृधे यो मां रसाया ज
गदादिसूकरः॥ कृत्वाग्रदंष्ट्रे निरगादुदन्वतः क्रीडन्निवेभः प्रणतास्मि तं विभुमिति॥३९॥
इति श्रीभागवते महापुराणे पंचमस्कंधे भुवनकोशवर्णनं नाम अष्टादशोऽध्यायः॥ ॥

रमेश्वररूपेण प्रणमति। करोतीति यस्येक्षितुर्जीवार्थमीप्सितं। अस्वंतानिच्छायामीक्षणायोगात्स्वा
र्थं तु नेप्सितं विश्वस्थित्यादि स्वगुणैर्मायया करोति। तस्या जडत्वेपीश्वरसंनिधानात्प्रवृत्तिं दृष्टांतेनाह।
यथा अयो लोहं ग्राव्णो अयस्कांतान्निमित्ताद्भ्रमति तदाश्रयं तदभिमुखं सत् गुणानां कर्म
णां जीवादृष्टानां च साक्षिणे तस्मै ते नमः॥३८॥ अवतारचरितमाह। प्रमथ्येति। यो जगतामादिः कारण
भूतः सूकरः। मां पृथिवीमग्रदंष्ट्रे दंष्ट्राग्रे कृत्वा रसातलादारभ्य उदन्वतः प्रलयार्णवात् इभो गज इव निरगात्। त

तभ्र आतिगजतुल्यं दैत्यं प्रमथ्य यः क्रीडन् स्थितः तं वि
हं प्रणतास्मीत्यन्वयः॥३९॥ पंचमेऽष्टादशः॥ ॥

दुःखं

कथं तर्हि दशरथपुत्रत्वं तत्राह। विष्णोर्मर्त्यावतारस्तु रक्षसो रावणस्य वधाय। तस्य मनुष्यादन्यतोऽवध्यत्वात् न केवलमेतावत्। किंतु इह संसारे स्त्रीसंगादिकृतं दुर्वारमिति मर्त्यानां शिक्षणं च शिक्षार्थमपीत्यर्थः॥ अन्यथा स्वे स्वरूपे रममाणस्य जगदात्मनः सीताविरहकृतानि व्यसनानि कुतः स्यात्॥५॥ विषयास

मर्त्यावतारस्त्विह मर्त्यशिक्षणं रक्षोवधायैव न केवलं विभोः॥ कुतोऽन्यथा स्याद्रमतः स्व आत्मनः सीताकृतानि व्यसनानीश्वरस्य॥५॥ न वै स आत्मात्मवतां सुहृत्तमः सक्तस्त्रिलोक्यां भगवान्वासुदेवः। न स्त्रीकृतं कश्मलमश्नुवीत न लक्ष्मणं चापि विहातुमर्हति॥६॥

क्त्यभावेन व्यसनानर्हत्वमुपपादयति॥ न वै स भगवान् त्रिलोक्यां क्वापि सक्तः यत आत्मवतां धीराणां आत्मा सुहृत्तमश्च। अतो न स्त्रीकृतं मोहं प्राप्नुयात्। न लक्ष्मणं चेति देवदूतेन श्रीरामं मंत्रयता विज्ञापितं। अत्रागतस्त्वया वध्य इति तद्देवद्वाःस्थितं लक्ष्मणं दुर्वाससमागतं विज्ञापयितुं प्रविष्टं हंतुमुद्यतो वसिष्ठवाक्यात्तत्याज तच्च न युज्येतेत्यर्थः॥६॥ राम ७४

अतः श्रीराम एव सर्वैः सेव्य इति वक्तुं न तस्य तोषहेतुः सत्कुलजन्मादि किंतु भक्तिरेवेत्याह। न जन्मेति। महतः पुरुषाज्जन्म महतः श्रीरामस्येति वा। सौभगं सौंदर्यं आकृतिर्जातिः। यद्यस्मात्तैर्जन्मादिभिर्विसृष्टान् त्यक्तानपि नो वनेचरान् वत अहो लक्ष्मणस्याग्रजोऽपि सखित्वे कृतवान्॥ ७॥ तस्मात्सुरो वा अन्यो वा यः कोऽपि श्रीराममेव सर्वप्रकारेण भजेत। स कृतज्ञं अल्पीयस्यपि भजने बहुमानिनं। उत्तरान् कोशलान् अयोध्यावासि

न जन्म नूनं महतो न सौभगं न वाङ्न बुद्धिर्नाकृतिस्तोषहेतुः। तैर्यद्विसृष्टानपि नो वनौकसश्चकार सख्ये बत लक्ष्मणाग्रजः॥७॥ सुरोऽसुरो वाप्यथ वानरो नरः सर्वात्मना यः सुकृतज्ञमुत्तमं। भजेत रामं मनुजाकृतिं हरिं य उत्तराननयत्कोशलान्दिवमिति॥८॥ भारतेऽपि वर्षे भगवान्नरनारायणाख्य आकल्पांतमुपचितधर्मज्ञानवैराग्यैश्वर्योपशमोपरमात्मोपलंभनमनुग्रहायात्मवतामनुकंपया तपोऽव्यक्तगतिश्चरति॥९॥

नः॥८॥ उपचितैर्धर्मादिभिरात्मोपलभ्यते। येन तत्तपश्चरति। तत्र उपशमः इंद्रियाणां संयमः। उपरमो निरहंकारता। आत्मवतामनुग्रहाय न स्वार्थं ईश्वरत्वात्॥९॥

भगवदनुभावउपवर्ण्यते येन पंचरात्रेण तत्सावर्णेर्मनोः उपसरति सेवते ॥१०॥ उपरतानात्म्याय निरहंकाराय ॥
११॥ अमूर्त्तश्चासौ विविक्तश्च साक्षी च तस्मै नमः अत्र सक्तत्वं दर्शयति। अस्य विश्वस्य सर्गादिषु कर्त्तापि यो न बध्यते
अहं कर्त्तेति न मन्यते विविक्तत्वमाह। देहगतोपि दैहिकैः क्षुत्पिपासादिभिर्यो न हन्यते। नाभिभूयते। साक्षित्वमाह।

तं भगवन्नारदो वर्णाश्रमवतीभिर्भारतीभिः प्रजाभिर्भगवत्प्रोक्ताभ्यां सांख्ययोगाभ्यां भगवदनुभावो
पवर्णनं सावर्णेरुपदेक्ष्यमाणः परमभक्तिभावेनोपसरति। इदं चाभिगृणाति ॥१०॥ ॐ नमो भगवत उ
पशमशीलायोपरतानात्म्याय नमोऽकिंचनवित्ताय ऋषिऋषभाय नरनारायणाय परमहंसपरमगु
रवे आत्मारामाधिपतये नमो नम इति ॥११॥ गायंति चेदं। कर्त्तास्य सर्गादिषु यो न बध्यते न हन्यते
देहगतोपि दैहिकैः। द्रष्टुर्न दृग्यस्य गुणैर्विदूष्यते तस्मै नमोऽसक्तविविक्तसाक्षिणे ॥१२॥ इदं हि योगे
श्वर योगनैपुणं हिरण्यगर्भो भगवान्जगाद यत्॥ यदंतकाले त्वयि निर्गुणे मनो भक्त्यादधीतोज्झित
दुःकलेवरः ॥१३॥ राम ७५
यस्य द्रष्टुरपि सतो दृष्टिर्गुणैर्दृश्यैर्न दूष्यते न विक्रियते ॥१२॥ योगकौशलं निरूपयन्योगं प्रार्थयते इदमिति त्रिभिः
हे योगेश्वर हिरण्यगर्भो यद्योगनैपुण्यं जगाद इदमेव तत्। किं जन्मप्रभृति न त्वया अंतकाले पुमांस्त्वयि मनो धा
रयेदिति यत्। कथंभूतः सन्। उज्झितं दुःकलेवरं तदभिमानो येन ॥१३॥

अन्यथा तस्य शास्त्राभ्यासादिश्रमो व्यर्थ इत्याह। ऐहिकामुष्मिककामेषु लंपटो मूर्खः सुतादिषु योगक्षेमं चिंत
यत् कुत्सितस्य कलेवरस्यात्ययात् मृत्योः शंकेत तथा विद्वानपि सन् यः शंकेत तस्य यत्नः श्रम एव ॥१४॥ यस्माद्धि

यथैहिकामुष्मिककामलंपटः सुतेषु दारेषु धनेषु चिंतयन्। शंकेत विद्वान्कुकलेवरात्ययात् यस्तस्य यत्नः
श्रम एव केवलं ॥१४॥ तन्नः प्रभो त्वं कुकलेवरार्पितां त्वन्माययाहंममतामधोक्षज॥ भिंद्याम येनाशु वयं सुदुर्भि
दां विधेहि योगं त्वयि नः स्वभावमिति ॥१५॥ भारतेप्यस्मिन् वर्षे सरिच्छैलाः संति हि बहवः॥ ॥मलयो मंगलप्र
स्थो मैनाकश्चित्रकूट ऋषभः कूटकः कोल्लकः सह्यो देवगिरिऋष्यमूकः श्रीशैलो व्यंकटो महेंद्रो वारिधारो
विंध्यः शुक्तिमान् ऋक्षगिरिः पारियात्रो द्रोणश्चित्रकूटो गोवर्द्धनो रैवतकः ककुभो नीलो गोकामुख इंद्रकी
लः कामगिरिरिति चान्ये च शतसहस्रशः शैलास्तेषां नितंबप्रभवा नदा नद्यश्च संत्यसंख्याताः ॥१६॥ एतासा श्च
मपो भारत्यः प्रजा नामभिरेव पुनंतीनामात्मना चोपस्पृशंति ॥१७॥ चंद्रवशा ताम्रपर्णी अवटोदा कृतमाला वैहाय
सी कावेरी वेणा पयस्विनी शर्करावर्त्ता तुंगभद्रा कृष्णवेणा भीमरथी गोदावरी निर्विंध्या पयोष्णी तापी रेवा सुरसा
नर्मदा चर्मन्वती सिंधुः अंधः शोणश्च नदौ महानदी वेदस्मृतिर्ऋषिकुल्या त्रिसामा कौशिकी मंदाकिनी यमु
ना सरस्वती दृषद्वती गोमती शरयू रोधवती सप्तवती सुषोमा शतद्रूश्चंद्रभागा मरुद्वृधा वितस्ता असिक्नी विश्वे
त्युषोऽपीयमेव दृशा तत् तस्मात् हे प्रभो अधोक्षज त्वमेव नो योगं विधेहि कीदृशं त्वयि स्वभावं सहजवास ति महानद्यः ॥१८
नारूपं येन योगेन वयं त्वन्मायया नः कुकलेवरे अर्पितामहंममतां शीघ्रं भिंद्याम त्यजेम। सुदुर्भिदां उपायांतरैः सर्वथात्य

लब्धं जन्म येः तैः पुरुषैः सात्त्विकादिस्वकृतेन कर्मणा दिव्यादिगतय आत्मनो विधीयंते साध्यंते । हि यस्मात् सर्वा एव ग
तयः कर्मानुसारेण सर्वेषां भवंति यस्य वर्णस्य यद्विधानं मोक्षप्रकारः सन्न्यासवनस्थत्वादि तदनतिक्रमेणास्मिन्ने
व वर्षे नृणामपवर्गश्च भवति । एतच्च कर्मादिबहुसाधनसंभवाभिप्रायेणोक्तं । न त्वन्यत्रापवर्गाभावेन । तदुपर्य्यपि
बादरायणः संभवादिति देवानामपि मोक्षस्य सूचितत्वात् ॥१९॥ अपवर्गस्वरूपमाह । योसाविति । अनात्म्ये आत्म

अस्मिन्नेव वर्षे पुरुषैर्लब्धजन्मभिः शुक्ललोहितकृष्णवर्णेन स्वारब्धेन कर्मणा दिव्यमानुषनारकगतयो
बह्व्य आत्मन आनुपूर्व्येण सर्वा ह्येव सर्वेषां विधीयंते । यथावर्णविधानमपवर्गश्चापि भवति ॥१९॥ योसौ
भगवति सर्वभूतात्मन्यनात्म्येऽनिरुक्तेऽनिलयने परमात्मनि वासुदेवेऽनन्यनिमित्तभक्तियोगलक्षणो
नानागतिनिमित्ताविद्याग्रंथिरंधनद्वारेण यदा हि महापुरुषपुरुषप्रसंगः ॥२०॥

निभवमात्म्यं रागादि तद्रहिते । अनिरुक्ते वाचामगोचरे अनिलये अनाधारे अनन्यनिमित्तोऽहैतुको भक्तियो राम ७६
गएव लक्षणं स्वरूपं यस्य । कथंभवति नानागतीनां निमित्तं यो विद्याग्रंथिः तस्य रंधनं छेदनं तद्द्वारेण महा
पुरुषपुरुषाः विष्णुभक्ताः तैः प्रकृष्टः संयोगो यदा भवति तदा ॥२०॥

एतदेव मानुष्यमेव सर्वपुरुषार्थसाधनं गायंति । अमीषां एभिः उत स्वित् अथवा स्वयमेव साधनं विनैव हरिरेषां प्रस
न्नो भूत् । एवं भूतस्य पुण्यस्य दुष्करत्वात् । भारताजिरे भारतांगणे । नः केवलं स्पृहैव यन्न तन्मुकुंदसेवोपयोगि नृषु जन्म ये
लब्धं ॥२१॥ स्पृहामेवाह किमित्यादि सप्तभिः । दुष्करैः क्रत्वादिभिर्नः फल्गुना तुच्छेन द्युजयेन स्वर्गप्राप्त्या किं न किंचि

एतदेव हि देवा गायंति । अहो अमीषां किमकारि शोभनं प्रसन्न एषां स्विदुत स्वयं हरिः । यैर्जन्म लब्धं नृ
षु भारताजिरे मुकुंदसेवौपयिकं स्पृहा हि नः ॥२१॥ किं दुष्करैर्नः क्रतुभिस्तपोव्रतैर्दानादिभिर्वा द्युजयेन
फल्गुना । न यत्र नारायणपादपंकजस्मृतिः प्रमुष्टातिशयेंद्रियोत्सवात् ॥२२॥ कल्पायुषां स्थानज
यात्पुनर्भवात् क्षणायुषां भारते भूजयो वरं । क्षणेन मर्त्येन कृतं मनस्विनः संन्यस्य संयांत्यभयं पदं हरेः
।२३। न यत्र वैकुंठकथासुधापगा न साधवो भागवतास्तदाश्रयाः । न यत्र यज्ञेशमखा महोत्सवाः सुरेश
लोकोपि न वै स सेव्यतां ॥२४॥

तत्फलं । कुतः । यत्र नारायणपादपंकजस्मृतिर्नास्ति प्रत्युत अतिशयितादिंद्रियाणामुत्सवात् भोगात् प्रमुष्टा ऽ
भूत् ॥२२॥ क्षणमल्पमेवायुर्येषां । वरत्वे हेतुः मर्त्येनापि देहेन क्षणेनैव कालेन । कृतं कर्म संन्यस्य हरेः पदं संयांति
॥२३॥ अतः यत्र वैकुंठकथामृतनद्यो न संति । तदाश्रयाः कथायगाश्रयाः । महांतो नृत्याद्युत्सवा येषु तादृशा य
ज्ञेशमखाश्च पूजाः । सः सुरेशस्य ब्रह्मणोपि लोको न सेव्यतां ॥२४॥

आम्नानजातिं विहयेव जंतवो ज्ञानक्रियाद्रव्यकलापसंभृतां। नवैयतेरन्नपुनर्भवाय ते भूयो वनौकाइव यांति बंधनं॥२५

अमुमुक्षून् नरान्निंदति। आम्नाद्इति। ज्ञानं च तदर्थाः क्रियाश्च तदर्थानि द्रव्याणि च तेषां कलापेन संभृतां पूर्णां अपुनर्भ
ताय मोक्षाय। वनौकाइव वनौकसः पक्षिणो यथा लुब्धकान्मुक्ता अपि पुनर्यदि तस्मिन्नेव वृक्षे भ्रमन्तो विहरंति
तर्हि यथा बध्यंते तेन तद्वत्॥२५॥ अहो भारतवासिनां भाग्यमित्याहुः येरिति। अग्नये जुष्टं निर्वपामि इंद्राय जुष्टं
निर्वपामि इत्येवं भागत्रयानि रूपं पृथक्कृतं। कथं विधिना अजकारेण मंत्रेण च बस्त तश्च चरुपुरोडाशादि ने

यैः श्रद्धया बर्हिषि भागशो हविर्निरुप्तमिष्टं विधिमंत्रवस्तुतः। एकः पृथक्नामभिराहुतो मुदा गृह्णाति
पूर्णः स्वयमाशिषां प्रभुः॥२६॥ सत्यं दिशत्यर्थितमर्थितो नृणां नैवार्थदो यत्पुनरर्थिता यतः। स्वयं वि
धत्ते भजतामनिच्छतामिच्छापिधानं निजपादपल्लवं॥२७॥

देनइष्टं देवता मुद्दिश्य त्यक्तं। निरुप्तं च मम इदमिति स्वीकृत्य त्यागानां अक्षरभ्यातीत्यर्थः। पृथगिंद्रादिनामभिरा राम
हुतः आहूतः आशिषां प्रभुः स्वयं पूर्णोपि हरिः॥२६॥ तत्रापि निष्कामाः कृतार्था इत्याहुः सत्यमिति प्रार्थितः सन् ७७
र्थितं ददातीति सत्यं अथापि परमार्थदो न भवत्येव यद्यस्मात् यतो दत्ता दनंतरं पुनरप्यार्थिता भवति। ननु नार्थितं चे
त्किमपि न दद्यादित्याशंक्याह। अनिच्छतां निःकामानां तु इच्छानां पिधानमाच्छादकं निजपादपल्लवं स्वयमेव संपा
दयति॥२७॥

स्विष्टस्य सम्यग्यजनस्य सूक्तस्य प्रवचनस्य कृतस्यापि कर्मणः स्वर्गसुखावशेषितं यदि किंचिदस्ति तेन अज
नाभे वर्षे नोस्माकं जन्म स्यात्। कीदृशां स्मृतिमत्। हरिरेव सेव्य इत्यनुसंधानयुक्तं। यतः हरिर्भजतां शं सुखं तनोति। शं सुखं २२।३०।३९
इति पंचमे एकोनविंशः॥ ॥विंशे प्लक्षादि षड्द्वीप स्थितिमाह सहार्णवैः। लोकालोकस्थितिं चांतर्बहिर्भागादिमानतः॥१

यद्यत्र नः स्वर्गसुखावशेषितं स्विष्टस्य सूक्तस्य कृतस्य शोभनं। तेनाजनाभे स्मृतिमज्जन्म नः स्याद्वर्षे हरिर्य
द्भजतां शं तनोति॥२८॥ ॥श्रीशुक उवाच॥ ॥जंबूद्वीपस्य च राजन्नुपद्वीपानष्टौ हैक उपदिशंति सगरात्म
जैरश्वान्वेषण इमां महीं परितो निखनद्भिरुपकल्पितान्॥२९॥ तद्यथा स्वर्णप्रस्थश्चंद्रशुक्ल आवर्तनो र
मणको मंदरहरिणः पांचजन्यः सिंहलो लंकेति॥३०॥ एवं तव भारतोत्तम जंबूद्वीपवर्षविभागो यथोपदे
शमुपवर्णित इति॥३१॥ ॥इति श्रीभागवते महापुराणे पंचमस्कंधे जंबूद्वीपवर्णनो नामैकोनविंशतितमोध्यायः॥

तावता लक्षविस्तारेण परिक्षिप्तः परिवेष्टितः उपास्ते तिष्ठति। आकलय्य समर्थ्य॥२॥ अभिज्ञाताः प्रसिद्धाः सप्तैव अन्ये
च पर्वता नद्यश्च सहस्रशः संतीत्यर्थः। मानसोत्तरस्य मंडलाकारत्वोक्तेः एते प्लक्षादि पंचद्वीपेषु वर्षाद्यास्तिर्यग्रेखा
कारा उभयतो द्वीपस्पृशंत इति गम्यते अन्यथा सप्तभिः सप्तवर्षविभागा संभवात् वैष्णवे वर्षाणां पूर्वादिक्रमोक्तेश्च॥२॥

जलोपस्पर्शनेनविधूतंरजस्तमश्चयेषां। हंसादयोब्राह्मणादिस्थानीयाः। वर्णाः विबुधोपमंसंदर्शनंक्रमस्वेदादिरहितं रूपंप्रजननमपत्योत्पादनंचयेषां॥४॥ विगीताअपिद्वीपमंत्राव्याख्यायंते। ब्रह्मस्यपुराणपुरुषस्यविष्णोर्यद्रूपंतंसूर्यं

अपिरुवाच॥ ॥अतःपरंप्लक्षादीनांप्रमाणलक्षणसंस्थानतोवर्षविभागउपवर्ण्यते।१॥ जंबूद्वीपोयंयावत्
प्रमाणविस्तारस्तावताक्षारोदधिनापरिवेष्टितोयथामेरुर्जंब्वाख्येनलवणोदधिरपिततोद्विगुणेनविशालेनप्ल
क्षाख्येनपरिक्षिप्तोयथापरिखाबाह्योपवनेन। प्लक्षोजंबूप्रमाणोद्वीपाख्याकरोहिरण्मयउत्थितोयत्राग्निरुपास्ते
सप्तजिह्वस्तस्याधिपतिःप्रियव्रतात्मजइध्मजिह्वःस्वंद्वीपंसप्तवर्षाणितेषुगिरयोनद्यश्चसप्तैवाभिज्ञाताः॥२॥
मणिकूटोवज्रकूटःइंद्रसेनोज्योतिष्मान्सुपर्णोहिरण्यष्ठीवोमेघमालइतिसेतुशैलाः। अरुणानृम्णांगि
रसीसावित्रीसुप्रभाताऋतंभरासत्यंभरेतिमहानद्यः। यासांजलोपस्पर्शनविधूतरजस्तमसोहंसप
तंगोर्ध्वायनसत्यांगसंज्ञाश्चत्वारोवर्णाःसहस्रायुषोविबुधोपमसंदर्शनप्रजननाःस्वर्गद्वारंत्रय्याविद्य
याभगवंतंत्रयीमयंसूर्यमात्मानंयजंते॥४॥ प्रत्नस्यविष्णोरूपंवसत्यस्यर्तस्यब्रह्मणः। अमृतस्यचमृ
त्योश्चसूर्यमात्मानमीमहीति॥५॥ राम ७८

ईमहीति।शरणंव्रजेम। कथंभूतंसत्यादीनामात्मानंअधिष्ठातारं। ३०१३८
तत्रसत्यमनुष्ठीयमानोधर्मः। ऋतंप्रमीयमाणोधर्मःब्रह्मणःतद्बोधकस्यवेदस्य अमृतस्यशुभफलस्य। मृत्योः
अशुभफलस्य॥५॥

हेजातवेदःत्वंसाक्षात्परस्यब्रह्मणोहरेर्हव्यवाडसि। अतोदेवानांयज्ञेनपुरुषंहरिमेवयज। अंगानांनाम्नात्वमंगिने

तत्रद्वीपपतिःप्रैयव्रतोराजन्हिरण्यरेतानामास्वंद्वीपंसप्तभ्यःस्वपुत्रेभ्योयथाभागंविभज्यस्वयंतपआ
तिष्ठत्॥१४॥ वसुवसुदानदृढरुचिनाभिगुप्तस्तुत्यव्रतविविक्तनामदेवनामभ्यस्तेषांवर्षेषुसीमा
गिरयोनद्यश्चाभिज्ञाताःसप्तैव। चक्रश्चतुःशृंगःकपिलश्चित्रकूटोदेवानीकऊर्ध्वरोमाद्रविणइति
॥१५॥ रसकुल्यामधुकुल्यामित्रविंदाश्रुतविंदादेवगर्भाघृतच्युन्मंत्रमालेति। यासांपयोभिःकुश
द्वीपौकसःकुशलकोविदाभियुक्तकुलकसंज्ञाभगवंतंजातवेदसरूपिणंकर्मकौशलेनयजंते
॥१६॥ परस्यब्रह्मणःसाक्षाज्जातवेदोसिहव्यवाट्। देवानांपुरुषांगानांयज्ञेनपुरुषंयजेति॥१७॥ तथा
बहिःक्रौंचद्वीपोद्विगुणःस्वमानेनक्षीरोदेनपरितउपक्लृप्तः। वृतोयथाकुशद्वीपोघृतोदेन। यस्मि
न्क्रौंचोनामपर्वतराजोद्वीपनामनिर्वर्तकआस्ते॥१८॥ योसौगुहप्रहरणोन्मथितनितंबकुंजोपिक्षीरो
देनासिच्यमानोभगवतावरुणेनाभिगुप्तोविभयोबभूव॥१९॥ तस्मिन्नपिप्रैयव्रतोघृतपृष्ठोनामाधिप राम ७९
ति ।तिःस्वेद्वीपेवर्षाणिसप्तविभज्यतेषुपुत्रनामसुसप्तरिक्थादान्वर्षपान्निवेश्यस्वयंभगवान्भगवतःपरमकल्या
णयशसआत्मभूतस्यहरेश्चरणारविंदमुपजगाम॥२०॥

समर्पयेत्यर्थः॥१७॥ उपक्लृप्तोवेष्टितः। यथाकुशद्वीपोघृतोदेनवृतः॥१८॥ गुहस्यकार्त्तिकेयस्यप्रहरणेनआयुधेन
उन्मथितानितंबाःकुंजानिचयस्य॥१९॥ स्वयंभगवान्ज्ञानीपरमकल्याणंयशोयस्य॥२०॥२१॥

सुपर्णो सिग रुत्मानृचिद्वत्ते त्रिर इत्यादिश्रूते ।। छंदोभिः स्वावयवैः श्री विष्णुं स्तौति छंदः स्कंत तस्य । द्वीपस्य दूतये व्यप देशाय ॥ ५ ॥ १९ ॥ स्वगोभिः स्वरश्मिभिः ।। अंधः अन्नं । सोमो नो राजा आस्त आभिमुख्येन भवतु । क्वचित्पाठे त्वं विवक्षय

प्लक्षादिषु पंचसु पुरुषाणामायुरिंद्रियमोजः सहो बलं बुद्धिर्विक्रम इति च सर्वेषामौत्पत्तिकी सिद्धिरविशेषेण वर्त्त ते ॥ ६ ॥ प्लक्षः स्वसमानेनेक्षुरसोदेनावृतो यथा तथा द्वीपोपि शाल्मलो द्विगुणविशालः समानेन सुरोदेनावृतः प रिवृंक्ते ॥ ७ ॥ यत्र ह वै शाल्मली प्लक्षायामा यस्यां वा किल निलयमाहुर्भगवतः छंदः स्कंतः पतत्रिराजस्य सा द्वी प स्तुत य उपलक्ष्यते ॥ ८ ॥ तद्द्वीपाधिपतिः प्रियव्रतात्मजो यज्ञबाहुः स्वसुतेभ्यः सप्तभ्यस्तन्नामानि सप्त वर्षा णि व्यभजत्सुरोचनं सौमनस्यं रमणकं देववर्षं पारिभद्रमाप्यायनमविज्ञातमिति ॥ ९ ॥ तेषु वर्षाद्रयो नद्य श्च सप्तैवाभिज्ञाताः ।। स्वरसः शतशृंगो वामदेवः कुंदः कुमुदः पुष्पवर्षः सहस्रश्रुतिरिति । अनुमतिः सिनीवाली सरस्वती कुहूरजनी नंदा राकेति ॥ १० ॥ तद्वर्षपुरुषाः श्रुतधरवीर्यधरवसुंधरेषंधरसंज्ञा भगवंतं वेदमयं सोमम न्यानं वेदेन यजंते ॥ ११ ॥ स्वगोभिः पितृदेवेभ्यो विभजन्कृष्णशुक्लयोः । प्रजानां सर्वासां राजांधः सोमो न आ स्त्विति ॥ १२ ॥ एवं सुरोदाद्बहिस्तद्द्विगुणः समानेनावृतो घृतोदेन यथापूर्वः कुशद्वीपो यस्मिन्कुशस्तं बो देवकृतस्तद्द्वीपाख्याकरो ज्वलन इवापरः स्वशष्परोचिषा दिशो विराजयति ॥ १३ ॥

संध्यभावः ॥ १२ ॥ एवं सुरोदाद्बहिर्घृतोदेनावृतः कुशद्वीपइत्यन्वयः ।। स्वशष्पाणि स्वकोमलशिखाः तेषां रोचिषा
१३ ॥ १६ ॥

स्वयंभगवान्ज्ञानी परमकल्याणं यज्ञो यस्य ॥ २० ॥ २१ ॥ आपोमयं अम्मयं ॥ २२ ॥ हे आपः पुरुषवीर्याः ईश्वरात्लब्धसा

आमो मधुरुहो मेघपृष्ठः सुधामा भ्राजिष्ठो लोहितार्णो वनस्पतिरिति घृतपृष्ठसुतास्तेषां वर्षगिरयः सप्त स प्तैव नद्यश्चाभिख्याताः ।। शुक्लो वर्द्धमानो भोजन उपबर्हिणो नंदो नंदनः सर्वतोभद्र इति ॥ २१ ॥ अभया मृतौघा आर्यका तीर्थवती वृत्तिरूपवती पवित्रवती शुक्लेति यासामंभः पवित्रममलमुपयुंजानाः पुरुषऋषभद्रविणदेव संज्ञा वर्षपुरुषा आपोमयं देवमपां पूर्णेनांजलिना यजंते ॥ २२ ॥ आपः पुरुषवीर्याः स्थ पुनंतीर्भूर्भुवः स्वः ।। ता नः पुनीतामीवघ्नीः स्पृशतामात्मना भुव इति ॥ २३ ॥ एवं परस्तात्क्षीरोदात्परित उपवेशितः शाकद्वीपो द्वात्रिं शल्लक्षयोजनायामः समानेन च दधिमंडोदेन परिवेष्टितः यस्मिन्शाको नाम महीरुहः स्वक्षेत्रव्यपदेशको यस्य ह महासुरभिगंधस्तं द्वीपमनुवासयति ॥ २४ ॥ तस्यापि प्रैयव्रत एवाधिपतिर्नाम्ना मेधातिथिः सोपि वि भज्य सप्त वर्षाणि पुत्रनामानि तेषु स्वात्मजान्पुरोजवमनोजववेपमानधूम्रानीकचित्ररेफबहुरूपवि श्वधारसंज्ञान्निधाप्याधिपतीन्स्वयं भगवत्यनंत आवेशितमतिस्तपोवनं प्रविवेश ॥ २५ ॥ एतेषां वर्षम र्यादागिरयो नद्यश्च सप्त सप्तैव । ईशान उरुशृंगो बलभद्रः शतकेसरः सहस्रस्रोतो देवपालो महानस इति ॥ २६

मर्थ्याः स्थ भवथ । अत एव भूर्भुवः स्वः त्रैलोक्यं पुनंत्यः ।। ता भवत्यो नोस्माकं स्पृशतां स्पर्शनं कुर्वतां भुवः शरीराणि पुनं तु । यत आत्मना स्वस्वरूपेणैव अमीवघ्नीः पापहंत्र्यः ।। २३ ॥ दधिमंडरसः स एवोदकं यस्य पर्णान्यंतः स्वरस्पर्शानि व

दिग्धस्य शाणि स शाको नामवृक्षः ॥ २४ ।। २५ ॥

अस्मकेतुभिः प्रायादिद्वित्रिभिः ।। २८ ।। ज्वलनशिखावदमलानां कनकपत्राणामयुतानामयुतानि यस्य तत् । देवानामहोरात्राभ्यामुत्तरदक्षिणायनाभ्यामित्यर्थः ।। ३० ।। ३१ ।। ब्रह्मरूपिणं कमलासनमूर्त्तिं सकर्मकेन ब्रह्म

अभयाः मतौघा आर्यका तीर्थवती वृत्तिरूपवती पवित्रवती शुक्लेति । यासामंभः पवित्रममलमुपयुंजानाः पुरुषऋषभद्रविणदेवसंज्ञा वर्षपुरुषा आपोमयं देवमपां पूर्णेनांजलिना यजंते ।

अनघाः युर्दउभयस्पृष्टिरपराजिता पंचपदी सहस्रस्रुतिर्निजधृतिरिति ।। २७ ।। तद्वर्षपुरुषा ऋतव्रतसत्यव्रतदानव्रतानुव्रतनामानो भगवंतं वाय्वात्मकं प्राणायामविधुतरजस्तमसः परमसमाधिना यजंते ।। २८ ।। अंतः प्रविश्य भूतानि यो बिभर्त्यात्मकेतुभिः । अंतर्यामीश्वरः साक्षात्पातु नो यद्वशे इदं ।। २९ ।। एवमेव दधिमंडोदात्परतः पुष्करद्वीपस्ततो द्विगुणायामः समंततउपकल्पितः समानेन स्वादूदकेन समुद्रेण बहिरावृतो यस्मिन्बृहत्पुष्करं ज्वलनशिखामलकनकपत्रायुतायुतं भगवतः कमलासनस्याध्यासनं परिकल्पितं । तद्द्वीपमध्ये मानसोत्तरनामैक एवार्वाचीनपराचीनवर्षयोर्मर्यादाचलोऽयुतयोजनोच्छ्रायायामो यत्र तु चतसृषु दिक्षु चत्वारि पुराणि लोकपालानां इंद्रादीनां यदुपरिष्टात्सूर्यरथस्य मेरुं परिभ्रमतः संवत्सरात्मकं चक्रं देवानामहोरात्राभ्यां परिभ्रमति ।। ३० ।।

राम
८०

ब्रह्मरूपिणं कमलासनमूर्त्तिं सकर्मकेन ब्रह्मसालोक्यादिसाधनेन ।। ३२ ।। कर्ममयं कर्मफलरूपं । ब्रह्मलिंग्यते यस्मात् एकस्मिन्नेव परमेश्वरे अंतो निष्ठा यस्य तत् । अतएव वस्तुतोऽद्वैतं ।। ३३ ।। ततः शुद्धोदात्परस्तात् लोकः सूर्याद्यालोकवान् देशः । अलोकः तद्रहितः तयोरंतराले मध्ये तयोर्विभागार्थमित्यर्थः ।। ३४ ।। ततः परस्तादित्युक्तं तदेवाकियतांतरेणेत्यपेक्षायां तदंतर्वर्त्तिनीं भूमिमाह । यावन्मानसोत्तरमेर्वोरंतरं सार्द्धसप्तलक्षोत्तरसार्द्धकोटिपरिमि

एतद्द्वीपस्याधिपतिः प्रैयव्रतो वीतिहोत्रो नामैतस्यात्मजौ रमणकधातकिनामानौ वर्षपती नियुज्य स्वयं पूर्वजवत् भगवत्कर्मशील एवास्ते ।। ३१ ।। तद्वर्षपुरुषा भगवंतं ब्रह्मरूपिणं सकर्मकेन कर्मणाऽऽराधयंतीदं चोदाहरंति ।। ३२ ।। यत्तत्कर्ममयं लिंगं ब्रह्मलिंगं जनोऽर्चयेत् । एकांतमद्वयं शांतं तस्मै भगवते नम इति ।। ३३

ऋषिरुवाच ।। ।। ततः परस्ताल्लोकालोकनामाचलो लोकालोकयोरंतराले परित उपक्षिप्तः ।। ३४ ।। यावन्मानसोत्तरमेर्वोरंतरं तावती भूमिः कांचन्यन्यादर्शतलोपमा । यस्यां प्रहितः पदार्थो न कथंचित्पुनः प्रत्युपलभ्यते तस्मात्सर्वसत्वपरिहृताऽऽसीत् ।। ३५

तावती भूः शुद्धोदात्परतोऽस्ति । तत्र च प्राणिनोऽपि संति । ततः कांचनी भूमिरन्याऽस्तीत्यर्थः ।। सा च कोनचत्वारिंशल्लक्षोत्तरकोट्यष्टकपरिमिता ज्ञेया । एवं हि सति मेरुलोकालोकयोरंतरं सार्द्धद्वादशकोटिपरिमितं वक्ष्यमाणमुपपन्नं भवति । एतच्च शैवतंत्रे उक्तं । कोटिद्वयं त्रिपंचाशल्लक्षाणि च ततः परं । पंचाशच्च सहस्राणि सप्तद्वीपाः ससागराः ।। ततो हेममयी भूमिर्दशकोट्यो वरानने । देवानां क्रीडनार्थाय लोकालोकस्ततः पर इति । अत्र च दशकोटित्वं पूर्वोक्तभूम्या सह द्रष्टव्यं । स

देवसूपरि हेलति द्वावतिरसु जातरूपो देशानां कौटि
नार्थादेत्ये कदसाव ।। ३४ ।। ३५ ।।

पं०भा० लोकत्रयस्यांतेपरितोमर्यादारूपोविहितः यस्माल्लोकप्रतिबंधकात्। सूर्यआदिर्येषांध्रुवोऽपवर्गोयेषां। आवितन्वाना:समंतात्प्रकाशयंतः परतोगंतुंनशक्नुवंति। तावदुन्नहनमुत्सेधंतदनुरूपआयामश्चविस्तारोयस्य। ध्रुवादप्युच्छ्रि

८१ तत्वात्त्रिलोकीमर्यादाभूत इत्यर्थः॥ ३७॥ सोयंतुलोकालोकाचल:तुरीयभागः चतुर्थोंशः।सार्द्धद्वादशकोट्यः

लोकालोक इतिसमाख्यायदनेनाचलेनलोकालोकस्यांतर्वर्त्तिनाऽवस्थाप्यते॥ ३६॥ सलोकत्रयांतेपरि
तईश्वरेणविहितः। यस्मात्सूर्यादीनांध्रुवापवर्गाणांज्योतिर्गणानांगभस्तयोऽर्वाचीनास्त्रींल्लोकाना
वितन्वानानकर्हिचित्परचीनाभवितुमुत्सहंते॥ तावदुन्नहनायामः॥ ३७॥ एतावाल्लोकविन्यासो
मानलक्षणसंस्थाभिर्विचिंतितःकविभिः। सतुपंचाशत्कोटिगणितस्यभूगोलस्यतुरीयभागोयंलोका
लोकाचलः॥ ३८॥ तदुपरिष्टाच्चतसृष्वाशास्वात्मयोनिनाखिलजगद्गुरुणाधिनिवेशितायेद्विरदप
तयऋषभपुष्करचूडोवामनोपराजितइतिसकललोकस्थितिहेतवः॥ ३९॥ तेषांस्वविभूतीनांलोकपाला
नांविविधवीर्योपबृंहणायभगवान्परममहापुरुषोमहाविभूतिपतिरंतर्याम्यात्मनोविशुद्धसत्वंधर्मज्ञानवैराग्यैश्वर्या
द्यष्टमहासिद्ध्युपलक्षणंविष्वक्सेनादिभिःस्वपार्षदप्रवरैःपरिवारितोनिजवरायुधोपशोभितैर्निजभुजदंडैःसंधारयमा राम ८१
णःतस्मिन्गिरिवरेसमंतात्सकललोकस्वस्तयआस्ते॥ ४०॥

मेरोरेकतइतिद्रष्टव्यं॥ ३८॥ आशास्फुदिक्षुयेऽधिनिवेशिताःतेआसते॥ ३९॥ तेषांदिग्गजानांस्वविभूतीनांस्वांशभूतानांमहेंद्रादी
नांचविविधवीर्योपबृंहणायसकललोकस्वस्तयेचभगवान्तस्मिन्नास्तइत्यन्वयः। किंकुर्वन्। आत्मनःस्वस्ययद्विशुद्धंसत्वंतत्सं
धारयमाणःआविःकुर्वन् कीदृशं। धर्मज्ञानादीन्यष्टमहासिद्धयश्चोपलक्षणंयस्यतत्। दोर्दंडैरुपलक्षितःसन्महाविभूतेःपरमेश्व

नन्वंतर्यामिणांतस्थेनैवसर्वंकर्तुंशक्यंकिंतस्यबहिःसमंतादवस्थानेनेत्याशंक्यतस्यार्थंस्वयमेवव्याचष्टे। आत्म
नोयोगमाययाविरचितायाविविधालोकयात्रातस्यागोपीथायरक्षणायएषभगवानेवंभूतंआकल्पंवेषंगतःलील
स्या याआस्तइतिसमंतादास्तइत्यर्थः॥ ४१॥ अलोकपरिमाणंचमेरोरेकतःसार्द्धद्वादशकोटयः। ततोलोकालोकात्अलो

आकल्पमेवंवेषंगतएवंआत्मयोगमाययाविरचितविविधलोकयात्रागोपीथायेत्यर्थः॥ ४१॥ योंतर्विस्तार
एतेनह्यलोकपरिमाणंचव्याख्यातंयद्बहिर्लोकालोकाचलात्। ततःपरस्ताद्योगेश्वरगतिंविशुद्धामुदाहरंति॥
४२॥ अंडमध्यगतःसूर्योद्यावाभूम्योर्यदंतरं॥ सूर्यांडगोलयोर्मध्येकोट्यःस्युःपंचविंशतिः॥ ४३॥ मृतेंडएष
एतस्मिन्यदभूत्ततोमार्तंडइतिव्यपदेशः॥ हिरण्यगर्भइतियद्धिरण्यांडसमुद्भवः॥ ४४॥

काद्वापरस्तात्विशुद्धांद्विजपुत्रानयनेअर्जुनस्यश्रीकृष्णेनप्रदर्शितां॥ ४२॥ विस्तरेणोक्तंब्रह्मांडमानंसर्वतोपिनिरूप
यति। अंडमध्यगतःकिंतन्मध्यंतदाह। द्यावाभूम्योःपूर्वोक्तखरकपालयोर्यदंतरंमध्यस्थानं। सर्वतःपंचविंशतिःकोट्यःस्युः
४३॥ अंडमध्यावस्थानेकारणंतन्नामनिर्वचनेनाह। मृतेअचेतनेएषसूर्योवैराजरूपेणयस्मात्प्रविष्टः॥ ४४॥

किंच। सूर्येणैव विभज्यंते दिशः। खमंतरिक्षं भिदा। अन्योपि विभागः। स्वर्गापवर्गौ भोगमोक्षदेशौ। रसौकांसि अतलादीनि
४५॥ उपासनार्थमाह। देवादीनां सूर्य आत्मा दृगीश्वरः नेत्राधिष्ठाता च॥४६॥ ॥इति पं चमे विंशतितमोध्यायः॥ एवमध्याय
विंशत्या भूमर्यादा निरूपिता॥ अतः परं द्युमर्यादापालनं त्रिभिरुच्यते। एविं शेरवेः कालचक्रेण भ्रमतोन्वहं। स्वग
त्या राशिसंचारे लोकयात्रा निरूप्यते॥ एतावानेव विस्तारेण कोशः पंचाशत् उत्सेधेन पंचविंशतिः॥१॥ द्विदलयोर्मध्ये

सूर्येण हि विभज्यंते दिशः खं द्यौर्मही भिदा। स्वर्गापवर्गौ नरका रसौकांसि च सर्वशः॥४५॥ देवतिर्यङ्मनुष्याणां
सरीसृपसवीरुधां। सर्वजीवनिकायानां सूर्य आत्मा दृगीश्वरः॥४६॥ ॥इति श्रीभागवते महापुराणे पंचम
स्कंधे भुवनकोशवर्णने समुद्रद्वीपवर्षसन्निवेशपरिमाणलक्षणो विंशतितमोध्यायः॥ ॥श्रीशुक उवाच॥
एतावानेव भूवलयस्य सन्निवेशः प्रमाणलक्षणतो व्याख्यातः॥ एतेन हि दिवो मंडलमानं तद्विद उपदिशं
ति॥१॥ यथा द्विदलयोर्निष्पावादीनां ते अंतरेणांतरिक्षं तदुभयसंधितं॥२॥ यन्मध्यगतो भगवांस्तपनां
पतिस्तपन आतपेन त्रिलोकीं प्रतपत्यवभासयत्यात्मभासा स एष उदगयनदक्षिणायनवैषुवतसंज्ञाभिर्मांद्यशै
घ्र्यसमानाभिर्गतिभिरारोहणावरोहणसमानस्थानेषु यथासवनमभिपद्यमानो मकरादिषु राशिष्वहोरात्राणि
दीर्घह्रस्वसमानानि विधत्ते॥३॥
यथैकस्य मानेनापरस्य मानमुपदिश्यते तद्वत् ते अंतरेण तयोर्मध्ये तदु
भयसंधितं ताभ्यामुभयतः संलग्नं॥२॥ उदगयनादिसंज्ञाभिर्मंदशीघ्रसमगतिभिर्यथाकालमारोहणादिस्थाने

आरोहणादिस्थानेषु यथासवनमभिपद्यमानो मकरादिषु राशिष्वहोरात्राणि
दीर्घह्रस्वसमानानि विधत्ते॥३॥

तत्र पंचयतीति यदेति। अत्यंतवैषम्याभावात् समानीत्युक्तं। सर्वथा साम्यं त्वेकस्यैवाहोरात्रस्य। यद्यपि वृषभमिथुनयो
रेवाह्नां वृद्धिः। कर्कादिषु ह्रासः तथापि रात्र्यपेक्षया अधिकत्वाद्वर्द्धंत इत्युक्तं। एवं रात्रिवृद्धावपि दिनापेक्षया ह्रस
तीत्युक्तं। एकैकेति स्थूलदृष्ट्योक्तं। वृद्धिह्रासयोः प्रतिमासं वैषम्यात्॥४॥ विपर्ययाणीति अहानि न्यूनानि रात्रयो

यदा मेषतुलयोर्वर्त्तते तदाहोरात्राणि समानानि भवंति। यदा वृषभादिषु पंचसु राशिषु चरति तदाहा
न्येव वर्द्धंते। ह्रसति च मासि मास्येकैका घटिका रात्रिषु॥५॥ यदा वृश्चिकादिषु पंचसु वर्त्तते तदाहोरात्रा
णि विपर्ययाणि भवंति॥५॥ यावद्दक्षिणायनमहानि वर्द्धंते यावदुदगयनं रात्रयः॥६॥ एवं नव कोटय एकपं
चाशल्लक्षाणि योजनानां मानसोत्तरगिरिपरिवर्त्तनस्योपदिशंति। तस्मिन्नैंद्रीं पुरीं पूर्वस्मान्मेरोर्देवधा
नीं नाम दक्षिणतो याम्यां संयमनीं नाम पश्चाद्वारुणीं निम्लोचनीं नाम उत्तरतः सौम्यां विभावरीं नाम। तासू
दयमध्याह्नास्तमयनिशीथानीति भूतानां प्रवृत्तिनिवृत्तिनिमित्तानि समयविशेषेण मेरोश्चतुर्दिशं॥७॥

ऽधिका इत्यर्थः॥५॥ तद्वृद्धिह्रासकालमाह यावदिति॥६॥ एवं मेरुदिग्गतिभिः नव कोटय इति मेरोरुभयतो मानसोत्त
रस्यांतर्विस्तरेण पंचदशलक्षाधिककोटित्रयपरिमितेन इदं परिमंडलमानमुन्नेयं। एवं पंचदशभिर्घटिकाभिरि
त्यादिष्वपि त्रैराशिकगणितेन तत्तन्मानमुन्नेयं। अत्रापेक्षितो विशेषः पुराणांतरादवगंतव्यः। तत्रारोहणादिस्था

ज्यपं०
८३

नानिवायुपुराणेदर्शितानि॥सर्वग्रहाणांत्रीण्येवस्थानानिद्विजसत्तमाः।स्थानंजरद्गवंमध्यंतथैरावतमुत्तरं।वैश्वानरंद
क्षिणतोनिर्दिष्टमिहतत्त्वतइति।तदेवमध्यमोत्तरदक्षिणमार्गत्रयंप्रत्येकंवीथीत्रयेणत्रिधाभिद्यतेत्रिभिस्त्रिभि
रश्विन्यादिनक्षत्रैः।नागवीथीगजवीथीचैरावतीचेत्युत्तरमार्गेवीथीत्रयं।आर्षभीगोवीथीजरद्गवीचेतिवैषुवतेमध्य
ममार्गेवीथीत्रयं।अजवीथीमृगवीथीवैश्वानरीचेतिदक्षिणमार्गेवीथीत्रयं।तदप्युक्तंतत्रैव।अश्विनीकृत्तिकायाम्यानाग
गवीथीतिशब्दिता।रोहिण्यार्द्रामृगशिरोगजवीथ्यभिधीयते।पुष्याश्लेषातथादित्यावीथीचैरावतीस्मृता।एतास्तु
वीथयस्तिस्रउत्तरोमार्गउच्यते।तथाद्वेचापिफाल्गुन्यौमघाचैवार्षभीमता।हस्तश्चित्रातथास्वातीगोवीथीतितुश
ब्दिता।ज्येष्ठाविशाखानुराधावीथीजारद्गवीमता।एतास्तुवीथयस्तिस्रोमध्यमोमार्गउच्यते॥मूलाषाढोत्तरा
षाढाअजवीथ्यभिशब्दिता॥श्रवणंचधनिष्ठाचमार्गीशततभिषक्तथा।वैश्वानरीभाद्रपदेरेवतीचैवकीर्तिता।एता
स्तुवीथयस्तिस्रोदक्षिणोमार्गउच्यतइति।याम्याभरणी।आदित्याअदितिदेवताकापुनर्वसुः।मार्गीमृगवीथी। राम
एवंस्थितेउत्तरायणेध्रुवेणयुगाक्षकोटिनिबद्धवायुपाशद्वयाकर्षणेरथस्यारोहणंतदाभ्यंतरमंडलप्रवेशोगति ८३
मांद्यंचेतिदिनवृद्धिः।रात्रिह्रासश्च।दक्षिणायनेचपाशप्रेरणाद्रवरोहणेबहिर्मंडलप्रवेशोगतिशैघ्र्यंचेत्यहोरात्र
योर्विपर्ययः।वैषुवतेतुपाशसाम्यात्समावस्थानेमध्यममंडलप्रवेशोगतिसाम्यंचेत्यहोरात्रयोःसाम्यमिति।
तथाचपुराणांतरं।आकृष्येतेयदातौतुध्रुवेणसमधिष्ठितौ।तदाभ्यंतरतःसूर्योभ्रमतेमंडलानितु।ध्रुवेणमुच्यमा
नेनपुनारश्मियुगेनतु।तथैवबाह्यतःसूर्योभ्रमतेमंडलानिचेति।तदेतदुक्तं।यदामेषतुलयोरित्यादिनाउदया

स्तादिकंवक्तुमाह।तस्मिन्मानसोत्तरेमेरोःपूर्वतऐंद्रींपुरींउपदिशंतीत्यनुषंगः।तास्तुपुरीमुदयादीन्युपदिशंति।चतुर्दि
क्षुमित्युक्तेर्येमेरोर्दक्षिणदेशेतेषामैंद्रीमारभ्यपूर्वोदयः।येपश्चिमेतेषांयाम्यामारभ्य।येउत्तरेतेषांवारुणीमारभ्य।येपूर्वेतेषां
सौम्यामारभ्य॥ ॥तत्रत्यानांमेरुस्थानां।सव्येनेति।नक्षत्राणिसुरवतयास्वगत्यामेरुंवामतःकुर्वन्त्यपिप्रदक्षिणावर्त
प्रवहाख्यवायुभ्राम्यमाणज्योतिश्चक्रवशात्सव्यहंदक्षिणतःकरोति।अतश्चक्रगतिवशादतिदूरतोभूसंलग्नस्येवदर्शन

तत्रत्यानांदिवसमध्यंगतएवसदादित्यस्तपति।सव्येनाचलंदक्षिणेनकरोति॥८॥यत्रोदेतितस्यहसमा
नसूत्रनिपातेनिम्लोचति।।९।।यत्रक्वचनस्यंदेनाभितपतितस्यहैषसमानसूत्रनिपातेप्रस्वापयति।
तत्रगतंनपश्यंतियेतंसमनुपश्येरन्॥१०

मुदयः।आकाशमारूढस्येवदर्शनंमध्याह्नः।भूमिंप्रविष्टस्येवदर्शनमस्तमयः।ततोतीवदूरगमनेनिशीथइति।समु
द्रतीरस्थदृष्ट्याचअदृष्टोवाएषप्रातरुदेत्यपःसायंप्रविशतीतिश्रुतिव्यवहारोनवस्तुतः।तदुक्तंवैष्णवे।उदयास्त
मयेचैवसर्वकालंतुसंमुखे।दिशास्वशेषासुतथामैत्रेयविदिशासुच।यैर्यत्रदृश्यतेभास्वान्सतेषामुदयःस्मृ
तः।तिरोभावंचयत्रैतितत्रैवास्तमनंरवेः।नैवास्तमनमर्कस्यनोदयःसर्वदासतः।उदयास्तमनाख्यंहिदर्शनादर्शनं
रवेः।शक्रादीनांपुरेतिष्ठन्स्पृशत्येषपुरत्रयं।विकर्णौद्वौविकर्णस्थस्त्रीन्कोणान्द्वेपुरेतथेति।अतएवतत्रैवोक्तं
सर्वेषांद्वीपवर्षाणांमेरुरुत्तरतःस्थितइति।यतोयत्रयःपश्यतिसैवतस्यप्राचीतस्यचवामतोमेरुस्तिष्ठतीति।८।९।
यथोक्तमुदयास्तमनाद्यनियमंदर्शयति।यत्रोदेतीत्यादिना।स्यंदेनस्वेरोद्गमेन।प्रस्वापयतिनिशीथंकरोति।येतंसमनुप

साधिकानियं तविंशतिसहस्त्राधिकानि।११॥ सहवासहैवयद्यपिवस्तुतः सूर्यस्यापि नक्षत्रैः सहैवोदयास्तमयौ त
थापितस्यसाहित्यादर्शनात्सोमादीनामेवतत्साहित्यमुक्तं।१२॥ त्रयीमयइत्याद्युपासनार्थं।१३। द्वादशमासाअरा
यस्य। षट्ऋतवोनेमयोयस्य त्रीणिचातुर्मास्यानि नाभयोयस्य। कृतइतरभागोयस्य। मानसोत्तरगिरौलक्षा
र्द्धउपरिवायुबद्धत्वमाविति द्रष्टव्यं। चक्रं वातावदुछ्रितमिति मंतव्यं। अन्यथायुतमात्रोछ्रायत्वान्मानसोत्तरस्यमेरो

यदावैऐंद्र्याः पुर्याः प्रचलते पंचदशघटिकाभिर्याम्यां सपादकोटिद्वयं योजनानां सार्द्धद्वादशलक्षाणि
साधिकानि चोपयाति॥११॥ एवंततोवारुणींसौम्यामैंद्रीं च पुनस्तथाऽन्येचग्रहाः सोमादयो नक्षत्रैः स
हज्योतिश्चक्रे समभ्युद्यंतिसहवानिम्लोचंति॥१२॥ एवंमुहूर्तेन चतुस्त्रिंशल्लक्षयोजनान्यष्टशता
धिकानिसौरोरथस्त्रयीमयोसौचतसृषु परिवर्त्ततेपुरीषु॥१३॥ यस्यैकं चक्रं द्वादशारं षण्नेमित्रिणा
भिसंवत्सरात्मकं समामनंति। तस्याक्षोमेरोर्मूर्द्धनिकृतोमानसोत्तरेकृतेतरभागो यत्रप्रोतंरविरथच
क्रंतैलयंत्रचक्रवद्भ्रमतमानसोत्तरगिरौपरिभ्रमति॥१४॥ तस्मिन्नक्षेकृतमूलो द्वितीयोक्षस्तुर्यमानेन

श्चतुराशीतलुछ्रायत्वादक्षस्य साम्यानुपपत्तेः॥१५॥ तस्मिन्नक्षेचक्रप्रांतेकृतमूलः निबद्धपूर्वभागः प्रथमाक्षोमे
रुमानसोत्तरायतः सार्द्धसप्तलक्षाधिकसार्द्धकोटिप्रमाणः। तस्यतुर्यमानेन सार्द्धसप्तत्रिंशत्सहस्त्राधिकेको
नचत्वारिंशल्लक्षमानेन ध्रुवेकृतः। वायुपाशेन निबद्धउपरिभागोयस्य॥१५॥

रथनीडस्तुषट्त्रिंशल्लक्षयोजनायतस्तत्तुरीयभागविशालस्तावानूरविरथयुगोयत्रहयाः छंदोनामानः सप्तारुणयोजितावहं
तिदेवमादित्यं॥१६॥ पुरस्तात्सवितुररुणः पश्चाच्चनियुक्तः सौत्येकर्मणिकिलास्ते॥१७॥

नीडउपवेशस्थानं। गायत्र्यादिछंदोनामानः अरुणेनयोजिताः संतोदेवंवहंति।१६। पुरस्तात्स्थितोपिपश्चात्प्र
त्यङ्मुखआस्ते। यद्वायत्सूर्यस्यपुरस्तात्तस्यैवपश्चिमत्वात्पश्चादित्युक्तं। अश्वस्थानं चवायुनोक्तं। सप्ताश्वरूपछं
दांसिवहंतेवामतोरविं। चक्रपक्षनिबद्धानिचक्रेचाक्षः समाहितइति।१७। सूक्तवाकायसूक्तभाषिताय।१८। एकैक

तथावालखिल्याऋषयोंऽगुष्ठपर्वमात्राः षष्टिसहस्त्राणिपुरतः सूर्यंसूक्तवाकायनियुक्ताः संस्तुवंति
॥१८॥ तथान्येचऋषयोगंधर्वाप्सरसोनागाग्रामण्योयातुधानादेवाइत्येकैकशोगणाः सप्तचतुर्दशमासि
मासिभगवंतं सूर्यमात्मानं नानानामानं पृथङ्नानानामानः पृथक्कर्मभिर्द्वंद्वश उपासते॥१९॥ लक्षो
त्तरंसार्द्धनवकोटियोजनपरिमंडलं भूवलयस्यक्षणेनसगव्यूत्युत्तरंद्विसहस्त्रयोजनानिसभुंक्ते॥२०॥
इतिश्रीभागवतेमहापुराणेपंचमस्कंधे ज्योतिश्चक्रसूर्यमंडलवर्णनंनामएकविंशतिमोध्यायः॥ ॥
॥ ॥राजोवाच॥ ॥ यदेतद्भगवतआदित्यस्यमेरुंध्रुवंचप्रदक्षिणेनपरिक्रामतोराशीनामभिमुखंप्र
चलितंभगवतोयवर्णितममुष्यवयंकथमनुमिमीमहीति॥१॥ ॥[illegible]॥ ॥[illegible]

शश्चतुर्दशद्वंद्वशः सप्तगणाः संतोमासिमास्युपासतइत्यन्वयः। गव्यूतिः क्रोशद्वयं सगव्यूत्तरं यथाभवतितथा।२०
पंचमेएकविंशः॥ ॥द्वाविंशेसोमशुक्रादेः स्थानमाहोत्तरोत्तरं। तत्रद्वृत्तेनुसारेणइष्टानिष्टेतथानृणां॥१॥

राशीनामभिमुखं अप्रदक्षिणं चउपवर्णितं। सव्येन चलनं दक्षिणेन करोतीति वदता अमुष्य वर्यं कथमनुमिमीमहि एतत्कथं ज्ञास्यामो विरुद्धत्वादित्यर्थः॥ १॥ चक्रवशात् स्वतश्च गतिद्वयमविरुद्धमिति परिहारार्थः॥ २॥ तत्र कालनियमेन कर्मणां विशुद्धेः साद्गुण्यस्य निमित्तभूतमात्मानं विभज्यावि विज्ञिज्ञास्यमानः वितर्क्यमाणः यथोपजोषंय

स होवाच॥ ॥यथाकुलालचक्रेण भ्रमता सह भ्रमतां तदाश्रयाणां पिपीलिकादीनां गतिरन्यैव प्रदेशांतरेष्वप्युपलभ्यमानत्वात् एवं नक्षत्रराशिभिरुपलक्षितेन कालचक्रेण ध्रुवं मेरुं च प्रदक्षिणेन परिधावता सह परिधावमानानां तदाश्रयाणां सूर्यादीनां ग्रहाणां गतिरन्यैव नक्षत्रांतरे राश्यंतरे चोपलभ्यमानत्वात्॥ २॥ स एष भगवानादिपुरुष एव साक्षान्नारायणो लोकानां स्वस्तय आत्मानं त्रयीमयं कर्मविशुद्धिनिमित्तं कविभिरपि च वेदेन विजिज्ञास्यमानो द्वादशधा विभज्य षट्सु वसंतादिष्वृतुषु यथोपजोषं ऋतुगुणान्विदधाति॥ ३॥ तमेतमिह पुरुषास्त्रय्या विद्यया वर्णाश्रमाचारानुपथानुच्चावचैः कर्मभिराम्नातैर्योगवितानैश्च श्रद्धयायजंतोंऽजसा श्रेयः समधिगच्छंति॥ ४॥

था कर्मभोगं। ऋतुगुणान् शीतोष्णादीन्॥ ३॥ वर्णाश्रमाचारानुवर्तिनः पुरुषास्त्रय्या आम्नातैः कर्मभिरिंद्रादिरूपं योगवितानैश्च ध्यानादिभिरंतर्यामिरूपं पूजयंतः॥ ४॥ ॥श्रीवासुदेवाय नमः॥ ॥

स एव स्वगत्या मासादिव्यवहारकारणमाह। स एष लोकानामात्मा। द्यावापृथिव्योरंतरेण मध्येयन्नभोवलयमंतरिक्षं तस्य मध्ये यत्कालचक्रं तद्गतः राशिभिर्मेषादिभिः संज्ञा येषां। चैत्रादिसंज्ञास्ते चांद्रमासानां। मासमाह पक्षद्वयं मास इति चांद्रेण मानेन सपादं महानक्षत्रद्वयं सौरेण। दिवानक्तं च अहोरात्रमिति पित्र्येण षष्ठमंशं राशिद्वयं॥ ५॥ ६

अथ स एष आत्मा लोकानां द्यावापृथिव्योरंतरेण नभोवलयस्य कालचक्रगतो द्वादश मासान् भुंक्ते राशिसंज्ञान् संवत्सरावयवान् मासः पक्षद्वयं दिवानक्तं चेति सपादर्क्षद्वयमुपदिशंति। यावता षष्ठमंशं भुंजीत स वै ऋतुरित्युपदिश्यते संवत्सरावयवः॥ ५॥ अथ च यावतार्धेन नभोवीथ्यां प्रचरति तं कालमयनमाचक्षते ६॥ अथ च यावन्नभोमंडलं सह द्यावापृथिव्योर्मंडलाभ्यां कार्त्स्न्येन स ह भुंजीत तं कालं संवत्सरं परिवत्सरं इडावत्सरमनुवत्सरमिति भानोर्मांद्यशैघ्र्यसमगतिभिः समामनंति॥ ७॥

मंडलाभ्यां सह भुंजीत सह सहि सूर्यः यदा शुक्लप्रतिपदि संक्रांतिर्भवति तदा सौरचांद्रयोर्मासयोः युगपदुपक्रमो भवति स संवत्सरः। ततः सौरमानेन वर्षे षट् दिनानि वर्द्धंते चांद्रमाने न षट् न्यूनसंतीति द्वादशदिनव्यवस्था नाडुलयोरग्रपश्चाद्वा भवति। एवं पंचवर्षाणि गच्छंति तन्मध्ये द्वौ मलमासौ भवतस्ततः षष्ठः संवत्सरो भवति। तदेवमवांतरभेदेन संवत्सरादि पंचकं समामनंति॥ ७॥

सोमादीनामपि स्थानं कार्यं वाह। एवं चंद्रमा इति। अर्कगभस्तिभ्यः मंडलरूपेभ्यः सपादर्क्षाभ्यां सपाददिनद्वयेन॥८
सर्वेषां जीवनिवहानां प्राणः अन्नमयत्वादमृतमयत्वाच्च। अतएव जीवनहेतुत्वाज्जीवश्च॥९॥ तदेवाह य एष इति॥१०
दक्षिणेनैव न तु तेषां पृथग्गत्या गतिरस्तीत्यर्थः। कालायने कालचक्रे। उत्तराषाढाश्रवणसंधावभिजिन्नक्षत्रं फ

एवं चंद्रमा अर्कगभस्तिभ्य उपरिष्टाल्लक्षयोजनत उपलभ्यमानोऽर्कस्य संवत्सरभुक्तिं पक्षाभ्यां मास
भुक्तिं सपादर्क्षाभ्यां दिनेनैव पक्षभुक्तिमग्रचारी द्रुततरगमनो भुंक्ते॥८॥ अथ चापूर्यमाणाभिश्च कलाभिः
अमराणां क्षीयमाणाभिश्च कलाभिः पितॄणामहोरात्राणि पूर्वपक्षापरपक्षाभ्यां वितन्वानः सर्वजीवनि
वहप्राणो जीवश्चैकमेकं नक्षत्रं त्रिंशता मुहूर्तैर्भुंक्ते॥९॥ य एष षोडशकलः पुरुषो भगवान्मनोम
योऽन्नमयोऽमृतमयो देवपितृमनुष्यभूतपशुपक्षिसरीसृपवीरुधां प्राणाप्यायनशीलत्वात्सर्वमय इति
वर्णयंति॥१०॥ तत उपरिष्टात्त्रिलक्षयोजनतो नक्षत्राणि मेरुं दक्षिणेनैव कालायन ईश्वरयोजितानि स
हाभिजिताष्टाविंशतिः॥११॥

लविशेषेण पृथक्कल्पितं तेन सह। तथा वक्ष्यति। अभिजिन्नाम नक्षत्रं उपरिष्टादाषाढानां अधस्ताच्छ्रोणायाः
इत्यादि॥११

ततउपरिष्टादुशना द्विलक्षयोजनत उपलक्ष्यते पुरतः पश्चात्सहैव वार्कस्य शैघ्र्यमांद्यसाम्याभिर्गतिभिरर्कवच्चरति। लोकानां
नित्यदानुकूल एव प्रायेण वर्षयन् चारेणानुमीयते। स वृष्टिविष्टंभग्रहोपशमः॥१२॥

पुरतः सूर्येण भोक्ष्यमाणे नक्षत्रे। पश्चाद्भुंक्ते। सहैव भुज्यमाने। चारेण कर्मस्थनक्षत्राद्यतिक्रमेण वृष्टेर्विष्टंभः स्तंभ
नं यस्मात् ग्रहात्तमुपशमयतीति तथा॥१२॥ बुधो व्याख्यातः पुरतः पश्चात्सहैव वा चरतीति। किं विद्विशेषमाह। त
न इत्यादिना। आशंसते सूचयति॥१३॥ अघशंसः दुःखसूचकः। यदि न वक्रेणाभिवर्तते। तर्हि त्रिभिस्त्रिभिः

उशनसा बुधो व्याख्यातः। तत उपरिष्टाद्द्विलक्षयोजनतो बुधः सोमसुत उपलभ्यमानः प्रायेण शुभकृ
द्यदार्काद्व्यतिरिच्येत तदातिवाताभ्रप्रायानावृष्ट्यादिभयमाशंसते॥१३॥ अत ऊर्ध्वमंगारकोऽपि योजन
लक्षद्वितय उपलभ्यमानस्त्रिभिस्त्रिभिः पक्षैरेकैकशो राशीन्द्वादशानुभुंक्ते। यदि न वक्रेणाभिवर्तते
प्रायेणाशुभग्रहोऽघशंसः॥१४॥ तत उपरिष्टाद्द्विलक्षयोजनांतरगतो भगवान्बृहस्पतिरेकैकस्मिन्
राशौ परिवत्सरं परिवत्सरं चरति। यदि न वक्रः स्यात्प्रायेणानुकूलो ब्राह्मणकुलस्य॥१५॥ तत उपरिष्टाद्यो
जनलक्षद्वयात्प्रतीयमानः शनैश्चर एकैकस्मिन्राशौ त्रिंशत्त्रिंशन्मासान्विलंबमानः सर्वानेवानुपर्ये
ति। तावद्भिरनुवत्सरैः प्रायेण हि सर्वेषामशांतिकरः॥१६॥ तत उत्तरस्मादृषय एकादशलक्षयोजनांतर उप
लभ्यंते। य एव लोकानां शमनुभावयंतो भगवतो विष्णोर्यत्परमं पदं प्रदक्षिणं प्रक्रमंति॥१७॥ ॥इति श्री
भागवते महापुराणे पंचमस्कंधे ज्योतिश्चक्रवर्णने द्वाविंशतितमोऽध्यायः॥

पक्षैः॥१४॥ यदि न वक्रः स्यात् तर्हि परिवत्सरं॥१५॥ १७॥ ॥पंचमे द्वाविंशः॥ ॥वासुदेवाय नमः॥

भा॰पं॰ ८७ त्रयोविंशे ध्रुवस्थानं ज्योतिश्चक्राश्रयं ततः ॥ शिशुमारस्वरूपेण हरेश्च स्थितिरुच्यते ॥१॥ यत्तस्मासिद्धं विष्णोः प
दं यत्र ध्रुव उपास्ते तिष्ठतीत्यन्वयः। समकालमेव युज्यंत इति तथा तैर्नक्षत्ररूपैः ॥१॥ मेढीस्तंभे वद्धा धान्याक्रम

श्रीशुक उवाच ॥ ॥ अथ तस्मात्परतस्त्रयोदशलक्षयोजनांतरतो यद्विष्णोः परमं पदमभिवदंति। य
त्र ह महाभागवतो ध्रुव औत्तानपादिरग्निनेंद्रेण प्रजापतिना कश्यपेन धर्मेण च समकालयुग्भिः सबहुमानं द
क्षिणः क्रियमाण इदानीमपि कल्पजीविनामाजीव्य उपास्ते। तस्येहानुभाव उपवर्णितः ॥१॥ स हि सर्वेषां ज्यो
तिर्गणानां ग्रहनक्षत्रादीनामनिमेषेणाव्यक्तरंहसा भगवता कालेन भ्राम्यमाणानां स्थाणुरिवावष्टंभ ईश्वरेण
विहितः शश्वदवभासते। यथा मेढीस्तंभ आक्रमणपशवः संयोजितास्त्रिभिस्त्रिभिः सवनैर्यथास्थानं मंडलानि
चरंति ॥२॥ एवं भगणा ग्रहादय एतस्मिन्नंतर्बहिर्योगेन कालचक्र आयोजिता ध्रुवमेवावलंब्य वायुनोदी
र्यमाणा आकल्पांतं परिचंक्रमंति। नभसि यथा मेघाः श्येनादयो वायुवशाः कर्मसारथयः परिवर्तंते। एवं ज्यो राम ८७
तिर्गणाः प्रकृतिपुरुषसंयोगानुगृहीताः कर्मनिर्मितगतयो भुवि न पतंति ॥३॥ केचिदेतज्ज्योतिरनीकं शिशुमार
संस्थानेन भगवतो वासुदेवस्य योगधारणायामनुवर्णयंति ॥४॥

णपशवो बलीवर्दाः ॥२॥ कर्मसारथिः सहायो येषां ॥३॥ ईश्वराधारत्वात्पतनशंकैव नास्तीति वक्तुं मतांतरमाह। केचिदिति।
ज्योतिरनीकं ज्योतिश्चक्रं। योगधारणायां स्थितमिति शेषः ॥४॥

लांगूले अग्रादधोभागे उदगयनानि अभिजिदादीनि पुनर्वस्वंतानि चतुर्दश दक्षिणपार्श्वे। दक्षिणायनानि तु सव्ये यथा[illegible]
ष्यादीन्युत्तराषाढांतानि चतुर्दश वामपार्श्वे ॥५॥ तदेव स्थानविशेषेण विभज्य दर्शयति। पुनर्वसुपुष्यावित्यादिना। पुनर्वसू
रुदगयनांत्यं नक्षत्रं। पुष्यो दक्षिणायनस्याद्यं। आर्द्राश्लेषे तयोर्निरंतरे। अभिजिदुत्तराषाढे उत्तरदक्षिणायनयोराद्यंतनक्ष

यस्य पुच्छाग्रेऽवाक्शिरसः कुंडलीभूतदेहस्य ध्रुव उपकल्पितः। तस्य लांगूले प्रजापतिरग्निरिंद्रो धर्म इति। पुच्छ
मूले धाता विधाता च। कट्यां सप्तर्षयः। तस्य दक्षिणावर्तकुंडलीभूतशरीरस्य यान्युदगयनानि दक्षिणपार्श्वे
तु नक्षत्राण्युपकल्पयंति दक्षिणायनानि तु सव्ये। यथा शिशुमारस्य कुंडलाभोगसन्निवेशस्य पार्श्वयोरुभ
योरप्यवयवाः समसंख्या भवंति। पृष्ठे त्वजवीथी। आकाशगंगा चोदरतः ॥५॥ पुनर्वसुपुष्यौ दक्षिणवामयोः श्रो
ण्योरार्द्राश्लेषे च दक्षिणवामयोः पश्चिमयोः पादयोः। अभिजिदुत्तराषाढे दक्षिणवामयोर्नासिकयोर्यथासंख्यं
श्रवणपूर्वाषाढे दक्षिणवामयोर्लोचनयोः धनिष्ठा मूलं च दक्षिणवामयोः कर्णयोः मघादीन्यष्ट नक्षत्राणि
दक्षिणायनानि। वामपार्श्ववंक्रिषु युंजीत। तथैव मृगशीर्षादीन्युदगयनानि दक्षिणपार्श्ववंक्रिषु प्रातिलोम्येन प्रयुं
जीत शतभिषाज्येष्ठे स्कंधयोर्दक्षिणवामयोर्न्यसेत् ॥६॥

त्रे श्रवणपूर्वाषाढे तयोरुत्तरपूर्वे धनिष्ठामूलं च तयोरप्युत्तरपूर्वे मघादीनि यान्यनुराधांतानि दक्षिणायनान्यष्ट तानि
वामपार्श्ववंक्रिषु। वामपार्श्वास्थिषु। मृगशीर्षादीनि प्रातिलोम्येन पूर्वाभाद्रपदांतानि यान्युदगयननक्षत्राण्यष्ट तानि
ण दक्षिणपार्श्वे। शतभिषग्ज्येष्ठे उत्तरदक्षिणायनयोः ये अवशिष्टे ते स्कंधयोः ॥६॥

यमो नक्षत्ररूपः। तथा नारायणोऽश्विनौ च ककुदि गलपृष्ठशृंगे॥७॥ ज्योतिषोल्लोकायाय। कालायनाय। कालचक्ररू
पायेत्यादि। नमो निमिधीमहीति मंत्रेणोपतिष्ठेत। मंत्रकृतां पूर्वोक्तं मंत्रं जपतां॥८॥ ॥इति पंचमे त्रयोविंशः॥ ॥एवं त्रिभिर्धु

उत्तराहनावगस्तिरधराहनौ यमः मुखेषु चांगारकः शनैश्चर उपस्थे बृहस्पतिः ककुदि वक्षस्यादित्यो हृदये ना
रायणो मनसि चंद्रो नाभ्यामुशनाः स्तनयोरश्विनौ बुधः प्राणापानयो राहुर्गले केतवः सर्वांगेषु रोम
सु सर्वे तारागणाः॥७॥ एतदु हैव भगवतो विष्णोः सर्वदेवतामयं रूपमहरहः संध्यायां प्रयतो वाग्य
तो निरीक्षमाण उपतिष्ठेत नमो ज्योतिर्लोकाय कालायनायानिमिषां पतये महापुरुषायाभिधीमहीति। ग्रहर्क्ष
तारामयमाधिदैविकं पापापहं मंत्रकृतां त्रिकालं। नमस्यतः स्मरतो वा त्रिकालं नश्येत तत्कालजमाशु पापं॥८॥
॥ ॥इति श्रीभागवते महापुराणे पंचमस्कंधे शिशुमारसंस्थाने त्रयोविंशतिमोऽध्यायः॥ ॥श्रीशुक उवाच॥
अधस्तात्सवितुर्योजनायुते स्वर्भानुर्नक्षत्रवच्चरतीत्येके योऽसावमरत्वं ग्रहत्वं चालभत भगवदनुकंपया स्वयमसु — राम ८८
रापसदः सैंहिकेयो ह्यतदर्हः। तस्य तात जन्मकर्माणि चोपरिष्टाद्वक्ष्यामः॥१॥

मर्यादापालनं वर्णितं तथा। अधो भुवनमर्यादापालनं त्रिभिरुच्यते। चतुर्विंशे रवेरर्वाक् स्वर्भान्वादिस्थितिः क्रमात्
अतलादि बिलस्वर्गमर्यादाः सप्त वर्णिताः। सूर्यमारभ्य ध्रुवांतं सन्निवेशं निरूप्येदानीं सूर्यादधस्तात् निरूपयति
अधस्तादिति। स्वर्भानुः राहुः अलभत लेभे। सिंहिकायाः पुत्रः॥१॥

अमृततयानेन मध्यप्रवेशेन नतयोर्वैबधानं करोतीति तथा

ग्रहणं चक्रमाह। यददस्तरणेर्मंडलं प्रतपतस्तद्विस्तरतो योजनायुतमाचक्षते। अत एवैताभ्यां सूचितत्वाद्वैरमनुबध्ना
तीति तथा। २॥ भागवतं चक्रं परिवर्तमानं परिभ्रमत् अभि अभिमुखं मुहूर्तमवस्थितः सन्। इति एवमेतदवस्थानमुपरागं
वदंति। तत्र चक्रम् जुवक्रस्थितिभ्यां अर्द्धं ग्रासः सर्वग्रासो न तु ग्रासोऽस्ति दूरांतरत्वात्॥३॥ तावन्मात्रे योजनायुते॥४॥ अ
यददस्तरणेर्मंडलं प्रतपतस्तद्विस्तरतो योजनायुतमाचक्षते द्वादशसहस्रं सोमस्य। त्रयोदशसहस्रं राहोर्यः प
र्वणि तद्व्यवधानकृद्वैरानुबंधः सूर्याचंद्रमसावभिधावति॥२॥ तन्निशम्योभयत्रापि भगवता रक्षणाय प्रयु
क्तं सुदर्शनं नाम भागवतं दयितमस्त्रं तत्तेजसा दुर्विषहं मुहुः परिवर्तमानमभ्यवस्थितो मुहूर्तमुद्विजमानश्च
कितहृदय आरादेव निवर्तते तदुपरागमिति वदंति लोकाः॥३॥ ततोऽधस्तात्सिद्धचारणविद्याधराणां सदनानि
तावन्मात्र एव॥४॥ ततोऽधस्ताद्यक्षरक्षःपिशाचप्रेतभूतगणानां विहाराजिरमंतरिक्षं यावद्वायुः प्रवाति
यावन्मेघा उपलभ्यंते॥५॥ ततोऽधस्ताच्छतयोजनांतर इयं पृथिवी यावद्धंसभासश्येनसुपर्णादयः पतत्रिप्र
वरा उत्पतंतीति॥६॥ उपवर्णितं भूमेर्यथासन्निवेशावस्थानं। अवनेरप्यधस्तात्सप्त भूविवराः एकैकशो योज
नायुतांतरेणायामविस्तारेणोपक्लृप्ताः। अतलं वितलं सुतलं तलातलं महातलं रसातलं पातालमिति॥७॥

तरिक्षं ग्रहहीनं तस्यावधिमाह। यावद्वायुः प्रवातीति तीव्रो वाति। तस्याप्यवधिमाह। यावन्मेघाः॥५॥ पृथिव्या उप
रि भूर्लोकावधिमाह यावद्धंसादयः पार्थिवा विकाराः॥६॥ योजनायुतांतरेण प्रत्येकमुच्छ्रिताः। आयामो यः कदाहस्य तत

सामान्येनविवराणिवर्णयति। एतेष्वित्यादिना। अथातलइत्यंतःप्राक्तनेनग्रंथेन। एतेषुदैत्यादयोनिवसंतीत्यन्वयः। कथंभूतेषु। अधिकःकामभोगश्चऐश्वर्यानंदश्चविभूतिश्चसंपत्तिःतैःसुसमृद्धाभवनादयोयेषु। कथंभूताः

एतेषुहिबिलस्वर्गेषुस्वर्गादप्यधिककामभोगैश्वर्यानंदविभूतिभिःसुसमृद्धभवनोद्यानाक्रीडविहारेषु दैत्यदानवकाद्रवेयानित्यप्रमुदितानुरक्तकलत्रापत्यबंधुसुहृदनुचरागृहपतयईश्वरादप्यप्रतिहतकामामायाविनोदानिवसंति॥८॥ येषुमहाराजमयेनमायाविनाविनिर्मिताःपुरोनानामणिप्रवरप्रवेकविरचितविविचित्रभवनप्राकारगोपुरसभाचैत्यचत्वरायतनादिभिर्नागासुरमिथुनपारावतशुकसारिकाकीर्णकृत्रिमभूमिभिर्विवरेश्वरगृहोत्तमैःसमलंकृताश्चकासति॥९॥

नित्यप्रमुदिताःअनुरक्ताःकलत्रादयोयेषां। नप्रतिहतःकामोयेषां। माययाविनोदोयेषां॥८॥ किंचहेमहाराजयेषुमयेननिर्मिताःपुरश्चकासतीत्यन्वयः। कथंभूतानानायेमणिप्रवरास्तेषांप्रवेकाःमुख्याःतैर्विरचितैःविचित्रैर्भवनादिभिःतथाविवरेश्वराणांगृहोत्तमैश्च। समलंकृताःकीदृशैःगृहोत्तमैः। नागाश्चअसुराश्चमिथुनभूताःपारावतादयश्चतैराकीर्णाःकृत्रिमाभूमयोयेषुतैः पाठांतरेनानास्वनत्वंमिथुनविशेषणं॥९॥

उद्यानानिचअतितराममरलोकश्रियमतिशायितानियेषुचकासतीत्यन्वयः। काभिःश्रीभिः केषां। कुसुमफलस्तबकाश्चसुभगकिशलयानिचतैरवनतारुचिराविटपायेषांतेषांविटपिनांलतानामंगैरालिंगितानांश्रीभिः तथासमिथुनाःचक्रवाकादिमिथुनसहितायेविविधाविहंगाःतद्युक्तानांजलाशयानांचश्रीभिः। कीदृशा

उद्यानानिचातितरांमनइंद्रियानंदिभिःकुसुमफलस्तबकसुभगकिशलयावनतरुचिरविटपविटपिनांलतांगालिंगितानांश्रीभिःसमिथुनविविधविहंगमजलाशयानाममलजलपूर्णानांझषकुलोल्लंघनक्षुभितनीरनीरजकुमुदकुवलयकह्लारनीलोत्पललोहितशतपत्रादिवनेषुकृतनिकेतनानामेकविहाराकुलमधुरविविधस्वनादिभिरिंद्रियोत्सवैरमरलोकश्रियमतिशायितानि॥१०॥ यत्रहवावनभयमहोरात्रादिभिःकालविभागैरुपलक्ष्यते॥११॥ यत्रमहाहिप्रवरशिरोमणयःसर्वंतमःप्रबाधंते॥१२॥

नांअमलैर्जलैःपूर्णानां। पुरपिकैरतिशायितानि। झषकुलोल्लंघनेनक्षुभितंयज्जलाशयानांनीरंतस्मिन्नयानिनीरजादीनितेषांवनेषुकृतंनिकेतनंयैस्तेषांअर्थात्पक्षिणांएकोऽखंडोयोविहारःतेनाकुलाश्चतेमधुराश्चविविधस्वनादयःतैरिंद्रियोत्सवाःतैश्च। यद्वासमिथुनेत्यादेरुत्तरेयोवसंबंधः। मनइंद्रियानंदिभिरितिस्वनादीनांविशेषणं। तत्रनीरजंसामान्येनकमलं। लोहितंशतपत्रंतद्विशेषः॥१०॥ अहोरात्रादिभिर्यद्भयं

तद्रौपवत्रस्तेस्यरगपाता॥१२॥

क्लमः श्रमः ग्लानिरनुत्साहः ॥१३॥ कल्याणानां मंगलरूपानां ॥१४॥ यस्मिन्भगवत्तेजसि प्रविष्टे। पुंसवनानि
गर्भाः॥ आचतुर्थाद्गर्भस्रावः पातः पंचमषष्ठयोरिति स्रावपातौ ज्ञेयौ ॥१५॥ स्ववर्णे रताः स्वैरण्यः कामिन्यस्त्वस

नवा एते युवस्तांदिव्यौषधिरसरसायनान्नपानस्नानादिभिराधयो व्याधयो वलीपलितजरादय
श्च देहवैवर्ण्यदौर्गंध्यस्वेदक्लमग्लानिरिति वयोवस्थाश्च भवंति ॥१३॥ न हि तेषां कल्याणानां प्रभवति
कुतश्चन मृत्युर्विना भगवत्तेजसश्चक्रापदेशात् ॥१४॥ यस्मिन्प्रविष्टेऽसुरवधूनां प्रायः पुंसवनानि भ
या देव स्रवंति पतंति ॥१५॥ अथातलेमयपुत्रोऽसुरोबलो निवसति। येन ह वा इह सृष्टाः षण्णवतिमा
याः याः काश्चनाद्यापि मायाविनो धारयंति ॥ यस्य जृंभमाणस्य मुखतः त्रयः स्त्रीगणा उदपद्यंत स्वै
रण्यः कामिन्यः पुंश्चल्य इति। या वै बिलायनं प्रविष्टं पुरुषं रसेन हाटकाख्येन साधयित्वा स्वविलासा
वलोकनानुरागस्मितसंलापोपगूहनादिभिः स्वैरं किल रमयंति। यस्मिन्नुपयुक्ते पुरुष ईश्वरोहं
सिद्धोहमित्ययुतमहागजबलमात्मानमभिमन्यमानः कत्थते मदांध इव ॥१६॥

वर्णेपि तत्राप्यति चंचलाः पुंश्चल्यः बिलायनं बिलायतनं। साधयित्वा संभोगसमर्थं कृत्वा। स्वैरं असाधा
रणा विलासाः तत्पूर्वकोऽवलोकः तेनानुरागयुक्तं स्मितं तेन संलापउपगूहनं च तदादिभिः। यस्मिन् देशेऽउपयुं
क्ते सेविते ॥१६॥

भवयोः भवस्य भवान्याश्च। चित्रभानुरग्निस्तेन निष्ठ्यूतं फूत्कृत्य त्यक्तं असुराणामवरोधेषु अंतःपुरेषु पुरुषीभिः
स्त्रीभिः ॥१७॥ सुतले बलिरधुनाप्यास्त इत्यन्वयः। कथंभूतः महेंद्रस्य प्रियं कर्तुमिच्छता प्रथमं पराक्षिप्तमप
हृतं त्रैलोक्यं यस्य सः। पुनर्भगवतोऽनुकंपयैव तत्र प्रवेशितः सन्। कीदृशेन। योदितेः सकाशाद्भूत्वा

ततोऽधस्ताद्वितले हरो भगवान् हाटकेश्वरः स्वपार्षदभूतगणावृतः प्रजापतिसर्गोपबृंहणाय
भवो भवान्या सह मिथुनीभूत आस्ते। यतः प्रवृत्ता सरित्प्रवरा हाटकी नाम भवयोर्वीर्येण यत्र चि
त्रभानुर्मातरिश्वना समिध्यमान ओजसा पिबति। तन्निष्ठ्यूतं हाटकाख्यं सुवर्णं भूषणेनासु
रेंद्रावरोधेषु पुरुषाः सह पुरुषीभिः धारयंति ॥१७॥ ततोऽधस्तात्सुतले उदारश्रवाः पुण्यश्लोको वि
रोचनात्मजो बलिर्भगवता महेंद्रस्य प्रियं चिकीर्षमाणेनादितेर्लब्धकायो भूत्वा बटुवामनरूपेण
पराक्षिप्तलोकत्रयो भगवदनुकंपयैव पुनः प्रवेशित इंद्रादिष्वविद्यमानया सुसमृद्धया श्रियाभि
जुष्टः स्वधर्मेणाराधयंस्तमेव भगवंतमाराधनीयमपगतसाध्वस आस्तेऽधुनापि ॥१८॥

बटुवामनरूपेण लब्धकायः तेन ॥१८॥ ॥ श्री वासुदेवाय नमः ॥

भा. पं.
६१

दान

केचित्तस्य सुतलराज्यं भूमिफलं मन्यंते तन्निराकरोति। नोएवैतदिति। यद्विलनिलये विवरस्थाने ऐश्वर्यं एतद्भूमि
दानस्य साक्षात्कारः फलं न भवत्येव। कुत इत्यपेक्षायामेवंभूतस्य दानस्य साक्षादपवर्गहेतुत्वादित्याह। यत्तत्प्र
सिद्धं दानं तस्य। तदेवाह। भगवत्यशेषजीवनिकायानां जीवभूतश्चासावात्मभूतश्च सर्वजीवनियंता चासावात्मा

नो एवैतत्साक्षात्कारो भूमिदानस्य यत्तद्भगवत्यशेषजीवनिकायानां जीवभूतात्मभूते परमात्मनि
वासुदेवे तीर्थतमे पात्र उपपन्ने परया श्रद्धया परमादरसमाहितमनसा संप्रतिपादितस्य साक्षा
दपवर्गद्वारस्य यद्विलनिलयैश्वर्यं॥१९॥ यस्य ह वाव क्षुतपतनप्रस्खलनादिषु विवशः सकृ
न्नामाभिगृणन् पुरुषः कर्मबंधनमंजसा विधुनोति यस्य हैव प्रतिबाधनं मुमुक्षवोऽन्यथै
वोपलभंते॥२०॥ तद्भगवतामात्मवतां सर्वेषामात्मन्यात्मद आत्मतमेव॥२१॥

रामश्चेत्यर्थः तस्मिन्संप्रतिपादितस्य॥१९॥ किंच यस्य नाम क्षुतादिषु विवशोपि सकृदपि गृणन् कर्मबं
धं विधुनोति। कथंभूतं। यस्य प्रतिबाधनं त्विह मुमुक्षवोऽन्यथैवोपलभंते। यन्निवृत्त्यर्थं योगसांख्यादि
क्लेशाननुभवंतीत्यर्थः तं कर्मबंधं त्यजंति॥२०॥ तत्तस्मिन्भगवतां भक्तानां ज्ञानिनां च यथायथं आत्मदे
ज्ञानदे हरौ आत्मतमे च समर्पितस्य भूमिदानं न तत्फलमिति पूर्वेणैव संबंधः॥२१॥ राम ६१

स्य

किंच नेदं भगवद्दत्तुकं याफलमपि। किंत्वेकांतभक्तस्य तस्यांतरायमात्रमित्याह। नेति भगवान् अमुष्य अमुं नैवानु
गृहीतवान् तत्र हेतुः। यदुतेति। आत्मन ईश्वरस्यानुस्मृतिमुष्णातीति तथा। तदुक्तं वासुदेवमनोयस्य जपहोमार्चनादिषु
तस्यांतरायो मैत्रेय देवेंद्रत्वादिकं फलमिति॥२२॥ तस्यैकांतभक्तिं सप्रपंचमाह। यत्तत् आतिप्रसिद्धं इति वक्ष्यमाणमुवा

न वै भगवान्नूनममुष्यानुजग्राह। यदुत पुनरात्मानुस्मृतिमोषणं मायामयभोगैश्वर्यमेवातनुतेति॥२२॥
यत्तद्भगवतानधिगतान्योपायेन याच्ञाछलेनापहृतस्वशरीरावशेषितलोकत्रयो वरुणपाशैश्च संप्रति
मुक्तो गिरिदर्यां चापविद्ध इति होवाच॥२३॥ नूनं बतायं भगवानर्थेषु न निष्णातो यो साविंद्रो यस्य सचिवो
मंत्राय वृत एकांततो बृहस्पतिस्तमतिहाय स्वयमुपेंद्रेणात्मानमयाचतात्मनश्चाशिषो नो एव तद्दास्यं अ
तिगंभीरवयसः कालस्य मन्वंतरपरिवृत्तं कियल्लोकत्रयमिदं॥२४॥

वहेत्यन्वयः। कथंभूतः। अनधिगत अन्य उपायो येन तेन भगवता याच्ञाछलेनापहृतं स्वशरीरमात्रावशेषितं लो
मुक्तो कत्रयं यस्य। सम्यक् प्रतिबद्धः अपविद्धः प्रक्षिप्तोपि सन्। अहो बतेति खेदे। भगवान् विद्वानपि यो सावि॑द्रः यस्यैकांतेन
बृहस्पतिः सचिवः सहायः यतो मंत्रार्थं वृतः। सोपि पुरुषार्थेषु नूनं न निष्णातः न निपुणः यत उपेंद्रेण द्वारभूतेन तं उपेंद्रं वि
हायात्मानं मां लोकत्रयमयाचत। तं मंत्रप्रदं बृहस्पतिमतिहायेति वा। तस्मिन्प्रसन्नेसत्यवरणीयो न लोकत्रयं यतस्तदति
तुच्छमित्याह। अतिगंभीरवयोयस्य तस्य कालस्य यन्मन्वंतरं तेन परिवृत्तं विपर्ययस्तं लोकत्रयमिदं कियत्॥२४॥

भा०पं०
९२

उक्तार्हस्त्वेकएवार्थेनिष्क्रांतः इत्याह यस्यानुद्गास्यमिति। स्वपितरि उपरते मृते सति स्वपित्र्यं पदं भगवता दीयमानमपि भगवतः खलु परमन्यदहितिकृत्वा न तु जग्राहेत्यर्थः ॥२५॥ ननु त्वमतिधीरः। कुतस्त्वमेव वक्तुमन्यसे तत्राह। तस्यानुपथं अनुवर्त्म अभजिता अक्षीणाः कषायाः रागादयो यस्य। परिहीनो भगवदनुग्रहो यस्य स को वा उपगंतुमिच्छतीति। २६
अथ शुकोक्तिः। नन्वेवंभूतश्चेद्बलिः तर्हि तस्यैव चरितं विस्तरेण कथ्यतां तत्राह। तस्य बलेरनुचरितमुपरिष्टाद्

यस्यानुद्गास्यमेवास्मत्पितामहः किल वव्रे न तु स्वपित्र्यं यदुताकुतोभयं पदं दीयमानं भगवतः परमिति भगवतोपरते खलु स्वपितरि ॥२५॥ तस्य महानुभावस्यानुपथममृजितकषायः को वास्मद्विधः परिहीनभगवदनुग्रह उपजिगमिषतीति ॥२६॥ अथ तस्यानुचरितमुपरिष्टाद्विस्तरिष्यते। यस्य भगवान्स्वयमखिलजगद्गुरुर्नारायणो द्वारि गदापाणिरवतिष्ठति निजजनानुकंपितहृदयो येनांगुष्ठेन पदा दशकंधरो योजनायुतायुतं दिग्विजय उच्चाटितः ॥२७॥ ततोऽधस्तात्तलातले मयो नाम दानवेंद्रस्त्रिपुराधिपतिर्भगवता पुरारिणा त्रिलोकीशं चिकीर्षुणा निर्दग्धस्वपुरत्रयस्तत्प्रसादाल्लब्धपदो मायाविनामाचार्यो महादेवेन परिरक्षितो विगतसुदर्शनभयो महीयते ॥२८॥
ष्टमेव विस्तरिष्यते। यस्य द्वार्यवतिष्ठते। उत्तैर्निजजने यदनुकंपितं तत्कृतानुकंपं हृदयं यस्य। द्वारपालकर्म दर्शयति। येन श्रीनारायणेन बलेर्द्वारि विग्रहे दशकंधर उच्चाटितः। केन पदा। तत्राप्यंगुष्ठेनैव ॥२७॥ यथा हरिणा स्वभक्तो बलिः सुतले निहितः सुखमास्ते। एवं महादेवभक्तोऽपि मयः तलातले सुखमास्त इत्याह ॥ तत इति। ल

… महीयते पुरुषैः ॥२८॥

राम
९२

नैकशिरसां अनेकफणानां गणोऽस्ति। एतत्प्रपंचयति। कुहकेति। महाभोगवंतो महाकायाः। पुरुषवाहात् हरेर्वाहनात् ॥२९॥ विबुधप्रत्यनीकाः देवशत्रवः। सकललोकेष्वप्यनुभावो यस्य तस्यैव तेजसा सुदर्शनेन प्रतिहतो बलावलेपो वीर्यमदो येषां। बिले शयाः सर्पा इव। इंद्र इत्याप्रयुक्तो निर्मंत्ररूपा गिर्वाग्भिः। एवं हि वैदिकमाख्यानं। पणि

ततोऽधस्तान्महातले काद्रवेयाणां सर्पाणां नैकशिरसां क्रोधवशो नाम गणः कुहकतक्षककालियसुषेणादिप्रधाना महाभोगवंतः पतत्त्रिराजाधिपतेः पुरुषवाहादनवरतमुद्विग्नमनसः स्वकलत्रापत्यसुहृत्कुटुंबसंगेन क्वचित्प्रमत्ता विहरंति ॥२९॥ ततोऽधस्ताद्रसातले दैतेया दानवाः पणयो नाम निवातकवचाः कालेया हिरण्यपुरवासिन इति विबुधप्रत्यनीका उत्पत्त्या महौजसो महासाहसिनो भगवतः सकललोकानुभावस्य हरेरेव तेजसा प्रतिहतबलावलेपा बिलेशया इव वसंति। ये वै सरमयेंद्रदूत्या वाग्भिर्मंत्रवर्णाभिरिंद्राद्बिभ्यति ॥ ३०॥
भिरस्कैरेर्निगूढगां अन्वेष्टुं सरमां देवशुनीमिंद्रेण प्रतिहितां संधिमिच्छंतः पणयः प्राहुः। किमिच्छंती सरमे त्यादि सा च संधिमनिच्छंती इंद्रस्तेति पूर्वकं तान्प्रति परुषमाह। हता इंद्रेण पणयः शयध्वं इत्यादि। ते च तदुक्त्वा बिभ्यतीति ॥३०॥

महाभोगिनः महाफणाः महानमर्षः क्रोधो येषां। पंचादिसंख्यानि शीर्षाणि येषां। शीर्ष्णामिति वक्तव्ये शीर्षाणामित्यार्षः॥३१॥ पंचमे चतुर्विंशोऽध्यायः॥ ॥ पंचविंशे ततोऽधस्तादाहशेषस्य संस्थितिं॥ संजिहीर्षोरिदं काले यच्चरुद्रसमुद्भवः॥ कोसावनंतः सात्वतीयाः सात्वततंत्रनिष्ठाः चतुर्व्यूहोपासने यं संकर्षणं इत्याचक्षते। तथा ऽख्या

ततोऽधस्तात्पाताले नागलोकपतयो वासुकिप्रमुखाः शंखकुलिकमहाशंखश्वेतधनंजयधृतराष्ट्रशंखचूडकंबलाश्वतरदेवदत्तादयो महाभोगिनो महामर्षा निवसंति। येषामु ह वै पंचसप्तदशशतसहस्रशीर्षाणां फणासु विरचिता महामणयो रोचिष्णवः पातालविवरतिमिरनिकरं स्वरोचिषा विधमंति॥३१॥
इति श्रीभागवते महापुराणे पंचमस्कंधे चतुर्विंशतितमोऽध्यायः॥ ॥ ॥ श्रीशुक उवाच॥ ॥ तस्य मूलदेशे त्रिंशद्योजनसहस्रांतर आस्ते या वै कला भगवतस्तामसी समाख्याता ऽनंत इति सात्वतीया द्रष्टृदृश्ययोः संकर्षणमहमित्यभिमानलक्षणं संकर्षणं इत्याचक्षते॥१॥ यस्येदं क्षितिमंडलं भगवतोऽनंतमूर्तेः सहस्रशिरस एकस्मिन्नेव शीर्षणि ध्रियमाणं सिद्धार्थ इव लक्ष्यते॥२॥

नेहेतुः द्रष्टृदृश्ययोः सम्यक्कर्षणमेकीकरणं येन। तत्कुतः। अहमित्यभिमानोत्लक्षणं चिह्नमधिष्ठातुर्यस्य। अहंकाराधिष्ठानेन द्रष्टृदृश्यसंकर्षणात्संकर्षण इत्यर्थः॥१॥ अनंतत्वमाह यस्येदमिति यच्छब्दानां स एव भगवा

तामसत्वमाह। यस्येदं विश्वमुपसंहर्तुमिच्छतः अमर्षेण विरचिते रुचिरीकृते कुटिलीकृते भ्रमंत्यौ भ्रुवौ तयोर्मध्ये। उत्तंभयन् उन्नमयन्॥३॥ स्कंभगत्वमाह। यस्यांघ्रिकमलयुगले अरुणाविशदा नखा एव मणयः तेषां षंडः समूहः तस्य मंडलेषु परिस्फुरतां कुंडलानां प्रभया मंडितानि गंडस्थलानि येषु तानि॥४॥ चारूणि अंगवल्लये

यस्य ह वा इदं कालेनोपसंजिहीर्षतोऽमर्षविरचितरुचिरभ्रमद्भ्रुवोरंतरेण सांकर्षणो नाम रुद्र एकादशव्यूहस्त्र्यक्षस्त्रिशिखं शूलमुत्तंभयन्नुदतिष्ठत्॥३॥ यस्यांघ्रिकमलयुगलारुणविशदनखमणिषंडमंडलेष्वहिपतयः सह सात्वतर्षभैरेकांतभक्तियोगेनावनमंतः स्ववदनानि परिस्फुरत्कुंडलप्रभामंडितगंडस्थलान्यतिमनोहराणि प्रमुदितमनसः खलु विलोकयंति॥४॥ यस्यैव हि नागराजकुमार्य आशिष आशासाना श्चार्वंगवलयविलसितविशदविपुलधवलसुभगरुचिरभुजरजतस्तंभेष्वगुरुचंदनकुंकुमपंकानुलेपेनावलिंपमानास्तदभिमर्शनोन्मथितहृदयमकरध्वजावेशरुचिरललितस्मितास्तदनुरागमदमुदितमदविघूर्णितारुणकरुणावलोकनयनवदनारविंदं सव्रीडं किल विलोकयंति॥५॥

विलसिता श्चैते विशदाः विपुलाश्च धवलाश्च सुभगाश्च रुचिराश्च भुजा एव रजतस्तंभाः तेषु अगुरुचंदनकुंकुमानां पंक एवानुलेपः तेनावलिंपमानाः तेषामभिमर्शनेनोन्मथिते हृदये मकरध्वजस्यावेशेन रुचिरं ललितं च स्मितं यासां ताः तस्यानुरागेण मदेन च मुदितं च तत् मदेन विघूर्णिते च वलिते च आ दूषद् अरुणे करुणावलोकयुक्ते नयने यस्मिन् तद्वदनारविंदं विलोकयंति॥५॥

अमर्षोऽसहनं। रोषः क्रोधः उपसंहृतस्तयोर्वेगो येन। ६। उपासनार्थमाह। सुरादिभिर्ध्यायमानः चिंत्यमानः अन
वरतं मदेन मुदिते अत एव विकृतविह्वललोचनश्च। सुललितेन मुखरिकामृतेनाप्यायमानः स्वपार्षदविबुधयू
थपतीनपरिम्लानरागनवतुलसिकामोदमध्वासवेन माद्यन्मधुकरव्रातमधुरगीतश्रियं वैजयंतीं स्वां वनमालां

सएव भगवाननंतोऽनंतगुणार्णव आदिदेव उपसंहृतामर्षरोषवेगो लोकानां स्वस्तय आस्ते॥ ६
ध्यायमानः सुरासुरोरगसिद्धगंधर्वविद्याधरमुनिगणैरनवरतमदमुदितविकृतविह्वललोच
नः सुललितमुखरिकामृतेनाप्यायमानः ❌ लां नीलवासा एककुंडलो हलककुदि कृतसुभग
सुंदरभुजो भगवान्माहेंद्रो वा[रणें]द्र इव कांचनीं कक्षामुदारलीलो बिभर्ति॥ ७॥ यएष एवमनु
श्रुतो ध्यायमानो मुमुक्षूणाम[ना]दिकालकर्मवासनाग्रथितमविद्यामयं हृदयग्रंथिं सत्वरजस्त
मोमयमंतर्हृदयं गत आशु निर्भिनत्ति॥ तस्यानुभावान् भगवान्स्वायंभुवो नारदः सह तुंबरुणा स
भायां ब्रह्मणः संश्लोकयामास॥ ८॥

तेन स्वपार्षदान् विबुधयूथपानां पतीश्चाप्यायमानः हर्षयन्। नीलं वासः यस्य। एकमेव कुंडलं यस्य हलस्य ककुदि य
ष्टिकृतः न्यस्तः सुभगश्च सुंदरश्च भुजो येन। उदारा लीला यस्य सः। न परिम्लानो रागः कांतिर्यस्याः तस्या नवतुलसिका
याश्चामोदमध्वासवेन सुराभिमधुरसेन माद्यतां मधुकराणां ये व्राताः तेषां मधुरगीतेन श्रीर्यस्याः तां मालां। कक्षां
वरत्रां॥ ७॥ संश्लोकयामास वर्णयामास॥ ८॥ राम ९४

अस्य जगत उत्पत्त्यादिहेतवो गुणा यस्येक्षया कल्प्याः स्वस्वकार्यसमर्था आसन्। यस्य तु रूपं ध्रुवं अनंतं
अकृतं च अनादि तत्र हेतुः यदेकमेव सत् आत्मन् आत्मनि नानाकार्यप्रपंचमधात् तस्य ब्रह्मरूपस्य वर्त्म
तत्वं जनः कथमु ह वेद न वेदेवेत्यर्थः॥ ९। तर्हि कथमसौ मुमुक्षुभिः सेव्यते तत्राह। मूर्तिमिति। यत्रेदं सदसद्वि

उत्पत्तिस्थितिलयहेतवोऽस्य कल्प्याः सत्वाद्याः प्रकृतिगुणा यदीक्षयाऽऽसन्। यद्रूपं ध्रुवमकृतं यदेक
मात्मन्नानाधात्कथमु ह वेद तस्य वर्त्म॥ ९॥ मूर्तिं नः पुरुकृपया बभार सत्वं संशुद्धं सदसदिदं विभा
ति यत्र। यल्लीलां मृगपतिराददेऽनवद्यामादातुं स्वजनमनांस्युदारवीर्यः॥ १०॥ यन्नाम श्रुतमनुकीर्त
येदकस्मादार्तो वा यदि पतितः प्रलंभनाद्वा। हंत्यंहः सपदि नृणामशेषमन्यं कं शेषाद्भगवत आश्रयेन्मु
मुक्षुः॥ ११॥

भाति स नोऽस्माकं भक्तानां बहुकृपया संशुद्धं सत्वं मूर्तिं बिभार। स्वजनानां मनांस्यादातुं वशीकर्तुं कृतां यस्य ली
लां मृगपतिः सिंहः आददे अशिक्षत। यतः उदाराणि वीर्याणि यस्य। तस्मादन्यं मुमुक्षुः कमाश्रयेदित्युत्तरेणान्वयः।
यद्वा कृपये त्यत्र हेतुः। यद्यस्मात् स्वजनानां मनांस्यादातुं लीलामाददे। मृगपतिरिवोदारवीर्यः। यद्वा मृग्यंत इति मृ
गाः कामत्रयाः तेषां पतिर्मुख्यः॥ १०॥ किंच। आस्तां तस्य कृपया वपुर्धारणं तद्भजनं वा। तन्नाम्नो हार्यमेवातिचित्रमि
त्याह। यस्य नाम यदि पतितोऽपि महापातक्यपि अनुकीर्तयेत् तर्हि स शुद्ध्येदिति किमु वक्तव्यं। यतोऽसावेव नृणामशे
षमंहः सद्यो हंति। कथमनुकीर्तयेत्। अन्यतः श्रुतं वा अकस्माद्वा आर्तो वा सन् प्रलंभनाद्वा परिहासात् तस्माच्छेषा
दन्यम्॥ ११॥

याकर्तुः स्फरिवित्वं। राजस्यासुखित्वं दुःखित्वं च। तामस्या दुःखित्वं मूढत्वं च। तत्रापि तासां श्रद्धानां तारतम्यात् तस्करवादितार
तम्यं स्वर्वे धार्मित्यर्थः॥१॥

भा०पं० ९५ गिर्यादिसहितं भूगोलं। सत्वानि प्राणिनः सहस्रजिह्वोपि को गणयेत्॥१२॥ दुरंतं वीर्यं बलं यस्य। उरवो गुणाः अ
नुभावश्च यस्या स च रसायाः भूमेर्मूले स्थितः तिष्ठति। आत्मतंत्रः आत्माधारः॥१३॥ उक्तस्य लोकविभागस्योपयो
गं वदन्नुपसंहरति। एता ह्येवेह कामान् कामयमानैर्नृभिरुपगंतव्या इत्यन्वयः॥१४॥ तस्य प्रपंचः एतावत्यो विपा

मूर्द्धन्यर्पितमणुवत्सहस्रमूर्ध्नो भूगोलं सगिरिसरित्समुद्रसत्वं। आनंत्यादनिमितविक्रमस्य भूम्नः
को वीर्याण्यधिगणयेत्सहस्रजिह्वः॥१२॥ एवंप्रभावो भगवाननंतो दुरंतवीर्योरुगुणानुभावः॥ मूले
रसायाः स्थित आत्म[illegible]रो यो लीलया क्ष्मां स्थितये बिभर्ति॥१३॥ एता ह्येवेह नृभिरुपगंतव्या ग
तयो यथाकर्मविनिर्मिताः॥ यथोपदेशमनुवर्णिताः कामान् कामयमानैः॥१४॥ एतावतीर्हि राजन्
पुंसः प्रवृत्तिलक्षणस्य धर्मस्य विपाकगतय उच्चावचा विसदृशा यथाप्रश्नं व्याचख्ये किमन्यत्क
थयाम इति॥१५॥ ॥इति श्रीभागवते महापुराणे पंचमस्कंधे विवरविध्युपवर्णनं पंचविंशतितमो
ध्यायः॥ ॥राजोवाच॥ ॥महर्ष एतद्वैचित्र्यं लोकस्य कथमिति॥ ॥श्रीशुक उवाच॥ ॥त्रिगुण — राम ९५
त्वात्कर्तुः श्रद्धया कर्मगतयः पृथग्विधाः सर्वा एव सर्वस्य तारतम्येन भवंति॥१॥

कगतयः फलभूता गतयः ताः व्याचख्ये व्याख्यातवानस्मि॥१५॥ ॥पंचमे पंचविंशः॥ ॥षड्विंशे तु ततोधस्ता
न्नरकस्थितिरुच्यते। पापिनो यत्र दह्यंते यमदूतैर्यथायथं॥ पुंसो गतय उच्चावचा विसदृशा इति भोगवैचित्र्यमुक्तं। तदेतत्कु
त इति पृच्छति। महर्ष इति। १। कर्मणः समानत्वेपि श्रद्धावैचित्र्यात् फलवैचित्र्यमिति परिहरति त्रिगुणत्वादिति सात्विक्या श्रद्ध

प्रतिषिद्धं प्रतिषेधः स एव लक्षणं प्रमाणं यस्य अधर्मे कर्तुः श्रद्धा वैसादृश्यं तमसस्तारतम्यात्। तत्रापि कारणं दर्शयन्नाह।
अनाद्यविद्याकृतानां कामानां सृतयो नरकाः तासां ताः अथेदानीं ताः प्राचुर्येणानुवर्णयिष्यामः इत्यन्वयः॥२॥ किं भूमावे
व देशविशेषाः। त्रिलोक्या ब्रह्मांडाद्बहिर्वा आवरणेषु मध्ये अंतराले वा भूमिव्यतिरिक्ते॥३॥४॥ कर्मदोषमनतिक्रम्य दोषमे

अथेदानीं प्रतिषिद्धलक्षणस्याधर्मस्य तथैव कर्तुः श्रद्धाया वैसादृश्यात्कर्मफलं विसदृशं भवति। या ह्यनाद्यविद्यया
कृतकामानां तत्परिणामलक्षणाः सृतयः सहस्रशः प्रवृत्तास्तासां प्राचुर्येणानुवर्णयिष्यामः॥२॥ ॥राजोवाच॥
नरका नाम भगवन् किं देशविशेषा अथवा बहिस्त्रिलोक्या आहोस्विदंतराल इति॥३॥ ॥श्रीशुक उवाच॥ ॥अं
तराल एव त्रिजगत्यास्तु दिशि दक्षिणस्यामधस्ताद्भूमेरुपरिष्टाच्च जलाद्यस्यामग्निष्वात्तादयः पितृगणा दिशि
स्वानां गोत्राणां परमेण समाधिना सत्या एवाशिष आशासाना निवसंति॥४॥ यत्र ह वाव भगवान् पितृराजो वै
वस्वतः स्वविषयं प्रापितेषु स्वपुरुषैर्जंतुषु संपरेतेषु यथाकर्मावद्यं दोषमेवानुल्लंघितभगवच्छासनः सगणो
दमं धारयति॥५॥ तत्र हैके नरकानेकविंशतिं गणयंति। अथ तांस्ते राजन् नामरूपलक्षणतोनुक्रमिष्यामः। तामिस्रों
धतामिस्रो रौरवो महारौरवः कुंभीपाकः कालसूत्रमसिपत्रवनं सूकरमुखमंधकूपः कृमिभोजनः संदंशस्तप्तसूर्मिर्वज्र
कंटकशाल्मली वैतरणी पूयोदः प्राणरोधो विशसनं लालाभक्षः सारमेयादनमवीचिरयःपानमिति। किंच क्षारकर्दमो र
क्षोगणभोजनः शूलप्रोतो दंदशूकः अवटनिरोधनः पर्यावर्तनः सूचीमुखमित्यष्टाविंशति नरका विविधयातनाभूमयः॥६
वद्दमं पापफलं दंडं करोति। न उल्लंघितं भगवच्छासनं येन॥५॥ मतांतरेणाष्टाविंशतिमाह। किंचेति॥६॥ श्रीवासुदेवाय नमः॥

भा०पं० ९६

पायभेदेन च तत्तन्नरकयातनाभेदं प्रपंचयति। यस्त्वित्यादिना। पात्यमानः पीड्यमानः। एकदैवतदैव॥७॥ पुरुषं पतिं वंचयित्वा॥८॥ एतत् शरीरमहमिति। इदं धनादि ममेति मत्वा स्वयं च कुटुंबमेव प्रपुष्णाति तेन देहादिं विहाय स्वयमेव श्रुभेन॥९॥

तत्र यस्तु परवित्तापत्यकलत्राण्यपहरति स हि कालपाशबद्धो यमपुरुषैरतिभयानकैस्तामिस्रे नरके बलान्निपात्यते। अनशनानुदपानदंडताडनसंतर्जनादिभिर्यातनाभिः पात्यमानो जंतुर्यत्र कश्मलमासादित एकदैव मूर्छामुपयाति तामिस्रप्राये॥७॥ एवमेवांधतामिस्रे यस्तु वंचयित्वा पुरुषं दारादीनुपभुंक्ते। यत्र शरीरी निपात्यमानो यातनास्थो वेदनया नष्टमतिर्नष्टदृष्टिश्च भवति। यथा वनस्पतिर्वृश्च्यमानमूलस्तस्मादंधतामिस्रं तमुपदिशंति॥८॥ यस्त्विह वा एतदहमिति ममेदमिति भूतद्रोहेण केवलं स्वकुटुंबमेवानुदिनं प्रपुष्णाति स तदिह विहाय स्वयमेव तदशुभेन रौरवे निपतति॥९॥ ये त्विह यथैवामुना विहिंसिता जंतवः परत्र यमयातनामुपगतं त एव रुरवो भूत्वा तथा तमेव विहिंसंति। तस्माद्रौरवमित्याहुः। रुरुरिति सर्पादतिक्रूरसत्वापदेशः॥३॥ एवमेव महारौरवो यत्र निपतितं पुरुषं क्रव्यादा नाम रुरवस्तं क्रव्येण घातयंति। यः केवलं देहंभरः॥४॥ यस्त्विह वा उग्रः पशून् पक्षिणो वा प्राणत उपरंधयति तमपकरुणं पुरुषादैरपि विगर्हितममुत्र यमानुचराः कुंभीपाके तप्ततैले उपरंधयंति॥५॥

रुरवो भूत्वेति कर्माण्येव तथा परिणामं प्राप्येत्यर्थः। अतिक्रूरस्य भारशृंगाख्यसत्वस्यापदेशः संज्ञा।३। क्रव्येण निमित्तेन मांसार्थमित्यर्थः॥४॥ प्राणतः सजीवान् उपरंधयति पचति। अपकरु

राम ९६

२ इतिटीकाऽष्टमस्य२ अग्रिमं मूलं२

खलेऽसमे देशो।६॥ स्वधर्महा स्वधर्मस्यागी॥७॥ स्वनयन् रुदन्। कश्मलं मोहमुपगतो भवति। अदृष्टदोषास्तेनोपरुद्धाः संतो यथा कश्मलमुपगतास्तद्वत्॥८॥ यस्त्विह पितृविप्रब्रह्मध्रुक् स कालसूत्रसंज्ञिके नरके अयुतयोजनपरिमंडले ताम्रमये तप्तखले उपर्यधस्तादग्न्यर्काभ्यामतितप्यमानोऽभिनिवेशितः क्षुत्पिपासाभ्यां च दह्यमानांतर्बहिःशरीर आस्ते शेते चेष्टतेऽवतिष्ठति परिधावति च यावंति पशुरोमाणि तावद्वर्षसहस्राणि॥६॥ यस्त्विह वै निजवेदपथादनापद्यपगतः पाषंडं चोपगतस्तमसिपत्रवनं प्रवेश्य कशया प्रहरंति। तत्र हासावितस्ततो धावमान उभयतोधारैस्तालवनासिपत्रैश्छिद्यमानसर्वांगो हा हतोऽस्मीति परमया वेदनया मूर्छितः पदे पदे निपतति स्वधर्महा पाषंडानुगतं फलं भुंक्ते॥७॥ यस्त्विह वै राजा राजपुरुषो वा अदंड्ये दंडं प्रणयति ब्राह्मणे वा शरीरदंडं स पापीयान्नरकेऽमुत्र सूकरमुखे निपतति। तत्रातिबलैर्विनिष्पिष्यमाणावयवो यथैवेहेक्षुखंड आर्तस्वरेण स्वनयन् क्वचिन्मूर्छितः कश्मलमुपगतः यथैवेहादृष्टदोषा उपरुद्धाः॥८॥ यस्त्विह वै भूतानामीश्वरकल्पितवृत्तीनामविविक्तपरव्यथानां स्वयं पुरुषोपकल्पितवृत्तिर्विविक्तपरव्यथो व्यथामाचरति स परत्रांधकूपे तदभिद्रोहेण निपतति तत्र हासौ तैर्जंतुभिः पशुमृगपक्षिसरीसृपैर्मशकयूकामत्कुणमक्षिकादिभिर्ये के चाभिद्रुग्धास्तैः सर्वतोऽभिद्रुह्यमाणस्तमसि विहतनिद्रानिर्वृतिरलब्धावस्थानः परिक्रामति यथा कुशरीरे जीवः॥९॥

ईश्वरेणोपकल्पिता मनुष्यरक्तपानादिलक्षणा वृत्तिर्येषां मत्कुणादीनां न विविक्ता विज्ञाता परव्यथा यैरविवेकिभिस्तेषां। पुरुषेण ब्राह्मणादिना वेनविधिनिषेधपूर्वकमुपकल्पिता वृत्तिर्यस्य विविक्ता परव्यथा येन विवेकिना। अभिद्रुग्धाः हिंसिताः। विहता निद्रारूपा वृत्तिर्यस्य। न लब्धमवस्थानं येन स तमसि परिक्रामति॥९॥

भा०पं० ९१

यस्त्विह वा असंविभज्याश्नाति यत्किंचनोपनतमनिर्मितपंचयज्ञो वायससंस्तुतः स परत्र कृमिभोजने नरकाधमे निपतति। तत्र शतसहस्रयोजने कृमिकुंडे कृमिभूतः स्वयं कृमिभिरेव भक्ष्यमाणः कृमिभोजनो यावत्तदप्रत्ताप्रहुतादोऽनि-

टी० टिप्पणिकायां क्रियं। यत्किंचनमभक्ष्यादिकं उपनतं प्राप्तं तदसंविभज्य न निर्मिताः पंचयज्ञा येन अत एव वायसैः संस्तुतः समत्वेन वर्णितः कृमिभोजनं कृमीनेव भुंजानः। यावत्तत्। यावंति योजनानि तत्कृमिकुंडं तावंति वर्षा-

र्वेशमात्मानं यातयते॥१०॥ यस्त्विह वै स्तेयेन बलाद्वा हिरण्यरत्नादीनि ब्राह्मणस्य वाऽपहरति अन्यस्य वानापदि पुरुषस्तममुत्र राजन्यमपुरुषा अयस्मयैरग्निपिंडैः संदंशैस्त्वचि निःकुषंति॥११॥ यस्त्विह वा अगम्यां स्त्रियमगम्यं वा पुरुषं योषिदपि गच्छति तावमुत्र कशया ताडयंतस्तिग्मया सूर्म्या लोहमय्या पुरुषमालिंगयति स्त्रियं च पुरुषरूपया सूर्म्या॥१२॥ यस्त्विह वै सर्वाभिगमस्तममुत्र निरये वर्तमानं वज्रकंटकशाल्मलीमारोप्य निष्कर्षंति॥१३॥

णि। यावद्घातयातकमित्यर्थः। अप्रत्तमसंविभक्तं। अप्रहुतं वाश्नातीति तथा सः न निर्वेशं अकृतप्रायश्चित्तं॥१०॥ निष्कुषंति छिंदंति॥११॥ तिग्मया तप्तया सूर्म्या प्रतिमया सर्वाभिगमः पश्वादिरूपसंगतः॥१३॥ राम ९१

अपाषंडाः सत्कुलीनाः संतः। द्विनीयांत पाठे सेतुविशेषणं। नदीविशेषण विण्मूत्रेति॥१४॥ पशुचर्यां स्वेच्छाचारं

ये त्विह वै राजन्या राजपुरुषा वा अपाषंडा धर्मसेतून्भिंदंति ते संपरेत्य वैतरण्यां निपतंति भिन्नमर्यादस्तस्यां निरयपरिखाभूतायां नद्यां यादोगणैरितस्ततो भक्ष्यमाणा आत्मना न वियुज्यमानाश्चासुभिरुह्यमानाः स्वाघेन कर्मपाकमनुस्मरंत उपतप्यंते। विण्मूत्रपूयशोणितकेशनखास्थिमेदोमांसवसावाहिन्यामुपतप्यंते॥१४॥ ये त्विह वै वृषलीपतयो नष्टशौचाचारनियमास्त्यक्तलज्जाः पशुचर्यां चरंति। ते चापि प्रेत्य पूयविण्मूत्रश्लेष्ममलापूर्णार्णवे निपतंति। तदेवातिबीभत्सितमश्नंति॥१५॥ ये त्विह वै श्वगर्दभपतयो ब्राह्मणादयो मृगयाविहारा अतीर्थे च मृगान्निघ्नंति तानपि संपरेताल्लँक्ष्यभूतान्यमपुरुषा इषुभिर्विध्यंति॥१६॥ ये त्विह वै दांभिका दंभयज्ञेषु पशून्विशसंति तानमुष्मिँल्लोके वैशसे नरके पतितान्निरयपतयो यातयित्वा विशसंति॥१७॥ यस्त्विह सवर्णां भार्यां द्विजो रेतः पाययति काममोहितस्तं पापकृतममुत्र रेतःकुल्यायां पातयित्वा रेतः संपाययंति॥१८॥ ये त्विह वै दस्यवोऽग्निदा गरदा ग्रामान्सार्थान्वा विलुंपंति राजानो भटा वा तांश्चापि हि परेत्य यमदूता वज्रदंष्ट्राः श्वानः सप्तशतानि विंशतिश्च सरभसं खादंति॥१९॥

१५॥ अतीर्थे विहितादन्यत्र विध्यंतीति प्राणनिरोधो दर्शितः॥१६॥ निरयपतयो यमपुरुषाः॥१७॥ लालान्तरमाह। यस्त्विहेति। रेतः पानं कारयंति॥१८॥ यमदूता ये श्वानः। सरभसं ससंभ्रमं॥१९॥

भा०पं०
९८

यस्त्विह वा अनृतं वदति साक्ष्ये द्रव्यविनिमये दाने वा कथंचित्स वै प्रेत्य नरके ऽवीचिमत्यधःशिरा निरवकाशे योजनशता २
द्रव्यविनिमये क्रयविक्रयादौ निरवकाशे निरालंबे। अवीचिशब्दार्थमाह यत्रेति वीचिस्तरंगः तद्रहितत्वादवीचिः॥ २०॥

तो च्छ्रायाद्गिरिमूर्ध्नः संपात्यते यत्र जलमिव स्थलमश्मपृष्ठमवभासते तदवीचिमत्तिलशो विशीर्यमाणशरीरो न म्रियमाणः पुनरारोपितो निपतति॥ २०॥ यस्त्विह वै विप्रो राजन्यो वैश्यो वा सोमपीथस्तत्कलत्रं वा सुरां व्रतस्थोपि वा पिबति प्रमादतस्तेषां निरयं नीतानामुरसि पदाक्रम्यास्ये वह्निना द्रवमाणं कार्ष्णायसं निषिंचंति॥ २१॥ अथ च यस्त्विह वा आत्मसंभावनेन स्वयमधमो जन्मतपोविद्याचारवर्णाश्रमवतो वरीयसो न बहु मन्येत स मृतक एव मृत्वा क्षारकर्दमे निरयेऽवाक्शिरा निपातितो दुरंता यातना ह्यश्नुते॥ २२॥ ये त्विह वै पुरुषाः पुरुषमेधेन यजंते याश्च स्त्रियो नृपशून्खादंति तांश्च ते पशव इव निहता यमसदने यातयंतो रक्षोगणाः सौनिका इव स्वधितिनावदार्यासृक्पिबंति नृत्यंति गायंति च हृष्यमाणा यथेह पुरुषादाः॥ २३॥ राम ९८

यो विप्रस्तत्कलत्रं वा सुरां पिबति। अन्यो पि वा व्रतस्थः सन् राजन्यो वैश्यो वा सोमपीथः कृतसोमयाग इत्यन्वयः। तयोः सोमस्थाने फलचमसविधानात्। सोमपाननिषेधाच्च। तथा च श्रुतिः। न्यग्रोधस्तिभीराहृत्य ताः संपिष्य ताः दधन्युपमृज्य तमस्मै भक्षं संप्रयच्छेन्न सोममिति॥ २१॥ स पूर्वमपि मृतक एव सन्मृत्वा॥ २२॥ पुरुषस्य मेधेन हिंसया भैरवादीन्यजंते। याश्च स्त्रियः कामरूपाः। रक्षोगणा भूत्वा यथेह ते पुरुषादाः संतः पूर्वमनृत्यंत तद्वत्॥ २३॥

वैश्रंभकैः विश्वासोपायैः उपविश्रंभय्य विश्वास्य॥ २४॥ बिले शयानन्मूषकान्॥ २५॥ सगरेण सविषेण॥ २६॥ अतिथयो ऽज्ञातपूर्वा अभ्यागताः ज्ञातपूर्वाः तान् पापेन वक्रीकृतेन॥ २७॥ आढ्याभिमतिः धनगर्वितः। अहंकृतिः श्रेष्ठो

ये त्विह वा अनागसोऽरण्ये ग्रामे वा वैश्रंभकैरुपसृतानुपविश्रंभय्य जिजीविषून्शूलसूत्रादिषूपप्रोतान्क्रीडनकतया पातयंति ते पि च प्रेत्य यमयातनासु शूलादिषु प्रोतात्मानः क्षुत्तृड्भ्यां चाभिहताः कंकवटादिभिश्चेतस्ततस्तिग्मतुंडैराहन्यमाना आत्मशमलं स्मरंति॥ २४॥ ये त्विह वै भूतान्युद्वेजयंति नरा उल्बणस्वभावा यथा दंदशूकास्ते पि प्रेत्य नरके दंदशूकाख्ये निपतंति यत्र नृप दंदशूकाः पंचमुखाः सप्तमुखा उपसृत्य ग्रसंति यथा बिलेशयान्॥ २५॥ ये त्विह वा अंधावटकुशूलगुहादिषु भूतानि निरुंधंति तानमुत्र तेष्वेवोपवेश्य सगरेण वह्निना धूमेन निरुंधंति॥ २६॥ यस्त्विह वा अतिथीनभ्यागतान्वा गृहपतिरसकृदुपगतमन्युर्दिधक्षुरिव पापेन चक्षुषा निरीक्षते तस्य चापि निरये पापदृष्टेरक्षिणी वज्रतुंडा गृध्राः कंककाकवटादयः प्रसह्योरुबलादुत्पाटयंति॥ २७॥ यस्त्विह वा आढ्याभिमतिरहंकृतिस्तिर्यक्प्रेक्षणः सर्वतोभिविशंकी अर्थव्ययनाशचिंतया परिशुष्यमाणहृदयवदनो निर्वृतिमनवगतो ग्रह इवार्थमभिरक्षति स चापि प्रेत्य तदुत्पादनोत्कर्षणसंरक्षणशमलग्रहः सूचीमुखे नरके निपतति यत्र ह वित्तग्रहं पापपुरुषं धर्मपुरुषा वायकाइव सर्वतोंगेषु सूत्रैः परिवयंति॥ २८॥

हमेतिमानी तिर्यक्प्रेक्षणं यस्य। सर्वतः गुर्वादेरपि धनं चोरयिष्यतीति विशंकमानः परिशुष्यमाणं हृदयं वदनं च यस्य। अनवगतः अप्राप्तः तस्यार्थस्योत्पादनादिभिः शमलं ग्र

द्धिर्न तथा परिचर्यया सर्वस्य क्रोधावकर्तु ॥२८॥

भा० पं०
९९

एवंविधा नरकयातना।।इतस्त्रस्वर्गादौ। इह मर्त्यलोके पुनर्भवे पुनर्जन्मनिमित्ते उभयोर्धर्माधर्मयोः शेषाभ्यां आदावेव द्वि
तीयस्कंधे वैश्वानरं याति त्यादिना। उपगेयं उपनिषदा। श्रद्धाभक्तिभ्यां विशुद्धा बुद्धिर्यस्य।।[illegible]।। यथा वच्छ्रुत्वा। कथं भूतासं

एवंविधा नरका यमालये संति शतशः सहस्रशस्तेषु सर्वेषु च सर्व एवाधर्मवर्तिनो ये केचिदिहोदिता अनुदि
ताश्चा ऽवनिपते पर्यायेण विशंति तथैव धर्मानुवर्तिनः इतरत्र। इह तु पुनर्भवे त उभयशेषाभ्यां निविशंति। नि
वृत्तिलक्षणमार्ग आदावेव व्याख्यातः। एतावानेवांडकोशो यश्चतुर्दशधा पुराणेषु विकल्पित उपगीयते। य
त्तद्भगवतो नारायणस्य साक्षान्महापुरुषस्य स्थविष्ठं रूपमात्ममायागुणमयमनुवर्णितमादृतः पठति शृणो
ति श्रावयति स उपगेयं भगवतः परमात्मनोऽग्राह्यमपि। श्रद्धाभक्तिविशुद्धबुद्धिर्वेद।।[illegible]।।।श्रुत्वा स्थूलं त
था सूक्ष्मं रूपं भगवतो यतिः।। स्थूले निर्जितमात्मानं शनैः सूक्ष्मे निधारयेदिति। द्वीपवर्षसरिदद्रिनभःसमु
द्रपातालदिङ्नरकभागण लोकसंस्था।। गीता मया तव नृपाद्भुतमीश्वरस्य स्थूलं वपुः सकलजीवनिकायधाम।।२५
।। ।।इतिश्री भागवते महापुराणे पारमहंस्यां संहितायां पंचमस्कंधे नरकानुवर्णनो नाम षड्विंशतिमोध्यायः।। राम ९९

स्थासकलानां जीवनिकायानां धाम आश्रयभूतं वपुः।। इति पंचमे षड्विंशः।। ।।पंचमस्कंधसंबंधिपदभावार्थ
दीपनैः।।प्रीयतां परमानंदनृहरिर्बलिभावितैः।। ।।इतिश्रीश्रीधरस्वामिविरचितायां पंचमस्कंधटीकायां ष
।। ड्विंशतिमोध्यायः।। ।।समाप्तोयं पंचमस्कंधः।। ।।

श्रीगणेशाय नमः॥ ॥पुण्यारण्ये न्टसिंहैकनामसिंहो विराजते॥ यन्नामतः पलायंते महाकल्मषकुंजराः१
विसर्गसंभवान् जीवान्स्वमर्यादासुसंस्थितान्। विष्णुः पात्यखिलैरूपैरित्येवं पंचमे स्थितं॥२॥ अध्याये कोनविं
शत्याषष्ठे पोषणमुच्यते। अनिलंघितमर्यादमक्लेशं लक्षणं॥३॥ अजामिलो मनुष्येषु महापापो यथावितः॥ वि
श्वरूपादिघातीच तथा देवेषु वासवः॥४॥ अजामिलस्य नक्रत्वं विष्णुदूतैर्निरूपितं। संकेतभगवन्नामपुत्रस्नेहानुष
गजं॥ इंद्रोपि भगवद्भक्तः सख्ये तोयेंद्रसेवकः॥ तदधीनसुरैश्वर्यशत्रुनिर्जयजीवितः॥६॥ तत्रादौ त्रिभिरध्यायैरजामि
लकथोच्यते। विश्वरूपकथाषड्भिरिंद्रदोषो क्रियेततः॥ ७॥ इंद्रस्यैव तु दोषोक्तेरत्राख्यानं ततोष्टभिः। द्वाभ्यां च मरुदाख्या

श्रीराजोवाच॥ ॥निवृत्तिमार्गः कथित आदौ भगवता यथा। क्रमयोगोपलब्धेन ब्रह्मणा यद
१ संसृतिः॥ १॥ प्रवृत्तिलक्षणश्चैव त्रैगुण्यविषयो मुने। योसावलीनप्रकृतेर्गुणसर्गः पुनः पुनः॥२॥

नमेप्रकरणक्रमः॥८॥ तत्रादौ प्रथमे विष्णोर्दूतैः पापकिमोचने। तत्पापख्यापनायोक्तं याम्यैर्धर्मादिलक्षणं॥९ १
अथ षष्ठस्कंधो व्याख्यायते॥ ॥पूर्वोक्तानुवादपूर्वकं निरंतरोक्तनरकपरिहारोपायं पृच्छति निवृत्तिमार्ग इति षड्भिः
आदौ द्वितीयस्कंधे। वैश्वानरं याति त्यादिना। भगवता त्वया। यथावत्। यत्र येन मार्गेण क्रमेण योगो चिरादिप्राप्तिस्त
नोपलब्धो ब्रह्मा तेन सह संसृतिमोक्षो भवति। ब्रह्मणा सह ते सर्वे संप्राप्ते प्रतिसंचरे। परस्यांते कृतात्मानः प्रवि
शंति परं पदमित्यिवचनात्। १। त्रैगुण्यं स्वर्गादिसुखं। तदेव विषयः प्राप्यं यस्य न लीना प्रकृतिर्यस्य तस्य पुनः पुनः
गुणसर्गः भोगार्थदेहारंभरूपो यः मार्गः स च कथितः। तृतीये। दक्षिणेन यथा। अर्यम्णः पितृलोकं व्रजंतीत्या
दिना॥२॥

अनुवर्णिताः निरंतराध्यायो व्याख्यातश्च तुर्थस्यादौ। यतः यस्मिन्। ३। ४॥ द्वीपादीन्भागवतो लक्षणतो मानतश्च धरामंडलस्य संस्था
नं ज्योतिषां विवराणां चइदं संस्थानं विभुर्यथा। असृजत्तथा व्याख्यातमित्यर्थः। ५॥ नानाउग्रयातनायेषु तान्नरकान् यथा येनोपा
येन न ईयात् न गच्छेत्। तन्मे ऽधुना व्याख्यातुमर्हसि। ६॥ तत्र तावन्मन्वादिकृतं प्रायश्चित्तं विना नरका दुर्निवारा इत्याह न चेदिति द्वाभ्यां
मनउक्तिपाणिभिः मनोवाक्कायैः कृतस्यांहसः स्तेरैव इहैवापचितिं प्रायश्चित्तं न कुर्याच्चेत्तर्हि पुरुषः प्रेत्य मृत्वा नरकान् ध्रुवमुपैति

अधर्मलक्षणा नानानरकाश्चानुवर्णिताः॥ मन्वंतरश्च व्याख्यात आद्यः स्वायंभुवो यतः॥३॥ प्रियव्रतोत्तानप
दोर्वंशस्तच्चरितानि च॥ द्वीपवर्षसमुद्राद्रीनद्युद्यानवनस्पतीन्॥४॥ धरामंडलसंस्थानं भागलक्षणमानतः
ज्योतिषां विवराणां च यथेदमसृजद्विभुः॥५॥ अधुनेह महाभाग यथैव नरकान्नरः। नानोग्रयातनान्नेयात्त
न्मे व्याख्यातुमर्हसि॥६॥ ॥श्रीशुक उवाच॥ ॥न चेदिहैवापचितिं यथांहसः कृतस्य कुर्यान्मनउक्तिपाणि
भिः॥ ध्रुवं स वै प्रेत्य नरकानुपैति ये कीर्तिता मे भगवंस्तिग्मयानाः॥७॥ तस्मात्पुरैवाश्विह पापनिष्कृतौ यतेत
मृत्योरविपद्यतात्मना। दोषस्य दृष्ट्वा गुरुलाघवं यथा भिषक् चिकित्सेत रुजां निदानवित्॥८॥

मे मया ये भवतः कीर्तिताः तिग्मा दारुणा यातना येषु तान्। ७। यस्मादेवं तस्मात्पापस्य निष्कृतौ प्रायश्चित्ते यतेत। कदा मृत्योः पुरैव तत्रापि अ
विपद्यता अम्रियमाणेनात्मना देहेन। यद्वा अविपत् विपत्तिरहितो यावत्। यतात्मना संयतेन मनसा। तत्रापि आशु अन्यथा
अतीव चिरकाले तु द्विगुणं व्रतमर्हतीति दिद्गुण्यापत्तेः। तत्र च पापस्य महत्त्वमल्पत्वं चावेक्ष्य तदनुरूपे प्रायश्चित्ते यतेत। रुजां
रोगाणां निदानविद्यथा वैद्यस्तदनुरूपं चिकित्सेत तद्वत्॥८॥

भा०ष०

तत्र चोदयति द्वाभ्यां। दृष्टं राजदंडादिश्रुतं नरकपातादि। ताभ्यां आत्मनः पापमहितं जानन्नपि भूयः प्रायश्चित्तानंतरं करोति। अथो अतः कारणात्तद्वाद्दशाब्दादि कथं प्रायश्चित्तं तेन समूलस्यापि दोषस्यानिवृत्तेः। निवृत्तौ वा पापप्ररोहायोगादिति भावः॥९॥ किंच। क्वचित्कदाचित् अभद्रात्पापान्निवर्त्तते। क्वचित्तदेव पुनराचरति। यथा कुंजरः स्नातोपि रजोभिरात्मानं मलिनीकरोति। तथा पापस्य पुनर्दुर्निवारत्वेन नरकपातस्यावश्यंभावित्वात् प्रायश्चित्तं व्यर्थमिति॥१०॥ परिहरति। कर्मणा कृच्छ्रादिप्रायश्चित्तेन कर्मणः

राजोवाच॥ ॥दृष्टश्रुताभ्यां यत्पापं जानन्नप्यात्मनो हितं॥ करोति भूयो विवशः प्रायश्चित्तमथो कथं॥९॥
क्वचिन्निवर्त्ततेऽभद्रात्क्वचिच्चरति तत्पुनः॥ प्रायश्चित्तमथो पार्थं मन्ये कुंजरशौचवत्॥१०॥ ॥श्रीशुक उवाच॥ ॥कर्मणा कर्मनिर्हारो न ह्यात्यंतिक इष्यते। अविद्वदधिकारित्वात्प्रायश्चित्तं विमर्शनं॥११॥ नाश्नतः पथ्यमेवान्नं व्याधयोभिभवंति हि॥ एवं नियमकृद्राजन्शनैः क्षेमाय कल्पते॥१२॥

२ ... २

पापस्य निर्हारो नाशः आत्यंतिकः समूलो न हीष्यते। अविद्वानधिकारी यस्मिन् तस्य भावस्तत्त्वं तस्मात्। अतोऽविद्याया नाशाभावान्नष्टेपि तस्मिन् पापे तत्संस्कारेण पापांतरस्य पुनः पुनः प्ररोहो भवत्येव। किं तर्हि मुख्यं प्रायश्चित्तं तदाह। प्रायश्चित्तं तु विमर्शनं ज्ञानं॥११॥ तत्तु नित्यमप्रमत्तः शनैर्लभते नान्यमिति सदृष्टांतमाह नेति। पथ्यमेवान्नमश्नतः पुरुषान् यथा व्याधयो न बाधंते तथा नियमादिकर्त्ता क्षेमाय तत्त्वज्ञानाय समर्थो भवति॥१२॥

तदेव विशदयति द्वाभ्यां। तपसा ऐकाग्र्येण। मनसश्चेंद्रियाणां च ऐकाग्र्यं परमं तप इति स्मृतेः। ब्रह्मचर्येणाष्टांगेन। तदुक्तं। स्मरणं कीर्त्तनं केलिः प्रेक्षणं गुह्यभाषणं। संकल्पोध्यवसायश्च क्रियानिर्वृत्तिरेव च। एतन्मैथुनमष्टांगं प्रवदंति मनीषिणः
वा बिपरीतं ब्रह्मचर्यमेतदेष्टलक्षणमिति। शमो मनसो नियमनं। दमो बाह्येंद्रियाणां। त्यागो दानं। यमोऽहिंसादि। नियमो जपादिः॥१३॥१४॥ अस्यातिदुष्करत्वात् मुख्यमेवान्यत्प्रायश्चित्तमेवाह। केचिदित्यनेनैवंभूता भक्तिश्च प्रायश्चित्तं नाविरलाइति दर्शयति। केवलया तपआदिनिरपेक्षया वासुदेवपरायणा इति। नाधिकारिविशेषणमेतत्। किं त्वन्येषामश्रद्धया तत्र प्रवृ

तपसा ब्रह्मचर्येण शमेन च दमेन च। त्यागेन सत्यशौचाभ्यां यमेन नियमेन च॥१३॥ देहवाग्बुद्धिजं धीरा धर्मज्ञाः श्रद्धयान्विताः॥ क्षिपंत्यघं महदपि वेणुगुल्ममिवानलः॥१४॥ केचित्केवलया भक्त्या वासुदेवपरायणाः॥ अघं धुन्वंति कार्त्स्न्येन नीहारमिव भास्करः॥१५॥ न तथा ह्यघवान्राजन्पूयेत तपआदिभिः॥ यथा कृष्णार्पितप्राणस्तत्पूरुषनिषेवया॥१६॥ सध्रीचीनो ह्ययं लोके पंथाः क्षेमोकुतोभयः॥ सुशीलाः साधवो यत्र नारायणपरायणाः॥१७॥ प्राय

त्तेरर्थात् तेष्वेव पर्यवसानादनुवादमात्रं॥१५॥ एतच्च ज्ञानमार्गादपि श्रेष्ठमित्याह। न तथा पूयेत। शुध्येत। तत्पुरुषनिषेवया कृष्णेऽर्पिताः प्राणा येन॥१६॥ तत्रापि हेतुः सध्रीचीनः समीचीनः अयं पंथा भक्तिमार्गः। यतः क्षेमः। क्षेमत्वे हेतुः। न कुतश्चिद्विघ्नादेर्भयं यस्मिन्। तदेवाह। सुशीलाः कृपालवः। साधवो निःकामाः यत्र धर्मनिष्ठाः। अतो न ज्ञानमार्ग इवासहायतानिमित्तं भयं। नापि कर्ममार्गवन्मत्सरादियुक्तेभ्यो भयमिति भावः। भक्तेरन्यनिरपेक्षत्वमुक्तं॥१७॥

कृच्छ्रादीनितुभक्तिंविनानशोधयंतीत्याह।प्रायश्चित्तानीति महतामप्यशोधकत्वेदृष्टांतमाह।सुराकुंभमापगाइवेति॥१८॥न किः स्वल्पापिपुनात्येवेत्याह।सकृदिति।तस्यगुणेषुरागमात्रमस्तिनवृज्ञानंयस्यतन्मनः।तावतैवचीर्णनिष्कृतंप्रायश्चित्तंयैः १९॥इममर्थमितिहासेनोपपादयति।अत्रचेति।मेमत्तः।२०॥कान्यकुब्जेपुरेदास्याः पतिः नाम्नाअजामिलः।२१॥बंदीग्रहेण अक्षैश्छद्यूतेन।कैतवैर्वंचनादिभिश्च।हतिंजीविकां।बिभ्रत् पुष्णन्।यातयामास।पीडयामास॥२२॥आयुषः संबंधीमहान्का

प्रायश्चित्तानिचीर्णानिनारायणपराङ्मुखं।ननिःपुनंतिराजेंद्रसुराकुंभमिवापगाः॥१८॥सकृन्मनः कृष्णप दारविंदयोर्निवेशितंतद्गुणरागियैरिह।नतेयमंपाशभृतश्चतद्भटान्स्वप्नेपिपश्यंतिहिचीर्णनिष्कृताः॥१९॥

अत्रचोदाहरंतीममितिहासंपुरातनं।दूतानांविष्णुयमयोःसंवाद[illegible]स्तंनिबोधमे॥२०॥कान्यकुब्जेद्विजः

कश्चिद्दासीपतिरजामिलः।नाम्नानष्टसमाचारोदास्याःसंसर्गदूषितः।२१॥बंदयक्षैकैतवैश्चौर्यैर्गर्हितांवृ

३ त्तिमास्थितः।बिभ्रत्कुटुंबमशुचिर्यातयामासदेहिनः॥२२॥एवंनिवसतस्तस्यलालयानस्यतत्सुतान्॥ ३

२ कालोत्यगान्महान्राजन्अष्टाशीतिःसमाःपुनः।२३॥तस्यप्रवयसःपुत्रादशतेषांतुयोऽवमः।बालोनाराय

णोनाम्नापित्रोश्चदयितोभृशं॥२४॥भुंजानःप्रपिबन्खादन्बालकंस्नेहयंत्रितः।भोजयन्पाययन्मूढो

नवेदागतमंतकं॥२५॥

लोत्यगात्। सक्रियानित्यपेक्षायामाह।अष्टाशीत्यासंख्ययायुक्ताःसमाःसंवत्सराः॥२३॥प्रवयसःवृद्धस्य। २४।बद्धंहृदयंयेनजरठेवृद्धः॥२५॥२६॥

क

एतच्चतदुपलालनादिश्रीनारायणनामोपचारमाह।तत्येनतद्भक्तिरेवाभूदितिसिद्धांतोयोगित्वेनापिद्रष्टव्यं॥ २७॥वक्राणितुंडा निमुखानियेषां।ऊर्ध्वानिरोमाणियेषांतान्।२८।प्लावितेनप्लुतत्वंनीतेन।२९॥हरिकीर्तनंनिशम्यापतन्।यतस्तद्भर्तुर्नाम।३०।३१। पुरःसराःभृत्याः।३२।अस्यनयनंनिषेधथ।३३।वयंयुष्मान्नजानीमइतिनकोपःकार्यः।यतोलौकिकाद्भुतरूपायूयमित्याहुः।

सबद्धहृदयस्तस्मिन्अर्भकेकलभाषिणि॥निरीक्षमाणस्तल्लीलांमुमुदेजरठोभृशं॥२६॥सएवंवर्तमानोऽज्ञोमृत्यु

कालउपस्थिते।मतिंचकारतनयेबालेनारायणाह्वये॥२७॥सपाशहस्तांस्त्रीन्दृष्ट्वापुरुषान्भृशदारुणान्।वक्र

तुंडानूर्ध्वरोम्णआत्मानंनेतुमागतान्॥२८॥दूरेक्रीडनकासक्तंपुत्रंनारायणाह्वयं।प्लावितेनस्वरेणोच्चैराजुहावा

कुलेंद्रियः॥२९॥निशम्यम्रियमाणस्यब्रुवतोहरिकीर्तनं।भर्तुर्नाममहाराजपार्षदाःसहसापतन्॥३०॥विकर्षतों

तर्हृदयाद्दासीपतिमजामिलं।यमप्रेष्यान्विष्णुदूतावारयामासुरोजसा॥३१॥ऊचुर्निषेधितास्तांस्तेवैवस्वतपुरः

सराः॥केयूयंप्रतिषेद्धारोधर्मराजस्यशासनं॥३२॥कस्यवाकुतआयाताःकस्मादस्यनिषेधथ॥किंदेवाउपदेवावा

यूयंकिंसिद्धसत्तमाः॥३३॥सर्वेपद्मपलाशाक्षाःपीतकौशेयवाससः॥किरीटिनःकुंडलिनोलसत्पुष्करमालि

२ नः॥३४॥सर्वेचनूत्नवयसःसर्वेचारुचतुर्भुजाः॥धनुर्निषंगासिगदाशंखचक्रांबुजश्रियः॥३५॥दिशोवितिमिरा

लोकाःकुर्वंतःस्वेनरोचिषा॥किमर्थंधर्मपालस्यकिंकरान्नोनिषेधथ॥३६॥

सर्वइतिसार्द्धाभ्यां।लसंत्यःपुष्करमालाःसंतियेषां॥३४॥निषंगइषुधिःधनुर्निषंगादिभिःश्रीःशोभायेषांते।॥३५॥विग तंतिमिरंआलोकश्चान्यस्यप्रकाशोयास्तथाभूतादिशःकुर्वंतः।भवतामेतदनुचितमित्याहुः।किमर्थमिति।३६॥

भा० ष०

अहोदंड्यादंड्यादिज्ञा नश्रून्याएते वैराए वास्मद्विया धर्मराजस्य किंकराइत्यनूतं वदंतीति विस्मयेन प्रहस्य तान्प्रत्यूचुर्मेघस्येव निर्ह्रादो ध्वनिर्यस्याः तया॥ ३७॥ तत्त्वं स्वरूपं लक्षणं प्रमाणं॥ ३८॥ कथंस्वित् केन प्रकारेण। स्थानं विषयः। कारिणः कर्मिणः नृणामिति। नराएव न पश्वादयः। ते अपि कतिचिदेवेत्यर्थः॥ ३९॥ वेदेन प्रणिहितो विहितो धर्मः वेदप्रमाणक इत्यर्थः। अनेन योवेदप्रमाणकः सधर्मः सवेदप्रमाणक इति स्वरूपं प्रमाणं चोक्तं। यथाह जैमिनिः चोदनालक्षणोर्थो धर्म इति। व्याख्यातं च भट्टैः। इयमेकेन सूत्रेण श्रुत्यर्थाभ्यां निरूप्यत इति। अथ एतस्याप्यधर्मस्य स्वरूपं लक्षणं च दंडस्थान कथनायाहुः। तद्विपर्ययः योवेदनिषिद्धः

श्रीशुक उवाच॥ ॥इत्युक्तौ यमदूतैस्तैर्वासुदेवोक्तकारिणः॥ ब्रूत धर्मस्य नस्तत्त्वं यच्चाधर्मस्य लक्षणं॥ ३८॥ कथं

×तान्प्रत्यूचुः प्रहस्येदं मेघनिर्ह्रादया गिरा॥ ३७॥ ॥विष्णुदूता ऊचुः॥ यूयं वै धर्मराजस्य यदि निर्देशकारिणः

स्वित्ध्रियते दंडः किं वास्य स्थानमीप्सितं॥ दंड्याः किं कारिणः सर्वे आहोस्वित्कतिचिन्नृणां॥ ३९॥ ॥यमदूता ऊचुः

वेदप्रणिहितो धर्मो ह्यधर्मस्तद्विपर्ययः॥ वेदो नारायणः साक्षात्स्वयंभूरिति शुश्रुम॥ ४०॥ येन स्वधाम्न्य

४ मी भावा रजःसत्त्वतमोमयाः॥ गुणनामक्रियारूपैर्विभाव्यंते यथातथं॥ ४१॥ ४

सोऽधर्मः निषेधश्च तस्मिन्प्रमाणमित्यर्थः। वेदस्य प्रामाण्ये हेतुः वेदो नारायणादुद्भूतः स एव साक्षादित्युपचारः। स्वयंभूरिति च निश्वासमात्रेण स्वयमेव भवतीति। तथा च श्रुतिः अस्य महतो भूतस्य निश्वसितमेतदृग्वेद इति॥ ४०॥ कोसौ नारायणस्तत्राहुः। येन स्वधाम्नि स्वस्वरूपे अमी भावाः प्राणिनः गुणाः शांतत्वादयः। नामानि ब्राह्मण इत्यादीनि क्रियाश्चाध्ययनाद्याः। रूपाणि वर्णाश्रमादयः तैर्विभाव्यंते। यथातथं यथावत्। स नारायणः॥ ४१॥ ॥श्रीवासुदेवाय नमः॥ ॥

३ र्निमित्तभूतैः ३

तथाप्यधर्मो नैन कृत इति कुतो ज्ञायते तत्राहुः। सूर्य इति अहश्च रात्रिश्च अहनी। कं उदकं। कुः पृथिवी। देह्यस्य जीवस्य यथाहुः। आदि। सचंद्रावनिलो नलश्च द्यौर्भूमिरापो हृदयं यमश्च॥ अहश्च रात्रिश्च उभे च संध्ये धर्मो विजानाति नरस्य वृत्त

स्थानमाहुः मिति॥ ४२॥ एतैः धर्मो विज्ञातः। दंड्यानाहुः। सर्व इति विपरीतानि अभद्राण्यपि कर्मिणां संभवंति यतस्तेषां गुणसंयोगोस्ति यदि कश्चिदकर्ता स्यात् तर्हि तस्याभद्राणि न स्युः। न त्वेतदस्तीत्याहुः। न हि देहवानकर्मकृदस्तीति। अतः सर्वे कर्मिणः कर्मिणां

सूर्योग्निः खं मरुद्देवः सोमः संध्याहनी दिशः॥ कं कुः कालो धर्म इति ह्येते दैह्यस्य साक्षिणः॥ ४२॥ एतैरधर्मो

रि विज्ञातः स्थानं दंडस्य युज्यते॥ सर्वे कर्मानुरोधेन दंडमर्हंति कारिणः॥ ४३॥ संभवंति हि भद्राणि विपरीतानि

चानघाः॥ कारिणां गुणसंगोस्ति देहवान्न ह्यकर्मकृत्॥ ४४॥ येन यावान्यथाधर्मो धर्मो वेह समीहितः॥ स

एव तत्फलं भुंक्ते तथा तावदमुत्र वै॥ ४५॥ यथेह देवप्रवरास्त्रैविध्यमुपलभ्यते॥ भूतेषु गुणवैचित्र्यात्तथान्य

त्रानुमीयते॥ ४६॥ वर्तमानोऽन्ययोः कालो गुणाभिज्ञापको यथा॥ एवं जन्मान्ययोरेतद्धर्माधर्मनिदर्शनं॥

४७॥

चपापाचरणयं भाविलात् तत्सर्वे दंडमर्हंतीत्यर्थः॥ ४४॥ कथं स्वित् ध्रियते दंड इत्यस्योत्तरं येनेति। धर्मो वेति दृष्टांतः। अत्र धर्मानुसारेण दंडो धर्मानुसारेण सुखवदित्यर्थः॥ ४५॥ न केवलं सूर्यादय एव ज्ञापकाः किं त्वर्थापत्तिरपीत्याहुः। यथेति। हे देवप्रवराः इह जन्मनि शांत घोर मूढत्वेन वा सुखी दुःखी मिश्रत्वेन वा। धार्मिकत्वादिना वा। त्रैविध्यं भूतेषु यथोपलभ्यते। तथान्यत्र जन्मांतरेनुमीयते त्रैविध्यान्यथानुपपत्त्या कल्प्यते॥ ४६॥ वर्तमानजन्मना पूर्वापरजन्मधर्माधर्मज्ञानं भवतीति सदृष्टांतमाहुः। वर्तमानो वसंतादिकालः अन्ययोर्भूतभविष्ययोर्वसंतयोर्ये गुणाः पुष्पफलादयस्तेषां सोभिज्ञा

पको यथा एवमेतज्जन्म अन्ययोर्भूतभाविजन्मनोर्धर्माधर्मौ निदर्शयति तथा॥ ४७॥

भा०ष० अयं च धर्माधर्मज्ञानप्रकारोऽन्येषां धर्मराजस्तु मनसैव सर्वं पश्यतीत्याह। पुरे संयमिन्यां स्थित एव देवो यमः। देही स्थितोऽन्तर्या
मी वा। जीवस्य पूर्वरूपं धर्माधर्मादियुक्तं विशेषेण पश्यति। अनु अनन्तरं अपूर्वरूपं मीमांसते यद्यस्यानुरूपं तद्विचारयति यतोऽसौ
भगवानजः॥४८॥ जीवस्त्वीश्वरेणोपस्थापितं वर्तमानं देहं पश्यति। ननु पूर्वमपरं चेत्याह। यथेति। अज्ञः अविद्योपाधिर्जीवस्तु
व्यक्तमेव प्राचीनकर्माभिव्यक्तं वर्तमानमेव देहाद्युपास्ते अहमिति मन्यते। पूर्वमपरं वा न वेद। अत्र हेतुः नष्टा जन्मना स्मृतिर्यस्य। अ
त्र दृष्टान्तः। तमसा निद्रया युक्तो यथा स्वप्ने अभिव्यक्तमेव देहाद्युपास्ते न तु जाग्रद्देहादि। पूर्वं स्वप्नादिगतं वा न वेदित्यर्थः॥४९॥ एवंभूत

मनसैव पुरे देवः पूर्वरूपं विपश्यति। अनुमीमांसते पूर्वं मनसा भगवानजः॥४८॥ यथाज्ञस्तमसा युक्त उपास्ते व्यक्तमे
व हि। न वेद पूर्वमपरं नष्टजन्मस्मृतिस्तथा॥४९॥ पञ्चभिः कुरुते स्वार्थान् पञ्च वेदाथ पञ्चभिः। एकस्तु षोडशेन त्रीन् स्वयं
सप्तदशोऽश्नुते॥५०॥ तदेतत्षोडशकलं लिङ्गं शक्तित्रयं महत्। धत्तेऽनुसंसृतिं पुंसि हर्षशोकभयार्तिदाम्॥५१॥ देह्यज्ञो
५ ऽजितषड्वर्गो नेच्छन्कर्माणि कार्यते। कोशकार इवात्मानं कर्मणाच्छाद्य मुह्यति॥५२॥ न हि कश्चित्क्षणमपि जातु ति
ष्ठत्यकर्मकृत्। कार्यते ह्यवशः कर्म गुणैः स्वाभाविकैर्बलात्॥५३॥

स्वजीवस्य संसारं प्रपञ्चयति पञ्चभिः श्लोकैः। पञ्चभिः कर्मेन्द्रियैः स्वार्थान् उपादानादीन् पञ्च शब्दादीन् वेद पञ्चभिर्ज्ञानेन्द्रियैः ५
षोडशेन मनसा सह सप्तदशः षोडशोपाध्यन्तर्गतोऽपि स्वयं त्वेक एव सर्वेन्द्रियविषयप्रतिसंधानात् त्रीन् ज्ञानकर्मेन्द्रिय
मनोविषयान् प्राप्नोति॥५०॥ तदेतल्लिङ्गशरीरं शक्तित्रयं गुणत्रयकार्यं महदनादि पुंसि जीवे अन्वनुसंसृतिं धत्ते॥५१॥
नेच्छन् अनिच्छन्नपि अनेनैव कर्माणि कार्यते। कोशकारः कीटविशेषः मुह्यति निर्गमोपायं न जानाति॥५२॥ कार्यते
इत्यत्रानुभवं प्रमाणयति न हीति। गुणैर्गुणकार्यै रागादिभिः स्वाभाविकैः पूर्वकर्मसंस्कारोद्भूतैः॥५३॥ ॥राम॥ ॥

कर्मवशो न च तदनुरूपो देहो भवतीत्याह। लब्ध्वेति। अव्यक्तं अदृष्टं निमित्तं लब्ध्वा व्यक्ताव्यक्तं तदनुरूपं स्थूलं सूक्ष्मं च
शरीरं भवति यथायोनि मातृसदृशं। स्वभावो वासना। शुक्रशोणितयोरेकत्वेऽपि कर्मवासनया मातृपितृसदृशो देहो भ
वतीत्यर्थः॥५४॥ संसारचक्रमुपसंहरंतो मुक्तिप्रकारमाह। एष इति। ईशसंगात् परमेश्वरभजनात्॥५५॥ तदेवं सामान्य
तो धर्मादिनिर्णयमुक्त्वा प्रस्तुतस्याजामिलस्याधर्मं प्रपंचयंस्तद्दुष्टत्वमाह। अयं हीति यावदध्यायसमाप्ति। तत्र द्वाभ्यां तत्

लब्ध्वा निमित्तमव्यक्तं व्यक्ताव्यक्तं भवत्युत। यथायोनि यथाबीजं स्वभावेन बलीयसा॥५४॥ एष प्रकृतिसंगेन
पुरुषस्य विपर्ययः। आसीत्स एव न चिरात् ईशसंगाद्विलीयते॥५५॥ अयं हि श्रुतसंपन्नः शीलवृत्तगुणालयः।
धृतव्रतो मृदुर्दान्तः सत्यवाङ्मन्त्रविच्छुचिः॥५६॥ गुर्वग्न्यतिथिवृद्धानां शुश्रूषुर्निरहंकृतः। सर्वभूतसुहृत्साधु
र्मितवागनसूयकः॥५७॥ एकदासौ वनं यातः पितृसंदेशकृद्द्विजः। आदाय तत आवृत्तः फलपुष्पसमित्कु
शान्॥५८॥ ददर्श कामिनं कंचित् शूद्रं सह भुजिष्यया। पीत्वा च मधु मैरेयं मदाघूर्णितनेत्रया॥५९॥ म
त्तया विश्लथन्नीव्या व्यपेतं निरपत्रपं। क्रीडन्तमनुगायन्तं हसन्तमनयान्तिके॥६०॥ दृष्ट्वा तां कामलिप्तेन बाहु
ना परिरंजितां। जगाम हृच्छयवशं सहसैव विमोहितः॥६१॥

वृत्तान्तानुवादोऽन्यायातिरेकप्रदर्शनार्थः। शीलं सुस्वभावः। वृत्तं सदाचारः। गुणाः क्षमादयः। येषामालयः॥५६॥ नि
रहंकृतो निरहंकारः॥५७॥ आवृत्तो वनात्परावृत्तः॥५८॥ भुजिष्यया भोगस्त्रिया दास्या मैरेयं मधुपैष्टीं सुरां पीत्वा मदे
नाघूर्णिते भ्रान्ते नेत्रे यस्याः॥५९॥ विशेषेण श्लथन्ती नीवी यस्याः तया सह व्यपेतं स्वाचारभ्रष्टं॥६०॥ कामोद्दीपकेन तदं
गरागेण हरिद्रादिना लिप्तेन॥६१॥

सत्वं धैर्यं। श्रुतं ज्ञानं। तद्बलेन स्तंभयन्नपि मदनेन कंपितं मनः समाधातुं न शशाको भूत्। ६२। तद्दर्शनमेव निमित्तं यस्य स्मरव्याजस्य ग्रहस्य तेन ग्रस्तः विचेतनो गतस्मृतिः। ६३। यावता समग्रेण। ६४। लंभितां परिणीतां। ६५। अथ रूपमाधुर्यस्यामलमेव तदीयमन्नादि मत्तीति मलात्। ६७। अकृतनिर्वेशं अकृतप्रायश्चित्तं। अस्यैव हितार्थं नेष्याम इत्याहुः। यत्रेति। ६८। ।। षष्ठे प्रथमः ।। ।। द्वितीये वैष्णवैर्याम्यान् नाममाहात्म्यमद्भुतं। श्रावयित्वा द्विजो विष्णोर्लोकं नीत इती

स्तंभयन्नात्मनात्मानं यावत्सत्वं यथाश्रुतं ।। न शशाक समाधातुं मनो मदनवेपितं ।। ६२ ।।
६ तन्निमित्तस्मरव्याजग्रहग्रस्तो विचेतनः ।। तामेव मनसा ध्यायन्स्वधर्माद्विरराम ह ।। ६३ ।।
तामेव तोषयामास पित्र्येणार्थेन यावता ।। ग्राम्यैर्मनोमयैः कामैः प्रसीदेत यथा तथा ।। ६४ ।। दे
विप्रां स्वभार्यामप्रौढां कुले महति लंभितां ।। विससर्जाचिरात्पापः स्वैरिण्यापांगविद्धधीः ।। ६५ ।। ६
यतस्ततश्चोपानिन्ये न्यायतोन्यायतो धनं ।। बभारास्याः कुटुंबिन्याः कुटुंबं मंदधीरयं ।। ६६ ।।
यदसौ शास्त्रमुल्लंघ्य स्वैरचार्यतिगर्हितः ।। अवर्त्तत चिरं कालमघायुरशुचिर्मलात् ।। ६७ ।।
तत एनं दंडपाणेः सकाशं कृतकिल्बिषं ।। नेष्यामोकृतनिर्वेशं यत्र दंडेन शुद्ध्यति ।। ६८ ।।
इति श्रीभागवते महापुराणे षष्ठस्कंधे प्रथमोध्यायः ।। ।। श्रीशुक उवाच ।। ।। एवं ते भगवद्दूता यमदूताभिभाषितं। उपधार्याथ तान् राजन् प्रत्याहुर्नयकोविदाः ।। १ ।।

र्यते ।। १ ।। नयकोविदाः न्यायनिपुणाः ।। १ ।।

धर्मदृशां सतामधर्मः स्पृशतीति तदाह। यत्र सभायां यैर्धर्मदृग्भिस्तेषां सभां [illegible] २। पितरः पितृवत्पालकाः शास्तारः अनुशिक्षकाः

विष्णुदूता ऊचुः ।। ।। अहो कष्टं धर्मदृशामधर्मः स्पृशते सभां ।। यत्रादंड्येष्वपापेषु दंडो यैर्ध्रियते वृथा ।। २ ।। प्रजानां पितरो ये च शास्तारः साधवः समाः ।। यदि स्यात्तेषु वैषम्यं कं यांति शरणं प्रजाः ।। ३ ।। यद्यदाचरति श्रेयान् इतरस्तत्तदीहते ।। स यत्प्रमाणं कुरुते लोकस्तदनुवर्त्तते ।। ४ ।। यस्यांके शिर आधाय लोकः स्वपिति निर्वृतः ।। स्वयं धर्ममधर्मं वा न हि वेद यथा पशुः ।। ५ ।। स कथं न्यर्पितात्मानं कृतमैत्रमचेतनं ।। विस्रंभणीयो भूतानां सघृणो द्रोग्धुमर्हति ।। ६ ।।

वैषम्यं दंड्यदंडनं ।। ३ ।। एतत्प्रवर्त्तितमधर्ममन्योपि करिष्यतीति महत्कष्टमभूदित्याहुः। यद्यदिति श्रेयान् श्रेष्ठः। ४ ।।
विश्वघातादपीत्याहुः यस्येति द्वाभ्यां। निर्वृतो निश्चिंतः ।। ५ ।। विश्वासेन नितरामर्पितः आत्मा येन तं विस्रंभणीयः
विश्वसनीयः सघृणश्चेत् ।। ६ ।।

नन्वस्य पापिनो दंडे किमर्थमाक्रोशः क्रियते तत्राहुः। अयं हीति। यद्यस्माद्विवशोपि हरेर्नाम व्याजहार उच्चारितवान्। न केवलं प्राय
श्चित्तमात्रं हरेर्नाम अपितु स्वस्त्ययनं मोक्षसाधनमपि। सकृदुच्चरितं येन हरिरित्यक्षरद्वयं। बद्धः परिकरस्तेन मोक्षाय गमनं प्रति। इति स्मृतेः ॥७
ननु कर्मसौकुण्यकरं हरेर्नामेति युक्तं। यस्य स्मृत्या च नामोक्त्या तपोयज्ञक्रियादिषु। न्यूनं संपूर्णतां याति सद्यो वंदे तमच्युतमित्यादिवचनात्।
स्वातंत्र्येण तु अघनिवर्तकं हरेर्नाम कथं स्यात्तत्राहुः। एतेनैवेति। अघोनः अघवतः मघवच्छब्दवद्रूपं। यत्र आ इति छेदः। आ उक्षत् आ नास मा चं
चतुरक्षरं यन्नाम जगाद। एतेनैव केवलेन चतुरक्षरमित्यनेनाधिक्यं च दर्शितं। कथं जगाद। नारायण आय आगच्छ इत्येवं विक्रोशन्नारूपे
ण पुत्राह्वानेनायं भावः। कर्मांगत्वेपि हरिनाम्नः खादिरत्वादिवत्संयोगपृथक्त्वेन सर्वप्रायश्चित्तार्थत्वं युक्तमेव तथाहि। अवशेनापि य

अयं हि कृतनिर्वेशो जन्मकोट्यंहसामपि। यद्व्याजहार विवशो नाम स्वस्त्ययनं हरेः॥७॥
एतेनैव ह्यघोनोस्य कृतं स्यादघनिष्कृतं॥ यदा नारायणायेति जगाद चतुरक्षरं॥८॥

७ न्नाम्नि कीर्तिते सर्वपातकैः। पुमान्विमुच्यते सद्यः सिंहत्रस्तैर्मृगैरिवेत्यादिभिः पुराणेषु तावत्सहस्रशो नाम्नः स्वातंत्र्य
मवगम्यते। न चैतेर्थवादा इति शंकनीयं विधिशेषत्वाभावात्। न च विध्यश्रवणादन्यशेषता कल्पनीया। यदाग्नेयोष्टाकपा ७
लो जवतीत्यादिवदज्ञार्थत्वेन विधिकल्पनोपपत्तेः। मंत्रेषु च मर्त्या अमर्तस्य ते भूरि नाम मनामहे। विप्रासो जातवेदसः। आ
स्य जानंतो नाम चिद्विवक्तन इत्यादिषु। नाम्नस्तपोदानादिसर्वधर्माधिक्यमवगम्यते। उपपादितं च मंत्रार्थवादानामपि स्वा
र्थे प्रामाण्यं देवताधिकरणे। तस्मा[illegible]त् श्रीनारायणनामाभासमात्रेणैव सर्वाघनिःकृतं स्यादिति ॥८॥

तामा ३

ननु कामकृतानां बहूनां महापातकानां सहस्रशआवर्तितानां द्वादशाब्दकोटिभिरनिवर्त्यानां कथमिदमेकमेव
प्रायश्चित्तं स्यात्। तत्राहुः स्तेन इति द्वाभ्यां ९ सुनिष्कृतं श्रेष्ठं प्रायश्चित्तमिदमेव। तत्र हेतुः। यतो नामव्याहरणात्
तद्विषया नामोच्चारकपुरुषविषया मदीयोयं मया सर्वतो रक्षणीय इति विष्णोर्मतिर्भवति १० श्रेष्ठत्वमेवोपपा
दयंति नेति द्वाभ्यां। ब्रह्मवादिभिर्मन्वादिभिरुक्तैर्व्रतादिभिर्निष्कृतैस्तथा न शुद्ध्यति। उदाहृतैरुच्चारितैर्यथा ना

स्तेनः सुरापो मित्रध्रुक् ब्रह्महा गुरुतल्पगः स्त्रीराजपितृगोहंता ये च पातकिनोपरे ९ सर्वेषामप्यघव
तामिदमेव सुनिष्कृतम् नामव्याहरणं विष्णोर्यतस्तद्विषया मतिः १० न निष्कृतैरुदितैर्ब्रह्मवादिभिस्तथा
विशुद्ध्यत्यघवान्व्रतादिभिः यथा हरेर्नामपदैरुदाहृतैस्तदुत्तमश्लोकगुणोपलंभकं ११ नैकांतिकं त
द्धि कृतेपि निष्कृते मनः पुनर्धावति चेदसत्पथे । तत्कर्मनिर्हारमभीप्सतां हरेर्गुणानुवादः खलु सत्वभा
वनः १२

मपदैरित्यनेन नमामीत्यादिक्रियायोगोपि नापेक्षित इति दर्शितं। किंच तन्नामपदोच्चारणं उत्तमश्लोकस्य गुणानां
चोपलंभकं ज्ञापकं भवति। न तु कृच्छ्रचांद्रायणादिवत्पापनिवृत्तिमात्रोपक्षीणमित्यर्थः ११ नैकांतिकं नात्यंतशो
धकं। तन्निष्कृते। यस्मिन्कृतेपि असत्पथे पापमार्गे मनो धावति चेत्। कर्मणां पापानां निर्हारं आत्यंतिकं ना
शमिच्छतां हरेर्गुणानुवाद एव प्रायश्चित्तं यतोसौ खलु सत्वभावनः चित्तशोधकः १२

भा० ष० अथ तस्मादेनं मा अपवर्गेण नयत कृतमशेषाणामघानां निष्कृतं येन । यद्यस्मात्स मयग्रहीत् संपूर्णमुच्चारितवा

न् । नामैकदेशो नालमिति भावः । म्रियमाण इत्यनेन पुनः पापान्तरासंभव उक्तः । ननु तत्कालत्वमेव विवक्षितं ।

तदानीं कृच्छ्रादिविधिवन्नामोच्चारणे विधेरसंभवात् । न च विधिं विना काकतालीयनामोच्चारणेन पापापहमि

ति प्रमाणमस्ति १३ नन्वयं पुत्रनामाग्रहीत् न तु भगवन्नाम । तत्राहुः । सांकेत्यं पुत्रादौ संकेति तं पारिहास्यं

परिहासेन कृतं । स्तोभं गीतालापपूरणार्थं कृतं हेलनं विष्णुर्नेति सावज्ञमपि च वैकुंठनामोच्चारणं १४ ननु

अथैनं मापनयत कृताशेषाघनिष्कृतं यदसौ भगवन्नाम म्रियमाणः समग्रहीत् १३ सांकेत्यं पारि

हास्यं वा स्तोभं हेलनमेव वा वैकुंठनामग्रहणमशेषाघहरं विदुः १४ पतितः स्खलितो भग्नः संदष्टस्त

प्त आहतः हरिरित्यवशेनाह पुमान्नार्हति यातनां १५ गुरूणां च लघूनां च गुरूणि च लघूनि च प्राय

श्चित्तानि पापानां ज्ञात्वोक्तानि महर्षिभिः १६

नायं संकल्पपूर्वकं वैकुंठनाम अग्रहीत् किंतु पुत्रस्नेहपरवशः सन् तत्राहुः । पतित इति । अवशेनापि यो हरिरि

त्याह स यातनां नार्हति । पुमानित्यनेन नात्र वर्णाश्रमादि नियम इत्युक्तं । अवशत्वमेवाह । पतितः प्रासादादि राम

भ्यः स्खलितो मार्गभ्रष्टः भग्नगात्रः संदष्टः सर्पादिभिः तप्तो ज्वरादिना । आहतो दंडादिना १५ ननु महतः पा

तकस्य महदेव प्रायश्चित्तं युक्तं न तु अल्पं । नामग्रहणमात्रं पापतारतम्येन कृच्छ्रादितारतम्यवत् । तत्राहुर्द्वाभ्यां ॥

गुरूणां पापानां गुरूणि प्रायश्चित्तानि लघूनां च लघूनि तारतम्यं ज्ञात्वा मन्वादिभिरुक्तानि अतस्तत्र तथैव व्यव

स्था हरिनामस्तु नैवं व्यवस्थोक्ता । मुच्यते सर्वपातकैरिति वचनात् । न च सुराबिंदुपाने महापातकवत्स्मरणवन्ना

मस्त्र प्रायश्चित्तत्वे स्मरणस्याप्यनतिभार इति भावः १६

विष्णोः स्मरणमात्रेण

किं च तैस्तपोदानादिभिस्तान्यघान्येव पूयंते न श्यंति । अधर्मोत्पन्नं मलिनं तु तस्य पापकर्तुर्हृदयं । नै । यद्वा तेषां मघा

नां हृदयं सूक्ष्मरूपं संस्काराख्यं न शुद्ध्यति । तदपीशांघ्रिसेवया कीर्तनादिना शुध्यतीत्यर्थः । अयं भावः । महान्त्यपि

पापानि सकृदुच्चारितेनैव नाम्ना नश्यंति । सकृत्प्रवर्तितेनैव दीपेन वगाढध्वांतानि । तदावृत्त्या तु पापांतरस्यानुत्पत्तिः

पापानि सकृदुच्चारितेनैव नाम्ना नश्यंति । ... एतदर्थमेव तत्र तत्रावृत्तिविधानं पापक्षयश्च भवति । स्म

दीपधारणमिव तमोंतरस्य । ततश्च वासनाक्षयात् हृदयशुद्धिः । एतदर्थमेव ... अतोऽस्य हरिनाम्ने

रतां न महर्निशमित्यादिषु तदेवाचार्ये पुर्नरुक्तं । गुणानुवादः खलु सत्वभावनः । तदपीशांघ्रिसेवयेति च । अतोऽस्य हरिनाम्ने

तैस्तान्यघानि पूयंते तपोदानजपादिभिः । नाधर्मजं तद्धृदयं तदपीशांघ्रिसेवया ॥ १७ ॥ अज्ञानादथवा ज्ञा

नादुत्तमश्लोकनाम यत् । संकीर्तितमघं पुंसो दहेदेधो यथानलः ॥ १८ ॥ यथागदं वीर्यतममुपयुक्तं यदृच्छया ॥

ना

अजानतोऽप्यात्मगुणं कुर्यान्मंत्रोऽप्युदाहृतः ॥ १९ ॥

वसर्वपापक्षयः । वासनाक्षयस्तु महापुरुषदर्शनादिभिरिति । १७ ॥ तथापि पापज्ञायश्चित्तमिदमिति चेत्तत्राहुः । यथे

ति । अगदमौषधं वीर्यवत्तममिति वक्तव्ये वीर्यतममित्युक्तं । यदृच्छया श्रद्धाहीनं उपयुक्तं भक्षितं । पर्यन्तमुखादज्ञानतो

पि स्वगुणमारोग्यं कुर्यात् । मंत्रोऽपि नामात्मकः । तथा स्वकार्यं कुर्यादेव । न हि वस्तुशक्तिः श्रद्धादिकमपेक्षत इ

त्यर्थः । तदुक्तं विष्णुधर्मेषु । हरिर्हरति पापानि दुष्टचित्तैरपि स्मृतः । अनिच्छयापि संस्पृष्टो दहत्येव हि पावक इति । १९

ज्ञात्वा नोच्चारितमिति । अज्ञानादिति बालकेनाज्ञानादपि प्रक्षिप्तोऽग्निर्यथा काष्ठराशिं दहति तद्वत् ॥ १८ ॥ ननु इदमपि पर्यटुपदि

ष्टं श्रद्धाहीनं च कथं प्रायश्चित्तं स्यात्तत्राहुः । यथेति । अगदमौषधं वीर्यवत्तममिति वक्तव्ये वीर्यतममित्युक्तं यदृच्छया श्रद्धाहीनं उपयुक्तं भक्षितं

पर्यन्तमुखादज्ञानतोऽपि स्वगुणमारोग्यं कुर्यात् । मंत्रोऽपि नामात्मकस्तथा स्वकार्यं कुर्यादेव । न हि वस्तुशक्तिः श्रद्धादिकमुपेक्षत इत्यर्थः । तदुक्तं विष्णुधर्मे

तं विप्रं अस्मन् मुंचन् । मोचयामासुः । २० । प्रत्यादिताः निराकृताः संतः यात्वा गत्वा यमराज्ञाय यथा वत् कथयामासुः । दर्शने नो त्सवो यस्य । २१ । २२ ॥ विवक्षुं वक्तुमिच्छंतं ज्ञात्वा । २३ । त्रैविध्यं वेदत्रय प्रतिपाद्यं । गुणाश्रयं यमदूतानां धर्मे कृष्णदूतानां च । भागवतं भगवल्लक्षणं तं शुद्धं निर्गुणं धर्मं आकर्ण्येति योज्यं । भक्तिमानासीदित्यत्र तस्यानुषंगः । २४ । २५ । अनुतापं प्र

श्रीशुक उवाच ॥ ॥ त एवं सुविनिर्णीय धर्मं भागवतं नृप । तं याम्यपाशान्निर्मुच्य विप्रं मृत्योरमूमुचन् ॥

५ २० ॥ इति प्रत्युदिता याम्या दूता यात्वा यमांतिके ॥ यमराज्ञे यथा सर्वमाचचक्षुररिंदम ॥ २१ ॥ द्विजः पाशा

द्विनिर्मुक्तो गतभीः प्रकृतिं गतः । ववंदे शिरसा विष्णोः किंकरान्दर्शनोत्सवः ॥ २२ ॥ तं विवक्षुमभिप्रेत्य

महापुरुषकिंकराः ॥ सहसा पश्यतस्तस्य तत्रांतर्दधिरेऽनघ ॥ २३ ॥ अजामिलोऽप्यथाकर्ण्य दूतानां यम

कृष्णयोः ॥ धर्मं भागवतं शुद्धं त्रैविध्यं च गुणाश्रयं ॥ २४ ॥ भक्तिमान् भगवत्याशु माहात्म्यश्रवणाद्धरेः ॥

अनुतापो महानासीत्स्मरतोऽशुभमात्मनः ॥ २५ ॥ अहो मे परमं कष्टमभूदविजितात्मनः ॥ येन वि

प्लावितं ब्रह्म वृषल्यां जायतात्मना ॥ २६ ॥ धिङ्मां विगर्हितं सद्भिर्दुष्कृतं कुलकज्जलं ॥ हित्वा बालां स ५

तीं योऽहं सुरापामसतीमगां ॥ २७ ॥ वृद्धावनाथौ पितरौ नान्यबंधू तपस्विनौ । अहो मयाधुनात्यक्तावकृ

तज्ञेन नीचवत् ॥ २८ ॥

ने

पं प्रयाति अहो इति चतुर्भिः । येन आत्मना मया वृषल्यां पुत्ररूपया जायमानेन ब्रह्म ब्राह्मणजातिः प्लावितं नाशितं

२६ । दुःकृतं दोषकर्तारं । कुलस्य कज्जलं कलंकं । नास्त्यन्यो बंधुः पुत्रादिर्ययोः तपस्विनौ संतप्तौ अधुना तत्

क्षणमेव । २८ ॥

७ ॥

धर्मघ्नाः धर्महंतारः कामिनः विंदंति यमयातनाः । २९ । इदानीं तस्य विमर्शपूर्वकं मोक्षक्रममाह । किमिदमित्यष्टभिः । साक्षात्प्र

त्यक्षमिह जाग्रत्येव दृष्टं । ३० । ये मां व्यमोचयन् ते क्व गताः । ३१ ॥ यद्यप्यहमस्मिन्जन्मनि दुर्भगः पापीयान् । अथापि जन्मांतरे

सोऽहं व्यक्तं पतिष्यामि नरके भृशदारुणे । धर्मघ्नाः कामिनो यत्र विंदंति यमयातनाः । २९ ॥ किमिदं स्वप्न आहोस्वि

त्साक्षाद्दृष्टमिहाद्भुतं । क्व याता अद्य ते ये मां व्यकर्षन् पाशपाणयः ॥ ३० ॥ अथ ते क्व गताः सिद्धाश्चत्वारश्चारुदर्शनाः

व्यमोचयन्नीयमानं बध्वा पाशैरधो भुवः ॥ ३१ ॥ अथापि मे दुर्भगस्य विबुधोत्तमदर्शने । भवितव्यं मंगलेन

येनात्मा मे प्रसीदति ॥ ३२ ॥ अन्यथा म्रियमाणस्य नाशुचेर्वृषलीपतेः । वैकुंठनामग्रहणं जिह्वा वक्तुमिहार्हति ।

३३ ॥ क्व चाहं कितवः पापो ब्रह्मघ्नो निरपत्रपः । क्व च नारायणेत्येतद्भगवन्नाम मंगलं ॥ ३४ ॥ सोऽहं तथा यति

ष्यामि यतचित्तेंद्रियानिलः ॥ यथा न भूय आत्मानमंधे तमसि मज्जये ॥ ३५ ॥ विमुच्य तमिमं बंधमविद्याकाम

कर्मजं । सर्वभूतसुहृच्छांतो मैत्रः करुण आत्मवान् ॥ ३६ ॥ मोचये ग्रस्तमात्मानं योषिन्मय्यात्ममायया । विक्री

डितो यथैवाहं क्रीडामृग इवाधमः ॥ ३७ ॥ ममाहमिति देहादौ हित्वा मिथ्यार्थधीर्मतिं । धास्ये मनो भगवति शु

द्धं तत्कीर्तनादिभिः ॥ ३८ ॥ इति जातसुनिर्वेदः क्षणसंगेन साधुषु । गंगाद्वारमुपेयाय मुक्तसर्वानुबंधनः ॥ ३९

नूनं पुण्यवानित्याह । विबुधोत्तमदर्शने इति निमित्तसप्तमी तेषां दर्शनार्थं पूर्वेण मंगलेन महता पुण्येन भवितव्यं येन दर्श

नेन । ३२ । अन्यथा पूर्वपुण्यं विना कथं भूतं वैकुंठनामग्रहणं तद्वशीक्रियते अनेनेति ग्रहणं । ३३ ॥ ब्रह्मघ्नः विप्रवंचनाशक्तः

३४ । मिथ्याभूतेऽर्थे धीर्यस्य तथाभूतः सन् देहादौ ममाहमिति मतिं हित्वा धास्ये । ३५ । ३६ । ३७ । ३८ । मुक्तं सर्वमनुबंधनं पुत्रा

दिस्नेहो येन सः । ३९ ॥

प्रत्याहृतइंद्रियग्रामो येन।४०। गुणेभ्यो देहेंद्रियादिभ्यः आत्मानं वियुज्य विशोध्य आत्मसमाधिना चित्तैकाग्र्येण भगवतो धा
म्नि रूपे।४१। तस्मिन् भगवद्धाम्नि उपारता निश्चला धीर्यस्य सः। तस्मिन्काले ऽद्राक्षीदिति वा। पुरः पुरतः तत्रश्च प्रागुपलब्धान्दे
वतानुचरान्प्रत्यभिज्ञाय ववंदे।४२।४३।४४। उपसंहरति। एवमिति द्वाभ्यां। विप्लावितः सर्वधर्मो येन। उत्सन्नव्रतं स्वदारनिय

श्रीशुक उवाच॥ ॥स तस्मिन्देवसदन आसीनो योगमाश्रितः। प्रत्याहृतेंद्रियग्रामो युयोज मन आत्मनि॥४०॥
ततो गुणेभ्य आत्मानं वियुज्यात्मसमाधिना। युयुजे भगवद्धाम्नि ब्रह्मण्यनुभवात्मनि॥४१॥ यर्ह्युपारतधीस्तस्मि
न्नद्राक्षीत्पुरुषान्पुरः। उपलभ्योपलब्धान्प्राग्ववंदे शिरसा द्विजः॥४२॥ हित्वा कलेवरं तीर्थे गंगायां दर्शनादनु। स
द्यः स्वरूपं जगृहे भगवत्पार्श्ववर्तिनां॥४३॥ साकं विहायसा विप्रो महापुरुषकिंकरैः। हैमं विमानमारुह्य ययौ य
त्र श्रियः पतिः॥४४॥ एवं स विप्लावितसर्वधर्मा दास्याः पतिः पतितो गर्ह्यकर्मणा। निपात्यमानो निरये हतव्रतः स
द्यो विमुक्तो भगवन्नाम गृह्णन्॥४५॥ नातः परं कर्मनिबंधकृंतनं मुमुक्षतां तीर्थपदानुकीर्तनात्। न यत्पुनः क
र्मसु सज्जते मनो रजस्तमोभ्यां कलिलं ततोन्यथा॥४६॥ य एवं परमं गुह्यमितिहासमघापहं। शृणुयाच्छ्रद्धया यु
क्तो यश्च भक्त्यानुकीर्तयेत्॥४७॥ न वै स नरकं याति नेक्षितो यमकिंकरैः॥ यद्यप्यमंगलो मर्त्यो विष्णुलोके
महीयते॥४८॥

मादिर्यस्य।४५। कर्मनिबंधस्य पापमूलस्य कृंतनं छेदकमतः परं नास्ति। कस्मात्परं। तीर्थपदस्यानुकीर्तनात्। अतो न
नुकीर्तनात्। अन्यथा प्रायश्चित्तांतरैः रजस्तमोभ्यां कलिलं मलिनमेव तिष्ठति यत्तन्मनः॥४६।४७। न वेक्षितो भवति
४८॥

म्रियमाणः अवशत्वेपि श्रद्धाविहीनोपि।४९॥ ॥षष्ठे द्वितीयः॥ ॥तृतीये पियमेनापि वैष्णवोत्कर्षवर्णनैः। सांत्वयि
त्वा स्वदूतास्ते वैष्णवैः किंकरीकृताः॥१॥ विष्णुदूतैर्निर्भर्त्सितं आत्मार्थं यममुखेनैव द्रढयितुं तृतीयाध्यायारंभः। तत्र यदुक्तं
यमराज्ञे तथा सर्वमाचचक्षुरिति। ततः किं तत्र वृत्तमिति पृच्छति। निशम्येति। मुरारेर्नैदेशिकैः किंकरैरेवं विहतान्। अत
एव हता आज्ञा यस्य। यस्य वशवर्ति अयं जनः सोपि तान्प्रति किमाह।१। अत्याश्चर्यमित्याह। यमस्येति। हे ऋषे यम

म्रियमाणो हरेर्नाम गृणन्पुत्रोपचारितं। अजामिलोप्यगाद्धाम किं पुनः श्रद्धया गृणन्॥४९॥ ॥इति श्री
भागवते महापुराणे षष्ठस्कंधे अजामिलोपाख्याने द्वितीयोध्यायः॥ ॥राजोवाच॥ ॥निशम्य देवः स्वभ
टोपवर्णितं प्रत्याह किं तान्प्रति धर्मराजः॥ एवं हताज्ञो विहतान्मुरारेर्नैदेशिकैर्यस्य वशे जनोयं॥१॥ यम
स्य देवस्य न दंडभंगः कुतश्चनर्षे श्रुतपूर्व आसीत्। एतन्मुने वृश्चति लोकसंशयं न हि त्वदन्य इति मे वि
निश्चितं॥२॥ ॥श्रीशुक उवाच॥ ॥भगवत्पुरुषै राजन्याम्याः प्रतिहतोद्यमाः। पतिं विज्ञापयामासुर्य
मं संयमिनीपतिं॥३॥ ॥यमदूता ऊचुः॥ ॥कति संतीह शास्तारो जीवलोकस्य वै प्रभो। त्रैविध्यं कुर्वतः क
र्मफलाभिव्यक्तिहेतवः॥४॥

स्य दंडभंगः कुतश्चन कस्माच्चिदपि श्रुतपूर्वो नासीत्। एतत् एतस्मिन्नर्थे यद्यानश्रुतपूर्वमेतत्। यमदूतनिराकरणं
वासीत्। अतः सर्वस्यापि लोकस्य संशयो वर्तते। तं त्वदन्यो न छिनत्तीति मे निश्चितं। अतः कथयेति शेषः।२। भ
गवतः पुरुषैः प्रतिहत उद्यमो येषां ते याम्याः पुरुषाः।३। कति संतीत्याक्षेपोक्तिः। त्रैविध्यं त्रिविधं स्वार्थे ष्यञ्। यद्वा त्रै
विध्यं यथा भवति तथा कर्म कुर्वतः। तदर्थे च कर्मफलस्याभिव्यक्तिहेतवः कति संतीति।४॥

संतु बहवः को वा बाधस्तत्राह। यदीति। मृत्युर्दुःखं। अमृतं सुखं तेषां विप्रतिपत्तौ। उभे कस्य स्यातां। न कस्यापि। परस्प
रविरोधेनोभयोरपि प्रतिबंधात्। ऐकमत्ये तु कस्य वा न स्यातां। एकः सुखं कर्तुमिच्छति द्वितीयो दुःखं चान्यः। ऐकमत्ये च तयोः प
रस्परकार्यानुमोदनेनोभयोरपि प्राप्तेः कस्य वा ते उभे अपि न स्यातामित्यर्थः॥५॥ ननु बहूनां कर्मिणां व्यवस्थया बहवः
शास्तारो भवंतु। तथा सति नायं दोषः स्यात्तत्राह। बहूनां कर्मिणां व्यवस्थाप्य शास्तृबहुत्वे शास्तृत्वं स्यात्तद्घटते।

यदि स्युर्बहवो लोके शास्तारो दंडधारिणः। कस्य स्यातां न वा कस्य मृत्युश्चामृतमेव वा॥५॥ किंतु शास्तृबहुत्वे
स्याद्बहूनामिह कर्मिणां। शास्तृत्वमुपचारो हि यथा मंडलवर्तिनां॥६॥ अतस्त्वमेको भूतानां सेश्वराणां
११ मधीश्वरः। शास्ता दंडधरो नृणां शुभाशुभविवेचनः॥७॥ तस्य ते विहितो दंडो न लोके वर्तते ऽधुना। चतुर्भिर
द्भुतैः सिद्धैराज्ञा ते विप्रलंभिता॥८॥ नीयमानं तवादेशादस्माभिर्यातनागृहान्। व्यमोचयन्पातकिनं छि
त्वा पाशान्प्रसह्य ते॥९॥ तांस्ते वेदितुमिच्छामो यदि नो मन्यसे क्षमं। नारायणेत्यभिहिते मा भैरित्याययुर्द्रु ११
तं॥१०॥
तदा किंतु सर्वशास्तरि मुख्यं शास्तृत्वं तदेकदेशे उपचारमात्रमेव स्यात्। यथा चक्रवर्तिन एव मुख्यं शास्तृत्वं मंडलवर्तिना
मुपचारमात्रं निरंकुशत्वाभावात्॥६॥ यस्मादेवं शास्तृबहुत्वं न घटते अतस्त्वमेक एव शास्ता शुभाशुभे विविनक्ती
ति तथा॥७॥ विप्रलंभिता वंचिता लंघितेत्यर्थः॥८॥ तदेवाह। नीयमानमिति॥९॥ ते त्वत्तः यदि नो स्मा कं क्षमं हितं म
न्यसे। अन्यथा, ज्ञानतस्त्वदाज्ञानेतद्वाप्यनर्थः स्यात्। अत कोऽभिहिते वा प्रभावः यतो नारायणायेति केवलमभि
हिते मा भयं कुर्वरिति वदंतः शीघ्रमागताः॥१०॥

संयमयतीति तथा॥११॥ मत्तोऽन्योऽजगतस्तस्थुषश्च परोऽधीश्वरोऽस्तीति। अहं तु जंगमानामेव। तत्रापि नृणामेव तत्रापि पापिना
मेव। तत्किंकरः सन्नीश्वरः स तु सर्वेश्वरः कोऽसौ यत्र यस्मिन्विश्वमोतं प्रोतं चकुर्ध्वतिर्यक्तंतुषु पटवत्। यस्य त्वंशो न्यो ब्रह्म
विष्णुरुद्रेभ्योऽस्य स्थित्यादयो भवंति। यस्य च वशो लोको वर्तते। नसि नासिकायां प्रोत बलीवर्दवत्॥१२॥ एतत्प्रपंचयति ब्राह्म
णादीनामभिर्वाचायां निजायां तंत्र्यां दामन्यां जनं योऽवबध्नाति। दामभिर्गाः बलीवर्दानिव। तस्मै जनाः नामकर्मभिर्निबंधो वहा
श्रीशुक उवाच॥ ॥इति देवः सआपृष्टः प्रजासंयमनो यमः। प्रीतः स्वदूतान्प्रत्याह स्मरन्पादांबुजं हरेः॥११॥ यम उ
वाच॥ ॥परो मदन्यो जगतस्तस्थुषश्च ओतं प्रोतं पटवद्यत्र विश्वं। यदंशतोऽस्य स्थितिजन्मनाशा नस्यो
तवद्यस्य वशे च लोकः॥१२॥ यो नामभिर्वाचि जनान्निजायां बध्नाति तंत्र्यामिव दामभिर्गाः। यस्मै बलिं त इमे ना
मकर्मनिबंधबद्धाश्चकिता वहंति॥१३॥ अहं महेंद्रो निरृतिः प्रचेताः सोमोऽग्निरीशः पवनोऽर्को विरिंचः। आ
दित्यविश्वे वसवोऽथ साध्या मरुद्गणा रुद्रगणाः ससिद्धाः॥१४॥ अन्ये च ये विश्वसृजोऽमरेशा भृग्वादयोऽस्पृ
ष्टरजस्तमस्काः। यस्येहितं न विदुः स्पृष्टमायाः सत्वप्रधाना अपि किं ततोऽन्ये॥१५॥

यस्मै बलिं वहंति। यदधीनाः कर्म कुर्वंतीत्यर्थः॥१३॥ यस्य च लीला दुर्विभाव्येत्याह। अहमिति द्वाभ्यां। न स्पृष्टं रजस्तमश्च
यैरिति तं अस्ति प्रेतं चेष्टितं वा। न विदुः। स्पृष्टमायाः मायया स्पृष्टाः। ततस्तेभ्योऽन्ये न विदुरिति किं पुनर्वक्तव्यं॥१४।१५

भा०ष०

त स्मान्मा या मोहितत्वान्नजानंतीत्युक्तं। अविषयत्वाद्यत स्येत्याह यमिति। गोभिरिंद्रियैर्हृदादिभिर्नेनानविचक्षते। नयत्ययं ति। यद्वावान न्युदितं यन्मनोनमनुतइत्यादिश्रुतेः। आत्मनां जीवानां आत्मानं द्रष्टारं। आकृतयो रूपाणि। यस्तु यथाकर्म तं तं नजानाति। ततः परमाकृतीनां प्रकाशकं। नहि प्रमाणता प्रमाणं। प्रमेयस्य विषयइति भावः। एवंभूतः परमेश्वरोस्तीति पूर्वेणै वसंबंधः॥१६॥ भवत्वेवंभूतोन्यः परमेश्वरः। ये पुनस्स्मान्निर्लत्यर्ययायिनं रक्षितवंतः स्ते केता नाहे तस्येति द्वाभ्यां। तस्यैव

१२ यं वै न गोभिर्मनसासुभिर्वा हृदा गिरा वासुभृतो विचक्षते। आत्मानमंतर्हृदि संतमात्मनां चक्षुर्यथैवाकृत

यस्ततः परं॥१६॥ तस्यात्मतंत्रस्य हरेरधीशितुः परस्य मायाधिपतेर्महात्मनः। प्रायेण दूताइह वै मनोहराश्चरं

ति तद्रूपगुणस्वभावाः॥१७॥ भूतानि विष्णोः सुरपूजितानि दुर्दर्शलिंगानि महाद्भुतानि। रक्षंति तद्भक्तिम

तः परेभ्यो मत्तश्च मर्त्यानथ सर्वतश्च॥१८॥ धर्मं तु साक्षाद्भगवत्प्रणीतं न वै विदुरृषयो नापि देवाः॥ न सि

द्धमुख्या असुरा मनुष्याः कुतश्च विद्याधरचारणादयः॥१९॥ स्वयंभूर्नारदः शंभुः कुमारः कपिलो मनुः ११

प्रह्लादो जनको भीष्मो बलिर्वैयासकिर्वयं॥२०॥ द्वादशैते विजानीमो धर्मं भागवतं भटाः॥ गुह्यं विशुद्धं दुर्बोधं

यं ज्ञात्वामृतमश्नुते॥२१॥

रूपं गुणाः प्रभावादयः स्वभावः भक्तवात्सल्यादिर्येषां ते॥१७॥ विष्णोर्भूतानि भृत्याः दुर्दर्शानि दृष्टुमशक्यानि लिंगानि रू पाणि येषां तानि। तद्भक्तिमतः विष्णुभक्तान्। परेभ्यः शत्रुभ्यः सर्वतः अग्न्यादिभ्यश्च रक्षंति॥१८॥ ननु विष्णुभक्ताश्चे त्कथमधर्मयातं कृतवंतः। तत्राह धर्ममिति। ऋषयो भृग्वादयः॥१९॥ ननु केपिचेन्नजानंति तस्य सत्वे किं प्रमाणं तत्राह। कुमारः सनत्कुमारः। वयमित्यात्मानमेव बक्तुमन्यमानो निर्दिशति॥२०॥ हे भटाः॥ २१॥

तमेव धर्ममाह। एतावानिति॥२२॥ न चात्र प्रमाणं वक्तव्यं दृष्टत्वादित्याह। नामोच्चारणेति। येनैव केवलेन सकृदुच्चारितेन॥२३

ननु नामाभासेन कथं सर्वपापक्षयः स्यात्। ब्रह्महा भक्त्यावृत्त्यादेरपि विधानात्। तथापि सा यंग्रा गृणन्भक्त्या दुःख ग्रामा

द्विमुच्यतइति अनुदिनमिदमादरेण शृण्वन्निति। श्रवणं कीर्तनं ध्यानं हरेरद्भुतकर्मणः। जन्मकर्मगुणानां च तदर्थेखिल

चेष्टितमिति त्याद्यस्मिन्नेव पुराणे तत्र तत्र पठ्यते। पुराणांतरे च यापक्षय श्च भवति स्मरतां तमहर्निशमिति। अत्रैव

च स्मरतां। तस्मात्संकीर्तनं विष्णोर्जगन्मंगलमंहसां। महतामपि कौरव्य विद्ध्यैकांतिकनिष्कृतमित्यादिना सम्यक्कीर्त

एतावानेव लोकेस्मिन्पुंसां धर्मः परः स्मृतः। भक्तियोगो भगवति तन्नामग्रहणादिभिः॥२२॥ नामोच्चारण

माहात्म्यं हरेः पश्यत पुत्रकाः॥ अजामिलोपि येनैव मृत्युपाशादमुच्यत॥२३॥ एतावतालमघनिर्हरणाय

पुंसां संकीर्तनं भगवतो गुणकर्मनाम्नां॥ विक्रुश्य पुत्रमघवान्यदजामिलोपि नारायणेति म्रियमाण इया

य मुक्तिं॥२४॥

ह्री नाहेवमन्यंते। किं च तथासति किमिति मन्वादयो द्वादशप्रायश्चित्तानि स्मरेयुः। तस्मादिदमनुपपन्नमिव तत्राह। एतावतेति। भग

वतो गुणानां कर्मणां च नाम्नां च सम्यक्कीर्तनमिति यत्। एतावता पुंसामघनिर्हरणाय पापक्षयमात्राय अलमुपयोगो नास्ति।

लिं अजेशादौ च वारणे। तथा हामरः हि अलं भूषणपर्याप्तिशक्तिवारणवाचकमिति। उपयोगाभावमेवाह। अजामिलो महतापातक्यपि

नारायणेति विक्रुश्य न तु सम्यक्कीर्तयित्वा तच्च पुत्रं विक्रुश्य न तु हरिं। अघवान्प्रसिद्ध पापी म्रियमाणोस्वस्थचित्तोपि मुक्तिमुवा

पनत्व घनिर्हरणमात्रं। अतो नाम भासेनापि सर्वपापक्षय इति तत्वं। अतः शिष्टः प्रायश्चित्तादिविषयस्तु पापवासनाक्षयार्थः। इत्युक्तमेव

हरेर्गुणानुवादः सम्यक्कृता ॥२४॥

भा०ष० प्रायेणवेदतदिदंनमहाजनोयन्नूक्तंव्यर्थंतर्हिद्वादशाद्यादिस्मरणमितितत्राह।प्रायेणेति।महाजनोमन्वादिः।अयंभावः।
अथामृतसंजीवनौषधिमजानंतोवैद्यारोगनिर्हरणायत्रिकटुकनिंबादीनिस्मरंति।तथास्वयंभूप्रभृतयोद्वादशव्य
तिरेकेणायंमहाजनोद्वादशाप्रतिगुह्यमिदमज्ञात्वाद्वादशाब्दिकंस्मरतीति।किंचमाययादेव्याअलंमोहितमतिरयंजनः।म
धुमधुरंयथाभवत्येवंपुष्पितायांपुष्पस्थानीयैरर्थवादैर्मनोहरायांत्रय्यांजडीकृताअभिनिविष्टामतिर्यस्यअतोमहत्ये
वकर्मणिश्रद्धयायुज्यमानोनाल्पेप्रवर्त्तते।दृश्यतेहिप्राकृतस्यलोकस्यमहतिमंत्रादौश्रद्धाअल्पेवाश्रद्धा।तस्माद्द
प्रायेणवेदतदिदंनमहाजनोयंदेव्याविमोहितमतिर्बतमाययालं॥त्रय्यांजडीकृतमतिर्मधुपुष्पितायां
वैतानिकेमहतिकर्मणियुज्यमानः॥२५॥एवंविमृश्यसुधियोभगवत्यनंतेसर्वात्मनाविदधतेखलुभावयो
१३ गं॥तेमेनदंडमर्हंत्यथयद्यमीषांस्यात्पातकंतदपिहंत्युरुगायवादः॥२६॥तेदेवसिद्धपरिगीतपवित्रगाथायेसा
धवःसमदृशोभगवत्प्रपन्नाः॥तान्नोपसीदतहरेर्गदयाभिगुप्तान्नैषांवयंनवयःप्रभवामदंडे॥२७॥
स्ययाहकोनास्तीतितैर्नोक्तं।यद्वास्वाधीनःसिंहोअस्येतावताश्वशृगालादिनिवारणायतंयथानप्रयुंजते।तथा १३
तितुच्छत्वात्।पापस्यनतन्निरसनायपरमंमंगलंहरेर्नामस्मरंति।यद्वा।नाममाहात्म्यज्ञानेसर्वमुक्तिप्रसंगादित्येषा
दिकंग्रंथविस्तरभयात्तुनातिप्रपंच्यते।२५॥भावयोगंभक्तियोगं।अमीषांपातकंनस्यादेव।यदिस्यात्तुउरुगायवादःकीर्त
नं।२६।तदेवंधर्मतत्त्वंनिर्णीयभृत्याननुशास्ति।तदितियेभगवंतंप्रपन्नास्तेदेवैःसिद्धैश्चपरिगीतपवित्रकथाःवर्णित
पवित्रकथाः।अतस्तान्नोपसीदततत्समीपमपिनगच्छतवयःकालोपिनप्रभवति॥२७॥

केतत्रदंडार्थमानेयाइत्यत्राह।तानिति।द्वाभ्यां।असतःदुष्टान्मुकुंदपादारविंदयोर्योमकरंदरूपोरसस्तस्माद्विमुखात्।कथंभू
तान्।निःकिंचनैःरजस्तंजुष्टात्।तेषांज्ञापकमाह।निरयवर्त्मनिस्वधर्मशून्येगृहेबद्धातृष्णायेस्तान्।२८।किंचजिह्वेत्यादि।भ
यः।नेष्टांतंविष्णुकृत्यंभगवद्भजनंयैः॥२९॥भगवंतंक्षमापयति।अयंभावः।नस्वपुरुषैरस्मदीयत्वेनास्थितैःस्वीयैरेवपुरुषै
तानानयध्वमसतोविमुखान्मुकुंदपादारविंदमकरंदरसादजस्रं।निःकिंचनैःपरमहंसकुलैरसंगैर्जुष्टाद्गृहे
निरयवर्त्मनिबद्धतृष्णान्॥२८॥जिह्वानवक्तिभगवद्गुणनामधेयंचेतश्चनस्मरतितच्चरणारविंदं।कृष्णायनो
नमतियच्छिरएकदापितानानयध्वमसतोऽकृतविष्णुकृत्यान्॥२९॥तत्क्षम्यतांसभगवान्पुरुषःपुराणोना
रायणःस्वपुरुषैर्यदसत्कृतंनः।स्वानामहोनविदुषांरचितांजलीनांक्षांतिर्गरीयसिनमःपुरुषायभूम्ने॥
३०॥तस्मात्संकीर्तनंविष्णोर्जगन्मंगलमंहसां।महतामपिकौरव्यविद्ध्यैकांतिकनिष्कृतिं॥३१॥शृण्वतांगृण
तांवीर्याण्युद्दामानिहरेर्मुहुः॥यथासुजातयाभक्त्याशुद्ध्येन्नात्माव्रतादिभिः॥३२॥
यैर्यद्यस्मादसदन्याय्यंकृतं।तत्स्मात्सएवक्षम्यतांसहतां।स्वानांस्वीयानांनःनविदुषांअज्ञानांअहोगरीयसितस्मि
न्क्षांतिर्युक्तैव।महदितिपाठेस्वीयानांमाहात्म्यमविदुषांनःक्षमांकरोत्वित्यर्थः।तस्मादित्यादिश्लोकोक्तिःजगतोपिमंगलरू
पं॥३१॥एकांतिकत्वमेवाह।शृण्वतामिति।व्रतादिभिस्तथानशुध्येत॥३२॥

एतदुपपादयति। कृष्णांघ्रिपद्मयोर्मधु लेढि आस्वादयतीति तथा मधुलिहता उद्धवेन विसृष्टा येमा या गुणा विषयास्तेषु पु
नर्नरमते। अन्यस्तु तन्मध्वास्वादरहितः। अत एव कामाभिहतः सन्नात्मनो रजः पापं प्रमार्ष्टुम् पिकर्मैव प्रायश्चित्तरूपमीहेत
यतः कर्मणः पुनरपि रजः पापं स्याद्देवकुंजरशौचवत् सत्वशोधकत्वाभावात्। ३३। नैव विस्मितधियो बत नूनं किंतु सत्यमुक्त
मित्येवमेनिरे। ततः प्रभृति प्रतिशंकमाना अस्मानेव न हन्यादिति शंकां वहंतः तं च सुम पि बिभ्यति स्म। पाठांतरे तु वि

२४ कृष्णांघ्रिपद्ममधुलिड् न पुनर्विसृष्टमायागुणेषु रमते वृजिनावहेषु॥ अन्यस्तु कामहत आत्मरजः प्रमा २५
ष्टुमीहेत कर्म यत एव रजः पुनः स्यात्॥ ३३॥ इत्थं स्वभर्तृगदितं भगवन्महित्वं संस्मृत्य विस्मितधियो यमकिं
करास्ते। नैवाच्युताश्रयजनं प्रतिशंकमाना द्रष्टुं च बिभ्यति ततः प्रभृति स्म राजन्॥ ३४॥ इतिहासमिमं
गुह्यं भगवान् कुंभसंभवः॥ कथयामास मलय आसीनो हरिमर्चयन्॥ ३५॥ ॥ इति श्रीभागवते महापु
राणे षष्ठस्कंधे तृतीयोध्यायः॥ ॥ राजोवाच॥ ॥ देवासुरनृणां सर्गो नागानां मृगपक्षिणां॥ सामासिकस्त्वया प्रो
क्तो यस्तु स्वायंभुवेंतरे॥ १॥

स्मितधियो जाताः ते च ततः प्रभृति बिभ्यति स्मेत्यर्थः॥ ३४॥ कुंभसंभवो गस्त्यो मलये पर्वत आसीनो न्यग्रोहरिमर्चयन् पुनः
पुनर्विश्वासार्थं हरेः पादौ स्पृशन्नित्यर्थः॥ ३५॥ ॥ षष्ठे तृतीयः॥ ॥ चतुर्थे दिग्विविधविश्वरूपजन्मविवक्षया। प्राचेतसः सु
तदक्षस्य वंशस्तावत्प्रतन्यते॥ १॥ चतुर्थे तु प्रजासृष्ट्यै दक्षेणाराधनं हरेः। पतयसा हंसगुह्याख्यस्तोत्रेण च निरूप्यते। प्रस
क्तानुप्रसक्तेन स्वायंभुवसुतान्वये। नानाभावमाकर्ण्य विंशत्यासंवृत्तु सते। १। देवासुरेति द्वाभ्यां। सामासिकः संक्षिप्तोयः

व्यासं विस्तारं। ते त्वत्तः यया शक्त्या यथा ससर्जतां शक्तिं तत्प्रकारं च ज्ञातुमिच्छामि। अनुसर्गमनुवृत्तं सर्गं॥ २। ३। दृष्ट्वादिरू
पेण ससर्जेति वक्तुं दक्षजन्मप्रकारमाह। यदेति। प्राचीनबर्हिषः पुत्राय दशसमुद्रमध्यादुन्मग्ना निर्गताः तदा गां पृथ्वीं द्रुमैर्वृतां दृष्ट्वा
प्सुः नारदोपदेशतः। प्राचीनबर्हिषो निवृत्त्या अराजके सति कृष्याद्यभावात्॥ ४॥ तपसा दीपितो मन्युर्येषां। तेषां द्रुमाणां दग्धानि
तस्यैव व्यासमिच्छामि ज्ञातुं ते भगवन्यथा। अनुसर्गं यया शक्त्या ससर्ज भगवान्परः॥ २॥ ॥ सूत उवाच॥ ॥ इति संप्र
श्नमाकर्ण्य राजर्षेर्बादरायणिः॥ प्रतिनंद्य महायोगी जगाद मुनिसत्तमाः॥ ३॥ ॥ श्रुक उवाच॥ ॥ यदा प्रचेतसः पु
त्रा दशप्राचीनबर्हिषः। अंतःसमुद्रादुन्मग्ना ददृशुर्गां द्रुमैर्वृतां॥ ४॥ द्रुमेभ्यः क्रुध्यमानास्ते तपोदीपितमन्यवः।
मुखतो वायुमग्निं च ससृजुस्तद्दिधक्षया॥ ५॥ ताभ्यां निर्दह्यमानांस्तानुपलभ्य कुरूद्वह॥ ॥ राजोवाच महान्सो
मो मन्युं प्रशमयन्निव॥ ६॥ मा द्रुमेभ्यो महाभागा दीनेभ्यो द्रोग्धुमर्हथ॥ विवर्धयिषवो यूयं प्रजानां पतयः स्मृताः॥
७॥ अहो प्रजापतिपतिर्भगवान्हरिरव्ययः॥ वनस्पतीनोषधीश्च ससर्जोर्जमिषं विभुः॥ ८॥ अन्नं चराणामच
राह्यपदः पादचारिणां॥ अहस्ता हस्तयुक्तानां द्विपदां च चतुष्पदः॥ ९॥ यूयं च पित्रान्वादिष्टा देवदेवेन चानघाः॥
सु॥ प्रजासर्गाय हि कथं वृक्षान्निर्दग्धुमर्हथ॥ १०॥ आतिष्ठत सतां मार्गं कोपं यच्छत दीपितं। पित्रा पितामहेनापि जु
५ ष्टं वः प्रपितामहैः॥ ११॥
क्षया॥ ५॥ ताभ्यां वाय्वग्निभ्यां दह्यमानांस्तान् द्रुमान् वनस्पतीनां राजा सोम उवाच॥ मा द्रुमेभ्य इति नवभिः॥ ६। हे महाभा
गाः विशेषेण वर्द्धयितुमिच्छवः॥ ७॥ प्रजापतीनां तद्वृक्ष्यत्वोज्य दाहोनुचित इत्याह। अहो इति त्रिभिः। ऊर्जं तक्ष्यं इषमन्नं। ८॥

५।१०। अत्र कातिरत्नाभ्रपत्र ...

ना०षा०

ज्ञाप

प्रजानांप्रीतिरेवबंधुः। अतस्तज्जीविकानाशोन कर्तव्या। इतिदृष्टांतपंचकेनाह। तोकानांबालानांमातापितरौ। अज्ञानांज्ञानदो बुधएवसुहृत्॥१२॥ ईश्वराधिष्ठानत्वाज्जंतुद्रोहो नयुक्त इत्याह। अंतर्देहेष्विति। वःयुष्माभिः॥१३॥ आकाशाद्देहसमुत्पत्तिं आकस्मिकमित्यर्थः। आत्मविचारेण योनियच्छेत्॥१४॥ खिलानांशेषाणां वःयुष्माकं च शिवमस्तु। वृक्षरक्षणार्थं तदीयां

तोकानां पितरौ बंधुर्दृशः पक्ष्म स्त्रियाः पतिः॥ पतिः प्रजानां भिक्षूणां गृह्यज्ञानां बुधः सुहृत्॥१२॥ अंतर्देहेषु भूतानामात्मास्ते हरिरीश्वरः॥ सर्वं तद्धिष्ण्यमीक्षध्वमेवं वस्तोषितो ह्यसौ॥१३॥ यः समुत्पतितं देह आकाशान्मन्युमुल्बणं॥ आत्मजिज्ञासया यच्छेत्स गुणानतिवर्तते॥१४॥ अलं दग्धैर्द्रुमैर्दीनैः खिलानां शिवमस्तु वः॥ वार्क्षी ह्येषा वरा कन्या पत्नीत्वे प्रतिगृह्यतां॥१५॥ इत्यामंत्र्य वरारोहां कन्यामाप्सरसीं नृप॥ सोमो राजा ययौ दत्वा ते धर्मेणोपयेमिरे॥१६॥ तेभ्यस्तस्यां समभवद्दक्षः प्राचेतसः किल॥ यस्य प्रजाविसर्गेण लोका आपूरितास्त्रयः॥१७॥ यथाससर्ज भूतानि दक्षो दुहितृवत्सलः॥ रेतसा मनसा चैव तन्ममावहितः शृणु॥१८॥ मनसैवासृजत्पूर्वं प्रजापतिरिमाः प्रजाः॥ देवासुरमनुष्यादीन्नभःस्थलजलौकसः॥१९॥ तमबृंहितमालोक्य प्रजासर्गं प्रजापतिः। विंध्यपादानुपव्रज्य सोऽचरद्दुष्करं तपः॥२०॥

कन्यां ददाति। वार्क्षी वृक्षैः पालिता॥१५॥ आमंत्र्य सांत्वयित्वा आप्सरसीं अप्सरसः प्रम्लोचायाः सुतां॥१६॥१७॥ दुहितृवत्सल इति तस्य कन्यावंश एवेत्यर्थः। ममममतः॥१८॥ प्रजापतिर्दक्षः॥१९॥ अबृंहितं असंवृद्धं विंध्यस्य पादान्सन्निहितपर्वतान्॥२०॥२१॥ X तत्राघमर्षणं नाम तीर्थं पापहरं परं। उपस्पृश्यानुसवनं तपसा तोषयद्धरिं २१॥X १५

X अस्तौषीद्धंसगुह्येन भगवंतमधोक्षजं तुभ्यं तदभिधास्यामि कस्यातुष्यद्यतो हरिः २२।X

हंसगुह्याख्येन स्तोत्रेण। कस्य दक्षस्य॥२२॥ परायसर्वोत्तमाय नमो दधे नमनं करोमि। परत्वे हेतुः। अवितथा अनुभूतिः चिच्छक्तिर्यस्य अतो गुणत्रयाभासो जीवो निमित्तं मायावृतयो बंधवे नियंता। एवमपि गुणेषु तत्वबुद्धिर्येषां तैर्जीवैरदृष्टं धामस्वरूपं यस्य तत्र हेतुः। निवृत्तं मानं यस्मात्। पाठांतरे निवृत्तमानमवधिश्च यस्मात् तर्हि कथं तस्य सिद्धिः। अत आह। स्वयंभुवे स्वप्रकाशाय॥२३॥ अदृष्टधामत्वं दर्शयन्नाह। नेति। पुरुषः सखा जीवः अस्मिन्पुरे देहे वसन्नपि अत्रैव संवसतः सख्युर्यस्य सख्यं करणप्रवर्तकत्वादिकं नावैति। न जानाति तस्मै कुतः। व्यक्तदृष्टेः प्रपंचद्रष्टुः नहि द्रष्टा द्रष्टव्यो भवतीति प्रथमा

प्रजापतिरुवाच॥ ॥नमः परायावितथानुभूतये गुणत्रयाभासनिमित्तबंधवे। अदृष्टधाम्ने गुणतत्वबुद्धिभिर्निवृत्तमानाय दधे स्वयंभुवे॥२३॥ न यस्य सख्यं पुरुषोऽवैति सख्युः सखा वसन् संवसतः पुरेऽस्मिन्। गुणो यथा गुणिनो व्यक्तदृष्टेस्तस्मै महेशाय नमस्करोमि॥२४॥ देहोऽसवोऽक्षा मनवो भूतमात्रा नात्मानमन्यं च विदुः परं यत्। सर्वं पुमान्वेद गुणांश्च तज्ज्ञो न वेद सर्वज्ञमनंतमीडे॥२५॥

तपाठे व्यक्तेः प्रपंचस्य द्रष्टृत्वं यस्य सः। गुणो विषयो गुणिनो विषयिणः इंद्रियादेः सख्यं प्रकाशकत्वं यथा न वेत्ति न द्वत॥२४॥ ननु गुणो जडत्वान्न जानाति। जीवस्तु चेतनः किमिति न जानाति अत आह। देह इति। देहश्चासवश्च प्राणाः अक्षाणींद्रियाणि मनवः अंतःकरणानि भूतानि च मात्राश्च तन्मात्राणि आत्मानं स्वस्वरूपं द्वयं अन्यं इंद्रियवर्गं तयोः परं देवतावर्गं च न विदुः पुमान्जीवस्तु सर्वमेतत्त्रयं वेद गुणांस्तु तन्मूलभूतान्वेद तज्ज्ञोऽपिसन् यं सर्वज्ञं न वेद तमनंतमीडे स्तौमि॥२५॥

तें
अदृष्टधामत्वमुक्त्वा स्वप्रकाशत्वमाह। यत्रेति। मनस उपरामः समाधिः न तु सुषुप्त्यादिवल्लयः। न च जाग्रत्स्वप्नयोरिव विक्षेपः।
तदाह। नामरूपे रूप्येते यथा तस्याउपरमे हेतुः। दृष्टस्य दर्शनं स्मृतिश्च तयोः संप्रमोषान्नाशात्। तदा यः केवलेन स्वरूपज्ञानेन
न प्रतीयते। तस्मै हंसाय शुद्धाय शुचि शुद्धं मनः सद्म प्रतीतिस्थानं यस्य तस्मै नमः॥ २६॥ एवंभूतः केषां प्रतीयत इत्य
पेक्षायामाह। मनीषिण इति द्वाभ्यां। विवेकिनो यं निष्कर्षन्ति विविच्य ध्यायन्ति। स निर्वाणसुखानुभूतिर्मम प्रसी
दतामिति द्वयोरन्वयः। एवं निष्कर्षतां प्रतीयत इति भावः। किमिति निःकर्षन्ति। स्वशक्तिभिर्गूढं अप्रकाशमानं। क

यत्रोपरामो मनसो नामरूपरूपस्य दृष्टस्मृतिसंप्रमोषात्। य ईयते केवलया स्वसंस्थया हंसाय तस्मै शुचिस
द्मने नमः॥ २६॥ मनीषिणोन्तर्हृदि संनिवेशितं स्वशक्तिभिर्नवभिश्च त्रिवृद्भिः। वह्निं यथा दारुणि पांचदश्यं मनी
१६ षया निःकर्षन्ति गूढं॥ २७॥ स वै ममाशेषविशेषमायानिषेधनिर्वाणसुखानुभूतिः। स सर्वनामा स च विश्व
रूपः प्रसीदतामनिरुक्तात्मशक्तिः॥ २८॥

ताभिर्नवभिः पुनश्च त्रिवृद्भिः त्रिगुणाभिः सहाविंशत्या भिर्गूढं अष्टाविंशतिभिः कर्षतीत्यर्थः। यद्वा नवभिः प्रकृति १६
पुरुषमहदहंकारपंचतन्मात्रारूपाभिः त्रिवृद्भिस्त्रिगुणात्मिकाभिः च काराद् षोडशविकाररूपाभिश्च। कथंभूतं निःकर्षन्ति म
नीषयान्तर्हृदि संनिवेशितं निश्चलीकृतं पांचदश्यं पंचदशसामिधेनीमंत्रैः प्रकाश्यं अलौकिकं वह्निमिव। हेकारस्य स्पदा
त्मनोन्यं परमात्मानं निष्कर्षन्तीत्यर्थः॥ २७॥ अशेषा विशेषा यस्याः तस्या मायाया निषेधेन निर्वाणसुखेऽनुभूतिर्यस्य अ
प्रसक्तनिषेधासंभवात्। प्रसक्तिमाह। स एव सर्वनामा स एव विश्वरूप इति। तद्रूपत्वेपि वास्तवत्वाभावान्निषेधः संभवतीत्याह
अनिरुक्ता आत्मनि शक्तिर्माया यस्य सः॥ २८॥

ननु यदि केवलया स्वसंस्थया प्रतीयते। तर्हि सर्वनामत्वं विश्वरूपत्वं चानुपपन्नं वाग्बाद्यगोचरत्वादित्याशंक्य सर्वैर्नामभिः
वाच्यं प्रत्यक्षादिदृश्यं च तस्य स्वरूपं वस्तुतो मा भूत्। तथापि मायया घटत इति श्लोकत्रयेणोपपादयन्नमस्करोति। यद्यदिति। य
द्यद्वचसा निरुक्तं अभिहितं धिया निरूपितं व्यवसितं। अक्षभिर्वा इंद्रियैर्निरूपितं गृहीतं उत अपि मनसापि निरूपितं संकल्पितं यस्य स्व
प्रकाशत्वं तस्य तत्स्वरूपं मा भूत्। स्वरूपत्वाभावे हेतुः। हि यस्माद्गुणानामेव रूपं। पाठांतरे गुणैर्वृहितं। स तु गुणव्यतिरिक्तः। यतो गुणा
नामपायविसर्गाभ्यां प्रलयोत्पत्तिभ्यां लक्ष्यत इति तथा। चेतनाधिष्ठानं विना तयोरसंभवात्। यद्वा यस्य स्वरूपं मा भूत् न भवति तस्मै न
म इति तृतीयेनान्वयः॥ २९॥ तदेवं वस्तुतो गुणस्वरूपत्वाभावमंगीकृत्य अनिरुक्तात्मशक्तिरित्यनेन द्योतितं मायया सर्ववाच्यत्वेन

यद्यन्निरुक्तं वचसा निरूपितं धियाक्षभिर्वा मनसा वोत यस्य। मा भूत्स्वरूपं गुणरूपं हि तत्तत्स वै गुणापायविसर्ग
लक्षणः॥ २९॥ यस्मिन्यतो येन च यस्य यस्मै यद्यो यथा कुरुते कार्यते च। परावरेषां परमं प्राक् प्रसिद्धं तद्ब्रह्म
तद्धेतुरनन्यदेकं॥ ३०॥
विश्वरूपत्वमाह। यस्मिन्नधिकरणे यतो यादानात् येन करणेन यस्य संबंधि यस्मै संप्रदानाय यदीप्सिततमं यः कर्त्ता कु
रुते स्वतंत्रः कार्यते चान्येन प्रयोजकः त्रीति द्वाभ्यामिति प्रत्येकं संबंधः अत्र च सप्तभिर्यच्छब्दैः सप्त विभक्त्यर्था दर्शिता। यथेति
च क्रियाकारकसंबंधप्रकारकसंबंधप्रकारवाचिना मव्ययानामर्थाः कुरुते कार्यतेति स्वार्थपरार्थक्रियाश्च सर्वे षष्ठ्यादर्शिता।
दयस्तद्धेतवः श्रूयंते अवरे च दृश्यंते तत्कथं ब्रह्मैव तद्धेतुः तत्राह परेषां च हेतूनां परमं कारणं। न तु कुतः सर्वेभ्यः प्राक् प्रसिद्धं न तु ब्रह्म
णि भवेत्तदानीमन्यस्याभावात्। सत्यं निरपेक्षमेव तत्कारणमित्याह। अनन्यद्विजातीयभून्यं च एकं च सजातीयभून्यं तस्मै नम हंसगुह्यस्तवः॥ ३०

भा०ष०

नन्वेवं ब्रह्मदेहिश्वस्यहेतुः तर्हि न कदाचिदनीदृशं जगदिति वदंतो मीमांसकाः कुतोत्र विवदंते तेभ्यश्चान्ये स्वभाववादिनः संवदंते। तेबतेब
तत्वविद्भिर्बोधिता अपि कुतः पुनः पुनर्मुह्यंति। तत्राह। यस्य माया विद्याद्याः शक्तयो विवादस्य क्वचित्संवादस्य भुवः स्थानानि भवंति
तस्मै नमः॥ ३१॥ ननु किं तद्ब्रह्म यस्य शक्तयो विवादादिभुवो भवंति। अत्राह। अस्तीति योगो यद्रूपा सना(?)त्मा स्तौ। तत्र हि विराड्रूपेणोपा
सनायां पातालपादादिकमस्तीत्युपास्यत्वेन विधीयते। नास्तीति सांख्ये ज्ञानशास्त्रं तत्र ह्यपाणिपादः अचक्षुरश्रोत्रमिति च पाद
दिना स्तीति निषिध्यते। तयोर्योगसांख्ययोर्यत्किंचित्समं अनुवर्तमानं अवेक्षितप्रतीतं तद्ब्रह्म तद्ब्रह्म(?)विवादेऽपि विवादास्य दंब्रह्ले

यच्छक्तयो वदतां वादिनां वै विवादसंवादभुवो भवंति। कुर्वंति चैषां मुहुरात्ममोहं तस्मै नमोऽनंतगुणाय भूम्ने॥ ३१॥ अस्ती
ति नास्तीति च वस्तुनिष्ठयोरेकस्थयोर्भिन्नविरुद्धधर्मयोः॥ अवेक्षितं किंचन योगसांख्ययोः समं परं ह्यनुकूलं बृहत्तत्।
१७ ३२॥ योऽनुग्रहार्थं भजतां पादमूलमनामरूपो भगवाननंतः॥ नामानि रूपाणि च जन्मकर्मभिर्भेजे स मह्यं परमः प्रसी
दतु॥ ३३॥

त्यर्थः॥ विवादं स्फुटयति। भिन्नौ अस्तिनास्तीत्येवंभूतौ विरुद्धौ धर्मौ ययोः॥ तयोर्भिन्नविषयत्वे विरोधो न स्यादित्येकस्थ १७
योरित्युक्तं एकविधयोः कुतः वस्तुनिष्ठयोः पादादिविधिप्रतिषेधयोरेकवस्तुनिष्ठत्वात्। समत्वे हेतुः परं हि यतो विधिप्रतिषे
धयोरविषयः तयोः पादादिविषयत्वात् तर्हि तथा अविषयस्य सद्भावे किं प्रमाणं तत्राह। अनुकूलं अधिष्ठानं विना पादादिक
ल्पनायोगात्। अवधिं विना तन्निषेधायोगाच्च तयोरुपपादकत्वेन सिद्धमित्यर्थः तस्मै नम इति पूर्वस्यानुषंगः॥ ३२॥ ननू
दासीनस्य समस्य नमस्कारे को लाभस्तत्राह। य इति। पादमूलं भजतामनुग्रहार्थं प्राकृतनामरूपरहितोपि जन्मभिरवतारै
र्विशुद्धोर्जितैः सत्वानि रूपाणि कर्मभिर्नामानि च यो भेजे। तत्कुतः भगवानचिंत्यैश्वर्यः स मह्यं प्रसीदतु॥ ३३॥

ननु त्वादृशाः सकामा गणेन्द्रादीन् प्रार्थयंते त्वं तु तान्विहाय किमिति भगवंतमेव प्रार्थयसे तत्राह। प्राकृतैरर्वाचीनैर्ज्ञान
पथैरुपासनामार्गैर्यथाशयं तत्तद्वासनानुसारेण यो देहगतोंतर्यामी तत्तद्देवतारूपेण विविधो भाति। यथा वायुः पार्थिवं
चंपकादिगंधवद्द्रव्यमाश्रित्य नानागंधवान्निर्भातिरेणोर्गुणं धूसरत्वादिकमाश्रित्य नानारूपवान्प्रतीयते तद्वत्तस्यैव तत्तद्दे
वतारूपेण फलदातृत्वात्। स ईश्वर एव मम मनोरथं सत्यं करोतु। किमंतर्गुरुभिर्देवतांतरैरित्यर्थः। तदुक्तं गीतासु। यो यो
यां यां तनुं भक्तः श्रद्धयार्चितुमिच्छति। तस्य तस्याचलां श्रद्धां तामेव विदधाम्यहं। स तया श्रद्धया युक्तस्तस्याराधनमीह
ते। लभते च ततः कामान्मयैव विहितान्हि तानिति। ये यथा मां प्रपद्यंते तांस्तथैव भजाम्यहमिति चेति॥ ३४॥ संस्तुवे

यः प्राकृतैर्ज्ञानपथैर्जनानां यथाशयं देहगतो विभाति। यथाऽनिलः पार्थिवमाश्रितो गुणं स ईश्वरो मे कुरुतान्मनोरथं।
३४॥ ॥श्रीशुक उवाच॥ ॥इति स्तुतः संस्तुवतः स तस्मिन्नघमर्षणे। आविरासीत्कुरुश्रेष्ठ भगवान्भक्तवत्सलः॥ ३५॥
कृतपादः सुपर्णांसे प्रलंबाष्टमहाभुजः॥ चक्रशंखासिचर्मेषुधनुःपाशगदाधरः॥ ३६॥ पीतवासा घनश्यामः प्रसन्नवद
नेक्षणः॥ वनमालानिवीतांगो लसच्छ्रीवत्सकौस्तुभः॥ ३७॥ महाकिरीटकटकः स्फुरन्मकरकुंडलः। कांच्यंगुलीयव
लय नूपुरांगदभूषितः॥ ३८॥ त्रैलोक्यमोहनं रूपं बिभ्रत्त्रिभुवनेश्वरः॥ वृतो नारदनंदाद्यैः पार्षदैः सुरयूथपैः॥ ३९॥

तो दक्षस्य भगवान्प्रत्यक्षोऽभूत्॥ ३५॥ तं वर्णयति सार्द्धैश्चतुर्भिः सुपर्णस्यांसे स्कंधे कृतौ पादौ येन प्रलंबा अष्टौ महांतो भुजा
यस्य चक्राद्यष्टायुधधरः॥ ३६॥ प्रसन्ने वदने ईक्षणे च यस्य वनमालया निवीतं कंठादिपादांतव्याप्तमंगं यस्य। लसंतौ श्रीव
त्सकौस्तुभौ यस्य॥ ३७॥ महांति किरीटकुंडलानि यस्य। स्फुरंतौ मकरकुंडले यस्य। कांच्यादिभिर्भूषितः। वलयमत्र पादभूष
णं द्रष्टव्यं कटकस्योक्तत्वात्॥ ३८॥ त्रैलोक्यमोहनं रूपं श्रीपुरुषोत्तमाख्यं सुरयूथपैर्लोकपालैः॥ ३९॥४०॥४१॥

नि

भा०ष० आपूरितानिमनोद्वाराणींद्रियाणितैर्यथाह्रदिन्योनद्योनिर्झरैराप्र्यंतेतथामहानंदापूर्णत्वेनातृप्तिकत्वाद्वागादी
नांनकिंचिदुक्तुंशक्तोभूदित्यर्थः।यद्यप्यसौनावोचत्तथापिचित्तज्ञइदंवक्ष्यमाणमाह॥४२॥भावंभक्तिंगतःप्राप्तः॥
४३॥यत्‌यतस्तेतपःअस्यविश्वस्यउद्बृंहणंवृद्धिकरमतस्तेहंप्रीतः।मत्परायसोलोकसमृद्ध्यर्थत्वेतत्प्रीतिःकिंकारणंतत्राह।

स्तूयमानोनुगायद्भिःसिद्धगंधर्वचारणैः॥रूपंतन्महदाश्चर्यंविचक्ष्यागतसाध्वसः॥४०॥ननामदंडवद्भूमौप्रहृ
ष्टात्माप्रजापतिः।नकिंचनोदीरयितुमशकत्तीव्रयामुदा।४१।आपूरितमनोद्वारैर्ह्रदिन्यइवनिर्झरैः॥तंतथा
वनतंभक्तंप्रजाकामंप्रजापतिं॥चित्तज्ञःसर्वभूतानामिदमाहजनार्दनः॥४२॥ ॥भगवानुवाच॥ ॥प्राचेत
समहाभागसंसिद्धस्तपसाभवान्॥यच्छ्रद्धयामत्परयामयिभावंपरंगतः॥४३॥प्रीतोहंतेप्रजानाथयत्ते
१८ स्योद्बृंहणंतपः॥ममैषकामोभूतानांयद्भूयासुर्विभूतयः॥४४॥ब्रह्माभवोभवंतश्चमनवोविबुधेश्वराः।विभूत १८
योममह्येताभूतानांभूतिहेतवः॥४५॥

ममेति।भूतानांविभूतयःसमृद्धयोभूयासुरितियत्‌एषएवममकामः।अतोमत्कामपूरणादेवाहंप्रीतोस्मीत्य
र्थः॥४४॥भूतिविस्तारंप्रयलब्धतवोचितएवेत्याह॥ब्रह्मेति।भवंतःप्रजापतयःभूतेरुद्भवस्यहेतवः॥४५॥

विश्ववृद्ध्यर्थेनत्वत्तपसाहंप्रीतइत्युक्तं।तदेवतपःस्तुवन्प्रसंगादन्यान्यपिलोकवृद्धिकराणिविद्यादीनिस्तौति।तपःयमनियमादिस
हितंध्यानं।मेहृदयं।विद्यासांगमंत्रजपःसाध्यानंतत्नोतीतितनुर्देहः।क्रियाध्यानादिविषयः।पुंव्यापारोभावनाशब्दवाच्यस्तेनहिध्याना
दिकमाक्रियतइत्याकृतिः।जाताःसुनिष्पन्नाःक्रतवोंगानिशिरोवाएतद्यज्ञस्यवर्ग्यःग्रीवाउपसदःवक्षःवीआज्यत्रागावित्यादिश्रुतेः।ध
र्मःक्रत्वाद्यपूर्वं।आत्मामनःहृदयाश्रयत्वात्।सुराःयज्ञभुजस्तएवअसवःप्राणाःसंतर्प्पणीयत्वात्॥४६॥तपसःसंतानवृद्धिहेतु
तपोमेहृदयंब्रह्मंस्तनुर्विद्याक्रियाकृतिः॥अंगानिक्रतवोजाताधर्मआत्मासवःसुराः॥४६॥अहमेवासमेवाग्रेनान्यत्किं
चांतरंबहिः।संज्ञानमात्रमव्यक्तंप्रसुप्तमिवविश्वतः॥४७॥मय्यनंतगुणेनंतेगुणतोगुणविग्रहः॥यदासीत्तत‌एवाद्यःस्व
यंभूःसमभूदजः॥४८॥सवैयदामहादेवोममवीर्योपबृंहितः॥मेनेखिलमिवात्मानमुद्यतःस्वर्गकर्मणि॥४९॥अथमे
भिहितोदेवःतपोतप्यतदारुणं॥सचविश्वसृजोयुष्मान्येनादावसृजद्विभुः॥५०॥एषापंचजनस्यांगदुहितावैप्र
जापतेः॥असिक्नीनामपत्नीत्वेप्रजेशःप्रतिगृह्यतां॥५१॥
तंदर्शयितुंद्वितीयंतृतीयोक्तमितिहासमाह।चतुर्भिः।अहमेवेतिवस्त्वंतरव्यावृत्तिः।आसमेवेतिक्रियांतरव्यावृत्तिः।अंत
रंग्राहकं।बहिर्ग्राह्यं।संज्ञानमात्रंचैतन्यमात्रं।अव्यक्तं।इंद्रियवृत्तिभिरनभिव्यक्तं।अतएवप्रसुप्तमिवविश्वतःसर्वत्र॥४७॥
गुणतोमायातःगुणमयोविग्रहोब्रह्मांडं।ततःतदेवआत्तःअयोनिजः॥४८॥खिलमसमर्थमिव॥४९॥मेमयातपतपेत्यभि
हितःसन्येनतपसा॥५०॥संततिवृद्ध्युपायमाह।एषेति।अंगहेदक्षःपंचजनाख्यस्यप्रजापतेः॥५१॥

मिथुनस्ययो व्यवायोरतिस एव धर्मोयस्य स त्वं। तथाभूतायां तस्यां॥५२॥ मायया निमित्तभूतया स्त्रियासह मिथुनीभूय भविष्यंति। पुत्रादिरू
पेणोत्पत्स्यंते॥५३।५४॥ ॥इति षष्ठे चतुर्थः॥ ॥पंचमे नारदेनाथ वाचः कूटैस्त्रु नाशितान्॥ सुतानाकर्ण्य दक्षोमुं शशापेति निरूप्यते।१॥
अपृथग्धर्मशीला एकाचारस्वभावाः॥२॥ तत्र प्रतीच्यां दिशि सिंधोर्नद्याः समुद्रस्य च यत्र संगमस्तत्रस्थं नारायणसरो नाम तीर्थं जग्म
युरित्यन्वयः॥ सुमहत् अति विस्तीर्णं॥३॥ विनिर्धूतो मलो रागादिर्यस्मात् स आशयो येषां तान् शुद्धसत्त्वानपि॥४॥ पित्रादेशेनाज्ञेन प्र

मिथुनव्यवायधर्मस्त्वं प्रजासर्गमिमं पुनः॥ मिथुनव्यवायधर्मिण्यां भूरिशो भावयिष्यसि॥५२॥ त्वत्तोऽधस्तात्प्रजाः सर्वा मिथु
नीभूय मायया। मदीयया भविष्यंति हरिष्यंति च मे बलिं॥५३॥ ॥श्रीशुक उवाच॥ ॥इत्युक्त्वा मिषतस्तस्य भगवान्विश्वभा
वनः। स्वप्नोपलब्धार्थ इव तत्रैवांतर्दधे हरिः॥५४॥ ॥इति श्रीभागवते महापुराणे षष्ठस्कंधे चतुर्थोध्यायः॥
१९ ॥ ॥श्रीशुक उवाच॥ ॥तस्यां स पांचजन्यां वै विष्णुमायोपबृंहितः। हर्यश्वसंज्ञानयुतं पुत्रानजनयद्विभुः॥१॥ अपृथ
ग्धर्मशीलास्ते सर्वे दाक्षायणा नृप। पित्रा प्रोक्ताः प्रजासर्गे प्रतीचीं प्रययुर्दिशं॥२॥ तत्र नारायणसरस्तीर्थं सिंधुसमुद्रयोः
संगमो यत्र सुमहन्मुनिसिद्धनिषेवितं॥३॥ तदुपस्पर्शनादेव विनिर्धूतमलाशयाः॥ धर्मे पारमहंस्ये च प्रोत्पन्नमतयोप्युत
॥४॥ तेपिरे तप एवोग्रं पित्रादेशेन यंत्रिताः॥ प्रजाविवृद्धये यत्तान्देवर्षिस्तान्ददर्श ह॥५॥ उवाच चाथ हर्यश्वाः कथं स्रक्ष्यथ
वै प्रजाः॥ अदृष्ट्वांतं भुवो यूयं बालिशा बत बालकाः॥६॥
जाविवृद्धये यत्तान् उद्युक्तान् ददर्श॥५॥ एते ही मोक्षमार्गाधिकारिणः संति एते प्रवृत्तिनिष्ठैः कर्मभिर्न क्लिश्येरन्निति कृपया तान्निगू
ढार्थैर्वाक्यैरुपदिशति स्म। तदाह। उवाचेति चतुर्भिः। बालकाः संतोपि बालिशाः अज्ञाः यूयं कथं प्रजाः स्रक्ष्यथ। बतेति खेदे। बा
लका इति पाठे। बालिशत्वे हेतुः॥६॥

अहो २

एक एव पुरुषो यस्मिन् तद्राष्ट्रं अदृष्ट्वेत्यनुषंगः। बिलं बेत्यादि द्वितीयांतानां अविज्ञाय कथं सर्गं करिष्यथेति तृतीयेनान्वयः॥७॥ पंचरूप
चानां पंचविंशो रद्भुतं गृहं। क्षौरपव्यं क्षुरैः पविभिर्वज्रैश्च निर्मितमिवातितीक्ष्णं दृढं चेत्यर्थः। स्वयं स्वतंत्रं भ्रमितृ भ्रमणस्वभावं।८॥ विपश्चि
तः सर्वज्ञस्य स्वपितुरादेशमात्मनोऽनुरूपमविद्वांसोऽजानंतः पूर्वोक्तमहोसर्गं करिष्यथेत्यन्वयः॥९॥ वाचः कूटं परोक्षवादेनार्थांतरमिवप्र
तीयमानं वचनं। औत्पत्तिकी सहजा मनीषा विचारशक्तिर्यस्याः तया धिया स्वयमेव विममृशुः विचारितवंतः॥१०॥ नारदोक्तदृष्टवाक्यानां तै

तथैकपुरुषं राष्ट्रं बिलं चादृष्टनिर्गमं॥ बहुरूपां स्त्रियं चापि पुमांसं पुंश्चलीपतिं॥७॥ नदीमुभयतो वाहां पंचपंचाद्भुतं गृहं॥ क्व
चिद्धंसं चित्रकथं क्षौरपव्यं स्वयं भ्रमि॥८॥ कथं स्वपितुरादेशमविद्वांसो विपश्चितः॥ अनुरूपमविज्ञाय अहो सर्गं करिष्यथ।
९॥ ॥श्रीशुक उवाच॥ ॥तन्निशम्याथ हर्यश्वा औत्पत्तिकमनीषया॥ वाचः कूटं तु देवर्षेः स्वयं विममृशुर्धिया॥१०॥ भूः क्षेत्रं जी
वसंज्ञं तैयदनादि निजबंधनं। अदृष्ट्वा तस्य निर्वाणं किमसत्कर्मभिर्भवेत्॥११॥ एक एवेश्वरस्तुर्यो भगवान्स्वाश्रयः परः। तमदृ
ष्ट्वाभवं पुंसः किमसत्कर्मभिर्भवेत्॥१२॥
र्विमृश्य निर्णीतानर्थानाह दशभिः। अदृष्ट्वांतं भुव इत्यत्र भूशब्दार्थमाह। भूरिति क्षेत्रं तद्वाच्यं जीवसंज्ञं लिंगशरीरं यत् निजबंधनमात्म
नो बंधकारणं। अंतशब्दार्थमाह। निर्वाणं नाशं। असद्भिर्मोक्षानुपयोगिभिः कर्मभिः किं भवेन्न किमपि॥११॥ एकपुरुषमि
त्यस्यार्थमाह। एक एवेति। तुर्यः सर्वसाक्षी। स्वाश्रयः स्वाधारः अभवं नित्यमुक्तं। असद्भिः ईश्वरासमर्पितैः कर्मभिः
॥१२॥

दिलंबाद्दृष्टनिर्गममित्यस्यार्थमाह। पुमानिति यद्गत्वा प्राप्य बिलस्वर्गं पातालं गत इव। नैवेति नावर्त्तते तत्प्रत्यक्धाम ज्योतीरूपं ब्रह्म अविदः अविदुषः असद्भिः नश्वरस्वर्गादिसाधनैः कर्मभिः॥१३॥ बहुरूपां स्त्रियमित्यस्यार्थमाह। नानारूपेति स्वैरिणी पुंश्चलीव विमोहकैः रजआदिगुणैः अन्विता। तन्निष्ठां आगतस्य। अवसानविवेकमप्राप्तस्य। असद्भिरशांतैः॥१४॥ पुमांसं पुंश्चलीपतिमित्यस्यार्थमाह॥ तस्याः संगेन भ्रंशितमैश्वर्यं स्वातंत्र्यं यस्य। कुत्सिता भार्या यस्य तद्वत्। तस्या गताः सुबलक्षणाः। संसरंतीव अबुधस्य। अजानतः। असद्भिः बुद्धिविवेकप्राप्तैः॥१५॥ नदीमुभयतोवाहामित्यस्यार्थमाह। सृष्ट्यप्ययोक

पुमान्नैवेति यद्गत्वा बिलस्वर्गं गतो यथा॥ प्रत्यग्धामाविद इह किमसत्कर्मभिर्भवेत्॥१३॥ नानारूपात्मनो बुद्धिः स्वैरिणीव गुणान्विता। तन्निष्ठामगतस्येह किमसत्कर्मभिर्भवेत्॥१४॥ तत्संगभ्रंशितैश्वर्यं संसरंतं कुभार्यवत्॥ तद्गतीरबुधस्येह

२० किमसत्कर्मभिर्भवेत्॥१५॥ सृष्ट्यप्ययकरीं मायां वेलाकूलांतवेगिनीं। मत्तस्य तामविज्ञस्य किमसत्कर्मभिर्भवेत्॥१६॥ पंचविंशतितत्त्वानां पुरुषोऽद्भुतदर्पणः। अध्यात्ममबुधस्येह किमसत्कर्मभिर्भवेत्॥१७॥

रोतीत्युभयतः प्रवाहो वृत्तिः। वेलाकूलप्रवाहपतितानां निर्गमस्थानं तयोर्विद्यादितस्यांते समीपे वेगिनी निर्गमप्रतिबंधाय क्रोधाहंकारादिभिः कृतवेगां। मत्तस्य तद्वेगेन विवशस्य अत एव तां तथाभूतामविज्ञस्य अविचारयतः असद्भिर्मायिकैः। यद्वा वेलाकूलं समुद्रस्य व्यवहारस्थानं तस्य समीपे समुद्रहद्भिर्वृद्धासान्यां यथा उभयतो तरङ्गैः कृतवेगा नदी भवति। एवं समुद्रतुल्यस्य आत्मनो व्यवहारस्थाने देहे जन्ममरणादिभिः कृतवेगामित्यर्थः। वेगिनीमिति पाठे वेगवती॥१६॥ पंचपंचेत्यस्यार्थमाह। पंचविंशतितत्त्वानां पुरुषोंतर्यामी अद्भुतदर्पणं आश्चर्यरूप आश्रयः अध्यात्मं कार्यकारणसंघाताधिष्ठातारं तमबुध २०

ता

क्वचिद्धंसमित्यस्यार्थमाह। ऐश्वरं ईश्वरप्रतिपादकं विविक्तं पदं चिज्जडरूपं वस्तु येनेति हंसपदव्याख्यानं। बंधमोक्षावनुदर्शयतीति तथा। अनेन चित्राः कथा यस्येति व्याख्यातं तदुत्सृज्य अनन्य आज्ञाय अविदुषोऽसद्भिर्बहिर्मुखैः॥१८॥ क्षौरपव्यामित्यस्यार्थमाह। कालचक्रमिति। भ्रमिः भ्रमणात्मकं तीक्ष्णमिति निःकर्षयदिति च। क्षौरपदं व्याख्यातं तदबुधस्य। अत एव फलस्य नित्यत्वबुद्ध्या काम्यकर्मानुष्ठानवैगुण्यबाहुल्याद्सद्भिः॥१९॥ स्वपितुरादेशमित्यस्यार्थमाह। शास्त्रस्य स्वपितुर्द्वितीयजन्महेतोः तदनुरूपा

ऐश्वरं शास्त्रमुत्सृज्य बंधमोक्षानुदर्शनं॥ विविक्तपदमज्ञाय किमसत्कर्मभिर्भवेत्॥१८॥ कालचक्रं भ्रमिस्तीक्ष्णं सर्वं निःकर्षयज्जगत्॥ स्वतंत्रमबुधस्येह किमसत्कर्मभिर्भवेत्॥१९॥ शास्त्रस्य पितुरादेशं यो न वेद निवर्त्तकं॥ कथं तदनुरूपाय गुणविस्रंभ्युपक्रमेत्॥२०॥ इति व्यवसिता राजन् हर्यश्वा एकचेतसः॥ प्रययुस्तं परिक्रम्य पंथानमनिवर्त्तनं॥२१॥ स्वरब्रह्मणि निर्भातहृषीकेशपदांबुजे॥ अखंडं चित्तमावेश्य लोकाननुचरन्मुनिः॥२२॥ नाशं निशम्य पुत्राणां नारदाच्छीलशालिनां॥ अन्वतप्यत कः शोचन् सुप्रजस्त्वं शुचां पदं॥२३॥

यनिवृत्त्यनुरूपाय निवर्त्तकमादेशं यो न वेद स कथं गुणविश्रंभी गुणमयप्रवृत्तिमार्गविश्वासवान् सन् उपक्रमेत। स्वच्छंदोऽप्रवर्त्तेत॥२०॥ मोक्षपेशब्रह्मबुद्धीनां जीवमायांतरात्मनां। शास्त्रकालोपदेशानां मज्ञानं किमु कर्मभिः॥ इति चावः कूटसंग्रहश्लोकः॥ इति व्यवसिताः। एवं निश्चितवंतः एकचेतसः एकमत्यं युक्ताः। तं नारदं प्रदक्षिणीकृत्य अपुनरावृत्तिमार्गं प्रययुः॥२१॥ निर्भातः साक्षात्कृतो यो हृषीकेशः तस्य पदांबुजे अनुवर्त्तते अन्वचरदित्यर्थः॥२२॥ नाशं नामदर्शनं स्वधर्मभ्रंशं वा। शीलेन शालंते शोभंत इति तथा तेषां। कः दक्षः सुप्रजास्त्वं सन्यूनवत्त्वं शुचां शोकानां स्थानं॥२३॥

२०

अजेन ब्रह्मणा। सहस्रशः सहस्रसंख्याकान्। २४॥ येपि बा परमं ब्रह्म प्रणवं वक्ष्यमाणं मंत्रं वा। २५। इडस्पतिं वाचां मंत्राणां पतिं
विष्णुमाराधयामासुः। २६। विशुद्धसत्वाश्रयाय परमहंसाय नमो धीमहि॥ २७॥ प्रतिसर्गे धीर्येषां तान्। काकूदानि अद्दष्ट्वा
तं भुवइत्यादीनि पूर्वोक्तानि प्राह॥ २८॥ हे दाक्षायणाः संश्रृणुतेत्यादि पुनरन्यदपि प्राह। निगमम् उपदेशः। अन्वीक्षित अवलो
कयत। २९॥ प्रायणं प्रकृष्टगमनं। पुण्यमेव बंधुर्यस्य मरुद्भिर्भ्रातृवत्सलैर्देवैः। ३०। अमोघं दर्शनं यस्य। हे मारिष आर्य।

सभूयः पांचजन्यायामजेन परिसांत्वितः। पुत्रानजनयद्दक्षः शबलाश्वान् सहस्रशः॥ २४॥ तेपि पित्रा स
मादिष्टाः प्रजासर्गे धृतव्रताः॥ नारायणसरो जग्मुर्यत्र सिद्धाः स्वपूर्वजाः॥ २५॥ तदुपस्पर्शनादेव विनिर्धू
तमलाशयाः॥ जपंतो ब्रह्म परमं तेपुस्तेत्र महत्तपः॥ २६॥ अब्भक्षाः कतिचिन्मासान् कतिचिद्वायुभो
२१ जनाः॥ आराधयन्मंत्रमिममभ्यस्यंत इडस्पतिं॥ २७॥ ओं नमो नारायणाय पुरुषाय महात्मने। विशु
द्धसत्वधिष्ण्याय महाहंसाय धीमहि॥ २८॥ इति तानपि राजेंद्र प्रतिसर्गधियो मुनिः। उपेत्य नारदः प्राह
वाचः कूटानि पूर्ववत्॥ २९॥ दाक्षायणाः संश्रृणुतेत्यादि पुनरन्यदपि प्राह। निगमम् उपदेशः। अविक्षत ‍ २१
गदतो निगमं मम। अन्वीक्षतानुपदवीं भ्रातॄणां पितृवत्सलाः॥ ३०॥ भ्रातॄणां प्रायणं भ्राता यो नुतिष्ठति धर्मवित्
सपुण्यबंधुः पुरुषो मरुद्भिः सह मोदते॥ ३१॥ एतावदुक्त्वा प्रययौ नारदोमोघदर्शनः। तेपि चान्वगमन्मार्गं भ्रातॄणामेव मा
अती रिष॥ ३२॥ सध्रीचीनं प्रतीचीनं परस्यानुपथं गताः। नाद्यापि ते निवर्तंते पश्चिमा यामिनीरिव॥ ३३॥
३२। सध्रीचीनं समीचीनं प्रतीचीनं प्रत्यग्वृत्तिलभ्यं। अनुपथं अनुगुणं पंथानं। पश्चिमा यामिनीः गताः रात्रय इव॥ ३३॥ ३४। ३५

बालानां मतिं पुत्रादिविषयां भिनत्तीति तथा। एवं निर्घृणः। हरेर्यशो नाशकः सन् तत्पार्षदानां मध्ये कथं चरसि॥३८॥
निवृत्त त्वमेवाह। ननु त्वामृते भागवताः सर्वभूतानुग्रहपरवशाः। त्वं तु भूतविप्रियं कुर्वन् कथं न लज्जस इति भावः॥३९॥
ननु वैराग्यादुपशमः उपशमाच्च भूतस्नेहपाशच्छेदनं भवति। न च विरक्तस्य ऋणत्रयापाकरणमावश्यकं। यदहरेव विर
जेत् तदहरेव प्रव्रजेत्। यदि वा इतरथा ब्रह्मचर्यादेव प्रव्रजेदित्यादिश्रुतेः। अतो वैराग्योपदेशेन तेषां मयानुग्रह एव कृत इ

एवं त्वं निरनुक्रोशो बालानां मतिभिद्धरेः। पार्षदमध्ये चरसि यशोहा निरपत्रपः॥३८॥ ननु भागवता नित्यं
भूतानुग्रहकातराः॥ ऋते त्वां सौहृदघ्नं वै वैरंकरमवैरिणां॥३९॥ नेत्थं पुंसां विरागः स्यात्त्वया केव
लिना मृषा। मन्यसे यद्युपशमं स्नेहपाशनिकृंतनमित्यर्थः॥४०॥ नानुभूय न जानाति पुमान् विष
२२ यतीक्ष्णतां॥ निर्विद्यते स्वयं तस्मान्न तथा भिन्नधीः परैः॥४१॥ यन्नस्त्वं कर्मसंधानां साधूनां गृहमेधि २२
नां॥ कृतवानसि दुर्मर्षं विप्रियं तव मर्षितं॥४२॥

ति चेत्तत्राह। नेति यद्यपि त्वमेवं मन्यसे तथापि मृषा केवलिना ज्ञानं विना अवधूतवेषेण त्वया इत्थं मतिचालने कृतेऽपि पुंसां विरागो नै
व स्यात्। न च विरागं विनोपशमः। न च तेन विना स्नेहपाशनिकृंतनमित्यर्थः॥४०॥ इत्थं विरागो न स्यादित्यत्र हेतुमाह। नानुभूयेति अ
ननुभूय विषयाणां तीक्ष्णतां दुःखहेतुत्वं न जानाति। तस्माद्विषयानुभवेन तीक्ष्णत्वज्ञानात्॥४१॥ अतस्त्वयास्माकमप्रियं कृ
तं तथापि वयं कुर्म इत्याह यदिति। कर्मसंधानां कर्ममर्यादानां। कर्मसंधानामिति पाठे विप्रियं कर्तुमजानतामित्यर्थः। दुःसहं यत्त्वं कृ

तथापि त्वा नाहं त्वं विष्यत्येवेत्याह। तंतुकृंतन संतानच्छेदक यद्यपि स्यात्। अभद्रं पुत्राणां स्थानभ्रंशं पदं स्थानं न भवेदिति भ्र
दुच्छेदन शापः॥४३॥ बाढं तथेति स्वीकृतवान्। ईश्वरोऽपि प्रतिशप्तुं समर्थोऽपि तितिक्षेत सहेत इति यत्। एतावानेव॥४४॥ षष्ठे पं
चमः॥ ॥षष्ठे दक्षेण सृष्टा या कन्याः षष्टिः प्रकीर्तिताः। पृथग्वंशा यतो जातो विश्वरूपो दितेः सुतात्॥१॥ नारदात्पुत्राणां नाश

तंतुकृंतन यन्नस्त्वमभद्रमचरः पुनः। तस्माल्लोकेषु ते मूढ न भवेद्भ्रमतः पदं॥४३॥ ॥श्रीशुक उवाच॥ ॥प्रतिजग्रा
ह तद्बाढं नारदः साधुसंमतः। एतावान् साधुवादो हि तितिक्षेतेश्वरः स्वयं॥४४॥ ॥इति श्रीभागवते महापु
राणे षष्ठस्कंधे दक्षनारदशापः पंचमोऽध्यायः॥ ॥श्रीशुक उवाच॥ ॥ततः प्राचेतसोऽसिक्न्यामनुनीतः स्वयं
भुवा। षष्टिं संजनयामास दुहितॄः पितृवत्सलाः॥१॥ दश धर्माय कायेंदोर्द्विषट् त्रिणव दत्तवान्॥
भूतांगिरःकृशाश्वेभ्यो द्वे द्वे तार्क्ष्याय चापराः॥२॥ नामधेयान्यमूषां त्वं सापत्यानां च मे शृणु। यासां प्रसूति
प्रसवैर्लोका आपूरितास्त्रयः॥३॥ भानुर्लंबा ककुब्जामिर्विश्वा साध्या मरुत्वती॥ वसुर्मुहूर्ता संकल्पा धर्मपत्न्यः
सुतान् शृणु॥४॥ भानोस्तु देवऋषभ इंद्रसेनस्ततो नृप॥ विद्योत आसील्लंबायास्ततश्च स्तनयित्नवः॥५॥

मासिक्न्यां नानोदुहितॄर्जनयामास॥१॥ काय। कश्यपाय। द्विषट्। द्विगुणाः षट् द्वादश। इंदवे सुताः। त्रयोदश इत्यर्थः। इंदोः सोमा
य त्रिनव सप्तविंशति। तार्क्ष्याय नामांतर आख्याय। कश्यपायैव। अपराः अवशिष्टाश्चतस्रः॥२॥ सापत्यानां अपत्यसहितानां
मे मत्तः शृणु। प्रसूतिप्रसवैः पुत्रपौत्रादिभिः॥३॥४॥ ततो वेदऋषभात्॥५॥

जाणस्योर्जस्वती भार्या सहऋायुः पुरोजवः। धूवस्य भार्या धरणीरसूत विविधा पुरः।१२। अर्कस्य वासना भार्या पुत्रास्तर्षादयः स्मृताः।।१३

यतः कीकटाद्दुर्वो दुर्गाणि दुर्गाभिमानिनो देवाः ज्ञामेयाः ज्ञाम्याः पुत्राः स्वर्गः।६। तत्स्मृतः साध्या नां स्मृतः।७।८।९। वसो
र्वेत्रास्य भूयस्त्वादंते निर्दिष्टाः मे मन्त्रः।१०। अभिमतिर्नाम पत्नी तस्या हर्षादयः पुत्राः।।११।। सहश्च। पुत्राः। पुरः पुराणि

विश्वेदेवास्तु विश्वाया अप्रजां स्तान् प्रचक्षते।। साध्यो गणस्तु साध्याया अर्थसिद्धिस्तु तत्सुतः।।७।।
मरुत्वांश्च जयंतश्च मरुत्वत्यां बभूवतुः।। जयंतो वासुदेवांश उपेंद्र इति यं विदुः।८। मौहूर्तिका देवग
णा मुहूर्ताया श्च जज्ञिरे। ये वै फलं प्रयच्छंति भूतानां स्वस्वकालजं।। ९।। संकल्पायाश्च संकल्पः का
मः संकल्पजः स्मृतः।। वसवोऽष्टौ वसोः पुत्रास्तेषां नामानि मे शृणु।।१०।। द्रोणः प्राणो ध्रुवोऽर्कोऽग्निर्दो
षो वसुर्विभावसुः।। द्रोणस्याभिमतेः पत्न्या हर्षशोकभयादयः।। ११।। स्कंदश्च कृत्तिका पुत्रो ये विशा
खादयस्ततः।। दोषस्य शार्वरी पुत्रः शिशुमारो हरेः कला।।१४।। वसोरांगिरसी पुत्रो विश्वकर्माकृतीपतिः। त
तो मनुश्चाक्षुषोऽभूत् विश्वेसाध्या मनोः स्मृताः।।१५।। विभावसोरसूत तोषा व्युष्टं रोचिषमातपं।। पंचयामाथ
भूतानि येन जाग्रति कर्मसु।।१६।। सरूपाऽसूत भूतस्य भार्या रुद्रांश्च कोटिशः।। रैवतोऽजो भवो भीमो वा
म उग्रो वृषाकपिः।।१७।। अजैकपादहिर्बुध्न्यो बहुरूपो महानिति।। रुद्रस्य पार्षदाश्चान्ये घोरा भूतविनाय
काः।।१८।।
१२।१३। स्कंदश्च कृत्तिकासुतोऽग्नेः पुत्रो षाण्मातुर इति अग्निभूरिति च प्रसिद्धेः। ततः स्कंदात्।।१४।। आकृतीपतिः शिल्पा
चार्यः ततो विश्वकर्मणः चाक्षुषो मनुरासीत्।।१५।। उषा भार्या। आतपात् पंचयामा दिवसो जातः अत एव रात्रिस्त्रियामा प्रदोषप्र
त्यूषयोर्दिवसस्यावयवत्वात्।१६।। भूतस्य द्वे भार्ये तयो र्वेत्रामाह सरूपेति।।१७।१८।

गुद्रुमः संकल्प्यकीर्तनलयोपयतः। दुर्वोदुर्गाणि ग्रामे
धाः स्वर्गादिफलाभवत्।६

२३

२३

पुत्राणां पारमहंस्यनिष्ठामुपश्रुत्य दक्षोपि अयं शोकविरक्तः स्यादिति तदनुग्रहार्थं देवर्षिस्तत्पार्श्वं गतः तदा तमुपलक्ष्य दक्ष आह। साधोरिव लिंगं वेषो यस्य तेन त्वया नोस्मदीयानां मर्मकारणं असाधु अकारि कृतं। तदेवाह। साधूनां स्वधर्मे प्रवृत्तानां भिक्षोर्मार्गः प्रदर्शित इति।। ३६।। ननु संन्यासिनो मार्गः साधुरेव मोक्षहेतुत्वात् सत्यं। ऋणत्रयापाकरणं विना तु महाननर्थ एवेत्याह। ऋणैरिति। जायमानो वै ब्राह्मणस्त्रिभिर्ऋणवान् जायते। ब्रह्मचर्येण। ऋषिभ्यो यज्ञेन। देवेभ्यः प्रजया पितृभ्यः।

एतस्मिन् काल उत्पातान् बहून् पश्यन् प्रजापतिः।। पूर्ववन्नारदकृतं पुत्रनाशमुपाशृणोत्।। ३४।। चुक्रोध नारदायासौ पुत्रशोकविमूर्छितः।। देवर्षिमुपलभ्याह रोषाद्विस्फुरिताधरः।। ३५।।
अहो असाधो साधूनां साधुलिंगेन नस्त्वया। असाध्वकार्यर्भकाणां भिक्षोर्मार्गः प्रदर्शितः।। ३६।। ऋणैस्त्रिभिरमुक्तानाममीमांसितकर्म्मणां। विघातः श्रेयसः पाप लोकयोरुभयोः कृतः।। ३७।।

एष वा अनृणो यः पुत्री। यद्वा ब्रह्मचारी वासी तिष्ठते। ऋणैरमुक्तानां नमीमांसितानि विचारितानि कर्म्माणि ये तेषां तावदृणविमोक्षो नास्ति तदुत्तरकालभावित्वाच्च। पुत्रोत्पादनयज्ञानुष्ठानयोरभावेन पितृदेवर्षिणां तद्विमुक्तिर्नास्ति अतः हेयोपादेयविषयज्ञोगत्या गात् इह लोके श्रेयसो विघातः कृतः मोक्षानधिकारित्वाच्च परलोकेपि श्रेयसो विघातः कृत इत्यर्थः। तथा च मनुः। ऋणानि त्रीण्यपाकृत्य मनो मोक्षे निवेशयेत्। अनपाकृत्य मोक्षं तु सेवमानो व्रजत्यधः इति।। ३७।।

महानित्येवमेकादशरूपस्य रुद्रस्य पार्षदाः प्रेतादयः अन्ये अन्यस्यां जाताः।। अंगिरसः स्वधा सती चेति द्वे भार्ये तयोर्वंशमाह। प्रजापतेरिति। स्वधा नाम पत्नी पितॄन् पुत्रत्वे अकरोत्। अथ सती च अथर्वांगिरसं नाम वेदं।। १९।। कृशाश्वस्य अर्चिर्धिषणेति द्वे भार्ये तयोर्वंशमाह। कृशाश्व इति।। २०।। २१।। सुपर्णी विनता। अनूरुं अरुणं।। २२।। रोहिण्यामेव प्रेमातिशयेन अन्यासामुपेक्षणात् कुपित

प्रजापतेरंगिरसः स्वधा पत्नी पितॄनथ।। अथर्वांगिरसं वेदं पुत्रत्वे चाकरोत् सती।। १९।। कृशाश्वोऽर्चिषि भार्यायां धूम्रकेशमजीजनत्। धिषणायां वेदशिरो देवलं वरुणं मनुं।। २०।। तार्क्ष्यस्य विनता कद्रूः पतंगी यामिनीति च।। पतंग्यसूत पतगान् यामिनी शलभानथ।। २१।। सुपर्णासूत गरुडं साक्षाद्यज्ञेशवाहनं।। सूर्यसूतमनूरुं च कद्रूर्नागाननेकशः।। २२।। कृत्तिकादीनि नक्षत्राणीन्दोः पत्न्यस्तु भारत।। दक्षशापात् सोऽनपत्यस्तासु यक्ष्मग्रहार्दितः।। २३।। पुनः प्रसाद्य तं सोमः कला लेभे क्षये दिताः।। शृणु नामानि लोकानां मातॄणां शंकराणि च।। २४।। अथ कश्यपपत्नीनां यत्प्रसूतमिदं जगत्।। अदितिर्दितिर्दनुः काष्ठा अरिष्टा सुरसा इला।। मुनिः क्रोधवशा ताम्रा सुरभिः सरमा तिमिः।। २५।।

स्य दक्षस्य शापात् यक्ष्मग्रहार्दितः क्षयरोगपीडितः सन् तास्वनपत्योऽभूत्। २३। तं दक्षं प्रसाद्य केवलं कला एव लेभे न त्वपत्यानि। कथंभूताः क्षये कृष्णपक्षे दिताः खंडिताः सतीः। पाठांतरे क्षये सति पुनरेधिताः तेनैव वर्धिताः सतीः।। २४।। २५।

अल्पत्वेन सुगमत्वाद्यथाकथंचुक्रमेण तासां वंशानाह तिमेरित्यादिना। २५। २७। सोवसाः सुरसायाः पुत्राः। २८। प्राधानिकानस्व
 ख्यानष्टदश श्रृणु॥ २९।३०।३१। वैश्वानरो दनोः पुत्रस्तस्य सुताः। ३२। कः प्रजापतिः कश्यप उपयेमे। दानवीं परिणयनेहेतुः।

निर्मयादोगणा आसन्श्वापदाः सरमासुताः॥ सुरभेर्महिषा गावो ये चान्ये द्विशफा नृप॥ २६॥ ताम्रायाः श्येनगृध्रा
द्यामुनेरथरसांगणाः॥ दंदशूकादयः सर्पा राजन्क्रोधवशात्मजाः॥ २७॥ इलाया भूरुहाः सर्वे यातुधानाश्च सौरसाः॥
अरिष्टायाश्च गंधर्वाः काष्ठाया द्विशफेतराः॥ २८॥ सुता दनोरेकषष्टिस्तेषां प्राधानिकान्शृणु॥ द्विमूर्द्धा शंबरोरिष्टो ह
यग्रीवो विभावसुः॥ २९॥ अयोमुखः शंकुशिराः स्वर्भानुः कपिलोरुणः॥ पुलोमा वृषपर्वा च एकचक्रोनुतापनः॥ ३०॥
धूम्रकेशो विरूपाक्षो विप्रचित्तिश्च दुर्जयः॥ स्वर्भानोः सुप्रभां कन्यामुवाह नमुचिः किल॥ वृषपर्वणस्तु शर्मिष्ठां यया
तिर्नहुषो बली॥ ३१॥ वैश्वानरसुता याश्च चतस्रश्चारुदर्शनाः॥ उपदानवी हयशिरा पुलोमा कालका तथा॥ ३२॥ उप
दानवीं हिरण्याक्षः क्रतुर्हयशिरां नृप॥ पुलोमां कालकां च द्वे वैश्वानर —सुते तु कः॥ उपयेमेथ भगवान्कश्य
पो ब्रह्मचोदितः॥ ३३॥ पौलोमाः कालकेयाश्च दानवा युद्धशालिनः॥ तयोः षष्टिसहस्राणि यज्ञघ्नांस्ते पितुः पिता॥ जघान स्व
र्गतो राजन्नेक इंद्रप्रियंकरः॥ ३४॥
ब्रह्मणा चोदित इति॥ ३३॥ तयोः षष्टिसहस्राणि निवातकवचाः पुत्रा जाताः॥ ३४॥ ॐ नमो भगवते वासुदेवाय॥ ॥

तान्स्वर्गंगतः सन्ते पितामहोऽर्जुनो जघान। ३५। राहुर्ज्येष्ठो यस्य। ३६॥ असूयत अजनयत् भुवि वर्त्तमाना॥ ३९॥ त
तः विवस्वतः॥ ४०॥ वर्षणायः कृताकृतज्ञानवतः॥ यत्र यतिकर्मत्वेन निषेधो उक्तः॥ यत्र येषु आत्मानुसंधाना विशेषेण
मानुषीजातिश्चोपकल्पिता तथास्वश्रुतिः पुरुषत्वे वा विस्तरामाप्नोति॥ ४१॥ कुपितं हरमिति शेषः। विवृतद्विजः प्रकटितदं

विप्रचित्तिः सिंहिकायां शतं चैकमजीजनत्॥ राहुज्येष्ठं केतुशतं ग्रहत्वं य उपागताः॥ ३५॥ अथातः श्रूयतां वंशो
यो दितेरनुपूर्वशः॥ यत्र नारायणो देवः स्वांशेनावातरद्विभुः॥ ३६॥ विवस्वानर्यमा पूषा त्वष्टाथ सविता भगः॥
धाता विधाता वरुणो मित्रः शक्र उरुक्रमः॥ ३७॥ विवस्वतः श्राद्धदेवं संज्ञासूयत वै मनुं॥ मिथुनं च महाभा य
मं देवं यमीं तथा॥ सैव भूत्वाथ वडवा नासत्यौ सुषुवे भुवि॥ ३८॥ छाया शनैश्चरं लेभे सावर्णिं च मनुं ततः॥
कन्यां च तपतीं या वै वव्रे संवरणं पतिं॥ ३९॥ अर्यम्णो मातृका पत्नी तयोश्चर्षणयः सुताः॥ यत्र वै मानुषी जा
तिर्ब्रह्मणा चोपकल्पिता॥ ४०॥ पूषाऽनपत्यः पिष्टादो भग्नदंतोभवत्पुरा॥ योसौ दक्षाय कुपितं जहास
विवृतद्विजः॥ ४१॥ त्वष्टुर्दैत्यात्मजा भार्या रचना नाम कन्यका॥ संनिवेशस्तयोर्जज्ञे विश्वरूपश्च वी
र्यवान्॥ ४२॥ तं वव्रिरे सुरगणा स्वस्रीयं द्विषतामपि॥ विमतेन परित्यक्ता गुरुणांगिरसेन यत्॥ ४३॥
तः सन्॥ ४२॥ यद्यदा विमतेन अवज्ञातेन बृहस्पतिना परित्यक्ताः तदा द्विषतां शत्रूणां भागिनेयमपि विश्वरू
पं पौरोहित्ये वृतवंतः॥ ४३॥ ॥षष्ठे षष्ठः॥ ॥ ॥

त्रि ३

सप्तमे विमतेनाश्वरूपोसौ यो रोहित्येद्वतः सुरैः॥ गुरुणा संपरित्यक्तैः पौरोहित्यमथाकरोत्॥१॥ यस्य हेतोः कस्मात् हेतोः
आत्मनः शिष्याः सुराः परित्यक्ताः॥ अक्रमम् अपराधं॥१॥ सइंद्रो यदा संप्राप्तं वाचस्पतिं नाभ्यनंदत् नाद्दतवान् तदा स आं
गिरसः ततो निर्गत्य तूष्णीं स्वगृहमाययावित्यष्टानामन्वयः॥ अनादरहेतुं मदं दर्शयितुं तं विनष्टि। त्रिभुवनैश्वर्यमदे

साध्यैश्च ३

इतिश्रीभागवते महापुराणे षष्ठस्कंधे षष्ठोध्यायः॥ ॥राजोवाच॥ ॥यस्य हेतोः परित्यक्ता आचार्येणात्म
नः सुराः॥ एतदाचक्ष्व भगवन् शिष्याणामक्रमं गुरौ॥१॥ ॥श्रीबादरायणिरुवाच॥ ॥इंद्रस्त्रिभुवनैश्वर्य
मदोल्लंघितसत्पथः॥ मरुद्भिर्वसुभिरुद्रैरादित्यैर्ऋभुभिर्नृप २॥ विश्वेदेवैश्च नासत्यौ परिश्रितः॥ सिद्ध श्यां
चारणगंधर्वैर्मुनिभिर्ब्रह्मवादिभिः॥३॥ विद्याधराप्सरोभिश्च किंनरैः पतगोरगैः॥ निषेव्यमाणो मघवा
न्स्तूयमानश्च भारत॥४॥ उपगीयमानो ललितमास्थानाध्यासनाश्रितः॥ पांडुरेणातपत्रेण चंद्रमंड
२५ लचारुणा॥५॥ युक्तश्चान्यैः पारमेष्ठ्यैश्चामरव्यजनादिभिः॥ विराजमानः पौलोम्या महार्हासनया
भृशं॥६॥ स यदा परमाचार्यं देवानामात्मनश्च ह॥ नाभ्यनंदत संप्राप्तं प्रत्युत्थानासनादिभिः॥७॥ २५

नोल्लंघितः सतां पंथा येन सः॥२ परिश्रितः परिवृतः॥३॥४॥ आस्थानं सभा तस्यां मध्यासनं सिंहासनं तदाश्रि
तः॥५॥ पारमेष्ठ्यैर्महाराजचिह्नैः॥ आसनस्यार्द्धे स्थितया पौलोम्या सह विराजमानः सन्॥६॥ उत्थानादिना
नाभ्यनंदत॥७॥ ॥

नचोच्चचाल आसन एव स्थितोपि किंचिन्न चलितवान्॥८॥ श्रीमदेन या विक्रिया तां जै विद्वान् जानन्॥९॥ प्रतिबुध्य अ
नुस्मृत्य॥१०॥ मम कृतं कर्म अहो असाधु यद्यस्मात् दभ्रबुद्धिना अल्पमतिना मया कात्कृतस्तिरस्कृतः॥११॥॥
विबुधानां सात्विकानां देवानामीश्वरोपि सन्नप्यहं॥१२॥ कुपथं ननु सिंहासनस्थो राजा ऽभ्युत्थानं न कुर्यादि

वाचस्पतिं मुनिवरं देवासुरनमस्कृतं। नोच्चचालासनादिंद्रः पश्यन्नपि समागतं॥८॥ ततो निर्गत्य सह
सा कविरांगिरसः प्रभुः। आययौ स्वगृहं तूष्णीं विद्वान् श्रीमदविक्रियां॥९॥ तर्ह्येव प्रतिबुध्येंद्रो गुरु
हेलनमात्मनः॥ गर्हयामास सदसि स्वयमात्मानमात्मना॥१०॥ अहो बत मया साधु कृतं वै दभ्रबुद्धि
ना॥ यन्मयैश्वर्यमत्तेन गुरुः सदसि कात्कृतः॥११॥ को गृध्येत्पंडितो लक्ष्मीं त्रिविष्टपपतेरपि। यया
हमासुरं भावं नीतोद्य विबुधेश्वरः॥१२॥ ये पारमेष्ठ्यं धिषणमधितिष्ठन्न कंचन। प्रत्युत्तिष्ठेदिति ब्रू
युर्धर्मं ते न परं विदुः॥१३॥ तेषां कुपथदेष्टॄणां पततां तमसि ह्यधः॥ ये श्रद्दध्युर्वचस्ते वै मज्जंत्यश्मप्ल
वा इव॥१४॥ अथाहममराचार्यमगाधधिषणं द्विजं। प्रसादयिष्ये निशठः शीर्ष्णा तच्चरणं स्पृशन्॥१५

ति वदंति। तत्राह। यइति द्वाभ्यां धिषणमासनं॥१३॥ कुपथं दिशंति उपदिशंतीति कुपथदेष्टारस्तेषां व
चः। अश्ममयः प्लवो येषां। ते यथा मज्जंतं प्लवमनुमज्जंति तद्वत्॥१४॥ अगाधा गंभीरा धिषणा यस्य तं। निश
ठः शाठ्यहीनः सन्॥१५॥ श्रीवासुदेवाय नमः॥

अधिकयात्ममायया ॥ १६ ॥ गुरोः संज्ञा ज्ञानोपायपरीक्षमाणोपि नाधिगतः । अप्राप्तः सन् ॥ १७ ॥ आततायिनः
उद्यतास्त्राः ॥ १८ ॥ निर्भिन्नान्यंगानि उत्तमांगानि शिरांसि उरवो बाहवश्च येषां ॥ १९ ॥ २० ॥ वो युष्माकं कृतं करणं महत्तदंत
दाह । ब्रह्मिष्ठमिति नाभ्यनंदत । नाभिवंदितवंतः ॥ २१ ॥ परेभ्यः शत्रुभ्यो वः पराभव इति यत् । अयं तस्य अनयस्य अ

एवं चिंतयतस्तस्य मघोनो भगवान्गृहात् ॥ बृहस्पतिर्गतोऽदृष्टां गतिमध्यात्ममायया ॥ १६ ॥ गुरोर्नाधिग
तः संज्ञां परीक्षन्भगवान्स्वराट् ॥ ध्यायन्धिया सुरैर्युक्तः शर्म नालभताऽत्मनः ॥ १७ ॥ तच्छ्रुत्वैवासु
राः सर्व आश्रित्यौशनसं मतं ॥ देवान्प्रत्युद्यमं चक्रुर्दुर्मदा आततायिनः ॥ १८ ॥ तैर्विसृष्टेषुभिस्ती
क्ष्णैर्निर्भिन्नांगोरुबाहवः ॥ ब्रह्माणं शरणं जग्मुः सहेंद्रा नतकंधराः ॥ १९ ॥ तांस्तथाभ्यर्दितान्वीक्ष्य भ
गवानात्मभूरजः ॥ कृपया परया देव उवाच परिसांत्वयन् ॥ २० ॥ ॥ ब्रह्मोवाच ॥ ॥ अहो बत सुरश्रे
ष्ठा ह्यभद्रं वः कृतं महत् ॥ ब्रह्मिष्ठं ब्राह्मणं दांतमैश्वर्यान्नाभ्यनंदत ॥ २१ ॥ तस्यायमनयस्यासीत्परेभ्यो
वः पराभवः ॥ प्रक्षीणेभ्यः स्ववैरिभ्यः समृद्धानां च यत्सुराः ॥ २२ ॥ मघवन्द्विषतः पश्य प्रक्षीणान्गुर्वतिक्र
मात् ॥ संप्रत्युपचितान्भूयः काव्यमाराध्य भक्तितः ॥ आददीरन्निलयनं ममापि भृगुदेवताः ॥ २३ ॥

न्यायस्य संबंधी फलरूप आसीत् । उक्तं च । ब्राह्मणं कुलसंपन्नं भक्तं विष्णोर्महात्मनः । आयांतं वीक्ष्य नोत्तिष्ठेत्स
दुःखैः परिभूयते ॥ इति स्व यमवैरिभ्यो हंता रो येषां तेभ्यः ॥ २२ ॥ गुरुतिरस्कारविसर्जनादिकारवितापवयोपचयका
रणमित्यसुरदृष्टांतेनाह ॥ मघवन्निति । द्विषतः शत्रून्काव्यं भार्गवं गुरुमेवाराध्य सख्योपचितान् । उप

न

आ नो यो मंत्रो येषां । अनुशिक्षितार्थाः शिष्याः यतः गोविंदो गावश्चेश्वराः अनुग्राहका येषां तेषामेव अभद्राणि न
भवंति । अन्येषां तु भवंति ॥ २४ ॥ तत्तस्मात् । अथ अनंतरमेव भजत । अस्य कर्म असत्परपक्षपात । २५ ॥ उदिता उक्ताः ॥ २६
॥ २७ ॥ २८ ॥ अतिथीनां पितॄणां च प्रशंसार्थमाहुः । आचार्यः उपनीय वेदाध्यापकः । ब्रह्मणो वेदस्य मूर्तिः ॥ २९ ॥ धर्म

त्रिविष्टपं किंगणयत्यमोघमंत्राथ भृगुवत्रिशिक्षितार्थाः । न विप्रगोविंदगवीश्वराणां भवंत्यभद्राणि नरेश्व
राणां ॥ २४ ॥ तद्विश्वरूपं भजताऽशु विप्रं तपस्विनं त्वाष्ट्रमथो भवंतः ॥ संभावितोऽर्थान्स विधास्यते वो यदि क्ष
मिष्यध्वमुतास्य कर्म ॥ २५ ॥ ॥ शुक उवाच ॥ ॥ एवमुदिता राजन्ब्रह्मणा विगतज्वराः ॥ ऋषिं त्वाष्ट्रमु
पव्रज्य परिष्वज्येदमब्रुवन् ॥ २६ ॥ ॥ देवा ऊचुः ॥ ॥ वयं तेऽतिथयः प्राप्ता आश्रमं भद्रमस्तु ते ॥ कामः संपाद्य
तां तात पितॄणां समयोचितः ॥ २७ ॥ पुत्राणां हि परो धर्मः पितृशुश्रूषणं सतां ॥ अपि पुत्रवतां ब्रह्मन्किमुत
ब्रह्मचारिणां ॥ २८ ॥ आचार्यो ब्रह्मणो मूर्तिः पिता मूर्तिः प्रजापतेः ॥ भ्राता मरुत्पतेर्मूर्तिर्माता साक्षात्
क्षितेस्तनुः ॥ २९ ॥ दयाया भगिनी मूर्तिर्धर्मस्यात्माऽतिथिः स्वयं ॥ अग्नेरभ्यागतो मूर्तिः सर्वभूतानि चा
त्मनः ॥ ३० ॥

स्य आत्मा मूर्तिरिति यः स्वयं साक्षात् आत्मनः श्रीविष्णोः । यद्वा । आत्मनः स्वस्य सर्वभूतेष्वात्मदृष्टिः
कर्तव्येत्यर्थः ॥ ३० ॥ ॥ ॥

परेभ्यः पराभव एवार्त्तिस्तां॥ ३१॥ तं देवा आहुः वृणीमह इति॥ ३२॥ ननु उपाध्यायत्वे कनिष्ठस्य ममाभिवन्दनं करिष्यथ। तच्च गर्हितं। तत्राहुः। नेति। अर्थेषु प्रयोजननिमित्तं यविष्ठानामभिवादनं न निंदंति। किंवा। छंदोभ्यः मंत्रेभ्योऽन्यत्र वयोज्यैष्ठस्य कारणं न तु मंत्रेषु। अतोऽस्य मंत्रदातृत्वेन भवन्तमेव ज्येष्ठं वृणुम इत्यर्थः॥ ३३॥ भविष्यसि। यद्वा। छंदोभ्यो

तस्मात्पितॄणामार्त्तानामार्त्तिः परपराभवं॥ तपसापनयंस्त्वात नं देवां कर्तुमर्हसि॥ ३१॥ वृणीमहे त्वोपाध्या

२७ यं ब्रह्मिष्ठं ब्राह्मणं गुरुं॥ यथांजसा विजेष्यामः सपत्नांस्तव तेजसा॥ ३२॥ न गर्हयंति ह्यर्थेषु यविष्ठांघ्र्य

भिवादनं॥ छंदोभ्योऽन्यत्र न ब्रह्मन्वयो ज्यैष्ठस्य कारणं॥ ३३॥ ॥ऋषिरुवाच॥ ॥अभ्यर्थितः सुरग

णैः पौरोहित्ये महातपाः॥ स विश्वरूपस्तानाह प्रसन्नः श्लक्ष्णया गिरा॥ ३४॥ ॥विश्वरूप उवाच॥ ॥वि

गर्हितं धर्मशीलैर्ब्रह्मवर्च उपव्ययं॥ कथं नु मद्विधो नाथा लोकेशैरभियाचितः॥ कथं त्वो २७

न्यत्र वेदान्विहाय वयएवं ज्येष्ठस्य कारणं न भवति किंतु वेदा एव कारणं तस्माद्यद्यपि त्वं वयः। वेदस्तानाद्युत्तमे वज्ज्येष्ठ इत्यर्थः॥ ३४॥ निंदितमपीदं युष्मद्वाक्यभंगभयेन करिष्यामीत्याह सार्द्धेन। विगर्हितं पौरोहित्यं धर्मशीलैः स्थ महेतुत्वात्। किंच ब्रह्मवर्च उपव्ययं। पूर्वसिद्धस्य ब्रह्म व्ययकरं। प्रत्याख्यातुं च मादृग्गो नार्हतीत्याह। कथं त्वि ति। तेषां शिक्षणार्हः अतएव प्रत्याख्या नाभाव एव हि शिष्यस्य स्वार्थ उच्यते॥ ३५॥

तेन

ननु पौरोहित्येन धनं नत्वाद्धर्मः सिद्ध्येत। अन्यथा निर्द्धनस्य कुतो धर्मः। अतएव लोको हृष्यति। तत्राह। अकिंच नानां हि शिलोञ्छनं धनं। क्षेत्रे स्वामिना उपेक्षितकणिशोपादानं शिलं हट्टादौ पतिततण्डुलाद्येकैकरूपोपादानमुञ्छनं। इह गृहाश्रमे तेनै वनिर्वर्त्तितावार्त्ता साधूनां सत्क्रियायेन॥ ३६॥ कियदेतत्प्रार्थितमल्पमेव। अन्यदपि किमपि करिष्यामीत्याह। भवतामिति। उ

अकिंचनानां हि धनं शिलोञ्छनं तेनेह निर्वर्त्तितसाधुसत्क्रियाः॥ कथं विगर्ह्यं नु करोम्यधीश्वराः पुरोधसं हृष्यति येन दु

 र्मतिः॥ ३६॥ तथापि न प्रतिब्रूयां गुरुभिः प्रार्थितं कियत्॥ भवतां प्रार्थितं सर्वं प्राणैरर्थैश्च साधये॥ ३७॥ ॥श्री

शुक उवाच॥ ॥तेभ्य एवं प्रतिश्रुत्य विश्वरूपो महातपाः॥ पौरोहित्यं वृतश्चक्रे परमेण समाधिना॥ ३८॥ सुरद्विषां

श्रियं गुप्तामौशनस्यापि विद्यया॥ आच्छिद्यादान्महेन्द्राय वैष्णव्या विद्यया विभुः॥ ३९॥ यया गुप्तः सहस्राक्षो जि

ग्ये ऽसुरचमूर्विभुः॥ तां प्राह स महेन्द्राय विश्वरूप उदारधीः॥ ४०॥ ॥इति श्रीभागवते महापुराणे षष्ठस्कंधे सप्त

मोऽध्यायः॥ ॥राजोवाच॥ ॥यया गुप्तः सहस्राक्षः सवाहान्रिपुसैनिकान्॥ क्रीडन्निव विनिर्जित्य त्रिलोक्या

बुभुजे श्रियं॥ १॥ भगवंस्तन्ममाख्याहि वर्म नारायणात्मकं॥ यथाऽऽततायिनः शत्रून्येन गुप्तोऽजयन्मृधे॥ २॥

समाधिनापरमो द्यमेन॥ ३८॥ वैष्णव्या श्रीनारायणकवचात्मिकया॥ ३९॥ असुरचमूः दैत्यसेनाः॥ ४०॥ ॥षष्ठे सप्तमे

अष्टमे विश्वरूपस्तु वर्म नारायणात्मकं॥ इन्द्राय प्राह येनेन्द्रो गुप्तो दैत्यानथाजयत्॥ त्रिलोक्याः संबंधिनीं श्रियं॥ १॥ २॥ २

श्वर्यादिभिर्भगशब्दवाच्याभिः विद्यावतेजश्चतपश्च मूर्त्तिर्यस्य इमं वक्ष्यमाणं श्रीनारायणाकवचाख्यं। अष्टगुणः अणिमाद्यष्टैश्वर्ययुक्तं॥२०॥ १५

भा० ष० मंत्राभ्यामष्टाक्षरद्वादशाक्षराभ्यां। कृतः स्वांगेषु करयोश्च न्यासो येन। नारायणमयं वर्मसंनह्येत् बध्नीयात्॥४॥ तत्राष्टाक्षरेण पादाद्यष्टांगेषु न्यासमाह। पादयोरिति सार्द्धेन। प्रणवसंपुटितमोंकाराद्येकैकमक्षरं विन्यसेत्॥५॥ विपर्ययं यथा न्वत्येवं शिरआदिपादांतं वा विन्यसेत्। उत्पत्तिन्यासं संहारन्यासं वा कुर्यात्। इत्यर्थः॥६॥ द्वादशाक्षरस्योद्धारः। प्रणवादियकारांतमिति। प्रणवसंपुटितमेकैकमक्षरं दक्षिणतर्जनीमारभ्य वामतर्जनीषु परिशिष्टमक्षरचतुष्टयोराद्यंतपर्वसु न्यसेत्

श्रीशुकउवाच॥ ॥वृतः पुरोहितस्त्वाष्ट्रो महेंद्रायानुपृच्छते॥ नारायणाख्यं वर्माह तदिहैकमनाः शृणु॥ ३॥

विश्वरूपउवाच॥ ॥धौतांघ्रिपाणिराचम्य सपवित्र उदङ्मुखः। कृतस्वांगकरन्यासो मंत्राभ्यां वाग्यतः शुचिः॥ नारायणपरं वर्म संनह्येद्भय आगते॥४॥ पादयोर्जानुनोरूर्वोरुदरे हृद्यथोरसि॥ मुखे शिरस्यानुपूर्व्यादोंकारादीनि विन्यसेत्॥५॥ ॐ नमो नारायणायेति विपर्ययमथापि वा। करन्यासं ततः कुर्याद्द्वादशाक्षरविद्यया॥६॥ प्रणवादियकारांतमंगुल्यंगुष्ठपर्वसु॥ न्यसेद्धृदय ॐकारं विकारमनु मूर्द्धनि॥७॥ षकारं तु भ्रुवोर्मध्ये णकारं शिखया दिशेत्॥ वेकारं नेत्रयोर्युंज्यान्नकारं सर्वसंधिषु॥८॥ मकारमस्त्रमुद्दिश्य मंत्रमूर्त्तिर्भवेद्बुधः॥ सविसर्गं फडंतं तत्सर्वदिक्षु विनिर्दिशेत्॥९॥ ॐ विष्णवे नम इति। आत्मानं परमं ध्यायेत् ध्येयं षट्शक्तिभिर्युतं॥ विद्यातेजस्तपोमूर्त्तिमिमं मंत्रमुदाहरेत्॥१०॥ २८

मंत्रांतरन्यासमाह। न्यसेदिति॥७॥ षकारणकारयोर्विश्लेषेण षडक्षराणि हृदयादिषु न्यसेत्॥८॥ मकारमस्त्रमुद्दिश्य ध्यात्वा तन्मकारास्त्रमस्त्राय फडित्येवं दिग्बंधे विदिशेत्॥९॥ ध्येयमीश्वररूपमात्मानं ध्यायेत्। षट्शक्तिभिः ऐ

यादसां गणाः एव वरुणस्य पाशास्तस्मात्॥११॥ अटवी आजिमुखं संग्रामो पग्रहश्च आदिर्येषां तेषु संकटस्थानेषु॥१२॥ असौ प्रसिद्धो वराहो मामध्वनि रक्षतु। यज्ञैश्चायं वरूपैः कल्प्यते निरूप्यते इति तथा। उन्नीता उद्धृता धरा येन सः। अद्रिकूटेषु गिरिशिखरेषु रामो जामदग्न्यः॥१३॥ उग्रधर्मो दम्भिचारादिलक्षणात्। हासात् गर्वात् नरः अवतु। दत्तो दत्तात्रेयः अयो

ॐ हरिर्विदध्यान्मम सर्वरक्षां न्यस्तांघ्रिपद्मः पतगेंद्रपृष्ठे॥ दरारिचर्मासिगदेषुचापपाशान्दधानोऽष्टगुणोऽष्टबाहुः॥१०॥ जलेषु मां रक्षतु मत्स्यमूर्त्तिर्यादोगणेभ्यो वरुणस्य पाशात्॥ स्थलेषु मायाबटुवामनोऽव्यात्त्रिविक्रमः खेऽवतु विश्वरूपः॥११॥ दुर्गेष्वटव्याजिमुखादिषु प्रभुः पायान्नृसिंहोऽसुरयूथपारिः॥ विमुंचतो यस्य महाट्टहासं दिशो विनेदुर्न्यपतंश्च गर्भाः॥१२॥ रक्षत्वसौ माध्वनि यज्ञकल्पः स्वदंष्ट्रयोन्नीतधरो वराहः॥ रामोऽद्रिकूटेष्वथ विप्रवासे सलक्ष्मणोऽव्याद्भरताग्रजोऽस्मान्॥१३॥ मामुग्रधर्मादखिलात्प्रमादान्नारायणः पातु नरश्च हासात्॥ दत्तस्त्वयोगादथ योगनाथः पायाद्गुणेशः कपिलः कर्मबंधात्॥१४॥ सनत्कुमारोऽवतु कामदेवाद्धयशीर्षा मां पथि देवहेलनात्॥ देवर्षिवर्यः पुरुषार्चनांतरात्कूर्मो हरिर्मां निरयादशेषात्॥१५॥

गात् योगनाशात्॥१४॥ पथि यद्देवहेलनं नमस्कारमकृत्वा गमनं तस्मात्। पुरुषार्चनस्यांतरात् तदेव छिद्रात् द्वात्रिंशदपराधरूपान्नारदः॥१५॥

लोकाज्जनापवादाद्यज्ञः। जनान्निमित्तो योऽतउपघातः तस्मात् बलभद्रः अवतात्। कृतांतादिति पाठे कृतांतात्कालात् रक्षतु क्रो
धवशात्सर्पाणां गणात् अहीद्रः शेषः॥१६॥ कालमलभूतात् कलेः कल्किः धर्मावनाय धर्मरक्षणाय उरुर्महान् कृतो
ऽवतारो येन॥१७॥ दिनस्य षड्भागेषु क्रमेण प्रातरादिसंज्ञेषु। रात्रेश्च प्रदोषादिसंज्ञेषु प्रार्थनं मां केशवइति
त्रिभिः आसंगवं संगवमभिव्याप्य॥१८॥ त्रिधामा ब्रह्मादित्रिमूर्तिः श्रीमाधवः दोषे अर्द्धरात्रिपर्यंते काले निशी

धन्वंतरिर्भगवान्पात्वपथ्यात् द्वंद्वात् भयादृषभो निर्जितात्मा॥ यज्ञश्च लोकादवताज्जनांतात् बलो ग
णात्क्रोधवशादहीद्रः॥१६॥ द्वैपायनो भगवानप्रबोधात् बुद्धस्तु पाषंडगणात्प्रमादात्। कल्किः
२९ कलेः कालमलात्प्रपातु धर्मावनायोरुकृतावतारः॥१७॥ मां केशवो गदया प्रातरव्याद्गोविंद आसं ।टी
गवमात्तवेणुः। नारायणः प्राह्ण उदात्तशक्तिर्मध्यंदिने विष्णुरहींद्रपाणिः॥१८॥ देवोऽपराह्णे मधुहो २९
ग्रधन्वा सायं त्रिधामाऽवतु माधवो मां॥ दोषे हृषीकेश उतार्द्धरात्रे निशीथ एकोऽवतु पद्मनाभः॥१९॥
श्रीवत्सधामाऽपररात्र ईशः प्रत्यूष ईशोऽसिधरो जनार्दनः॥ दामोदरोऽव्यादनुसंध्यं प्रभाते विश्वेश्व
रो भगवान्कालमूर्तिः॥२०॥

थे व एक एव पद्मनाभोऽवतु॥१९॥ अपररात्रे ईशः श्रीवत्सधामाऽवतु। प्रत्यूषे ईशः श्रीजनार्दनः। श्रीदामोदरः
प्रभाते। श्रीविश्वेश्वरोऽवतु संध्यं॥२०॥

युगांतानलवत्तिग्मा तीक्ष्णा नेमिर्यस्य तच्चक्रं भगवता प्रयुक्तं सत्। अरिसैन्यं दंदग्धि [दंदग्ध्यरिसैन्यमाशु। कक्षं यथा वातसखो हुताश]
अतिशयेन दहति। तस्यायं स्वभाव एव न तु तस्मात्प्रार्थनीयमित्यर्थः। यद्वा दंदग्धीति लोण्मध्यमपुरुषः। अत्र त्वमेवंभूतं चक्रमिति स्व
रूपमुक्त्वा संबोध्य प्रार्थ्यते। अतिशयेन दहेति। अतिशयेन दहेति। कक्षं शुष्कतृणं॥२१॥ अशनिवत्स्पर्शो येषां ते विस्फुलिंगा य
स्याः तस्याः संबोधनं हे गदे त्वमजितस्य प्रियासि। अहं च अच्युतस्य दासः अतः कूष्मांडादीन्निष्पिंडि निष्पिंडि। संचूर्णय संचूर्णय। स

चक्रं युगांतानलतिग्मनेमि भ्रमत्समंताद्भगवत्प्रयुक्तं। दंदग्धि दंदग्ध्यरिसैन्यमाशु कक्षं यथा वातसखो हुताशः॥२१॥
गदेऽशनिस्पर्शनविस्फुलिंगे निष्पिंडि निष्पिंड्यजितप्रियासि॥ कूष्मांडवैनायकयक्षरक्षोभूतग्रहांश्चूर्णय चूर्ण
यारीन्॥२२॥ त्वं यातुधानप्रमथप्रेतमातृपिशाचविप्रग्रहघोरदृष्टीन्॥ दरेंद्र विद्रावय कृष्णपूरितो भीमस्वनोऽरे
र्हृदयानि कंपयन्॥२३॥ त्वं तिग्मधारासिवरारिसैन्यमीशप्रयुक्तो मम छिंधि छिंधि॥ चक्षूंषि चर्मन् शत
चंद्र छादय द्विषामघोनां हर पापचक्षुषां॥२४॥ यन्नो भयं ग्रहेभ्योऽभूत् केतुभ्यो नृभ्य एव वा॥ सरीसृपेभ्यो दंष्ट्रि
भ्यो भूतेभ्योंऽहोभ्य एव वा॥२५॥

र्वत्र वीप्सा अतिशीघ्रत्वाय॥२२॥ हे दरेंद्र पांचजन्य त्वं यातुधानादीन् विद्रावय विप्रग्रहाः ब्रह्मराक्षसाः। ये घोराश्च दृष्ट
यस्तान्॥२३॥ तिग्मा धारा यस्य हे तिग्मधार असिवर खड्गश्रेष्ठ त्वं मम अरिसैन्यं छिंधि। शतचंद्राकाराणि मंडलानि यस्मि
न् हे शतचंद्र चर्मन् अघोनां अघवतां द्विषां चक्षूंषि छादय। पापचक्षुषां उग्रदृष्टीनां चक्षूंषि हर॥२४॥ यत् येभ्यो भयं महोभ्यः
पापेभ्यः॥२५॥

श्रेयः प्रतीपकाः। दृष्ट्वा घातकाः॥२६॥ स्तोत्राणि बृहद्रथंतरादिसामानि तैः स्तोम्यते स्तूयते स्तोत्रस्तोमः। छंदोमयो वेदमूर्तिः। सु
पर्णो गरुत्मानित्यादिश्रुतेः। एकपद्यपाठे। स्तोत्रा गीतपूरकाक्षराणि स्तोत्रस्तोमेति पाठे सामाधारभूतत्र्यक्षरस्तोमः॥२७॥ नामानि
स्वरूपाणि च यानानि वाहनानि आयुधानि च नो बुद्ध्यादीन्यांतु। पार्षदभूषणाः पार्षदमुख्याश्च पांतु॥२८॥ सच्चासच्च मूर्तामूर्तं
मूर्तयित तत्सर्वं जगत्॥२९॥ ऐकात्म्यस्यानुभावोऽनुध्यानं। येषां विकल्पो भेदस्तद्रहितोपि॥३०॥ सत्यमानेन सत्यज्ञानेन भ्रमा

सर्वाण्येतानि भगवन्नामरूपास्त्रकीर्तनात्। प्रयांतु संक्षयं सद्यो ये नः श्रेयः प्रतीपकाः॥२६॥ गरुडो भगवान्स्तोत्र
स्तोमः छंदोमयः प्रभुः॥ रक्षत्वशेषकृच्छ्रेभ्यो विष्वक्सेनः स्वनामभिः॥२७॥ सर्वापद्भ्यो हरेर्नामरूपमानायुधा
निनः॥ बुद्धींद्रियमनःप्राणान्पांतु पार्षदभूषणाः॥२८॥ ॥यथा हि भगवानेव वस्तुतः सदसच्च यत्॥ स
त्येनानेन नः सर्वे यांतु नाशमुपद्रवाः॥२९॥ यथैकात्म्यानुभावानां विकल्परहितः स्वयं॥ भूषणायुध
लिंगाख्या धत्ते शक्तीः स्वमायया॥३०॥ तेनैव सत्यमानेन सर्वज्ञो भगवान्हरिः॥ पातु सर्वैः स्वरूपैर्नः सदा
सर्वत्र सर्वगः॥३१॥ विदिक्षु दिक्षूर्ध्वमधः समंतादंतर्बहिर्भगवान्नारसिंहः॥ प्रहापयंल्लोकभयं स्वनेन स्व 30
तेजसा ग्रस्तसमस्ततेजाः॥३२॥ मघवन्निदमाख्यातं वर्म नारायणात्मकं॥ विजेष्यस्यं जसा येन दंशितोऽसुरयूथ स्यं
पान्॥३३॥
णेन॥३१॥ पुनरपि श्रीनृसिंह एव प्रार्थ्यते। विदिक्ष्विति। पात्वित्यनुषंगः। यद्वा नारसिंहः प्रकारः स्वनेन श्रीनृसिंहनाम
गर्जनेन। स्वतेजसा स्वप्रभावेन ग्रस्तानि समस्तानि दिग्गजविषशस्त्रजलवाय्वग्न्यादीनां तेजांसि प्रभावो येन सः॥३२॥
दंशितः कवचितः॥३३॥

सोपि सा ध्वसाद्भयाद्विमुच्यते॥३४॥ तस्य तु भयं न भवेदेव॥३५॥ एतद्विद्याप्रभावमितिहासेनाह। इमामिति सार्द्धैस्त्रि
भिः। मरुद्धन्वनि निरुदके देशे। अनेन विद्यायाः क्षेत्रतीर्थानपेक्षत्वं दर्शितं॥३६॥ यत्र द्विजस्य क्षयो देहत्यागः तस्योपरि॥३७॥
सद्यः तत्क्षणमेव गमनात्त्यपतत्। पाठांतरे। अग नामिः सह वालखिल्योपदेशात्तस्यास्थीनि प्रास्य प्रक्षिप्य विस्मितः
एतद्धारयमाणस्तु यं यं पश्यति चक्षुषा॥ पदा वा संस्पृशेत्सद्यः साध्वसात्स विमुच्यते॥३४॥ न कुतश्चिद्भयं त
स्य विद्यां धारयतो भवेत्॥ राजदस्युग्रहादिभ्यो व्याघ्रादिभ्यश्च कर्हिचित्॥३५॥ इमां विद्यां पुरा कश्चित्कौशि
को धारयन्द्विजः॥ योगधारणया स्वांगं जहौ स मरुधन्वनि॥३६॥ तस्योपरि विमानेन गंधर्वपतिरेकदा। धन्व
ययौ चित्ररथः स्त्रीभिर्वृतो यत्र द्विजक्षयः॥३७॥ गगनान्न्यपतत्सद्यः सविमानो ह्यवाक्शिराः॥ स वालखि
ल्यवचनादस्थीन्यादाय विस्मितः॥३८॥ प्रास्य प्राचीसरस्वत्यां स्नात्वा धाम स्वमन्वगात्॥३८॥
श्रीशुक उवाच॥ ॥य इदं शृणुयात्काले यो धारयति चादृतः॥ तं नमस्यंति भूतानि मुच्यते सर्वतो भयात्॥
३९॥ एतां विद्यामधिगतो विश्वरूपाच्छतक्रतुः॥ त्रैलोक्यलक्ष्मीं बुभुजे विनिर्जित्य मृधेऽसुरान्॥४०॥ ॥इति
श्रीभागवते महापुराणे ष्ठस्कंधे नारायणवर्मनामाष्टमोध्यायः॥ ॥
सन् स्वधाम गंधर्वलोकं जगाम॥३८॥३९॥ अधिगतः प्राप्तः सन्॥४०॥ ॥इति षष्ठेऽष्टमः॥ ॥

न वमे विश्वरूपे तु हते त्र्यंकेण कोपतः॥ ब्रह्मत्वोत्पादितेत्र्येकीतेर्दैवहरे ऽस्मृतिः। सोमस्य पीथं पानं यस्मिन्। एवं सुरापीथं। अन्नमत्तीत्यन्नादं। अत्र विश्वरूपो वै त्वाष्ट्रः पुरोहितो देवानामासीदित्यादिश्रुतिरनुसंधेया॥१॥ तस्यासुरपक्षपातमाह। स वा इति द्वाभ्यां। प्रत्यक्षं प्रकटं यथा भवति तथा सविनयं देवेभ्यो हविर्भागं इंद्रायेदं अग्नये इदमित्युच्चैरवदत्। अत्र

श्रीशुक उवाच॥ ॥ तस्यासन् विश्वरूपस्य शिरांसि त्रीणि भारत॥ सोमपीथं सुरापीथमन्नादमिति शुश्रुम॥१॥ स वै बर्हिषि देवेभ्यो भागं प्रत्यक्षमुच्चकैः॥ अवदद्यस्य पितरो देवाः सप्रश्रयं नृप।

स एव हि ददौ भागं परोक्षमसुरान् प्रति॥२॥ यजमानोऽवहद्भागं मातृस्नेहवशानुगः॥ तद्देवहेलनं तस्य

३१ धर्मालीकं सुरेश्वरः॥ आलक्ष्य तरसा भीतस्तच्छीर्षाण्यच्छिनद्रुषा। सोमपीथं तु यत्तस्य शिर आसीत्क

पिंजलः॥४॥ कलविंकः सुरापीथमन्नादं यत्स तित्तिरिः॥ ब्रह्महत्यामंजलिना जग्राह यदपीश्वरः

५॥ संवत्सरांते तदघं भूतानां स विशुद्धये। भूम्यंबुद्रुमयोषिद्भ्यश्चतुर्धा व्यभजद्धरिः॥६॥ ३१

हेतुः। यस्य पितरो देवाः सः॥२॥ असुरेभ्यस्तु परोक्षं गुप्तं भागं ददौ तदेवाह। देवान्यजमानोऽप्यसावसुरान्प्रति भागमवहत्॥३॥४॥ तं वारयितुमसमर्थः तथापि जग्राह। संवत्सरं तथैव स्थित्वा संवत्सरांते भूतानामभीतः सन् भूतानां मध्ये विशुद्धये लोकापवादपरिहाराय। स हरिरिंद्रो भूम्यादिभ्यस्तदघं विभज्य ददौ॥६॥ ॥

हीनः स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह। स वाग्वज्रो यजमानं हिनस्ति यथेंद्रशत्रुः स्वरतोऽपराधादिति॥११॥ अन्वाहार्यपचनाद्दक्षिणाग्नेः

तुरीयं चतुर्थं भागस्य गर्तस्य पूरः पूरणं तेन वरेण यदिरिणात्पूरणं खातमेव भविष्यति तदा ग्रहीष्यामीत्येवं भागबंधनेन जग्राहेत्यर्थः। इरिणमूषरं अत एवोषरेऽध्ययनादिनिषिध्यते॥७॥ छेदे सति पुनर्विरोहः प्ररोहो भवत्विति वरेण निर्यासरूपेण ब्रह्महत्या या इष्टत्वात् निर्यासो न भक्ष्यः॥८॥ शश्वत्कामवरेण यावत्प्रसवं गर्भानुपघातेन संभोगवरेण। अत एव रजोदर्शने तत्संगादिनकार्यं॥९॥ द्रव्यभूयोवरेण यास्मिन् द्रव्ये क्षारादावापो मिश्रीभवेयुः तस्य भूयस्त्वमाधिक्यं स्यादि १२

भूमिस्तुरीयं जग्राह खातपूरवरेण वै॥ ईरिणं ब्रह्महत्याया रूपं भूमौ प्रदृश्यते॥७॥ तुर्यं छेदविरोहेण वरेण ज

गृहुर्द्रुमाः। तेषां निर्यासरूपेण ब्रह्महत्या प्रदृश्यते॥ शश्वत्कामवरेणांहस्तुरीयं जगृहुः स्त्रियः॥ रजोरूपेण

तास्वंहो मासि मासि प्रदृश्यते॥९॥ द्रव्यभूयोवरेणापस्तुरीयं जगृहुर्मलं॥ तासु बुद्बुदफेनाभ्यां दृष्टं तद्ध

रति क्षिपन्॥१०॥ हतपुत्रस्ततस्त्वष्टा जुहावेंद्राय शत्रवे॥ इंद्रशत्रो विवर्धस्व माचिरं जहि विद्विषं॥११॥ अथा

न्वाहार्यपचनादुत्थितो घोरदर्शनः॥ कृतांत इव लोकानां युगांतसमये यथा॥१२॥

ति वरेण। यद्वा स्वस्येव निर्झरोद्गमादिना भूयस्त्ववरेण। द्रवस्थस्य भूयस्त्व इति पावेप्ययमेवार्थः। यद्वा द्रवभूयस्त्वं सांसिद्धिक द्रवत्वं तेन वरेण। अस्यापि भागस्य विश्वरूपो वै त्वाष्ट्र इत्यस्यां श्रुतावनुक्तेः। तद्विभागफलमाह। तत्पापं हरति निराकरोति कः क्षिपन् बुद्बुदादिजलाद्बहिः प्रक्षिपन्नित्यर्थः। यद्वा क्षिपन् जलं पापं हरति आहरति गृह्णातीति गत्यर्थः। अयं तत्र समाहायो नपरि वर्ष्या इत्यादिश्रुत्यर्थ उक्तः। पाठांतरे हरिरिति किल्बिषं इंद्रपापं॥१०॥ इंद्राय इंद्रं हंतुं शत्रवे शत्रूत्पत्त्यै। तदाह। इंद्रशत्रो विवर्धस्वेति

 अत्र येंद्रशत्रुपदस्याद्युदात्तत्वात् बहुव्रीहिप्रकृत्या पूर्वपदमिति स्मृते बहुव्रीहिलक्षणपत्या इंद्र एव तस्य शत्रुरभूत् तदुक्तं

यद्ब्रवीत्स्वाहेंद्रशत्रुर्वर्धस्वेति तस्मादस्येंद्रः शत्रुरभवदिति। तथा च शिक्षायां मंत्रो

तंवीक्ष्यवित्रस्ता लोका दश दिशो विदुद्रुवुरिति पंचमेनान्वयः। कथंभूतं। विश्वक्समंततः इषुविक्षेपमात्रं प्रतिदिनं वर्द्धमानं।१२।
दग्धशैलप्रतीकाशं कृष्णवर्णं। संध्याभ्रानीकवद्बद्धवेदीप्तिर्यस्य तं॥१३॥ तप्तताम्रवत् शिखाः स्मश्रूणि च यस्य। मध्याह्नार्के
वद् उग्रे लोचने यस्य॥१४॥ रोदसी आरोप्य इवेत्यर्थः॥१५॥ दरीवद्गंभीरेण वक्त्रेण मुहुर्मुहुर्जृंभमाणमित्यन्वयः। कथंभूतेन
नभस्तलं पिबता ऋक्षाणि जिह्वया लिहता भुवनत्रयं ग्रसता॥१६॥ महता विस्तीर्णेन रौद्रा दंष्ट्रा यस्मिन्॥१७॥ हतजना

विष्वग्विवर्द्धमानं तमिषुमात्रं दिने दिने॥ दग्धशैलप्रतीकाशं संध्याभ्रानीकवर्चसं॥१३॥ तप्तताम्रशि
खाश्मश्रुं मध्याह्नार्कोग्रलोचनं॥ देदीप्यमाने त्रिशिखे शूल आरोप्य रोदसी॥ नृत्यंतमुन्नदंतं च चाल
यंतं पदा महीं॥१४॥ दरीगंभीरवक्त्रेण पिबता च नभस्तलं॥ लिहता जिह्वयार्क्षाणि ग्रसता भुवनत्रयं॥
१६॥ महता रौद्रदंष्ट्रेण जृंभमाणं मुहुर्मुहुः॥ वित्रस्ता दुद्रुवुर्लोका वीक्ष्य सर्वे दिशो दश॥१७॥ येनाहता
इमे लोकास्तपसा त्वाष्ट्रमूर्तिना॥ स वै वृत्र इति प्रोक्तः पापः परमदारुणः॥१८॥ तं निजघ्नुरभिद्रुत्य
सगणा विबुधर्षभाः॥ स्वैः स्वैर्दिव्यास्त्रशस्त्रौघैः सोऽग्रसत्तानि कृत्स्नशः॥१९॥

मनिर्माथिकेनाहता इति। त्वाष्ट्री मूर्तिर्यस्य तपसः तेन तथा वक्ष्यति॥ स इमाल्लोकानावृण्वन्यदिमांल्लोकानावृ
णोत् तद्वृत्रस्य वृत्रत्वमिति॥१८॥ अग्रसत् भक्षितवान्॥१९॥

सतः नूनं त्राता रक्षिष्यति। २३॥ संयमांतसिष्व(ल)योदकेउदीर्णैरूर्मिभिर्वातेर्येऽर्मयस्तैर्घोरैः करालैर्भयंकरे अरविंदान्नाभिकम
लात्पतितन्नाय(स्ता)यः। एकोसहायएव तस्मात् भयाद्धैन ततार। सएव नः पारस्तारकोस्तु॥ २४॥

यस्तं तेजो येषां। अत्यंयमं तु यामिणं। त्रिभुवनस्य तेन व्याप्तत्वात् क्वापिगमनासंभवात् तत्रैव स्थित्वा तुष्टुवुरित्यर्थः॥ महान्म
यपरित्राणमन्यतोन भवंति। हरिमेव प्रपद्यंते स्फुराः शरणमातुराः॥२०॥ वायवादीनि यं च महाभूतानि तैर्निर्मितास्त्रयो लोका
स्ते षामधिपतयः ब्रह्मादयश्च ततोऽर्वाचीना वयं च सर्वे यस्मै अंतकाय काला यो द्विजंतः संतो बलिं हराम। असावपि यस्मा
द्बिभेति ततः परमेश्वरादेव नोस्माकमरण्यं रक्षणमस्तु॥ २१॥ तत एवेत्यवधारणे हेतुमाहुः। अविस्मितं निरहंकारं कलह

ततस्तु विस्मिताः सर्वे विषण्णायस्त तेजसः॥ अत्यं च मादि पुरुषमुपतस्थुः समाहिताः॥२०॥ ॥देवाऊचुः॥ ॥वा
य्वंबराग्न्यप्क्षितयस्त्रिलोका ब्रह्मादयो ये वयमुद्विजंतः। हराम यस्मै बलिमंतकोसौ बिभेति यस्मादरणं
ततोनः॥ २१॥ अविस्मितं तं परिपूर्णकामं स्वेनैव लाभेन समं प्रशांतं॥ विनोपसर्पत्यपरं हि बालिशः श्व
लांगुलेनातितितर्त्ति सिंधुं॥ २२॥ यस्योरुश्रृंगे जगतीं स्वनावं मनुर्यथाबध्य ततार दुर्गं॥ सएव नस्त्वाष्ट्रभया
दुरंतात्त्राताश्रितान्वारिचरोपि नूनं॥ २३॥ पुरास्वयंभूरपि संयमांभस्युदीर्णवातोर्मिरवैः करालैः॥ एको
ऽरविंदात्पतितस्तता[illegible]तारतस्माद्भयाद्येन स नोस्तु पारः॥ २४॥

श्रून्यं वा। कुतः प्रशांतं रागादिशून्यं। तच्च कुतः स्वेनैव लाभेन परिपूर्णकामं उपाधिपरिच्छेदशून्यं एवं भूतं परमेश्वरं विना अपरं यः श
रणार्थमुपसर्पति स बालिशोऽज्ञः यतोऽसौ श्वनो लांगूलेन पुच्छेन समुद्रमतितितर्त्ति अतितर्तुमिच्छतीत्यर्थः। यथा तेन समुद्रतर
णं न भवति तथान्याश्रयेण व्यसनार्णवतरणं न भवतीति भावः॥ महाभयेस एव रक्षक इति दृष्टमित्याहुर्यस्येति द्वाभ्यां। यस्य म
हाश्रृंगे जगतीं पृथ्वीमेव स्वनावं बध्वा मनुः सत्यव्रतो यथा बत दुर्गं संकटं ततार। सएव वारिचरो मत्स्यमूर्तिः सोस्मान्त्वाष्ट्राश्रितान्

[illegible]

किंच वयं जगवतैवस्रष्टाः पालिता श्च बकुराः ॥ अतस्तमेव शरणं व्रजामेत्याहुः। यएक इति त्रिभिः। येनानुगृ
हीताः संतो विश्वंसृजाम। ननु यूयमेवस्रष्टारः नान्योयुष्माकमनुग्राहकोस्ति। तस्या दर्शनात्तत्राहुः अस्मत्तः पुरः पू
र्वमेवांतर्यामितया समीहमानस्यापियस्य लिंगं रूपं न पश्याम॥ तत्र हेतुः। पृथक् पृथग्गीशाइत्यभिमानिनः। २५
देवादिषु उपेंद्र परशुराममत्स्यरामादितनुभिः कृतावतारः सन् आत्मसात्कृत्वा पातिच। २६॥ आत्मभूतं दैवतं कुतः वि

यएक ईशो निजमायया नः ससर्ज येनानुसृजाम विश्वं॥ वयं न यस्यापि पुरः समीहतः पश्याम लिंगं पृथगी
शमानिनः॥ २५॥ यो नः सपत्नैर्भृशमर्द्यमानान् देवर्षितिर्यङ्नृषु नित्य एव॥ कृतावतारस्तनुभिः स्वमा
३३ यया कृत्वात्मसात्पाति युगे युगे च॥ २६॥ तमेव देवा वयमात्मदैवतं परं प्रधानं पुरुषं विश्वमन्यं॥
व्रजाम सर्वे शरणं शरण्यं स्वानां स नो धास्यति शं महात्मा॥ २७॥ ॥श्रीशुक उवाच॥ ॥
इति तेषां महाराज सुराणामुपतिष्ठतां॥ प्रतीच्यां दिश्यभूदाविः शंखचक्रगदाधरः॥ २८॥ ३३

श्वं विश्वात्मकं। तथापि विकारं वारयंति। अन्यं विश्वात्महेतुः। परं कारणं ननु प्रधानं पुरुषश्च विश्वस्य कारणं।
तत्राहुः। प्रधानं पुरुषं च। तदात्मकोपि स एवेत्यर्थः। स एव नः शं विधास्यति॥ २७॥ प्रतीच्यां दिशि हृदि प्रथममावि
रभूत्। पुनश्च तं पुरो दृष्ट्वा ईक्षणाह्लादेन विवशा अवनौ दंडवत्पतिताः संतः शनैरुत्थाय तुष्टुवुरित्यन्वयः॥ २८॥ ॥

कथंभूतं श्रीवत्सकौस्तुभौ विना स्वतुल्यैः षोडशभिः सुनंदादिभिः परितः सेवितं। उन्निद्रशारदंबुरुहवदीक्षणे यस्य
तं। ३०॥ यज्ञो वीर्यं स्वर्गादिफलजननाय सामर्थ्यं यस्य तस्मै नमः॥ वयसे उततत्फलपरिछेदककालात्मनेपि। तद्विधात
केषु दैत्येषु अस्तं प्रक्षिप्तं चक्रं येन। एवंभूतैः प्रभावैः स्फपुरुहूतये शोभनं नाम्ने॥ ३१॥ ननु समगुणातीतं रूपं विहाय

आत्मतुल्यैः षोडशभिर्विनाश्रीवत्सकौस्तुभौ॥ पर्युपासितमुन्निद्रशारदंबुरुहेक्षणं॥ २९॥ दृष्ट्वा तमवनौ
सर्व ईक्षणाह्लादविक्लवाः॥ दंडवत्पतिता राजन् शनैरुत्थाय तुष्टुवुः॥ ३०॥ ॥देवा ऊचुः॥ ॥नमस्ते यज्ञवीर्या
य वयसे उत ते नमः॥ नमस्ते ह्यस्तचक्राय नमः सुपुरुहूतये॥ ३१॥ यत्ते गतीनां तिसृणामीशितुः परमं पदं।
नार्वाचीनो विसर्गस्य धातर्वेदितुमर्हति॥ ३२॥

गुणोपाधिकं यज्ञवीर्यत्वादिकिमिति वर्ण्यते। तत्राहुः॥ यत्ते गुणत्रयस्येशितुः नियंतुस्त्रिगुणात्मिकानां
तिसृणां गतीनां परमं पदं निर्गुणं स्वरूपं तद्विसर्गस्यार्वाचीनः इहानीतनः हे धातः वेदितुं नार्हति अतः केव
लं तस्मै ते नमोस्तु॥ ३२॥

मिताक्षराणि पद्यानि नमीयंते हरेर्गुणाः॥ इति पद्यैरनुध्यंतः सद्योगद्येन तुष्टुवुः॥ भक्त्युद्रेकेण बद्धयासंबोधयंतो ऽर्ह्यय
तं प्रपंचयंति। भगवन्नित्यादिना परममंगलं शुद्धो धर्मो यस्मिन् आत्मयोगे नाष्टांगे नयः समाधिः चित्तैकाग्र्यं तेन परिभा
वितः स्फुटीलितः परिस्फुटो यः पारमहंस्यधर्मो भगवद्भजनं तेनउद्घाटितं तमोरूपं कपाटं यस्मिन् तस्मिन् द्वारभू
ते चित्ते अपावृते प्रकटे आत्मलोके अत्यपूर्णे स्वयमेवोपलब्धमभिव्यक्तं यन्निजसुखं तदनुभवरूपो भवान्॥ १॥ न

ॐ नमस्ते भगवन्नारायण वासुदेवादिपुरुष महानुभाव परममंगल परमकल्याण परमकारुणिक के
वल जगधाधार लोकैकनाथ सर्वेश्वर लक्ष्मीनाथ परमहंसपरिव्राजकैः परमेणात्मयोगसमाधिनापरिभा
वित परिस्फुट पारमहंस्यधर्मेणोद्घाटित तमःकपाटद्वारे चित्ते ऽपावृत आत्मलोके स्वयमुपलब्ध
 निजसुखानुभवो भवान्॥ १॥ दुरवबोध इव तवायं विहारयोगो यदशरणो ऽशरीर इदमनवेक्षितो ऽस्मत्
समवाय आत्मनैवाविक्रियमाणेन सगुणमगुणः सृजसि पासि हरसि॥ २॥

नु केवलानुभवरूपत्वे ममस्रष्ट्रादिकर्तृत्वं कथं तत्राहुः। दुरवबोध इव तवायं विहारयोगः क्रीडायोगः। य
दस्मात् अशरणो निराश्रयः इदं विश्वं अनवेक्षितो ऽस्माकं समवायो मेलनं साहाय्यं येन सः॥ २॥

अनुग्रहनिग्रहादिकं तु न तन्मतिभेदेन त्वन्मायया त्वयि स्फुरतीत्याहुः। समाविषमा च मतिर्येषां तेषां मतमभिप्रा
यं सर्पादिविषया धीर्येषां यथा रज्जुखंडस्तथा तथा भाति। यद्वा तमेवाविरोधं पुरुषमतिभेदेन दर्शयति सम विष
मेति॥ ५॥ तदेवं विरोधं परिहृत्य निश्चितं परमार्थमाहुः॥ स एव हि नानारूपेण हि प्रतीतः। वस्तु स्वरूपः सद्रूपः

सम विषममतीनां मतमनुसरसि यथा रज्जुखंडः सर्पादिधियां॥ ५॥ स एव हि पुनः सर्ववस्तुनि व
स्तुस्वरूपः सर्वेश्वरः सकलजगत्कारणकारणभूतः सर्वप्रत्यगात्मत्वात्सर्वगुणाभासोपलक्षित
 एक एव पर्यवशेषितः॥ ६॥ अथ ह वाव तव महिमामृतरससमुद्रविप्रुषा सकृदवलीढया स्वमनसि निष्यंदमाना
नवरतसुखेन विस्मारितदृष्टश्रुतविषयसुखलेशाभासाः परमभागवता एकांतिनो भगवति सर्वभूतप्रियसुहृदि
सर्वात्मनि नितरां निरंतरं निर्वृतमनसः कथमु ह वा एते मधुमथन पुनः स्वार्थकुशला ह्यात्मप्रियसुहृदः सा
धवस्त्वच्चरणांबुजानुसेवां विसृजंति न यत्र पुनरयं संसारपर्यावर्तः॥ ७॥
सर्वेषां गुणानां विषयाणामाभासैः प्रकाशैरुपलक्षितः। ननु तेजीव एवोपलभ्यते। न। सर्वप्रत्यगात्मत्वात्। सर्वजीवांतर्यामित्वात्। ज
डतादात्म्याध्यासे न जीवस्य पिंडप्रायत्वात् तेन विना प्रकाशाद्वृतिभावः पर्यवशेषितः नेति नेतीत्यादिश्रुतिभिः॥ ६॥ अतस्त्वद्भक्तिरेव
परमपुरुषार्थ इत्याहुः। अथ हेति पर्यावर्तइत्यंतेन। यस्मादेवं भूतस्त्वं परमेश्वरः। अथ ह वाव अत एव हि हे मधुमथन परमभागवता एते त्व
त्पदांभोजानुसेवां कथं मुक्त्वा विसृजंतीत्यन्वयः। हि यस्मात्स्वार्थे कुशलाः निपुणाः अत एव आत्मा त्वमेव प्रियः सुहृच्च येषां ते। साधवो
रागादिशून्याः तत्र हेतुः। तव महिमैवामृतरससमुद्रस्तस्य विप्रुषा बिंदुमात्रेण सकृदपि लीढया आस्वादितया स्वमनसि निष्यंदमा
नं अतिशयेन स्रवत् यन्निरंतरं सुखं तेन विस्मारिता दृष्टश्रुतविषयाः सुखलेशाभासा येषां ते। अत एव भगवति त्वयि नितरां निरंत

ईं निर्दिष्टमनोयर्थकंतेमन्त्ररस्यमनुरुवानां सत्या॥ १॥

दुर्ज्ञेयत्वांतरमाह ॥ अथतत्रेति । यथेह देवदत्तो गृहादि निर्माय तत्र स्वकृतस्य शुभाशुभयोः फलमुपादत्ते एवं भवान् ब्रह्म
स्वरूपो जीवरूपेण गुणविसर्गपतितः सन्नुपाददाति । यद्वा असमंजसं अप्रच्युतं दर्शनं चिच्छक्तिर्यस्य स भवानुदास्ते उदासी
नः साक्षितया वर्त्तत इति ॥ ३ ॥ तदेवं विरोधं न दुर्ज्ञेयत्वमुक्त्वा तत्परिहारेण ज्ञानप्रकारमाह ॥ नहीति । विरुध्यत इति वि
रोधः उभयं न विरुद्धमित्यर्थः । न ह्यन्यदृष्टांतेन त्वयि विकल्पो युज्यते अतर्क्यैश्वर्यत्वादित्याह । भगवतीति । अपरि

अथ तत्र भवान् किं देवदत्तवदिह गुणविसर्गपतितः पारतंत्र्येण स्वकृतकुशलाकुशलं फलमुपाददाति ।
आहोस्विदात्माराम उपशमशीलः समंजसदर्शन उदास्त इति ह वाव न विदामः ॥ ३ ॥ नहि विरोध उभयं भगव
त्यपरिगणितगुणगण ईश्वरे अनवगाह्यमाहात्म्ये अर्वाचीनविकल्पवितर्कविचारप्रमाणाभासकुतर्कशा
स्त्रकलिलांतःकरणाश्रयदुरवग्रहवादिनां विवादानवसरे उपरतसमस्तमायामये केवल एवात्ममा
यामंतर्धाय को न्वर्थो दुर्घट इव भवति स्वरूपद्वयाभावात् ॥ ४ ॥

मिता गुणगणा यस्य तस्मिन्नीश्वरे स्वतंत्रेन अनवगाह्यमतर्क्यं माहात्म्यं यस्य तस्मिन् विकल्प एवं वा इदं वेति वितर्कः
किमत्र युक्तमिति विचार इत्थमेवेति तत्र प्रमाणाभासाः तदनुग्राहकः कुतर्कश्चार्वाचीनाः वस्तुस्वरूपास्पर्शिनो
ये विकल्पास्तेषु शास्त्रेषु तैः कलिलं व्याकुलं अंतःकरणमाश्रयो यस्य दुरवग्रहस्य तेन वादिनां विवादस्यानव
सरे अगोचरे ननु अहमात्मा नमेतत् युक्तिरुच्यतां तत्राह । उपरतो मायामयः संसारो यस्मिन् तस्मिन्केवले आत्ममायां
मध्ये निधाय को न्वर्थः कर्तृत्वादिर्न संभवति । यदि वस्तुतः कर्तृत्वादिर्भवेत्तर्हि विरोधः स्यात् । न तु तदस्तीत्याह । स्वरूप

प्रसक्तं विरोधमपनयति । त्रिभुवनेत्यादिना । यावत्समाप्ति । त्रिभुवनमात्मा स्वरूपं तच्च भवनं च यस्य । त्रिभुवनस्यात्मा भवनं चे
तिवा । त्रयो विक्रमा यस्य । त्रीन्लोकान्नयतीति तथा । त्रयाणां लोकानां मनोहरोनुभावो यस्य । एवं चतुर्भिः संबोध्याह । तेषाम
नुपक्रमसमयः उपक्रमकालो न भवतीति मत्वा । हे दंडधर पूर्वं यथा दंडं दधर्थ धृतवानसि एवमेनं त्वाष्ट्रमपि जहि । यदि मन्य

त्रिभुवनात्मभवन त्रिविक्रम त्रिनयन त्रिलोकमनोहरानुभाव तवैव विभूतयो दितिजदनुजादयश्चापि तेषामनुप
क्रमसमयोयमिति स्वात्ममायया सुरनरमृगमिश्रितजलचराकृतिभिर्यथापराधं दंडं दंडधर दधर्थ एवमेनमपि भ
गवन् जहि त्वाष्ट्रमुत यदि मन्यसे ॥ ८ ॥ अस्माकं तावकानां तव नतानां तत ततामह तव चरणनलिनयुगलध्याना
नुबद्धहृदयनिगडानां स्वलिंगविवरणेनात्मसात्कृतानामनुकंपानुरंजितविशदरुचिरशिशिरस्मितावे
लोकेन विगलितमधुरमुखरसामृतकलया चांतस्तापमनघार्हसि शमयितुं ॥ ९ ॥

से हंतुं यदीच्छसि ॥ ८ ॥ प्रथमं तावत्त्वदीयानामस्माकं अंतस्तापं शमयितुमर्हसि । तावकानामित्यत्र हेतुः हे पितः हे पिता
मह तव चरणनलिनयुगलध्यानेनैवानुबद्धो हृदये निगडः शृंखला येषां । स्वलिंगविवरणेन निजमूर्तिप्रकटनेन स्वी
कृतानां । केन । अनुकंपयानुरंजितं सानुरागं च तद्विशदं रुचिरं च शिशिरं चास्मितं तत्सहितेनावलोकेन । तथानुकं
पयैव विगलितो मधुरो मुखरसः प्रियावाक् सैवामृतकला तया च ॥ ९ ॥

किंवास्मादृभि प्रायस्त्वया ज्ञायत एवकिमत्रास्माभिर्विज्ञापनीयमित्याहुः। अथहेभगवन् तवाऽस्माभिरिहकियान्वार्थवि
शेषोविज्ञापनीयः स्यादित्यन्वयः। यथाहिरण्यरेतसोऽग्नेस्तदंशभूतैर्विस्फुलिंगादिभिः प्रकाशो नक्रियते। तथा तवास्मा
भिः कार्यार्थप्रकाशनंनकार्यमित्यर्थः। अत्रहेतुगर्भाणि विशेषणानि अखिलजगतामुत्पत्त्यादिषुनिमित्तायमान
या दिव्यमायया विनोदो यस्य अतएवसर्वजीवनिकायानामंतर्हृदयेषुब्रह्मस्वरूपेण प्रत्यगात्मांतर्यामीतद्रूपेणच

अथभगवंस्तवास्माभिरखिलजगदुत्पत्तिस्थितिलयनिमित्तायमानदिव्यमायाविनोदस्य सकलजीवनिकाया ना
मंतर्हृदयेषुबहिरपिचब्रह्मप्रत्यगात्मस्वरूपेणप्रधानरूपेणचयथादेशकालदेहावस्थानविशेषंतदुपादानोपलं
भकतयानुभवतः सर्वप्रत्ययसाक्षिणआकाशशरीरस्य साक्षात्परब्रह्मणः परमात्मनः कियानिहवा अर्थ
३६ विशेषोविज्ञापनीयः स्यात्। विस्फुलिंगादिभिरिवहिरण्यरेतसः॥१०॥ अतएवस्वयंतदुपकल्पयास्माकंभ
गवतः परमगुरोस्तव चरणशतपलाशच्छायांविविधवृजिनसंसारपरिश्रमोपशमनीमुपसृतानांवयंयत्का
मेनोपसादिताः॥११॥

हिरपिप्रधानरूपेणदेशकालदेहावस्थानविशेषमनुलक्ष्य्यानुभवतः क ३६
थंतेषामुपादानतया उपलंभकतया चउपादानस्योपालंभकतयेतिवा। अतएवसर्वेषांप्रत्ययानांबुद्ध्यादीनामपिसाक्षि
णः साक्षित्वेहेतुः आकाशवत् अलिप्तंशरीरंस्वरूपंयस्य। अलिप्तत्वेहेतुद्वयंसाक्षात्परब्रह्मणोनिरूपाधेः परमात्मनः शुद्ध
सत्वमूर्तेश्च॥१०॥ अतएवसर्वज्ञत्वादेववयंयत्कामेनयस्यकार्यस्यकामेनोपसादिताः प्रापिताः तदस्माकंकार्यंस्वयमेवोप
कल्पयसंपादयेति। चरणमेवशतपत्राशकमलंतस्यच्छायांविविधवृजिनैर्यःसंसारपरिश्रमः तस्योपशमकरीउपसृतानांप्रा
प्तानां॥११॥

पूर्वं तत्केरुत्कर्षोक्तिस्तत्कामत्रांकामत्रांकामात्सृदितिस्वकामंकथयंति। अथोऽनंतरमेव॥१२॥ शीघ्रं तद्वधायपुनःप्रणमंति। हंसायशु
द्धाय। हरयेआर्तिहरायतन्नमः। शुद्धत्वेहेतवः। दृङ्निलयाय। हृदयाकाशनिकेताय। निरीक्षकाय। बुद्ध्यादिसाक्षिणे। कृष्णायसदा
नंदरूपाय। कृषिर्भूवाचकः शब्दोणश्चनिर्वृतिवाचकः। तयोरैक्यंपरंब्रह्मकृष्णइत्यभिधीयतइतिनिरुक्तेः। आर्तिहरत्वेहेतवः।
मृष्टंरुचिरंयशोयस्य। निरुपक्रमायआदिशून्याय। सद्भिः संगृह्यतइतितथातस्मै। भवपांथः। भवरूपेपथिवर्तमानः तस्यज

अथोईशजहिवाघ्नंयसंतंभुवनत्रयं॥ ग्रस्तानियेननःकृष्णतेजांस्यस्त्रायुधानिच॥१२॥ हंसाय दहनिलयाय
३७ निरीक्षकाय कृष्णायमृष्टयशसेनिरुपक्रमाय॥ सत्संग्रहायभवपांथनिजाश्रमाप्तावंतेपरीष्टगतयेहरयेन
मस्ते॥१३॥ ॥श्रीशुकउवाच॥ ॥अथैवमीडितोराजन् सादरंत्रिदशैर्हरिः॥ स्वमुपस्थानमाकर्ण्यप्राहतान
भिनंदितः॥१४॥ ॥श्रीभगवानुवाच॥ ॥प्रीतोहंवः सुरश्रेष्ठामदुपस्थानविद्यया॥ आत्मैश्वर्यस्मृतिः पुं
सांभक्तिश्चैवययामयि॥१५॥ किंदुरापंमयिप्रीतेतथापिविबुधर्षभाः॥ मय्येकांतमतिर्नान्यन्मत्तोवांछति
तत्ववित्॥१६॥

नस्यनिजाश्रमाप्तौसत्यांसंसारस्यांतेपरीष्टास्सर्वतः पूजिताउत्तमागतिः फलंयस्तस्मै॥१३॥ अभिनंदितः संतोषितः॥ ३७
१४॥ मदीयमुपस्थानंस्तोत्रंतत्सहितयाविद्ययाज्ञानेन। आत्मनऐश्वर्यमसंसारित्वंतस्यस्मृतिर्यया। नहिविरोध
उत्तयमित्यादिनाकर्तृत्वभोक्तृत्वादेर्मायिकत्वोक्तेः। भक्तिश्चययाभवति॥१५॥ अथभगवन्नित्यादिनाभक्तैः सर्वोत्क
र्षोक्तेर्भक्तिमभिनंदतिकिमिति॥१६॥

यदुक्तं देवैः स्वयं तदुपकल्पयास्माकमित्यादि तत्संपादनं कृपालोर्ममानुचितमित्याशयेनाह। नवेदेति द्वाभ्यां। गुणेषु विषयेषु तत्त्वदर्शिनान् विषयान्। तथाविधोऽज्ञ एव।।१७।। कर्म न वक्ति प्रवृत्तिमार्गं न वक्ति हि। अपथ्यं यथा न राति न ददाति भिषक्तमः सद्वैद्यः।।१८।। एवं तत्त्वकथनेनादौ वो चित्यं परिहृत्य तदभिप्रायमनुसरन्नाह। मघवन्निति। विद्यया व्रततेजसा च सारं दृढं गात्रं शरीरं याचत याचध्वं।।१९।। तत्र नदीयं विद्यां तिरोधाय माह। स वा इति द्वाभ्यां। एवं ह्यत्र प्रसिद्धाक

न वेद कृपणः श्रेय आत्मनो गुणवस्तुदृक्। तस्य तानिछतो यछेत् दि सोपि तथाविधः।।१७।। स्वयं निःश्रेयसं विद्वान् न वक्त्यज्ञाय कर्म हि। न राति रोगिणोऽपथ्यं वांछितोऽपि भिषक्तमः।।१८।। मघवन् यात भद्रं वो दध्यंचमृषिसत्तमं। विद्याव्रततपःसारं गात्रं याचत माचिरं।।१९।। स वा अधिगतो दध्यङ्ङश्विभ्यां ब्रह्म निष्कलं। यद्वा अश्वशिरो नाम तयोरमरतां व्यधात्।।२०।।

३७ था।। निशम्याथर्वणं दक्षं प्रवर्ग्यब्रह्मविद्ययोः।। दध्यं वै समुपागम्य तमूचतुरथाश्विनौ।।१।। भगवन्देहि नौ विद्यामिति श्रुत्वा स चाब्रवीत्।। कर्मण्यवस्थितोऽद्याहं पश्चाद्दास्यामि गच्छतं।। तयोर्निर्गतयोरेव शक्र आगत्य तं मुनिं।। उवाच भिषजोर्विद्यां मा वदीरश्विनोर्मुने। यदि मद्वाक्यमुल्लंघ्य ब्रवीषि सहसैव ते। शिरश्छिंद्यां न संदेह इत्युक्त्वा स ययौ हरिः। इंद्रे गते तथाभ्येत्य नासत्यावूचतुर्द्विजं। तन्मुखाद्दिंद्रगदितं श्रुत्वा तावूचतुः पुनः। आवां तव शिरश्छित्वा पूर्वमश्वस्य मस्तकं। संधास्यावस्ततो ब्रूहि तेन विद्यां च नौ द्विज। तस्मिन्निंद्रेण संछिन्ने पुनः संधाय मस्तकं। निजं ते दक्षिणां दत्त्वा गमिष्यावो यथागतं। एतच्छ्रुत्वा ततो वाचद्दध्यङ्ङाथर्वणस्तयोः। प्रवर्ग्यं ब्रह्मविद्यां च सत्कृतोऽसत्यशंकितः इति। ततश्चायमर्थः। दध्यङ् निष्कलं शुद्धं ब्रह्म अधिगतः ज्ञातवान्। पाठांतरे तु नितरां कृतं भवति धनं तं प्रवर्ग्यं चाधिगतः ज्ञातवान्। ततोऽश्विभ्यां प्रादादित्यत्रैतस्यानुषंगः उपदिदेशेत्यर्थः कथंभूतं ब्रह्म यद्वै

अश्वशिरसा प्रोक्तं तदश्वशिरो नाम ब्रह्मसिद्धं। तयोरमरतां च व्यधत्
कवचं धारः तथा श्वकृत्ति। कश्यपाय शिक्षां अहा मुखान्तेति।१० ३७

महात्मकं वर्म श्रीनारायणकवचं च अधिगत इति पूर्वस्यानुषंगः तत्र हेतुः यद्यस्मात् त्वष्ट्रे आदात्। किं तत्। यत् त्वष्टा विश्वरूपाय पुत्राय प्रादात्। कीदृशाय यत् त्वं तत्तो विश्वरूपात् अधाः धृतवानसि। तदेवं विद्यया सारं गात्रं याचध्वमित्यर्थः।।२१।। ननु प्रेष्ठं देहं कथं दास्यति। तत्राह। युष्मभ्यमंगानि अस्थीनि याचितः सन् दास्यति। यतो धर्मज्ञः। विशेषतोऽश्विभ्यां शिष्यप्रीत्या दास्यति। अस्थीनीत्यनेन हेयत्वं दर्शितं। तैरस्थिभिर्विश्वकर्मणा विनिर्मितं आयुधश्रेष्ठो वज्रो भविष्यतीति शेषः। येन त्वं वान्

दध्यङ्ङाथर्वणस्त्वष्ट्रे वर्माभेद्यं महात्मकं।। विश्वरूपाय यत्प्रादात्त्वष्टा यत्त्वमधास्ततः।।२१।। युष्मभ्यं याचितोऽश्विभ्यां धर्मज्ञोऽङ्गानि दास्यति।। ततस्तैरायुधश्रेष्ठो विश्वकर्मविनिर्मितः। येन वृत्रशिरो हर्ता मत्तेजउपबृंहितः।।२२।। तस्मिन्विनिहते यूयं तेजोस्त्रायुधसंपदः।। भूयः प्राप्स्यथ भद्रं वो न हिंसंति च मत्परान्।।२३।। ।।इति श्री भागवते महापुराणे षष्ठस्कंधे नवमोध्यायः।।

वृत्रस्य शिरो हर्ता हरिष्यति। मम तेजसा उपबृंहितः सन्।।२२।। तेजश्च अस्त्राणि च संपदश्च भूयः प्राप्स्यथ। महाकायस्त्रिभुवनग्रासी स खल्वस्मान् हन्यादिति शंकाव्याकुलचित्तान् प्रत्याह। मत्परांश्च केऽपि न हिंसंति। अतो युष्माकं भद्रं भवेति।।२३।। ।।इति षष्ठे नवमः।। ।।

दृष्ट्वामेकेशवादिष्टदध्यङ्ङस्थिजवज्रधृत्। इंद्रोयुध्यतवृत्रेणसोऽसुरेणसनिर्जरः॥१॥ मोदमानएवतन्मुखाद्धर्मंश्रोतुकामः
प्रत्यावक्षाणइवोवाच॥ अपीतिद्वाभ्यां। हेदारकाः अपिकिंसंस्थायांमृत्यौयोऽतिद्रोहोदुःखंतन्नजानीथ॥ ३॥ आत्मादेहः
वयंजानीमएवकिंतु श्रीविष्णुरस्मन्मुखेनयाचते। विष्णवेपिदातुंकःउत्सहेत॥४॥ पुण्यश्लोकैरीड्यानिकर्माणियेषां। याचको
यदिवेदतर्हिनयाचेत्। यदीश्वरःदानसमर्थश्चेत्तर्हिसोपिनेतिनाह। अतोयथावयंतवसंकटंस्वार्थपरानजानीमःएवंत्व

श्रीबादरायणिरुवाच॥ ॥इंद्रमेवंसमादिश्यभगवान्विश्वभावनः॥ पश्यतामनिमेषाणांतत्रैवांतर्दधेहरिः॥१॥
तथाभियाचितोदेवैरृषिराथर्वणोमहान्। मोदमानउवाचेदंप्रहसन्निवभारत॥२॥ अपिवृंदारकायूयंनजानी
३८ थशरीरिणां। संस्थायांयस्त्वभिद्रोहोदुःसहश्चेतनापहः॥३॥ जिजीविषूणांजीवानामात्माप्रेष्ठइहेप्सितः॥ क
उत्सहेततंदातुंभिक्षमाणायविष्णवे॥४॥ ॥देवाऊचुः॥ ॥किन्नुतद्दुस्त्यजंब्रह्मन्पुंसांभूतानुकंपिनां॥
भवद्विधानांमहतांपुण्यश्लोकेड्यकर्मणां॥५॥ ननुस्वार्थपरोलोकोनवेदपरसंकटं॥ यदिवेदनयाचेतनेतिनाह ३८
अ यदीश्वरः॥६॥ ॥ऋषिरुवाच॥ ॥धर्मंवःश्रोतुकामेनयूयंमेप्रत्युदाहृताः॥ एषवःप्रियमात्मानंत्यजंतंसंत्यजाम्यहं॥७
योऽध्रुवेणात्मनानाथानधर्मंनयशःपुमान्॥ ईहेतभूतदययासशोच्यःस्थावरैरपि॥८॥

त्वावक्षाणस्त्वमस्मत्संकटंनजानासीतिभावः॥६॥ मेमयाप्रत्युदाहृताःप्रत्युक्ताः। मांत्यजंतंत्यक्ष्यंतंआत्मानं
देहं॥७॥ अध्रुवेणात्मनादेहेननाथाः॥८॥ ॥
श्रीवासुदेवायनमः॥ ॥

भूतानांशोकेनशोचतिहर्षेणहृष्यतियआत्मास्वयंतस्ययोधर्मःएतावानेवाव्ययइत्यर्थः॥९॥ पारक्यैःश्वसृगालादिभक्ष्यैःअ
स्वार्थैःआत्मोपयोगशून्यैःस्वंवित्तंज्ञातयःपुत्रादयःविग्रहोदेहःतैर्नोपकुर्यादितियत्॥१०॥ कृतंव्यवसितंनिश्चयोयेनआत्मा

एतावानव्ययोधर्मःपुण्यश्लोकैरुपासितः। योभूतशोकहर्षाभ्यामात्माशोचतिहृष्यति॥९॥ अहोदैन्यमहोकष्टंपारक्यैः
क्षणभंगुरैः॥ यन्नोपकुर्यादस्वार्थैर्मर्त्यःस्वज्ञातिविग्रहैः॥१०॥ ॥श्रीशुकउवाच॥ ॥एवंकृतव्यवसितोदध्यङ्ङाथर्वण
स्तनुं॥ परेभगवतिब्रह्मण्यात्मानंसंनयन्जहौ॥११॥ यताक्षासुमनोबुद्धिस्तत्त्वदृग्ध्वस्तबंधनः॥ आस्थितःपरमं
योगंनदेहंबुबुधेगतं॥१२॥ अथेंद्रोवज्रमुद्यम्यनिर्मितंविश्वकर्मणा॥ मुनेःशक्तिभिरुत्सिक्तोभगवत्तेजसान्वितः॥१३
वृतोदेवगणैःसर्वैर्गजेंद्रोपर्यशोभत॥ स्तूयमानोमुनिगणैस्त्रैलोक्यंहर्षयन्निव॥१४॥ वृत्रमभ्यद्रवच्छत्रुमसुरानी
कयूथपैः॥ पर्यस्तमोजसाराजन्क्रुद्धोरुद्रइवांतकं॥१५॥ ततःसुराणामसुरैरणःपरमदारुणः। त्रेतामुखेनर्मदाया
मभवत्प्रथमेयुगे॥१६॥ रुद्रैर्वसुभिरादित्यैरश्विभ्यांपितृवह्निभिः॥ मरुद्भिरृभुभिःसाध्यैर्विश्वेदेवैर्मरुत्पतिं॥१७॥
दृष्ट्वावज्रधरंशक्रंरोचमानंस्वयाश्रिया॥ नामृष्यन्नसुराराजन्मृधेवृत्रपुरःसराः॥१८॥

नंक्षेत्रज्ञंसन्नयन्नेकीकुर्वन्तनुंजहौ॥११॥ यताअक्षादयोयेन। तत्त्वंपश्यतीतितथा। ध्वस्तानिगतानिबंधनानियस्य।
॥१२॥ अथेंद्रःअशोभतेत्युत्तरेणान्वयः॥ मुनेःशक्तिभिःअस्थिभिर्निर्मितं। उत्सिक्तःऊर्जितः। मुनेःशक्तिभिरितिवापाठः।
१३॥ १४॥ असुरानीकानांयूथपैःपर्यस्तंपरिवृतं॥ १५॥ रणःसंग्रामः। प्रथमेचतुर्युगे। त्रेतायुगस्यमुखेआरंभे॥१६॥१७॥
नामृष्यन्नासहंत॥१८॥

१९॥२०॥२१॥२२॥शतघ्नीव वतुर्हस्ता लोहकंटकसंचिता॥ भुशुंडी सर्वतो लोहकंटकानुक्रमोन्नतेत्यभिधानं॥२३॥ पुंखो मूलदेशः एकस्य मूलदेशमनु तत्संलग्नोपरस्य पुंखो यथा भवति तथा। न नखेषु चेत्ज्योतींषीव चेलनेन तेषां तद्व्याप्तिः सूचिता २४॥ तामेवाह नत इति। शस्त्राणामस्त्राणां वयानि वर्षाणि तेषामोघाः सनासेदुः। न प्रापुः सिद्धपथे आकाशे॥२५॥ क्षीण

नमुचिः शंबरो नर्वा द्विमूर्द्धा ऋषतोंबरः॥ हयग्रीवः शंकुशिरा विप्रचित्तिरयोमुखः॥१९॥ पुलोमा वृषपर्वा च प्रहेतिर्हेतिरुत्कलः॥ दैतेया दानवा यक्षा रक्षांसि च सहस्रशः॥२०॥ सुमालिप्रमुखाः कार्तस्वरपरिच्छदाः॥ प्रतिषिध्येंद्रसेनाग्रं मृत्योरपि दुरासदं॥२१॥ अभ्यर्दयन्नसंभ्रांताः सिंहनादेन दुर्मदाः॥ गदाभिः परिघैर्बाणैः प्रासमुद्गरतोमरैः॥२२॥ शूलैः परश्वधैः खड्गैः शतघ्नीभिर्भुशुंडिभिः॥ सर्वतो वाकिरन्शस्त्रैरस्त्रैश्च विबुधर्षभान्॥२३॥ न तेदृश्यंत संछन्नाः शरजालैः समंततः॥ पुंखानुपुंखपतितैर्ज्योतींषीव नभो घनैः॥२४॥ न ते शस्त्रास्त्रवर्षौघा ह्यासेदुः सुरसैनिकान्॥ छिन्नाः सिद्धपथे देवैर्लघुहस्तैः सहस्रधा॥२५॥ अथ क्षीणास्त्रशस्त्रौघा गिरिशृंगद्रुमोपलैः॥ अभ्यवर्षत्सुरबलं चिच्छिदुस्तांश्च पूर्ववत्॥२६॥ तानक्षतान्स्वस्तिमतो निशाम्य शस्त्रास्त्रपूगैरथ दैत्यनाथाः॥ द्रुमैर्दृषद्भिर्विविधाद्रिशृंगैरविक्षतांस्तत्रसुरिंद्रसैनिकान्॥२७॥

शस्त्राणां अस्त्राणां च ओघो येषां गिरिशृंगैर्द्रुमैरुपलैश्च॥२६॥ तानिंद्रसैनिकान्शस्त्राणामस्त्राणां च पूगैः समूहैरक्षतानक्षतत्वेन्यानस्वस्तिमतः स्फुरिवनः द्रुमादिभिश्च अविक्षतान्निशाम्य दैत्यनाथा येषां ते तत्र स्फुत्रसेताः॥
॥२७॥

क्रताः क्रताः पुनः पुनः क्रताः। कृष्ठो न कूलो येषां तेषु देवगणेषु रूषतीः रूषत्यः अकल्याण्यः रूक्षाः परुषा वाचो यथा महत्स्फोटपक व्यो न भवंति तद्वत्॥२८॥ हतो युद्धे दर्पो येषां। आत्तः परैर्गृहीतः सारो धैर्यं येषां ते अतिप्रसिद्धा अपि ते दैत्या एवं ते इत्यस्यायोनरुत्वं। आजिमुखे युद्धारंभे। पतिं विसृज्य पलायना यमनो दधुः॥ यतो हावभक्ताः॥२९॥ प्रधा

सर्वे प्रयासा अभवन्विमोघाः कृताः कृता देवगणेषु दैत्यैः॥ कृष्णानुकूलेषु यथा महत्सु क्षुद्रैः प्रयुक्ता रूषती रूक्षवाचः॥२८॥ ते स्वप्रयासं वितथं निरीक्ष्य हरावभक्ता हतयुद्धदर्पाः॥ पलायनायाजिमुखे विसृज्य पतिं मनस्ते दधुरात्तसाराः॥२९॥ वृत्रोऽसुरांस्ताननुगान्मनस्वी प्रधावतः प्रेक्ष्य बभाषएतत्॥ पलायितं प्रेक्ष्य बलं च भग्नं भयेन तीव्रेण विहस्य वीरः॥३०॥ कालोपपन्नां रुचिरां मनस्विनां जगाद वाचं पुरुषप्रवीरः॥ हे विप्रचित्ते नमुचे पुलोमन्मयानवन्शंबर मे शृणुध्वं॥३१॥ जातस्य मृत्युर्ध्रुव एव सर्वतः प्रतिक्रिया यस्य न चेह क्लृप्ता॥ लोको यशश्चाथ ततो यदि ह्यमुं को नाम मृत्युं न वृणीत युक्तं॥३२॥

वतः पलायमानाननुप्रेक्ष्य आदावेव तीव्रेण भयेन पलायितं भग्नं च तद्बलं सैन्यं तत्प्रेक्ष्य एतद्वक्ष्यमाणं बभाषे॥३०॥ तदेवविशिनष्टि। कालोपपन्नमवसरोचितं। मनस्विनां रुचिरां। हे अनवन्मे वाचं शृणुत॥३१॥ ततो मृत्योः इह यत्र लोकः स्वर्गश्च यदि स्यात्। अथ तर्हि अमुं मृत्युं युक्तं समीचीनं भावंवा॥३२॥

ब्रह्मसंधारणया कलेवरं जह्यादिति यत् स एको मृत्युः वीरशय्ये रणभूमौ अनिवृत्तः अपराङ्मुखः सन् जह्यादिति यत्
स चैकः तो द्वाविह शास्त्रे संमतो मृत्यू ॥ तथा च स्मृतिः ॥ द्वाविमौ पुरुषौ लोके सूर्यमंडलभेदिनौ । परिव्राड्योगयुक्त
श्च रणे चाभिमुखो हत इति ॥ ३३ ॥ ॥ इति षष्ठे दशमः ॥ ॥ एकादशे तु वृत्रस्य युध्यमानस्य वज्रिणा । भक्तिज्ञान
बलोत्कर्षश्चित्रा वाचोऽनुवर्णिताः ॥ १ ॥ तान् सतः कथयतः पृष्ठदर्शिनः ॥ १ ॥ कालानुकूलैः कालानुवर्तिभिः ॥ काल्य

द्वौ संमतौ विह मृत्यू दुरापौ यद् ब्रह्मसंधारणया जितासुः ॥ कलेवरं योगरतो विजह्याद्यदग्रणी वीरशये
निवृत्तः ॥ ३३ ॥ ॥ इति श्रीभागवते महापुराणे षष्ठस्कंधे दशमोऽध्यायः ॥ ॥ श्रीशुक उवाच ॥ ॥

५० त एवं शंसतो धर्मं वचः पत्युरचेतसः ॥ नैवागृह्णंत संत्रस्ताः पलायनपरा नृप ॥ १ ॥ विशीर्यमाणां
पृतनामासुरीमसुरर्षभः ॥ कालानुकूलैस्त्रिदशैः काल्यमानामनाथवत् ॥ २ ॥ दृष्ट्वातप्यत संक्रुद्ध
इंद्रशत्रुरमर्षितः ॥ तान्निवार्यौजसा राजन् निर्भर्त्स्येदमुवाच ह ॥ ३ ॥ किं व उच्चरितैर्मातुर्धावद्भिः पृ
ष्ठतो हतैः ॥ न हि भीतवधः श्लाघ्यो न स्वर्ग्यः शूरमानिनां ॥ ४ ॥ ५०

मानां विद्राव्यमाणां ॥ २ ॥ अमर्षितः असहमानः तांस्त्रिदशान्निवार्य निर्भर्त्स्य चेदं वक्ष्यमाणमुवाच ॥ ३
तदाह द्वाभ्यां । मातुरुच्चरितैः पुरीषप्रायैः प्रथमांतपाठे देवानां संबोधनं पृष्ठतो हतैः । दैत्यैः किं । न किंचित् । न
यशो नापि धर्मः तदेवाह । न हीति ॥ ४ ॥

प्रधने संग्रामे । सारं धैर्यं । हे क्षुल्लकाः क्षुद्राः । मात्रं क्षणमात्रं अग्रे तिष्ठत । न चेदिह लोकभोगेस्पृहास्ति ॥ ५ ॥
सुरगणान् रिपून् सुमहान् प्राणो बलं यस्य । येन विचेतसः स्युः बभूवुः ॥ ६ ॥ वृत्रस्य विस्फोटनेन नादेन ॥ ७ ॥ उद्यतं शू

यदि वः प्रधने श्रद्धा सारं वा क्षुल्लका हृदि ॥ अग्रे तिष्ठत मात्रं मे न चेद्ग्राम्यसुखे स्पृहा ॥ ५ ॥ एवं सुरगणान्
क्रुद्धो भीषयन् वपुषा रिपून् ॥ व्यनदत् सुमहाप्राणो येन लोका विचेतसः ॥ ६ ॥ ततो देवगणाः सर्वे वृ
त्रविस्फोटनेन वै ॥ निपेतुर्मूर्छितास्तत्र यथैवाशनिना हताः ॥ ७ ॥ ममर्द पद्भ्यां सुरसैन्यमातुरं नि
मीलिताक्षं रणरंगदुर्मदः ॥ गां कंपयन्नुद्यतशूलओजसा नालं वनं यूथपतिर्यथोन्मदः ॥ ८ ॥ वि
लोक्य तं वज्रधरोत्यमर्षितः स्वशत्रवे — — — महागदां ॥ विक्षेप तामापततीं सुदुःसहां जग्राह वामेन क
रेण लीलया ॥ ९ ॥ स इंद्रशत्रुः कुपितो भृशं तया महेंद्रवाहं गदयोरुविक्रमः ॥ जघान कुंभस्थल उन्नद
न्मृधे तत्कर्म सर्वे समपूजयन्नृप ॥ १० ॥ ऐरावतो वृत्रगदाभिमृष्टो विघूर्णितो द्विः कुलिशाहतो यथा ॥ अ
पासरद्भिन्नमुखः सहेंद्रो मुंचन्नसृक् सप्तधनुर्भृशार्तः ॥ ११ ॥

लं येन । नालं नलानां वनं उद्धतो मदो यस्य स यूथपतिर्गजो यथा मर्दयति ॥ ८ ॥ ९ ॥ १० ॥ सप्तधनुःप्रमाणं देशं
॥ ११ ॥

भा०ष० सन्नोऽवसन्नोबाहोयस्यतस्मैनघायुक्तं॥ अमृतस्पंदीअमृतस्रवीयःस्वकरःतेनाभिमर्शस्यशस्तेनवीतव्यथोगत
दुःखःक्षतोबाहोयस्यसतथाभूतोऽवतस्थे॥१२॥ सवृत्रःहेन्द्रपेंद्रआहवकाम्ययायुद्धेच्छयाऽवस्थितंभ्रातृहणं
भ्रातरंविश्वरूपंहंतारंनृशंसंक्रूरंतदेवाहपापंतस्यकर्मस्मरन्॥१३॥ योब्रह्महाब्राह्मणंहतवान्।विशेषतःस्व

नसन्नवाहायविषण्ण।वेतस्थेप्रायुक्तंकन्यःसगदांमहात्मा॥ इंद्रोऽमृतस्पंदिकराभिमर्शवीतव्यथःक्षतबा
होव्यतस्थे॥१२॥ सतंनृपेंद्राहवकाम्ययारिपुंवज्रायुधंभ्रातृहणंविलोक्य॥स्मरंश्चतत्कर्मनृशंसमंहः
५१ शोकेनमोहेनहसन्नुजगाद॥१३॥ ॥वृत्रउवाच॥ ॥दिष्ट्याभवान्मेसमवस्थितोसियोब्रह्महागुरुहा
भ्रातृहाच।दिष्ट्यानृणोद्याहमसत्तमत्वयामच्छूलनिर्भिन्नदृषद्धृदाचिरात्॥१४॥ योनोग्रजस्यात्मवि
दोद्विजातेर्गुरोरपापस्यचदीक्षितस्य॥विश्रभ्यखड्गेनशिरांस्यवृश्चत्पशोरिवाकरुणःस्वर्गकामः॥१५॥ ५२

गुरुःममचभ्रातरंसस्ववानग्रतःसमवस्थितः।तंदिष्ट्याभद्रंजातं।दिष्ट्येत्यव्ययमानंदार्थे।हेअसत्तमसत्र
५१ स्त्रूलेनानिर्भिन्नंदृषत्तुल्यंहतहृदयंयस्य।तेनत्वयानिमित्तभूतेन।अद्यअचिरादेवभ्रातुरनृणोहंस्यां।एत
दृदिष्ट्या॥१४॥ स्वर्गकामोयोभवान्अवृश्चत्।स्वर्गकामोयाज्ञिकःपशोरिवेतिवा॥१५॥

तंत्वामस्पृष्टवह्निंमदग्धदेहंसमदंति।वर्तमानसामीप्येवर्तमानवन्निर्देशः॥१६॥ अन्येपियेअज्ञाइहत्वात्वांनृशंसमनुम
द्यमद्यतास्त्राःसंतोयदिप्रहरंतितैर्भूतनाथान्भैरवादीन्यक्ष्यामि।कथंभूतैःनिशातंतीक्ष्णीकृतंयन्ममत्रिशूलंतेननि
र्भिन्नागलायेषांतैः॥१७॥ अथोअथवाहरे।भोइंद्रयदित्वंवानेवममशिरोहर्ताहरिष्यति।तत्रतथासतिअनृणोविमु

क्तोभीदयाकीर्तिजिरुरितंत्वांस्वकर्मणापुरुषादेश्चगर्ध्ये॥ कव्येणमच्छूलविभिन्नदेहमस्पृष्टवह्निंसमदंतिगृ
५२ ध्राः॥१६॥ अन्येऽनुयेत्वेहनृशंसमज्ञायद्युद्यतास्त्राःप्रहरंतिमह्यं॥तैर्भूतनाथान्सगणान्निशातत्रिशूल
निर्भिन्नगलैर्यजामि॥१७॥ अथोहरेमेकुलिशेनवीरहर्ताप्रमथ्येवशिरोयदीह॥तत्रानृणोभूतबलिं
विधायमनस्विनांपादरजःप्रपत्स्ये॥१८॥ सुरेशकस्मान्नहिनोषिवज्रंपुरःस्थितेवैरिणिमय्यमोघं॥ रि
मासंशयिष्ठानगदेवववज्रंस्यान्निःफलंकृपणार्थेवयाच्ञा॥१९॥ नन्वेषवज्रस्तवशक्रतेजसाहरेर्दधीच श्री
स्तपसाचतेजितः।तेनैवशत्रुंजहिविष्णुयंत्रितोयतोहरिर्विजयःश्रीर्गुणास्ततः॥२०॥

त्कर्मबंधःसन्तेभ्योबलिंदेहेनविधायमनस्विनांपादरजःप्रपत्स्येधीराणांपदंप्राप्स्यामि॥१८॥ जीवितादपि
मत्यरेवममाभिमतइत्याशयेनाह।सुरेशेति।नहिनोषिनहिक्षिपसि।गदेवविफलोयास्यतीतिसंशयंमाकार्षीः
कृपणादर्थःप्रयोजनंयस्याःसायाच्ञायथानिःफलातथानस्यात्॥१९॥ अमोघत्वेहेतुवदन्तंप्रोत्साहयति
नन्विति।तेजितस्तीक्ष्णीकृतःशत्रुंमांजहिविष्णुनायंत्रितः॥२०॥

भा० ष० हननेन मम यीडा स्यादित्यपि मा संशयिष्ठा इत्याह। अहमिति। संकर्षणो भगवान्यथाह तथा तदीयचरणारविंदे मनः स
माधाय मुनेर्योगिनो गतिमहं यास्यामि। तव वज्ररंहसा लुलितः छिन्नो ग्राम्यपाशो विषयसंगलक्षणो यस्य
अपविद्धलोकः। त्यक्तदेहः॥ २१॥ तर्हि भगवान्संकर्षणः स्वभक्ताय मह्यमेव स्वर्गादिसंपदो दास्यतीत्यपि मा
संशयिष्ठा इत्याह। पुंसामिति। स्वर्गभूमौ रसातले च याः संपदस्ताः किल निश्चितं न राति न ददाति। तत्र हेतुः। यत् याभ्यः

अहं समाधाय मनो यथाह संकर्षणस्तच्चरणारविंदे। त्वद्वज्ररंहो लुलितग्राम्यपाशो गतिं मुनेर्या
म्यपविद्धलोकः॥ २१॥ पुंसां किलैकांतधियां स्वकानां याः संपदो दिवि भूमौ रसायां॥ नराति यत्
५२ द्वेष उद्वेग आधिर्मदः कलिर्व्यसनं संप्रयासः॥ त्रैवर्गिकायासविघातमस्मत्पतिर्विधत्ते पुरुष
स्य शक्र॥ ततोनुमेयो भगवत्प्रसादो यो दुर्लभोकिंचनगोचरोन्यैः॥ २३॥ अहं हरे तव पादैकमूलदा
दा सानुदासो भवितास्मि भूयः॥ मनः स्मरेतासुपतेर्गुणांस्ते गृणीत वाक् कर्म करोतु कायः॥ २४॥

द्वेषादयो भवंति॥ २२॥ तर्हि स्वभक्तस्य किं विधत्ते। तत्राह। त्रैवर्गिको धर्मार्थकामविषयाणां य आयासस्तस्य
विघातं विधत्ते। तत आयासोपरमाद्धनुमेयः अन्त्वैश्वर्यादिना। अतः सम्यक् भगवत्प्रसादाभावान्नैव संपदोत्र वि
ष्यंतीति भावः॥ २३॥ एवमिंद्रायस्वाभिप्रायं निवेद्य भगवंतं प्रार्थयते। अहमिति। तव पादावेकं मूलमाश्रयो येषां
तेषां दासानामनुदासः भूयो भवितास्मि भविष्यामि जन्मेयं। असुपतेः प्राणनाथस्य तव गुणान् मम मनः स्मर

तु। वाग्गृणातु कीर्तयतु कायस्तवैव कर्म करोतु॥ २४॥ ५२

ननु किं दास्येन तुभ्यं महाफलानि दास्यामीति चेत्तत्राह। नाकपृष्ठं ध्रुवपदं। ब्रह्मलोकादिकं च। हे समंजस। निखिलसौभा
ग्यनिधे। त्वा त्वां विरहय्य पृथक्कृत्य न कांक्षे नेच्छामि॥ २५॥ तर्हि किमिच्छसि तत्राह। अजातपक्षाः खगाः घूकादिभिः पी
डिता यथा मातरं। यथा च दाम्ना बद्धाः बालवत्साः स्तन्यं। यथा च व्युषितं दूरदेशागतं प्रियं कामेन विषण्णा प्रिया। तथा मे
मनस्तापत्रयपीडितं कर्मभिर्बद्धं च कामादिभिर्विषण्णं च त्वां दिदृक्षते द्रष्टुमिच्छतीत्यर्थः॥ २६॥ उत्तमश्लोकस्य त

न नाकपृष्ठं न च पारमेष्ठ्यं न सार्वभौमं न रसाधिपत्यं॥ न योगसिद्धीरपुनर्भवं वा समंजस त्वा विरह
य्य कांक्षे॥ २५॥ अजातपक्षा इव मातरं खगाः स्तन्यं यथा वत्सतराः क्षुधार्ताः॥ प्रियं प्रियेव व्युषितं वि
षण्णा मनोरविंदाक्ष दिदृक्षते त्वां॥ २६॥ ममोत्तमश्लोकजनेषु सौख्यं संसारचक्रे भ्रमतः स्वकर्मभिः॥
त्वन्माययात्मात्मजदारगेहेष्वासक्तचित्तस्य न नाथ भूयात्॥ २७॥ ॥ इति श्रीभागवते महापुराणे ष
ष्ठस्कंधे एकादशोध्यायः॥ ॥ ऋषिरुवाच॥ ॥ एवं जिहासुर्नृप देहमाजौ मृत्युं वरं विजयान्मन्यमा
नः॥ शूलं प्रगृह्याभ्यपतत्सुरेंद्रं यथा महापुरुषं कैटभोप्सु॥ १॥

वजनेषु भक्तेषु वसख्यं भूयात्। त्वन्मायया देहादिष्वासक्तचित्तस्य भूयोपि तेष्वासक्तिर्न भूयात्॥ २७॥
इति षष्ठे एकादशः॥ ॥ द्वादशेतिविषमेनस्वयमुत्साहितेन तु॥ महेंद्रेण महायुद्धे वृत्रस्य वध ईर्यते॥ १॥
महापुरुषं श्रीविष्णुं अप्सु प्रलयोदके॥ १॥

युगांताग्निवत् कठोरा जिह्वा त्रिशिखा यस्य तत्। आविध्य भ्रामयित्वा ॥२॥ तत् खे आपतत् आगच्छत्। विचलत परि
भ्रमत। ग्रहश्च उल्का च यथा ग्रहोल्कं तद्वत् दुःप्रेक्ष्यं शतं पर्वाणि यस्य। तेन उरगराजो वासुकिः तस्य भोगो देहस्तदाकारं
॥३॥ हनौ कपोलप्रांते। अमरेभं ऐरावतं च ॥४॥५॥ पुनश्च तमाह वृत्रो हे हरे इंद्र ॥६॥ सदा जयो नैव किंतु कुत्रचिज्ज

ततो युगांताग्निकठोरजिह्वमाविध्य शूलं तरसाऽसुरेंद्रः क्षिप्त्वा महेंद्राय विनद्य वीरो हतोऽसि पापेति रु
षा जगाद ॥२॥ ख आपतत्तद्विचलद्ग्रहोल्कवन्निरीक्ष्य दुःप्रेक्ष्यमजातविक्लवः। वज्रेण वज्री शतपर्वणाच्छि
नद्भुजं च तस्योरगराजभोगं ॥३॥ छिन्नैकबाहुः परिघेण वृत्रः संरब्ध आसाद्य गृहीतवज्रं। हनौ तता
डेंद्रमथाऽमरेभं वज्रं च हस्तान्न्यपतन्मघोनः ॥४॥ वृत्रस्य कर्मातिमहाद्भुतं तत् सुरासुराश्चारणसिद्धसं
५२ घाः। अपूजयंस्तत्पुरुहूतसंकटं निरीक्ष्य हाहेति विचुक्रुशुर्भृशं ॥५॥ इंद्रो न वज्रं जगृहे विलज्जितश्च्यु
तं स्वहस्तादरिसंनिधौ पुनः। तमाह वृत्रो हर आत्तवज्रो जहि स्वशत्रुं न विषादकालः ॥६॥ युयुत्सतां कु ५२
त्रचिदाततायिनां जयः सदैकत्र न वै परात्मनां। विनैकमुत्पत्तिलयस्थितीश्वरं सर्वज्ञमाद्यं पुरुषं स
नातनं ॥७॥
यः एकत्र कुत्रचित् न वै। यद्वा कुत्रचिदपि युयुत्सतां सदा जयो नैव। किं त्वेकत्रैव कदाचिदेवेत्यर्थः। परो देहः
आत्मा येषां पराधीनात्मनामिति वा। आद्यमनादिं सनातनं नित्यं ॥७॥ ॥

पराधीनतामेवाह। लोका इति सपालाः। यस्य वशे स्थिताः स्वयं विवशाः संतः श्वसंति चेष्टंते। द्विजाः पक्षिणः शिचा जालं
न कालः कलयतीति। भगवान् इह जयादौ कारणं ॥८॥ ओजआदिरूपं कालं तं हेतुं। अज्ञाय यथा अविद्यया जडं संतमात्मा
नं देहं हेतुं मन्यते ॥९॥१०॥ ननु स्वारंभकप्रधानपुरुषादितंत्राणीति युक्तं। तत्राह पुरुष इति। व्यक्तं महत्तत्वं। आत्मा अ
हंकारः ॥११॥ ननु स्वकर्मद्वारा जीव एव सर्वस्यादिहेतुरिति मीमांसका मन्यंते। तत्राह। एवमविद्वान् अनीशमेवा

लोकाः सपाला यस्येमे श्वसंति विवशा वशे। द्विजा इव शिचा बद्धाः स काल इव कारणं ॥८॥ महापुरुष
सन्नद्धो योगमायाबलेन च ओजः सहो बलं प्राणममृतं मृत्युमेव च। तमज्ञाय जनो हेतुमात्मानं म
न्यते जडं ॥९॥ यथा दारुमयी नारी यथा यंत्रमयो मृगः। एवं भूतानि मघवन् ईशतंत्राणि विद्धि भो ॥१०॥
पुरुषः प्रकृतिर्व्यक्तमात्मा भूतेंद्रियाशयाः। शक्नुवंत्यस्य सर्गादौ न विना यदनुग्रहात् ॥११॥ अविद्वा
नेवमात्मानं मन्यतेऽनीशमीश्वरं। भूतैः सृजति भूतानि ग्रसते तानि तैः स्वयं ॥१२॥ आयुः श्रीः कीर्ति
रैश्वर्यमाशिषः पुरुषस्य याः। भवंत्येव हि तत्काले यथानिच्छोर्विपर्ययाः ॥१३॥
त्मानमीश्वरं स्वतंत्रं मन्यंते। ननु पित्रादयः स्रष्टारो दृश्यंते व्याघ्रादयस्तु हंतारस्तत्राह। भूतैरिति। स्वयं ईश्वरः ॥१२॥
ननु त्वया पराजितस्य मम जयादिशंकैव नास्ति। किमिति मां बलात् युद्धे प्रवर्तयसि तत्राह। आयुरिति। तत्काले
जयादिकाले। विपर्ययाः अकीर्त्यादयः ॥१३॥

यस्मादेवं सर्वमीश्वराधीनं तस्मात्समः स्याद्विषादहीनो भवेत्।।१४।। समदृष्टावुपायमाह। सत्वमिति। सत्वादिभिर्न म
बध्यते।।१५।। हर्षविषादनिवृत्त्यै तवाहमेव गुरुरित्याह। पश्येति। हृतं क्यामायुधं भुजश्च यस्य।।१६।। आनियैं त्वं द्यूतरू
पकेणो यसं हरति।। प्राणा एव ग्लहः पणो यस्मिन्। इषव एवाक्षाः यस्मिन्। वाहनान्येव तत्त्वश्चाल्यमानानि आस
नानि फलका यस्मिन्।।१७।। गतालीकं निःकपटं।।१७।। भक्तः सेवितवानसि।।१८।।२०।। तस्य खातकोदके गर्ता

तस्मादकीर्तियशसोर्जयापजययोरपि।। समः स्यात्सुखदुःखाभ्यां मृत्युजीवितयोस्तथा।।१४।। सत्त्वं
रजस्तम इति प्रकृतेर्नात्मनो गुणाः।। तत्र साक्षिणमात्मानं यो वेद न स बध्यते।।१५।। पश्य मां निर्जितं शत्रु वृ
क्णायुधभुजं मृधे।। घटमानं यथाशक्ति तव प्राणजिहीर्षया।।१६।। प्राणग्लहोयं समर इष्वक्षो वाहनास
नः।। अत्र न ज्ञायतेमुष्य जयोमुष्य पराजयः।।१७।। ।।श्रीशुक उवाच।। ।। इंद्रो वृत्रवचः श्रुत्वा गता
४४ लीकमपूजयत्।। गृहीतवज्रः प्रहसंस्तमाह गतविस्मयः।।१८।। अहो दानव सिद्धोसि यस्य ते मतिरीदृशी।
भक्तः सर्वात्मनात्मानं सुहृदं जगदीश्वरं।।१९।। भवानतार्षीन्मायां वै वैष्णवीं जनमोहिनीं।। यद्विहायासु ४४
रं भावं महापुरुषतां गतः।।२०।। खल्विदं महदाश्चर्यं यद्रजःप्रकृतेस्तव।। वासुदेवे भगवति सर्वात्मनि दृढा
मतिः।।२१।। यस्य भक्तिर्भगवति हरौ निःश्रेयसेश्वरे।। विक्रीडतोमृतांभोधौ किं क्षुद्रैः खातकोदकैः।।२२।।
।। ।।श्रीशुक उवाच।। ।।इति ब्रुवाणावन्योन्यं धर्मजिज्ञासया नृप।। युयुधाते महावीर्याविंद्रवृत्रौ युधांपती।।

दिव्यै जल्लोपमैः स्वर्गादिभिः किं।।२१।। युधां योधानां पती मुख्यौ।।२३।। ।।श्रीवासुदेवाय नमः।। ।।

हे मारिष श्रेष्ठ राजन्।।२४।। उरू तं शूलं ययोस्ताभ्यां रक्तं स्रवतीति तथा। गोत्रः पर्वतः।।२५।। कृत्वाधरामित्यादेर्जग्रासेति तृती
येनान्वयः। नभोवद्गंभीरेया वक्त्रेण लेलिहः सर्पस्तद्वत् उल्बणया जिह्वया।।२६।। कालकल्पाभिः ग्रसन्निव।।२७।। निर्जर

आविध्य परिघं वृत्रः कार्ष्णायसमरिंदमः।। इंद्राय प्राहिणोद्घोरं वामहस्तेन मारिष।।२४।। स तु वृत्रस्य परिघं करं च
करभोपमं।। चिच्छेद युगपद्देवो वज्रेण शतपर्वणा।।२५।। दोर्भ्यामुत्कृत्तमूलाभ्यां बभौ रक्तस्रवोसुरः।। छिन्नप
क्षो यथा गोत्रः खाद्भ्रष्टो वज्रिणा हतः।।२६।। कृत्वाधरां हनुं भूमौ दैत्यो दिव्युत्तरां हनुं।। नभोगंभीरवक्त्रेण लेलिहो
ल्बणजिह्वया।।२७।। दंष्ट्राभिः कालकल्पाभिः ग्रसन्निव जगत्त्रयं।। अतिमात्रमहाकाय आक्षिपंस्तरसा गिरीन्।।
।।२८।। गिरिराट् पादचारीव पद्भ्यां निर्जरयन्महीं।। जग्रास स समासाद्य वज्रिणं सहवाहनं।।२९।। महाप्राणो म
हावीर्यो महासर्प इव द्विपं।। वृत्रग्रस्तं तमालक्ष्य सप्रजापतयः सुराः।।३०।। हा कष्टमिति निर्विण्णाश्चुक्रुशुः समह
र्षयः।। निगीर्णोप्यसुरेंद्रेण न ममारोदरं गतः।।३१।। महापुरुषसन्नद्धो योगमायाबलेन च।। भित्वा वज्रेण तत्
कुक्षिं निष्क्रम्य बलभिद्विभुः।। उच्चकर्त शिरः शत्रोर्गिरिशृंगमिवौजसा।।३२

यन्चूर्णयन्। महाप्राणो महाबलो महावीर्यो महाप्रभावः।।२८।।२९।।३०।। महापुरुषेण कवचरूपेण श्री
नारायणेन सन्नद्धो दंशितः योगबलेन मायाबलेन च।।३०।। बलभित् इंद्रः उच्चकर्त चिच्छेद।।३२।। ।।

तस्य कंधरं कंधरा आशुवेगे अतिवेगवान्। ज्योतिषो सूर्यादीनां अयने दक्षिणोत्तरगतिरूपे संवत्सरे योऽहर्गणः ष
ष्ठ्युत्तरशतयोजनात्मकः॥ तावताऽहर्गणेन वार्त्रहत्ये वृत्रहत्यायोग्ये काले न्यपातयत्। यद्वा। स्वार्थे तद्धितः
वृत्रहत्यायां वृत्रहननार्थं परिवर्तमान इत्यर्थः॥ ३२॥ वार्त्रघ्नलिंगैर्मंत्रैः वृत्रहत्वीर्यप्रकाशकैः॥ वार्त्रहत्या
यशो वसे ऋत नाषा ह्याय वेत्यादेः तमिंद्रमभिष्टुवानाः अभिष्टुतवंतः॥ ३३॥ अलोकं लोकातीतं भगवंतं

वज्रस्तु तत्कंधरमाशुवेगः कृंतन् समंतात्परिवर्तमानः॥ न्यपातयत्तावदहर्गणेन यो ज्योतिषामयने
वार्त्रहत्ये॥ ३२॥ तदा च खे दुंदुभयो विनेदुर्गंधर्वसिद्धाः समहर्षिसंघाः॥ वार्त्रघ्नलिंगैस्तमभि
४५ ष्टुवाना मंत्रैर्मुदा कुसुमैरभ्यवर्षन्॥ ३३॥ वृत्रस्य देहान्निष्क्रांतमात्मज्योतिररिंदम॥ पश्यतां सर्व
लोकानामलोकं समपद्यत॥ ३४॥ ॥ इति श्रीभागवते महापुराणे षष्ठस्कंधे वृत्रवधो नाम द्वाद
शोऽध्यायः॥ ॥ श्रीशुक उवाच॥ ॥ वृत्रे हते त्रयो लोका विना शक्रेण भूरिद॥ सपाला ह्यभव ४५
न्सद्यो विज्वरा निर्वृतेंद्रियाः॥ १॥ देवर्षिपितृभूतानि दैत्या देवानुगाः स्वयं॥ प्रतिजग्मुः स्वधिष्ण्यानि
ब्रह्मेशेंद्रादयस्ततः॥ २॥
३४॥ ॥ इति षष्ठे द्वादशः॥ ॥ त्रयोदशे तु वृत्रस्य ब्रह्महत्या महाभयात्॥ चिरं नष्टोषितः शक्रो विष्णुनेति
निरूप्यते॥ १॥ अनिर्वृतं शक्रमदृष्ट्वा स्वयमेव प्रतिजग्मुः॥ २॥ श्रीवासुदेवाय नमः॥ १॥

तस्य हरेरिंद्रस्य दुःखहेतुं वक्तुं प्रस्तावकथामाह। वृत्रविक्रमेत्यादिना॥ आर्थयन् प्रार्थयंतः वृत्रहद्वधात् ब्राह्मण
वधाद्भीतः सन्॥ ४॥ एनः पापं विजज्ञ्यस्य गृहीतं। मार्जिष्ये शोधयामि। ५। ६। ७। ८। ९। वृषाकपिमिंद्रं। १०॥ तथा देवा

राज्ञो वाच॥ ॥ इंद्रस्यानिर्वृतेर्हेतुं श्रोतुमिच्छामि भो मुने॥ येनासन्सुखिनो देवा हरेर्दुःखं
कुतोऽभवत्॥ ३॥ ॥ श्रीशुक उवाच॥ ॥ वृत्रविक्रमसंविग्नाः सर्वे देवाः सहर्षिभिः॥ तद्वधा
यार्थयन्निंद्रं नैच्छद्भीतो बृहद्वधात्॥ ४॥ ॥ इंद्र उवाच॥ ॥ स्त्रीभूजलद्रुमैरेनो विश्वरूपव
धोद्भवं॥ विभक्तमनुगृह्णद्भिर्वृत्रहत्यां क्व मार्ज्म्यहं॥ ५॥ ॥ श्रीशुक उवाच॥ ॥ ऋषयस्त
दुपाकर्ण्य महेंद्रमिदमब्रुवन्॥ याजयिष्याम भद्रं ते हयमेधेन मा स्म भैः॥ ६॥ हयमेधेन
पुरुषं परमात्मानमीश्वरं॥ इष्ट्वा नारायणं देवं मोक्ष्यसेऽपि जगद्वधात्॥ ७॥ ब्रह्महा पितृ
हा गोघ्नो मातृहाचार्यहाघवान्॥ श्वादः पुल्कसको वापि शुद्ध्येरन् यस्य कीर्तनात्॥ ८॥ तमश्व
मेधेन महामखेन श्रद्धान्वितोऽस्माभिरनुष्ठितेन॥ हत्वापि सब्रह्मचराचरं त्वं न लिप्यसे किं
खलनिग्रहेण॥ ९॥ ॥ श्रीशुक उवाच॥ ॥ एवं संचोदितो विप्रैर्मरुत्वानहनद्रिपुं॥ ब्रह्महत्या ह
ते तस्मिन्नाससाद वृषाकपिं॥ १०॥

भा०ष० तया देवादिभिः कारितया स्मेत्यवधारणे। इंद्र एव ताय मस हतु नान्यः। अमुमिंद्रं निर्वृतिर्नाविशत्। ननु धैर्यादि
गुणयुक्तस्य कुतो निर्वृतिः तत्राह। ह्रीमंतं वाच्यतां नियंतां। यक्ष्मग्रस्तां क्षयरोगव्याप्तां॥१३॥ मीनस्येव गंधो य
स्य स मीनगंधिः। स चासाव सुधश्चैश्वासवायुस्तस्य गंधेन॥१३॥ आगुदीचीं दिशं गतः सन् तूर्णं मानसं सरः प्रवि

तयेंद्रः स्मा सहत्तापं निर्वृतिर्नाऽमुमाविशत्। ह्रीमंतं वाच्यतां प्राप्तं सुखयंत्यपि नो गुणाः॥१२॥ तां
ददर्शानुधावंतीं चांडालीमिव रूपिणीं॥ जरया वेपमानांगीं यक्ष्मग्रस्ताम सृक् पटां॥१३॥ विकीर्य प
लितान् केशांस्तिष्ठ तिष्ठेति भाषिणीं॥ मीनगंध्यसुगंधेन कुर्वतीं मार्गदूषणं॥१३॥ नभो गतो दि
शः सर्वाः सहस्राक्षो विशांपते॥ प्रागुदीचीं दिशं तूर्णं प्रविष्टो नृप मानसं॥१४॥ स आवसत्पु
४६ ष्करनालतंतून लब्धभोगो यदिहाग्निदूतः॥ वर्षाणि साहस्रमलक्षितोंतः स चिंतयन् ब्रह्म
वधाद्विमोक्षं॥१५॥

स इंद्रः सहस्रं वर्षाणि पुष्करनालस्य तंतून् आविशत्॥ कथंभूतः न लब्धो भोगो येन सः। कुतः यत् यस्मात् इह जलेऽव
सत्। अग्निदूतश्च स्वयं। अग्नेश्च स्वदूतस्य हविर्भागान्ने तुर्जले प्रवेशासंभवात् लब्धभोग इत्यर्थः। पाठांतरे न ल
ब्धो भोगो येन सः॥१५॥

चिनाकं। न अकं दुःखं यस्मिन् इति नाकः पुण्यलोकः। त तीयं नाकं स्वर्गं। ननु मनुष्यस्य कुतः स्वर्गराज्यं तत्राह। विद्या
दिभिरनुभावः स्वर्गपालने सामर्थ्यं यस्य सः। तर्हि तस्मिन् सति कथमिंद्रस्य पुनः स्वर्गप्राप्तिस्तत्राह। स नहुषः संपदैश्व
र्याभ्यां योमदस्तेनांधा बुद्धिर्यस्य सः इंद्रपत्न्या शच्या तिरश्चां गतिं सर्पयोनिं नीतः उपायेन प्रापितः। एवं ह्याख्यायते
नहुषः किल कदाचित् इंद्राणीमुवाच। इंद्रस्ताव दहं अतस्त्वं मां भजेति। तया चावेदितवृत्तांतो बृहस्पतिस्तामुवाच। ब्राह्म

तावच्छ्रियाकं नहुषः शशास विद्यातपोयोगबलानुभावः॥ स संपदैश्वर्यमदांधबुद्धिर्नीतस्तिरश्चां ग
तिमिंद्रपत्न्या॥१६॥ ततो गतो ब्रह्मगिरोपहूत ऋतंभरध्याननिवारिताघः॥ पापस्त्वदिग्देवतया हतो
जास्तं नाभ्यभूदवितं विष्णुपत्न्या॥१७॥ तं च ब्रह्मर्षयोभ्येत्य हयमेधेन भारत॥ यथावद्दीक्षयांचक्रुः
पुरुषाराधनेन ह॥१८॥

णं वा ह्यृषिशिबिकामारुह्यागतं त्वां भजिष्यामीति ब्रूहि। ततोसौ ब्रह्महत्या पात्यतिष्यतीति। तया च तथोक्तो नहुषो
गस्त्यादीनृषीन् शिबिकां वाहयामास। तदा च त्वरी ध्वंसर्प सर्पेत्यगस्त्यपदाय स्पर्शेन कुपितेन सर्पो भवेति शप्तो महास
र्पः अजगरः अभूदिति॥१६॥ ततः इंद्रः स्वर्गं गतः प्राप्तः। कथंभूतः ब्रह्मगिरा ब्राह्मणवाक्येनोपहूतः स न् ऋतंभरः स
त्यपालको हरिः तस्य ध्यानेन निवारितमघं येन। प्राक् अपि तु पापो ब्रह्मवधस्त्वमिंद्रं नाभ्यभूत् तेस्याभिभवं नाकरो
त्। कुतः दिग्देवतया प्रागुदीच्यां दिशि स्थितया श्रीरुद्रेण अवितं रक्षितं संतं॥१७॥ पुरुषस्य हरेराराधनं यस्मिंस्ते
न॥१८॥

सर्वदेवमय आत्मा मूर्तिर्यस्य तस्मिन् वेदमयात्मनीति वा पाठः। ब्रह्मवादिभिर्विततेऽनुष्ठिते अश्वमेधे महेंद्रेणेज्य
माने पुरुषे सति॥१९॥ तेनैव पुरुषेणैव भ्रूण्यायनीतः नाशित इत्यर्थः॥२०॥ अधिकृताः यज्ञा येन तं॥२१॥ पाठादिविधा
नमाख्यानं स्तौति॥ इदमिति। प्रक्षाल्यते अनेनेति प्रक्षालनं। तीर्थपदस्यानुकीर्तनं यस्मिन्। भक्तेरुच्छ्रयो यस्मिन् भ रु

अथेज्यमाने पुरुषे सर्वदेवमयात्मनि॥ अश्वमेधे महेंद्रेण वितते ब्रह्मवादिभिः॥१९॥ स वै त्वाष्ट्रवधो भूया
नपि पापचयो नृप॥ नीतस्तेनैव शून्याय नीहार इव भानुना॥२०॥ स वाजिमेधेन यथोदितेन वितायमा
नेन मरीचिमिश्रैः॥ इष्ट्वाधियज्ञं पुरुषं पुराणमिंद्रो महानास विधूतपापः॥२१॥ इदं महाख्यानमशेषपा
४७ पमानां प्रक्षालनं तीर्थपदानुकीर्तनं॥ भक्त्युच्छ्रयं भक्तजनानुवर्णनं महेंद्रमोक्षं विजयं मरुत्वतः॥२२॥ पठे ४७
युरुपाख्यानमिदं सदा बुधाः शृण्वंत्यथो पर्वणि पर्वणींद्रियं॥ धन्यं यशस्यं निखिलाघमोचनं रिपुंजयं स्वस्त्य
यनं तथायुषं॥२३॥ ॥इति श्रीभागवते महापुराणे षष्ठस्कंधे इंद्रविजयो नाम त्रयोदशोऽध्यायः॥

क्तजनानामनुवर्णनं यस्मिन् । महेंद्रस्य मोक्षो यस्मिन् । मरुत्वतो विशेषेण जयो यस्मिन् । इंद्रियं तत्वास्वकरं। इं
द्रसंबंधीति वा। आयुषं आयुष्यं॥ ॥इति षष्ठे त्रयोदशः॥ ॥वृत्रस्य ज्ञानजन्मादि श्रुत्वा पृष्टः परीक्षिता। हे
तुमाह वतुर्भिस्तत्राजन्मचरितोक्तिभिः॥१॥ चतुर्दशोतु सहसा कृच्छ्रलब्धे सुते मृते॥ चित्रकेतो रतिस्नेहा
दतिशोको निरूप्यते॥२॥

Rc

रजस्तमश्च स्वभावो यस्य॥१॥२॥ भक्तेर्दुर्लभत्वं प्रपंचयति त्रिभिः॥ पार्थिवैः रजोभिः समा संख्याता अनंता इत्यर्थः। जंतवो
जीवाः तेषां मध्ये ये केचन कतिपये श्रेयो धर्ममीहंते कुर्वते॥३॥ मुच्येत गृहसंगाद्विमुच्यते सिध्यति तत्वं जानाति॥४॥५॥

राजोवाच॥ ॥रजस्तमःस्वभावस्य ब्रह्मन् वृत्रस्य पाप्मनः॥ नारायणे भगवति कथमासीद्दृढा मतिः॥१॥ देवानां
शुद्धसत्वानां मृषीणां चामलात्मनां॥ भक्तिर्मुकुंदचरणे न प्रायेणोपजायते॥२॥ रजोभिः समसंख्याताः पार्थिवैरि
ह जंतवः॥ तेषां ये केचनेहंते श्रेयो वै मनुजादयः॥३॥ प्रायो मुमुक्षवस्तेषां केचनैव द्विजोत्तम॥ मुमुक्षूणां सहस्रे
षु कश्चिन्मुच्येत सिध्यति॥४॥ मुक्तानामपि सिद्धानां नारायणपरायणः॥ सुदुर्लभः प्रशांतात्मा कोटिष्वपि
महामुने॥५॥ वृत्रस्तु स कथं पापः सर्वलोकोपतापनः॥ इत्थं दृढमतिः कृष्ण आसीत्संग्राम उल्बणे॥ अत्र नः संशयो भूयाञ्छ्रोतुं कौतूहलं हि मे
॥६॥ यः पौरुषेण समरे सहस्राक्षमतोषयत्॥ वृत्रस्तु स कथं पापः सर्वलोकोपतापनः॥७॥ ॥सूत उवाच
परीक्षितोऽथ संप्रश्नं भगवान् बादरायणिः॥ निशम्य श्रद्दधानस्य प्रतिनंद्य वचोऽब्रवीत्॥८॥ ॥श्रीशुक उवाच
शृणुष्वावहितो राजन्नितिहासमिमं यथा॥ श्रुतं द्वैपायनमुखान्नारदाद्देवलादपि॥९॥ आसीद्राजा सार्वभौ
मः शूरसेनेषु वै नृप॥ चित्रकेतुरिति ख्यातो यस्यासीत्कामधुङ्मही॥१०॥

६॥ नवेंद्रमिया कृष्णं शरणगत इत्याह। यः पौरुषेणेति॥८॥ यथा यथावत् शृणु॥९॥१०॥ श्रीकृष्णायनमः।

र्श्चाहिताधयः निहितनिश्रेयाः सैधनैः समृद्धा भवंति। पाठांतरे आसमंततो हताधयो निरस्तमनोदुःखा भवंतीत्यर्थः।।१८

भा०ष० भार्यासहस्राणां द्वादशसहस्राणि कोटिरित्यर्थः।। सांतानिकः स्वयं संतानार्होऽपि पुत्रोत्पादनसमर्थोऽपि तास्क संततिं न लेभे।। सर्वास्ता वंध्या एव दैवयोगेन मिलिता इति भावः।।११।। तदेवाह वंध्यापतेरिति।।१२।। उपासीदत तस्य समीपं उपविष्ट इत्यर्थः।। समाहितः संयतः।।१३।।१४।।१५।।१६।। अपि किं। अनामयमारोग्यं। स्वस्ति शुभं। प्रकृत्यधीनमेव हि राज्य

तस्य भार्यासहस्राणां सहस्राणि दशाभवन्।। सांतानिकश्चापि नृपो न लेभे तासु संततिं।।११।। रूपौदार्य वयोजन्मविद्यैश्वर्यश्रियादिभिः।। संपन्नस्य गुणैः सर्वैश्चिंता वंध्यापतेरभूत्।।१२।। न तस्य संपदः सर्वा महिष्यो वामलोचनाः।। सार्वभौमस्य भूश्चेयमभवन्प्रीतिहेतवः।।१३।। तस्यैकदा तु भवनमंगिरा भगवानृषिः।। लोकाननुचरन्नेतानुपागच्छद्यदृच्छया।।१४।। तं पूजयित्वा विधिवत्प्रत्युत्थानार्ह णादिभिः।। कृतातिथ्यमुपासीदत्सुखासीनं समाहितः।।१५।। महर्षिस्तमुपासीनं प्रश्रयावनतं क्षि तौ।। प्रतिपूज्य महाराज समाभाष्येदमब्रवीत्।।१६।। ।।अंगिरा उवाच।। ।।अपि तेऽनामयं स्वस्ति प्रकृ

४८ तीनां तथात्मनः।। यथा प्रकृतिभिर्गुप्तः पुमान्राजा च सप्तभिः।।१७।। आत्मानं प्रकृतिष्वद्धा निधाय श्रे ४८

यश्चाप्नुयात्।। राजा तथा प्रकृतयो नरदेवाहिताधयः।।१८।।

मपि सदृष्टांतमाह। यथा महदाद्याभिः सप्तभिः प्रकृतिभिः पुमान् जीवो नित्यं गुप्तो भवति। न तु तद्व्यतिरेके क्षणमपि तिष्ठति तथा राजापि सप्तभिः। स्वाम्यमात्यौ जनपददुर्गद्रविणसंचयाः। दंडो मित्रं च तस्यैताः सप्तप्रकृतयो मताः।। इत्येवंलक्षणाभि र्नित्यं गुप्तः सन्।१७।। आत्मानं प्रकृतिषु अद्धा साक्षात् निधाय तदनुवर्तिनं कृत्वा श्रेयो राज्य(श्रे)यसुखं प्राप्नुयादित्यर्थः।। स्वामी गुरुः स्वयं वा। मंत्रसहायो मित्रं। कर्मसहायोऽमात्य इति भेदः।। प्रकृतीनां च सुखं राजाधीनमेवेत्याह। हे नरदेव तथा प्रकृतयोऽपि रा

अमात्याः श्रेण्यश्च समयविशेषेण संघशो वर्तमाना वणिक्प्रभृतयः। पौराः पुरवासिनः जानपदाः तत्तद्देशाधिकारिणः।

१९।। तव मनः स्ववशं वा न वेत्यर्थात् पृच्छति। यस्यात्मा मनः अनुवशः अनुवर्ती अधीनः स्यात्। तस्य वशगा इमे सर्वे भवंति। किं

अपि दाराः प्रजामात्या भृत्याः श्रेण्योऽथ मंत्रिणः।। पौरा जानपदा भूपा आत्मजा वशवर्तिनः।।१९।। यस्यात्मानुव शश्चेत्स्यात्सर्वे तद्वशगा इमे।। लोकाः सपाला यच्छंति सर्वे बलिमतंद्रिताः।।२०।। आत्मनः प्रीयते नात्मा परतः स्व त एव वा।। लक्षयेऽलब्धकामं त्वां चिंतया शबलं मुखं।।२१।। एवं विकल्पितो राजन्विदुषा मुनिनापि सः।। प्रश्र यावनतोऽभ्याह प्रजाकामस्ततो मुनिं।।२२।। ।।चित्रकेतुरुवाच।। ।।भगवन्किं न विदितं तपोज्ञानसमाधिभिः योगिनां ध्वस्तपापानां बहिरंतः शरीरिषु।।२३।। तथापि पृच्छतो ब्रूयां ब्रह्मन्नात्मनि चिंतितं।। भवतो विदुषश्चा पि चोदितस्त्वदनुज्ञया।।२४।। लोकपालैरपि प्रार्थ्याः सांम्राज्यैश्वर्यसंपदः।। न नंदयंत्यप्रजं मां क्षुत्तृट्कामम थापरे।।२५।। ततः पाहि महाभाग पूर्वैः सह गतं मम।। यथा तरेम दुस्तारं प्रजया तद्विधेहि नः।।२६।। ।।श्रीशुक उ वाच।। ।।इत्यर्थितः स भगवान्कृपालुर्ब्रह्मणः सुतः।। श्रपयित्वा चरुं त्वाष्ट्रं त्वष्टारमयजद्द्विजः।।२७।।

च। लोकाश्च तस्य बलिं यच्छंति।२०। आत्मा त्वात्मनो भवान् आत्मनो न प्रीयते न तुष्यति। तत्किं परतो वा स्वतो वा। अ लब्धकामं त्वां लक्षये।।२१।। विदुषा सर्वज्ञेनापि।।२२।। अलब्धकामत्वं कथयन् पुत्रं याचते भगवन्निति चतुर्भिः।।२३।।२४ अप्रजमपुत्रं। क्षुत्तृड्भ्यां अन्नपानं कामं अपरे स्रक्चंदनादयो यथा न सुखयंति।।२५।। पूर्वैः पितृभिः सह गतं प्राप्तं तमः नरकं प्रजया यथा तरेम तत्तथा विधेहि।।२६।।२७।।

यज्ञोच्छिष्टं यज्ञशेषं॥२८॥ जन्मना हर्षं मरणेन च शोकं प्रददातीति तथा इति एवमुक्त्वा ययौ॥२९॥ शूरसेनानामीश्वरस्य ते
जसा वीर्येण सो गर्भः स ववृधे॥३०॥३१॥३२॥ जातकं जन्मकर्म॥३३॥ अर्बुदं दश कोट्यः। वेदे तु कोटिरेवार्बुदं। नियुतंप्र

ज्येष्ठा श्रेष्ठा च या राज्ञो महिषीणां च भारत॥ नाम्ना कृतद्युतिस्तस्यै यच्छिष्टमदाद्द्विजः॥२८॥ अथाह नृप
तिं राजन् भवितैकस्तवात्मजः॥ हर्षशोकप्रदस्तुभ्यमिति ब्रह्मसुतो ययौ॥२९॥ सापि तत्प्राशनादेव चि
त्रकेतोरधारयत्॥ गर्भं कृतद्युतिर्देवी कृत्तिकाग्नेरिवात्मजं॥३०॥ तस्या अनुदिनं गर्भः शुक्लपक्ष इवो
४९ डुपः॥ ववृधे शूरसेनेश तेजसा शनकैर्नृप॥३१॥ अथ काल उपावृत्ते कुमारः समजायत॥ जनयन् शूर
सेनानां शृण्वतां परमां मुदं॥३२॥ हृष्टो राजा कुमारस्य स्नातः शुचिरलंकृतः॥ वाचयित्वाशिषो विप्रैः का
रयामास जातकं॥३३॥ तेभ्यो हिरण्यं रजतं वासांस्याभरणानि च॥ ग्रामान् हयान् गजान् प्रादात् धेनूना
मर्बुदानि षट्॥३४॥ ववर्ष कामानन्येषां पर्जन्य इव देहिनां॥ धन्यं यशस्यमायुष्यं कुमारस्य महामनाः॥३५॥ ४९
कृच्छ्रलब्धेथ राजर्षेस्तनयेनुदिनं पितुः॥ यथा निःस्वस्य कृच्छ्राप्ते धने स्नेहोन्ववर्धत॥३६॥

युतं वार्बुदं चेति प्रयुतानंतरनिर्देशात्॥३४॥ धन्यं धनकरं॥३५॥३६॥ ॥श्रीवासुदेवायनमः॥

आयुष्यं आयुःकरं। मोहस्य समुद्भवो यस्मिन्। प्रजाकामरूपो ज्वरस्तापः॥३७॥ दारमित्येकवचनमार्षं॥३८॥
अनपत्येन अपुत्रत्वनिमित्तेन॥३९॥ न गृहे संमतां। न बहुमतां। यद्वा गृहिण्येव गृहं न त्वार्येति संमतामित्य

मातुस्त्वतितरां पुत्रे स्नेहो मोहसमुद्भवः॥ कृतद्युतेः सपत्नीनां प्रजाकामज्वरोभवत्॥३७॥ चित्रके
तोरतिप्रीतिर्यथा दारे प्रजावती॥ न तथान्येषु संजज्ञे बालं लालयतोन्वहं॥३८॥ ताः पर्यतप्यन्ना
त्मानं गर्हयंत्योभ्यसूयया॥ आनपत्येन दुःखेन राज्ञो नादरणेन च॥३९॥ धिगप्रजां स्त्रियं पा
पां पत्युश्चागृहसंमतां॥ सुप्रजाभिः सपत्नीभिर्दासीमिव तिरस्कृतां॥४०॥ दासीनां को
नु संतापः स्वामिनः परिचर्यया॥ अभीक्ष्णं लब्धमानानां दास्या दासीव दुर्भगाः॥४१॥ एवं सं
दह्यमानानां सपत्न्याः पुत्रसंपदा॥ राज्ञोऽसंमतवृत्तीनां विद्वेषो बलवानभूत्॥४२॥ विद्वेषन
ष्टमतयः स्त्रियो दारुणचेतसः॥ गरं ददुः कुमाराय दुर्मर्षा नृपतिं प्रति॥४३॥ कृतद्युतिरजा
नंती सपत्नीनामघं महत्॥ सुप्त एवेति संचिंत्य निरीक्ष्य व्यचरद्गृहे॥४४॥

४०॥र्थः॥४०॥ दास्या दासी यथा तथा वयं दुर्भगाः॥४२॥ न संमता वृत्तिर्जीवनं यासां ताः। विद्वेषेण नष्टाम
तिर्यासां ताः। गरं विषं। दुर्मर्षा असहमानाः॥४३॥ धात्री स्तनदायिनी॥४५॥ ॥श्रीकृष्णायनमः॥

उद्वृत्ते तारके कनीनिके ययोस्ते लोचने यस्य तं ॥४६॥ ४७॥ विस्रस्ताः शिरोरुहा अंबरे च यस्याः सा ॥४८॥ ताभ्यश्च स
पत्न्यो पि अलक्षितो अंतकः मृत्युहेतुर्यस्य तं ॥४९॥ अनुगता अमात्यादयः प्रकृतयो यस्य सो नुप्रकृतिः ॥५०॥

शयानं सुचिरं बालमुपधार्य मनीषिणी ॥ पुत्रमानय मे भद्र इति धात्रीमचोदयत् ॥४५॥ सा शयानमुप
व्रज्य दृष्ट्वोद्वृत्ततारलोचनं ॥ प्राणेंद्रियादिभिस्त्यक्तं हतास्मीत्यपतद्भुवि ॥४६॥ तस्यास्तदा कर्ण्य भृशातु
रं स्वरं घ्नंत्याः कराभ्यामुरउच्चकैरपि ॥ प्रविश्य राज्ञी लघ्वात्मजं निकं ददर्श बालं सहसा मृतं सुतं ॥
४७॥ पपात भूमौ परिदेहयाष्टिवासुमोहविभ्रष्टशिरोरुहांबरा ॥ ततोन्तर्यांतःपरिवर्त्तिनो जना नरा
श्च नार्यश्च निशम्य रोदनं ॥४८॥ आगत्य तुल्यव्यसनाः सुदुःखितास्ताश्च व्यलीकं रुरुदुः कृताग
५० सः ॥ श्रुत्वा मृतं पुत्रमलक्षितांतकं विनष्टदृष्टिः प्रपतन् स्खलन्पथि ॥४९॥ स्नेहानुबंधेधितया
शुचा स्त्रियं विमूर्छितो नुप्रकृतिर्द्विजैर्वृतः ॥ पपात बालस्य स पादमूलेमृतस्य विस्रस्तशिरोरुहां
बरः ॥५०॥ दीर्घं श्वसन्बाष्पकलोपरोधतो निरुद्धकंठो न शशाक भाषितुं ॥ पतिं निरीक्ष्योरुशुचा ५०
र्पितं तदा मृतं च बालं सुतमेकसंततिं ॥५१॥ जनस्य राज्ञी प्रकृतेश्च हृद्रुजं सती दधाना विलपत्यपि
त्र धा ॥ स्तनद्वयं कुंकुमगंधमंडितं निषिंचती सांजनबाष्पबिंदुभिः ॥५२॥
बाष्पकलाभिः अश्रुबिंदुभिरुपरोधतः संरुद्धत्वेन विरुद्धः कंठो यस्य । उरुशुचार्पितं बहुशोकेन व्याप्तं ए
कमेव संततिरूपं ॥५२॥५३॥ ॥

विगलंत्यः स्रजो येभ्यस्तान् केशान् ॥५३॥ आत्मसृष्टेः प्रतिरूपं अननुरूपं चेष्टसे तदेवाह ॥ नु अहो परे त्वहे जीवति । अ
परस्य बालस्य यामृतिस्तत् । तदाहि दृष्टहस्य सृष्टिसामर्थ्याभावे बाले च मृते सति तव सृष्टिर्नष्टा स्यादित्यर्थः ॥ सां प्रतं स्व
सृष्टेर्विपरीतो स्मीति चेत्तत्राह । विपर्ययः विपरीतोसि चेत्तर्हि त्वं प्राणिनामति दुःखकारित्वात् ध्रुवः नित्यः परः शत्रुरसि

विकीर्यकेशान्विगलत्स्रजः सुतं शुशोच वित्रं कुररीव सुस्वरं ॥५३॥ अहो विधातस्त्वमतीव बालिशो यस्या
त्मसृष्ट्यप्रतिरूपमीहसे ॥ परेनुजीवत्यपरस्य या मृतिर्विपर्ययश्चेत्त्वमसि ध्रुवः परः ॥५४॥ त्वं नात नार्हसि
च मां कृपणामनाथां त्यक्तुं विचक्ष्व पितरं तव शोकतप्तं ॥ अंजस्तरेम भवता प्रजदुस्तरं यद्ध्वांतं न याह्यकरुणे
न यमेन दूरं ॥५६॥ न हि क्रमश्चेदिह मृत्युजन्मनोः शरीरिणामस्तु तदात्मकर्मभिः ॥ यः स्नेहपाशो निजसर्गवृद्ध
ये स्वयं कृतस्ते तमिमं विवृश्चसि ॥५५॥ उत्तिष्ठ तात त इमे शिशवो वयस्यास्त्वामाह्वयंति नृपनंदन संविहर्तुं
सुप्तश्चिरं ह्यशनया च भवान्परीतो भुंक्ष्व स्तनं पिब शुचो हर नः स्वकानां ॥५७॥
न तु कृपालुरित्यर्थः ॥५४॥ ननु जीवकर्मानुसारेण जन्मादि कुर्वतो मम को पराध इति तत्राह । न हीति । पुत्रे जीवत्येव पि
ता म्रियते पितरि जीवत्येव पुत्रो जायत इति क्रमो नास्ति । कर्माधीनत्वादिति चेत्तर्ह्यात्मकर्मभिरेव तज्जन्मादिकमस्तु किं
त्वयाहत्यं । ननु मयेश्वरेण विना जडैः कर्मभिरिदं कथं सिध्येत् । भवतु नाम तथापि निजसर्गवृद्धये नेत्वयायः स्नेहपाशः
कृत स्तमिमं स्वयमेव कृतस्तं विवृश्चसि छिनत्सि इत्यादि को शक्तिः । न ह्येवंविधं दुःखं दृष्ट्वा कश्चिदपि पुत्रादिषु स्नेहं करिष्य
तीति भावः ॥५५॥ अप्रजदुस्तरं अप्रजानां दुस्तरं । अकरुणेन सह ॥५६॥ अशनया क्षुधा ॥ ५७॥

तनूज हे पुत्र नाहं प्रथमं त्वत्पार्श्वमागतास्मि तीव मुग्धस्मितं वक्त्रं दृष्ट्वा न दृष्टवत्यस्मि। इदानीमपि गिरो न शृणोमि तर्हि किं अपुनरन्वयं पुनरागमनं यथा न भवति तथा गतोसि ॥५८॥५९॥६०॥६१॥ ॥षष्ठे चतुर्दशः॥ ॥ततः पंचदशे चित्रकेतोः शोकापनोदनं। कृतं तत्त्वोपदेशेन नारदेनांगिरोयुजा ॥१॥ मृतकोपांते शवसमीपे।१। त्वं चास्य बंधूनां कतमः सृष्टो

नाहं तनूज ददृशे हतमंगला ते मुग्धस्मितं मुदितवीक्षणमाननाब्जं। किं वा गतोस्यपुनरन्वयमन्यलोकं नीतो घृणेन नशृणोमि कला गिरस्ते ॥५८॥ ॥श्रीशुक उवाच॥ ॥विलपंत्या मृतं पुत्रमिति चित्रविलापनैः। चित्र

केतुर्भृशं तप्तो मुक्तकंठो रुरोद ह ॥५९॥ तयोर्विलपतोः सर्वे दंपत्योस्तदनुव्रताः। रुरुदुः स्म नरा नार्यः सर्वमासीदचेतसं ॥६०॥ एवं कश्मलमापन्नं नष्टसंज्ञमनायकं। ज्ञात्वांगिरा नाम मुनिराजगाम सनारदः ॥६१॥ ॥ इति श्रीभागवते महापुराणे षष्ठस्कंधे चतुर्दशोध्यायः॥ ॥श्रीशुक उवाच॥ ॥ऊचतुर्मृतकोपांते पतितं मृतकोपमं। शोकाभिभूतं राजानं बोधयंतौ सदुक्तिभिः ॥१॥ कोयं स्यात्तव राजेंद्र भवान्यमनुशोचति। त्वं चास्य कतमः सृष्टौ पुरेदानीमतः परं ॥२॥ यथा प्रयांति संयांति स्रोतोवेगेन वालुकाः। संयुज्यंते वियुज्यंते तथा कालेन देहिनः ॥३॥

प्रज्ञा स्तूपायां अयं पुत्रः अहं वास्य पितेति चेत्तत्राहतुः पुरेति। ये पूर्वजन्मनि पित्रादिरूपेण संयुक्ता आसन्। त एव मरणेन वियुक्ताः संतो वर्त्तमानजन्मनि कदाचित्तस्यैवान्यस्य वा पुत्रादयो भवंति। तज्जन्मांतरे तस्यैवान्यस्य वा कलत्रादयः शत्रुमित्रादयो वा भवंति। अतो नायं नियम इति भावः ॥२॥ तमेवाभिप्रायं प्रकटयति यथेति स्रोतसः प्रवाहस्य वेगेन य

यथा यांति विमुज्यंते संयांति संयुज्यंते तथा कालेन देहिनः इत्यर्थः ॥३॥

तु मातुर्देहिनो देहाद्देहाद्भिज्जायते। देही तु शाश्वत एव। अर्थो भूम्यादिर्यथा तद्वत्। ननु नश्वरदेहप्रतियोगित्वाद्देह्यपि न शाश्वतः स्यात् तत्राहतुः ॥७॥

तथाप्येतावंतं कालं मम पुत्रो नाभूत्। वार्धके जातो मृत इति दुःखं चेत्तत्राहतुः। यथा धानासु बीजेषु धानाः बीजांतराणि भवंति। काश्चित्कदाचिन्न भवंति नोत्पद्यंते नश्यंति च। न तु भवंत्येव तिष्ठंत्येवेति वा नियमः। एवमेव भूतानि पुत्रादिरूपाणि भूतेषु पित्रादिषु। अतो धानानां जन्म जनकत्वेपि यथा पितृपुत्रादिभावो नास्ति। एवमत्रापीति न शोकः कार्य इति भावः। ईशमायया प्रेरितानामेवेति भवनमभवनं न वस्तुतः ॥४॥ तस्य च सर्वसाधारणत्वान्न पुत्र एव शोचनीयः ॥इ

यथा धानासु वै धाना भवंति न भवंति च। एवं भूतेषु भूतानि चोदितानीशमायया ॥४॥ वयं च त्वं च ये चेमे तुल्यकालाश्चराचराः। जन्ममृत्योर्यथा पश्चात्प्राङ्नैवमधुनापि भोः ॥५॥ भूतैर्भूतानि भूतेशः सृजत्यवति हंत्यजः। आत्मसृष्टैरस्वतंत्रैरनपेक्षोपि बालवत् ॥६॥ देहेन देहिनो राजन्देहाद्देहोभिजायते। बीजादेव यथा बीजं देह्यर्थ इव शाश्वतः ॥७॥

त्याहतुः। वयं चेति। तुल्यकाला वर्तमानकालिनाः जन्मनः प्राक् मृत्योः पश्चाच्च यथा न संति एवमधुनापि न संति। भो राजन् आद्यंतयोरसत्त्वात्स्वप्नवदित्यर्थः ॥५॥ असत्त्वे कथं प्रतीतिः। कथं वा दस्य जनक इत्याद्यभिमानस्तत्राहतुः। भूतैरिति। ईश्वरेण मायया सृष्टत्वात्। प्रतीतिः निमित्तमात्रत्वेनैव वस्तुतानामयमभिमान इति भावः। नन्वीश्वरस्य सृष्ट्यादिभिः साध्यमस्ति चेत्तत्र पूर्णकामता प्राप्ता। नास्ति चेत्कुतः प्रवृत्तिस्तत्राहतुः। अनपेक्षोपि बालवल्लीलया करोतीति ॥६॥ अयं च जन्मादिव्यवहारो देहानामेव न त्वात्मन इत्याहतुः। देहिनः पितुर्देहेन देहिनः पुत्रस्य देहो

देहदेहिनोरयंपरस्परजातियोगिभावः।पुरा अनादि अविवेककृतः।अज्ञानकल्पितः।जातिसामान्यंव्यक्तिर्विशेषस्तयोर्वि
भागोयथावस्तूनिसन्मात्रेकल्पितः।परस्परापेक्षासिद्धित्वेनानिरूप्यत्वात्तद्वत्।।८।।आधिनाम्लानंवक्त्रं।।९।।१०।।उ

देहिदेहविभागोयमविवेककृतःपुरा।।जातिव्यक्तिविभागोयंयथावस्तूनिकल्पितः।।८।। ।।श्रीशुकउवाच।। ।।
एवमाश्वासितोराजाचित्रकेतुर्द्विजोक्तिभिः।।प्रमृज्यपाणिनावक्त्रंमाधिम्लानमभाषत।।९।। ।।राजोवाच।। ।।
कौयुवांज्ञानसंपन्नौमहिष्ठौचमहीयसां।।अवधूतेनवेषेणगूढाविहसमागतौ।।१०।।चरंतिह्यवनौका
मंब्राह्मणाभगवत्प्रियाः।।मादृशांग्राम्यबुद्धीनांबोधायोन्मत्तलिंगिनः।।११।।कुमारोनारदऋभुरंगिरादेव
लोसितः।।अपांतरतमोव्यासोमार्कंडेयोथगौतमः।।१२।।वसिष्ठोभगवान्रामःकपिलोबादरायणिः।।दुर्वा
सायाज्ञवल्क्यश्चजातूकर्ण्यस्तथारुणिः।।१३।।लोमशश्च्यवनोदत्तआसुरिःसपतंजलिः।।ऋषिर्वेदशि
राबोध्योमुनिःपंचशिखस्तथा।।१४।।हिरण्यनाभःकौशल्यःश्रुतदेवऋतध्वजः।।एतेपरेचसिद्धेशाश्चरंतिज्ञान
हेतवः।।१५।।तस्माद्युवांग्राम्यपशोर्मममूढधियःप्रभू।।अंधेतमसिमग्नस्यज्ञानदीपउदीर्यतां।।१६।। ।।अंगि
राउवाच।। ।।अहंतेपुत्रकामस्यपुत्रदोस्म्यंगिरान्नृप।।एषब्रह्मसुतःसाक्षात्नारदोभगवानृषिः।।१७।।

न्मत्तस्येवलिंगंयेषांते।।११।।१२।।१३।।१४।।१५।।ममजन्तुरक्षकौबोधेसमर्थाविति।।अतोयुवाभ्यांमेज्ञानदीपःप्रव
र्त्यतां।।१७।।

५२ ५२

महापुरुषगोचरंत्वांहरिभक्तं।।१८।।१९।।तदैवयदापूर्वमागतोस्मि।।२०।।रायअर्थाः।।२१।।चलाःअनित्याः।।किंचमहीति।।२२।।हेशू
रसेनइमेसर्वेपिशोकादिप्रदाः।।किंचआगमापायित्वेनगंधर्वनगरतुल्याः।।गंधर्वनगरंहिअकस्माद्दृश्यतेकचिदायातिचाप
यातिचेतिप्रसिद्धं।।तदेवमनित्यत्वंशोकादिहेतुत्वंचागमापायित्वंचोक्तं।।मिथ्यात्वमप्याह।।स्वप्नश्चमायाचमनोरथश्चय

इव्वंत्वांपुत्रशोकेनमग्नंतमसिदुस्तरे।।अतदर्हमनुस्मृत्यमहापुरुषगोचरं।।१८।।अनुग्रहायभवतःप्राप्तावावामिह
प्रभो।।ब्रह्मण्योभगवद्भक्तोनावसीदितुमर्हति।।१९।।तदैवतेपरंज्ञानंददामिगृहमागतः।।ज्ञात्वान्याभिनिवेशंते
पुत्रमेवददाम्यहं।।२०।।अधुनापुत्रिणांतापोभवतैवानुभूयते।।एवंदारागृहारायोविविधैश्वर्यसंपदः।।२१।।
शब्दादयश्चविषयाश्चलाराज्यविभूतयः।।महीराज्यंबलंकोशोभृत्यामात्याःसुहृज्जनाः।।२२।।सर्वेपिशूर
सेनेमेशोकमोहभयार्तिदाः।।गंधर्वनगरप्रख्याःस्वप्नमायामनोरथाः।।२३।।दृश्यमानाविनार्थेनन
दृश्यंतेमनोभवाः।।कर्मभिर्ध्यायतानानाकर्माणिमनसोभवन्।।२४।।

यातद्वत्।।२३।।मनोभवाः।।मनोमात्रविजृंभिताः।।अत्रहेतुः।।अर्थेनतात्विकस्वरूपेणविनैवदृश्यमानाः।।तत्कुतः
यस्मात्क्षणांतरेनदृश्यंते।।तात्विकत्वेहिक्षणांतरेबाधोनस्यात्।।अतोमनोमात्रविजृंभितत्वेनस्वप्नादिवन्मिथ्या
भूताइत्यर्थः।।नन्वेतेपुण्यापुण्यकृताइतिमीमांसकाःप्राहुस्तत्कुतोमनोभवत्वंतत्राह।।कर्मभिःपूर्ववासनाभिः कर्म
अर्थान्ध्यायतःकर्माभिध्यायतःपुंसोमनसएवनिमित्तात्कर्माण्यभवन्।।पाठांतरेकर्मदीप्सितममभिध्यायतइत्यर्थः
कर्मण्यपिमनोभवत्वात्तत्प्रध्याअर्थाअपिमनोभवाएवेतिभावः।।२४।।

५३

तदेवं मम नास्पदानां दुःखादिहेतुत्वमुक्तं। तत्र देहस्य बंधोमूलमित्याह। अयंहीति। हीत्यवधारणे। अयं द्रव्यज्ञान
क्रियात्मकः अधिभूताधिदेवाध्यात्मरूपो देह एव देहिनः देहोहमिति मन्यमानस्य। देहिनो जीवस्य विविधान् क्ले
शान् संतापांश्च करोतीति तथा॥२५॥ स्वस्थेनाव्यग्रेण गतिं तत्वं। ध्रुवोयं धर्मं इति विस्रंभं विश्वासं प्रणयं वा त्यज।

अयं हि देहिनो देहो द्रव्यज्ञानक्रियात्मकः। देहिनो विविधक्लेशसंतापकृदाहृतः॥२५॥ तस्मात्स्व
स्थेन मनसा विमृश्य गतिमात्मनः॥ द्वैते ध्रुवार्थविस्रंभं त्यजोपशममाविश॥२६॥ ॥श्रीनारद उवाच
एतां मंत्रोपनिषदं प्रतीच्छ प्रयतो मम॥ यां धारयन्सप्तरात्राद्द्रष्टा संकर्षणं विभुं॥२७॥ यत्पादमूलं
 उपसृत्य नरेंद्र पूर्वे शर्वादयो भ्रममिमं द्वितयं विसृज्य। सद्यस्तदीयमतुलानधिकं महित्वं आपु
र्भवानपि परं नचिरादुपैति॥२८॥ ॥इति श्रीभागवते महापुराणे षष्ठस्कंधे पंचदशोध्यायः॥ ॥

ततश्च उपशममाविश आश्रय॥२६॥ अंगिरसोपदिष्टं तत्वं परमेश्वरप्रसादं विना न प्राप्यत इति तत्प्रसादाय मंत्र
विद्यां नारद उपदिशति एतामिति। उपनिषण्णं परं श्रेयोस्यामिति उपनिषत् मंत्र एवोपनिषत् तां प्रतीच्छ गृहाण। द्र
ष्टा द्रक्ष्यति त्वान्॥२७॥ अतुलं च तदनधिकं च समानाधिकरहितं परं महिमानं आपुः उपैति उपैष्यति॥२८॥ ॥
षष्ठे पंचदशः॥

षोडशे तत्र तोत्रैव विशोकीकृत्य तं नृपं॥ आदिदेश महाविद्यां नारदः शेषतोषिणीं॥१॥ आदौ तावन्मृतपुत्र
मुखेनैव पितृपुत्रादि संबंधो मिथ्येति दर्शयितुं योगबलेन तमेव ज्ञातीनां दर्शयित्वा जीवात्मन् इत्याद्युवाच॥१।२
शेषमवशिष्टमायुरस्ति अपमृत्युनामृतत्वादित्यर्थः। तदेव केवलं अविद्ययोच्छ्रितो जीव उवाच। यदा अंतराले अतश्श

श्रीशुक उवाच॥ ॥अथ देवऋषी राजन्संपरेतं नृपात्मजं॥ दर्शयित्वेति होवाच ज्ञातीनामनुशोचतां॥१॥
श्रीनारद उवाच॥ ॥जीवात्मन्पश्य भद्रं ते मातरं पितरं च ते॥ सुहृदो बांधवास्तप्ताः शुचा त्वत्कृतया
भृशं॥२॥ कलेवरं स्वमाविश्य शेषमायुः सुहृद्वृतः॥ भुंक्ष्व भोगान्पितृप्रत्तानधितिष्ठ नृपासनं॥
३॥ ॥जीव उवाच॥ ॥कस्मिन्जन्मन्यमी मह्यं पितरो मातरोभवन्॥ कर्मभिर्भ्राम्यमाणस्य देवतिर्य
ङ्नृयोनिषु॥४॥ बंधुज्ञात्यरिमध्यस्थमित्रोदासीनविद्विषः॥ सर्व एव हि सर्वेषां भवंति क्रमशो मिथः॥
५॥

शरीरस्थितत्वेन ज्ञेयं॥३।४॥ मयि मृते पुत्रदृष्ट्या शोकश्चेत् शत्रुदृष्ट्या हर्षः किं न क्रियत इत्याशयेन संबंधस्यानिय
त्वमाह। बंधवो विवाहादिभिः संबंधिनः ज्ञातयः सपिंडाः अरयो घातकाः मित्राणि रक्षकाः मध्यस्थाः उभयव्य
तिरिक्ताः विद्विषो द्रव्यनिमित्तेन द्वेषिणः। उदासीनास्तु अतिरिक्ता इति भेदः॥५॥

कर्मभिर्भ्राम्यमाणत्वे दृष्टांतः। यथा पण्यानि क्रयविक्रयाद्य र्हाणि कर्तृषु व्यवहर्तृषु परिभ्रमंति। एवं जीवोपि योनि
षु जनकेषु॥ ६॥ एकस्मिन्नपि जन्मनि संबंधस्यानियतत्वं सदृष्टांतमाह। द्वाभ्यां। नित्यस्य जीवतोपि अर्थस्य पश्वादेः
वि यतः अनित्यः क्रियादिना संबंधनिवृत्तेः॥ ७॥ एवं योनिगतः पित्रादिसंबंधं प्राप्तोपि स जीवो नित्यः। देहजन्मादि

यथा वस्तूनि पण्यानि हेमादीनि ततस्ततः॥ पर्यटंति नरेष्वेवं जीवो योनिषु कर्तृषु॥ ६॥ नित्यस्यार्थ
स्य संबंधो ह्यनित्यो दृश्यते नृषु॥ यावद्यस्य हि संबंधो ममत्वं तावदेव हि॥ ७॥ एवं योनिग
तो जीवः स नित्यो निरहंकृतः॥ यावद्यत्रोपलभ्येत तावत्स्वत्वं हि तस्य तत्॥ ८॥

५७ नातस्य जन्माद्यभावात्। अत एव वस्तुतो निरहंकृतः। अहमस्य पुत्र इत्यभिमानशून्यः। यत्र पित्रादौ सं
बंधि निया वदुपलभ्येत कर्मवशेन वर्त्तेत। तावदेव तस्य पित्रादेः। तत्तस्मिन्स्वत्वं न तु विक्रियाद्युत्तरकाल ५७
मपि। अथ चैवं संबंधः। यदुक्तं कलेवरं समाविश्येति। न च तस्मिन्कलेवरे ममेदानीं स्वत्वं निवृत्तं इति सदृष्टां
तमाह। नित्यस्य चिरकालावसायिनः सुवर्णादेः योनिगतो देहं प्रविष्टः यत्र देहे तस्य जीवस्य तत्तस्मिन्देहे
स्वत्वं न तु मरणोत्तरकालमपीत्यर्थः सश्लोकं समानं॥ ८॥ ॥

जीवस्यानित्यत्वं साधयति। एष नित्यस्तत्र हेतुः अव्ययः अपक्षयशून्यः। तत्कुतः सूक्ष्मः जन्मादिशून्यः। तच्च कुतः
सर्वाश्रयः। जन्मादिमतो देहादेराश्रयः। न तु देहादिरूपः। यतः स्वदृक् स्वप्रकाशः। सर्वाश्रयत्वमुपपादयति। आत्म
मायागुणैरात्मानमेव विश्वं विश्वात्मकं सृजति। तदात्मानं स्वयमकुर्वतेतिश्रुतेः। उपादानकारणत्वात्। समाश्रय
इत्यर्थः। जीवस्य वस्तुतो ब्रह्मत्वात् ब्रह्मण एव विभक्तिविशिष्टस्येश्वरत्वेन स्रष्टृत्वात्। जीवः सृजतीति वाचो
युक्तिः। यद्वा स्वकर्मद्वारा सृष्टिनिमित्तत्वेन स्रष्टृत्वं भोग्यस्यैव सर्वस्य भोक्ताश्रयत्वात्। सर्वाश्रयत्वं चोक्तमिति द्रष्ट ५७

एष नित्योव्ययः सूक्ष्म एष सर्वाश्रयः स्वदृक्॥ आत्ममायागुणैर्विश्वमात्मानं सृजते प्रभुः॥ ९॥ न ह्यस्या
स्ति प्रियः कश्चिन्नाप्रियः स्वः परोपि वा॥ एकः सर्वधियां द्रष्टा कर्तॄणां गुणदोषयोः॥ १०॥ ना
दत्त आत्मा हि गुणं न दोषं न क्रियाफलं। उदासीनवदासीनः परावरदृगीश्वरः॥ ११॥

व्यं॥ ९॥ यदुक्तं सुहृद्धत इति सुहृदो बांधवास्तस्मादिति च तत्राह। न ह्यस्येति। तत्र हेतुः। एकः सुहृदादिसंग
रहितः। तत्कुतः। गुणदोषयोर्हिताहितयोः कर्तॄणां मित्रादीनां याः सर्वा धियः विचित्रा बुद्धयः तासां द्रष्टा सा
क्षी। यच्चोक्तं भुंक्ष्व भोगानित्यादि तत्राप्याह। नादत्त इति। गुणं सुखं दोषं क्रियाफलं च राज्यादिकं। उदासीन
त्वे हेतुः। परावरदृक्। कारणस्य कार्यस्य च साक्षी न तु भोक्ता। यतः ईश्वरः देहादिपारतंत्र्यशून्यः। अत एवं
भूतस्य मम च युष्माकं च संबंधाभावाच्छोकं च मा कुरुतेति वाक्यार्थः॥ १२॥

१२॥१३॥ द्विजभाषितं अंगिरसा प्रोक्तं पुत्रादीनां दुःखहेतुत्वं स्मरंत्यः पुत्रकामना श्रून्या निर्मत्सराः सत्य इति भावः
१४॥ निबिडयं कतुल्यं गृहं विहाय निःक्रमणमति धीरस्य तस्यैव योग्यं नान्यस्येति स दृष्टांतमाह। सरस्सः पंकात् द्विपो ग
जइवेति॥१५॥ कृताः पुण्यजलक्रिया पितृतर्पणाद्या येन। संयत प्राणो नियतेंद्रियः॥ १६।१७॥ नमो धीमहि ध्याये
मनसा नमस्यामइत्यर्थः॥१८॥ निवृत्ता द्वैतदृष्टिर्यस्मात्॥१९॥ न्यस्ता निरस्ता शक्तिर्मयः मायानिमित्ता रागद्वेषाद

श्रीशुकउवाच॥ ॥इत्युदीर्य गतो जीवो ज्ञातयस्तस्य ते तदा॥ विस्मिता मुमुचुः शोकं छित्वात्मस्नेहशृंखलां॥१२॥
निर्हृत्य ज्ञातयो ज्ञातेर्देहं कृत्वोचिताः क्रियाः॥ तत्यजुर्दुस्त्यजं स्नेहं शोकमोहभयार्तिदं॥ १३॥ बालघ्न्यो व्रीडि
तास्तत्र बालहत्याहतप्रभाः॥ बालहत्याव्रतं चेरुर्ब्राह्मणैर्यन्निरूपितं॥ १४॥ यमुनायां महाराज स्म
रंत्यो द्विजभाषितं॥ स इत्थं प्रतिबुद्धात्मा चित्रकेतुर्द्विजोक्तिभिः॥ गृहांधकूपान्निःक्रांतः सरःपंकादिव द्विपः।
 १५॥ कालिंद्यां विधिवत्स्नात्वा कृतपुण्यजलक्रियः॥ मौनेन संयतप्राणो ब्रह्मपुत्राववंदत॥१६॥ अथ तस्मै प्र
पन्नाय भक्ताय प्रयतात्मने॥ भगवान्नारदः प्रीतो विद्यामेतामुवाच ह॥१७॥ नमस्तुभ्यं भगवते वासुदेवा
य धीमहि॥ प्रद्युम्नायानिरुद्धाय नमः संकर्षणाय च॥१८॥ नमो विज्ञानमात्राय परमानंदमूर्तये॥ आ
त्मारामाय शांताय निवृत्तद्वैतदृष्टये॥१९॥ आत्मानंदानुभूत्यैव न्यस्तशक्त्यूर्मये नमः॥ हृषीकेशाय
महते नमस्ते विश्वमूर्तये॥ २०॥ वचस्युपरतेऽप्राप्य य एको मनसा सह॥ अनामरूपश्चिन्मात्रः सो व्यान्नः सदसत्परः
यो येन। २०॥ मनसा सह वचसि अप्राप्योपरते सति य एक एव प्रकाशते। वचसीति सर्वेंद्रियोपलक्षणं। सोस्मान् व्यात् २१॥

तदेवाह। यस्मिन्निदं कार्यं कारणं तिष्ठति। अप्येति च। यतश्च जायते। मृन्मयेषु घटादिषु मृज्जातिर्मृन्मात्रमिव सर्वा
नुस्यूतं यत् तस्मै॥२२॥ ननु सर्वानुस्यूतं चेत् ज्ञातिवत् प्रतीयेत। कथं मनोवचसोरप्राप्तिस्तत्राह। यद्ब्रह्म व्योमवद्वितत्तम
पि अस्वः प्राणाः क्रियाशक्त्या न स्पृशंति। मनआदीनि वा ज्ञानशक्त्या न विदुः तद्ब्रह्म नतोस्मि॥ २३॥ तेषां तदज्ञाने
हेतुमाह। देहेंद्रियादयो मीयदंशाविद्धाः यद्वेतन्यांशेनाविष्टाः संतः कर्मसु स्वस्वविषयेषु प्रचरंति जाग्रत्स्वप्नयोः।

यस्मिन्निदं यतश्चेदं तिष्ठत्यप्येति जायते॥ मृन्मयेष्विव मृज्जातिस्तस्मै ते ब्रह्मणे नमः॥ २२॥ यन्न स्पृ
शंति न विदुर्मनोबुद्धींद्रियासवः॥ अंतर्बहिश्च सततं व्योमवत्तं नतोस्म्यहं॥ २३॥ देहेंद्रियप्राणम
नोधियो मीयदंशाविद्धाः प्रचरंति कर्मसु॥ नैवान्यदा लोहमिवाप्रतप्तं स्थानेषु तद्द्रष्टृपदेश
मेति॥ २४॥ ॐ नमो भगवते महापुरुषाय महानुभावाय महाविभूतिपतये सकलसात्वतप
रिवृढनिकरकरकमलकुड्मलोपलालितचरणारविंदयुगल परमपरमेष्ठिन् नमस्ते॥ २५॥ ॥

अन्यदा स्वप्नसुषुप्तिमूर्च्छादौ नैव प्रचरंति। यथा अप्रतप्तं लोहं न दहति। अतो लोहमग्निशक्त्यैव दहति कं स दहन्निर्विना न द
हति। एवं ब्रह्मगतज्ञानक्रियाशक्तिभ्यां वर्तमाना देहादयः। तन्न स्पृशंति न विदुश्चेति भावः। जीवस्तर्हि द्रष्टृत्वाज्जानातु
नेत्याह स्थानेषु जाग्रदादिषु द्रष्टृ प्रदेशं द्रष्टृसंज्ञां न दैवेतिप्राप्नोति नान्यो जीवो नामास्ति नान्यो अतो ऽस्ति द्रष्टेत्यादिश्रुतेः। यद्वा द्रष्टृप्रदे
शं द्रष्टृसंज्ञं जीवमपि तदेव एति जानाति। न तु जीवस्तज्जानातीत्यर्थः। तदुक्तं हंसगुह्यस्तोत्रे। देहोसवोक्षा इत्यादि॥ २४॥ सकलाये सात्वतप
रिवृढास्तेषां निकरः समूहस्तस्य करकमलानां कुड्मलैर्मुकुलैरुपलालितं चरणारविंदयुगलं यस्य तस्य संबोधनं। परम उत्कृष्ट परमे

पूर्वं स नारदो ंगिरा आजगामेत्यंगिरः प्राधान्येनोक्तः। चित्रकेतोः पुत्रप्रदत्वेन तस्य पृथक् उक्तत्वात्। इह तु नारदो ंगिरसा
साकं ययाविति नारदस्य प्राधान्यनिर्देशः। तदुपदेशेन तस्य वैराग्योत्पत्तेः। प्रभोर्हि समर्थः॥ २६॥ यथा यथावद्धारयामा
स॥ २७॥ विद्याधराधिपत्यं चावांतरफलं तेन। अप्रतिहतम स्खलितं॥ २८॥ कतिपयैरहोभिः विद्यया ईद्दृशेन दीप्तेन म
नसा गतिर्यस्य॥ २९॥ मृणालवद्गौरं सितिवाससं नीलांबरं। स्फुरंति किरीटादीनि यस्य। कटित्रं कटिसूत्रं। प्रसन्नानिव

श्रीशुक उवाच॥ ॥ गत्वा यैतां प्रपन्नाय विद्यामादिश्य नारदः॥ ययावंगिरसा साकं धाम स्वायंभुवं प्रभो॥
२६॥ चित्रकेतुस्तु तां विद्यां यथा नारदभाषितां॥ धारयामास सप्ताहमप्भक्षः सुसमाहितः॥ २७॥ ततश्च स
प्तरात्रांते विद्यया धार्यमाणया॥ विद्याधराधिपत्यं स लेभे ऽप्रतिहतं नृप॥ २८॥ ततः कतिपयाहोभिः

र्विद्ययेद्धमनोगतिः॥ जगाम देवदेवस्य शेषस्य चरणांतिकं॥ २९॥ मृणालगौरं सितिवाससं स्फुरत्किरीटके
यूरकटित्रकंकणं॥ प्रसन्नवक्त्रारुणलोचनं वृतं ददर्श सिद्धेश्वरमंडलैः प्रभुं॥ ३०॥ तद्दर्शनध्वस्तसमस्तकि
ल्बिषः स्वच्छामलांतःकरणो ऽभ्ययान्मुनिः॥ प्रवृद्धभक्त्या प्रणयाश्रुलोचनः प्रहृष्टरोमा ऽनमदादिपूरुषं॥
॥ ३१॥

क्षाणि यस्य। अरुणानि लोचनानि यस्य तं वृतं च॥ ३०॥ दृष्ट्वा च तमादिपूरुषं अभ्ययात् शरणं गतः। अनमत् नाम। कथंभूत
स्तस्य दर्शनेन ध्वस्तं समस्तं किल्बिषं यस्य। स्वच्छममलं चांतःकरणं यस्य। प्रणयेनाश्रुयुक्ते लोचने यस्य। प्रहृष्टानि रोमा
णि यस्य॥ ३१॥

तं प्रसमीडितुं चिरं नैवाशकत् तत्र हेतुः। उत्तमश्लोकस्य पदाब्जयोर्विष्टरं आसनं उपमेहयन् अश्रुभिः सिंचन् प्रेम्णा
उपरुद्धः। अखिलानां वर्णानां निर्गमं उत्सरणं यस्य॥ ३२॥ मनीषया बुद्ध्या मनः समाधाय एतद्वक्ष्यमाणं बभाषे॥
अतिलब्धा वाक् येन॥ सात्वतशास्त्रोक्तो विग्रहो यस्य तं॥ ३३॥ अन्योन्यप्रेमजानंदनिर्वृतान् स्वामिसेवकान्। अ
जितं त्वं मुदा स्तौति। दशभिः पंचभिर्विष्णुं॥ हे अजित अन्यैरजितो भवान् साधुभिर्भक्तैर्जितः स्वाधीन एव कृतः। य

स उत्तमश्लोकपदाब्जविष्टरं प्रेमाश्रुलेशैरुपमेहयन्मुहुः॥ प्रेमोपरुद्धाखिलवर्णनिर्गमो नैवाशका
त्तं प्रसमीडितुं चिरं॥ ३२॥ ततः समाधाय मनो मनीषया बभाष एतत्प्रतिलब्धवागसौ॥ नियम्य सर्वेंद्रि
यबाह्यवर्तनं जगद्गुरुं सात्वतशास्त्रविग्रहं॥ ३३॥ ॥ चित्रकेतुरुवाच॥ ॥ अजित जितः सममतिभिः
साधुभिर्भवान् जितात्मभिर्भवता॥ विजितास्तेपि च भजतामकामात्मनां य आत्मदो ऽतिकरु
णः॥ ३४॥ तव विभवः खलु भगवन् जगदुदयस्थितिलयादीनि॥ विश्वसृजस्तें ऽशांशास्तत्र मृषास्प
र्द्धंति पृथगभिमत्या॥ ३५॥

तो भवानतिकरुणः तेपि च निःकामा अपि त्वया विजिताः॥ यो भवान् अकामात्मनामात्मानमेव ददाति॥ ३४॥
ननु भक्तैरेव जित इति कथं। स्पर्द्धमानैरपि सृष्ट्यादिकर्तृभिरन्यैरीश्वरैर्जयसंभवात्। तत्राह। तवेति। जगदुदयादीनि
तवैव विभवः। विभवनं महिमा लीलेति यावत्। आदिशब्देन प्रवेशमहिमादीनि। विश्वसृजस्तु ब्रह्मादयो नेश्वराः
किंतु तवांशांशाः पुरुषस्तस्यांशाः। तत्र एवं स्थिते पृथक् पृथगीश्वरा वयमित्यभिमानेन वृथैव स्पर्द्धंते॥ ३५॥

[illegible] सर्वोत्कर्षेण स्थितं तत्र हेतुः यान् कथनात् सनत्कुमारादयो मुनयस्ते यं भगवंतमपवर्गाय सेव
तेते न भवताजितं यं धर्ममिति वा ॥४०॥

भा०ष० त्वमेव सृष्ट्यादिकं त्रैस्येतदुपपादयति। परमाणुः सूक्ष्मं स्थूलं कारणं परमं महत्। अंतिकं कार्यं। तयोस्त्वमेवाद्यंतांतरवर्ती
आदावंते च। अंतरे मध्ये च वर्तित्वं शीलं यस्य स अन्तरवर्ती त्रयविधुरः। आद्यंतमध्यशून्यो ध्रुवः। तेन त्वयास्त्यंते। ननु ध्रुवः
कुत इत्यत आह। सत्वानां सत्वेन प्रतीतानां कार्याणामादावंते पि अंतराले पि तदेव ध्रुवं स्फुवर्णादिवत् ॥३६॥ एवं ध्रुव
त्वेन कालतः परिच्छेदो नास्तीत्युक्तं। देशतोप्यपरिच्छेदमाह। क्षित्यादिभिरिति। पूर्वस्मात्पूर्वस्माद्दशगुणोत्
तरैरधिकैरावृतो यत्र यस्मिन्नणुकल्पः र = ८ अणुतुल्यः पतति परिच्छिन्नमिति तत्तस्मादनंतत्वं ॥३७॥ यस्मादेवं परमेश्वरस्त्वमेवात्र
परमाणुपरमहतोस्त्वमाद्यंतांतर्वर्ती त्रयविधुरः ॥ आदावंते च सत्वानां यत् ध्रुवं तदेवांतरालेपि ॥३६॥
क्षित्यादिभिरेष किलावृतः सप्तभिर्दशगुणोत्तरैरंडकोशः ॥ यत्र पतत्यणुकल्पः सहांडकोटिकोटि
५७ भिस्तदनंतः ॥३७॥ विषयतृषो नरपशवो य उपासते विभूतीर्न परं त्वां ॥ तेषामाशिष ईश तदनु
विनश्यंति यथा राजकुलं ॥ ३८ ॥ कामधियस्त्वयि रचिता न परम रोहंति यथा करंभबीजानि ॥
ज्ञानात्मन्यगुणमये गुणगणतोस्य द्वंद्वजालानि ॥३९॥ जितमजित तदा भवता यदाह भागवतं ध पु
र्ममनवद्यं ॥ निःकिंचना ये मुनय आत्मारामा यमुपासतेऽपवर्गाय ॥४०॥ ५७
न्ये देवास्तव विभूतयः अतस्त्वां विहाय विषयकामनया। अन्योपासका अतिमंदा इत्याह। विषयेषु तृट् तृष्णा येषां ते नराकाराः पशवः
कुतः ये विभूतीरिंद्राद्या उपासते न तु परं त्वां। ततः किं तत्राह। तेषामिति तदनु उपास्यनाशानंतरं यथा राजकुलं अनुराजकुलनाशानंतरं
यथा तत्सेवकानां आशिषो नश्यंति तद्वत्। अयं च परमो वधिः। मध्येपि नश्यंत्येव ॥३८॥ विषयकामेनापि कृता त्वत्सेवा मोक्षफलैवेत्याह।
कामधियः विषयकामना अपि। हे परम त्वयि रचिता कृताश्चेन्न रोहंति देहांतरोत्पत्तये न भवंति। करंभबीजानि भर्जितबीजानि यथा यतोस्य
जीवस्य गुणगणादेव द्वंद्वसमूहा भवंति। अतः कामेनापि निर्गुणस्य तव भजनाद्भवनैर्गुण्यं भवतीत्यर्थः ॥३९॥ फलकामनयापि त्वदारा
धं यदा मोक्षहेतुर्हे। तदा हे भगवन् त्वया जितं किं वक्तव्यं भगवद्धर्ममाहात्म्यमिति वक्तुं तत्संग्रहाय प्रवर्तकत्वेन च भगवंतं स्तौति जितमिति। यदा भर्गं

अनवद्यतामेवाह। विषममतिर्यत्र यस्मिन्। भागवते धर्मे नास्ति। यदन्यत्र यथान्यस्मिन् काम्यधर्मे। ननु सोपि
वेदोक्तत्वादनवद्य एव तत्राह। विषमधिया शत्रुमरणादिकामनया रचितो विहितो यः स ह्यविशुद्धः रागद्वेषादिमत्वात् क्षयि
ष्णुश्च नश्वरफलत्वात्। अधर्मबहुलश्च हिंसादिबाहुल्यात्। तदुक्तं शंकरस्वामिभिः। उभयमिह चोदनायां लक्ष्यते। अर्थोनर्थश्चे
त्यादि ॥४१॥ एतत्प्रपंचयति। कः क्षेमः किं कुशलं। न किंचित् निजपरयोः स्वपुरस्य च। स्वपरद्रुहा स्वस्मै परस्मै द्रुह्यतीति
विषममतिर्न यत्र नृणां त्वमहमिति मम तवेति च यदन्यत्र ॥ विषमधिया रचितो यः स ह्यविशुद्धः क्षयिष्णुरधर्मबहुलः ॥
॥४१॥ कः क्षेमो निजपरयोः कियानर्थः स्वपरद्रुहा धर्मेण ॥ स्वद्रोहात्तव कोपः परसंपीडया च तथाधर्मः ॥४२॥ न व्यभि
चरति तवेक्षा यया ह्यभिहितो भागवतो धर्मः ॥ स्थिरचरसत्वकदंबेष्वपृथग्धियो यमुपासते त्वार्याः ॥४३॥ न हि भग
वन्नघटितमिदं त्वद्दर्शनान्नृणामखिलपापक्षयः ॥ यन्नाम सकृच्छ्रवणात्पुल्कशोपि विमुच्यते संसारात् ॥४४॥
स्वपरध्रुक् तेन। यतः स्वद्रोहात्। अत्यंतकायक्लेशात्। तव कोपः पीडा संभवति। तदुक्तं गीतासु। कर्षयंतः शरीरस्थं भूतग्राम
मचेतसः ॥ मां चैवांतःशरीरस्थं तान्विद्ध्यासुरनिश्चयानिति। तथा परसंपीडया ऽधर्मः। च शब्दात्तव कोपश्च। अतस्त्वयोरागां
धमपि कथं विद्वेद मार्गे प्रवर्तीयितुं काम्यधर्मो ऽभिहितो न तत्वदृष्ट्या ॥४२॥ भागवतधर्मेण तु न द्रोह इत्याह। न व्यभिचरति न
परमार्थं जहाति। तव ईक्षा दृष्टिः। अव्यभिचारे हेतुः स्थिरेति। स्थावरजंगमप्राणिसमूहेषु समबुद्धयो भागवताः। यं धर्मं से
वंते ॥४३॥ एवं भूतस्य भागवतधर्मप्रवर्तकस्य तव दर्शनात्सर्वपापक्षयो भवतीति किं चित्रमित्याह न हीति ॥४४॥

भा०ष० अतोऽहं कृतार्थोऽस्मीत्याह। अथेति। अतो हेतोः तवावलोकेन परिमृष्टा निरस्ता आशये चित्ते मला येषां ते। त्वद्दर्शनं च मम नार
दोपदेशेनैव जातमित्याह। सुरर्षिणेति ॥४५॥ यथा चाहं पूर्वमतिमूढ आसं। यथा च नारदेनानुगृहीतोऽस्मि। तत्सर्वांतर्या
मिणस्तव मया किं प्रकाशनीयमित्याह ॥५ विदितमिति। विशेषेण ज्ञाप्यं प्रकाशनीयं। कियदिव न किमपीत्यर्थः ॥ स

अथ भगवन् वयमधुना त्वदवलोकपरिमृष्टाशयमलाः ॥ सुरऋषिणा यदुदितं तावकेन कथमन्यथा भवति ॥
४५॥ विदितमनंत समस्तं तव जगदात्मनो जनैरिहाचरितं ॥ विज्ञाप्यं परमगुरोः कियदिव सवितुरिव खद्योतैः ॥
४६॥ नमस्तुभ्यं भगवते सकलजगत्स्थितिलयोदयेशाय ॥ दुरवसितात्मगतये कुयोगिनां भिदा परमहंसाय ॥
५८ ४७॥ यं वै श्वसंतमनु विश्वसृजः श्वसंति यं चेकितानमनु चित्तय उच्चकंति ॥ भूमंडलं सर्षपायति यस्य मूर्ध्नि
तस्मै नमो भगवतेऽस्तु सहस्रमूर्ध्ने ॥४८॥ ॥श्रीशुक उवाच॥ ॥संस्तुतो भगवानेवमनंतस्तमभाषत ॥ विद्याधरप
तिं प्रीतश्चित्रकेतुं कुरूद्वह ॥४९॥ ॥श्रीभगवानुवाच॥ ॥यन्नारदांगिरोभ्यां ते व्याहृतं मेऽनुशासनं ॥ संसिद्धोऽसि ५८
तया राजन् विद्यया दर्शनाच्च मे ॥५०॥

१।८
वितुर्यथा खद्योतैः प्रकाशनीयं नास्ति तद्वत् ॥४६॥ उक्तलक्षणं भगवंतं प्रणमति नम इति द्वाभ्यां। सकलस्य जगतः स्थित्यादीनां
मीश्वराय समर्थाय दुरवसिता अविज्ञाता आत्मगतिर्निष्ठा तत्त्वं यस्य तस्मै केषां कुयोगिनां। केन भिदा भेददृष्ट्या ॥४७॥ श्व
सति चेष्टते। चेकितानं पश्यंतमनु चित्तयः ज्ञानेंद्रियाणि उच्चकंति स्वारूढं पश्यंति ॥४८॥४९॥ मे मनुशासनं मद्विषय उपदेशः
तेन च तया च विद्यया अस्माच्च दर्शनात् संसिद्धोऽसि ॥५०॥

तद्बोधाद्भाग्यस्त्वयमप्युपदिशति। अयमित्यादिना। सर्वभूतान्यहमेव भूतानामात्मा भोक्ताप्यहमेव। भोक्तृभोग्यात्मकं
विश्वं मद्व्यतिरिक्तं नास्तीत्यर्थः। अतोऽहं भूतभावनः भूतानां प्रकाशकः। कारणं च। ननु शब्दब्रह्म प्रकाशकं परं ब्रह्म कारणं च
प्रकाशकं च। सत्यं। ते उभे ममैव स्वरूपे इत्याह शब्दब्रह्मेति। शाश्वती शाश्वत्यौ ॥५१॥ अतस्त्वमेवं पश्येत्याह। लोके भोग्ये प्रपंचे
भोक्तृत्वेन विततमनुगतमात्मानं, लोकं चात्मनि भोग्यत्वेन संततं व्याप्तं। तदुभयं च मया कारणात्मना व्याप्तं। मयि चैवोभयं कृ

अहं वै सर्वभूतानि भूतात्मा भूतभावनः ॥ शब्दब्रह्म परं ब्रह्म ममोभे शाश्वती तनू ॥५१॥ लोके विततमात्मा
नं लोकं चात्मनि संततं ॥ उभयं च मया व्याप्तं मयि चैवोभयं कृतं ॥५२॥ यथा सुषुप्तः पुरुषो विश्वं पश्यति चात्म
नि ॥ आत्मानमेकदेशस्थं मन्यते स्वप्न उत्थितः ॥५३॥ एवं जागरणादीनि जीवस्थानानि चात्मनः ॥ मायामात्रा
णि विज्ञाय तद्द्रष्टारं परं स्मरेत् ॥५४॥

तं कल्पितं स्मरेदिति तृतीयेनान्वयः। पश्येदित्यध्याहारो वा ॥५२॥ ननु जाग्रदाद्यवस्थाभेदेन भोक्तृभोग्यात्मकं विश्वं स्फु
टं प्रतीयमानं कथं कल्पितं स्यादित्याशंक्य स्वप्नगतजाग्रदादिदृष्टांतेन संभावयन्नाह। यथेति द्वाभ्यां। यथा स्वप्ने सुषुप्तो विश्वं
गिरिवनादिरूपं देशांतरस्थमात्मन्येव पश्यति स्वप्नमध्ये सुषुप्तिं स्वप्नं च पश्यतीत्यर्थः। तथा स्वप्न एव उत्थितः सन्नात्मानमे
कदेशस्थं शयनदेशे स्थितं मन्यते। जाग्रदवस्थामनुभवति ॥५३॥ एवं प्रसिद्धान्यपि जागरादीनि जीवस्थानानि जीवोपाधेः बुद्धेर
अवस्था आत्मनो मायामात्राणीत्येवं विज्ञाय तेषां द्रष्टारं। अत एव परं तदवस्थारहितमात्मानं स्मरेत् ॥५४॥

ननु तेषां द्रष्टारमिति कथमुच्यते। सुषुप्तौ स्वापे द्रष्टृत्वाभावे। द्रष्टृत्वाभावात्। तत्राह। येनेति। सुषुप्तः पुरुषो जीवः येन रूपेण तदा स्वापकाले आत्मनः स्वापं निर्गुणमतीन्द्रियं सुखं च वेद तमात्मानं ब्रह्म मामवेहि। तदा स्वापसुखयोः संवेदने सुखमहमस्वाप्सम् इति स्मृतेरसंभवात्॥५५॥ ननु स्वापसाक्षिणा दृष्टं कथं जाग्रद्वस्थः स्मरेत्। नह्यन्येन दृष्टमन्यः स्मरति तत्राह। उभयं प्रस्वापं प्रतिबोधं च स्मरतः अनुसंदधतः। तयोः प्रस्वापप्रतिबोधयोः एकाकारत्वेन यदन्वेति। ताभ्यां व्यतिरिच्येत वा। एकैकापायेप्यनपायात्। तत्ज्ञानं परं ब्रह्म तदेव वस्तु भिन्नमित्यर्थः। अतो बाल्ये दृष्टस्य यौवने स्मृतिवत् स्वप्नावस्थान्तरत्वेपि स्वापानंदयोः स्मरणं घटत इति भावः। तदेवंभूतब्रह्मात्मानमवेहीत्यनुषंगः॥५६॥

येन प्रसुप्तः पुरुषः स्वापं वेदात्मनस्तदा॥ सुखं च निर्गुणं ब्रह्म तमात्मानमवेहि मां॥५५॥

उभयं स्मरतः पुंसः प्रस्वापप्रतिबोधयोः॥ अन्वेति व्यतिरिच्येत तत् ज्ञानं ब्रह्म तत्परं॥५६॥

यदेतद्विस्मृतं पुंसो मद्भावं भिन्नमात्मनः॥ ततः संसार एतस्य देहाद्देहो मृतेर्मृतिः॥५७॥

विपक्षे दोषमाह। यत् यदि एतन्मद्भावं मत्स्वरूपं ब्रह्म विस्मृतं तदात्मनः सकाशाद्भिन्नं भवति। ततः एतस्य पुंसः संसारो भवति। संसारस्वरूपमाह। देहाद्देहः जन्मांतरं पुनर्जन्म। मृतेरनंतरं पुनर्मृतिश्चेति॥५७॥ ॥ ५९

योन्यंतरेपि भोगादिसंपादनं तुच्छकं। ज्ञानार्थं तत्रैव यतितव्यमित्याह। लब्ध्वेति। ज्ञानं शास्त्रोक्तं विज्ञानमपरोक्षं तयोः संभवो यस्यां तां॥५८॥ वैराग्यार्थमाह। ईहायां प्रवृत्तिमार्गे नतरं हातः। अनीयां होनिवृत्तिमार्गे तु। अभयं मोक्षो भवतीति। वस्मृत्वा फलसंकल्पाद्विरमेत्। पाठांतरे नोभयं परिक्लेशः। फलविपर्ययः अनास्तीत्येव स्मृत्वा॥५९ एतद्विद्वा

लब्ध्वेह मानुषीं योनिं ज्ञानविज्ञानसंभवां॥ आत्मानं यो न बुध्येत न क्वचित् क्षेममाप्नुयात्॥५८॥ स्मृत्वेहायां परिक्लेशं ततः फलविपर्ययं॥ अभयं चाप्यनीहायां संकल्पाद्विरमेत्कविः॥५९॥ सुखाय दुःखमोक्षाय कुर्वाते दंपती क्रियाः॥ ततो निवृत्तिरप्राप्तिर्दुःखस्य च सुखस्य च॥६०॥ एवं विपर्ययं बुद्ध्वा नृणां विज्ञाभिमानिनां॥ आत्मानश्च गतिं सूक्ष्मां स्थानत्रयविलक्षणां॥६१॥ दृष्टश्रुताभिर्मात्राभिर्निर्मुक्तः स्वेन तेजसा॥ ज्ञानविज्ञानसंतृप्तो मद्भक्तः पुरुषो भवेत्॥६२॥

णेति। सुखदुःखायेति द्वाभ्यां। दुःखस्यानिवृत्तिः सुखस्याप्राप्तिः॥६०॥ विज्ञा उद्यमे प्रवीणा वयमिति अभिमानवतां स्थानत्रयविलक्षणां तुरीयां बुद्ध्वा॥६१॥ दृष्टश्रुताभिर्मात्राभिः ऐहिकामुष्मिकैर्विषयैः स्वेन तेजसा विवेकबलेन॥६२

नवातःपरंपुरुषार्थोस्तीत्याह।एतावानिति योगेनैवपुण्यंयस्याःसाबुद्धिर्येषांपरस्यात्मनःएकंदर्शनमितियत्एतावाने
व॥६३॥६४॥इतिषष्ठेषोडशोध्यायः॥ ॥ततःसप्तदशे॰मोघमहर्द्धिंप्राप्यखेचरं॥विहस्यगिरिशंशापादुमायाश्च
त्रतांगतः।यतःयस्यांतस्यैदिशेनमःनमनंकृत्वा।सविद्याधरस्त्रीभिर्हरिंगायन्नरेमेइतिद्वयेनान्वयः॥१॥अव्याहतबलमिं

एतावानेवमनुजैर्योगनैपुण्यबुद्धिभिः॥स्वार्थःसर्वात्मनाज्ञेयोयत्परात्मैकदर्शनं॥६३॥त्वमेवमश्रद्धयाराज
न्नप्रमत्तोवचोमम।ज्ञानविज्ञानसंपन्नोधायन्नाशुसुसिध्यसि॥६४॥ ॥श्रीशुकउवाच॥ ॥आश्वा
स्यभगवानित्थंचित्रकेतुंजगद्गुरुः॥पश्यतस्तस्यविश्वात्मातत्रश्चांतर्दधेहरिः॥६५॥ ॥इतिश्रीभा
गवतेमहापुराणेषष्ठस्कंधेषोडशोध्यायः॥ ॥श्रीशुकउवाच॥ ॥ततश्चांतर्हितोनंतस्तस्यैकृत्वादिशे
नमः॥विद्याधरश्चित्रकेतुश्चचारगगनेचरः॥१॥सलक्षंवर्षलक्षाणांअव्याहतबलेंद्रियः।स्तूयमानोमहा
योगीमुनिभिःसिद्धचारणैः॥२॥कुलाचलेंद्रद्रोणीषुनानासंकल्पसिद्धिषु।रेमेविद्याधरस्त्रीभिर्गाप
यन्हरिमीश्वरं॥३॥एकदासविमानेनविद्युद्दीप्तेनभास्वता॥गिरिशंददृशेगच्छन्परीतंसिद्धचारणैः॥४॥

द्रियपाटवंयस्य।२।नानाविधाःसंकल्पेनैवसिद्धयोयासुतासु।३॥अकस्माददृष्टैश्वर्यगर्वात्प्राचीनकर्मतःआसुरीयो
निमापन्नोभवानीशापतःसतुतदाहएकदेत्यादिना॥४॥ ॥ ॥ ६०

× आलिंग्यांकीकृतांदेवींबाहुनामुनिसंसदि॥उवाचदेव्याःशृण्वंत्याजहासोच्चैस्तदंतिके॥५॥चित्रकेतुरुवाच॥ ४
अंकीकृतांउत्संगेस्थानेकीकृत्यदेवींबाहुनालिंग्यस्थितंउवाचजहासतस्यांतिकेस्थितःसन्॥५॥धर्मवक्ताबदतिशरीरि
णांमध्येमुख्यश्चभार्ययामिथुनीभूयचास्ते।६।७।८।अधीगागंभीराधीर्यस्यसः॥९॥नूतस्यवीर्यप्रभावंविद्वान्तस्मि
न्निर्जितात्माभिमानिनेजितेंद्रियोहमित्यभिमानवते॥१०॥इतिरुषाक्रोधेनाह।विरुद्धप्रकर्षेणकरोतीतिविप्रकृत्
* एषलोकगुरुःसाक्षाद्धर्मवक्ताशरीरिणां॥आस्तेमुख्यःसभायांवैमिथुनीभूयभार्यया॥६॥जटाधरस्तीव्रतपा
ब्रह्मवादिसभापतिः।अंकीकृत्यस्त्रियंचास्तेगतह्रीःप्राकृतोयथा॥७॥प्रायशःप्राकृतश्चापिस्त्रियंरहसिबि
भ्रति।अयंमहाव्रतधरोबिभर्त्तिसदसिस्त्रियं॥८॥ ॥श्रीशुकउवाच॥ ॥भगवानपितच्छ्रुत्वाप्रहस्या
गाधधीर्नृप।तूष्णींबभूवसदसिसभ्याश्चतदनुव्रताः॥९॥इत्यतद्वीर्यविदुषिब्रुवाणेबह्वशोभनं॥रुषाहदे
वीधृष्टायनिर्जितात्माभिमानिने॥१०॥ ॥पार्वत्युवाच॥ ॥अयंकिमधुनालोकेशास्तादंडधरःप्रभुः॥
अस्मद्विधानांदुष्टानांनिर्लज्जानांचविप्रकृत्॥११॥नवेदधर्मंकिलपद्मयोनिर्नब्रह्मपुत्राभृगुनारदाद्याः।
नवैकुमारःकपिलोमनुश्चयेनोनिषेधंत्यतिवर्त्तिनंहरं॥१२॥एषामनुध्येयपदाब्जयुग्मंजगद्गुरुंमंगल
मंगलंस्वयं॥यःक्षत्रबंधुःपरिभूयसूरीन्प्रशास्तिधृष्टस्तदयंहिदंड्यः॥१३॥
अतिवर्त्तिनंशास्त्रमतिक्रम्यवर्त्तमानंशीलंयेनोनिषेधंतिनवारयंति।१२।एषांब्रह्मादीनामनुध्येयंपदाब्जयुगंयस्यतंमंगल

भा०ष०
६१

ननुहरिभक्तोनदंडार्हइतिचेत्तत्राह।नायंसाधुभिःपरिसेवितंवैकुंठस्यपादमूलंउपसर्पणमर्हति।यतःसंभाविताअहमधिकइ
तिरूढमतिरयंनअतएवस्तब्धःअनम्रः॥१४॥तद्दोषस्यचैतदेवफलंनिश्चित्यतंप्रत्याह।अतइति।हेपुत्रयथाभूयोमहतांकिल्बि
षमपराधंनकर्त्तानकरिष्यसि।तथाहीयासीत्यर्थः॥१५।१६॥पूर्वदिष्टंप्राचीनकर्मप्राप्तमेव॥१७॥अयंचसंसारचक्रस्य
स्वभावएवनविचित्रमित्याह।संसारचक्रइति॥१८॥एतदेवात्रममचनकोपिदोषइत्याह।नैवेति।एवंतावत्सुखदुःख

नायमर्हतिवैकुंठपादमूलोपसर्पणं॥संभावितमतिस्तब्धःसाधुभिःपर्युपासितं॥१४॥अतःपापीयसींयो
नीमासुरींयाहिदुर्मते।यथेहभूयोमहतांनकर्त्तापुत्रकिल्बिषं॥१५॥ ॥श्रीशुकउवाच॥ एवंशप्तश्चित्रके
सप तुर्विमानादवरुह्यसः।प्रसादयामाससतींमूर्ध्नानम्रेणभारत॥१६॥ ॥चित्रकेतुरुवाच॥ ॥प्रतिगृह्णामि
तेशापमात्मनोंजलिनांबिके।देवैर्मर्त्याययत्प्रोक्तंपूर्वदिष्टंहितस्यतत्॥१७॥संसारचक्रएतस्मिन्जंतुर
ज्ञानमोहितः।भ्राम्यन्सुखंचदुःखंचभुंक्तेसर्वत्रसर्वदा॥१८॥नैवात्मानपरश्चापिकर्त्तास्यात्सुखदुःख
योः।कर्त्तारंमन्यतेप्राज्ञआत्मानंपरमेवच॥१९॥गुणप्रवाहएतस्मिन्कःशापःकोन्वनुग्रहः।कःस्व
र्गोनरकःकोवाकिंसुखंदुःखमेववा॥२०॥

स्वमंगीकृत्योक्तं॥१९॥इदानींतदपितत्त्वतोनास्तीत्याह॥गुणानांमायामयानांप्रवाहेसंसारे॥२०॥ ६१

ननुमायागुणानांचस्वयंप्रवाहकर्तृत्वेहितेषांजडत्वं...आद्यनुभवोनस्यात्तत्राह।एकःपरमेश्वरोमाययानिमित्तभू
तयाभूतानिप्राणिनःसृजतितेषांबंधादिकंचसृजति।निष्कलःस्वयंबंधादिशून्यः॥२१॥नन्वेवंभूतविषमसृष्टेर्
तस्यकिंकारणंप्रियादिवैषम्याभावादित्याशंक्य।यद्यपिप्रियादयोनभवंतितथापितत्तत्कर्मवशात्सर्वंघटतइ
त्याह।नतस्येतिद्वाभ्यां।प्रतीपःअप्रियःनज्ञातिर्बंधुश्चेत्यर्थः।तत्रहेतुः॥सर्वत्रसमस्यतत्कुतः।निरंजनस्यनिःसं

एकःसृजतिभूतानिभगवानात्ममायया।एषांबंधंचमोक्षंचसुखंदुःखंचनिष्कलः॥२१॥नतस्यकश्चिद्दयितः
प्रतीपोनज्ञातिबंधुर्नपरोनचस्वः।समस्यसर्वत्रनिरंजनस्यसुखेनरागःकुतएवरोषः॥२२॥तथापितच्छक्ति
विसर्गएषांसुखायदुःखायहिताहिताय।बंधायमोक्षायचमृत्युजन्मनोःशरीरिणांसंसृतयेवकल्पते॥
२३॥अथप्रसादयेनत्वांशापमोक्षायभामिनि।यन्मन्यसेह्यसाधूक्तंममतत्क्षम्यतांसति॥२४॥श्री
शुकउवाच॥ ॥इतिप्रसाद्यगिरिशौचित्रकेतुररिंदम।जगामस्वविमानेनपश्यतोःस्मयतस्तयोः॥२५॥

गस्यअतएवतन्निमित्तेसुखेरागोनास्ति।रागानुबंधोरोषःकुतःस्यात्॥२२॥यद्यप्येवंतथापितस्यशक्त्यामाययायोवि
सर्गःपुण्यपापादिलक्षणंकर्मएषांशरीरिणांसुखाद्यर्थंभवकल्पते।समर्थोभवति।यथोक्तंगीतासु।भूतभावोद्भव
करोविसर्गःकर्मसंज्ञितइति॥२३॥अथतस्मात्हेभामिनिकोपनेत्वांकेवलंप्रसादयामि।नतुशापमोक्षाय।तर्हिकिं

प्रसादने नात आह। ममोक्तं साध्वपि असाधुवन्मन्यसेत त्वया क्षम्यतां ॥२४॥ गिरिशो भवानी शंकरो प्रसाद्य स्मयतो
विस्मयं कुर्वतोः सतोः॥२५॥ २६। २७ स्वर्गादावेव तुल्येऽर्थप्रयोजनमिति द्रष्टुं शीलं येषां ते तेषां॥२८॥ तत्र तदुक्तमे

ततस्तु भगवान् रुद्रो रुद्राणीमिदमब्रवीत्॥ देवर्षिदैत्यसिद्धानां पार्षदानां च शृण्वतां॥२६॥ रुद्र उवाच।
दृष्टवत्यसि सुश्रोणि हरेरद्भुतकर्मणः। माहात्म्यं भृत्यभृत्यानां निस्पृहाणां महात्मनां॥२७॥ नारायणप
राः सर्वे न कुतश्चन बिभ्यति। स्वर्गापवर्गनरकेष्वपि तुल्यार्थदर्शिनः॥२८॥ देहिनां देहसंयोगाद्द्वंद्वानी
श्वरलीलया। सुखं दुःखं मृतिर्जन्म शापोऽनुग्रह एव च॥२९॥ अविवेककृतः पुंसो ह्यर्थभेद इवात्मनि। गु
णदोषविकल्पश्च भिदेव स्रजिवत्कृतः॥३०॥ वासुदेवे भगवति भक्तिमुद्वहतां नृणां। ज्ञानवैराग्यवीर्याणां
नेह कश्चिद्व्यपाश्रयः॥३१॥

वहेतुमाह द्वाभ्यां। देहिनां सुखदुःखमित्यादि द्वंद्वानीश्वरस्य लीलया मायया भवंति॥२९॥ ते एव गुणदोषविकल्प इत्येवे
त्यन्वयः। इष्टानिष्टभेदद्वयः स्फुरति स आत्मन्यर्थभेदः पुंसः स्वप्ने यथा अविवेककृतो भवति। स्रजिवत्सर्पमालादिभिः
यथा तथैव वस्तुत इत्यर्थः। स्रग्वदिति वक्तव्ये स्रजिवदित्यार्षं पाठांतरे तु सुगमं॥३० अतो भागवतानां निस्पृहत्वमुचितमे
वेत्याह। ज्ञानवैराग्ययोर्वीर्यं बलं येषां तेषां व्यपाश्रयः॥ विशिष्टबुध्या आश्रयणीयोऽर्थो नास्ति॥३१॥ ॥ ६२

अस्य च हरिदासत्वेन तत्स्वभावत्वान्नैतच्चित्रमिति वक्तुं हरेर्माहात्म्यमाह। नाहमिति द्वाभ्यां। ईहितमभिप्रायं लीलां वा या
वदा वयं न विद्मः। तदा तस्य स्वरूपमंशकांशका असंतः पृथगीशमानिनो न विदुरेव॥३२॥ अत एव हरिरपि सर्वेषां
भूतानां प्रियः॥३३॥ अहं चैवाच्युतस्य प्रियः। न ×चि×स्मान्ममास्मन्क्रोधो माभूदिति भावः॥३४॥ प्रतिशापं दातु
नाहं विरिंचो न कुमारनारदौ न ब्रह्मपुत्रा मुनयः सुरेशाः॥ विदाम यस्येहितमंशकांशका न तत्स्वरूपं
पृथगीशमानिनः॥३२॥ न ह्यस्यास्ति प्रियः कश्चिन्नाप्रियः स्वःपरोऽपि वा। आत्मत्वात्सर्वभूतानां
सर्वभूतप्रियो हरिः॥३३॥ तस्य चायं महाभागश्चित्रकेतुः प्रियोऽनुगः। सर्वत्र समदृक् शांतो ह्यहं चैवाच्यु
तप्रियः॥३४॥ तस्मान्न विस्मयः कार्यः पुरुषेषु महात्मसु। महापुरुषभक्तेषु शांतेषु समदर्शिषु॥
३५॥ ॥श्रीशुक उवाच॥ ॥ इति श्रुत्वा भगवतः शिवस्योमाभिभाषितं। बभूव शांतधी राजन्देवी वि
गतविस्मया॥३६॥ इति भागवतो देव्याः प्रतिशप्तुमलंतमः। मूर्ध्ना स जगृहे शापमेतावत्साधुलक्ष
णं॥३७॥ जज्ञे त्वष्टुर्दक्षिणाग्नौ दानवीं योनिमाश्रितः। वृत्र इत्यभिविख्यातो ज्ञानविज्ञानसंयुतः॥३८
मलं तमो समर्थतमोऽपि॥३७॥ ३८ ॥ ॥ ॥

भा० ष
६२

असुरजाते असुरभावे। नोत्पन्ने भगवति मतेश्च॥ ३९। ४०। एतत्तु एवं ४१। षष्ठे सप्तदशः॥ आदित्यानां तु यस्य त्वा
वंशप्रसंगतः। प्रोक्तमिंद्रकृतं चित्रं भ्रूणरूपमिंद्रवधादिकं॥१॥ अदितेः पंचमादीनां पुत्राणां अन्वयोक्तितः। अष्टादशे दिते

एतत्ते सर्वमाख्यातं यन्मां त्वं परिपृच्छसि। वृत्रस्यासुरजातेश्च कारणं भगवन्मतेः॥३९॥ इतिहासमिमं
पुण्यं चित्रकेतोर्महात्मनः। माहात्म्यं विष्णुभक्तानां श्रुत्वा बंधाद्विमुच्यते॥४०॥ य एतत्प्रातरुत्थाय श्र
द्धया वाग्यतः पठेत्। इतिहासमिमं स्मृत्वा स याति परमां गतिं॥४१॥ ॥ इति श्रीभागवते महापुरा
णे षष्ठस्कंधे सप्तदशोध्यायः॥ ॥ श्रीशुक उवाच॥ ॥ पृश्निस्तु पत्नी सवितुः सावित्रीं व्याहृतीं
त्रयीं। अग्निहोत्रं पशुं सोमं चातुर्मास्यं महामखान्॥१॥ सिद्धिर्भगस्य भार्यांग महिमानं विभुं प्रभुं।
आशिषं च वरारोहां कन्यां प्रासूत सुव्रता॥२॥

गर्भे शक्रेण मरुतां भिदा। त्वष्टुर्वंशमनुक्रम्य सप्रसंगं यथाक्रमं। आदित्यानामथान्येषां वंशानाह मुनीश्वरः ६३
दक्षकन्यान्वयानुकथने आदित्याः द्वादश पुत्राः प्रोक्ताः। विवस्वानर्यमा पूषा त्वष्टाथ सविता भगः। धाता वि
धाता वरुणो मित्रः शक्र उरुक्रम इति। तत्र अष्टाध्यायां तरमारभ्य विश्वरूपचित्रकेतूपाख्यानेस्त्वष्टुर्वंशमनु
वर्ण्य। इदानीं सवितुर्वंशमाह। पृश्निस्त्विति। सावित्रीमित्यादिषु प्रासूतेत्यनुषंगः। पशुं पशुयागं। महामखान्पंचयज्ञान्॥१॥

धातुर्भार्या कुहूः सायं पुत्रं प्रासूत। एवं सिनीवाली दर्शमित्यनुक्रमात्। समनंतरो विधाता क्रियायां भार्यायां पुरीष्या
नग्नीन्पंचचिती। त्रीन्। पुरीष्यासो अग्नय इति पंचवा एते अग्नयो यच्चित्तय इति श्रुतेः। ३। चर्षणी वरुणस्य भार्यासी
त्। पूर्वब्रह्मणः पुत्रो भृगुः यस्यां पुनर्जातः। वाल्मीकिर्वरुणस्य पुत्रोऽभवत्। एतौ वरुणस्य साधारणौ पुत्रौ

धातुः कुहूः सिनीवाली राका चानुमतिस्तथा। सायं दर्शमथ प्रातः पूर्णमासमनुक्रमात्। अग्नीन्पुरीष्या
नाधत्त क्रियायां समनंतरः॥३॥ चर्षणी वरुणस्यासीद्यस्यां जातो भृगुः पुनः। वाल्मीकिश्च महायोगी वल्मी
द्रु कादभवत्किल॥४॥ अगस्त्यश्च वसिष्ठश्च मित्रावरुणयोर्ऋषी। रेतः सिषिचतुः कुंभे उर्वश्याः संनिधौ
द्रुतं॥५॥ रेवत्यां मित्र उत्सर्गमरिष्टं पिप्पलं व्यधात्। पौलोम्यामिंद्र आधत्त त्रीन्पुत्रानिति नः श्रु
तं॥६॥ जयंतमृषभं तात तृतीयं मीढुषं प्रभुः॥७॥ उरुक्रमस्य देवस्य मायावामनरूपिणः। कीर्त्तौ प
त्न्यां बृहच्छ्लोकस्तस्यासन्सौभगादयः॥८॥ तत्कर्मगुणवीर्याणि काश्यपस्य महात्मनः। पश्चाद्वक्ष्या
महेदित्यां यथैवावततार ह॥९॥ द्रुतं स्कंध पा६।७८।९

तथोत्सर्गादयो मित्रस्य साधारणाः। तयोरेव साधारणौ पुत्रौ द्वौ। अगस्त्यश्च वसिष्ठश्च ऋषी मित्रावरुणयोर
भवतां। यतः उभावपि कुंभे रेतः सिषिचतुः। सत्रे हृता नाविजितामनोभिः कुंभे रेतः सिषिचतुः समानमिति श्रुतेः

भा० प०
६८

पश्चादष्टमस्कंधे अथेति कश्यपस्यादितेः पुत्राणां द्वादशादित्यानां संततिमुक्त्वा दितेः पुत्रान्कथयामीत्यर्थः ।१०। हिरण्य
कशिपुर्हिरण्याक्षश्चेति । प्रथमं द्वावेव तौ वक्कीर्तितौ । तृतीयस्कंधे ।११।१२। विप्रचित्तो दानवान्भर्तुः सकाशात् राहुं पुत्रम
ग्रहीत् ।१३। ततः संह्रादाद् असूत ।१४। यो मेषरूपं वातापिं पपे तमिल्वलं । यं पपे तं वातापिं वा सूते इत्यन्वयः ।१५।१६।१७।१८

अथ कश्यपदायादान्दैतेयान्कीर्तयामि ते । यत्र भागवतः श्रीमान्प्रह्लादो बलिरेव च ॥१०॥ दितेर्द्वावेव दा
यादौ दैत्यदानववंदितौ । हिरण्यकशिपुर्नाम हिरण्याक्षश्च कीर्तितौ ॥११॥ हिरण्यकशिपोर्भार्या कयाधुर्ना
म दानवी । जंभस्य तनया दत्ता सुषुवे चतुरः सुतान् ॥१२॥ संह्रादं प्रागनुह्रादं ह्रादं प्रह्लादमेव च । तत्स्वसा
सिंहिका नाम राहुं विप्रचितोग्रहीत् । शिरो हरद्यस्य हरिश्चक्रेण पिबतोमृतं । संह्रादस्य कृतिर्भार्यासूत
पंचजनं ततः ॥ ह्रादस्य धमनी भार्यासूत वातापिमिल्वलं । योगस्त्यायत्वतिथये पेचे वातापिमिल्वलं ।
१५॥ अनुह्रादस्य सूर्म्यायां बाष्कलो महिषस्तथा । विरोचनस्तु प्राह्लादिर्देव्यास्तस्याभवद्बलिः ॥१६॥ बाण
ज्येष्ठं पुत्रशतं अशनायां ततोभवत् । तस्यानुभावः सुश्लोक्यः पश्चादेवाभिधास्यते ॥१७॥ बाणस्य आराध्य
गिरिशं लेभे तद्गणमुख्यतां । यत्पार्श्वे भगवानास्ते ह्यद्यापि पुरपालकः ॥१८॥ मरुतश्च दितेः पुत्राश्चत्वारिं
शन्नवाधिकाः । त आसन्नप्रजाः सर्वे नीता इंद्रेण सात्मतां ॥१९॥ सुश्लोक्यः यशः इति शेषः ।१९।
ततो बलेः सकाशादभवत् । तस्य बलेरनुभावः सुश्लोक्यः गुणकीर्त्यर्हः । यद्वा अनुभाव्यते सद्भिः स्तूयत इति अनुभावं

६८

३७॥ इंद्रहणं इंद्रहंतारं अमर्त्यं अमृत्युं अमर्त्यं येन इंद्रेण विष्णुसहायेन । घातितौ ।३८।३९।४०। स्वभावमनुवर्तमानाया योषितः कोतिक्रमो
पराधः ।४१। स्वभावमेवाह द्वाभ्यां । शरत्पद्मस्येवोत्सवो विकाशो यस्मिन् । श्रवणे अमृतीतयो रमृतं । क्षुरधारोपमं चित्तं ॥४२॥
स्वाशिषात्मनां स्वार्थकामनया त्मवत् श्रेष्ठत्वेन ज्ञातीयमानां ।४३। तत्रेदमुपकल्प्यते योग्यं भवति । अयं भावः । वैकुंठं व्रतं ता
तस्मात्पतिव्रता नार्यः श्रेयस्कामा सुमध्यमे । यजंतेनन्यभावेन पतिमात्मानमीश्वरं ॥३६॥ सोहं त्वयार्चितो भद्रे
ईदृग्भावेन भक्तितः । तत्ते संपादये काममसतीनां सुदुर्लभं ॥३७॥ ॥दितिरुवाच॥ ॥वरदो यदि मे ब्रह्मन्
पुत्रमिंद्रहणं वृणे । अमृत्युं मृतपुत्राहं येन मे घातितौ सुतौ ॥३८॥ निशम्य तद्वचो विप्रो विमनाः पर्यतप्यत । अ
हो अधर्मः सुमहानद्य मे समुपस्थितः ॥३९॥ अहो अर्थेंद्रियारामो योषिन्मय्येह मायया । गृहीतचेताः कृ
पणः पतिष्ये नरके ध्रुवं ॥४०॥ कोतिक्रमोनुवर्तंत्याः स्वभावमिह योषितः । धिङ्मां बताबुधं स्वार्थे यदहं त्वजितें
द्रियः ॥४१॥ शरत्पद्मोत्सवं वक्त्रं वचश्च श्रवणामृतं । हृदयं क्षुरधाराभं स्त्रीणां को वेद चेष्टितं ॥४२॥ न हि क
श्चित्प्रियः स्त्रीणामंजसा स्वाशिषात्मनां । पतिं पुत्रं भ्रातरं वा घ्नंत्यर्थे घातयंति च ॥४३॥ प्रतिश्रुतं ददामीति व
चस्तन्न मृषा भवेत् । वधं नार्हति चेंद्रोपि तत्रेदमुपकल्प्यते ॥४४॥ इति संचिंत्य भगवान्मारीचः कुरुनंदन ।
उवाच किंचित्कुपित आत्मानं च विगर्हयन् ॥४५॥ एवं सतींद्रस्य वधोपि न भविष्यतीति ।४४।४५। ॥
वदुपदेक्ष्यामि । तेनैवास्याः शुद्धचित्तायाः इंद्रक्रोधो निवर्तयिष्यते । पुत्रस्त्वां मर्त्यो भविष्यति । दीर्घकालत्वेवात्र तस्य कथं चिद्दैगु

हे भद्रे अंगः यथावद्यदि धारयिष्यसि तर्हि इंद्रहा भविष्यति वैगुण्येपि देवबांधवो भविष्यति। वैष्णवत्वाद्व्रतस्य कथंचिद्वैगुण्येपि सति
सर्वथा वैफल्याभावात्।४६॥ कार्याण्यावश्यकानि। व्रतं यानि न घ्नंति। नावश्यकानि। किंतु अभ्यनुज्ञातानि सर्वाण्यपि मे ब्रूहि
४७॥ तत्रैकत्रिंशन्निषेधानाह। नहिंस्यादिति पंचभिः। न शपेन्नाक्रोशेत्। यदमंगलं कपालास्थ्यादिकं तन्न स्पृशेत्॥४८॥

कश्यप उवाच॥ ॥पुत्रस्ते भविता भद्रे इंद्रहा देवबांधवः॥ संवत्सरं व्रतमिदं यद्यंजो धारयिष्यसि॥४६॥ ॥दिति
रुवाच॥ ॥धारयिष्ये व्रतं ब्रह्मन्ब्रूहि कार्याणि यानि मे। यानि चेह निषिद्धानि न व्रतं घ्नंति यान्युत॥४७॥ ॥
कश्यप उवाच॥ ॥नहिंस्याद्भूतजातानि न शपेन्नानृतं वदेत्। नच्छिंद्यान्नखरोमाणि नस्पृशेद्यदमंगलं॥
४८॥ नाप्सु मज्जेत्स्नायात्र कुप्येत न संभाषेत दुर्जनैः। नवसीताधौतवासः स्रजं च विधृतां क्वचित्॥४९॥
नोच्छिष्टं चंडिकान्नं च सामिषं वृषलाहृतं। भुंजीतोदक्यया दृष्टं पिबेदंजलिनात्वपः।५०॥ नोच्छिष्टास्पृष्ट
सलिला संध्यायां मुक्तमूर्द्धजा। अनर्चिताऽसंयतवाग्नासंवीता बहिश्चरेत्॥५१॥ नाधौतपादाऽप्रयता
नार्द्रपान्नोदक्शिराः। शयीत नापराङ्नान्यैर्न नग्ना न च संध्ययोः॥५२॥

सु प्रविश्य स्नायात्। पूर्वं विधृतां स्रजं न धारयेत्।४९। भोजने पंच निषेधानाह। नोच्छिष्टमिति। चंडिकान्नं भद्रकाल्यै निवेदितं। पि
पीलिकादिदूषितं वा। अंजलिना त्वपो न पिबेत्। गृहाद्बहिर्निर्गमे सप्त निषेधानाह। नोच्छिष्टेति॥ अनर्चिता मंडन
हीना असंवृता अप्रावृता॥५१॥ शयने षण्निषेधानाह। नाधौतपादेति। नापराक् पश्चिमशिराः॥५२॥ ॥ ६६

तस्य गणे पुमुख्यतां प्राधान्यं।२०। सात्मतां समानरूपतां।२१। देवत्वं प्रापिताः।२२।२३। आदृतः सादरं अल्पं मितं गिरं अर्थव
त् अर्थयुक्तं। सत्रमयनमाश्रयो यस्य हे सत्रायन शौनक।२४। पार्ष्णिग्राहेण पृष्ठतः सहायेन।२५। भ्रातृहंतारं इंद्रं मारयित्वा सुखि
नी स्यामिति। चिंतयामास दितिः उल्बणं क्रूरं अक्लिन्नहृदयं कठिनचित्तं।२६। ननु राज्ञा स्वदेहरक्षार्थमन्येषां घातं क

राजोवाच॥ ॥कथं त आसुरं भावमपोह्यौत्पत्तिकं गुरो। इंद्रेण प्रापिताः साम्यं किं तत्साधुकृतं हि तैः।२०। इमे श्रद्द
धते ब्रह्मन्नृषयो हि मया सह। परिज्ञानाय भगवंस्तन्नो व्याख्यातुमर्हसि॥२१॥ ॥सूत उवाच॥ ॥तद्विष्णु
रातस्य स बादरायणिर्वचो निशम्यादृतमल्पमर्थवत्। सभाजयन्संनिभृतेन चेतसा जगाद सत्रायण सर्वदर्शी
नः॥२२॥ ॥श्रीशुक उवाच॥ ॥हतपुत्रा दितिः शक्रपार्ष्णिग्राहेण विष्णुना। मन्युना शोकदीप्तेन ज्वलंती पर्य
चिंतयत्॥२५॥ कदानु भ्रातृहंतारमिंद्रियाराममुल्बणं। अक्लिन्नहृदयं पापं घातयित्वा शये सुखं॥२६॥ कृ
मिविड्भस्मसंज्ञासीद्यस्येशाभिहितस्य च। भूतध्रुक्तत्कृते स्वार्थं किं वेद निरयो यतः॥२७॥ आशासानस्य तस्येदं ध्रुवमुन्नद्धचेतसः। मदशोषक इंद्रस्य भूयाद्येन सुतो हि मे॥२८

रोतीत्येव किमत्र चित्रं तत्राह। कृमीति। ईशाः प्रभुरिति अभिहितस्यापि यस्य पूर्वेषां राज्ञां देहस्य मरणानंतरं द्वित्रिदिनावस्थित
स्य कृमय इति। श्वादिभिर्भक्षितस्य तु विडिति दग्धस्य भस्मेति संज्ञा आसीत्। तत्कृते तस्य देहस्यार्थे यो भूतेभ्यो द्रुह्यति स किं
स्वार्थं वेद न वेदैव। तत्र हेतुः यतो भूतद्रोहान्निरयो भवति।२७। इंद्रो हा हि किं ध्रुवं नित्यं आशासानस्य मन्यमानस्य अतउन्नद्धं उद्ध

भर्त्तुः प्रियमाचरणमेवेति भावेन सा भर्त्तुः प्रियमसकृदाचचार। २९।३०। विवशः स्त्रीपरतंत्रः सन्। बाढं तव मनोरथं पूरयिष्यामीति यदाह तन्नचित्रं। ३१। तत्र हेतुमाह विलोक्येति। एकांतभूतानि निःसंगानि मिथुनेन सृष्टिवृद्ध्यर्थं स्वदेहार्द्धमेव स्त्रियं चक्रे। ३२। एवं स्त्रियाशुश्रूषितः सन्। ३३। इह चकारास्सरत्र च। अगमः अप्राप्यः। ३४। ननु परमेश्वरे प्रीते सर्वकामप्राप्तिरिति प्रसिद्धं तत्राह

इति भावेन सा भर्त्तुराचचारासकृत्प्रियं। शुश्रूषयानुरागेण प्रश्रयेण दमेन च ॥२९॥ भक्त्या परमया राजन्मनोज्ञैर्वल्गुभाषितैः। मनोजग्राह भावज्ञा सुस्मितापांगवीक्षणैः ॥३०॥ एवं स्त्रिया जडीभूतो विद्वानपि विदग्धया। बाढमित्याह विवशो न तच्चित्रं हि योषिति ॥३१॥ विलोक्यैकांतभूतानि भूतान्यादौ प्रजापतिः। स्त्रियं चक्रे स्वदेहार्द्धं यया पुंसां मतिर्हृता ॥३२॥ एवं शुश्रूषितस्तात भगवान्कश्यपः स्त्रिया। प्रहस्य परमप्रीतो दितिमाहाभिनंद्य च ॥३३॥ कश्यप उवाच ॥ ॥ वरं वरय वामोरु प्रीतस्तेहमनिंदिते। स्त्रिया भर्त्तरि सुप्रीते कः काम इह चागमः ॥३४॥ पतिरेव हि नारीणां दैवतं परमं स्मृतं। मानसः सर्वदेवानां वासुदेवः श्रियः पतिः ॥३५॥ स एव देवतालिंगैर्नामरूपविकल्पितैः। इज्यते भगवान्पुंभिः स्त्रीभिश्च पतिरूपधृक् ॥३६॥

पतिरेवेति। ननु मनसि स्थितः श्रीवासुदेव एव लक्ष्मीपतिः परं दैवतमिति प्रसिद्धं सत्यं। स एव स्वाधिकारेण रूपभेदैः पूज्यत इत्याह। मानस इति सार्द्धेन। देवतालिंगैर्मूर्त्तिभिरुपलक्षितः तान्येवाह। नामइंद्रादिरूपं वज्रहस्तत्वादि। ताभ्यां विविधं कल्पितैः ३५।३६॥ ६५

कार्यमित्याह। धौतवासा इति द्वाभ्यां। प्रातराशात् प्रथमभोजनात्। ५३। वर्जितक्रूरस्पर्शकाः। आर्यैः संपूज्य कोष्ठगतं कुक्षिस्थं नरगतं ॥५४॥ पुंसवनं पुत्रोत्पत्तिकरं तुभ्यं तव ॥५५॥ हरिरिंद्रो व्रतस्य छिद्रं प्रेप्सुः प्राप्तुमिच्छुः जिह्मः कुटिलः साधुवेषः। मृगहा

धौतवासाः शुचिर्नित्यं सर्वमंगलसंयुता। पूजयेत्प्रातराशात्प्राग्गोविप्राञ्श्रियमच्युतं ॥५३॥ स्त्रियो वीरवतीश्चार्चेत्स्रग्गंधबलिमंडनैः। पतिं चार्च्योपतिष्ठेत ध्यायेत्कोष्ठगतं च तं ॥५४॥ सांवत्सरं पुंसवनं व्रतमेतदविप्लुतं। धारयिष्यसि चेत्तुभ्यं शक्रहा भविता सुतः ॥५५॥ बाढमित्यभिप्रेत्याथ दिती राजन्महामनाः। काश्यपं गर्भमाधत्त व्रतं चांजो दधार सा ॥५६॥ मातृष्वसुरभिप्रायमिंद्र आज्ञाय मानद। शुश्रूषणेनाश्रमस्थां दितिं पर्यचरत्सुधीः कविः ॥५७॥ नित्यं वनात्सुमनसः फलमूलसमित्कुशान्। पत्रांकुरांस्मृदोपश्च काले काल उपाहरत् ॥५८॥ एवं तस्या व्रतस्थाया व्रतछिद्रं हरिर्नृप। प्रेप्सुः पर्यचरज्जिह्मो मृगहेव मृगाकृतिः ॥५९॥ नाध्यगच्छद्व्रतच्छिद्रं तत्परोथ महीपते। चिंतां तीव्रां गतः शक्रः केन मे स्याच्छिवं त्विह ॥६०॥ एकदा तु सा संध्यायामुच्छिष्टा व्रतकर्शिता। अस्पृष्टवार्यधौतांघ्रिः सुष्वाप विधिमोहिता ॥६१॥ लब्ध्वा तदंतरं शक्रो निद्रापहृतचेतसः। दितेः प्रविष्ट उदरं योगेशो योगमायया ॥६२॥

लुब्धको यथा मृगं बध्नाय मृगवेषो भवति तद्वत्। ५९। केन मे शिवं स्यादिति चिंतां प्राप्तः। ६०। अस्पृष्टवारि आसाव धौतांघ्रिश्च ६१

मारोदीरित्युपलालयन्निवतान्पुनः सप्तधावकर्त्तविच्छेद। कौशिकः इंद्रः गणान्सप्तगवैमरुतइतिश्रुतेः॥६२॥६६॥६०
वकर्त्तसप्तधागर्भंवज्रेणकनकप्रभं। रुदंतंसप्तधैकैकंमारोदीरितितान्पुनः॥६३॥ तेतमूचुस्ताड्य
मानाः सर्वेप्रांजलयोन्रप। नोजिघांससिकिंइंद्रभ्रातरोमरुतस्तव। ६४। माभैष्टभ्रातरोमह्यंयूयमित्या
हकौशिकः। अनन्यभावान्पार्षदानात्मनोमरुतांगणान्। ६५। नममारदितेर्गर्भः श्रीनिवासानु
कंपया। बहुधाकुलिशक्षुण्णोद्रौण्यस्त्रेणयथाभवान्। ६६॥ सकृदिष्ट्वादिपुरुषंपुरुषोयातिसाम्यतां।।
संवत्सरंकिंचिदूनंदित्यायद्धरिरर्चितः॥६७। सजूरिंद्रेणपंचाशद्देवास्तेमरुतोभवन्। व्यपोह्यमातृ
दोषंतेहरिणासोमपाःकृताः।६८॥ दितिरुत्थायददृशेकुमारानग्निलप्रभान्। इंद्रेणसहितान्देवीपर्य
तुष्यदनिंदिता॥६९। अथेंद्रमाहताताहमादित्यानांभयावहं। अपत्यमिच्छंत्यचरंव्रतमेतत्सुदुष्क
रं॥७०॥ एकःसंकल्पितःपुत्रःसप्तसप्ताभवन्कथं। यदितेविदितंपुत्रसत्यंकथयमामृषा।७१॥ ॥
इंद्रउवाच॥ ॥अंबतेहंव्यवसितमुपधार्यागतोंतिकं। लब्धांतरोछिदंगर्भमर्थबुद्धिर्नधर्मवित्।७२
सजूःसह।६८।७०।७१ दित्यानिःकपटमुक्तेसतिइंद्रोपिनिःकपटमेवाह। अंबेति। लब्धमंतरंयेन। अर्थएवबुद्धिर्यस्य।७२

अपिपरंमोक्षमपि।७५। गुणस्पर्शोविषयभोगं। कोवृणीत। यद्यस्मान्नरकेपिस्यात्॥७६॥ महीयसिमहत्तमोत्थगःसन्नुत
उत्थितः।७७॥७८।७९।८०॥ ॥षष्ठेअष्टादशः॥ ॥ऊनविंशेतुयस्त्रोक्तंकश्यपेनदितेर्व्रतं। तदेवविवृतंलोकेहितायह
कृतोमेसप्तधागर्भआसन्सप्तकुमारकाः। तेपिचैकैकशोवृक्णासप्तधानापिमम्रिरे॥७३॥ ततस्तत्प
रमाश्चर्यंवीक्ष्याध्यवसितंमया। महापुरुषपूजायाःसिद्धिःकाप्यनुषंगिणी॥७४॥ आराधनंभगव
तईहमानानिराशिषः। येतुनेच्छंत्यपिपरंतेस्वार्थकुशलाःस्मृताः॥७५॥ आराध्यात्मप्रदंदेवंस्वात्मानं
जगदीश्वरं। कोवृणीतेगुणस्पर्शंबुधःस्यान्नरकेपियत्॥७६॥ तदिदंममदौर्जन्यंबालिशस्यमही
यसि। क्षंतुमर्हसिमातस्त्वंदिष्ट्यागर्भोमृतोत्थितः॥७७॥ ॥श्रीशुकउवाच॥ ॥इंद्रस्तयाभ्य
नुज्ञातःशुद्धभावेनतुष्टया। मरुद्भिःसहतांनत्वाजगामत्रिदिवंप्रभुः॥७८॥ एवंतेसर्वमाख्या
तंयन्मांत्वंपरिपृच्छसि। मंगलंमरुतांजन्मकिंभूयःकथयामिते॥८०॥ ॥इतिश्रीभागवतेमहा
पुराणेषष्ठस्कंधेऽष्टादशोध्यायः॥ ॥राजोवाच॥ ॥व्रतंपुंसवनंब्रह्मन्भवतायदुदीरितं।
तस्यवेदितुमिच्छामियेनविष्णुःप्रसीदति॥१॥ ॥श्रीशुकउवाच॥ ॥शुक्लेमार्गशिरेपक्षेयोषिद्भर्तुर
नुज्ञया॥ प्रारभेतव्रतमिदंसार्वकामिकमादितः॥२॥
रितोषणं।१। तस्यप्रकारमितिशेषः।१। मार्गशिरेमासेशुक्लपक्षेआदितःप्रतिपदि॥२॥ ॐनमोभगवतेवासुदेवाय।

भा०ष० अनुमंत्र्य पृष्ट्वा। शुक्लादंता यस्याः सा। शुक्लदती धौतदंता। अलंकृता सती पूजयेत्।३। आदौ तावन्नमस्कारमंत्रानाह।।
६८ त्रिभिः। ते तुभ्यं अलं पर्याप्तमेव सर्वं न तु किंचिदन्यैः कृत्यमस्ति। अतः केवलं ते तुभ्यं नमोस्तु। पर्याप्तो हेतवः निरपेक्षाय हे
पूर्णकाम महाविभूतिपतये लक्ष्मीपतये सकलाः सिद्धयो ऽणिमाद्या यस्मिन् तस्मै।।५।। भो ईश यथाय थावत्। त्वं

निशाम्य मरुतां जन्म ब्राह्मणाननुमंत्र्य च। स्नाता शुक्लदती शुक्ले वसीतालंकृतांबरे। पूजयेत्प्रातराशा
त्प्राक् भगवंतं श्रिया सह।।३।। अलं ते निरपेक्षाय पूर्णकाम नमोस्तु ते। महाविभूतिपतये नमः सक
लसिद्धये।।४।। यथा त्वं कृपया भूत्या तेजसा महिमौजसा। जुष्ट ईश गुणैः सर्वैस्ततोसि भगवान् प्रभुः
५।। विष्णुपत्नि महामाये महापुरुषलक्षणे। प्रीयेथा मे महाभागे लोकमातर्नमोस्तु ते।।६।। ओं नमो
भगवते महापुरुषाय महानुभावाय महाविभूतिपतये। सह महाविभूतिभिर्बलिमुपाहराणीति।।७।।
अनेनाहरहर्मंत्रेण विष्णोरावाहनार्घ्यपाद्योपस्पर्शनस्नानवासउपवीतविभूषणगंधपुष्पधूप
दीपोपचारांश्च समाहित उपाहरेत्। हविःशेषं च जुहुयात् अनले द्वादशाहुतीः।।८।। ओं नमो भगवते म
हापुरुषाय महाविभूतये स्वाहेति। श्रियं विष्णुं च वरदावाशिषां प्रभवावुभौ। भक्त्या संपूजयेन्नित्यं यदीच्छेत्सर्वसंपदः।।९।।

कृपादिभिर्जुष्टः अन्यैश्च सत्यसंकल्पादिभिः सर्वैर्गुणैर्युक्तस्ततस्तस्मात्।५। महापुरुषस्य परमेश्वरस्य लक्षणानि निरपेक्षत्वा ६८
दीनि यस्याः तस्याः संबोधनं।६। प्रणाममंत्रमाह। ओं नम इति।७। हविःशेषमुपहारावशिष्टं।८। होममंत्रस्योदाहरणं दर्शय

१०।। इज्या यज्ञादभिनिवर्त्तकः पुरुषव्यापारो भावनाख्यः क्रिया लौकिकी।।११। प्रत्ययो नामरूपयोः प्रकाशः। अपाश्रयः

प्रणमेद्दंडवद्भूमौ भक्तिप्रह्वेण चेतसा। दशवारं जपेन्मंत्रं ततस्तोत्रमुदीरयेत्।।९।। युवां तु विश्वस्य विभू जग
तः कारणं परं। इयं हि प्रकृतिः सूक्ष्मा मायाशक्तिर्दुरत्यया।।१०।। तस्या अधीश्वरः साक्षात्त्वमेव पुरु
षः परः। त्वं सर्वयज्ञ इज्येयं क्रियेयं फलभुग्भवान्।।११।। गुणव्यक्तिरियं देवी व्यंजके गुणभुग्भवान्।।
त्वं हि सर्वशरीर्यात्मा श्रीः शरीरेंद्रियाशया।।१२।। नामरूपे भगवती प्रत्ययस्त्वमपाश्रयः। यथा यु
वां त्रिलोकस्य वरदौ परमेष्ठिनौ। तथा म उत्तमश्लोक संतु मत्याशिष महाशिषः।।१३।। इत्य
भिष्टूय वरदं श्रीनिवासं श्रिया सह। तन्निःसार्योपहरणं दत्वाचमनमाचरेत्।।१४।। ततस्तु
वीत स्तोत्रेण भक्तिप्रह्वेण चेतसा।। यज्ञोच्छिष्टमवघ्राय पुनरभ्यर्चयेद्धरिं।।१५।। पतिं च
परया भक्त्या महापुरुषचेतसा।। प्रियैस्तैस्तैरुपनमेत् प्रेमशीलः स्वयं पतिः।।१६।। बिभृ
यात्सर्वकर्माणि पत्न्या उच्चावचानि च। कृतमेकतरेणापि दंपत्योरुभयोरपि।।१७।। ।।
तयोराधारः।११।१४। महापुरुषचेतसा ईश्वरबुध्या उपनमेत् भजेत्।१६। पतिश्च स्वयं प्रेमशीलः सन् पत्न्याः

कर्मविभ्रंशयात्। तदनुकूलो भवेदित्यर्थः॥ यतो दंपत्योर्मध्ये एकतरेणाकृतमुभयोरपि भवति॥ १७॥ न विहन्यात्
तं न क्षिंद्यात्॥ १८॥ १९॥ द्वादश मासानित्युक्ते कदाचित्तन्मध्ये मलमासे सति तेन सह द्वादशसंख्यायां स्व

पत्नीं कुर्यादनर्हायां पतिरेतत्समाहितः॥ विष्णोर्व्रतमिदं बिभ्रन्न विहन्यात्कथंचन॥ १८
विप्रान्स्त्रियो वीरवतीः स्रग्गंधबलिमंडनैः॥ अर्चेदहरहर्भक्त्या देवं नियममास्थितः॥ १९॥
उद्वास्य देवं स्वे धाम्नि तन्निवेदितमग्रतः॥ अद्यादात्मविशुद्ध्यर्थं सर्वकामर्द्धये तथा २०
एतेन पूजाविधिना मासान्द्वादश हायनं॥ नीत्वाऽथोपरमेत्साध्वी कार्त्तिके चरमेऽहनि २१
श्वोभूतेऽप उपस्पृश्य कृष्णमभ्यर्च्य पूर्ववत्॥ पयःशृतेन जुहुयाच्चरुणा सह सर्पिषा २२
पाकयज्ञविधानेन द्वादशैवाहुतीः पतिः॥ आशिषः शिरसादाय द्विजैः प्रीतैः समीरिताः २३
स्थालीपाकविधानेन २२।२३।

त्यां शुद्धस्यैकस्य त्यागः स्यात्॥ हायनमित्युक्ते तन्मध्यपातिनस्तस्यापि प्रसंगः स्यात्। तदुभयं वारयितुमु
भयमुक्तं उपरमेत् उपवसेत्। २१। श्वोभूते प्रभाते सति पयसि सृतेन प[illegible] २२। पाकयज्ञविधानेन पार्वण ६९

सुप्रजास्त्वं सत्पुत्रत्वमित्यर्थः॥ वाग्यतः सन्नशेषं २४।२५ अवीरा विधवा। धनेश्वरी सत्यपि या दुर्भगा सा सुभगा भवति
२६॥ यत्र आमयावी रोगी अपि रुजा विशिष्टया सन्ता विमुच्येते। इंद्रियैः सहितं कल्यं देहं सविंदति शेषः। पठन्यो वर्तेत तस्यापि पितॄ
णां देवानां चानंततृप्तिर्भवतीत्यर्थः। २७। उपसंहरति राजन्निति। महत्पुण्यं जन्म महद्वृत्तं॥ षष्ठस्कंधे निगूढार्थप

प्रणम्य शिरसा भक्त्या भुंजीत तदनुज्ञया। आचार्यमग्रतः कृत्वा वाग्यतः सहबंधुभिः। दद्यात्पत्न्यै चरोः शे
षं सुप्रजास्त्वं सुसौभगं॥ २४॥ एतच्चरित्वा विधिवद्व्रतं विभोरभीप्सितार्थं लभते पुमानिह॥ स्त्री त्वेत
दास्थाय लभेत सौभगं श्रियं प्रजां जीवपतिं यशो गृहं॥ २५॥ कन्या च विंदेत समग्रलक्षणं पतिं त्ववीरा हतकिल्बि
षां गतिं। मृतप्रजा जीवसुता धनेश्वरी सुदुर्भगा सुभगा रूपमग्र्यं॥ २६॥ विंदेद्विरूपा विरुजा विमुच्यते य
आमयावींद्रियकल्पदेहं॥ एतत्पठन्नभ्युदये च कर्मण्यनंततृप्तिः पितृदेवतानां॥ २७॥ तुष्टाः प्रयच्छं
ति समस्तकामान्होमावसाने हुतभुक् श्रीहरिश्च॥ राजन्मम[illegible]मरुतां जन्म पुण्यं दितेर्व्रतं चा
भिहितं महत्ते॥ २८॥ ॥इति श्रीभागवते महापुराणे षष्ठस्कंधे एकोनविंशोऽध्यायः॥ ॥

दभावार्थदीपिका। सद्भिरासेव्यतामेषा यतिश्रीधरनिर्मिता॥ ॥इति श्रीश्रीधरविरचितायां टीकायां एको
नविंशः॥ ॥समाप्तोयं षष्ठः॥ ७०

[illegible]

[illegible] ॥ [illegible] ॥ [illegible]

[illegible] ॥੮੧॥ [illegible] ॥ [illegible] ॥

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

੯੦ [illegible]

[illegible]

[illegible]

भा० स० श्रीगणेशायनमः स्वभक्तपक्षपातेनतद्विपक्षविदारणं नृसिंहमद्भुतंवंदेपरमानंदविग्रहं १ ऊतिःपंचदशाध्यायैःसप्तमे
१ वर्ण्यतेधुना ऊतिश्चवासनाप्रोक्तातत्तत्कर्मानुसारिणी २ अशुभाचशुभाचेतिद्विधासाहेतुभेदतः अशुभामहतांकोपा
त्शुभामहदनुग्रहात् ३ हरेर्द्वाःस्थयोर्यद्वद्वैकुंठवसतोरपि चतुःसनरुषाविक्षेद्वेषाद्यशुभवासना ४ यथाहिदैत्यगर्भेपि
प्रह्लादस्यसतःस्थिरा नारदानुग्रहाद्दासविष्णोःसद्भक्तिवासना ५ स्वभक्तंचसदाविष्णुर्द्विषंतमपिरक्षति तती
येथभवेद्भावकरोदात्मसात्पुनः ६ अतोमनीषिणायत्नःकार्योमहदनुग्रहे इत्येतदर्थमूतीनामत्रलक्षणमुच्यते

राजोवाच समःप्रियःसुहृद्ब्रह्मन्भूतानांभगवान्स्वयं इंद्रस्यार्थेकथंदैत्यानवधीद्विषमोयथा १
नह्यस्यार्थःसुरगणैःसाक्षान्निःश्रेयसात्मनः नैवासुरेभ्योविद्वेषोनोद्वेगश्चागुणस्यहि २

तत्रादौदृश्यतेदैत्यतत्पुत्रमतिभेदतः महत्कोपानुकंपोत्थवासनाभेदउच्यते ८ सद्वासनाचयुज्येतकर्मभिःशुभहवे
तस्यःपरैरस्तुपंचभिस्तस्मात्क्रियतेधर्मनिर्णयः ९ तत्रतुप्रथमेध्यायेहिरण्यकशिपोःसुते विष्णुभक्तेविरोधस्त
विप्रशापकृईर्यते १० यदुक्तंपूर्वस्कंधांतेहतपुत्रादितिःशक्रपार्ष्णिग्राहेणविष्णुना मन्युनाशोकदीप्तेनज्वलंतीपर्य राम
चिंतयदिति तच्छ्रुत्वाविस्मितःपरीक्षित्पृच्छति समइतित्रिभिः नहिसमस्यसुहृदश्चवैषम्यंनामास्ति नचप्रियस्य १
प्रीतिकर्तृत्वेवैषम्यंयुक्तमित्यर्थः १ यस्ययैःप्रयोजनंसिध्यतिसतत्पक्षपातीभवति यत्योबिभेतितानद्वेष्टिद्वेषेणहं
तिननुतदत्रास्तीत्याहनहीति निःश्रेयसंपरमानंदएवात्मास्वरूपंयस्यअतस्तस्यभयोद्वेगोभयंनास्तिअतोविद्वेषो
पिनास्त्येवतत्रहेतुःअगुणस्येति २

श्रीनारायणस्यगुणाननुग्रहनिग्रहादीन्प्रतितत्रतंसंशयं ३ भागवतस्यप्रह्लादस्यमाहात्म्यं ४ कृष्णायव्यासायकृष्णमु
निंनत्वेत्यर्थः ५ यस्मात्प्रकृतेःपरःअतोनिर्गुणःअतएवाजःअतएवअव्यक्तःरागद्वेषादिनिमित्तभूतदेहेंद्रियादिरहितःसोपिस्व
मायागुणंसत्वादिकंआविश्यअधिष्ठायबाध्यान्प्रतियद्वादेवासुरादीनांयापरस्परंबाध्यबाधकतातांगतःप्राप्तःतत्रहेतुर्भात
इत्यर्थः ६ तत्रगुणानांस्वीयत्वेसतिप्राकृतपुरुषवद्विषमःस्यात् ननुतदस्तीत्याहसत्वमिति ननुस्वेच्छयागुणाधिष्ठानेनापिपक्षपा

इतिनःसुमहाभागनारायणगुणान्प्रति संशयःसुमहान्जातस्तद्भवांश्छेत्तुमर्हति ३ श्रीशुकउवाच साधु
पृष्टंमहाराजहरेश्चरितमद्भुतं यद्भागवतमाहात्म्यंभगवद्भक्तिवर्द्धनं ४ गीयतेपरमंपुण्यमृषिभिर्नारदादिभिः न
त्वा त्वाकृष्णायमुनयेकथयिष्येहरेःकथां ५ निर्गुणोपिह्यजोव्यक्तोभगवान्प्रकृतेःपरः स्वमायागुणमाविश्यबाध्यबाध
कतांगतः ६ सत्वंरजस्तमइतिप्रकृतेर्नात्मनोगुणाः नतेषांयुगपद्राजन्ह्रासउल्लासएवच ७ जयकालेतुसत्व
स्यदेवर्षीन्रजसोसुरान् तमसोयक्षरक्षांसितत्कालानुगुणोभजत् ८ ज्योतिरादिरिवाभातिसंघातान्नवि
विच्यते
तेवैषम्यंस्यादेवनतस्यकालकृतत्वादित्याह नतेषामितिसार्द्धेनउल्लासोवृद्धिः ७ सत्वस्यजयकालेदेवानृषींश्च
भजतत्तद्देहंप्रविश्यवर्द्धयतीत्यर्थः रजसोजयकालेतमसोजयकालइत्यन्वयः तस्यकालस्यानुगुणःसन् ८ सम
स्यापिनिमित्तभेदेनवैषम्येदृष्टांतःज्योतिर्यथाकाष्ठादिषुजलंयथापात्रेषुआकाशंयथाघटादिषुतथानानारूप
आभातिननुतर्हितद्देवविवेकेनप्रतीयेततत्राहसंघातात्सुरादिदेहात्नाविविच्यतेनपृथक्प्रतीयते

तर्हि तान्भजतीति कुतो ज्ञायते तत्राह विंदंतीति आत्मस्थं परमात्मानं कवयो निपुणाः मथित्वा कार्यदर्शनलिंगेन विचार्य जानंति अंततः स्वभावकर्मादिवादनिषेधेन विंदंतीति पाठे त्वान्वयि ज्ञानमेव अत्रापि ज्योतिरग्निरिवेति द्रष्टव्यं यथा हि सूर्यकांतादौ दाहदर्शनात्तज्ज्योतिर्ज्ञायते यथा च गंधदर्शनाद्वायुरित्यादि ९ तदेवं मायागुणवशेनेतद्वैषम्यं न स्वात्मा विक्रमित्युक्तं नहि गुणपारतंत्र्यादनीश्वरत्वमाशंक्याह यदेति आत्मनो जीवस्य भोगाय पुरः शरीराणि परः परमेश्वरः सिसृक्षुर्भवति तदासा म्येन स्थितं रजः पृथक् सृजति विचित्रासु तासु पूर्षु रिरंसुः क्रीडितुमिच्छुः सत्वं पृथक् सृजति शयिष्यमाणः संहरिष्यन्

विंदंत्यात्मानमात्मस्थं मथित्वा कवयोंततः ९ यदा सिसृक्षुः पुर आत्मनः परो रजः सृजत्येष पृथक् स्वमायया सत्वं विचित्रासु रिरंसुरीश्वरः शयिष्यमाणस्तम ईरयत्यसौ १० कालं चरंतं सृजतीश आश्रयं प्रधानपुंभ्यां नरदे चरंतं
वसत्यकृत् य एष राजन्नपि काल ईशिता सत्वं सुरानीकमिवैधयत्यतः तत्प्रत्यनीकानसुरान्सुरप्रियो रजस्तमस्कान्प्रमिणोत्युरुश्रवाः ११ अत्रैवोदाहृतः पूर्वमितिहासः सुरर्षिणा प्रीत्या महाक्रतौ राजन्पृच्छतेऽजातशत्रवे १२ राम २

तमः पृथगीरयति प्रेरयति १० यदा सिसृक्षुरित्यादिनिर्दिष्टात् पतीतं कालपारतंत्र्यं वारयन् प्रधानपुरुषपारतंत्र्यमपि वारयति कालमिति हे नरदेव प्रधानपुंभ्यां निमित्तभूताभ्यां सत्यकृत् अमोघकर्ता ईश्वरस्तयोः सहकारित्वेन आश्रयभूतं चरंतं वर्तमानं कालं स्वयमेव सृजति स्वचेष्टानुरूपत्वात्कालस्य न तत्पारतंत्र्यमित्यर्थः तथापि ज्ञस्तेन किमायातं तत्राह य एष कालः स सत्वं धयति मे अतो हेतोः ईशितापि ईश्वरोपि सत्वप्रधानं सुरानीकं देवसमूहमेधयतीवेत्यर्थः तत्प्रत्यनीकान् सुरजातिपक्षान् प्रमिणोति हिनस्तीवेत्यन्वयः उरुश्रवाः कीर्तिर्यस्य सः कालशक्तिक्षुभितगुणगतं वैषम्यं सान्निधिमात्रेण तदधिष्ठातरि स्फुरतीति प्रकरणार्थः ११ इदानीं तु तयोर्वधो न स्वरक्षपातेन किंतु ब्राह्मणशापेनासुरीयोनिं प्राप्तयोरनुग्रहार्थमेवेति वक्तुमितिहासमुपक्षिपति अत्रैवेति द्वेषादिरहितस्यापि दैत्यवधे १२

चेदिराजः शिशुपालस्य १३ १४ एकांतभक्तानामपि दुर्लभा प्राप्तिर्विद्विषो जाते त्येतदद्भुतं हि १५ तस्य तु वेनस्येव नरकपात एवोचित इत्याह भगवन्निंदयेति तमसि नरके १६ दमघोषस्य सुतः शिशुपालः कलभाषणात् बाल्ये कोमलभाषणमारभ्य संप्रति अधुनापि अमर्षी क्रोधी मत्सरीव १७ श्वित्रः कुष्ठं १८ दुःखग्राह्यं दुःप्रापं धाम स्वरूपं यस्य तस्मिन् लयं सायुज्यं ईयतुः

दृष्ट्वा महाद्भुतं राजा राजसूये महाक्रतौ वासुदेवे भगवति सायुज्यं चेदिभूभुजः १३ तत्रासीनं सुररृषिं राजा पांडुसुतः क्रतौ पप्रच्छ विस्मितमना मुनीनां शृण्वतामिदं १४ युधिष्ठिर उवाच अहो अत्यद्भुतं ह्येतद्दुर्लभैकांतिनामपि वासुदेवे परे तत्वे प्राप्तिश्चैद्यस्य विद्विषः १५ एतद्वेदितुमिच्छामः सर्व एव वयं मुने भगवन्निंदया वेनो द्विजैस्तमसि पातितः १६ दमघोषसुतः पाप आरभ्य कलभाषणात् संप्रत्यमर्षी गोविंदे दंतवक्त्रश्च दुर्मतिः १७ शपतोरसकृद्विष्णुं यद्ब्रह्म परमव्ययं श्वित्रो न जातो जिह्वायां नांधं विविशतुस्तमः १८ कथं तस्मिन्भगवति दुरवग्राह्यधामनि पश्यतां सर्वलोकानां लयमीयतुरंजसा १९ एतद्भ्राम्यति मे बुद्धिर्दीपार्चिरिव वायुना ब्रूह्येतदद्भुततमं भगवांस्तत्र कारणं २०

अ अत्र तस्यापि दंतवक्त्रलयस्य तस्मिन् लयं सायुज्यं तज्ज्ञातकप्रामाण्येनासिद्धवन्निर्देशः १९ एतत् अद्भुततमं हि अतएतत्प्रति भ्राम्यति भगवान् सर्वज्ञस्त्वं ब्रूहि २०

ओं नमो भगवते वासुदेवाय०

भा० स०
३

आभाष्य संबोध्य सीदंतिनिबोधतस्यामितिसत्सभातस्याः सदसः शृण्वंत्याः सत्याः कथाः प्राहेत्यन्वयः २१ भगवन्निंदक
स्य नरकपातेन भाव्यमिति वदतस्तवको भिप्रायः भगवत्पीडाकरत्वेन वा तदभावेपि सुरापानादिवन्निषिद्धनिंदाचरणाद्वा
तत्र नावद्देहाभिमानकृतनिंदानिमित्तत्वात्पीडादीनां भगवतश्च तदभावान्न पीडाशंकास्तीत्याह सार्द्धैस्त्रिभिः निंदनं दोषकीर्त
नं न्यक्कारस्तिरस्कारः निंदनस्तवेत्यादिज्ञानार्थं प्रधानपुरुषयोरविवेकेन कलेवरं कल्पितं रचितं २२ तदभिमानेन भूतानां य

श्रीशुक उवाच राज्ञस्तद्वच आकर्ण्य नारदो भगवानृषिः तुष्टः प्राह तमाभाष्य शृण्वंत्यास्तत्सदः कथाः २१ ना
रद उवाच निंदनस्तवसत्कारन्यक्कारार्थं कलेवरं प्रधानपरयो राजन्नविवेकेन कल्पितं २२ हिंसा तदभि
मानेन दंडपारुष्ययोर्यथा वैषम्यमिह भूतानां ममाहमिति पार्थिव २३ यन्निबद्धोभिमानोयं तद्वधात्प्राणिनां
वधः तथा न यस्य कैवल्यादभिमानोखिलात्मनः २४ परस्य दमकर्तुर्हि ~~तार्थं दंडंकरोतीत्यर्थः~~ हिंसा केनास्य
कल्पते २४

थाममाहमिति वैषम्यं तत्कृतं हिंसादिकं च भवति तथा न यस्येत्यत्र व्यतिरेकेणान्वयः दंडस्ताडनं पारुष्यं निंदा तयोर्हेतुभूतयो हिंसा राम ३
पीडा भवति २३ यस्मिन्निबद्धोयमभिमानः तस्य देहस्य वधाद्वधश्च यथा तथा यस्याभिमानो नास्ति अस्य परमेश्वरस्य
हेतुना हिंसा केनैकल्पते न केनापि अभिमानाभावे हेतुः कैवल्यात् अद्वितीयत्वेनाभिमंतव्याभावात् वैषम्याभावे हेतुः अ
खिलात्मनः सर्वात्मन इति तर्हि किमिति हंति तत्राह परस्येति दमकर्तुः हितार्थं दंडं करोतीत्यर्थः २५

यस्माद्भगवतो निंदादिकृतं वैषम्यं नास्ति तस्माद्येन केनाप्युपायेन ध्यायतस्तेनैव निंदादिकृतपापस्यापि नाशात्सायुज्यं युक्त
मित्याशयेनाह तस्मादिति सप्तभिः नास्ति वैरं केनापि यस्मिन् तेन भक्तियोगेनेत्यर्थः युंज्यान्मन इति शेषः तस्माद्वैरेणोपायेः
पृथक् नेक्षेत २५ तत्रापि वैरानुबंधः श्रेष्ठ इत्याह यथेति न तथा भक्तियोगेनापीति २६ अत्र दृष्टांतः कीटः पेशस्कृता भ

तस्माद्वैरानुबंधेन निर्वैरेण भयेन वा स्नेहात्कामेन वा युंज्यात्कथंचिन्नेक्षते पृथक् २५ यथा वैरानुबंधेन म
र्त्यस्तन्मयतामियात् न तथा भक्तियोगेन इति मे निश्चिता मतिः २६ कीटः पेशस्कृता रुद्धः कुड्यायां तमनुस्म
रन् संरंभभययोगेन विंदते तत्सरूपतां २७ एवं कृष्णे भगवति मायामनुज ईश्वरे वैरेण पूतपाप्मानस्त
मीयुरनुचिंतया २८ कामाद्द्वेषाद्भयात्स्नेहाद्यथा भक्त्येश्वरे मनः आवेश्य तदघं हित्वा बहवस्तद्गतिं गताः
२९ गोप्यः कामाद्भयात्कंसो द्वेषाच्चैद्यादयो नृपाः संबंधाद्वृष्णयः स्नेहाद्यूयं भक्त्या वयं विभो ३०

भरेण संरंभो द्वेषः भयं च स एव योगस्तेन २७ वैरेण या अनुचिंता तयैव पूतः पाप्मा येषां ते तं प्रापुः २८ तदघं
कामादिनिमित्तं पापं हित्वा २९ ३०

तर्हि वेनः किमिति नरके पातितः तीव्रध्यानाभावात् पापमेव तत्र फलतामित्याह कतमोपीति पुरुषं श्रीहरिं प्रतिपुरु
षे पुरुषस्य का मांसं भवात् भयादिभिश्चिंतयतां पंचानां मध्ये नैकतमोपीत्यर्थः ३१ तदेवमितिहासप्रस्तावकथा
मुक्त्वा श्रीकृष्णे शिशुपालस्य वैरानुबंधे को हेतुरित्यपेक्षायां तमेवेतिहासं वक्तुमाह मातृष्वस्रेयइति पदात् वैकुं

कतमोपि न वेनः स्यात्पंचानां पुरुषं प्रति तस्मात्केनाप्युपायेन मनः कृष्णे निवेशयेत् ३१ मातृष्वस्रे
यो वश्चैद्यो दंतवक्त्रश्च पांडव पार्षदप्रवरौ विष्णोर्विप्रशापात्पदाच्च्युतौ ३२ युधिष्ठिर उवाच की
दृशः कस्य वा शापो हरिदासाभिमर्शनः अश्रद्धेय इवाभाति हरेरेकांतिनां भवः ३३ देहेंद्रियासुहीनानां
वैकुंठपुरवासिनां देहसंबंधसंबद्धमेतदाख्यातुमर्हसि ३४ ॥३५॥ अत्रां कयि पर्यायेपि श्लोका नगतः

ठात्च्युतौ ३२ हरिदासो अभिमर्शति अभिभवतीति तथा अश्रद्धेयः अनादरणीय इव असंभवात् भवो जन्म ३३
असंभवमेवाह जन्महेतुभूतैः प्राकृतैः देहेंद्रियासुभिर्हीनानां शुद्धसत्वदेहानामित्यर्थः प्राकृतदेहसंबंधेन संबद्धमेत
दाख्यानमाख्यातुमर्हसि ३४ ३५
ओं नमो भगवते वासुदेवाय॰

राम
५

॥३८॥

३६ कीदृशाः पंचषड्वा हायनाः येषां ते अर्भाः बालाः तेषां आभेवाभा येषां ते पूर्वेषां मरीच्यादीनामपि । दिग्वाससः दिगं
बरान् अतः शिशून्मत्वा वासमापि नार्हथः कुतः पुनः सत्त्वेवामपि चकारार्थः ॥ हे बालिशो अतो हेतोः आशु यातं ३७ ॥
वांपुवपोस्त्रिभिर्जन्मभिः लोकायस्वस्थानप्राप्तये कल्पतां तावतायं शापः समाप्यतामिति पुनः प्रोक्तावित्यर्थः धि

नारद उवाच एकदा ब्रह्मणः पुत्रा विष्णोर्लोकं यदृच्छया सनंदनादयो जग्मुश्चरंतो भुवनत्रयं ३६ पंचष
ड्ढायनार्भाभाः पूर्वेषामपि पूर्वजाः दिग्वाससः शिशून्मत्वा द्वाःस्थौ तान्प्रत्यषेधतां ३७ अशपन्कुपि
ता एवं युवां वासं न नार्हथः रजस्तमोभ्यां रहिते पादमूले मधुद्विषः ३८ पापिष्ठामासुरीं योनिं बालिशौ
यातमाश्वतः एवं शप्तौ स्वभवनात्पतंतौ तैः कृपालुभिः ३९ प्रोक्तौ पुनर्जन्मभिर्वां त्रिभिर्लोकाय कल्पतां
जज्ञाते तौ दितेः पुत्रौ दैत्यदानववंदितौ हिरण्यकशिपुर्ज्येष्ठो हिरण्याक्षोनुजस्ततः ४० ततो हिरण्य
कशिपुर्हरिणा सिंहरूपिणा हिरण्याक्षो धरोद्धारे बिभ्रता सौकरं वपुः ४१ हिरण्यकशिपुः पुत्रं प्रह्लादं
केशवप्रियं जिघांसुरकरोन्नानायातनामृत्युहेतवे ४२ तं सर्वभूतात्मभूतं प्रशांतं समदर्शनं भगवत्ते
जसा स्पृष्टं नाशक्नोद्धंतुमुद्यमैः ४३

रोद्धारनिमित्तेन तत्प्रतिघातो हतः । हिरण्यकशिपोर्वधकारणं सूचयति हिरण्यकशिपुरिति ४१ सर्वभूतानामात्म
भूतं कुतः समं ब्रह्मैव पश्यतीति तथा तं अतः प्रशांतं द्वेषरहितं अत एव भगवत्तेजसा स्पृष्टं व्याप्तं उद्यमैः शस्त्रप्र
हारादिभिः ४३

विश्रवसः सुतौ ४४ न्यहनत् हतवानित्यर्थः ४५ तर्हि तद्देवकथनीयमित्यपेक्षायां प्रत्याह रामवीर्यमिति ४५
कुम्भकर्णेण हतं अंहो ययोस्तौ तयोः पापमेव हतं न तु तौ ४६ येन कारणेन प्रह्लादस्याच्युतात्मता अच्युतैकचित्त
त्वं तदपि ब्रूहीति शेषः ४८ इति सप्तमे प्रथमोध्यायः ॥ द्वितीये विष्णुरोषेण लोकं विद्राव्य दानवैः ॥ तद्धन

ततस्तौ राक्षसौ जातौ केशिन्यां विश्रवः सुतौ रावणः कुंभकर्णश्च सर्वलोकोपतापनौ ४४ तत्रापि राघवो
भूत्वा न्यहनच्छापमुक्तये रामवीर्यं श्रोष्यसि त्वं मार्कंडेयमुखात्प्रभो ४५ तावेव क्षत्रियौ जातौ मातृष्वस्रा
त्मजौ तव अधुना शापनिर्मुक्तौ कृष्णचक्रहतांहसौ ४६ वैरानुबंधतीव्रेण ध्यानेनाच्युतसात्म्यतां नी
तौ पुनर्हरेः पार्श्वं जग्मतुर्विष्णुपार्षदौ ४७ युधिष्ठिर उवाच विद्वेषो दयिते पुत्रे कथमासीन्महात्म
नि ब्रूहि मे भगवन्येन प्रह्लादस्याच्युतात्मता ४८ इति श्रीभागवते महापुराणे सप्तमस्कंधे प्रथमो
ध्यायः नारद उवाच भ्रातर्येवं विनिहते हरिणा क्रोडमूर्तिना हिरण्यकशिपू राजन्पर्यतप्यद्रुषा शु
चा १ आह चेदं रुषा घूर्णः संदष्टदशनच्छदः कोपोज्वलद्भ्यां चक्षुर्भ्यां निरीक्षन्धूम्रमंबरं २ करालदंष्ट्रो
ग्रदृष्ट्या दुःप्रेक्ष्यभ्रुकुटीमुखः शूलमुद्यम्य सदसि दानवानिदमब्रवीत् ३

भ्रातृपुत्रादीन् इतिहासैः सांत्वयत् १ भगवद्द्वेष एव तद्द्वेषः तद्द्वेषे कारणमित्याशयेनाह भ्रातरीति १ एवं पक्षपा
तेन कोपेनोत् अतिशयेन ज्वलद्भ्यां कोपाग्निधूमेनेव धूम्रमंबरं निरीक्ष्यमाणः २ करालदंष्ट्राभिः युक्तया उग्रया
दृष्ट्या दुःप्रेक्ष्यं भ्रुकुटीयुक्तं मुखं यस्य सः ३ ५

समेनापि उपधावने भजनैः निमित्तभूतैः पार्ष्णिग्राहेण सता ६ एवं त्यक्तः स्वभावः समत्वं येन तस्य घृणेः शुद्धते
जोमयस्यापि मायया वनौकसः वराहरूपस्य सतः अस्थिरात्मनः अव्यवस्थितचित्तस्य कुतः यो यो भजति तं तं भजमा
नस्य अनुसरतः ७ तस्य रुधिरेण यावत्तर्पयिष्यामि तावद्यूयं भुवं यातेति तृतीयेनान्वयः ८ ननु देवैस्तद्द्विषः

भो भो दानवदैतेया द्विमूर्धन्त्र्यक्ष शंबर शतबाहो हयग्रीव नमुचे पाक इल्वल ४ विप्रचित्ते मम वचः
पुलोमन् शकुनादयः शृणुतानंतरं सर्वे क्रियतामाशु माचिरं ५ सपत्नैर्घातितः क्षुद्रैर्भ्राता मे दयितः
सुहृत् पार्ष्णिग्राहेण हरिणा समेनाप्युपधावनैः ६ तस्य त्यक्तस्वभावस्य घृणेर्मायावनौकसः भजं
तं भजमानस्य बालस्येवास्थिरात्मनः ७ मच्छूलभिन्नग्रीवस्य भूरिणा रुधिरेण वै रुधिरप्रियं तर्पयिष्ये
भ्रातरं मे गतव्यथः ८ तस्मिन्कूटेऽहिते नष्टे कृत्तमूले वनस्पतौ विटपा इव शुष्यंति विष्णुप्राणा दिवौकसः
९ तावद्यात भुवं यूयं विप्रक्षत्रसमेधितां सूदयध्वं तपोयज्ञस्वाध्यायव्रतदानिनः १०

कारितः अतस्ते किं न हन्यं तत्राह तस्मिन्कूटे कपटे अहिते प्रतिपक्षे कूटमीहितं यस्येति वा नष्टे अदृष्टे सति देवाः शु
ष्यंति स्वयमेव नाशं यास्यंति कुतः विष्णुरेव प्राणो येषां ते ९ तयो यज्ञादियुक्तान्सूदयध्वं घातयत १०

ननु तैः किमपराद्धं तत्राह विष्णुरिति द्विजानां क्रिया अनुष्ठानं मूलं यस्य सः यतोसौ यज्ञो धर्ममयश्च परायणं परमआ
श्रयः अतो यज्ञरूपस्य विष्णोर्मूलत्वात् मामना इत्यतदाश्रयणाद्भूते वध्या इति भावः ११ तस्मात्परमं मंत्रं शृणुतेत्याह यत्र
यत्रेति संदीपयत दहत हश्यत छेदं कुरुत १२ पुरं हट्टादिमत् ग्रामस्तद्रहितः व्रजो गवां वासः उद्यानं कृत्रिमं वनं क्षेत्रं
व्रीह्यादेः आरामोः कृत्रिमं वनं आश्रम ऋषीणां स्थानं आकरो रत्नादीनां खेटः कृषिवलानां वासः खर्वटो गिरिद्रो

विष्णुर्द्विजक्रियामूलो यज्ञो धर्ममयः पुमान् देवर्षिपितृभूतानां धर्मस्य च परायणं ११ यत्र यत्र द्विजा गा
वो वेदा वर्णाश्रमाः क्रियाः तं तं जनपदं यात संदीपयत वृश्चत १२ इति ते भर्तृनिर्देशमादाय शिरसादृताः
तथा प्रजानां कदनं विदधुः कदनप्रियाः १३ पुरग्रामव्रजोद्यानक्षेत्रारामाश्रमाकरान् खेटखर्वटघो
षांश्च ददहुः पत्तनानि च १४ केचित्खनित्रैर्बिभिदुः सेतुप्राकारगोपुरान् आजीव्यांश्चिच्छिदुर्वृक्षान् के
चित्परशुपाणयः प्रादहन् शरणान्यन्ये प्रजानां ज्वलितोल्मुकैः १५ एवं विप्रकृते लोके दैत्येंद्रानुचरै
र्मुहुः दिवं देवाः परित्यज्य भुवि चेरुरलक्षिताः १६

ण्याश्रयो ग्रामः घोष आभीराणां वासः पत्तनं राजधानी १४ खनित्रैः खननसाधनैः आजीव्यान् उपजीव्यान् शरणानि गृ
हान् १५ विप्रकृते उपद्रुते यज्ञभागानामभावात् दिवं परित्यज्य १५ तदेवं प्रजानां कदनं दानवेषु कुर्वत्सु स्वयं स्वर्गराज्या
दिसाधयितुं तपस्तप्तुकामः प्रथमं यत्कृतवान् तदाह हिरण्यकशिपुरित्यादिना १५

कटोदकं प्रेताय प्रदेयमुदकं आदिशब्दात् प्रेतश्राद्धं १६ १८ हे वधूरिति भ्रातुर्भार्यां संबोधयति १९ भवतु नाम तस्य
श्लाघ्यो वधः तथाप्यस्माकं तावत्त्वं धकर्गत एवेति चेत्तत्राह भूतानामिति दैवेन प्राचीनकर्मणा एकत्र नीतानां संयो
जितानां पुनश्च स्वैः स्वैः कर्मभिरुन्नीतानां वियोजितानां २० एवं लोकदृष्ट्या शोकं निवार्य तत्त्वदृष्ट्या वारयति नि

हिरण्यकशिपुर्भ्रातुः संपरेतस्य दुःखितः कृत्वा कटोदकादीनि भ्रातृपुत्रानसांत्वयत् १६ शकुनिं
शंबरं धृष्टं भूतसंतापनं वृकं कालनाभं महानाभं हरिश्मश्रुमथोत्कचं १७ तन्मातरं रुषाभानुं दितिं
च जननीं गिरा श्लक्ष्णया देशकालज्ञ इदमाह जनेश्वर १८ हिरण्यकशिपुरुवाच अंबांब हे व
धूः पुत्रा वीरं मार्हथ शोचितुं रिपोरभिमुखे श्लाघ्यः शूराणां वध ईप्सितः १९ भूतानामिह संवासः प्रपा
यामिव सुव्रते दैवेनैकत्र नीतानामुन्नीतानां स्वकर्मभिः २० नित्य आत्माव्ययः शुद्धः सर्वगः सर्ववि
त्परः धत्तेसावात्मनो लिंगं मायया विसृजन् गुणान् २१

त्य इति नित्यः मृत्युशून्यः अव्ययः अपक्षयशून्यः शुद्धः निर्मलः सर्वगः सर्वगतः सर्ववित् सर्वज्ञश्च सर्वचेहेतुः परो दे
हादिव्यतिरिक्तः अतो मृत इति कुशइति मलिन इति विषयुक्त इति अज्ञ इति शोको न कार्य इत्यर्थः कथं तर्हि तस्य संसारः तत्राह
धत्त इति आत्मनो मायया स्वाविद्यया लिंगं धत्ते गुणानुद्भावयान् देहान् सुखदुःखादीन् वा विक्षोभेण सृजन् स्वीकुर्वन् लिंगशा न
रीरोपाधिः संसार इत्यर्थः २१

एतत्सदृष्टांतं प्रपंचयति यथेति चतुर्भिः तरवः प्रतिबिंबिताः उपाधिधर्मा उपहिते भवंतीति दृष्टांतमुक्त्वा ग्राहकधर्मा ग्रा
ह्ये भवंतीति दृष्टांतमाह चक्षुषेति २२ अविकलः परिपूर्ण एव तत्साम्यतां मनःसमतामित्यर्थः २३ लिंगभावना देहा
भिमानः एष आत्मनो विपर्यासः अन्यथा भावः तमेवाह प्रियैर्वियोगः अप्रियैर्वियोगश्च कर्मैव संसृतिश्च नाना

यथांभसा प्रचलता तरवोपि चला इव चक्षुषा भ्राम्यमाणेन दृश्यते चलतीव भूः २२ एवं गुणैर्भ्राम्यमाणे
मनस्यविकलः पुमान् याति तत्साम्यतां भद्रे ह्यलिंगो लिंगवानिव २३ एष आत्मविपर्यासो ह्यलिंगे लिं
गभावना एष प्रियाप्रियैर्योगो वियोगः कर्मसंसृतिः २४ संभवश्च विनाशश्च शोकश्च विविधः स्मृतः अ
विवेकश्च चिंता च विवेकास्मृतिरेव च २५ अत्राप्युदाहरंतीममितिहासं पुरातनं यमस्य प्रेतबंधूनां संवादं
तं निबोधत २६ उशीनरेष्वभूद्राजा सुयज्ञ इति विश्रुतः सपत्नैर्निहतो युद्धे ज्ञातयस्तमुपासत २७ वि
शीर्णरत्नकवचं विभ्रष्टाभरणस्रजं शरनिर्भिन्नहृदयं शयानमसृगाविलं २८

मर्मेषु प्रवेशः २४ ततश्च संभव उत्पत्तिः विवेकस्यास्मृतिः अननुसंधानं २५ अत्रापि शोकहेतुं विनापृथैवायं शो
क इत्यस्मिन्नर्थे प्रेतस्य मृतस्य तस्य ये बांधवास्तेषां च २६ उपासत तत्समीपे आवृत्यास्थिताः २७ विशीर्णरत्नमयं
कवचं यस्य विभ्रष्टानि आभरणानि स्रजश्च यस्य शरेण निर्भिन्नं हृदयं यस्य असृजा रक्तेन आविलं लिप्तं २८

प्रकीर्णाः केशा यस्य ध्वस्ते अक्षिणी यस्य रभसा संरंभेण दष्टो दच्छदो ओष्ठो येन रजसा कुंठं आवृतं मुखांभोजं यस्य
छिन्नमायुधं भुजश्च यस्य २९ तस्य पादयोरुपसमीपे आसमंतात् अपतन् ३० १ विलापमेवाह अहो इति द्वाभ्यां अक
रुणत्वमेवाह दृगगोचरां दशां येन भवान्प्रणीतो गमितः तेन विधात्रा त्वमधुना शुचां विवर्द्धनः कृतोसीत्यन्वयः ३२

प्रकीर्णकेशं ध्वस्ताक्षं रभसा दष्टदच्छदं रजःकुंठमुखांभोजं छिन्नायुधभुजं मृधे २९ उशीनरेंद्रं विधिना त
था कृतं पतिं महिष्यः प्रसमीक्ष्य दुःखिताः हताः स्म नाथेति करैरुरो भृशं घ्नंत्यो मुहुस्तत्पदयोरुपापतन्
३० रुदंत्य उच्चैर्दयितांघ्रिपंकजं सिंचंत्य अस्रैः कुचकुंकुमारुणैः विस्रस्तकेशाभरणाः शुचं नृणां सृजंत्य आ
क्रंदनया विलेपिरे ३१ अहो विधात्राकरुणेन नः प्रभो भवान्प्रणीतो दृगगोचरां दशां उशीनराणामसि
वृत्तिदः पुरा कृतोधुना येन शुचां विवर्द्धनः ३२ त्वया कृतज्ञेन वयं महीपते कथं विना स्याम सुहृत्तमेन ते तत्रा
नुयानं तव वीर पादयोः शुश्रूषतीनां दिश यत्र यास्यसि ३३ एवं विलपतीनां वै परिगृह्य मृतं पतिं अनिच्छती
नां निर्हारमर्कोस्तं संन्यवर्तत ३४ तत्र ह प्रेतबंधूनामाश्रुत्य परिदेवितं आह तान्बालको भूत्वा यमः स्वयमु
पागतः ३५

त्वया सुहृत्तमेन विना वयं कथं स्याम भवेम जीवेम अतः हे वीर यत्र त्वं यास्यसि तत्र ते अनुयानं अनुगमनं तव पादयोः शु
श्रूषां कुर्वतीनामस्माकं दिश देहि ३३ निर्हारं दाहार्थं नयनं अस्तं अस्ताचलं प्रति ३४ परिदेवितं रोदनं स्वपुर्यामेवा
श्रुत्य श्रुत्वा ३५

तत्रस्वयमेवोपागतोयमस्तानाह अहोइत्यादिनावयसाअस्मत्तोधिकानामपिलोकस्यविधिंजन्ममरणादिप्रकारंवियत्रय तामपिविमोहमेवाहयत्रयस्मात्अव्यक्तादागतःतत्रैवगतमपार्थंशोचंतितदुक्तंगीतासु अव्यक्तादीनिभूतानिव्यक्तमध्या निभारत अव्यक्तनिधनान्येवतत्रकापरिदेवनेतिकिंचस्वयमपिस्वधर्माःतेनसहसमानोमृत्युलक्षणोधर्मोयेषांतथाभूता

यमउवाच अहोअमीषांवयसाधिकानांवियन्नयतांलोकविधिंविमोहिता यत्रागतस्तत्रगतंमनुष्यंस्व यंसधर्माअपिशोचंत्यपार्थं ३६ अहोवयंधन्यतमायदत्रत्यक्ताःपितृभ्यांनविचिंतयामः अभक्ष्यमाणा अबलावृकादिभिःसरक्षितारक्षतियोहिगर्भे ३७ यइच्छयेशःसृजतीदमव्ययोयएवरक्षत्यवलुंपतेचयः तस्याबलाःक्रीडनमाहुरीशितुश्चराचरंनिग्रहसंग्रहेप्रभुः ३८ पथिच्युतंतिष्ठतिदिष्टरक्षितंगृहेस्थितंत द्विहतंविनश्यति जीवत्यनाथोपितदीक्षितोवनेगृहेपिगुप्तोस्यहतोनजीवति ३९

अपि ३६ अबलादुर्बलाअपिवृकादिभिरभक्ष्यमाणावयंतत्रहेतुःयोंतर्गर्भेरक्षतिसएवहिविश्वंरक्षितारक्षति ३७ ननुतस्यरक्षणेकिंप्रयोजनंनकिंचिदपिकिंतुक्रीडैवकेवलमित्याहयइदंविश्वंसृजतिरक्षतिसंहरतिच नोअब लाःतस्येशितुश्चराचरंक्रीडासाधनमाहुः अतःसएवनिग्रहेसंहारेसंग्रहेपालनेचप्रभुः ३८ प्रभुत्वमेवान्वयव्य तिरेकाभ्यांदर्शयतिपथीतिदिष्टेनदैवेनईश्वरेणरक्षितंतेनेश्वरेणविहतंअस्यहतःतेनोपेक्षितः ३९

तदेवमात्मनोजन्ममरणादिकमंगीकृत्येश्वराधीनत्वान्नशोकःकार्यइत्युक्तंइदानींतुदेहानामेवजन्मादिनत्वात्मनइत्याह भि भिःभूतानिदेहाःनिजयोनिःस्वकारणभूतंलिंगशरीरंतन्निमित्तैःकर्मभिःभवंतिजायंतेनभवंतिनश्यंतिचसर्वशःदेवादि देहाअपितत्रतदाप्रकृतौदेहेस्थितोप्यात्मातस्याःगुणैर्देहधर्मैर्जन्मादिभिर्नबध्यतेनयुज्यतेयतःअन्यतमोदेहाद्भ्यं तविलक्षणः ४० नन्वहंकृशःस्थूलःइत्यादौनवैलक्षण्यंप्रतीयतेतत्राहइदंमोहजंअविवेकादात्मत्वेनजातंवस्तुतस्तु

भूतानितैस्तैर्निजयोनिकर्मभिर्भवंतिकालेनभवंतिसर्वशः नतत्रहात्माप्रकृतावपिस्थितस्त स्यागुणैरन्यतमोनिबध्यते ४० इदंशरीरंपुरुषस्यमोहजंयथापृथग्भौतिकमीयतेगृहं यथौदकैःपार्थिवतैजसैर्जनःकालेनजातोविकृतोविनश्यति ४१

पृथगेवयतःईयतेदृश्यतेभौतिकंचयथागृहमित्यन्वयःअत्रैवंप्रयोगःदृष्टरभौतिकाच्चपुरुषात्शरीरंभिन्नंदृश्यत्वा त्भौतिकत्वाच्चयथात्यंताविवेकिनआत्मत्वेनाभिमतमपिगृहंततःपृथकृतद्वदितिभौतिकत्वानुमानंविवृण्वन्नात्म नोजन्माद्यभावमुपसंहरतियथाओदकैःपरमाणुभिःजातोबुद्बुदादिःयथाचपार्थिवैर्जातोघटादिःयथाचतैजसै र्जातःकुंडलादिर्विनश्यतितथातैरेवत्रिविधैःपरमाणुभिःजातोजनोदेहएवविकृतःपरिणतःसन्विनश्यतिनत्वात्मेत्यर्थः ४१

पृथगवस्थानाभावेपिभिन्नत्वेदृष्टांतद्वयमाह यथानलोदारुष्वेवस्थितोपि दाहकत्वेनप्रकाशकत्वेनभिन्नएवप्रतीयते यथा चदे
हगतोप्यनिलो नासिकादिषुपृथक्स्थितएवप्रतीयतेदेहस्थत्वेप्यात्मनस्तद्धर्मयोगाभावेदृष्टांतमाह यथानभोनसज्जतेक्वापि
संगंनप्राप्नोतितथापुमानपिसर्वेषांगुणानांदेहेंद्रियादीनामाश्रयः तेषाश्रितो वापरः पृथगेवेत्यर्थः ४२ किंचहेमूढाःय
मनुज्ञोवचथसोयंयुष्मद्गर्भासुयज्ञःशेतेकिमिति नोवच्थ नन्वेतावंतंकालंमसोश्रृणोतिअनंतरंप्रतिवक्तिच इदानीतस्यादर्श
नान्मृतइतिशोचामइतिचेत्सतुशोचनीयोनभवतिप्रागपितस्यादर्शनादित्याह यःश्रोतेति ४३ ननुमुखनासिकासंचा

यथानलोदारुषुभिन्नईयतेयथाऽनिलोदेहगतःपृथक्स्थितः यथानभःसर्वगतंनसज्जते तथापुमान्सर्वगुणा
श्रयःपरः ४२ सुयज्ञोनन्वयंशेतेमूढायमनुशोचथ यःश्रोतायोनुवक्तेहसनदृश्येतकर्हिचित् ४३ न
श्रोतानानुवक्तायंमुख्योप्यत्रमहानसुः यस्त्विहेंद्रियवानात्मासचान्यःप्राणदेहयोः ४४ भूतेंद्रियम
नोलिंगान्देहानुच्चावचान्विभुः भजत्युत्सृजतिह्यन्यस्तच्चापिस्वेननतेजसा ४५

रीप्राणःश्रोतावक्ताचदृष्टएव नासौश्रोतावक्ताचअचेतनत्वादित्याहनश्रोतेतिमहान्सर्वेंद्रियचेष्टाहेतुः अतएवमुख्यः
प्राणोवैमुख्यइतिश्रुतेः कस्तर्हिवक्ताश्रोताचतत्राहयस्त्विहदेहेंद्रियैस्तत्तदर्थद्रष्टा आत्मासतुप्राणदेहाभ्यामचेतनाभ्या
मन्यएवसचेतनः ४४ ननुचेतनत्वेअन्यत्वेचतस्याहंकृशःस्थूलःकाणोबधिरइत्यादिदेहधर्मोपलब्धिःकुतस्तत्राह
भूतेंद्रियमनोभिर्लिंग्यंतेलक्ष्यंतइतितथातान्देहानतेभ्योऽन्यएवभजतिअहमितिमन्यतेतर्हिकथंमोक्षस्तत्राह
तद्भजनंस्वेनतेजसाविवेकबलेनउत्सृजत्यपिहिइत्यनुभवंप्रमाणयति ४५

ननुविवेकानंतरमप्याहारादिकर्मप्रवृत्तेर्बंधःस्यादेवेत्यत आह यावल्लिंगशरीरेणान्वितःतदभिमानवानात्माभवतितावदेवत
स्यतत्कर्मनिबंधनंबंधहेतुर्भवतिततोविपर्ययःदेहधर्मनात्मत्वं ततःक्लेशाश्चानुवर्ततेनतुलिंगाभिमानेनिवृत्तेपियतोयंमायायो
गोविपर्ययादिःमाययायुज्यतइतितथानपरमार्थइत्यर्थः ४६ ननुसुखदुःखादीनांतत्साधनानांचसत्यत्वप्रतीतेःकुतो
मायामयत्वंतथाचबहवोवादिनःसत्यत्वमेववदंतितत्राह वितथोमिथ्याभूतोऽयमभिनिवेशःकोसौगुणेषुतत्कार्येषु

यावल्लिंगान्वितोह्यात्मातावत्कर्मनिबंधनं ततोविपर्ययःक्लेशोमायायोगोनुवर्तते ४६ वितथाभिनिवेशोयं
यद्गुणेष्वर्थदृग्वचः यथामनोरथःस्वप्नःसर्वमैंद्रियकंमृषा ४७ अथनित्यमनित्यंवानेहशोचंतितद्विदः ना
न्यथाशक्यतेकर्तुंस्वभावःशोचतामिति ४८ लुब्धकोविपिनेकश्चित्पक्षिणांनिर्मितोंतकः वितत्यजालंवि
दधेतत्रतत्रप्रलोभयन् ४९ कुलिंगमिथुनंतत्रविचरत्समदृश्यत तयोःकुलिंगीसहसालुब्धकेनप्रलोभि
ता ५० सासज्जतशिचस्तंत्यांमहिषीकालयंत्रिता कुलिंगस्तांतथापन्नांनिरीक्ष्यभृशदुःखितः ५१

सुखादिषुअर्थःपरमार्थइतिदृक्वचश्चेतियत्कुतइत्यतआह यथेति ४७ उपसंहरति अथतस्मात्नित्यमात्मा
नंअनित्यंदेहंवातद्विदःनित्यमनित्यंचजानंतःनन्वेवमुपदेष्टारोपिशोचंतोदृश्यंतेतत्राहनान्यथेति ज्ञानदार्ढ्याभावा
त्स्वभावोननिवर्ततइत्यर्थः ४८ स्वयंसधर्मापीतियदुक्तंतत्रेतिहासमाह लुब्धकइत्यादिना पक्षिणामंतकईश्व
रेणनिर्मितःसन् यत्रयत्रतेतत्रतत्रतान्तान्प्रलोभयन्जालंविस्तार्यविशेषेणधृतवान्यागांतरेतेचामामिषादिभिः
प्रलोभनंकृतवानित्यर्थः ४९ कुलिंगःकंदभक्षीपक्षिविशेषःकुलिंगयोर्मिथुनं ५० शिचस्तंत्यांजालस्यसूत्रेसज्जत

वंशजा प क्रापत्नीं क्रापोत्यां ५८

आकरुणया सर्वतोनुकंपया ५२ आत्मनो देहस्यार्द्धेन विधुरायुषा भार्याशून्यजीवितेनानेन दुःखं यथा भवत्येवं जीवता
किं मे प्रयोजनं अतो मामपि कामं नयत्वित्यन्वयः ५३ नजातः पक्षा येषां तान् कथं विभर्मि पोष्यामि मे प्रजाः मात
रं प्रतीक्षंते ५४ शाकुनिकः पक्षिहंता निलीनः सन् ५५ आत्मापायं स्वमृत्युं ५६ अयथोचितं मिथ्यैवाविर्भूतं ५७

स्नेहादकल्पः कृपणः कृपणां पर्यदेवयत् अहो अकरुणो देवः स्त्रिया करुणया विभुः कृपणं मानुशोचंत्या
दीनया किं करिष्यति ५२ कामं नयतु मां देवः किमर्द्धेनात्मनो हि मे दीनेन जीवता दुःखमनेन विधुरायुषा ५३
कथं त्वजातपक्षांस्तान्मातृहीनान्बिभर्म्यहं मंदभाग्याः प्रतीक्षंते नीडे मे मातरं प्रजाः ५४ एवं कुलिंगं विलपं
तमारात् प्रियावियोगातुरमश्रुकंठं स एव तं शाकुनिकः शरेण विव्याध कालप्रहितो विलीनः ५५ एवं यूयमप
श्यंत्य आत्मापायमबुद्धयः नैनं प्राप्स्यथ शोचंत्यः पतिं वर्षशतैरपि ५६ हिरण्यकशिपुरुवाच बालस्यैवं प्र
वदति सर्वे विस्मितचेतसः ज्ञातयो मेनिरे सर्वमनित्यमयथोत्थितं ५७ यम एतदुपाख्याय तत्रैवांतरधीय
त ज्ञातयोपि सुयज्ञस्य चक्रुर्यत्सांपरायिकं ५८ ततः शोचत मा यूयं परं चात्मानमेव च क आत्मा कः परो वात्र | राम ९०
स्वीयः पारक्य एव वा स्वपराभिनिवेशेन विनाज्ञानेन देहिनां ५९ नारद उवाच इति दैत्यपतेर्वाक्यं दितिराक
र्ण्य सस्नुषा पुत्रशोकं क्षणात्त्यक्त्वा तत्त्वे चित्तमधारयत् ६० इति श्रीभागवते महापुराणे सप्तमस्कंधे द्वितीयो
ध्यायः
सांपरायिकं परलोककृत्यं ५८ अशोचतेति पाठे अडागम आर्षः स्वः परश्चेत्यभिनिवेश एवाज्ञानं तेन विना ५९ स
स्नुषा स्नुषया सहिता ६० सप्तमे द्वितीयः

तृतीये तपसा तप्तं वीक्ष्य जगद्विधिः आगत्य विस्मितस्तेन संस्तुतः स वरान् ददात् १ तदेवं साधूनां कदनेन भगवा
नादिरूप बंधूनां शोकं तत्त्वनिरूपणेनापनीय यत्कृतवान् तदाह हिरण्यकशिपुरित्यादिना अप्रतिद्वंद्वं प्रतिपक्ष

नारद उवाच हिरण्यकशिपू राजन्नजेयमजरामरं आत्मानमप्रतिद्वंद्वमेकराजं व्यधित्स
त १ स तेपे मंदरद्रोण्यां तपः परमदारुणं ऊर्ध्वबाहुर्नभोदृष्टिः पादांगुष्ठाश्रितावनिः २
जटादीधितिभी रेजे संवर्तार्क इवांशुभिः तस्मिंस्तपस्तप्यमाने देवाः स्थानानि भेजिरे ३ त
स्य मूर्ध्नः समुद्भूतः सधूमोग्निस्तपोमयः तिर्यगूर्ध्वमधो लोकानतपद्विष्वगीरितः ४
चुक्षुभुर्नद्युदन्वंतः सद्वीपाद्रिश्चचाल भूः निपेतुः सग्रहास्तारा जज्वलुश्च दिशो दश ५

हीनं एकराजं एकमेव राजानं व्यधित्सत कर्तुमैच्छत् १ ऊर्ध्वौ बाहू यस्य नभसि दृष्टिर्यस्य पादांगुष्ठेनाश्रिता अव
निर्येन २ जटानां दीधितिभिः कांतिभिः अंशुभिः रश्मिभिः प्रलयकर्ता अर्क इव रेजे पूर्वं ये अलक्षिताः संतो दिवं रुरुः ते
देवाः पुनः स्वानि स्थानानि भेजिरे ३ विष्वगीरितः सर्वतः प्रसृतः सन् ४ द्वीपैरद्रिभिश्च सहिता भूश्चलिता ५

ना०स० तव बलिहाराः करप्रदाः पूजाकारिण इति वा अभितो भवतीत्यभिभुः हे अभिभो सर्वाधिपते पाठांतरे अभोइति संबोधनं अ
११ भितो यावल्लोका नंक्ष्यंतीति संबंधः ७ ब्रह्मणस्त्वस्मिन्द्वेष मुत्पादयितुं तत्संकल्पमाहुः तस्येति चतुर्भिः अथाप्यस्माभिर्नि
वेदितं त्वयाश्रूयतां ८ तपोयोगयोः समाधिना निष्ठया सर्वधिष्ण्येभ्यः श्रेष्ठं निजासनं सत्यलोकं यथा अध्यास्ते
अधितिष्ठति ९ तत्तथैवात्मनः साधयिष्यामि ननु ब्रह्मणा अतिदीर्घायुषा तपस्तप्त्वा तत्साधितं अन्यः कुतस्तत्साध

तेन तप्तादिवं त्यक्त्वा ब्रह्मलोकं ययुः सुराः धात्रे विज्ञापयामासु र्देवदेव जगत्पते ६ दैत्येंद्रतपसा तप्तादि
वि स्थातुं न शक्नुमः तस्य चोपशमं भूमन्विधेहि यदि मन्यसे लोका न यावन्नंक्ष्यंति बलिहारास्तवाभिभो
७ तस्यायं किल संकल्पश्चरतो दुश्चरं तपः श्रूयतां किं न विदितस्तवाथापि निवेदितं ८ सृष्ट्वा चराचरमिदं
तपोयोगसमाधिना अध्यास्ते सर्वधिष्ण्येभ्यः परमेष्ठी निजासनं ९ तदहं वर्द्धमानेन तपोयोगसमा
धिना कालात्मनोश्च नित्यत्वात्साधयिष्ये तथात्मनः १० अन्यथेदं विधास्येहम यथापूर्वमोजसा राम
किमन्यैः कालनिर्धूतैः कल्पांते वैष्णवादिभिः ११ ११
येत तत्राह कालात्मनोरिति यद्यप्यायुषोल्पत्वेन देहो वारं वारं म्रियेत तथापि कालस्यात्मनश्च नित्यत्वात्बहुभिर्ज
न्मभिस्तपस्तप्त्वा तत्साधयिष्याम्येवेति १० वर्द्धमानेनेति यदुक्तं तस्य फलमाह अन्यथेति सुरासुरादिव्यत्ययेन
अयथापूर्वं पुण्यपापादिव्यत्ययेन इदं जगद्विधास्यामि वैष्णवादिभिः ध्रुवादिपदैः किं प्रयोजनं अतस्तदेव सा
धयिष्यामि ११

इति स्वपदाहरणे निर्बंधं शुश्रुमः अत एवासौ तपः परममास्थितः यदत्र युक्तं तदनंतरमेव विधत्स्व अन्यथा न वक्ष्या
न भ्रंशो स्मत्साध्वनामनिष्टं स्यादिति शोवं तत्र आद्भुसवासनमिति १२ तव पारमेष्ठ्यमिदमासनं द्विजानां गवां च
भवायोद्भवाय श्रेयसे सुखाय भूत्यै ऐश्वर्याय क्षेमाय लब्धपालनाय विजयायोत्कर्षाय १३ १४ वाल्मिकादिभिः

इति शुश्रुम निर्बंधं तपः परममास्थितः विधत्स्वानंतरं युक्तं स्वयं त्रिभुवनेश्वर १२ तवासनं द्विजगवां पारमे
ष्ठ्यं जगत्पते भवाय श्रेयसे भूत्यै क्षेमाय विजयाय च १३ इति विज्ञापितो देवैर्भगवानात्मभूर्नृप परीतोभृ
गुदक्षाद्यैर्ययौ दैत्येश्वराश्रमं १४ तं ददर्श प्रतिछन्नं वल्मीकतृणकीचकैः पिपीलिकाभिराकीर्णमेदस्त्व
ङ्मांसशोणितं १५ तपंतं तपसा लोकान्यथाभ्रापिहितं रविं विलक्ष्य विस्मितः प्राह हसन्नं तं हंसवाहनः
१६ ब्रह्मोवाच उत्तिष्ठोत्तिष्ठ भद्रं ते तपःसिद्धोसि काश्यप वरदोहमनुप्राप्तो व्रियतामीप्सितो वरः
द्रा७ १७ अप्रक्ष्यमहमेतत्ते हृत्सारं महदद्भुतं दंशभक्षितदेहस्य प्राणा ह्यस्थिषु शेरते १८ नैतत्पूर्वर्षयश्चक्रुः
करिष्यंति न चापरे निरंबुर्धारयन्प्राणान्को वै दिव्यं शतं समाः १९

प्रतिछन्नं प्रथमं न ददर्श पश्चात्तु कायं विद्विलक्षितं प्राहेति द्वयोरन्वयः आकीर्णं समंतात्भक्षितं मेदस्त्वङ्मांसंशो
णितं यस्य १५ अभ्रैः पिहितं छन्नं रविमिव विलक्ष्य दृष्ट्वा प्राह भगवान् १६ १७ हृत्सारं धैर्यं दंशैर्मक्षिकादि
भिर्भक्षितो देहो यस्य १८ निरंबुर्निषिद्धं अंबु येन सः त्यक्तोदक इत्यर्थः तेन १९

भा०स० तेनानेनव्यवसायेनैवतावत्‌जितोहंतपोनिष्ठेनभवतानुसुतरांजितः २० अमर्त्यस्यममदर्शनंअफलंनभवति
१२ २१ आदौभवतीत्यादिभवःउक्षन्‌प्रोक्षितवान्‌ २२ वज्रवत्संहननमंगदार्ढ्यंयस्य २३ तप्तस्यहेम्नइवआभाय

व्यवसायेनतेनेहदुष्करेणमनस्विना तपोनिष्ठेनभवताजितोहंदितिनंदन २० ततस्त्वेआशिषःसर्वादद्‌
म्यसुरपुंगव मर्त्यस्यतेह्यमर्त्यस्यदर्शनंनाफलंमम २१ नारदउवाच इत्युक्त्वादिभवोदेवोभक्षि
तांगंपिपीलिकैः कमंडलुजलेनौक्षत्‌दिव्येनामोघराधसा २२ सतत्कीचकवल्मीकात्सहओजोबला
न्वितः सर्वावयवसंपन्नोवज्रसंहननोयुवा २३ उत्थितस्तप्तहेमाभोविभावसुरिवैधसः सनिरीक्ष्यां
बरेदेवंहंसवाहमवस्थितं २४ ननामशिरसाभूमौतद्दर्शनमहोत्सवः उत्थायप्रांजलिःप्रह्वईक्षमा
णोदृशाविभुं हर्षाश्रुपुलकोद्भेदोगिरागद्‌गदयागृणात्‌ २५ हिरण्यकशिपुरुवाच कल्पांते
कालसृष्टेनयोंधेनतमसावृतं अभिव्यनक्‌जगदिदंस्वयंज्योतिःस्वरोचिषा २६ राम
१२

स्य २४ तस्यदर्शनमेवमहानुत्सवोयस्य २५ हर्षेणअश्रूणिपुलकोद्भेदश्चयस्यसगद्‌गदयागिराअगृणात्‌
अस्तौत्‌ २५ अंधेननिबिडेनतत्रहेतुःकालसृष्टेनप्रकृतिगुणरूपेणध्वांतेनतमसावृतमिदंजगदयः अभि
व्यनक्‌अभिव्यक्तंकृतवान्‌ २६

यश्चत्रिगुणेनात्मनाइदंसृजतिअवतिलुंपतिचतस्मैरजःसत्वतमसांधाम्नेआश्रयायमहतेपरायपरमेश्वरायनम
इतिद्वयोरन्वयः २७ अत्रचस्वप्रकाशकत्वंजगत्प्रकाशकत्वंतत्कारणत्वंसृष्ट्यादिकर्तृत्वंपरमेश्वरत्वंचेतिषड्विधत्व
मुक्तंतदेवप्रपंचयन्नमस्करोतिनमइतिचतुर्भिः बीजायकारणायतत्रहेतुःआद्यायज्ञानंज्ञप्तिःविज्ञानंविषयाकारंज्ञा
नंमूर्तिर्यस्यतस्मैअनेनस्वप्रकाशत्वंजगत्प्रकाशकत्वंचदर्शितंबीजायेतिनिमित्तत्वमुक्तंउपादानत्वमाहप्राणाद्‌

आत्मनात्रिवृताचेदंसृजत्यवतिलुंपति रजःसत्वतमोधाम्नेपरायमहतेनमः २७ नमआद्यायबीजा
यज्ञानविज्ञानमूर्तये प्राणेंद्रियमनोबुद्धिविकारैर्व्यक्तिमीयुषे २८ त्वमीशिषेजगतस्तस्थुषश्चप्रा
णेनमुख्येनपतिःप्रजानां चित्तस्यचित्तेर्मनइंद्रियाणांपतिर्महान्भूतगुणाशयेशः २९

योयेविकारास्तैरूपैर्व्यक्तिंकार्याकारंईयुषेप्राप्तवते २८ एवमात्मनात्रिवृताचेत्यनेनोक्तंकारणत्वंद्वेधादर्शितं
बीजायेतिनिमित्तत्वमुक्तंप्या सहतत्वमीश्वरत्वंचाह त्वमेवजगतोजंगमस्यतस्थुषःस्थावरस्यचईशिषेनियंता
भवसिकेनमुख्येनप्राणेनसूत्रात्मरूपेणअतस्त्वंप्रजानांपतिःतासांचित्तस्यचित्तेश्चतत्परिणामस्मृतायाश्
चेतनायाःमनसश्चतन्नियम्यानामिंद्रियाणांचपतिःअतस्त्वमेवमहान्भूतानामाकाशादीनांतद्‌गुणानांशब्दा
दिविषयाणांआशयानांतद्वासनानांमीशश्चएतेनैवस्त्रष्टृत्वंदर्शितं २९

ना० स०
१२

इदानीं यज्ञप्रवर्त्तकत्वेनांतर्यामित्वेन जगत्पालकत्वमाह त्वमेव सप्ततंतून् अग्निष्टोमादियज्ञान् विस्तारयसि कथं
त्रय्या तन्वा वेदत्रयरूपेण कथंभूतं यच्चत्वारो होतारो यत्र तं चातुर्होत्रिकं कर्मं तद्विषयया विद्यया आत्मवतां प्राणिनामा
त्मत्वं तत्त्वमेवांतरात्मा च अंतर्यामी कुतः यतः कविः सर्वज्ञः तत्कुतः एकः अखंडः तत्र हेतुः अनादिः अनंतपारश्चेति
नास्त्यंतः कालतः पारं च देशतो यस्य सः ३० कालरूपेण संहर्तृत्वमाह त्वमेवेति त्वं बाधैरवयवैः क्षिणोषि क्षपयसि
तदेवं सृष्ट्यादिकर्तृत्वेपि निर्विकारत्वमेवाह कूटस्थ इति तत्र हेतवः आत्मा ज्ञानरूपः परमेष्ठी परमेश्वरः अजः जन्म

त्वं सप्ततंतून् वितनोषि तन्वा त्रय्या चातुर्होत्रकविद्यया च त्वमेक आत्मात्मवतामनादिरनंतपारः कविरंतरात्मा
३० त्वमेव कालोनिमिषो जनानामायुर्लवाद्यावयवैः क्षिणोषि कूटस्थ आत्मा परमेष्ठ्यजो महांस्त्वं जीवलोकस्य
च जीव आत्मा ३१ त्वत्तः परं नापरमप्यनेजदेजच्च किंचिद्व्यतिरिक्तमस्ति विद्याः कलास्ते तनवश्च सर्वा हिरण्यगर्भो
सि बृहत्त्रिपृष्ठः ३२

शून्यः महान् अपरिछिन्नः किं च जीवलोकस्य कर्मवशाज्जन्मादिभिर्विक्रियते त्वं तु तस्य जीवः जीवनस्य हेतुः यतस्तस्या
त्मा नियंता ३१ तत्कुतस्तत्राह त्वत्त इति त्वत्तो व्यतिरिक्तं यदि किंचिद्भवेत्तर्हि तस्मात्तव जन्मादिविकारो नियम्यत्वादिकं
वा भवेत् त्वत्तः परं कारणं अपरं कार्यं तत्र वैजत् जंगमं अनेजत् स्थावरं च व्यतिरिक्तं नास्ति बोधकं शास्त्रं व्यतिरिक्तमस्तीति
चेत् न यतः विद्या वेदोपवेदादिविद्यास्थानानि कलाश्च तदंगानि तवैव तनवः न तु त्वद्व्यतिरिक्ताः तत्कुतः यतः त्वं बृहत्
ब्रह्मैवासि तदपि कुतः तत्राह हिरण्यरूपं ब्रह्मांडं गर्भे यस्य सः त्रिपृष्ठः त्रिगुणात्मकस्य प्रधानस्य पृष्ठे परतः स्थितः अस्पृ

राम
१२

ननु ब्रह्मांडशरीरस्य मम कुतो ब्रह्मत्वं कुतो वा ब्रह्मांडगर्भत्वादि तत्राह व्यक्तं कार्यमिदं तव शरीरं व्यक्तं सत्यमिति वा ये
न शरीरेण त्वमिंद्रियप्राणमनसां गुणान् विषयान् भुंक्षे किंतु पारमेष्ठ्ये परमैश्वर्यधामनि स्वस्वरूपे स्थित एव भुंक्षे न
तु स्वरूपतिरोधानेन अतस्त्वमव्यक्त आत्मा निरूपाधि ब्रह्मैव पुराणपुरुषश्चेत्यर्थः ३३ ननु ब्रह्मत्वं पुराणपुरुष
त्वं कथमेकस्य तत्राह हे अनंत येन त्वया अव्यक्तेन मनोवचनागोचरेण रूपेण इदं विश्वं ततं व्याप्तं तस्मै तुभ्यं भगवते

व्यक्तं विभो स्थूलमिदं शरीरं येनेंद्रियप्राणमनोगुणांस्त्वं भुंक्षे स्थितो धामनि पारमेष्ठ्ये अव्यक्त आत्मा
पुरुषः पुराणः ३३ अनंताव्यक्तरूपेण येनेदमखिलं ततं चिदचिच्छक्तियुक्ताय तस्मै भगवते नमः ३४ यदि
दास्यस्यभिमतान्वरान्मे वरदोत्तम भूतेभ्यस्त्वद्विसृष्टेभ्यो मृत्युर्मा भून्मम प्रभो ३५ नांतर्बहिर्दिवा न
क्तमन्यस्मादपि चायुधैः न भूमौ नांबरे मृत्युर्न नरैर्न मृगैरपि ३६ व्यसुभिर्वासुमद्भिर्वा सुरासुरमहोरगैः
अप्रतिद्वंद्वतां युद्धे ऐकपत्यं च देहिनां ३७ सर्वेषां लोकपालानां महिमानं यथात्मनः तपोयोगप्रभावानां
यन्न रिष्यति कर्हिचित् ३८ इति श्री भा० स० ह० टी०

अचिंत्यैश्वर्याय नमः भगवत्वे हेतुः चिच्छक्तिर्विद्या अचिच्छक्तिर्माया ताभ्यां युक्तायेति ३४ ३५ अन्यस्मात्त्वत्स
ष्टव्यतिरिक्तादपि भगवत आयुधैर्मा भूत् ३६ व्यसुभिरप्राणैः असुमद्भिः सप्राणैः यथा आत्मनस्तवास्ति तथा
अप्रतिद्वंद्वतादिकं देहीति शेषः ३७ तपसा योगेन च प्रभावो येषां तेषां यत् अणिमाद्यैश्वर्यं न रिष्यति न नश्यति

ना० स०
२४

सप्तमे तृतीयः चतुर्थे तु वरान् लब्ध्वा विजित्याखिललोकपान् विष्णुद्वेषेण तान्सर्वान् दैत्येंद्रः समपीडयत् १
शतधृतिः ब्रह्मा १ मम मत्तः यद्यपि यद्यपी मे दुर्लभाः २ अमोघो अनुग्रहो यस्य ३ यदर्थं तपस्तप्तं तदाह एवमित्या
दिना ४ ५ ६ सर्वेषां सत्वानां प्राणिजातानां ये ये पतयस्तान् ७ त्रिविष्टपं स्वर्गं अध्यास्ते अधिष्ठितवान्

इतिश्रीभागवते महापुराणे सप्तमस्कंधे तृतीयोध्यायः श्रीनारद उवाच एवंवृतः शतधृतिर्हिरण्यकशि
पोरथ प्रादात्तत्तपसा प्रीतो वरांस्तस्य सुदुर्लभान् १ ब्रह्मोवाच तातेमे दुर्लभाः पुंसां यान्वृणीषे वरा
न्मम तथापि वितराम्यंग वरान्यद्यपि दुर्लभान् २ ततो जगाम भगवानमोघानुग्रहो विभुः पूजितोसु
रवर्येण स्तूयमानः प्रजेश्वरैः ३ एवं लब्धवरो दैत्यो बिभ्रद्धेममयं वपुः भगवत्यकरोत् द्वेषं भ्रातुर्वध
मनुस्मरन् ४ स विजित्य दिशः सर्वा लोकांश्च त्रीन्महासुरः देवासुरमनुष्येंद्रान्गंधर्वगरुडोर
गान् ५ सिद्धचारणविद्याध्रानृषीन्पितृपतीन्मनून् यक्षरक्षःपिशाचेशान्प्रेतभूतपतीन
थ ६ सर्वसत्वपतीन्जित्वा वशमानीय विश्वजित् जहार लोकपालानां स्थानानि सह तेजसा ७ दे
वोद्यानश्रिया जुष्टमध्यास्ते स्म त्रिविष्टपं महेंद्रभवनं साक्षान्निर्मितं विश्वकर्मणा त्रैलोक्यलक्ष्म्याय
तनमध्युवासाखिलर्द्धिमत् ८ तत्र महेंद्रभवनं मध्ये वास अधिवसति स्म ८

राम
२४

अखिलसमृद्धियुक्तमेवाह यत्रेति त्रिभिः ९ मुक्तादामानि परिच्छदाः परिकरा यासां १० सुदतीः सुदत्यः ११ ऊ
र्जितमधिकं चंडं तीव्रं शासनं यस्य १२ अंग हे राजन् उरुगंधिना उरुगंधेन मधुना सुरया मत्तं अत एव विवृत्ते विघूर्णि

यत्र विद्रुमसोपाना महामारकता भुवः यत्र स्फाटिककुड्यानि वैडूर्यस्तंभपंक्तयः ९ यत्र चित्रविताना
नि पद्मरागासनानि च पयःफेननिभाः शय्या मुक्तादामपरिच्छदाः १० कूजद्भिर्नूपुरैर्देव्यः शब्दयंत्य इत
स्ततः रत्नस्थलीषु पश्यंति सुदतीः सुंदरं मुखं ११ तस्मिन्महेंद्रभवने महाबलो महामना निर्जितलोक ए
कराट् रेमेऽभिवंद्यांघ्रियुगः सुरादिभिः प्रतापितैरूर्जितचंडशासनः १२ तमंग मत्तं मधुनोरुगंधि
ना विवृत्तताम्राक्षमशेषधिष्ण्यपाः उपासतोपायनपाणिभिर्विना त्रिभिस्तपोयोगबलौजसां प
दं १३ जगुर्महेंद्रासनमोजसा स्थितं विश्वावसुस्तुंबुरुरस्मदादयः गंधर्वसिद्धा ऋषयोस्तुवन्मुहुर्वि
द्याधराश्चाप्सरसश्च पांडव १४ अकृष्टपच्या तस्यासीत्सप्तद्वीपवती मही तथा कामदुघा द्यौस्तु नानाश्च
र्यपदं नभः १५

ते ताम्रे अक्षिणी यस्य तं अशेषधिष्ण्यपाः सर्वलोकपालाः उपायनयुक्तैः पाणिभिरुपासत त्रिभिर्ब्रह्मवि
ष्णुरुद्रैर्विना पदं आश्रय स्थानं १३ उपासनप्रकारमाह जगुरिति १४ १५ १६

तत्पत्न्यो नद्य ऊहुः वहंति स्म रत्नाकरानेवाह क्षारेति सीधुरिक्षुः १७ आक्रीडं क्रीडास्थानं गुणान् पुष्पफलादी
न् स एव लोकपालानां पृथग्विधान्गुणान् वर्षणदहनशोषणादीनेक एव दधार १८ निर्जिताः ककुभो येन यथो

स एव वर्णाश्रमिभिः क्रतुभिर्भूरिदक्षिणैः ईज्यमानो हविर्भागानग्रहीत्स्वेन तेजसा १६ रत्नाकराश्च
रत्नौघांस्तत्पत्न्यश्चोहुरूर्मिभिः क्षारसीधुघृतक्षौद्रदधिक्षीरामृतोदकाः १७ शैला द्रोणीभिरा
क्रीडं सर्वर्तुषु गुणान्द्रुमाः दधार लोकपालानामेक एव पृथग्गुणान् १८ स इत्थं निर्जितककुबेक
राड् विषयान्प्रियान् यथोपजोषं भुंजानो नातृप्यदजितेंद्रियः १९ एवमैश्वर्यमत्तस्य दृप्तस्योच्छा
स्त्रवर्तिनः कालो महान्व्यतीयाय ब्रह्मशापमुपेयुषः २० तस्योग्रदंडसंविग्नाः सर्वे लोकाः सपालकाः
अन्यत्रालब्धशरणाः शरणं ययुरच्युतं २१ तस्यै नमोऽस्तु काष्ठायै यत्रात्मा हरिरीश्वरः यद्गत्वा न ---- राम
निवर्तंते शांताः सन्यासिनोऽमलाः २२ इति ते संयतात्मानः समाहितधियोऽमलाः उपतस्थुर्हृषीके ---- १५
शं विनिद्रा वायुभोजनाः २३ तेषामाविरभूद्वाणी अरूपा मेघनिस्वना सन्नादयंती ककुभः सा
धूनामभयंकरी २४ मा भैष्ट विबुधश्रेष्ठाः सर्वेषां भद्रमस्तु वः मद्दर्शनं हि भूतानां सर्वश्रेयोपपत्तये २५

पजोषं यथाप्रीति १९ २३ अरूपा वक्तृरहिता २४ मम दर्शनं भवतां सर्वेषां श्रेयसां उपपत्तये प्राप्तये २५

ननु देवादिविद्वेषिण्यस्य विनाशो नास्ति ब्रह्मवरेणोर्जितत्वात् तत्राह हनिष्य इति सर्वं अहं सहे न मद्द्रोहमिति भावः २८
असुरं च हतं मेनिरे तदानीं तद्द्वेषस्य प्रवृत्तत्वादिति भावः २९ तमेव वर्णयन् कुमारोऽस्य तस्य महत्वमाह तस्येत्यादिना
गुणैर्महानभूत् गुणानेवाह महदुपासक इत्यादिना ३० सत्या संधा प्रतिज्ञा यस्य एक एव प्रियश्च सुहृत्तमश्च ३१ स

निर्वैराय प्रशांताय स्वसुताय महात्मने प्रह्लादाय यदा द्रुह्येत् हनिष्येऽपि वरोर्जितं २८ नारद उवाच इत्यु
क्ता लोकगुरुणा तं प्रणम्य दिवौकसः न्यवर्तंत गतोद्वेगा मेनिरे चासुरं हतं २९ तस्य दैत्यपतेः पुत्राश्च
त्वारः परमाद्भुताः प्रह्लादोऽभून्महांस्तेषां गुणैर्महदुपासकः ३० ब्रह्मण्यः शीलसंपन्नः सत्यसंधो जि
तेंद्रियः आत्मवत्सर्वभूतानामेकः प्रियसुहृत्तमः ३१ दासवत्सन्नतार्यांघ्रिः पितृवद्दीनवत्सलः भ्रा
तृवत्सदृशे स्निग्धो गुरुष्वीश्वरभावनः ३२ विद्यार्थरूपजन्माढ्यो मानस्तंभविवर्जितः नोद्विग्नचित्तो व्य
सनेषु निस्पृहः श्रुतेषु दृष्टेषु गुणेष्ववस्तुदृक् दांतेंद्रियप्राणशरीरधीः सदा प्रशांतकामो रहितासुरोऽसु
रः ३३ यस्मिन्महद्गुणा राजन् गृह्यंते कविभिर्मुहुः न तेऽधुनापिधीयंते यथा भगवतीश्वरे ३४

म्यं नता आर्याणां अंघ्रयो येन ईश्वर इति भावना यस्य ३२ व्यसनेषु नोद्विग्नचित्तः गुणेषु विषयेषु निस्पृ
हः यतस्तेषु अवस्तुदृक् दांता इंद्रियादयो यस्य रहित आसुरो भावो मत्सरादिर्यस्य सः असुरोऽपि सन्
३३ अधुनापि ते गुणा न पिधीयंते तिरोहिता न भवंति ३४

यसाधुगाथासदस्यसोऽस्पत्नीपसुरान्टप। प्रतिमानंप्रकुर्वंति किमुतान्येभवादृशाः॥ ३५॥

भा० स० १६ यंसाधकगाथासदसिसाधककथाप्रसंगवत्यांसनायांप्रतिमानंदृष्टांतं ३५ सूच्यतेमयाकेवलंद्योत्यतेसुष्ठु
कथ्यतइतिवा ३६ नैसर्गिकरतेर्लिंगान्याह न्यस्तक्रीडनकइतिषड्भिः तन्मनस्तयातदेकचित्तत्वेन ३७ एता
निश्वासनादीनिगोविंदेनपरिरंभितः आत्मनाएकीकृतः ३८ रुदतिरोतिवैकुंठस्यचिंतयाशबलाभिश्रा

गुणैरलमसंख्येयैर्महात्म्यंतस्यसूच्यते वासुदेवेभगवतियस्यनैसर्गिकीरतिः ३६ न्यस्तक्रीडनको
बालोजडवत्तन्मनस्तया कृष्णग्रहगृहीतात्मा नवेदजगदीदृशं ३७ आसीनःपर्यटन्नश्नन्शयाया
नःप्रपिबन्ब्रुवन् नानुसंधत्तएतानिगोविंदपरिरंभितः ३८ क्वचिद्रुदतिवैकुंठचिंताशबलचे
तनः क्वचिद्धसतितच्चिंताह्लादउद्गायतिक्वचित् ३९ नदतिक्वचिदुत्कंठोविलज्जोनृत्यतिक्वचि
त् क्वचित्तद्भावनायुक्तस्तन्मयोनुचकारह ४० क्वचिदुत्पुलकस्तूष्णीमास्तेसंस्पर्शनिर्वृतः
अस्पंदप्रणयानंदसलिलामीलितेक्षणः ४१ सउत्तमश्लोकपदारविंदयोर्निषेवयाकिंचन
संगलब्धया तन्वन्परांनिर्वृतिमात्मनोमुहुर्दुःसंगदीनान्यमनःशमंव्यधात् ४२ राम १६

क्षमिताचेतनायस्यतस्यचिंतयाह्लादोय ३९ उत्कंठःमुक्तकंठःसन् अनुचकारतच्चेष्टादिकंस्वयंकृतवान् ४०
संस्पर्शस्तद्भावापत्तिःतेननिर्वृतःअस्पंदःस्थिरोयःप्रणयस्तेनयःआनंदःतेनयत्सलिलंतेनयुक्तेआमीलि
तेईषन्मीलितेईक्षणेयस्य ४१ आत्मनःपरांनिर्वृतिंतन्वन्दुःसंगेनदीनस्यान्यस्यापिमनःशमंशांतिंव्यधात्
४२

अघंद्रोहमकरोत् ४३ प्रथमाध्यायांतेपृष्टमेवार्थमतिविस्मयेनपुनःपृच्छतिदेवर्षइति तवत्वत्तःतववाक्य
मितिवासाधवेअघमद्रात्साधोर्द्रोहंकृतवानितियत् एतद्वेदितुं ४४ उपालभंतेआक्षिपंति अघंतुनैवकु
र्वंति अपरःशत्रुरिव ४५ अनुवर्तान् अनुकूलान्साधून् अपगतरोषान् गुरुःपितैवदेवतायेषांतान्बुद्धि
त्यघंनकुर्वंतीतिकिमुवक्तव्यमित्यर्थः पुत्रायपुत्रमुद्दिश्यपितुर्द्वेषःपित्राकृतोद्वेषःपुत्रस्यमरणा[illegible]र्थंप्रयो
जितःप्रवर्तितइति यत् एतत्कौतूहलं विधमअपाकुरु यद्वायद्यस्मात्पुत्रायद्वेषःसपितुर्मरणायप्र

तस्मिन्महाभागवतेमहाभागेमहात्मनि हिरण्यकशिपूराजन्नकरोदघमात्मजे ४३ युधिष्ठिरउ
वाच देवर्षएतदिच्छामोवेदितुंतवसुव्रत यदात्मजायशुद्धायपितादात्साधवेह्यघं ४४ पुत्रा
न्विप्रतिकूलान्स्वान्पितरःपुत्रवत्सलाः उपालभंतेशिक्षार्थंनैवाघमपरोयथा ४५ कि
मुतानुवशान्साधूंस्तादृशान्गुरुदेवतान् एतत्कौतूहलंब्रह्मन्नस्माकंविधमप्रभो पितुःपु
त्राययद्द्वेषोमरणायप्रयोजितः ४६ इतिश्रीभागवतेम
हापुराणेसप्तमस्कंधेचतुर्थोध्यायः श्रीनारदउवाच पौरोहित्यायभगवान्वृतःकाव्यःकिलासुरैः
योजितः अतएतत्कौतूहलंविधमेत्यर्थः ४६ सप्तमेचतुर्थः [illegible]मर्कौसुतौतस्यदैत्यराजगृहांतिके १

भा० स० १७ पंचमे गुरुतोधीतं त्यक्त्वा विष्णुस्तुतौ रतं घातयन्नद्विपसर्पाद्यैः सुतं दैत्यो न चाशकत् १ भगवद्भक्तेरेव विद्वेष
कारणमिति वक्तुमाह यौरोहित्याय इत्यादिना काव्यः शुक्रः अतस्तस्य सुतौ तत्र न्यवसतामिति शेषः १ पाठ्यान्
दण्डनीत्यादीन् पाठ्यान् स्वबालकानिति वान्वयः २ अनुश्रवणानंतरं तथैव पपाठ च किंतु तत्साधनमेने
तत्र हेतुः स्वः पर इत्यसद्ग्रहो मिथ्याभिनिवेश एवाश्रयो यस्य तत् ३ ४ हे असुरवर्य असद्ग्रहात् अहं मन्ये

तौ राज्ञा प्रापितं बालं प्रह्लादं नयकोविदं पाठयामासतुः पाठ्यानन्यांश्चासुरबालकान् २ यत्तत्र
गुरुणा प्रोक्तं शुश्रुवेनुपपाठ च न साधु मनसा मेने स्वपरासद्ग्रहाश्रयं ३ एकदासुरराट् पुत्रमंक
मारोप्य पाण्डव पप्रच्छ कथ्यतां वत्स मन्यते साधु यद्भवान् ४ प्रह्लाद उवाच तत्साधु मन्येसुरवर्य
देहिनां सदा समुद्विग्नधियामसद्ग्रहात् हित्वात्मपातं गृहमंधकूपं वनं गतो यद्धरिमाश्रयेत ५ राम १७
नारद उवाच श्रुत्वा पुत्रगिरो दैत्यः परपक्षसमाहिताः जहास बुद्धिर्बालानां भिद्यते परबुद्धिभिः ६

ति मिथ्याभिनिवेशाद्धेतोः सम्यग्बुद्धिर्या धीर्येषां वनं गतः सन् हरिमाश्रयेदिति यत् तदेवाहं साधु मन्ये कथं
भूतं गृहं हित्वा आत्मनः पातं निमित्तं कुतः अंधकूपवन्मोहावहं ५ परपक्षे विष्णौ समाहिताः परिनिष्ठिताः
हास मेवाह बुद्धिरिति ६

विष्णुपक्षैर्भगवतैः हेतुभूतैः ननु लङ्केहे कुतस्तेषां प्रवेशः सत्यं तथापि प्रतिच्छन्नैर्वेषांतरेणाच्छन्नैः ७ दैत्यैर्गृहमानीतं ८
बालान् सर्वान् अति अतिक्रम्य तुभ्यं तव ९ १० अहो मायामोहितो भवं तो मामाक्षिपंतीत्याशयेन तावदाह परः
स्वश्चेति मिथ्याभिनिवेशो यदीयया माययैव कृतः न तु वास्तवः अत एव तया विमोहितबुद्धीनां भवतामेव दृष्टः न तु
मम तस्मै अचिंत्यमायेश्वराय नमः ११ अहो किमेतज्जल्पसि तव बुद्धिभेदो यतो जातस्तत्कथयेत्याक्षिप्तः स

सम्यग्विधार्यतां बालो गुरुगेहे द्विजातिभिः विष्णुपक्षैः प्रतिच्छन्नैर्न भिद्येतास्य धीर्यथा ७ गृह
मानीतमाहूय प्रह्लादं दैत्ययाजकाः प्रशस्य श्लक्ष्णया वाचा समपृच्छंत सामभिः ८ वत्स प्रह्लाद भ
द्रं ते सत्यं कथय मा मृषा बालानति कुतस्तुभ्यमेष बुद्धिविपर्ययः ९ बुद्धिभेदः परकृत उताहो ते स्व
तोभवत् भण्यतां श्रोतुकामानां गुरूणां कुलनंदन १० प्रह्लाद उवाच परः स्वश्चेत्यसद्ग्राहः पुंसां
यन्मायया कृतः विमोहितधियां दृष्टस्तस्मै भगवते नमः ११ स यदानुव्रतः पुंसां पशुबुद्धिर्विभिद्य
ते अन्य एष तथान्योहमिति भेदगतासती १२

न् तत्प्रसादादेवेत्युत्तरमाह स इति त्रिभिः स भगवान् यदा अनुव्रतः अनुकूलो भवति तदा पशूनामिव बुद्धि
र्भेदगता असती मिथ्या विषया भिद्यते अभिन्नात्मनिष्ठा भवति १२ श्रीवासुदेवाय नमः छ

न्नेदस्यासत्वंदर्शयिन्नाह स एव परमात्मैव स्वःपर इति च अविवेकिभिर्निरूप्यते युक्तंचैतत् यतः यस्य वर्त्म निजि
ज्ञासायां ब्रह्मादयोपि मुह्यंतीति तत्र हेतुः दुरन्वयं दुर्घटमनुक्रमणं अनुचरितमनुवर्णनं वा यस्य सः १३ ननु
निर्विकारस्य कथं मतिभेदकर्तृत्वमाह यथा अयोलोहं आकर्षस्यायःकांतस्य समीपे स्वयमेव भ्रमति चेत
सश्चक्रपाणेः सन्निधिरेव कुतो जातस्तत्राह यदृच्छयेति कस्यतपोदानादेःफलमेतदितिन ज्ञायत इत्य

स एष आत्मा स्वपरेत्यबुद्धिभिर्दुरन्वयानुक्रमणो निरूप्यते मुह्यंति यद्वर्त्मनि वेदवादिनो ब्रह्माद
योह्येष भिनत्ति मे मतिं १३ यथा भ्राम्यत्ययो ब्रह्मन्स्वयमाकर्षसन्निधौ तथा मे भिद्यते चेतश्च
क्रपाणेर्यदृच्छया १४ एतावद्ब्राह्मणायोक्त्वा विरराम महामतिः तं निर्भर्त्स्याथ कुपितः सदीनो
राजसेवकः १५ आनीयतामरे वेत्रमस्माकमयशस्करः कुलांगारस्य दुर्बुद्धेश्चतुर्थोस्योदितो दमः
१६ राम १८

र्थः १४ राजसेवक उवाचेति शेषः १५ वेत्रं कशा उपायानां मध्ये चतुर्थः दमः दमो दंडः अस्य दुर्बुद्धेः उदि
तः उक्तः शास्त्रेषु दुर्बुद्धित्वे हेतुः कुलस्यांगारवन्नाशहेतोः १६ ओं नमो भगवते वासुदेवाय०

नत्कुतः तत्राह दैतेया एव चंदनद्रुमाः तेषां वने अयं कंटकद्रुमतुल्यो जातः तदेवाह यस्य दैत्यवनस्य मूलोन्मू
लने परशुस्थानीयस्य विष्णोरयमर्भक एव नालायितः नालमिवाचरत् यथा परशोः छेदकत्वे बर्बूलादि
निर्मितो दंडः सहकारी तं विनाछेदनासंभवात् तथायं विष्णोर्दैत्यमूलछेदहेतुर्जात इत्यर्थः १७ इति तं

दैतेयचंदनवने जातोयं कंटकद्रुमः यन्मूलोन्मूलपरशोर्विष्णोर्नालायितोर्भकः १७ इति तं विवि
धोपायैर्भीषयंस्तर्जनादिभिः प्रह्रादं ग्राहयामास त्रिवर्गस्योपपादनं १८ तत एनं गुरुर्ज्ञा
त्वा ज्ञातज्ञेयचतुष्टयं दैत्येंद्रं दर्शयामास मातृमृष्टमलंकृतं १९ पादयोः पतितं बालं प्र
तिनंद्याशिषासुरः परिष्वज्य चिरं दोर्भ्यां परमामाप निर्वृतिं २० आरोप्यांकमवघ्राय
मूर्द्धन्यश्रुकलांबुभिः आसिंचन्विकसद्वक्त्रमिदमाह युधिष्ठिर २१

प्रह्रादं ग्राहयन्धर्मार्थकामवर्गस्य प्रतिपादकं शास्त्रमध्यापयामास १८ ज्ञातं ज्ञेयमुपायचतुष्टयं
येन तं ज्ञात्वा दैत्येंद्रं प्रति मात्रा मृष्टं उद्वर्त्यस्नापितं १९ २० २१

भा० स०
१९

पादसेवनं परिचर्या अर्चनं पूजा दास्यं कर्मार्पणं सख्यं तद्विश्वासादि आत्मनिवेदनं देहसमर्पणं यथा विक्रीतस्य गवाश्वादेर्भरणपालनादिचिंता न क्रियते तथा देहं तस्मै समर्प्य तच्चिंतावर्जनमित्यर्थः २३ इति नवलक्षणानि

हिरण्यकशिपुरुवाच प्रह्लादानूच्यतां तात स्वधीतं किंचिदुत्तमं कालेनैतावतायुष्मन् यदशिक्षत् गुरोर्भवान् २२ प्रह्लाद उवाच श्रवणं कीर्तनं विष्णोः स्मरणं पादसेवनं अर्चनं वंदनं दास्यं सख्यमात्मनिवेदनं २३ इति पुंसार्पिता विष्णौ भक्तिश्चेन्नवलक्षणा क्रियते भगवत्यद्धा तन्मन्येऽधीतमुत्तमं २४ निशम्यैतत्सुतवचो हिरण्यकशिपुस्तदा गुरुपुत्रमुवाचेदं रुषा प्रस्फुरिताधरः २५ ब्रह्मबंधो किमेतत्ते विपक्षं श्रयतासता असारं ग्राहितो बालो मामनादृत्य दुर्मते २६ संति ह्यसाधवो लोके दुर्मैत्राश्छद्मवेषिणः तेषामुदेत्यघं काले रोगः पातकिनामिव २७

यस्याः सा अद्धा अधीते न चेद्भगवति विष्णौ भक्तिः क्रियेत सा च अर्पितैव सती यदि क्रियेत न तु कृता सती पश्चादर्प्यते तदुत्तममधीतं मन्ये न त्वस्माद्गुरोरधीतं शिक्षितं वा तथाविधं किंचिदस्तीति भावः २४ २५ २६ मित्रत्वेन वर्तमाना नस्यापि नव विरोधाचरणं नास्ति भावितमित्याह संति हीति दुष्टं मैत्रं मित्रत्वं येषां ते रोग इति ब्रह्महा क्षयरोगी स्यात्सुरापः श्यावदंतकः स्वर्णहारी तु कुनखी दुश्चर्मा गुरुतल्पग इत्यादिस्मृत्युक्तः पातकिनां रोगो

प्रयोरेतितत्यातयोनासंविद्यादिकमुक्तीसर्वं ३०

राम
१९

मत्प्रणीतं मया पाठितं नो अस्मत्संबंधिना अन्येन कृतं कुत्सितं दोषं मा स्म अदाः अडागम आर्षः मयि दोषारोपं मा कृथा इत्यर्थः इंद्रशत्रो इति न हि ब्राह्मणेषु तव कोपं उचितं इति भावः २८ गुरुमुखी गुरुवाक्यजनिता हेतुः २९ आत्मा नियंता वा तत्र वादः इत्थं नां विषयासक्तानां मंत्रानधिकारादित्याशयेनाह मतिरिति परतः गुरोः स्वतो वा मिथो वा अन्योन्यतः

गुरुपुत्र उवाच न मत्प्रणीतं न परप्रणीतं सुतो वदत्येष तवेंद्रशत्रो नैसर्गिकीयं मतिरस्य राजन्नियच्छ मन्युं कददाः स्म मा नः २८ नारद उवाच गुरुणैवं प्रतिप्रोक्तो भूय आहासुरः सुतं न चेद्गुरुमुखीयं ते कुतोऽभद्रासती मतिः २९ प्रह्लाद उवाच मतिर्न कृष्णे परतः स्वतो वा मिथोऽभिपद्येत गृहव्रतानां अदांतगोभिर्विशतां तमिस्रं पुनः पुनश्चर्वितचर्वणानां ३०

नाभिपद्येत न संपद्यते केषां गृह एव व्रतं संकल्प इति कृत्यचिंता येषां अत एव अदांतैः अनुपरतैः गोभिः इंद्रियैर्हेतुभूतैः तमिस्रं संसारं विशतां तत्र चर्वितस्यैव चर्वणं येषां ३० ओं नमो भगवते वासुदेवा
य०

भा० स० ननु कृष्णस्य परमानंदरूपत्वात्तेपि तन्निष्ठा एव किं न स्युः तदज्ञानादित्याह । नेति ये दुराशया विषयवासितांतःकरणाः
२० ते हि विष्णुं न विदुः तत्र हेतुः स्वस्मिन्नेवार्थः पुरुषार्थो येषां तेषां गतिं गम्यं ननु तेपि गुरूपदेशाद्धि ज्ञास्यंतीति तत्राह ब
हिर्विषयेष्वर्थो येषां ते बहिरर्थास्ता नेव गुरुत्वेन मंतुं शीलं येषां ते अतः अंधैरुपनीयमाना अंधा यथा पंथानं न विदुः
किंतु गर्ते पतंति तथा तेपि ईशस्य तंत्यां दीर्घरज्वां वेदलक्षणायां उरूणि दामानि ब्राह्मणादिनामानि यस्यां तस्यां
काम्यैः कर्मभिर्बद्धा एव भवंतीत्यर्थः तदुक्तं विषयाविष्टचित्तानां विष्ण्वावेशः सुदूरतः वारुणी दिग्गतं वस्तु व्रजन्नैंद्री

न ते विदुः स्वार्थगतिं हि विष्णुं दुराशया ये बहिरर्थमानिनः अंधा यथांधैरुपनीयमाना वाचीशतंत्यामुरुदा
म्नि बद्धाः ३१ नैषां मतिस्तावदुरुक्रमांघ्रिं स्पृशत्यनर्थापगमो यदर्थः महीयसां पादरजोभिषेकं निष्किं
चनानां न वृणीत यावत् ३२ इत्युक्त्वोपरतं पुत्रं हिरण्यकशिपू रुषा अंधीकृतात्मा स्वोत्संगान्नि राम
रस्यत महीतले ३३ २०

किमाप्नुयादिति ३१ ननु स एको देवः सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतांतरात्मेत्यादिश्रुतिप्रतिपादितं
विष्णुं कथं न विदुः कुतो वा तेषां तमिस्रप्रवेशस्तत्राह नैषामिति निःकिंचनानां निरस्तविषयाभिमानानां
महत्तमानां पादरजसां अभिषेकं यावन्न वृणीत तावत् श्रुतिवाक्यतो जातापि एषां मतिरुरुक्रमस्यांघ्रिं न स्पृ
शति न प्राप्नोति असंभावनादिभिर्विहन्यत इत्यर्थः अनर्थस्य संसारस्यापगमो यदर्थः यस्यां घ्रिस्पर्शिन्याः म
तेरर्थः प्रयोजनं यदुक्तं ग्रहाभावान्न तत्त्वनिश्चयो नायी हमोक्षस्तेषामित्यर्थः ३२ निरस्यत निरास्यत् विक्षेप-
३३

अमर्षेसिहनं तेन सहितया रुषा आविष्टो व्याप्तः कषायी भूते आताम्रे लोचने यस्य हे नैर्ऋताः राक्षसाः ३४ वध्यत्वे हे
तुः यतो यं मे भ्रातृहा कुतो यो विष्णोः पादावर्चति तत्पक्षपातीत्यर्थः अतः स एवायमित्यन्वयः ३५ अहो विष्णुरप्य
विश्वसनीयं किमिति स्वीकृतवानित्याह विष्णोर्वेति अहात् जहौ ३६ ननु तवायमपत्यं स कथं वध्यस्तत्राह परोप्यो

आहामर्षरुषाविष्टः कषायीभूतलोचनः वध्यतामाश्वयं वध्यो निःसार्यतां नैर्ऋताः ३४ अयं मे भ्रा
तृहा सोयं हित्वा स्वान्सुहृदोऽधमः पितृव्यहंतुर्यः पादौ विष्णोर्दासवदर्चति ३५ विष्णोर्वा साध्वसौ किं
नु करिष्यत्यसमंजसः सौहृदं दुस्त्यजं पित्रोरहाद्यः पंचहायनः ३६ परोप्यपत्यं हितकृद्यथौषधं स्वदे
ल हजोप्यामयवत्सुतोहितः छिंद्यात्तदंगं यदुतात्मनोहितं शेषं सुखं जीवति यद्विवर्जनात् ३७
सर्वैरुपायैर्हंतव्यः संभोजशयनासनैः सुहृल्लिंगधरः शत्रुर्मुनेर्दुष्टमिवेंद्रियं ३८ नैर्ऋतास्ते समा
दिष्टा भर्त्रा वै शूलपाणयः तिग्मदंष्ट्रकरालास्यास्ताम्रश्मश्रुशिरोरुहाः ३९

वधमिव हितकृज्ज्ञेतत् तदपत्यमेव ज्ञेयं सुतः स्वदेहजोपि अहितश्चेत् आमयवत् आस्तां ममतास्पदस्य कथा अंग
मपि यत् करचरणादि तद्यपात्मनोऽहितं चेत्तच्छिंद्यादेवेत्यर्थः ३७ अतः सर्वैरुपायैर्हंतव्यः संभोजो भोजनं भोज
नादिषु विषादिप्रयोगैरित्यर्थः यथा दुष्टमिंद्रियं मुनेः शत्रुः ३८ तिग्मा तीक्ष्णा दंष्ट्रा दंष्ट्रा येषां करालान्यास्या
नि येषां ते च ते च ताम्राणि श्मश्रूणि शिरोरुहाश्च येषां ३९ ४०

परे ईश्वरे युक्तः समाहितः आत्मा मनो यस्य तस्मिन् तेषां प्रहारा निष्फला जाताः तत्र हेतवः अलणि निर्विकारे अ
निर्देश्ये अविषये भगवति निरतिशयैश्वर्ये अखिलात्मनि शस्त्रादीनामपि नियंतरि एवंभूते परे अपुण्यस्य
निर्देवस्य सात्क्रिया महोद्यमाश्च ४१ अभिचाराः कृत्यादयः अवपातनानि गिरिशृंगादधः पातनानि तैः
अवशाद्दिषु सन्निरोधैश्च ४२ पर्वताक्रमणैः पर्वतानां तदुपरि क्षेपैः बहुवर्षैरभिचाराद्यावृत्तिं दर्शयति तत्

नदंतो भैरवान्नादान् छिंधि भिंधीति वादिनः आसीनं चाहनन् स्थूलैः प्रह्लादं सर्वकर्मसु ४० परे ब्रह्म
ण्यनिर्देश्ये भगवत्यखिलात्मनि युक्तात्मन्यफला आसन्नपुण्यस्येव सत्क्रियाः ४१ प्र
यासे ऽपहते तस्मिन् दैत्येंद्रः परिशंकितः चकार तद्वधोपायान्निर्बंधेन युधिष्ठिर ४२ दिग्गजै
र्दंदशूकेंद्रैरभिचारावपातनैः मायाभिः सन्निरोधैश्च गरदानैरभोजनैः ४३ हिमवाय्वग्निस
लिलैः पर्वताक्रमणैरपि न शशाक यदा हंतुमपापमसुरः सुतं ४४ चिंतां दीर्घतमां प्राप्तस्त
त्कर्तुं नाभ्यपद्यत ४४

हननं कर्तुं नाभ्यपद्यत न प्राप नाशक्नोदित्यर्थः चिंतामेवाह एष इति त्रिभिः मे मया अ साधकं पौरुषं
यथा भवति तथोक्तः असद्भिर्मैरपकारैः अभिचारैर्वा ४४ वासुदेवाय नमः छ।

अविदूरे वर्तमानोपि बालोप्ययं अजडधीः निर्भयचित्तः मे अनार्यमन्यायं शासनं वा न विस्मरति अजीगर्तस्य मध्य
म पुत्रः शुनःशेफो नाम पितृत्यां हरिश्चंद्राय विक्रीतः स यथा तयोरपकारमविस्मरन् तद्विपक्षं विश्वामित्रमाश्रि
त्य गोत्रांतरमापन्नस्तद्वत् यद्वा स्वभावापरित्यागे दृष्टांतः शुनःशेफः पुच्छमिवेति ४६ अप्रमेयः अपरिमे

एष मे बह्वसाध्वक्तो वधोपायाश्च निर्मिताः तैस्तैर्द्रोहैरसद्धर्मैर्मुक्तः स्वेनैव तेजसा ४५ वर्तमानो वि
दूरे वै बालोप्यजडधीरयं न विस्मरति मे नार्यं शुनःशेफ इव प्रभुः ४६ अप्रमेयानुभावोयमकुत
श्चिद्भयोमरः नूनमेतद्विरोधेन मृत्युर्मे भविता न वा ४७ इति तं चिंतया किंचिन्म्लानश्रियमध
धोमुखं शंडामर्कावौशनसौ विविक्त इति होचतुः ४८ जितं त्वयैकेन जगत्त्रयं भ्रुवोर्विजृंभण
त्रस्तसमस्तधिष्ण्यपं न तस्य चिंत्यं तव नाथ चक्ष्महे न वै शिशूनां गुणदोषयोः पदं ४९

योनुभावो यस्य न कुतश्चिद्भयं यस्य न वा भविता अन्यथा मृत्युर्नैव भविष्यतीत्यर्थः ४७ औशनसो शुक्रा
नसः पुत्रौ नीतिज्ञौ विविक्ते एकांते ४८ भ्रुवोर्विजृंभणेनैव त्रस्ता धिष्ण्यपा यस्मिन् तस्य चिंत्यं न चक्ष्महे
न पश्यामः पदमालंबनं नैवास्ति यद्वा शिशूनां वृत्तं गुणदोषयोः पदं विषयो न भवतीत्यर्थः ४९

भा० स० २२ तथापि तु बंधनमस्योचितमित्याहुः इमं त्विति यावद्गुरुरागमिष्यति तावद्बध्वा निधेहि ततः किं अत आहतुः बुद्धि
२२ श्च समीचीना वयसा भवतीति ५० अनुज्ञाय तथेत्यंगीकृत्य ५१ ततश्च तौ प्रह्लादाय धर्मादिकमूचतुः प्रश्रित
श्चासाववनतश्च तस्मै यथावत् त्रिवर्गमनुशिक्षितमपि साधु न मेने तां शिक्षां च कुतः द्वंद्वैः रागद्वेषादिभिर्वि

इमं तु पाशैर्वरुणस्य बध्वा निधेहि भीतो न पलायते यथा बुद्धिश्च पुंसो वयसार्यसेवया यावद्गुरु
र्भार्गव आगमिष्यति ५० तथेति गुरुपुत्रोक्तमनुज्ञायेदमब्रवीत् धर्मो ह्यस्योपदेष्टव्यो राज्ञां
ये गृहमेधिनां ५१ धर्ममर्थं च कामं च नितरां चानुपूर्वशः प्रह्लादायोचतू राजन्प्रश्रयाव
नताय च यथा त्रिवर्गं गुरुभिरात्मने उपशिक्षितं न साधु मेने तच्छिक्षां द्वंद्वारामोपवर्णितां
यदाचार्यः परावृत्तो गृहमेधीयकर्मसु वयस्यैर्बालकैस्तत्र सोपहूतः कृतक्षणैः ५३ अथ तान् ५२
श्लक्ष्णया वाचा प्रत्याहूय महाबुधः उवाच विद्वांस्तन्निष्ठां कृपया प्रहसन्निव ५४ राम २२

षयेष्वारमणं येषां तैरुपवर्णितां ५२ परावृत्तः अन्यत्र गतः उपहूतः संधिः पादपूरणार्थः क्रीडार्थं कृतक्ष
णैः कृतोत्सवैः लब्धावसरैरिति वा ५३ तेषां निष्ठां जन्ममरणादिलक्षणां विद्वान् ५४ कृपया०

द्वंद्वारामाणामीरितैरीहितैश्च न दूषिता धीर्येषां यतो बालाः ५५ तस्मिन्नेव न्यस्तं हृदयमीक्षणं च यैः ५६ सप्तमे पं
चमः ॥ षष्ठे गुरोर्गृहव्यग्रे प्रह्लादो दैत्यबालकान् अनुकंप्य परं तत्त्वं नारदोक्तमुपादिशत् १ निरर्थकक्रि
यालापैरायुर्व्ययमजानतां प्रह्लादः सदयं प्राह धर्मं भागवतं कृती २ कौमार इत्यादिना इहैव मानुषजन्मनि
धर्मानाचरेत् यतोऽर्थदमेतत् तत्र कौमार एव यतः तदप्यध्रुवं न चैवंभूते जन्मांतरे यतः दुर्लभं तत्र धर्मानेवाचरे

ते तु तद्गौरवात्सर्वे त्यक्तक्रीडापरिच्छदाः बाला न दूषितधियो द्वंद्वारामेरितेहितैः ५५ पर्युपासत
राजेंद्र तन्न्यस्तहृदयेक्षणाः तानाह करुणो मैत्रो महाभागवतोऽसुरः ५६ इति श्रीभागवते महापु
राणे सप्तमस्कंधे पंचमोऽध्यायः प्रह्लाद उवाच कौमार आचरेत्प्राज्ञो धर्मान्भागवतानिह
दुर्लभं मानुषं जन्म तदप्यध्रुवमर्थदं १ यथा हि पुरुषस्येह विष्णोः पादोपसर्पणं यदेष सर्वभूतानां
प्रिय आत्मेश्वरः सुहृत् २

त् न स्क स्वार्थप्रयासात् तत्र भागवतानेव न काम्यान् इह भागवतानेव धर्मानाचरेदित्येतदुपपादयति
यथा हीति चतुर्भिः इह पुरुषस्य विष्णोः पादोपसर्पणमेव हि यथा अनुरूपं योग्यमित्यर्थः यद्यस्मात् एष
प्रिय इत्यादि २

भा० स०
२३

भोगोद्यमः कथं त्याज्य इति चेत्तत्राह सुखमिति सर्वत्र पश्वादावपि दैवानुपूर्वाद्दृष्टादेव ३ अतस्तदर्थं प्रयासो न कर्तव्यः यतः प्रयासात् परं केवलं आयुषो व्यय एव यतस्तथा तेन प्रकारेण क्षेमं न प्राप्नोति ४ भयमाश्रितः संसारं प्राप्तः पुरुषरूपं शरीरं यावत् पुष्कलमस्ति न विपद्येत अक्षमं न भवेत् न नश्येदिति वा तावदेव क्षेमा

सुखमैंद्रियकं दैत्या देहयोगेन देहिनां सर्वत्र लभ्यते दैवाद्यथा दुःखमयत्नतः ३ तत्प्रयासो न कर्तव्यो यत आयुर्व्ययः परं न तथा विंदते क्षेमं मुकुंदचरणांबुजं ४ ततो यतेत कुशलः क्षेमाय भयमाश्रितः शरीरं पौरुषं यावन्न विपद्येत पुष्कलं ५ पुंसो वर्षशतं ह्यायुस्तदर्द्धं चाजितात्मनः निष्फलं यदसौ रात्र्यां शेतेंधं प्रापितस्तमः ६ मुग्धस्य बाल्ये कौमारे क्रीडतो याति विंशतिः जरया ग्र- राम
स्तदेहस्य यात्यकल्पस्य विंशतिः ७ २३

य यतेत उक्तं च यावत्स्वस्थमिदं शरीरमरुजं यावज्जरा दूरतो यावच्चेंद्रियशक्तिरप्रतिहता यावत्क्षयो नायुषः आत्मश्रेयसि तावदेव विदुषा कार्यः प्रयत्नो महान् संदीप्ते भवने च कूपखननं प्रत्युद्यमः कीदृशः ५ आयुर्व्ययक्रममाह पुंस इति त्रिभिः यद्यस्मात् शेते ६ विंशतिर्वर्षाणि आयुर्याति ७

दुरापूरेण दुःखैः समंतादापूर्यमाणेन ८ ननु यौवने गृहासक्तोऽपि पश्चाद्विरक्तः सन् क्षेमं यास्यतीत्याशंक्य तदसंभवं दर्शयन् कौमार एवाचरेदित्येतदुपपादयति को गृहेष्विति सप्तभिः ९ यं अर्थं प्रेष्ठैरसुभिः क्रीणाति प्राणहानिमंगीकृत्यापि तस्करादिरर्थं साधयति तस्मिन्नर्थे तृष्णां को नु विसृजेत् १० किं च कथमित्यादि

दुरापूरेण कामेन मोहेन च बलीयसा शेषं गृहेषु सक्तस्य प्रमत्तस्यापयाति हि ८ को गृहेषु पुमान्सक्तमात्मानमजितेंद्रियः स्नेहपाशैर्दृढैर्बद्धमुत्सहेत विमोचितुं ९ को न्वर्थतृष्णां विसृजेत्प्राणेभ्योऽपि य ईप्सितः यं क्रीणात्यसुभिः प्रेष्ठैस्तस्करः सेवको वणिक् १० कथं प्रियाया अनुकंपितायाः संगं रहस्यं रुचिरांश्च मंत्रान् सुहृत्सु च स्नेहसितः शिशूनां कलाक्षराणामनुरक्तचित्तः ११ पुत्रान्स्मरंस्ता दुहितॄर्हृदय्या भ्रातॄन्स्वसॄर्वा पितरौ च दीनौ गृहान्मनोज्ञोरुपरिच्छदांश्च वृत्तीश्च कुल्याः पशुभृत्यवर्गान् १२

प्रियायाः संगादिकं स्मरन् कथं त्यजेदिति तृतीयेनान्वयः मंत्रान् रहितशिक्षालापान् सुहृत्सु च संगं तेषां स्नेहेन सितो बद्धः कलानि मधुराण्यक्षराणि येषां तेषां च संगं तेष्वनुरक्तं चित्तं यस्य ११ ताः श्वशुरगृहे स्थिताः हृदय्याः हृदयंगमाः मनोज्ञा उरवः परिच्छदा येषु तान् वृत्तीर्जीविकाः कुल्याः कुलपरंपरागताः १२

कोशस्कृत् कोशकारी कीटः स यथा गृहं कुर्वन्नात्मनो निर्गमाय द्वारमपि नावच्छोषयति तथा कर्माणीहमा
नः नत्ववितृप्तकामोपि दोषदर्शनेन विरक्तः सन् त्यजेत्तत्राह औपस्थ्यं च जैह्व्यं च जैह्व्यं बहु स्तवंतदेवाधिकं म
न्यमानः अतो दुरंतो मोहो यस्य सः कथं विरज्येत विरक्तः स्यात् १३ दुरंतमोहत्वं दर्शयन्नाह कुटुंबपो

त्यजेत कोशस्कृदिवेहमानः कर्माणि लोभादवितृप्तकामः औपस्थ्यजैह्व्यं बहुमन्यमानः कथं
विरज्येत दुरंतमोहः १३ कुटुंबपोषाय वियन्निजायुर्न बुध्यतेर्थं विहतं प्रमत्तः सर्वत्र तापत्रय
दुःखितात्मा निर्विद्यते न स्वकुटुंबरामः १४ वित्तेषु नित्याभिनिविष्टचेता विद्वांश्च दोषं परवि
त्त हर्तुः प्रेत्येह चाथाप्यजितेंद्रियस्तदशांतकामो हरते कुटुंबी १५

षाय वियत् क्षीयमाणं निजमायुः पुरुषार्थं च विहतं न बुध्यते अत एव तापत्रयेण दुःखितचित्तोपि न
निर्विद्यते दुःखबुद्धिं न करोति यतः स्वकुटुंबे रामो रतिर्यस्य १४ प्रत्युत चौर्यं करोतीत्याह वित्तेष्वि
ति नित्यमभिनिविष्टं चेतो यस्य सः परवित्तहर्तुः प्रेत्य नरकलक्षणं इह च दंडादिरूपं दोषं यद्यपि
विद्वान् अथापि अशांतात्तिलाषः सन् परवित्तं हरत्येव १५

तदेवं को गृहेषु पुमानित्यादिसप्तभिः श्लोकैरुपपादितं गृहादिषु प्रसक्तस्य वैराग्याद्यसंभवमुपसंहरति वि
द्वानपीति स्वलोकाय आत्मपरामर्शाय न कल्पते किं तु विमूढो यथा तथा विद्वानपि तमः अभिनिवेशमेव प्रप
द्यते तत्र हेतुः यः इति स्वीयमिदं पारक्यमिदमिति भिन्नो भावो भावना यस्य सः १६ तस्माद्कौमार एव भागव
तान् धर्मान् आचरेदिति सहेतुकमुपसंहरति यतः कश्चिदपि स्वमात्मानं मोचयितुं न समर्थः ततः नाराय

विद्वानपीत्थं दनुजाः कुटुंबं पुष्णन् स्वलोकाय न कल्पते वै यः स्वीयपारक्यविभिन्नभावस्तमः प्रपद्येत
यथा विमूढः १६ यतो न कश्चित्क्व च कुत्रचिद्वा दीनः स्वमात्मानमलं समर्थः विमोचितुं कामदृ
शां विहारक्रीडामृगो यन्निगडो विसर्गः १७ ततो विदूरात्परिहृत्य दैत्या दैत्येषु संगं विषयात्मके
षु उपेत नारायणमादिदेवं समुक्तसंगैरिषितोपवर्गः १८

णमुपेत शरणं यातेत्युत्तरेणान्वयः असामर्थ्ये हेतुः अलं दीनो लंपटः अतः कामोद्दृशिया सां तासां विहा
रक्रीडायां निमित्ते क्रीडामृगः विहारमिति पृथक् पाठे तासां विहारसाधनमात्मानं यतस्तासां क्रीडामृगः स इत्य
न्वयः किं च यत्र यास्कः निगडः शृंखला तुल्यो विसर्गः पुत्रादि तुल्यो भवति १७ विदूरात् दूरतः संगं परिहृत्य य
द्वा अविदूरात् शीघ्रं नारायणमुपेतेत्यन्वयः यस्मात्स एवापवर्गः इषितः इष्टः १८

भा० स० बालानामस्माकं तद्भजनमशक्यमिति चेत्तत्राह नहीति बह्वायासः अतिप्रयासः १९ आत्मत्वात्सर्वत्रसि
२५ द्धत्वादिति च हेतुद्वयमुपपादयति परावरेष्विति चतुर्भिः ब्रह्मा अंतो येषां स्थावर आदिर्येषां तेषु जीवेषु भौति
केषु अजीवेषु घटादिषु महत्सु च भूतेषु आकाशादिषु २० गुणसाम्ये प्रधाने गुणव्यतिकरे महत्तत्त्वादौ च

नह्यच्युतं प्रीणयतो बह्वायासोऽसुरात्मजाः आत्मत्वात्सर्वभूतानां सिद्धत्वादिह सर्वतः १९ परावरे
षु भूतेषु ब्रह्मांतस्थावरादिषु भौतिकेषु विकारेषु भूतेष्वथ महत्सु च २० गुणेषु गुणसाम्ये
च गुणव्यतिकरे तथा एक एव परो ह्यात्मा भगवानीश्वरोऽव्ययः २१ प्रत्यगात्मास्वरूपेण दृ
श्यरूपेण च स्वयं व्याप्यव्यापकनिर्देश्यो ह्यनिर्देश्योऽविकल्पितः २२ राम २५

परः ब्रह्मस्वरूपः २१ कथं तर्हि द्रष्टृदृश्यभोक्तृभोग्यादिभेदः मायये त्याह प्रत्यगात्मा तत्तद्द्रष्टा भोक्ता त
त्स्वरूपेण व्यापकतया निर्देश्यः दृश्यं भोग्यं देहादि तद्रूपेण च व्याप्यतया निर्देश्यो मायया ईयत इत्युत्तरे
णान्वयः वस्तुतस्तु स्वयं अविकल्पितोऽनिर्देश्योपि सन् यद्वा अनिर्देश्योपि एवं निर्देश्यः सन् विक
ल्पित ईयते इत्यन्वयः २२

यतः केवलोनुभवः आनंद एव स्वरूपं यस्य ननु स एव चेत्सर्वत्र तर्हि सर्वत्र सर्वज्ञत्वाद्यनुपलभ्येत तत्राह
गुणात्मकः सर्गो यस्याः सा गुणसर्गा तया मायया अंतर्हितमैश्वर्यं येन सः २३ यस्मादेवं तस्मात्सर्वेषु यथो
चितं दयां सौहृदं च कुरुत यया दयया आसुरं भावं संत्यज्य २४ ततः किमत आह तुष्टे च तत्र तस्मिन् किमलभ्यं त

केवलानुभवानंदस्वरूपः परमेश्वरः मायया अंतर्हितैश्वर्य ईयते गुणसर्गया २३ तस्मात्सर्वेषु भूते
षु दयां कुरुत सौहृदं आसुरं भावमुन्मुच्य यया तुष्यत्यधोक्षजः २४ तुष्टे च तत्र किमलभ्यमनंत आ
द्ये किं तैर्गुणव्यतिकरादिह ये स्वसिद्धाः धर्मादयः किमगुणेन च कांक्षितेन सारं जुषां चरणयोरुपगाय
तां नः २५

थापि गुणपरिणामाद्दैवाद्वा स्वतःसिद्धा अयत्नतः सिद्धा ये धर्मादयः तैः किं अगुणेन च मोक्षेण कांक्षितेन किं
तमुपगायतां नोऽस्माकं अकांक्षितस्यापि तस्य सिद्धेः यद्वा मा भून्मोक्षः तस्य चरणयोः सारं जुषां सुधां सेव
मानानां तेनापि किमित्यर्थः २५

भा० स० २६ ननु च धर्मादेरपुरुषार्थत्वे किमित्याचार्याभ्यां वेदोक्तत्वेन सत्य एवाभिहितः तत्राह धर्मोर्थः कामश्चेति यस्त्रि
वर्गः तदर्थं च या ईक्षाद्या अभिहिताः ईक्षा आत्मविद्या त्रयी कर्मविद्या नयः दमो तर्को दंडनीतिश्च विविधा च वा
र्त्ताजीविका तदेतत्सर्वं निगमस्यार्थजातं स्वसुहृदः स्वांतर्यामिणः परमस्य पुंसः स्वात्मार्पणसाधनं चेत्तर्हि स
त्यं मन्ये सत्यपरत्वात् अन्यथा तदसत्यमेव यद्वा तदेतदखिलं निगमस्य त्रैगुण्यविषयस्य प्रतिपाद्यं मन्ये सत्यं

धर्मार्थकाम इति योभिहितस्त्रिवर्ग ईक्षा त्रयी नयदमौ विविधा च वार्त्ता मन्ये तदेतदखिलं निगम
स्य सत्यं स्वात्मार्पणं स्वसुहृदः परमस्य पुंसः २६ ज्ञानं तदेतदमलं दुरवापमाह नारायणो नरसखः कि
लनारदाय एकांतिनां भगवतस्तदकिंचनानां पादारविंदरजसाप्लुतदेहिनां स्यात् २७ राम २६

पुनस्त्रैगुण्यलक्षणं परमस्य पुंसः स्वात्मार्पणमेवेत्यर्थः तदुक्तं भगवता त्रैगुण्यविषया वेदा निस्त्रैगुण्यो
भवार्जुनेति २६ तेषां विश्वासार्थं गुरुसंप्रदायमाह ज्ञानमिति यत्र नारदः श्रोता तत्र कुतो मादृशानामधि
कार इति माशंकीत्याह भगवत एकांतभक्तानां यत्पादरजः तेन आप्लुतानां स्नातानां देहिनां सर्वेषामपि तत्
ज्ञानं स्यात् न तूत्तमानामेवेति नियमः २७

अत एव मयापि नारदाच्छ्रुतं विज्ञानसंयुतं अनुभवपर्यंतं धर्मं च श्रुतं २८ तत्रातिविस्मिताः पृच्छंति प्रह्लादेति एताभ्या
मृते अन्यं गुरुं न विद्मः एतदागमनात् पूर्वमेवाहं नारदपार्श्वं गत इति चेत् तत्राहुः बालानामपि अतिशिशूनामस्माकमेता
वीश्वरौ नियंतारौ अतस्तत्र अन्यत्र गमनं न संभवति २९ स एवात्रागत इत्यपि न संभवतीत्याहुः बालस्येति दुरन्वयः
दुर्घटः विश्रंभकारणं विश्वासहेतुः ३० सप्तमे षष्ठः सप्तमे मातृगर्भस्थे स्वस्मिन्नारदभाषितं प्रह्लादो वर्णयामा

श्रुतमेतन्मया पूर्वं ज्ञानं विज्ञानसंयुतं धर्मं भागवतं शुद्धं नारदाद्देवदर्शनात् २८ दैत्यपुत्रा ऊचुः प्रह्लाद
त्वं वयं चापि नर्त्तेन्यं विद्महे गुरुं एताभ्यां गुरुपुत्राभ्यां बालानामपि हीश्वरौ २९ बालस्यांतःपुरस्थस्य
महत्संगो दुरन्वयः छिंधि नः संशयं सौम्य स्याच्चेद्विश्रंभकारणं ३० इति श्रीभागवते महापुरा
णे सप्तमस्कंधे प्रह्लादानुचरिते षष्ठोध्यायः नारद उवाच एवं दैत्यसुतैः पृष्टो महाभागवतोसु
रः उवाच स्मयमानस्तान्स्मरन्मदनुभाषितं १ प्रह्लाद उवाच पितरि प्रस्थितेस्माकं तपसे मंद
राचलं युद्धोद्यमं परं चक्रुर्विबुधा दानवान्प्रति २

स शिष्यप्रत्ययसिद्धये १ अश्रावि नारदादेतन्मया गर्भ इतीरितं तत्प्रस्तावकथामाह पद्यैः षोडशभिः
सुधीः २ अस्माकं पितरि हिरण्यकशिपौ ३

ॐ नमो भगवते वासुदेवाय

भा०स० २७ स्वकृतेनैवपापेनपापोसौअभक्षिभक्षितइतिवदंतोयह्योद्यमंचक्रुः ४ ५ राज्ञःशिबिरंआवासंव्यलुंपन्सर्व
स्वापहारेणनाशितवंतः ६ ७ अनागसंनिरपराधामेनांनेतुंमार्हसीतिप्राह आविषह्यंदुःसहं अतःअन
याप्रसवपर्यंतमत्रास्यतांततश्चअर्थस्यपदवीमार्गंगतःसन्जातंपुत्रंहत्वामोक्ष्यामीत्यर्थः ९ साक्षात्स्वगुणे प्राप्तः ३

पिपीलिकैरहिरिवदिष्ट्यालोकोपतापनः पापेनपापोभक्षीतिवादिनोवासवादयः ३ तेषामपिबलो
द्योगंनिशाम्यासुरयूथपाः वध्यमानाःसुरैर्भीताःदुद्रुवुःसर्वतोदिशं ४ कलत्रपुत्रमित्राप्तान्
गृहान्पशुपरिच्छदान् नावेक्ष्यमाणास्त्वरिताःसर्वप्राणपरीप्सवः ५ व्यलुंपन्राजशिबि
रममराजयकांक्षिणः इंद्रस्तुराजमहिषींमातरंममचाग्रहीत् ६ नीयमानांभयोद्विग्नांरुदतींकु राम २७
ररीमिव यदृच्छयागतस्तत्रदेवर्षिर्ददृशेपथि ७ प्राहैनांसुरपतेनेतुमर्हस्यनागसं मुंचमुं
चमहाभागसतींपरपरिग्रहं ८ इंद्रउवाच आस्तेस्याजठरेवीर्यमविषह्यंसुरद्विषः आस्यतांयाव
त्प्रसवंमोक्ष्येर्थपदवींगतः ९ नारदउवाच अयंनिःकिल्बिषःसाक्षात्महाभागवतोमहान्
त्वयानप्राप्स्यतेसंस्थामनंतानुचरोबली १०

एवमहान् ननुपित्रादिसंबंधात् त्वयाहेतुभूतेनस्वंस्वांमृत्युंनयास्यति तत्रहेतवोनिःकिल्बिषइ
त्यादयः १०

अनंतस्यप्रियोयोहंसवाप्रियोयस्यतस्यममभक्त्याएतांप्रदक्षिणीकृत्य ११ इहोष्यतामित्याहेतिशेषः १२
आंतिसमीपे १३ अंतर्वत्नीगर्भिणी इच्छयाभर्तुरागमनानंतरंप्रसूतये एवमपिस्वगर्भस्यक्षेमाय १४ तस्याः
शोकशांत्यैधर्मस्यतत्वंभक्तिलक्षणंज्ञानमात्मानात्मविवेकः तदुभयंप्रादात् ईश्वरःसमर्थः १५ १६ भूया

इत्युक्तस्तांविहायेंद्रोदेवर्षेर्मानयन्वचः अनंतप्रियभक्त्यैनांपरिक्रम्यदिवंययौ ११ ततोनोमातर
मृषिःसमानीयनिजाश्रमं आश्वास्येहोष्यतांवत्सेयावत्तेभर्तुरागमः १२ तथेत्यवात्सीद्देवर्षेरंति
साप्यकुतोभया यावद्दैत्यपतिर्घोरात्तपसोनन्यवर्तत १३ ऋषिंपर्यचरत्तत्रभक्त्यापरमयासती
अंतर्वत्नीस्वगर्भस्यक्षेमायेच्छाप्रसूतये १४ ऋषिःकारुणिकस्तस्याःप्रादादुभयमीश्वरः धर्मस्य
तत्वंज्ञानंचमामप्युद्दिश्यनिर्मलं १५ ननुकालस्यदीर्घत्वात्स्त्रीत्वान्मातुस्तिरोदधे ऋषिणानुगृ
हीतंमांनाधुनाप्यजहात्स्मृतिः १६ भवतामपिभूयान्मेयदिश्रद्दधतेवचः वैशारदीधीःश्रद्धातःस्त्री
बालानांचमेयथा १७

त्भवेत् वैशारदीस्वार्थेतद्धितः देहाद्यहंकारच्छेदनिपुणेत्यर्थः १७ श्रींनमोभगवतेवासुदेवा

कासौ वैशारदी धीरित्यपेक्षायां नारदोक्तमेव देहात्मविवेकप्रकारमाह जन्मेति द्वाभ्यां। जन्माद्याः जायते ऽस्ति वर्द्धते विपरिणमते अपक्षीयते नश्यतीत्येवंभूता इमे षड्भावा विकारा वृक्षस्येव यथा फलानां दृश्यंते तद्वदात्मनि तथैवस्थिते देहस्य द्रष्टा इत्यर्थः ईश्वरी विकारसमर्था मूर्त्तिर्यस्य तेन १८ तदेवं देहधर्मैस्तैर्द्वलक्षण्येनात्मनो देहाद्भेदो दर्शितः इदानीमात्मधर्मैरेव तद्भेदं स्फुटयंस्तदहंकारादिकं त्याजयति आत्मा नित्यः अविनाशी द्वा

जन्माद्याः षडिमे भावाः दृष्टा देहस्य नात्मनः फलानामिव वृक्षस्य कालेनेश्वरमूर्त्तिना १८ आत्मा नित्योऽव्ययः शुद्ध एकः क्षेत्रज्ञ आश्रयः अविक्रियः स्वदृग्घेतुर्व्यापकोऽसंग्यनावृतः १९

वा अरे यमात्मेति श्रुतेः अव्ययः अपक्षयशून्यः ऋचो अक्षरे परमे व्योमन्निति श्रुतेः शुद्धः निरवद्यं निरंजनमिति श्रुतेः एकः एकमेवाद्वितीयमिति श्रुतेः क्षेत्रज्ञः विज्ञातारमरे केन विजानीयादिति श्रुतेः आश्रयः यस्मिन्द्यौः पृथिवी चांतरिक्षमिति श्रुतेः अविक्रियः निष्कलं निष्क्रियं शांतमिति श्रुतेः स्वदृक् आत्मज्योतिः सम्राडिति होवाचेति श्रुतेः हेतुः स इमांल्लोकान्सृजत इति श्रुतेः व्यापकः सत्यं ज्ञानमनंतमिति श्रुतेः असंगी असंगो ह्ययं पुरुष इति श्रुतेः अनावृतः पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यत इति श्रुतेः १९

परैः श्रेष्ठैः विवेकसमर्थैः देहादिभेदं विद्वान् असद्भावं मिथ्याबुद्धिं त्यजेत् २० नन्वेवं विविक्तात्मज्ञानिनोऽप्यपरोक्षानुभवेन ब्रह्मताप्राप्तिः कथं स्यात् यतो ऽहंकारादित्यजेदित्यपेक्षायां तत्प्राप्तिप्रकारं सदृष्टांतमाह स्वर्णाकरक्षेत्रेषु स्फुरत्स्वर्णकणेषु ग्रावसु योगैः धमनाद्युपायैस्तदुपायाभिज्ञो हेमकारो यथा स्वर्णं प्राप्नुयात् आत्मयोगैः आत्मप्राप्त्युपायैः ब्रह्मगतिं ब्रह्मतां अध्यात्मवित् आत्माधिकृतकार्यकारणसंघात

एतैर्द्वादशभिर्विद्वानात्मनो लक्षणैः परैः अहं ममेत्यसद्भावं देहादौ मोहजं त्यजेत् २० नन्वेवं स्वर्णं यथा ग्रावसु हेमकारः क्षेत्रेषु योगैस्तदभिज्ञ आप्नुयात् क्षेत्रेषु देहेषु तथात्मयोगैरध्यात्मविद् ब्रह्मगतिं लभेत २१ अष्टौ प्रकृतयः प्रोक्तास्त्रय एव हि तद्गुणाः विकाराः षोडशाचार्यैः पुमानेकः समन्वयात् २२

ज्ञाता २१ अध्यात्मविवेकमात्मप्राप्त्युपायमाह अष्टाविति त्रिभिः मूलप्रकृतिः महदहंकारो पंचतन्मात्राणि चेत्यष्टौ त्रयः सत्वादयः ते च प्रकृतिगुणा एव न तु भिन्नाः एकादशेंद्रियाणि पंचमहाभूतानि चेति षोडश पुमानात्मा एकः प्रोक्तः कपिलादिभिराचार्यैः एकत्वे हेतुः एषु साक्षित्वेनान्वयात् तदुक्तं मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृतयः सप्त षोडशकस्तु विकारो न प्रकृतिर्न विकृतिः पुरुष इति २२

ना॰ स॰ २९ जगत्जंगमं तस्थुः स्थावरं अत्रैव सर्वसंघात्मके देह एव मृग्यः अन्वेष्टव्यः सकःशक्यं चैतदित्याह नेति नेती
त्यन्यापोहे क्रियमाणे स्वयमेव अतत्त्यजन् अनात्मवर्गात्पृथगुपलभ्यमान इत्यर्थः २३ मणिषु सूत्र
मिव सर्वत्रानुस्यूतत्वेनान्वयः अत एव मणिभ्यः सूत्रस्येवैकैकव्यतिरेकश्च तयोर्द्वैक्यं ते नयोर्विवे
कः पूर्वोक्तो वा तेन उशता शुद्धेनात्मना मनसा सर्गस्थानसमाम्नाये सृष्टिस्थितिसंहारे यतो वा इमा

देहस्थ सर्वसंघातो जगत्तस्थुरिति द्विधा अत्रैव मृग्यः पुरुषो नेति नेतीत्यतत्त्यजन् २३ अन्व
यव्यतिरेकेण विवेकेनोशतात्मना सर्गस्थानसमाम्नायैर्विमृशद्भिरसत्वरैः २४ बुद्धेर्जाग
रणं स्वप्नः सुषुप्तिरिति वृत्तयः ता येनैवानुभूयंते सोध्यक्षः पुरुषः परः २५ राम २९

नि भूतानि जायंते येन जातानि जीवंति यत्प्रयंत्यभिसंविशंतीत्यादि श्रुत्युक्त सर्गाद्यनुसंधानेनेत्य
र्थः विमृशद्भिः विचारयद्भिः असत्वरैः अव्यग्रैः मृग्य इति पूर्वेणान्वयः २४ विमर्शप्रकारमाह
बुद्धेरिति द्वाभ्यां अध्यक्षः साक्षी २५

१ अतः एभिः बुद्धेर्वृत्तैः परिणामैः पर्यस्तैः परितः क्षिप्तैः आत्मधर्मत्वेन निरस्तैः बुद्धिधर्मत्वे हेतुः त्रिवर्णैस्त्रिगुणा
त्मकैः क्रियोद्भवैः कर्मजन्यैः बुद्धेरेव त्रिगुणात्मकत्वात्कर्मकर्तृत्वाच्च तस्या एवैता अवस्थाः आत्मा तु बुद्ध्यन्वयात्
तदवस्थावानिव भाति न तत्त्वतः इत्यात्मनः स्वरूपं बुध्येत जानीयादित्यर्थः अत्र दृष्टांतः कुसुमधर्मैर्गंधैस्तदाश्र
यथा यं वायुमिव २६ ननु तर्हि कुसुमोपाधिकोपि वायोर्गंधो विवेकज्ञाने न निवर्तते एवमात्मनः संसारो न निवर्तते

एभिस्त्रिवर्णैः पर्यस्तैर्बुद्धिभेदैः क्रियोद्भवैः स्वरूपमात्मनो बुध्येद्गंधैर्वायुमिवान्वयात् २६ एतद्द्वा
रो हि संसारो गुणकर्मनिबंधनः अज्ञानमूलोपार्थोपि पुंसः स्वप्न इवेष्यते २७ तस्माद्भवद्भिः कर्तव्यं
कर्मणां त्रिगुणात्मनां बीजनिर्हरणं योगः प्रवाहोपरमो धियः २८

त्याशंक्याह एतदिति द्वारः बुद्धिद्वारकस्तदवस्थाद्वारको वा न स्वतः हि यस्मात् बुद्धेर्ये गुणाः कर्माणि च तैर्निब
ध्यत इति तथा स चाज्ञानमूलः अतोपार्थो मिथ्याभूतोपि स्वप्न इवेष्यते वायोस्तु गंधवद्द्रव्यसंबंधस्य वा
स्तवत्वाद्विषमो दृष्टांतः २७ यस्मादेवं निवृत्तिर्घटते तस्माद्बीजमज्ञानं तस्य निर्हरणं दहनं किं तत् योगः
कथंभूतः धियः प्रवाहं जाग्रदादिरूपमुपरमयतीति तथा २८

भा० स० ३० तदेवं शास्त्रप्रकारमुक्त्वा तत्साधनं धर्मस्यतत्वं नारदोक्तमेवाह तत्रेति पंचभिः येर्हं मैर्यथानुष्ठितेर्वा रतिः इति यत्
अयमुपायो भगवतोक्तः तथा हि गीतासु यत्करोषि यदश्नासि यज्जुहोषि ददासि यत् यत्तपस्यसि कौंतेय तत्
कुरुष्व मदर्पणमिति भक्त्या मामभिजानाति यावान्यश्चास्मि तत्वतइत्यादि २८ तत्रैवांतरंगान्धर्मानाह

तत्रोपायसहस्राणामयं भगवतोदितः यदीश्वरे भगवति यथा यैरंजसा रतिः २९ गुरुशुश्रूषया भक्त्या स
र्वलब्धार्पणेन च संगेन साधुभक्तानामीश्वराराधनेन च ३० श्रद्धया तत्कथायां च कीर्तनैर्गुणकर्म
णां तत्पादांबुरुहध्यानात्तल्लिंगेक्षार्हणादिभिः ३१ हरिः सर्वेषु भूतेषु भगवानास्त ईश्वरः इति भूता
नि मनसा कामैस्तैः साधु मानयेत् ३२ एवं निर्जितषड्वर्गैः क्रियते भक्तिरीश्वरे वासुदेवे भगवति य
यासंलभते रतिं ३३ निशम्य कर्माणि गुणानतुल्यान्वीर्याणि लीलातनुभिः कृतानि यदातिहर्षो राम ३०
त्पुलकाश्रुगद्गदं प्रोत्कंठ उद्गायति रौति नृत्यति ३४
गुरोः शुश्रूषया भक्त्या प्रेम्णा सर्वेषां लब्धानामर्पणेन च ३० तस्य लिंगानां मूर्तीनामीक्षणमर्हणं वा दिर्ये
मोहमद षां वंदनादीनां तैश्च ३१ ३२ निर्जितः षड्वर्गः कामक्रोधलोभमोहमदमत्सराणामिंद्रियाणां वा वर्गो यैः ३३ भगवद्भक्ते
र्लिंगान्याह निशम्येति त्रिभिः गुणान्भक्तवात्सल्यादीन् अतिहर्षेण उद्गतो पुलकाश्रूणि वैतैर्गद्गदं य
था भवत्येवं प्रोत्कंठ उद्गायति ३४ ३५

५ यदा ग्रहग्रस्त इव क्वचिद्धसत्याक्रंदते ध्यायति वंदते जनं मुहुः श्वसन्वक्ति हरे जगत्पते नारायणेत्यात्ममतिर्गतत्रपः ३५
तस्य भावश्चेष्टादिः तस्य भावो भावना तेनानुकृते आशयाकृती मनःशरीरे यस्य निर्दग्धं बीजमज्ञानमनु
शयो वासना च यस्य सः सम्यगेति प्राप्नोति ३६ ततः किमत आह अधोक्षजस्यालंभं मनसा स्पर्शं याठांत
रे तस्याश्रयणं अशुभः रागादियुक्तः आत्मा मनो यस्य संसृति चक्रशातनं तन्निवर्तकं बुधा विदुः तदेव
ब्रह्मनिर्वाणं लयो मोक्षः तदात्मकं सुखं विदुः हृदीश्वरमंतर्यामिणं ३७ भक्तिरशक्येति च न मंतव्यमित्या
५ तदा पुमान्मुक्तसमस्तबंधनस्तद्भावभावानुकृताशयाकृतिः निर्दग्धबीजानुशयो महीयसा भक्तिप्रयो
गेण समेत्यधोक्षजं ३६ अधोक्षजालंभमिहाशुभात्मनः शरीरिणः संसृतिचक्रशातनं तद्ब्रह्म
निर्वाणसुखं विदुर्बुधास्ततो भजध्वं हृदये हृदीश्वरं ३७ कोतिप्रयासो सुरबालका हरेरुपासने स्वे
हृदि छिद्रवत्सतः स्वस्यात्मनः सख्युरशेषदेहिनां सामान्यतः किं विषयोपपादनैः ३८
ह क इति छिद्रवत् आकाशवत् विषयाणामुपपादनैरर्जनैः किं तत्र हेतुः सर्वदेहिनां सामान्यतः विषयनिष्ठत्वे
शूकरादिसाधारण्यापत्तेरित्यर्थः न चैवमादौ योन रुक्त्यं दोषः नारदोक्तानुवादरूपत्वादस्य प्रकरणस्य
३८

भा० स०
३१

अनर्थकं विषयार्जनमित्याह रायः अर्थाः क्षणभंगुरमायुर्यस्य तदुक्तमिति हासेषु धनं हि पुरुषो लोके पुरुषं धन
मेव वा अवश्यमेकं त्यजति तस्मात्किं धनतृष्णयेति ३९ यच्च दुःखेन संभिन्नं न च ग्रस्तमनंतरं अभिलाषो
पपन्नं च सुखं स्वर्गपदास्पदमित्येवंभूताः स्वर्गादिभोगाः अपि न सेवार्हाः इत्याह एवं हीति क्षयिष्णुत्वे हेतुः क्र
तुभिः कृता इति तद्यथेह कर्मजितो लोकः क्षीयते एवमेवामुत्र पुण्यजितो लोकः क्षीयत इति श्रुतेः अत एव पुण्यता

रायः कलत्रं पशवः सुतादयो गृहा मही कुंजरकोशभूतयः सर्वेऽर्थकामाः क्षणभंगुरायुषः कुर्वंति म
र्त्यस्य कियत्प्रियं चलाः ३९ एवं हि लोकाः क्रतुभिः कृता अमी क्षयिष्णवः सातिशया न निर्मलाः
तस्माददृष्टश्रुतदूषणं परं भक्त्यैकयेशं भजतात्मलब्धये ४० यदर्थ इह कर्माणि विद्वन्मान्यसकृन्न
रः करोत्यतो विपर्यासममोघं विंदते फलं ४१ सुखाय दुःखमोक्षाय संकल्प इह कर्मिणः सदाप्नो
तीहया दुःखमनीहायाः सुखावृतः ४२ राम ३१

रतम्येन सातिशयाः वैनेनिर्मलाः स्पर्द्धादिमत्वात् न विद्यते दृष्टं श्रुतं च दूषणं यस्मिन् ४० किंच यदर्थं
यत्संकल्प्य अतः संकल्पितात् विपर्यासं विपरीतं फलं अमोघमवश्यं प्राप्नोति ४१ तदेव दर्शयति सु
खायेति ईहया इच्छया क्रियया वा यः पूर्वमनीहायाहेतोः सुखेनावृतो व्याप्त आसीत् स ईहया दुःखमाप्नोत्ये
व ४२

किंच कामान् भोगान् काम्यैर्विषयैः कर्मभिर्वा पारक्यः श्वादिभोग्यः न त्वात्मीयः भंगुरश्च ४३ किमु देहात्
व्यवहिताः अपत्यादयो ममताविषयाः पारक्या इति वक्तव्यं ४४ किंच स्वयं पुरुषार्थरूपस्य किमेतैरि
त्याह किमेतैरिति ४५ भोगावसराभावाच्चैतैः क उपयोग इत्याह निरूप्यतामिति प्राचीनैः कर्मभिः

कामान् कामयते काम्यैर्यदर्थमिह पूरुषः स वै देहस्तु पारक्यो भंगुरो यात्युपैति च ४३ किमुव्य
वहितापत्यदारागारधनादयः राज्यं कोशगजामात्यभृत्याप्ता ममतास्पदाः ४४ किमेतैरात्म
नस्तुच्छैः सह देहेन नश्वरैः अनर्थैरर्थसंकाशैर्नित्यानंदमहोदधेः ४५ निरूप्यतामिह स्वार्थः
कियान् देहभृतोऽसुराः निषेकादिष्ववस्थासु क्लिश्यमानस्य कर्मभिः ४६ कर्माण्यारभते देही
देहेनात्मानुवर्तिना कर्मभिस्तनुते देहमुभयं त्वविवेकतः ४७ तस्मादर्थाश्च कामाश्च धर्मा
श्च यदपाश्रयाः भजतानीहयात्मानमनीहं हरिमीश्वरं ४८

कियानर्थ इति अन्वयः ४६ ननु कर्मसु समाप्तेषु भोगावसरः स्यात् तत्राह कर्माणीति न चैवं कर्मत
त्फलं देहादिकं च परमार्थ इत्याह उभयं कर्म च देहं च अविवेकतः अज्ञानेनैव तनुते ४७ यदपाश्रयाः
यदधीनाः ४८

भा०स० ३२

भूतानांप्राणिनांजीवसंज्ञितः अंतर्यामी ४९ अध्यायद्वयोक्तमुपसंहरति एतावानिति तदीक्षणंगोविंदद ×३
असुराणामस्माकमत्रनाधिकार इत्यपि नवाच्यमित्याह देवइति पंचभिः ५० ५१ अमलयानिष्काम
या विडंबनं नटनमात्रं ५२ ५३ अच्युततां आत्मतत्वं ५४ आत्मसम्माननं ५५ इतिसप्तमेसप्तमः

सर्वेषामपिभूतानांहरिरात्मेश्वरःप्रियः भूतैर्महद्भिःस्वकृतैःकृतानांजीवसंज्ञितः ४९ देवो
ऽसुरो मनुष्योवायक्षोगंधर्वएवच भजन्मुकुंदचरणंस्वस्तिमान्स्याद्यथावयं ५० नालंद्वि
जत्वंदेवत्वमृषित्वंवासुरात्मजाः प्रीणनायमुकुंदस्य नवृत्तंनबहुज्ञता ५१ नदानंनतपोने
ज्यानशौचंनव्रतानिच प्रीयतेऽमलयाभक्त्याहरिरन्यद्विडंबनं ५२ ततोहरौभगवति भक्तिं
कुरुतदानवाः आत्मौपम्येनसर्वत्रसर्वभूतात्मनीश्वरे ५३ दैतेयायक्षरक्षांसिस्त्रियःशूद्रा
व्रजौकसः खगामृगाःपापजीवाःसंतिह्यच्युततांगताः ५४ एतावानेवलोकेऽस्मिन्पुंसः
स्वार्थःपरःस्मृतः एकांतभक्तिर्गोविंदेयत्सर्वत्रतदीक्षणं ५५ इतिश्रीभागवतेमहापुराणे
सप्तमस्कंधेसप्तमोऽध्यायः

अष्टमेतिरश्चास्तंभंनिघ्नन्दैत्योहतःस्वयं आविर्भूयनृसिंहेनसचब्रह्मादिभिःस्तुतः १

राम ३२

अंतःकृपासुधापूर्णोबहिःक्रोधोन्नकेसरी दैत्येंद्रमरिभावेनभजंतंस्वमघातयत् २ एकांतसंस्थि
तांप्रत्यग्दृष्टांयथायथावत् १ सचहंतुंमनोदधे कथंभूतः कोपस्यावेशोनोद्रेकेणचलन्गात्रंवपुर्यस्यसः
३ क्षिप्त्वातिरस्कृत्यपापेनसरोषेणतिरश्चीनेनचक्षुषा ४ ५ मंदात्मन् अत्यबुद्धे मदाज्ञातिलंघिनं

नारदउवाच अथदैत्यसुताःसर्वेश्रुत्वातदनुवर्णितं जगृहुर्निरवद्यत्वान्नैवगुर्वनुशिक्षि
तं १ अथाचार्यसुतस्तेषांबुद्धिमेकांतसंस्थितां आलक्ष्यभीतस्त्वरितोराज्ञआवेदयद्यथा
२ श्रुत्वातदप्रियंदैत्योदुःसहंतनयानयं कोपावेशचलद्गात्रःपुत्रंहंतुंमनोदधे ३ क्षिप्त्वा
परुषयावाचाप्रह्रादमतदर्हणं आहेक्षमाणःपापेनतिरश्चीनेनचक्षुषा ४ प्रश्रयावनतंदां
तंबद्धांजलिमवस्थितं सर्पःपदाहतइवश्वसन्प्रकृतिदारुणः ५ हेदुर्विनीतमंदात्मन्कुलभे
दकराधम स्तब्धंमच्छासनोद्वृत्तंनेष्येत्वाद्ययमक्षयं ६ क्रुद्धस्ययस्यकंपंतेत्रयोलोकाःसहे
श्वराः तस्यमेऽभीतवन्मूढशासनंकिंबलोऽत्यगाः ७

त्वामद्ययमालयंनेष्यामि ६ अभीतवत् किंबलं यस्यसकिंबलः ७ ८ वासुदेवायनमः कू

भा० स० बलान्प्रणीता इत्यत्र हेतुः स ईश्वर इति उरवः क्रमाः पादविक्षेपा यस्य बहुपराक्रम इति वा ओज आदि रूपः सत्वं
३३ धैर्यं बुद्धिर्वा ९ मद्बन्धुरसौ कथं ममापि स एव बलं स्यादत आह जहीति आत्मनः स्वस्य भावं त्यज यतः अ
जितादात्मनो मनसः ऋते विना अन्ये विद्विषो न संति किंच तद्धि हितं देवहि साम्येन मनसो धारणमेव

प्रह्लाद उवाच न केवलं मे भवतश्च राजन् स वै बलं बलिनां चापरेषां परेऽवरेऽमी स्थिरजंगमा ये
ब्रह्मादयो येन वशं प्रणीताः ८ स ईश्वरः काल उरुक्रमोऽसावोजः सहः सत्वबलेंद्रियात्मा स
एव विश्वं परमः स्वशक्तिभिः सृजत्यवत्यत्ति गुणत्रयेशः ९ जह्यासुरं भावमिमं त्वमात्मनः स
मं मनो धत्स्व न संति विद्विषः ऋतेऽजितादात्मन उत्पथस्थितात् तद्धि ह्यनंतस्य महत्समर्हणं १०
दस्यून् पुरा षण्न विजित्य लुंपतो मन्यंत एके स्वजिता दिशो दश जितात्मनो ज्ञस्य समस्य देहि राम
नां साधोः स्वमोहप्रभवाः कुतः परे ११ ३३

समर्हणमाराधनं १० मया दिग्विजये सर्वे जिताः अतः सांप्रतं न संतीति सत्यमिति चेत् तत्राह दस्यूनि
ति एके भवादृशा मंदाः पुरा आदौ लुंपतः सर्वस्वं हरतः षडिंद्रियलक्षणान् शत्रून् नाविजित्य आजि
त्वा दश दिशः स्वयं जिता मन्यंते साधोस्तु जितचित्तस्य देहिनां समस्य ज्ञस्य विदुषः स्वाज्ञानकल्पि
ताः परे शत्रवः कुतः स्युः ११

व्यक्तं निश्चितं विप्लवाः अनन्विता इत्यर्थः १२ हे मंदभाग्य यद्यसावस्ति तर्हि क्वास्ति प्रह्लादस्त्वाह सर्वत्रास्ति हिर
ण्यकशिपुराह तर्हि कस्मादस्तंभे नास्ति प्रह्लादस्तु स्तंभं निरीक्षमाणो नमस्यन्नाह दृश्यत इति १३ हिरण्यक
शिपुस्तत्र तमपश्यन्नाह सोऽहमिति १४ प्रह्लादेन मूर्ध्नि बद्धांजलिना निरीक्ष्यमाणं स्तंभं ताडितवान् १५ १६

हिरण्यकशिपुरुवाच व्यक्तं त्वं मर्तुकामोऽसि योऽतिमात्रं विकत्थसे मुमूर्षूणां हि मंदात्मन्ननु स्युर्वि
क्लवा गिरः १२ यस्त्वया मंदभाग्योक्तो मदन्यो जगदीश्वरः क्वासौ यदि स सर्वत्र कस्मात्स्तंभे न दृश्य
ते १३ सोऽहं विकत्थमानस्य शिरः कायाद्धरामि ते गोपायेत हरिस्त्वाद्य यस्ते शरणमीप्सितं १४ एवं
दुरुक्तैर्मुहुरर्दयन् रुषा सुतं महाभागवतं महासुरः खड्गं प्रगृह्योत्पतितो वरासनात् स्तंभं तताडातिब
लः स्वमुष्टिना १५ तदैव तस्मिन्निनदोऽतिभीषणो बभूव येनांडकटाहमस्फुटत् यं वै स्वधिष्ण्योपग
तं त्वजादयः श्रुत्वा स्वधामात्ययमंगमेनिरे १६ स विक्रमन् पुत्रवधेप्सुरोजसा निशम्य निर्ह्रादमपूर्व
मद्भुतं अंतःसभायां न ददर्श तत्पदं वितत्रसुर्येन सुरारियूथपाः १७

तत्पदं तस्य ध्वनेराश्रयं १७ ॐ नमो भगवते वासुदेवाय छ

भगवांस्तदा अदृश्यत दृश्यो बभूव किमर्थं निजभृत्येन प्रह्लादेन यद्भाषितं दृश्यत इति तत्सत्यं विधातुं कर्तुं तथा अखिलेषु भूतेषु स्वात्मनो व्याप्तिं च सत्यां कर्तुं स्तंभे अदृश्यत तत्किमर्थं नेति केषु चभावेषु भूतेष्वथ महत्स्वच भगवानास्त इति तेनैव भृत्ये न भाषितं तत्सत्यं कर्तुं तथा अत्यद्भुतं दैत्यघातकमतिघोरं रूपमुद्वहन् दधत्तत्किमर्थं निजभृत्यैः सनकादिभिः शापानंतरमनुतप्तैस्त्रिभिर्जन्मभिः शापमोक्षो भवत्विति तत्सत्यं कर्तुं तथा अद्भुतं ब्रह्मसृष्टावसृष्टमभूतं च रूपमुद्वहन् तच्च मृगाकारं न च मनुष्याकारं उद्वहन् सभायां मध्ये अदृश्यत तत्किमर्थं निजभृत्येन हिरण्यकशिपुना ब्रह्माणं प्रति यद्भा

सत्यं विधातुं निजभृत्यभाषितं व्याप्तिं च भूतेष्वखिलेषु चात्मनः अदृश्यतात्यद्भुत
रूपमुद्वहन्स्तंभे सभायां न मृगं न मानुषं १८

षितं भूतेभ्यस्त्वद्विसृष्टेभ्यो मृत्युर्माभून्मम प्रभो इति तथा नांतर्बहिरिति न नरैर्न मृगैरिति ब्रह्मणा च निजभृत्येन तथास्त्विति यद्भाषितं तत्सत्यं कर्तुं न हि तद्ब्रह्मसृष्टं भूतं न च नरो वा मृगो वा न च सभागृहस्यांतः न च प्रांगणवद्बहिः एवं ताभ्यां भाषितं सत्यं कर्तुं यच्च हिरण्यकशिपुना भाषितं नूनमेतद्विरोधेन मृत्युर्मे भवितेति तथा अयमकुतश्चिद्भयो मर इति वत्तच्च नारदेन निजभृत्येनेंद्रं प्रति भाषितं अयं महाभागवतो न प्राप्स्यति अनंतानुचर इत्यनेन स्वस्य भक्तपक्षपातित्वं च यद्भाषितं तच्च सत्यं कर्तुं अदृश्यत चकारान्निजभाषितं च यत् कौंतेय प्रतिजानीहि न मे भक्तः प्रणश्यतीति तथा तेषामहं समुद्धर्ता मृत्युसंसारसागरादित्यादि तच्च सत्यं कर्तुमदृश्यतेति द्रष्टव्यं अलम

स दैत्यः एवं ध्वनिं श्रुत्वा तदाश्रयं सत्त्वं प्राणिविशेषं सर्वतो विलोकयन् स्तंभस्य मध्यान्निर्गच्छत् न मृगेंद्रो न मिश्ररूपमहो किमेतदिति मीमांसितवानिति शेषः १९ तस्यैवमलं भयानकं नृसिंहरूपं मीमांसमानस्याग्रतो नृसिंहरूपो हरिः समुत्थितः भयानकत्वमेव दर्शयंस्तद्रूपमनुवर्णयति त्रिभिः प्रतप्तं चामीकरं स्वर्णमिव

स सत्त्वमेवं परितो विपश्यन्स्तंभस्य मध्यादनुनिर्जिहानं नायं मृगो नापि नरो विचित्रमहो कि
मेतन्नृमृगेंद्ररूपं १९ मीमांसमानस्य समुत्थितोऽग्रतो नृसिंहरूपस्तदलं भयानकं प्रतप्तचा
मीकरचंडलोचनं स्फुरत्सटाकेसरजृंभिताननं २० करालदंष्ट्रं करवालचंचलक्षुरां
तजिह्वं भ्रुकुटीमुखोल्बणं स्तब्धोर्ध्वकर्णं गिरिकंदराद्भुतव्यात्तास्यनासं हनुभेदभीषणं
२१

पिंगानि चंडानि लोचनानि यस्मिन् सटाजटाः केसराः कंठरोमाणि स्फुरद्भिः सटाकेसरैः जृंभितं साटोपमाननं यस्मिन् २० करालाः तुंगाः दंष्ट्रा यस्मिन् करवालः खड्गः तद्वच्चंचला क्षुरांतवत्तीक्ष्णा जिह्वा यस्मिन् भ्रुकुटीयुक्तेन मुखेनोल्बणं स्तब्धौ उन्नतौ शंकुवदूर्ध्वौ कर्णौ यस्मिन् गिरिकंदरवदद्भुतं व्यात्तं प्रसृतमास्यं नासे च यस्मिन्नवचनव अत्यंतमध्यमंऊर्ध्वमंउदरं यस्मिन् चंडांशुवत् हनू कपोलप्रांतौ तयोर्भेदेन विदारणेन भीषणं २१

भा०स०
३५
दिविस्पृशत्कायो यस्मिन् अलुक्समासः अदीर्घा ह्रस्वा पीवरा च स्थूला ग्रीवा यस्मिन् उरु विशालं वक्षःस्थ
लं यस्मिन् तत् तच्च अल्पं मध्यमं उदरं यस्मिन् चंद्रांशुवत् गौरैस्तनूरुहैर्लोमभिः छुरितं व्याप्तं विष्वक् सर्वतः
प्रसृता भुजास्तेषां शतानि यस्मिन् नखान्येवायुधानि यस्मिन् २२ दुरासदं प्राप्तुमशक्यं सर्वाणि च नि
जानि चक्रादीनि इतराणि च वज्रादीनि तान्यायुधप्रवेकाः श्रेष्ठोत्तमाः तैर्विद्राविता दैत्यदानवा येन तं

२दुरासदं सर्वनिजेतरायुधप्रवेकविद्रावितदैत्यदानवं प्रायेण मेऽयं हरिणोरुमायिना वधः स्मृतो
नेन समुद्यतेन किं २३ दिविस्पृशत्कायमदीर्घपीवरग्रीवोरुवक्षःस्थलमल्पमध्यमं चंद्रांशुगौ
रैश्छुरितं तनूरुहैर्विष्वग्भुजानीकशतं नखायुधं २२ एवं ब्रुवंस्त्वभ्यपतद्गदायुधो नदन्नृसिं
हं प्रति दैत्यकुंजरः अलक्षितोऽग्नौ पतितः पतंगमो यथा नृसिंहौजसि सोऽसुरस्तथा २४ राम ३५

पंचमी मांसमानस्यायतः समुद्यतस्य इति पूर्वेणैवान्वयः तदाविर्भावप्रयोजनविमर्शपूर्वकं तेन सह दैत्यस्य यु
द्धमाह सप्तभिः प्रायेण महामायाविना हरिणा मेऽयमेवंभूतो वधः मृत्युहेतुः स्मृतः चिंतितः तथाप्यनेन स
नकिं मुद्यतेन किंचित्स्यादित्येवं ब्रुवन्नभ्यपतदित्यन्वयः २३ तदा सो नरसिंहस्यौजसि दीप्तौ पतितः सन् अल
क्षितः अदृष्टोऽभूत् २४

सत्वधामनि सत्वप्रकाशे हरौ पतितस्य तमोमयस्यादर्शनं तद्विचित्रं न भवति तत्र हेतुः यो हरिः पुरा सृष्ट्यादौ प्र
लयकालीनं तमः नु अहो अपिबत् तस्मिन् २५ विक्रमंतं ततस्ततः प्रहरंतं हस्तादुत्कलितः निःसृतः तदा अमरा
देवाः सर्वे धिष्ण्यपाः असाध्वमन्यंत हृतान्योकांसि स्थानानि येषां ते तद्भिया घनच्छदाः मेघांतरिताः संतः २७

न तद्विचित्रं खलु सत्वधामनि स्वतेजसा यो नु पुरापिबत्तमः ततोऽभिपद्याभ्यहनन्महासुरो रुषा नृसिंहं
गदयोरुवेगया २५ तं विक्रमंतं सगदं गदाधरो महोरगं तार्क्ष्यसुतो यथाग्रहीत् स तस्य हस्तोत्कलितस्त
दासुरो विक्रीडतो यद्वदहिर्गरुत्मतः २६ असाध्वमन्यंत हृतौकसोऽमरा घनच्छदा भारत सर्वधिष्ण्यपाः
२७ तं मन्यमानो निजवीर्यशंकितं यद्धस्तमुक्तो नृहरिं महासुरः पुनस्तमासज्जत खड्गचर्मणी प्रगृह्य वे
गेन जितश्रमो मृधे २८ तं श्येनवेगं शतचंद्रवर्त्मभिश्चरंतमच्छिद्रमुपर्यधो हरिः कृत्वाट्टहासं खरमु
त्स्वनोल्बणं निमीलिताक्षं जगृहे महाजवः २९

यस्य हस्तात् स्वयं मुक्तः तं नृहरिं स्ववीर्याच्छंकितं मन्यमानः खड्गचर्मणी प्रगृह्य पुनस्तं आसज्जत अभ्यपद्यते
त्यन्वयः २८ श्येनस्येव वेगो यस्य तं शतचंद्रवर्त्मभिः खड्गचर्ममार्गैः अच्छिद्रं यथा भवत्येवमुपर्यधश्चरंतं
अट्टहासमेवाह खरं तीव्रं उत्स्वनेन महाशब्देनोल्बणं भयंकरं तद्भयेन हरेस्तेजसा च निमीलिते अक्षिणी
यस्य २९

ना० स० २६ ग्रहणेदृष्टांतः व्यालोयथाआखुंमूषकं विदारणेदृष्टांतः अहिंगरुडइवेति विष्वक् सर्वतःस्फुरंतंनिःसरंतंग्रहणे
नातुरंविवशंइंद्रेणसहयुद्धेतस्ययुक्तेनकुशैलेन नक्षतात्वगपियस्य द्वारिसभायांनांतर्नबहिः ऊरू ऊरौनि
पात्यनखैर्मौनवांबरे नखैर्नव्यसुभिरस्त्रमंद्भिर्वा एवंदिवानक्तपरिहारायसंध्यायामितिद्रष्टव्यं ३० दैत्यव
धमुक्त्वातद्दैत्यवधमाहद्वाभ्यांसंरंभेणदुःप्रेक्षाणिकरालानिलोचनानियस्य असृग्जोरक्तस्यलवैर्विंदुभि

विष्वक्स्फुरंतंग्रहणातुरंहरिर्व्यालोयथाखुंकुलिशाक्षतत्वचं द्वार्यूरुमापात्यददारलीलयानखैर्य
थाहिंगरुडोमहाविषं ३० संरंभदुःप्रेक्ष्यकरालकलोचनोव्यात्ताननांतंविलिहन्स्वजिह्वया असृग्लव
वाक्तारुणकेसराननोयथांत्रमालीद्विपहत्यया हरिः ३१ नखांकुरोत्पाटितहृत्सरोरुहंविसृज्यतस्या
नुचरानुदायुधान् अहन्समंतान्नखशस्त्रपाणिभिर्दोर्दंडयूथोनुपथान्सहस्रशः ३२ श्रीराम २६

रक्ताःसिक्ताअतएवारुणाःकेसराः आननंचयस्यसः कइव द्विपहत्ययागजवधेनहरिःसिंहोयथा एवं
भूतस्तस्यानुचरान् अहन्नित्यक्तरेणान्वयः ३१ नखांकुरैरुत्पाटितंहृत्सरोरुहंयस्यतंदोर्दंडानांयूथानि
यस्यसःतमनुपंथायेषांतान् अन्यानपितत्पक्षपातिनइत्यर्थः ३२

दैत्यवधव्यग्रस्यनृहरेरौद्रोपमाहद्वाभ्यांसटाभिरवधूताःप्रकंपिताः परापतन्ग्रहाश्चयैस्तस्यदृष्ट्याविमुष्टरो
चिर्येषांतेतिरस्कृतप्रभाः अंबुधयो निर्ह्रादोघोषः दिगिभाःदिग्गजाः ३३ तस्यसटाभिरुत्क्षिप्तानिविमानानितैःसं
कुलाव्याप्तासतीप्रोत्सर्पतस्वस्थानात् आकर्षेणोदसर्पत् ३४ स्वभृत्येभ्योऽयमाश्चर्यमिवमत्वा कौतूहलेन

सटावधूताजलदाःपरापतन्ग्रहाश्चतद्दृष्टिविमुष्टरोचिषः अंभोधयःश्वासहताविचुक्षुभुर्निर्ह्रा
दभीतादिगिभाविचुक्रुशुः ३३ द्यौस्तत्सटोत्क्षिप्तविमानसंकुलाप्रोत्सर्पतक्ष्माचपदातिपीडिता शैलाः
समुत्पेतुरमुष्यरंहसातत्तेजसाखंककुभोनरेजिरे ३४ ततःसभायामुपविष्टमुत्तमेनृपासनेसंभृतते
त जसंविभुं अलक्षितद्वैरथमत्यमर्षणंप्रचंडवक्त्रंनबभाजकश्चन ३५ निशाम्यलोकत्रयमस्तकज्वरं
तमादिदैत्यंहरिणाहतंमृधे प्रहर्षवेगोत्कलिताननामुहुःप्रसूनवर्षैर्ववृषुःसुरस्त्रियः ३६

तस्यासनेउपविष्टंभयात्कोपिनबभाजनासेवत नलक्षितोद्वैरथःप्रतियोद्धायेन ३५ लोकत्रयस्यम
स्तकज्वरंशिरोव्यथेवदुःसहं प्रहर्षस्यवेगेनउत्कलितानिविकसितान्याननानियासांताः नृहरिंव
वृषुः ३६

नाकिनां विमानावलिभिः सुराणामानकाः पटहाः तैर्जघ्निरे वादिताः स्त्रियो प्सरसोनन्नृतुः ३७ ३८ गंधर्वा
प्सरसश्चचारणाश्चेत्यर्थः ३९ नरशार्दूलं पुरुषोत्तमं ब्रह्मादयो नृसिंहस्य त्र्यंकयोर्द्विकुलचेतसः आरादेवा
स्तुवन्नृसत्तदशश्लोकैः पृथक्पृथक् ४० अनंताय अनंतंप्रसादयितुंनतोस्मि अनंतत्वेहेतुः दुरंताः शक्तयो

तदाविमानावलिभिर्नभस्तलं दिदृक्षतां संकुलमास नाकिनां सुरानका दुंदुभयोथ जघ्निरे गंधर्वमुख्या
ननृतुर्जगुस्त्रियः ३७ तत्रोपव्रज्य विबुधा ब्रह्मेंद्रगिरिशादयः ऋषयः पितरः सिद्धा विद्याधरमहोरगाः
३८ मनवः प्रजानांपतयो गंधर्वाप्सरचारणाः यक्षाः किंपुरुषास्तात वेताला सिद्धकिंन्नराः ३९ तेवि
ष्णुपार्षदाः सर्वे सुनंदकुमुदादयः मूर्ध्नि बद्धांजलिपुटाः आसीनं तीव्रतेजसं ईडिरे नरशार्दूलं नातिदूरच
राः पृथक् ४० श्रीब्रह्मोवाच नतोस्म्यनंताय दुरंतशक्तये विचित्रवीर्याय पवित्रकर्मणे विश्वस्य स
र्गस्थितिसंयमान् गुणैः स्वलीलया संदधतेव्ययात्मने ४१

यस्य तत्कुतः विचित्राणि वीर्याणि प्रभावा यस्य तत्किमर्थं पवित्राणि शोधकानि कर्माणि यस्य विचित्रवीर्य
त्वमेवाह विश्वस्येति संदधते सम्यक्कुर्वते एवमपि अव्ययात्मने अप्रच्युत स्वरूपाय ४१ श्रीरुद्रस्य

रुद्रस्तु तत्कोपकालान्निवृत्तोनायं कोपावसरइतितं प्रार्थयते सहस्रयुगांतस्तव कोपस्य कालः कोपायोग्यश्चायमित्या
ह अल्पकः अत्यल्पः अतः कोपान्निवृत्त्या प्रह्लादं मा हिंसीरित्याह तत्सुतं इति यद्वा अकालेप्ययं कोपोस्य भक्त
स्य रक्षणार्थं इति चेत्तर्हि इदानीं कोपं त्यक्त्वेमं पाहीत्यर्थः ४२ इंद्रस्तु नास्माकं हविर्भागादिलाभः पुरुषार्थः
किं तु तत्परिचर्यैव भक्ता पुनरनेन संरंभेण स्वकार्यमेव साधितं तस्य च सिद्धत्वादुपसंहरेनं क्रोधमित्याशये
२ इंद्रउवाच प्रत्यानीताः परम भवता त्रायता नः स्वभागा दैत्याक्रांतं हृदयकमलं तद्गृहं प्रत्यबोधि का
लग्रस्तं कियदिदमहो नाथ शुश्रूषतां ते मुक्तिस्तेषां न हि बहुमता नारसिंहापरैः किं ४३
१ श्रीरुद्रउवाच कोपकालो युगांतस्ते हतोयमसुरोल्पकः तत्सुतं पाह्युपसृतं भक्तं ते भक्तवत्सल
४२
नाह हे परम नोस्मांस्त्रायता रक्षता भवता स्वीया एव भागा दैत्यात्प्रत्याहृताः अंतर्यामिणस्तवैव यज्ञेषु
भोक्तृत्वात् अस्मदीयं हृदयकमलं च त्वद्गृहमेवैतावत्पर्यंतं भयहेतुत्वेनास्मत्स्मृतिपथे नित्यं स्थितेन दैत्ये
नाक्रांतं व्याप्तं सत्प्रत्यबोधि भयापाकरणेन विकासं नीतं तव चैतौ कोप्यैश्वर्यसाधनार्थमयमुद्यम इ
ति चेत्तत्राह कालग्रस्तमिति ते त्वां हे नारसिंह नरस्य सिंहस्य चाकाराभ्यां आविर्भूत ४३

ना० स० ३८

ऋषयस्ततपः प्रवर्त्तितो नो स्माकं महाननुग्रहः कृत इत्याहुः त्वं नो यद्राज्ञ परमं ध्यानलक्षणं तपः परमत्वे हेतुः आ
त्मनस्तव तेजः प्रभावस्त्वं तदेवाहुः येन तपसा आत्मनि लीनमिदं विश्वं ससर्ज सृष्टवानसि तत् अमुना दैत्ये
न विप्लुप्तं कुंठितं सत् हे शरण्य पाल अयरक्षार्थं गृहीतेनानेन वपा पुनरपि तपः कुरुष्वेत्यनुज्ञातवान
सि तस्मै ते नम इत्युत्तरश्लोकचतुर्थपादस्यानुषंगः ४४ पितरस्तु श्राद्धो ह्यरणेन परमोपकारिणं प्रणमंति

ऋषय ऊचुः त्वं नस्तपः परममाह यदात्मतेजो येनेदमादिपुरुषात्मगतं ससर्ज तद्विप्रलुप्तममुना
द्य शरण्यपालरक्षागृहीतवपुषा पुनरन्वमंस्थाः ४४ पितर ऊचुः श्राद्धानि नोधिबुभुजे प्रसभं तनू
जैर्दत्तानि तीर्थसमये पिति तिलांबुसन्त्यः तस्योदरान्नखविदीर्णवपाद्य आर्छत्तस्मै नमो नृहरयेखिल
धर्मधर्मगोप्त्रे ४५ सिद्धा ऊचुः यो नो गतिं योगसिद्धामसाधुरहार्षीत् योगतपोबलेन नानादर्पं तं न
खैर्निर्ददार तस्मै तुभ्यं प्रणताः स्मो नृसिंह ४६

श्राद्धानि श्रद्धायुक्तानि पिंडदानादीनि नो स्मभ्यं पुत्रैर्दत्तानि प्रसभं बलात्त्वयमधिकृत्य बुभुजे किंच तीर्थस्ना
नसमये दत्तं तिलोदकमप्यपिबत् तानि तस्योदराद्य आर्छत् आहृतवान् कथं नृतात् नखैर्विदीर्णवपायस्य
तस्मात् वपा विदारणस्य तस्य तत्र पिंडो ह्यरणमेव फलमिति भावः ४५ योगसिद्धां गतिं अणिमादिसिद्धिं नानात्व
नेकेदर्पा यस्य तं तस्मै तुभ्यं तं त्वामुद्दिश्य ४६

हे विभो वयं ते त्वदीयाः नटनर्त्तकाः नाट्येनृत्ये गायकाश्च येन स्वाधीनाः कृताः कथं भूतेन वीर्यं शौर्यं बलं शक्तिः तान्यामोजः प्रभावो य

विद्यां अंतर्द्धानादिलक्षणां अनुराद्धां संप्राप्तां संख्ये युद्धे ४७ रत्नानि फणास्फाच्छितानि स्त्रीरत्नानि वउत्तमाः
स्त्रियः आसां स्त्रीणां दत्त आनंदो येन तत्संबोधनं पाठांतरे अस्माकं दत्त आनंदो येनेति ४८ नृसिंहेनावलो

विद्याधरा ऊचुः विद्यां पृथक् धारणयानुराद्धां न्यषेधदज्ञो बलवीर्यदृप्तः स येन संख्ये पशुवद्धतस्तं मा
यानृसिंहं प्रणताः स्म नित्यं ४७ नागा ऊचुः येन पापेन रत्नानि स्त्रीरत्नानि हृतानि नः तद्वक्षः पाटनेना
सां दत्तानंद नमोस्तु ते ४८ मनव ऊचुः मनवो वयं तव निदेशकारिणो दितिजेन देव परिभूतसेतवः भवता ख
लः स उपसंहृतः प्रभो करवाम ते किमनुशाधि किंकरान् ४९ प्रजापतय ऊचुः प्रजेशा वयं ते परेशाभि
सृष्टा न येन प्रजा वै सृजामो निषिद्धाः स एष त्वया भिन्नवक्षानुशेते जगन्मंगलं सत्त्वमूर्तेऽव
गंधर्वा ऊचुः वयं विभो ते नटनाट्यगायका येनात्मसाद्वीर्यबलौजसा कृताः स एष नीतो भवता दशामिमां किमुत्पथस्थः कुशलाय कल्पते ५१ [तारः ५०]

किताः संतो मूर्द्धि विद्धां जल्पयो मनवः प्रोचुः मनवो वयं धर्मपालकाः परिभूताः सेतवो वर्णाश्रमधर्ममर्यादा ये
षां ते अनुशाधि अनुशिक्षय ४९ प्रजापतयो तद्वलोकिताः प्रोचुः हे परेश ते त्वयाभिसृष्टाः प्रजेशा व
यं येन निषिद्धाः संतः प्रजा न सृजामः स एष भिन्नं वक्षो यस्य सः अनुशिक्षितं मृतः शेते अतः परं ताः स्र
क्ष्याम इति हर्षं तत्राहुः हे सत्त्वमूर्ते तिवायमवतारो जगतो मंगलं ५० गंधर्वा अपि तद्वलोकिताः प्रोचुः

सत्ते नहुमां दृशां मृत्तिंडिविततमता दृत्याद्धः क्रिमितव ४९

राम ३८

भा० स० ३९

भवापवर्गसंसारनिवर्त्तकं आश्रयणे हेतुः यस्मात्साधूनां हृदि भयजनकत्वेन शेते तिष्ठतीति तथा स एषोऽसुर
स्त्वया समापितः अन्तं नीतः ५२ मनोज्ञैः कर्मभिरनुचरेषु मुख्याः पञ्चतां मृत्युं हे पञ्चविंश चतुर्विंशतितत्त्वनि
यामक ५३ किंपुरुषास्तु त्वां स्तोतुं के वयं वराका इत्याहुः कयं किंपुरुषास्तुच्छप्राणिनः त्वं तु महानद्भुतश्च

चारणा ऊचुः हरे तवांघ्रिपंकजं भवापवर्गमाश्रिताः यदेष साधुहृच्छयस्त्वयासुरः समापितः ५२
यक्षा ऊचुः वयमनुचरमुख्याः कर्मभिस्ते मनोज्ञैस्त इह दितिसुतेन प्रापिता वाहकत्वं स तु
जनपरितापं तत्कृतं जानता ते नरहर उपनीतः पञ्चतां पञ्चविंश ५३ किंपुरुषा ऊचुः वयं
किंपुरुषास्त्वं तु महापुरुष ईश्वरः अयं कुपुरुषो नष्टो धिक्कृतः साधुभिर्यदा ५४ वैतालिका ऊचुः ५४
सभासु सत्रेषु तवामलं यशो गीत्वा सपर्यां महतीं लभामहे यस्तामनैषीद्वशमेष दुर्जनो दिष्ट्या हत
स्ते भगवन्यथामयः ५५ किंनरा ऊचुः वयमीश किंनरगणास्तवानुगा दितिजेन विष्टिममुना
नुकारिताः भवता हरे स वृजिनोऽवसादितो नरसिंह नाथ विभवाय नो भव ५६

भावः पुरुषः ननु अयं महान्दैत्यो हत इति किं न वर्ण्यते इत्याशंक्याहुः यदेति ५४ अयमिति सत्रेषु यज्ञे
षु ते त्वया हतः एतद्दिष्ट्या भद्रं कृतं ५५ अमुना दितिजेन विष्टिं निर्मूल्यं कर्म अनुनिरंतरं कारिताः अतः परं

राम ३९

५ विष्णुपार्षदा ऊचुः अद्यैतद्धरिनररूपमद्भुतं ते दृष्टं नः शरणद सर्वलोकशर्म सोऽयं ते विधिकर ईश विप्रशप्तस्तस्येदं निधनमनु
ग्रहाय विद्मः ५७ इति श्रीभागवते महापुराणे सप्तमस्कंधे प्रह्लादानुचरिते दैत्यराजवधो नामाष्टमोऽध्यायः
नोऽस्माकं भक्तानां शरणद आश्रयप्रद सर्वेषां लोकानां शर्म मंगलमेतदद्भुतं रूपमद्यैव दृष्टं न तु पूर्वं विधिक
रः किंकरः ५७ इति सप्तमे अष्टमः नवमे ब्रह्मणा प्रीत्या बोधितोऽस्मरबालकः कोपं प्रशामयत्स्तौन्नृसिं
हमतिभीषणं १ उग्रोऽप्यनुग्र एवायं स्वभक्तानां नृकेसरी केसरीव स्वपोतानामन्येषामुग्रविग्रहः इत्या
द्यागमोक्तां भक्तानुकंपितामाह एवमिति स प्रसिद्धः एवं दूरत एव स्थित्वा स्तुवतः मन्युना संरंभ आवेशो यस्य तं

नारद उवाच एवं सुरादयः सर्वे ब्रह्मरुद्रपुरःसराः नोपैतुमशकन्मन्युसंरंभं सुदुरासदं १
साक्षाच्छ्रीः प्रेषिता देवैर्दृष्ट्वा तन्महदद्भुतं अदृष्टाश्रुतपूर्वत्वात्सा नोपेयाय शंकिता २ प्रह्ला
दं प्रेषयामास ब्रह्मावस्थितमन्तिके तात प्रशमयोपेहि स्वपित्रे कुपितं प्रभुं ३ तथेति शनकै रा
जन्महाभागवतोऽर्भकः उपेत्य भुवि कायेन ननाम विधृताञ्जलिः ४ स्वपादमूले पतितं तमर्भ
कं विलोक्य देवः कृपया परिप्लुतः उत्थाप्य तच्छीर्ष्ण्यदधात्कराम्बुजं कालाहिवित्रस्तधियां कृताभयं ५
उपगन्तुं नाशक्नुवन् १ महदद्भुतं रूपं दृष्ट्वा शंकिता सती तं नोपजगाम अद्भुतत्वे हेतुः अदृष्टेति २ उपेहि उप
गच्छ ३।४ काल एवाहिस्तस्माद्वित्रस्ता धीर्येषां तेषां कृतमभयं येन तत् ५ ओं नमो भगवते वासुदेवा
य०

तस्य करस्पर्शेन धुतं निरस्तमखिलमशुभं यस्य स सपदि तत्क्षणमेव अभिव्यक्तं अपरोक्षीभूतं परात्मदर्शनं ब्रह्म
ज्ञानं यस्य निर्वृतः सन् हृदि दधौ हृष्यंती रोमांचिता तनुर्यस्य अश्रूणि लोचनयोर्यस्य परमपुरुषार्थतया दधौ
न साधनेनेत्यर्थः ६ सुसमाधिमेवाह तस्मिन्नेव न्यस्तं हृदयमीक्षणं च येनेति ७ स्वस्मिन्निव समस्तेषु तत्कृपा
मृतवृष्टये प्रह्लादः स्तौति सत्वैकवित्वादिशिरसा हरिं तत्र तावदात्मनो भगवतस्तुतावनधिकारमिवाशंक्याधि

प्रह्लादकरस्पर्शधुताखिलाशुभः सपद्यभिव्यक्तपरात्मदर्शनः तत्पादपद्मं हृदि निर्वृतो दधौ हृष्यत्त
नुः क्लिन्नहृदश्रुलोचनः ६ अस्तौषीद्धरिमेकाग्रमनसा सुसमाहितः प्रेमगद्गदया वाचा तन्न्य
स्तहृदयेक्षणः ७ प्रह्लाद उवाच ब्रह्मादयः सुरगणा मुनयोथ सिद्धाः सत्वैकतानमतयो वचसां
प्रवाहैः नाराधितुं पुरुगुणैरधुनापि पिप्रुः किं तोष्टुमर्हति स मे हरिरुग्रजातेः ८ मन्ये धनाभिज राम ५०
नरूपतपः श्रुतौजस्तेजः प्रभावबलपौरुषबुद्धियोगाः नाराधनाय हि भवंति परस्य पुंसो भक्त्या तु
तुतोष भगवान् गजयूथपाय ९
कारं संभावयन्नाह ब्रह्मादय इति यं वाग्भिः मुनयो मननशीलाः सिद्धा ज्ञानिनोपि स
त्व एवैकस्मिंस्तानो विस्तारो यस्याः सा मतिर्येषां तथाविधा अपि वचसां प्रवाहैरपि तथा बहुभिर्वर्ण्यमानैर्गुणैरपि
यमाराधयितुं न पिप्रुः न पूर्णं न शक्ता इत्यर्थः स हरिर्मे किं तोषं आप्तुमर्हति तत्र हेतुः उग्रा घोरा आसुरी जातिर्यस्य न
एवं हरितोषणे स्वस्यायोग्यतामाशंक्य योग्यतां संभावयति मन्य इति द्वाभ्यां अभिजनः सत्कुले जन्म रूपं सौंदर्यं
तोषं २

श्रुतं पांडित्यं ओज इंद्रियनैपुण्यं तेजः कांतिः प्रभावः प्रतापः पौरुषमुद्यमः बुद्धिः प्रज्ञा योगो ष्टांगः एते धनाद
यो द्वादशापि गुणाः परमस्य पुंसः आराधनाय न भवंति हि यतः केवलया भक्त्यैव स तु गजेंद्राय तुष्टो भवत् एवं
भक्त्यैव केवलया हरेस्तोषः संभवतीत्युक्तं ९ एवं भक्त्यैव केवलया हरेस्तोषः संभवतीत्युक्तं इदानीं भक्तिं विना
नान्यत्किंचित्तोषहेतुरित्याह विप्रादिति पूर्वोक्ता धनादयो द्विषट् द्वादश गुणास्तैर्युक्ताद्विप्रादपि श्वपचं व
रिष्ठं मन्ये यद्वा सनत्सुजातोक्ता द्वादश धर्मज्ञानादयो गुणा द्रष्टव्याः तदुक्तं ज्ञानं च सत्यं च दमः श्रुतं च ह्य

विप्राद्द्विषड्गुणयुतादरविंदनाभपादारविंदविमुखात् श्वपचं वरिष्ठं
मन्ये तदर्पितमनोवचनेहितार्थप्राणं पुनाति स कुलं न तु भूरिमानः १०

मात्सर्यं ह्रीस्तितिक्षानसूया यज्ञश्च दानं च धृतिः शमश्च महाव्रता द्वादश ब्राह्मणस्येति कथंभूताद्विप्रा
त् अरविंदनाभस्य पादारविंदाद्विमुखात् कथंभूतं श्वपचं तस्मिन् अरविंदनाभे अर्पिता मनआदयो येन तं
ईहितं कर्म वरिष्ठत्वे हेतुः स एवंभूतः श्वपचः सर्वं कुलं पुनाति भूरिमानो गर्वो यस्य स तु विप्र आत्मानमपि न
पुनाति कुतः कुलं यतो भक्तिहीनस्यैते गुणा गर्वायैव भवंति न तु शुद्धये अतो हीन इति भावः १०

भा० स० तर्हि किं धनाद्यर्पणेन सन्मानं प्राकृत इव भगवानपेक्षते नेत्याह नैवेति अयं प्रभुरीश्वरः अविदुषो अल्पकाज्जना
४१ न्मानं पूजां आत्मनो अर्थे वृणीते नेच्छति यतो निजलाभेनैव पूर्णः तर्हि पूजां नेच्छत्येव तत्राह करुणः कृपालुः अतो वृणी
ते व तत्र हेतुः यद्यदिति यं यं मानं यद्यत्स्मात् यद्येन धनादिना भगवते मानं विदधीत तदेवात्मने भवति नान्यत्र
यथा मुखे कृतैव तिलकादिश्रीः श्रोभा प्रतिबिंबस्य भवति न तु साक्षात्तस्यैव कर्तुं शक्यते तद्वत् ११ य

नैवात्मनः प्रभुरयं निजलाभपूर्णो मानं जनादविदुषः करुणो वृणीते यद्यज्जनो भगवते वि
दधीत मानं तच्चात्मने प्रतिमुखस्य यथा मुखश्रीः ११ तस्मादहं विगतविक्लव ईश्वरस्य स
र्वात्मना महि गृणामि यथा मनीषं नीचोऽजया गुणविसर्गमनुप्रविष्टः पूयेत येन हि पुमाननु राम
वर्णितेन १२ ४१

स्मादेवं भगवान् भक्त्यैव तुष्यति तस्मादहं नीचोऽपि गतविक्लवः गताशंकः सन् ईश्वरस्य महि महिमानं
सर्वप्रयत्नेन स्वमनीषानुसारेणानुवर्णयामि अजानतोऽपि स्तुतिकरणे हेतुमाह येनैवं महिम्नानु
वर्णितेन अविद्यया संसारमनुप्रविष्टः पुमान् पूयेत शुध्येत तन्महि अन्यस्य तथा शोधकस्याभा
वादित्यर्थः १२

तदेवमात्मनः स्तुतावनधिकारं परिहृत्येदानीं स्तुवन् कोपोपसंहारं प्रार्थयते सर्वे ह्यमी इति द्वाभ्यां भो ईश अमी
उद्विजंतो बिभ्यतः सर्वे ब्रह्मादयः सत्वमूर्तेस्तव विधिकरास्त्वन्नियोगकर्तारो भक्ता एव नान्ये न च वयं सु
राद्यवद्वैरभावेनैते भक्ताः किंतु भक्त्यैव तव रुचिरैरवतारैर्विविधं क्रीडनं अस्य विश्वस्य क्षेमादिप्रयोजना
य न तु भयोत्पादनाय १३ तत्तस्मादेषां भयपरिहाराय मन्युं यच्छ उपसंहर यदर्थे अयं मन्युः स चासुरः सा

सर्वे ह्यमी विधिकरास्तव सत्वधाम्नो ब्रह्मादयो वयमिवेश न चोद्विजंतः क्षेमाय भूतय उतात्मसु
खाय चास्य विक्रीडितं भगवतो रुचिरावतारैः १३ तद्यच्छ मन्युमसुरश्च हतस्त्वयाद्य मोदेत साधुर
पि वृश्चिकसर्पहत्या लोकाश्च निर्वृतिमिताः प्रतियंति सर्वे रूपं नृसिंह विभयाय जनाः स्मर
ति १४

धूनां संतोषार्थं अद्य हतः अतः परं क्रोधेन कार्याभावात्तं नियच्छ ननु अन्येषां वधेन साधुः किं मोदेत तत्राह
वृश्चिकादेः परोपद्रवकारिणोऽन्यत एव प्रजातया हत्या वधेन तस्यैव तद्भद्रं जातमिति साधुरपि मोदते एवं त
र्हि बहूनां सुखाय हत्वा द्रमुं क्रोधं न त्यजामीति चेत् तत्राह लोकाश्च निर्वृतिं इताः प्राप्ताः संतः प्रतियांति क्रोधो
पसंहारं प्रतीक्षंते तर्हि जनानां पुनर्भयाभावाय मन्युं धारयामीति चेत् तत्राह रूपमिति विभयाय निवृत्त्यै
एतद्रूपस्मरणादेव भयनिवृत्तेर्न मन्युधारणेन कृत्यमस्तीत्यर्थः १४

ना० स० तं वेद्मि नेवित्तर्हि त्यजामीति चेत्तत्राह नाहमिति हे अजित ते अस्माद्रूपात् अहं न बिभेमि कथंभूतात् आस्यं
४२ च जिह्वा च अर्कसदृशे नेत्राणि च भ्रुकुटीनां रभसेन आटोपश्च उग्रा दंष्ट्राश्च एतानि अतिभयानकानि यस्मि
न् तस्मात् अंत्रमय्यः स्रजो यस्मिन् तत् आंत्रस्रक् तस्मात् क्षतजाक्ताः केसरा यस्मिन् शंकुवदुन्नतौ स्तब्धौ

नाहं बिभेम्यजित तेऽतिभयानकास्यजिह्वार्कनेत्रभ्रुकुटीरभसोग्रदंष्ट्रात् आंत्रस्रजः क्षतज
केसरशंकुकर्णात् निर्ह्रादभीतदिगिभादरिभिन्नखाग्रात् १५ त्रस्तोस्म्यहं कृपणवत्सल
दुःसहोग्रसंसारचक्रकदनाद्ग्रसतां प्रणीतः बद्धः स्वकर्मभिरुशत्तम तेंघ्रिमूलं प्रीतोपवर्ग
शरणं ह्वयसे कदा नु १६ राम ४२

कर्णौ यस्मिन् तत् तस्मात् निर्ह्रादेन भीता दिगिभा यस्मात् अरीन् भिंदंतीत्यरिभिद्भिः तानि नखाग्रा
णि यस्मिन् एवंभूतादपि ते रूपादहं न बिभेमि १५ महद्भयं त्वन्यदस्तीत्याह त्रस्तोस्मीति दुःसहं यदुग्रं
संसारचक्रे कदनं दुःखं तस्मादहं त्रस्तोस्मि तत्र च ग्रसतां हिंस्राणां मध्ये स्वकर्मभिर्बद्धः सन् प्रणीतः नि
क्षिप्तोस्मि हे कृपणवत्सल हे उशत्तम कदा नु त्वं प्रीतः सन् अपवर्गभूतं शरणं तवांघ्रिकमलं प्रति ह्वयसे
मामाह्वास्यसि १६

दास्ये सति मत्प्रीतिरिति चेत्तर्हि नानायोनिषु क्लिश्यमानस्य मम दास्यज्ञानाभावात् त्वमेव तदुपदिशेति प्रा
र्थयते यस्मात् प्रियैरप्रियैश्च यथासंख्यं वियोगसंयोगाभ्यां जन्म यस्य तेन शोकाग्निना सकलयोनिषु
दह्यमानोस्मि दुःखस्य प्रतीकारः कार्य इति चेत्तत्राह दुःखस्यौषधं प्रतीकारः तदपि दुःखमेव एवमपि अत्र
तद्धिया देहाद्यभिमानेन मुह्यामि अतः हे भूमन् विभो मे तव दास्यरूपं योगं निस्तारोपायं वद १७ ननु दा
स्ययोगे न प्रवृत्तस्यापि तदंतरायभूतानां पूर्वोक्तानां दुःखानां कुतः परिहारः तत्राह सोहं त्वद्दासः सन् नो

यस्मात्प्रियाप्रियवियोगसंयोगजन्मशोकाग्निना सकलयोनिषु दह्यमानः दुःखौषधं तदपि दुः
खमतद्धियाहं भूमन् भ्रमामि वद मे तव दास्ययोगं १७ सोहं प्रियस्य सुहृदः प्रियदेवतायाः लीला
कथास्तव नृसिंह विरंच्यगीताः अंजस्तितर्म्यनुगृणन् गुणविप्रमुक्तो दुर्गाणि ते पदयुगालयहंस
संगः १८

नृसिंह तव लीलाकथा अनुगृणन् दुर्गाणि महादुःखान्यंजसा तितर्मि तरामि न गणयिष्यामीत्यर्थः तत्र हेतुः
गुणै रागादिभिर्विप्रमोषेण प्रमुक्तः सन् तत्कुतः ते पदयुगमेवालयो येषां भक्तानां त एव हंसा ज्ञानिनः तैः संगो य
स्य मम सोहं कथंभूतस्य कथास्तत्राह प्रियस्येत्यादि कुतो ज्ञाताः विरंचेन गीताः तत्संप्रदायप्रवृत्ताः तथा
चात्र वर्णाश्रुतिः देवा हवै प्रजापतिमब्रुवन् इत्यादि दास्ये प्रवृत्तस्य भगवदनुग्रहेण सत्संगः ततो वीतरागतया त्व

[illegible] १८

भा० स०
५२

ननुदुःखैस्तप्तस्यतत्प्रतीकारोलोकेप्रसिद्धएवकिंमद्दास्यादिनातत्राहबालस्येतिनोनृसिंहतप्तस्यतत्प्रतिविधिः
दुःखप्रतीकारःइहलोकेयोऽञ्जसाइष्टःसत्वयोपेक्षितानांतावदेवक्षणमात्रमेवनत्वात्यंतिकःतदेवाहबालस्य
पितरौशरणंरक्षकाविहनभवतःताभ्यांपाल्यमानस्यापितस्यदुःखदर्शनात् क्वचिद्गीगर्त्तादिषुताभ्या
मेवतद्वधदर्शनाच्चनचार्त्तस्यरोगिणःअगदमौषधंशरणंकृतेप्यौषधेमृत्युदर्शनात्नचउदन्वतिसमुद्रेम

बालस्यनेहशरणंपितरौनृसिंहनार्त्तस्यचागदमुदन्वतिमज्जतोनौः तप्तस्य
तत्प्रतिविधिर्यइहाञ्जसेष्टस्तावद्विभोतनुभृतांत्वदुपेक्षितानां १९

राम
५२

ज्जतःपुंसोनौःशरणंतयासहमज्जनदर्शनात्अतस्त्वमेवशरणमित्यर्थःअथचैवकाक्काव्याख्येयं
तप्तस्यतत्प्रतिविधिःयइहतावत्प्रसिद्धःसत्वदुपेक्षितानांकिमञ्जसेष्टःअपितुनेष्टएवयद्वायस्तावदिहप्र
तिविधिरिष्टःसकिमञ्जसानैवाञ्जसेत्यादियोज्यंबालस्येत्यादिनापूर्ववदेव १९

ननुक्वचित्कुतश्चित्केनचित्कदाचित्कश्चिद्रक्षकोपिदृश्यतएवेत्याशंक्यतत्रापितत्तद्रूपेणत्वमेवरक्षकइ
त्यङ्गीकृत्यतस्यैवसर्वात्मतामाहयस्मिन्निति अपरोऽर्वाचीनःपित्रादिःपरोब्रह्मादिर्वाजीवःकर्तातत्तत्का
रकैर्यद्यत्करोतितत्सर्वंभवतएवस्वरूपंनतुपृथक् यस्मिन्नधिकरणेयतोनिमित्तात्यर्हियस्मिन्कालेये
नकरणेनयेनहेतुकर्त्रासंचोदितश्चयस्यसंबंधियस्मादपादानात्यस्मैसंप्रदानाययदीप्सिततमंयःकर्तेत्ये
वंसप्तसप्तविभक्त्यर्थाःयथायेनप्रकारेणेतिक्रियाविशेषणभूतानामव्ययानामर्थाःपृथक्स्वभावतःसत्वादि

यस्मिन्यतोयर्हियेनचयस्ययस्माद्यस्मैयथायदुतयस्त्वपरःपरोवा भावःकरोतिविकरोतिपृथक्स्व
भावःसंचोदितस्तदखिलंभवतःस्वरूपं २० मायामनःसृजतिकर्ममयंबलीयःकालेनचोदितगुणानु
मतेनपुंसः छन्दोमयंयदजयार्पितषोडशारंसंसारचक्रमजकोतितरेत्त्वदन्यः २१

प्रकृतिःकरोतिउत्पादयतिविकरोतिरूपांतरंनयतीति २० अतोन्यस्यरक्षकस्याभावात्संसारित्वाच्चनित्यमुक्त
स्त्वमेवमांशरणागतंरक्षेतिप्रार्थयतेमायेतिद्वाभ्यांत्वदंशस्यपुंसोऽनुमतेनईक्षणरूपेणअनुग्रहेणमनःप्रधानंलिंगं
मायासृजतिकथंभूताकालेनचोदिताःक्षोभिताःगुणायस्याःकथंभूतंमनःकर्ममयंकर्मप्रचुरंबलीयःदुर्जयंछन्दोमयं
वेदोक्तकर्मप्रधानंच अजयाजीवस्याविद्ययातद्भोगार्थंअर्पिताःषोडशअराविकारायस्मिन्यदेवंभूतंसंसारच
क्रात्मकंमनःतत्कोतितरेत् भोअजत्वदन्यःत्वत्तःपृथक्स्थितस्त्वामभजन्नित्यर्थः

भा० स०
४४

ननु ममापि मायासंबंधात्कर्तृत्वाद्यविशेषाद्भवतः को विशेष इत्यत आह स इति स्वधाम्ना चिच्छक्त्या नित्यं विजि
तात्मनो बुद्धेर्गुणा येन सहितं यतः कालः मायाप्रेरकः अत एव वशीकृता विसृज्यानां कार्याणां विसर्गाणां साध
नानां च शक्तयो येन अतः ईदृक्त्वं उवन्निष्पीड्यमानं मामुपकर्ष स्वसमीपं नय २२ ननु लोकपालानां भोगान्

स त्वं हि नित्यविजितात्मगुणः स्वधाम्ना कालो वशीकृतविसृज्यविसर्गशक्तिः चक्रे विसृष्टमजयेश्वर षोडशा विसर्ग
रे निष्पीड्यमानमुपकर्ष विभो प्रपन्नं २२ दृष्टा मया दिवि विभोऽखिलधिष्ण्यपानामायुः श्रियो वि
व भवं इच्छति यान् जनोयं यस्मत्पितुः कुपितहासविजृंभितभ्रूविस्फूर्जितेन लुलिताः स तु ते निरस्तः
२३ तस्मादमूस्तनुभृतामहमाशिषोऽज्ञ आयुः श्रियं विभवमैंद्रियमाविरिंच्यात् नेच्छामि ते विलुलि राम
तानुरुविक्रमेण कालात्मनोपनय मां निजभृत्यपार्श्वं २४ ४४

भुंक्ष्व पित्र्यं वा राज्यमिदं दास्यामि किमिति संसारादुद्विजसे तत्राह दृष्टा इति त्रिभिः श्रियः संपदः विभव उद्भवः आ
युरादयो दृष्टा इति काक्वा तुच्छत्वमुक्तं तदेवाह यस्मत्पितुः कोपहासविजृंभितभ्रूभंगमात्रेण विध्वस्ताः स च त्वया नि
रस्तः २३ यस्मादेवं तस्मात् आशिषः भोगान् अज्ञः तत्परिपाकं विद्वान् अहं ऐंद्रियं इंद्रियभोग्यं ब्रह्मणो भोग
मभिव्याप्य किमपि नेच्छामि ते कालात्मना उरुविक्रमेण विलुलितान् विध्वस्तान् अणिमादीनपि २४

किं च वर्तमानकालेपि न भोगार्हा इत्याह कुत्रेति श्रुतिः श्रवणं तद्वत्सुखं यासु ताः मृगतृष्णिकावन्मिथ्यारूपाः आ
शिषः क्व अशेषाणां रुजां रोगाणां विरोहः उद्भवस्थानं क्व च इदं कलेवरं एवं चेत्सर्वोपि जनः किं न विरज्यते तत्राह यदपि
यद्यपि इति एवं विद्वानयं जनस्तथापि न निर्विद्यते विरक्तो न भवति कुतः कामएवानलः तं मधुलवैः सुखलवैः दुः

क्वाशिषः श्रुतिसुखा मृगतृष्णिरूपाः क्वेदं कलेवरमशेषरुजां विरोहः निर्विद्यते
न तु जनो यदपीति विद्वान् कामानलं मधुलवैः शमयन् दुरापैः २५ क्वाहं रजःप्रभव
ईश तमोधिकेस्मिन् जातः सुरेतरकुले क्व तवानुकंपा न ब्रह्मणो न तु भवस्य न
वै रमाया यन्मेऽर्पितः शिरसि पद्मकरः प्रसादः २६

साध्यैरपि शमयन् कामाग्निशमनव्यग्रस्य निर्वेदस्यावकाशो नास्तीत्यर्थः यद्वा अचिंत्यमिदं तन्मायावेष्टितमिति
भावः २५ तर्हि त्वं कथं निर्विण्णोसि अनेहं पि मयि प्रवृत्तया त्वत्कृपयैवेत्याशयेनाह क्वेति रजसैव प्रभवो जन्म यस्य सः
सप्तम्यंतं वा कुलविशेषणं तमोधिकं यस्मिन् तस्मिन्नसुराणां कुले जातोहं क्व च तवानुकंपा तामेवाह ब्रह्मादीनां
शिरसि यो नैवार्पितः स पद्मवत्सकलसंतापहरः करप्रसादः पुरुषार्थरूपो मे शिरस्यर्पित इति यत् यत्स्यपानुकं
पयेति वा २६

भा० स०
४५

ननु त्वयीदमतिविचित्रमित्याह नैषेति एते ब्रह्मादय उत्तमाश्च अयमसुरो नीच इत्येषा परावरमतिः जंतोः प्राकृतस्य यथा
तथा भवतो नैव स्यात् अत्र हेतुः जगत आत्मनः सुहृदश्च तर्हि सर्वं भमत्प्रसादः एकरूपश्च किं न स्यात् तत्राह संसेव
यातव प्रसादो भवति तत्र च सेवानुरूपं तत्तदिच्छानुसारेण धर्मादीनामुदयो भवति एवं सत्यपि वैषम्याभावे दृष्टांतः
सुरतरुर्यथा सेवकस्यैव संकल्पानुसारेण फलं ददाति न च विषमस्तद्वत् न परावरत्वं अत्र कारणमिति शेषः २७

नैषा परावरमतिर्भवतो ननु स्याज्जंतोर्यथात्मसुहृदो जगतस्तथापि संसेवया सुरतरोरिव ते प्रसा
दः सेवानुरूपमुदयो न परावरत्वं २७ एवं जनं निपतितं प्रभवाहिकूपे कामाभिकाममनु यः प्र
पतन् प्रसंगात् कृत्वात्मसात् सुरर्षिणा भगवन् गृहीतः सोहं कथं नु विसृजे तव भृत्यसेवां २८ राम ४५

तच्च त्वद्भृत्यकृपया प्राप्तमिति त्वद्भृत्यपार्श्वमेव मां नयेसाभिप्रायेनाह एवमिति यथा त्वयानुकंपितोस्मि एवं नारदे
नात्मसात्कृत्वा पूर्वमनुगृहीतः सोहं कथं तु त्वद्भृत्यसेवां विसृजामि कथं भूतोनुगृहीतोस्मि प्रभव एवाहिर्युक्तः
कूपस्तस्मिन् कामाभिकामितः कामयमानं जनं निपतितमनु तत्प्रसंगात् अपतन्योऽहं तदेवं त्वद्भृत्यस्य श्रीनारद
स्यानुग्रहेण त्वया अत्यंतमनुकंपितोस्मि अयमेव च मम परमो नुग्रहः न पुनरिदमति तुच्छं मत्प्राणरक्ष
णादि २८

न चेदं त्वया मत्प्राणरक्षणार्थं कृतं किं त्वन्यार्थमित्याह भो अनंत यदेतन्मत्प्राणरक्षणं मां हंतुमुद्यतस्य मत्पितुर्वधश्च
तदुभयं स्वभृत्यऋषिवाक्यमृतं विधातुमित्यहं मन्ये कुतः यद्यस्मात् असत् अयुक्तं विधित्सुः खड्गं प्रगृह्यावोचत्
किं मदपरो मद्व्यतिरिक्तश्चेदीश्वरोस्ति तर्हि त्वामिदानीमवतु तव कं शिरोऽहं हरामीति पाठांतरेप्ययमेवार्थः यद्य
दा अवोचत् तदा मत्प्राणरक्षणमिति वान्वयः एतच्च सत्यं विधातुं निजभृत्य भाषितमित्यत्रैव बहुधा व्याख्यातं २९ ऊ

मत्प्राणरक्षणमनंत पितुर्वधश्च मन्ये स्वभृत्यऋषिवाक्यमृतं विधातुं खड्गं प्रगृह्य यदवोचदसद्विधि
त्सुस्त्वामीश्वरो मदपरोवतु कं हरामि २९ एकस्त्वमेव जगदेतदमुष्य यत्त्वमाद्यंतयोः पृथगवस्यसि मध्यत
श्च सृष्ट्वा गुणव्यतिकरं निजमाययेदं नानेव तैरवसितस्तदनुप्रविष्टः ३०

न चेदं पक्षपातेन रक्षणं दैत्यहननं च त्वयि स्वाभाविकं किंतु मायागुणोपाधिकं सर्वात्मके त्वयि स्वतस्तदयोगादि
त्याह एक इति एतज्जगत् त्वमेवैकः यद्यतः अमुष्याद्यावंते च पृथगवस्यसि विरामं करोषि सन्मात्रतया कारण
त्वेनावधित्वेन च वर्तस इत्यर्थः अतो मध्यतश्च त्वमेव कुतस्तर्हि भेदप्रतीतिस्तत्राह निजमायया गुणपरिणामा
त्मकमिदं जगत्सृष्ट्वा तदनुप्रविष्टस्त्वं तैर्गुणैर्हेतुभूतैर्नानेव रक्ष्यहंतेव च अवसितः प्रतीतः तदुक्तं स्कंधोपक्रमे नि
र्गुणोपि ह्यजोव्यक्तो भगवान् प्रकृतेः परः स्वमायागुणमाविश्य बाध्यबाधकतां गत इत्यादि ३०
क

ननु यद्येतज्जगदहमेव तर्हि जगतो वैषम्येण ममापि वैषम्यं मयि किं न स्यादित्यत आह त्वं वेत्यमेव इदं सदसत् कार्यकार
णात्मकं जगत् न तु त्वत्तः पृथक् भवांस्तु ततोन्यः आद्यंतयोः पृथगवस्थानात् यत् यस्मादेवं अतो यमात्मीयोयं प
र इति बुद्धिः सा अपार्था मायैव कार्यकारणत्वे दृष्टांतेन साधयति यद्यतः यस्य जन्म ईक्षणं प्रकाशश्च यस्मिन्
निधनं च स्थितिश्च तद्वै तदेव अष्टिर्बीजं कारणं तरुः कार्यं तयोर्यथा वसु कालमात्रत्वं अयमर्थः कालशब्देन नी
लत्वासाधारणगुणयोगात् पृथ्वी वसुशब्देन वसुमात्रं भूतसूक्ष्मं तत्र तयोर्यथा पृथ्वीमय बीजमात्रत्वं तस्य वर्णे यथा भू
तसूक्ष्ममात्रत्वं एवं सर्वमपि कार्यकारणात्मकं जगत् परमकारणात्मकमेवेति तथा च पारमार्थिकत्वं तदनन्यत्वमारंभण

त्वं वा इदं सदसदीश भवांस्ततोन्यो माया यदात्मपरबुद्धिरियं ह्यपार्था यद्यस्य जन्म निधनं स्थितिरीक्षणं च त
द्वै तदेव वसुकालवदष्टितर्वोः ३१ न्यस्येदमात्मनि जगद्विलयांबुमध्ये शेषे त्मनानिजसुखानुभवो नि
रीहः योगेन मीलितदृगात्मनिपीतनिद्रस्तुर्ये स्थितो न तु तमो न गुणांश्च युंक्षे ३२

शब्दादिभ्य इति श्रुतिश्च वाचारंभणं विकारो नामधेयं मृत्तिकेत्येव सत्यमिति ३१ तत्र तावदंते पृथगवस्थानं दर्शयति
न्यस्येति इदं जगत् आत्मना आत्मनि निक्षिप्य स्वसुखमेवानुभवन्निः क्रियः सन् प्रलयोदकमध्ये शयनं करोषि
तर्हि किं जीवस्येव ममापि तमोवृत्तिरूपा निद्रास्ति नहि नहि योग एव तु बहिर्वृत्त्युपरमः साम्यान्निद्रोच्यत इत्याह योगेन
मीलिते दृशौ येन आत्मना स्वरूपप्रकाशेन निपीता निद्रा येन यतस्तुर्ये अवस्थात्रयातिरिक्ते स्वरूपे स्थितस्त्वं
न तु सुप्त इवात्मना तमो युंक्षे न योजयसि न पश्यसि न जाग्रत्स्वप्नयोरिव गुणान्विषयांश्चेत्यर्थः ३२

इदानीं कारणत्वेनादावपि पृथगवस्थानं दर्शयन्मध्य तच्छ्वत्वमेवेत्ये तत्प्रपंचयति चतुर्भिः यस्त्वमंभसि शेषेत
स्यैव ते इदं जगद्वपुः स्वरूपं नान्यस्य यतस्त्वं मध्यतोपि न स्याः कथंभूतस्य निजया कालशक्त्या संचोदिताः प्र
कृतेर्धर्माः सत्वादयो येन स्वरूपत्वे हेतुः अनंतशयनात् शेषपर्यंकात् विरमन् समाधिर्यस्य तस्य तव नाभेः स
काशादेकार्णवोदके महाब्जं लोकपद्मं अभूत् कथंभूतं आत्मनि तत्र्येव गूढं सत् स्वकणिकांतः सूक्ष्मात् वट

तस्यैव ते वपुरिदं निजकालशक्त्या संचोदितप्रकृतिधर्मण आत्मगूढं अंभस्यनंतशयनाद्विरम
त्समाधेर्नाभेरभूत्स्वकणिकावटवन्महाब्जं ३३ तत्संभवः कविरतोन्यदपश्यमानस्त्वां बीजमात्म
नि ततं स्वबहिर्विचिंत्य नाविंददब्दशतमप्सु निमज्जमानो जातेंकुरे कथमु होपलभेत बीजं ३४

बीजात् महावट इव ३३ तदेवं कारणत्वेनानुगतः सन् मध्यतश्च त्वमेव वर्तस इत्युक्तं एतदेव भुवः सत्वस्य ब्रह्मणोनु
भवेन स्फुटयितुं तस्य प्राक्तनीमवस्थामाह तस्मिन्नब्जे संभवो यस्य सः कविर्ब्रह्मा अतः पद्मादन्यदपश्यन् बीजं
उपादानकारणभूतं त्वां स्वस्मिन् व्याप्तं संतमपि नाविंदत् युक्तं चैतत् उह अहो अंकुरे जाते सति बीजं तदनुगतं का
रणं पृथक् कथं नाम पुमान्पश्येत् ३४

न्नवदुपासनयात्नुस्वस्मिन्नेवदृष्टवानित्याह सत्वमिति पराहृत्याब्रुमास्थितः सन् तीव्रेणतपसाध्यानेन अनेन
सन्मात्ररूपेणोपादानतयादृर्शनिमुक्तं ३५ ईश्वरत्वेनचदृष्ट्वाकृतार्थोभिवदित्याह एवं अनेनप्रकारेणसहस्त्रम

सत्वात्मयोनिरतिविस्मितआस्थितोब्दंकालेनतीव्रतपसापरिशुद्धभावः त्वामात्मनीशभुविगंध
मिवातिसूक्ष्मंभूतेंद्रियाशयमयेविततंददर्श ३५ एवंसहस्त्रवदनांघ्रिशिरःकरोरुनासास्य
कर्णनयनाभरणायुधाढ्यं मायामयंसदुपलक्षितसन्निवेशं दृष्ट्वामहापुरुषमापमुदंविरिंचः ३६
तस्मैभवान्हयशिरस्तनुवंचबिभ्रद्वेदद्रुहावतिबलौमधुकैटभाख्यौ हत्वानयच्छ्रुतिगणांस्तुरज
स्तमश्चसत्वंतवप्रियतमांतनुमामनंति ३७ राम ५७

परिमितानियानिवदनादीनितैराढ्यंसमृद्धंमायामयंमायाप्रधानंसताप्रपंचेनोपलक्षितःसन्निवेशःपादा
दिरचनायस्य ३६ तदाप्रभवांस्तस्यानुग्रहंकृतवानित्याह तस्माइति हयग्रीवमूर्तिंबिभ्रत्सन्रजस्तमोरूपौम
धुकैटभाख्यौहत्वातस्मैश्रुतिगणान्समर्पितवान्तत्रहेतुःसत्वमिति ३७

तदेवंकारणत्वेनानुगतःसन्मध्यतश्चत्वमेववर्त्तसइत्युक्तं एतदेवशुद्धसत्वस्यब्रह्मणोनुभवेनस्फुटयितुंतस्य
प्राक्तनीमवस्थामाह। तस्मिन्नब्जेसंभवोयस्यसःकविर्ब्रह्मा अतःपश्चादन्यदपश्यन्बीजंउपादानकारणभूतंत्वां
स्वस्मिन्व्याप्तंसंतमपिनाविंदत् युक्तं चैतत्।उहअहोअंकुरेजातेसतिबीजंतदनुगतंकारणंपृथक्कथंनाम

तत्संभवःकविरतोन्यदपश्यमानःत्वांबीजमात्मनिततंस्वबहिर्विचिंत्य नाविंददब्दशतमप्सुनिमज्ज
मानोजातेंकुरेकथमुहोपलभेतबीजं ३८ सत्वात्मयोनिरतिविस्मितआस्थितोब्दंकालेनतीव्रतप
सापरिशुद्धभावः त्वामात्मनीशभुविगंधमिवातिसूक्ष्मंभूतेंद्रियाशयमयेविततंददर्श ३९ एवंस
हस्त्रवदनांघ्रिशिरःकरोरुनासास्यकर्णनयनाभरणायुधाढ्यं मायामयंसदुपलक्षितसन्निवेशं
दृष्ट्वामहापुरुषमापमुदंविरिंचः ४०

पुमान्नपश्येत् ३८ भवदुपासनयात्नुस्वस्मिन्नेवदृष्टवानित्याहसत्वामिति।पराहृत्याब्रुमाश्रितःसन्तीव्रे
णतपसाध्यानेनसन्मात्ररूपेणोपादानतयादर्शनिमुक्तं ३९ ईश्वरत्वेनचदृष्ट्वाकृतार्थोभिवदित्याह।एवमने
कप्रकारेणसहस्त्रमपरिमितानियानिवदनादीनितैराढ्यंसमृद्धंमायामयंमायाप्रधानंसताप्रपंचेनोपलक्षि
तःसन्निवेशःपादादिरचनायस्य ४०

भा०स० तदृवभवांस्तस्यानुग्रहंकृतवानित्याहतस्मादिति। हयग्रीवमूर्त्तिर्बिभ्रत्सन् रजस्तमो रूपौ मधुकैटभाख्यौ हत्वा
४४ तस्मैश्रुतिगुणान् समर्पितवान् तत्रहेतुः सत्वमिति ४१ एकस्त्वमेवेत्यादिभिरष्टभिः श्लोकैः यदुक्तं पक्षपातेन
रक्षणं नहिपक्षवधश्च सत्वोपाधिको ननुस्वतइति तदुपसंहरति इत्थमिति। विभावयसि पालयसि हंसि घा

॥ तस्मै भवान् हयशिरस्तनुवं च बिभ्रद्वेदद्रुहावतिबलौ मधुकैटभाख्यौ हत्वानयच्छ्रुतिगणांश्च रजस्त
मश्च सत्वं तव प्रियतमां तनुमामनन्ति ४१ इत्थं नृतिर्यगृषिदेवझषावतारैर्लोकान् विभावयसि हंसि २८
जगत्प्रतीपान् धर्मं महापुरुष पासि युगानुवृत्तं छन्नः कलौ यदभवस्त्रियुगोथ सत्वम् ४२ नैत
न्मनस्तव कथासु विकुंठनाथ संप्रीयते दुरितदुष्टमसाधुतीव्रं कामातुरं हर्षशोकभयैषणार्त्तं त
स्मिन् कथं तव गतिं विमृशामि दीनः ४३

राम
४४
तयासि कलौ तु तन्न करोषि यतस्तदा त्वं छन्नो भवः यतस्त्रिष्वपि च युगेष्वाविर्भावान्। स एवंभूतस्त्वं त्रियुग इति प्र
सिद्धः ४२ तदेवं भगवतस्तत्वं निरूप्य स्वस्य वतद्विचारायोग्यतां निवेदयन् प्रार्थयते नैतदिति त्रिभिः। अ
साधु बहिर्मुखं तीव्रं दुर्धरं हर्षशोकभयैषणात्रयेण वार्त्तं दुःखितमपि त्वत्कथासु न प्रीयते तस्मिन्नेवं भूते मन
सि कथं तव तत्वं विचारयामि ४३

किं च जिह्वा अवितृप्ता सती नो अच्युत मां मां यतो मधुरादिरसस्ततः आकर्षति उदरं क्षुधासंतप्तं संसद्य एवय
त्किंचिदाहारमात्रं प्रति चपला दृक् च क्षुः कर्मशक्ति कर्मेंद्रियाणि लुनंति चोरयंति ४४ न केवलमहमेक एव
एवं कष्टां दशामापन्नः किं तु महाजनोप्येवमेव क्लिश्यति अतः सर्वजनं पालयेति प्रार्थयते एवमिति भवः सं
सार एव वैतरणी यमनदी तस्यां अन्योन्यतो यानि जन्मादीनि तेभ्यो निभीतं स्वेषां परेषां च विग्रहे यथायथं वैरं मैत्रं च
यस्य एवंमूढजनं पश्यन् त्वं हे पारस्वर तस्याः पारे स्थित नित्यमुक्त हंतेति अहो कष्टमित्येवमनुकंप्याद्यपीह हि वैत

जिह्वैकतोच्युत विकर्षति मावितृप्ता शिश्नोन्यतस्त्वगुदरं श्रवणं कुतश्चित् घ्राणोन्यतश्चपलदृक् क्व च
कर्मशक्तिर्बह्व्यः सपत्न्य इव गेहपतिं लुनंति ४४ एवं स्वकर्मपतितं भववैतरण्यामन्योन्यजन्ममरणा
ह शनभीतभीतं पश्यन् जनं स्वपरविग्रहवैरमित्रं हंतेति पारचर पीपृहि मूढमद्य ४५ को न्वत्र तेखिलगु
रणीमुत्तार्य पालय ४५ रो भगवन् प्रयास उत्तारणेस्य भवसंभवलोपहेतोः मूढेषु वै महदनुग्रह आर्त्तबंधो किं ते
न ते प्रियजनाननुसेवतां नः ४६
एकेन मया कथं सर्वो जनस्तारणीय इति चेत्तत्राह को न्विति कोनु ते अत्र सर्वजनोत्तारणे प्रयासः न कोपि कुतः अस्य
विश्वस्य भवसंभवलोपानां उत्पत्तिस्थितिसंहाराणां हेतोः किमेतद्दुःकरमिति भावः उचितं चैतदित्याह मूढेष्विति लो
च त्वदीयांश्च तारयिष्यामि इमं दुराग्रहं मा कृथा इति चेत्तत्राह तव ये प्रियजनाः भक्ताः ताननुसेवमानानां नोस्मा
कं तेन उत्तारणेन किं कोपि प्रयासो सुरवालकाः हरेः को न्वत्र तेखिलगुरो भगवन् प्रयासः प्रह्लाद इत्थमुपमंत्र्य मिथो

नराणांमिथोऽर्थसत्वमकोदर्पनियमाणां ४६

वत्सप्रह्लादत्वांतावत्तारयिष्यामितावतैवकृतार्थःस्याः किमनेननिर्बंधेनेत्यतआह नैवेति हेपरसर्वोत्तमत्व
द्वीर्यगायनमेवमहामृतंतस्मिन्मग्नंचित्तंयस्यसोहंभववैतरण्याः नैवोद्विजे किंतुविमूढान्शोचामितानेवाहत
तो महामृताद्विमुखंचेतो येषांप्रस्फतइंद्रियार्थनिमित्तंयन्मायासुखंतदर्थंभरंकुटुंबादिभारमुद्वहतः ४७ तं
तावन्मुक्तिंगृहाण तांस्कृतत्वन्नामुनयउपदेक्ष्यंतीति चेत्तत्राह प्रायेणेति नविमुमुक्षोविमुक्तिंनेच्छामि तर्ह्यन्यं

नैवोद्विजेपरदुरत्ययवैतरण्यास्त्वद्वीर्यगायनमहामृतमग्नचित्तः शोचेततोविमुखचेतसइंद्रियार्थ
मायासुखायभरमुद्वहतोविमूढान् ४७ प्रायेणदेवमुनयःस्वविमुक्तिकामामौनंचरंतिविजनेनपरार्थ
निष्ठाः नैतान्विहायकृपणान्विमुमुक्षएकोनान्यंत्वदस्यशरणंभ्रमतोनुपश्ये ४८ यन्मैथुनादि
गृहमेधिसुखंहितुच्छं कंडूयनेनकरयोरिवदुःखदुःखं तृप्यंतिनेहकृपणाबहुदुःखभाजः कंडूतिवन्म
नसिजंविषहेतधीरः ४९

कमपिप्रार्थय मामेवकिमितिनिर्बध्नासीतिचेत्तत्राह त्वत्तोन्यमस्यजनस्यशरणंनपश्यामि ४८ नन्वेतस्त्री
संभोगादिनासुखिनएवनकृपणास्तत्राह यदिति करयोःकंडूयनेनसंघर्षणेनदुःखमनुदुःखंयस्मिन् तर्हिदुः
खत्वादेवततोनिर्विद्यविमुच्येरन् तत्राह कृपणाःकामुकाः बहुदुःखभाजोपिइहगृहमेधिसुखेनतृप्यंतिअलमि
तिनमन्यंते कंडूतिवत्कामस्यदुःखसहत्वात् ननुकेचित्कंडूतिमपिसहंते कामंचेत्यत्राह त्वत्प्रसादात्तुकश्चि
द्धीरएवमनसिजंकामंविषहेत नतुसर्व अत्रापिकंडूतिवदि तिदृष्टांतः ४९

ननुमौनादिभिर्मोक्षसाधनैःसुलभैवतेषामपिमुक्तिः तत्राह मौनेति हेपुरुषअंतर्यामिन् येमौनादयोदशआप
वर्ग्याः अपवर्गहेतवःप्रसिद्धाः रहःविविक्तवासः तेतुप्रायशः अजितेंद्रियाणांइंद्रियजयोगाय अर्थार्थिविक्रीण
तांवार्त्ताःजीवनोपायाभवंति दांभिकानांवार्त्ताअपिभवंतिवानवा दंभस्यानियतफलत्वात् ५० त्वत्ज्ञानंतुभक्तिं
विनासकामैर्मौनादिभिःनभवत्येवेत्याह रूपेइतिद्वाभ्यां बीजांकुराविवप्रवाहापन्नेइमेसदसतीकार्यकारणे

मौनव्रतश्रुततपोध्ययनस्वधर्मव्याख्यारहोजपसमाधयआपवर्ग्याः प्रायःपरंपुरुषतेत्वजितेंद्रि
याणांवार्त्ताभवंत्युतनवात्रतुदांभिकानां ५० रूपेइमेसदसतीतववेदसृष्टेबीजांकुराविवनचान्यदरूप
कस्य युक्ताःसमक्षमुभयत्रविचिन्वतेत्वांयोगेनवह्निमिवदारुषुनान्यतःस्यात् ५१

एवंतेरूपेउपलक्षणभूतेवेदेनसृष्टेप्रकाशितेनचान्यत् स्वसमवेतंगोत्वादिकमिवदेवदत्तादेः कुतः अरूपक
स्यप्राकृतरूपादिशून्यस्य अतःयुक्ताःसंयताःएवंभक्तियोगेनप्रत्यक्षंत्वामुभयत्रकार्यकारणेवाअनुगतंपश्यं
तिमथनेनदारुषुवह्निमिवनान्यतःस्यात् ज्ञानमितिशेषः यद्वाज्ञानप्रकारमेवाह एतदुभयमन्यतःप्रधानप
रमाणुवादेर्नस्यात् सदैक्षतेत्यादिश्रुतेः अतस्त्वमेवकारणत्वात्सर्वत्रानुस्यूतइति ५१

तदेवाह त्वं वायुरिति हृदयं मनः चित्तं चित्तं अनुग्रहः अहंकारः देवतावर्गो वा सगुणः स्थूलः विगुणः सूक्ष्मः मनश्च
वचश्च मनोवचं तेन निरुक्तं प्रकाशितं किमपि त्वत्तोन्यन्नास्ति ५२ अत्रैकोस्त स्वस्मिन्ननुगतमपि त्वां न जानं
तीत्याह नेति नैते गुणाद्यभिमानिनो देवाः आद्यंतवंतः जडोपाधित्वात् अनाद्यंतं निरुपाधिं त्वां न विंदंति हि य
स्मात्सुधियो विद्वांसः एवं विचार्य शब्दात् अध्यापनादिव्यापारादुपरमंति त्वामेव समाधिनोपासत इत्यर्थः

त्वं वायुरग्निरवनिर्वियदंबुमात्राः प्राणेंद्रियाणि हृदयं चिदनुग्रहश्च सर्वं त्वमेव सगुणो विगुणश्च
भूमन् नान्यत्त्वदस्त्यपि मनोवचसा निरुक्तं ५२ नैते गुणा न गुणिनो महदादयो ये सर्वे मनःप्रभृ
तयः सहदेवमर्त्याः आद्यंतवंत उरुगाय विदंति हि त्वामेवं विमृश्य सुधियो विरमंति शब्दात् ५३

तथा च श्रुतिः किमर्था वयमध्येष्यामहे किमर्था वयं यक्ष्यामह इति नानुध्यायेत् बहूञ्छब्दान्वाचो विग्लापनं हि त
दिति च स्मृतिश्च यदा ते मोहकलिलं बुद्धिर्व्यतितरिष्यति तदा गंतासि निर्वेदं श्रोतव्यस्य श्रुतस्य चेत्यादि

उपसंहरति तदिति हे अर्हत्तम नमः स्तुति कर्म पूजाः प्रणिपातस्तुति सर्वकर्मार्पणानि कर्म च परिचर्या चर
णयोः स्मृतिश्च कथायां श्रवणं च एवं षडंगया सम्यक् सेवया विना परमहंसानां गतौ प्राप्ये त्वयि जनः कथं
भक्तिं लभेत यस्मादेवं भक्तिं विना न मोक्षो न च भक्तिः संसेवया विना अतः प्राक् प्रार्थितं दास्ययोगमेव देहीति

तत्तेऽर्हत्तम नमः स्तुति कर्म पूजाः कर्म स्मृतिश्चरणयोः श्रवणं कथायां संसेवया त्वयि विनेति षडंग
या किं भक्तिं जनः परमहंसगतौ लभेत ५३ श्रीनारद उवाच एतावद्वर्णितगुणो भक्त्या भक्ते
न निर्गुणः प्रह्लादं प्रणतं प्रीतो यतमन्युरभाषत ५४ श्रीभगवानुवाच प्रह्लाद भद्र भद्रं ते प्रीतो
हं ते सुरोत्तम वरं वृणीष्वाभिमतं कामपूरोस्म्यहं नृणां ५५ मामप्रीणत आयुष्मन् दर्शनं दुर्लभं
हि मे दृष्ट्वा मां न पुनर्जंतुरात्मानं तप्तुमर्हति ५६ प्रीणंति ह्यथ मां धीराः सर्वभावेन साधवः श्रेय
स्कामा महाभागाः सर्वासामाशिषां पतिं ५७

प्रकरणार्थः ५३ एतावंतो वर्णिता गुणा यस्य यतमन्युः उपसंहृतकोपः ५४ कामान्पूरयतीति तथा यद्वा
पुरुषार्थप्रवाहोस्मीत्यर्थः ५५ अप्रीणतः अप्रीणयतः तप्तुं अपूर्णकामत्वेन शोचितुं ५५ प्रीणंति तोषयंति

भा०स० ५९ एकांतित्वात् निरुपाधिभक्तत्वात् ५८ सप्तमे नवमः ॥ दशमे त्वनुगृह्यामुं भक्तमंतर्हिते हरौ प्रसंगाद्धरि
णारुद्रे कृतोनुग्रह ईर्यते तत्सर्वं वरजातं १ उत्पत्त्यास्वभावेनैवासक्तं मां तेषां कामानां संगाद्भीतः २ ननु
किमहं भक्तं प्रलोभयामि नहि किंतु वरं वृणीष्वेति वदतस्तवाभिप्रायोन्य एवेत्याह भृत्यलक्षणेति हृदयस्य
ग्रंथिवद्बंधकेषु अन्यथा अनर्थसाधने प्रवर्त्तनं न घटेतेत्यर्थः ३ कथमेवं भृत्यलक्षणज्ञानं स्यात्तत्राह यइति नेत्वन्तः न

एवं प्रलोभ्यमानोपि वरैर्लोकप्रलोभनैः एकांतित्वाद्भगवति नैच्छत्तानसुरोत्तमः ५८ इतिश्रीभा
गवते महापुराणे सप्तमस्कंधे नवमोध्यायः ॥ नारद उवाच ॥ भक्तियोगस्य तत्सर्वमंतरायतया
र्भकः मन्यमानो हृषीकेशं स्मयमान उवाच ह १ प्रह्लाद उवाच ॥ मा मां प्रलोभयोत्पत्त्यासक्तं का
मेषु तैर्वरैः तत्संगभीतो निर्विण्णो मुमुक्षुस्त्वामुपाश्रितः २ भृत्यलक्षणजिज्ञासुर्भक्तं कामेष्वचोद राम ५१
यत् भवान्संसारबीजेषु हृदयग्रंथिषु प्रभुः नान्यथा तेऽखिलगुरो घटेत करुणात्मनः ३ यस्त आ
शिष आशास्ते न स भृत्यः स वै वणिक् आशासानो न वै भृत्यः स्वामिन्याशिष आत्मनः न स्वामी भृत्य
तः स्वाम्यमिच्छन्यो राति चाशिषः ४

तु कामनयापि सेव्यसेवकयोः स्वामिभृत्यभावः प्रसिद्धः सत्यं सोपाधिकोसौ न तु तात्त्विक इत्याह स्वामिन्यात्मनः आशि
षो अपेक्षमाणो नैव भृत्यः भृत्यहेतुकामात्मनः स्वाम्यमिच्छन् यो भृत्याय ददाति स च नैव स्वामी ४

आवयोस्तु तात्त्विकोसावित्याह अहं त्विति अनयाश्रयो निरभिसंधिः अन्यथा कामाद्यनभिसंधिं विना अ
र्थः प्रयोजनं नास्ति ५ ननु तथापि परमोदारस्य मम संतोषार्थं किमपि वृणीष्वेति वदंतमाह यदीति कामांकुराणां
असंरोहं अनुत्पत्तिं भवतः सकाशात् ६ ननु कामोत्पत्तौ सत्यां को दोषस्तत्राह इंद्रियादीनि यस्य जन्मना न

अहं त्वकामस्त्वद्भक्तस्त्वं च स्वाम्यनपाश्रयः नान्यथेहावयोरर्थो राजसेवकयोरिव ५ यदि रासी
शो मे कामान्वरांस्त्वं वरदर्षभ कामानां हृद्यसंरोहं भवतस्तु वृणे वरं ६ इंद्रियाणि मनः प्राण आ
त्मा धर्मो धृतिर्मतिः ह्रीः श्रीस्तेजः स्मृतिः सत्यं यस्य नश्यंति जन्मना ७ विमुंचति यदा कामान्मा
नवो मनसि स्थितान् तर्ह्येव पुंडरीकाक्ष भगवत्त्वाय कल्पते ८ ॐ नमो भगवते तुभ्यं पुरुषाय म
हात्मने हरयेद्भुतसिंहाय ब्रह्मणे परमात्मने ९

नश्यंतीति आत्मा देहः ७ कामाभावे गुणमाह विमुंचतीति भगवत्त्वाय त्वत्समानैश्वर्याय तथा च श्रुतिः यदा सर्वे
प्रमुच्यंते कामा येस्य हृदि स्थिताः अथ मर्त्योमृतो भवत्यत्र ब्रह्म समश्नुत इति निर्दोषान् कामान् दातुमिच्छंतं प्र
श्रि त्याख्यास्यन्नमस्यति ॐ नमइति ९

भा०स०
५२

सत्यमेकांतभक्तस्त्वं तथापि मदाज्ञा करणीयेत्याह नेतीति मेऽएकांतिनः कदाचिदपि इहामुत्र च मय्याशिषो न वांछंत्येव तथा
प्येतन्मन्वंतरमात्रं भोगान्भुंक्ष्व १० ननु तर्हि बंधः स्यादित्यत आह कथाइति द्वाभ्यां सर्वेषु भूतेषु संतमेकमीशं य
ज्ञाधिष्ठातारं मामात्मन्याविश्य यजस्व तद्ध्यानेनैव कर्मणा बंधः स्यादेवेत्याह योगेन मय्यर्पणेन [illegible] जी हि
स्व ११ किंच भोगेन सुखानुभवेन प्रारब्धं पुण्यं हित्वा मुक्तबंधः सन् लोकानुग्रहार्थं कीर्तिं विस्तार्य मामाप्स्यसि कु

श्रीनृसिंह उवाच नैकांतिनो मे मयि जात्विहाशिष आशासतेऽमुत्र च ये भवद्विधाः तथापि मन्वंतरमेतद
त्र दैत्येश्वराणामनुभुंक्ष्व भोगान् १० कथा मदीया जुषमाणः प्रियास्त्वमावेश्य मामात्मनि संतमेकं सर्वे
षु भूतेष्वधियज्ञमीशं यजस्व योगेन च कर्म हिन्वन् ११ भोगेन पुण्यं कुशलेन पापं कलेवरं कालजवेन हि राम
त्वा कीर्तिं विशुद्धां सुरलोकगीतां वितायमामेष्यसि मुक्तबंधः १२ ५२

शलेन पुण्याचरणेन पापं हित्वेति विजीषामात्रं अन्यथा तस्य राज्ये ऽप्रवृत्तेः न तु तस्य प्राचीनं पापमस्ति तदधि
गमे उत्तरपूर्वाघयोरश्लेषविनाशौ तद्व्यपदेशादिति न्यायात् तत्सुकृतदुष्कृते विधुनुत इति श्रुतेश्च न वेदं प्रारब्धपा
पाभिप्रायं तस्य भोगेनैव क्षयात् कुशलेन हित्वेति वचनानुपपत्तेः न चासावविद्वानिति वाच्यं भगवतैव कृतार्थस्या व
नंतरं वक्ष्यमाणत्वात् अत एव योगेन कर्म हिन्विति इदमपि लोकसंग्रहार्थे कर्मणि प्रवर्तितस्यानुद्वेगमात्रायेति स
र्वमनवद्यं १२

न्च

×य एतत्कीर्तयेन्मह्यं त्वया गीतमिदं नरः। त्वां च मां च स्मरन्काले कर्मबंधाद्विमुच्यते ॥१३॥×

किंच य इति त्वां च मां च इदं मच्चरितं च स्मरन् एतत् स्तोत्रं यः कीर्तयेत् सोऽपि कर्मबंधाद्विमुच्यते कुतस्तव बंधशंके
त्यर्थः १३ ईश्वराज्ञाप्राप्तकर्माधिकारः सन्नपि तु निवृत्तिं प्रार्थयते त्रिभिः वरं वरणीयमेतदपरं वृणे ते त्वत्तः १४
विद्धोऽमर्षेण क्रोधेन आशयो यस्य १५ ते अपांगेन संदृष्टः अतः पूत एव तथापि भो कृपणवत्सल कार्पण्येन प्रार्थ

✓प्रह्लाद उवाच वरं वरय एतत्ते वरदेशान्महेश्वर यदनिंदत्पिता मे त्वामविद्वांस्तेज ऐश्वरं १४ विद्धामर्षाश
यः साक्षात्सर्वलोकगुरुं प्रभुं भ्रातृहेति मृषादृष्टिस्त्वद्भक्ते मयि चाघवान् १५ तस्मात्पिता मे पूयेत दु
रंतादुस्तराद्घात् पूतस्ते ऽपांगसंदृष्टस्तदा कृपणवत्सल १६ श्रीभगवानुवाच त्रिःसप्तभिः पिता पू
तः पितृभिः सह तेऽनघ यत्साधोऽस्य गृहे जातो भवान्वै कुलपावनः १७ यत्र यत्र च मद्भक्ताः प्रशांताः
समदर्शिनः साधवः समुदाचारास्ते पूयंत्यपि कीकटाः १८ सर्वात्मना न हिंसंति भूतग्रामेषु किंचन उच्चा
वचेषु दैत्येंद्र मद्भावेन गतस्पृहाः १९

ये इत्यर्थः १६ यद्यपि कश्यपो मरीचिर्ब्रह्मा चेति तत्पितृत्रय एव पूर्वजाः तथापि त्रिभिः सप्तभिः सहेति प्रा
कृत्यगतपितृत्रितयाभिप्रायेणोक्तं यद्यस्मात् १७ सम्यगुत्तम आचारो येषां ते कीकटा अपि देशाः तत्तुल्या वा प्राणिनः पू
यंते शुद्धा भवंति १८ ननु त्वद्भक्तानामयं महिमेति न चित्रं अहं तु तादृशो न भवामीति चेत्तत्राह सर्वात्मनेति
द्वाभ्यां मद्भावेन मद्भक्त्या विगतास्पृहा येषां १९

त्वामनुगतायेकेचित्पुरुषास्तेप्येवंलक्षणाःसंतोमद्भक्ताःभवंति अतोभवान्मेभक्तानांसर्वेषांप्रतिरूपधृक् उपमा
नास्पदंश्रेष्ठःखल्वित्यर्थः २० मदंगस्पर्शनेनसर्वशःपूतस्यतेपितुःपापवार्ताकैव नास्ति केवलं पुत्रकृत्यानिप्रेतका

भवंतिपुरुषालोकेमद्भक्तास्त्वामनुव्रताः भवान्मेखलुभक्तानांसर्वेषांप्रतिरूपधृक् २० कुरुत्वंप्रेतकार्या
णिपितुःपूतस्यसर्वशः मदंगस्पर्शनेनांगलोकान्यास्यतिसुप्रजाः २१ पित्र्यंचस्थानमातिष्ठयथो
क्तंब्रह्मवादिभिः मय्यावेश्यमनस्तातकुरुकर्माणिमत्परः २२ श्रीनारदउवाच प्रह्लादोपितथाचक्रे
पितुर्यत्सांपरायिकं यथाहभगवान्राजन्नभिषिक्तोद्विजोत्तमैः २३ प्रसादसुमुखंदृष्ट्वाब्रह्मान
रहरिंहरिं स्तुत्वावाग्भिःपवित्राभिःप्राहदेवादिभिर्वृतः २४ देवदेवाखिलाध्यक्षभूतभावनपूर्व
ज दिष्ट्यातेनिहितःपापोलोकसंतापनोसुरः २५ योसौलब्धवरोमत्तोनवध्योममसृष्टिभिः तपोयो
गबलोन्नद्धःसमस्तनिगमानहन् २६ दिष्ट्यास्यतनयःसाधुर्महाभागवतोर्भकः त्वयाविमोचितोमृत्यो
र्दिष्ट्यात्वांसमितोधुना २७

र्याणिकुरु २१ वेदवादिभिरुक्तमनतिक्रम्यमत्परःसन्कर्माणिकुरु २२ ममसृष्टिभिर्मयासृष्टैर्भूतैःसम
स्तान्निगमान्धर्मानित्यर्थः अहन् हतवान् सत्वयाहतः २६ एतद्दिष्ट्यासमितःसम्यक्प्राप्तः २७ छ

सर्वतःसंत्रासात्गोप्तारक्षकं २८ एवंवरस्त्वयानप्रदेयःक्रूरोनिसर्गःस्वभावोयेषांअमृतंक्षीरं २९ शिशुपा
लदंतवक्रयोःद्विषतोःश्रीकृष्णसायुज्यंकथमितियत्पृष्टंतदेवतयोःपूर्वजन्मकथनादिभिरुपपादितमुपसंहरति

एतद्वपुस्तेभगवन्ध्यायतःप्रयतात्मनः सर्वतोगोप्तृसंत्रासान्मृत्योरपिजिघांसतः २८ श्रीनृसिंहउवा
च मैवंवरोसुराणांतेप्रदेयःपद्मसंभव वरःक्रूरनिसर्गाणामहीनाममृतंयथा २९ नारदउवाच
इत्युक्त्वाभगवान्राजन्तत्रैवांतर्दधेहरिः अदृश्यःसर्वभूतानांपूजितःपरमेष्ठिना ३० ततःसंपूज्य
शिरसाववंदेपरमेष्ठिनं भवंप्रजापतीन्देवान्प्रह्लादोभगवत्कलाः ३१ ततःकाव्यादिभिःसार्द्धंमुनिभिः
कमलासनः दैत्यानांदानवानांचप्रह्लादमकरोत्पतिं ३२ प्रतिनंद्यततोदेवाःप्रयुज्यपरमाशिषः
स्वधामानिययूराजन्ब्रह्माद्याःप्रतिपूजिताः ३३ एवंतौपार्षदौविष्णोःपुत्रत्वंप्रापितौदितेः हृदि
स्थितेनहरिणावैरभावेनतौहतौ ३४ पुनश्चविप्रशापेनराक्षसौतौबभूवतुः कुंभकर्णदशग्रीवौह
तौतौरामविक्रमैः ३५ शयानौयुधिनिर्भिन्नहृदयौरामसायकैः तच्चित्तौजहतुर्देहंयथाप्राक्तन
जन्मनि ३६ ताविहाथपुनर्जातौशिशुपालकरूषजौ हरौवैरानुबंधेनपश्यतस्तेसमीयतुः ३७
एवमितिसप्तभिःदितेःपुत्रत्वंप्रापितौ विप्रशापेनेत्यत्रतस्यानुषंगः ३४ करूषजोदंतवक्त्रःहरौसायुज्यंस
मीयतुः ३७

भा० स०
५४

कृष्णनिंदादिना पूर्वकृतं च यत् एनः पापं तत् ध्यानेन तदात्मानः संतो जहुः तदात्मत्वे दृष्टांतः कीटः पेशस्कृतो ध्याने
नेन यथा तदात्मा भवतीति ३८ अभिदा भेददर्शनशून्यया ३९ हरेः सात्म्यं सारूप्यं ४० प्रह्लादचरितार्थमुपसं
हरति एषेति चतुर्भिः अवतारः श्रीनृसिंहरूपस्तस्य कथा आख्याते ति शेषः ४१ प्रह्लादस्य चरितमित्यादेः समा

एनः पूर्वकृतं यत्तद्राजानः कृष्णवैरिणः जहुस्त्वंते तदात्मानः कीटः पेशस्कृतो यथा ३८ यथा यथा भ
गवतो भक्त्या परमयाभिदा नृपाश्चैद्यादयः सात्म्यं हरेस्तच्चिंतया ययुः ३९ आख्यातं सर्वमेतत्ते यन्मां
त्वं परिपृष्टवान् दमघोषसुतादीनां हरेः सात्म्यमपि द्विषां ४० एषा ब्रह्मण्यदेवस्य कृष्णस्य च महात्म
नः अवतारकथा पुण्या वधो यत्रादिदैत्ययोः ४१ प्रह्लादस्यानुचरितं महाभागवतस्य च भक्तिर्ज्ञानं
विरक्तिश्च याथात्म्यं चास्य वै हरेः ४२ सर्गस्थित्यप्ययेशस्य गुणकर्मानुवर्णनं परावरेषां स्थानानां
कालेन व्यत्ययो महान् ४३ धर्मो भागवतानां च भगवान्येन गम्यते आख्यानेस्मिन् समाम्नात राम ५४
मध्यात्मिकमशेषतः ४४ य एतत्पुण्यमाख्यानं विष्णोर्वीर्योपबृंहितं कीर्तयेच्छ्रद्धया श्रुत्वा कर्मपा
शैर्विमुच्यते ४५

म्नातं इति तृतीयेनान्वयः अस्येत्यनेनोक्तं सर्गस्थित्यप्ययानामीशस्य हरेर्याथात्म्यं तत्त्वं ४२ अनेन कृतं हरेर्गुण
कर्मानुवर्णनं चेत्यर्थः परावरेषां देवदैत्यादीनां यानि स्थानानि तेषां व्यत्ययो विपर्यासः ४३ आध्यात्मिकं
आत्मानात्मविवेकादि ४४ एतत्श्रवणादिफलमाह य इति द्वाभ्यां एतच्छ्रुत्वा यः कीर्तयेत् ४५

एतत् एतां मृगेंद्रस्य लीलां तामेवाह दैत्येंद्रस्य यूथपानां च वधं यः शुचिः सन् पठेत् पुण्यमनुभावं भावं मतिनि
श्चयं वा लोकं वैकुंठं ४६ अहो प्रह्लादस्य भाग्यं येन देवो दृष्टः वयं तु मंदभाग्या इति विषीदंतं तं प्रत्याह यूयमिति त्रिभिः येषां
युष्माकं गृहान्मुनयो भियंति सर्वतः समायांति तत्कस्य हेतोः एषु गृहेषु नराकारं गूढं सत् श्रीकृष्णाख्यं परं ब्रह्म
साक्षाद्वसतीति ४७ ननु कृष्णोस्माकं मातुलेयः कथं ब्रह्मेत्युच्यते तत्राह स वा इति सोयं ब्रह्मैव कथंभूतः महद्भिर्विमृग्यं

एतद्य आदिपुरुषस्य मृगेंद्रलीलां दैत्येंद्रयूथपवधं प्रयतः पठेत दैत्यात्मजस्य च सतां प्रवरस्य पुण्यं
श्रुत्वानुभावमकुतोभयमेति लोकं ४६ यूयं नृलोके बत भूरिभागा लोकं पुनाना मुनयोभियंति ये
षां गृहानावसतीति साक्षात् गूढं परं ब्रह्म मनुष्यलिंगं ४७ स वा अयं ब्रह्म महद्विमृग्यकैवल्यनि
र्वाणसुखानुभूतिः प्रियः सुहृद्वः खलु मातुलेय आत्मार्हणीयो विधिकृद्गुरुश्च ४८ न यस्य साक्षाद्भव
पद्मजादिभी रूपं धिया वस्तुतयोपवर्णितं मौनेन भक्त्योपशमेन पूजितः प्रसीदतामेष स सात्वतां पतिः ४९

यत्कैवल्यं निर्वाणसुखं निरुपाधिः परमानंदः तदनुभूतिस्वरूपः वः युष्माकं खलु प्रियः सुहृदित्यादिरूपो भवति विधिकृत्
आज्ञानुवर्ती ४८ ननु परं ब्रह्म चेत् कथं द्व्यष्टसहस्रस्त्रीषु रतिः कथं वा धर्माद्याचरणं तस्येत्यत आह न यस्य रूपं तत्त्वं
वादिभिरपि धिया स्वबुद्ध्या वस्तुतया इदमित्थमिति साक्षान्नोपवर्णितं स युष्माकं स्वयमेव प्रसन्नः अस्माकं तु मौ
नादिसाधनैस्तत्प्रसादः प्रार्थनीय एवेत्याह मौनेनेति स एष सात्वतां पतिर्नः प्रसीदतु नहि प्रह्लादस्य गृहे परं ब्रह्म व
सति न च तद्दर्शनाय मुनयस्तद्गृहानभियंति न च तस्य मातुलेयादिरूपेण वर्तते न च स्वयमेव प्रसन्नः अतो यूयमेव तेभ्योपि
त

भा०स०
५५

नन्वन्येदुःकरंत्रिपुरदाहादिकंश्रीरुद्रःकृतवान्सएवंकृतईश्वरोप्यस्यतत्त्वंनजानातीतिकथमित्यपेक्षायांतस्याप्ये
तत्साहाय्यादेवासौप्रभावोनकेवलस्येतिकृष्णमाख्यानमुपक्षिपतिसएषइति ५० राजायुधिष्ठिरउवाच जगदीशितु
र्देवस्यकीर्त्तिंकस्मिन्कर्मणिमयोहतवान् ५१ अनेनश्रीकृष्णेनोपबृंहितैःसंवर्द्धितैः ५२ हैमीरौप्यायायसीचे

सएषभगवान्राजन्व्यतनोद्विहतंयशः पुरारुद्रस्यदेवस्यमयेनानंतमायिना ५० राजोवाच कस्मि
न्कर्मणिदेवस्यमयोहन्जगदीशितुः यथाचोपचिताकीर्त्तिःकृष्णेनानेनकथ्यतां ५१ नारदउवाच नि
र्जिताअसुरादेवैर्युध्यनेनोपबृंहितैः मायिनांपरमाचार्यंमयंशरणमाययुः ५२ सनिर्मायपुरस्तिस्रोहैमी
रौप्यायसीर्विभुः दुर्लक्ष्यापायसंयोगादुर्वितर्क्यपरिच्छदाः ५३ ताभिस्तेसुरसेनान्योलोकांस्त्रीन्सेश्वरान्
नृप स्मरंतोनाशयांचक्रुःपूर्ववैरमलक्षिताः ५४ ततस्तेसेश्वरालोकाउपासाद्येश्वरंविभो त्राहिनस्ताव
कान्देवविनष्टांस्त्रिपुरालयैः ५५ अथानुगृह्यभगवान्माभैष्टेतिसुरान्विभुः शरंधनुषिसंधाय
पुरेष्वस्त्रंव्यमुंचत ५६ ततोग्निवर्णाइषवउत्पेतुःसूर्यमंडलात् यथामयूखसंदोहानादृश्यंतपुरोयतः
५७

तिस्रःपुरोनिर्मायतेभ्योददावितिशेषःदुर्लक्ष्योअपायसंयोगोगमनागमनेयासांदुर्वितर्क्याःपरिच्छदायासु
५३ असुराणांसेनान्यःसेनापतयःपूर्ववैरंस्मरंतः ५४ ५५ अस्त्रंअभिमंत्रितंशस्त्रंअनभिमंत्रितंपुरेषुव्य
मुंचत् ५६ ततःशरात्सूर्यमंडलान्मयूखसंदोहःरश्मिसमूहाइवयतःयेभ्यः ५७

राम
५५

कूपरसेस्वयंनिर्मितकूपामृते ५८ वज्रसाराःवज्रवद्दृढांगाःमहौजसोमहाबलाःमेघदलनाःमेघभेदिनोविद्युद्रू
पावह्नयइव ५९ ६० कालेमध्याह्ने ६१ ६२ आत्मनोवाअन्यस्यवाद्वयोरपिवादैवेनादिष्टमुपकल्पितंअपोहितुंप

तैःस्पृष्टाव्यसवःसर्वेनिपेतुःस्मपुरौकसः तानानीयमहायोगीमयःकूपरसेक्षिपत् ५८ सिद्धामृतर
सःस्पृष्टावज्रसारामहौजसः उत्तस्थुर्मेघदलनावैद्युताइववह्नयः ५९ विलोक्यभग्नसंकल्पंविमन
स्कंवृषध्वजं तदायंभगवान्विष्णुस्तत्रोपायमकल्पयत् ६० वत्सआसीत्तदाब्रह्मास्वयंविष्णुरयंहि
गौः प्रविश्यत्रिपुरंकालेरसकूपामृतंपपौ तेसुराह्यपिपश्यंतोनन्यषेधन्विमोहिताः ६१ तद्विज्ञायम
हायोगीरसपालानिदंजगौ स्वयंविशोकःशोकार्त्तान्स्मरन्दैवगतिंचतां ६२ देवोसुरोनरोन्योवानेश्व
रोस्तीहकश्चन आत्मनोन्यस्यवादिष्टंदैवेनापोहितुंद्वयोः ६३ अथासौशक्तिभिःस्वाभिःशंभोःप्रा
धनिकंव्यधात् धर्मज्ञानविरक्त्यृद्धितपोविद्याक्रियादिभिः ६४ रथंसूतंध्वजंवाहान्धनुर्वर्मशरादि
यत् सन्नद्धोरथमास्थायशरंधनुरुपाददे ६५ शरंधनुषिसंधायमुहूर्त्तेभिजितीश्वरः ददाहतेनदुर्भे
द्याहरोथत्रिपुरोनृप ६६

रिहर्तुंइहकश्चिदपीश्वरःसमर्थोनास्ति ६३ असौश्रीकृष्णःप्रधनंसंग्रामस्तत्साधनं ६४ ६५ अभिजिति
मध्याह्ने ६६

विमानशतानि संकुलानि संकीर्णानि येषां ते देवादयः ६७ आदित आरभ्य स्कंधार्थं निगमयति एवंविधानीति
नृलोके नराकारमात्मनो विडंबमानस्य अनुकुर्वतः ६८ ६९ इति सप्तमे दशमः एकादशे नृणां धर्माः साधारण्ये
न वर्णिताः विशेषेण च वर्णानां मुख्यामुख्याश्च योषितां तद्वदंशात्रिंशल्लक्षणभक्तियोगाबुदीरितौ अथ पंचभिरध्या
यैः कर्मयोगोऽनुवर्ण्यते दैत्यपतेः प्रह्लादस्य साधूनां सभासु सभाजितं सत्कृतं ईहितं चरितं श्रुत्वा पुनर्नारदं पप्रच्छ

दिवि दुंदुभयो नेदुर्विमानशतसंकुलाः देवर्षिपितृसिद्धैश्च जयेति कुसुमोत्करैः अवाकिरन् जगुर्हृष्टा ननृ
तुश्चाप्सरोगणाः ६७ एवं दग्ध्वा पुरस्तिस्रो भगवान् पुरहा नृप ब्रह्मादिभिः स्तूयमानः स्वधाम प्रत्यपद्यत
६८ एवंविधान्यस्य हरेः स्वमायया विडंबमानस्य नृलोकमात्मनः वीर्याणि गीतान्यृषिभिर्जगद्गुरोर्लो
कान्पुनानान्यथ किं वदामि किं ६९ इति श्रीभागवते महापुराणे सप्तमस्कंधे युधिष्ठिरनारदसंवादे त्रि
पुरविजयो नाम दशमोऽध्यायः श्रीशुक उवाच श्रुत्वेहितं साधुसभासभाजितं महत्तमाग्रण्य उरुक्र
मात्मनः युधिष्ठिरो दैत्यपतेर्मुदायुतः पप्रच्छ भूयस्तनयं स्वयंभुवः १ श्रीयुधिष्ठिर उवाच भगवन्
श्रोतुमिच्छामि नृणां धर्मं सनातनं वर्णाश्रमाचारयुतं यत्पुमान्विंदते परं २
कथंभूतस्येहितं महत्तमानामग्रण्यः मुख्यस्य तत्र हेतुः उरुक्रमे आत्मा मनो यस्य १ श्रवणेच्छायां हेतुः यत् यतो धर्मात्
तुष्टितात्पर्यं ज्ञानं भक्तिं च विंदति २

ननु स्मृतिकारैर्धर्मः उक्त एव तत्राह नारायणपरा इति ४ अजाय श्रीनारायणाय तस्यैव मुखादाकूतं ५ तन्मुखादात्मनः
श्रवणं संभावयन् विशिनष्टि यदिति ५ प्रथमं तावद्धर्मे प्रमाणमाह धर्मेति धर्मस्य मूलं प्रमाणं स्मृतं च स्मृतिः त
द्विदां वेदविदां येन चात्मा मनः प्रसीदति तुष्यति तथा च याज्ञवल्क्यः श्रुतिः स्मृतिः सदाचारः स्वस्य च प्रियमा
त्मनः सम्यक् संकल्पजः कामो धर्ममूलमिदं स्मृतमिति मनुश्च वेदोऽखिलो धर्ममूलं स्मृतिशीले च तद्विदां आ

भवान्प्रजापतेः साक्षात् आत्मजः परमेष्ठिनः सुतानां संमतो ब्रह्मन् तपोयोगसमाधिभिः ३ नाराय
णपरा विप्रा धर्मं गुह्यं परं विदुः करुणाः साधवः शांतास्त्वद्विधा न तथापरे ४ नारद उवाच नत्वा भगव
तेऽजाय लोकानां धर्महेतवे वक्ष्ये सनातनं धर्मं नारायणमुखाच्छ्रुतं ५ योऽवतीर्यात्मनोंऽशेन दाक्षायण्यां तु
धर्मतः लोकानां स्वस्तयेऽध्यास्ते तपो बदरिकाश्रमे ६ धर्ममूलं हि भगवान् सर्ववेदमयो हरिः स्मृतं च तद्वि
दां राजन् येन चात्मा प्रसीदति ७ सत्यं दया तपः शौचं तितिक्षेक्षा शमो दमः अहिंसा ब्रह्मचर्यं च त्यागः स्वा
ध्याय आर्जवं ८
चारश्चैव साधूनामात्मनस्तुष्टिरेव चेति १ तत्र तावन्नरमात्रसाधारणं धर्ममाह सत्यमिति पंचभिः तपः एकाद
श्युपवासादि ईक्षा युक्तायुक्तविवेकः शमो मनसः संयमः दमो बाह्येंद्रियनिग्रहः स्वाध्यायो यथोचितज

भा० स० ५७ संतोषो दैवलब्धेनालंबुद्धिः समदृशां महतां सेवा ग्राम्येहोपरमः प्रवृत्तकर्मभ्यो निवृत्तिः विपर्ययेहेक्षा निष्फल
क्रियाणामीक्षणं मौनं वृथालापनिवृत्तिः आत्मविमर्शनं देहादिव्यतिरिक्तात्मानुसंधानं ९ आत्मेति दैवमिति
च बुद्धिः १० अस्य श्रीकृष्णस्य श्रवणादयो नव इज्या अर्चनं ११ एवं त्रिंशल्लक्षणवान् १२ इदानीं वर्णधर्मान्वि
वक्तुं द्विजानां लक्षणमाह संस्कारा मंत्रवंतो गर्भाधानादयो यस्मिन्नविच्छिन्नाः स द्विजः तथा च स्मृतिः विवाहमात्रसंस्का

संतोषः समदृक्सेवा ग्राम्येहोपरमः शनैः नृणां विपर्ययेहेक्षा मौनमात्मविमर्शनं ९ अन्नाद्यादेः संविभागो भूते
भ्यश्च यथार्हतः तेष्वात्मदेवताबुद्धिः सुतरां नृषु पांडव १० श्रवणं कीर्तनं चास्य स्मरणं महतां गतेः सेवेज्याव
नतिर्दास्यं सख्यमात्मसमर्पणं ११ नृणामयं परो धर्मः सर्वेषां समुदाहृतः त्रिंशल्लक्षणवान् राजन्सर्वात्मा
येन तुष्यति १२ संस्कारा यत्राविच्छिन्नाः स द्विजोऽजो जगाद यं वैदिकाः इज्याध्ययनदानानि विहितानि द्विजन्मनां राम ५७
जन्मकर्मावदातानां क्रियाश्चाश्रमचोदिताः १३
रः शूद्रोपि लभतां सदा न केनचित्समसृजद्ब्रह्मसात्तं प्रजापतिरिति श्रुतिश्च गायत्र्या ब्राह्मणमसृजत त्रिष्टुभा रा
जन्यं जगत्या वैश्यं न केनचिच्छूद्रमिति अतो विवाहव्यतिरिक्तसंस्कारस्यानावश्यकत्वात् उपनयनस्य तु स
र्वथा निषेधान्न तस्य द्विजत्वमित्यर्थः पाठांतरे वैदिकादय इति गर्भाधानादय इत्यर्थः त्रैवर्णिकानामावश्यकान् धर्मा
नाह इज्येति जन्मनाविशुद्धेन कुलेन कर्मणा च आचारेण अवदातानां शुद्धानां दुःकुलानां दुराचाराणां च नैतानि
विहितानीत्यर्थः ब्रह्मचर्यादि आश्रमविहिताः क्रियाश्च शूद्रस्य वर्णधर्म एव आश्रमस्तेष्वनधिकारात्
१३

ब्राह्मणादीनां चतुर्णामपि वृत्तिरूपान्धर्मानाह विप्रस्येति सार्द्धैः सप्तभिः विप्रस्य षट्कर्माणि विहितानीत्यनुषंगः त
त्राध्यापनं याजनं प्रतिग्रहश्च जीविका यथाह मनुः षण्णां तु कर्मणामस्य त्रीणि कर्माणि जीविका याजनाध्यापने चैव वि
शुद्धाच्च प्रतिग्रह इति अन्यस्य क्षत्रियस्य अप्रतिग्रह इति प्रतिग्रहातिरिक्तं याजनमध्यापनं चापद्यनुज्ञानाति व
क्ष्यति वानंतरमेव ऋतेराजन्यमिति श्रूयते च अश्वपतिकैकयप्रभृतीनां क्षत्रियाणामुपदेष्टृत्वादि प्रजापालनेधिकृ

विप्रस्याध्ययनादीनि षडन्यस्याप्रतिग्रहः राज्ञो वृत्तिः प्रजागोप्तुरविप्राद्वा करादिभिः १४ वैश्यस्तु वार्ता
वृत्तिश्च नित्यं ब्रह्मकुलानुगः शूद्रस्य द्विजशुश्रूषा वृत्तिश्च स्वामिनो भवेत् १५ वार्ता विचित्रा शालीनयाया
वरशिलोंछनं विप्रवृत्तिश्चतुर्द्धेयं श्रेयसी चोत्तरोत्तरा १६ जघन्यो नोत्तमां वृत्तिमनापदि भजेन्नरः ऋते
राजन्यमापत्सु सर्वेषामपि सर्वशः १७
तस्य क्षत्रियस्य वृत्त्यंतरमाह राज्ञ इति आदिशब्देन दंडशुल्कादि १४ वार्ता कृषिवाणिज्यादिलक्षणा वृत्तिर्यस्य सः
शूद्रस्य द्विजशुश्रूषा विहिता स्वामिनो द्विजस्य तु शुश्रूषा वृत्तिश्च भवेत् १५ वार्ता विचित्रा शालीनयायावरशि
लोंछनं विप्रवृत्तिश्च स्य मुख्यानुकल्पत्वेन वृत्त्यंतराण्याह वार्ता विचित्रा कृष्यादिरूपा शालीनं याच्ञां विनैव
प्राप्तमयाचितं यायावरं प्रत्यहं धान्ययाच्ञा शिलं शालिक्षेत्रात् दोस्वामित्यक्त कणिशोपादानं उंछनं आपणादिपति
तकणोपादानं शिलोंछनं द्वयमेकीकृत्य चतुर्द्धेत्युक्तं श्रेयसी उत्तमा १६ वृत्तिष्वेवं व्यवस्थां दर्शयन्नापद्धर्मानाह जघ
न्यो नीचः उत्तमां अध्ययनादिरूपां ऋते राजन्यं क्षत्रियस्तु प्रतिग्रहादन्यां भजेत १७

ना०स० चतुर्विधां पूर्वोक्तां विप्रवृत्तिमितरेषामपि दर्शयन्नाह ऋतामृताभ्यामपि १८ श्लोकं व्याचष्टे ऋतमिति १९ त
५८ योस्तद्वर्जने हेतुमाह सर्ववेदमय इति २० वर्णानामभिव्यंजकरूपान्धर्मानाह शम इति चतुर्भिः अच्युतात्मत्वं
श्रीविष्णुपरत्वं २१ शौर्यं युद्धोत्साहः वीर्यं प्रभावः तेजः प्रागल्भ्यं २२ २३ अमंत्रयज्ञः नमस्कारेणैव पंच

ऋतामृताभ्यांजीवेतमृतेनप्रमृतेनवा सत्यानृताभ्यांजीवेतनश्ववृत्त्याकथंचन १८ ऋतमुंछशि
लंप्रोक्तममृतंयदयाचितं मृतंतुनित्ययाच्ञास्यात्प्रमृतंकर्षणंस्मृतं सत्यानृतंतुवाणिज्यंश्ववृ
त्तिर्नीचसेवनं १९ वर्जयेत्तांसदाविप्रोराजन्यश्चजुगुप्सितां सर्ववेदमयोविप्रःसर्वदेवमयोनृपः
२० शमोदमस्तपःशौचंसंतोषःक्षांतिरार्जवं ज्ञानंदयाच्युतात्मत्वंसत्यंचब्रह्मलक्षणं २१ शौर्यं
वीर्यंधृतिस्तेजस्त्यागश्चात्मजयःक्षमा ब्रह्मण्यताप्रसादश्चरक्षाचक्षत्रलक्षणं २२ देवगुर्वच्युते राम
भक्तिस्त्रिवर्गपरिपोषणं आस्तिक्यमुद्यमोनित्यंनैपुण्यंवैश्यलक्षणं २३ शूद्रस्यसन्नतिःशौ ५८
चंसेवास्वामिन्यमायया अमंत्रयज्ञोह्यस्तेयंसत्यंगोविप्ररक्षणं २४ स्त्रीणांचपतिदेवानांतच्छु
श्रूषानुकूलता तद्बंधुष्वनुवृत्तिश्चनित्यंतद्व्रतधारणं २५

यज्ञान्न हापयेदिति २४ स्त्रीधर्मानाह स्त्रीणामिति पंचभिः पतिरेव देवो यासां तस्य पत्युः शुश्रूषात
दनुकूलताच तस्य तद्व्रतं नियमस्तस्य धारणं एतच्चतुष्टयं पतिव्रतानां लक्षणं धर्मश्च २५

किंच संमार्जनोपलेपाभ्यामित्यादेः पतिं भजेदित्युत्तरेणान्वयः परिमृष्टा उद्वर्तनादिना निर्मलीकृताः परि
च्छदा गृहोपकरणानि यया २७ किंच संतुष्टा यथालाभेन तावन्मात्रभोगे अलोलुपा दक्षा अनलसा प्रिया
सत्या च वाग्यस्याः सर्वत्रापि अप्रमत्ता अवहिता अपतितं महापातकशून्यं यथाह याज्ञवल्क्यः आशुद्धेः सं
प्रतीक्ष्यो हि महापातकदूषित इति २८ तत्परा सती भजेत श्रीर्हरिमिव हर्यात्मना पत्या सह २९ प्रतिलोम

संमार्जनोपलेपाभ्यांगृहमंडलवर्तनैः स्वयंचमंडितानित्यंपरिमृष्टपरिच्छदा २६ कामैरुच्चाव
चैःसाध्वीप्रश्रयेणदमेनच वाक्यैःसत्यैःप्रियैःप्रेम्णाकालेकालेभजेत्पतिं २७ संतुष्टालोलु
पादक्षाधर्मज्ञाप्रियसत्यवाक् अप्रमत्ताशुचिःस्निग्धापतिंत्वपतितंभजेत् २८ यापतिंहरि
भावेनभजेच्छ्रीरिवतत्परा हर्यात्मनाहरेर्लोकेपत्याश्रीरिवमोदते २९ वृत्तिःसंकरजातीनांतत्त
त्कुलकृताभवेत् अचौराणामपापानामंत्यजांतेवसायिनां ३०

जानां वृत्तिमाह वृत्तिरिति तत्तत्कुलकृता कुलपरंपराप्राप्ता परंपराप्राप्तमपि चौर्यहिंसादिकं प्रतिषेधति अचौरा
णामपापानां चेति तत्र प्रसंगान्नार्थकांश्चित्प्रतिलोमजविशेषानाह अंत्यजेति रजकश्चर्मकारश्च नटो बुरुड एव च
केवर्तमेदभिल्लाश्च सप्तैते अंत्यजाः स्मृताः अंतेवसायिनस्तु चांडालपुक्कसमातंगादयः तेषां परंपराप्राप्तैव
वस्त्रनिर्णेजनादिवृत्तिरित्यर्थः ३०

भा० स० ५९ श्रेष्ठादपिपरधर्मात्नीचोपिस्वधर्मएवश्रेयानित्याहप्रायइतिस्वभावेनसत्वादिप्रकृत्याविहितोधर्मःशर्मकृ
त्सुखहेतुःस्मृतःकैर्वेददृग्भिर्वेददृक्भिः येषांतैः भगवताचोक्तं श्रेयान्स्वधर्मोविगुणःपरधर्मात्स्वनुष्ठितादिति
३१ ननुस्वाभाविकस्यकर्मणोबंधहेतुत्वात्कथंसुखहेतुत्वंतत्राहवृत्त्येति ३२ ननुकाम्यानिकर्माणिकुर्वतस्त

प्रायःस्वभावविहितोनृणांधर्मोयुगेयुगे वेददृग्भिःस्मृतोराजन्प्रेत्यचेहचशर्मकृत् ३१ वृत्त्या
स्वभावकृतयावर्तमानःस्वकर्मकृत् हित्वास्वभावजंकर्मशनैर्निर्गुणतामियात् ३२ उप्यमानं
मुहुःक्षेत्रंस्वयंनिर्वीर्यतामियात् नकल्प्यतेपुनःसूत्याउप्तंबीजंचनश्यति ३३ एवंकामाशयंचि
त्तंकामानामतिसेवया विरज्येतयथाराजन्नाग्निवत्कामबिंदुभिः ३४

त्फलभोगपरस्यकथंनैर्गुण्यंस्यात् तदुक्तंप्रह्लादेनश्रोपस्थजैह्व्यंबहुमन्यमानःकथंविरज्येतदुरंतमोहइत्यादितत्रा राम ५९
धिकारभेदेनव्यवस्थांसदृष्टांतमाहउप्यमानमितिद्वाभ्यांपुनःसूत्यैसस्यकृषिसंभवाय ३३ कामाशयंप्राग्रतवासनारूपेणय
स्मिन्तत् अयंभावःउत्कटवासनाविष्टस्यसहसैवकामत्यागासंभवादेकोनियमेनबहुशःकामान्भुंजानस्यैवनित्य
नैमित्तिकैःविशुद्धचेतसस्तद्दोषदर्शनेनतयातिसौभिक्षुसुखानामिवशनैर्विरागोभवतियथासबीजंक्षेत्रंशनैर्निर्वीर्यं
भवतियथावाप्रज्वलितोग्निर्नघृतबिंदुभिःशाम्यतिमहताघृतपूरेणशाम्यत्येवतद्वत् प्रह्लादेनतुस्वकौमारएवनि
वृत्तस्ययद्वोमंदवासनानामधिकारेणतदुक्तंतच्चैवबालान्दूषितधियोह्यद्धारामेरतिर्हितैरिति अतःसर्वमनवद्यं ३४

×यस्ययल्लक्षणंप्रोक्तंपुंसोवर्णाभिव्यंजकं । यदन्यत्रापिदृश्येततत्तेनैवविनिर्दिशेत् ॥ ३५॥ ॥इतिश्रीभागवते० सप्त० एकादशोध्यायः ×४

शमादिभिरेवब्राह्मणादिव्यवहारोमुख्यःनजातिमात्रादित्याहयस्येतियद्यदिअन्यत्रवर्णांतरेपिदृश्येततद्वर्णां
तरंतेनैवलक्षणनिमित्तेनैववर्णेनविनिर्दिशेन्नतुजातिनिमित्तेनेत्यर्थः ३५ सप्तमेएकादशः॥द्वादशेवर्ण्य
तेधर्मोब्रह्मचारिवनस्थयोः चतुर्णामाश्रमाणांचसाधारण्येनकश्चन १ वर्णादीनांधर्माउक्ताःइदानीमा

४श्रीनारदउवाच ब्रह्मचारीगुरुकुलेवसन्दांतोगुरोर्हितं आचरन्दासवन्नीचोगुरौसुदृढसौहृदः १
सायंप्रातरुपासीतगुर्वग्न्यर्कसुरोत्तमान् संध्येउभेचयतवाक्जपन्ब्रह्मसमाहितः २ छंदांस्य
धीयीतगुरोराहूतश्चेत्सुयंत्रितः उपक्रमेवसानेचचरणौशिरसानमेत् ३ मेखलाजिनवासां
सिजटादंडकमंडलून् बिभृयादुपवीतंचदर्भपाणिर्यथोदितं ४ सायंप्रातश्चरेद्भैक्ष्यंगुरवेतन्नि
वेदयेत् भुंजीतयद्यनुज्ञातोनोचेदुपवसेत्क्वचित् ५

श्रमधर्माउच्यंतेतत्रास्मिन्द्वादशेध्यायेब्रह्मचारिवनस्थयोरसाधारणाश्चतुर्णांसाधारणाश्चोच्यंतेत्रयोदशेयतेर्ध
र्माश्चतुर्दशेगृहस्थस्यपंचदशेसर्वधर्मसारसंग्रहःब्रह्मचारीगुरुकुलेवसन्गुर्वादीनुपासीतेत्युत्तरेणान्वयः १
ब्रह्मगायत्रींजपन्संध्याद्वयमप्युपासीत उभेसंध्येतुयतवाक्भवेत्सायंप्रातःसंध्याकालनिमित्तमौनंकुर्यादित्यर्थः
२ गुरोश्चरणौनमेत् ३ यथोदितंपालाशोदंडोब्राह्मणस्येत्यादिनियममनतिक्रम्यजटाधारणंतुकेशसाधनत्या
गमात्रं ४ ५

स्फुटी लोमितत्तुक्तृस्य: श्रद्धानोजितेंद्रियः यावदर्थं व्यवहरेत्स्त्रीषु स्त्रीनिर्जितेषु च ६ वर्जयेत्प्रमदागाथामगृहस्थो बृहद्व्रतः इंद्रियाणि प्र
माथीनि हरंत्यपि यतेर्मनः ७ केशप्रसाधनोन्मर्दस्नपनाभ्यंजनादिकं गुरुस्त्रीभिर्युवतिभिः कारयेन्नात्मनो युवा ८ नन्वग्निः प्रमदानाम घृतकुंभसमः पुमान् सुतामपि रहो जह्यादन्यदा यावदर्थकृत् ९

ना० स० ६६ यावदर्थं यथोपयोगमेव ६ बृहद्व्रतः ब्रह्मचर्यवान् गृहस्थव्यतिरिक्तः सर्वोपि गाथामपि वर्जयेत् तत्र हेतुः इंद्रियाणि
बलवंति संयतस्यापि मनो हरंतीति ७ ८ नकारयेदित्यत्र हेतुः नन्विति रहः एकांते अन्यदा केशप्रसाधनादिव्यतिरिक्ता
वसरे अनेकांतावसरे वा यावदर्थं तदुक्तं कुर्यात् ९ ननु मिथ्यात्वादतिकश्मलत्वाच्च स्वयंत्यक्ष्यायंस्त्र्यादिजल्पादिनिको
यमतिनिर्बंधस्तत्राह कल्पयित्वेति आत्मना स्वरूपसाक्षात्कारेण इदं देहेंद्रियादि आभासमात्रं कल्पयित्वा निश्चित्य

कल्पयित्वात्मना यावदाभासमिदमीश्वरः द्वैतं तावन्न विरमेत्ततो ह्यस्य विपर्ययः १० एतत्सर्वं गृहस्थस्य स
माम्नातं यतेरपि गुरुवृत्तिर्विकल्पेन गृहस्थस्यर्तुगामिनः ११ अंजनाभ्यंजनोन्मर्दस्त्र्यवलेखामिषं मधु
स्रग्गंधालेपालंकारांस्त्यजेयुर्ये धृतव्रताः १२ उषित्वैवं गुरुकुले द्विजोधीत्यावबुध्य च त्रयीं सांगोप
निषदं यावदर्थं यथाबलं १३

यावदसौ जीव ईश्वरः स्वतंत्रो न भवेत् तावद्द्वैतं अहं पुमानियं स्त्रीत्यादिभेदो न विरमेत् ततः किमत आह ततो हि द्वैतात् विपर्ययः राम ६०
गुणाध्यासेन भोग्यताबुद्धिः अतो जह्यादेवेत्यर्थः १० एतत्सर्वं स्फुटीलइत्याद्युक्तं गृहस्थस्य विशेषमाह गुरुवृत्तिरिति ११ अं
जनादीनामामिषांतानां द्वैक्यं अंजनं शरीरस्य अभ्यंजनं शिरसः स्त्रियं प्रति अवलेखं चित्रकर्म स्त्री कुद्या दोलेखनं वान वां
निरीक्षणं वा अत्र अभ्यंगादि स्वरूपतो निषिध्यते पूर्वं तु कथंचिदापदि आत्मनि स्त्रीकर्तृकं निषिद्धमिति भेदः १२ अंगैः शि
क्षादिभिः उपनिषद्भिश्च सहितां वेदत्रयीमधीत्य अवबुध्य च तदर्थं च विचार्य यावदर्थं स्वाधिकारानुसारेण १३

कु

यदीश्वरः शक्तस्तर्हि गुरोः कामं यथेष्टं तं वरं दत्वा यथाधिकारं गृहस्थाद्याश्रमं स्वीकुर्यात् तत्रैव वा वसेत् नैष्ठिकः स्यादित्य
म र्थः १४ स्वधीभिः स्वाश्रमैर्भूतैर्जीवैः सह तन्नियंतृतया १५ चरन् एवमाचरन् विदितं विज्ञानं विज्ञेयं येन सः १६ ऋषि
लोकं महर्लोकं १७ अकृष्टं अकृष्टपच्यं अकालतः पाककालात्पूर्वमेवानिष्पन्नमित्यर्थः अग्निपक्वं फलादि आ

दत्वा वरमनुज्ञातो गुरोः कामं यदीश्वरः गृहं वनं वा प्रविशेत्प्रव्रजेत्तत्र वा वसेत् १४ स्वधामभिः स्वाश्रयैः
अग्नौ गुरावात्मनि च सर्वभूतेष्वधोक्षजं भूतैः स्वधामभिः पश्येदप्रविष्टं प्रविष्टवत् १५ एवंविधो ब्र
ह्मचारी वानप्रस्थो यतिर्गृही चरन्विदितविज्ञानः परं ब्रह्माधिगच्छति १६ वानप्रस्थस्य वक्ष्यामि निय
मान्मुनिसंमतान् यानातिष्ठन्मुनिर्गच्छेदृषिलोकमिहांजसा १७ न कृष्टपच्यमश्नीयादकृष्टं वाप्य
कालतः अग्निपक्वमथामं वा अर्कपक्वमुताहरेत् १८ वन्यैश्चरुपुरोडाशान्निर्वपेत्कालचोदितान्
लब्धे नवे नवेऽन्नाद्ये पुराणं तु परित्यजेत् १९ अग्न्यर्थमेव शरणमुटजं वाद्रिकंदरं श्रयेत हिमवाय्व
ग्निवर्षार्कातपषाट् स्वयं २० केशरोमनखश्मश्रुमलानि जटिलो दधत् कमंडल्वजिने दंडवल्कला
ग्निपरिच्छदान् २१

हरेत् अश्नीयात् १८ वन्यैर्नीवारादिभिः कालचोदितान् नित्यान् पुराणं पूर्वसंचितं १९
हिमादीन् सहत इति तथा केशादीन् मलं वा अक्षालनेन धारयन् कमंडल्वादींश्च दधत् २१

स्फुरीलो मितजुकृत्स्नः श्रद्धानो जितेंद्रियः यावदर्थं व्यवहरेत्स्त्रीषु स्त्रीनिर्जितेषु च ६ वर्जयेत्प्रमदागाथामगृहस्थो बृहद्व्रतः इंद्रियाणि प्र
माथीनि हरंत्यपि यतेर्मनः ७ केशप्रसाधनोन्मर्दस्नपनाभ्यंजनादिकं गुरुस्त्रीभिर्युवतिभिः कारयेन्नात्मनो युवा ८ ननु अग्निः प्रमदा नाम घृतकुंभसमः पुमान् सुतामपि रहो जह्यादन्यदा यावदर्थकृत् ९

भा० स० ६६ यावदर्थं यथोपयोगमेव ६ बृहद्व्रतः ब्रह्मचर्यवान् गृहस्थव्यतिरिक्तः सर्वोपि गाथामपि वर्जयेत् तत्र हेतुः इंद्रियाणि
बलवंति संयतस्यापि मनो हरंतीति ७ ८ न कारयेदित्यत्र हेतुः नन्विति रहः एकांते अन्यदा केशप्रसाधनादिव्यतिरिक्ता
वसरे अनेकांतावसरे वा यावदर्थं तदुक्तं कुर्यात् ९ ननु मिथ्यात्वादतिकश्मलत्वाच्च स्वयं त्यक्ष्याम्येवायं स्त्र्यादि जह्यादिति को
यमतिनिर्बंधस्तत्राह कल्पयित्वेति आत्मना स्वरूपसाक्षात्कारेण इदं देहेंद्रियादि आभासमात्रं कल्पयित्वा निश्चित्य

कल्पयित्वात्मना यावदाभासमिदमीश्वरः द्वैतं तावन्न विरमेत्ततो ह्यस्य विपर्ययः १० एतत्सर्वं गृहस्थस्य स
माम्नातं यतेरपि गुरुवृत्तिर्विकल्पेन गृहस्थस्यर्तुगामिनः ११ अंजनाभ्यंजनोन्मर्दस्त्र्यवलेखामिषं मधु
स्रग्गंधालेपालंकारांस्त्यजेयुर्ये धृतव्रताः १२ उषित्वैवं गुरुकुले द्विजोऽधीत्यावबुध्य च त्रयीं सांगोप
निषदं यावदर्थं यथाबलं १३ राम ६०

यावदसौ जीव ईश्वरः स्वतंत्रो न भवेत् तावद्द्वैतं अहं पुमान् इयं स्त्रीत्यादिभेदो न विरमेत् ततः किमत आह ततो हि द्वैतात् विपर्ययः
गुणाध्यासेन भोग्यताबुद्धिः अतो जह्यादेवेत्यर्थः १० एतत्सर्वं स्फुरील इत्याद्युक्तं गृहस्थस्य विशेषमाह गुरुवृत्तिरिति ११ अं
जनादीनामामिषांतानां द्वंद्वैक्यं अंजनं शरीरस्य अभ्यंजनं शिरसः स्त्रियं च अवलेखं च चित्रकर्म स्त्रीकुड्यादौ लेखनं वान यां
निरीक्षणं वा अत्राभ्यंगादिस्वरूपतो निषिध्यते पूर्वं तु कर्षवद्धि धापदि आत्मपरस्त्रीकर्तृकं निषिद्धमिति भेदः १२ अंगैः शि
क्षादिभिः उपनिषद्भिश्च सहितां वेदत्रयीमधीत्य अवबुध्य च तदर्थं च विचार्य यावदर्थं स्वाधिकारानुसारेण १३

कु

यदीश्वरः शक्तस्तर्हि गुरोः काममपेक्षितं वरं दत्वा यथाधिकारं गृहस्थाद्याश्रमं स्वीर्यात् तत्रैव वा वसेत नैष्ठिकः स्यादित्य
म र्थः १४ स्वधामभिः स्वाश्रमैर्भूतैर्जीवैः सह तन्नियंतृतया १५ चरन् एवमाचरन् विदितं विज्ञानं विज्ञेयं येन सः १६ ऋषि
लोकं महर्लोकं १७ अकृष्टं अकृष्टपच्यं अकालतः पाककालात्पूर्वमेवानिष्पन्नमित्यर्थः अर्कपक्वं फलादि आ

दत्वा वरमनुज्ञातो गुरोः कामं यदीश्वरः गृहं वनं वा प्रविशेत्प्रव्रजेत्तत्र वा वसेत् १४ स्वधामभिः स्वाश्रयैः
अग्नौ गुरावात्मनि च सर्वभूतेष्वधोक्षजं भूतैः स्वधामभिः पश्येदप्रविष्टं प्रविष्टवत् १५ एवंविधो ब्र
ह्मचारी वानप्रस्थो यतिर्गृही चरन् विदितविज्ञानः परं ब्रह्माधिगच्छति १६ वानप्रस्थस्य वक्ष्यामि निय
मान्मुनिसंमतान् यानातिष्ठन्मुनिर्गच्छेदृषिलोकमिहांजसा १७ न कृष्टपच्यमश्नीयादकृष्टं चाप्य
कालतः अग्निपक्वमथामं वा अर्कपक्वमुताहरेत् १८ वन्यैश्चरुपुरोडाशान्निर्वपेत्कालचोदितान्
लब्धे नवे नवेऽन्नाद्ये पुराणं तु परित्यजेत् १९ अग्न्यर्थमेव शरणमुटजं वाद्रिकंदरं श्रयेत हिमवाय्व
ग्निवर्षार्कातपषाट् स्वयं २० केशरोमनखश्मश्रुमलानि जटिलो दधत् कमंडल्वजिने दंडवल्कला

हरेत् अश्नीयात् १८ वन्यैर्नीवारादिभिः कालेचोदितान् नित्यान् पुराणं पूर्व ग्निपरिच्छदान् २१ संचितं १९
हिमादीन् सहत इति तथौ केशादीन् मलं च अक्षालनेन धारयन् कमंडल्वादींश्च दधत् २१

ना० स० ६२ कृच्छ्रतः तपःक्लेशाद्यथाबुद्धिर्न नश्येत्तथाचरेत् २२ द्वादशाब्दाद्यनंतरमपियदिधर्माद्यनुष्ठानेऽशक्तस्तर्हि वनएववं
सेत् यदितुज्ञानाभ्यासेयोग्यस्तर्हिसंन्यसेदित्युत्तराध्यायेवक्ष्यति तदुभयरहितस्यतुयत्कृत्यंतदाह यदात्व
कल्पः असमर्थः आन्वीक्षिक्यांज्ञानाभ्यासे २३ अनशनादिकरिष्यतः पूर्वकृत्यमाह आत्मनीत्यादियावद

चरेद्वनेद्वादशाब्दानष्टौवावत्सरान्मुनिः द्वावेकंवायथाबुद्धिर्नविपद्येतकृच्छ्रतः २२ यदाकल्पः स्व
क्रियायांव्याधिभिर्जरयाथवा आन्वीक्षिक्यांवाविद्यायांकुर्यादनशनादिकं २३ आत्मन्यग्नी
न्समारोप्यसंन्यस्याहंममात्मतां कारणेषुन्यसेत्सम्यक्संघातंतुयथार्हतः २४ खेखानिवायो
निश्वासांस्तेजस्यूष्माणमात्मवान् अप्स्वसृक्श्लेष्मपूयानि क्षितौशेषंयथोद्भवं २५ वाचमग्नौ
सवक्तव्यामिंद्रेशिल्पंकरावपि पदानिगत्यावयसिरत्योपस्थंप्रजापतौ २६ राम ६१
ध्यायसमाप्तिः यथार्हतः यथायोग्यंस्वकारणेष्वाकाशादिषुसंघातंदेहंन्यसेत्प्रविलापयेत् २४ ननुमिथ्याकार
[illegible] कल्पयित्वेति [illegible]
[illegible] स्वतंत्रो [illegible]
[illegible] ततः किमतआह [illegible]
तदेवविलज्य दर्शयति खेआकाशेखानिदेहगतछिद्राणि आत्मवान्धीमान् शेषं अस्थिमांसादिकठिनांशं
२५

रूप
एवंस्थूलशरीरस्यलयमुक्त्वालिंगशरीरस्याध्यात्मादित्रयस्यलयमाहवाचमित्यादिना तत्रयद्यपिय
थोद्भवंलयस्ययुक्तत्वादध्यात्मादीनांस्वस्वकारणेषुराजसाहंकारादिषुलयोवाच्यः तथापीहतेषांलयभा
वनेयमद्वितीयात्मप्रतिपत्तिपरेति यथाकथंचिल्लयेत्राव्येदेवतानांप्रवर्तकत्वेनप्राधान्यादिंद्रियतद्वि
षययोर्देवतासुलयः कथ्यते वक्तव्यसहितांवाचमग्नौन्यसेत् एवंसर्वत्र पदानिपादौवयसिविष्णौ २६ सना

वाचमग्नौसवक्तव्यामिंद्रेशिल्पंकरावपि पदानिगत्यावयसिरत्योपस्थंप्रजापतौ २६ मृत्यौपायुं
विसर्गंच यथास्थानंविनिर्दिशेत् दिक्षुश्रोत्रंसनादेनस्पर्शमध्यात्मनित्वचं २७ रूपाणि
चक्षुषाराजन्ज्योतिष्यभिनिवेशयेत् अप्सुप्रचेतसाजिह्वांघ्रेयैर्घ्राणंक्षितौन्यसेत् २८

देनशब्देनसह अध्यात्मनिवायौ अध्यात्मविदितिपाठेवायाविति ज्ञातव्यं २७ ज्योतिषिआदित्येरसगंध
योस्त्विंद्रियार्थाकर्षकत्वेनप्राधान्यविवक्षयादेवतासहितस्येंद्रियस्यविषयेलयमाहप्रचेतसासहजिह्वां
रसनंअप्सुरससरूपासु घ्राणशब्देनाश्विनोरप्युपल[illegible]णं अश्विन्यांसहघ्राणंघ्रेयैर्गंधैरुपलक्षिता
यांक्षिताविित्यर्थः २८

अमनोम नो रथेश्वं द्रे बुद्धिं बोध्यः कवौ परे । कर्माण्यध्यात्मना रुद्रे यदहं ममताक्रिया । सत्वेन चित्तं क्षेत्रज्ञं गुणैर्वैकारिकं परे ॥ २७ ॥ ५

ना०स० ६२ परे कवौ ब्रह्मणि अध्यात्मना अहंकारेण अध्यात्मतामिति पाठे कर्माण्यहंकारं चेत्यर्थः कथंभूते रुद्रे यद्य स्मादहंममतापूर्विका क्रियाभवति तस्मिन् सत्वेन चेतनया गुणैः गुणकार्यैः प्रागवशिष्टैर्देवैः सह यद्वा सत्वाहि निर्गुणैर्हेतुभूतैर्वैकारिकं मोक्तृत्वादिविकारवंतं क्षेत्रज्ञं परे निर्विकारे ब्रह्मणि २९ ननु विकारवतः कथं परे लयः स्यात् विकारहेतूनां सर्वोपाधीनां लयद्वारेणेत्याह अक्षितिं अद्भोज्योतिः तच्च नभः कूटस्थे

अप्क्षितिमपो ज्योतिष्यदो वायौ नभस्यमुं कूटस्थे तच्च महति तदव्यक्तेऽक्षरे च तत् ३० इत्यक्षरतयात्मानं चिन्मात्रमवशेषितं ज्ञात्वाद्वयोऽथ विरमेद्दग्धयोनिरिवानलः ३१ इति श्रीभागवते महापुराणे सप्तमस्कंधे द्वादशोऽध्यायः श्रीनारद उवाच कल्पस्त्वेवं परिव्रज्य देहमात्रावशेषितः ग्रामैकरात्रविधिना निरपेक्षश्चरेन्महीं १

अहंतत्वे तच्च कूटस्थं महति महत्तत्वे तदव्यक्ते प्रधाने तच्चाव्यक्तं अक्षरे परमात्मनि ३० इति सर्वोपाधिलयाद्धेतोः अवशेषितं चिन्मात्रमात्मानं क्षेत्रज्ञमक्षरतया ज्ञात्वा अद्वयः सन्विरमेत् दग्धकाष्ठो यथानलः ३१ इति सप्तमे द्वादशः ॥ त्रयोदशे यतेर्धर्माः साधकस्योच्यते महान् अवधूतेतिहासेन सिद्धावस्थाच वर्ण्यते १ एवं ध्यात्वा अकल्पो न रानादिकं कुर्यात् आन्वीक्षिक्यां कल्पस्त्वेवं ध्यात्वा परिव्रज्येति संबंधः कियदत्र त्याज्यं देह

राम ६२

८

[illegible]

कौपीनमाच्छाद्यते यावता तावन्मात्रं परं केवलं अन्यदिति वा त्यक्तं प्रैषोच्चारणात्पूर्वमेव २ ३ सदसतः परे कार्यकारणव्यतिरिक्ते ४ नन्वात्मानं परं ब्रह्मेति कथं सामानाधिकरण्यनिर्देशः नहि बद्धमुक्तयोरैक्यं संभवति तत्राह सुषुप्तेति सुषुप्तेर्हि तमसावृतमात्मतत्वं जाग्रत्स्वप्नयोस्तु विक्षिप्तं प्रकाशते संधौ तु न तमो नापि

बिभृयाद्यद्यसौ वासः कौपीनाच्छादनं परं त्यक्तं न लिंगदंडादेरन्यत्किंचिदनापदि २ एक एव चरेद्भिक्षुरात्मारामो नपाश्रयः सर्वभूतसुहृच्छांतो नारायणपरायणः ३ पश्येदात्मन्यदो विश्वं परे सदसतोऽव्यये आत्मानं च परं ब्रह्म सर्वत्र सदसन्मये ४ सुषुप्तिप्रबोधयोः संधावात्मनो गतिमात्मदृक् पश्यन्बंधं च मोक्षं च मायामात्रं न वस्तुतः ५ नाभिनंदेद्ध्रुवं मृत्युमध्रुवं वास्य जीवितं कालं परं प्रतीक्षेत भूतानां प्रभवाप्ययं ६

विक्षेपः अतस्तदा आत्मदृक् आत्मानं लक्षीकृत्य स्थितः सन् आत्मनो गतिं तत्वं पश्यन् अत एव बंधं मोक्षं च मायामात्रं पश्यन् आत्मानं परं ब्रह्म सर्वत्र पश्येदित्यन्वयः तदुक्तं योगग्रंथे निद्रादौ जागरस्यांते यो भाव उपजायते तं भावं भावयन्नित्यं मुच्यते नेतरो यतिरिति ५ अस्य देहस्य प्रभवोऽप्ययश्च यस्मात्तं कालं ६ राम

भा० स० ६२ असच्छास्त्रेषु अनात्मपरेषु जीविकां नक्षत्रविद्यादिवृत्तिं वादवादान् जल्पवितंडादिनिष्ठान् कंचन कमपि पक्षं निर्बंधेन न संश्रयेत् ७ नानुबध्नीत प्रलोभनादिना बलान्नापादयेत् आरंभान् मठादिव्यापारान् ८ परमहंसस्य विशेषमाह न यतेराश्रमो धर्मार्थः कथंभूतस्य महात्मनः तस्य लक्षणं शांतस्येत्यादि प्राय इत्यस्यायं भावः ज्ञानोत्पत्तिपर्यंतं वद्रू दंडादिलिंगमाश्रित्य सेतव्युह्यर्थं यमान्नियमांश्चावरेत् ज्ञानोत्पत्त्यै यतेत उत्प

नासच्छास्त्रेषु सज्जेत नोपजीवेत जीविकां वादवादांस्त्यजेत्तर्कान्पक्षं कंचन नाश्रयेत् ७ न शिष्या
पुं नुनुबध्नीत ग्रंथान्नैवाभ्यसेद्बहून् न व्याख्यामुपयुंजीत नारंभानारभेत्क्वचित् ८ न यतेराश्रमः प्रा
यो धर्महेतुर्महात्मनः शांतस्य समचित्तस्य बिभृयादुत वा त्यजेत् ९ अव्यक्तलिंगो व्यक्तार्थो मनी
षुन्मत्तबालवत् कविर्मूकवदात्मानं स दृष्ट्या दर्शयेन्नृणां १० अत्राप्युदाहरंतीममितिहासं पु राम ६२
रातनं प्रह्लादस्य च संवादं मुनेराजगरस्य च ११

न्नेतु ज्ञानेन नियमैः कृत्यमस्ति यमास्त्वावत एव स्युः अतस्तदा लिंगादिभिः प्रयोजनाभावाल्लोकसंग्रहार्थं धारये द्वा त्यजेद्वेति ९ तस्यैव ज्ञानदार्ढ्याभावे योगभ्रंशपरिहारार्थमाह नबहिर्व्यक्तं लिंगं यस्य व्यक्तोर्थः प्रयोजनमात्मानुसंधानं यस्य सः मनीष्यपि उन्मत्तवद्बालवद्वा कविरपि मूकवदात्मानं नृणां दृष्ट्या दर्शयित् ते यथोन्मत्तादिरूपं मन्येरन् तथा वर्तेत स्वदृष्ट्येति पाठे बाह्यानुसंधानाभावेनेत्यर्थः १० पारमहंस्यं धर्ममितिहासेन स्फुटयति अत्रापीति यावदध्यायसमाप्ति आजगरवृत्तस्य मुनेश्च ११

धरोपस्थे भूपृष्ठे सह्याद्रेस्तटे रजोभिर्धूसरैस्तनूदेशैर्देहावयवैर्निरूढममलं तेजो यस्य १२ १३ कर्मादिभिर्जना यं न विदुः तं पादयोः शिरसा स्पृशन्नत्वा अप्राक्षीदित्युत्तरेणान्वयः १४ १५ उद्यमसहित इव भोगवानिव पीवानं स्थूलं देहं धारयसि तत्र हेतुं वदेति तृतीयेनान्वयः १६ उद्यमं विनैव भोगोस्तीति चेत्तत्राह वित्तं चेति नु इति निश्चये हर्तिप्रसिद्धौ तव अर्थो नास्तीति प्रसिद्धमेवेत्यर्थः यतोर्थादेव यतो हेतोः पीवा क्षमं योग्यं चेत् १७ किंच विद्वानर्जनाद्यस ७

तं शयानं धरोपस्थे कावेर्यां सह्यसानुनि रजस्वलैस्तनूदेशैर्निगूढामलतेजसं १२ ददर्श लोकान् वि
चरल्लोकतत्त्वविवित्सया वृतो मात्यैः कतिपयैः प्रह्लादो भगवत्प्रियः १३ कर्मणाकृतिभिर्वाचा लिंगैर्व
र्णाश्रमादिभिः न विदंति जना यं वै सोसावितिन वेति च १४ तं नत्वाभ्यर्च्य विधिवत्पादयोः शिरसा
स्पृशन् विवित्सुरिदमप्राक्षीन्महाभागवतोसुरः १५ बिभर्षि कायं पीवानं सोद्यमो भोगवान्यथा
वित्तं चैवोद्यमवतां भोगो वित्तवतामिह १६ भोगिनां खलु देहोयं पीवा भवति नान्यथा १६ न ते शयानस्य
निरुद्यमस्य ब्रह्मन्नु हार्थो यत एव भोगः अभोगिनोयं तव विप्र देहः पीवा यतस्तद्वद नः क्षमं चेत् १७ क
विः कल्पो निपुणदृक् चित्रप्रियकथः समः लोकस्य कुर्वतः कर्म शेषे तद्वीक्षितापि वा १८

मर्थोप्ययं जनस्तदर्थमुद्यमं करोति त्वं तु समर्थोपि किमिति न करोषीत्याह कविर्विद्वान् कल्पो दक्षः निपुणदृक् चतुरः चित्राः प्रियाः लोकरंजनाः कथा यस्य तथापि लोकस्य कर्म कुर्वतः सतः शेषे तद्वीक्षितापि वा तत्सर्वं पिन्नयत्नपि याद्दांतरे नद्वेषि

भा० स० ६४ तस्यवागेवामृतंतेनयंत्रितोवशीकृतःसन् १९ अध्यात्मचक्षुषाअंतर्दृष्ट्याभगवान्वेदैव आर्याणांज्ञानिनांसंमतोन
नुभवान्नदृष्टमपियदुक्तंतदेवाह नृणामीहोपरमयोःप्रवृत्तिनिवृत्त्योःपदानिसाधनानिफलानीत्यर्थः २० वेदेत्यत्रहेतुःय
स्येति हृदिप्रविष्टःसन्नज्ञानंधुनोति अर्कोयथाबहिर्ध्वांतं २१ यथाश्रुतमित्यौद्धत्यपरिहारायोक्तं २२ लोकः

श्रीनारदउवाच सइत्थंदैत्यपतिनापरिपृष्टोमहामुनिः स्मयमानस्तमभ्याहतद्वागमृतयंत्रितः १९ ब्रा
ह्मणउवाच वेदेदमसुरश्रेष्ठभवान्नन्वार्यसंमतः ईहोपरमयोर्नॄणांपदान्यध्यात्मचक्षुषा २० यस्य
नारायणोदेवोभगवान्हृद्गतःसदा भक्त्याकेवलयाज्ञानंधुनोतिध्वांतमर्कवत् २१ अथापिब्रूमहेप्र
श्नांस्तवराजन्यथाश्रुतं संभावनीयोहिभवानात्मनःशुद्धिमिच्छता २२ तृष्णयाभववाहिन्यायोग्यैः
कामैरपूरया कर्माणिकार्यमाणोहंनानायोनिषुयोजितः २३ यदृच्छयालोकमिमंप्रापितःकर्मभि
र्भ्रमन् स्वर्गापवर्गयोर्द्वारंतिरश्चांपुनरस्यच २४ राम ६४

कर्मसुवर्ततेत्वंतुनिवृत्तःसन्किंशेषइतियदुक्तंतत्राहतृष्णयेतिचतुर्भिः भवप्रवाहकारिण्यायथोचितैरपिविषयैः
पूरयितुमशक्ययातृष्णयाकर्मसुप्रवर्त्तमानोहंपूर्वंनानायोनिषुप्रवेशितः २३ तथैवेमंलोकंमनुष्यदेहंय
दृच्छयाप्रापितः कथंभूतंलोकंधर्मेणस्वर्गद्वारंसाधनंअधर्मेणतिरश्चांश्वशूकरादियोनेर्द्वारंमिश्राभ्यां
ताभ्यांपुनरस्यमनुष्यस्यद्वारंसर्वतोनिवृत्त्यापवर्गस्यद्वारमित्यर्थः २४

श्री

अत्रापिमनुष्यत्वेपिअन्यापनुत्तयेदुःखनिवृत्त्यैविपर्ययंदृष्ट्वानिवृत्तोस्मि २५ प्रवृत्त्याकदाचित्सुखंस्यादपि
निवृत्त्यातुकिंस्यादितिचेत्तत्राह सुखमस्यजीवस्यस्वरूपमेवतर्हिकिंनप्रकाशतेतत्राहसर्वेतितनोतीतितनुःसर्व
क्रियानिवृत्तोस्यतदेवप्रकाशतइत्यर्थः भोगांश्चमनःस्पर्शजान्मनोरथमात्रजान् अशाश्वतान्दृष्ट्वास्वप्स्यामि

अत्रापिदंपतीनांचसुखायान्यापनुत्तये कर्माणिकुर्वतांदृष्ट्वानिवृत्तोस्मिविपर्ययं २५ सुखमस्यात्म
नोरूपंसर्वेहोपरतिस्तनुः मनःसंस्पर्शजान्दृष्ट्वाभोगान्स्वप्स्यामिसंविशन् २६ इत्येतदात्मनःस्वार्थं
संतंविस्मृत्यवैपुमान् विचित्रामसतिद्वैतेघोरामाप्नोतिसंसृतिं २७ जलंतदुद्भवैश्छन्नंहित्वाज्ञोजल
काम्यया मृगतृष्णामुपाधावेत्तथान्यत्रार्थदृक्स्वतः २८ देहादिभिर्दैवतंत्रैरात्मनःसुखमी
हतः दुःखात्ययंचानीशस्यक्रियामोघाःकृताःकृताः २९ आध्यात्मिकादिभिर्दुःखैरविमुक्तस्यक
र्हिचित् मर्त्यस्यकृच्छ्रोपनतैरर्थैःकामैःक्रियेतकिं ३० पश्यामिधनिनांक्लेशंलुब्धानामजिता
त्मनां भयादलब्धनिद्राणांसर्वतोभिविशंकिनां ३१

निरुद्यमोस्मीत्यर्थः तर्हिकदाचित्कथंभुंक्षेतत्राह संविशन्प्रारब्धभोगान्भुंजानइत्यर्थः २६ एवंचेत्कोपिसंसारंनप्रा
प्नुयात्तत्राह इत्येतदात्मनःसुखात्मकंरूपंस्वार्थंस्वतःसिद्धंसंतंपुरुषार्थंविस्मृत्यअसतिद्वैते २७ एतदेवदृष्टांतेन
स्पष्टयतिजलमिति तदुद्भवैस्तृणशैवालादिभिः जलकाम्ययाजलेच्छयास्वतःआत्मस्वरूपादन्यत्रपुरुषार्थंपश्य
न् २८ एवंस्वस्यनिरुद्यमत्वेकारणमुक्त्वाविपर्ययंदृष्ट्वेतियदुक्तंतद्विवृणोतिदेहादिभिरितिपंचभिः ईहतःइच्छतःअनिर्दैव

ना० स०
६५

स्य पुनः पुनः प्रारब्धाः क्रिया मोघा विफला एव भवंति २९ क्रियाणां फलत्वेपि फलस्यानुपयोगमाह आध्यात्मिकादि
भिरिति मर्त्यस्य मरिष्यतः कृच्छ्रेण दुःखेनोपनतैः प्राप्तैः ३० कृच्छ्राद्विनैव प्राप्तेप्यर्थे दुःखं तदवस्थमित्याह पत्न्यामीति
३१ तदेव प्रपंचयति राजत इति स्वस्मान्मत्तस्व कथं वित्त्यागभोगविस्मरणादिना नाशक्यादिति प्राणवतामर्थ

राजतश्चौरतः शत्रोः स्वजनात्पशुपक्षितः अर्थिभ्यः कालतः स्वस्मान्नित्यं प्राणार्थवद्भयं ३२ शो
कमोहभयक्रोधरागक्लैब्यश्रमादयः यन्मूलाः स्युर्नृणां जह्यात्स्पृहां प्राणार्थयोर्बुधः ३३ मधु
कारमहासर्पौ लोकेस्मिन्नो गुरूत्तमौ वैराग्यं परितोषं च प्राप्ता यच्छिक्षयावयं ३४

राम
६५

वतां च भयं नित्यं ३२ अतोनर्थहेतुत्वात्प्राणेवार्थे स्पृहा न कार्येत्याह शोकेति ३३ नन्वेवमनर्थान
नुभवंतोपि न केचिद्विरज्यंते न च यथालाभेन तुष्यंति त्वं तु कथं वैराग्यादिकं प्राप्तोसि तत्राह मधुकारे
ति मधुमक्षिकाजगरौ ययोः शिक्षया वृत्तपर्यालोचनया ३४

नन्वेवमर्थाननुभवंतो न केचिद्विरज्यंते न च यथालाभेन तुष्यंति त्वं तु कथं वैराग्यादिकं प्राप्तोसि तत्राह मधुकारेति म
धुमक्षिकाअजगरौ ययोः शिक्षया वृत्तपर्यालोचनया ३४ मधुकराच्छिक्षितमाह विरागइति वित्तपतिं हत्वाप्यन्यो
वित्तं हरेदित्येवं ३५ अजगराच्छिक्षितमाह अनीहइति। सत्ववान् धैर्यवानपि न त्वेहेतुः अनीहइति ३६ अनी

मधुकारमहासर्पौ लोकेस्मिन्नो गुरूत्तमौ वैराग्यं परितोषं च प्राप्ता यच्छिक्षयावयं ३४ विरागः सर्वकामेभ्यः
शिक्षितो मे मधुव्रतात् कृच्छ्राप्तं मधुवद्वित्तं हत्वाप्यन्यो हरेत्पतिं ३५ अनीहः परितुष्टात्मा यदृच्छोपनता
दहं नो चेच्छये सुबह्वहानि महाहिरिव सत्ववान् ३६ क्वचिदल्पं क्वचिद्भूरि भुंजेन्नं स्वाद्वस्वादु वा क्वचि
द्भूरिगुणोपेतं गुणहीनमुत क्वचित् ३७ श्रद्धयोपहृतं क्वापि कदाचिन्मानवर्जितं भुंजे भुक्त्वाथ कस्मिंश्चि
द्दिवा नक्तं यदृच्छया ३८ क्षौमं दुकूलमजिनं चीरं वल्कलमेव वा वसेन्यदपि संप्राप्तं दिष्टभुक्तुष्टधीरहं
३९ क्वचिच्छये धरोपस्थे तृणपर्णाश्मभस्मसु क्वचित्प्रासादपर्यंके कशिपौ वा परेच्छया ४० क्वचित्स्ना
तोनुलिप्तांगः सुवासाः स्रग्व्यलंकृतः रथेभाश्वैश्चरे क्वापि दिग्वासा ग्रहवद्विभो ४१

हत्वेन पदद्वयाप्राप्तात्परितोषं प्रपंचयति क्वचिदल्पमिति षड्भिः ३७ चीरं जीर्णवस्त्रखंडं वसे परिदधे दिष्टभुक्
प्रारब्धभोगी ३९ प्रासादमध्ये पर्यंके तत्रापि कशिपौ ४० चरे विचरामि क्वचिद्ग्रहवद्दिगंबरो विचरामि ४१

भा०स० नचमानापमानकर्तृषु मम वैषम्यमित्याह। नाहं निंदामि महात्मनि विघ्नो ४२ एवंभूतत्वेन स्थितावुपायमाह विक
६७ ल्पमिति द्वाभ्यां। चित्तौ भेदकग्राहकमनोवृत्तौ अर्थरूपो विभ्रमो यस्मिन् वैकारिके अहंकारे अनु अनंतरं महत्तत्वद्वा
रेणेत्यर्थः ४३ सत्यमेव पश्यतीति तथा ४४ मंददृष्ट्या लोकशास्त्राभ्यां व्यपेतं न तु तत्वदृष्ट्या यतो भवान् भगव

नाहं निंदे न च स्तौमि स्वभावविषमं जनं एतेषां श्रेय आशासे उतैकात्म्यं महात्मनि ४२ विकल्पं जुहुयाच्चि
त्तौ तां मनस्यर्थविभ्रमे मनो वैकारिके हुत्वा तं मायायां जुहोत्यनु ४३ आत्मानुभूतौ तां मायां जुहुयात्सत्य
दृङ्मुनिः ततो निरीहो विरमेत्स्वानुभूत्यात्मनि स्थितः ४४ स्वात्मवृत्तं मयेत्थं ते सुगुप्तमपि वर्णितं व्यपे
तं लोकशास्त्राभ्यां भवान् हि भगवत्प्रियः ४५ नारद उ धर्मं पारमहंस्यं वै मुनेः श्रुत्वासुरेश्वरः पूज
यित्वा ततः प्रीत आमंत्र्य गृहमाययौ ४६ इति श्रीभागवते महापुराणे सप्तमस्कंधे यतिधर्मे त्रयोद
शोध्यायः युधिष्ठिर उ गृहस्थ एतां पदवीं विधिना येन चांजसा याति देवऋषे ब्रूहि मादृशो गृहमू राम ६७
ढधीः १ नारद उ गृहेष्ववस्थितो राजन् क्रियाः कुर्वन् गृहोचिताः वासुदेवार्पणं साक्षादुपासीत महा
मुनीन् २

त्पर्यः ४६ इति सप्तमे त्रयोदशः चतुर्दशे गृहस्थस्य परमो धर्म ईर्यते। देशकालादिभेदेन पु
नः श्रेयोविशेषहेतवः। गृहस्थमुल्लंघ्य मोक्षं प्रति अंतरंगत्वेन प्रथमं वनस्थयतिधर्मेष्वभिहितेषु तर्हि गृहस्थस्य मोक्षो
न स्यादिति शंकितः पृच्छति गृहस्थ इति तस्य मोक्षधर्मानाह गृहेष्वित्यादि यावदध्यायसमाप्तिः साक्षाद्वासुदेवार्प
णं यथा भवत्येवं कुर्वन्नुपासीत २ ३

स्वयमेव मुच्यमानेषु वियुज्यमानेषु यथा उत्थितः पुमान् स्वप्नदृष्टेषु पुत्रादिषु संगं विमुंचति तद्वत् ४ नन्वेवंभूतस्य दुर्जनै
रभिभूयमानस्य कुतो गृहोचिताः क्रियाः स्युस्तत्राह यावदर्थमिति अंतरनासक्तः बहिस्त्वासक्त इव नृलोके जनमध्ये न
रतां मानुष्यं न्यसेत् पुंस्कारमाविःकुर्यादित्यर्थः ५ आग्रहं तु क्वापि न कुर्यादित्याह ज्ञातय इति ६ नन्वेवं सर्वानुमोद
ने वित्तक्षयप्रसंगात् कुतो जीवनं कुतो वा कर्मकरणं तत्राह दिव्यं वृष्ट्यादिनिर्जातं भौम्यं निधानादि आंतरिक्षं

शृण्वन् भगवतोऽभीक्ष्णमवतारकथामृतं श्रद्दधानो यथाकालमुपशांतजनावृतः ३ सत्संगाच्छनकैः सं
गमात्मजायात्मजादिषु विमुच्येत् मुच्यमानेषु स्वयं स्वप्नवदुत्थितः ४ यावदर्थमुपासीनो देहे गेहे च पंडितः
विरक्तो रक्तवत्तत्र नृलोके नरतां न्यसेत् ५ ज्ञातयः पितरौ पुत्रा भ्रातरः सुहृदोऽपरे यद्वदंति यदिच्छंति चा
नुमोदेत निर्ममः ६ दिव्यं भौमं चांतरिक्षं वित्तमच्युतनिर्मितं तत्सर्वमुपयुंजान एतत्कुर्यात्स्वतो बुधः ७ या
वद्भ्रियेत जठरं तावत्स्वत्वं हि देहिनां अधिकं योऽभिमन्येत स स्तेनो दंडमर्हति ८

आकस्मादेव प्राप्तं एवं स्वत एव अच्युतनिर्मितं दैवलब्धं यत् एतत्पूर्वोक्तं कर्मादि ७ दैवाद्भूरिलाभे जाते पितत्राभिमा
नो न कार्य इत्याह यावदिति भ्रियेत पूर्यते ८

अतएव यं कमपि स्वगृहं क्षेत्रं वा प्रविश्य तं भुंजानं न निवारयेदित्याह मृगेति मर्कोमर्कटः सरीसृपः सर्पः मक्षिकाश्च तैः पुत्रैः एवांमृगादीनां ९ अतिकृच्छ्रेणापाद्य न त्यजेत किंतु यावद्दैवप्रापितं तावदेव त्यजेत् १० श्वानश्च अघाश्च पतिताः अंतेवसायिनश्चांडालादयः तानपि व्याप्य यथायथार्हं कामान्संविभजेत् स्वभोग्यान् विभज्य दद्यात् यद्यप्येकैवात्मनो दारा भार्या तस्यामतिथिशुश्रूषणे नियुक्तायां स्वस्य शुश्रूषा हीयेत यस्यां च नृणां स्वत्वग्रहः ममैवेयमित्या

मृगोष्ट्रखरमर्काखुसरीसृपखगमक्षिकाः आत्मनः पुत्रवत्पश्येत् तैरेषामंतरं कियत् ९ त्रिवर्गं नाति कृच्छ्रेण भजेत गृहमेध्यपि यथादेशं यथाकालं यावद्दैवोपपादितं १० आश्वाद्यांतेवसायिभ्यः कामान् संविभजेद्यथा अप्येकामात्मनो दारान् नृणां सत्वग्रहो यतः ११ जह्याद्यदर्थे स्वप्राणान् हन्याद्वा पितरं गुरुं तस्यां स्वत्वं स्त्रियां जह्याद्यस्तेन ह्यजितो जितः १२ कृमिविड्भस्मनिष्ठांतं क्वेदं तुच्छं कलेवरं क्व तदीयरतिर्भार्या क्वायमात्मा नभश्छदिः १३

हंग्रहता मेकामपि संविभजेत् अतिथ्यादिशुश्रूषणे नियुंजीतेत्यर्थः न त्वन्यथा मंतव्यं यथार्हं संविभजेदित्युक्तत्वात् ११ एवं चेत्तेनेश्वरोवशीकृतः स्यादित्याह यदर्थे यन्निमित्तं अन्यैरजितोपीश्वरस्तेन जित एव १२ कथमेकं तस्यां स्वत्वाभिमानो हातुं शक्यः तत्त्वविचारेणेत्याह कृमिविड्भस्मसु निष्ठापर्यवसानं अंते यस्य तदीयादेहार्थ रतिर्यस्यां सा स्वमहिम्ना नभोपि छादयतीति तथा १३

किंच सिद्धैर्दैवलब्धैर्यज्ञावशिष्टार्थैः पंचयज्ञशेषैरन्नादिभिः महतां निष्ठावतां १४ एतद्विवृण्वन्नाह देवादीन्यं च यज्ञदेवताः आत्मानं च एवं पृथक् पुरुषं अंतर्यामिणमेव यजेत् १५ १६ न पुनरतिनिर्बंधो यज्ञार्थकार्य इत्याह न हीति विप्रमुखे हुतैरन्नादिभिर्यथा इज्येत पूज्येत न तथा अग्निमुखतो हविषा इज्येत १७ ब्राह्मणेषु देवेषु च पंचयज्ञदेवतासु मर्त्यादिषु अन्येष्वपि नरेषु पश्वादिषु च क्षेत्रज्ञमंतर्यामिणं ब्राह्मणाननु मर्त्यादियजने ब्राह्मण

सिद्धैर्यज्ञावशिष्टार्थैः कल्पयेद्वृत्तिमात्मनः शेषे स्वत्वं त्यजन्प्राज्ञः पदवीं महतामियात् १४ देवानृषीन्नृभूतानि पितॄन्नात्मानमन्वहं स्ववृत्त्यागतवित्तेन यजेत पुरुषं पृथक् १५ यर्ह्यात्मनोधिकाराद्याः सर्वाः स्युर्यज्ञसंपदः वैतानिकेन विधिना अग्निहोत्रादिना यजेत् १६ न ह्यग्निमुखतो यं वै भगवान् सर्वयज्ञभुक् इज्येत हविषा राजन्यथा विप्रमुखे हुतैः १७ तस्माद्ब्राह्मणदेवेषु मर्त्यादिषु यथार्हतः तैस्तैः कामैर्यजस्वैनं क्षेत्रज्ञं ब्राह्मणाननु १८ कुर्यादपरपक्षीयं मासि प्रौष्ठपदे द्विजः श्राद्धं पित्रोर्यथावित्तं तद्बंधूनां च वित्तवान् १९ अयने विषुवे कुर्याद्व्यतीपाते दिनक्षये चंद्रादित्योपरागे च द्वादश्यां श्रवणेषु च २० तृतीयायां शुक्लपक्षे नवम्यामथ कार्त्तिके चतसृष्वप्यष्टकासु हेमंते शिशिरे तथा २१

यजनानंतरमन्येषु यजस्व पादांतरे ब्राह्मणा आननं यस्य तं १८ प्रौष्ठपदे भाद्रपदे १९ २० शुक्लपक्षे अक्षयतृतीयायामित्यर्थः हेमंते शिशिरे च मार्गशीर्षादिमासचतुष्टयेपि यास्तिस्रोष्टकास्तासु २१

संपूर्णचंद्रा पौर्णमासी राका न्यूनचंद्रा सैवानुमतिः तयामासर्क्षाणि तत्तन्मासनामप्रवृत्तिनिमित्तानि नक्षत्राणि युता
नि यदा स्युः तदा तदुक्तं त्रिकाद्यां पुष्ययुक्ता पौर्णमासी पौषी मासे तु यत्र सा नाम्ना स पौषो माघाद्याश्चैवमेकाद
शापरद्गते २३ अनुराधा श्रवण उत्तराः फाल्गुनी उत्तराषाढा उत्तराभाद्रपदा द्वादश्यां यदा स्यात् आसूत्तरास्फ
ल्गापरद्गति २३ अनुराधाश्रवणउत्तराफाल्गुनीउत्तराषाढाउत्तराभद्रपदा

माघे च सितसप्तम्यां मघाराकासमागमे राकया चानुमत्या वा मासर्क्षाणि युतान्यपि २२ द्वादश्या
मनुराधा स्याच्छ्रवणस्तिस्र उत्तराः तिस्रष्वेकादशी वासु जन्मर्क्षश्रोणयोगयुक् २३ त एते श्रेयसः
कालाः नृणां श्रेयोविवर्द्धनाः कुर्यात्सर्वात्मनैतेषु श्रेयोऽमोघं तदायुषः २४ एषु स्नानं जपो होमो
व्रतं देवद्विजार्चनं पितृदेवनृभूतेभ्यो यद्दत्तं तद्ध्यनश्वरं २५ संस्कारकालो जायाया अपत्यस्यात्मन
स्तथा प्रेतसंस्था मृताहश्च कर्मण्यभ्युदये नृप २६ अथ देशान्प्रवक्ष्यामि धर्मादिश्रेयआवहान्
स वै पुण्यतमो देशः सत्पात्रं यत्र लभ्यते २७

एकादशी वा यदा स्यात् तदा च जन्मर्क्षश्रोणयोगयुक् जन्मनक्षत्रस्य श्रवणस्य वा योगेन युक्तं दिनं यदा यो
गग्रहणं संबंधवाहुल्यार्थं २३ न केवलं श्राद्धस्यैवैते कालाः किंतु धर्ममात्रस्येत्याह त एत इति द्वाभ्यां त
देव आयुषः अमोघं साफल्यमित्यर्थः २४ २५ संस्कारकालो जायायाः पुंसवनादिः अपत्यस्य जातक
र्मादिः आत्मनो यज्ञदीक्षादिः प्रेतस्य संस्था दहनादिः मृताहश्च सांवत्सरिकं यद्वा अन्यस्मिन्नपि अन्यु

यत्र यस्मिन् सर्वमेतच्चराचरमस्ति तस्य भगवतो विंबरूपं सत्पात्रं यत्र लभ्यते स वै पुण्यतमो देशः २८ अर्हैः उत्तमै
राश्रितानि ३० ३१ सीतायाः रामस्य वा आश्रम आदिर्येषां द्वयोः पृथक्ग्रहणं वियोगकालाभिप्रायेण ३२ अर्चा
श्रिताश्च स्थिरजंगमाश्रिताः पूर्वं तु शालग्रामशिलाद्यर्चनदेशा उक्ता इत्यपौनरुक्त्यं अत्र एषु ईहितः कृतः सहस्रगु

विंबं भगवतो यत्र सर्वमेतच्चराचरं यत्र ह ब्राह्मणकुलं तपोविद्यादयान्वितं २८ यत्र यत्र हरेरर्चा स देशः
श्रेयसां पदं यत्र गंगादयो नद्यः पुराणेषु च विश्रुताः २९ सरांसि पुष्करादीनि क्षेत्राण्यर्हाश्रितान्यु
त कुरुक्षेत्रं गयशिरः प्रयागः पुलहाश्रमः नैमिषं फाल्गुनं सेतुः प्रभासोऽथ कुशस्थली वाराण
सी मधुपुरी पंपा विंदुसरस्तथा ३१ नारायणाश्रमो नंदा सीतारामाश्रमादयः सर्वे कुलाच
ला राजन् महेंद्रमलयादयः ३२ एते पुण्यतमा देशा हरेरर्चाश्रिताश्च ये एतान्देशान्निषेवेत श्रे
यस्कामो ह्यभीक्ष्णशः ३३ धर्मो ह्यत्रेहितः पुंसां सहस्राधिफलोदयः पात्रं त्वत्र निरुक्तं वै कविभिः
पात्रवित्तमैः हरिरेवैक उर्वीश यन्मयं वै चराचरं ३४ देवर्ष्यर्हत्सु वै सत्सु तत्र ब्रह्मात्मजादिषु रा
जन्यदग्रपूजायां मतः पात्रतयाच्युतः ३५
णमधिकस्य फलस्य उदयो यस्मात् स तथा ३३ हरिरेव पात्रं निरुक्तं निर्णीतं ३४ तदेवाह देवेषु च ऋषि
षु च अर्हत्सु च तपोयोगादिसिद्धेषु ब्रह्मात्मजादिषु सनकादिष्वपि सत्सु तत्र त्वदीये राजसूये यद्यस्माद

भा० स०

६९ संमतत्वे हेतुमाह जीवराशिभिर्योसौ ब्रह्मांडकोशाश्रयोंघ्रिपः सर्वजीवानामात्मनश्च तर्पणं ३६ तदेव पुरुष
नामनिरुक्त्या द्रढयति पुराणीति नृतिर्यगादिरूपाणि पुराणि शरीराणि तेष्वंतर्यामिरूपेण प्रत्यगंशेन
वसनात् शेते अतः पुरुष इति प्रसिद्धः ३७ तेष्वेषु भगवान्तारतम्येन तिर्यगादिभ्यः पुरुषे यस्मादाधिक्ये
नवर्त्तते तस्मात्पुरुषः पात्रं तत्रापि यावानात्मा ज्ञानांशः यथा यथा ईयते तप आदियोगेन यत्र यत्र प्रती

जीवराशिभिराकीर्णआंडकोशांघ्रियो महान् तन्मूलत्वादच्युतेज्या सर्वजीवात्मतर्पणं ३६ पुरा
ण्यनेन सृष्टानि नृतिर्यगृषिदेवताः शेते जीवेन रूपेण पुरेषु पुरुषो ह्यसौ ३७ तेष्वेषु भग
वान्राजन्तारतम्येन वर्त्तते तस्मात्पात्रं हि पुरुषो यावानात्मा यथेयते ३८ दृष्ट्वा तेषां मिथो नृणा
मवज्ञानात्मतां नृप त्रेतादिषु हरेरर्चा क्रियायै कविभिः कृता ३९ ततोऽर्चायां हरिं केचित्संश्र राम
द्धाय सपर्यया उपासत उपास्तापि नार्थदा पुरुषद्विषां ४० ६९

यते तथा तथा सौपात्रमित्यर्थः तथा वक्ष्यति पुरुषत्वे वाविस्तरामात्मेत्यादि ३८ तर्हि प्रतिमादौ हरेः
पूजां किमिति कुर्वंति तत्राह दृष्ट्वेति द्वाभ्यां मिथोऽवज्ञानं असन्मानस्तस्मिन्नात्मा बुद्धिर्येषां तेषां भावं दृष्ट्वा क्रि
यायै पूजार्थं ३९ हरिमुपासते उपासितापि अर्चा पुरुषद्वेषिणामर्थदा न भवति पुरुषेषु द्वेषं हित्वार्चितास
नी सापि मंदाधिकारिणां पुरुषार्थप्रदा भवत्येवेत्यर्थः ४०

पुरुषेष्वेव जात्या तप आदिभिश्च पुनर्विशेषांतरमाह पुरुषेष्वपीति योधत्ते तं सुपात्रं विदुः एतदेव कैमुत्यन्यायेन द्र
ढयति नन्वस्येति ४२ सप्तमे चतुर्दशः ततः पंचदशो सर्ववर्णाश्रमनिबंधनं सारतः संग्रहेणाथ वर्ण्यते मोक्षल
क्षणं १ सर्वेषामपि मोक्षधर्माणां सारसंग्रहार्थमध्यायारंभः तत्र श्राद्धगतान्विशेषानाह कर्मनिष्ठा इति स्वा

पुरुषेष्वपि राजेंद्र सुपात्रं ब्राह्मणं विदुः तपसा विद्यया तुष्ट्या धत्ते वेदं हरेस्तनुं ४१ नन्वस्य ब्राह्मणा रा
जन्कृष्णस्य जगदात्मनः पुनंतः पादरजसा त्रिलोकीं दैवतं महत् ४२ इति श्रीभागवते महापु
राणे सप्तमस्कंधे चतुर्दशोऽध्यायः श्रीनारद उवाच कर्मनिष्ठा द्विजाः केचित्तपोनिष्ठा नृपाप
रे स्वाध्यायेऽन्ये प्रवचने केचित् ज्ञानयोगयोः १ ज्ञाननिष्ठाय देयानि कव्यान्यानंत्यमिच्छ
ता दैवे च तदभावे स्यादितरेभ्यो यथार्हतः २ द्वौ दैवे पितृकार्ये त्रीनेकैकमुभयत्र वा भोजयेत्सुसमृद्धोपि
श्राद्धे कुर्यान्न विस्तरं ३ देशकालोचितश्रद्धाद्रव्यपात्रार्हणानि च सम्यग्भवंति नैतानि विस्तरात्स्वजना
र्पणात् ४

ध्यायादिषु परिनिष्ठिता इति शेषः १ कव्यानि पितॄनुद्दिश्य देयानि दैवे च हव्यान्यपि तस्मै देयानि यथार्हत
इति सर्वत्र ज्ञानादितारतम्येन ननु विस्तरः कुतः आप्तः येन निषिद्ध्यते तत्राह स्वजनानामर्पणात् जामातादिभि
र्मन्यते तत्पित्रादयः कथं वर्ज्या इत्येवं प्राप्ताद्विस्तरादित्यर्थः ४

भा०स० ७० मुन्यन्नं आरण्यं व्रीह्यादि हरिदैवतं हरयेनिवेदितं सत् ५ पुरुषात्मकं ईश्वरस्वरूपं दंडस्यन्यासः हिंसायास्त्या
गोयः एतादृशोन्योनास्ति ८ अतएवोत्तमाधिकारिणोबाह्यानिकर्माणित्यजंतीत्याह एकइति अनीहा निष्कामाः
ज्ञानदीपिते आत्मस्फूर्तिमिति आत्मसंयमने जुह्वति मनोनियम्यतदंतरायतयात्यजंतीत्यर्थः तदुक्तं सर्वज्ञत्व
के: प्रत्यक्स्फूर्तिरसंस्फूर्तिस्तनुनिष्ठाविघातकं संलक्ष्यसंत्यजेत्कर्मत्यजन्विघ्नहतोन्यथेति ९ मामांए

देशेकाले चसंप्राप्ते मुन्यन्नंहरिदैवतं श्रद्धयाविधिवत्पात्रेन्यस्तंकामधुगक्षयं ५ देवर्षिपितृभूते
भ्य आत्मने स्वजनायच अन्नंसंविभजन्पश्येत्सर्वंतत्पुरुषात्मकं ६ नदद्यादामिषंश्राद्धेनचाद्याद्ध
र्मतत्त्ववित् मुन्यन्नैःस्यात्पराप्रीतिर्यथानपशुहिंसया ७ नैतादृशःपरोधर्मोनृणांसद्धर्ममिच्छतां राम ७०
न्यासोदंडस्यभूतेषुमनोवाक्कायजस्ययः ८ एकेकर्ममयान्यज्ञान्ज्ञानिनोयज्ञवित्तमाः आत्मसं
यमनेनीहाजुह्वतिज्ञानदीपिते ९ द्रव्ययज्ञैर्यक्ष्यमाणंदृष्ट्वाभूतानिबिभ्यति एषमाकरुणोहन्यादत
ज्ज्ञोह्यसुतृप्ध्रुवं १०

यथ्रुवं हन्यादिति कुतः अकरुणः तत्कुतः असुतृप् प्राणतर्पकः ततः किं अतत् आत्मतत्वानभिज्ञः तथाचश्रुतिः
नतंविदाथयइमाजजानान्यद्युष्माकमंतरंबभूव नीहारेणप्रावृताजल्प्याचासुतृपउक्थशासश्चरंतीति १०

प्रसक्तमनुवर्त्तयतितस्मादिति ११ अधर्मवत्साक्षान्निषिद्धवत् १२ क्रममनादृत्य पंचापिव्याचष्टे धर्मबाधःध
र्मबुद्ध्यापियस्मिन्क्रियमाणेस्वधर्मबाधः अन्यस्यचोदितोऽन्यस्यपरधर्मः उपमेतिव्याचष्टे उपधर्मस्त्विति शब्दस्य
भित्भेदः अन्यथाव्याख्यानंयस्मिन् यथादशावरान्भोजयेदित्युक्तेदशभ्योऽवरानिति शब्दभिदितिपाठे धर्म

तस्माद्दैवोपपन्नेन मुन्यन्नेनापिधर्मवित् संतुष्टोऽहरहःकुर्यान्नित्यनैमित्तिकाःक्रियाः ११ विधर्मः
अ परधर्मश्च आभास उपमाछलः अधर्मशाखाःपंचेमाःधर्मज्ञोऽधर्मवत्त्यजेत् १२ धर्मबाधोविधर्मःस्या
त्परधर्मोन्यचोदितः उपधर्मस्तुपाखंडोदंभोवाशब्दभिच्छलः १३ यस्त्विच्छयाकृतःपुंभिराभासोह्याश्र
मात्पृथक् स्वभावविहितोधर्मःकस्यनेष्टःप्रशांतये १४ धर्मार्थमपिनेहेतयात्रार्थंवाऽधनोधनं अनीहा
ऽनीहमानस्यमहाहेरिववृत्तिदा १५ संतुष्टस्यनिरीहस्यस्वात्मारामस्ययत्सुखं कुतस्तत्कामलोभेनधाव
तोर्थेहयादिशः १६

शब्दमात्रं विभक्तीतितथा यथा गां दद्यादित्युक्ते मरिष्यंत्या गोर्दानं १३ स्वधर्मानुष्ठानानंतरं धर्मभूयस्त्वार्थमपि
परधर्मोनानुष्ठेयः अनुपयोगादित्याह स्वभावविहितइति १४ किंच अधनोधर्मार्थिधनंनेहेतनोयक्षेतधना
र्जनव्याप्रियेतेतिवा दैवोपपन्नेनैवस्वधर्मसिद्धेरुक्तत्वात् यात्रार्थमपिनेहेतेत्येतत्प्रपंचयति अनीहेति
सार्द्धैःषड्भिः १५ १६

उपानहो पादयोर्यस्य स उपानत्पात् तस्य १७ गृहपालः श्वा तद्वदाचरति १८ १९ क्षुधातृषावर्जनः कामस्यांतं या
ति अन्नोदकातिरिक्तकामांतराभावात् क्रोधस्य चांतं याति एतस्य क्रोधस्य यत्फलं हिंसा तस्योदयान्निष्पत्तेः
दिशो जित्वापि भुवो भुक्त्वापि लोभस्य नैवांतं यातीत्यर्थः २० इदानीं कामादिजयोपायानाह असंकल्पादिति चतु
र्भिः जयेदिति यथापेक्षमन्वेति अर्थे अनर्थदर्शनेन तत्वावमर्शनात् अद्वैतानुसंधानेन २२ आन्वीक्षि

सदा संतुष्टमनसः सर्वाः शिवमया दिशः शर्कराकंटकादिभ्यो यथोपानत्पदः शिवं १७ संतुष्टः केन वा
राजन्नवर्तेतापि वारिणा औपस्थ्यजैह्व्यकार्पण्याद्गृहपालायते जनः १८ असंतुष्टस्य विप्रस्य तेजो
विद्या तपो यशः स्रवंतींद्रियलौल्येन ज्ञानं चैवावकीर्यते १९ कामस्यांतं च क्षुत्तृड्भ्यां क्रोधस्यैतत्फलो
दयात् जनो याति न लोभस्य जित्वा भुक्त्वा दिशो भुवः २० पंडिता बहवो राजन् बहुज्ञाः संशयच्छिदः
सदसस्पतयोऽप्येके असंतोषात्पतंत्यधः २१ असंकल्पाज्जयेत्कामं क्रोधं कामविवर्जनात् अ
र्थानर्थेक्षया लोभं भयं तत्वावमर्शनात् २२ आन्वीक्षिक्या शोकमोहौ दंभं महदुपासया योगांतरायां
न्मौनेन हिंसां कायाद्यनीहया २३

क्या आत्मानात्मविवेकेन महतां सात्विकानां सेवया योगस्यांतरायान् लोकवार्तादीन् २३ श्रीराम

येभ्यो भूतेभ्यो भयं जायेत तेष्वेव कृपया हिताचरणेन दैवं दैवोपसर्गनिमित्तं दुःखं तथा मनःपीडादि तदुक्तं याज्ञवल्क्ये
न विमनो विफलारंभः संसीदत्यनिमित्ततः इति आत्मजं देहजं योगवीर्येण प्राणायामादिबलेन सत्वनि
षेवया सात्विकाहारादिना २४ २५ ननु कथं गुरौ भक्त्या सर्वस्य जयः स्यात् तस्यापि मनुष्यत्वेन तद्वस्थ
त्वात् तत्राह यस्येति मर्त्यासद्धीः मनुष्य इति दुर्बुद्धिः तस्य शास्त्रश्रवणं कुंजरस्नानवद्व्यर्थं २६ ननु गुरोः पित

कृपया भूतजं दुःखं दैवं जह्यात्समाधिना आत्मजं योगवीर्येण निद्रां सत्वनिषेवया २४ रजस्तमश्च
सत्वेन सत्वं चोपशमेन च एतत्सर्वं गुरौ भक्त्या पुरुषो ह्यंजसा जयेत् २५ यस्य साक्षाद्भगवति ज्ञान
दीपप्रदे गुरौ मर्त्यासद्धीः श्रुतं तस्य सर्वं कुंजरशौचवत् २६ एष वै भगवान्साक्षात्प्रधानपुरुषेश्वरः
योगेश्वरैर्विमृग्यांघ्रिर्लोको यं मन्यते नरं २७ षड्वर्गसंयमैकांताः सर्वा नियमचोदनाः तदंता यदि
नो योगानावहेयुः श्रमावहाः २८

पुत्रादयस्तेन रूपेण मन्यंते अत आह एष गुरुः साक्षाद्भगवानेव लोकस्य नरोऽसाविति बुद्धिर्भ्रांतिरित्यर्थः यद्वा
नहि तत्पुत्रादेर्मनुष्यबुद्ध्या प्रतीयमानोऽपि गुरुर्भगवान्न भवेत् यथैव श्रीकृष्ण इत्यर्थः २७ एवं सर्वैरुपायैः का
मादिवेगं जित्वा नियतेंद्रियो भूत्वा ध्यानपरो भवेत् अन्यथा तं प्रति सर्वशास्त्रवैफल्यं स्यादित्याह षड्वर्गेति सर्वा
अपि नियमचोदना इष्टापूर्तादिविधयः षडिंद्रियवर्गस्य यः संयमः तस्मिन्नेकस्मिन्नंतो यासां तदेकपरा इत्यर्थः
न चैतावनापि चरितार्था इत्याह तदंता सत्योऽपि यदि योगान् धारणाध्यानसमाधीन् नो आवहेयुः न साधयेयुः तर्हि केवलं श्रमा

ना० स० एतदेव दृष्टांतेनाह यथा वार्त्तादयः कृष्यादयः अर्थाः तत्फलानि च योगस्यार्थं मोक्षं न साधयंति प्रत्युत
७२ नेअर्थाय संसारायैव असतो बहिर्मुखस्येष्टापूर्त्तादयपि तथा २९ एवं योगं युंजतोपि यस्य कुटुंबादि
संगेन चित्तं विक्षिप्येत तस्य कृत्यमाह यश्चित्तस्य विजये यत्त उद्युक्तः सन्निःस्पृहः स्यात् संन्यसेत् तथा च स्मृ
तिः द्वंद्वाहतस्य गार्हस्थ्ये ध्यानभंगादिकारणं लक्षयित्वा गृही स्पष्टं संन्यसेदविचारयन्निति भिक्षया प्रा

यथा वार्त्तादयो ह्यर्था योगस्यार्थं न बिभ्रति अनर्थाय भवेयुस्ते पूर्त्तमिष्टं तथासतः २९ यश्चि
त्तविजये यत्तः स्यान्निःसंगोपरिग्रहः एको विविक्तशरणो भिक्षुर्भैक्ष्यमिताशनः ३० देशे
शुचौ समे राजन्संस्थाप्यासनमात्मनः स्थिरं समं सुखं तस्मिन्नासीतर्ज्वंग ओमिति ३१
प्राणापानौ सन्निरुंध्यात्पूरकुंभकरेचकैः यावन्मनस्त्यजेत्कामान्स्वनासाग्रनिरीक्षणः ३२ राम
यतो यतो निःसरति मनः कामहतं भ्रमत् ततस्तत उपाहृत्य हृदि रुंध्याच्छनैर्बुधः ३३ एवमभ्यस ७२
तश्चित्तं कालेनाल्पीयसा यतेः अनिशं तस्य निर्वाणं यात्यनिंधनवह्निवत् ३४

शंमितमशनं यस्य ३० ऋजुः सममंगं यस्य सः सुखं यथा भवत्येवमासीत ओमित्युच्चारयन्निति शेषः
३१ ३२ ३३ एवमनिशमभ्यसतस्तस्य यतेश्चित्तं निर्वाणं शांतिं याति ४ वासुदेवाय नमः

न च पुनर्विक्षिप्येतेत्याह कामादिभिरस्पृष्टमितं यच्चित्तं तन्नोत्तिष्ठेत् यतः प्रशांता अखिला वृत्तयो यस्य कुतः
ब्रह्मसुखेन स्पृष्टं ३५ यस्तु प्रव्रज्यां कृत्वापि भोगमभिलषेत् स्यात्तं निंदति यद्गृहं त्रयाणां धर्मादीनां व
र्गः आसमंतादुप्यते यस्मिन् तस्माद्गृहात् तान्धर्मादीन् वांताशी छर्दितभोजी निर्लज्जश्च सः ३६ ननु देहसं
घटितं दृष्टत्वादित्याह यैः पूर्वं स्वदेहः अनात्मादिरूपः स्मृतः चिंतितः त एव पुनरेनमात्मेति मत्वा श्लाघयंति तस्ताव

कामादिभिरनाविद्धं प्रशांताखिलवृत्ति यत् चित्तं ब्रह्मसुखस्पृष्टं नैवोत्तिष्ठेत कर्हिचित् ३५ यः प्रव्रज्य
गृहात्पूर्वं त्रिवर्गावपनात्पुनः यदि सेवेत तान्भिक्षुः स वै वांताश्यपत्रपः ३६ यैः स्वदेहः स्मृतोनात्मा म
र्त्यो विट्कृमिभस्मसात् त एनमात्मसात्कृत्वा श्लाघयंति ह्यसत्तमाः ३७ गृहस्थस्य क्रियात्यागो व्रत
त्यागो वटोरपि तपस्विनो ग्रामसेवा भिक्षोरिंद्रियलोलता ३८ आश्रमापसदा ह्येते खल्वाश्रमवि
डंबकाः देवमायाविमूढांस्तानुपेक्षेतानुकंपया ३९ आत्मानं चेद्विजानीयात्परं ज्ञानधुताशयः कि
मिच्छन्कस्य वा हेतोर्देहं पुष्णाति लंपटः ४०

यंतिहि ३७ यतिमुपलक्षणीकृत्यान्यानपि स्वधर्मत्यागिनो निंदति गृहस्थस्येति द्वाभ्यां ३८ ३९ ननु आत्मतत्त्वज्ञ
स्य भिक्षोरिंद्रियलौल्येपि को दोषस्तत्राह आत्मानं परं ब्रह्म चेज्जानीयात् ज्ञानेन धुता निरस्ता आशया वासना यस्य त
स्य ज्ञानिनो लौल्यमेव न संभवतीत्यर्थः तथा च श्रुतिः आत्मानं चेद्विजानीयादयमस्मीति पूरुषः किमिच्छन्कस्य कामा
य शरीरमनुसंज्वरेदिति ४०

भा०स० ७२ अज्ञस्य तु लौल्येन नरकपातापत्तेः प्रमत्तेन सदा तत्त्वज्ञानेयतितव्यमिती ममर्थ आत्मानं रथिनं विद्धि शरीरं रथमेव
चेत्यादिश्रुत्युक्तरथरूपकद्वारेणाह आहुरिति षड्भिः इंद्रियेशं मनो अभीषून् रश्मीनाहुः मात्राः शब्दादीन् वर्त्मानि गं
तव्यदेशानाहुः सत्वं चित्तं बृहत् देहव्यापि बंधुरं बंधनं चित्रं विनाप्यनिबद्धमिव शरीरं भवति ईशसृष्टमिति बंधनक
र्त्री ईशएवेत्यर्थः ४१ प्राणादयः पंच नागः कूर्मश्च कृकलो देवदत्तो धनंजयश्चेत्येवं दशविधं प्राणमक्षं अभिमानं

आहुः शरीरं रथमिंद्रियाणि हयानभीषून्मन इंद्रियेशं वर्त्मानि मात्रा धिषणां च सूतं सत्वं बृहद्बंधुरमीशसृष्टं ४१ सत्वं
अक्षं दशप्राणमधर्मधर्मौ चक्रेऽभिमानं रथिनं च जीवं धनुर्हि तस्य प्रणवं पठंति शरं तु जीवं परमेव लक्ष्यं ४२
रागो द्वेषश्च लोभश्च शोकमोहौ भयं मदः मानोऽवमानोऽसूया च माया हिंसा च मत्सरः ४३ रजः प्रमादः क्षु
न्निद्रा शत्रवस्त्वेवमादयः रजस्तमःप्रकृतयः सत्वप्रकृतयः क्वचित् ४४ यावन्नृकायरथमात्मवशो राम
पकल्पं धत्ते गरिष्ठचरणार्चनया निशातं ज्ञानासिमच्युतबलो दधदस्तशत्रुः स्वाराज्यतुष्ट उपशांत इदं ७२
विजह्यात् ४५
साहंकारं जीवं रथिनं शुद्धजीवं शरं परं ब्रह्म लक्ष्यं यथा धनुषा शरो लक्ष्ये निपात्यते तथा प्रणवेन जीवो ब्र
ह्मणि निपात्यते इत्यर्थः ४२ रागादयो जेतव्याः शत्रवः ४३ तत्र रजोभिनिवेशः क्वचित् आरूढसमाधेः सत्वप्रकृतयोपि
परोपकारादिप्रवृत्तयः शत्रवः ४४ नृकायरूपं रथं आत्मवशः उपकल्पं इंद्रियादिपरिकरो यस्मिन् तथाभूतं यावद्धत्ते ता
वदेव गरिष्ठानां गुरूणां चरणसेवया निशितं ज्ञानखड्गं बिभ्रत् अच्युताश्रयः सन्निरस्तशत्रुः उपशांतः स्वानंदेन तुष्टो भू
त्वा इदं रथादिकमुपेक्षेतेत्यर्थः ४५

अच्युताश्रयाभावे बाधकमाह नोचेदिति असंतो बहिर्मुखाः ये इंद्रियवाजिनः सूतश्च ते उत्पथं प्रवृत्तिमार्गं नीत्वा विषया
ख्येषु दस्युषु निक्षिपंति हये सूतेन च सह वर्तमानं तमोंधे तमसा व्याप्ते उरुमृत्युभयं यस्मिन् ४६ ननु च वेदविहि
तेष्टापूर्तादिकारिणः पुंसः कथमेवमनर्थप्राप्तिः स्यादित्याशंक्य वैदिककर्मणां द्वैविध्यं दर्शयन्फलभेदमाह प्रवृत्तं चे
ति दशभिः ४७ हिंस्रं श्येनादि श्येनादिकर्म अशांतिदं अत्यासक्तियुक्तं आदिशब्दार्थविवरणं दर्शश्चेति पशुः प

नो चेत्प्रमत्तमसदिंद्रियवाजिसूता नीत्वोत्पथं विषयदस्युषु निक्षिपंति ते दस्यवः सहयसूतममुं तमोंधे
संसारकूप उरुमृत्युभये क्षिपंति ४६ प्रवृत्तं च निवृत्तं च द्विविधं कर्म वैदिकं आवर्तते प्रवृत्तेन निवृत्ते
नाश्नुतेऽमृतं ४७ हिंस्रं द्रव्यमयं काम्यमग्निहोत्राद्यशांतिदं दर्शश्च पूर्णमासश्च चातुर्मास्यं पशुः
सुतः ४८ एतदिष्टं प्रवृत्ताख्यं हुतं प्रहुतमेव च पूर्तं सुरालयारामकूपाजीव्यादिलक्षणं ४९

शुयागः सुतः सोमयागः ४८ हुतं वैश्वदेवं प्रहुतं बलिहरणं एतत्सर्वमिष्टमुच्यते एतदेव यदि काम्यं अशां
तिदं च तर्हि प्रवृत्ताख्यमपीत्यर्थः आजीव्यं प्रपादि ४९ श्रीनमो भगवते वासुदेवाय

भा०स०
७५

प्रवृत्तेन कर्मणा आरोहावरोहाभ्यामावृत्तिप्रकारमाह द्रव्यस्य चरुपुरोडाशादेः सूक्ष्मो विपाकः परिणामो देहांतरारं
भकः येन स्वर्गं परिशक्तो गच्छति यत्र वक्ष्यति अप्शब्देनोक्तः इति तु पंचम्यामाहुतावापः पुरुषवचसो भवंतीति पाठांतरे
द्रव्यशब्देन तेजोमात्राशब्दोक्तानींद्रियाणि उष्मविपाकशब्देन हृदयाग्रप्रद्योतः तथा वक्ष्यति सह्मात्तेजोमात्राः
समभ्याददानो हृदयमेवान्ववक्रामतीति तथा तस्य हैतस्य हृदयस्याग्रं प्रद्योतते तेन एष आत्मा निष्क्रामतीति धू

द्रव्यसूक्ष्मविपाकश्च धूमो रात्रिरपक्षयः अयनं दक्षिणं सोमो दर्श ओषधिवीरुधः ५०
अन्नं रेत इति क्ष्मेश पितृयानं पुनर्भवः एकैकश्येनानुपूर्वं भूत्वा भूत्वेह जायते ५१

मादिशब्दैस्तत्तदभिमानिन्यो देवताः तत्रापक्षयः कृष्णपक्षः सोमः सोमलोकः तत्र भुक्तभोगस्यावरोहण
प्रकारमाह दर्श इत्यादि दर्श इति विपरीतलक्षणया विशिष्टभोगक्षयः शोकाग्निना देहलये नादर्शन मुच्यते ए
तदुक्तं भवति भूतसूक्ष्मयुक्तो धूमाद्यातिवाहिकदेवताभिः सोमलोकं प्रापितस्तद्भोगावसाने विलीनदेहो वृ
ष्टिद्वारेणौषधीवीरुधादिसाम्यापत्तिक्रमेण जायते एवं पुनर्भवहेतुः पितृयानं प्रवृत्तकर्ममार्ग इति ५०
क्ष्मेश हे भूपते पुनर्भवमेवाह एकैकश्येन प्रत्येकं क्रमेण भूत्वा भूत्वा तत्तत्सान्निध्यं प्राप्येह भूमौ जायते ५१ रम
७५

तत्राधिकारिणमाह निषेकादीति अन्यस्त्वि ष्टादिकार्यप्येवं जन्मनः जन्मत इत्यर्थः निवृत्तकर्मनिष्ठस्योपासनाविशे [illegible]
षमुपदिशन्नर्चिरादिमार्गेण ब्रह्मलोकप्राप्तिमाह इंद्रियेष्वित्यादिना यद्वा द्रव्ययज्ञेषु हिंसाया दुर्वारत्वादिति मुख्यं
निवृत्तं कर्मैव दर्शयन्नाह ज्ञानेन दीप्यंत इति तथा तेषु इंद्रियव्यापाराणामिष्टापूर्तादीनामिंद्रियतावन्मात्रतां भाव
यंतीत्यर्थः एवमुत्तरत्रापि ५२ ऊर्मौ दर्शनादिसंकल्परूपे मनसि वैकारिकं विकारयुक्तं मनो वाचि विध्यादिल

निषेकादिश्मशानांतैः संस्कारैः संस्कृतो द्विजः इंद्रियेषु क्रियायज्ञान् ज्ञानदीपेषु जुह्वति ५२ इंद्रिया
णि मनस्यूर्मौ वाचि वैकारिकं मनः वाचं वर्णसमाम्नाये तमोंकारे स्वरे न्यसेत् ५३ ओंकारं बिंदौ नादे तं
तं तु प्राणे महत्यमुं अग्निः सूर्यो दिवा प्राह्णः शुक्लो राकोत्तरं स्वराट् विश्वश्च तैजसः प्राज्ञस्तुर्य आत्मा
समन्वयात् ५४

क्षणया वाचा हि मनः कर्तृत्वादिविकारं भजति वर्णानां समाम्नाये समुदाये तद्धि शेषत्वाद्वाचः स्वरे अकारादिस्वरत्रयात्म
के ५३ ओंकारं बिंदौ तं च नादे प्राणे सूत्रात्मनि महति ब्रह्मणि अग्निरिति तत्तदभिमानिन्यो देवताः ताः प्राप्नोतीति पूर्ववं
त् दिवाह्नः प्राह्णस्तस्यैवांशः राका शुक्लपक्षस्यांतः यद्वा प्राह्णो राकेति च पुराणानां मतं उत्तरमयनं स्वराट् ब्रह्मा एवं ब्रह्म
लोकं गतस्य भोगावसाने मोक्षप्रकारमाह विश्व इति विश्वः स्थूलोपाधिः तं स्थूलं सूक्ष्मे विलाप्य सूक्ष्मोपाधिस्तैजसो भवति
सूक्ष्मं च कारणे विलाप्य कारणोपाधिः प्राज्ञो भवति कारणं च सर्वत्र साक्षित्वेनान्वयात्साक्षिस्वरूपे विलाप्य तुर्यो भवति ते

भा० स० ७५ यथेतरो भूत्वा भूत्वा निवर्त्तते तथा न निवर्त्तत इत्यर्थः ५५ वेदेन निर्मिते ते धूममभिसंभवंतीत्यादिना तेऽर्चिरभिसं
भवंतीत्यादिना च निश्चयेन विविच्य ज्ञापिते इत्यर्थः जनस्थोपि देहस्थोपि न मुह्यति ५६ तत्र हेतुमाह आदावि
ति जनानां देहादीनां आदौ कारणत्वेन अंते चावधित्वेन यत्सत् तथा बहिर्भोग्यं अंतर्भोक्तृरूपं परमवरं च उच्चं नीचं त
मोऽप्रकाशः ज्योतिः प्रकाशः तत्तु सर्वं अयं ज्ञानी स्वयमेव न तस्माद्व्यतिरिक्तं वस्तु किंचिदस्ति येन मुह्येदित्यर्थः ५७

देवयानमिदं प्राकृ भूत्वा भूत्वानुपूर्वशः आत्मयाज्युपशांतात्मा ह्यात्मस्थो न निवर्त्तते ५५ य एते पितृदे
वानामयने वेदनिर्मिते शास्त्रेण चक्षुषा वेद जनस्थोपि न मुह्यति ५६ आदावंते जनानां सद्बहिरंतः
परावरं ज्ञानं ज्ञेयं वचो वाच्यं तमो ज्योतिस्त्वयं स्वयं ५७ आबाधितोपि ह्याभासो यथा वस्तुतया स्मृ
तः दुर्घटत्वादैंद्रियकं तद्वदर्थविकल्पितं ५८ राम ७५

ननु तर्हि कथं पृथगर्थस्तस्यापि प्रतीयते तत्राह आबाधितः तर्कविरोधेन सर्वतो बाधितोपि आभासः प्रति
बिंबादिर्वस्तुतया यथा स्मृतः तद्वदैंद्रियकं सर्वमर्थत्वेन विकल्पितं न तु परमार्थतः दुर्घटत्वात् ५८ श्रीराम

तदेवाह क्षित्यादीनां पंचभूतानां छायाया ऐक्यबुद्ध्यालंबनरूपं देहादिसंघातारंभपरिणामानां मध्ये कतमापि अन्यत
मापि न भवति न तावत्तेषां संघातः वृक्षाणामिव वनं एकदेशाकर्षणे सर्वाकर्षणानुपपत्तेः न ह्येकस्मिन् वृक्षे आकृष्टे स
र्वं वनमाकृष्यते न च विकारः आरब्धो अवयवी अपिशब्दात्परिणामोपि कुतः स किं स्वावयवेभ्यो वा परिणतेभ्यो वा पृ
थक् तदन्वितो वा न तावदत्यंतं पृथक् तथा अप्रतीतेः न चान्वितः स किं प्रत्यवयवं सर्वोपि अन्वेति अंशेन वा आद्ये

क्षित्यादीनामिहार्थानां छाया न कतमापि हि न संघातो विकारोपि न पृथङ्नान्वितो मृषा ५९ धातवोव
यवित्वाच्च तन्मात्रावयवैर्विना न स्युर्ह्यसत्यवयविन्यसन्नवयवोंततः ६०

अंगुलिमात्रेऽपि देहबुद्धिः स्यात् द्वितीये तस्याप्यंशांगीकारे सत्यनवस्था स्यात् अतो मृषैवेत्यर्थः ५९ एवं देहादेर्मि
थ्यात्वमुक्त्वा तद्धेतूनां क्षित्यादीनामपि मिथ्यात्वमाह धातव इति धातवो महाभूतानि तन्मात्रैः सूक्ष्मैरवयवैर्विना
न स्युः अवयवित्वात्तेषामपि तर्ह्यवयवः सत्य इति चेत् तत्राह उक्तप्रकारेणावयविन्यसति अवयवोप्यंततोऽस
न्नेव स्यात् अवयविप्रतीत्यन्यथानुपपत्तिं विना तत्सद्भावे प्रमाणाभावादित्यर्थः तदुक्तं पंचमस्कंधे एवं निरुक्तं
क्षितिशब्दवृत्तमित्यादि ६०

भा० स० नन्ववयविनोऽभावे आगमापायिषु बाल्यादिषु सोयं देवदत्त इति प्रत्यभिज्ञानं न स्यात् तदुक्तं भट्टैः आविर्भावतिरोभा
७६ वधर्मकेष्वनपायियत् तद्धर्मीति तत्राह स्यादिति वस्तुनः परमात्मनो विकल्पे भेदे असति यद्वा वस्तुनोऽविद्यया वि
कल्पे सति पूर्वपूर्वारोपसादृश्यात् स एवेति भ्रमः स्यात् स च तावदेव यावदविद्यानिवृत्तिः ननु सर्वमिथ्यात्वे शास्त्र
स्य विधिनिषेधता कथं तत्राह स्वप्नमध्ये जाग्रत्त्वापव्यवस्था यथेति ६१ इदानीमुक्तमेवाद्वैतं भावनात्रयोपदेशेन

स्यात्सादृश्यभ्रमस्तावद्विकल्पेऽसति वस्तुनः जाग्रत्स्वापौ यथा स्वप्ने तथा विधिनिषेधता ६१ भावाद्वैतं क्रि
याद्वैतं द्रव्याद्वैतं यथात्मनः वर्त्तयन् स्वानुभूत्येह त्रीन् स्वप्नान् धुनुते मुनिः ६२ कार्यकारणवस्त्वैक्यमर्शनं प
टतन्तुवत् अवस्तुत्वाद्विकल्पस्य भावाद्वैतं तदुच्यते ६३ यद्ब्रह्मणि परे साक्षात्सर्वकर्मसमर्पणं मनोवाक्त
नुभिः पार्थ क्रियाद्वैतं तदुच्यते ६४

दृढीकरोति भावाद्वैतमिति चतुर्भिः वर्त्तयन्नालोचयन् स्वानुभूत्या आत्मतत्त्वानुभवेन त्रीन् जाग्रदादीन् त्रयश्चावस्थाः राम ७६
त्रयः स्वप्ना इति श्रुतेः यद्वा वस्तुभेदबुद्धिरेकः स्वप्नः ततस्तत्तदधिकारभेदेन कर्मभेदबुद्धिर्द्वितीयः ततो मत्कर्मसा
धितमेतत्फलं ममैव भोग्यमिति तृतीयः तान् धुनुते निवर्त्तयति ६२ कार्यकारणयोर्वस्त्वैक्यस्य मर्शनं आलोच
नं तन्तुरेव न पट इति ६३ मनोवाक्तनुभिः कृतानां कर्मणां समर्पणं तैः समर्पणमिति वा उद्देश्यफलभेदो हि क्रियाभे
दे हेतुः ईश्वरार्पणे च तदभावात् क्रियाणामद्वैतं ६४

आत्मनः स्वस्य जायादीनां च स्वार्थश्च कामश्च तयोः देहादीनां पञ्चभूतात्मकत्वेन भोक्तृश्च परमात्मत्वेनात्मभेदालोचने
नार्थकामयोर्यदैक्यदर्शनमित्यर्थः ६५ उक्तानाश्रमधर्मान् संक्षिप्याह यदिति यत् द्रव्यं येनोपायेन यतः सकाशात् ६६
प्रस्तुतमुपसंहरति एतैरिति अस्य श्रीकृष्णस्य गतिं तद्भक्तिभाक्तस्य भक्तः ६७ एतच्च सर्वसाधारणमुक्तं भक्तस्य

आत्मजायासुतादीनामन्येषां सर्वदेहिनां यत्स्वार्थकामयोरैक्यं द्रव्याद्वैतं तदुच्यते ६५ यद्यस्य वाऽनिषिद्धं
स्याद्येन यत्र यतो नृप स तेनेहेत कर्माणि नरो नान्यैरनापदि ६६ एतैरन्यैश्च वेदोक्तैर्वर्त्तमानः स्वकर्म
भिः गृहेप्यस्य गतिं यायाद्राजंस्तद्भक्तिभाङ्नरः ६७ यथा हि यूयं नृपदेव दुस्त्यजादापद्गणादुत्तरतात्‌
मनः प्रभोः यत्पादपंकेरुहसेवया भवानहारषीन्निर्जितदिग्गजः क्रतून् ६८

तद्भक्तिरेव सर्वपुरुषार्थहेतुरिति पाण्डवानेव लक्षीकृत्याह यथा हीति हे नृपदेव नृपैर्देवैश्च सहायैर्दुस्त्यजादि
ति वा आत्मनः श्रीकृष्णादेव प्रभोर्हेतोः अहार्षीः आर्षः उत्कर्षेणाचरतेत्यर्थः यथा यथावत्तमेव भजतेति शे
षः यद्वा यथा आपद्गणादुत्तीर्णास्त्वं यथा च क्रतून् अहार्षीः तथा श्रीकृष्णादेव तारकात् संसारादप्युत्तरते
त्यर्थः ६८

भा०स० ७७ श्रीकृष्णसेवामहतामवज्ञयाऽन्यथयति तत्कृपयाचसिध्यतीतिदर्शयन्स्वपूर्ववृत्तांतमाह अहमितिसार्द्धैःपंचभिः

अहंपुराभवंकश्चिद्गंधर्वउपबर्हणः नाम्नातीतेमहाकल्पेगंधर्वाणांसुसंमतः ६९ रूपपे
शलमाधुर्यसौगंध्यप्रियदर्शनः स्त्रीणांप्रियतमोनित्यंमत्तस्तुपुरलंपटः ७० एकदा
देवसत्रेतुगंधर्वाप्सरसांगणाः उपहूताविश्वसृड्भिर्हरिगाथोपगायने ७१ अहंचगायंस्त
द्विद्वान्स्त्रीभिःपरिवृतोगतः ज्ञात्वाविश्वसृजस्तन्मेहेलनंशेपुरोजसा ७याहित्वंशूद्र
तामाशुनष्टश्रीःकृतहेलनः ७२ तावद्दास्यामहंजज्ञेतत्रापिब्रह्मवादिनां शुश्रूषयानुषंगेण स्त राम
प्राप्तोहंब्रह्मपुत्रतां ७३ धर्मस्तेगृहमेधीयोवर्णितःपापनाशनः गृहस्थोयेनपदवीमंज ७७
साऽन्यासिनामियात् ७४

नाम्नाउपबर्हणः ६९ पेशलंसौकुमार्यंरूपादिभिःप्रियंदर्शनंयस्य ७० ७१ तद्गानंविद्वान्उन्मत्तः
सन्गायन्नेवगतः ७२ ७३ ७४

भा०स० ७८ त्वंतुकृतार्थएवेतिहर्षेणपुनःपूर्वश्लोकानयठतियूयमितिशेषंस्पष्टं ७५ ८० इतिसप्तमेभावार्थदीपिका

यूयंनृलोकेवतभूरिभागालोकंपुनानामुनयोभियंति येषांगृहानावसतीतिसाक्षाद्गूढंपरंब्रह्मम
नुष्यलिंगं ७५ सवाअयंब्रह्ममहद्विमृग्यंकैवल्यनिर्वाणसुखानुभूतिः प्रियःसुहृद्वःखलुमा
तुलेयआत्मार्हणीयोविधिकृद्गुरुश्च ७६ नयस्यसाक्षाद्भवपद्मजादिभीरूपंधियावस्तुतयो
पवर्णितं मौनेनभक्त्योपशमेनपूजितःप्रसीदतामेषससात्वतांपतिः ७७ श्रीशुकउवाच
इतिदेवर्षिणाप्रोक्तंनिशम्यभरतर्षभः पूजयामाससुप्रीतःकृष्णंचप्रेमविह्वलः ७८ कृष्णपार्था
वुपामंत्र्यपूजितःप्रययौमुनिः श्रुत्वाकृष्णंपरंब्रह्मपार्थःपरमविस्मितः ७९ इतिदाक्षायणीनां राम
तेपृथक्वंशाःप्रकीर्तिताः देवासुरमनुष्याद्यालोकायत्रचराचराः ८० इतिश्रीभागवतेमहापुरा ७८
णेपारमहंस्यांसंहितायांसप्तमस्कंधेप्रह्लादानुचरितेयुधिष्ठिरनारदसंवादेसदाचारःपंचदशोध्या
यः

यांटीकायांश्रीधरस्वामिकृतायांपंचदशोध्यायः शुभंभवतुलेखकपाठकयोः वासुदेवायनमः

[illegible]

अष्ट० श्रीगणेशाय नमः ॐ नमः परमहंसास्वादितचरणकमलचिन्मकरंदाय भक्तजनमानसनिवासाय श्रीरामाय ॥ अथा
१ ष्टमे तु चतुर्विंशत्याध्यायैर्मनुवर्णनं ॥ तत्सुतैर्ऋषिदेवेंद्रैर्मूर्तिभिश्च हरेः सह १ प्रतिमन्वंतरं चैवमन्वाद्याः षट् पृथक् पृथक् ॥
प्रवर्तयंति सद्धर्मान्पालयंत्या च रंति च २ अतो मन्वंतरस्योक्तं सद्धर्मेद्वितिलक्षणं ॥ येन वै क्रियमाणेन नरो न निरयं व्रजेत् ४ तत्र तु
प्रथमे स्वायंभुवः स्वारोचिषस्तथा ॥ उत्तमस्तामसश्चेति चतुर्मनुनिरूपणं ४ स्वायंभुवेंतरे नंतदुरंतगुणवर्णनात् ॥ मुदितः परी

राजोवाच स्वायंभुवस्येह गुरो वंशोयं विस्तराच्छ्रुतः ॥ यत्र विश्वसृजां सर्गो मनूनन्यान्वदस्व नः १ यत्र
यत्र हरेर्जन्म कर्माणि च महीयसः ॥ गृणंति कवयो ब्रह्मंस्तानि नो वद शृण्वतां २ यद्यस्मिन्नंतरे ब्रह्मन्
भगवान्विश्वभावनः ॥ कृतवान्कुरुते कर्ता ह्यतीतेनागतेद्य वा ३ ऋषिरुवाच मनवोस्मिन्व्यती
ताः षट् कल्पे स्वायंभुवादयः ॥ आद्यस्ते कथितो यत्र देवादीनां च संभवः ४ आकूत्यां देवहूत्यां च दुहित्रोस्तस्य
वै मनोः ॥ धर्मज्ञानोपदेशार्थं भगवान्पुत्रतां गतः ५ कृतं पुरा भगवतः कपिलस्यानुवर्णितं ॥ आख्यास्ये भग
वान्यज्ञो यच्चकार कुरूद्वह ६

प्रपंचसर्गमन्वंतरस्थितिं स्वायंभुवस्येति त्रिभिः यत्र विश्वसृजां मरीच्यादीनां मनुकन्यासु पुत्रपौत्रादिसर्गः १ महीयसो हरेः १
अत्र कवि इत्यपि पाठांतरमस्ति तदुपेक्षितमस्माभिः २ यस्मिन्नतीते यत्कृतवान् । यस्मिन्नागते यत्कर्ता करिष्यति । अथवा
वर्तमाने यत्कुरुते तद्वदेत्यन्वयः ३ अस्मिन्कल्पे षट् मनवो व्यतीताः ४ तस्य मनोर्दुहित्रोः कपिलयज्ञमूर्तिभ्यां पुत्रतां गतः प्राप्तः ५।६

७ घोरं दुश्चरं तपस्तप्यमानः समाधावनुभूतमिदं वक्ष्यमाणं निद्रितो च्छ्वसितवद्भिस्मितद्वत् उपदिशन्निव अनुवदन्निव अष्टाभिः श्लोकैर
न्वाह ८ येन चिदात्मना विश्वं चेतयते चेतनी भवति विश्वं तु यं न चेतयते न चेतनी करोति । स्वत एव चिद्रूपत्वात् । तत्र हेतुः । अस्मिन्देह्या नि
नेस्वपति यो जागर्ति साक्षितया वर्तते । अहो चित्रं ना यं जनुस्तं वेद स तु इमं वेद ९ तस्येश्वरत्वं दर्शयन् लोकस्य हितमुपदिशति ।
आत्मना ईश्वरेणावास्यं व्याप्तं चेतन्याध्यासं यथार्थं विश्वं सर्वं जगत्यां लोके यत् किंचिज्जगज्जातं । अतस्तेनैवेश्वरेण यत्किंचित्त्यक्तं द
त्तं धनं तेनैव भुंजीय भोगान्भुंक्ष्व यद्वा तेन हेतुना त्यक्तेन ईश्वरार्पणेन वा भुंजीथाः न स्वार्थं । कस्य स्वित् कस्य चित् अपि धनं मागृधः

विरक्तः कामभोगेषु शतरूपापतिः प्रभुः ॥ विसृज्य राज्यं तपसे सभार्यो वनमाविशत् ७ सुनंदायां वर्षशतं पदैकेन भुवं
स्पृशन् । तप्यमानस्तपो घोरमिदमन्वाह भारत ८ मनुरुवाच येन चेतयते विश्वं विश्वं चेतयते न यं । यो जागर्ति
शयानेस्मिन्नायं तं वेद वेद सः ९ आत्मावास्यमिदं विश्वं यत्किंचिज्जगत्यां जगत् । तेन त्यक्तेन भुंजीथा मा गृधः क
स्य स्विद्धनं १० यं न पश्यति पश्यंतं चक्षुर्यस्य न रिष्यति । तं भूतनिलयं देवं सुपर्णमुपधावत ११ श्रीरुक्म
मा भिकांक्षीः यद्वा कस्य स्विदिति कस्यान्यस्य धनमस्ति यतो धनकांक्षा क्रियते स्वर्थः । तथा च श्रुतिः ईशावास्यमिति यथा श्लोक
मेव १० ननु यदि स सर्वं व्याप्नोति तर्हि चक्षुरादिभिः किं न प्रतीयते तत्राह यं पश्यंतं जनः चक्षुर्वा न पश्यति चक्षुराद्यविषयत्वात् । न हि प्रमातारं प्रमा
णं विषयीकरोतीति भावः । तथा च श्रुतिः चक्षुषश्चक्षुरुत श्रोत्रस्य श्रोत्रमित्यादि ननु तर्हि घटनाशे देवदत्तस्य तद्विषयं चाक्षुषं ज्ञानमिवेश्वरस्या
पि स्वरूपभूतं तद्विषयं ज्ञानं नश्येत् तत्राह । यस्य तु पश्यतः चक्षुर्ज्ञानं न रिष्यति न नश्यति तत्र द्वाकारेणोत्पन्नत्वात् इतरेवन्नाशो न स्वतः सिद्धज्ञानस्य
न हि सवितृप्रकाशः प्रकाश्यनाशे नश्यतीति भावः । भूतानि निलयो यस्य सर्वांतर्यामिणं तथापि सुपर्णे शोभनं पतनं असंगं उपधावत भजत ध्यं ११

अष्ट· तस्य स्वरूपस्य नित्यत्वमेवोपपादयन्नाह। नयस्येति। अमूनि आद्यन्तादीनि विश्वस्य यस्माद्भवंति। विश्वं च यत्। यद्रूपं। अत एवाव्याप्ति
२ वारित्वात्। तत् ऋतं सत्यं महत्परिपूर्णं ब्रह्म १२ ननु विश्वं चेद्ब्रह्म तद्रूपं तर्हि तस्य कथं जन्माद्यभावः स्वप्रकाशत्वं वा कथं वा जगज्जन्मादिकर्तृ
त्वेन विकारिणः सत्यत्वं पूर्णत्वं वा तत्राह। सईशः अजः सत्यश्च स्वप्रकाशश्च पुराणश्च निर्विकारः विश्वं कायो यस्य पुरुणि बहूनि नामानि य
स्य तथाविधोपि। यतः अस्य विश्वस्य जन्मादि स्वशक्त्या मायया धत्ते। तां च नित्यसिद्धया विद्यया उदस्य हित्वा निःक्रिय एवास्ते १३
यस्मादेवमीश्वरः कर्म कृत्वा सन् त्यज्य नैष्कर्म्येणास्ते अथ अस्माद्धेतोः ऋषयोप्यग्रे आदौ कर्माणि कुर्वंति। किमर्थं अकर्मत्वं नैष्कर्म्यं मोक्षार्थे

नयस्याद्यंतौ मध्यं च स्वपरो नांतरं बहिः॥ विश्वस्यामूनि यद्यस्माद्विश्वं च तदृतं महत् १२ स विश्वकायः पुरुहूत ईशः स
त्यः स्वयंज्योतिरजः पुराणः॥ धत्तेस्य जन्माद्यजयात्मशक्त्या तां विद्ययोदस्य निरीह आस्ते १३ अथाग्रे ऋषयः कर्माणीह
तेऽकर्महेतवे। ईहमानो हि पुरुषः प्रायोनीहां प्रपद्यते १४ ईहते भगवानीशो न हि तत्र विषज्जते। आत्मलाभेन पूर्णार्थो
नावसीदंति येनुतं १५ तमीहमानं निरहंकृतं बुधं निराशिषं पूर्णमनन्यचोदितं॥ नृन्शिक्षयंतं निजवर्त्मसंस्थितं प्र
भुं प्रपद्येखिलधर्मभावनं १६

पाठांतरे कर्मनाशायाहि यस्मात् १४ नन्वीहमानः कर्मभिरवगुंठितः कोशकारवद्बध्येतैवेत्यत्राह। ईहत इति। अतस्तमनुवर्तमाना ये तेनाव
सीदंति न विषज्जंते १५ तदेवं लोकानुग्रहाय विश्वसृष्ट्यादि यः करोति श्रीरामकृष्णाद्यवतारैश्च वेदोक्तमप्याचरति तं शरणं व्रजामीत्याह॥ तमिति।
निजवर्त्मनि अवतारानुरूपे मार्गे तत्र सम्यक् स्थितं अतः ईहमानं कर्मपरं। तथापि जीववैलक्षण्यमाह। निरहंकृतं निराशिषं अनन्यचोदितमिति। नि
रहंकारत्वे हेतुः बुधं निराशीत्वे हेतुः पूर्णं। अनन्यनियुक्तत्वे हेतुः प्रभुं। तथापि कर्मानुष्ठाने हेतुः नृन् स्वाचारेण शिक्षयंतं। तत्किमर्थं तत्राह। अ २
खिलान्धर्मान्भावयति प्रवर्तयतीति तथा तं १६

समाहितमपि संतं मंत्रोपनिषदं व्याहरंतं दृष्ट्वा सुप्तोत्थितवद्विवशमिव मन्वाना असुरा यातुधानाश्च क्षुधानिमित्तेन तं जग्धुं अत्तुमभ्यद्रवन् अभिदु
द्रुवुः १७ यामैः स्वपुत्रैः त्रिविष्टपं स्वर्गमपालयत्। स्वयमेवेंद्रो बभूवेत्यर्थः। तत्र प्रतिमन्वंतरं मन्वादयः षडन्येन्ये भवंति। तथा हि सूतेो द्वादशे वक्ष्य
ति। मन्वंतरं मनुर्देवा मनुपुत्राः सुरेश्वरः॥ ऋषयोंशावताराश्च हरेः षड्विधमुच्यते इति। तत्राद्यः स्वायंभुवो मनुः प्रियव्रतोत्तानपादौ मनुपुत्रौ
यामादयो देवाः मरीचिप्रमुखाः सप्त ऋषयः यज्ञो हरेरवतारः इंद्रश्च स एवेति। तन्मन्वंतरं षड्विधमेव। तच्चतुर्थस्कंधोपक्रमे निरूपितं
१८ द्वितीयादिषु त्रिषु मन्वंतरेषु मन्वादिषट्कमाह। स्वारोचिषो द्वितीय इत्यादि यावद्गजेंद्रमोक्षप्रश्नः १९। २० २१। विभोरसाधारणं च

श्रीशुक उवाच इति मंत्रोपनिषदं व्याहरंतं समाहितं॥ दृष्ट्वासुरा यातुधाना जग्धुमभ्यद्रवन्क्षुधा १७ तांस्तथावसितान्
वीक्ष्य यज्ञः सर्वगतो हरिः॥ यामैः परिवृतो देवैर्हत्वाशासत्त्रिविष्टपं १८ स्वारोचिषो द्वितीयस्तु मनुरग्नेः सुतोऽभवत्। द्युमा
त्सुषेणरोचिष्मत्प्रमुखास्तस्य चात्मजाः १९ तत्रेंद्रो रोचनस्त्वासीद्देवाश्च तुषितादयः। ऊर्जस्तंभादयः सप्त ऋषयो ब्रह्म
वादिनः २० ऋषेस्तु वेदशिरसस्तुषिता नाम पत्न्यभूत्। तस्यां जज्ञे ततो देवो विभुरित्यभिविश्रुतः २१ अष्टाशीतिसहस्रा
णि मुनयो ये धृतव्रताः। अन्वशिक्षन्व्रतं तस्य कौमारब्रह्मचारिणः॥ २२ तृतीय उत्तमो नाम प्रियव्रतसुतो मनुः। पवनः सृ
ञ्जयो यज्ञहोत्राद्यास्तत्सुता नृप २३ वसिष्ठतनयाः सप्त ऋषयः प्रमदादयः। सत्या वेदश्रुता भद्रा देवा इंद्रस्तु सत्य
जित् २४ धर्मस्य सूनृतायां तु भगवान्पुरुषोत्तमः। सत्यसेन इति ख्यातो जातः सत्यव्रतैः सह २५ सोऽनृतव्रतदुःशी
लानसतो यक्षराक्षसान्। भूतद्रुहो भूतगणांश्चावधीत्सत्यजित्सखः २६ चतुर्थ उत्तमभ्राता मनुर्नाम्ना च तामसः॥
पृथुः ख्यातिर्नरः केतुरित्याद्या दश तत्सुताः २७
रितमाह। अष्टाशीतिसहस्राणीति २२ सत्यजितः इंद्रस्य सखा सन् २६ उत्तमस्तृतीयो मनुः तस्य भ्राता तामसश्चतुर्थो मनुरिति॥ २७

अष्ट. त्रिशिखईश्वरः इंद्रः २८ अन्यानपि विशिष्टपराक्रमान्देवानाह। देवावैधृतयइति २९ हरिरित्याहृतः ह्याहृतः। ग्रहात्याहात् ३० अमू
३ मुवत्मोसयामास ३१ श्रवणेच्छायांहेतुः तत्कथासुतासुकथासुसाक्षेथेवत्वासुमहत्पुण्यं पुण्यस्यविशेषणं धन्यमित्यादि ३२। ३३।

सत्यकाहरयोवीराद्देवास्त्रिशिखईश्वरः। ज्योतिर्धामादयःसप्तऋषयस्तामसेंतरे २८ देवावैधृतयोनामविधृतेस्त
नयान्नृपा। नष्टाःकालेनयैर्वेदाविधृताःस्वेनतेजसा २९ तत्रापिजज्ञेभगवान्हरिण्यांहरिमेधसः। हरिरित्याहृतोयेन
गजेंद्रोमोचितोग्रहात् ३० राजोवाच बादरायणएतत्तेश्रोतुमिच्छामहेवयं। हरिर्यथागजपतिंग्राहग्रस्तममूमुच
त् ३१ तत्कथासुमहत्पुण्यंधन्यंस्वस्त्ययनंशुभं। यत्रयत्रोत्तमश्लोकोभगवान्गीयतेहरिः ३२ सूतउवाच परीक्षि
तैवंसतुबादरायणिःप्रायोपविष्टेनकथासुचोदितः। उवाचविप्राःप्रतिनंद्यपार्थिवंमुदामुनीनांसदसिस्मशृण्वतां ३३ इ
तिश्रीभागवतेमहापुराणेअष्टमस्कंधेमन्वंतरानुवर्णनंनामप्रथमोध्यायः श्रीशुकउवाच आसीद्गिरि
वरोराजन्त्रिकूटइतिविश्रुतः। क्षीरोदेनावृतःश्रीमान्योजनायुतमुच्छ्रितः १ तावताविस्तृतःपर्यक्त्रिभिःशृंगैःपयोनि
धिं। दिशःखंरोचयन्नास्तेरौप्यायससुवर्णमयैः २ अन्यैश्चककुभःसर्वारत्नधातुविचित्रितैः। नानाद्रुमलतागुल्मैर्नि
र्घोषैर्निर्झराम्भसां ३ Xवान्वयःकथंभूतैःशृंगैःरत्नैर्धातुभिश्चविचित्रितैः। नानाविधाद्रुमलतानागुल्मायेषुतैः ३

इत्यष्टमेप्रथमः तुर्यमन्वंतरेप्रोक्तंगजेंद्रस्यविमोक्षणं। द्वितीयादित्रिभिस्तत्रविस्तरेणोपवर्ण्यते १ द्वितीयेतुगजेंद्रस्यगतीभिः
क्रीडोजलेदैवाद्ग्राहदृष्टौ। तस्यहरिस्मृतिरुदीर्यते २। आसीत्अस्ति। १। तावतायोजनायुतेनपर्यक्परितः त्रिकूटसमाख्याबीजमा ३
हत्रिभिःशृंगैःमुख्यैःसुवर्णरौप्यलोहमयैःआख्यायस्य २ अन्यैश्चशृंगैःनिर्झराम्भसांनिर्घोषैश्चककुभःसर्वारोचयन्नास्तेइतिपूर्वेण

पयसःऊर्मिभिःसमंतादवनिज्यमानाअंघ्रयोयस्यतेप्रांतायस्य। हरिद्भिःपालाशवर्णैः ४।५। किंनरादीनांसंगीतसंनादैर्नदंत्योगुहायस्मि
न्प्रदेशेतंअभिगर्जतिहर्यक्षसिंहाअमर्षयाअसहनेन ६ नानायेआरण्याःपशवःतेषांव्रातैःसंकुलाभिःद्रोणीभिःअलंकृतआस्तेकिंच ३
चित्राद्रुमायेषुसुरोद्यानेषुकलकंठामधुरस्वनाविहंगमायस्मिन् ७ किंच स्वच्छोदकैःसरित्सरोभिर्युतः। मणयएववालुकायेषुतैःपुलिनैः

सत्यवनिज्यमानांघ्रिःसमंतात्पयऊर्मिभिः करोतिश्यामलांभूमिंहरिन्मरकताश्मभिः ४ सिद्धचारणगंधर्वविद्याध
रमहोरगैः। किंनरैरप्सरोभिश्चक्रीडद्भिर्जुष्टकंदरः ५ यत्रसंगीतसंनादैर्नदद्गुहममर्षया। अभिगर्जंतिहरयःश्लाघि
नःपरशंकया ६ नानारण्यपशुव्रातसंकुलद्रोण्यलंकृतः। चित्रद्रुमसुरोद्यानकलकंठविहंगमः ७ सरित्सरोभिरच्छो
दैःपुलिनैर्मणिवालुकैः। देवस्त्रीमज्जनामोदसौरभांब्वनिलैर्युतः ८ तस्यद्रोण्यांभगवतोवरुणस्यमहात्मनः। उद्या
नमृतुमन्नामआक्रीडंसुरयोषितां ९ सर्वतोलंकृतंदिव्यैर्नित्यपुष्पफलद्रुमैः। मंदारैःपारिजातैश्चपाटलाशोकचंपकैः
१० चूतैःप्रियालैःपनसैराम्रैराम्रातकैरपि। क्रमुकैर्नारिकेरैश्चखर्जूरैर्बीजपूरकैः ११ मधुकैःशालताल्रैश्चतमालैरस
नार्जुनैः। अरिष्टोडुंबरप्लक्षैर्वटैःकिंशुकचंदनैः १२ पिचुमंदैःकोविदारैःसरलैःसुरदारुभिः। द्राक्षेक्षुरंभाजंबूभिर्बदर्य
क्षाभयामलैः १३ बिल्वैःकपित्थैर्जंबीरैर्वृतोभल्लातकादिभिः। तस्मिन्सरःसुविपुलंलसत्कांचनपंकजं ॥१४॥

श्चयुतः। देवस्त्रीणांमज्जनेनयआमोदःतेनसौरभ्ययुक्तान्यंबूनिअनिलाश्चतैश्चयुतआस्ते ८ तस्यद्रोण्यांवरुणस्योद्यानमास्तेगिरि
वनादिसर्वंध्येयमितिवक्ष्यतिअतोगिरिमुपवर्ण्यवनंवर्णयतिमंदारैरितिषड्भिःमंदारादिभिर्वृतइत्यन्वयः १०।११।१२।१३। तस्मिन्निवि
रोसरश्चास्तेतद्वर्णयतिसुविपुलमित्यादिसार्द्धैःपंचभिः। लसंतिकांचनपंकजानियस्मिन् ॥१४॥ श्रीकृष्णःशरणं

अष्ट० कुमुदादीनां श्रिया ऊर्जितं। कलः स्वनो येषां तैः शकुंतैश्च निर्घुष्टं १५ चक्राह्वैः सारसैश्चाकीर्णं। जलकुक्कुटादीनां कुलैः कूजितं १६ मत्स्या
नां कच्छपानां च संचारेण चलंतो ये पद्मास्तेषां रजसा युक्तं पयो यस्मिंस्तत् १७।१८ नित्यमृतवः फलपुष्पादिसंपत्तिहेतवो येषां तैर्द्रुमैरलं शोभितं १९ त
४ त्रैवं सति एकदा तद्गिरिकाननाश्रयो वारणयूथपः करेणुभिश्चरन् तृषार्दितेन स्वयूथेन वृतः सरोवरस्याभ्याशं समीपमगमदिति पंचमेनान्व

कुमुदोत्पलकह्लारशतपत्रश्रियोर्जितं मत्तषट्पदनिर्घुष्टं शकुंतैश्च कलस्वनैः १५ हंसकारंडवाकीर्णं चक्राह्वैः सारसैरपि। ज
लकुक्कुटकोयष्टिदात्यूहकुलकूजितं १६ मत्स्यकच्छपसंचारचलत्पद्मरजःपयः। कदंबवेतसनलनीपवंजुलकैर्वृतं १७ कुंदैः कु
रबकाशोकैः शिरीषैः कुटजेंगुदैः। कुब्जकैः स्वर्णयूथीभिर्नागपुन्नागजातिभिः १८ मल्लिकाशतपत्रैश्च माधवीजालकादि
भिः। शोभितं तीरजैश्चान्यैर्नित्यर्तुभिरलं द्रुमैः १९ तत्रैकदा तद्गिरिकाननाश्रयः करेणुभिर्वारणयूथपश्चरन्। सकंटकान्कीचक
वेणुवेत्रवद्विशालगुल्मं प्ररुजन्वनस्पतीन् २० यद्गंधमात्राद्धरयो गजेंद्रा व्याघ्रादयो व्यालमृगाः सखड्गाः। महोरगाश्चापि भया
द्द्रवंति सगौरकृष्णाः सरभाश्चमर्यः २१ वृका वराहा महिषर्क्षशल्या गोपुच्छशालावृकमर्कटाश्च। अन्यत्र क्षुद्रा हरिणाः शशाद
यश्चरंत्यभीता यदनुग्रहेण २२ स घर्मतप्तः करिभिः करेणुभिर्वृतो मदच्युत्कलभैरनुद्रुतः। गिरिं गरिम्णा परितः प्रकंपयन्नि
षेव्यमाणोऽलिकुलैर्मदाशनैः २३ सरोऽनिलं पंकजरेणुरूषितं जिघ्रन्विदूरान्मदविह्वलेक्षणः। वृतः स्वयूथेन तृषार्दितेन तत्सरोवराभ्याश
मथागमद्द्रुतं २४ बीमदमश्नंति इति तथा तैः २३।२४ ४

यः। किं कुर्वन्। कीचकवेणुवेत्रवंतं विशालं गुल्मं लतादिसंदर्भं वनस्पतींश्च प्ररुजन् प्रभंजन् २० कथंभूतः। यस्य गंधमात्राद्धरयः सिंहा गजेंद्राद
यश्च भयाद्द्रवंति पलायंते २१ वृकादयस्तु क्षुद्रा अल्पप्राणिनः अन्यत्र दृष्टिपथं त्यक्त्वा चरंति २२ पुनः कीदृशः घर्मतप्तः मदच्युत् मदस्रावी

निजेन पुष्करेण कराग्रेणोद्धृतं गतक्लमः सन् निकामं पपौ २५।२६।२७ दीनधियः करेणवः तं केवलं विचुक्रुशुः २८।२९ मनउत्साहः शक्तिः ब
लं शारीरं ओजः इंद्रियतेजः तेषां। सकलं बलादि विपर्ययो विपरीतं अधिकं जलौकसो ग्राहस्य ३० सङ्गत्येयदा प्राणस्य संकटमापयतो देही। ३१ बु ४

विगाह्य तस्मिन्नमृतांबु निर्मलं हेमारविंदोत्पलरेणुवासितं। पपौ निकामं निजपुष्करोद्धृतमात्मानमद्भिः स्नपयन्गतक्लमः २५
स्वपुष्करेणोद्धृतसीकरांबुभिर्निपाययन्संस्नपयन्यथा गृही। घृणी करेणुः कलभांश्च दुर्मदो नाचष्ट कृच्छ्रं कृपणोऽजमायया।। २६।।
तं तत्र कश्चिन्नृप दैवचोदितो ग्राहो बलीयांश्चरणे रुषाग्रहीत्। यदृच्छयैवं व्यसनं गतो गजो यथाबलं सोऽतिबलो विचक्रमे।। २७।। त
थातुरं यूथपतिं करेणवो विकृष्यमाणं तरसा बलीयसा।। विचुक्रुशुर्दीनधियोऽपरे गजाः पार्ष्णिग्रहास्तारयितुं न चाशकन् २८
नियुध्यतोरेवमिभेंद्रनक्रयोर्विकर्षतोरंतरतो बहिर्मिथः। समाः सहस्रं व्यगमन्महीपते सप्राणयोश्चित्रममंसतामराः।।२९।।
ततो गजेंद्रस्य मनोबलौजसां कालेन दीर्घेण महानभूद्व्ययः। विकृष्यमाणस्य जलेऽवसीदतो विपर्ययोऽभूत्सकलं जलौकसः ३०
इत्थं गजेंद्रः स यदाप संकटं प्राणस्य देही विवशो यदृच्छया। अपारयन्नात्मविमोक्षणे चिरं दध्याविमां बुद्धिमथाभ्यपद्यत ३१
न मामिमे ज्ञातय आतुरं गजाः कुतः करिण्यः प्रभवंति मोचितुं। ग्राहेण पाशेन विधातुरावृतोऽप्यहं च तं यामि परं परायणं ३२
यः कश्चनेशो बलिनोंऽतकोरगात्प्रचंडवेगादभिधावतो भृशं। भीतं प्रपन्नं परिपाति यद्भयान्मृत्युः प्रधावत्यरणं तमीमहि ३३
॥ ॥इति श्री भा० अष्टम० गजेंद्रोपाख्याने द्वितीयोऽध्यायः॥ ॥

द्विमेवाहं न मामिति। अहं वन प्रक्षयामि। यतः ग्राहरूपेण केवलं विधातुः पाशेनावृतः। तथापि तं परं परमेश्वरं परेषां ब्रह्मादीनां अय
नमाश्रयभूतं शरणं यामि ३२ कोसौ यं शरणं यासि तत्राह। यः कश्चनेति। अंतक एवोरगस्तस्मात्। तं शरणमीमहि व्रजेम। यद्भयादित्यत्र श्रुतिः

भीषास्माद्वातः पवते भीषोदेति सूर्यः। भीषास्मादग्निश्चेन्द्रश्च मृत्युर्धावति पंचम इति ३३ अष्टमे द्वितीयः ॥ त्वत्रीयेतु गजेंद्रः एकस्तु नोह
रिरूपेत्युक्तं। समुद्रधारेसंग्राहाक्रांतः देवलशापात्। १ जाप्यं जप्यं स्तोत्रं प्राग्जन्मनि इंद्रद्युम्नसंज्ञे १ तस्मै नमो नमनं अभिधीमहि अभि
ध्यायेम केवलं आहुत्य हीति लेनक्रायमप्रतीतिरशक्यत्वात्। स्वस्मृतत्वान् संभावयितुं विशिनष्टि यत् आश्रिद्रूपादेतद्देहादि विदात्मकं चेतनं स
वति। तदुक्तं येन चेतयते विश्वं विश्वं चेतयते न यमिति। तत्र हेतुः पुरुषाय पूर्षु कारणत्वेन प्रविष्टाय। ननु प्रकृति पुरुषौ कारणमिति प्रसिद्धं तत्राह।
आदिः प्रकृतिः बीजं पुरुषः तद्रूपाय प्रविष्टत्वेपि जीववत्संसारं तं च वारयति। परेशायेति २ परमैश्वर्यं विष्टं एवन्नाद्याघत्समीति ॥

श्रीशुक उवाच ॥ एवं व्यवसितो बुध्या समाधाय मनो हृदि। जजाप परमं जाप्यं प्राग्जन्मन्यनुशिक्षितं १ गजेंद्र उवाच
॥ नमो भगवते तस्मै यत एतच्चिदात्मकं। पुरुषायादिबीजाय परेशायाभिधीमहि २ यस्मिन्निदं यतश्चेदं येनेदं य
इदं स्वयं। योस्मात्परस्माच्च परस्तं प्रपद्ये स्वयंभुवं ३ यः स्वात्मनीदं परमाययार्पितं क्वचिद्विभातं क्व च तत्तिरोहितं। अविद्ध
दृक्साक्ष्युभयं तदीक्षते स आत्ममूलोवतु मां परात्परः ४ कालेन पंचत्वमितेषु कृत्स्नशो लोकेषु पालेषु च सर्वहेतुषु। तम
स्तदासीद्गहनं गभीरं यस्तस्य पारेभिविराजते विभुः ५ × दुरवगाहं गम्भीरमनंतं तस्य तमसः। आदित्यवर्णं तमसः परस्ता
दिति श्रुतेः ५

यस्मिन्नाधिष्ठाने। यतः उपादानात्। येन कर्त्रा। यश्च स्वयमेवेदं विश्वं भवति अस्मात्कार्यात् परस्मात्कारणाच्च यः परस्तं स्वयंभुवं स्वतः सिद्धं प्रपद्ये शरणं व्र
जामि ३ विश्वहेतुत्वस्वतः सिद्धत्वोक्तिः। इदानीं विश्वप्रकाशत्वं स्वप्रकाशत्वं च वर्ण्यन्प्रार्थयते। यः स्वात्मनीति। विभातं अभिव्यक्तं सत्। तदुभयं कार्यकार
णं च सोक्षी स च मीक्षते साक्षित्वे हेतुः। अविद्धदृक् अलुप्तदृष्टिः आत्ममूलः स्वप्रकाशः कुतः परात्प्रकाशकाच्चक्षुरादेः परः तस्यापि प्रकाश
कः इत्यर्थः। चक्षुषश्चक्षुरिति श्रुतेः ४ तिरोहितमीक्षत इत्येतत्प्रपंचपूर्वकं दुर्ज्ञेयत्वं वदन्प्रार्थयते कालेनेति द्वाभ्यां पंचत्वमितेषु नाशं प्राप्तेषु गहनं

अत एव देवादयोपि यस्य स्वरूपं न विदुः जंतुः दुरत्ययं दुर्गममनुक्रमणं चरितं कथनं वा यस्य सः मामवतु ६ कथं
तर्हि तमेव विदित्वातिमृत्युमेतीत्यादिश्रुतिविरोध इत्याशंक्य तत्प्राप्त्युपायं कथयन्नाह। दिदृक्षव इति। अलोकव्रतं ब्रह्मचर्यादि। अव्रणं अछिद्रं
भूतानामात्मभूताः भूतेष्वात्मदृष्टयः सन्तः समेग तिरस्तु ७ दुरत्ययानुक्रमणत्वं प्रपंचयन्प्रणमति। न विद्यत इत्यादिना। लोकानाम
पाय प्रलयः संभवो जन्मता योद्वितीयं। तदर्थं यस्तानि जन्मादीनि स्वीकरोति। तस्मै नम इत्युत्तरेणान्वयः ८ ब्रह्मणे ब्रह्मरूपाय। अन

न यस्य देवा ऋषयः पदं विदुर्जन्तुः पुनः कोर्हति गंतुमीरितुं। यथा नटस्याकृतिभिर्विचेष्टतो दुरत्ययानुक्रमणः स मावतु ६ दिदृक्षवो यस्य पदं सुमंगलं विमुक्तसंगा मुनयः सुसाधवः। चरंत्यलोकव्रतमव्रणं वने भूतात्मभूताः सुहृदः स मे ग
तिः ७ न विद्यते यस्य च जन्म कर्म वा न नामरूपे गुणदोष एव वा। तथापि लोकाप्ययसंभवाय यः स्वमायया तान्यनुकाल
मृच्छति ८ तस्मै नमः परेशाय ब्रह्मणेनंतशक्तये। अरूपायोरुरूपाय नम आश्चर्यकर्मणे ९ नम आत्मप्रदीपा
य साक्षिणे परमात्मने। नमो गिरां विदूराय मनसश्चेतसामपि १० सत्त्वेन प्रतिलभ्याय नैष्कर्म्येण विपश्चिता।
नमः कैवल्यनाथाय निर्वाणसुखसंविदे ११ नमः शांताय घोराय मूढाय गुणधर्मिणे। निर्विशेषाय साम्याय नमो ज्ञा
नघनाय च १२

तशक्तये उरुरूपाय अत आश्चर्याणि कर्माणि यस्य तस्मै परेशाय नमः ९ आत्मप्रदीपाय प्रकाशांतरस्याविषयाय। कुतः साक्षिणे प्र
काशकाय। परमात्मने जीवनियंत्रे। अत एव गिरां विदूराय अप्राप्य चेतसां चित्तवृत्तीनां। तथा च श्रुतिः। यतो वाचो निवर्तंते अप्राप्य मनसा
सहेति १० एवमपि विपश्चिता निपुणेन नैष्कर्म्येण संन्यासेन सत्त्वेन शुद्धेन। संन्यासयोगाद्यतयः शुद्धसत्त्वा इति श्रुतेः। प्रतिलभ्याय प्र
त्यक्त्वेन प्राप्याय। निर्वाणसुखसंविदे मोक्षानंदानुभूतये ११ गुणधर्मिणे सत्वादिधर्मानुकारिणे ज्ञानघनाय चेति निर्विशेषत्वे प्रधानत्वे लक्ष

अष्ट० साक्षिण इति सर्वाध्यक्षत्वेपि निर्विकारत्वमुक्तं। आत्मनां क्षेत्रज्ञानां मूलाय मूलस्य प्रधानस्यापि प्रकृतये उद्भवहेतवे। तत्र हेतुः पुरुषाय पूर्वमे
८ वसते। तथा च श्रुतिः पूर्वमेवाहमिहासमिति तत्पुरुषस्य पुरुषत्वमिति। पूर्णायेति वा १३ सर्वेन्द्रियाणां ये गुणा विषयास्तेषां द्रष्ट्रे। सर्वप्रत्ययाद्
दियवृत्तयो हेतवो ज्ञापका यस्य तस्मै। तदेवाह। असता अहंकारादिप्रपंचेन छायया सद्रूपता उक्ताय। प्रतिबिंबेन बिंबमिव सूचिताय। तत्र हे
तुः सद्रूपेषु विषयेषु आभासो यस्य तस्मै। तदुक्तं तृतीये। यथा जलस्थ आभास इत्यादिना। पाठांतरे असतस्य छायया अध्यासेन अक्ताय युक्ता

क्षेत्रज्ञाय नमस्तुभ्यं सर्वाध्यक्षाय साक्षिणे। पुरुषायात्ममूलाय मूलप्रकृतये नमः १३ सर्वेन्द्रियगुणद्रष्ट्रे सर्वप्रत्यय
हेतवे। असता च्छाययोक्ताय सदाभासाय ते नमः १४ नमो नमस्तेखिलकारणाय निःकारणायाद्भुतकारणाय। सर्वाग
माम्नायमहार्णवाय नमोपवर्गाय परायणाय १५ गुणारणिच्छन्नचिदूष्मपाय तत्क्षोभविस्फूर्जितमानसाय। नैष्क
ग र्म्यभावेन विवर्जितागमस्वयंप्रकाशाय नमस्करोमि १६

य तदधिष्ठानायेत्यर्थः १४ अखिलकारणाय सर्वकारकरूपाय। अत एव स्वयं निःकारणाय। कारणत्वेपि मृदादिवद्विकाराभावादस्य
ति। अद्भुतकारणायेति। एवंभूतत्वे कारणमाह। सर्वे आगमाः पांचरात्रादयः आम्नायाश्च वेदाः तेषां महार्णवाय स्रोतसामिव पर्यव
सानस्थानाय। अपवर्गाय मोक्षरूपाय। अतः परायणाय उत्तमानामाश्रयाय १५ गुणा एवारणिस्तया छन्नश्चिदूष्मपो
ज्ञानाग्निः तस्मै। तेषां गुणानां क्षोभे कार्ये विस्फूर्जितं बहिर्वृत्तिकं मानसं यस्य। सोकामयत बहु स्यामिति श्रुतेः। नैष्कर्म्यमा ८
त्मतत्वं तस्य भावेन भावनया विवर्जिता आगमा विधिनिषेधलक्षणाः यैः तेषु स्वयमेव प्रकाशो यस्य तस्मै १६ श्रीरुक्ल

मादृक्मद्विधश्चासौ प्रपन्नः पशुः तस्य पाशो ऽविद्या तस्या विशेषेण मोक्षणं येन। तत्र योग्यतामाह। मुक्ताय मोचने हेतुः भूरिकरुणा
यस्य। अतस्तत्रार्थे अलयाय अनलसाय। स्वांशेन अंतर्यामिरूपेण सर्वेषां तनुभृतां मनसि प्रतीता प्रत्यक्स्वरूपा दृक् तस्मै। तथा
च श्रुतिः। य आत्मनि तिष्ठन् आत्मानमंतरो यमयतीति। भगवते सर्वेषां तनुभृतां नियमने समर्थाय। तेषां मनसि स्थितत्वेपि बृहते
अपरिच्छिन्नाय १७ अंतःस्थत्वेपि देहादिष्वासक्तैर्दुःप्रापणाय प्राप्तुमशक्याय। तत्र हेतुः। गुणसंगेन विवर्जिताय। अत एव मुक्ता

मादृक्प्रपन्नपशुपाशविमोक्षणाय मुक्ताय भूरिकरुणाय नमोलयाय॥ स्वांशेन सर्वतनुभृन्मनसि प्रतीतप्रत्यग्दृ
शे भगवते बृहते नमस्ते १७ आत्मात्मजाप्तगृहवित्तजनेषु सक्तैर्दुःप्रापणाय गुणसंगविवर्जिताय। मुक्तात्मभिः स्व
हृदये परिभाविताय ज्ञानात्मने भगवते नम ईश्वराय १८ यं धर्मकामार्थविमुक्तिकामा भजंत इष्टां गतिमाप्नुवंति। किं
त्वाशिषो रात्यपि देहमव्ययं करोतु मेदभ्रदयो विमोक्षणं १९ एकांतिनो यस्य न कंचनार्थं वांछंति ये वै भगवत्प्रपन्नाः।
अत्यद्भुतं तच्चरितं सुमंगलं गायंत आनंदसमुद्रमग्नाः २० तमक्षरं ब्रह्म परं परेशमव्यक्तमाध्यात्मिकयोगगम्यं। अ
तीन्द्रियं सूक्ष्ममिवातिदूरमनंतमाद्यं परिपूर्णमीडे २१

त्मभिर्देहादिष्वनासक्तैः चिंतिताय। तैः परिभावितं स्वरूपमाह। ज्ञानात्मन इति १८ इष्टां गतिं कामितं धर्मादिफलं प्राप्नुवंत्येव न तावदेव।
किंतु यास्तेरकामितास्ता अपि आशिषो राति ददाति। देहमप्यव्ययं राति। एवंभूतः अदभ्रदयः समे विमोक्षणमेवैकं फलं करोतु। नाधिकं प्रार्थये १९ एता
वदेवाहं। न किंचित्सुखं नाभिज्ञत्वेन वांछामि। यस्य तु एकांतभक्ता न कंचिदर्थं वांछंति। तं परमेश्वरमीडे स्तोमीति उत्तरेणान्वयः। तेषां निःकामत्वे हेतुः।
ये वै भगवंतं सर्वथा मुक्तं प्रपन्नाः सेवितवंतः २० अत्यद्भुतसुमंगलत्वप्रदर्शनार्थमक्षरत्वादिविशेषणानि २१ श्रीरुक्ल

अष्ट॰
८

परिपूर्णत्वं प्रदर्शयन्नाह त्रिभिः यस्येति। फल्ग्व्या तुच्छरूपयैव कलया अंशेन कृताः सृजन्ता इति तृतीयेनान्वयः २२ कथं कृता इत्यपेक्षायां हृष्टांतो यथार्चिषोग्नेरितिप्रवाहे हृष्टांतः। सवितुर्गभस्तयइत्यानंत्ये। निर्यांति उद्गच्छंति। संयांति लीयंते। गुणसंप्रवाहमेवाह। बुद्धिर्मनः खानि करणानि शरीरसर्गाः कार्यदेहप्रवाहाश्च यतो भवंति सः २३ अत एव देवादीनां मध्ये कोपि न भवति। न जंतुः लिंगत्रय शून्यप्राणिमात्रमपि। किंतु सर्वस्य निषेधे अवधित्वेन अवशिष्यत इति निषेधशेषः। मायया अशेषात्मकश्च जयतात् सम

यस्य ब्रह्मादयो देवा वेदा लोकाश्चराचराः। नामरूपविभेदेन फल्ग्व्या च कलया कृताः २२ यथार्चिषोग्नेः सवितुर्गभस्तयो निर्यांति संयांत्यसकृत्स्वरोचिषः॥ तथा यतोयं गुणसंप्रवाहो बुद्धिर्मनः खानि शरीरसर्गाः २३ स वै न देवासुरमर्त्यतिर्यङ् न स्त्री न षंढो न पुमान्न जंतुः। नायं गुणः कर्म न सन्न चासन्निषेधशेषो जयतादशेषः २४ जिजीविषे नाहमिहामुया किमंतर्बहिश्चावृतयेभयोन्या। इच्छामि कालेन न यस्य विप्लवस्तस्यात्मलोका वरणस्य मोक्षं॥ २५॥ सोहं विश्वसृजं विश्वमविश्वं विश्ववेदसं। विश्वात्मानमजं ब्रह्म प्रणतोस्मि परं पदं २६

द्धिमोक्षणाय आविर्भवतु २४ न च ग्राहाच्छरीरस्य मोक्षणेनाहं जीवितुमिच्छामि। तत्र हेतुः। अमुया अंतर्बहिश्चाविवेकव्याप्तया गजजात्या किं प्रयोजनं। आत्मलोकस्य आत्मप्रकाशस्य यदावरणमज्ञानं तस्यैव तु मोक्षमिच्छामि। यस्य मोक्षस्य कालेन नाशो नास्ति। य द्वा देहसंबंधात् देहनाशेन स्यादेव किं तन्मोक्षप्रार्थनेन। आत्मलोकावरणस्य तु कालेन विप्लवो नास्ति। ज्ञानैकनिवर्त्यत्वात्। अतस्तस्यैव मोक्षमिच्छामीत्यर्थः २५ सोहं मुमुक्षुः विश्वरूपं अविश्वं विश्वव्यतिरिक्तं च विश्ववेदं धनं उपकरणं यस्य तं। विश्वस्यात्मानं च। केवलं प्रणतोस्मि

[illegible] ८

योगं विना दुर्ज्ञानत्वादित्याह। योगेन भगवद्धर्मेण रंधितानि दग्धानि कर्माणि येषां ते यं प्रपश्यंति २७ तर्हि सर्वेपि योगमेव किं नाश्रिताः तत्राह नम इति द्वाभ्यां। असह्यो वेगो रागादिलक्षणो यस्य। तथाभूतं शक्तित्रयं यस्य तस्मै। बहिश्च अखिलधियां सर्वेंद्रियाणां गुणाय शब्दादिरूपे ण प्रतीयमानाय। अतः कदिंद्रियाणां कुत्सितानींद्रियाणि येषां तेषां अनवाप्यं वर्त्म यस्य २८ यच्छक्त्या यस्य मायया अहंधीः तया हतं आ वृतं अयं जनो न वेद दुरत्ययं माहात्म्यं यस्य तं। इतः आश्रितोस्मि २९ उपवर्णितं निर्विशेषं मूर्त्तिमिदं विना परं तत्त्वं येन तं। विविधा वासो लिं

योगरंधितकर्माणो हृदि योगविभाविते। योगिनो यं प्रपश्यंति योगेशं तं नतोस्म्यहं २७ नमो नमस्तुभ्यमसह्यवेगशक्तित्रयायाखिलधीगुणाय। प्रपन्नपालाय दुरंतशक्तये कदिंद्रियाणामनवाप्यवर्त्मने २८ नायं वेद स्वमात्मानं यच्छक्त्याहंधिया हतं। तं दुरत्ययमाहात्म्यं भगवंतमितोस्म्यहं २९ श्रीशुक उवाच एवं गजेंद्रमुपवर्णितनिर्विशेषं ब्रह्मादयो विविधलिंगभिदाभिमानाः। नैते यदोपससृपुर्निखिलात्मकत्वात्तत्राखिलामरमयो हरिराविरासीत् ३० तं तद्वदार्त्तमुपलभ्य जगन्निवासः स्तोत्रं निशम्य दिविजैः सह संस्तुवद्भिः। छंदोमयेन गरुडेन समुह्यमानश्चक्रायुधोभ्यगमदाशु यतो गजेंद्रः ३१ सोंतःसरस्युरुबलेन गृहीत आर्त्तो हृष्ट्वा गरुत्मति हरिं ख उपात्तचक्रं। उत्क्षिप्य सांबुजकरं गिरमाह कृच्छ्रान्नारायणाखिलगुरो भगवन्नमस्ते ३२ तं वीक्ष्य पीडितमजः सहसावतीर्य सग्राहमाशु सरसः कृपयोज्जहार। ग्राहाद्विपाटितमुखादरिणा गजेंद्रं संपश्यतां हरिरमूमुचदुस्रियाणां ३३ इति श्रीभा॰ अष्टमस्कंधे तृतीयोध्यायः॥ ॥

गभिदा मूर्त्तिभेदास्तासामभिमानो येषां। अत एते यदा नोपजग्मुः तत्र तदा अखिलामरमयः सर्वदेवमयमूर्त्तिः ३० दिविजैर्देवैः सह छंदोमयेनेति शी घ्रयाने ३१ खे दृष्ट्वा उपात्तं उद्यतं चक्रं येन ३२ गरुडापि मंदगतिरिति ततः सहसावतीर्य अरिणा चक्रेण विपाटितमुखं यस्य। उस्रियाणां देवानां ३३ अ॰ तृतीयः

अष्ट. ८ नतु वैर्येण तयोर्ग्राहः प्राप गंधर्वतां पुनः। गजं स्वपार्षदं कृत्वा हरिर्निन्ये निजं पदं १।२।२। हूहूसंज्ञो यो गंधर्वसत्तमः असौ देवलस्य शापेन ग्राहो
जातः स वै ततः सद्यो मुक्तः स● उत्तमश्लोकमगायतेत्यन्वयः। एवं ही तिहासोत्तमेकथा सरसि स्त्रीभिः क्रीडन्नसौ स्नातुं प्रविष्टं देवलं पा

श्रीशुक उवाच तदा देवर्षिगंधर्वा ब्रह्मेशानपुरोगमाः। मुमुचुः कुसुमासारं शंसंतः कर्म तद्धरेः १ नेदुर्दुंदुभयो दि
व्या गंधर्वा ननृतुर्जगुः। ऋषयश्चारणाः सिद्धास्तुष्टुवुः पुरुषोत्तमं २ योसौ ग्राहः स वै सद्यः परमाश्चर्यरूपधृक्। मु
क्तो देवलशापेन हूहूर्गंधर्वसत्तमः ३ प्रणम्य शिरसाधीशमुत्तमश्लोकमव्ययं। अगायत यशोधाम कीर्तन्यगु
णसत्कथं ४ सोनुकंपित ईशेन परिक्रम्य प्रणम्य तं। लोकस्य पश्यतो लोकं स्वमगान्मुक्तकिल्बिषः ५ गजेंद्रो भग
वत्स्पर्शाद्विमुक्तो ज्ञानबंधनात्। प्राप्तो भगवतो रूपं पीतवासाश्चतुर्भुजः ६ स वै पूर्वमभूद्राजा पांड्यो द्रविडसत्त
मः। इंद्रद्युम्न इति ख्यातो विष्णुव्रतपरायणः ७ स एकदाराधनकाल आत्मवान्गृहीतमौनव्रत ईश्वरं हरिं। जटा
युतं परस्तापस आप्लुतो हरिं समर्चयामास कुलाचलाश्रमः ८ यदृच्छया तत्र महायशा मुनिः समागमच्छिष्यगणैः
परिश्रितः। तं वीक्ष्य तूष्णीमकृतार्हणादिकं रहस्युपासीनमृषिश्चुकोप ह ९ तस्मा इमं शापमदादसाधुरयं
दुरात्माकृतबुद्धिरद्य। विप्रावमंता विशतां तमोंधं यथा गजस्तब्धमतिः स एव १०

देप्रगृह्य विचकर्ष स च प्रकुपितो ग्राहो भवेति शशाप ततेन च प्रसादितः सन् तु वाराएवमेव गजेंद्रं ग्रहीष्यत तस्य गजेंद्र मुद्धरिष्यन् हरिस्त्वामपि मोचयिष्य ८
तीति ३ कथंभूतं यशसो धाम आश्रयं अतः कीर्तन्याः कीर्तनीयाः गुणाः सती कथा च यस्य तं ४ स्वं लोकं गंधर्वलोकं ५।६।७ कुलाचले मलयाद्रावाश्रमो य
स्य ८ तूष्णीं रहस्युपासीनं वीक्ष्य ९ शापमेवाह असाधुरित्यादि। अकृता अशिक्षिता बुद्धिर्यस्य गजो यथा स्तब्धमतिस्तथैवायं अतः स एव गज एव भवत्विति शेषः १०

इदिष्टं दैवप्रापितं तदुपधारयन् आलोचयन् ११ कौंजरीं योनिमापन्नः तर्हि पश्चात् कथं स्मृतिर्जातेत्याह। हरेरर्चनस्यानुभावेनेति १२ अ
द्भुतं स्वभवनमगात् १३ एतद्गजराजमोक्षणं नाम कृष्णानुभावस्तवेरितः कथंभूतं तत्राह। स्वर्ग्यमित्यादि दुःस्वप्नं नाशयतीति तथा १४।

श्रीशुक उवाच एवं शप्त्वा गतोगस्त्यो भगवान्नृप सानुगः। इंद्रद्युम्नोपि राजर्षिर्दिष्टं तदुपधारयन् ११ आपन्नः कौंज
रीं योनिमात्मस्मृतिविनाशिनीं। हर्यर्चनानुभावेन यद्गजत्वेप्यनुस्मृतिः १२ एवं विमोक्ष्य गजयूथपमब्जनाभस्तेनापि पा
र्षदगतिं गमितेन युक्तः। गंधर्वसिद्धविबुधैरुपगीयमानकर्माद्भुतं स्वभवनं गरुडासनोगात् १३ एतन्महाराज तवेरितो
मया कृष्णानुभावो गजराजमोक्षणं। स्वर्ग्यं यशस्यं कलिकल्मषापहं दुःस्वप्ननाशं कुरुवर्य शृण्वतां १४ यथानुकीर्त
यंत्येतच्छ्रेयस्कामा द्विजातयः। शुचयः प्रातरुत्थाय दुःस्वप्नाद्युपशांतये १४ इदमाह हरिः प्रीतो गजेंद्रं कुरुसत्तम। शृण्वतां
सर्वभूतानां सर्वभूतमयो विभुः १५ श्रीभगवानुवाच ये मां त्वां च सरश्चेदं गिरिकंदरकाननं। वेत्रकीचकवेणूनां गु
ल्मानि सुरपादपान् १६ शृंगाणीमानि धिष्ण्यानि ब्रह्मणो मे शिवस्य च। क्षीरोदं मे प्रियं धाम श्वेतद्वीपं च भास्वरं।
१७ श्रीवत्सं कौस्तुभं मालां गदां कौमोदकीं मम। सुदर्शनं पांचजन्यं सुपर्णं पतगेश्वरं १८ शेषं च मत्कलां सूक्ष्मां श्रियं
देवीं मदाश्रयां। ब्रह्माणं नारदमृषिं भवं प्रह्लादमेव च १९ मत्स्यकूर्मवराहाद्यैरवतारैः कृतानि मे। कर्माण्यनंतपुण्या
नि सूर्यं सोमं हुताशनं २० प्रणवं सत्यमव्यक्तं गोविप्रान्धर्ममव्ययं। दाक्षायणीर्धर्मपत्नीः सोमकश्यपयोरपि २१

अतः श्रेयस्कामा एतद्यथावदनुकीर्तयंति १४ अनेन श्रेयो भवतीति कुतो ज्ञातं साक्षाद्भगवद्वचनादेवेत्याह। इदमाहेत्यादि यावत्समाप्ति १५
प्रसंगादन्यस्यापि स्मरणे फलमुच्यते सर्वांश्च इति यांतानि स्मरंती त्यष्टमेनान्वयः १६।२० अव्ययं धर्मं शक्तिलक्षणं सोमकश्यपयोरपि पत्नीर्दाक्षाय
णीः २१

अष्ट० ९

सितवारणां मैरावतं २२ सुसमाहिता एकाग्रचित्ताः ममरूपाणि मद्विभूतीः २३।२४ जलजोत्तमं शंखवरं प्रध्मापयन्वादयित्वा २५ इत्यष्टमे चतुर्थः अष्टाख्यानमष्टाभिरध्यायैरनुवर्ण्यते। स्वसकपक्षपातेन यत्र योषाभितं विभो: १ पंचमे पंचमं चाथ षष्ठं चाकथयन्मनुं।

गंगां सरस्वतीं नंदां कालिंदीं सितवारणं। ध्रुवं ब्रह्मर्षीन्सप्त पुण्यश्लोकांश्च मानवान् २२ उत्थायापररात्रांते प्रयताः सुसमाहिताः। स्मरंति मम रूपाणि मुच्यंते ह्येनसोखिलात् २३ ये मां स्तुवंत्यनेनांग प्रतिबुध्य निशात्यये। तेषां प्राणात्यये चाहं ददामि विमलां मतिं २४ इत्यादिश्य हृषीकेशः प्रध्माय जलजोत्तमं। हर्षयन्विबुधानीकमारुरोह खगाधिपं २५ इति श्रीभा० अष्टमस्कंधे चतुर्थोध्यायः श्रीशुक उवाच राजन्नुदितमेतत्ते हरेः कर्माघनाशनं। गजेंद्रमोक्षणं पुण्यं रैवतं त्वंतरं शृणु १ पंचमो रैवतो नाम मनुस्तामससोदरः। बलिविंध्यादयस्तस्य सुता अर्जुनपूर्वकाः २ विभुरिंद्रः सुरगणा राजन्भूतरयादयः। हिरण्यरोमा वेदशिरा ऊर्ध्वबाह्वादयो द्विजाः ३ पत्नी विकुंठा शुभ्रस्य वैकुंठैः सुरसत्तमैः। तयोः स्वकलया जज्ञे वैकुंठो भगवान्स्वयं ४ वैकुंठः कल्पितो येन लोको लोकनमस्कृतः। रमया प्रार्थ्यमानेन देव्या तत्प्रियकाम्यया ५ तस्यानुभावः कथितो गुणाश्च परमोदयाः। भौमान्रेणून्स विममे यो विष्णोर्वर्णयेद्गुणान् ६ षष्ठश्च चक्षुषः पुत्रश्चाक्षुषो नाम वै मनुः। पूरुपूरुषसुद्युम्नप्रमुखाश्चाक्षुषात्मजाः ७

विप्रशापाद्यनिःश्रीकैः कृतां दैवैर्हरेः स्तुतिं २ तामसश्चतुर्थो मनुः तस्यैश्वजाता २ तस्य वैकुंठसंज्ञस्य हरेरनुभावः सनकादिशापेन दैत्यतां प्राप्ताभ्यां वराहादिरूपेण युद्धादिलक्षणः। गुणाश्च ब्रह्मण्यतादयः परमोदयाश्च महदैश्वर्याः कथिताः तृतीयस्कंधादिषु ।६।७॥ ९

सो२२:२

१०यतो हेतोरंबुचरात्मना कूर्मरूपेण ११ सुराणां साधिता सुधेत्युक्तायासुधाया पि सूचितं। अत्र पृच्छति। किं वान्यदिति १२।१३। नोत्तिष्ठेरन्न पुनर्जरिं यंति स्मेत्यर्थः १५ दुर्वाससा हि कदाचिन्मार्गगच्छता मिंद्रं दृष्ट्वा स्वकंठस्था माला तस्मै दत्ता तेन च श्रीमदेनानादृत्यैरावतस्य कुंभ

इंद्रो मंत्रद्रुमस्तत्र देवा आप्यादयो गणाः। मुनयस्तत्र वै राजन्हविष्मद्वीरकादयः ८ तत्रापि देवः संभूत्यां वैराजस्याभवत्सुतः। अजितो नाम भगवानंशेन जगतः पतिः ९ पयोधिं येन निर्मथ्य सुराणां साधिता सुधा। भ्रममाणोंभसि धृतः कूर्मरूपेण मंदरः १० राजोवाच यथा भगवता ब्रह्मन्मथितः क्षीरसागरः। यदर्थं वा यतश्चाद्रिं दधारांबुचरात्मना ११ यथामृतं सुरैः प्राप्तं किं वान्यदभवत्ततः। एतद्भगवतः कर्म वदस्व परमाद्भुतं १२ त्वया संकथ्यमाने न महिम्ना सात्वतां पतेः। नातितृप्यति मे चित्तं सुचिरं तापतापितं १३ सूत उवाच संपृष्टो भगवानेवं द्वैपायनसुतो द्विजाः। अभिनंद्य हरेर्वीर्यमभ्याचष्टुं प्रचक्रमे १४ श्रीशुक उवाच यदा युद्धेसुरैर्देवा बाध्यमानाः शितायुधैः। गतासवो निपतिता नोत्तिष्ठेरन्स्म भूयशः १५ यदा दुर्वाससः शापात्सेंद्रा लोकास्त्रयो नृप। निःश्रीकाश्चाभवंस्तत्र नेशुरिज्यादयः क्रियाः १६ निशाम्यैतत्सुरगणा महेंद्रवरुणादयः। नाध्यगच्छन्स्वयं मंत्रैर्मंत्रयंतो विनिश्चयं १७ ततो ब्रह्मसभां जग्मुर्मेरोर्मूर्धनि सर्वशः। सर्वं विज्ञापयांचक्रुः प्रणताः परमेष्ठिने १८ स विलोक्येंद्रवाय्वादीन्निःसत्वान्विगतप्रभान्। लोकानमंगलप्रायानसुरानयथा विभुः १९ समाहितेन मनसा संस्मरन्पुरुषं परं। उवाचोत्फुल्लवदनो देवान्स भगवान्परः २०

योर्निक्षिप्तास्तगजोन्मत्तनया पद्भ्यां तां मालां चूर्णीचकार ततः कुपितो दुर्वासास्तं शशाप त्रिभिर्लोकैः सह त्वं निःश्रीको भवेति। तदेतदाह। यदा दुर्वाससः शापेनेति इज्यादयः यागादयः १६।१८ असुरानयथा देवैर्बलेन सत्त्वेन बलपुष्ट्यादियुक्तान्विलोक्येत्यर्थः १९ हरिं शरणं गताः संतोयथापूर्वं प्रा

अष्ट० प्याम्इति हर्षेणोत्फुल्लंविकसितं वदनंयस्य २० मनुष्यादयोजरायुजांडजोद्भिज्जस्वेदजाः यस्यावतारः पुरुषः तस्यांशो ब्रह्मातस्यकलाम
१० रीच्यादयः ताभिर्विसर्जिताः पुत्रपौत्रादिद्वारेणजनिताः २१ ननुतर्हिसर्वेषांसोसमः स्यात्किंतच्छरणाश्रयेण सत्यंयद्यप्येवंतथाप्यस्मत्पक्ष
पातीभविष्यतीत्याशयेनाह नयस्येतिद्वाभ्यां २२ क्षितिपालनस्यक्षणः कालः अतः सुरप्रियः सन्नस्मीयानांनःशंसुखंकरिष्यति २३
यत्रक्षीराब्धौ हरेर्वासः तदेवतमः परंस्थानं यद्वा लोकालोकात्परतोयत्तमस्ततः परंस्थानंजगाम २४ देवीभिः लोकेअप्रसिद्धाभिःवैदिकीभिः

अहंभवोयूयमथोसुरादयोमनुष्यतिर्यग्द्रुमघर्मजातयः। यस्यावतारांशकलाविसर्जितास्तंजामसर्वेशरणंतम
व्ययं २१ नयस्यवध्योनचरक्षणीयोनोपेक्षणीयादरणीयपक्षः। अथापिसर्गस्थितिसंयमार्थंधत्तेरजःसत्व
सि मथोतमश्च २२ अयंचतस्यस्थितिपालनक्षणःसत्वंजुषाणस्यभवायदेहिनां। तस्माद्व्रजामःशरणंजगद्गुरुंस्वा
नांसनोधास्यतिशंसुरप्रियः २३ श्रीशुकउवाच इत्याभाष्यसुरान्वेधाःसहदेवैररिंदम। अजितस्यपदं
साक्षाज्जगामतमसःपरं २४ तत्रादृष्टस्वरूपायश्रुतपूर्वायवैप्रभो। स्तुतिमब्रूतदैवीभिर्गीर्भिस्त्ववहितें
द्रियः २५ ब्रह्मोवाच अविक्रियंसत्यमनंतमाद्यंगुहाशयंनिष्कलमप्रतर्क्यं। मनोग्रयानंवचसानिरुक्तंनमामहेदेव
वरंवरेण्यं २६

गीर्भिःस्तुतिमकरोत् २५ देववरंनमामहे हेदेव वरंत्वांनमामेतिवावरत्वेहेतुःसत्यंकुतः अविक्रियंनकुतः अनंतंआद्यंअनादिंआद्यंतवतो हि
दृश्यादिविक्रियायुक्ताभवंति किंच गुहाशयंसर्वांतरंकुतः निःकलंनिरुपाधिंतकुतोऽप्रतर्क्यंतत्कुतः मनोग्रयानंपमनसापिजविष्ठंमनःप्राप्यस्थानंत १०
तःप्रागेवविद्यमानत्वात् तथाचश्रुतिः अनेजदेकंमनसोजवीयोनैनद्देवाआप्नुवन्पूर्वमर्षत् तद्धावतोन्यानत्येतितिष्ठदिति वचसाअनिरुक्तं
अविषयत्वात् यद्वाचानाभ्युदितंयेनवागभ्युद्यतइतिश्रुतेः मनोवचसोरगोचरत्वादप्रतर्क्यं यथेष्टंवासर्वेषांहेतुहेतुमद्भाव॥ २६॥

किंच प्राणादीनांविपश्चितंज्ञातारं आत्माअहंकारोदेहोवा ननुतद्व्यतिरिक्तंज्ञेयमस्तीत्याह अर्थोविषयः इंद्रियाणितद्ग्राहकाणितद
भयरूपेणाभासतइतितथात्वं तथाप्यनिदंस्वप्नद्रष्टृवज्ज्ञानरहितंकुतः अव्रणंअदृश्यंअतएवअक्षरंखमिवव्यापिनंच सर्वत्रहेतुः यत्रयस्मिन्न २
गंअपृक्षौजीवपक्षपातिनौछायातपौअविद्याचतन्निवर्तिकाविद्याचनास्तितं त्रियुगंत्रिषुयुगेष्वाविर्भवंतंशरणंव्रजामः २७ तदेवमविक्रि
यत्वादिभिःसर्वज्ञत्वादिभिश्चस्तुत्वावरेण्यत्वंचोक्तं संसारचक्राधारत्वेनापिनिर्देवदर्शयन्नाह अजस्यजीवस्यचक्रं चक्रवदावर्तमानंदेहादिद्व
जयामायया प्रेर्यमाणंयत्स्यअक्षोयस्यपदाधिष्ठानमाकुस्तत्तंसत्यंप्रपद्ये कथंभूतंचक्रं मनोमयंमनःप्रधानं दशेंद्रियाणिपंचप्राणाश्च

विपश्चितंप्राणमनोधियात्मनामर्थेंद्रियाभासमनिद्रमव्रणं। छायातपौयत्रनगृध्रपक्षौतमक्षरंखंत्रियुगंव्र
जामहे २७ अजस्यचक्रंत्वजयेर्यमाणंमनोमयंपंचदशारमाशु। त्रिनाभिविद्युच्चलमष्टनेमियदक्षमाहुस्तमृतं
प्रपद्ये २८ यएकवर्णंतमसःपरंतदलोकमव्यक्तमनंतपारं। आसांचकारोपसुपर्णमेनमुपासतेयोगरथेनधीराः
२९

एवंपंचदशअरायस्य आशुशीघ्रगं त्रयोगुणानाभिरिवमध्येयस्य विद्युदिवचंचलं अष्टौप्रकृतयोनेमयइवावरणानियस्य २८ सर्वजीव
नियंतृत्वादिनावरिष्ठत्वमाह यइति यउपसुपर्णंजीवसमीपेतन्नियंतृत्वेन आसांचकार आस्तेस्म द्वासुपर्णासयुजासखायासमानंवृक्षंपरि
षस्वजातइतिश्रुतेः पक्षाभ्यांरक्षणार्थंगरुडस्योपरिउपविष्टइत्यर्थः तर्हिदेहस्थत्वात्करस्थाणादिक्रियावेशात्जीवसाम्यंस्यादित्याह एकव
र्णंज्ञानैकस्वरूपं तमसःप्रकृतेःपरं अलोकंअदृश्यंअव्यक्तंनिर्विकल्पंअनंतपारंकालतोदेशतश्चापरिच्छिन्नंतद्धेयः अप्रच्युतस्वरूपत्वात्जीव
साम्यं तयोरन्यःपिप्पलंस्वाद्वत्त्यनश्नन्नन्योअभिचाकशीतिविशेषश्रवणादित्यर्थः अतएवयंधीराःयोगोनरथेनप्राप्तिसाधनेनोपासतेतंनमाम
इत्युत्तरेणान्वयः २९

अष्ट० मायाया नियंतृत्वेनापि जीवसाम्यं परिहरन्नीशत्वमाह । यस्य मायां कश्चन कश्चिदपि नातितितर्त्ति नातिक्रामति । कथंभूतं । जनो यया समुह्यति
११ अर्थं आत्मस्वरूपं न तु वेद । निर्जितआत्मशक्तिर्माया येन अत एव गुणाश्रयेन तं ३० अर्थं न वेदेति यदुक्तं तत्प्रपंचयन्नाह । इमे वयं देवा सत्त्व
श्रयस्य प्रियया तन्वा सत्त्वेनैव सृष्टा अपि बहिरंतश्च संतो प्रकाशात्म्यामाविः प्रकटमपि सूक्ष्मां गतिं निरुपाधिस्वरूपं न विदुः । इतर
प्रधाना रजस्तमोमया कुतो विदुः तं नमामेति पूर्वेणैवान्वयः ३१ इदानीं वैराजरूपेण स्तुवन्प्रार्थयते पादौ महीति द्वादशभिः । य
त्र महीजरायुजादिभूतसर्गः सा मही यस्य पादौ स नः प्रसीदतु । आत्मतंत्रः पादादिभिर्लेपिनात्परतंत्रः । कुतः ब्रह्म अप्रच्युतरूपः ।

न यस्य कश्चातितितर्त्ति मायां यया जनो मुह्यति वेद नार्थं । तं निर्जितात्मात्मगुणं परेशं नमाम भूतेषु समं चरंतं ३० इ
य मे वयं यत्प्रियैव तन्वा सत्त्वेन सृष्टा बहिरंतराविः । गतिं न सूक्ष्मामृषयश्च विद्महे कुतो सुराद्या इतरप्रधानाः ३१ पादौ म
हीयं स्वकृतैव यस्य चतुर्विधो यत्र हि भूतसर्गः । स वै महापूरुष आत्मतंत्रः प्रसीदतां ब्रह्म महाविभूतिः ३२ अंभस्तु य
द्रेत उदारवीर्यं सिध्यंति जीवंत्युत वर्धमानाः । लोकास्त्रयो योखिललोकपाळाः प्रसीदतां ब्रह्म महाविभूतिः ३३ सोमं म
नो यस्य समामनंति दिवौकसां वै बलमंध आयुः । ईशो नगानां प्रजनः प्रजानां प्रसीदतां नः स महाविभूतिः ३४

तत्कुतः महती विभूतिरैश्वर्यं यस्य सः ३२ उदारं वीर्यं शक्तिर्यस्य तद्रेतो यस्य रेतः स नः प्रसीदतु । उदारवीर्यतामाह । यतो भसो
लोकादयः सिध्यंति जायंते ३३ यः सोमो देवानामंधः अन्नं अत एव बलमायुश्च । नगानां वृक्षाणां । प्रकर्षेण जनयतीव ११
र्द्धयतीति प्रजनः । तत्र यस्य मनः समामनंति स प्रसीदतु ॥ ३४ ॐ नमो भगवते वासुदेवाय ॥ ॥छ॥ ॥

अग्निर्यस्य तु मुखं जातः कथंभूतः । जातवेदा धनं यस्मात् क्रियाकांडं तत्प्रतिपाद्यं कर्म तन्निमित्तं जन्म यस्य । अंतः समुद्रे उदरमध्ये
स्वधातून्याकाहानिवान्नादीन् । प्रसिद्धसमुद्रे पिवडवानलरूपेण उदकान्यवानुपचन्नग्निः ३५ यच्चक्षुस्तरणिर्यस्य चक्षुरासीत् । कथंभू
तः देवयानं अर्चिरादिमार्गः देवतात्रयीमयः सैषा त्रय्येव विद्या तपतीति श्रुतेः । ब्रह्मणो धिष्ण्यं उपासनास्थानं । य एषोंतरादित्ये हिरण्म
यः पुरुष इति श्रुतेः । मुक्तेर्द्वारं देवयानत्वात् । अमृतं च पुण्यलोकत्वात् । मृत्युश्च कालात्मकत्वात् एवंभूतस्तरणिर्यस्य चक्षुः सः ३६ कथं

अग्निर्मुखं यस्य तु जातवेदा जातः क्रियाकांडनिमित्तजन्मा ॥ अंतः समुद्रेनुपचन्स्वधातून्प्रसीदतां नः स महाविभू
तिः ३५ यच्चक्षुरासीत्तरणिर्देवयानं त्रयीमयो ब्रह्मण एष धिष्ण्यं । द्वारं च मुक्तेरमृतं च मृत्युः प्रसी० ३६ प्राणादभूद्यस्य
चराचराणां प्राणः सहो बलमोजश्च वायुः । अन्वास्म सम्राजमिवानुगा वयं प्रसी० ३७ श्रोत्राद्दिशो यस्य हृदश्च खानि प्र
जज्ञिरे खं पुरुषस्य नाभ्याः । प्राणेंद्रियात्मासुशरीरकेतं प्रसी० ३८ बलान्महेंद्रस्त्रिदशाः प्रसादान्मन्योर्गिरीशो धि
षणाद्विरिंचः । खेभ्यश्च छंदांस्यृषयो मेंढ्रतः कः प्रसी० ३९ श्रीर्वक्षसः पितरश्छाययासन्धर्मः स्तनादितरः पृष्ठतोभूत् । द्यौ
र्यस्य शीर्ष्णोप्सरसो विहारात् प्रसी० ४० विप्रो मुखं ब्रह्म च यस्य गुह्यं राजन्य आसीद्भुजयोर्बलं च । ऊर्वोर्विडोजोंघ्रिरवेदशूद्रौ प्र० ४१

भूतो वायुः चराचराणां सह आदिर्धर्मवान् प्राणः । यं प्राणं वयं बुद्ध्याद्यधिष्ठातारो देवाः संम्राजं भृत्या इव अन्वास्म अनुसृत्य स्थिताः एवंभूतो वायु
र्यस्य प्राणादभूत्सः ३७ खानि देहगतानि छिद्राणि प्राणाः पंचवृत्तिः इंद्रियाणि च आत्मा मनश्च असवो नागकूर्मादयः शरीरं च तेषां केतं आश्रयभूतं
खं यस्य पुरुषस्य नाभ्याः प्रजज्ञे सः ३८ यस्य बलान्महेंद्रो तद्वेत्रछंदांसि ऋषयश्च खेभ्यः कः प्रजापतिः ३९ इतरो अधर्मः ४० विट् वैश्यः ऊर्जः नैपुण्यं
तस्य वृत्तिश्च । अंघ्रिः अंघ्रिजाविसर्थः । अवेदश्च शूद्रो अवेदः वेदव्यतिरिक्ता शुश्रूषा तत्रिमानं शूद्रश्च । पाठांतरं सुगमं ४१ ऊर्वोर्विशो [illegible]

अष्ट. उपरि उत्तरोष्ठात् । नस्तः नासिकातो द्युतिः कांतिः । पराध्यः पुष्पनां हितकामः स्पर्शनाभूत् ४२ द्रव्यं भूतानि वयः कालं । विशेषं लोकिक प
१२ पंचं । यद्यस्मादु विभाव्यं । कुतः । प्रबुधापबाधं विद्वद्भिरपोह्यमानं । पाठांतरे प्रबुधानां मायेव्य वबोधो यस्मिन्नित्यर्थः ४३ तदेव
संप्रपंचमुपवर्ण्य निःप्रपंचमुपवर्णयन्प्रणमति नमइति । इति क्षिप्रदर्शनादिभिः नमस्त्वान्वायुः नस्येव उतीलिरिलायस्यतस्मै ४४

लोभोधरात्प्रीतिरुपर्यभूद्द्युतिर्नस्तः पशव्यः स्पर्शेन कामः । भ्रुवोर्यमः पक्ष्मभवस्तु कालः प्रसी० ४२ द्रव्यं वयः
कर्मगुणान्विशेषं यद्योगमायाविहितान्वदंति । यद्दुर्विभाव्यं प्रबुधापबाधं प्रसी० ४३ नमोस्तु तस्मा उपशांत
शक्तये स्वाराज्यलाभप्रतिपूरितात्मने । गुणेषु मायारचितेषु वृत्तिभिर्न सज्जमानाय नभस्वदूतये ४४ स त्वं नो दर्श
यात्मानमस्मत्करणगोचरं । प्रपन्नानां दिदृक्षूणां सस्मितं ते मुखांबुजं ४५ तैस्तैः स्वेच्छाभूतै रूपैः काले काले
स्वयं विभो । कर्म दुर्विषयं यन्नो भगवांस्तत्करोति हि ४६ क्लेशभूर्यल्पसाराणि कर्माणि विफलानि वा । देहिनां विषया
र्तानां न तथैवार्पितं त्वयि ४७ नावमः कर्मकल्पोपि विफलायेश्वरार्पितः । कल्पते पुरुषस्यैव स ह्यात्मा दयितो हितः ४८

ते सस्मितं मुखांबुजं दिदृक्षूणां नोस्मच्चक्षुरादिकरणगोचरं यथा भवत्येवं वात्मानं दर्शय ४५ । ननु केचानुवर्तिलं वत्व बद्धुं शोट्दृष्टमेवेत्याह ।
तैस्तैरिति । यन्नो दुर्विषयं मशक्यं कर्म तद्भगवान्स्वयमेव करोति हि ४६ ननु बहिर्मुखानामिव लक्षकानामस्माकं त्वय्यर्पितानि पुर्वपुण्यानि विप १२
रीतफलानि भवितुमर्हतीत्याह । क्लेशभूरिति । सुअल्पसारफलं येषु यद्वा विफलान्येव सकामानां कर्माणि त्वय्यर्पितं तु नैव तथा ४७ तत्रैवैफल्य
मुपपादयति । अवमः अल्पोपि कर्मकल्पः कर्माभासोपि ईश्वरार्पितश्चेद्विफलाय भाय न कल्पते । हि यस्मात्स एव ईश्वरः पुरुषस्यात्मा अत
एव दयितो हितश्च । न ह्यात्मनि दयिते हिते चार्पितं निःफलं स्यात् ४८

अनंतफलत्वमाह । यथा हि मूलावसेचनं स्कंधानां शाखानां च भवति ४९ एवं सत्यपि त्वदर्पितकर्मणां त्वत्कानामस्माकं यन्निमित्तमि
दं दुःखमिति त्वमेव वेत्सीत्याशयेनाह । नम इति । दुर्वितर्क्यो णयात्मकर्माणि स्वभाववेष्टितानि यस्य तस्मै ५० इत्यष्टमे पंचमः षष्ठेपु
नः स्तुतिर्विज्ञाय विष्णूं तेसुरैः कृता । तन्मंत्रात्सासुरैः साकमम्तार्थमहोद्यमः १ सहस्रार्काणामुदये द्युतिरिव द्युतिर्यस्य १ महसा

यथा हि स्कंधशाखानां तरोर्मूलावसेचनं एवमाराधनं विष्णोः सर्वेषामात्मनश्च हि ४९ नमस्तुभ्यमनंताय दुर्वि
तर्क्यात्मकर्मणे निर्गुणाय गुणेशाय सत्वस्थाय च सांप्रतं ५० इति श्रीभागवते महापुराणे अष्टमस्कंधे
अष्टतमथने पंचमोध्यायः ॥ ॥श्रीशुक उवाच एवं स्तुतः सुरगणैर्भगवान्हरिरीश्वरः । तेषामाविरभूद्राजन्
सहस्रार्कोदयद्युतिः १ तेनैव महसा सर्वे देवाः प्रतिहतेक्षणाः । नापश्यन्खं दिशः क्षोणीमात्मानं च कुतो विभुं २ वि
रिंचो भगवान्दृष्ट्वा सह शर्वेण तां तनुं । स्वच्छां मरकतश्यामां कंजगर्भारुणेक्षणां ३ तप्तहेमावदातेन लसत्कौशेयवा
ससा । प्रसन्नचारुसर्वांगीं सुमुखीं सुंदरभ्रुवं ४ महामणिकिरीटेन केयूराभ्यां च भूषितां । कर्णाभरणनिर्भातकपो
लश्रीमुखांबुजां ५ कांचीकलापवलयहारनूपुरशोभितां । कौस्तुभाभरणां लक्ष्मीं बिभ्रतीं वनमालिनीं ॥६॥

तेन महसा प्रतिहतानीक्षणानि चक्षूंषि येषां २ तामाविर्भूतां तनुं विरिंचो दृष्ट्वा तुष्टावेति पंचमेनान्वयः । कंजगर्भवदरुणे ईक्षणे यस्याः ३
तप्तहेमवदवदातेन पीतेन लसता कौशेयवाससा युक्तां । प्रसन्नानि चारूणि सर्वाण्यंगानि यस्याः शोभनं मुखं यस्याः सुंदरे भ्रुवौ यस्याः ४
महांतो मणयो यस्मिंस्तेन किरीटेन । कर्णाभरणे कुंडले ताभ्यां निर्भातौ यौ कपोलौ ताभ्यां श्रीर्मुखांबुजे यस्याः ५ कौस्तुभमाभरणं केय

अष्ट॰
१३

स्याः लक्ष्मीं वक्षसि बिभ्रतीं ६ देवप्रवरो ब्रह्मा । सर्वैर्गीर्वाणैः सांष्टांगप्रणामैः । अनाविरावीरासेयं नाम्भूतास्मृदितिः ब्रुवन् । ब्रह्मा भिप्रेतिनित्यत्वविभुत्वे भगवत्तनोः ७ श्रीमूर्तेरयमाविर्भाव एव । न त्वस्मदादिवज्जन्मादि तवास्तीत्याह । न जाता जन्मादयो यस्य । कुतः न अगुणाय । कुतो निर्वाणसुखस्यार्णवाय । अपारमोक्षसुखरूपायेत्यर्थः । तथापि अणोरप्यणिम्ने अतिसूक्ष्माय दुर्ज्ञानत्वात् । वस्तुतस्तु अपरिगण्यं इयत्तातीतं धाम मूर्तिर्यस्य तस्मै । न चैतदसंभावितं । यतः महानचिंत्योनुभावो यस्य ८ तन्मूर्तेः सनातनत्वं अपरिमेय त्वं चोपपादयति । रूपमिति । हे पुरुषर्षभ । हे धातः । एतत्तव रूपं वैदिकेन तांत्रिकेण च योगेन उपाश्रयेन श्रेयार्थिभिः सदा इज्यं । अतोनेर

सुदर्शनादिभिः स्वास्त्रैर्मूर्तिमद्भिरुपासितं । तुष्टाव देवप्रवरः सशर्वः पुरुषं परं । सर्वामरगणैः साकं सर्वैर्गीर्वाणैः
७ ब्रह्मोवाच अजातजन्मस्थितिसंयमायाऽगुणाय निर्वाणसुखार्णवाय । अणोरणिम्नेपरिगण्यधाम्ने महा
नुभावाय नमो नमस्ते ८ रूपं तवैतत्पुरुषर्षभेज्यं श्रेयोर्थिभिर्वैदिकतांत्रिकेण । योगेन धातः सह नस्त्रिलो
कान्पश्याम्यमुष्मिन्नुह विश्वमूर्तौ ९ त्वय्यग्र आसीत्त्वयि मध्य आसीत्त्वय्यंत आसीदिदमात्मतंत्रे । त्वमादि
रंतो जगतोस्य मध्यं घटस्य मृत्स्नेव परः परस्मात् १०

मिदानीं अपूर्वं जातमिति भावः । ननु यूयं देवाः पूज्यत्वेन प्रसिद्धाः सत्यं सर्वेषु चैषां तस्मिंस्ता इत्याह । ऊ अहो हरुरं । अमुष्मिं
स्त्वयि नोस्मान् त्रिलोकांश्च सह पश्यामि । तत्र हेतुः । विश्वं मूर्तौ यस्य । अतस्तवैतद्रूपं परिछिन्नमपि न भवतीति भावः १३
९ । विश्वमूर्तित्वमेवाह । त्वयीति । घटस्य मृत्तिका यथा आदिरंतश्च मध्यं च तथा त्वमस्य जगतः तत्र हेतुः परस्मात्प्रधानादपि परः १०

मृत्तिका दृष्टांतेन परिणामं प्राप्तं वारयति । त्वमिति । स्वया स्वाधीनया आश्रितया एव गुणव्यतिकराय परिणामिष्यगुणे न त्वं युक्तः पश्यं ति । मनीषिणो विवेकिनः । विपश्चितः शास्त्रज्ञाः ११ अथ एतद्दर्शनमाह । यथाग्निं काष्ठे मंथनेन अमृतमाज्यं गोषु दोहना दिना । भुवि अन्नं व्रीह्यादि कर्षणादिना । अंबु खननेन उद्यमने पुरुषकारे वाणिज्यादिना वृत्तिं जीविकां । यद्वा । अंबु उद्यमने घ टीयंत्रादिनोद्धरणो । योगैरुपायैर्मनुष्या अधियंति प्राप्नुवंति । तथा कवयस्त्वां बुध्या गुणेष्वधियंति वदंति च १२ हे नाथ

त्वं मायया आत्माश्रयया स्वयेदं निर्माय विश्वं तदनुप्रविष्टः । पश्यंति युक्ता मनसा मनीषिणो गुणव्यवायेप्यगुणं
विपश्चितः ११ यथाग्निमेधस्यमृतं च गोषु भुव्यन्नमंबूद्यमने च वृत्तिं । योगैर्मनुष्या अधियंति हि त्वां गुणे
षु बुध्या कवयो वदंति १२ तं त्वां वयं नाथ समुज्जिहानं सरोजनाभातिचिरेप्सितार्थं । दृष्ट्वा गता निर्वृतिमद्य सर्वे
गजा दवार्ता इव गांगमंभः १३ स त्वं विधत्स्वाखिललोकपाला वयं यदर्थास्तव पादमूलं । समागतास्ते बहिरंतरात्मन्
किं वान्यविज्ञाप्यमशेषसाक्षिणः १४ अहं गिरीशश्च सुरादयो ये दक्षादयोग्नेरिव केतवस्ते । किं वा विदामेश पृथग्वि
भाता विधत्स्व शं नो द्विजदेवमंत्रं १५

सरोजनाभ अतिचिरात् ईप्सितमर्थं त्वया गे कृपापूर्णत्वात्सम्यगुज्जिहानं आविर्भवंतं पश्यंतो दृष्ट्वा अद्य वयं निर्वृतिं गताः । दवार्ताः दावाग्नि पीडिताः १३ यद्विधेयं तत्कथ्यतेति चेत्तत्राह । ऊ अंतरात्मन् अशेषसाक्षिणस्ते बहिः किं वान्यो विज्ञाप्यमस्ति १४ यूयमेव किं कुरुतेति चेत्तत्राह । अहमिति अग्नेः केतवो विस्फुलिंगा इव ते सत्तो वयं पृथग्विभाताः संतः आत्मनः शं श्रेयः किं वा वियाम । अतस्त्वमेव द्विजानां देवानां च

अष्ट॰ मंत्रं विधत्स्व। इदं कुरु इत्युपायमुपदिशेत्यर्थः १५ हृदयं मंत्रमुपदेष्टव्यमिति अभिप्रेतं यथा तथैव विज्ञाय जगाद। संवृतानि नियमि
१४ तानि सर्वाणि कारकाणि इंद्रियाणि येस्तान् १६ ईश्वरस्यापि तथैवाभिप्रेतमित्याह। एक एवेश्वरः समर्थोपि १७ हे सुराः देवाः अन्येषां
पर्वादयः १८ वः आत्मनः यावद्भवो वृद्धिर्भवति १९ अर्थस्य प्रयोजनस्य पदवीं सिद्धिं प्राप्तैः ततः पश्चादहिमूषकवद्वध्यघातकभावे

श्रीशुक उवाच एवं विरिंच्यादिभिरीडितस्तद्विज्ञाय तेषां हृदयं तथैव। जगाद जीमूतगभीरया गिरा बद्धांजलीन्संवृ
तसर्वकारकान् १६ एक एवेश्वरस्तस्मिन्सुरकार्ये सुरेश्वरः। विहर्तुकामस्तानाह समुद्रोन्मथनादिभिः १७ श्रीभग
वानुवाच हंत ब्रह्मन्नहो शंभो हे देवा मम भाषितं। शृणुता वहिताः सर्वे श्रेयो वः स्याद्यथा सुराः १८ यात दानवदैते
यैस्तावत्संधिर्विधीयतां। कालेनानुगृहीतैस्तैर्यावद्वो भव आत्मनः १९ अरयोपि हि संधेयाः सति कार्यार्थगौरवे॥
अहिमूषकवद्देवा ह्यर्थस्य पदवीं गतैः २० अमृतोत्पादने यत्नः क्रियतामविलंबितं। यस्य पीतस्य वै जंतुर्मृत्युग्रस्तोमरो
भवेत् २१ क्षिप्त्वा क्षीरोदधौ सर्वा वीरुत्तृणलतौषधीः। मंथानं मंदरं कृत्वा नेत्रं कृत्वा तु वासुकिं। सहायेन मया दे
वा निर्मथध्वमतंद्रिताः २२

न वर्तितव्यमिति शेषः। यद्वा पेटिकायां निरुद्धो हिर्यथा निर्गमद्वारविधानार्थं प्रथमं मूषकेण संधिं विधत्ते पश्चात्तमेव कदाचिद्भक्षयति त १४
थार्थमार्गप्रवृत्तैः प्रथमं संधेया इत्यर्थः २० यत्नः स्तैः सह यत्नः कार्य इत्याह। अमृतोत्पादन इति यस्यामृतस्य पीतस्य सतः २१ नेत्रं रज्जुं २२

ननु जर्हि ते यत्नमृतपाने नाम राः स्युस्तत्राह। क्लेशभाज इति। रे। बलिभिः साध्या अर्थास्तदनुसरणं विना न सिध्यंतीति कुलासामादिकमु
पदिशति। यूयमिति द्वाभ्यां हे सुराः संरंभेण संभ्रमेण सांत्वया साममार्गेण यथा सिध्यंति २४ वस्तुषु मथनादुत्पन्नेषु २५। २६ सुरास्तु बलिमुपेयुः

क्लेशभाजो भविष्यंति दैत्या यूयं फलग्रहाः २३ यूयं तदनुमोदध्वं यदिच्छंत्यसुराः सुराः। न संरंभेण सिध्यंति सर्वार्थाः सांत्वया य
था २४ न भेतव्यं कालकूटाद्विषाज्जलधिसंभवात्। लोभः कार्यो न वो जातु रोषः कामस्तु वस्तुषु २५ श्रीशुक उवाच इति देवान्स
मादिश्य भगवान्पुरुषोत्तमः। तेषामंतर्दधे राजन्स्वच्छंदगतिरीश्वरः २६ अथ तस्मै भगवते नमस्कृत्य पितामहः। भवश्च जग्म
तुः स्वं स्वं धामोपेयुर्बलिं सुराः॥ २७ दृष्ट्वारीनप्यसंयत्तान्जातक्षोभान्स्वनायकान्। न्यषेधद्दैत्यराट् श्लोक्यः संधिविग्रहकालवित्
२८ ते वैरोचनिमासीनं गुप्तं चासुरयूथपैः। श्रिया परमया जुष्टं जिताशेषमुपागमन् २९ महेंद्रः श्लक्ष्णया वाचा सांत्वयित्वा महामतिः
अभ्यभाषत तत्सर्वं शिक्षितं पुरुषोत्तमात् ३० तदरोचत दैत्यस्य तत्रान्ये ये सुराधिपाः। शंबरोरिष्टनेमिश्च ये च त्रिपुरवासिनः ३१ त
तो देवासुराः कृत्वा संविदं कृतसौहृदाः। उद्यमं परमं चक्रुरमृतार्थे परंतप ३२ ततस्ते मंदरगिरिमोजसोत्पाट्य दुर्मदाः। नदंत उद
धिं निन्युः शक्ताः परिघबाहवः ३३ दूरभारोद्वहश्रांताः शक्रवैरोचनादयः। अपारयंतस्तं वोढुं विवशा विजहुः पथि॥ ३४॥
निपतन्स गिरिस्तत्र बहूनमरदानवान्॥ चूर्णयामास महता भारेण कनकाचलः॥ ३५॥ ॐ नमः कृष्णाय॥

उपजग्मुः २७ असंयत्तानपि दृष्ट्वा श्लोक्यः कीर्त्यर्हः २८ वैरोचनिं बलिं। जितमशेषं त्रैलोक्यं येन तं २९ तत्सर्वं अमृतोन्मथनादि ३० तत्र
ये अन्ये असुराधिपाः पौलोमकालेयादयः शंबरादयश्च तेभ्य आरोचत ३१ संविदं समयं ३२ परिघा इव बाहवो येषां ३३। ३४। ३५॥

३८ विसर्जितः प्रस्थापितः सुपर्णे तत्र स्थिते वासुकेरागमनायोगादिति भावः ३९ इत्यष्टमे षष्ठः ॥ सप्तमे मथनोद्भूतविषभीत्या
अष्ट. खिलैर्जनैः। स्तुतः सत्नरूपया रुद्रः पपौ विषमितीर्यते। फलभागेन तवाप्यमृते भागो भविष्यतीति संमंत्र्य वासुकिं नेत्रं गिरोपरि
१५ तांस्तथा भग्नमनसो भग्नबाहूरुकंधरान्। विज्ञाय भगवांस्तत्र बभूव गरुडध्वजः ३६ गिरिपातविनिःपिष्टान्विलोक्या
मरदानवान्। ईक्षया जीवयामास निर्जरान्निर्व्रणान्यथा ३७ गिरिं चारोप्य गरुडे हस्तेनैकेन लीलया। आरुह्य प्रययाव
ब्धिं सुरासुरगणैर्वृतः ३८ अवरोप्य गिरिं स्कंधात्सुपर्णः पततां वरः। ययौ जलांत उत्सृज्य हरिणा स विसर्जितः ३९
॥ ॥ इति श्रीभागवते महापुराणे अष्टमस्कंधे अमृतमथने षष्ठोऽध्यायः ॥ श्रीशुक उवाच ॥ ते नागराजमामंत्र्य फल
भागेन वासुकिं। परिवीय गिरौ तस्मिन्नेत्रमब्धिं मुदान्विताः। आरेभिरे सुरा यत्ता अमृतार्थे कुरूद्वह १ हरिः पुरस्ताज्जगृ
हे पूर्वं देवास्ततोऽभवन्। तन्नैच्छन्दैत्यपतयो महापुरुषचेष्टितं २ न गृह्णीमो वयं पुच्छमहेरंगममंगलं। स्वाध्यायश्रु
तसंपन्नाः प्रख्याता जन्मकर्मभिः ३ इति तूष्णीं स्थितान्दैत्यान्विलोक्य पुरुषोत्तमः। स्मयमानो विसृज्याग्रं पुच्छं जग्राह
सामरः ४ कृतस्थानविभागास्त एवं कश्यपनंदनाः। ममंथुः परमं यत्ता अमृतार्थं पयोनिधिं ५ मथ्यमानेऽर्णवे सोऽद्रिरनाधारो ह्यपोऽवि
शत्। ध्रियमाणोऽपि बलिभिर्गौरवात्पांडुनंदन ६ ते सुनिर्विण्णमनसः परिम्लानमुखश्रियः। आसन्स्वपौरुषे नष्टे दैवेनातिबलीयसा
॥७॥
यसंवेष्ट्य अब्धिं मथितुं आरेभिरे १ वासुकेर्मुखं तत्र दैत्या न्यग्राहयितुमेव पूर्वं हरिः पुरस्तान्मुखं जगृहे। ततो भवन्मुखं २५
जगृहुः २।३।४ कृतो धारणे स्थानविभागो यैः ५।६। दैवेन हेतुना स्वपौरुषे नष्टे सति ॥७॥ ॐ नमः कृष्णाय॥

विघ्नेशस्य विधिं तेन रचितं विघ्नं। अवितथः सत्योऽभिसंधिः संकल्पो यस्य ८ लक्षयोजनं प्रस्तारो विस्तारो यस्यास्तीति तथा तेन पृष्ठे
न ९ तस्य गिरेरावर्तनं भ्रमणं अंगकंडूयनं मेने १० आसुरेण असुराकारेण। दैवेन दैवाकारेण रूपेण आविशत् ११।१२ आत्मनि देव
देहमध्ये गोत्रे दारुरूपेण नेत्रे अप्रबोधरूपेण। परेण हरिणा। क्षोभितं नक्राणां चक्रं समूहो यस्मिन् १३ दिशश्च मुखानि च
विलोक्य विघ्नेशविधिं तदेश्वरो दुरंतवीर्योऽवितथाभिसंधिः। कृत्वा वपुः काच्छपमद्भुतं महत्प्रविश्य तोयं गिरिमुज्जहार ८
तमुत्थितं वीक्ष्य कुलाचलं पुनः समुद्यता निर्मथितुं सुरासुराः। दधार पृष्ठेन स लक्षयोजनप्रस्तारिणा द्वीप इवापरो महान्
९ सुरासुरेंद्रैर्भुजवीर्यवेपितं परिभ्रमंतं गिरिमंग पृष्ठतः। बिभ्रत्तदावर्तनमादिकच्छपो मेनेऽङ्गकंडूयनमप्रमेयः १० त
थासुरानाविशदासुरेण रूपेण तेषां बलवीर्यमीरयन्। उद्दीपयन्देवगणांश्च विष्णुर्दैवेन नागेंद्रमबोधरूपः ११ उपर्यगें
द्रं गिरिराडिवान्य आक्रम्य हस्तेन सहस्रबाहुः। तस्थौ दिवि ब्रह्मभवेंद्रमुख्यैरभिष्टुवद्भिः सुमनोऽभिवृष्टः १२ उपर्यध
श्चात्मनि गोत्रनेत्रयोः परेण ते प्राविशता समेधिताः। ममंथुरब्धिं तरसा मदोत्कटा महाद्रिणा क्षोभितनक्रचक्रं १३ अहींद्रसा
हस्रकठोरदृङ्मुखश्वासाग्निधूमाहतवर्चसोऽसुराः। पौलोमकालेयबलील्वलादयो दवाग्निदग्धाः सरला इवाभवन् १४ दे
वांश्च तच्छ्वासशिखाहतप्रभान्धूम्रांबरस्रग्वरकंचुकाननान्। समभ्यवर्षन्भगवद्वशा घना ववुः समुद्रोर्म्युपगूढवायवः १५॥
साश्च। अहींद्रस्य सहस्रं अपरिमिताः कठोराः दृशो मुखानि च तेभ्यो निर्गता श्वासा अग्निधूमास्तैर्हतं वर्चो येषां ते सरला द्रुमविशेषाः १४ देवांश्च भगव
द्वशा घनाः समभ्यवर्षन्। समुद्रोर्मिभिः उपगूढा वायवश्च शीतला ववुः वांतिस्म। कथंभूतान्। तस्याहींद्रस्य श्वासशिखाग्निभिर्हता प्रभा

अष्ट° १६ येषां धूम्राणं वराटीनि येषां १५।१६ ध्रतोद्रिर्येन स ध्रताद्रिः भगवानादिपुरुषोऽनंतरमशोभतेत्यन्वयः। कथंभूतः कनकपरिधिः पीतवा
साः कर्णयोर्विद्योतमाना विद्युत्कुंडललक्षणा यस्य स तथा। मूर्ध्नि भ्राजंतो विलुलिताः कचा यस्य स तथा। जैत्रैर्दोर्भिः दंदशूकं सर्पं
प्रतिगिरिः प्रतिद्वंद्वी पर्वतः १७ हालहलमित्याह्वा नाम यस्य। संभ्रांता मीना उन्मकरा अहयः कच्छपा यस्मिन् तस्मात्। तिम्यादिभिराकुलाच्च

मथ्यमानात्तथा सिंधोर्देवासुरवरूथपैः। यदा सुधा न जायेत निर्ममंथाजितः स्वयं १६ मेघश्यामः कनकपरिधिः कर्णविद्योत
विद्युन्मूर्ध्नि भ्राजद्विलुलितकचः स्रग्धरो रक्तनेत्रः। जैत्रैर्दोर्भिर्जगदभयदैर्दंदशूकं गृहीत्वा मंथन्मथ्ना प्रतिगिरिरिवाशो
भताथो ध्रताद्रिः १७ निर्मथ्यमानादुदधेरभूद्विषं महोल्बणं हालहलाह्वमग्रतः। संभ्रांतमीनोन्मकराहिकच्छपात्ति
मिद्विपग्राहतिमिंगिलाकुलात् १८ तदुग्रवेगं दिशि दिश्युपर्यधो विसर्पदुत्सर्पदसह्यमप्रति। भीताः प्रजा दुद्रुवुरंग सेश्व
रा अरक्ष्यमाणाः शरणं सदाशिवं १९ विलोक्य तं देववरं त्रिलोक्या भवाय देव्याभिमतं मुनीनां। आसीनमद्रावपवर्गहेतो
स्तपो जुषाणं स्तुतिभिः प्रणेमुः २० प्रजापतय ऊचुः देवदेव महादेव भूतात्मन्भूतभावन। त्राहि नः शरणापन्नांस्त्रै
लोक्यदहनाद्विषात् २१ त्वमेकः सर्वजगत ईश्वरो बंधमोक्षयोः। तं त्वामर्चंति कुशलाः प्रपन्नार्तिहरं गुरुं २२

१८ तद्विषं अप्रति अप्रतिमं प्रतिक्रियाशून्यमिति वा। कुतः उग्रो वेगो यस्य तदेवाह। दिशि दिशीति। यद्वा। उग्रो वेगो रोमांचस्वेदादयो यस्मात्। अ
त एवासह्यं विलोक्य भीता अन्येन केनाप्यरक्ष्यमाणाः सदाशिवं शरणं दुद्रुवुः जग्मुः। त्रिलोक्या उद्भवाय देव्या सह अद्रौ कैलासे आसीनं। तथापि १६
मुनीनामभिमतं तेषामेवापवर्गाय तपो जुषाणं २० निर्गुणं सगुणं चैव शिवं हरिपराक्रमैः। स्तुवंतश्च प्रजेशाना नाऽमन्यंतांतरं तयोः २१।२२

नन्वेवं भूतो विष्णुरिति प्रसिद्धं तत्राहुः। गुणमय्येति। अस्य जगतो यदा सर्गादीन्धत्से तदा हे भूमन् स्वदृक् स्वतः सिद्धज्ञानः त्वं ब्रह्मा
दिसंज्ञां धत्से २३ तत्र हेतुः त्वं ब्रह्मेति। सदसतोर्भावान् देवतिर्यगादिरूपान्भावयतीति तथा। सर्वं त्वत्तो व्यतिरिक्तं नास्तीत्याहुः। आ
भैव तं नानाशक्तिभिर्जगद्रूपेणाभात यस्मादीश्वरः २४ स्वतःसिद्धज्ञानत्वमुपपादयंतो जगदात्मना आभानप्रकारमाहुः। त्वं शब्दस्य वेदस्य
योनिः अतः स्वतःसिद्धज्ञानः त्वं जगदादिर्महत्तत्वं आत्मा अहंकारः कथंभूतः प्राणेंद्रियद्रव्याणां कारणीभूता गुणा यस्य रजआदित्रिवि

गुणमय्या स्वशक्त्यास्य सर्गस्थित्यप्ययान्विभो। धत्से यदा स्वदृग्भूमन्ब्रह्मविष्णुशिवाभिधां २३ त्वं ब्रह्म परमं गु
ह्यं सदसद्भावभावनः। नानाशक्तिभिराभातस्त्वमात्मा जगदीश्वरः २४ त्वं शब्दयोनिर्जगदादिरात्मा प्राणेंद्रियद्र
व्यगुणः स्वभावः। कालः क्रतुः सत्यमृतं च धर्मस्त्वय्यक्षरं यात्त्रिवृदामनंति २५ अग्निर्मुखं तेऽखिलदेवतात्मा क्षि
तिं विदुर्लोकभवांघ्रिपंकजं। कालं गतिं तेऽखिलदेवतात्मनो दिशश्च कर्णौ रसनं जलेशं॥ २६ नाभिर्नभस्ते श्वसनं न
भस्वान्सूर्यश्च चक्षूंषि जलं स्म रेतः। परावरात्माश्रयणं तवात्मा सोमो मनो द्यौर्भगवन्शिरस्ते २७ कुक्षिः समुद्रा गिर
योऽस्थिसंघा रोमाणि सर्वौषधिवीरुधस्ते। छंदांसि साक्षात्तव सप्त धातवस्त्रयीमयात्मन्हृदयं सर्वधर्मः २८॥

धइत्यर्थः स्वभावादयश्च त्वमेव क्रतुः संकल्पः सत्यमृतं चेति यो धर्मः सत्वं महदादिरूपत्वे हेतुः। त्रिवृत् त्रिगुणात्मकं यदक्षरं प्रधानं त्वयि तदाश्रयं त
दामनंति। यद्वा। एवंभूते त्वयि त्रिवृदक्षरं प्रणवं प्रकाशकमाहुरित्यर्थः २५ अखिलदेवतात्मा अग्निः सर्वदेवात्मा इति श्रुतेः सः अग्निस्ते मुखं हे
लोकभवकृद्धितीयांतेषु विदुरित्यस्य संबंधः २६ परे अवरे अपि आत्मानो जीवास्तेषामाश्रयस्तवात्मा अहंकारः २७ त्रयीमयात्मन् वेदत्रयमूर्ते २८

अष्ट. पंचोपनिषदः तत्पुरुषाघोरसद्योजातवामदेवेशानरूपा मंत्राः यैर्मुखैरष्टोत्तरत्रिंशन्मंत्राणां वर्गः तेषामेव मंत्राणां पदच्छेदेना
११ ष्टोत्तरत्रिंशत्कलात्मका मंत्रा इत्यर्थः । अवस्थितिरुपरतावस्था २९ अधर्मस्योर्मिषु दंभलोभादिषु येरूर्मिषु विसर्गः प्रतिसर्गः
संहारः यद्वा येः सत्वादिभिर्विविधः सर्गस्तानि नेत्रत्रयं हे देव छंदोमयः ऋषिर्वेदः सतवेक्षा ईक्षणं साक्षान्मनुरिति पाठे मनुर्वेदः तत्त्वा

मुखानि पंचोपनिषदस्तवेशयैस्त्रिंशदष्टोत्तरमंत्रवर्गः यत्तच्छिवाख्यं परमार्थतत्त्वं देव स्वयंज्योतिरवस्थितिस्ते २९
छायात्वधर्मोर्मिषु यैर्विसर्गो नेत्रत्रयं सत्वरजस्तमांसि । सांख्यात्मनः शास्त्रकृतस्तवेक्षा छंदोमयो देव ऋषिः पुराणः ॥ ३०
न ते गिरित्राखिललोकपालविरिंचवैकुंठसुरेंद्रगम्यं । ज्योतिः परं यत्र रजस्तमश्च सत्वं न यद्ब्रह्म निरस्तभेदं ३१ ॥
कामाध्वरत्रिपुरकालगराद्यनेकभूतद्रुहः क्षपयतः स्तुतये न तत्ते । यस्त्वंतकाल इदमात्मकृतं स्वनेत्रवह्नि
स्फुलिंगशिखया भसितं न वेद ३२

मेवाहं छंदोमय इति ३० हे गिरित्र ते परं ज्योतिः अखिलानां लोकपालादीनां गम्यं न भवति कुतः यत्र रजआदिर्नास्ति
किंतु ज्योतिः यन्निरस्तभेदं ब्रह्म ३१ कामश्च अध्वरश्च दक्षयज्ञः त्रिपुरादयश्च ये अनेके भूतद्रुहस्तान् क्षपयतः संह
रतस्तेन कर्मस्तुतये न भवति अत्यल्पमेतादित्यर्थः रक्षणस्याप्यवश्यंभावित्वेन सिद्धवन्निर्देशः स्तुतये अलं न भवतीत्य ११
त्र हेतुः यस्तु भवान् स्वनेत्रवह्निविस्फुलिंगस्य शिखया इदं जगत् भसितं भस्मसाज्जातं न वेद नालोकयत्यपि ३२

तद्देवं नित्यं परानुग्रहैकव्यग्रं त्वां ये निंदंतितेऽभिमूर्खा इत्याह ये उमया सह सततं रतं तस्यां नितरां रतं कामिनं कल्पयंते प्रलपंति तथा श्मशाने वर्तं
उग्रं क्रूरं परुषं च हिंस्रं कल्पयंते । कथंभूतं आत्मारामाश्च ते गुरवश्च विश्वहितोपदेष्टारस्तैर्हृदि चिंतितं तं मंघ्रिद्वंद्वं यस्य तथा ध्यामपि तपसा मि
ति तमपि ते नूनं तव [illegible]म विदन्ति तिकाकुः तव लीलां नैव विदुरित्यर्थः अतो ह्यलज्जाः सत्यं त्रपाः कथमात्मारामैः सेवितचरणयुगलस्य कामि
त्वसंभवः कथं वा तपसा भजितमस्य शांतस्योग्रत्वं परुषत्वं वा संभवति त्यविचार्यैव प्रलापादित्यर्थः ३३ आस्तां तावन्निंदकानां वार्तामिहानो

ये त्वात्मारामगुरुभिर्हृदि चिंतितांघ्रिद्वंद्वं रतं न मुमयां तपसा भितप्तं । कथंयंत उग्रपरुषं निरतं श्मशाने ते नूनमूतिमविदंस्तव
हातलज्जाः ३३ तत्तस्य ते सदसतोः परतः परस्य नांजः स्वरूपगमने प्रभवंति भूम्नः । ब्रह्मादयः किमुत संस्तवने वयं तु तत्सर्गस
र्गविषया अपि शक्तिमात्रं ३४ एतत्परं प्रपश्यामो न परं ते महेश्वर । मृडनाय हि लोकस्य व्यक्तिस्तेऽव्यक्तकर्मणः ३५ श्रीशुकः
॥ तद्वीक्ष्य व्यसनं तासां कृपया भृशपीडितः । सर्वभूतसुहृद्देव इदमाह सतीं प्रियां ३६ श्रीशिव उवाच अहो बत भवान्येतत्
प्रजानां पश्य वैशसं । क्षीरोदमथनोद्भूतात्कालकूटादुपस्थितं ३७ आसां प्राणपरीप्सूनां विधेयमभयं हि मे । एतावान्
हि प्रभोरर्थो यद्दीनपरिपालनं ३८ प्राणैः स्वैः प्राणिनः पांति साधवः क्षणभंगुरैः । बद्धवैरेषु भूतेषु मोहितेष्वात्ममायया
३९
पितव तत्त्वं न जानंतीत्याह नतस्मात्तव स्वरूपस्य गमने ज्ञाने तु कुतः शक्ताः स्युः तत्र वयं कथं प्रभवाम यतस्तेषां सर्गे अस्यांतार्वर्तिनाः त
थापि यदेतत्स्तवनं एतदात्मशक्तिपरिमितमात्रमित्यर्थः ३४ तदेवाह एतत्परमिति न परं रूपं तथापि तव दर्शनादेव कृतार्था वयमित्याह मृ
डनाय हीति ३५।३६ मत्प्रभावमविचार्य विषपाने प्रवृत्तं मां कथंचिदियं प्रिया वारयेदिति शंकया तामनुज्ञापयन्नाह अहो बतेति सार्धैश्चतुर्भिः
वैशसं दुःखं ३७ प्राणपरीप्सूनां प्राणरक्षणेच्छूनां मे मया प्रभोः समर्थस्य अर्थः कार्यं ३८ किंच बद्धवैरेषु परस्परं जिघांसत्सु ॥ ३९ ॥

कृपयतः कृपां कुर्वतः पुंसः ४० मेमत्र स्वस्ति शोभनमस्तु। सुखेन जीवितमस्त्वित्यर्थः। जग्धुं अत्तुं ४१ करतली कृत्य करतलपरिमितमात्रं कृत्वा ४२
जळकल्मषः जळदोषो विषं। यस्मात् गळे नीलं तत्कारसाधोः कृपालोः ४३।४४।४५ प्रस्कन्नं गलितं। अपरे सर्पास विषाः तेपि जगृहुः अनेन विषस्य तीव्र
तोक्ता ४६ इत्यष्टमे सप्तमः अष्टमे मथ्यमाने ब्धौ लक्ष्म्या विष्णौ वृते सुरैः। धन्वंतरेर्वृतं सोमे मोहिन्युद्भव ईर्यते। हविर्धानी सुरभिः १ देवयान

पुंसः कृपयतो भद्रे सर्वात्मा प्रीयते हरिः। प्रीते हरौ भगवति प्रीयेहं सचराचरः ४० तस्मादिदं गरं भुंजे प्रजानां स्वस्तिरस्तु मे।
एवमामंत्र्य भगवान्भवानी विश्वभावनः। तद्विषं जग्धुमारेभे प्रभावज्ञान्वमोदत ४१ ततः करतली कृत्य व्यापि हालाहलं विषं।
अभक्षयन्महादेवः कृपया भूतभावनः ४२ तस्यापि दर्शयामास स्ववीर्यं जळकल्मषः। यच्चकार गळे नीलं तच्च साधोर्विभूषणं।
४३ तप्यंते लोकतापेन साधवः प्रायशो जनाः। परमाराधनं तद्धि पुरुषस्याखिलात्मनः ४४ निशम्य कर्म तच्छंभोर्देवदेवस्य मी
ढुषः। प्रजा दाक्षायणी ब्रह्मा वैकुंठश्च शशंसिरे ४५ प्रस्कन्नं पिबतः पाणेर्यत्किंचिज्जगृहुः स्म तत्। वृश्चिकाहिविषौषध्यो
दंदशूकाश्च येपरे ४६ इति श्रीभागवते महापुराणे अष्टमस्कंधे सप्तमोध्यायः श्रीशुक उवाच पीते गरे वृषां
केणाप्रीतास्तेमरदानवाः। ममंथुस्तरसा सिंधुं हविर्धानी ततोभवत् १ तामग्निहोत्रीमृषयो जगृहुर्ब्रह्मवादिनः। यज्ञस्य
देवयानस्य मेध्याय हविषे नृप २ तत उच्चैःश्रवा नाम हयोभूच्चंद्रपांडुरः। तस्मिन्बलिः स्पृहां चक्रे नेंद्र ईश्वरशिक्षया ३ तत ऐ
रावतो नाम वारणेंद्रो विनिर्गतः। दंतैश्चतुर्भिः श्वेताद्रेर्हरन्भगवतो महिं ४ ततोभवत्पारिजातः सुरलोकविभूषणं। पूरय
त्यर्थिनो योर्थैः शश्वद्भुवि यथा भवान् ५
स्वर्गलोकमार्गप्रापकस्य। यज्ञस्य संबंधिने हविषे २ ईश्वरशिक्षया प्रागेव कृतया ३ भगवतोयः श्वेताद्रिः कैलासः तस्य महिमा महिमानं दं ८
तैः शिखरतुल्यैर्हरन्। चंद्रवत्पांडुर इत्यनुषंगः ४।५।× कौस्तुभाख्यमभूद्रत्नं पद्मरागो महोदधेः। तस्मिन्मणौ स्पृहां चक्रे वक्षोलंकरणे हरिः ६

तनुभिर्गत्यादिभिः स्वर्गिणां रमण्योरतिकर्त्र्यः ७ सुदामापर्वतः तत्रैकस्यां दिशि जाता सौदामिनी स्फटिकादिमयगिरिशृंगेषु अधिकं विस्फुरं
ती विद्युदिव कांत्या दिशो रंजयंती श्रीः संपत् साक्षान्मूर्तिधारिणी सती सेव भगवत्परा रमाविर्भूदित्यर्थः ८ तस्याः स्वसादिमहिम्ना आक्षिप्तं चेतो
येषां ९ भगवद्वक्षसि स्थितया श्रिया विलोकिता नां देवानां यथापूर्वं सर्वसंपत्प्राप्तिमसुराणां वेतद्विपर्ययं च वक्तुमभिषेकमहोत्सवपूर्वकं ब्रह्मादि
परिहारेण भगवत्प्राप्तिप्रकारमाह। तस्याश्चासनमित्यादि। अथासीद्वारुणी त्यंतः प्राक्तनेन ग्रंथेन १० आभिषेचनिकाः अभिषेकोप

ततश्चाप्सरसो जाता निष्ककंठ्यः सुवाससः। रमण्यः स्वर्गिणां वल्गुगतिलीलावलोकनैः ७ ततश्चाविरभूत्साक्षाच्छ्रीरमा
भगवत्परा। रंजयंती दिशः कांत्या विद्युत्सौदामिनी यथा ८ तस्यां चक्रुः स्पृहां सर्वे ससुरासुरमानवाः। रूपौदार्यवयोवर्णमहिमा
क्षिप्तचेतसः ९ तस्याश्चासनमानिन्ये महेंद्रो महदद्भुतं। मूर्तिमत्यः सरिच्छ्रेष्ठा हेमकुंभैर्जलं शुचि १० आभिषेचनिका भू
गा मिराहरत्सकलौषधीः। गावः पंचपवित्राणि वसंतो मधुमाधवौ ११ ऋषयः कल्पयांचक्रुरभिषेकं यथाविधि। जगुर्भद्राणि गं
धर्वा नट्यश्च ननृतुर्जगुः १२ मेघा मृदंगपणवमुरजानकगोमुखान्। व्यनादयन् शंखवेणुवीणास्तुमुलनिःस्वनान् १३ ततोभि
षिषिचुर्देवीं श्रियं पद्मकरां सतीं। दिगिभाः पूर्णकलशैः सूक्तवाक्यैर्द्विजेरितैः १४ समुद्रः पीतकौशेयवाससी समुपाहरत्। व
रुणः स्रजं वैजयंतीं मधुना मत्तषट्पदां १५ भूषणानि विचित्राणि विश्वकर्मा प्रजापतिः। हारं सरस्वती पद्मं अजो नागाश्च कुंड
ले १६ ततः कृतस्वस्त्ययनोत्पलस्रजं नदद्द्विरेफां परिगृह्य पाणिना। चचाल वक्त्रं सुकपोलकुंडलं सव्रीडहासं दधती सुशोभनं १७

तान् पंचपवित्राणि पंचगव्यानि मधुमाधवौ चैत्रवैशाखौ सर्वं फलपुष्पादि। पाठांतरे पिंडैक्यं सर्ववार्थः। मधुमासे भवं माधिलिता ११ आभिषेके अभि
षेको चितं विधिं। नर्तकानां स्त्रियः नर्तक्यः १२ शंखवेणुवीणा अव्यनादयन्। तुमुलो निःस्वनो येषां तानन्मृदंगादीन् ॥१३।१४।१५।१७

अष्ट० १८ पदं चाश्रयं। ध्रुवं नित्यं। अव्यभिचारिणो नित्याः संतो गुणा यस्मिन् तत्र नान्वविंदत् कचित्कस्यचिद्दोषस्य सद्भावात् १९ तदेवाह। नूनमिति त्रि
१९ भिः। मन्युनिर्जयो नास्ति दुर्वासा प्रभृतिषु। गुरुशुक्रादिषु संगवर्जितं ज्ञानं नास्ति। महत्त्वेपि ब्रह्मसोमादौ न कामनिर्जयः परतोव्यपाश्रयः परापेक्षइंद्रा
दिः स किमीश्वरः २० न भूतसौहृदं परशुरामादिषु। न मुक्तिकारणं त्यागः शिबिप्रभृतिषु। पुंसः कार्तवीर्यादेर्वीर्यमस्ति अजवेगनिष्कृतं कालवेगेन
परिहृतं तु न भवति गुणसंगवर्जितः सनकादिः द्वितीयः ममवरो न हि समाधिनिष्ठत्वात्। २१ चिरायुष्यपि मार्कंडेयादौ शीलं मंगलं नास्ति। इंद्रिय

स्तनद्वयं चातिकृशोदरी समं निरंतरं चंदनकुंकुमोक्षितं। ततस्ततो नूपुरवल्गुसिंजितैर्विसर्पती हेमलतेव सा बभौ १८ विलोक
यंती निरवद्यमात्मनः पदं ध्रुवं चाव्यभिचारिसद्गुणं। गंधर्वयक्षासुरसिद्धचारणत्रैविष्टपेयादिषु नान्वविंदत १९ नूनं तपो यस्य न
मन्युनिर्जयो ज्ञानं क्वचित्तच्च न संगवर्जितं। कश्चिन्महांस्तस्य न कामनिर्जयः स ईश्वरः किं परतो व्यपाश्रयः २० धर्मः क्वचित्तत्र
न भूतसौहृदं त्यागः क्वचित्तत्र न मुक्तिकारणं। वीर्यं न पुंसोस्त्यजवेगनिष्कृतं न हि द्वितीयो गुणसंगवर्जितः २१ क्वचि
च्चिरायुर्न हि शीलमंगलं क्वचित्तदप्यस्ति न वेद्यमायुषः। यत्रोभयं कुत्र च सोप्यमंगलः सुमंगलः कश्च न कांक्षते हि मां २२ श्रीराम

दमनशीलत्वात्। कचित्तदप्यस्ति हिरण्यकशिपुप्रभृतौ। आयुषस्तु स्थैर्यं न वेद्यं दुर्ज्ञानं। भगवद्द्वेषात्कस्मादेव मृत्युसंभवात्। यत्र कुत्र च श्रीरुद्रे मा
कंडेयादि वा इंद्रियदमनाद्युभावाच्छीलं मंगलं वायुर्निश्चयश्चेत्युभयमस्ति न वान्यः पूर्वोक्तः कश्चिद्दोषः तथापि सोप्यमंगलः श्मशानवासा १९
द्यमंगलवेषितः। श्रीमुकुंदलक्ष्मीकृत्याहकश्चेति। कश्चित्तु सुमंगलः निरवद्यश्च स तु मां न हि कांक्षते आत्मारामत्वात् २२ श्रीवृत्त

एवं विमृश्य रमा निरपेक्षमपि मुकुंदमेव वरं वव्रे। तत्किं। अव्यभिचारिभिः साधुभिर्धर्मज्ञानादिभिर्गुणैः निजैकाश्रयतया स्वैरपेक्ष्यैरेव रसं
वीतमिमं। तत्र हेतुः अगुणाश्रयं प्रकृतिगुणातीतं पाठांतरे स्वयमेवाश्रयः। अत एव स्वस्य ईप्सितं। किंच सर्वैर्गुणैरणिमादिभिरपेक्षितं यं द्वंतं। अयं
भावः यद्यपि स्वयमात्मारामत्वेनान्यनिरपेक्षः तथाप्याश्रिताश्चाणिमादिसिद्धीर्यथा नोपेक्षते तथा मामपि नोपेक्षेत। तावतैव तत्सेवया हं
कृतार्थास्यां किमन्यैः प्राकृतैरितितमेव वृतवतीति। २३ तदेवाह। तस्यांस देशे कमनीयां नवकंजमालां निधाय तदनुग्रहं प्रतीक्षमाणा तूष्णीं तस्थे

एवं विमृश्याव्यभिचारिसद्गुणैर्वरं निजैकाश्रयसद्गुणाश्रयं वव्रे वरं सर्वगुणैरपेक्षितं रमा मुकुंदं निरपेक्षमीप्सितं २३ तस्यां
स देशे उशतीं नवकंजमालां माद्यन्मधुव्रतवरूथगिरोपघुष्टां तस्थौ निधाय निकटे तदुरः स्वधाम सव्रीडहासविकसन्नयनेन याता २४
तस्याः श्रियस्त्रिजगतो जनको जनन्या वक्षो निवासमकरोत्परमं विभूतेः। श्रीः स्वाः प्रजाः सकरुणेन निरीक्षणेन यत्र स्थितैधयत साधिप
तीस्त्रिलोकान् २५ शंखतूर्यमृदंगानां वादित्राणां पृथुः स्वनः। देवानुगानां सस्त्रीणां नृत्यतां गायतामभूत् २६ ब्रह्मरुद्रांगि
रोमुख्याः सर्वे विश्वसृजो विभुं। ईडिरेवितथैर्मंत्रैस्तल्लिंगैः पुष्पवर्षिणः २७ श्रियावलोकिता देवाः सप्रजापतयः प्रजाः।
शीलादिगुणसंपन्ना लेभिरे निर्वृतिं परां २८ निःसत्वा लोलुपा राजन्निरुद्योगा गतत्रपाः। यदा चोपेक्षिता लक्ष्म्या बभूवुर्दैत्यदा
नवाः २९
निकटे तस्थौ। कथंभूतां माद्यंतो ये मधुव्रताः तेषां वरूथस्य गिरा उपघुष्टां नादितां। कथंभूता श्रीः सव्रीडहासेन विकसन्नयनं तेन तस्य उरः स्व
धाम यातासती वक्षः प्रतीक्षमाणा तस्थाविस्यर्थः २४ भगवानपि त्रैलोक्याभिवृद्धये स्ववक्षस्तस्याः स्थानं ददावित्याह। तस्याइति। विशिष्टा
भूतयो विभवा यस्याः तस्यास्त्रिजगतो जनन्याः श्रियः परमं सुस्थिरं ऐधयत। अवर्धयत् २५।२६ तल्लिंगैर्विष्णुप्रतिपादकैरवितथैर्यथार्थैः
२७।२८।२९॥ ॥

वारुणीं वरुणदेवत्यां यदनन्तमयी सुरा ३०।३१ दीर्घपीवरौ दोर्दण्डौ यस्य। कंबुग्रीवः शंखवन्नाभिरिव त्रिरेखा सुवृत्ता ग्रीवा यस्य ३२ स्निग्धः कुंचि
अष्ट. तः केशानामन्तो यस्य ३३ ईज्यभाक् यज्ञभागभोक्ता ३४ अमृतेन आपूर्य तं परिपूर्णं ३५।३६ मिथः दैत्यानां परस्पर कलहो यादनेन योगमाय
२० या मोहिन्या वोऽर्थं साधयिष्यामि। अतो मा खिद्यते त्याह हे तिरोष: ३७ तदेवाह। मिथ इति तर्षः कामः तदुक्तामिवेतां सियेषां इत्येवं समबलानां

अथासीद्वारुणी देवी कन्या कमललोचना। असुरा जगृहुस्तां वै हरेरनुमतेन ते ३० अथोदधेर्मथ्यमानात्काश्यपैरमृतार्थि
भिः। उदतिष्ठन्महाराज पुरुषः परमाद्भुतः ३१ दीर्घपीवरदोर्दण्डः कंबुग्रीवोऽरुणेक्षणः। श्यामलस्तरुणः स्रग्वी सर्वाभरणभूषितः
३२ पीतवासा महोरस्कः सुमृष्टमणिकुंडलः। स्निग्धकुंचितकेशान्तः सुभगः सिंहविक्रमः ३३ अमृतापूर्णकलशं बिभ्रद्वलयभूषितः
स वै भगवतः साक्षाद्विष्णोरंशांशसंभवः। धन्वन्तरिरिति ख्यात आयुर्वेददृगिज्यभाक् ३४ तमालोक्यासुराः सर्वे कलशं चामृताभृतं। गी
लिप्सन्तः सर्ववस्तूनि कलशं तरसाहरन् ३५ नीयमानेऽसुरैस्तस्मिन्कलशेऽमृतभाजने। विषण्णमनसो देवा हरिं शरणमाययुः ३६।
इति तद्दैन्यमालोक्य भगवान्भृत्यकामकृत्। मा खिद्यत मिथोऽर्थं वः साधयिष्ये स्वमायया ३७ मिथः कलिरभूत्तेषां तदर्थं तर्षचेतसां।
अहं पूर्वमहं पूर्वं न त्वं न त्वमिति प्रभो। ३८ देवाः स्वं भागमर्हन्ति ये तुल्यायासहेतवः। सत्रयाग इवैतस्मिन्नेष धर्मः सनातनः ३९
इति स्वान्प्रत्यषेधन्वै दैतेया जातमत्सराः। दुर्बलाः प्रबलान्राजन्गृहीतकलशान्मुहुः ४० एतस्मिन्नन्तरे विष्णुः सर्वोपायविदी
श्वरः। योषिद्रूपमनिर्देश्यं दधार परमाद्भुतं ४१ २०
कलिरभूत् ३८ दुर्बलानां लाक्रोशप्रकारमाह। देवा इति द्वाभ्यां। ये देवा तुल्येनायासेन हेतवः साधकाः। तुल्यः आयासे हेतुश्च धनादिर्ये
षामिति वा। सत्रयागे यथा सर्वेषां समं फलं तद्वत्। तथा च श्रुतिः। ऋद्धिकामाः सत्रमासीरन्निति। येय जमानास्त ऋत्विज इति ३९।४०
४१

तद्रूपं वर्णयति पंचभिः। प्रेक्षणीयमुत्पलमिव श्यामं। सर्वेष्ववयवेषु सुंदरं। समानयोः कर्णयोराभरणे यस्मिन्। सुकपोलं चतदुन्नसं नासि
कं चाननं यस्मिन् ४२।४३ सुष्ठु ग्रीवा यस्मिन्। कंठे आभरणं यस्मिन् तत्। अंगशोभना ग्रीवा यस्य। नतं कंठाभरणं यस्मिन्निति वा सुभुजयो रंग
दाभ्यां भूषितं ४४ विरजांबरेण संवीतो नितंब एव द्वीपः विशालत्वात्। तस्य शोभा यस्याः तया कांच्या प्रकर्षेण विलसत्। वल्गु यथा भवति
तथा चलनोश्चरणयोर्नूपुरे यस्मिन् ४५ सव्रीडेन स्मितेन सह विक्षिप्ता या भ्रू तया। तस्या विलासेन सह यान्यवलोकितानि तैः दैत्य

प्रेक्षणीयोत्पलश्यामं सर्वावयवसुंदरं। समानकर्णाभरणं सुकपोलोन्नसाननं ४२ नवयौवननिर्वृत्तस्तनभा
रकृशोदरं। मुखामोदानुरक्तालिझंकारोद्विग्नलोचनं ४३ बिभ्रत्सुकेशभारेण मालामुत्फुल्लमल्लिकां। सुग्रीवकंठाभर
णं सुभुजांगदभूषितं ४४ विरजांबरसंवीतनितंबद्वीपशोभया। कांच्या प्रविलसद्वल्गुचलच्चरणनूपुरं ४५ स
व्रीडस्मितविक्षिप्तभ्रूविलासावलोकनैः। दैत्ययूथपचेतःसु काममुद्दीपयन्मुहुः ४६ इति श्रीभागवते म०
अष्टमस्कंधे अष्टमोऽध्यायः श्रीशुक उवाच तेऽन्योन्यतोऽसुराः पात्रं हरन्तस्त्यक्तसौहृदाः। क्षिपन्तो दस्युधर्मा
ण आयान्तीं ददृशुः स्त्रियं १ अहो रूपमहो धाम अहो अस्या नवं वयः। इति ते तामभिद्रुत्य पप्रच्छुर्जातहृच्छयाः २ का
त्वं कंजपलाशाक्षि कुतो वा किं चिकीर्षसि। कस्यासि वद वामोरु मथ्नन्तीव मनांसि नः ३ न वयं त्वामरैर्दैत्यैः सिद्धगन्धर्वचारणैः।
नास्पृष्टपूर्वां जानीमो लोकेशैश्च कुतो नृभिः ४

ऋष्यप्रणांचेतः सुमुहुर्मुहुः कामं उद्दीपयन् ४६ इत्यष्टमे ऽष्टमः॥ नवमे मोहिनीं दैत्यैरर्पिते ऽमृतभाजने। तद्दर्शने न देवेभ्यो
दत्तं तयेर्यते १ अहो रूपं सौन्दर्यं धाम द्युतिः इति वदन्तः कालामित्यादि पप्रच्छुः २ मथ्नन्तीव क्षोभयन्तीव ३ कस्यासीत्ययुक्तमुक्तम

अष्ट० २१

स्वामिभिः यतस्त्वं न केनचित् स्पृष्टपूर्वा स्यात् कुतः । नेति । त्वां अमरादिभिरस्पृष्टपूर्वां न जानीमः इति न अपि तु जानीम एव ४ आस्तामिदं त्वद्
र्शनं त्वीश्वरेणैव संपादितमित्याहुः । नूनमिति । सर्वेंद्रियाणां मनसश्च प्रीतिं विधातुं सघृणेन किं प्रेषितासि । किंवा यदृच्छयेवागता

नूनं त्वं विधिना सुभ्रु प्रेषितासि शरीरिणां । सर्वेंद्रियमनःप्रीतिं विधातुं सघृणेन किं ५ सा त्वं नः स्पर्द्धमानानामेकवस्तु
नि मानिनि । ज्ञातीनां बद्धवैराणां शं विधत्स्व सुमध्यमे ६ वयं कश्यपदायादा भ्रातरः कृतपौरुषाः । विभजस्व यथान्यायं
नैव भेदो यथा भवेत् ७ इत्युपामंत्रितो दैत्यैर्मायायोषिद्वपुर्हरिः । प्रहस्य रुचिरापांगैर्निरीक्षन्निदमब्रवीत् ८ श्री
भगवानुवाच कथं कश्यपदायादाः पुंश्चल्यां मयि संगताः । विश्वासं पंडितो जातु कामिनीषु न याति हि ९ शालावृका
णां स्त्रीणां च स्वैरिणीनां सुरद्विषः । सख्यान्याहुरनित्यानि नूत्नं नूत्नं विचिन्वतां १० श्रीशुक उवाच इति ते क्ष्वेलि
तैस्तस्या आश्वस्तमनसोसुराः । जहसुर्भावगंभीरं ददुश्चामृतभाजनं ११ ततो गृहीत्वामृतभाजनं हरिर्बभाष ईषत्
स्मितशोभया गिरा । यद्यभ्युपेतं क्व च साध्वसाधु वा कृतं मया वो विभजे सुधामिमां १२ इत्यभिव्याहृतं तस्या आकर्ण्या
सुरपुंगवाः । अप्रमाणविदस्तस्यास्तत्तथेत्यन्वमंसत १३ अथोपोष्य कृतस्नाना हुत्वा च हविषानलं । दत्वा गोविप्रभूतेभ्यः
कृतस्वस्त्ययना द्विजैः १४ अप्रमाणमियत्तामजानंतः १३ । १४

५ सि नैवं नूनं प्रेषितैवेत्यर्थः ५ । ६ भेदो विग्रहो यथा न भवेत्तथा ७ । ८ संगता अनुरक्ताः ९ हे सुरद्विषः १० भावेन केनाप्यभिप्रायेण गंभीरं यथा भ
वत्येवं जहसुः ११ ईषत्स्मितेन शोभा यस्यास्तया मया कृतं साधु वा असाधु वा यद्यभ्युपेतं अंगीकुरुत तर्हि विभजे १२ असुरपुंगवाः दैत्यश्रेष्ठाः । २१

यथोपजोषं यथाप्रीति । अहतस्य लक्षणं । अहतं यंत्रनिर्मुक्तमुक्तं वासः स्वयंभुवा । शस्तं तन्मांगलिक्येषु तावन्मात्रेण सर्वदा । प्रागग्रेषु कुशे
षु विविशुः १५ धूपैरामोदितायां सुरभीकृतायां १६ अथ तस्यां शालायां हे नरेंद्र सा कलशपाणिः आविवेश । कथंभूता । मणिबंधादाकनिष्ठं क
रस्य करभो बहिः । करभसदृशौ सुवृत्तौ ऊरू यस्याः सा । उशत् कमनीयं दुकूलं यस्मिन् तेन श्रोणीतटेन क्लिशालया श्रोण्या लसा मंदा गतिर्य
स्याः सा । पाठांतरे करभसदृशौ रूरू लसद्दुकूलं यस्याः सा चासौ श्रोणीतटेन अलसा गतिश्च । मदेन विह्वले अक्षिणी यस्याः १७ तां श्रियः स

यथोपजोषं वासांसि परिधायाहतानि ते । कुशेषु प्राविशन् सर्वे प्रागग्रेष्वभिभूषिताः १५ प्राङ्मुखेषूपविष्टेषु सुरेषु दितिजे
षु च । धूपामोदितशालायां जुष्टायां माल्यदीपकैः । १६ तस्यां नरेंद्र करभोरुरुशद्दुकूलश्रोणीतटालसगतिर्मदविह्वलाक्षी । सा
कूजती कनकनूपुरसिंजितेन कुंभस्तनी कलशपाणिरथाविवेश १७ तां श्रीसखीं कनककुंडलचारुकर्णनासाकपोलव
दनां परदेवताख्यां । संवीक्ष्य संमुमुहुरुत्स्मितवीक्षणेन देवासुरा विगलितस्तनपट्टिकांतां १८ असुराणां सुधादानं सर्पाणा
मिव दुर्नयं । मत्वा जातिनृशंसानां न तां व्यभजदच्युतः १९ कल्पयित्वा पृथक् पंक्तीरुभयेषां जगत्पतिः । तांश्चोपवेशयामास स्वे
षु स्वेषु च पंक्तिषु २० दैत्यान् गृहीतकलशो वंचयन्नुपसंचरैः । दूरस्थान् पाययामास जरामृत्युहरां सुधां २१ श्रीसख

सखीं संवीक्ष्य देवासुराः संमुमुहुः । कथंभूतां कनकमये कुंडले यस्याः सा चासौ चारवः कर्णाद्यो यस्याः सा च विगलितो विस्रस्तः स्तनपट्टिकाया अंतो यस्याः १८
एवं तान् मोहयित्वाप्यकृतवान् तदाह त्रिभिः । असुराणां सुधादानं सर्पाणां क्षीरदानमिव दुर्नयं अन्याय्यं मत्वा तां सुधां तेभ्यो न व्यभजत् । अयं भावः दैत्येभ्यः यदि
साध्वसाधु वा सर्वमनुमतमेव ततो मदंते ... नैव सुधां पाययिष्यामि किंच नैव यथान्यायं विभजस्वेत्युक्तं न वै तेभ्यो जातितो हि क्रूरेभ्यो दानं न्याय्यं अतस्तेभ्यः सुधां
न दद्यामिति १९ पंक्तीः पृथक् विविक्ताः कल्पयित्वा विधाय तासु पंक्तिषु स्वेषु स्वेषु तत्तत्सजातीयेषु तांश्च असुरान् विप्रतारणार्थमेवोपवेशयामास २० उपसंचरैर्बहुमा

अष्ट॰ नप्रियवाक्यादिना तान् प्रतिकृम्याति कम्युगमनैर्दूरस्थाऽनपृदेवान् २१ तस्यां कृत:स्नेहायै: स्त्रियासह विवादस्य जुगुप्सया २२ कृता अति प्रणय:
२२ स्नेहायै: प्रणयापायेन कातरा: किं भीता: एतेनोक्तरूपेणा: पूर्वं किं स्तित्यिबंतु यूयंतु धीरा: क्षणं प्रतीक्ष्य भूमिस्यादि बहुमानेन न व आबद्धा: नियंत्रि
ता: समयपालनादिभि:पद्धिरे तै: कारणेर प्रियं किंचिदपि नोचु:किंतु तूष्णीमासन् २३ देवपंक्तौ वं द्राकेयोर्मध्ये प्रविष्ट:सोमममृतमपिबत् २४॥
हरिस्तस्य शिरो जहार अप्लावित: असंस्पृष्ट: २५ ग्रहं स्वर्भानु द्विट् कृत्वाधिकारिणं २६।२७ हरिमिक्तानामेवोद्यम:फलतिनान्येषामि

तेपालयंत:समयमसुरा:स्वकृतंनृप। तूष्णीमासन्कृतस्नेहा:स्त्रीविवादजुगुप्सया २२ तस्यांकृतातिप्रणया:प्रणया
पायकातरा:।बहुमानेनचाबद्धानोचु:किंचनविप्रियं २३ देवलिंगप्रतिच्छन्न:स्वर्भानुर्देवसंसदि।प्रविष्ट:सोममपिबच्चंद्रार्का
भ्यांचसूचित:२४ चक्रेणक्षुरधारेणजहारपिबत:शिर:।हरिस्तस्यकबंधस्तुसुधयाप्लावितोपतत् २५ शिरस्त्वमर
तांनीतमजोग्रहमचीक्लृपत्।यस्तुपर्वणिचंद्रार्कावभिधावतिवैरधी:२६ पीतप्रायेमृतेदेवैर्भगवाँल्लोकभावन:।
पश्यतामसुरेंद्राणांस्वंरूपंजगृहेहरि:२७ एवंसुरासुरगणा:समदेशकालहेत्वर्थकर्ममतयोपिफलेविक
ल्पा:।तत्रामृतंसुरगणा:फलमंजसापुर्यत्पादपंकजरज:श्रयणान्नदैत्या:२८

त्येवमाख्यानतात्पर्यमाह।एवमिति समादेशादयोयेषां हेतु:मंदरादि:।अर्थ:समुद्रे क्षिप्तंवीरुधादिविविध:कल्प:फलंकेषांचिज्ज्ञातंकेषां २२
चिन्नेति वैचित्र्यंयेषांते फलेवैषम्यवंतोबभूवुरित्यर्थ:।तदेवाह।तत्रतेषु।यस्यपादपंकजरज:श्रयणाद्देवाअमृतंफलमापु:सएवसेव्यइत्यर्थ:
यत्रदोनित्यसंबंधात् २८

एतदेवोपपादयति।यदिति।असु:प्राणा:वसुधनं प्राणादिभिर्देहात्मजादिषु नृभिर्यत् युज्यते प्रयुज्यते देहाद्यर्थं यत्क्रियत इत्यर्थ:।तदसदार्थं भव
ति।कुत:पृथक्त्वात् भेदाश्रयत्वात्।शाखानिषेचनवत्।तैरेव प्राणादिभिरीश्वरोद्देशेन यत्क्रियते तेनतु सम्यक् फलं भवति।कुत:अपृथक्त्वात् ईश्व
रस्यसर्वत्रानुगतत्वात्।तत्रदृष्टांत:यत्तरोर्मूलनिषेचनं तद्यथा सर्वस्य स्कंधशाखादेरपि भवति।यद्वा।त्वं ब्रूपेपन्नम्यो पृथक्त्वं पर्यालोच्यब्र
ह्मदृष्ट्यादेहाद्युद्देशेन यत्क्रियते तदसत्।अपृथक्त्वं पर्यालोच्येश्वरदृष्ट्या तैरेव तेष्वेव यत्क्रियते तत्सत् भवतीति शेषं समानं २९ इत्यष्ट
म्य यद्युज्यते सुवसुकर्म मनोवचोभिर्देहात्मजादिषु नृभिस्तदसत्पृथक्त्वात्।तैरेव सद्भवति यत्क्रियतेपृथक्त्वात्सर्वस्य तद्भवतिमू
लनिषेचनंयत् २९ इतिश्रीभाग॰अष्टमस्कंधे नवमोध्याय: श्रीशुकउवाच इतिदानवदैतेया नाविंदन्न
मृतंनृप।युक्ता:कर्मणियत्ताश्च वासुदेवपराङ्मुखा: १ साधयित्वामृतंराजन्पाययित्वास्वकान्सुरान्।पश्यतांसर्वभू
तानांययौगरुडवाहन: २ सपत्नानांपरामृद्धिंदृष्ट्वातेदितिनंदना:।अमृष्यमाणा उत्पेतुर्देवान्प्रत्युद्यतायुधा: ३॥
तत:सुरगणा:सर्वेसुधयापीतयैधिता:।प्रतिसंयुयुधु:शस्त्रैर्नारायणपराश्रया: ४ तत्रदैवासुरोनामरण:परम
दारुण:।रोधस्युदन्वतोराजंस्तुमुलोरोमहर्षण: ५ तत्रान्योन्यंसपत्नास्ते संरब्धमनसोरणे।समासाद्यासिभि
र्बाणैर्निजघ्नुर्विविधायुधै: ६ शंखतूर्यमृदंगानांभेरीडमरिणांमहान्।हस्त्यश्वरथपत्तीनांनदतांनि:स्वनोभवत् ७
रथिनोरथिभिस्तत्रपत्तिभि:सहपत्तय:।हया हयैरिभाश्चेभै:समसज्जंतसंयुगे ८
मेनवम: दशमेमत्सराद्दैत्यैरारब्धेतुमृधेसुरै:।देवमायाविजयेषु देवेष्वाविर्बभौहरि:।तदेवममृतावाप्ति र्नाभक्तानामितीरि
तं।भक्तमात्सर्यत:प्राणा।द्यानि:पुनरुदीर्यते।२॥रण:संग्राम:उदन्वत:समुद्रस्यरोधसितीरेबभूव ५ अन्योन्यंसमासाद्यनिजघ्नु:६ ७८

अष्ट २३ १२ चित्रध्वजपटादिभिश्च वीराणां माला दिदीपिरे ऽतिर्दिदीपिरे देवदानववीराणां ध्वजिन्यौ यादसां मालाभिः सागराविव रेजतुरिति त्रयाणामन्वयः
यादोभिरिति वा सितैः स्वमलै रातपत्रैश्च महार्हैश्चामरैश्च व्यजनैः १३ वातेनोद्धूतैरुत्तरीयैः उष्णीषैश्चार्कसूर्यरश्मिभिः सुतरां स्फुरद्भिः १४।१५।श्र

उष्ट्रैः केचिदिभैः केचिदपरे युयुधुः खरैः। केचिद्गौरमृगैः ऋक्षैर्द्वीपिभिर्हरिभिर्भटाः ९ गृध्रैः कङ्कैर्बकैरन्ये श्येनभासैस्तिमिङ्गिलैः। शर
भैर्महिषैः खड्गैर्गोवृषैर्गवयारुणैः १० शिवाभिराखुभिः केचित्कृकलासैः शशैर्नरैः। बस्तैरेके कृष्णसारैर्हंसैरन्ये च सूकरैः ११ अ
न्ये जलस्थलखगैः सत्त्वैर्विकृतविग्रहैः। सेनयोरुभयो राजन्विविशुस्तेऽग्रतोऽग्रतः १२ चित्रध्वजपटै राजन्नातपत्रैः सितामलैः।
महाधनैर्वज्रदण्डैर्व्यजनैर्बार्हचामरैः १३ वातोद्धूतोत्तरोष्णीषैरर्चिर्भिर्वर्मभूषणैः। स्फुरद्भिर्विशदैः शस्त्रैः सुतरां सूर्यरश्मि
भिः १४ देवदानववीराणां ध्वजिन्यौ पाण्डुनन्दन। रेजतुर्वीरमालाभिर्यादसामिव सागरौ १५ वैरोचनो बलिः सङ्ख्ये सो
सुराणां चमूपतिः। यानं वैहायसं नाम कामगं मयनिर्मितं १६ सर्वसाङ्ग्रामिकोपेतं सर्वाश्चर्यमयं प्रभो। अप्रतर्क्यमनि
र्देश्यं दृश्यमानमदर्शनं १७ आस्थितस्तद्विमानाग्र्यं सर्वानीकाधिपैर्वृतः। वालव्यजनछत्राग्र्यै रेजे चन्द्र इवोदये १८ तस्यास
न्सर्वतो यानैर्यूथानां पतयोऽसुराः। नमुचिः शम्बरो बाणो विप्रचित्तिरयोमुखः १९ द्विमूर्धा कालनाभोऽथ प्रहेतिर्हेतिरिल्वलः। श
कुनिर्भूतसन्तापो वज्रदंष्ट्रो विरोचनः २० हयग्रीवः शङ्कुशिरा कपिलो मेघदुन्दुभिः। तारकश्चक्रदृक् शुम्भो निशुम्भो जम्भ उत्कलः
२१ अरिष्टोऽरिष्टनेमिश्च मयश्च त्रिपुराधिपः। अन्ये पौलोमकालेया निवातकवचादयः २२ अलब्धभागाः सोमस्य केवलं क्लेश
भागिनः। सर्व एते रणमुखे बहुशो निर्जितामराः २३ २३
सुराणां यावमूः तस्याः पतिः स बलिर्यानमास्थितः उदये उदयगिरिशिखरं स्थितः चन्द्र इव विरेजे इति त्रयाणामन्वयः ॥१६। २३॥

२४ स्वपन्ति प्रसवणानि यस्मिन्निति मद्धारा प्रसादः शं २५ नानावाहा दीनियेषां ते देवा असुराश्च २६ मिथो युयुधुः ३७ द्वन्द्वान्येवाह युयो
धेति सप्तभिः। अस्यत आस्यत अयुध्यत यथा २९ सूर्यो देव एकः एव शतेन बलिसुतैः बाणो ज्येष्ठो येषां तैः ३० निशुम्भशुम्भाभ्यां

सिंहनादान्विमुञ्चन्तः शङ्खान्दध्मुर्महारवान्। दृष्ट्वा सपत्नानुत्सिक्तान्बलभित्कुपितो भृशं २४ ऐरावतं दिक्करिणमारूढः शो
भते स्वराट्। यथा स्रवत्प्रस्रवणमुदयाद्रिमहर्पतिः २५ तस्यासन्सर्वतो देवा नानावाहध्वजायुधाः। लोकपालाः सहगणैर्वाय्व
ग्निवरुणादयः २६ तेऽन्योन्यमभिसंसृत्य क्षिपन्तो मर्मभिर्मिथः। आह्वयन्तो विशन्तोऽग्रे युयुधुर्द्वन्द्वयोधिनः २७ युयोध बलिरिन्द्रे
ण तारकेण गुहोऽस्यत। वरुणो हेतिनायुध्यन्मित्रो राजन्प्रहेतिना २८ यमस्तु कालनाभेन विश्वकर्मा मयेन वै। शम्बरो युयु
धे त्वष्ट्रा सवित्रा तु विरोचनः २९ अपराजितेन नमुचिरश्विनौ वृषपर्वणा। सूर्यो बलिसुतैर्देवो बाणज्येष्ठैः शतेन च ३०
राहुणा च तथा सोमः पुलोम्ना युयुधेऽनिलः। निशुम्भशुम्भयोर्देवी भद्रकाली तरस्विनी ३१ वृषाकपिस्तु जम्भेन महिषेण
विभावसुः। इल्वलः सह वातापिर्ब्रह्मपुत्रैररिन्दम ३२ कामदेवेन दुर्मर्ष उत्कलो मातृभिः सह। बृहस्पतिश्चोशनसा नर
केण शनैश्चरः ३३ मरुतो निवातकवचैः कालेयैर्वसवोऽमराः। विश्वेदेवास्तु पौलोमै रुद्राः क्रोधवशैः सह ३४ त एवमाजा
वसुराः सुरेन्द्रा द्वन्द्वेन संहत्य च युध्यमानाः। अन्योन्यमासाद्य निजघ्नुरोजसा जिगीषवस्तीक्ष्णशरासितोमरैः ३५॥
भुशुण्डिभिश्चक्रगदर्ष्टिपट्टिशैः शक्त्युल्मुकैः प्रासपरश्वधैरपि। निस्त्रिंशभल्लैः परिघैः समुद्गरैः सभिन्दिपालैश्च शिरांसि
चिच्छिदुः ३६ गजास्तुरङ्गाः सरथाः पदातयः सारोहवाहा विविधा विखण्डिताः। निकृत्तबाहूरुशिरोधराङ्घ्रयश्छिन्नध्वजेष्वा
सतनुत्रभूषणाः ३७ ध्वजादीनि येषां ३७
देवी ३१।३६ आरोहैर्हस्त्यारोहाः तैः सहिताः अन्ये च वाहाः पूर्वं तु केवलं गजादय उक्ताः कथंभूताः निकृत्ता बाह्वादयो येषां छिन्नानि

अ१०
२४

तेषांदेवादीनांपदाघैः रथांगैश्चचूर्णितादायोधनादुल्बणमुत्थितो रेणुर्दिशः खं द्युमणिं सूर्यंचछादयंस्तदैवरक्तस्रावैर्न्यवर्त्तत। कथंभूतात् असृक्स्रुतिभिः रक्तलक्षणैः परिप्लुतात्सिक्तात्तदा। परिप्लवनाद्धेतोन्यवर्त्तत। भावेक्तः रक्तधाराणांतात्पर्यं तत्सुष्ठुप्लुतादित्यर्थः अथमंत पाठेरणोविशेषणं ३८ शिरोभिर्महाभुजैश्चकरभसदृशोरुभिश्च सा रणभूः प्रस्तीर्णास्तृतासती बभौ कथंभूतैः शिरोभिः उद्धूतानि उत्पातितानि किरीटानि कुंडलानि यैस्तैः संरंभयुक्ताः दृशो येषु तैः परिदष्टाः दच्छदा ओष्ठाः येषु तैः ३९ पतितानिवानि

तेषांपदाघातरथांगचूर्णितादायोधनादुल्बणउत्थितस्तदा। रेणुर्दिशः खंद्युमणिंचछादयन्न्यवर्त्ततासृक्स्रुतिभिःपरिप्लुतात् ३८ शिरोभिरुद्धूतकिरीटकुंडलैः संरंभदृग्भिः परिदष्टदच्छदैः। महाभुजैःसाभरणैःसहायुधैः साप्रास्तृताभूः करभोरुभिर्बभौ ३९ कबंधास्तत्रचोत्पेतुः पतितस्वशिरोक्षिभिः। उद्यतायुधदोर्दंडैराधावंतोभटान्मृधे ४० बलिर्महेंद्रंदशभिस्त्रिभिरैरावतंशरैः। चतुर्भिश्चतुरोवाहानेकेनारोहमार्छयत् ४१ सतानापततः शक्रस्तावद्भिः शीघ्रविक्रमः। चिच्छेदनिशितैर्भल्लैरसंप्राप्तान्हसन्निव ४२ तस्यकर्मोत्तमंवीक्ष्यदुर्मर्षः शक्तिमाददे। तांज्वलंतींमहोल्काभांहस्तस्थामच्छिनद्धरिः ४३ ततः शूलंततःप्रासंततस्तोमरमृष्टयः। यद्यच्छस्त्रंसमादद्यात्सर्वंतदच्छिनद्विभुः ४४ ससर्जाथासुरींमायामंतर्धानंगतोसुरः। ततःप्रादुरभूच्छैलः सुरानीकोपरिप्रभो ४५ २४

स्वशिरांसितत्रत्यैरक्षिभिः तैःपश्यंतइत्यर्थः उद्यतानि आयुधानियैः तैर्दोर्दंडैर्युक्ताः ४० वाहान्ऐरावतपादरक्षकान् आरोहंजयंतारम् आर्छयतविव्याध ४१ दुर्मर्षः असहनोबलिः ४३।४५

कंटकवत्तीक्ष्णाग्रैः शिखरैः सहिताः ४६।४८। स्तनयित्नवस्तैश्च अंगारान्मुमुचुरितिअनुषंगः ४९ अधाक् आर्षं अधाक्षीदित्यर्थः ५० उद्धृतस्तरंगैरावर्त्तैश्चभीषणः ५१ एवमन्येश्चदैत्यैः सृज्यमानासु ५२ यत्रयदातत्रतदातैर्ध्यातःसन् ५३ अष्टौआयुधयुक्तौ

ततोनिपेतुस्तरवोदह्यमानादवाग्निना। शिलाः सटंकशिखराश्चूर्णयंत्योद्विषद्बलं ४६ महोरगाःसमुत्पेतुर्दंदशूकाःसवृश्चिकाः। सिंहव्याघ्रवराहाश्चमर्दयंतोमहागजान् ४७ यातुधान्यश्चशतशः शूलहस्ताविवाससः। छिंधिभिंधीतिवादिन्यस्तथारक्षोगणाःप्रभो ४८ ततोमहाघनाव्योम्निगंभीरपरुषस्वनाः। अंगारान्मुमुचुर्वातैराहतास्तनयित्नवः ४९ सृष्टोदैत्येनसुमहान्वह्निःश्वसनसारथिः। सांवर्तकइवात्युग्रोविबुधध्वजिनीमधाक् ५० ततःसमुद्रउद्वेलःसर्वतःप्रत्यदृश्यत। प्रचंडवातैरुद्धूततरंगावर्त्तभीषणः ५१ एवंदैत्यैर्महामायैरलक्ष्यगतिभीषणैः। सृज्यमानासुमायासुविषेदुःसुरसैनिकाः ५२ नतत्प्रतिविधिंयत्रविदुरिंद्रादयोनृप। ध्यातःप्रादुरभूत्तत्रभगवान्विश्वभावनः ५३ ततःसुपर्णांसकृतांघ्रिपल्लवः पिशंगवासानवकंजलोचनः। अदृश्यताष्टायुधबाहुरुल्लसच्छ्रीकौस्तुभानर्घ्यकिरीटकुंडलः ५४ तस्मिन्प्रविष्टेसुरकूटकर्मजामायाविनेशुर्महिनामहीयसः। स्वप्नोयथाहिप्रतिबोधआगतेहरिस्मृतिःसर्वविपद्विमोक्षणं ५५ दृष्ट्वामृधेगरुडवाहमिभारिवाहआविध्यशूलमहिनोदथकालनेमिः। तल्लीलयागरुडमूर्ध्निपतद्गृहीत्वातेनाहनन्नृपसवाहमरिंत्र्यधीशः ५६

वाहवोयस्य श्रीश्चकौस्तुभश्चअनर्घ्यकिरीटकुंडलेचयस्यउल्लसंतिश्रीकौस्तुभादीनियस्मिन् ५४ असुराणांकूटंकर्ममंत्रादिप्रयोगस्तस्माज्जाताः महिनामाहात्म्नाहरेः स्मृतिरेवसर्वासांविपदांविमोक्षणरूपाकिमुतहरेःप्रवेशइत्यर्थः ५५ इभारिवाहः सिंहवाहः आहिनत् चिक्षेपलीलयैवतद्गृहीत्वाअहनत्। हेनृप ५६

अष्ट० माली यस्य चक्रेण कृत्तशिरसो पेततुः तं तथाभूतमपि आहत्य संघट्य अंडजेंद्रं गरुडमहन् तं हंतुं गदामुद्यच्छन्नित्यर्थः। आद्यो हरिः
५७ इत्यष्टमे दशमः। एकादशे तु देवेषु दैत्यघातिषु नारदः। देवान्वारयत् कौमं तान्दैत्यान्निवारयत् १ उदयच्छत् उन्नियच्छत् २।३ नि
२५ बद्धाक्षान् अक्षैर्दीव्यतः बालान् जित्वा नटः कपटद्यूतार्थी तेषां धनं हरति तथा हे मूढ मायया जेतुमिच्छसि ४ मन्मायाभिः शिबयाद्य आ
रुरुक्षंति आरोढुमिच्छंति ये उत्सिसृप्संति उल्लंघयितुमिच्छंति मोक्षमिच्छंतीत्यर्थः। अधो विधुनोमि पातयामि ५।६।७ कालरशनं

मालीसुमाल्यतिबलौयुधिपेततुर्यच्चक्रेणकृत्तशिरसावथमाल्यवांस्त्वां।आहत्यतिग्मगदयाहनदंडजेंद्रंतावच्छिरोच्छिनदरेर्नद
तोरिणाद्यः ५७ इतिश्रीभा० अष्टमस्कंधेदशमोध्यायः श्रीशुकउवाच अथोसुराःप्रत्युपलब्धचेतसःपर
स्यपुंसःपरयानुकंपया।जघ्नुर्भृशंशक्रसमीरणादयस्तांस्तान्रणेयैरभिसंहताःपुरा १ वैरोचनायसंरब्धोभगवा
न्पाकशासनः।उदयच्छद्यदावज्रंप्रजाहाहेतिचुक्रुशुः २ वज्रपाणिस्तमाहेदंतिरस्कृत्यपुरःस्थितं।मनस्विनंसुसं
पन्नंविचरंतंमहामृधे। ३ नटवन्मूढमायाभिर्मायेशान्नोजिगीषसि।जित्वाबालान्निबद्धाक्षान्नटोहरतितद्ध
नं ४ आरुरुक्षंतिमायाभिरुत्सिसृप्संतियेदिवं।तान्दस्यून्विधुनोम्यज्ञान्पूर्वस्माच्चपदादधः ५ सोहंदुर्मायि
नस्तेद्यवज्रेणशतपर्वणा।शिरोहरिष्येमंदात्मन्घटस्वज्ञातिभिःसह ६ बलिरुवाच संग्रामेवर्तमानानांका
लचोदितकर्मणां।कीर्तिर्जयोजयोमृत्युःसर्वेषांस्युरनुक्रमात् ७ तमिमंकालरशनंजनाःपश्यंतिसूरयः। २५

नहृष्यंतिनशोचंतितत्रयूयमपंडिताः ८॥ कालयंत्रितं अतो नहृष्यंति तत्र एवं विवेके यूयमपंडिताः अनिपुणाः ८

तत्रकीर्तिजयादौ। आत्मानं साधनं मन्यमानानां वो गिरो नश्च्छीमः। मर्मसु ताडनं याभिस्ताः ९ विभुमिंद्रं वीरो बलिः १०

नवयंमन्यमानानांपात्मानंतत्रसाधनं।गिरोवःसाधुशोच्यानांगृह्णीमोमर्मताडनाः ९ श्रीशुकउवाच
इत्याक्षिप्यविभुंवीरोनाराचैर्वीरमर्दनः।आकर्णपूर्णैरहनदाक्षेपैराहतंपुनः १० एवंनिराकृतोदेवोवैरिणात
थ्यवादिना।नामृष्यत्तदधिक्षेपंतोत्राहतइवद्विपः ११ प्राहरत्कुलिशंतस्माअमोघंपरमर्दनः।सयानोन्यपतद्भू
मौछिन्नपक्षइवाचलः १२ सखायंपतितंदृष्ट्वाजंभोबलिसखःसुहृत्।अभ्ययात्सौहृदंसख्युर्हतस्यापिस
माचरन् १३ ससिंहवाहआसाद्यगदामुद्यम्यरंहसा।जत्रावताडयच्छक्रंगजंचसुमहाबलः १४ गदाप्रहा
रव्यथितोभृशंविह्वलितोगजः।जानुभ्यांधरणींस्पृष्ट्वाकश्मलंपरमंययौ १५ ततोरथोमातलि
नाहरिभिर्दशशतैर्वृतः।आनीतोद्विपमुत्सृज्यरथमारुरुहेविभुः १६ तस्यतत्पूजयन्कर्मयं
तुर्दानवसत्तमः।शूलेनज्वलतातंतुस्मयमानोहनन्मृधे १७ सेहेरुजंसुदुर्मर्षांसत्वमालंब्य
मातलिः।इंद्रोजंभस्यसंक्रुद्धोवज्रेणापाहरच्छिरः १८ जंभंश्रुत्वाहतंतस्यज्ञातयोनारदादृषेः।नमुचि
श्चबलःपाकस्तत्रापेतुस्त्वरान्विताः १९

तोत्रमंकुशः तेन आहतइव ११ सयानः विमानसहितः १२।१३।१४।१५ नमुचिर्बलःपाकश्चेतित्रयआजग्मुः १९

अष्ट० २६ २० त्रयाणां पृथग्विक्रमानाह। हरीनिति त्रिभिः हर्यश्वस्य इंद्रस्य तावद्भिः दशभिः शतैः २१।२२। आहत्य इंद्रं विधा २३

वचोभिः परुषैरिंद्रमर्दयंतोस्य मर्मसु। शरैरवाकिरन्मेघधाराभिरिव पर्वतं २० हरीन्दशशता
न्याजौ हर्यश्वस्य बलः शरैः। तावद्भिरर्दयामास युगपल्लघुहस्तवान् २१ शताभ्यां मातलिं पा
कोरथं सावयवं पृथक्। सकृत्संधानमोक्षेण तदद्भुतमभूद्रणे २२ नमुचिः पंचदशभिः स्वर्णपुं
खैर्महेषुभिः। आहत्य व्यनदत्संख्ये सतोयइव तोयदः २३ सर्वतः शरकूटेन शक्रं सरथ
सारथिं। छादयामासुरसुराः प्रावृट्सूर्यमिवांबुदाः २४ अलक्षयंत तस्तमतीवविह्वला विबु
धा देवगणाः सहानुगाः। अनायकाः शत्रुबले निर्जिता वणिग्यथा भिन्ननावो यथार्णवे २५
ततस्तुराषाडिषुबद्धपंजराद्विनिर्गतः साश्वरथध्वजाग्रणीः। बभौ दिशः खं पृथिवीं च रोचयन् स्वतेज
सा सूर्य इव क्षपात्यये २६ निरीक्ष्य पृतनां देवः परैरभ्यर्दितां रणे। उदयच्छद्रिपुं हंतुं वज्रं वज्रधरो रु
षा २७

निर्गतः अग्रणीः सारथिः २६।२७ २६

प्रावृट्कालीनं सूर्यं २४ वणिक्यथा वणिजः। भिन्ना नौर्येषां ते भिन्ननाव इत्यर्थः २५ तुराषाडिंद्रः अश्वादिसहितो वि

२८ शोकामर्षाभ्यां युक्तः रुषा क्रोधेनान्वितः सन्निंद्रं हंतुं परमोद्यमं चकार २९ घंटावत् घंटाभिर्युक्तं ३०।३१

स तेनैवाष्टधारेण शिरसी बलपाकयोः। ज्ञातीनां पश्यतां राजन् जहार जनयन्भयं २८ नमुचिस्तद्वधं
दृष्ट्वा शोकामर्षरुषान्वितः। जिघांसुरिंद्रं नृपते चकार परमोद्यमं २९ अश्मसारमयं शूलं घंटावद्धेमभूष
णं। प्रगृह्याभ्यद्रवत्क्रुद्धो हतोसीति वितर्जयन् ३० प्राहिणोद्देवराजाय निनदन्मृगराडिव। तदापतद्गगन
तले महाजवं विचिच्छिदे हरिरिषुभिः सहस्रधा। तमाहनन्नृप कुलिशेन कंधरे रुषान्वितस्त्रिदशपतिः शिरो हर
न् ३१ न तस्य हि त्वचमपि वज्र ऊर्जितो बिभेद यः सुरपतिनौजसेरितः। तदद्भुतं परमतिवीर्यवृत्रभिन्निरस्त
तो नमुचिशिरोधरत्वचा ३२ तस्मादिंद्रोबिभेच्छत्रोर्वज्रः प्रतिहतो यतः। किमिदं दैवयोगेन भूतं लोकविमो
हनं ३३ येन मे पूर्वमद्रीणां पक्षच्छेदः प्रजात्यये। कृतो निविशतां भारैः पतत्रैः पततां भुवि ३४ तपःसारमयं त्वा
ष्ट्रं वृत्रो येन विपाटितः। अन्ये चापि बलोपेताः सर्वास्त्रैरक्षतत्वचः ३५ सोयं प्रतिहतो वज्रो मया मुक्तोसुरेल्पके। नाहं त
दाददे दंडं ब्रह्मतेजोप्यकारणं ३६ इति शक्रं विषीदंतमाह वागशरीरिणी। नायं शुष्कैरथो नार्द्रैर्वधमर्हति दा
नवः ३७ मयास्मै यद्वरो दत्तो मृत्युर्नैवार्द्रशुष्कयोः। अतोन्यश्चिंतनीयस्ते उपायो मघवन्रिपोः ३८ श्रीराम

अतिवीर्यं वृत्रं भिनत्तीति ३२।३३ तथा पततां पक्षैः ३४ सारमयं वीर्याधिकं त्वाष्ट्रं तपः एतत्तद्वज्रं मयापि न तत्रेण विपाटि
तः ३५ दंडं कुटसदृशं ब्रह्मतेजः दधीचेः सामर्थ्यं ३६ आर्द्रशुष्काभ्यां मृत्युर्नैवेति ३८

अष्ट. २७

३९ उभयात्मकमेवाह। न शुष्केणेति न वार्द्रेण फेनेन। तथा च श्रुतिः। अपां फेनेन नमुचेः शिर इंद्रोदवर्तयदिति ४०
अनुचरैरनुगीयमाना इत्यर्थः। उपगीयमानैरनुचरैः सहेति वा ४५।४६ अविनष्टा अवयवा येषां। विद्यमानाः शि

तां दैवीं गिरमाकर्ण्य मघवान्सुसमाहितः। ध्यायन्फेनमथापश्यदुपायमुभयात्मकं ३९ न शुष्केण न
वार्द्रेण जहार नमुचेः शिरः। तं तुष्टुवुर्मुनिगणा माल्यैश्चावाकिरन्विभुं ४० गंधर्वमुख्यौ जगतुर्विश्वा
वसुपरावसू। देवदुंदुभयो नेदुर्नर्तक्यो ननृतुर्मुदा ४१ अन्येप्येवं प्रतिद्वंद्वान्वाय्वग्निवरुणादयः। सू
दयामासुरस्त्रौघैर्मृगान्केसरिणो यथा ४२ ब्रह्मणा प्रेषितो देवान्देवर्षिर्नारदो नृप। वारयामास विबुधा
न्दृष्ट्वा दानवसंक्षयं ४३ नारद उवाच। भवद्भिरमृतं प्राप्तं नारायणभुजाश्रयैः। श्रिया समेधिताः स
र्व उपारमत विग्रहात् ४४ श्रीशुक उवाच। संयम्य मन्युसंरंभं मानयंतो मुनेर्वचः। गीयमाना अनुचरै
र्ययुः सर्वे त्रिविष्टपं ४५ ये वशिष्टा रणे तस्मिन्नारदानुमतेन ते। बलिं विपन्नमादाय अस्तं गिरिमुपागमन् ४६
तत्राविनष्टावयवान्विद्यमानशिरोधरान्। उशना जीवयामास संजीविन्या स्वविद्यया ४७ बलिश्चोशनसा
स्पृष्टः प्रत्यापन्नेंद्रियस्मृतिः। पराजितोपि नाखिद्यल्लोकतत्त्वविचक्षणः ४८ इति श्रीभागवते म २७
हापुराणे अष्टमस्कंधे एकादशोध्यायः

रोधरा येषां तान् ४७ प्रत्यापन्नानि पुनः प्राप्तानि इंद्रियाणि स्मृतिश्च येन सः ४८ इत्यष्टमे एकादशः॥ ॥

द्वादशे मोहिनीरूपविभ्रमालोकनोत्सुकं। भवं संमोहयामास हरिः पुनरसांत्वयत् १ अमुह्यदसुरान्विष्णुर्मायया न तद
द्भुतं। इति वक्तुं महादेवमोहायमुपवर्ण्यते २ हरिः सोममपाययदिति निशम्य स यत्रास्ते। तत्र तद्रूपं द्रष्टुं पप्याविष्णुनरेण व
यः २ सोमया उमया सह ३ त्वयि किं चित्रमाश्चर्यं वयं त्वाश्चर्यमानसाः। इति वक्ष्यन्महादेवस्तुष्टाव हरिमष्टभिः॥ ३॥ त्वयि म
हामायाधिनि परमेश्वरे नहि किल किंचिदघटितमिव। वयं तु परमकौतूहलेन द्रष्टुमागता इति वक्रोक्त्या संबोधयन्स्तौति। हे दे ५९

श्रीबादरायणिरुवाच। वृषध्वजो निशम्येदं योषिद्रूपेण दानवान्। मोहयित्वा सुरगणान्हरिः सोममपा
ययत् १ वृषमारुह्य गिरिशः सर्वभूतगणैर्वृतः। सह देव्या ययौ द्रष्टुं यत्रास्ते मधुसूदनः २ सभाजि
तो भगवता सादरं सोमया भवः। सूपविष्ट उवाचेदं प्रतिपूज्य स्मयन्हरिं ३ श्रीमहादेव उवाच॥
देवदेव जगद्व्यापिन् जगदीश जगन्मय। सर्वेषामपि भावानां त्वमात्मा हेतुरीश्वरः ४ आद्यंतावस्य
यन्मध्यमिदमन्यदहं बहिः। यतोऽव्ययस्य नैतानि तत्सत्यं ब्रह्म चिद्भवान् ५

५९ अष्ट वदेव। कुतोहं देवानां देव इत्यत आह। हे जगद्व्यापिन्। त्वं कुतः। हे जगन्मय। तर्हि किं प्रधानं। नहि। जगदीश। तत्र कुतस्तत्रा
ह। सर्वेषामपि त्वं हेतुः अतः ईश्वरः। आत्मा त्वं च न जडं प्रधानं त्वमित्यर्थः ४ ननु जगन्मयत्वोक्त्या जगत उत्पत्त्यादितो
असत्यत्वेन च जाड्येन च ममापि किं तथात्वं ब्रूषे नेत्याह। आद्यंतौ मध्यं च अस्य जगतो यतो ब्रह्मणो

अष्ट. २८ भवंति। अस्य च अपयस्य रूपाणि आद्यंतमध्यानि न संति। यत्र ब्रह्म इदंकारास्पदं दृश्यं। अहंकारास्पदं द्रष्टृ। ब
हितोगमं। अन्यात् भोक्तृ च। तत्सर्वं चिद्रूपं च अस्ते न प्रभवान्। अतो न तव विकारादि शंकेत्यर्थः ५॥ तवैवंभूतत्वे मुमु
क्षूणामाचारः प्रमाणमित्याह। तवैवेति। उभयतः इहामुत्र च संगं त्यक्त्वा ६ ननु ब्रह्मैव चेदं रूपं तर्हि संगोदासीनस्य मम नरत्वाभो
जोपासनया किं तेषां तत्राह। त्वमिति। ब्रह्मत्वेऽपि तु न त्वं तमुदासीनः किंतु विश्वस्य प्रपंचस्योदयादीनां हेतुः तदुपाधीनामा
त्मनां जीवानामीश्वरश्च अतस्तत्फलदाता। तर्हि किं राजादिवत्कायाप्यपेक्षया सेवकेभ्यः फलं ददासि। नहि नहि। अनपेक्षत्व
त्वं तर्हि किमीश्वरत्वेन तत्राह। जीवात्मभिः तत्फलदानार्थं अपेक्ष्यत इति तदपेक्षस्तस्य भावस्तदपेक्षता तया। अनपेक्षत्वमे

तवैव चरणांभोजं श्रेयस्कामा निराशिषः। विसृज्योभयतः संगं मुनयः समुपासते ५ त्वं ब्रह्म पूर्णममृतं
विगुणं विशोकमानंदमात्रमविकारमनन्यदन्यत्। विश्वस्य हेतुरुदयस्थितिसंयमानामात्मेश्वरश्च तदपेक्षतया
ऽनपेक्षः ७

च दर्शयितुं तादृशं ब्रह्मत्वं विशिनष्टि। पूर्णं। अमृतं सुखरूपं। विषयसुखवैलक्षण्यार्थमाह। अविकारं नित्यं आनंदमात्रं २८
च। कुतः। विशोकं त्वत्कुतः। विगुणं किंच अनन्यत् न विद्यते अन्यद्यस्मात् ब्रह्मव्यतिरिक्ताभावादपि निरपेक्षत्वमित्यर्थः। न
हि सर्वात्मकत्वे तद्विकारप्रसंगो दुर्वारः। तत्राह। अन्यत् सर्वतो व्यतिरिक्तं च। कारणत्वात्। नह्येवंभूतसुखात्मकब्र
ह्मस्वरूपस्य तवान्यापेक्षास्ति। अतः केवलं भक्तानुग्रहार्थमेव तवैश्वर्यं न स्वार्थमित्यर्थः॥ ७॥ श्रीसांबशिव

अन्यत्वमनन्यत्वं चैकस्य कुत इत्याशंक्य दृष्टांतेनोपपादयति। सदसत्कार्यकारणरूपं द्वयं अद्वयं च। परं मकारणं
त्वमेवैकः। कटककुंडलादिरूपं द्वयं। अकृतं च केवलमद्वयं स्वर्णं यथैकमेव तद्वदेव हि त्वयि वस्तुतो भेदो नास्ति। कथं
तर्हि भेदप्रतीतिस्तत्राह। अज्ञानत इति। कुतः। यस्मान्निरुपाधिकस्यैव तवायं गुणव्यतिकरो भेदः। न स्वतः ८
अत एव त्वां बहुधा वर्णयंति। न तु त्वत्तस्त्वं केपि न जानंतीत्याह द्वाभ्यां। त्वां ब्रह्म वेदांतिनो वयंति मन्यंते त्वामेव ध

त ब्रह्म
एकस्त्वमेव सदसद्द्वयमद्वयं च स्वर्णं कृताकृतमिवेह न वस्तुभेदः। अज्ञानतस्त्वयि जनैर्विहितो विकल्पो
यस्माद्गुणव्यतिकरो निरुपाधिकस्य ८ त्वां ब्रह्म केचिदवयंत्युत धर्ममेक एके परं सदसतोः पुरुषं परेशं। अ
न्येवयंति नवशक्तियुतं परं त्वां केचिन्महापुरुषमव्ययमात्मतंत्रं ९ नाहं परायुरृषयो न मरीचिमुख्या
जानंति यद्विरचितं खलु सत्त्वसर्गाः यन्मायया मुषितचेतस ईश दैत्यमर्त्यादयः किमुत शश्वदभद्रवृ ६
त्ताः १०

र्मं मीमांसका मन्यंते। प्रकृतिपुरुषयोः परं पुमांसं सांख्याः। विमलोत्कर्षिणी ज्ञाना क्रिया योगा प्रह्वी सत्या ईशाना।
अनुग्रहा चेत्येवं नवशक्तियुतं परं पांचरात्राः महापुरुषं पातंजलाः ९ परायुर्ब्रह्मा सत्त्वसर्गाः सत्त्वगुणेन सृष्टा
अपि येन त्वया विरचितं विश्वमपि खलु तत्त्वतो न जानंति। किं पुनस्त्वां। हे ईश अभद्रं राजसं तामसं च वृत्तं ऽन्य
न्निर्वृत्तिश्च येषां ते न जानंतीति किमु वक्तव्यं १०

किंतु त्वं सर्वं जानासीत्याह। सर्वं सत्त्वं अवरुंत्से व्याप्नोषि जानासि। किं तत्सर्वं सम्मोहितं स्वकृतं अदः। स्थितिजन्म
नाशं अमुष्य जगतो जन्मादि भूतानामीहितं च। जगतो भवबंधं च। मोक्षं च। व्याप्नोद्दृष्टांतः। चराचराख्यं देहजातं
खं च यथा वायुराविशति तथा कथमावरुंत्से। तदात्मकतया तस्य सर्वस्यात्मतयेत्यर्थः। आत्मत्वे हेतुः अवग

सत्त्वं सम्मोहितमदः स्थितिजन्मनाशं भूतेहितं च जगतो भवबंधमोक्षौ वायुर्यथाविशति खं च चराचरा
ख्यं सर्वं तदात्मकतयावगमोवरुंत्से ११ अवतारा मया दृष्टा रममाणस्य ते गुणैः सोहं तद्द्रष्टुमिच्छामि
यत्ते योषिद्वपुर्धृतं १२ येन संमोहिता दैत्याः पायिताश्चामृतं सुराः तद्दिदृक्षव आयाताः परं कौतूह
लं हि नः १३ श्रीशुक उवाच एवमभ्यर्थितो विष्णुर्भगवान्शूलपाणिना प्रहस्य भावगंभीरं गि
श्रीभगवानुवाच रिशं प्रत्यभाषत १४ कौतूहलाय दैत्यानां योषिद्वेषो मया कृतः पश्यता सुरकार्याणि गते पीयूष
भाजने १५ तत्तेहं दर्शयिष्यामि दिदृक्षोः सुरसत्तम कामिनां बहु मंतव्यं संकल्पप्रभवोदयं १६ राम २९

मः ज्ञानरूपत्वादिति ११ एवं स्तुत्वा प्रस्तुतं विज्ञापयति अवतारा इति द्वाभ्यां १२ १३ १४ सुरकार्याणि योषिद्रू
पेण भविष्यंतीति पश्यता। अयं भावः। अवश्यं तावदुन्मत्तान् दैत्यान्वंचयित्वा देवेभ्योमृतं देयं। न चैवं विषमं रूपां
तरेण कर्तुमुचितं। अतो वंचनमोहार्दि सारं कामिनीरूपं मया धृतमिति १५ तद्रूपं दर्शयिष्यामि। संकल्पप्रभ
ना वः कामः तस्योदयो यस्मात् १६

१७ विचित्राणि पुष्पाणि। अरुणपल्लवाश्च येषां ते द्रुमा यस्मिन्। लसद्दुकूले न पर्यस्ते परिवृते नितंबमेखला
यस्यास्तां १८ उत्पतनपतनं कंदुकलीलावशेन ये आवर्त्तनोद्वर्त्तनैर्भ्र[illegible]तोन्नमनैस्ताभ्यां कंपितयोः स्तनयोः प्र यर
कृष्टहाराणां चोरुभारैः प्रतिपदं मध्ये भज्यमानामिव चंचलत्पदमेव प्रवालवत्कोमलं ततस्ततो नयंती १९

शुक उवाच इति ब्रुवाणो भगवांस्तत्रैवांतरधीयत सर्वतश्चारयंश्चक्षुर्भव आस्ते सहोमया १७ त
तो ददर्शोपवने वरस्त्रियं विचित्रपुष्पारुणपल्लवद्रुमे विक्रीडतीं कंदुकलीलया लसद्दुकूलपर्यस्तनितं
बमेखलां १८ आवर्त्तनोद्वर्त्तनकंपितस्तनप्रकृष्टहारोरुभरैः पदे पदे प्रभज्यमानामिव मध्यतश्च
लत्पदप्रवालं नयतीं ततस्ततः १९ दिक्षु भ्रमत्कंदुकचापलैर्भृशं प्रोद्विग्नतारायतलोललोचनां स्व
कर्णविभ्राजितकुंडलोल्लसत्कपोलनीलालकमंडिताननां २० श्लथद्दुकूलं कबरीं च विच्युतां सन्न
ह्यतीं वामकरेण वल्गुना विनिघ्नतीमन्यकरेण कंदुकं विमोहयंतीं जगदात्ममायया २१

दिक्षु भ्रमतः कंदुकस्य चापलैश्चांचल्यैः भृशं प्रोद्विग्ने तारे आयते लोले चंचले लोचने यस्याः। स्वकर्णाभ्यां विभ्रा
जिते ये कुंडले ताभ्यामुल्लसंतौ कपोलौ ताभ्यां च नीलालकैश्च मंडितमाननं यस्याः २० संनह्यतीं बध्नंतीं।
जगद्विमोहयंती २१

भा० अ० तांवीक्ष्यदेवःश्रीरुद्रः आत्मानमंतिकेस्थितामुमांस्वगणांश्चनवेद। कथंभूतः। इतिएवंभूतयार्कंदुकलीलयायाई
३९ षद्व्रीडातयाअस्फुटंस्मितंतेनसहविसृष्टोयःकटाक्षःतेनमुष्टोवंचितः। अतएवस्वयंयते। स्त्रियाःप्रेक्षणंतया

तांवीक्ष्यदेवइतिकंदुकलीलयेषद्व्रीडास्फुटस्मितविसृष्टकटाक्षमुष्टः स्त्रीप्रेक्षणप्रतिसमीक्षणविह्व
लात्मानात्मानमंतिकउमांस्वगणांश्चवेद २२ तस्याःकराग्रात्सतुकंदुकोयदागतोविदूरंतमनुव्रजंत्स्त्रि
स्कं याः वासःससूत्रंलघुमारुतोहरद्भवस्यदेवस्यकिलानुपश्यतः २३ एवंतांरुचिरापांगींदर्शनीयांम
नोरमां दृष्ट्वातस्यांमनश्चक्रे विषज्जंत्यांभवःकिल २४ तयापहृतविज्ञानस्तत्कृतस्मरविह्वलः भ
वान्याअपिपश्यंत्यागतह्रीस्तत्पदंययौ २५ सातमायांतमालोक्यविवस्त्राव्रीडिताभृशं निलीय
मानावृक्षेषुहसंतीनान्वतिष्ठत २६ तामन्वगच्छद्भगवान्भवःप्रमुषितेंद्रियः कामस्यचवशंनीतः
करेणुमिवयूथपः २७ सोनुव्रज्यातिवेगेनगृहीत्वानिच्छतींस्त्रियं केशबंधउपानीयबाहुभ्यांपरिष राम
स्वजे २८ सोपगूढाभगवताकरिणाकरिणीयथा इतस्ततःप्रसर्पंतीविप्रकीर्णशिरोरुहा २९ आ ३९
त्मानंमोचयित्वांगसुरर्षभभुजांतरात् प्राद्रवत्साप्टथुश्रोणीमायादेवविनिर्मिता ३०

वप्रतिसमीक्षणंताभ्यांविह्वलआत्मामनोयस्यतत् २२ तंकंदुकमनुव्रजंत्याःस्त्रियाःलघुसूक्ष्मंवासःस
सूत्रंकांचीसहितं २३ विषज्जंत्यांकुंचितकटाक्षैरात्मानंनिरीक्षमाणायां २४ तत्पदंतस्याःसमीपंययौ
२५ २६ २७ २८ २९ अंगहेराजन् ३०

एवंतामनुधावन्हरःसरित्सरःसुशैलादिषुवसन्निहितोबभूव ३४ तदुक्तमायायाजडीकरणं ३५।३६।३७ स्वांनिष्ठां

तस्यासौपदवींरुद्रोविष्णोरद्भुतकर्मणः। प्रत्यपद्यतकामेनवैरिणेवविनिर्जितः ३१ तस्यानुधावतोरेतः
चस्कंदामोघरेतसः। शुष्मिणोयूथपस्येववासितामनुधावतः ३२ यत्रयत्रापतन्मह्यांरेतस्तस्यमहात्मनः।
तानिरूप्यस्यहेम्नश्चक्षेत्राण्यासन्महीपते ३३ सरित्सरःसुशैलेषुवनेषूपवनेषुच। यत्रक्वचासन्नृपयस्तत्रसन्निहितो
हरः ३४ स्कन्नेरेतसिसोपश्यदात्मानंदेवमायया। जडीकृतंनृपश्रेष्ठसन्न्यवर्ततकश्मलात् ३५ अथावगतमाहात्म्यआ
त्मनोजगदात्मनः। अपरिज्ञेयवीर्यस्यनमेनेतदुहाद्भुतं ३६ तमविक्लवमव्रीडमालक्ष्यमधुसूदनः। उवाचपरमप्रीतोबिभ्र
त्स्वांपौरुषींतनुं ३७ श्रीभगवानुवाच दिष्ट्यात्वंविबुधश्रेष्ठस्वांनिष्ठामात्मनास्थितः। यन्मेस्त्रीरूपयास्वैरंमोहि
तोप्यंगमायया ३८ कोनुमेतितरेन्मायांविषक्तस्त्वदृतेपुमान्। तांस्तान्विसृजतींभावान्दुस्तरामकृतात्मभिः ३९ सेयंगु
णमयीमायानत्वामभिभविष्यति। मयासमेताकालेनकालरूपेणभागशः ४० श्रीशुकउवाच एवंभगवताराजन्
श्रीवत्सांकेनसत्कृतः। आमंत्र्यतंपरिक्रम्यसगणःस्वालयंययौ ४१ आत्मांशभूतांतांमायांभवानींभगवान्भवः॥
शंसतामृषिमुख्यानांप्रीत्याचष्टाथभारत ४२ अपिव्यपश्यस्त्वमजस्यमायांपरस्यपुंसःपरदेवतायाः। अहंकला
नामृषभोविमुह्येययावशोन्येकिमुतास्वतंत्राः ४३ यंमामपृच्छस्त्वमुपेत्ययोगात्समासहस्रांतउपारतंवै। सएष
साक्षात्पुरुषःपुराणोनयत्रकालोविशतेनवेदः ४४
प्रकृतिं ३८।३९। कालेनसृष्ट्यादिनिमित्तेन। मयाकालरूपेणभागशोरजआद्यंशेनसमेतामदधीनासती ४०।४४

अष्टाध्यायार्थनिगमनं इतीति ४५ एतत्कीर्तनादेः फलमाह एतदिति ४६ भगवता कृतौ भक्तपक्षपातं स्मरन्नमस्करोति। असतामविषयं भावेन भजनं तेन गम्यमङ्घ्रिं प्रपन्नान् सिंधुमथ्यं सिंधोर्मथने जातममृतं यः आशयत अभोजयत् ४७ इत्यष्टमे द्वादशः त्रयोद

श्रीशुक उवाच इति ते भिहितस्तात विक्रमः शार्ङ्गधन्वनः। सिंधोर्निर्मथने येन धृतः पृष्ठे महाचलः ४५ एतन्मुहुः कीर्तयतोनुशृण्वतो न रिष्यते जातु समुद्यमः क्वचित्। यदुत्तमश्लोकगुणानुवर्णनं समस्तसंसारपरिश्रमापहं ४६ असद्विषयमङ्घ्रिं भावगम्यं प्रपन्नानमृतममरवर्यानाशयत्सिंधुमथ्यं। कपटयुवतिवेषो मोहयन्यः सुरारीन्नमहमुपसृतानां कामपूरं नतोस्मि ४७ इति श्रीभा॰ अष्टमस्कंधे द्वादशोध्यायः श्रीशुक उवाच

मनुर्विवस्वतः पुत्रः श्राद्धदेव इति श्रुतः। सप्तमो वर्तमानो यस्तदपत्यानि मे शृणु १ इक्ष्वाकुर्नभगश्चैव धृष्टः शर्यातिरेव च। नरिष्यंतोथ नाभागः सप्तमो दिष्ट उच्यते २ करूषश्च पृषध्रश्च दशमो वसुमान्स्मृतः। मनोर्वैवस्वतस्यैते दशपुत्राः परंतप ३ आदित्या वसवो रुद्रा विश्वेदेवा मरुद्गणाः। अश्विनावृभवो राजन्निंद्रस्तेषां पुरंदरः ४ कश्यपोत्रिर्वसिष्ठश्च विश्वामित्रोथ गौतमः। जमदग्निर्भरद्वाज इति सप्तर्षयः स्मृताः ५ अत्रापि भगवज्जन्म कश्यपाददितेरभूत्। आदित्यानामवरजो विष्णुर्वामनरूपधृक् ६ संक्षेपतो मयोक्तानि सप्तमन्वंतराणि ते। भविष्याण्यथ वक्ष्यामि विष्णोः शक्त्यन्वितानि च ७

शतु वर्ण्यंते सप्तमादीन्यनुक्रमात्। मन्वंतराणि सर्वाणि षड्विधानि पृथक्पृथक् सप्तमादि मन्वंतराण्याह। मनुरित्यादिना यावदध्यायसमाप्ति १ आदित्यादयो देवा इत्यन्वयः ४ भगवतो जन्म अवतारः तमेवाह। आदित्यानां विवस्वान् अर्यमा पूषेत्यादि उक्तानां मध्ये अवरं तन्मय

अष्टमं मन्वंतरं वक्तुं कथामाह। विवस्वत इति त्रिभिः ८ एके वडवां छायामाहुः मम तु संज्ञैव वडवेति मतं। तदुक्तं षष्ठे सैव भूत्वाथ वडवा नासत्यौ सुषुवे भुवीति। यमश्च यमी च यमुना श्राद्धदेवश्चेति त्रयः सुताः ९।१० सावर्णि पुत्राः ११।१२ पदत्रयं याचमाना

विवस्वतश्च द्वे जाये विश्वकर्मसुते उभे। संज्ञा छाया च राजेंद्र ये प्रागभिहिते तव ८ तृतीयां वडवामेके तासां संज्ञासुतास्त्रयः। यमो यमी श्राद्धदेवश्छायायाश्च सुताञ्छृणु ९ सावर्णिस्तपती कन्या भार्या संवरणस्य या। शनैश्चरस्तृतीयोभूदश्विनौ वडवात्मजौ १० अष्टमेंतर आयाते सावर्णिर्भविता मनुः। निर्मोकविरजस्काद्याः सावर्णितनया नृप ११ तत्र देवाः सुतपसो विरजा अमृतप्रभाः। तेषां विरोचनसुतो बलिरिंद्रो भविष्यति १२ दत्त्वेमां याचमानाय विष्णवे यः पदत्रयं। राद्धमिंद्रपदं हित्वा ततः सिद्धिमवाप्स्यति १३ योसौ भगवता बद्धः प्रीतेन सुतले पुनः। निवेशितोधिके स्वर्गादधुनास्ते स्वराडिव १४ गालवो दीप्तिमान्रामो द्रोणपुत्रः कृपस्तथा। ऋष्यशृंगः पितास्माकं भगवान्बादरायणः १५ इमे सप्तर्षयस्तत्र भविष्यंति स्वयोगतः। इदानीमासते राजन्स्वे स्व आश्रममंडले १६ देवगुह्यात्सरस्वत्यां सार्वभौम इति प्रभुः। स्थानं पुरंदराद्धृत्वा बलये दास्यतीश्वरः १७ नवमो दक्षसावर्णिर्मनुर्वरुणसंभवः। धृष्टकेतुर्दीप्तिकेत्वित्याद्यास्तत्सुता नृप १८ पारा मरीचिगर्भाद्या देवा इंद्रोद्भुतः स्मृतः। द्युतिमत्प्रमुखास्तत्र भविष्यंत्यृषयस्ततः १९ आयुष्मतोंबुधारायामृषभो भगवत्कला। भवित्री येन संराद्धां त्रिलोकीं भोक्ष्यतेद्भुतः २०॥ ॥

यद्दत्त्वेमां सर्वां महीं सप्तमे मन्वंतरे दत्त्वा अष्टमे मन्वंतरे विष्णोः प्रसादेन राद्धं ऋद्धमिंद्रपदं हित्वा सर्वः १३।१४ रामः परशुरामः द्रोणपुत्रोऽश्वत्थामा १५ इदानीं तु स्वयोगत आसते १६।१७ अद्भुतः इंद्रः १८।१९ ३०नमस्कार्याय

अष्ट० ३२ २२ हविष्मत्प्रमुखा इत्युक्तानामेकैकेषां त्रिनामान्याह हविष्मानिति २३ विषूच्यां जातः सन् २४ एकादशम इत्यादि रार्थः २५। २९

आयुष्मतोंबुधारायामृषभो भगवत्कळा। भविता येन संराद्धां त्रिलोकीं भोक्ष्यतेऽद्भुतः २० दशमो ब्रह्मसावर्णिरु
पश्लोकसुतो महान्। तत्सुता भूरिषेणाद्या हविष्मत्प्रमुखा द्विजाः २१ तत्रापि जन्म भवति हरेर्विश्वसृजां गृहे। अमू
र्त्तिरिति विख्यातो येनाप्यायित वै जगत् २२ हविष्मान्सुकृतिः सत्यो जयो मूर्त्तिस्तदा द्विजाः। सुवासनविरुद्धाद्या देवाः शं
भुः सुरेश्वरः २३ विष्वक्सेनो विषूच्यां तु शंभोः सख्यं करिष्यति। जातः स्वांशेन भगवान्गृहे विश्वसृजो विभुः २४ म
नुर्वै धर्मसावर्णिरेकादशम आत्मवान्। अनागतास्तत्सुताश्च सत्यधर्मादयो दश २५ विहंगमाः कामगमाः निर्वा
णरुचयः सुराः। इंद्रश्च वैधृतस्तेषामृषयश्चारुणादयः २६ आर्यकस्य सुतस्तत्र धर्मसेतुरिति स्मृतः। वैधृता
यां हरेरंशस्त्रिलोकीं धारयिष्यति २७ भविता रुद्रसावर्णी राजन्द्वादशमो मनुः। देववानुपदेवश्च देवश्रेष्ठादयः सु
ताः २८ ऋतधामा च तत्रेंद्रो देवाश्च हरितादयः। ऋषयश्च तपोमूर्त्तिस्तपस्व्याग्नीध्रकादयः २९ स्वधामाख्यो हरेरंशः सा
धयिष्यति तन्मनोः। अंतरं सत्यसहसः सूनृतायाः सुतो विभुः ३० मनुस्त्रयोदशो भाव्यो देवसावर्णिरात्मवान्। चित्रसेन
विचित्राद्या देवसावर्णिदेहजाः ३१ देवाः सुकर्मसुत्रामसंज्ञा इंद्रो दिवस्पतिः। निर्मोकतत्वदर्शाद्या भविष्यंत्यृषयस्तदा ३२ ३२

तस्य मनोरंतरं साधयिष्यति। सत्यसहसः सूनृतायाश्च सुतः सन् ३० दिवस्पतेरिंद्रस्योपहर्त्ता संपादकः भविष्यति ३१। ३२॥ ॥

३५ क्रियातंतून्कर्मसंततीः वितायिता विस्तारयिष्यति ३६ युगसाहस्रेण पर्ययः परिवर्त्तो यस्य युगसहस्रप्रमाण इत्यर्थः ३७
अष्टमे त्रयोदशः चतुर्दशे तु सर्वेषां मन्वादीनां यथायथं। पृथक्कर्माणि वर्ण्यंते भगवद्वशवर्त्तिनां १ पुरुषेणेश्वरेणाज्ञापितवता

देवहोत्रस्य तनय उपहर्त्ता दिवस्पतेः। योगेश्वरो हरेरंशो बृहत्यां संभविष्यति ३३ मनुर्वा इंद्रसावर्णिश्चतुर्दशम एष्यति। उरु
गंभीरबुध्याद्या इंद्रसावर्णिदेहजाः ३४ पवित्राश्चाक्षुषा देवाः शुचिरिंद्रो भविष्यति। अग्निर्बाहुः शुचिः शुद्धो मागधाद्या
स्तपस्विनः ३५ सत्रायणस्य तनयो बृहद्भानुस्तदा हरिः। वितानायां महाराज क्रियातंतून्वितायिता ३६ राजंश्चतुर्दशैता
नि त्रिकालानुगतानि ते। प्रोक्तान्येभिर्मितः कल्पो युगसाहस्रपर्ययः ३७ इति श्रीभागव० अष्टमस्कंधे त्रयोदशोऽध्या
यः राजोवाच मन्वंतरेषु भगवन्यथा मन्वादयस्त्विमे। यस्मिन्कर्मणि ये येन नियुक्तास्तद्वदस्व मे १ ऋषिरुवा
च मनवो मनुपुत्राश्च मुनयश्च महीपते। इंद्राः सुरगणाश्चैव सर्वे पुरुषशासनाः २ यज्ञादयो याः कथिताः पौरुष्यस्तन
वो नृप। मन्वादयो जगद्यात्रां नयंत्याभिः प्रचोदिताः ३ चतुर्युगांते कालेन ग्रस्तान् श्रुतिगणान्यथा। तपसा ऋष
योऽपश्यन्यतो धर्मः सनातनः ४ ततो धर्मं चतुष्पादं मनवो हरिणोदिताः। युक्ताः संचारयंत्यद्धा स्वे स्वे काले महीं नृ
पाः ५ पालयंति प्रजापाला यावदंतं विभागशः। यज्ञभागभुजो देवा ये च तत्रानुकीर्तिताः ६

रैः शास्यंते नियुज्यंत इति तथा २ तद्वाहय ज्ञादय इति ३ ऋष्यादीनां कर्माण्याह चतुर्युगांत इति चतुर्भिः यतः येभ्यः श्रुतिगणेभ्यः ४ उदि
तोऽक्ताः युक्ताः संयताः संतो महीं धर्मं संचारयंति मह्यां धर्मं प्रवर्त्तयंतीत्यर्थः ५ प्रजापाला मनुपुत्राः तं धर्मं पालयंति यावदंतं यावन्मन्वंत

रावसानं। विभागशः पुत्रपौत्रादिक्रमेण। पैशान्ये धावापृथिव्यादयो यत्रकर्मणि भोक्ष्कालेनाक्लिमान्ते श्रासह ६। ७। धर्म प्रसंगाद्रूपांतरै रपि जगद्यात्राप्रवर्त्तनमाह। ज्ञानमिति द्वाभ्यां। सिद्धाः सनकादयः। ऋषयो याज्ञवल्क्यादयः। योगेशा दत्तात्रेयादयः। तैर्द्रूपैः सन् ज्ञानं कर्मयोगं च ब्रूते ८ प्रजेशा मरीच्यादयस्तेन रूपेण सर्गं करोतीति शेषः। स्वराट् पुः राजमूर्त्तिः सर्वेषामभावाय भवति। पृथग्विधा गुणाः

इंद्रो भगवता दत्तां त्रैलोक्यश्रियमूर्जितां। भुंजानः पाति लोकांस्त्रीन्कामं लोके प्रवर्षति ७ ज्ञानं चानुयुगं ब्रूते हरिः सिद्धस्वरूपधृक्। ऋषिरूपधरः कर्मयोगं योगेशरूपधृक् ८ सर्गं प्रजेशरूपेण दस्यून्हन्यात्स्वराड्वपुः। कालरूपेण सर्वेषामभावाय पृथग्गुणः ९ स्तूयमानो जनैरेभिर्मायया नामरूपया। विमोहितात्मभिर्नानादर्शनैर्न च दृश्यते १० एतत्कल्पविकल्पस्य प्रमाणं परिकीर्तितं। यत्र मन्वंतराण्याहुश्चतुर्दश पुराविदः ११ इति श्रीभा० अष्टमस्कंधे चतुर्दशोध्यायः राजोवाच बलेः पदत्रयं भूमेः कस्माद्धरिरयाचत। भूत्वेश्वरः कृपणवल्लब्धार्थोपि बबंध तं १ एतद्वेदितुमिच्छामो महत्कौतूहलं हि नः। यज्ञेश्वरस्य पूर्णस्य बंधनं चाप्यनागसः २

शीतो ह्लादयो यस्य ९ नामरूपात्मिकया मायया मोहितात्मभिरेभिर्जनैः नानादर्शनैः शास्त्रैः स्तूयमानो निरूप्यमाणोपि नैव दृश्यत इत्यर्थः १० प्रासंगिकं निरूप्य प्रस्तुतमेवोपसंहरति। एतत्कल्पविकल्पस्य अवांतरकल्पस्य ११ अष्टमे चतुर्दशः बलिं पराजितं चाहं अयाजयन् । ततोसौ स्वर्गमध्यास्य ऋयाद्देवा निलिल्यिरे १ अत्रेर्यतेन वाध्याय्यावामंवामनेरिष्टितं। निग्रहोलं तो यत्र बलेर्भृत्यानतुग्रहः। ईश्वरः स्वयं कृपणवत् कस्मात् तोयाचत लब्धार्थोपि ला पितं कस्माद्बबंध १। २। श्रीशुक उ॥ ३३

तत्रतावद्बलेः त्रिलोकीमपहर्तुं याश्वारिद्ध्लं कृतवानिति वक्तुं ब्राह्मणाराधनबलेन बलेरकांडएव स्वर्गविजयक्रममाह। पराजितश्रीरित्यादिनाध्यायसमाप्ति। युद्धे पराजिता श्रीर्येन स इंद्रेण असुभिश्च त्यजितः सन्। भृगून्भृगोर्वंश्यान् शुक्रादीन्महात्मा अर्थिनानिवेदनेनार्पणेन ३ त्रिणाकं स्वर्गं जेतुमिच्छंतं। विश्वजिता यागेनायाजयन्महाभिषेकेणैंद्रेण ब्रह्म ब्राह्मणप्रसिद्धेन ४ यं हि अस्यैंद्रस्यये तुरंगास्तेषामिव वर्णो हरितोयेषां ५ पुरटं सुवर्णं। तूणौ इषुधी अरिक्तौ अक्षयशरौ॥ ३४

श्रीशुक उवाच पराजितश्रीरसुभिश्च हापितो हीन्द्रेण राजन्भृगुभिः स जीवितः। सर्वात्मना तानभजद्भृगून्बलिः शिष्यो महात्मार्थनिवेदनेन ३ तं ब्राह्मणा भृगवः प्रीयमाणा अयाजयन्विश्वजिता त्रिणाकं। जिगीषमाणं विधिनाभिषिच्य महाभिषेकेण महानुभावाः ४ ततो रथः कांचनपट्टनद्धो हयाश्च हर्यश्वतुरंगवर्णाः। ध्वजश्च सिंहेन विराजमानो हुताशनादास हविर्भिरिष्टात् ५ धनुश्च दिव्यं पुरटोपनद्धं तूणावरिक्तौ कवचं च दिव्यं। पितामहस्तस्य ददौ च मालामम्लानपुष्पां जलजं च शुक्रः ६ एवं स विप्रार्जितयोधनार्थस्तैः कल्पितस्वस्त्ययनोथ विप्रान्। प्रदक्षिणीकृत्य कृतप्रणामः प्रह्रादमामंत्र्य नमश्चकार ७ अथारुह्य रथं दिव्यं भृगुदत्तं महारथः। सुस्रग्धरोथ सन्नह्य धन्वी खड्गी धृतेषुधिः ८ हेमांगदलसद्बाहुः स्फुरन्मकरकुंडलः। रराज रथमारूढो धिष्ण्यस्थ इव हव्यवाट् ९

उस्थ आहवनीय इवेति वा ९

पितामहः प्रह्लादः जलजं शंखं ६ विप्रैरर्जितः संपादितो योधनार्थो युद्धपरिकरो यस्य। तैरेव कल्पितं स्वस्त्ययनं मंगलावनादि यस्य आमंत्र्य पृष्ट्वा। अथारुह्य रराजेति द्वयोरन्वयः। सुस्रक् धरः शोभनमालाधरः ८ हेमांगदाभ्यां लसंतौ बाहू यस्य। धिष्ण्यस्थः वने प्रज्वलितः कुं

अष्ट॰ ३४ तुल्यमैश्वर्यं बलं च श्रीश्च येषां तैर्दैत्ययूथपैर्दृग्भिर्ययाविति द्वयोरन्वयः। परिधीन्दिशः १० स्वृद्धां अतिसमृद्धां ११ धिग्ग्राम्यसुखं तथा
विधां पुरीं अकस्मादेव परित्यज्य द्रष्टव्यः पश्चात्प्राप्यता इति वैराग्यार्थमिंद्रपुरीमनुवर्णयति। रम्यामिति सार्द्धैरेकादशभिः। उपवनानि फलप्र
धानानि। निकटानि वा। उद्यानानि पुष्पप्रधानानि। दूरस्थानि वा तैः रम्यां। कूजंति विहंगमिथुनानि येषु। गायंतो मत्ता मधुव्रता येषु १२ प्रवा
लादिनां गुरुभारो यासु ताः शाखा येषां तैरमरद्रुमा येषु तैः यत्र या सुसुरसेविताः प्रमदा क्रीडंति ताः हंसादिकुलैराकुला या नलिन्यः सरां

तुल्यैश्वर्यबलश्रीभिः स्वयूथैर्दैत्ययूथपैः। पिबद्भिरिव खं दृग्भिर्दहद्भिः परिधीनिव १० वृतो विकर्षन्महतीमासुरीं ध्वजिनीं विभुः। य
याविंद्रपुरीं स्वृद्धां कंपयन्निव रोदसी ११ रम्यामुपवनोद्यानैः श्रीमद्भिर्नंदनादिभिः। कूजद्विहंगमिथुनैर्गायन्मत्तमधुव्रतैः १२ प्रवालफलपु
ष्पोरुभारशाखामरद्रुमैः। हंससारसचक्राह्वकारंडवकुलाकुलाः। नलिन्यो यत्र क्रीडंति प्रमदाः सुरसेविताः १३ आकाशगंग
या देव्या वृतां परिखभूतया। प्राकारेणाग्निवर्णेन साट्टालेनोन्नतेन च १४ रुक्मपट्टकपाटैश्च द्वारैः स्फटिकगोपुरैः। जुष्टां विभक्त
प्रपथां विश्वकर्मविनिर्मितां १५ सभाचत्वररथ्याढ्यां विमानैर्न्यर्बुदैर्युतां। शृंगाटकैर्मणिमयैर्वज्रविद्रुमवेदिभिः ॥ १६ ॥

सि यत्र येषु संति ते रूपवनोद्यानै रम्यामिति पूर्वेणैवान्वयः १३ किंच। परिखभूतया आकाशगंगया वृतां। अट्टालाः प्राकारोपरि
रचितान्युन्नतानि युद्धस्थानानि तत्सहितेन १४ रुक्मपट्टानि कपाटानि येषु तैर्द्वारैः स्फटिकमयैर्गोपुरैर्जुष्टां। विभक्ताः प्रपथाः
राजमार्गा यस्यां १५ सभा उपवेशस्थानानि। चत्वराण्यंगणानि रथ्या उपमार्गाः तैराढ्यां संपन्नां। न्यर्बुदं दशकोट्यः तैर्ग
णनीयैरनंतैर्विमानैर्युतां। वज्रविद्रुममय्यो वेद्यो येषु तैः शृंगाटकैः चतुष्पथैः युतां १६॥ श्रीकृष्णः शरणं मम ३४

नित्यं वयस्तारुण्यं रूपं च सौकुमार्यं यासां ताः। रूपवन्नार्यः स्वलंकृताश्च स्त्रियः यत्र यस्यां भ्राजंते १७ सुरस्त्रीणां केशेभ्यो विभ्रष्टा
नां नवसौगंधिकस्रजां आमोदं १८ हेमगवाक्षेभ्यो निर्गच्छता धूमेन। सुरप्रिया अप्सरसः १९ मुक्तामयैर्वितानैर्मणिहेममयैः केतुभि
श्च ध्वजैः नानापताकायुक्ताभिर्वलभी। भिः विमानानां पुरोभागैः आवृतां यानां वैमानिकस्त्रीणां कलगीतैर्मंगलां २० उप

यत्र नित्यवयोरूपाः श्यामा विरजवाससः। भ्राजंते रूपवन्नार्यो ह्यर्चिर्भिरिव वह्नयः १७ सुरस्त्रीकेशविभ्रष्टन
वसौगंधिकस्रजां। यत्रामोदमुपादाय मार्ग आवाति मारुतः १८ हेमजालाक्षनिर्गच्छद्धूमेनागरुगंधिना। पांडुरेण
प्रतिच्छन्नमार्गे यांति सुरप्रियाः १९ मुक्तावितानैर्मणिहेमकेतुभिर्नानापताकावलभीभिरावृतां। शिखंडिपाराव
तभृंगनादितां वैमानिकस्त्रीकलगीतमंगलां २० मृदंगशंखानकदुंदुभिस्वनैः सतालवीणामुरजर्ष्टिवेणुभिः। नृ
त्यैः सवाद्यैरुपदेवगीतकैर्मनोरमां स्वप्रभया जितप्रभां २१ यां न व्रजंत्यधर्मिष्ठाः खला भूतद्रुहः शठाः। मानिनः
कामिनो लुब्धा एभिर्हीना व्रजंति यत् २२ तां देवधानीं स वरूथिनीपतिर्बहिः समंताद्रुरुधे पृतन्यया। आचार्यद
त्तं जलजं महास्वनं दध्मौ प्रयुंजन्भयमिंद्रयोषितां २३ मघवांस्तमभिप्रेत्य बलेः परममुद्यमं। सर्वदेवगणोपेतो गु
रुमेतदुवाच ह २४ भगवन्नुद्यमो भूयान्बलेर्नः पूर्ववैरिणः। अविषह्यमिमं मन्ये केनासीत्तेजसोर्जितः २५।

देवानां गंधर्वादीनां गीतकैश्च मनोरमां। जिता प्रभा साक्षाद्दीप्त्यधिष्ठात्री देवता यया तां। अन्यैरजितप्रभामिति वा। पाठांतरे
जिताग्रहा स्पर्धा दर्पो यया २१ यत्स्या २२ पृतन्यया सेनया २३।२४ केन हेतुना एवं तेजसा ऊर्जित आसीत् २५

प्रतियोद्धुं अपाकर्तुं २६ यतः कारणादेतस्य ऊर्जः आदि। यतः ऊर्जः आदेः एतस्य समुद्यमः २७ उपभृतं संचितं २८।२९
अष्ट॰ ३५ अत्रो वितिं मंत्रमाह। तस्माद्यूयं त्रिविष्टपमुत्सृज्य निलयमदर्शनं यात। यतः कालात् ३० केनास्य विपर्ययः स्यादित्यत आह। एष

नैनं कश्चित्कुतो वापि प्रतियोद्धुमधीश्वरः। पिबन्निव मुखेनेदं लिहन्निव दिशो दश। दहन्निव दिशो दृग्भिः संवर्त्ताग्निरिवो
त्थितः २६ ब्रूहि कारणमेतस्य दुर्धर्षत्वस्य मद्रिपोः। ओजः सहो बलं तेजो यत एतत्समुद्यमः गुरुरुवाच जानामि
मघवञ्छत्रोरुन्नतेरस्य कारणं। शिष्यायोपभृतं तेजो भृगुभिर्ब्रह्मवादिभिः २८ भवद्विधो भवान्वापि वर्जयित्वेश्वरं ह
रिं। नास्य शक्तः पुरः स्थातुं कृतान्तस्य यथा जनाः २९ तस्मान्निलयमुत्सृज्य यूयं सर्वे त्रिविष्टपं। यात कालं प्रतीक्षन्तो यतः
शत्रोर्विपर्ययः ३० एष विप्रबलोदर्कः संप्रत्यूर्जितविक्रमः। तेषामेवापमानेन सानुबंधो विनंक्ष्यति ३१ एवं सुमंत्रितार्थास्ते ति
गुरुणार्थानुदर्शिना। हित्वा त्रिविष्टपं जग्मुर्गीर्वाणाः कामरूपिणः ३२ देवेष्वथ निलीनेषु बलिर्वैरोचनः पुरीं। देवधानीम
धिष्ठाय वशं निन्ये जगत्त्रयं ३३ तं विश्वजयिनं शिष्यं भृगवः शिष्यवत्सलाः। शतेन हयमेधानामनुव्रतमयाजयन् ३४
ततस्तदनुभावेन भुवनत्रयविश्रुतां। कीर्त्तिं दिक्षु वितन्वानः स रेज उडुराडिव ३५

इति। विप्राणां बलेन उदर्कः उत्तरोत्तरमधिकं फलं यस्य सः ३१ सुमंत्रितः अर्थः कार्यं येषां ते निलयं जग्मुः ३२।३३ एवं प्राप्तमिंद्रप ३५
दं स्थिरीकर्तुं अयाजयन्। अनुव्रतं अनुवर्तिनं ३४।३५.

द्विजदेवे ब्राह्मणे रूपलक्षितेन अपापिनी ३६ इत्यष्टमे पंचदशः षोडशे पुत्रनाशेन शोकं संप्राप्तया अदित्या पतिः प्रार्थितः कश्यपः प्रा
ह पयोव्रतमितीर्यते। इदानीं श्रीवामनावतारप्रसंगमाह। एवमित्यादि यावत्समाप्ति। नष्टेषु अदृष्टेषु सत्सु १।२ स कश्यपः पत्नीं ददर्श ३
दीनवदनत्वादिकमालक्ष्य बहुधा विकल्पयन्पृच्छति। अथ भद्रमिति सप्तभिः। हे भद्रे भद्रं सौः कच्चिदिच्छामनुवर्तते इति तया। मृत्युवशवर्तिनो जन

बुभुजे च श्रियं स्वृद्धां द्विजदेवोपलंभितां। कृतकृत्यमिवात्मानं मन्यमानो महामनाः ३६ इति श्रीभाग॰ अष्ट॰ पंचदशोऽध्यायः ॥
श्रीशुक उवाच एवं पुत्रेषु नष्टेषु देवमातादितिस्तदा। हृते त्रिविष्टपे दैत्यैः पर्यतप्यदनाथवत् १ एकदा कश्यपस्तस्या आश्रमं भगवा
नगात्। निरुत्सवं निरानंदं समाधेर्विरतश्चिरात् २ स पत्नीं दीनवदनां कृतासनपरिग्रहः। सभाजितो यथान्यायमिदमाह कुरूद्वह ३
अप्यभद्रं न विप्राणां भद्रे लोकेऽधुनागतं। न धर्मस्य न लोकस्य मृत्योश्छन्दानुवर्तिनः ४ अपि वाकुशलं किंचिद्गृहेषु गृहमेधिनि
धर्मस्यार्थस्य कामस्य यत्र योगो ह्ययोगिनां ५ अपि वातिथयोऽभ्येत्य कुटुंबासक्तया त्वया। गृहादपूजिता याताः प्रत्युत्था
नेन वा क्वचित् ६ गृहेषु येष्वतिथयो नार्चिताः सलिलैरपि। यदि निर्यांति ते नूनं फेरुराजगृहोपमाः ७ अप्यग्नयस्तु वेला
यां न हुता हविषा सति। त्वयोद्विग्नधिया भद्रे प्रोषिते मयि कर्हिचित् ८ यत्पूजया कामदुघान्याति लोकान्गृहान्वितः। ब्रा
ह्मणोऽग्निश्च वै विष्णोः सर्वदेवात्मनो मुखं ९ अपि सर्वे कुशलिनस्तव पुत्रा मनस्विनि। लक्षयेऽस्वस्थमात्मानं भवत्या लक्ष
णैरिह १०

मृत्योः तस्य ४ हे गृहमेधिनि अपि वा किंचन गृहेषु धर्मादेः किंचिदकुशलमिति काक्वा प्रश्नः यत्र येषु गृहेषु अयोगिनामपि योगः स्वधर्मादिना यो
गफलं भवति ५ किं वा त्वया पूजिता एवाभ्येत्य गृहाद्याताः ६ नार्चिताः अनर्चिताः संतोषादि निर्गच्छंति ते गृहाः फेरुराजः शृगालराजः तद्बि
लतुल्याः ७ वेलायां होमकाले कर्हिचित् न हुताः ८।९ भवत्या आत्मानं मनः अस्वस्थमप्रकृतिस्थं लक्षणैर्मुखम्लान्यादिभिः लक्षयामि
१०

अष्ट· अस्यास्य प्रकारेण मन्यष्टस्त्री तिवक्तुं त्वत्प्रष्टमभद्रादिकं नास्तीत्याह भद्रमिति द्वाभ्यां। इमे गृहाः त्रिवर्गस्य परं क्षेत्रं उद्भवस्थानं। त्रिवर्गो
३६ पि यथावद्वर्तते इत्यर्थः ११ भगवतस्तवानुध्यानं यन्मया क्रियते तस्मात् अग्नयो तिथय इत्यादि सर्वं न रिष्यति न हीयते १२ प्रस्तु
तं विज्ञापयितुमाह। को न्विति। १३ संपाद्यं काममाह। तवैवेति चतुर्भिः १४ सपत्नैर्हृतं श्रीर्येषां। हृतं स्थानं येषामिति पु

अदितिरुवाच भद्रं द्विजगवां ब्रह्मन्धर्मस्यास्य जनस्य च। त्रिवर्गस्य परं क्षेत्रं गृहमेधिन्गृहा इमे ११ अग्नयो तिथयो भृत्या भिक्षवो
ये च लिप्सवः। सर्वं भगवतो ब्रह्मन्ननुध्यानान्न रिष्यति १२ को नु मे भगवन्कामो न संपद्येत मानसः। यस्या भवान्प्रजाध्यक्ष ए
वं धर्मान्प्रभाषते १३ तवैव मारीच मनः शरीरजाः प्रजा इमाः सत्वरजस्तमोजुषः। समो भवांस्तास्वसुरादिषु प्रभो तथापि भक्तं भ
जते महेश्वरः १४ तस्मादीश भजन्त्या मे श्रेयश्चिंतय सुव्रत। हृतश्रियो हृतस्थानान्सपत्नैः पाहि नः प्रभो १५ परैर्विवासिता साहं
मग्ना व्यसनसागरे। ऐश्वर्यं श्रीर्यशः स्थानं हृतानि प्रबलैर्मम १६ यथा तानि पुनः साधो प्रपद्येरन्ममात्मजाः। तथा विधेहि क
ल्याणं धिया कल्याणकृत्तम १७ श्रीशुक उवाच एवमभ्यर्थितो दित्या कस्तामाह स्मयन्निव। अहो मायाबलं विष्णोः स्नेहबद्ध समय
मिदं जगत् १८ क्व देहो भौतिको नात्मा क्व चात्मा प्रकृतेः परः। कस्य के पतिपुत्राद्या मोह एव हि कारणं १९ उपतिष्ठस्व पुरुषं भगवंतं
जनार्दनं। सर्वभूतगुहावासं वासुदेवं जगद्गुरुं २० स विधास्यति ते कामान्हरिर्दीनानुकंपनः। अमोघा भगवद्भक्तिर्नेतरेति मतिर्म
म ॥२१॥

त्रयाभिप्रायेण वचनं १५।१६।१७ कः कश्यपः। प्रथमं तावत्पुत्रस्नेहं त्याजयितुं विस्मयव्याजेन तत्त्वमुपदिशति। अहो इति सा ३६
र्द्धेन १८।१९ अत्रापरितुष्यन्तीं प्रत्याह उपतिष्ठस्वेति द्वाभ्यां २० नन्वेवंभूतकामप्राप्तिहेतुर्देवान्तरसेवा प्रसिद्धा तत्राह। अमोघेति २१

यथा च मे मनोरथं विदध्यात् २२ यथा च मे आशु तुष्यति तथा तत्सेवाप्रकारमादिश २३ मे मया पृष्टः पद्मजो मे यद्ब्रूते तमाह एतन्मे प्रवक्ष्या
मीत्यन्वयः २४ अमले शुक्ले २५ तत्रादौ पूर्वेद्युः कृत्यमाह सिनीवाल्यामित्यादिना ब्रह्मवाक्यं यथा तद्द्वाभ्यामित्यनेन ग्रंथेन। यदि लभ्यते ३०
तर्हि क्रोडविदीर्णया वन्यवराहोत्खातया आलिप्य २६ तत्र मंत्रः त्वं देवीति। हे देवि त्वं वराहेण रसायाः उद्धृतासि २७ निर्वर्तित आत्मनिय

अदितिरुवाच केनाहं विधिना ब्रह्मन्नुपस्थास्ये जगत्पतिं। यथा मे सत्यसंकल्पो विदध्यात्स मनोरथं २२ आदिश त्वं द्वि
जश्रेष्ठ विधिं तदुपधावनं। आशु तुष्यति मे देवः सीदंत्याः सह पुत्रकैः २३ कश्यप उवाच एतन्मे भगवान्पृष्टः प्रजाकामस्य
पद्मजः। यदाह ते प्रवक्ष्यामि व्रतं केशवतोषणं २४ फाल्गुनस्यामले पक्षे द्वादशाहं पयोव्रतः। अर्चयेदरविंदाक्षं भक्त्या परमया
न्वितः २५ सिनीवाल्यां मृदालिप्य स्नायात्क्रोडविदीर्णया। यदि लभ्येत वै स्रोतस्येतं मंत्रमुदीरयेत् २६ त्वं देव्यादि
वराहेण रसायाः स्थानमिच्छता। उद्धृतासि नमस्तुभ्यं पाप्मानं मे प्रणाशय २७ निर्वर्तितात्मनियमो देवमर्चेत्समाहितः
अर्चायां स्थंडिले सूर्ये जले वह्नौ गुरावपि २८ नमस्तुभ्यं भगवते पुरुषाय महीयसे। सर्वभूतनिवासाय वासुदेवाय सा
क्षिणे २९ नमोऽव्यक्ताय सूक्ष्माय प्रधानपुरुषाय च। चतुर्विंशद्गुणज्ञाय गुणसंख्यानहेतवे ३० श्रीरामः शरणं॥

३० मो नित्यनैमित्तिको येन ॥२८॥ तत्रावाहनादौ नवमंत्रानाह। नमस्तुभ्यमिति। पाद्यादौ विशेषतस्तु द्वादशाक्षरं वक्ष्यति
३१८ २९। चतुर्विंशतिगुणास्तत्वानि तानि जानातीति तथा। स एव गुणसंख्यानस्य हेतवे सांख्यप्रवर्तकाय ॥३०॥ श्रीकृष्ण शरणं मम

अष्ट. ३० एवं सामान्यतो नत्वा गुणावतारान् प्रणमति त्रिभिः। तत्रादौ मंत्रो यज्ञरूपेण विष्णोः प्रणामो नम इति। द्वे शीर्षे यस्य। त्रयः पादा यस्य तं तंतवे प्र
काशविस्तारकाय। त्रय्या विद्यया आत्मा यस्य तेन त्रिधा बद्ध इत्यस्यार्थ उक्तः। तथा च मंत्रः चत्वारि शृंगा त्रयो अस्य पादा द्वे शीर्षे सप्त हस्तासो अस्य।
त्रिधा बद्धो वृषभो रोरवीति महो देवो मर्त्याँ आविवेशेति। मार्गमुद्गवदाल्लूनः। मार्गं स्वपास नामार्गमुद् हर्षं गच्छतीति ये ते मार्गमुद्गाः। आत्मयाथा
विघ्नं ते येषां ते मार्गमुद्गवंतः। सदस्मार्य शिष्यास्ते। आ। तत्र देवतारूपेण लूनइव विच्छिन्नः लूनः परिच्छेदेनोपासितः। सोयं प्राज्ञैर्यथायथं।

नमो द्विशीर्ष्णे त्रिपदे चतुःशृंगाय तंतवे। सप्तहस्ताय यज्ञाय त्रयीविद्यात्मने नमः ३१ नमः शिवाय रुद्राय नमः शक्ति
धराय च। सर्वविद्याधिपतये भूतानां पतये नमः ३२ नमो हिरण्यगर्भाय प्राणाय जगदात्मने। योगैश्वर्यशरीराय न
मस्ते योगहेतवे ३३ नमस्त आदिदेवाय साक्षिभूताय ते नमः। नारायणाय ऋषये नराय हरये नमः ३४ नमो मरकत
श्यामवपुषेधिगतश्रिये। केशवाय नमस्तुभ्यं नमस्ते पीतवाससे ३५ त्वं सर्ववरदः पुंसां वरेण्य वरदर्षभ। अतस्ते श्रे
यसे धीराः पादरेणुमुपासते ३६ अन्ववर्तंत यं देवाः श्रीश्च तत्पादपद्मयोः। स्पृहयंत इवामोदं भगवान्मे प्रसीदतां।
३७ एतैर्मंत्रैर्हृषीकेशमावाहनपुरस्कृतं। अर्चयेच्छ्रद्धया युक्तः पाद्योपस्पर्शनादिभिः ॥३८॥

विष्णुस्तु यज्ञरूपेण स्तूयते नेन जलतः। तथा च यास्कः। चत्वारि शृंगेति। एवोक्तः। त्रयो अस्य पादा इति सवनानि त्रीणि। द्वे शीर्षे प्राय
णीयोदयनीये। सप्त हस्ताः सप्त छंदांसि। त्रिधा बद्धो मंत्रब्राह्मणकल्पैः वृषभो रोरवीति। रोरवणं सवनक्रमेण ऋग्भिर्यजुर्भिः सा
मभिर्यदेनमृग्भिः शंसंति। यजुर्भिर्यजंति। सामभिः स्तुवंतीति ३१।३२ प्राणाय सूत्रात्मने। योगैश्वर्यं शरीरं यस्य ३३ अधिगता प्राप्ता ३०
श्रीर्येन तस्मै ३५ तत्पादपद्मयोः आमोदं स्पृहयंतइव देवाः श्रीश्च यमन्ववर्तंत स मे प्रसीदतु ३७ आवाहनेन पुरस्कृतं सम्मानितं ३८

पयसि शृतं पक्वं पायसं मूलविद्यया द्वादशाक्षरेण ४०।४१ पूर्वोक्ताभिरन्याभिश्च स्तुतिभिः ४२ तस्य शेषां निर्माल्यं। द्वौ अन्ये येषां तान्
असंभवे द्वावपि आजपेदित्यर्थः ४३ सभाजितैस्तैरनुज्ञातः सन् शेषं बंधुभिः सहितः। तस्यां रात्र्यां ब्रह्मचारी सन्। श्वोभूते प्रभा

अर्चित्वा गंधमाल्याद्यैः पयसा स्नपयेद्विभुं। वस्त्रोपवीताभरणपाद्योपस्पर्शनैस्ततः। गंधपुष्पादिभिश्चार्चेद्द्वादशाक्ष
रविद्यया ३९ शृतं पयसि नैवेद्यं शाल्यन्नं विभवे सति। ससर्पिः सगुडं दत्वा जुहुयान्मूलविद्यया ४० निवेदितं तद्भक्ताय दद्या
द्भुंजीत वा स्वयं। दत्वाचमनमर्चित्वा तांबूलं च निवेदयेत् ४१ जपेदष्टोत्तरशतं स्तुवीत स्तुतिभिः प्रभुं। कृत्वा प्रदक्षिणं भूमौ प्र
णमेद्दंडवन्मुदा ४२ कृत्वा शिरसि तच्छेषां देवमुद्वासयेत्ततः। द्व्यवरान्भोजयेद्विप्रान्पायसेन यथोचितं ४३ भुंजीत तैरनुज्ञा
तः शेषं सेष्टः समाहितः। ब्रह्मचार्यथ तद्रात्र्यां श्वोभूते प्रथमेहनि ४४ स्नातः शुचिर्यथोक्तेन विधिना सुसमाहितः। पय
सा स्नापयित्वार्चेद्यावद्व्रतसमापनं ४५ पयोभक्षो व्रतमिदं चरेद्विष्णवर्चनादृतः। पूर्ववज्जुहुयादग्निं ब्राह्मणांश्चापि भोज
येत् ४६ एवं त्वहरहः कुर्याद्द्वादशाहं पयोव्रतः। हरेराराधनं होमम् अर्हणं द्विजतर्पणं ४७ प्रतिपद्दिनमारभ्य यावच्छुक्लत्रयो
दशी। ब्रह्मचर्यमधः स्वप्नं स्नानं त्रिषवणं चरेत् ४८ वर्जयेदसदालापं भोगानुच्चावचांस्तथा। अहिंस्रः सर्वभूतानां वासु
देवपरायणः ४९ त्रयोदश्यामथो विष्णोः स्नपनं पंचकैर्विभोः। कारयेच्छास्त्रदृष्टेन विधिना विधिकोविदैः ५० पूजां च
महतीं कुर्याद्वित्तशाठ्यविवर्जितः। चरुं निरूप्य पयसि शिपिविष्टाय विष्णवे ५१ शृतेन तेन पुरुषं यजेत सुसमाहितः। नै
वेद्यं चातिगुणवद्दद्यात्पुरुषतुष्टिदं ५२
तैः सति ४४।४५ पय एव भक्ष्यं आहारो यस्य ४७ अधः स्वप्नं शयनं ४८।४९ पंचकैः पंचामृतैः ५०।५१।५२॥ ॥

आचार्यंज्ञानसंपन्नंवस्त्राभरणधेनुभिः। तोषयेदृत्विजश्चैवतद्विद्ध्याराधनंहरेः॥ ५३ भोजयेत्तान्गुणवतासदन्नेनशुचिस्मिते। अन्यांश्चब्राह्मणान्शक्त्यायेचतत्रसमागताः ५४ दक्षिणांगुरवेदद्यादृत्विग्भ्यश्चयथार्हतः। अन्नाद्येनाश्वपाकांश्चप्रीणयेत्समुपागतान् ५५ भुक्तवत्सुचसर्वेषुदीनांधकृपणेषुच। विष्णोस्तत्प्रीणनंविद्वान्भुंजीतसहबंधुभिः ५६ नृत्यवादित्रगीतैश्चस्तुतिभिःस्वस्तिवाचनैः। कारयेत्तत्कथाभिश्चपूजांभगवतोन्वहं ५७ एतत्पयोव्रतंनामपुरुषाराधनंपरं। पितामहेनाभिहितंमयातेसमुदाहृतं ५८ त्वंचानेनमहाभागेसम्यक्चीर्णेनकेशवं। आत्मनाशुद्धभावेननियतात्माभजाव्ययं ५९ अयंवैसर्वयज्ञाख्यःसर्वव्रतमितिस्मृतं। तपःसारमिदंभद्रेदानंचेश्वरतर्पणं ६० तएवनियमाःसाक्षात्तएवचयमोत्तमाः। तपोदानंव्रतंयज्ञोयेनतुष्यत्यधोक्षजः ६१ तस्मादेतद्व्रतंभद्रेप्रयताश्रद्धयाचर। भगवान्परितुष्टस्तेवरानाशुविधास्यति ६२ इतिश्रीभाग० अष्टमस्कंधेषोडशोध्यायः श्रीशुकउवाच॥ इत्युक्तासादितीराजन्स्वभर्त्राकश्यपेनवै। अन्वतिष्ठद्व्रतमिदंद्वादशाहमतंद्रिता १ चिंतयंत्येकयाबुध्यामहापुरुषमीश्वरं। प्रगृह्येंद्रियदुष्टाश्वान्मनसाबुद्धिसारथिः २ मनश्चैकाग्रयाबुध्याभगवत्यखिलात्मनि। वासुदेवेसमाधायचचारहपयोव्रतं ३ तस्याःप्रादुरभूत्तात भगवानादिपूरुषः॥ पीतवासाश्चतुर्बाहुःशंखचक्रगदाधरः॥४॥ श्रीः ३८

ततःसप्तदशेऽदित्याकृतेतस्मिन्व्रतेहरिः॥ तत्कामपूरणायादौतत्पुत्रात्मादितीर्यते ॥१॥ श्रीकृष्णःशरणंमम

प्रीतिविद्ध्कृत्वाश्वसाबद्धांजलिःसतीस्थिताकिंवक्ष्यईडितुंपुनर्नोत्सेहेनशशाक। अपितुतूष्णींबभूव। कथंभूता आनंदजलैराकुलेईक्षणेयस्याः। पुलकैराकुला आकृतिर्देहोयस्याः। तस्यदर्शनेनयोऽत्युत्सवःतेनगात्रेवेपथुःकंपोयस्याः ६ तुष्टावपिबंतीवोद्वीक्षमाणेतिक्रियाभेदाभेदस्यास्यादृक्तिरदोषः ७ अयत्नतोविनिर्जित्यदैत्यान्स्वर्गमपिभक्तान्रक्षितुमीश्वरत्वमित्यस्योदितिस्त्रिभिः। यज्ञेशेत्यादिदशभिःसंबोधनैस्तवाशक्यंकिमपिनास्तीतिवदंतीप्रार्थयते। शंनःकृधिकुरु। यतोदीनानांनाथोसित्वं। तीर्थश्रवःकीर्तिर्यस्य श्रव ३८

तंनेत्रगोचरंवीक्ष्यसहसोत्थायसादरं। ननामभुविकायेनदंडवत्प्रीतिविह्वला ५ सोत्थायबद्धांजलिरीडितुंस्थितानोत्सेहआनंदजलाकुलेक्षणा। बभूवतूष्णींपुलकाकुलाकृतिस्तद्दर्शनात्युत्सवगात्रवेपथुः ६ प्रीत्याशनैर्गद्गदयागिराहरिंतुष्टावसादेवदितिःकुरूद्वह। उद्वीक्षतीसापिबतीवचक्षुषारमापतिंयज्ञपतिंजगत्पतिं ७ अदितिरुवाच यज्ञेशयज्ञपुरुषाच्युततीर्थपादश्रवःतीर्थश्रवणमंगलनामधेय। आपन्नलोकवृजिनोपशमोदयाद्यशंनःकृधीशभगवन्नसिदीननाथः ८ विश्वायविश्वभवनस्थितिसंयमायस्वैरंगृहीतपुरुशक्तिगुणायभूम्ने। स्वस्थायशश्वदुपबृंहितपूर्णबोधव्यापादितात्मतमसेहरयेनमस्ते ९ आयुःपरंवपुरभीष्टमतुल्यलक्ष्मीर्द्योभूरसाःसकलयोगगुणास्त्रिवर्गः। ज्ञानंचकेवलमनंतभवंतितुष्टात्वत्तोनृणांकिमुसपत्नजयादिराशीः १०

णमेवमंगलंयस्यतन्नामधेयंयस्य। आपन्नानांशरणंगतानांलोकानांवृजिनोपशमाय उदयस्य ८ भूम्नेमहतेनमः। महत्वेहेतवः विश्वायविश्वस्यभवनस्थितिसंयमार्थंस्वैरंगृहीताःपुरुशक्तयोमायागुणायेनतस्मै। तथापिस्वस्थाय आयुतत्वरूपायकृतःशश्वदुपबृंहितः। नित्योदितोयःपूर्णबोधस्तेनव्यापादितंनिरस्तमात्मनितमोमायालक्षणंयेनतस्मै ९ आसदीपमनोरथपूरणमीषत्करमेवत्वत्तोवृकैस्त्वित्याहनाह। ते
३८

अष्ट० आयुः परं ब्रह्मायुः पुनरपि द्यौश्च भूश्च रसातलं च द्यौर्भूरसाः द्यौरिति एथ क्पाठे भूश्च रसाश्च बिलस्वर्गा इति विग्रहः। रसेति पाठे श्री
३९ णि पदानि। सकलाश्च योगगुणा अणिमादयः १० क्षेत्रज्ञः अंतर्यामी ११ सपत्नैर्हृता श्रीर्येषां स्वधाम च तः च्याविता नां स्वपुत्राणां सर्व
धियत्व जकवस्याश्च रमा काङ्क्षितं मया विज्ञातं १२ कांक्षितमेवाह तानिति त्रिभिः प्रतिलब्धो जयश्च श्रीश्च येस्तैः पुत्रैः सह उपासितुं

श्रीशुक उवाच अदित्यैवं स्तुतो राजन् भगवान्पुष्करेक्षणः। क्षेत्रज्ञः सर्वभूतानामिति होवाच भारत ११ श्रीभगवानुवाच
देवमातर्भवत्या मे विज्ञातं चिरकाङ्क्षितं। यत्सपत्नैर्हृतश्रीणां च्यावितानां स्वधामतः १२ तान्विनिर्जित्य समरे दुर्मदानसुरर्षभान् नि
त्यप्रतिलब्धजयश्रीभिः पुत्रैरिच्छस्युपासितुं १३ इन्द्रज्येष्ठैः स्वतनयैर्हतानां युधि विद्विषां। स्त्रियो रुदंतीरासाद्य द्रष्टुमिच्छसि
दुःखिताः १४ आत्मजान्सुसमृद्धांस्त्वं प्रत्याहृतयशःश्रियः। नाकपृष्ठमधिष्ठाय क्रीडतो द्रष्टुमिच्छसि १५ प्रायोऽधुना तेऽ
सुरयूथनाथा अपारणीया इति देवि मे मतिः। यत्तेऽनुकूलेश्वरविप्रगुप्ता न विक्रमस्तत्र सुखं ददाति १६ अथाप्युपायो मम देवि
चिन्त्यः संतोषितस्य व्रतचर्यया ते। ममार्चनं नार्हति गंतुमन्यथा श्रद्धानुरूपं फलहेतुकत्वात् १७ त्वयार्चितश्चाहमपत्यगुप्तये पयो
व्रतेनानुगुणं समीडितः। स्वांशेन पुत्रत्वमुपेत्य ते सुतान्गोप्तास्मि मारीचतपस्यधिष्ठितः १८ उपाधाव पतिं भद्रे प्रजा
पतिमकल्मषं। मां च भावयती पत्यावेवंरूपमवस्थितं १९

कत्त्वस्थातुमिच्छसि १३।१४ प्रत्याहृतं यशश्च श्रीश्च यैस्तान्। १५ अपारणीयाः यतः यस्मात् अनुकूल ईश्वरः कालो येषां ते विप्रैः गुप्ता रक्षिताः।
अनुकूलेश्वरैः समर्थैः विप्रैः गुप्ता इति वा १६ मम मया चिंत्य एव। तत्र हेतुः संतोषितस्येत्यादि। श्रद्धानुरूपं इच्छानुसारेण फलहेतुत्वात् ३९
१७ मारीचस्य तपसि अधिष्ठाय स्थितः सन् गोप्तास्मि पालयिष्यामि ॥१८॥ अतः पतिमुपाधाव भजस्व ॥१९॥ श्रीकृष्ण

देवानां गुह्यं रहस्यं सर्वं सुसंवृतं सुसंगुप्तं सत् संपद्यते सिद्ध्यति २० प्रभोः हरेरात्मनि जन्म लब्ध्वा २१ अवितथमीक्षणं दृष्टि
र्यस्य सः २२ अनिलो यथा स्वचं(?) त्रसमोऽपि रुद्धोऽग्निः संघर्षेण च दाहकमग्निमाधत्ते। एवं स्वयं पुत्रेषु समोऽपि दैत्यक्षपणं वीर्यमाधत्ते
सर्थः २३ धिष्ठितं अधिष्ठाय स्थितं समीडत् तुष्टाव इत्यर्थः २४।२५ अदितेरेव पूर्वस्मिन् जन्म निष्ठा श्रीरिति नाम तस्याः गर्भेऽपि अर्भ
काय। वेदा गर्भे यस्य। यद्वा वेदानां गर्भाय वेदेषु प्रकाशमानायेत्यर्थः। त्रयो लोका नाभौ यस्य सः त्रिनाभः तस्मै त्रयाणां लोकानां पृष्ठे

नैतत्परस्मा आख्येयं पृष्टयापि कथंचन। सर्वं संपद्यते देवि देवगुह्यं सुसंवृतं २० श्रीशुक उवाच एतावदुक्त्वा भगवांस्तत्रैवां
तरधीयत। अदितिर्दुर्लभं लब्ध्वा हरेर्जन्मात्मनि प्रभोः २१ उपाधावत्पतिं भक्त्या परया कृतकृत्यवत् २१ स वै समाधियोगेन कश्यप
स्तदबुध्यत। प्रविष्टमात्मनि हरेरंशं ह्यवितथेक्षणः २२ सोऽदित्यां वीर्यमाधत्त तपसा चिरसंभृतं। समाहितमना राजन्दारुण्यग्निं यथा
ऽनिलः २३ अदितेर्धिष्ठितं गर्भं भगवंतं सनातनं। हिरण्यगर्भो विज्ञाय समीडे गुह्यनामभिः २४ ब्रह्मोवाच जयोरुगाय
भगवन्नुरुक्रम नमोऽस्तु ते। नमो ब्रह्मण्यदेवाय त्रिगुणाय नमो नमः २५ नमस्ते पृश्निगर्भाय वेदगर्भाय वेधसे। त्रिनाभाय त्रिपृष्ठ
ाय शिपिविष्टाय विष्णवे २६ त्वमादिरन्तो भुवनस्य मध्यमनंतशक्तिं पुरुषं यमाहुः। कालो भवानाक्षिपतीश विश्वं स्रोतो यथांतः
पतितं गभीरं २७ त्वं वै प्रजानां स्थिरजंगमानां प्रजापतीनामसि संभविष्णुः। दिवौकसां देव दिवश्च्युतानां परायणं नौरिव मज्जतो
ऽसि २८ इति श्रीभाग० अष्टमस्कंधे सप्तदशोऽध्यायः॥

स्वर्गाख्यानि त्रीणि पृष्ठानि यस्य तस्मै। शिपिविष्टाय पशवो वै शिपिविष्टाः तेषु अंतर्यामितया प्रविष्टाय। यज्ञो वै विष्णुः पशवः शिपिर्यज्ञ एव पशुषु प्रतितिष्ठतीति श्रुतेः। यद्वा। शिपयो
रश्मयस्तैर्विष्टाय व्याप्तायेत्यर्थः। तथापि विष्णवे व्यापिने २६ अंतःपतितं तृणादि यथा गभीरः स्रोतः आक्षिपति आकर्षति तथा कालात्मा भवा
न्विश्वमाक्षिपति २७ संभविष्णुः उत्पादनशीलोऽसि अयं भावः नह्येतावत्त्वस्य तव जन्मादिसंभवः। किंतु देवानां प्रजापतीनां प्रजा
नां परमाश्रयः लनत्वं(?) कार्यसाधनाय अवतारोऽयं। अतः पोत इव स्वर्गच्युतान्पुनः स्वर्गे स्थापयिष्यति २८ ॥इत्यष्टमे सप्तदशः॥ ॥

५०

५०

दुष्टुवुर्मुनयो देवा मनवः पितरोऽग्नयः ॥ ८ ॥ सिद्धविद्याधरगणाः सकिंपुरुषकिन्नराः ॥ चारणा यक्षरक्षांसि सुपर्णा भुजगोत्तमाः ॥ ९ गायंतोऽपि प्रशंसंतो नृत्यंतो विबुधानुगाः

भा० अ० तत्प्रादुर्भावसमयमाह श्रोणायामिति। भाद्रपदशुक्लद्वादशी श्रवणद्वादशीति प्रसिद्धा। तस्यां तत्रापि श्रोणायां श्र

५१ वणर्क्षे वर्तमानेत्यर्थः। तत्रापि श्रवणर्क्षस्य प्रथमांशे अभिजितिति नक्षत्रे। तच्च श्रुत्या दर्शितं। अभिजिन्नाम नक्षत्रं उप

रि ~~षेणांत्के स्वर्णस्य~~ ष्टादाषाढानां अधस्ताच्छ्रोणाया इति। एवंविशिष्टे मुहूर्ते प्रभुः प्रादुर्बभूवेत्यर्थः। किंच। नक्ष

श्रोणायां श्रवणद्वादश्यां मुहूर्तेऽभिजिति प्रभुः सर्वे नक्षत्रताराद्याश्चक्रुस्तज्जन्म दक्षिणं ५ द्वादश्यां सवि

तातिष्ठन्मध्यंदिनगतो नृप विजया नाम सा प्रोक्ता यस्यां जन्म विदुर्हरेः ६ शंखदुंदुभयो नेदुर्मृदंगपण

वानकाः चित्रवादित्रतूर्याणां निर्घोषस्तुमुलोऽभवत् ७ प्रीताश्चाप्सरसोऽनृत्यन् गंधर्वप्रवरा जगुः आदि

त्या आश्रमपदं कुसुमैः समवाकिरन् ९ दृष्ट्वादितिस्तं निजगर्भसंभवं परं पुमांसं मुदमाप विस्मिता।

गृहीतदेहं निजयोगमायया प्रजापतिश्चाह जयेति विस्मितः १० यत्तद्वपुर्भाति विभूषणायुधैरव्यक्तचि

दव्यक्तमधारयद्धरिः बभूव तेनैव स वामनो वटुः संपश्यतो दिव्यगतिर्यथा नटः ११ राम ५१

त्राणप्रश्विन्यादीनि। ताराशब्देन ताराग्रहा गुरुशुक्रादयः ते आद्या येषां ते सूर्यादयोऽपि सर्वे तस्य जन्म दक्षिणं उ

दारं चक्रुः। जन्ममुहूर्ते गुणा बहवो बभूवुरित्यर्थः ५ विशेषांतरमाह। यस्यां द्वादश्यां हरेर्जन्म तत् तस्यां महत्त्वे

वविदुः तदा च मध्यंदिनगतः सविता तिष्ठन् सा च द्वादशी विजया नाम प्रोक्तेत्यन्वयः ६ शंखादयो येषां अन्ये

षां च चित्रतूर्याणां निर्घोषोऽभवत् ७ देवा मनवः इत्यादीनां कुसुमैः समवाकिरन्निति तृतीयेणान्वयः ८० १२

ततस्त्वष्टादशे भूत्वा वामनः सत्कृतो खिलैः। यज्ञं गतस्तत्स्तेन सत्कृत्योक्तो वरान् वृणु १ इत्थं विरिंच्येन स्तुतं कर्म
वदेवकार्यलक्षणं वीर्यं च प्रभवो यस्य स हरिरदित्यां प्रादुर्बभूवेति त्रयाणामन्वयः। अमृतभूः मृत्युजन्मशून्यः। शं
खगदाब्जचक्राणि यस्य संतीति तथा। अर्थ आदित्वेन मत्वर्थीयो अनुप्रत्ययः। अविसर्गपाठे स चासौ पीतवासाश्च १

श्रीशुक उवाच इत्थं विरिंच्यस्तुतकर्मवीर्यः प्रादुर्बभूवामृतभूरदित्यां चतुर्भुजः शंखगदाब्जचक्रः पिशं
गवासा नलिनायतेक्षणः १ श्यामावदातो झषराजकुंडलत्विषोल्लसच्छ्रीवदनांबुजः पुमान् श्रीवत्सव
क्षा वलयांगदोल्लसत्किरीटकांचीगुणचारुनूपुरः २ मधुव्रतव्रातविघुष्टया स्वया विराजितः श्रीवनमा
लया हरिः प्रजापतेर्वेश्म तमः स्वरोचिषा विनाशयन् कंठनिविष्टकौस्तुभः ३ दिशः प्रसेदुः सलिलाश
यास्तदा प्रजाः प्रहृष्टा ऋतवो गुणान्विताः द्यौरंतरिक्षं क्षितिरग्निजिह्वा गावो द्विजाः संजहृषुर्नगाश्च ४

झषराजो मकरः तदाकारयोः कुंडलयोस्त्विषा उल्लसंती श्रीर्वदनांबुजे यस्य। श्रीवत्सो वक्षसि यस्य। वलयैरंगदैश्च
सहोल्लसंति किरीटादीनि यस्य २ श्रीमत्या वनमालया विराजितः। वेश्मगतं तमः ३ अग्निजिह्वा देवाः। न
गाः पर्वताः ४

विस्मयांतरमाह। यत्तदिति। यद्वपुर्हरिर्दधार यत्प्रकटितवान्। तेन वपुषा मातापित्रोः संपश्यतोरेव वामनो बटुर्बभूव
दिव्यगतिः अद्भुतचेष्टितः स्वयं कथंभूतः अव्यक्तचिद्रूपः। कथमधारयत्। भातीति विभूषणानि च आयुधानि च तैर्व्यक्तो यथा
भवति तथा १२ कर्माणि जातकर्मादीनि १३। १४ वनस्पतिः वनानां पतिः सोमः १५। १६। पात्रिकां भिक्षापात्रीं ॥ १७

तं वटुं वामनं दृष्ट्वा मोदमाना महर्षयः। कर्माणि कारयामासुः पुरस्कृत्य प्रजापतिं १३ तस्योपनीयमानस्य सा
वित्रीं सविताब्रवीत्। बृहस्पतिर्ब्रह्मसूत्रं मेखलां कश्यपोऽददात् १४ ददौ कृष्णाजिनं भूमिर्दंडं सोमो वनस्पतिः॥
कौपीनाच्छादनं माता द्यौश्छत्रं जगतः पतेः १५ कमंडलुं वेदगर्भः कुशान् सप्तर्षयो ददुः। अक्षमालां महाराज सरस्वत्य
व्ययात्मनः १६ तस्मा इत्युपनीताय यक्षराट् पात्रिकामदात्। भिक्षां भगवती साक्षादुमादादंबिका सती १७ स ब्र
ह्मवर्चसेनैवं सभां संभावितो बटुः। ब्रह्मर्षिगणसंजुष्टामत्यरोचत मारिषः १८ समिद्धमाहितं वह्निं कृत्वा प
रिसमूहनं। परिस्तीर्य समभ्यर्च्य समिद्भिरजुहोद्द्विजः १९ श्रुत्वाश्वमेधैर्यजमानमूर्जितं बलिं भृगूणामुप
कल्पितैस्ततः। जगाम तत्राखिलसारसंभृतो भारेण गां संनमयन्पदे पदे २० तं नर्मदायास्तट उत्तरे बले
र्य ऋत्विजस्ते भृगुकच्छसंज्ञके॥ प्रवर्तयंतो भृगवः क्रतूत्तमं व्यचक्षतारादुदितं यथा रविं॥ २१ श्रीराम

सएवं संभावितो मारिषः श्रेष्ठो बटुर्ब्रह्मवर्चसेन ब्रह्मर्षिगणसंजुष्टां तां सभामतिक्रम्यारोचत। १८। १९ यदर्थं बटुर्बभूव तदाह श्रुत्वे
त्यादि यावत्समाप्ति। यजमानं यजंतं भृगूणां भृगुभिः उपकल्पितैः प्रवर्तितैः अखिलेन सारेण संभृतः संपूर्णः २० नर्मदाया बलेन
उत्तरे तटे भृगुकच्छसंज्ञके क्षेत्रे क्रतूत्तमं प्रवर्तयंतो ये बलेः ऋत्विजः भृगवः तेतं व्यचक्षत अपश्यन् आरात्समीपे उदितं रविमिव २१

अष्ट·
४२

तेजः त्विषा दर्शयैः सूर्यः किल सोमादिरयं तर्कयन्निति शेषः २२ हयमेधवाटं अश्वमेधमंडपं विवेश २३ उपवीताजिनं उपवीतवद्धृतमजिनं मेखलात्तरीयं यस्य २४ संक्षिप्ताः अभिभूताः संतः २५ रूपस्यानुरूपा अवयवा य

तं कलिजाम्पतमानाः सदस्या हतत्विषो वामनतेजसा नृप। सूर्यः किलायात्युत वा विभावसुः सनत्कुमारोऽथ दिदृक्षया क्रतोः २२ इत्थं सशिष्येषु भृगुष्वनेकधा वितर्क्यमाणो भगवान्स वामनः। छत्रं सदंडं सजलं कमंडलुं विवेश बिभ्रद्धयमेधवाटं २३ मौंज्या मेखलया वीतमुपवीताजिनोत्तरं। जटिलं वामनं विप्रं मायामाणवकं हरिं २४ प्रविष्टं वीक्ष्य भृगवः सशिष्यास्ते सहाग्निभिः। प्रत्यगृह्णन्समुत्थाय संक्षिप्तास्तस्य तेजसा २५ यजमानः प्रमुदितो दर्शनीयं मनोरमं। रूपानुरूपावयवं तस्मा आसनमाहरत् २६ स्वागतेनाभिनंद्याथ पादौ भगवतो बलिः। अवनिज्यार्चयामास मुक्तसंगमनोरमं २७ तत्पादशौचं जनकल्मषापहं स धर्मविन्मूर्ध्न्यदधात्सुमंगलं। यद्देवदेवो गिरिशश्चंद्रमौलिर्दधार मूर्ध्ना परया च भक्त्या २८ बलिरुवाच स्वागतं ते नमस्तुभ्यं ब्रह्मन्किं करवाम ते। ब्रह्मर्षीणां तपः साक्षान्मन्ये त्वार्य वपुर्धरं २९

यतं दृष्ट्वेति शेषः २६। २७ चंद्रमौलिश्चेत्यन्वयः। अप्यर्थे चकारः चंद्रमौलिरपि गंगारूपं यत्मूर्ध्ना दधारेत्यर्थः ४२
२८ हे आर्य त्वां साक्षान्मन्ये किं ब्रह्मर्षीणां तपः वमन्ये कथंभूतं तपः वपुर्द्धरं मूर्तिधारि २९॥ ॥

३० त्वच्चरणावनेजनैर्वार्भिः हे ईशत्तम अंहो यस्य तस्य मे पुनीता पवित्रीकृता ३१ मे मत्तः प्रतीच्छ गृहाण। हे अर्हत्तम पूज्यतम ३२ इत्यष्टमेऽष्टादशः ॥ उनविंशे तु हरिणा याचितेन पदत्रये। प्रतिश्रुते च बलिना जानन्नपि गुरुर्वारयत् १ दातुः कृतिः स्वयं तुष्टिरित्यादि प्रकृतो वित्तां वक्तव्यमिति भिक्षुं कृतशिक्षयन्नाह वामनः १ वचस्तवैत

अद्य नः पितरस्तृप्ता अद्य नः पावितं कुलं अद्य स्विष्टः क्रतुरयं यद्भवानागतो गृहान् ३० अद्याग्नयो मे सुहुता यथाविधि द्विजात्मज त्वच्चरणावनेजनैः हतांहसो वार्भिरियं च भूरहो तथा पुनीता तनुभिः पदैस्तव ३१ यद्यद्वटो वांछसि तत्प्रतीच्छ मे त्वामर्थिनं विप्रसुतानुतर्कये गां कांचनं गुणवद्धाम मृष्टं तथान्नपेयमुत वा विप्रकन्यां ग्रामान्समृद्धांस्तुरगान्गजान्वा रथांस्तथार्हत्तम संप्रतीच्छ ३२ इति श्रीभागवते महापुराणेऽष्टमस्कंधे बलिवामनसंवादेऽष्टादशोऽध्यायः श्रीशुक उवाच इति वैरोचनेर्वाक्यं धर्मयुक्तं स सूनृतं निशम्य भगवान्प्रीतः प्रतिनंद्येदमब्रवीत् १ श्रीभगवानुवाच वचस्तवैतन्नरदेव शोभनं कुलोचितं धर्मयुतं यशस्करं यस्य प्रमाणं भृगवः सांपराये पितामहः कुलवृद्धः प्रशांतः २ न ह्येतस्मिन्कुले कश्चिन्निःसत्वः कृपणः पुमान् प्रत्याख्याता प्रतिश्रुत्य यो वादाता द्विजातये ३

दितिषोडशभिः। हे जनदेव। सांपराये पारलौकिके धर्मे पितामहः प्रल्हादः प्रमाणं २ निःसत्वस्य लक्षणं। यो द्विजातये याचकाय प्रत्याख्याता न ददामीति वक्ता। कृपणस्य लक्षणं। प्रथमं प्रतिश्रुत्य यो वा न दातेति ३

भा० अ० तीर्थदानावसरेयस्मिन्युष्मत्कुले ४ यतःयस्मिन्कुलेजातः ५ क्ष्मोद्धारेभूम्याउद्धरणे ६ ७ ८ परागृशः
४३ बहिर्दृष्टेः ९ अतोहृदयेस्थितंमांनज्ञास्यतीत्येवंनिश्चित्यश्वासानिलेंऽतर्हितःसूक्ष्मोदेहोयस्य।विविशेत्यम

नसंतितीर्थेयुधिवार्थिनार्थिताःपराङ्मुखायेत्वमनस्विनोनृपाः युष्मत्कुलेयद्यशसामलेनप्रह्लादउ
द्भातियथोडुपःखे ४ यतोजातोहिरण्याक्षश्चरन्नेकइमांमहीं प्रतिवीरंदिग्विजयेनाविंदतगदायुधः
५ यंविनिर्जित्यकृच्छ्रेणविष्णुःक्ष्मोद्धारआगतं नात्मानंजयिनंमेनेतद्वीर्यंभूर्यनुस्मरन् ६ निशम्यत
द्वधंभ्राताहिरण्यकशिपुःपुरा हंतुंभ्रातृहणंक्रुद्धोजगामनिलयंहरेः ७ तमायांतंसमालोक्यशूल
पाणिंकृतांतवत् चिंतयामासकालज्ञोविष्णुर्मायाविनांवरः ८ यतोयतोहंतत्रासौमृत्युःप्राणभृ
तामिव अतोहमस्यहृदयंप्रवेक्ष्यामिपरागृशः ९ एवंसनिश्चित्यरिपोःशरीरमाधावतोनिर्विविशे
ऽसुरेंद्र श्वासानिलांतर्हितसूक्ष्मदेहस्तत्प्राणरंध्रेणविविग्नचेताः १० सतन्निकेतंपरिमृश्यशून्य
मपश्यमानःकुपितोननाद क्ष्मांद्यांदिशःखंविवरान्समुद्रान्विष्णुंविचिन्वन्नददर्शवीरः ११ अपश्य राम
न्नितिहोवाचमयान्विष्टमिदंजगत् भ्रातृहामेगतोनूनंयतोनावर्ततेपुमान् १२ ४३

तिकंपितंचेतोयस्य।अनुकंपितमितिवासम्बोर्थः १० नददर्शअंतःप्रविष्टत्वात् ११ पुमान्यतःसकाशा
न्नावर्ततेतद्ब्रह्मैवनूनंगतःनित्यमुक्तत्वादितिवासम्बोऽर्थः।एवंमृत्युपर्यंतमखंडंविष्णोर्वैरंयत्तत्कृतवान्तदुचि
तमेवतस्याप्रतिद्वंद्वमहाबलपराक्रमस्यश्रीरोहंमानविजृंभितक्रोधानुबंधस्य १२

कथंनामासोसुरशिरोमणिःजीवन्नेवकातरवद्वैरमुपेक्षितवानित्याशंक्याह।वैरानुबंधएतावानामृत्योर्भवतिदे
हिनांदेहनिरूढाभिमानवतांशूराणां।तथाअहंमानेनोपबृंहितोमन्युश्चभवत्येव।यतोअज्ञानप्रभवःअज्ञान
निवृत्तेःप्राक्पौरुषत्यागोमांद्यमेवेत्यर्थः १२ तदेवंपूर्वजान्दस्युत्वात्पितरंस्तौतिपितेति।द्विजवेषधारिणेम

॥वैरानुबंधएतावानामृत्योरिहदेहिनां।अज्ञानप्रभवोमन्युरहंमानोपबृंहितः १३
॥पिताप्रह्लादपुत्रस्तेतद्विद्वान्द्विजवत्सलः।स्वमायुर्द्विजलिंगेभ्योदेवेभ्योदात्सयाचितः १४
॥भवानन्यतरितान्धर्मानास्थितोगृहमेधिभिः।ब्राह्मणैःपूर्वजैःशूरैरन्यैश्चोद्दामकीर्तिभिः १५
तस्मात्त्वत्तोमहीमीषद्वृणेहंवरदर्षभात्।पदानित्रीणिदैत्येंद्रसंमितानिपदामम १६
नान्यत्तेकामयेराजन्वदान्याज्जगदीश्वरात्।नैनःप्राप्नोतिवैविद्वान्यावदर्थप्रतिग्रहः १७

देवेभ्योदत्वाएतेनतुद्विजाइतितद्विद्वानपिस्वयाचितःसन्स्वीयमायुर्देवेभ्योददौ १४।१५ ममपदासंमितानीतित्रि
विक्रमपदाभिप्रायेण नचान्ततोवादःतत्रापिस्वपदत्वानपगमात् १६ यावदर्थमेवप्रतिग्रहोयस्यसः १७॥ ॥

अष्ट॰ ४४ ईश्वरस्यापि याच्ञाकारणप्रकारं वोक्ता बलेर्बंधनप्रसंगस्योत्तरलेन तस्य गर्वातिरेकेणाधिक्षेपप्रकारमाह। अहो इति
त्रिभिः। ते वाचो वृद्धानां संमताः। त्वं तु बालः बालिशमतिश्च। बालिशानामज्ञानामिव मतिर्यस्य अत एव स्वार्थं प्रति य
थावदबुधः। वस्तुतस्तु बाल इव अबालिशमतिश्चेति छेदः। स्वार्थं प्रति अबुध इति भक्तानामेवार्थं बुध्यसे। परिपूर्ण

बलिरुवाच अहो ब्राह्मणदायाद वाचस्ते वृद्धसंमताः। त्वं बालो बालिशमतिः स्वार्थं प्रत्यबुधो
यथा १८ मां वचोभिः समाराध्य लोकानामेकमीश्वरं। पदत्रयं वृणीते योऽबुद्धिमान्द्वीपदाशुषं १९
न पुमान्मामुपव्रज्य भूयो याचितुमर्हति। तस्माद्वृत्तिकरीं भूमिं बटो कामं प्रतीच्छ मे
२० श्रीभगवानुवाच. यावंतो विषयाः प्रेष्ठास्त्रिलोक्यामजितेंद्रियं। न शक्नुवंति ते सर्वे प्रतिपूरयितुं
नृप २१ त्रिभिः क्रमैरसंतुष्टो द्वीपेनापि न पूर्यते। नववर्षसमेतेन सप्तद्वीपवरेच्छया॥ २२॥ श्रीः

स्यात्तदा द्व्यतिरेकेण स्वार्थाभावादित्यर्थः १८ अबुधत्वमेवाह मां मामिति। द्वीपस्य दाशुषं दातारं। अबुद्धिमान्वस्तु
तस्तु बुद्धिमानित्येव छेदः १९ कामं यथेष्टं सम्यक्पादप्रसारणेनेत्यर्थः अत एव तथा करिष्यति २० पुनरपि निस्पृह ४४
त्वमेवाविःकुर्वन्नाह। यावंत इति सप्तभिः २१ नववर्षसमेतेन द्वीपेनापि सप्तानां द्वीपवराणामिच्छया॥ २२॥ ॥

तृष्णाया अंतं न गता इत्यस्माभिः श्रुतं २३ असंतुष्टस्त्रिभिर्लोकैर्न सुखं वर्तते २५ आशुशुक्षणि
रग्निः २६ सिद्धोहं कृतार्थः। एतावतैव सर्वस्वापहारसिद्धेरिति गूढोभिप्रायः। तदेवाह। वित्तं हि यावत्प्रयोजन

सप्तद्वीपाधिपतयो नृपा वैन्यगदादयः। अर्थैः कामैर्गता नांतं तृष्णाया इति नः श्रुतं २३ यदृच्छयोपपन्ने
न संतुष्टो वर्त्तते सुखं। नासंतुष्टस्त्रिभिर्लोकैरजितात्मोपसादितैः २४ पुंसोयं संसृतेर्हेतुरसंतोषोर्थ
कामयोः। यदृच्छयोपपन्नेन संतुष्टो वर्त्तते सुखं तोषो मुक्तये स्मृतः २५ यदृच्छालाभतुष्टस्य तेजो विप्र
स्य वर्धते। तत्प्रशाम्यत्यसंतोषादंभसेवाशुशुक्षणिः २६ तस्मात्त्रीणि पदान्येव वृणे त्वद्वरदर्षभात्
एतावतैव सिद्धोहं वित्तं यावत्प्रयोजनं २७ श्रीशुक उ॰ इत्युक्तः स हसन्नाह वांछितः प्रतिगृह्य
तां। वामनाय महीं दातुं जग्राह जलभाजनं २८ विष्णवे क्ष्मां प्रदास्यंतमुशना असुरेश्वरं। जानंश्चि
कीर्षितं विष्णोः शिष्यं प्राह विदांवरः २९ शुक्र उ॰ एष वैरोचने साक्षाद्भगवान्विष्णुरव्ययः। क
श्यपाददितेर्जातो देवानां कार्यसाधकः ३० प्रतिश्रुतं त्वयैतस्मै यदनर्थमजानता। न साधु मन्ये दै
त्यानां महानुपगतोनयः ३१ एष ते स्थानमैश्वर्यं श्रियं तेजो यशः श्रुतं। दास्यत्याच्छिद्य शक्राय माया
माणवको हरिः ३२

मेव सुखं। अधिकस्य क्लेशावहत्वादित्यर्थः २७ ३० अनयः अन्यायः ३१ अन्यायमेवाह एष इति ३२

भा० अ०
४५

ननु मया पदत्रयमेव प्रतिश्रुतं नाधिकं तत्राह त्रिभिरिति। क्रमतामिति चेत्तत्राह सर्वस्वमिति ३३ तथापि प्र
तिश्रुतं संपादनीयमेवेति चेत्तत्राह क्रमत इति द्वाभ्यां। एकेन पादन्यासेन भूमिं क्रममाणस्येत्यर्थः। तार्तीयस्य
तृतीयपदन्यासस्य ३४ ३५ तथापि सर्वस्वदानात्कीर्तिर्भविष्यतीति चेत्तत्राह न तद्दानमिति। तपः वित्ते
काम्यं। कर्म पूर्तं ३६ ननु तर्हि प्रतिश्रुत्य नेति कथमनृतं वाच्यं तत्राह सार्धैः षड्भिः ३७ अत्रापि सत्यानृत

त्रिभिः क्रमैरिमाँल्लोकान्विश्वकायः क्रमिष्यति सर्वस्वं विष्णवे दत्वा मूढ वर्तिष्यसे कथं ३३ क्रमतो
गां पदैकेन द्वितीयेन दिवं विभोः खं च कायेन महता तार्तीयस्य कुतो गतिः ३४ निष्ठां ते नरके मन्ये
ह्यप्रदातुः प्रतिश्रुतं प्रतिश्रुतस्य योऽनीशः प्रतिपादयितुं भवान् ३५ न तद्दानं प्रशंसंति येन वृत्ति
विपद्यते दानं यज्ञस्तपः कर्म लोके वृत्तिमतो यतः ३६ धर्माय यशसेऽर्थाय कामाय स्वजनाय च पं
चधा विभजन्वित्तमिहामुत्र च मोदते ३७ अत्रापि बह्वृचैर्गीतं शृणु मेऽसुरसत्तम सत्यमोमि
तियत्प्रोक्तं यन्नेत्याहानृतं हि तत् ३८ राम ४५

व्यवस्थायां। बह्वृचश्रुत्या हि। प्रथमं ओमिति सत्यं नेत्यनृतमित्यादिना सत्यानृतयोर्लक्षणपूर्वकं स्तुतिर्निं
दाभ्यां सत्यं विहितं। अनृतं च निषिद्धं। अनंतरं च। पराग्वा एतद्रिक्तमक्षरमित्यादिना सत्ये दोषा अनृते च गु
णा उक्ता तस्मात्काल एव दद्यात् काले न दद्यात् सत्यानृते मिथुनीकरोतीत्युपसंहारेण वृत्तिसंकटादिष्वनृतम
प्यनुज्ञातं। तमिमं श्रुत्यर्थं दर्शयन्नाह ॐमित्यंगीकारेण यत्प्रोक्तं तत्सत्यं नेति यदाह तदेवानृतं ३८

शयेना

ननु सत्यमीषदनृतं विना न सिध्यतीत्याह। सत्यं पुष्पफलं विद्यादिति जानीयात्। आत्मवृक्षस्य देहरूपस्य वृक्षस्य। कुतः गीयते
श्रुत्योच्यत इत्यर्थः। पाठांतरे सुगमं। यद्यपि श्रुत्या वाचः सत्यं पुष्पफलं चेत्युक्तं। तथापि वाचो देहनिर्वाहाधीनत्वादात्मवृक्षस्येति प्र
स्तुतानुसारेणोक्तं। भवतु पुष्पफलस्थानीयं सत्यं ततः किमत आह। वृक्षे देहे अजीवति तत्पुष्पफलं न स्यात्। सा न स्यादिति पाठे
श्रुत्युक्ताया वाचः परामर्शः। देहश्चानृतेन रक्षणीय इत्याह। अनृतं त्वात्मनोऽस्य मूलं ३९ एतदेव दृष्टांतेन स्पष्टयति। तद्यथा
वृक्ष उत्पाटितमूलः शुष्यति। अचिरादेवोद्वर्तते पतति च। एवं नष्टमनृतं यस्य स आत्मा देहः शुष्येत्। यद्यपि च श्रुत्या एवमेवा

सत्यं पुष्पफलं विद्यादात्मवृक्षस्य गीयते। वृक्षेऽजीवति तन्न स्यादनृतं मूलमात्मनः ३९
तद्यथा वृक्ष उन्मूलः शुष्यत्युद्वर्ततेऽचिरात्। एवं नष्टानृतः सद्य आत्मा शुष्येन्न संशयः ॥४०॥

नृतं वदन्नात्मानमाविर्मूलं करोतीति सेयं निंदया अनृतं निषिद्धं तथाप्युपसंहारानुसारेण तत्केवलानृतविषयमित्यभिप्रेत्ये
वं व्याख्यातं। दयेत तलेनेति वृत्तये वोक्तिः। तथा च श्रुतिः। ओमिति सत्यं नेत्यनृतं नरेत्तत् पुष्पं फलं वाचो यत्सत्यं। सहेश्वरो यशस्वी
कल्याणकीर्तिर्भवितुं पुष्पं हि फलं वाचः सत्यं वदत्यथैतन्मूलं वाचो यदनृतं तद्यथा वृक्ष आविर्मूलः शुष्यति स उद्वर्तत एवमेवानृतं
वदन्नाविर्मूलमात्मानं करोति स शुष्यति स उद्वर्तते। तस्मादनृतं न वदेद्दयेत त्वेनेनेति। अनेन तु अनृतेन दयेत संकटे आत्मानं रक्षे
दिति श्रुत्यर्थः ४०

भा·अ· सर्वथासत्यवचनेदेहोननिर्वहेदितिस्फुटीकर्तुंसत्यस्यदोषाननृतस्यगुणानाहपराग्रिक्ताभ्यां। यदोमित्यक्षरंतत्पराक्दूरेअर्थंगृहीत्वा
४६ वर्ततीतिपराक्। रिक्तमितिश्रुतिपदस्यव्याख्यानं। वेदइति। तस्मात्तत्अर्थिनेयत्किंचिदोमितिदास्यामीतिब्रूयात्तेनरिच्येतन्यूनोभवेत्। किंच।
भिक्षवेसर्वमोंकुर्वन्दास्यामीत्यंगीकुर्वन् आत्मनेकामेननालंपर्याप्तोनभवति। तस्य भागोनभविष्यतीत्यर्थः। तथाचश्रुतिः। पराग्वाएतद्रिक्तम
क्षरंयदेतदोमितितद्यत्किंचोमित्याहात्रैवास्मैतद्रिच्यते सयत्सर्वमोंकुर्याद्रिच्यादात्मानंसकामेभ्योनालंस्यादिति ४१ नेतियदनृतं वचः। ए
तत्पूर्णं अर्थंययाभावाह। अभ्यात्मेवेतिवकारान्वयः। आत्मनोभिमुखमन्यस्यार्थमाकर्षतीत्यभ्यात्मं यो हि नित्यंममकिंचिदपिनास्तीतिसीदा

पराक्तिग्रिमपूर्णंवा अक्षरंयत्तदोमिति। यत्किंचिदोमितिब्रूयात्तेनरिच्येतवैपुमान् ४१ भिक्षवेसर्वमोंकुर्वन्नालंकामे
नचात्मने। अथैतत्पूर्णमभ्यात्मंयच्चनेत्यनृतंवचः ४२ सर्वंनेत्यनृतंब्रूयात्स दुष्कीर्तिःश्वसन्मृतः। स्त्रीषुनर्मवि
वाहेचवृत्त्यर्थेप्राणसंकटे। गोब्राह्मणार्थेहिंसायांनानृतंस्याज्जुगुप्सितं ४३ इतिश्रीभागवतेमहापुराणेअष्टम
स्कंधे एकोनविंशः॥ ॥

मीतिब्रूतेसहितेनानृतेनपरेषामर्थानाकर्षतीतिप्रसिद्धं ४२ ननुतर्हिइदमेवानृतंसर्वदासेव्यंस्यात् नेत्याह। सर्वमिति। तथाचश्रुतिः। अथैतत्
स पूर्णमभ्यात्मंयन्नेति। यत्सर्वंनेतिब्रूयात्पापिकाऽस्यकीर्तिर्जायेत सैनंतत्रैवहन्यादिति। अतोवृत्तिसंकटादिष्वनृतंनदोषायेत्युपसंहरति। स्त्री ४६
षुप्रीत्याहनेनवशीकारे। नर्मपरिहासे। विवाहेवरादिस्तुतौ। गवांब्राह्मणानांचहितार्थं। हिंसायांकस्यचित्प्राप्तायां। तथाचयाज्ञवल्क्यः। वर्णिनां
हिवधोयत्रतत्रसाक्ष्यनृतंवदेदिति। तथाचश्रुतिः। तस्मात्कालएवदद्यात्कालेनदद्यात्तत्सत्यानृतेमिथुनीकरोतीति ४३ इत्यष्टमेएकोनविंशः॥

विशेलब्धतत्त्वश्रीसौनोज्ञालापिकपटंहरेः। ददावेवततोविष्णुःसहसावर्द्धिताद्भुतं १ भगवतात्वयाप्रोक्तंसत्यं। किंतत्। योर्थकामादिकंन
बाधेतस्यगृहमेधिनांधर्मइति २ कथंप्रत्याचक्षे निराकरोमि ३।४ ननुप्रत्याख्यानेदोषाउक्ताः तत्राहनाहमिति। आधन्यादारिद्र्यात्
मृत्योरपि ५ यद्यद्धनादिकंतत्सर्वंसंपरेतंमृतंपुरुषंहास्यतित्यक्ष्यत्येव तत्किमितिजीवतैवस्वयंनदेयमितिभावः। तथापितावद्वृत्तिसंकट

श्रीशुकउवाच बलिरेवंगृहपतिःकुलाचार्येणभाषितः। तूष्णींभूत्वाक्षणंराजन्नुवाचावहितोगुरुं १ बलिरुवाच स
त्यंभगवताप्रोक्तंधर्मोयंगृहमेधिनां। अर्थंकामंयशोवृत्तिंयोनबाधेतकर्हिचित् २ सचाहंवित्तलोभेनप्रत्याचक्षेकथंद्विजं॥
प्रतिश्रुत्यददामीतिप्राह्लादिःकितवोयथा ३ नह्यसत्यात्परोऽधर्मइतिहोवाचभूरियं। सर्वंसोढुमलंमन्येऋतेऽलीकपरंन
रं ४ नाहंबिभेमिनिरयान्नाधन्यादसुखार्णवात्। नस्थानच्यवनान्मृत्योर्यथाविप्रप्रलंभनात् ५ यद्यद्धास्यतिलोकेऽ
स्मिन्संपरेतंधनादिकं। तस्यत्यागेनिमित्तंकिंविप्रस्तुष्येन्नतेनचेत् ६ श्रेयःकुर्वंतिभूतानांसाधवोदुस्त्यजासुभिः। दध्यङ्शि
बिप्रभृतयःकोविकल्पोधरादिषु ७ यैरियंबुभुजेब्रह्मन्दैत्येंद्रैरनिवर्तिभिः। तेषांकालोऽग्रसील्लोकान्नयशोऽधिगतंभु
वि ८ सुलभायुधिविप्रर्षेह्यनिवृत्तास्तनुत्यजः। नतथातीर्थआयातेश्रद्धयायेधनत्यजः ९

परिहारार्थंअर्द्धदीयतामितिचेत्तत्राह्। नस्यति। विप्रश्चेत्तेनार्द्धेनदत्तेनापिनतुष्येत्तर्हितस्यार्धस्यत्यागेदानेकिंस्यात्। याचितादल्पस्यदानेविप्र
स्यासंतोषेणदानंव्यर्थमेवस्यात्। अतस्तद्याचितंसर्वंदेयंनचकिंचिदितिभावः ६ तर्हिनदेयमेवेतिचेत्तत्राह श्रेयइति। दुस्त्यजैरसुभिःप्राणैःको
विकल्पोविचारः ७ यदेवंयद्देयं दैत्येंद्रैरनिवर्तिभिरियंभूर्बुभुजेउपभुक्तातेषामिहलोकाःपरलोकाश्चभोगानितिवाकालोग्रसीत्संहृतवा
न्। ननुभुवितैरधिगतंप्राप्तंयशोग्रसीत्। अतःकीर्तिरेवसाध्यानान्यदितिभावः ८ देहत्यागादपिधनत्यागेकीर्तिर्भवतीत्याहसुलभाइति।

भा॰अ॰ तनुं त्यजंतीति तथा। तीर्थपात्रे। अतोतिदुष्करो धनत्याग एव मया कार्य इति भावः ९ तर्हि निर्धनत्वेन दैन्यं स्यादिति [illegible] तत्राह। मनस्विन इ
४७ ति। यादृशतादृशानामप्यर्थिनां कामोपनयनेन कामपूरणेन दुर्गतिर्दैन्यमिति यत् तच्छोभनं श्रद्धमेव भवादृशानां तु कामोपनयेन दुर्गतिः
शोभनमिति किंपुनर्वक्तव्यमित्यर्थः १० ननु नायं बटुः किंतु विष्णुस्तव शत्रुरित्युक्तं। तर्हि सुतरामेव दास्यामीत्याह। यजंतीति। परः शत्रु

मनस्विनः कारुणिकस्य शोभनं यदर्थिकामोपनयेन दुर्गतिः। कुतः पुनर्ब्रह्मविदां भवादृशां ततो बटोरस्य ददामि वांछितं १०
यजंति यज्ञक्रतुभिर्यमादृता भवंत आम्नायविधानकोविदाः। स एष विष्णुर्वरदोस्तु वा परो दास्याम्यमुष्मै क्षितिमीप्सितां मुने
११ यद्यप्यसावधर्मेण मां बध्नीयादनागसं। तथाप्येनं न हिंसिष्ये भीतं ब्रह्मतनुं रिपुं १२ एष वा उत्तमश्लोको न जिहास
ति यद्यशः। हत्वा मे नांहरेद्युद्धे शयीत निहतो मया १३ श्रीशुक उवाच एवमश्रद्धितं शिष्यमनादेशकरं गुरुः। श
शाप दैवप्रहितः सत्यसंधं मनस्विनं १४ दृढं पंडितमान्यज्ञः स्तब्धोस्यस्मदुपेक्षया। मच्छासनातिगो यत्त्वमचिराद्भ्रश्य
से श्रियः १५ एवं शप्तः स्वगुरुणा सत्यान्न चलितो महान्। वामनाय ददावेनामर्चित्वोदकपूर्वकं १६ विंध्यावलिस्तदागत्य
पत्नी जालकमालिनी। आनिन्ये कलशं हैममवनेजन्यपां भृतं १७ यजमानः स्वयं तस्य श्रीमत्पादयुगं मुदा। अवनिज्या
वहन्मूर्ध्नि तदपो विश्वपावनीः १८

वास्तु ११।१२ यद्यदि यशो न जिहासति तर्हि युद्धे मां हत्वा एनां भूमिं हरेत्। शयीत वा सम्यक् ज्ञातः सन्मम कित्ते शयीतेति वा ५०
स्त्वर्थः १३ अश्रद्धितं अजातश्रद्धं १४।१५।१६ जालकं मुक्ताभरणविशेषः तन्मालावती अवनेजनी नामपां कलशं भृतं पूर्णं १७
॥१८॥

२० अर्हणेन। वांछातः प्रतिगृह्णामीति बलिना पूर्वमुक्तत्वात्। गुणत्रयमात्मा नियंता यस्य ततः। अनंतरं भूः खमित्यादयो यद्यस्मिन् आसन्
स्थितवंतः २१ ऋत्विगादिसहितो बलिस्तस्य हरेः काये एतद्विश्वं ददर्श २२ तदेव प्रपंचयति रसामिति पादोनैः सप्तभिः। मरुतां गणं वायुसंघं। इं

तदासुरेंद्रं दिवि देवतागणा गंधर्वविद्याधरसिद्धचारणाः। तत्कर्म सर्वेपि गृणंत आर्जवं प्रसूनवर्षैर्ववृषुर्मुदान्विताः १९ नेदुर्मु
हुर्दुंदुभयः सहस्रशो गंधर्वकिंपूरुषकिंनरा जगुः। मनस्विनानेन कृतं सुदुष्करं विद्वानदाद्यद्रिपवे जगत्त्रयं २० तद्वामनं रूपमव
र्धताद्भुतं हरेरनंतस्य गुणत्रयात्मकं। भूः खं दिशो द्यौर्विवराः पयोधयस्तिर्यङ्नृदेवा ऋषयो यदासत २१ काये बलिस्तस्य महा
विभूतेः सहर्त्विगाचार्यसदस्य एतत्। ददर्श विश्वं त्रिगुणं गुणात्मके भूतेंद्रियार्थाशयजीवयुक्तं २२ रसामचष्टांघ्रितलेथ पादयोर्मही
मद्रीन् अनुरूपस्य जंघयोः। पत्त्रिणो जानुनि विश्वमूर्तेरूर्वोर्गणं मारुतमिंद्रसेनः २३ संध्यां विभोर्वाससि गुह्य ऐक्षत्प्रजा
पतीन् जघने आत्ममुख्यान्। नाभ्यां नभः कुक्षिषु सप्तसिंधूनुरुक्रमस्योरसि चर्क्षमालां २४ हृद्यंग धर्मं स्तनयोर्मुरारेर्ऋतं च स
त्यं च मनस्यथेंदुं। श्रियं च वक्षस्यरविंदहस्तां कंठे च सामानि समस्तरेफान् २५ इंद्रप्रधानानमरान्भुजेषु तत्कर्णयोः ककुभो द्यौश्च मू
र्ध्नि। केशेषु मेघान् श्वसनं नासिकायामक्ष्णोश्च सूर्यं वदने च वह्निं २६ वाण्यां च छंदांसि रसे जलेशं भ्रुवोर्निषेधं च विधिं च पक्ष्मसु। अ
हश्च रात्रिं च परस्य पुंसो मन्युं ललाटेधरे लोभं २७ स्पर्शे च कामं नृप रेतसांभः पृष्ठे त्वधर्मं क्रमणेषु यज्ञं। छायासु मृत्युं हसि
ते च मायां तनूरुहेष्वोषधिजातयश्च २८ नदीश्च नाडीषु शिला नखेषु बुद्धावजं देवगणान् ऋषींश्च। प्राणेषु गात्रे स्थिरजंगमानि सर्वाणि भूता
नि ददर्श वीरः २९

इंद्रसेनः इंद्रसेना यस्य सः इंद्रपदे स्थितत्वात्। अचष्ट ऐक्षत २३ आत्मा स्वयं बलिर्मुख्यो येषां तान्। ऋक्षमालां नक्षत्रपंक्तिं २४ अंग हे राजन् समस्ता
न् रेफाश्च शब्दान् २५ द्यौश्च धाम २६ रसे रसने २७ रेतसा रेतसि क्रमणेषु पादन्यासेषु ओषधिजातयः ओषधिजातीश्च २८ प्राणेषु इंद्रियेषु २९

भा॰अ॰ सर्वात्मनीत्यादि वाक्यांतरं। सुदर्शनमित्यादीनामीशमुपतस्थुरित्यनेनान्वयः ३० विद्याधरसंज्ञोऽसिः ३१ मीनकुंडले मकरकुंडले स्फुरं कि
४८ किरीटादीनि यस्य सः ३२ मधुव्रता नाम स्रग्यस्यास्तया वनमालया श्रीवत्सादिभिश्चावृतो याऽपि। उरुक्रम त्वमेवाह। क्षितिमिति। ३३ द्वितीयप
दक्रमतो विक्षिपतस्त्रिविष्टपं तदीयं किंचिन्मात्रं जातं। तृतीयाय तु न किंचिदपि। तत्र हेतुः। उरुक्रमस्यांघ्रिस्त्रिविष्टपादुपर्युपरि गच्छन्महर्जे

सर्वात्मनीदं भुवनं निरीक्ष्य सर्वे सुराः कश्मलमापुरंग। सुदर्शनं चक्रमसह्यतेजो धनुश्च शार्ङ्गं स्तनयित्नुघोषं ३०
पर्जन्यघोषो जलजः पांचजन्यः कौमोदकी विष्णुगदा तरस्विनी। विद्याधरोऽसिः शतचंद्रयुक्तस्तूणोत्तमावक्षयसायकौ च ३१
सुनंदमुख्या उपतस्थुरीशं पार्षदमुख्याः सहलोकपालाः। स्फुरत्किरीटांगदमीनकुंडलश्रीवत्सरत्नोत्तममेखलांबरैः ३२
मधुव्रतस्रग्वनमालयावृतो रराज राजन्भगवानुरुक्रमः। क्षितिं पदैकेन बलेर्विचक्रमे नभः शरीरेण दिशश्च बाहुभिः
३३ पदं द्वितीयं क्रमतस्त्रिविष्टपं न वै तृतीयाय तदीयमण्वपि। उरुक्रमस्यांघ्रिरुपर्युपर्यथो महर्जनाभ्यां तपसः परं गतः ३४
॥ ॥इति श्रीभाग॰ अष्टमस्कंधे विश्वरूपो नाम विंशतितमोऽध्यायः श्रीशुक उवाच सत्यं समीक्ष्याब्जभवो
नखेंदुभिर्हतस्वधामद्युतिरावृतोऽभ्यगात्। मरीचिमिश्रा ऋषयो बृहद्व्रताः सनंदनाद्या नरदेव योगिनः १॥ श्रीः

मरीचिमिश्रा ऋषयश्चेति द्वयोरन्वयः कथंभूतोऽब्जभवः हरेरंघ्रेर्नखा एवेंदवस्तैर्हता स्वधाम्नो द्युतिर्यस्य। स्वयं च तैरावृतः छन्नः हे नरदेव बृहद्व्रता योगिनश्च ।१। ४८
नाभ्यां तपसश्च परं गतः सत्यलोकं गत इति। ३४ इत्यष्टमे विंशः एकविंशे पदापूर्तिमिषेण बलिबंधनं। विष्णुना कृतमुत्कर्षं त
स्य ख्यापयितुं जने। उरुक्रमस्यांघ्रिस्तपसः परं गत इत्युक्तं ततः किं वृत्तं तदाह। सत्यं सत्यलोके प्राप्तं तमंघ्रिं समीक्ष्याब्जभवोऽभ्यगात्। तथा मरी

अंगानि शिक्षादीनि। पुराणानि तत्संहिताश्च योग एव समीरस्तेन दीपितं ज्ञानमेवाग्निस्तेन रंधितं दग्धं कर्म कल्मषं कर्ममलं
येषां। ते च सर्वे तमंघ्रिं ववंदिरे। यस्यांघ्रेः स्मरणानुभावतः अकर्मकं कर्मभिरप्राप्यं २ विधेरंघ्र्यर्घ्ये स्वयं यस्य नाभिपंकेरुहसंभवः।
तस्यांघ्रिमंघ्रिं समभ्यर्च्य ३ लोकत्रयं निमार्ष्टि पवित्रयति। संक्षिप्ता उपसंहृता आत्मविभूतिः स्वविस्तारो येन तस्मै। यथा पूर्वं नाम

वेदोपवेदा नियमा यमान्विता स्तर्केतिहासांगपुराणसंहिताः। ये चापरे योगसमीरदीपितज्ञानाग्निना रंधितकर्मकल्मषाः
भा ववंदिरे यत्स्मरणानुभावतः स्वायंभुवं धाम गता अकर्मकं २ अथांघ्रये प्रोन्नमिताय विष्णोरुपाहरत्पद्मभवोऽर्हणादिकं। सम
भ्यर्च्य भक्त्याभ्यगृणाच्छुचिश्रवा यन्नाभिपंकेरुहसंभवः स्वयं ३ धातुः कमंडलुजलं तदुरुक्रमस्य पादावनेजनपवित्रतया नदीर्वै
स्वर्धुन्यभून्नभसि सा पतती निमार्ष्टि लोकत्रयं भगवतो विशदेव कीर्तिः ४ ब्रह्मादयो लोकनाथाः स्वनाथाय समादृताः। सानुगा
बलिमाजह्रुः संक्षिप्तात्मविभूतये ५ तोयैः समर्हणैः स्रग्भिर्दिव्यगंधानुलेपनैः। धूपैर्दीपैः सुरभिभिर्लाजाक्षतफलां
कुरैः ६ स्तवनैर्जयशब्दैश्च तद्वीर्यमहिमांकितैः। नृत्यवादित्रगीतैश्च शंखदुंदुभिनिःस्वनैः ७ जांबवानृक्षराजस्तु भेरी
शब्दैर्मनोजवः। विजयं दिक्षु सर्वासु महोत्सवमघोषयत् ८ महीं सर्वां हृतां दृष्ट्वा त्रिपदव्याजयाच्ञया। ऊचुः स्वभर्तु
रसुरा दीक्षितस्यात्यमर्षिताः ९ न वा अयं ब्रह्मबंधुर्विष्णुर्मायाविनां वरः। द्विजरूपप्रतिच्छन्नो देवकार्यं चिकीर्षति १०
अनेन याचमानेन शत्रुणा वटुरूपिणा। सर्वस्वं नो हृतं भर्तुर्न्यस्तदंडस्य बर्हिषि ११
नरूपेण स्थितायेत्यर्थः ५।६ त्रिपदविषयया या याच्ञा सा कापट्यात् व्याजस्तया स्वभर्तुर्बलेर्महीं हृतां दृष्ट्वा ऊचुः ९ किमूचुस्तदाह नवा इति सार्द्धैस्त्रिभिः
१०।११

१३ अनुचराश्चाते असुराश्च १४।१८ अर्थकृदनुकूलः १९ पौरुषैस्तं कालमतिवर्तितुं पुमानीश्वरः समर्थो न भवति २०। २२ हरेरनुचरा देवाः। दैवेन अ

सत्यव्रतस्य सतां दीक्षितस्य विशेषतः। नानृतं भाषितुं शक्यं ब्रह्मण्यस्य दयावतः १२ तस्मादस्य वधे धर्मो भर्तुः शुश्रूषणं च नः। इत्या
युधानि जगृहुर्बलेरनुचरासुराः १३ ते सर्वे वामनं हन्तुं शूलपट्टिशपाणयः। अनिच्छतो बले राजन्प्राद्रवञ्जातमन्यवः १४ तानभिद्रव
तो दृष्ट्वा दितिजानीकपान्नृप। प्रहस्यानुचरा विष्णोः प्रत्यषेधन्नुदायुधाः १५ नन्दः सुनन्दोऽथ जयो विजयः प्रबलो बलः। कुमुदः कु
मुदाक्षश्च विष्वक्सेनः पतत्रिराट् १६ जयन्तः श्रुतदेवश्च पुष्पदन्तोऽथ सात्वतः। सर्वे नागायुतप्राणाश्चमूं ते जघ्नुरासुरीं १७
हन्यमानान्स्वकान्दृष्ट्वा पुरुषानुचरैर्बलिः। वारयामास संरब्धान्काव्यशापमनुस्मरन् १८ हे विप्रचित्ते हे राहो हे नेमे श्रूयतां वचः। मायु
ध्यत निवर्तध्वं न नः कालोऽयमर्थकृत् १९ यः प्रभुः सर्वभूतानां सुखदुःखोपपत्तये। तं नातिवर्तितुं दैत्याः पौरुषैरीश्वरः पुमान् २० यो नो भ
वाय प्रागासीदभवाय दिवौकसां। स एव भगवानद्य वर्तते तद्विपर्ययं २१ बलेन सचिवैर्बुध्या दुर्गैर्मन्त्रौषधादिभिः। सामादिभिरुपायैश्च का
लं नात्येति वै जनः २२ भवद्भिर्निर्जिता ह्येते बहुशोऽनुचरा हरेः। दैवेनर्द्धैस्त एवाद्य युधि जित्वा नदन्ति नः २३ एतान्वयं विजेष्यामो यदि दै
वं प्रसीदति। तस्मात्कालं प्रतीक्षध्वं यो नोऽर्थत्वाय कल्पते २४ श्रीशुक उवाच पत्युर्निगदितं श्रुत्वा दैत्यदानवयूथपाः। रसां निर्वि
विशू राजन्विष्णुपार्षदताडिताः २५ अथ तार्क्ष्यसुतो ज्ञात्वा विराड्विष्णुचिकीर्षितं। बबन्ध वारुणैः पाशैर्बलिं सूत्येऽहनि क्रतौ ॥ २६॥

दैवेन समृद्धैर्भवद्भिः २३ अर्थत्वाय आनुकूल्याय २४।२५ विष्णुपक्षिषु राजत इति विराट्। प्रभोश्चिकीर्षितं ज्ञात्वा अयमर्थः। अस्य सर्वस्वाप ४९
हारेणममैवमभिमानस्त्याज्यो दानी दृहस्त्वीकारेणाहंकारमपि त्याजयितुमपरमनुग्रहं कर्तुमिच्छतीति। न चानेन तुल्योऽन्यः कोपि सत्यसंधो धीरो
वास्तीति तद्यशः प्रख्यापनार्थं किंचित्पातयितुमपीच्छतीति प्रभोरभिप्रायं ज्ञात्वा तं बबंधेति। सौत्येऽहनि सोमाभिषवदिने २६॥ ॥

रोदस्योः द्यावापृथिव्योः ३७। २९ असौ सूर्यः ३० मया आत्मने त्वयि आपिने सूर्यः। स्वं च दिशश्च तेन वौ तेनौ। तेस्वं त्वदीयं सर्वस्वं ३१ गुरु
स णा शुक्रेणाननुमोदितः सन् ३२ एवमुक्तेपि निरयपरिहारार्थं स्वर्गाद्भ्रंशपरिहारार्थं च मनोरथं कुर्वन्तं प्रत्याह। वृथेति। यः प्रतिश्रुतस्य अदानेन या
वकं विप्रलंभते तस्य मनोरथो वृथैव। स्वर्गश्च तस्य दूर एव असावधःपतत्येव ३२ त्वया वाहं विप्रलब्धः तस्मादलीकफलं निरयं भुंक्ष्वेत्यर्थः ३४ इत्यष्ट

हाहाकारो महानासीद्रोदस्योः सर्वतो दिशं। गृह्यमाणेऽसुरपतौ विष्णुना प्रभविष्णुना ३७ तं बद्धं वारुणैः पाशैर्भगवानाह वामनः। न
ष्टश्रियं स्थिरप्रज्ञमुदारयशसं नृप ३८ पदानि त्रीणि दत्तानि भूमेर्मह्यं त्वयासुर। द्वाभ्यां क्रान्ता मही सर्वा तृतीयमुपकल्पय ३९ या
वत्तपत्यसौ गोभिर्यावदिन्दुः सहोडुभिः। यावद्वर्षति पर्जन्यस्तावती भूरियं तव ३० पदैकेन मया क्रान्तो भूर्लोकः खं दिशस्तनोः। स्वर्लोक
स्तु द्वितीयेन पश्यतस्ते स्वमात्मना ३१ प्रतिश्रुतमदातुस्ते निरये वास इष्यते। विश त्वं निरयं तस्माद्गुरुणा चानुमोदितः ३२ वृथा मनो
रथस्तस्य दूरः स्वर्गः पतत्यधः। प्रतिश्रुतस्यादानेन योऽर्थिनं विप्रलंभते ३३ विप्रलब्धो ददामीति त्वयाहं चाढ्यमानिना। तद्व्यलीकफ
लं भुंक्ष्व निरयं कतिचित्समाः ३४ इति श्री भा॰ अष्टमस्कंधे एकविंशोऽध्यायः श्रीशुक उवाच एवं विप्रकृतो राज
न्बलिर्भगवतासुरः। भिद्यमानोऽप्यभिन्नात्मा प्रत्याहाविक्लवं वचः १ बलिरुवाच यद्युत्तमश्लोक भवान्ममेरितं वचो व्य
लीकं सुरवर्य मन्यते। करोम्यृतं तन्न भवेत्प्रलंभनं पदं तृतीयं कुरु शीर्ष्णि मे निजं २

मेएकविंशः द्वाविंशे तु प्रसन्नः सन्प्रस्थाप्य सुतलं बलिं। दत्वा तरान्हरिर्न्यूनं मत्वा तद्द्वारपोऽभवत् समर्पितात्मनाऽविनोनिर्मलमलक्षितः। बलिनो
बलिना चित्रस्वमेवार्पयद्युतः। विप्रकृतः अपकृतः भिद्यमानः सत्याच्चाल्यमानः १ हे उत्तमश्लोकेति कटाक्षः। मम वचः ईरितं प्रतिश्रुतं न तावद्व्यलीकं
त्वया कपटेन वामनतया भिक्षित्वा रूपान्तरस्याविष्करणात्। एवमपि भवान्व्यलीकं मन्यते तथापि ऋतमेवाहं करोमि। मदुक्तं विप्रलंभनं न भवतु। मे शी यादे
र्ष्णि निजं तृतीयं पदं कुरु। न च द्वाभ्यां विश्वं क्रान्तवतो मत वा शिरः पदपर्याप्तं न भवतीति मन्यथाः। वित्तेन तत्पदद्वयं जातं तदहं स्वं माधिकमस्य स्यात् वि

त्वादपिकिंचनवतोधिकत्वादितिभावः २ ननुच आपदर्थेधनंरक्षेद्दारान्रक्षेद्धनैरपि। आत्मानंसततंरक्षेद्दारैरपिधनैरपि इत्यादिवचना
दात्मपरिहारायसर्वस्वंत्यज्यते। त्वंतुकुतोऽत्रमीतःस्वात्मानंसमर्पयसि अतआह बिभेमीति। असाधुवादात् अपकीर्तेर्यथाहं भृशमुद्वि
जे। तथानिरयादिस्थानाद्बिभेमि ३ ननुमयानिग्रहात्तवापकीर्तिर्जातैव। नैवेत्याह पुंसामिति। अर्हत्तमैरर्पितं। यंदंडंमाता दयापिनहित्वा
दिशंतिनेवार्पयंति। हितोषिणा त्वया निगृहीतोहंच्यै। श्लो एवाहमिति भावः ४ ननु हे देवानां हितैषीनासुराणामतआह। त्वंनूनमितिपरोक्ष्यः श
बिभेमिनाहंनिरयात्पदच्युतोनपाशबंधाद्व्यसनाद्दुरत्ययात्। नैवार्थकृच्छ्राद्भवतोविनिग्रहादसाधुवादाद्भृशमुद्विजेयथा ३
पुंसांश्लाघ्यतमंमन्येदंडमर्हत्तमार्पितं। यंनमातापितााभ्रातासुहृदश्चादिशंतिहि ४ त्वंनूनमसुराणांनःपरोक्षःपरमोगुरुः। यो
नोनेकमदांधानांविभ्रंशंचक्षुरादिशत् ५ यस्मिन्वैरानुबंधेनव्यूढेनविबुधेतराः। बहवोलेभिरेसिद्धिंयामुहैकांतयोगिनः ६
तेनाहंनिगृहीतोस्मिभवताभूरिकर्मणा। बद्धश्चवारुणैःपाशैर्नातिव्रीडेनचव्यथे ७ पितामहोमेभवदीयसंमतःप्रह्लादआवि
ष्कृतसाधुवादः। भवद्विपक्षेणविचित्रवैशसंसंप्रापितस्त्वत्परमःस्वपित्रा ८ किमात्मनानेनजहातियोंततःकिंरिक्थहारैःस्वज
नाख्यदस्युभिः। किंजायया संसृतिहेतुभूतयामर्त्यस्यगेहैःकिमिहायुषोव्ययः ९
त्वच्छलेनवर्तमानः ५ शत्रुत्वंपुनर्भक्तानिवास्माननुगृह्णीतुमेवेत्याह यस्मिन्निति। उ अहो। हप्रसिद्धं ६ अतो त्वेनोममलज्जानापिदुःखमित्याह
तेनगुरुणाभवता ७ किंच। यायंदंडरूपोममानुग्रहस्त्वयाकृतःसत्वद्भक्तपौत्रत्वेननलुहमनुग्रहस्यपात्रमित्याशयेनाह पितामहइति। भवदीया
 नांसंमतः अतः आविष्कृतःसाधुवादोयस्य। त्वमेवपरमःआश्रयोयस्यसः अतःभवतापिविपक्षेणविद्विषाहिरण्यकशिपुना विचित्रंवैशसंदुः
खंसंप्रापितोपि ८ देहादीनामसारतांनिश्चित्याकुतोभयंध्रुवंभवतःपादपद्ममेवप्रपेदिरे। अथतस्मादहमपिदैवेनतस्यैवभाग्येनत्वां
तिकंनीतः इतिचतुर्णामन्वयः अततः आयुषोंते। रिक्थहारैःपुत्रैः। इहगेहेषुकेवलमायुषोव्ययएवनतुसुखंकिंचित् ॥९॥ श्रीराम

सःप्रसिद्धोमहान्स्वपक्षंदैत्यकुलंक्षपयतीतितथातस्यापि १० अथतस्मादहमपिदैवेनतस्यैवभाग्येनत्वांतिकंनीतःप्रसभंबलात्याजि
ताश्रीर्यस्यांयया। श्रियासत्वमतिःसन्मुमानिदृंजीवितमध्रुवंनबुध्यते। कथंभूतंकृतांतस्यांतिकवर्तिनिमित्तोःसन्निहितं ११ राकापतिःपूर्णेंदुः
१२ अंजनत्विषंश्यामं १३ स्वकृताहंकारादिरूपापराधस्मरणेनसव्रीडंनीचीनमधोमुखंयस्यसः १४ शिरसानमन्नेवउपेत्यमूर्ध्नानानाम

इत्थंसनिश्चित्यपितामहोमहानगाधबोधोभवतःपदांबुजं। ध्रुवंप्रपेदेह्यकुतोभयंजनाद्भीतःस्वपक्षक्षपणस्यसत्तम १० अथा
हमप्यात्मरिपोस्तवांतिकंदैवेननीतःप्रसभंत्याजितश्रीः। इदंकृतांतांतिकवर्तिजीवितंययाध्रुवंस्तब्धमतिर्नबुध्यते ११ श्रीशुक
तस्येत्थंभाषमाणस्यप्रह्लादोभगवत्प्रियः। आजगामकुरुश्रेष्ठराकापतिरिवोत्थितः १२ तमिंद्रसेनःस्वपितामहंश्रियाविराजमानंनलि
नायतेक्षणं। प्रांशुंपिशंगांबरमंजनत्विषंप्रलंबबाहुंसुभगंसमैक्षत १३ तस्मैबलिर्वारुणपाशयंत्रितःसमर्हणंनोपजहारपूर्ववत्।
ननाममूर्ध्नाश्रुविलोललोचनःसव्रीडनीचीनमुखोबभूवह १४ सतत्रहासीनमुदीक्ष्यसत्पतिंसुनंदनंदाद्यनुगैरुपासितं। उ
पेत्यभूमौशिरसामहामनानानाममूर्ध्नापुलकाश्रुविक्लवः १५ प्रह्लादउवाच त्वयैवदत्तंपदमैंद्रमूर्जितंहृतंतदेवाद्यतथैवशोभनं।
मन्येमहानस्यकृतोह्यनुग्रहोविभ्रंशितोयच्छ्रिय आत्ममोहनात् १६ ययाहिविद्वानपिमुह्यतेयतस्तत्कोविचष्टेगतिमात्मनोयथा।
तस्मैनमस्तेजगदीश्वरायवैनारायणायाखिललोकसाक्षिणे १७ श्रीशुकउवाच तस्यानुशृण्वतोराजन्प्रह्लादस्यकृतांजलेः।
हिरण्यगर्भोभगवानुवाचमधुसूदनं १८

बलेस्तत्कृतामनुग्रहंदृष्ट्वापुलकैरश्रुभिश्चविक्लवः १५। त्वयैवेति। नत्वेंद्रंपदमेवतदीयंत्वयापहृतंकिंतुस्वीयमेवपुनःस्वीकृतं। तच्चशोभ
नमेवकृतं। तत्रहेतुःमन्यइति। यद्यस्माच्छ्रियःवृथात्ममोहनंतस्माद्विभ्रंशितः १६ मोहनत्वमेवाह ययाश्रियाविद्वानपियतःसंपन्नोपि
मुह्यते। ततस्तस्यासत्यांकोन्यःपुमानात्मनोगतिंतत्वंयथावद्विचष्टेपश्यतितस्मैमहाकारुणिकाय १७ तस्यप्रह्लादस्यानुशृण्वतःउवा

भा॰अ॰ वेति किं विद्धन्तुं प्रवृत्त इत्यर्थः १८ तदैव विंध्यावलिरपि वक्तुं प्रवृत्ता । तावत्संमानयन्हिरण्यगर्भः क्षणं तूष्णीं स्थितः । अतस्तस्या एव वा
क्यं प्रथममवतारयति बद्धं वीक्ष्येति १९ त्रिजगतः कर्तुः प्रभोः पालकस्य । अस्यतः संहर्तुश्च । ईश्वरस्य तवान्ये किमावहंतीति किं समर्पयंति । त्व
यावरोपितः कर्तृवादः कर्तारः स्वामिनो वयमिति वादमात्रमपि येषां ते । अयं भावः । लोकत्रयं मयार्पितं तृतीयपादाय देहं समर्पय प्रतिश्रुतमत्र तं क

बद्धं वीक्ष्य पतिं साध्वी तत्पत्नी भयविह्वला । प्रांजलिः प्रणतोपेंद्रं बभाषेवाङ्मुखी नृप १९ विंध्यावलिरुवाच क्रीडार्थ
मात्मन इदं त्रिजगत्कृतं ते स्वाम्यं तु तत्र कुधियोपर ईश कुर्युः । कर्तुः प्रभोस्तव किमस्यत आवहंति त्यक्तह्रियस्त्वदवरोपि
तकर्तृवादाः २० ब्रह्मोवाच भूतभावन भूतेश देवदेव जगन्मय । मुंचैनं हृतसर्वस्वं नायमर्हति निग्रहं २१ कृत्स्ना
तेनेन दत्ता भूर्लोकाः कर्मार्जिताश्च ये । निवेदितं च सर्वस्वमात्माविक्लवया धिया २२ यत्पादयोरशठधीः सलि
लं प्रदाय दूर्वांकुरैरपि विधाय सतीं सपर्यां । अप्युत्तमां गतिमसौ भजते त्रिलोकीं दाश्वानविक्लवमनाः कथमार्त्तिमृ
च्छेत् २३ तिं प्राप्नोति तस्मै तुभ्यमसौ बलिः त्रिलोकीं दाश्वान् दत्तवान् आर्त्तिं कथं प्राप्नुयात् २३

रोमीति देहादिषु स्वाम्याविष्कारेण ब्रुवन्नयं कुबुद्धिर्निर्लज्जश्च । यतस्त्वमेव सर्वस्यापि स्वामी । अतो मंदबुद्धिमेनं केवलं कृपया विमुच्य पाल ५१
येति २० तदैव ब्रह्मादस्य विंध्यावल्ल्येश्च परमार्थस्तुत्या प्रसन्नो हरिः । ब्रह्मा तु लोकदृष्ट्यैव विज्ञापयतीति भूतभावनेति त्रिभिः २१ निग्रहानर्हत्वे
हेतुः कृत्स्नेति । सर्वस्वमेवाह आत्मेति । २२ तदेव कैमुत्यन्यायेनाह । यस्य तव पादयोः सलिलमात्रमपि प्रदाय सर्वोऽपि जनः उत्तमां ग

तस्य विशः अर्थान् । नन्वर्थापहारः कोऽयमनुग्रहः तत्राह । यन्मदः येनार्थेन मदो यस्य सः अत एव स्तब्धः अनम्रः सन् । मदस्तंभहेतूनाम
र्थानामपहार एवानुग्रह इत्यर्थः । २४ दुर्लभं पुरुषजन्म कथंचिल्लब्धवतो जीवस्य जन्मादिनिमित्तो गर्वो महाहानिकरः तस्य च नाशो मद
नुग्रहादेवेत्याह । यदेति द्वाभ्यां । अनीशः परतंत्रः सन्निजैः कर्मभिर्नानायोनिषु कृमिकीटादिषु संसरन् २५ यदि पौरुष्यां गतौ ज
न्मादिभिरस्य यदि स्तंभो न भवेत् । तर्हि अयं मदनुग्रह एव । कथं तर्हि ध्रुवादिष्वैश्वर्यसंपदो ददासीति चेत्तत्राह । मानस्तंभः अनम्रता

श्रीभगवानुवाच ब्रह्मन्यमनुगृह्णामि तद्विशो विधुनोम्यहं । यन्मदः पुरुषस्तब्धो लोकं मां चावमन्यते २४ यदा क
दाचिज्जीवात्मा संसरन्निजकर्मभिः । नानायोनिष्वनीशोयं पौरुषीं गतिमाव्रजेत् २५ जन्मकर्मवयोरूपविद्यैश्वर्यधनादिभिः
यद्यस्य न भवेत्स्तंभस्तत्रायं मदनुग्रहः २६ मानस्तंभनिमित्तानां जन्मादीनां समंततः । सर्वश्रेयःप्रतीपानां हंत मुह्येन्न मत्प
रः २७ एष दानवदैत्यानामग्रणीः कीर्तिवर्द्धनः । अजैषीदजयां मायां सीदन्नपि न मुह्यति २८ क्षीणरिक्थश्च्युतः स्था
नात्क्षिप्तो बद्धश्च शत्रुभिः । ज्ञातिभिश्च परित्यक्तो यातनामनुयापितः २९ गुरुणा भर्त्सितः शप्तो जहौ सत्यं न सुव्रतः । छले
रुक्तो मया धर्मो नायं त्यजति सत्यवाक् ३० एष मे प्रापितः स्थानं दुष्प्रापममरैरपि । सावर्णेरंतरस्यायं भवितेंद्रो मदाश्रयः ३१

तस्य निमित्तभूतानां समंततः सर्वश्रेयःप्रतिकूलानां जन्मादीनां सत्त्वेऽपि जन्मादिभिरभिरतिर्वा । हंत हे ब्रह्मन्मत्परो न मुह्येत् । अतो भक्तस्यैश्वर्यसंपदोऽपि
ददामि । अभक्तस्तु मुह्येदिति तदपहाररूपमेव तस्यानुग्रहं करोमीति भावः २७ अस्य चेदानीं मत्परत्वादन्यैर्दुःप्रापमपि दास्यामीति तत्कृतं तस्य म
हाभाग्यमाह एष इति त्रिभिः २८ । २९ नैवैतस्मिन्कुले केऽपि निःसत्त्वाः कृपणाः पुमान् इत्यादिना छलैरेव मया धर्म उक्तः । तथापि तं धर्मं न
त्यजति । अतः सत्यवाक् ३० मे मया अहमेवाश्रयः पालको यस्य सः ३१ ॥ ॥

भा॰अ॰ स्थानं प्रापितं इति यदुक्तं तदेव स्थानमाह। तावत्सावर्णिमन्वंतरपर्यंतं सुतलमध्यास्तां अधिवसत्वित्यर्थः। यद्यस्मिन्वसतां आध्याद
५२ यो मम ईक्षया न संभवंतीति ३२ एवं ब्रह्माणं प्रत्युक्त्वा करुणापरवशः साक्षाद्बलिं प्रत्याह। इंद्रसेनेति चतुर्भिः ३३ लब्धासनमतिगाः इति
अतिवर्तंत इति तथा तान् ३४ तथापि भगवद्द्वेषिणां संगान्निर्गतं प्रत्याह सदेति ३५ संगाद्य आसुरो भावः स विनंक्ष्यति ३६ इसस्व २

तावत्सुतलमध्यास्तां विश्वकर्मविनिर्मितं। यन्नाधयो व्याधयश्च क्लमस्तंद्रा पराभवः। नोपसर्गा निवसतां संभवंति ममेक्षया
३२ इंद्रसेन महाराज याहि भो भद्रमस्तु ते। सुतलं स्वर्गिभिः प्रार्थ्यं ज्ञातिभिः परिवारितः ३३ न त्वामभिभविष्यंति लोके
शाः किमुतापरे। त्वच्छासनातिगान्दैत्यांश्चक्रं मे सूदयिष्यति ३४ रक्षिष्ये सर्वतोऽहं त्वां सानुगं सपरिच्छदं। सदा सन्निहितं वी
रतत्र मां द्रक्ष्यते भवान् ३५ तत्र दानवदैत्यानां संगात्ते भाव आसुरः। दृष्ट्वा मदनुभावं वै सद्यः कुंठो विनंक्ष्यति ३६ इति
श्रीभाग॰ अष्टमस्कंधे द्वाविंशोऽध्यायः श्रीशुक उवाच इत्युक्तवंतं पुरुषं पुरातनं महानुभावोऽखिलसाधु
संमतः। बद्धांजलिर्बाष्पकलाकुलेक्षणो भक्त्युद्गलो गद्गदया गिराब्रवीत् १ बलिरुवाच अहो प्रणामाय कृतः समु
द्यमः प्रपन्नभक्तार्थविधौ समाहितः। यल्लोकपालैस्त्वदनुग्रहोऽमरैरलब्धपूर्वोऽपसदेऽसुरेऽर्पितः २॥

मे द्वाविंशः त्रयोविंशे बलिर्याते सुतलं स पितामहे। उपेंद्रेण दिवं गत्वा पूर्ववन्मोदते हरिः। बाष्पस्य कलाभिर्बिंदुभिराकुले ईक्षणे यस्य। भक्त्या उद्
लः उत्कंठः १ अहो तव प्रणामस्य महिमा। यदर्थं कृतः समुद्यम एव प्रपन्नानां भक्तानां यो अर्थः तस्य विधौ अर्थे कोपितस्य संपादने समाहितः अ ५२
प्रमत्तः स्थितः। यद्यनोद्यमेन लोकपालैरमरैः सत्त्वप्रधानैरपि अलब्धपूर्वस्त्वदनुग्रहः अपसदे नीचे राजसे मय्यसुरे अर्पितः। अयं भावः परमेश्वराय
तुभ्यं महेंद्राका त्रैलोक्यं दत्तवानित्येतदास्तां। प्रणामोऽपि न सम्यक्कृतः किंतु तदर्थमुद्यममात्रं कृतं तेन रंकमंतपोदानादिकोटिभिरप्यलभ्यस्त्व
भा॰

२ अशासत उपेंद्रः सन्पालयामास ४।५ दुर्गपालोऽसि रक्षिष्ये सर्वतो दामित्युक्तत्वात् ६ हे शरणद आश्रयप्रद येऽकुसृतयः दुर्दांताः खलयोनयः
उग्रजातयश्च ते वयं तस्य भवतो दाक्षिण्यदृष्टेः पदवीं कस्माद्गताः प्रणीताः बंधुमानेन चित्तानुवर्तनं दाक्षिण्यं तेन या दृष्टिस्तद्विषयताः प्रापि
ताः ७ भक्तप्रियत्वादिति चेत् तर्हि एवं तवेहितं अहो चित्रं। किं तत् सर्वात्मनः समदृशश्च स्वभावोऽविषमः इतीयत्। सर्वात्मत्वे चित्रं चरितं तदे

श्रीशुक उवाच इत्युक्त्वा हरिमानम्य ब्रह्माणं सभवं ततः। विवेश सुतलं प्रीतो बलिर्मुक्तः सहासुरैः ३ एवमिंद्रा
य भगवान्प्रत्यानीय त्रिविष्टपं। पूरयित्वादितेः काममशासत्सकलं जगत् ४ लब्धप्रसादं निर्मुक्तं पौत्रं वंशधरं बलिं।
निशाम्य भक्तिप्रवणः प्रह्लाद इदमब्रवीत् ५ प्रह्लाद उवाच नेमं विरिंचो लभते प्रसादं न श्रीर्न शर्वः किमुतापरे
ते। यन्नोऽसुराणामसि दुर्गपालो विश्वाभिवंद्यैरभिवंदितांघ्रिः ६ यत्पादपद्ममकरंदनिषेवणेन ब्रह्माद
यः शरणदाश्नुवते विभूतीः। कस्माद्वयं कुसृतयः खलयोनयस्ते दाक्षिण्यदृष्टिपदवीं भवतः प्रणीताः ७ चित्रं
तवेहितमहोऽमितयोगमायालीलाविसृष्टभुवनस्य विशारदस्य। सर्वात्मनः समदृशोऽविषमः स्वभावो भक्तप्रि
यो यदसि कल्पतरुस्वभावः ८

तु। अमिता अचिंत्या योगमाया तया लीलया विसृष्टानि निर्मितानि भुवनानि येन तस्य। अहो इत्यत्र संधिरार्षः। समदृक्त्वे हे
तुः विशारदस्य सर्वज्ञस्य अथवा भक्तप्रियत्वेऽपि तव वैषम्यं नास्त्येव। यतः कल्पतरुस्वभावः सन् भक्तप्रियोऽसि। न हि कल्पतरोः
राश्रितानां स्वकामान्पूरयन्नपि विषमो भवतीत्यर्थः ८

भा॰अ॰ मद्दर्शनेन नयो महाह्लादः तेन ध्वस्तकर्मबंधनमज्ञानं यस्य १०।१३ कर्मवितन्वतः शिष्यस्य च्छिद्रं मंतारं न्यूनं जानंतस्तत्तनुवि
५३ स्तारय संधत्स्व। यजमानैर्विना कथं संधातव्यमिति न वाच्यमित्याह। यत्तदिति। ब्रह्मदृष्टं ब्राह्मणैर्दृष्टमेव समं भवेत् किंपुनस्त्वं तु

श्रीभगवानुवाच वत्स प्रह्राद भद्रं ते प्रयाहि सुतलालयं। मोदमानः स्वपौत्रेण ज्ञातीनां सुखमावह ९ नित्यं द्रष्टा सि मां तत्र गदापाणिमवस्थितं। मद्दर्शनमहाह्लाद ध्वस्तकर्मनिबंधनः १० श्रीशुक उवाच आज्ञां भगवतो राजन्प्रह्रा दो बलिना सह। बाढमित्यमलप्रज्ञो मूर्ध्न्याधाय कृतांजलिः ११ परिक्रम्यादिपुरुषं सर्वासुरचमूपतिः। प्रणतस्त दनुज्ञातः प्रविवेश महाबिलं १२ अथाहोशनसं राजन्हरिर्नारायणोंतिके। आसीनमृत्विजां मध्ये सदसि ब्रह्मवादिनां १३ ब्रह्मन्संतनु शिष्यस्य कर्मच्छिद्रं वितन्वतः। यत्तत्कर्मसु वैषम्यं ब्रह्मदृष्टं समं भवेत् १४ ।शुक्र उवाच कुतस्तत्कर्मवैषम्यं यस्य कर्मेश्वरो भवान्। यज्ञेशो यज्ञपुरुषः सर्वभावेन पूजितः १५ मंत्रत स्तंत्रतश्छिद्रं देशकालार्हवस्तुतः। सर्वं करोति निश्छिद्रं नामसंकीर्तनं तव १६

च्छित्तमित्यर्थः १४ भवान् यस्य सर्वेणापि भावेन वस्तुमात्रेण पूजितः तस्य कर्मसु कुतो वैषम्यं। कथंभूतः। कर्मणामीश्वरः प्रव र्तकः। यज्ञेशः यज्ञफलदः यज्ञमयश्च पुरुषः १५ आस्तां तावत्पूजा। यस्मात् मंत्रतः स्वरादिभ्रंशेन तंत्रतः व्युत्क्रमादिना देशतः ५३
कालतश्च अर्हतः पात्रतः वस्तुतश्च दक्षिणादिना यच्छिद्रं न्यूनं तत्सर्वं तवानुकीर्तनमात्रमेव निश्छिद्रं करोति ।।१४।।१६ ।।

इति हरेराज्ञां प्रतिनंद्य बलेर्यज्ञच्छिद्रं समाधत्त संदधे। पाठांतरे समाधायेत्याज्ञां संपादितवानिति शेषः १८

तथापि वदतो भूमन्करिष्याम्यनुशासनं एतच्छ्रेयः परं पुंसां यत्तवाज्ञानुपालनं १७ श्रीशुक उवाच अभिनंद्य हरेराज्ञामुशना भगवानिति यज्ञच्छिद्रं समाधत्त बलेर्विप्रर्षिभिः सह १८ एवं बलेर्महीं रा जन्भिक्षित्वा वामनो हरिः ददौ भ्रात्रे महेंद्राय त्रिदिवं यत्परैर्हृतं १९ प्रजापतिपतिर्ब्रह्मा देवर्षि पितृभूमिपैः दक्षभृग्वंगिरोमुख्यैः कुमारेण भवेन च २० कश्यपस्यादितेः प्रीत्यै सर्वभूतभवाय च लोकानां लोकपालानामकरोद्वामनं पतिं २१ वेदानां सर्वदेवानां धर्मस्य यशसः श्रियः मंग लानां व्रतानां च कल्पं स्वर्गापवर्गयोः २२ उपेंद्रं कल्पयांचक्रे पतिं सर्वविभूतये तदा सर्वाणि भूता नि भृशं मुमुदिरे नृप २३ ततस्त्विंद्रः पुरस्कृत्य देवयानेन वामनं लोकपालैर्दिवं निन्ये ब्रह्मणा चा नुमोदितः २४ प्राप्य त्रिभुवनं चेंद्र उपेंद्रभुजपालितः श्रिया परमया जुष्टो मुमुदे गतसाध्वसः २५ ब्रह्मा शर्वः कुमारश्च भृग्वाद्या मुनयो नृप पितरः सर्वभूतानि सिद्धा वैमानिकाश्च ये २६

देवाश्च ऋषयश्च भूमिपाश्च मनवः तैः सहितः २० २२ ननु लोकादीनां पतिरिंद्रो ह्यस्त्येव। सत्यं। तथापि देवादी नां कल्पं पालने दक्षं वामनमुपेंद्रं कल्पयांचक्रे २३ देवयानेन मार्गेण विमानेनेति वा २५ २६

य

२८ एतच्चरितं सर्वमाख्यातमिति विशेषोक्त्या अन्यान्यपि संतीत्युक्तं। तानि तर्हि निःशेषाणि वर्णयानीत्य
पेक्षायामाह पारमिति। उरुबहुधा विक्रमतो विष्णोर्महिम्नः पारं योऽनुगणानो भवति स मर्त्यः पार्थिवानि रजां
स्यपि विममे गणितवान्। तैर्यथा पार्थिवाः परमाणुगणनमशक्यं तथा विष्णोर्गुणगणनमप्यशक्यमित्यर्थः

सुमहत्कर्म तद्विष्णोर्गायंतः परमाद्भुतं धिष्ण्यानि स्वानि ते जग्मुरदितिं च शशंसिरे २७ सर्वमेतन्म
याख्यातं भवतः कुलनंदन उरुक्रमस्य चरितं श्रोतॄणामघमोचनं २८ पारं महिम्न उरुविक्रमतो
गृणानो यः पार्थिवानि विममे स रजांसि मर्त्यः किं जायमान उत जात उपैति मर्त्य इत्याह मंत्रदृगृषि
: पुरुषस्य यस्य २९ य इदं देवदेवस्य हरेरद्भुतकर्मणः अवतारानुचरितं शृण्वन्याति परां गतिं ३०
क्रियमाणे कर्मणीदं दैवे पित्र्येऽथ मानुषे यत्र यत्रानुकीर्त्येत तत्तेषां सुकृतं विदुः ३१ इति श्रीभा
गवते महापुराणेऽष्टमस्कंधे वामनचरिते त्रयोविंशोऽध्यायः राम

तथा च मंत्रः। विष्णोर्नुकं वीर्याणीति। एतदेव मंत्रांतरार्थस्तवयन्नाह। यस्य पुरुषस्य पूर्णस्य महिम्नः पारं। मंत्र ५४
दृक् ऋषिर्वसिष्ठः इति एवमाह। कथं किं जायमानो जातो वा उपैति न कोपीति वदन्न नं तत्त्वेनैवाहेत्यर्थः। तथा
च मंत्रः। न ते विष्णो जायमानो न जातो देव महिम्नः पारमंतमाप इति २९ य इदं शृण्वन्नेवं न भवति स परां गतिं या
ति ३० सुकृतं यथावत्कृतं विदुः ३१ इत्यष्टमे त्रयोविंशः

मा०

चतुर्विंशे प्रसंगेन मत्स्यरूपस्य शार्ङ्गिणः लीलोच्यते यत्तः स्मृत्यव्रतरक्षा महार्णवे। तनुं तनुं निदर्श्याशेषेनिर्जेष्व
यनिदर्शनात्। मत्स्यं पृच्छति पृथ्वीशो लीलया वामनोपमं॥ मायया मत्स्यविडंबनं मत्स्यरूपानुकरणं यस्यां नि
रूप्यते तां १ ननु कस्मादकस्मादेव मत्स्यावतार श्रवणेच्छा। श्रीवामनसादृश्यादित्याह यदर्थमिति द्वाभ्यां। दु

राजोवाच भगवञ्छ्रोतुमिच्छामि हरेरद्भुतकर्मणः अवतारकथामाद्यां मायामत्स्यविडंबनं १ यदर्थ
मदधाद्रूपं मात्स्यं लोकजुगुप्सितं तमः प्रकृति दुर्धर्षं कर्मग्रस्त इवेश्वरः २ एतन्नो भगवन्सर्वं यथावद्व
क्तुमर्हसि उत्तमश्लोकचरितं सर्वलोकसुखावहं ३ सूत उ इत्युक्तो विष्णुरातेन भगवान्बादरा
यणिः उवाच चरितं विष्णोर्मत्स्यरूपेण यत्कृतं ४ शुक उ गोविप्रसुरसाधूनां छंदसामपि चेश्व
रः रक्षामिच्छंस्तनूर्धत्ते धर्मस्यार्थस्य चैव हि ५ उच्चावचेषु भूतेषु चरन्वायुरिवेश्वरः नोच्चावचत्वं भज
ते निर्गुणत्वाद्धियो गुणैः ६

र्मर्षि दुःसहां। २ बलेरनुग्रहाय जुगुप्सितमपि याचकरूपं धृतवानिति युक्तमुक्तं। यदर्थं तु लोकजुगुप्सितं मात्स्यं
रूपमधारयत्। एतन्नो यथावद्वक्तुमर्हसीत्यर्थः ३ ४ सामान्येनावतारप्रयोजनमाह गोविप्रेति ५ जुगु
१६ प्सितत्वं परिहरति। धियो गुणैर्यान्युच्चावचानि रूपाणि तेषु नियंतृत्वेन चरन्नपीश्वरो नोच्चावचत्वं भजते। निर्गु
णत्वात्। कुतः पुनः शुद्धसत्त्वमयैर्मत्स्याद्याकारैरुच्चावचत्वशंकेति भावः ६

विशेषतोमत्स्यावतारप्रयोजनमाहआसीदितित्रिभिः।ब्रह्मणोनिद्रायांभावोब्राह्म्यः।तेनैवनिमित्तेनजातोनै
मित्तिकः।समुद्रेउपप्लुतानिमग्नाः ७ अंतिकेनिःसृतान् ८ शफरीरूपंमत्स्यरूपं ९ प्रयोजनांतरंलीलाप्र

आसीदतीतकल्पांतेब्राह्मोनैमित्तिकोलयः समुद्रोपप्लुतास्तत्रलोकाभूरादयोनृप ७ कालेनागतनि
द्रस्यधातुःशिशयिषोर्बली मुखतोनिःसृतान्वेदान्हयग्रीवोंतिकेहरत् ८ ज्ञात्वातद्दानवेंद्रस्यहय
ग्रीवस्यचेष्टितं दधारशफरीरूपंभगवान्हरिरीश्वरः ९ तत्रराजऋषिःकश्चिन्नाम्नासत्यव्रतोमहान्
नारायणपरोतप्यत्तपःससलिलाशनः १० योसावस्मिन्महाकल्पेतनयःसविवस्वतः श्राद्धदेवइति
ख्यातोमनुत्वेहरिणार्पितः ११ एकदाकृतमालायांकुर्वतोजलतर्पणं तस्यांजल्युदकेकाचिच्छफर्येका
भ्यपद्यत १२ सत्यव्रतोंजलिगतांसहतोयेनभारत उत्ससर्जनदीतोयेशफरींद्रविडेश्वरः १३ तमाह
सातिकरुणंमहाकारुणिकंनृपं यादोभ्योज्ञातिघातिभ्योदीनांमांदीनवत्सल कथंविसृजसेराजन्
भीतामस्मिन्सरिज्जले १४ तमात्मनोनुग्रहार्थंप्रीत्यामत्स्यवपुर्धरं अजानन्रक्षणार्थायशफर्याःसम
नोदधे १५ तस्यादीनतरंवाक्यमाश्रुत्यसमहीपतिः कलशाप्सुनिधायैनांदयालुर्निन्यआश्रमं १६
सातुतत्रैकरात्रेणवर्द्धमानाकमंडलौ अलब्ध्वात्मावकाशंवाइदमाहमहीपतिं १७

कारंमाहराजर्षिःइत्यादियावत्समाप्तिः १० सएवश्राद्धदेवइतिख्यातः ११ कृतमालायांनद्यां १२ १३ १७
सा

यत्राहंसुखंनिवसामितदोकःस्थानंकल्पय १८ औदंचनोदकेमणिकस्थेजले १९ २१ रक्षायायोगेनोपायेन।

नाहंकमंडलावस्मिन्कृच्छ्रंवस्तुमिहोत्सहे कल्पयौकःसुविपुलंयत्राहंनिवसेसुखं १८ सएनांततआदा।
यन्यधादौदंचनोदके तत्रक्षिप्तामुहूर्तेनहस्तत्रयमवर्द्धत १९ नमएतदलंराजन्सुखंवस्तुमुदंचनं पृथु
देहिपदंमह्यंयत्त्वाहंशरणंगता २० ततआदायसाराज्ञाक्षिप्ताराजन्सरोवरे तदावृत्यात्मनासोयंम
हामीनोन्ववर्द्धत २१ नैतन्मेस्वस्तयेराजन्नुदकंसलिलौकसः निधेहिरक्षायोगेनह्रदेमामविदासिनि
नि २२ इत्युक्तःसोनयन्मत्स्यंतत्रतत्राविदासिनि जलाशयेसंमितंतंसमुद्रेप्राक्षिपज्झषं २३ क्षि
प्यमाणस्तमाहेदमिहमांमकरादयः अदंत्यतिबलावीरमांनेहोत्स्रष्टुमर्हसि २४ एवंविमोहितस्तेन
वदतावल्गुभारतीं तमाहकोभवानस्मान्मत्स्यरूपेणमोहयन् २५ नैवंवीर्योजलचरोदृष्टोस्माभिः
श्रुतोपिवा योभवान्योजनशतमह्नाभिव्यानशेसरः २६ नूनंत्वंभगवान्साक्षाद्धरिर्नारायणोव्ययः
अनुग्रहायभूतानांधत्सेरूपंजलौकसां २७ नमस्तेपुरुषश्रेष्ठस्थित्युत्पत्त्यप्ययेश्वरः भक्तानांनःप्रप
(न्नानांमुख्योह्यात्मगतिर्विभो २८

यथामहाह्रदप्राप्तेर्वाजलंविनानःशुष्येयंतेनोपायेननिधेहिअविदासि
निअनुपक्षये।संमितंतत्तज्जलाशयपरिमितंसंतं २३ २४ २५ अभिव्यानशेअभितोव्याप्तवान् २६ २७ मु
ख्यःसत्यः।आत्मावगतिश्चआश्रयः २८

भा०अ० हेअरविंदाक्ष।पृथगात्मनां।देहाद्यभिमानिनांसत्तामितरेषांपदोपसर्पणंयथामृषाभवेत् तथासर्वसुहृत्प्रि
५९ यात्मनस्तवपादोपसर्पणंमृषानभवेत्।यद्यस्मान्नोभक्तानामद्भुतंवपुरदीदृशः दर्शितवानसि।पाठांतरे।पृ

सर्वेलीलावतारास्तेभूतानांभूतिहेतवः ज्ञातुमिच्छाम्यदोरूपंयदर्थंभवताधृतं २९ नतेऽरविंदाक्षपदो
पसर्पणंमृषाभवेत्सर्वसुहृत्प्रियात्मनः यथेतरेषांपृथगात्मनांसतामदीदृशोयद्वपुरद्भुतंहिनः ३०
श्रीशुकउवाच इतिब्रुवाणंनृपतिंजगत्पतिःसत्यव्रतंमत्स्यवपुर्युगक्षये विहर्तुकामःप्रलयार्णवेऽ
ब्रवीच्चिकीर्षुरेकांतजनप्रियःप्रियं ३१ श्रीभगवानुवाच सप्तमेऽद्यतनादूर्ध्वमहन्येतदरिंदम वि
नंक्ष्यत्यप्ययांभोधौत्रैलोक्यंभूर्भुवादिकं ३२ त्रिलोक्यांलीयमानायांसंवर्त्ताभसिवैतदा उपस्थास्यति
नौःकाचिद्विशालात्वांमयेरिता ३३ त्वंतावदोषधीःसर्वाबीजान्युच्चावचानिच सप्तर्षिभिःपरिवृ
तःसर्वसत्वोपबृंहितः ३४ राम ५९

थगात्मनोभेददर्शिनःपुंसः।असतांपरिच्छिन्नानांपदोपसर्पणंयथामृषेत्यर्थः ३० एकांतजनाःभक्ताःप्रिया
यस्य ३१ अप्ययांभोधौप्रलयार्णवे।भूर्भुवआदिकमित्यर्थः ३२ संवर्त्ताभसिप्रलयोदके।त्वामुपस्थास्यति
प्राप्स्यति ३३ ओषधीःआदायेतिशेषः ३४

ऋषीणामेवालोकेनविचरिष्यसि ३५ महाहिनावासुकिना ३६ ३७ मेमयानुगृहीतंप्रसादीकृतं।हृदि

आरुह्यबृहतींनावंविचरिष्यस्यविक्लवः एकार्णवेनिरालोकेऋषीणामेववर्चसा ३५ दोधूयमानांतां
नावंसमीरेणबलीयसा उपस्थितस्यमेशृंगेनिबध्नीहिमहाहिना ३६ अहंत्वामृषिभिःसाकंसहना
वमुदन्वति विकर्षन्विचरिष्यामियावद्ब्राह्मीनिशाप्रभो ३७ मदीयंमहिमानंचपरंब्रह्मेतिशब्दितं
वेत्स्यस्यनुगृहीतंमेसंप्रश्नैर्विवृतंहृदि ३८ इत्थमादिश्यराजानंहरिरंतरधीयत सोऽन्ववैक्षततं
कालंयंहृषीकेशआदिशत् ३९ आस्तीर्यदर्भान्प्राक्कूलान्राजर्षिःप्रागुदङ्मुखः निषसादहरेःप
पादौचिंतयन्मत्स्यरूपिणः ४० ततःसमुद्रउद्वेलःसर्वतःप्लावयन्महीं वर्धमानोमहामेघैर्वर्षद्भिः
समदृश्यत ४१ ध्यायन्भगवदादेशंददृशेनावमागतां तामारुरोहविप्रेंद्रैरादायौषधिवीरुधः
४२ तमूचुर्मुनयःप्रीताराजन्ध्यायस्वकेशवं सवैनःसंकटादस्मादविताशंविधास्यति ४३ सो
नुध्यातस्ततोराज्ञाप्रादुरासीन्महार्णवे एकशृंगधरोमत्स्योहैमोनियुतयोजनः ४४ निबध्यना
वंतच्छृंगेयथोक्तोहरिणापुरा वरत्रेणाहिनातुष्टःस्तुष्टावमधुसूदनं ४५

अपरोक्षंवेत्स्यसि।त्वयाकृतैःसंप्रश्नैर्मयाविवृतंप्रकाशितं ३८ ३९ ४० ४४ वरत्रेणदोरकरूपेण ४५

सागरंतारयिष्यंतंतरिष्यन्निवसागरं।सत्यव्रतोगुरुत्वेनतुष्टावहरिमिष्टभिः॥अत्रेदंचिंत्यं।किमयंमहाप्रलयो
दैनंदिनोवेति।तत्रतावद्ब्राह्मणोलयइति।योसावस्मिन्महाकल्पइतिचोक्तेर्महाप्रलयइतिप्राप्तं।नेतिब्रूमः।म
हाप्रलयेपृथिव्यादीनामवशेषासंभवात्।यावद्ब्राह्मीनिशेत्याद्युक्तिविरोधाच्च।अतोदैनंदिनइतियुक्तं।नचैतद
पिसंगच्छते।सांवर्तकैरनावृष्ट्यादिभिर्विनाअकस्मादेवसप्तमेहनित्रैलोक्यंनिमंक्ष्यतीतिमत्स्योक्तेरनुपपत्तेः

श्रीराजोवाच अनाद्यविद्योपहतात्मसंविदस्तन्मूलसंसारपरिश्रमातुराः

यच्चोक्तंप्रथमस्कंधे।रूपंसजगृहेमात्स्यंचाक्षुषांतरसंप्लवे।नाव्यारोप्यमहीमय्यामपाद्वैवस्वतंमनुमिति।तदपि
तदादुर्घटं।नहिप्रलयद्वयेपिमहीमय्यांनाव्यारोहःसंभवति।नचचाक्षुषमन्वंतरेप्रलयोस्ति।तथात्वसतिसप्तमोम
नुर्वैवस्वतइत्यपिदुर्घटंस्यात्।एवंतावदोषधीःसर्वाइत्यादिनिर्देशोपिनसंगच्छते।नहितदाओषध्यादीनांसं
सत्वादीनांवावशेषःसंभवति॥

तस्मादन्यथावर्ण्यते।नैवायंवास्तवःकोपिप्रलयः।किंतुसत्यव्रतस्यज्ञानोपदेशायाविर्भूतोभगवान्वैराग्यार्थम
कस्मात्प्रलयमिवदर्शयामास।यथास्मिन्नेववैवस्वतमन्वंतरेमार्कंडेयायदर्शितवान्।तदपेक्षयैवचमहाकल्पेस्मि
न्नितिविशेषणंसंगच्छते।तथाच।ततःसमुद्रउद्वेलःसर्वतःसमदृश्यतेतितस्यैवयथादर्शनमुक्तमित्ये

यदृच्छयैहोपश्रितायमाप्नुयुर्विमुक्तिदोनःपरमोगुरुर्भवान् ४७

षादिकं।प्रस्तुतंस्तोत्रंव्याख्यास्यामः।तत्रनानायोनिषुसंसरतःस्वस्यभगवत्कृपयैवतत्प्राप्तिंदृष्ट्वामु
क्तयेतमेवप्रार्थयते।अनादिर्याअविद्यातयाउपहताआवृताआत्मसंविद्येषांते।अतएवाविद्यामूलैःसं
सारपरिश्रमैरातुराः।इहसंसारेयदृच्छयायदनुग्रहादेवउपश्रिताःआश्रिताःसंतोयंआप्नुयुःसभवानै
वसाक्षान्नोगुरुःसन्ग्रंथिंभिंद्यादित्युत्तरेणान्वयः॥४७॥ श्रीः

भा॰अ॰ ननु वैराग्यं विना कुतो मुक्तिः। तर्हि तस्य त्वत्सेवैकफलत्वात्सेवामादिशेत्याशयेनाह। अबुधोयं जनः असुखं यथा भव
५८ ति तथा कर्मसमीहते। तास्सुखेच्छा। नो हृदस्य रूपं ग्रंथिं स भिंद्यात्। यतः स एव परो गुरुः ४८ ननु यज्ञदानादिभिः स
त्वशुद्धिं विना कथं ग्रंथिभेदः स्यात्तत्राह। यस्य सेवयैव पुमानात्मनो मनसो मलं तमो विजह्यात्। प्रहीनमलः निजं व
र्णं निजस्वरूपं भजेत स ईशो नो गुरुर्भूयादित्याह। यतः स एव गुरोरपि परमो गुरुः। मलदाने दृष्टांतः। रुद्ररोदनं रज

जनोबुधोयं निजकर्मबंधनः सुखेच्छया कर्मसमीहतेसुखं। यत्सेवया तां विधुनोत्यसन्मतिं ग्रंथिं स भिंद्याद्धृदयं
स नो गुरुः ४८ यत्सेवयाग्नेरिव रुद्ररोदनं पुमान्विजह्यान्मलमात्मनस्तमः। भजेत वर्णं निजमेष सोव्य
यो भूयात्स ईशः परमो गुरोर्गुरुः ४९ न यत्प्रसादायुतभागलेशमन्ये च देवा गुरवो जनाः स्वयं। कर्तुं समे
ताः प्रभवंति पुंसस्तमीश्वरं त्वां शरणं प्रपद्ये ५० तःकर्तुंनप्रभवंति ५०

तं। यद्रोदीत्। तद्रुद्रस्य रुद्रत्वं यदश्रु अशीर्यत तत् रजतं हिरण्यमभवदिति श्रुतेः। तद्यथाग्नेः संपर्कान्मलं जहाति स्वव ५८
र्णं भजते। न तु क्षालनादिभिः तथा न यज्ञादिभिर्मलत्यागः किंतु त्वत्सेवयैव तेषां तु सेवांगत्वमेवेति भावः ४९ परमेश्वर
त्वं परमगुरुत्वं च प्रपंचयन्नाह। यत्प्रसादस्यायुतभागस्तस्य लेशमात्रमपि अन्ये देवादयः सर्वे समेता अपि स्वयं निरपेक्षाः सं त

तदेव दृष्टांतेन स्पष्टयन्नाह। अचक्षुरिति। अविदुषो जनस्य अबुधोऽविद्वान् गुरुस्तथैव। अर्कप्रकाशकवत्तु स्व
तएव दृक् ज्ञानं यस्य सः अर्कदृक्। अतः सर्वदृशां सर्वेंद्रियाणां समीक्षणः प्रकाशकः। अत एव सुगतिं बोद्धु

अचक्षुरंधस्य यथाग्रणीः कृतस्तथा जनस्याविदुषोऽबुधो गुरुः। त्वमर्कदृक् सर्वदृशां समीक्षणो वृ
तो गुरुर्नः सुगतिं बुभुत्सतां ५१ जनो जनस्यादिशतेसतीं मतिं यया प्रपद्येत दुरत्ययं तमः। त्वं
त्वव्ययं ज्ञानममोघमंजसा प्रपद्यते येन जनो निजं पदं ५२ त्वं सर्वलोकस्य सुहृत्प्रियेश्वरो ह्यात्मा
गुरुर्ज्ञानमभीष्टसिद्धिः तथापि लोको न भवंतमंधधीर्जानाति संतं हृदि बद्धकामः ५३

मिच्छद्भिर्नोस्माभिर्गुरुर्वृतोसि ५१ किंच प्राकृतो गुरुरनर्थहेतुरेवेत्याह। जन इति। आदिशते उपदिशति।
असतीं मतिं अर्थकामादिमतिं। तमः संसारं ५२ ननु तर्हि सर्वोपि लोको मामेव किं नोपसरति। अज्ञानादि
त्याह त्वामिति। प्रियश्चासावीश्वरश्च ५३

अहंतुत्वामेवशरणंयामीत्याह तंत्वामिति। प्रतिबोधनायतत्त्वोपदेशाय। अर्थदीपैः परमार्थप्रकाशकैः। हृदये

तंत्वामहंदेववरंवरेण्यंप्रपद्यईशंप्रतिबोधनाय छिंध्यर्थदीपैर्भगवन्वचोभिर्ग्रंथीन्हृदय्यान्विवृणु
स्वमोकः ५४ श्रीशुकउवाच इत्युक्तवंतंनृपतिंभगवानादिपूरुषः मत्स्यरूपीमहांभोधौ
विहरंस्तत्त्वमब्रवीत् ५५ पुराणसंहितांदिव्यांसांख्ययोगक्रियावतीं सत्यव्रतस्यराजर्षेरात्मगु
ह्यमशेषतः ५६ अश्रौषीदृषिभिःसाकमात्मतत्त्वमसंशयं नाव्यासीनोभगवताप्रोक्तंब्रह्म

सनं ५७ अतीतप्रलयापायउत्थितायसवेधसे हत्वासुरंहयग्रीवंवेदान्प्रत्याहरद्धरिः ५८
सतुसत्यव्रतोराजाज्ञानविज्ञानसंयुतः विष्णोःप्रसादात्कल्पेऽस्मिन्नासीद्वैवस्वतोमनुः ५९

भवान्ग्रंथीन्अहंकारादीन्। स्वमोकः स्वरूपंविवृणुप्रकाशय ५४ नृपतिंप्रति ५५ पुराणसंहितांमत्स्य
पुराणं। अशेषतःअब्रवीदित्यनुषंगः ५६ ५७ अतीतःपूर्वोयःप्रलयःतस्यापायेअवसाने ५८ ५९

६० योयंहरेरवतारस्तंयःप्रकीर्त्तयेत् ६१ सत्यव्रतानांसत्यव्रतस्यऋषीणांचाछत्रिणेगर्छंतीतितच्छि

सत्यव्रतस्यराजर्षेर्मायामत्स्यस्यशार्ङ्गिणः संवादंमहदाख्यानंश्रुत्वामुच्येतकिल्बिषात् ६० अ
वतारोहरेर्योयंकीर्त्तयेदन्वहंनरः संकल्पास्तस्यसिध्यंतिसयातिपरमांगतिं ६१ प्रलयपयसि
धातुःसुप्तशक्तेर्मुखेभ्यःश्रुतिगणमपनीतंप्रत्युपादत्तहत्वा दितिजमकथयद्योब्रह्मसत्यव्रता
नांतमहमखिलहेतुंजिह्ममीनंनतोस्मि ६२ इतिश्रीभागवतेमहापुराणेऽष्टमस्कंधेम
त्स्यावतारचरितानुवर्णनंनामचतुर्विंशतितमोऽध्यायः श्रीकृष्णार्पणमस्तु

गसमवायाद्धक्रवचनं। जिह्ममीनंमायामत्स्यं ६२ इतिश्रीभागवतेमहापुराणेभागवतभावार्थदीपि
कायांश्रीधरस्वामिविरचितायांअष्टमस्कंधेचतुर्विंशतितमोध्यायः श्रीवासुदेवायनमः

इत्यष्टमस्कंधःसमाप्तः

भा० न० श्रीगणेशाय नमः ॥ गुणायं गुणतावाप्ये ह्यणुतेक रूणानिधिं। तमहं शरणं यामि परमानंदमाधवं १ त्रिगुणा
१ ष्टभिरध्यायैर्वैवस्वतसुतान्वयः। नवमे कृष्णसत्कीर्तिप्रसंगाय वितन्यते। २ एवमुक्तोष्टमस्कंधे सद्धर्मः सत्यशोध
कः। कर्तृपालकवक्त्रादिमन्वादीनां वितन्वते निरूपणैः ३ सद्धर्मशुद्धसत्वानां अंतरंगेशसत्कथा। स्वर्यसो

राजोवाच ॥ मन्वंतराणि सर्वाणि त्वयोक्तानि श्रुतानि मे वीर्याण्यनंतवीर्यस्य हरेस्तत्र कृतानि च १ योसौ
सत्यव्रतो नाम राजर्षिर्द्रविडेश्वरः ज्ञानं योतीतकल्पांते लेभे पुरुषसेवया २ स वै विवस्वतः पुत्रो मनुरा
सीदिति श्रुतं त्वत्तस्तस्य सुताश्चोक्ता इक्ष्वाकुप्रमुखा नृपाः ३ तेषां वंशं पृथक्‌ ब्रह्मन्वंश्यानुचरितानि च
कीर्तय स्व महाभाग नित्यं शुश्रूषतां हि नः ४ ये भूता ये भविष्याश्च भवंत्यद्यतनाश्च ये तेषां नः पुण्यकी
र्तीनां सर्वेषां वद विक्रमान्‌ ५ सूत उवाच एवं परीक्षिता राज्ञा सदसि ब्रह्मवादिनां पृष्टः प्रोवाच भग राम
वान्‌ शुकः परमधर्मवित्‌ ६ शुक उवाच श्रूयतां मानवो वंशः प्राचुर्येण परंतप न शक्यते १
विस्तरतो वक्तुं वर्षशतैरपि ७

मान्वयाख्यानैरधुना समस्तोच्यते ४ तत्र चात्रयोदशभिरध्यायैः स्वर्यवंशोनुवर्ण्यते। एकादशभिरध्यायैः
सोमवंशस्ततः परैः ॥ तत्र तु प्रथमेध्याये वैवस्वतसुतान्वये। सोमवंशप्रवेशोक्त्यै सुद्युम्नस्त्रीत्वमुच्यते ॥ उक्ता
नुवादपूर्वकं वैवस्वतमनोर्वंशं पृच्छति मन्वंतराणीति पंचभिः ७

२१२
अनुक्तवंशं वक्तुं पूर्वोक्तमेव नाव वंशं तत्प्रवर्तकं श्रीनारायणमारभ्यानुस्मारयति परावरेषामिति पंचभिः। नाभागं चे
ति पाठेपि नभग एव नाभागः सूर्यपौत्रस्य सुद्युम्नस्य स्त्रीत्वे सति बुधात्पुरूरवः प्रभृति सोमवंशसंचारं वक्तुं स प्रस्ताव मि
लोपाख्यानमाह। अप्रजस्य मनोः पूर्वमित्यादिना यावदध्यायसमाप्तिः। पूर्वमिक्ष्वाकुःप्रभृतीनामुत्पत्तेः प्राक्‌ तु हि

परावरेषां भूतानामात्मायः पुरुषः परः स एवासीदिदं विश्वं कल्पांतेन्यन्न किंचन ८ तस्य नाभेः समभवत्पद्म
कोशो हिरण्मयः तस्मिन्‌ जज्ञे महाराज स्वयंभूश्चतुराननः ९ मरीचिर्मनसस्तस्य जज्ञे तस्यापि कश्यपः दा
क्षायण्यां ततोदित्यां विवस्वानभवत्सुतः १० ततो मनुः श्राद्धदेवः संज्ञायामास भारत श्रद्धायां जनयामास
दश पुत्रान्स आत्मवान्‌ ११ इक्ष्वाकुनृगशर्यातिदिष्टधृष्टकरूषकान्‌ नरिष्यंतं पृषध्रं च नभगं च कविं विभुः
१२ अप्रजस्य मनोः पूर्वं वसिष्ठो भगवान्किल मित्रावरुणयोरिष्टिं प्रजार्थमकरोत्प्रभुः १३ तत्र श्रद्धा मनोः
पत्नी होतारं समयाचत दुहित्रर्थमुपागम्य प्रणिपत्य पयोव्रता १४ प्रेषितोध्वर्युणा होता ध्यायंस्तत्सुसमा
हितः गृहीते हविषि व्याचरद्वषट्कारं गृणन्द्विजः १५ होतुस्तद्व्यभिचारेण कन्येला नाम साभवत्‌ तां वि
लोक्य मनुः प्राह नातिहृष्टमना गुरुं १६ भगवन्किमिदं जातं कर्म वो ब्रह्मवादिनां विपर्ययमहो कष्टं मैवं
स्याद्ब्रह्मविक्रिया १७ यूयं मंत्रविदो युक्तास्तपसा दग्धकिल्बिषाः कुतः संकल्पवैषम्यमनृतं विबुधेष्विव १८

त्वर्थं मम कन्या यथा भवेत्तथा यजेति होतारं सम्यग् याचत। पयएव व्रतमाहारो नियतो यस्याः ॥ अध्वर्युणा होतर्यजेति
प्रेषितो होता तेन गृहीते हविषि सति तत्तया प्रार्थितं ध्यायन्‌ अयजत्‌ पाठांतरे तत्‌ आध्यायन्‌ वाषो वषट्कारं गृणन्‌ वौ
षडित्युच्चारयन्‌। ब्रह्मविक्रिया मंत्रान्यत्वं १७ १८

भा० न० प्रपितामहो वसिष्ठः। विगतं तिमिरं आभासः प्रकाशश्चान्यश्च यासु तथाभूतानि दिशः कुर्वतः। प्रसंगं रतस्य अभिनिवेशं।
२
तन्निशम्य वचस्तस्य भगवान्प्रपितामहः होतुर्व्यतिक्रमं ज्ञात्वा बभाषे रविनंदनं १८ एतत्संकल्पवैषम्यं होतु
स्ते व्यभिचारतः तथापि साधयिष्ये ते सुप्रजास्त्वं स्वतेजसा १९ एवं व्यवसितो राजन्भगवान्स महायशाः अ
स्तौषीदादिपुरुषमिलायाः पुंस्त्वकाम्यया २० तस्मै कामवरं तुष्टो भगवान्हरिरीश्वरः ददाविलाभवत्तेन सुद्यु
म्नः पुरुषर्षभः २१ स एकदा महाराज विचरन्मृगयां वने वृतः कतिपयामात्यैरश्व[illegible]मारुह्य सैंधवं २२ प्रगृ
ह्य रुचिरं चापं शरांश्च परमाद्भुतान् दंशितोनु मृगं वीरो जगाम दिशमुत्तरां २३ स कुमारो वनं मेरोरधस्तात्प्र
विवेश ह यत्रास्ते भगवाञ्छर्वो रममाणः सहोमया २४ तस्मिन्प्रविष्ट एवासौ सुद्युम्नः परवीरहा अपश्यत्
स्त्रियमात्मानमश्वं च वडवां नृप २५ तथा तदनुगाः सर्वे आत्मलिंगविपर्ययं दृष्ट्वा विमनसोभूवन्वीक्षमा
णाः परस्परं २६ राजोवाच कथमेवं गुणो देशः केन वा भगवन्कृतः प्रश्नमेतं समाचक्ष्व परं कौतूहलं हि राम
नः २७ शुक उवाच एकदा गिरिशं द्रष्टुमृषयस्तत्र सुव्रताः दिशो वितिमिराभासाः कुर्वंतः समुपागम २
न् २८ तान्विलोक्याम्बिका देवी विवासा व्रीडिता भृशं भर्तुरंकात्समुत्थाय नीवीमाश्वथ पर्यधात् २९ अथ
ऋषयोपि तयोर्वीक्ष्य प्रसंगं रममाणयोः निवृत्ताः प्रययुस्तस्मान्नरनारायणाश्रमं ३० तदिदं भगवानाह प्रि
यायाः प्रियकाम्यया स्थानं यः प्रविशेदेतत्स वै योषिद्भवेदिति" ततऊर्ध्वं वनं तद्वै पुरुषा वर्जयंति हि ३२

स्त्रीप्रसंगकलुषितमनसः संतस्तत्प्रसंगश्रवणं नरनारायणाश्रमं प्रययुः ३० ३१ श्रीकृष्णाय नमः श्रीराम।।

प्रासंगिकमुक्त्वा प्रकृतमनुवर्णयति। अनुचरीसंयुक्तेति वक्तव्ये भूतपूर्वगत्या पुंस्त्वनिर्देशः। आशयत् द्रष्ट्वा नाभ्य

स्त्रीत्वानुचरसंयुक्तो विचचार वनाद्वनं" अथ तामाश्रमाभ्याशे चरंतीं प्रमदोत्तमां ३२ स्त्रीभिः परिवृतां वीक्ष्य च
कमे भगवान्बुधः" सापि तं चकमे सुभ्रूः सोमराजसुतं पतिं ३३ स तस्यां जनयामास पुरूरवसमात्मजं" ए
वं स्त्रीत्वमनुप्राप्तः सुद्युम्नो मानवो नृपः ३४ सस्मार स्वकुलाचार्यं वसिष्ठमिति शुश्रुम" स तस्य तां दशां दृ
ष्ट्वा कृपया भृशपीडितः ३५ सुद्युम्नस्याशयन्पुंस्त्वमुपाधावत शंकरं" तुष्टस्तस्मै स भगवानृषये प्रियमावह
न् ३६ स्वां च वाचमृतां कुर्वन्निदमाह विशांपते" मासं पुमान्स भविता मासं स्त्री तव गोत्रजः ३७ इत्थं व्य
वस्थया कामं सुद्युम्नोवतु मेदिनीं" आचार्यानुग्रहात्कामं लब्ध्वा पुंस्त्वं व्यवस्थया ३८ पालयामास जगतीं
नाभ्यनंदन्स्म तं प्रजाः" तस्योत्कलो गयो राजन्विमलश्च सुतास्त्रयः ३९ दक्षिणापथराजानो बभूवुर्धर्म
वत्सलाः" ततः परिणते काले प्रतिष्ठानपतिः प्रभुः पुरूरवस उत्सृज्य गां पुत्राय गतो वनं ४० इति
श्रीभागवते महापुराणे नवमस्कंधे इलोपाख्याने प्रथमोध्यायः शुक उवाच एवं गतेथ सुद्युम्ने
मनुर्वैवस्वतः सुते पुत्रकामस्तपस्तेपे यमुनायां शतं समाः १ ततोयजन्मनुर्देवमपत्यार्थं हरिं प्रभुम्
इक्ष्वाकुपूर्वजान्पुत्रान्लेभे स्वसदृशान्दश २

नंदत्तां स्त्रीत्वे लज्जया मासं निलीयावस्थानात् ४० इति नवमस्कंधदीपिकायां प्रथमः द्वितीये मनुपुत्रा
णां द्वावपुत्रौ विरागतः करूषकादिपंचानां वंशानाह लघुक्रमात् १ इक्ष्वाकुः पूर्वजो येषां तान् २

भा०न० तत्रपृषध्रस्यवंशोनाभवदितिसहेतुकमाह।पृषध्रस्त्वित्यादिनाकविःकनीयानित्यंतःप्राक्तनेनग्रंथेन
३ खड्गपाणेःसततंस्थितोजागरणंवीरासनंतदेवव्रतंयस्य।ततःअवहितःसन्गाःपालयामास।शार्दूलोव्याघ्रः।प्र

पृषध्रस्तुमनोःपुत्रोगोपालोगुरुणाकृतः पालयामासगायत्तोरात्र्यांवीरासनाव्रतः ३ एकदाप्राविशद्गोष्ठं
शार्दूलोनिशिवर्षति शयानागावउत्थायभीतास्ताबभ्रमुर्व्रजे ४ एकांजग्राहबलवान्साचुक्रोशभयातुरा
तस्यास्तत्क्रंदितंश्रुत्वापृषध्रोभिससारह ५ खड्गमादायतरसाप्रलीनोडुगणेनिशि अजानन्नहनद्बभ्रोः
शिरःशार्दूलशंकया ६ व्याघ्रोपिवृक्णश्रवणोनिस्त्रिंशाग्राहतस्ततः निश्चक्रामभृशंभीतोरक्तंपथिसमु
त्सृजन् ७ मन्यमानोहतंव्याघ्रंपृषध्रःपरवीरहा अद्राक्षीत्स्वहतांबभ्रुंव्युष्टायांनिशिदुःखितः ८ तं
शशापकुलाचार्यःकृतागसमकामतः नक्षत्रबंधुःशूद्रस्त्वंकर्मणाभवितामुना ९ एवंशप्तस्तुगुरुणा
प्रत्यगृह्णात्कृतांजलिः अधारयद्व्रतंवीरऊर्ध्वरेतामुनिप्रियं १० वासुदेवेभगवतिसर्वात्मनिपरेमले राम
एकांतित्वंगतोभक्त्यासर्वभूतसुहृत्समः ११ विमुक्तसंगःशांतात्मासंयताक्षोपरिग्रहः यदृच्छयोपप ३
न्नेनकल्पयन्वृत्तिमात्मनः १२ आत्मन्यात्मानमाधायज्ञानतृप्तःसमाहितः विचचारमहीमेतांजडां
धबधिराकृतिः १३ एवंवृत्तोवनंगत्वादृष्ट्वादावाग्निमुत्थितं तेनोपयुक्तकरणोब्रह्मप्रापपरंमुनिः १४

लीनाउडुगणायस्मिन्।तस्मिन्समयेबभ्रोःकपिलायागोः।गांकामतोनजघानेतिख्यापयितुंवृक्णश्रवणइ
त्याद्युक्तं।व्युष्टायांप्रभातायां।नक्षत्रबंधुरपित्वंनभविताअपितुशूद्रोभवितेति।उपयुक्तकरणःदग्धदेहः १४

कवेरपिवंशोनाभवदित्याहकविरिति।बंधुभिःसहराज्यंविसृज्य।ब्रह्मभूयंब्राह्मणत्वं।नृगस्यवंशःपुत्रःसुमतिः
ततोभूतज्योतिःततोवसुःओघवतःपितातत्पुत्रोप्योघवानेवेत्यर्थः।तदेवंत्रिभिःश्लोकैःकरूषधृष्टनृगाणांवं

कविःकनीयान्विषयेषुनिस्पृहोविसृज्यराज्यंसहबंधुभिर्वने निवेश्यचित्तेपुरुषंस्वरोचिषंविवेशकैशोरवे
वयःपरंगतः १५ करूषान्मानवादासन्कारूषाःक्षत्रजातयः उत्तरापथगोप्तारोब्रह्मण्याधर्मवत्सला
: १६ धृष्टाद्धार्ष्टमभूत्क्षत्रंब्रह्मभूयंगतंक्षितौ नृगस्यवंशःसुमतिर्भूतज्योतिस्ततोवसुः १७ वसोः
प्रतीकस्तत्पुत्रओघवानोघवत्पिता कन्याचौघवतीनामसुदर्शनउवाहतां १८ चित्रसेनोनरिष्यंता
दृक्षस्तस्यसुतोभवत् तस्यमीढ्वांस्ततःपूर्णइंद्रसेनस्तुतत्सुतः १९ वीतिहोत्रस्त्विंद्रसेनात्तस्यस
त्यश्रवाअभूत् उरुश्रवाःसुतस्तस्यदेवदत्तस्ततोभवत् २० ततोग्निवेश्योभगवानग्निःस्वयमभूत्सुतः
कानीनइतिविख्यातोजातुकर्ण्योमहानृषिः २१ ततोब्रह्मकुलंजातमाग्निवेश्यायनंनृप नरिष्यं
तान्वयःप्रोक्तोदिष्टवंशमतःशृणु २२ नाभागोदिष्टपुत्रोन्यःकर्मणावैश्यतांगतः भलंदनःसुतस्तस्य
वत्सप्रीतिर्भलंदनात् २३

शाउक्ताः।नरिष्यंतस्यवंशमाहचित्रसेनइतिसार्धैस्त्रिभिः।ततइत्यादेर्यत्राधिक्यंतस्मात्तत्रानंतर्येणतइत्यादि
पदंव्याख्येयं।तत्रतुन्यूनत्वंतत्रपूर्वस्यपरस्यवानुषंगादिभिर्व्याख्येयं।अग्निवेश्यएवकानीनइतिजातुकर्ण्यइ
तिचविख्यातः।दिष्टस्यपुत्रोनाभागोवक्ष्यमाणान्नाभागादन्यइतिभ्रांतिव्युदासार्थंमनुवादमात्रं २३

भा० न० ४ २४ २५ अंगिरसः सुतो महायोगी संवर्त्तो यमयाजयन् समसंज्ञः अस्य किंचित्पात्रादिकमासीत् तु सर्वं हिरण्मयं

वत्सप्रीतेः सुतः प्रांशुस्तत्सुतं प्रमतिं विदुः खनित्रः प्रमतेस्तस्माच्चाक्षुषोथ विविंशतिः २४ विविंशतेः सु
तो रंभः खनिनेत्रोस्य धार्मिकः करंधमो महाराज तस्यासीदात्मजो नृप २५ तस्यावीक्षित्सुतो यस्य म
रुत्तश्चक्रवर्त्यभूत् संवर्त्तोयाजयद्यं वै महायोग्यंगिरः सुतः २६ मरुत्तस्य यथा यज्ञो न तथान्योस्ति क^
श्चन सर्वं हिरण्मयं त्वासीद्यत्किंचिच्चास्य शोभनं २७ अमाद्यदिंद्रः सोमेन दक्षिणाभिर्द्विजातयः म
रुतः परिवेष्टारो विश्वेदेवाः सभासदः २८ मरुत्तस्य दमः पुत्रस्तस्यासीद्राज्यवर्धनः सुधृतिस्तत्सुतो ज
ज्ञे सौधृतेयो नरः सुतः २९ तत्सुतः केवलस्तस्माद्धुंधुमान्वेगवांस्ततः बुधस्तस्याभवद्यस्य तृणबिंदुर्म^ न
हीपतिः ३० तं भेजेलंबुषा देवी भजनीयगुणालयं वराप्सरा यतः पुत्राः कंन्या चेडविडाभवत् ३१ तस्या राम
मुत्पादयामास विश्रवा धनदं सुतं ३२ प्रादाय परमां विद्यामृषिर्योगेश्वरात्पितुः विशालः शून्यबंधुश्च ४
धूम्रकेतुश्च तत्सुताः ३३ विशालो वंशकृद्राजा वैशालीं निर्ममे पुरीं हेमचंद्रः सुतस्तस्य धूम्राक्षस्तस्य
चात्मजः ३४ तत्पुत्रात्संयमादासीत्कृशाश्वः सहदेवजः कृशाश्वात्सोमदत्तोभूद्योश्वमेधैरिडस्पतिं
३५

शोभनमासीत् २७ अमाद्यत् अहृष्यत् । यतः यस्यां तृणबिंदोः पुत्रा अभवन् । तानेवाह विशाल इति । तस्य तृ
णबिंदोः सुताः सहदेवजः देवजेन सहितः पाठांतरे नामान्यत्वमात्रं अर्थस्तु स एव ३५

[illegible]

वैशालभूपालाः विशालस्यान्वये जाताः ३६ इति नवमे द्वितीयः तृतीये मनुपुत्रस्य शर्यातेः कीर्त्यतेन्व
यः । यत्रासौ कन्यमाख्यानं रैवतं च महद्भुतं १ वसिष्ठः वेदार्थतत्त्वज्ञः तदेवाह । यो वा इति । द्वितीयमहः द्वितीयेह्नि

इष्ट्वा पुरुषमाप्याग्र्यां गतिं योगेश्वराश्रितः सोमदत्तिस्तु सुमतिस्तत्सुतो जनमेजयः एते वैशालभूपालाः^
तृणबिंदोर्यशोधराः ३६ इति श्रीभागवते नवमस्कंधे द्वितीयोध्यायः शुक उवाच शर्याति समानां वंशः कथितः
र्मानवो राजा ब्रह्मिष्ठः स बभूव ह यो वा अंगिरसां सत्रे द्वितीयमहरूचिवान् १ सुकन्या नाम तस्यासीत्क
न्या कमललोचना तया सार्धं वनगतो ह्यगमच्च्यवनाश्रमं २ सा सखीभिः परिवृता विचिन्वंत्यंघ्रिपान्
वने वल्मीकरंध्रे ददृशे खद्योते इव ज्योतिषी ३ ते दैवचोदिता बाला ज्योतिषी कंटकेन वै अविध्यन्मु
ग्धभावेन सुस्रावासृक् ततो बहु ४ शकृन्मूत्रनिरोधोभूत्सैनिकानां च तत्क्षणात् राजर्षिस्तमुपाल
क्ष्य पुरुषान्विस्मितोब्रवीत् ५ अप्यभद्रं न युष्माभिर्भार्गवस्य विचेष्टितं व्यक्तं केनापि नस्तस्य कृतमा
श्रमदूषणं ६ सुकन्या प्राह पितरं भीता किंचित्कृतं मया द्वे ज्योतिषी अजानंत्या निर्भिन्ने कंटकेन मे
७ दुहितुस्तद्वचः श्रुत्वा शर्यातिर्जातसाध्वसः मुनिं प्रसादयामास वल्मीकांतर्हितं शनैः ८

क्रियमाणं कर्म ऊचिवान् उवाच । तस्य वंशं उत्तानबर्हिरानर्त इत्यादिना वक्ष्यति । आदौ तावत् कन्यावृत्तांतमाह ।
सुकन्या नामेत्यादिना । भार्गवस्य च्यवनस्य अभद्रं अपराधः मुग्धेयं मम कन्या क्षंतव्यं त्वया ८

भा०न० इत्युच्यमानेकतिवर्षाण्यस्याविवाहःकृतोनवेत्यादिवाक्यैःतदभिप्रायंज्ञात्वातस्मैदुहितरंप्रादात्।हेईश्वरौसद्वै
५ द्यौयुवांमह्यंवयस्तारुण्यंदत्तंसंपादयतां।असोमपोःसोमपानरहितयोरपिवांयुवयोःसोमस्यग्रहंसोमपूर्णपा
त्रंग्रहीष्येदास्यामीति।युवांसोमेनयक्ष्यइत्यर्थः।ऐंद्रवायवंगृह्णातीत्यादिषुद्व्यादेवतासंबंधानुपपत्त्यागृह्णाने

तदभिप्रायमाज्ञाय प्रादाद्दुहितरंमुनिः कृच्छ्रान्मुक्तस्तमामंत्र्यपुरंप्रायात्समाहितः ९ सुकन्याच्यवनंप्रा
प्यपतिंपरमकोपनं प्रीणयामासचित्तज्ञाअप्रमत्तानुवृत्तिभिः १० कस्यचित्त्वथकालस्यनासत्यावाश्र श्र
मागतौ तौपूजयित्वाप्रोवाचवयोमेदत्तमीश्वरौ ११ ग्रहंग्रहीष्येसोमस्ययज्ञेवामप्यसोमपोः क्रियतां
मेवयोरूपंप्रमदानांयदीप्सितं १२ बाढमित्यूचतुर्विप्रमभिनंद्यभिषक्तमौ निमज्जतांभवानस्मिन्
ह्रदेसिद्धविनिर्मिते १३ इत्युक्तोजरयाग्रस्तदेहोधमनिसंततः ह्रदंप्रवेशितोश्विभ्यांवलीपलितवि
प्रियः १४ पुरुषास्त्रयउत्तस्थुरपीच्यावनिताप्रियाः पद्मस्रजःकुंडलिनस्तुल्यरूपाःसुवाससः १५ राम
तान्निरीक्ष्यवरारोहासरूपान्सूर्यवर्चसः अजानंतीपतिंसाध्वीअश्विनौशरणंययौ १६ दर्शयित्वा ५
पतिंतस्यैपातिव्रत्येनतोषितौ ऋषिमामंत्र्य ययतुर्विमानेनत्रिविष्टपं १७

र्गपर्यवसायित्वात्।बाढमित्यभिनंद्यभवानस्मिन्निमज्जतामित्यूचतुः।ह्रदप्रवेशात्तावपितमनुह्रदंगृही
त्वाप्रविष्टावित्यर्थः।अश्विनौशरणंययौ।युवांपृथक्कृत्वामत्पतिंदर्शयतमिति।प्रार्थयामासेत्यर्थः १६ १७

प्रार्थयामासेत्यर्थः।प्रलंभितोवंचितः।हेअसतिअसंमतंअनभीष्टं।हेसतिकुलप्रसूतेतेमतिरन्यथातंद्विपर्य

यक्ष्यमाणोथशर्यातिश्च्यवनस्याश्रमंगतः ददर्शदुहितुःपार्श्वेपुरुषंसूर्यवर्चसं १८ राजादुहितरंप्राहकृ
तपादाभिवंदनां आशिषश्चाप्रयुंजानोनातिप्रीतमनाइव १९ चिकीर्षितंतेकिमिदंपतिस्त्वयाप्रलंभि
तोलोकनमस्कृतोमुनिः यत्त्वंजराग्रस्तमसत्यसंमतंविहायजारंभजसेमुमध्वगं २० कथंमतिस्तेवि
गतान्यथासतांकुलप्रसूतेकुलदूषणंत्विदं बिभर्षिजारंयदपत्रपाकुलंपितुश्चभर्तुश्चनयस्यधस्तमः
२१ एवंब्रुवाणंपितरंस्मयमानाशुचिस्मिता उवाचतातजामातातवैषभृगुनंदनः २२ शशंसपित्रे
तत्सर्वंवयोरूपाभिलंभनं विस्मितःपरमःप्रीतस्तनयांपरिषस्वजे २३ सोमेनयाजयन्वीरंग्रहंसोम
स्यचाग्रहीत् असोमपोरप्यश्विनोश्च्यवनःस्वेनतेजसा २४ हंतुंतमाददेवज्रंसद्योमन्युरमर्षितः॥
सवज्रंस्तंभयामासभुजमिंद्रस्यभार्गवः २५ अन्वजानंस्ततःसर्वेग्रहंसोमस्यचाश्विनोः भिषजाविति
यत्पूर्वंसोमाहुत्याबहिःकृतौ २६ उत्तानबर्हिरानर्तोभूरिषेणइतित्रयः शर्यातेरभवन्पुत्राआनर्ताद्रे
वतोभवत् २७ सोंतःसमुद्रेनगरींविनिर्मायकुशस्थलीं आस्थितोभुंक्तविषयानानर्तादीनरिंदमश्

येणकथमवगताअवसन्नाअध्यवासितेनिवातद्वेवाहकुलदूषणंत्विदमित्यादि।सद्यस्तत्क्षणमेवमन्युर्यस्य
सद्वेगः।विषयान्देशान्अभुंक्तअपालयत् २८

ककुद्मी ज्येष्ठो यस्मिन् २८ विभुं ब्रह्माणं न लब्धः क्षणो वसरो येन आद्यं ब्रह्माणं नत्वा ये हृदये कृताः सर्वे काले

तस्य पुत्रशतं जज्ञे ककुद्मिज्येष्ठमुत्तमं ककुद्मी रेवतीं कन्यां स्वामादाय विभुं गतः २९ कन्यावरं परिप्रष्टुं ब्रह्मलोकमपावृतं आवर्तमाने गांधर्वे स्थितोलब्धक्षणः क्षणं ३० तदंत आद्यमानम्य स्वाभिप्रायं न्यवेदयत् तच्छ्रुत्वा भगवान् ब्रह्मा प्रहस्य तमुवाच ह ३१ अहो राजन्निरुद्धास्ते कालेन हृदि ये कृताः तत्पुत्रपौत्रनप्तॄणां गोत्राणि च न शृण्महे ३२ कालोभियातस्त्रिनवचतुर्युगविकल्पितः तद्गच्छ देवदेवांशो बलदेवो महाबलः ३३ कन्यारत्नमिदं राजन्नररत्नाय देहि भोः भुवो भारावताराय भगवान् भूतभावनः ३४ अवतीर्णो निजांशेन पुण्यश्रवणकीर्तनः इत्यादिष्टोभिवंद्याजं नृपः स्वपुरमागतः ३५ त्यक्तं पुण्यजनत्रासाद्भ्रातृभिर्दिक्ष्ववस्थितैः सुतां दत्वानवद्यांगीं बलाय बलशालिने बदर्याख्यं ततो राजा प्रागान्नारायणाश्रमं ३६ इति श्रीभागवते महापुराणे नवमस्कंधे तृतीयोध्यायः श्रीवासुदेवाय नमः

नविरुद्धाः संहृताः ।। त्रिनवसप्तविंशतियुगानि तैर्विशिष्टः कालोभियातो विभक्तः ।। यो देवस्यांशोस्ति तस्मै नररत्नाय देहि । तदेवाह । भुव इति पुण्यजनत्रासाद्यक्षभयात्सर्वे मे बधुः तत् भ्रातृभिस्त्यक्तं ३६ इति नवमे तृतीयः

चतुर्थे मनुपुत्रस्य नभगस्य कथोच्यते तत्पौत्रस्यांबरीषस्य कृत्याप्रतिहतायतः नभगस्य वंशमाह नभगस्यापत्यं नाभागः नाभागादंबरीषो महाभागवतो भूदिति वक्ष्यन् तद्धेतुत्वेन वंशप्रवर्तकस्य नाभागस्य निःकपटं चरितं तेन च श्रीरुद्रप्रसादमाह यं ततमित्यादिना ब्रह्मचारिणं बहुकालं गुरुकुले वसंतं नैष्ठिकोसाविति मत्वा विभागसमये तस्मै भागमप्रकल्प्यैव भ्रातरः सर्वदायं विभज्य गृहीत्वा पश्चाद्गुरुकुलादागतं यं भागार्थिनं कविं विद्वांसं यविष्ठं प्रति तं तातं पितरं दायं व्यभजंतेत्यर्थः १ एतदेव प्रश्नोत्तराभ्यां दर्शयति तत्र नाभागः पृच्छति हे भ्रातरः मह्यं किमभंक्त व्यभ

श्रीशुक उवाच नाभागो नभगापत्यं यं ततं भ्रातरः कविं यविष्ठं व्यभजन् दायं ब्रह्मचारिणमागतं १ भ्रातरोभंक्त किं मह्यं भजाम पितरं तव त्वां ममार्यास्तताभांक्षुर्मा पुत्रक तदादृथाः २ इमे अंगिरसः सत्रमासतेद्य सुमेधसः षष्ठं षष्ठमुपेत्याहः कवे मुह्यंति कर्मणि ३

ऊंत कं भागं मदर्थं यूयं प्रकल्पितवंतः भ्रातर आहुः तदा विस्मृतमस्माभिरिदानीं तु नवपितरं भजाम विभजामः त्वं पितरं गृहाणेत्यर्थः स च पितरं गत्वा हे तत हे तात आर्याः श्रेष्ठाः मम त्वामभांक्षुः भागं चक्रुः मदीयो भागस्त्वमित्यर्थः पाठांतरे हे तात किमिदं ममाभांक्षुः भजाम पितरं तवेत्युक्तवंत आर्यास्त्वां मह्यं किमर्थं ददुरित्यर्थः पिता हहे पुत्रक तद्वचस्तेन्मा आदृथाः प्रतारणमात्रं तैः कृतं तस्मिन्नादरं माकार्षीः नह्यहं दायद्रव्यं भोगसाधनमित्यर्थः २ तथापि ते भोगत्वे न दत्तो हं तव जीवनोपायं उपदेक्ष्यामीत्याह इमे इति सपादाभ्यां द्वाभ्यां अभिप्लवः षडहो भवति एवं षडहो भवतीति विहितेषु षडहेष्वावर्त्यमानेषु षष्ठं षष्ठमहः कर्मोपेत्य प्राप्य कर्मणि तदनुष्ठाने सुमेधसोपि ते स्तत्र विशेषाज्ञानेन मु

भा० न०
७

तान्महात्मनोपित्वं इदमिक्ष्वाकोरिदमितिचयेयज्ञेनदक्षिणयेतिचवैश्वदेवेद्वेसूक्तेशंसययाचयततःकर्मणिसमा
प्तेसतितेस्वर्यंतःस्वर्गंगच्छंतःस्वसत्रेपरिशेषितमवशिष्टमात्मनोधनंतेतुभ्यंदास्यंति अथतस्मात्तान्ग
च्छेतितथेत्यादिश्रुकवाक्यंतथासकृतवान्सत्रपरिशेषितंसत्रावशिष्टंधनं ४ ५ पुरुषःश्रीरुद्रःदृश्यत
इतिदर्शनंशरीरंकृष्णंदर्शनंयस्यसःवास्तुकंयज्ञभूमिगतंवस्तुधनंममेत्युवाच ६ तर्हिस्मतदेवममेदमि

तांस्त्वंसंशायसूक्तेद्वेवैश्वदेवेमहात्मनः तेस्वर्यंतोधनंसत्रपरिशेषितमात्मनः ४ दास्यंत्यथततोगच्छ
तथासकृतवान्यथा तस्मैदत्वाययुःस्वर्गंतेसत्रपरिशेषितं ५ तंकश्चित्स्वीकरिष्यंतंपुरुषःकृष्णदर्श
नः उवाचोत्तरतोभ्येत्यममेदंवास्तुकंवसु ६ ममेदमृषिभिर्दत्तमितितर्हिस्ममानवः स्यान्नौतेपितरि
प्रश्नःपृष्टवान्पितरंतथा ७ यज्ञवास्तुगतंसर्वमुच्छिष्टमृषयःक्वचित् चक्रुर्हिभागंरुद्रायसदेवःस
र्वमर्हति ८ नाभागस्तंप्रणम्याहतवेशकिलवास्तुकं इत्याहमेपिताब्रह्मञ्छिरसात्वांप्रसादये ९ य राम ७
त्तेपितावदद्धर्मंत्वंचसत्यंप्रभाषसे ददामितेमंत्रदृशोज्ञानंब्रह्मसनातनं १०

तिमानवोनाभागःउवाचपुनश्चरुद्रउवाचनौआवयोरस्मिन्विवादेतेपितरिप्रश्नःस्यादितिपृष्टवानितिश्रुकोक्तिः ७ पृष्टस्य
मानवस्यवाक्यंयज्ञवास्तुगतमितिउच्छिष्टमुर्वरितंक्वचिदितिदक्षाध्वरेउच्छेषणभागोवैरुद्रइतिश्रुतेश्चकिंचसदेवई
श्वरःसर्वमर्हतिकिंपुनर्यज्ञावशिष्टमित्यर्थः ८ ९ श्रीरुद्रआहयत्तइति १०

इदमाख्यानंश्रुतिप्रसिद्धंतथाहिबह्वृचब्राह्मणंनाभानेदिष्ठंवैमानवंब्रह्मचर्यंवसंतंभ्रातरोनिरभजन्सो
ब्रवीदित्यादि ११ अस्याख्यानस्यस्मरणफलमाह यएतदितिआत्मनोगतिंचप्राप्नोतीतिशेषः १२ क्वचिदपिन
प्रतिहतोब्रह्मशापोपिब्राह्मणेनदुर्वाससानिर्मितःकृत्यानलोपियंनास्पृशत् अतोसौमहाभागवतःअतए
वकृतीपुण्यवान् १३ तस्यश्रोतुमिच्छामिचरितंमितिशेषः ब्रह्मदंडःकृत्यानिलःनप्राभूत् नसमर्थोबभूव
१४

गृहाणद्रविणंदत्तंमत्सत्रेपरिशेषितं इत्युक्त्वांतर्हितोरुद्रोभगवान्सत्यवत्सलः ११ यएतत्संस्मरेत्प्रा
तःसायंचसुसमाहितः कविर्भवतिमंत्रज्ञोगतिंचैवतथात्मनः १२ नाभागादंबरीषोभूत्महाभाग
वतःकृती नास्पृशत्ब्रह्मशापोपियंनप्रतिहतःक्वचित् १३ राजोवाच भगवन्श्रोतुमिच्छामिरा
जर्षेस्तस्यधीमतः नप्राभूद्यत्रनिर्मुक्तोब्रह्मदंडोदुरत्ययः १४ श्रीशुकउवाच अंबरीषोमहा
भागःसप्तद्वीपवतीमहीं अव्ययांचश्रियंलब्ध्वाविभवंचातुलंभुवि १५
श्रियंसंपदंविभवमैश्वर्यंअतुलंनिरूपमं १५ भुवमस्त

पुंसामतिदुर्लभमपि तत्सर्वं स्वप्नवत्संस्कृतं निरूपितं अनुपादेयं मेने तत्र हेतुः विभवस्य निर्वाणं नाशं विद्वान्
यतः येन विभवेन लब्धा ज्ञेन वा पुमान् तमो विशति मोहे निमज्जति १६ नन्वेवं जानंतोपि विभवैषिणो दृश्यंते तत्रा
ह वासुदेव इति भावं भक्तिं प्राप्तः येन भावेनेदं विश्वं लोष्टवत् अतितुच्छं स्मृतं १७ भक्तिमेव सर्वेंद्रियाणां

मेने ति दुर्लभं पुंसां सर्वं तत्स्वप्नसंस्कृतं विद्वान् विभवनिर्वाणं तमो विशति यत्पुमान् १६ वासुदेवे
भगवति तद्भक्तेषु च साधुषु प्राप्तो भावं परं विश्वं येनेदं लोष्टवत्स्मृतं १७ स वै मनः कृष्णपदारविंदयो
र्वचांसि वैकुंठगुणानुवर्णने करौ हरेर्मंदिरमार्जनादिषु श्रुतिं चकाराच्युतसत्कथोदये १८ मुकुंद
लिंगालयदर्शने दृशौ तद्भृत्यगात्रस्पर्शेंगसंगमं घ्राणं च तत्पादसरोजसौरभे श्रीमत्तुलस्या रसनां
तदर्पिते १९ पादौ हरेः क्षेत्रपदानुसर्पणे शिरो हृषीकेशपदाभिवंदने कामं च दास्ये न तु कामकाम्य
या यथोत्तमश्लोकजनाश्रया रतिः २०

गवत्परत्वकथनेन प्रपंचयति स वा इति त्रिभिः श्रुतिं श्रोत्रं अच्युतस्य सत्कथानामुदये श्रवणे चकारेत्यस्य सर्वत्रा
न्वयः १८ मुकुंदस्य लिंगानां मालयानि स्थानानि तेषां दर्शने दृशौ नेत्रे श्रीमत्याः तुलस्याः तत्पादसरोजे नयत्सौ
रभं तस्मिन् तदर्पिते तस्मिन्निवेदितान्नादौ १९ कामं स्रक्चंदनादिसेवां दास्ये निमित्ते तत्प्रसादस्वीकाराय न तु
कामकाम्यया विषयेच्छया कथं चकार उत्तमश्लोकजनाश्रया रतिर्यथा भवेत्तथा अनेन तद्भक्तेषु च परं भावं प्राप्त इ

त्युक्तं २० एवमिति अधोक्षजे परे स्वस्य कर्मकलापं विदधत् समर्पयन् तन्निष्ठैः भग
वत्परैर्विप्रैः अभिहितः शिक्षितः सन् महीं शशास पालयामास अनेनाधिकृतधर्मोपि यथावद्दर्शितः २१ किंच
यज्ञाधिष्ठातारमीश्वरं अश्वमेधैरीजे आराधयामास महाविभूत्या उपचितान्यंगानि दक्षिणाश्च येषु तैः वसिष्ठा

एवं सदा कर्मकलापमात्मनः परेधियज्ञे भगवत्यधोक्षजे सर्वात्मभावं विदधन्महीमिमां तन्निष्ठविप्राभि
हितः शशास ह २१ ईजेश्वमेधैरधियज्ञमीश्वरं महाविभूत्योपचितांगदक्षिणैः ततैर्वसिष्ठासितगौत
मादिभिर्धन्वन्यभिस्रोतमसौ सरस्वतीं २२ यस्य क्रतुषु गीर्वाणैः सदस्या ऋत्विजो जनाः तुल्यरू
पास्त्वनिमिषा व्यदृश्यंत सुवाससः २३ स्वर्गो न प्रार्थितो यस्य मनुजैरमरप्रियः शृण्वद्भिरुपगाय
द्भिरुत्तमश्लोकचेष्टितं २४ संमर्दयंति यत्कामाः स्वाराज्यपरिभाविताः दुर्लभा नापि सिद्धानां
मुकुंदं हृदि पश्यतः २५ स इत्थं भक्तियोगेन तपोयुक्तेन पार्थिवः स्वधर्मेण हरिं प्रीणन् कामान्सर्वान्
शनैर्जहौ २६

द्यादिभिर्हेतुभूतैः ततैः विस्तृतैः धन्वनि धन्वदेशे निरुदके सरस्वतीमभिस्रोतं तस्याः प्रतिलोममित्यर्थः २२ किंच यस्य क्रतुषु सदस्यादयो गी
र्वाणैः सह रूपणादिभिस्तुल्यरूपा व्यदृश्यंत सदस्यमितिचतुर्थ्यंतान्वयः न चैवानां
निमेषाभावात् देवलक्षण्यं यतः अनिमिषाश्च व्यदृश्यंत नानिमिषंतीति तथा आश्चर्यदर्शनोत्सुक्येन तेषां निमेषो परमादिति भावः २३
यस्य यदीयैर्मनुजैरपि स्वर्गो न प्रार्थितः तस्य तु का वार्ता २४ आस्तां स्वर्गप्रार्थनं शंकापि यद्यतः मुकुंदं हृदि पश्यतस्तान् कामान् विष
यान् संमर्दयंति न हर्षयंति कथंभूताः स्वाराज्येन स्वरूपसुखेन परिभाविताः अतिशायिताः अतएव सिद्धानामपि दुर्लभाः यानि ति
पाठे मनुजानां विशेषणं यामिति पाठे यमं बरीषं पश्यतामिति पाठे सिद्धानां विशेषणं २५ एवं भगवदाराधनपरस्य कामाद्युपेक्षाने

भा० न०
९

नन्वेवंभूतोसौ कथं प्रतिपक्षान् जयेत्तत्राह तस्मादिति २८ तदेवं तस्य वैराग्यादिकं हरिभक्तिं चोक्त्वा ब्रह्मदंडोयत्र न प्राभूदि
ति यदुक्तं तदेव द्वादशीव्रतनिष्ठां कथयन्नाह आरिराधयिषुरित्यादि यावदध्यायसमाप्ति अर्चयत् अडागमाभाव
आर्षः ३० ३१ ब्राह्मणांश्च पूजयामास सिद्धार्थान् आप्तकामान् पूजां नपेक्षानपि ३२ रूप्यांघ्रीणां रूप्यखुरा

गृहेषु दारेषु सुतेषु बंधुषु द्विजोत्तमस्यंदनवाजिवस्तुषु अक्षय्यरत्नाभरणायुधादिष्वनंतकोशेष्व
करोदसन्मतिं २७ तस्मा अदाद्धरिश्चक्रं प्रत्यनीकभयावहं एकांतभक्तिभावेन प्रीतो भृत्याभिरक्षणं
२८ आरिराधयिषुः कृष्णं महिष्या तुल्यशीलया युक्तः सांवत्सरं वीरो दधार द्वादशीव्रतं २९ व्रतां
ते कार्तिके मासि त्रिरात्रं समुपोषितः स्नातः कदाचित्कालिंद्यां हरिं मधुवनेऽर्चयत् ३० महाभिषेकवि
धिना सर्वोपस्करसंपदा अभिषिच्यांबराकल्पैर्गंधमाल्यार्हणादिभिः ३१ (यथा चैव्यवहाराय पादमूलमुपा
गतः) ३१ तद्गतांतरभावेन पूजयामास केशवं ब्राह्मणांश्च महाभागान्सिद्धार्थानपि भक्ति
तः ३२ गवां रुक्मविषाणीनां रूप्यांघ्रीणां सुवाससां पयःशीलवयोरूपवत्सोपस्करसंपदां
३३ प्राहिणोत्साधुविप्रेभ्यो गृहेषु न्यर्बुदानि षट् भोजयित्वा द्विजानग्रे स्वाद्वन्नं गुणवत्तमं ३४
णां पयःशीलादिसंपद्योयासां तासां ३३ न्यर्बुदानि षट् षष्टिकोटीः ३६ कृष्णायनमः ६

तर्हि तदैव दुर्वासा अतिथिः साक्षात्प्रत्यक्षोभूत् ३५ आनर्च अर्चितवान् अभ्यवहाराय भोजनाय ३६ आवश्यकं नै
यमिकं माध्याह्निकं कर्तुं गतः बृहत् ब्रह्म ३७ ३८ धर्मसंकटमेवाह यद्यतः ब्राह्मणातिक्रमे दोषः अधर्मः द्वादश्यामपारणे
पि दोषः व्रतवैगुण्यं यत् कृत्वा यस्मिन् कृते ३९ एवं द्विजैः सह विचार्य निश्चिनोति अंभसेति व्रतस्य पारणं समाप्तिं तत्

लब्धकामैरनुज्ञातः पारणायोपचक्रमे तस्य तर्ह्यतिथिः साक्षात् दुर्वासा भगवानभूत् ३५ तमानर्चातिथिं भू
पः प्रत्युत्थानासनार्हणैः ययाचेऽभ्यवहाराय पादमूलमुपागतः ३६ प्रतिनंद्य स तद्याच्ञां कर्तुमावश्य
कं गतः निममज्ज बृहद्ध्यायन्कालिंदीसलिले शुभे ३७ मुहूर्तार्धावशिष्टायां द्वादश्यां पारणं प्रति चिंत
यामास धर्मज्ञो द्विजैस्तद्धर्मसंकटे ३८ ब्राह्मणातिक्रमे दोषो द्वादश्यां यदपारणे यत्कृत्वा साधु मे भू
याद्धर्मो वा न मां स्पृशेत् ३९ अंभसा केवलेनाथ करिष्ये व्रतपारणं प्राहुरब्भक्षणं विप्रा ह्यशितं नाशि
इत्यपः प्राश्य राजर्षिश्चिंतयन्मनसाच्युतं प्रत्यचष्ट कुरुश्रेष्ठ द्विजागमनमेव सः ४१ तं च तत् ४०

अशितमाहुः अशितं नेति चाहुः श्रुतिश्च अपोश्नाति नैवाशितं नैवानशितमिति ४० प्रत्यचष्ट प्रत्यैक्ष
त ४१ ४२

भा॰ नं॰ ९

अवलत्कंपमानं गात्रं यस्य तं कुटिलां कुटिलमाननं यस्य ४२ ४३ क्रुद्धमहिं पावको दवाग्निरिव ४८ निष्फलमुद्वीक्ष्य ४९
अनुषक्तं पृष्ठतः संलग्नं मेरोर्गुहां विविक्षुरधावत ५० ५१ अरणमेषमाणः शरणमिच्छन् अजिततेजसः हरेश्चक्रात् ५२

दुर्वासा यमुनाकूलात्कृतावश्यक आगतः राज्ञाभिनंदितस्तस्य बुबुधे चेष्टितं धिया ४२ मन्युना प्रचलद्गा
त्रो भ्रुकुटीकुटिलाननः बुभुक्षितश्च सुतरां कृतांजलिमभाषत ४३ अहो अस्य नृशंसस्य श्रियोन्मत्त
स्य पश्यत धर्मव्यतिक्रमं विष्णोरभक्तस्येशमानिनः ४४ यो मामतिथिमायातमातिथ्येन निमंत्र्य च अ
दत्त्वा भुक्तवांस्तस्य सद्यस्ते दर्शये फलं ४५ एवं ब्रुवाण उत्कृत्य जटां रोषविदीपितः तया स निर्ममे तस्मै कृ
त्यां कालानलोपमां ४६ तामापतंतीं ज्वलतीमसिहस्तां पदा भुवं वेपयंतीं समुद्वीक्ष्य न चचालप
दान्नृपः ४७ प्राग्दिष्टं भृत्यरक्षायां पुरुषेण महात्मना ददाह कृत्यां तां चक्रं क्रुद्धाहिमिव पावकः ४८
तदभिद्रवदुद्वीक्ष्य स्वप्रयासं च निःफलं दुर्वासा दुद्रुवे भीतो दिक्षु प्राणपरीप्सया ४९ तमन्वधावद्भगवद्र
थांगं दावाग्निरुद्धूतशिखो यथाहिं तथानुषक्तं मुनिरीक्षमाणो गुहां विविक्षुः प्रससार मेरोः ५० दि
शो नभः क्ष्मां विवरान्समुद्रांल्लोकान्सपालांस्त्रिदिवं गतः सः यतो यतो धावति तत्र तत्र सुदर्शनं दुःप्रसहं
ददर्श ५१ अलब्धनाथः स यदा कुतश्चित्संत्रस्तचित्तोऽरणमेषमाणः देवं विरिंचं समगाद्विधातस्त्राह्यात्म
योनेऽजिततेजसो मां ५२ १०

एतत्सर्वं यस्य भ्रूभंगमात्रेण तिरोभविष्यति कदा क्रीडाया अवसाने तदपि कदा द्विपरार्धसंज्ञे काले ५३ अतो वयं सर्वे यस्य नि
यममाज्ञां प्रपन्नाः प्राप्ताः संतो लोकहितं यथा भवत्येवं तन्नियमं मूर्ध्नार्पितं वहामः अतस्तद्भक्तद्रोहिणं त्वां रक्षितुं न समर्थो ह
मिति शेषः यत्र शेते नित्यसंबंधात् ५४ ५५ श्रीरुद्रोपि प्रत्याचष्टे वयमिति चतुर्भिः तस्मिन्महति महत्त्वमेवाह यस्मिन्परमेश्व

श्रीब्रह्मोवाच स्थानं मदीयं सहविश्वमेतत्क्रीडावसाने द्विपरार्धसंज्ञे भ्रूभंगमात्रेण हि संदिधक्षोः कालात्म
नो यस्य तिरोभविष्यति ५३ अहं भवो दक्षभृगुप्रधानाः प्रजेशभूतेशसुरेशमुख्याः सर्वे वयं यन्नियमं प्र
त्या पन्ना मूर्ध्नार्पितं लोकहितं वहामः ५४ प्रत्याख्यातो विरिंचेन विष्णुचक्रोपतापितः दुर्वासाः शरणं यातः शर्वं कैला
सवासिनं ५५ श्रीरुद्र उवाच वयं न तात प्रभवाम भूम्नि यस्मिन्परेऽन्येप्यजजीवकोशाः भवंति का
लेन भवंति हीदृशाः सहस्रशो यत्र वयं भ्रमामः ५६ अहं सनत्कुमारश्च नारदो भगवानजः कपिलोऽपांतरतमो
देवलो धर्म आसुरिः ५७ मरीचिप्रमुखाश्चान्ये सिद्धेशाः पारदर्शिनाः विदाम न वयं सर्वे यन्मायां माययाऽ
वृताः ५८ तस्य विश्वेश्वरस्येदं शस्त्रं दुर्विषहं हि नः तमेव शरणं याहि हरिस्ते शं विधास्यति ५९ त
तो निराशो दुर्वासाः पदं भगवतो ययौ वैकुंठाख्यं यदध्यास्ते श्रीनिवासः श्रिया सह ६० संदह्यमानोऽजित
शस्त्रवह्निना तत्पादमूले पतितः सवेपथुः आहाच्युतानंत सदीप्सित प्रभो कृतागसं मावहि विश्वभावन ६१

रेअजा ब्राह्मणस्त एव जीवास्तेषां कोशा उपाधिभूता ब्रह्मांडविग्रहाः ईदृशा दृश्यमानब्रह्मांडप्रमाणा अन्येपि भ
वंति जायंते नश्यंति च यत्र येषु ब्रह्मांडेषु लोकेशाभिमानिनो वयं भ्रमामः ५६ ननु सर्वज्ञस्य तव भ्रमः कुतस्तत्राह
अहमिति पारदर्शिनाः सर्वज्ञा अपि यस्य मायां न विद्मः ५७
हेस्वनामीक्षितमामां अवहि पाहि ५८

भा० न० ११ अपराधं निवेदयन्प्रार्थयते अजानतेति अघं दुःखं अपचितिं निःकृतिं न पश्यामीति चेत् तत्राह यस्य तव ना

अजानता ते परमानुभावं कृतं मयाघं भवतः प्रियाणां विधेहि तस्यापचितिं विधातर्मु
च्येत यन्नाम्न्युदिते नारकोऽपि ६२ श्रीभगवानुवाच अहं भक्तपराधीनो ह्यस्वतंत्र इव द्वि
ज साधुभिर्ग्रस्तहृदयो भक्तैर्भक्तजनप्रियः ६३ नाहमात्मानमाशासे मद्भक्तैः साधुभि
र्विना श्रियं चात्यंतिकीं ब्रह्मन्येषां गतिरहं परा ६४ ये दारागारपुत्राप्तान्प्राणान्वित्तमि
मं परं हित्वा मां शरणं याताः कथं तांस्त्यक्तुमुत्सहे ६५ ११

म्निकीर्तिते नरकस्थोऽपि मुच्यते तस्य तव किमशक्यमिति भावः ६२ ६३ न आशासे न स्पृहयामि ६४
इमं परं च लोकं हित्वा ६५ प्रतीतं प्राप्तमपि ६७ ओं नमो भगवते वासुदेवा
य०

प्रतीतं प्राप्तमपि। आत्मनस्त्वैव अभिचारो हिंसा यतो भूर्वतमेव यातु। अशिवमनर्थं तपो विद्यासंपन्नस्यम
मकथमनर्थः समजनि तत् तस्मात् विस्मयं काषीरित्याह तप इति इति नवमे चतुर्थः पंचमे

मयि निर्बद्धहृदयाः साधवः समदर्शनाः वशीकुर्वंति मां भक्त्या सत्स्त्रियः सत्पतिं यथा ६६ मत्सेव
या प्रतीतं च सालोक्यादिचतुष्टयं नेच्छंति सेवया पूर्णाः कुतोऽन्यत्कालविद्रुतं ६७ साधवो हृद
यं मह्यं साधूनां हृदयं त्वहं मदन्यत्ते न जानंति नाहं तेभ्यो मनागपि ६८ उपायं कथयिष्यामि तव वि
प्र शृणुष्व तत् अयं ह्यात्माभिचारस्ते यतस्त्वं स्यात्तु विभवान् ६[illegible] साधुषु प्रहितं तेजः प्रहर्तुः कुरुते
शिवं तपो विद्या च विप्राणां निःश्रेयसकरे उभे ६९ एते वै दुर्विनीतस्य कल्पेते कर्तुरन्यथा ब्रह्मं
स्तं गच्छ भद्रं ते नाभागतनयं नृपं क्षमापय महाभागं ततः शांतिर्भविष्यति ७१ इति श्रीभाग
वते महापुराणे नवमस्कंधे अंबरीषचरिते चतुर्थोऽध्यायः शुक उवाच एवं भगवतादिष्टो
दुर्वासाश्चक्रतापितः अंबरीषमुपावृत्य तत्पादौ दुःखितोऽग्रहीत् १ तस्य सोद्यममावीक्ष्य पाद
स्पर्शविलज्जितः अस्तावीत्तद्धरेरस्त्रं कृपया पीडितो भृशं २

विष्णुचक्रं तु प्रसाद्य प्राणसंकटात्। दुर्वासा रक्षितस्तेन तथा तद्वन्नमर्प्यते १ स उद्यमनमिति छेदः सुलो
पश्छांदसः २

भा०न० ज्योतिषाणां नक्षत्राणां पतिः सोमस्त्वं मात्राणि इंद्रियाणि च। तच्छक्त्यैव भूम्यादयः स्वस्वकार्यं कुर्वंतीत्यर्थः ३॥ सहस्राणि
१२ अराणि यस्य हे सहस्रार स्वस्ति शरणं भूयाः। हे ईडस्पते पृथ्वीपते ब्राह्मणरक्षणं तव युक्तमेवेत्याह त्वं धर्म इति। नेवत्त
वेयमतिक्रमतीति ऋतमित्याह। पौरुषं पुरुषस्येश्वरस्य परं तेजः सामर्थ्यं त्वं। अयंभावः स एष इत्यादि श्रुतिप्रसिद्धं भवं

त्वमग्निर्भगवान्सूर्यस्त्वं सोमो ज्योतिषां पतिः त्वमापस्त्वं क्षितिर्व्योम वायुर्मात्रेंद्रियाणि च ३ सुदर्शन न
मस्तुभ्यं सहस्राराच्युतप्रिय सर्वास्त्रघातिन्विप्राय स्वस्ति भूया इडस्पते ४ त्वं धर्मस्त्वमृतं सत्यं त्वं यज्ञो
खिलयज्ञभुक् त्वं लोकपालः सर्वात्मा त्वं तेजः पौरुषं परं ५ नमः सुनाभाखिलधर्मसेतवे ह्यधर्म
शीलासुरधूमकेतवे त्रैलोक्यगोपाय विशुद्धवर्चसे मनोजवायाद्भुतकर्मणे गृणे ६ त्वत्तेजसा
धर्ममयेन संहृतं तमः प्रकाशश्च दृशो महात्मनां दुरत्ययस्ते महिमा गिरां पते त्वद्रूपमेतत्सदसत्परा राम
वरं ७ १२

गवतः शोभनं दर्शनं हि सुदर्शनं। तत एव सर्वज्ञातं अतस्त्वमेव सर्वात्मेति ५॥ हे सुनाभ अद्भुतकर्माणं त्वां कः स्तोतुं
समर्थः। अद्भुतकर्म त्वमेवाह। अखिलानां धर्माणां सेतवे मर्यादारूपाय। अत एवाधर्मशीलानामसुराणां धू
मकेतवे दाहकाय। त्रैलोक्यं गोपायतीति तथा। विशुद्धं अत्युज्ज्वलं वर्चस्तेजो यस्य तस्मै। तदेव प्रपंचयति त्व
त्तेजसेति द्वाभ्यां। सूर्यादीनां प्रकाशश्च त्वय्येवारूप्यते प्रकाश्यत इति त्वद्रूपं ७

हे अजित अनंजनेन श्रीहरिणा यदा विसृष्टः त्वं तदा दैत्यदानवानां बलं प्रविष्टः सन् तेषां बाह्वादीन् वृश्चन् छिंदन् वि
राजसे यावांतरे ऊरू अंघ्री दैत्यग्रीवा यस्मिन् तत्फलं सर्वं पदेन संधिरार्षः ८ किं च त्वया भगवन्नियुक्तेन खलानामे
व दंडः कार्यः साधवस्तु रक्षणीयाः अतो विप्ररक्षणेनास्मान् अनुगृहाणेत्याह स त्वमिति हे जगत्त्राण स एवंभूतः ख त्वं २

यदा विसृष्टस्त्वमनंजनेन वै बलं प्रविष्टोऽजित दैत्यदानवं बाहूदरोर्वंघ्रिशिरोधराणि वृश्चन्नजस्रं प्रधने वि
राजसे ८ स त्वं जगत्त्राण खलप्रहाणये निरूपितः सर्वसहो गदाभृता विप्रस्य चास्मत्कुलदैवहेतवे विधे
हि भद्रं तदनुग्रहो हि नः ९ यद्यस्ति दत्तमिष्टं वा स्वधर्मो वा स्वनुष्ठितः कुलं नो विप्रदैवं चेद्द्विजो भवतु विज्वरः
१० यदि नो भगवान्प्रीत एकः सर्वगुणाश्रयः सर्वभूतात्मभावेन द्विजो भवतु विज्वरः ११ शुक उवाच
इति संस्तुवतो राज्ञो विष्णुचक्रं सुदर्शनं अशाम्यत्सर्वतो विप्रं प्रदहद्राजयाच्ञया १२ स मुक्तोऽस्त्राग्नि
तापेन दुर्वासाः स्वस्तिमांस्ततः प्रशशंस तमुर्वीशं युंजानः परमाशिषः १३ दुर्वासा उवाच अहो अनंतदा
सानां महत्त्वं दृष्टमद्य मे कृतागसोपि यद्राजन्मंगलानि समीहसे १४

खलानामेव प्रहरणार्थं निरूपितो नियुक्तः अतोस्मत्कुलस्य दैवहेतवे भाग्यलाभाय विप्रस्य भद्रं विधेहि तदेव नोनु
ग्रहः ९ सर्वसुकृतार्पणेन विप्ररक्षां प्रार्थयते यद्यस्तीति द्वाभ्यां विप्रो देवं देवता यस्मिन् तत् १० राज्ञस्तस्यैव
याच्ञया १२ ७

राजेत्यादिश्लोकद्वयंशुकोक्तिः प्रीतोस्मीतिश्लोकद्वयंपुनश्चविप्रोक्तिः १८ १९ आत्मनिमेधायेनातिथ्येन २०
दुःकरः कोनुसाधूनांदुस्त्यजोवामहात्मनां यैः संगृहीतोभगवान्सात्वतामृषभोहरिः १५ यन्नामश्रु
तिमात्रेण पुमान्भवतिनिर्मलः तस्यतीर्थपदः किंवादासानामवशिष्यते १६
२ राजानमकृताहारःप्रत्यागमनकांक्षया चरणावुपसंगृह्यप्रसाद्यसमभोजयत् १७
१ राजन्ननुगृहीतोहंत्वयातिकरुणात्मना मदघंपृष्ठतःकृत्वाप्राणायत्मेभिरक्षिताः १८
सोशित्वादृतमानीतमातिथ्यंसार्वकामिकं तृप्तात्मानृपतिंप्राहभुज्यतामितिसादरं १९
२१ कर्मावदातमेतत्तेगायंतिस्वःस्त्रियोमुहुः कीर्तिंपरमपुण्यंचकीर्तयिष्यतिभूरियं २१ श्रीतोस्म शुकउवाच
२० नुगृहीतोस्मितवभागवतस्यवै दर्शनस्पर्शनालापैरातिथ्येनात्ममेधसा २१ कर्मावदातमेतत्ते

भूरियंतत्रस्थोजनः कीर्तयिष्यति २१ २२

क्रहंकाम्हतम्रुश्रीर्भुप्रथ्यश्रवणकीर्तन वासुदेवकंठगद्योनिनेमिरायवांहिं श्री रामायनमः

एवंसंकीर्त्यराजानंदुर्वासाः परितोषितः ययौविहायसामंत्र्यब्रह्मलोकमहेतुकं २२

२३

तस्यधैर्यातिशयमाहगतोमुनिर्यावतामागतः तावत्संवत्सरोतिक्रांतइति २३ द्विजस्योपयोगेनभोजनेनअतिप
वित्रंआहरत्बुभुजे स्ववीर्यंचधैर्यादिलक्षणंपरानुभावंभगवतःप्रभावंमेने २४ एवंविधाअनेकेगुणायस्यसः
विरिंच्यपदसहितान्भोगान्निरयंप्रायानपश्यदित्यर्थः २६ २७ नवमेपंचमः षष्ठेंबरीषस्यवंशमुक्त्वा

संवत्सरोत्यगात्तावद्यावतानागतोगतः मुनिस्तद्दर्शनाकांक्षोराजाब्भक्षोबभूवह २३ गतेथदुर्वाससि
सोंबरीषोद्विजोपयोगातिपवित्रमाहरत् ऋषेर्विमोक्षंव्यसनंचबुद्ध्वामेनेस्ववीर्यंचपरानुभावं २४
एवंविधानेकगुणःसराजापरात्मनिब्रह्मणिवासुदेवे क्रियाकलापैःसमुवाहभक्तिंययाविरिंच्यान्निर
यांश्चकार २५ अथांबरीषस्तनयेषुराज्यंसमानशीलेषुविसृज्यधीरः वनंविवेशात्मनिवासुदेवेम
नोदधद्ध्वस्तगुणप्रवाहः २६ इत्येतत्पुण्यमाख्यानमंबरीषस्यभूपतेः संकीर्तयन्ननुध्यायन्भक्तोभ
गवतोभवेत् २७ इतिश्रीभागवतेमहापुराणेनवमस्कंधेअंबरीषचरितेपंचमोध्यायः शुकउवाच
विरूपःकेतुमाञ्छंभुरंबरीषसुतास्त्रयः विरूपात्पृषदश्वोभूत्तत्पुत्रस्तुरथीतरः १

ततःपरं षष्ठाद्यष्टत्रिरध्यायैरिक्ष्वाकोर्वंशउच्यते १ तत्रषष्ठेशशादादिमंधात्रंतोनिरूप्यते प्रसंगात्सौ
भरेराख्यामंधातृतनयापतेःसंतवेसंतानार्थं १ २

तद्गुरुर्वसिष्ठः प्रोक्षणाय आहूतो वितसंस्काराय ८ त्यक्तो विधिः सदाचारो येन ९ सतु इक्ष्वाकुः ज्ञापकेन वसिष्ठेन राज्ययोगेन विरक्तो योगी स
न् तेन योगेन कलेवरं त्यक्त्वा सयत्परं तत्त्वं तदवाप १० शासत् पालयन् हरिमीजे १२ ८५

भा० न० १४ ये अंगिरसा जनिताः एते रथीतरस्य क्षेत्रे प्रसूतत्वेन रथीतरगोत्राः संतः आंगिरसो वीर्येण प्रसूतत्वादांगिरसाश्च पु
नरपि रथीतराणां अन्येषां जातानां प्रवराः मुख्याः स्मृताः यतः क्षत्रोपेताः ब्राह्मणा इत्यर्थः ३ तदेवं मनोर्द्दश स्रुपु
त्रेषु पृषध्रकविभिश्च विरक्तत्वात् वंशाप्रवर्त्तकौ करूषादीनां च सप्तानां वंशास्तारतम्यक्रमेणोक्ताः इदानीमतिविततमि
क्ष्वाकोर्वंशमाह क्षुवतस्त्वित्यादिना यावत् सोमवंशप्रस्तावः क्षुतं कुर्वतो मनोर्घ्राणतो जज्ञे अश्रद्धायां जनयामास

रथीतरस्याप्रजस्य भार्यायां तंतवेऽर्थितः अंगिरा जनयामास ब्रह्मवर्चस्विनः सुतान् २ एते क्षेत्रे प्रसूता वै
पुनस्त्वांगिरसाः स्मृताः रथीतराणां प्रवराः क्षत्रोपेता द्विजातयः ३ क्षुवतस्तु मनोर्जज्ञे इक्ष्वाकुर्घ्राणतः सु
तः तस्य पुत्रशतज्येष्ठा विकुक्षिनिमिदंडकाः ४ तेषां पुरस्तादभवन्नार्यावर्त्ते नृपा नृप पंचविंशतिः पश्चाच्च
त्रयो मध्ये परेऽन्यतः ५ स एकदाष्टकाश्राद्धे इक्ष्वाकुः सुतमादिशत् मांसमानीयतां मेध्यं विकुक्षे गच्छ माचिरं
६ तथेति स वनं गत्वा मृगान् हत्वा क्रियार्हणान् श्रांतो बुभुक्षितो वीरः शशं चाददपस्मृतिः ७ शेषं निवे
दयामास पित्रे तेन च तद्गुरुः चोदितः प्रोक्षणायाह दुष्टमेतदकर्मकं ८ ज्ञात्वा पुत्रस्य तत्कर्म गुरुणाभिहि १४
तं नृपः देशान्निःसारयामास सुतं त्यक्तविधिं रुषा ९ सतु विप्रेण संवादं ज्ञापकेन समाचरन् त्यक्त्वा कलेव
रं योगी स तेनावाप यत्परं १० पितर्युपरतेऽभ्येत्य विकुक्षिः पृथिवीमिमां शासदीजे हरिं यज्ञैः शशाद इति विश्रुतः ११
शं पुत्रानिति पूर्वोक्तं बाकुल्याभिप्रायेणोति द्रष्टव्यं पुत्राणां शतज्येष्ठाः ४ आर्यावर्तः पुण्यभूमिर्मध्यं विंध्यहिमालयोः तस्मि
न् पुरस्तात्समुद्रपर्यंतं मंडलविभागेन पंचविंशतिर्नृपा अभवन् हे नृप तथैव पश्चाच्च पंचविंशतिः मध्ये तु ज्येष्ठास्त्रयः अपरे
तु दक्षिणोत्तरादिषु विकुक्षिरेव शशाद इति विश्रुत इति वक्ष्यति ५ तत्र हेतुमाह स एकदेति चतुर्भिः ६ क्रियार्हणान् श्राद्धार्हान् आददत् अभक्षयत् ७

दैत्यपुरस्य जयात् पुरंजयः इंद्रो वाहो यस्येतींद्रवाहः ककुदि स्थितत्वेन तत्ककुत्स्थ इति वशाशाद सुतस्य त्रीणि नामा
नि तत्कर्मनिमित्तानि तान्येव व्याचक्षाण आह कृतांत इति सप्तभिः कृतं विश्वं अंतयतीति कृतांतः युगं तस्मिन् तत्र पार्ष्णिग्राहः सहायः
इंद्रो यदि मम वाहनं स्यात्तर्हि दैत्यान् हनिष्यामीति तेन वाहनत्वे इष्टः सन् इंद्रो लज्जया तदंगीकुर्वन् विष्णोर्व

पुरंजयस्तस्य सुत इंद्रवाह इतीरितः ककुत्स्थ इति चाप्युक्तः शृणु नामानि कर्मभिः १२ कृतांत आसीत्सम
रो देवानां सह दानवैः पार्ष्णिग्राहो वृतो वीरो देवैर्दैत्यपराजितैः १३ वचनाद्देवदेवस्य विष्णोर्विश्वात्मन
ः प्रभोः वाहनत्वे वृतस्तस्य बभूवेंद्रो महावृषः १४ स संनद्धो धनुर्दिव्यमादाय विशिखान् शितान् स्तू
यमानः समारुह्य युयुत्सुः ककुदि स्थितः १५ तेजसाप्यायितो विष्णोः पुरुषस्य परात्मनः प्रतीच्यां दि
शि दैत्यानां न्यरुणत् त्रिदशैः पुरं १६ तैस्तस्य चाभूत्प्रधनं तुमुलं लोमहर्षणं यमाय भल्लैरनयद्दैत्यान
न्येऽभिययुर्मृधे १७ तस्येषुपाताभिमुखं युगांताग्निमिवोल्बणं विसृज्य दुद्रुवुर्दैत्या हन्यमानाः स्वमा
लयं १८ जित्वा पुरं धनं सर्वं सश्रीकं वज्रपाणये प्रत्ययच्छत्स राजर्षिरिति नामभिराहृतः १९ पुरंज
यस्य पुत्रोऽभूदनेनास्तत्सुतः पृथुः विश्वगंधिस्ततश्चंद्रो युवनाश्वस्तु तत्सुतः २०

वनात्तस्य वाहनत्वाय महावृषो बभूवेत्यर्थः येऽभिमुखं ययुः तान् यमं दर्शयित्वा संदेहानेव भल्लैरनयदित्यर्थः
तत्र दृष्ट्वा अन्ये दुद्रुवुः स्वमालयं पातालं इति एतैः कर्मभिः पुरंजयादिनामभिराहूतः व्याहृतः पाठांतरे आहू
तइत्यर्थः २०

भा० न० शावस्तिः शावस्तस्य पुत्रः कुवलयाश्वक एव धुंधुमार इति ख्यातः। तत्र कारणमाह यदिति। सुतानामेकविंशत्या
१५ सहस्रैर्वृतः सन्नहत वा नु धुंधुमार इति चेति चकारान्वयः। अथ तस्मान्निकुंभात् कृशाश्वः। भार्याणां शतेन स

पुरंजयस्य पुत्रोभूदनेनास्तत्सुतः पृथुः विश्वगंधिस्ततश्चंद्रो युवनाश्वश्च तत्सुतः २१ शावस्तस्तत्सुतो ये
न शावस्ती निर्ममे पुरी बृहदश्वस्तु शावस्तिस्ततः कुवलयाश्वकः २२ यः प्रियार्थं सुतंकस्य धुंधुनामा
सुरं बलिं सुतानामेकविंशत्या सहस्रैरहनद्वृतः २३ धुंधुमार इति ख्यातस्तत्सुतास्ते च जज्वलुः धुं
धुर्मुखाग्निना सर्वे त्रय एवावशेषिताः २४ दृढाश्वः कपिलाश्वश्च भद्राश्व इति भारत २४ दृढाश्वपु
त्रो हर्यश्वो निकुंभस्तत्सुतः स्मृतः २५ बर्हणाश्वो निकुंभस्य कृशाश्वोथास्य सेनजित् युवनाश्वोभ
वत्तस्य सोनपत्यो वनं गतः २६ भार्याशतेन निर्विण्णा ऋषयोस्य कृपालवः इष्टिं स्म वर्तयांचक्रुरैंद्री
ते सुसमाहिताः २७ राजा तद्यज्ञसदनं प्रविष्टो निशि तर्षितः दृष्ट्वा शयानान्विप्रांस्तान्पपौ मंत्रजलं राम
स्वयं २८ उत्थितास्ते निशम्याथ व्युदकं कलशं प्रभो पप्रच्छुः कस्य कर्मेदं पीतं पुंसवनं जलं २९ १५

ह इत्यस्य पुत्रार्थमिंद्रदेवत्यामिष्टिं वर्तयामासुः स्मेत्याश्चर्ये। तदेवाह राज्ञेति षड्भिः। तर्षितः तृषितः सन् ज
लार्थं प्रविष्टः मंत्राभिमंत्रितं जलं पत्न्यै देयं स्वयं पपौ व्युदकं निरुदकं पुंसवनं पुत्रोत्पत्तिकारणं २९

अहो दैवबलमेव मुख्यं बलं पुरुषबलं न किंचिदिति वदंतः ईश्वराय नमस्कारं चक्रुः। अयं कं धास्यतीति दुःखितैर्विप्रैः
उक्ते सति। तस्या मिष्ट्या माराधितः इंद्रो मांधाता पाता हे वत्स मा रोदीरिति ब्रुवन् देशिनीमदादित्यर्थः। तस्य पिता
युवनाश्वो भिन्नकुक्षिरपि न ममार। किंतु कालांतरे तपसा सिद्धिमन्वगात्। मांधातुर्महिमानमाह त्रसदस्युरिति

राज्ञा पीतं विदित्वाथ ईश्वरप्रहितेन ते ईश्वराय नमश्चक्रुरहो दैवबलं बलं ३० ततः काल उपावृत्ते कुक्षिं नि
र्भिद्य दक्षिणं युवनाश्वस्य तनयश्चक्रवर्ती जजान ह ३१ कं धास्यति कुमारोयं स्तन्ये रोरूयते भृशम् मां
धाता वत्स मा रोदीरितींद्रो देशिनीमदात् ३२ न ममार पिता तस्य विप्रदेवप्रसादतः युवनाश्वोथ तत्रैव
तपसा सिद्धिमन्वगात् ३३ त्रसद्दस्युरितींद्रोंग विदधे नाम तस्य वै यस्मात्त्रसंति ह्युद्विग्ना दस्यवो राव
णादयः ३४ यौवनाश्वोथ मांधाता चक्रवर्त्यवनिं प्रभुः सप्तद्वीपवतीमेकः शशासाच्युततेजसा ३५
ईजे च यज्ञं क्रतुभिरात्मविद्भूरिदक्षिणैः सर्वदेवमयं देवं सर्वात्मकमतींद्रियं ३६ द्रव्यं मंत्रो विधिर्यज्ञो
यजमानस्तथर्त्विजः धर्मो देशश्च कालश्च सर्वमेतद्यदात्मकम् ३७

षड्भिः। अंग हे राजन् यस्मान्मांधातुर्दस्यव उद्विग्नाः कंपिताः संतः प्रत्रसंति। अत इंद्रोऽपस्य त्रसदस्युरिति नाम
विदधे। स मांधाता अवनीमेकः शशासेत्युत्तरेणान्वयः। अच्युततेजसा अप्रच्युततेजसेति वा। आत्म
विद्भिः सः यज्ञं विष्णुं प्रीतिमेव विष्णुं प्रीतिविशिनष्टि। सर्वदेवमयमिति सार्धेन ३८

प्रतीतिष्ठतिअसंगच्छूर्ति ३८॥ प्रसंगात्सौभरेश्चरितमाह।तेषामिति।यावत्समाप्तिः।तेषांस्वसारः मांधातुः कन्याः
ननुमहातापसस्यकुतोविवाहप्रसंगः।कथंवाजराजर्जरंतंराजकन्यावव्रिरेतदाह।यमुनांतर्जलेद्रतिषड्भिः।नृ
पंमांधातारंसोपिमांधातात्स्वयंवरेकामंगृह्यतामित्याह।सविप्रःस्त्रीणामप्रियंमांविवित्यानेनाहंप्रयुक्तोन्ततः

यावत्सूर्यउदेतिस्मयावच्चप्रतितिष्ठति सर्वंतद्यौवनाश्वस्यमांधातुःक्षेत्रमुच्यते ३८ शशबिंदोर्दुहि
तरिबिंदुमत्यामधान्नृपः पुरुकुत्समंबरीषंमुचुकुंदंचयोगिनं ३९ तेषांस्वसारःपंचाशत्सौभरिंवव्रि
रेपतिं यमुनांतर्जलेमग्नस्तप्यमानःपरंतपः ४० निर्वृतिंमीनराजस्यवीक्ष्यमैथुनधर्मिणः जात
स्पृहोनृपंविप्रःकन्यामेकामयाचत ४१ सोप्याहगृह्यतांब्रह्मन्कामंकन्यास्वयंवरे सविचिंत्याप्रि
यंस्त्रीणांजरठोयमसंमतः ४२ वलीपलितएजत्कइत्यहंप्रत्युदाहृतः साधयिष्येतथात्मानंसुर राम
स्त्रीणामपीप्सितं किंपुनर्मनुजेंद्राणामितिव्यवसितःप्रभुः ४३ १६

आत्मानंतथासाधयिष्यामीतिव्यवसितः।निश्चितवानित्यन्वयः।अप्रियत्वेहेतुःजरठोवृद्धः।वलीभि
र्युक्तःपलितश्चएजत्कःकंपमानशिराः।तापसत्वादिनावा।अहंमतोहमितिचिह्नत्वात्तथेयस्यप्रपंचः।सुरस्त्री
णामपीप्सितंकिंपुनर्मनुजेंद्राणांयाःस्त्रियःतासामिति ४३

४६ मुनिःप्रवेशितःक्षत्राकन्यांतःपुरमृद्धिमत् वृतश्चराजकन्याभिरेकःपंचाशतावरः ४३ ४४
ततःकिंवृत्तंतदाह मुनिरितिद्वाभ्यां क्षत्त्राप्रतीहारेणपंचाशतापिराजकन्याभिःसएकएववरोवृतः ४३ ४४ तस्यगार्ह
स्थ्यंवर्णयतिसइतित्रिभिःबह्वृचइतिमंत्रसामर्थ्यमुक्तंताभिःसहरेमइतिउत्तरेणान्वयः क्वरेमेअपारणीयंदुरंतं
तपःतस्यश्रियासमृद्ध्याअनर्घ्याःपरिच्छदाःयेषुगृहेषुतथानानाविधेषूपवनेषुच अमलान्यंभांसियेषांतेषुसरः
तासांकलिरभूद्भूयांस्तदर्थेपोह्यसौहृदं ममानुरूपोनायंवइतितद्गतचेतसां ४४ सबह्वृचस्ताभिरपार
णीयतपःश्रियानर्घ्यपरिच्छदेषु गृहेषुनानोपवनामलांभःसरस्सुसौगंधिककाननेषु ४५ महार्हश
य्यासनवस्त्रभूषणस्नानानुलेपाभ्यवहारमाल्यकैः स्वलंकृतस्त्रीपुरुषेषुनित्यदारेमेनुगायद्द्विजभृंगवं
दिषु ४६ यद्गार्हस्थ्यंतुसंवीक्ष्यसप्तद्वीपवतीपतिः विस्मितःस्तंभमजहात्सार्वभौमश्रियान्वितं ४७ ए
वंगृहेष्वभिरतोविषयान्विविधैःसुखैः सेवमानोनचातुष्यदाज्यस्तोकैरिवानलः ४८ सकदाचिदुपासी
नआत्मापह्नवमात्मनः ददर्शबह्वृचाचार्योमीनसंगसमुत्थितं ४९
सरःसुकथंभूतेषुसौगंधिकानांकह्लाराणांचकाननानियेषुतेष्वित्यपि ४५ कथंभूतेषुगृहादिषुस्वलंकृताःस्त्रियःपुरुषाश्च
येषुअनुगायंतोद्विजाश्चपक्षिणःभृंगाश्चबंदिनश्चयेषुकथंभूतःमहार्हशय्यादिभिरुपलक्षितःसन् ४६ स्तंभं
गर्वं ४७ आज्यस्तोकैर्घृतबिंदुभिः ४८ इदानींतस्यानुतापपूर्वकंवानप्रस्थाश्रममाह सकदाचिदितिसप्तभिःआ

ततःमनसोहितो।आत्मनोपह्ववंतपोहानिरहद् ४८

भा०न०
१७

सन्न्यासो चरितव्रतस्य योऽहं तस्य ब्रह्मतपः ५० मिथुनव्रतीनां दांपत्यधर्मवतां चेत् यदि प्रसंगस्तर्हि ति इति मुमुक्षुरीश्व
रार्थधर्मपरश्चेदेव कार्य इति शेषः ५१ संगाज्जातं दोषं प्रपंचयति एक इति पंचाशता ताभिर्भार्याभिः संबंधात् आसंबन्ध
वमित्यर्थः ततश्च सुतैः पंचसहस्रसर्गश्चासं प्रत्येकं तासु पुत्रशतरूपेणोत्पत्तेः उभयकृत्यानि ऐहिकपारत्रिका

अहो इमं पश्यत मे विनाशं तपस्विनः सच्चरितव्रतस्य अंतर्जले वारिचरप्रसंगात्प्रच्यावितं ब्रह्म चि
रं धृतं यत् ५० संगं त्यजेत मिथुनव्रतीनां मुमुक्षुः सर्वात्मना न विसृजेद्बहिरिंद्रियाणि एकश्चरन्रह
सि चित्तमनंत ईशे युंजीत तद्व्रतिषु साधुषु चेत्प्रसंगः ५१ एकस्तपस्व्यहमथांभसि मत्स्यसंगात्पंचाशदा
समुत पंचसहस्रसर्गः नांतं व्रजाम्युभयकृत्यमनोरथानां मायागुणैर्हृतमतिर्विषयेर्थभावः ५२
एवं वसन्गृहे कालं विरक्तो न्यासमास्थितः वनं जगामानुययुस्तत्पत्न्यः पतिदेवताः ५३ तत्र तप्त्वा
तपस्तीक्ष्णमात्मकर्षणमात्मवान् सहैवाग्निभिरात्मानं युयोज परमात्मनि ५४ ताः स्वपत्युर्महा १७
राज निरीक्ष्याध्यात्मिकीं गतिं अन्वीयुस्तत्प्रभावेन अग्निं शांतमिवार्चिषः ५५ इति श्रीभागवते महा
पुराणे नवमस्कंधे षष्ठोऽध्यायः

निकर्माणि तद्विषयाणां मनोरथानां अर्थभावः अर्थबुद्धिमान् ५२ न्यासोऽत्र संगत्याग एव वानप्रस्थधर्म इत्यर्थः
आध्यात्मिकीं गतिं ब्रह्मणि लयं ५५ नवमे षष्ठः वासुदेवाय नमः छ

मांधातुरन्वयः प्रोक्तः सप्तमे यत्र गीयते पुरुकुत्सस्य चाख्यानं हरिश्चंद्रस्य चोत्तमं पुत्रप्रवरः पुत्रश्रेष्ठः पितामहेन
युवनाश्वेन प्रवृत्तः पुत्रत्वेन स्वीकृतः अत एव तस्य मांधातृप्रवर्ग्यत्वं तत्सुतः अंबरीषस्य सुतः १ इमे युवनाश्वांबरीष
हारीताः मांधातृगोत्रस्य प्रवराः अवांतरविशेषप्रवर्त्तकाः यद्वा यौवनाश्वविशेषणं पितामहेन मांधात्रा सह आर्षेयवर
णे प्रवृत्तः मांधाता प्रवरो येषां ते इमे अंबरीषयौवनाश्वहारीताः यथाहाश्वलायनः हरितकुत्सपिंगशंखदर्भभैमग
वानामांगिरसांबरीषयौवनाश्वेति मांधातारं ह्येके ब्रुवते अतीत्यांगिरसं मांधात्रांबरीषयौवनाश्वेतीति १ पुरुकुत्स

शुकउवाच मांधातृपुत्रप्रवरो योंबरीषः प्रकीर्तितः पितामहेन प्रवृतो यौवनाश्वश्च तत्सुतः १ हारीत
स्तस्य पुत्रोऽभून्मांधातृप्रवरा इमे नर्मदा भ्रातृभिर्दत्ता पुरुकुत्साय योरगैः तयासौ रसातलं नीतो भुजगेंद्र
प्रयुक्तया २ गंधर्वानवधीत्तत्र वध्यान्वै विष्णुशक्तिधृक् नागाल्लब्धवरः सर्पादभयं स्मरतामिदं ३
त्रसद्दस्युः पौरुकुत्सो योऽनरण्यस्य देहकृत् हर्यश्वस्तत्सुतस्तस्माद्दरुणोऽथ त्रिबंधनः ४

स्य वंशं कथयिष्यन्नादौ तावत्तस्य विवाहं प्रसंगं चाह उरगैर्भ्रातृभिर्यद्दत्ता नर्मदा तया २ वध्यान् वधार्हान्
स च पुरुकुत्सो नागाल्लब्धवरोऽभूत् वरमाह इदं नर्मदया रसातलनयनादिकं स्मरतां सर्पादभयमिति ३ देहकृ
त्पिता त्रसद्दस्योः सुतोऽनरण्य इत्यर्थः ४

त्रा० न०
१८

त्रयः शंकवइव दुःखहेतवो दोषायस्यासौ त्रिशंकुः तदुक्तं हरिवंशे पितुश्चापरितोषेण गुरोर्दोग्ध्रीवधेन च अप्रोक्षितोपयोगाच्च त्रिविधस्तत्र्व्यतिक्रम इति परिणीयमान विप्रकन्यापहरणात् क्रुद्धस्य गुरोः पितुः शापात् कौशिकस्य विश्वामित्रस्य तेजसा प्रभावेन ५ तेनैव कौशिकेन ६ पक्षिणोः आडीबकयोः विश्वामित्रोरा

तस्य सत्यव्रतः पुत्रस्त्रिशंकुरिति विश्रुतः प्राप्तश्चांडालतां शापाद्गुरोः कौशिकतेजसा ५ सशरीरो गतः स्वर्गमद्यापि दिवि दृश्यते पातितोवाक्शिरा देवैस्तेनैव स्तंभितो बलात् ६ त्रैशंकवो हरिश्चंद्रो विश्वामित्रवसिष्ठयोः यन्निमित्तमभूद्युद्धं पक्षिणोर्बहुवार्षिकं ७ सोनपत्यो विषण्णात्मा नारदस्योपदेशतः वरुणं शरणं यातः पुत्रो मे जायतां प्रभो ८ यदि वीरो महाराज तेनैव त्वां यजे इति त १८
थेति वरुणेनास्य पुत्रो जातस्तु रोहितः ९

जसूय दक्षिणाछलेन हरिश्चंद्रस्सर्वस्वमपहृत्य याचयामास तच्छ्रुत्वा कुपितो वसिष्ठोपि विश्वामित्रं त्वमाडीभवेति शशाप सोपि त्वं बको भवेति वसिष्ठं शशाप तयोश्च युद्धमभूदिति प्रसिद्धं हरिश्चंद्रो ह वैधस ऐक्ष्वाको राजपुत्र आसेत्यादिश्रुति प्रसिद्धं ७ हरिश्चंद्रस्य चरितमाह सोनपत्य इत्यादि यावत्समाप्ति कथं शरणं यातस्तदाह पुत्रो मे जायतां ८ यदि वीरः पुत्रो मे जायेत तर्हि तेनैव पुरुषपशुना त्वां यजे यजामीति शपथयात तथेत्युक्तवता वरुणेन निमित्तेनास्य रोहितो नाम पुत्रो जातः ९

जाते पुत्रे स वरुणो जातः सुतो माम नेन यजस्वेत्यब्रवीत् यदा यं पशुर्निर्दशः निर्गत दशादिवसः स्यादित्यत्र स राजाब्रवीदित्यनुषंगः १० राजन् हे वरुण राजन्यः पशुर्यदा सांनाहिकः कवच संबंधार्हः संग्राम समर्थः अथ तदा शुचि १४ इइत्येवं तं तं कालं वंचयता राज्ञा उक्तः प्रार्थितो देवो वरुणः तं तं कालं प्रत्यैक्षतेत्यर्थः १५ चिकीर्षितं आत्मना पशुना वरुण यजनं १६ ततश्च कुपि

जातः सुतो ह्यनेनांग मां यजस्वेति सोब्रवीत् यदा पशुर्निर्दशः स्यादथ मेध्यो भवेदिति १० निर्दशे च स आगत्य यजस्वेत्याह सोब्रवीत् दंताः पशोर्यज्जायेरन्नथ मेध्यो भवेदिति ११ जाता दंता यजस्वेति स प्रत्याहाथ सोब्रवीत् यदा पतंत्यस्य दंता अथ मेध्यो भवेदिति १२ पशोर्निपतिता दंता यजस्वेत्याह सोब्रवीत् यदा पशोः पुनर्दंता जायंतेथ पशुः शुचिः १३ पुनर्जाता यजस्वेति स प्रत्याहाथ सोब्रवीत् सांनाहिको यदा राजन् राजन्योथ पशुः शुचिः १४ इति पुत्रानुरागेण स्नेहयंत्रितचेतसा कालं वंचयता तं तमुक्तो देवस्तमैक्षत १५ रोहितस्तदभिज्ञाय पितुः कर्म चिकीर्षितं प्राणप्रेप्सुर्धनुःपाणिररण्यं प्रत्यपद्यत १६ पितरं वरुणग्रस्तं श्रुत्वा जातमहोदरं रोहितो ग्राममेयाय तमिंद्रः प्रत्यषेधत १७ भूमेः पर्यटनं पुण्यं तीर्थक्षेत्रनिषेवणैः रोहितायादिशच्छक्रः सोप्यरण्येवसत्समां १८

तेन वरुणेन ग्रस्तं अत एव जातं महदुदरं यस्य तं पितरं श्रुत्वा १७ समां वर्षं १८ ओं नमो भगवते वासुदेवाय॰

द्वितीये च वर्षे हे यज्ञ हा अन्येत्यान्येत्य तथैव तं प्रत्यषेधत किंचित्किंचिदाह १९ २० वरुणेन मुक्तमुदरं यस्य महत्सु कथा यस्य सः २१ आत्मवान् जमदग्निरध्वर्युरभूत् अयास्यो मुनिः सामगउद्गाता अभूदित्यर्थः २२ उपरिष्टात् विश्वामित्रकृताख्यानप्रसंगेन २३ अविहतां गतिं ज्ञानं २४ तामेव गतिमाह सार्द्धाभ्यां मनः पृथिव्यां धारयन् ज्ञा

एवं द्वितीये तृतीये चतुर्थे पंचमे तथा अन्येत्यान्येत्य स्थविरो विप्रो भूत्वाह हे यज्ञ हा १९ षष्ठं संवत्सरं तत्र चरित्वा रोहितः पुरीं उपव्रजन्नजीगर्त्तादक्रीणान्मध्यमं सुतं शुनःशेपं पशुं पित्रे प्रदाय समवंदत २०
ततः पुरुषमेधेन हरिश्चंद्रो महायशाः मुक्तोदरोयजद्देवान्वरुणादीन्महत्कथः २१ विश्वामित्रोभवत्तस्मिन् होता चाध्वर्युरात्मवान् जमदग्निरभूद्ब्रह्मा वसिष्ठोयास्यसामगः २२ तस्मै तुष्टो ददाविंद्रः शात कौंभमयं रथं शुनःशेफस्य माहात्म्यमुपरिष्टात्प्रवक्ष्यते २३ सत्यं सारां धृतिं दृष्ट्वा सभार्यस्य च भूपतेः विश्वामित्रो भृशं प्रीतो ददावविहतां गतिं २४ मनः पृथिव्यां तामद्भिस्तेजसापोनिलेन तत् खे वायुं धारयंस्तच्च भूतादौ तं महात्मनि २५
नकलां ध्यात्वा तया ज्ञानं विनिर्दहन् तां च हित्वा मुक्तो मुक्तबंधनस्तस्थावित्यन्वयः मनोमूलो हि संसारः मनश्चान्नमयं अन्नमयं हि सोम्य मन इति श्रुतेः अतोन्नरूपत्वाद्यायां पृथिव्यां मनो धारयन् तां पृथिवीमद्भिरेकीकुर्वन् अपस्तेजसा तत्तेजोनिलेन तं खे आकाशे तच्च भूतादावहंकारे तं च भूतादिमहंकारं महात्मनि महत्तत्वे २५

...१५ तदेवं सुमत्याः पुत्रेषु मृतेषु केशिन्याः पौत्रेण

तस्मिन्विषयाकारं व्यावर्त्य ज्ञानकलां ज्ञानांशमात्मत्वेन ध्यात्वा तया ध्यानवृत्तिरूपया आत्मावरकमज्ञानं विनिर्दहन् निर्वाणसुखसंविदा तां च हित्वा मुक्तबंधनः सन् अनिर्देश्येनाप्रतर्क्येण स्वेन भावेन स्वस्वरूपेण तस्थौ २६ नवमे सप्तमः अष्टमे रोहितस्योक्तो वंशो यत्रान्वभूपः सगरः कपिलाक्षेपात् निर्दग्धा यस्य सूनवः १ चंपस्तस्मादित्युद्येन

तस्मिन् ज्ञानकलां ध्यात्वा तया ज्ञानं विनिर्दहन् हित्वा तां स्वेन भावेन निर्वाणसुखसंविदा अनिर्देश्याप्रतर्क्येण तस्थौ विध्वस्तबंधनः २६ इति श्रीभागवते महापुराणे नवमस्कंधे हरिश्चंद्रोपाख्यानं नाम सप्तमोध्यायः श्रीशुक उवाच हरितो रोहितसुतश्चंपस्तस्माद्विनिर्मिता चंपापुरी सुदेवोतो विजयो यस्य चात्मजः १
भरुकस्तत्सुतस्तस्माद्वृकस्तस्यापि बाहुकः सोरिभिर्हृतभू राजा सभार्यो वनमाविशत् २ वृद्धं तं पंचतां प्राप्तं महिष्यनुमरिष्यती और्वेण जानतात्मानं प्रजावंतं निवारिता ३ आज्ञायास्यै सपत्नीभिर्गरो दत्तोंधसा सह सह तेनैव संजातः सगराख्यो महायशाः ४ सगरश्चक्रवर्त्यासीत्सागरो यत्सुतैः कृतः यस्तालजंघान्यवनाञ्छकान्हैहयबर्बरान् ५ नावधीद्गुरुवाक्येन चक्रे विकृतवेषिणः मुंडीञ्छ्मश्रुधरान्कांश्चित् मुक्तकेशार्द्धमुंडितान् ६
चंपापुरी विनिर्मिता अतः चंपात्सुदेवः हृता भूर्यस्य २ और्वेण ऋषिणा आत्मानं देहं प्रजावंतं सगर्भं ३ गरो विषं तेन गदेन सहैव जातः ४ ५ गुरुवाक्येन और्ववचनेन कांश्चित्सहलैव विकृतवेषियाश्च के तदेवाह मुंडीनिति मुक्तकेशान

ग्रा० न० २० और्वेणोपदिष्टो योगउपायस्तेन तस्य हे आर्ये सुमतिः केशिनी च तत्र सुमत्याः पुत्राणां प्रस्तावं मत्वा तुं चाह सुमत्या इति षड्भिः ए
ष वाजिहर इति ब्रुवंतोऽभ्ययुः षष्टिसहस्राणि परिच्छेदकतया संति ये षां उन्मिमेष लोचनोन्मीलनं चकार १२ केचित्तु क

अनंतर्वाससः कांश्चिद्वह्निर्वाससोऽपरान् सोऽश्वमेधैरयजत सर्ववेदसुरात्मकं ७ और्वोपदिष्टयोगेन हरिमा
त्मानमीश्वरं तस्योत्सृष्टं पशुं यज्ञे जहाराश्वं पुरंदरः ८ सुमत्यास्तनया दृप्ताः पितुरादेशकारिणः हयमन्वेष
माणास्ते समंतान्न्यखनन्महीं ९ प्रागुदीच्यां दिशि हयं ददृशुः कपिलांतिके एष वाजिहरश्चौर आस्ते मीलितलो
चनः १० हन्यतां हन्यतां पाप इति षष्टिसहस्रिणः उदायुधा अभिययुरुन्मिमेष तदा मुनिः ११ स्वशरीराग्निना ता
वन्महेंद्रहृतचेतसः महद्व्यतिक्रमहता भस्मसादभवन् क्षणात् १२ न साधुवादो मुनिकोपभर्जिता नृपेंद्रपुत्रा इ
ति सत्वधामनि कथं तमो रोषमयं विभाव्यते जगत्पवित्रात्मनि खे रजो भुवः १३ यस्येरिता सांख्यमयी दृढेह नौ
र्यया मुमुक्षुस्तरते दुरत्ययं भवार्णवं मृत्युपथं विपश्चितः परात्मभूतस्य कथं पृथङ्मतिः १४ २०

पिलस्य कोपाग्निना दग्धा इति वर्णयंति तन्निराकरोति नेति कुत इत्यत आह सत्वधामनि शुद्धसत्वमूर्तौ जगतः पवित्रं शु
द्धिकर आत्मा यस्य तस्मिन् कथं विभाव्यते संभाव्यते असंभावनायां दृष्टांतः भुवो रजः खे कथं संभाव्यत इति १३ किं
च यस्य येन ईरिता प्रवर्तिता तस्य विपश्चितः सर्वज्ञस्य कथं पृथङ्मतिः अरिमित्रादिभेददृष्टिः १४ कृष्णाय नमः

योऽसमंजस इत्युक्तः स केशिन्यां नृपात्मजः तस्य पुत्रोंऽशुमान्नाम पितामहहिते रतः १५ तदेवं सुमत्याः पुत्रेषु मृतेषु केशिन्याः पौत्रेण
अश्वः समानीतः पितृव्यो द्धरणं च यत्नश्च कृत इति दर्शयितुमाह योऽसमंजस इति उक्तः केवलं मत्रैः वस्तुतः समंजस एव स तु केशिन्याः सुतः
१५
क्षेत्वजलामिव प्रत्ता तं वारयति तस्यैव तपस्यात्मनो देहाज्ज्ञातः तस्य कथामाह चतुर्भिः असमंजसः पुरा पूर्व
जन्मनि योगी सन् संगाद्धेतोः योगाद्विचालितः अतः इदानीं जातिस्मरः सन् संगपरिहाराय जनमुद्वेजयन्
लोके गर्हितं ज्ञातीनां च विप्रियं कर्माचरन् क्रीडतो बालान् शरय्वां प्रास्यत् प्राक्षिपदिति द्वयोरन्वयः एवं वि
धं वृत्तं कर्म यस्य सः पितृव्यखातमनुपः पंथाः तं ययौ भस्मांति भस्मसमीपे २० अज्ञानेनोवज्ञानेनोऽप्यनुक्तं
असमंजस आत्मानं दर्शयन्नसमंजसं जातिस्मरः पुरा संगाद्योगी योगाद्विचालितः १६ आचारगर्हि
तं लोके ज्ञातीनां कर्म विप्रियं शरय्वां क्रीडतो बालान् प्रास्यदुद्वेजयञ्जनं १७ एवं वृत्तः परित्यक्तः पित्रा
स्नेहमपोह्य वै योगैश्वर्येण बालांस्तान् दर्शयित्वा ततो ययौ १८ अयोध्यावासिनः सर्वे बालकान्पुनरा
गतान् दृष्ट्वा विसिस्मिरे राजन् राजा चाप्यन्वतप्यत १९ अंशुमांश्चोदितो राज्ञा तुरगान्वेषणे ययौ।
पितृव्यखातानुपथं भस्मांति ददृशे हयं २० तत्रासीनं मुनिं वीक्ष्य कपिलाख्यमधोक्षजं अस्तौत्समा
हितमनाः प्रांजलिः प्रणतो महान् २१ अंशुमानुवाच न पश्यति त्वां परमात्मनोऽजनो न बुध्यतेऽद्या
पि समाधियुक्तिभिः कुतोऽपरे तस्य मनःशरीरधीविसर्गसृष्टा वयमप्रकाशाः २२

प्या वयं त्विति। तुष्टाव षड्भिः ईशानं अंशुमानेव माशयः। अजनः अजः ब्रह्मापि त्वामद्यापि न पश्यति न च बुध्यते। क
थंभूतं आत्मनः स्वस्मात् परं परमेश्वरं। कैर्हेतुभिः समाधिना प्रत्यक्षं न पश्यति युक्तिभिः परोक्षमपि सम्यङ् न
बुध्यत इत्यर्थः अपरे अर्वाचीनास्तु कुतस्त्वां पश्येयुः अर्वाचीनत्वे हेतुः तस्य ब्रह्मणः मनश्च शरीरं च धीश्च सत्वं तमो
रजः कार्याणि ताभिर्ये द्वे विविधा देवतिर्यङ्नराणां सर्गाः तेषु सृष्टाः तत्रापि वयं अप्रकाशाः अज्ञाः कुतः पश्यामेत्यर्थः २२

भा०न० २१ अपरेत्त र्हि किंपश्यंतितदाह। येदेहभाजस्तेष्वस्मिन्सम्यकस्थितमपीत्वांनविदुः किंतुगुणानेवविपश्यंति। अ
यवानगुणा नपिअपितुतमएवपश्यंति। यत्त्रिगुणाबुद्धिरेवप्रधानंतेषां अतोबहिरेवप्रकाशोज्ञानंयेषां
बुद्धिपरतंत्रतयाज्ञायत्वप्रयो विषयान्पश्यंति। सुषुप्तौतमएवकेवलंननुनिर्गुणंत्वांसर्वत्रहेतुः यत्त्य
तः यस्यतवमाययेतिवामोहितंचेतोयेषांतेतथाप्यहंविचारेणज्ञास्यामीतिचेत्तत्राह। तंत्वामहंविमूढः कथं
परिभावयामि विचारयामिकथंभूतंज्ञानघनंशुद्धज्ञानमूर्तिंस्वितएवप्रध्वस्तोमायागुणनिमित्तोभेदमोहो
येषांतैर्विभाव्यंविचिंत्यं। अयंभावः। ज्ञानघनंत्वांनतावत्ज्ञानविषयत्वाद्विचारविषयत्वेपिमायागुणैरभि
येदेहभाजस्त्रिगुणप्रधानागुणान्विपश्यंत्युतवातमश्च यन्माययामोहितचेतसस्त्वेवि
दुःस्वसंस्थंनबहिःप्रकाशाः २३ तंत्वामहंज्ञानघनंस्वभावप्रध्वस्तमायागुणभेदमोहैः
सनंदनाद्यैर्मुनिभिर्विभाव्यं कथंविमूढःपरिभावयामि २४ प्रशांतमायागुणकर्मलिं
गमनामरूपंसदसद्विमुक्तं ज्ञानोपदेशायगृहीतदेहंनमामहेत्वांपुरुषंपुराणम् २५ राम २१
भूतोहंनाविचारेसमर्थइति। तत्तस्मात्हेप्रशांतत्वांपुराणपुरुषंकेवलंनमोमेत्यन्वयः। पुराणपुरुषत्वेहेतुः
मायपागुणाः कर्माणिविश्वसृष्ट्यादीनिलिंगानिवब्रह्मादिरूपाणियस्यतं। प्रशांतत्वेहेतुः सदसद्भ्यांकार्य
कारणाभ्यांपुण्यपापाभ्यांवाविमुक्तं। अतः अनामरूपंतत्कृतनामरूपशून्यंकिंतुज्ञानोपदेशायगृहीतः
प्रकटितोदेहः शुद्धसत्वमूर्तिर्येनतं यद्वाहेप्रशांतमायेति। अगुणेतिवसंबोध्यकर्मभिः सृष्ट्यादिकोर्यैः
लिंगानियस्येतियोज्यंयद्वाप्रशांतामायागुणादयोयस्मिन्नित्येकंपदं २५

स्वभाग्यंश्लाघतेत्वन्मायेतिद्वाभ्यां। कामादिभिर्विभ्रांतानिचेतांसियेषांतइमेसर्वेगृहादिषुभ्रमंति। हेस
र्वभूतात्मन्अस्माकंतत्कृपयैवघटितात्तत्वदर्शनादतिदृढोपिमोहमयः पाशश्छिन्नः। कथंभूतः कामादी
नामाशयः। आश्रयः त्वत्प्रसादेनकृतार्थोस्मीत्यर्थः। अश्वंलब्ध्वापिसाकांक्षंप्रत्याह। इमेचेतिपरिक्रम्येति
त्वन्मायारचितेलोकेवस्तुबुध्यागृहादिषु भ्रमंतिलोभेर्ष्यामोहविभ्रांतचेतसः २६ अद्यनःसर्वभू काम ४
तात्मन्कामकर्मेंद्रियाशयाः मोहपाशोदृढश्छिन्नोभगवंस्तवदर्शनात् २७ शुकउ इत्थंगी
तानुभावस्तंभगवान्कपिलोमुनिः अंशुमंतमुवाचेदमनुगृह्यधियानृप २८ भगवानु अ
श्वोयंनीयतांवत्सपितामहपशुस्तव इमेचपितरोदग्धागंगांभोर्हंतिनेतरत् २९ तंपरिक्रम्यशि
रसाप्रसाद्यहयमानयत् सगरस्तेनपशुनाक्रतुशेषंसमापयत् ३० राज्यमंशुमतेन्यस्यनिस्पृ
होमुक्तबंधनः और्वोपदिष्टमार्गेणलेभेगतिमनुत्तमां ३१ इतिनवमस्कंधेअष्टमोध्यायः
शुकउवाच अंशुमांश्चतपस्तेपेगंगानयनकाम्यया कालंमहांतंनाशक्नोत्ततःकालेनसंस्थितः १
दिलीपस्तत्सुतस्तद्वदशक्तःकालमेयिवान् भगीरथस्तस्यपुत्रस्तेपेससुमहत्तपः २
शुकोक्तिः ३१ इतिनवमेअष्टमः नवमेंशुमतोवंशःखट्वांगावधिवर्ण्यते। गंगांभूतलमानिन्येयस्य
पौत्रोभगीरथः १ यथासगरःपौत्रायाराज्यंदत्वातपस्तेपेतथाअंशुमांश्चस्वपुत्रायराज्यंदत्वामहांतंका
लंतपस्तेपेइतिचकारस्यार्थः नाशक्नोत्गंगामानेतुमितिशेषः। संस्थितःमृतः कालंमृत्युमुपेयिवान्प्राप्तः
२

तंप्रसन्ना। त्मानंदर्शयामासतेवरदास्मीतिगंगयोक्तःसन्स्वमभिप्रायंपूर्वजोद्धरणंशशंसकथयामास। आहगं
गा। कोपिगगनात्पतंतंमामिवेगंधारयिता धारयिष्यति। किंच। आस्त्वजंतिक्षालयिष्यंतितत्त्रोपायंविचिंत्यतां। हरंति

दर्शयामासतंदेवीप्रसन्नावरदास्मिते इत्युक्तःस्वमभिप्रायंशशंसावनतोनृपः ३ कोपिधारयितावेगं
पतंत्यामेमहीतले अन्यथाभूतलंभित्वान्नृपयास्येरसातलं ४ किंवाहंनभुवंयास्येनरामय्यामृजं
त्यघं मृजामितदघंकुत्रराजंस्तत्रविचिंत्यतां ५ भगीरथउवाच साधवोन्यासिनःशांता
ब्रह्मिष्ठालोकपावनाः हरंत्यघंतेंगसंगात्तेष्वास्तेह्यघभिद्धरिः ६ धारयिष्यतितेवेगंरुद्रस्त्वात्माश
रीरिणां यस्मिन्नोतमिदंप्रोतंविश्वंशाटीवतंतुषु ७ इत्युक्त्वासनृपोदेवंतपसातोषयच्छिवं काले
नाल्पीयसाराजंस्तस्येशःसमतुष्यत ८ तथेतिराज्ञाभिहितंसर्वलोकहितःशिवः दधारावहितो राम २२
गंगांपादपूतजलांहरेः ९

हरिष्यंति। अघंभिनत्तीत्यघभित्। आत्माकथंभूतः यस्मिन्निदंविश्वमोतंग्रंथितंऊर्ध्वतंतुषुशाटीवपटइवप्रो
तंवतियक्तंतंतुषुपटइव। असोसर्वाधारस्त्वद्वेगंदधारधारयिष्यतीत्यर्थः। इतिएवंगंगामुक्त्वातच्छुत्वेतिपाठेश्रु
त्वापित्वेत्यर्थः। राज्ञाभिहितंतथेत्यंगीकृत्य। हरेःपादेनपूतंजलंयस्याः ९

प्रसंगात्गंगामाहात्म्यमाहचतुर्भिः। यस्याःजलस्पर्शमात्रेणतत्रकेवलंदेहभस्मभिरेवनसाक्षाद्ब्रह्मणिस्वकृतेनदंडेन
हता अपितांश्रद्धयासेवंतेतिशेषः। तत्रपंचयति। भस्मीभूतेनांगेनयःसंगःतेन अनंतस्यविशेषणंसन्निवेश्येति। त्रै

भगीरथःसराजर्षिर्निन्येभुवनपावनीं यत्रस्वपितृणांदेहाभस्मीभूतास्मशेरते १० रथेनवायुवेगेनप्रयांतम
नुधावती देशान्पुनंतीनिर्दग्धानासिंचत्सगरात्मजान् ११ यज्जलस्पर्शमात्रेणब्रह्मदंडहताअपि सगरा
त्मजादिवंजग्मुःकेवलंदेहभस्मभिः १२ भस्मीभूतांगसंगेनस्वर्याताःसगरात्मजाः किंपुनःश्रद्धयादेवींये
सेवंतेधृतव्रताः १३ नह्येतत्परमाश्चर्यंस्वर्धुन्यायदिहोदितं अनंतचरणांभोजप्रसूतायाभवच्छिदः १४
संनिवेश्यमनोयस्मिन्श्रद्धयामुनयोमलाः त्रैगुण्यंदुस्त्यजंहित्वासद्योयातास्तदात्मतां १५ श्रुतोभगीर
थाज्जज्ञेतस्यनाभोपरोभवत् सिंधुद्वीपस्ततस्तस्मादयुतायुस्ततोभवत् १६ ऋतुपर्णोनलसखोयोश्वविद्या
मयान्नलात् दत्वाक्षहृदयंचास्मैसर्वकामस्ततत्सुतः १७ ततःसुदासस्तत्पुत्रोमदयंतीपतिर्नृप आहुर्
र्मित्रसहंयंवैकल्माषांघ्रिमुतक्वचित् वसिष्ठशापाद्रक्षोभूदनपत्यःस्वकर्मणा १८ राजोवाच किंनि
मित्तोगुरोःशापःसोदासस्यमहात्मनः एतद्वेदितुमिच्छामःकथ्यतांनरहोयदि १९ शुकउवाच
सोदासोमृगयांकिंचिच्चरन्रक्षोजघानह मुमोचभ्रातरंसोथगतःप्रतिचिकीर्षया २०

गुण्यंदेहसंबंधः। नलस्यसखाअयान्प्राप्तःतत्सुतऋतुपर्णस्यसुतः। तत्पुत्रःसोदासः। नरहःनरहस्यंमृगयांचरन्
कंचिद्राक्षसंजघान। तस्यभ्रातरंमुमोच २०

भा०न० सश्रांतात्र्प्रघं त्र्प्रनिष्टंसूदःपावकः तद्रूपधरःसन् राज्ञोगृहेवर्तमानः त्र्प्रभक्ष्यमञ्जसा विलोक्य एवंनरमांसव्यवहारेण
२३ वसिष्ठएवतंशापंद्वादशवार्षिकंवक्रेरुशतीःतीक्ष्णाःत्र्प्रपःस्वपादयोर्जहौ।नान्यत्रतत्रहेतुः।दिशइतिएवंत्र्प्रनेनमि
त्रसहत्वमपिदर्शितं।मित्रस्यकलत्रस्यवावःसहनात् तदेवंराक्षसत्वेकल्माषांघ्रित्वेचकारणमुक्त्वास्वकर्मणा।न

सोविंतयन्नघंराज्ञःसूदद्रूपधरोगृहे गुरवेभोक्तुकामायपक्त्वानिन्येनरामिषं २१ परिवेक्ष्यमाणंभगवान्वि
लोक्याभक्ष्यमंजसा राजानमशपत्क्रुद्धोरक्षोह्येवंभविष्यसि २२ रक्षःकृतंतद्विदित्वाचक्रेद्वादशवार्षि
कं सोप्यपोंजलिनादायगुरुंशप्तुंसमुद्यतः २३ वारितोमदयंत्यापोरुशतीःपादयोर्जहौ दिशःखमवनिं
सर्वंपश्यन्जीवमयंनृपः २४ राक्षसंभावमापन्नःपादेकल्माषतांगतः व्यवायकालेददृशेवनौकोदंपती
द्विजौ २५ क्षुधार्तोजगृहेविप्रंतत्पत्न्याहाकृतार्थवत् नभवान्राक्षसःसाक्षादिक्ष्वाकूणांमहारथः २६ म
दयंतीपतिर्वीरनाधर्मंकर्तुमर्हसि देहिमेपत्यकामायाअकृतार्थंपतिंद्विजं २७ देहोयंमानुषोराजन् राम
पुरुषस्याखिलार्थदः तस्मादस्यवधोवीरसर्वार्थवधउच्यते २८ एषहिब्राह्मणोविद्वान्तपःशील २३
गुणान्वितः आरिराधयिषुर्ब्रह्ममहापुरुषसंज्ञितं सर्वभूतात्मभावेनभूतेष्वंतर्हितंगुणैः २९

पत्यइतियदुक्तंतत्प्रपंचयतिव्यवायकालइत्यादिना।कर्मणाअप्रजइत्यंतेन।वनमोकोनिवासोयपोस्तौवनौकौव
दंपतीवष्टयथस्पदत्वेसकारलोपआर्षः।अकृतार्थवत् दीनवत् अकृतार्थीअतवाप्ररतिंसर्वभूतानामात्मेतिभाव
नया आराधयितुमिच्छुः यद्वासर्वभूतानामात्मभावेनभूतेषुस्थितंअपिगुणैरंतर्हितंब्रह्मेतिसंबंधः २९

सर्वभूतानामात्मेतिभावनया आराधयितुमिच्छुः यद्वासर्वभूतानामात्मभावेनभूतेषुस्थितमपिगुणैरंतर्हितंब्रह्मेति
संबंधः पाठांतरे अंतर्हितःसोयमित्युत्तरेणान्वयः २९ ३० भ्रूणस्यश्रोत्रियस्यगर्भस्यसतइतिवावक्तोः गोःसतांम
तोत्तवान् वधःकथंसाधुमन्यतइत्यर्थः ३१ क्षणमपियेनविनानजीविष्यामिसोयंयदि भक्षःक्रियतेतर्हिमृतकंयथा

क्षुधार्तोजगृहेविप्रंतत्पत्न्याःहाकृतार्थवत् नत्त्ववान् राक्षसःसाक्षादिक्ष्वाकूणांमहारथः २६ मदयंत्याःप
तिर्वीरनाधर्मंकर्तुमर्हसि देहिमेपत्यकामायाअकृतार्थंपतिंद्विजं २७ देहोयंमानुषोराजन्पुरुषस्या
खिलार्थदः तस्मादस्यवधोवीरसर्वार्थवधउच्यते २८ एषहिब्राह्मणोविद्वान्तपःशीलगुणान्वितः आ
रिराधयिषुर्ब्रह्ममहापुरुषसंज्ञितं २९ सर्वभूतात्मभावेनभूतेष्वंतर्हितंगुणैः सोयंब्रह्मर्षिवर्यस्तेराज
र्षिप्रवराद्विजो ३० कथमर्हतिसधर्मज्ञवधंपितुरिवात्मजः तस्यसाधोरपापस्यभ्रूणस्यब्रह्मवादिनः कथंव
धंयथाबभ्रोर्मन्यतेसम्मतोभवान् ३१ यद्ययंक्रियतेभक्षस्तर्हिमांखादपूर्वतः नजीविष्येविनायेनक्षणंचमृ
तकंयथा ३२ एवंकरुणभाषिण्याविलपंत्याअनाथवत् व्याघ्रःपशुमिवाखादत्सौदासःशापमोहितः ३३ ब्रा
ह्मणीवीक्ष्यदिधिषुंपुरुषादेनभक्षितं शोचंत्यात्मानमुर्वीशमशपत्कुपितासती ३४ यस्मान्मेभक्षितःपाप
कामार्तायाःपतिस्त्वया तवापिमृत्युराधानादकृतप्रज्ञदर्शितः ३५
मृतप्रायांमांपूर्वंभक्षय ३२ ३३ दिधिषुंगर्भाधानकर्तारं ३४ आधानान्मेथुनात्हेअकृतप्रज्ञमृत्युर्मयादर्शितः
३५ ३७

भा० न०
२५

तदेवं कर्मणा प्रजाः ३८ अबिभ्रद्धारेत्यर्थः नव्यजायत नव्यसूत अतो वसिष्ठ एव तस्या उदरमश्मना जघान स उ
त्पन्नः स्मृतः अश्मकः ३९ स्त्रीभिः संवेष्ट्य परशुरामात् परिरक्षितः अतो नारीकवच इत्युक्तः निःक्षत्रे सति क्षत्रवंशस्य मू
लमभवत् अतो मूलक इति चोक्तः ४० प्रसन्नैर्देवैर्वरं वृणीष्वेत्युक्ते खट्वांगेनोक्तं प्रथमं तावन्मम आयुः कथ्यतामि
ति देवैश्चोक्तं मुहूर्तमात्रमिति तज्ज्ञात्वा देवैर्दत्तेन विमानेन शीघ्रं स्वपुरमेत्य मनः परमेश्वरे संदधे ४२ एतदेव स्वसा

एवं मित्रसहं शप्त्वा पतिलोकपरायणा तदस्थीनि समिद्धेऽग्नौ प्रास्य भर्तुर्गतिं गता ३६ विशापो द्वादशाब्दांते मै
थुनाय समुद्यतः विज्ञाय ब्राह्मणीशापं महिष्या स निवारितः ३७ तत ऊर्ध्वं स तत्याज स्त्रीसुखं कर्मणाप्रजः
वसिष्ठस्तदनुज्ञातो मदयंत्यां प्रजामधात् ३८ सा वै सप्त समा गर्भमबिभ्रन्न व्यजायत जघ्नेऽश्मनोदरं त
स्याः सोऽश्मकस्तेन कथ्यते ३९ अश्मकान्मूलको जज्ञे यः स्त्रीभिः परिरक्षितः नारीकवच इत्युक्तो निःक्षत्रे
मूलकोऽभवत् ४० ततो दशरथस्तस्मात्पुत्र ऐडविडस्ततः राजा विश्वसहो यस्य खट्वांगश्चक्रवर्त्यभूत् ४१
यो देवैरर्थितो दैत्यानवधीद्युधि दुर्जयः मुहूर्तमायुर्ज्ञात्वैत्य स्वपुरं संदधे मनः ४२ न मे ब्रह्मकुलात्प्राणाः २५
कुलदैवान्न चात्मजाः न श्रियो न मही राज्यं न दाराश्चातिवल्लभाः ४३ न बाल्येपि मतिर्मह्यमधर्मे रमते क्वचित् ना
पश्यमुत्तमश्लोकादन्यत्किंचन वस्त्वहं ४४

घुदत्तानुस्मरणपूर्वकं तत्कृतेन निश्चयेन दर्शयति नेति सप्तभिः कुलदैवात् ब्रह्मकुलात्सकाशात् मे प्राणादयो नाति
प्रियाः ४३ मह्यं मम ४४
देवैः कामवरो दत्तो मह्यं त्रिभुवनेश्वरैः न वृणे तमहं कामं भूतभावनभावनः ४५ भूतभावनो हरिः तस्मिन्भावना यस्य सोऽहं तं कामं न वृणे ४५

ये विक्षिप्तेंद्रियधियो देवास्ते स्वहृदि स्थितं न विंदंति प्रियं शश्वदात्मानं किमुतापरे ४६ तत्र हेतुः ये इति विक्षिप्तानींद्रियाणि धीश्च येषां ते देवा अपि ४६
अथेशमायारचितेषु संगं गुणेषु गंधर्वपुरोपमेषु रूढं प्रकृत्यात्मनि विश्वकर्तुर्भावेन हित्वा तमहं प्रपद्ये ४७ अथ तस्मात् गुणेषु संगं त्यक्त्वा स्वतो वेनात्मनि रूढं गुणे
प्रसंगं विश्वकर्तुर्भावेन हित्वा तमेवाहं प्रपद्ये ४७
अन्यभावं देहाद्यभिमानरूपमज्ञानं हित्वा स्वभावमेवाह यत्तदिति। शून्यवत्कल्पितं वागाद्यविषयत्वात् वासुदेव इति गृण
ति। ब्रह्मण एव भक्तानुग्रहार्थमाविःकृतशक्तेर्वासुदेवत्वात् ४८ इति नवमे नवमः दशमे प्राह खट्वांगवंशे श्रीरा
मसंभवं। तच्चरित्रं बलं केशहत्वा योध्यागमनावधि। खट्वांगाद्दीर्घबाहुः। ऋषिभिर्वाल्मीकिमुख्यैर्भूरि वर्णितं त्वया बहु
श्रुतं। तथापि संक्षेपतः कथ्यमानं शृणु। ग्रंथकोटिभिराकीर्णमद्भुतं रामविक्रमं। अध्यायद्वयतो वक्ष्ये त्वेकश्लोकेन सम
स्यति। स कोशलेंद्रः श्रीरामः नोऽस्मान् अवतात् पातु। कथंभूतः। यो गुर्वर्थे पितुः सत्यस्य पालनार्थं त्यक्तराज्यः सन् पद्मवद्

इति व्यवसितो बुद्ध्या नारायणगृहीतया हित्वान्यभावमज्ञानं ततः स्वं भावमाश्रितः ४८ यत्तद्ब्रह्म परं सूक्ष्ममश
ून्यं शून्यकल्पितं भगवान्वासुदेवेति यं गृणंति हि सात्वताः ४९ इति श्रीभागवते नवमस्कंधे सूर्यवंशानुक
थने नवमोऽध्यायः श्रीशुक उ० खट्वांगाद्दीर्घबाहुश्च रघुस्तस्मात्पृथुश्रवाः अजस्ततो महाराजस्तस्माद्दशर
थोऽभवत् १ तस्यापि भगवानेष साक्षाद्ब्रह्ममयो हरिः अंशांशेन चतुर्धागात्पुत्रत्वं प्रार्थितः सुरैः २ रामलक्ष्म
णभरतशत्रुघ्ना इति संज्ञया तस्यानुचरितं राजन्नृषिभिस्तत्त्वदर्शिभिः श्रुतं हि वर्णितं भूरि त्वया सीतापतेर्मुहु
ः ३ गुर्वर्थे त्यक्तराज्यो व्यचरदनुवनं पद्मपद्भ्यां प्रियायाः पाणिस्पर्शाक्षमाभ्यां मृजितपथरुजो यो हरींद्रानु
जाभ्यां वैरूप्याच्छूर्पणख्याः प्रियविरहरुषारोपितभ्रूविजृंभत्रस्ताब्धिर्बद्धसेतुः खलदवदहनः कोशलेंद्रोऽवतान्नः ४

ति सुकुमाराभ्यां पद्भ्यां। तदेवाह। प्रियायाः पाणिनापि स्पर्शेनाक्षमाभ्यां ताभ्यां प्रतिवनं व्यचरत्। हरींद्रो हनु
मान् सुग्रीवो वा अनुजो लक्ष्मणस्ताभ्यां मृजितापथश्रमरुजा मार्गश्रमो यस्य शूर्पणख्या वैरूप्यात् कर्णनासिकाछेदात्
तो यया प्रलोभितेन रावणेनापहारात्। प्रियेण कलत्रेण विरहः तेन रुट् तया आरोपितयोर्भ्रुवोर्विजृंभेन त्रस्तोऽब्धिर्य
स्मात् तत्र प्रहितज्ञापनेन बद्धः सेतुर्येन ततः खला रावणादयः एव दवो वनं तस्य दहनः ४

संक्षेपतोवर्णितंरामचरितं। आदित आरभ्यविस्तरेणाह। विश्वामित्राध्वर इत्यादिनायावदुत्तराध्यायसमाप्ति॥ पश्यतएवल
क्ष्मणस्यउत्तमप्यनपेक्ष्यैवहताइत्यर्थः। पंछुद्धानांकोशलेंद्रोवताइत्यनेनान्वयः। लोकेयेवीरास्तेषांसमितौसमाजेऐशंत्रै
यंबकंधनुरिक्षुयष्टिमिवलीलयैवादायसज्जीकृतमारोपितंविकृष्यमध्येबभंजाहेनपठग्रंकठिनंगरिष्ठंतदाहा। वाह
कानांत्रिभिःशतैरुपनीतं। बालगजस्यलीलेवलीलायस्यसः। अनुरूपाणिस्वयोग्यानिगुणशीलादीनियस्याःतां

विश्वामित्राध्वरेयेनमारीचाद्यानिशाचराः पश्यतोलक्ष्मणस्यैवहतानैर्ऋतपुंगवाः ५ योलोकवीरसमितौ
धनुरैशमुग्रंसीतास्वयंवरगृहेत्रिशतोपनीतं आदायबालगजलीलइवेक्षुयष्टिंसज्जीकृतंनृपविकृष्यबभंजम
ध्ये ६ जित्वानुरूपगुणशीलवयोंगरूपांसीताभिधांश्रियमुरस्यभिलब्धमानां मार्गेव्रजन्भृगुपतेर्व्यनयत्
प्ररूढदर्पमहीमकृतयःत्रिरराजबीजां ७ यःसत्यपाशपरिवीतपितुर्निदेशंस्त्रैणस्यचापिशिरसाजगृहेसभा
र्यः राज्यंश्रियंप्रणयिनःसुहृदोनिवासंत्यक्त्वायबौवनमसूनिवमुक्तसंगः ८

सीतासंज्ञांप्रर्वठरासिअभिलब्धोमानोययातांश्रियंजित्वाधनुर्भंगमहानादश्रवणात्क्षुभितस्यभृगुपतेर्दर्पव्यप राम २५
नयत्अपनीतवान्। कथंभूतस्यत्रिःसप्तकृत्वःराजबीजस्रत्यांमहींयोकरोत्। तस्यइदानींगुर्वर्थइतिश्लोकंविदुएवत्रा
हायइति। कदाचित्कैकेय्याःतुष्टेनराज्ञात्वदपेक्षितंदास्यामीतिप्रतिश्रुतं। ततःश्रीरामस्ययुवराज्याभिषेकसमयेतया
भरतस्यराज्यंरामस्यवनेवासःप्रार्थितस्तदासत्यपाशेनपरिवीतस्यपितुर्निदेशमाज्ञांशिरसाजगृहे। ततोरा
ज्यादिकंत्यक्त्वासभार्योवनंययौ। दुस्त्यजस्यापिसहर्षत्यागेदृष्टांतःमुक्तसंगोयोगीअसून्प्राणान्निवेति ८

रक्षसोरावणस्यस्वसुःशूर्पणखायाःअशुद्धबुद्धेःसीतांजिघृक्षोःकामातुरायाइतिवारूपंव्यकृतविकारमनयत् तस्या
खरत्रिशिरोदूषणमुख्याबंधवोयेषुतांश्चतुर्दशसहस्रंजघान। अपारणीयंअलंघ्यंअसह्यंकोदंडपाणेर्यस्यसः ९
सीतायाःकथाश्रवणेनदीपितोहृच्छयोयस्यतेनसीतांहरिष्यतारावणेनस्वस्याश्रमादपकर्षणार्थंसृष्टंनिसृ

रक्षःस्वसुर्व्यकृतरूपमशुद्धबुद्धेस्तस्याःखरत्रिशिरदूषणमुख्यबंधून् जघ्नेचतुर्दशसहस्रमपारणीयकोदं
डपाणिरटमानउवासकृच्छ्रं ९ सीताकथाश्रवणदीपितहृच्छयेनसृष्टंविलोक्यनृपतेर्दशकंधरेण जघ्ने
द्भुतेनवपुषाश्रमतोपकृष्टोमारीचमाशुविशिखेनयथाकमुग्रः १० रक्षोधमेनवृकवद्विपिनेसमक्षं
वैदेहराजदुहितर्यपयापितायां भ्रात्रावनेकृपणवत्प्रियपावियुक्तःस्त्रीसंगिनांगतिमितिप्रथयंश्चचार
११

सृष्टंमारीचंविलोक्यजघान। कथंभूतंअद्भुतेनवपुषास्वर्णहरिणदेहेनोपलक्षितं। अतएवप्रलोभनेनाश्रमतस्त
नापकृष्टःसन्कथंदक्षंयथाउग्रंश्रीरुद्रः। ततश्चरक्षोधमेनरावणेनअसमक्षमपनीतायांप्रियया। वियुक्तोभ्रा
त्रासहलक्ष्मणेनकृपणवद्वनेचचार। किमभिप्रायःसन्इतिअनेनप्रकारेणस्त्रीसंगिनांदुःखोदर्कांगतिंप्र
ख्यापयन् ११

भा०न० २६ आत्मार्थेनकृत्येनकर्मणारावणेनसहयुद्धेनहतंकृत्यंशास्त्रीयंदहनादिकंयस्यतंजटायुषंपुत्रइवदग्ध्वाकबंधंस्व
ग्रहणायप्रसारितबाहुंराक्षसमहनत्। अथवालिनिहतेतैःकपिभिर्दयितायागतिंबुद्ध्वाअजभवाभ्यामर्चितावं
घ्रीयस्यसमनुजोवेलायांसमुद्रतीरमगात्। तत्रत्रिरात्रिमुपवासेनप्रतीक्षितोपिसिंधुर्यदानोपस्थितःतदायस्य
रोषविभ्रमेणक्रोधलीलयाविवृत्तोयःकटाक्षःतस्यपातेनसंभ्रांतानक्रामकराश्चयस्मिन्।भयेनगीर्णःग्रस्तःस्तंभि
तोघोषोयेनसःसिंधुःएतद्वक्ष्यमाणंबभाषे। अर्हणमर्घ्यादिकं। रूपीमूर्त्तिमान्। भाषमाणमेवाह। नत्वामितिद्वाभ्यां।

दग्ध्वात्मकृत्यहतकृत्यमहन्कबंधंसख्यंविधायकपिभिर्दयितागतिंतैः बुद्ध्वाथवालिनिहतेप्लवगेंद्रसैन्यै
र्वेलामगात्समनुजोजभवार्चितांघ्रिः १२ यद्रोषविभ्रमविवृत्तकटाक्षपातसंभ्रांतनक्रमकरोभयगीर्णघो
षः सिंधुःशिरस्यर्हणंपरिगृह्यरूपीपादारविंदमुपगम्यबभाषएतत् १३ नत्वांवयंजडधियोनुविदाम
भूमन्कूटस्थमादिपुरुषंजगतामधीशं यत्सत्वतःसुरगणारजसःप्रजेशामन्योश्चभूतपतयःसभवान्गु
णेशः १४ कामंप्रयाहिजहिविश्रवसोवमेहंत्रैलोक्यरावणमवाप्नुहिवीरपत्नीं बध्नीहिसेतुमिहतेयश राम
सोवितत्यैगायंतिदिग्विजयिनोयमुपेत्यभूपाः १५ २६

एतावत्पर्यंतंनुनिश्चितंत्वांनविदाम नजानीमइत्यर्थः। इदानींतुज्ञातोसीत्याह। यदितिपृथक्पदं यस्येत्यर्थः। यद्वं
शेभ्यःसत्वादिभ्यःसुरगणादयोभवंति। सभवानितिकामंयथेष्टंजलमाक्रम्यापिप्रयाहि। अवमेहंपुरीषप्रायंत्रैलो
क्यरावयतिआक्रंदयतितथातंजहि। हेवीरयद्यपितवजलंप्रतिबंधकंनभवतितथापीहिसेतुंबध्नीहि। नहिकिं
मर्थंतेयशसोविस्ताराय। तदेवाह। यंसेतुमुपेत्यदुःकरंकर्मावेक्ष्यत्वत्तुल्यथागास्यंतिभूपाः। तद्वाक्यमभिनंद्यपतङ्क
तंतदाह १५

तद्वाक्यमभिनंद्यपतङ्कतंतदाहबध्वेति। विविधैरद्रीणांकूटैःशृंगैःसेतुंबध्वाअग्रेसीतान्वेषणेनहनुमतैवदग्धांलं
कामविशत्। कथंभूतैःशृंगैःकपींद्राणांकरैःकंपितानिभूरुहाणामंगानिशिखादीनियेषुतैः। विभीषणस्यदृशाबु
ध्याकैःसहाविशत्। सुग्रीवादयःप्रमुखायेषांतैरनीकैः। ततःसालंकाघूर्णाप्रस्खलिताबभूव। कथंभूतावानरेंद्राणां
बलैरुद्धाविहारादयोयस्याः। निर्भज्यमानाधिषणादयोयस्याश्च। तत्रविहारःक्रीडास्थानं कोष्ठंधान्यागारादिश्रीःको
बध्वोदधौरघुपतिर्विविधाद्रिकूटैःसेतुंकपींद्रकरकंपितभूरुहांगैः सुग्रीवनीलहनुमत्प्रमुखैरनीकैर्लं
कांविभीषणदृशाविशदग्रदग्धां १६ सावानरेंद्रबलरुद्धविहारकोष्ठश्रीद्वारगोपुरसदोवलभीविटंका
निर्भज्यमानधिषणध्वजहेमकुंभशृंगाटकागजकुलैर्ह्रदिनीवघूर्णा १७ रक्षःपतिस्तदवलोक्यनिकुं
भकुंभधूम्राक्षदुर्मुखसुरांतनरांतकादीन् पुत्रंप्रहस्तमतिकायविकंपनादीन्सर्वानुगान्समहिनोदथ
कुंभकर्णं १८ तांयातुधानपृतनामसिशूलचापप्रासर्ष्टिशक्तिशरतोमरखड्गदुर्गां सुग्रीवलक्ष्मण
मरुत्सुतगंधमादनीलांगदर्क्षपनसादिभिरन्वितोगात् १९

शः द्वारंगृहादीनां गोपुरंपुरद्वारं सदःसभा वलभीप्रासादादिपुरोभागच्छादिनी। विटंकःकपोतपालिका धिषणं
वेदिका शृंगाटकंचतुःपथं। रक्षःपतीरावणःपुत्रमिंद्रजितंप्रहस्तादींश्चसमहिनोत्प्राहिणोत्। असिशूलादि
भिर्दुर्गमांतांयातुधानपृतनांसुग्रीवादिभिरन्वितःश्रीरामोभ्यागात्। मरुत्सुतोहनुमान्। ऋक्षोजांबवान् १९

भा०न० तेरघुपतेरनीकपा अंगदाद्यास्ते सर्वे रावणस्य इभादिभिर्यद्वरूथं सैन्यं तत् द्वंद्वं यथा भवति तथाभिपत्य संग
२७ म्य द्रुमादिभिर्जघ्नुः कान् सीतायाः अभिमर्शेन हतं मंगलं यस्य स रावणः ईशो येषां तान् स्वबलस्य नष्टिं नाशम
रुक्ष्य तुष्टः क्रुद्धः सन् यानकं पुष्पकं विमानं रथं वा आरुह्य श्रीराममभिससार अथ तं स्वःस्यंदने स्वर्गस्थे रथे इंद्र

तेनीकपा रघुपतेरभिपत्य सर्वे द्वंद्वं वरूथमिभपत्तिरथाश्वयोधैः जघ्नुर्द्रुमैर्गिरिगदेषुभिरंगदाद्याः सी
ताभिमर्शहतमंगलरावणेशान् २० रक्षःपतिः स्वबलनष्टिमवेक्ष्य रुष्ट आरुह्य यानकमथाभिससार
रामं स्वःस्यंदने द्युमति मातलिनोपनीते विभ्राजमानमहनन्निशितैः क्षुरप्रैः २१ रामस्तमाह पुरुषाद
पुरीष यन्नः कांतासमक्षमसतापहृता श्ववत्ते त्यक्तत्रपस्य फलमद्य जुगुप्सितस्य यच्छामि कालइव क
र्तुरलंघ्यवीर्यः २२ एवं क्षिपन् धनुषि संधितमुत्ससर्ज बाणं स वज्रमिव तद्धृदयं बिभेद सोसृग्व
मन् दशमुखैर्न्यपतद्विमानात् हाहेति जल्पति जने सुकृतीव रिक्तः २३ राम २७

स्यरथे मातलिना इंद्रसारथिनोपनीते द्युमति दीप्तियुक्ते विभ्राजमानमहनत् अहनत् हे पुरुषादपुरीष राक्षसपु
रीषप्राय यद्यस्मादपहृता श्ववत् श्वा यथा असमक्षं गृहं प्रविश्य किमपि हरति तद्वत् तस्मात् जुगुप्सितस्य कर्म
णः कर्तुस्तेद्य कालइवालंघ्यवीर्योहं फलं यच्छामि अधर्मकर्तुः पुंसः कालो यथा यच्छतीति वा रिक्तः क्षीणपुण्यः
सुकृती विमानादिव विमानात्पुष्पकात् न्यपतदिति वा २३

राक्षसस्त्रीणां विलापमाह ततइति पंचभिः मंदं स्वल्पमुदरं यस्याः तया रावणभार्यया सह परैरर्दितान् गृध्राणां अ

ततो निःक्रम्य लंकायां यातुधान्यः सहस्रशः मंदोदर्या समं तस्मिन्प्ररुदत्य उपाद्रवन् २४ स्वान्स्वान्बंधू
न्परिष्वज्य लक्ष्मणेषुभिरर्दितान् रुरुदुः सुस्वरं दीना घ्नंत्य आत्मानमात्मना २५ हा हताः स्म वयं नाथ
लोकरावण रावण कं यायाच्छरणं लंका त्वद्विहीना परार्दिता २६ नवैवेद महाभाग भवान्कामवशंगः
तः जानन्नुभावं सीताया येन नीतो दशामिमां २७ कृतैषा विधवा लंका वयं च कुलनंदन देहः कृतो
न्नं गृध्राणामात्मा नरकहेतवे २८ शुक उवाच स्वानां विभीषणश्चक्रे कोशलेंद्रानुमोदितः पितृ
मेधविधानेन यदुक्तं सांपरायिकं २९ ततो ददर्श भगवानशोकवनिकाश्रमे क्षामां स्वविरहव्याधिं शिं
शिपामूलमाश्रितां ३० रामः प्रियतमां भार्यां दीनां वीक्ष्यान्वकंपत आत्मसंदर्शनाह्लादविकस
न्मुखपंकजां ३१ आरोप्यारुरुहे यानं भ्रातृभ्यां हनुमद्युतः विभीषणाय भगवान्दत्वा रक्षोगणे
शतां ३२ लंकामायुश्च कल्पांतं ययौ चीर्णव्रतः पुरीं अवकीर्यमाणः कुसुमैर्लोकपालार्पितैः पथि ३३

न्नं भक्ष्यः नरकहेतवे नरकभोगाय सांपरायिकं और्ध्वदेहिकं आत्मनः स्वस्य संदर्शनेन य आह्लादस्तेन विक
सन्मुखपंकजं यस्याः तां यानं पुष्पकं भ्रातृभ्यां लक्ष्मणसुग्रीवाभ्यां आयुश्च दत्वा तेनापि सहैव ययौ ३३

भा०न० गोमूत्रपावकः गोमूत्रपक्वयवान्नभोजिनं भ्रातरं भरतं स्वशिबिरान्नु रामं विनायोध्यामप्रविशत् । स्वस्यवासंय
२८ त्रनिर्मितवान् तस्मात्सकाशाज्ज्ञात्वादिभिर्युक्तो रामं प्रत्युद्यतोभिमुखं ययौ । ब्रह्मघोषेण महताघोषेण पठद्भिः ॥

उपगीयमानचरितः शतघ्न्यादिभिर्मुदा गोमूत्रपावकं श्रुत्वा भ्रातरं कल्मषांबरं ३४ महाकारुणिको
तप्यन्तज्जटिलं स्थंडिलेशयं भरतः प्राप्तमाकर्ण्य पौरामात्यपुरोहितैः पादुके शिरसिन्यस्य रामं प्रत्युद्यतो
ग्रजं ३५ नंदिग्रामात्स्वशिबिरात् गीतवादित्रनिःस्वनैः ब्रह्मघोषेण च मुहुः पठद्भिर्ब्रह्मवादिभिः ३६
स्वर्णकक्षपताकाभिर्हैमैश्चित्रध्वजैरथैः सदश्वैरुक्मसन्नाहैर्भटैः पुरटवर्मभिः ३७ श्रेणीभिर्वारमु
ख्याभिर्भृत्यैश्चैव पदानुगैः पारमेष्ठ्यान्युपादाय पण्यान्युच्चावचानि च ३८ पादयोर्न्यपतत्प्रेम्णा प्र
क्लिन्नहृदयेक्षणः पादुके न्यस्य भरतः प्रांजलिर्बाष्पलोचनः ३९ तमाश्लिष्य चिरं दोर्भ्यां स्नापयन्नेत्र
जैर्जलैः रामो लक्ष्मणसीताभ्यां विप्रेभ्यो ये र्हसत्तमाः ४० तेभ्यः स्वयं नमश्चक्रे प्रजाभिश्च नमस्कृतः राम
धुन्वंत उत्तरासंगान्पतिं वीक्ष्य चिरागतं उत्तराः कोशला माल्यैः किरंतो ननृतुर्मुदा ४१ २८

स्वर्णसात्काः कक्षाः प्रांतायासां ताभिः पताकाभिर्हैमैरिति चत्वारि रथविशेषणानि पारमेष्ठ्यानि राजार्हाणि
छत्रचामरादीनि प्रेम्णा प्रक्लिन्नं हृदयं ईक्षणे च नेत्रे यस्य नेत्रजैर्जलैः स्नापयन्नाश्लिष्य ये र्हसत्तमाः कुलवृद्धाः
तेभ्योपि नमश्चक्रे ४१

ध्या अयोध्याप्रवेशप्रकारमाह पादुके इति सार्धैस्त्रिभिः धनुश्च निषंगौ च तान् गुरुपत्नीः कैकेय्याद्याः वयस्याः नवरजां

पादुके भरतोगृह्णाच्चामरव्यजनोत्तमे बिभीषणः ससुग्रीवः श्वेतच्छत्रं मरुत्सुतः ४१ धनुर्निषंगा
न्शत्रुघ्नः सीता तीर्थकमंडलुं अबिभ्रदंगदः खड्गं हैमं चर्म क्षराण्नृप ४२ पुष्पकस्थोन्वितः स्त्री
भिः स्तूयमानश्च वंदिभिः विरेजे भगवान्राजन्ग्रहैश्चंद्र इवोदितः ४३ भ्रातृभिर्नंदितः सोपि सो
त्सवां प्राविशत्पुरीं प्रविश्य राजभवनं गुरुपत्नीः स्वमातरं ४४ गुरून्वयस्यावरजान्पूजितः प्र
त्यपूजयत् वैदेही लक्ष्मणश्चैव यथावत्समुपेयतुः ४५ पुत्रान्स्वमातरस्तास्तु प्राणांस्तन्व इवोत्थि
ताः आरोप्यांकेभिषिंचंत्यो बाष्पौघैर्विजहुः शुचः ४६ इति नवमस्कंधे दशमोध्यायः ॥ ॥
शुक उवाच जटा निर्मुच्य विधिवत्कुलवृद्धैः समं गुरुः अभ्यषिंचद्यथैवेंद्रं चतुःसिंधुजलादिभि
ः ४७ एवं कृतशिरःस्नानः सुवासाः स्रग्व्यलंकृतः स्वलंकृतैः सुवासोभिर्भ्रातृभिर्भार्यया बभौ
४८ अग्रहीदासनं भ्रात्रा प्रणिपत्य प्रसादितः प्रजाः स्वधर्मनिरता वर्णाश्रमगुणान्वहे ४९ ज
गोप पितृवद्रामो मेनिरे पितरं च तं त्रेतायां वर्तमानायां कालः कृतसमोभवत् ५०

श्च बाष्पौघैरभिषिंचंत्यः शुचः शोकान् विजहुः शेषं स्पष्टं ॥ ततश्चैकादशे योध्यामावसन्ननुजैः सह । यज्ञादि
पञ्चकारे श्रीरामस्तदनुवर्ण्यते ॥

इति नवमे दशमः ॥

तदंतरात्तासां दिशां मध्ये यावती भूस्तां ब्राह्मण एवार्हतीति मन्यमानः॥ अयं श्रीरामः तदा सौमंगल्यमाभरणादि

रामे राजनि धर्मज्ञे सर्वभूतसुखावहे वनानि नद्यो गिरयो वर्षाणि द्वीपसिंधवः ५१ सर्वे कामदुघा आसन्
प्रजानां भरतर्षभ नाधिव्याधिजराग्लानिदुःखशोकभयक्लमाः ५२ मृत्युश्चानिछतां नासीद्रामे राज
न्यधोक्षजे एकपत्नीव्रतधरो राजर्षिचरितः शुचिः ५३ स्वधर्मं गृहमेधीयं शिक्षयन्स्वयमाचरत् प्रेम्णा
नुवृत्त्या शीलेन प्रश्रयावनता सती धिया ह्रिया च भावज्ञा भर्तुः सीताहरन्मनः ५४ इति भागवते द
शमोध्यायः शुक उवाच भगवानात्मनात्मानं राम उत्तमकल्पकैः सर्वदेवमयं देवमीजे आचार्य
वान्मखैः १ होत्रेददाद्दिशं प्राचीं ब्रह्मणे दक्षिणां प्रभुः अध्वर्यवे प्रतीचीं वा उदीचीं सामगाय सः २ आ
चार्याय ददौ शेषां यावती भूस्तदंतरा मन्यमान इदं कृत्स्नं ब्राह्मणोर्हति निस्पृहः ३ इत्ययं तदलंकार
वासोभ्यामवशेषितः तथा राज्ञ्यपि वैदेही सौमंगल्यावशेषिता ४ तेतु ब्राह्मणदेवस्य वात्सल्यं वीक्ष्य
संस्तुतं प्रीताः क्लिन्नधियस्तस्मै प्रत्यर्प्येदं बभाषिरे ५ अप्रत्तं नः त्वया किं नु भगवान्भुवनेश्वर यन्नो
न्तर्हृदयं विश्य तमो हंसि स्वरोचिषा ६ नमो ब्रह्मण्यदेवाय रामायाकुंठमेधसे उत्तमश्लोकधुर्याय
न्यस्तदंडार्पितांघ्रये ७ कदाचिल्लोकजिज्ञासुर्गूढो रात्र्यामलक्षितः चरन्वाचोश्रृणोद्रामो भार्यामु
(द्दिश्य कस्यचित् ८
कं तावन्मात्रमवशेषितं यस्या स्तद्व्यतिरिक्तं हिरण्यादि सर्वं ददावित्यर्थः॥ अप्रत्तं अद
त्तं विश्य प्रविश्य न्यस्तदंडैर्मुनिभिरर्पितौ चिंतनेन यस्मा अंघ्री यस्य तस्मै तेष्वर्पितावंघ्री येनेति वा ८ श्रीराम।

असंविदः अज्ञान्प्राचेतसो वाल्मीकिः तस्याश्रमं प्राप्ता अंतर्वत्नी गर्भिणी क्रिया जातकर्माद्याः ईश्वरोपि शुचोरो

नाहं बिभर्मि त्वां दुष्टामसतीं परवेश्मगां स्त्रीलोभी बिभृयात्सीतां रामो नाहं भजे पुनः ९ इति लोकाद्ब
हुमुखाद्दुराराध्यादसंविदः पत्या भीतेन सा त्यक्ता प्राप्ता प्राचेतसाश्रमं १० अंतर्वत्न्यागते काले य
मौ सा सुषुवे सुतौ कुशो लव इति ख्यातौ तयोश्चक्रे क्रिया मुनिः ११ अंगदश्चित्रकेतुश्च लक्ष्मणस्या
त्मजौ स्मृतौ तक्षः पुष्कल इत्यास्तां भरतस्य महीपते १२ सुबाहुः श्रुतसेनश्च शत्रुघ्नस्य बभूवतुः गं
धर्वान्कोटिशो जघ्ने भरतो विजये दिशां १३ तदीयं धनमानीय सर्वं राज्ञे न्यवेदयत् शत्रुघ्नश्च मधो
ः पुत्रं लवणं नाम राक्षसं १४ हत्वा मधुवने चक्रे मथुरां नाम वै पुरीं मुनौ निक्षिप्य तनयौ सीता भ
र्त्रा विवासिता १५ ध्यायंती रामचरणौ विवरं प्रविवेश ह तां श्रुत्वा भगवान्रामो रुंधन्नपि धिया शु
चः १६ स्मरंस्तस्या गुणांस्तांस्तान्नाशक्नोद्रोद्धुमीश्वरः स्त्रीपुंप्रसंग एतादृक्सर्वत्रैव भयावहः १७
अपीश्वराणां किमुत ग्राम्यस्य गृहचेतसः तत ऊर्ध्वं ब्रह्मचर्यं धारयन्नजुहोत्प्रभुः त्रयोदशाब्दसा
हस्रमग्निहोत्रमखंडितं १८
द्धुं नाशक्नोत्। न चातिचित्रमेतदित्याह। स्त्रीपुंसोः प्रसंगः आसक्तिः त्रासमावहतीति तथा विभक्तेरलुगार्षः पा
ठांतरं सुगमं किमुतेति प्रासंगिकोक्तिः अग्निहोत्रमजुहोत् १८

आत्मज्योतिर्निजंधामंजलधिबंधनंअस्त्रपूगैश्चरक्षसांवधइत्यादिकंविभिराश्चर्यमिववर्णितमपियशःस्तुतिर्न
भवति। तत्रहेतुः। अधिकसाम्याभ्यांविमुक्तंधामप्रभावोयस्यतस्यकिंकपयःसहायाःसुग्रीवाद्याःअवरणंयथा
लीलामात्रंतथैवेदमपि। युक्तंचैतदित्याह। सुराणांयाच्ञयाआत्तास्वीकृतालीलार्थंतनुर्येनतस्य। एवंविधंली
लाप्रयोजनंदर्शयन्प्रणमति। यस्ययशःनृपाणांयुधिष्ठिरादीनांसदःसुऋषयोमार्कंडेयादयोगायंति। दिगिभें

स्मरतांहृदिविन्यस्यविद्धंदंडककंटकैः स्वपादपल्लवंरामआत्मज्योतिरगान्निजं १९ नेदंयशोरघुपतेः
सुरयाच्ञयात्तलीलातनोरधिकसाम्यविमुक्तधाम्नः रक्षोवधोजलधिबंधनमस्त्रपूगैःकिंतस्यशत्रुह
ननेकपयःसहायाः २० यस्यामलंनृपसदःसुयशोधुनापिगायंत्यघघ्नमृषयोदिगिभेंद्रपट्टं तंना
कपालवसुपालकिरीटजुष्टपादांबुजंरघुपतिंशरणंप्रपद्ये २१ सयैःस्पृष्टोभिदृष्टोवासंविष्टोनुग
तोपिवा कोशलास्तेययुःस्थानंयत्रगच्छंतियोगिनः २२ पुरुषोरामचरितंश्रवणैरुपधारयन् आ
नृशंस्यपरोराजन्कर्मबंधैर्विमुच्यते २३

द्रपट्टवदाभरणरूपंतत्पर्यंतव्याप्तमित्यर्थः। नाकपालादेवाःवसुपालाश्चवसुधापालाःतेषांकिरीटैर्जुष्टंपादांबु
जंयस्यतंरघुपतिंपाठांतरेतत्यस्यरघुपतेर्जुष्टंपादांबुजंशरणंप्रपद्येइत्यर्थः। सरामःसंविष्टःउपवेशितःअ
नुगतोवायैःतेकोशलदेशवासिनःसर्वेपियत्रयोगिनोगच्छंतितत्स्थानंययुः। आनृशंस्यपरःउपशमनिष्ठःस
न्विमुच्यते २३

सरामःस्वयंकथमवर्ततभ्रातृन्प्रतिवाकथमवर्ततकथंभूतान्आत्मनःआत्मांशभूतान्तस्मिन्वाईश्वरेभ्रात्राद
यःअनुअनंतरंकथमवर्तंतप्रश्नत्रयं। तत्रश्रीरामस्यभ्रात्रादिषुप्रवृत्तिप्रकारमाहअथेति। अनेनैवभ्रातृणामपि
तदाज्ञानुसारित्वयाप्रवृत्तिरुक्ता। अथसिंहासनस्वीकारानंतरंपुरींवर्णयतित्रिभिः। गंधोदकैर्मदबिंदुभिश्चआ

राजोवाच कथंसभगवान्रामोभ्रातृन्वास्वयमात्मनः तस्मिन्वातेन्ववर्तंतप्रजाःपौराश्चईश्वरे २४
बादरायणिरुवाच अथादिशद्दिग्विजयेभ्रातृंस्त्रिभुवनेश्वरः आत्मानंदर्शयन्स्वानांपुरीमैक्षतसा
नुगः २५ आसिक्तमार्गांगंधोदैःकरिणांमदसीकरैः स्वामिनंप्राप्तमालोक्यमत्तांवासुतरामिव २६
प्रासादगोपुरसभाचैत्यदेवगृहादिषु विन्यस्तहेमकलशैःपताकाभिश्चमंडितां २७ पूगैःसवृंतैरंभा
भिःपट्टिकाभिःसुवाससां आदर्शैरंशुकैःस्रग्भिःकृतकौतुकतोरणां २८ तमुपेयुस्तत्रतत्रपौराअर्ह
णपाणयः आशिषोयुयुजुर्देवपाहीमांप्राक्त्वयोद्धृतां २९ ततःप्रजावीक्ष्यपतिंचिरागतंदिदृक्ष
योत्सृष्टगृहाःस्त्रियोनराः आरुह्यहर्म्याण्यरविंदलोचनमतृप्तनेत्राःकुसुमैरवाकिरन् ३०

सिक्तामार्गायस्यांसुतरांमत्तामिवासमत्तांवेतिवितर्केपाठांतरे। वासितरांकामोन्मत्तांगामित्यर्थः। पौराणांत
स्मिन्प्रवृत्तिमाह। तमुपेयुरितिवराहरूपेणत्वयोद्धृतामिमांपृथ्वींपाहीति। प्रजानांतस्मिन्प्रवृत्तिमाहततःप्रजा
इति ३०

स्वयं कथमवर्त्ततेत्यस्योत्तरमाह। अथेति यावत्समाप्ति स्वगृहं प्रविष्टः सन् तस्मिन् रेमे इति पंचमेनान्वयः। गृहं वर्णय
तिसार्धैः त्रिभिः। अनंता ये खिलानां रत्नादीनां कोशाः तैराढ्यं अनर्घ्यानुरवः परिच्छदा यस्मिन्। विद्रुममया उदुंब
रा देहल्यो येषु तैर्द्वारैः स्वच्छैः स्थलैः। तत्तीयांतानां मंडितमिति तृतीयेनान्वयः। वाससां मणिगणानां च अंशुकैर्दी

अथ प्रविष्टः स्वगृहं जुष्टं स्वैः पूर्वराजभिः। अनंताखिलकोशाढ्यमनर्घ्योरुपरिच्छदं ३१ विद्रुमोदुंबरद्वारैर्वै
डूर्यस्तंभपंक्तिभिः। स्थलैर्मरकतैः स्वच्छैर्भ्राजत्स्फटिकभित्तिभिः ३२ चित्रस्रग्भिः पट्टिकाभिर्वासोमणिगणांशु
कैः। मुक्ताफलैश्चिदुल्लासैः कांतकामोपपत्तिभिः ३३ धूपदीपैः सुरभिभिर्मंडितं पुष्पमंडनैः। स्त्रीपुंभिः सु
रसंकाशैर्जुष्टं भूषणभूषितैः ३४ तस्मिन् स भगवान् रामः स्निग्धया प्रियचेष्टया रेमे स्वारामधीराणामृ
षभः सीतया किल ३५ बुभुजे च यथाकालं कामान् धर्ममपीडयन्। वर्षपूगान् बहून् नृणामभिध्याताङ्घ्रिप
ल्लवः ३६ इति श्रीभागवते नवमस्कंधे एकादशोऽध्यायः। श्रीशुक उवाच। कुशस्य चातिथि
स्तस्मान्निषधस्तत्सुतो नभः। पुंडरीकोऽथ तत्पुत्रः क्षेमधन्वाभवत्ततः १ राम ३१

त्तिभिः। चिदुल्लासैः चैतन्यं तद्वदुल्लासैः उज्ज्वलैः पद्मादिविदिति। क्वचित्तु वैडूर्यस्तंभादिषु यथाशोभमुज्ज्वलैर्मुक्ताफलैर्मंडितमि
त्यर्थः। कांताः कमनीया कामोपपत्तयो भोगसाधनानि ताभिः। भूषणानां भूषणभूतैः नृणां मध्ये पद्मान् अभिध्याताङ्घ्रिपल्लवं यस्येति ३६ इति नवमे एकादशः। द्वादशे रामपुत्रस्य कुशस्यान्वय उच्यते। एवमिक्ष्वाकुपुत्रस्य श
शादस्येति तोऽन्वयः। कुशस्य श्रीरामस्य पुत्रस्यातिथिः सुतोऽभवत्। १

अर्कसंभवः अर्कस्यांशभूतः जैमिनेः शिष्यो योगाचार्यः। तदाह। यतः सकाशात् कौशल्यो याज्ञवल्क्य ऋषिरध्यात्मयो

देवानीकस्ततो हीनः पारियात्रोऽथ तत्सुतः। ततो बलस्थलस्तस्माद्वज्रनाभोऽर्कसंभवः २ खगणस्तत्सुतस्तस्मा
द्विधृतिश्चाभवत्सुतः। ततो हिरण्यनाभोऽभूद्योगाचार्यस्तु जैमिनेः ३ शिष्यः कौशल्य आध्यात्मं याज्ञवल्क्यो
ऽध्यगाद्यतः। योगं महोदयमृषिर्हृदयग्रंथिभेदनं ४ पुष्यो हिरण्यनाभस्य ध्रुवसंधिस्ततोऽभवत्। सुदर्शनोऽथा
ग्निवर्णः शीघ्रस्तस्य मनुः सुतः ५ योऽसावास्ते योगसिद्धः कलापग्राममाश्रितः। कलेरंते सूर्यवंशं नष्टं भा
वयिता पुनः ६ तस्मात्प्रसुश्रुतस्तस्य संधिस्तस्याप्यमर्षणः। महस्वांस्तत्सुतस्तस्माद्विश्वसाह्वोऽन्वजायत
७ ततः प्रसेनजित्तस्मात्तक्षको भविता पुनः। ततो बृहद्बलो यस्तु पित्रा ते समरे हतः। एते हीक्ष्वाकुभूपाला अतीताः शृण्वनागतान्। ८ बृहद्बलस्य
भविता पुत्रो नाम बृहद्रणः। उरुक्रियस्ततस्तस्य वत्सवृद्धो भविष्यति ९ प्रतिव्योमस्ततो भानुर्दिवाको वा
हिनीपतिः। सहदेवस्ततो वीरो बृहदश्वोऽथ भानुमान् १० प्रतीकाश्वो भानुमतः सुप्रतीकोऽथ तत्सुतः। भवि
ता मरुदेवोऽथ सुनक्षत्रोऽथ पुष्करः ११ तस्यांतरिक्षस्तत्पुत्रः सुतपास्तदमित्रजित्। बृहद्राजस्तु तस्यापि ब
र्हिस्तस्मात्कृतंजयः १२ रणंजयस्तस्य सुतः संजयो भविता ततः। तस्माच्छाक्योऽथ शुद्धोदो लांगलस्तत्सुतः
स्मृतः १३ ततः प्रसेनजित्तस्मात् क्षुद्रको भविता ततः। रणको भविता तस्मात्सुरथस्तनयस्ततः १४

गमध्यागात्। महांतं उदयो सिद्धिर्यस्मिन्। तं हृदयग्रंथेर्भेदकं च। यं मनुं विशिनष्टि। योऽसाविति पुनर्भावयिता भाव
यिष्यति। पित्रा अभिमन्युना। तस्मादमित्रजित्। १४

निष्ठावंशस्य स्थितिस्तस्य अंतः। तदेवाह इक्ष्वाकूणामिति इति नवमे द्वादशः इक्ष्वाकोरेव पुत्रस्य निमेर्वंश
स्त्रयोदशो वर्ण्यते जन्ति रेयत्र बहुला जनकाद्वयः॥ निमेरोरसः पुत्रो नाभूदिति दर्शयन् कथामाह निमिरित्येकादश
भिः। सत्रमारभ्य वसिष्ठं ऋत्विजं अवृत तव व्रतं शक्रस्य मखं निर्वर्त्य प्रतिपालय प्रतीक्षस्वेति। गृहपतिर्निमिः इदं ज्ञी॥

सुमित्रो नाम निष्ठांत एते बार्हद्बलान्वया इक्ष्वाकूणामयं वंशः सुमित्रांतो भविष्यति यत्तं संप्राप्य राजानं संस्थां
प्राप्स्यति वै कलौ १५ इति श्रीभागवते रामचरित्रवर्णनं नाम द्वादशोध्यायः शुक उवाच निमिरि
क्ष्वाकुतनयो वसिष्ठमवृत ऋत्विजं आरभ्य सत्रं सोप्याह शक्रेण प्राग्वृतोस्मि तः १ तं निर्वर्त्यागमिष्यामि ता
वन्मां प्रतिपालय तूष्णीमासीद्गृहपतिः सोपीन्द्रस्याकरोन्मखं २ निमिश्चलमिदं विद्वान्सत्रमारभतात्म
वान् ऋत्विग्भिरपरैस्तावन्नागमद्यावता गुरुः ३ शिष्यव्यतिक्रमं वीक्ष्य निर्वर्त्य गुरुरागतः अशपत्पत
तांदेहो निमेः पंडितमानिनः ४ निमिः प्रतिददौ शापं गुरवेधर्मवर्तिने तवापि पततां देहो लोभाद्धर्मम
जानतः ५ इत्युत्ससर्ज स्वं देहं निमिरध्यात्मकोविदः मित्रावरुणयोर्जज्ञे उर्वश्यां प्रपितामहः ६ गंध
वस्तुषु तद्देहं निधाय मुनिसत्तमाः समाप्ते सत्रयागेथ देवानूचुः समागतान् ७ राज्ञो जीवतु देहोयं प्र राम ३२
सन्नाः प्रभवो यदि तथेत्युक्ते निमिः प्राह मा भून्मे देहबंधनं ८

वितं वलं ऋत्विग्भिरविद्वान् इंद्रस्य मखं निर्वर्त्यागतो गुरुः शिष्यस्य व्यतिक्रममन्यायं वीक्ष्य निमेर्देहः पतत्विति शापत्
उर्वशीदर्शनात् कुंभरेतस्ताभ्यां कुंभे निषिक्तं तस्मात् प्रपितामहो वसिष्ठो जज्ञे तदाह मित्रावरुणयोरिति। तथा च श्रुतिः
कुंभे रेतः सिषिचतुः समानमिति यदि प्रसन्नाः प्रभवः समर्थाश्च तर्हि जीवत्वित्यूचुः ८

यस्य देहस्य योगं न वांछंति अपितु मोक्षायैव भजंति ९ १० निमिर्विदेह एव सन् उष्यतां वसतु कामं यथेच्छं एवं सति युष्मा
भिः प्रार्थितं जीवितमस्य भविष्यति न च देहसंबंध इति भावः स च अध्यात्मसंस्थितः लोचनयोः स्थितः सन् उन्मेषणनिमेषा
भ्यां तत्प्रवर्तकत्वेन लक्षितो वर्ततइतिशेषः ११ तदेवं मृतादपि निमेर्देहाद्वंशप्रवृत्तिं दर्शयति अराजकेत्वयमिति तस्यान्वर्था
यस्य योगं न वांछंति वियोगभयकातराः भजंति चरणांभोजं मुनयो हरिमेधसः ९ देहं नावरुरुत्से हं दुःखशोकभ
यावहं सर्वत्रास्य यतो मृत्युर्मत्स्यानामुदके यथा १० देवा ऊचुः विदेह उष्यतां कामं लोचनेषु शरीरिणां उन्मे
षणनिमेषाभ्यां लक्षितोध्यात्मसंस्थितः ११ अराजकेत्वयं नृणां मन्यमाना महर्षयः देहं ममंथुः स्म निमेः कु
मारः समजायत १२ जन्मना जनकः सोभूत् वैदेहस्तु विदेहजः मिथिलो मथनाज्जातो मिथिला येन निर्मिता १३
तस्मादुदावसुस्तस्य पुत्रोभून्नंदिवर्द्धनः ततः सुकेतुस्तस्यापि देवरातो महीपते १४ तस्माद्बृहद्रथस्तस्य महा
वीर्यः सुधृतपिता सुधृतेर्धृष्टकेतुर्वै हर्यश्वोथ मरुस्ततः १५ मरोः प्रतीपकस्तस्माज्जातः कृतरथो यतः देवमी
ढस्तस्य सुतो विश्रुतोथ महाधृतिः १६ कृतिरातस्ततस्तस्मान्महारोमाथ तत्सुतः स्वर्णरोमा सुतस्तस्य ह्र
स्वरोमा व्यजायत १७ ततः सीरध्वजो जज्ञे यज्ञार्थं कर्षतो महीं सीता सीराग्रतो जाता तस्मात्सीरध्वजः स्मृतः
१८
नित्रीणि नामान्याह जन्मना असाधारणेन जनएव जनकः यद्वा स्वदेहद्वारा जनकता तस्मान्निर्विजनको भूदित्यर्थः
मिथिला येन निर्मिता त्यनेन उत्पत्त्यंतरमर्थादुक्तं १३ १४

भा० न० सुधृतस्सुधृतिः तस्य पिता २० तस्य केशिध्वजस्य भानुमान् २१ २२ ततस्तस्मात्सुपार्श्वकः २३ अग्निसंभवः अग्ने रंशात्संभूतः २४
३३ यस्मात्स भ्रावणः २५ २६ योगेश्वराया ज्ञवल्क्यादयः २७ नवमे त्रयोदशः चतुर्दशादिभिः सोमवंशमाह समाप्ति

कुशध्वजस्तस्य पुत्रस्ततो धर्मध्वजो नृप धर्मध्वजस्य द्वौ पुत्रौ कृतध्वजमितध्वजौ १९ कृतध्वजात्केशिध्वजः खांडि
क्यस्तु मितध्वजात् कृतध्वजसुतो राजन् आत्मविद्याविशारदः २० खांडिक्यः कर्मतत्वज्ञो भीतः केशिध्वजाद्द्रुतः
भानुमांस्तस्य पुत्रोभूत् शतद्युम्नस्तु तत्सुतः २१ शुचिस्तत्तनयस्तस्मात्सनद्वाजस्ततोभवत् ऊर्ध्वकेतुः सनद्वाजाद
योथ पुरजित्सुतः २२ अरिष्टनेमिस्तस्यापि श्रुतायुस्तत्सुपार्श्वकः ततश्चित्ररथो यस्य क्षेमाधिर्मिथिलाधिपः
२३ तस्मात्समरथस्तस्य सुतः सत्यरथस्ततः आसीदुपगुरुस्तस्मादुपगुप्तोग्निसंभवः २४ वस्वनंतोथ तत्पुत्रो यु
युधोनात्सुभाषणः श्रुतस्ततो जयस्तस्माद्विजयोस्मादृतः सुतः २५ शुनकस्तत्सुतो जज्ञे वीतहव्यो धृतिस्ततः ३३
बहुलाश्वो धृतेस्तस्य कृतिरस्य महावशी २६ एते वै मैथिला राजन् आत्मविद्याविशारदाः योगेश्वरप्रसादे
न द्वंद्वैर्मुक्ता गृहेष्वपि २७ इति श्रीभागवते महापुराणे नवमस्कंधे जनकवंशे त्रयोदशोध्यायः श्रीशुक उवाच
अथातः श्रूयतां राजन् वंशः सोमस्य पावनः यस्मिन्नैलादयो भूपाः कीर्त्यंते पुण्यकीर्तयः १ सहस्रशिरसः पुं १४
सो नाभिह्रदसरोरुहात् जातस्यासीत्सुतो धातुरत्रिः पितृसमो गुणैः २ तस्य दृग्भ्योभवत्पुत्रः सोमोमृतमयः किल ॥
तः यस्मिन्नैलादयो भूपाः कीर्त्यंते पुण्यकीर्तयः चतुर्दशो गुरोः पत्न्यां तारायां सोमजाद्बुधात् जातश्चैलः षड्वर्गश्यामा श्रीराम
युर्मुख्यान जीजनत् १ दृग्भ्यः आनंदाश्रुभ्यः अत एवामृतमयः किलेत्याश्चर्ये पाठांतरे दृशः नेत्रात् वक्ष्यमाणदर्पस्य का

वक्ष्यमाणदर्पस्य कारणमाह विप्रेति सोमस्य पुत्रो बुध इति कथाद्वारेण हपत्नीमिति सार्धैर्नवभिः क्रतोत निमि
त्तं सुराणां दानवानां च विग्रहे कारणमाह शुक्र इति असुरैः सहितं उडुपमग्रहीदित्यर्थः संधिरार्षः गुरोः सुत

विप्रौषध्युडुगणानां ब्रह्मणा कल्पितः पतिः सोयजद्राजसूयेन विजित्य भुवनत्रयं ३ पत्नीं बृहस्पतेर्द
र्पात्तारां नामाहरद्बलात् यदा स देवगुरुणा याचितोभीक्ष्णशो महान् ४ नात्यजत्तत्कृते जज्ञे सुरदा
नवविग्रहः शुक्रो बृहस्पतेर्द्वेषादग्रहीत्सासुरोडुपं हरो गुरुसुतं स्नेहात्सर्वभूतगणावृतः ५ सर्व
देवगणोपेतो महेंद्रो गुरुमन्वयात् सुरासुरविनाशोभूत्समरस्तारकामयः ६ निवेदितोथांगिरसा
सोमं निर्भर्त्स्य विश्वकृत् तारां स्वभर्त्रे प्रायच्छदंतर्वत्नीमवैत्पतिः ७ त्यज त्यजाशु दुःप्रज्ञे मत्क्षेत्रे
दाहितं परैः नाहं त्वां भस्मसात्कुर्यां स्त्रियं सांतानिके सति ८ तत्याज व्रीडिता तारा कुमारं कनक
प्रभं स्पृहामांगिरसश्चक्रे कुमारे सोम एव च ९ ममायं न तवेत्युच्चैस्तस्मिन्विवदमानयोः पप्रच्छु
ऋषयो देवा नैवोचे व्रीडिता तु सा १० कुमारो मातरं प्राह कुपितोलीकलज्जया किं न वोचस्यसद्वृत्ते आ
त्मावद्यं वदाशु मे ११

बृहस्पतिमग्रहीत् अंगिरसः सकाशात्प्राप्तविद्यो हर इति हि प्रसिद्धिः निवेदितो विज्ञापितः विश्वकृत् ब्रह्मा अ
वैत् अबुध्यत बृहस्पतिराह त्यज त्यजेति परैराहितं गर्भं गर्भे त्यक्ते भस्मीकरिष्यतीति बिभ्यतीं प्रत्याह ना
हमिति सांतानिकः संतानार्थी सांतानिके इति पाठे हे सत्पुत्रे इत्यर्थः ११

भा०न० ३४

रहः एकांते। पुरूरवस उर्वश्यामायुःप्रमुखाःषट्पुत्रा इतिवक्तुं कथामाह। तस्येत्यादिना यावत्समाप्तिः॥
ननु देवी कुतो मनुष्यांतिकमुपागच्छत्। तत्राह मित्रावरुणयोःशापान्नरलोकतां मनुष्यभावमापन्ना सती॥
~~नोआवयोरतिरस्त्विति। यस्य तव अंगांतरं वक्षः आश्रया रिंसया रंतुमिच्छया ह स्फुटं न च्यवते नापयातीति॥~~

त्वरमाणां रह आहूय समप्राक्षीच्च सांत्वयन्। सोमस्येत्याह शनकैः सोमस्तां तावदग्रहीत् १२ तस्यात्मयो
नेरकृत बुध इत्यभिधां नृप बुध्या गंभीरया येन पुत्रेणापोडुराण्मुदं १३ ततः पुरूरवा जज्ञे इलायां य
उदाहृतः तस्य रूपगुणौदार्यशीलद्रविणविक्रमान् १४ श्रुत्वोर्वशींद्रभवने गीयमानान्सुरर्षिणा॥
तदंतिकमुपेयाय देवी स्मरशरार्दिता १५ मित्रावरुणयोःशापादापन्ना नरलोकतां निशम्य पुरु
षश्रेष्ठं कंदर्पमिव रूपिणं १६ धृतिं विष्टभ्य ललना उपतस्थे तदंतिके स तां विलोक्य नृपतिर्हर्षेणोत्
फुल्ललोचनः उवाच श्लक्ष्णया वाचा देवीं हृष्टतनूरुहः १७ राजोवाच स्वागतं ते वरारोहे आ राम
स्यतां करवाम किं संरमस्व मया साकं रतिर्नौ शाश्वतीः समाः १९ उर्वश्युवाच कस्यास्त्वयि न ३४
सज्जेत मनो दृष्टिश्च सुंदर यदंगांतरमासाद्य च्यवते ह रिरंसया २०

नोआवयोरतिरस्त्विति। यस्य तव अंगांतरं वक्षः आसाद्य रिंसया रंतुमिच्छया ह स्फुटं न च्यवते नापयातितद्य
स्मादिनिवा २०

शापावसाने भाषाभंगामिषेण जिगमिषोस्तस्याः भाषाबंधमाह। एतावितिद्वाभ्यां। उरणकौ मेषौ। न्यासौ निक्षे
पनूपौ रक्षयाः श्लाघ्यः स एव स्त्रीणां वरः स्मृतः। अतो विजातीत्वं न दोष इति भावः। हे वीर घृतं मे भक्ष्यं स्यात्। घृतं
वा आज्यमिति श्रुतेः। देवानां वा अमृतमसि त्वां मैथुनादन्यत्र दिवा स संत्वां नेक्षिष्य इति प्रतिपेदे अंगी

एतावुरणकौ राजन्न्यासौ रक्षस्व मानद संरंस्ये भवता साकं श्लाघ्यः स्त्रीणां वरः स्मृतः २१ घृतं मे वीर
भक्ष्यं स्यान्नेक्षे त्वान्यत्र मैथुनात् दिवाससं तत्तथेति प्रतिपेदे महामनाः २२ अहो रूपमहो भावो नरलो
कविमोहनं को न सेवेत मनुजो देवीं त्वां स्वयमागतां २३ तस्यां स पुरुषश्रेष्ठो रमयंत्यां यथार्हतः रे
मे सुरविहारेषु कामं चैत्ररथादिषु २४ रममाणस्तया देव्या पद्मकिंजल्कगंधया तन्मुखामोदमुदितो
ग मुमुदेहर्गणान्बहून् २५ अपश्यन्नुर्वशीमिंद्रो गंधर्वान्समचोदयत् उर्वशीरहितं मह्यमास्थानं ना
तिशोभते २६ त उपेत्य महारात्रे तमसि प्रत्युपस्थिते उर्वश्या उरणौ जह्रुः न्यस्तौ राजनि जायया।
२७ निशम्याक्रंदितं देवी पुत्रयोर्नीयमानयोः हतास्म्यहं कुनाथेन नपुंसा वीरमानिना २८

कृतवान्। तदेवाह। अहो इति। पद्मकिंजल्कगंधइव गंधो यस्याः तस्याः मुखामोदेन मुषितः प्रलोभितः सन्रेम
इमं महारात्रे मध्यरात्रे महानिशा द्वे घटिके रात्रौ मध्यमयामयो रिति स्मृतेः। जिगमिषोस्तस्याः परुषोक्तिमाह
हतास्मीति सार्धेन। नपुंसा नपुंसकेन। यथा नारी स तथा संत्रस्तः २८

भा०न० ऐलोविद्युतः विशिष्टद्युतिमंतः व्यद्योतंत दामिम कुर्वंत यद्वा तद्देवतडितः प्रकाशंतेत्यर्थः। नग्नमैक्षत अतो भा
३५ षा भंगान्निर्जगामेति ज्ञेयं। तस्याः सखीश्च पंच वीक्ष्य सूक्तं शोभनं वचनं हयेजाये त्यादि तदेवार्थत आह अहो इ

यद्विश्रंभादहं नष्टा हृतापत्या च दस्युभिः यः शेते निशि संत्रस्तो यथा नारी दिवा पुमान् २९ इति वाक्सा
यकैर्विद्धः प्रतोत्रैरिव कुंजरः निशि निस्त्रिंशमादाय विवस्त्रोभ्यद्रवद्रुषा ३० ते विसृज्योरणौ तत्र व्य
द्योतंत स्म विद्युतः आदाय मेषावायांतं नग्नमैक्षत सा पतिं ३१ ऐलोपि शयने जायामपश्यन्विमना
इव तच्चित्तो विह्वलः शोचन्बभ्रामोन्मत्तवन्महीं ३२ स तां वीक्ष्य कुरुक्षेत्रे सरस्वत्यां च तत्सखीः पंच प्रहृ
ष्टवदनाः प्राह सूक्तं पुरूरवाः ३३ अहो जाये तिष्ठ तिष्ठ घोरे न त्यक्तुमर्हसि मां त्वमद्याप्यनिर्वृत्य वचांसि
कृणवावहै ३४ सुदेहोयं पतत्यत्र देवि दूरं हृतस्त्वया खादंत्येनं वृका गृध्रास्त्वत्प्रसादस्य नास्पदं ३५ राम ३५

निद्राभ्यां। अनिर्वृत्य मत्कृतां निर्वृतिमप्राप्य पाठांतरे मां निर्वृतिमगमयित्वा मंत्रान् अनुक्त्वेतिवा। वचांसि कृणवाव
है गोष्ठीकरवावहै। सुदेहो निकमनीयोयं मम देहः। पुरूरवो मा मृथा इत्यादि ३५ श्रीगोपालो जयति॥ ॥

तस्याः सूक्तं तदप्यर्थत आह मा मृथा इति चतुर्भिः। मा म्रियस्व पुरुषोसि अतो धैर्यमावहेति भावः। इमे वृकाः प्रसिद्धाः
इंद्रियाणि वा त्वा इति त्वा मा स्म अद्युः भक्षयेयुः। इंद्रियवशो मा भवेत्यर्थः। प्रिये निमित्ते साहसं यासां। तं सांत्वय
ति। संवत्सरांत इति। अपराणीति वचनात् अंतर्वत्नीमुपालक्ष्य अनेनाग्निना कर्म कृत्वा तद्दशा उर्वशीं प्राप्स्यसीत्य

उर्वश्युवाच मा मृथाः पुरुषोसि त्वं मा स्म त्वाद्युर्वृका इमे क्वापि सख्यं न वै स्त्रीणां वृकाणां हृदयं यथा ३६
स्त्रियो ह्यकरुणाः क्रूरा दुर्मर्षाः प्रियसाहसाः घ्नंत्यल्पार्थेपि विश्रब्धं पतिं भ्रातरमप्युत ३७ विधायाली
कविश्रंभमज्ञेषु त्यक्तसौहृदाः नवं नवमभीप्संत्यः पुंश्चल्यः स्वैरवृत्तयः ३८ संवत्सरांते हि भवानेकरात्रं
मयेश्वरः वत्स्यत्यपत्यानि च ते भविष्यंत्यपराणि भोः ३९ अंतर्वत्नीमुपालक्ष्य देवीं स प्रययौ पुरं पुनस्त
त्रगतो ब्दांते उर्वशीं वीरमातरं ४० उपलभ्य मुदा युक्तः समुवास तया निशां अथैनमुर्वशी प्राह कृपणं वि
रहातुरं ४१ गंधर्वानुपधावेमान् तुभ्यं दास्यंति मामिति तस्य संस्तुवतस्तुष्टा अग्निस्थालीं ददौ नृप उर्व
शीं मन्यमानस्तां सोबुध्यत विचरन्वने ४२ स्थालीं न्यस्य वने गत्वा गृहानाध्यायतो निशि त्रेतायां संप्रवृ

भिप्रायेणाग्निस्थालीं ददुः। स तु तां स्थालीमेवोर्वशीं मन्यमानः तया सहितो त्तायां मनसि त्रय्यवर्तत ४३
वने विचरन् नेयमुर्वशी किं त्वग्निस्थालीत्यबुध्यत। ततश्च तां स्थालीं वने स्थापयित्वा गृहान् गत्वा निशि नित्यं तामे
वाध्यायतस्तस्य मनसि त्रेतायां त्रय्यवर्तत। कर्मबोधकं वेदत्रयं प्रादुरभूत् ४३ श्रीकृष्णाय नमः श्रीराम

भा॰न॰ ३६ ततः स्थालीस्थानं गतः सन् शम्या गर्भे जातमश्वत्थं विलक्ष्य अस्मिन्सा वह्निरस्तीति विशेषेण लक्षयित्वा तेनाश्वत्थेन
द्वे अरणी कृत्वाग्निं ममंथेति शेषः। शमीगर्भादग्निं मंथ्नातीति श्रुतेः। मंथनप्रकारमाह। अधरारणिमुर्वशीं ध्यायन्नु
त्तरारणिमात्मानं ध्यायन्। उभयोररण्योर्मध्ये यत्काष्ठं तत्प्रजननं पुत्रं ध्यायन्। तथा च मंत्रः। उर्वश्यापुरसि पुरूर
वा इति। तस्य तेन कृतान्निर्मथनात्। विभावसुरग्निर्जातः। कथंभूतं जातं। वेदोघनं भोग्यं यस्मात्स त्रय्या विद्यया।

स्थालीस्थानं गतोऽश्वत्थं शमीगर्भं विलोक्य सः तेन द्वे अरणी कृत्वा उर्वशीलोककाम्यया ४४ उर्वशीं
मंत्रतो ध्यायन्नधरारणिमुत्तरां आत्मानमुभयोर्मध्ये यत्तत्प्रजननं प्रभुः ४५ तस्य निर्मंथनाज्जा
तो जातवेदा विभावसुः त्रय्या स विद्यया राज्ञा पुत्रत्वे कल्पितस्त्रिवृत् ४६ तेनायजत यज्ञेशं भग
वंतमधोक्षजं उर्वशीलोकमन्विच्छन्सर्वदेवमयं हरिं ४७ एक एव पुरा वेदः प्रणवः सर्ववाङ्मयः
देवो नारायणो नान्य एकोऽग्निर्वर्ण एव च ४८

त्रिविहितेनाधानसंस्कारेण त्रिवृत्। आहवनीयादिरूपः सन्। राज्ञा पुरूरवसा पुत्रत्वे कल्पितः पुण्यलोकप्रापकत्वा राम ३६
त् तेन दोहतेनेति। न त्वनादिर्वेदत्रयबोधितो ब्राह्मणादीनां इंद्राद्यनेकदेवयजनेन स्वर्गप्राप्तिहेतुः कर्ममार्गः क
थं सादिरिव वर्ण्यते। तत्राह एक एवेति द्वाभ्यां। पुरा कृतयुगे सर्ववाङ्मयः सर्वासां वाचां बीजभूतः प्रणव एक एव
वेदश्च नारायणश्च एक एव अग्निश्चैक एव लौकिकः वर्णश्चैक एव हंसो नाम ४८

वेदत्रयी तु पुरूरवसः सकाशादासीत्। एषि वा त्राप। अयं भावः। कृतयुगे सत्वप्रधानाः प्रायशः सर्वेऽपि ध्याननिष्ठाः। र
जःप्रधाने तु त्रेतायुगे वेदादिविभागेन कर्ममार्गः प्रकटो बभूवेति इति नवमे चतुर्दशः ततः पंचदशे गाधि
रैलपुत्रान्वये जनि। यद्दौहित्रसुतो रामः कार्तवीर्यमहानृषा। सुग्रहत्वाया त्यादिक्रमेण श्रुतायुप्रभृतिषु षण्णां

पुरूरवस एवासीत्त्रयी त्रेतामुखे नृप अग्निना प्रजया राजा लोकं गांधर्वमेयिवान् ४९ इति श्रीभागव
ते महापुराणे नवमस्कंधे ऐलोपाख्याने चतुर्दशोऽध्यायः बादरायणिरुवाच ऐलस्य चोर्वशीगर्भा
त्षडासन्नात्मजा नृप आयुः श्रुतायुः सत्यायू रयोऽथ विजयो जयः १ श्रुतायोर्वसुमान्पुत्रः सत्यायोश्च
श्रुतंजयः रयस्य सुत एकश्च जयस्य तनयोऽमितः २ भीमस्तु विजयस्याथ कांचनो होत्रकस्ततः तस्य ज
ह्नुः सुतो गंगां गंडूषीकृत्य योऽपिबत् ३ जह्नोस्तु पुरुस्तत्पुत्रो बलाकश्चात्मजोऽजकः ततः कुशः कुशस्या
पि कुशांबो मूर्तयो वसुः कुशनाभश्च चत्वारो गाधिरासीत्कुशांबुजः ४ तस्य सत्यवतीं कन्यां ऋचीकोऽ
याचत द्विजः वरं विसदृशं मत्वा गाधिर्भार्गवमब्रवीत् ५ उदयः

वंशमाह श्रुतायोरित्यादिना। एकसंज्ञः अमितः तत्संज्ञः। जह्नोः पुत्रः। तस्य बलाकः। तस्याजकः। गाधेः पुत्रो विश्वा
मित्रो ब्रह्मर्षिरभूदित्युत्तराध्याये वक्ष्यति। गाधेरभून्महातेजा इत्यादिना विसृष्ट तत्र तावदुपोद्घातत्वेन भृगुवं
शसंभवस्य ऋचीकस्य चरितं प्रसक्तानुप्रसक्तेन च परशुरामावतारचरितमाह तस्य सत्यवतीमित्यादिना। वि
सदृशं अननुरूपं भार्गवं ऋचीकं अब्रवीत् ५

दक्षिणवामयोरेकतः श्यामोकर्णो येषां। सर्वास्मिन्नंगे चंद्रस्येव वर्चो येषां। न त्वेदमपि पर्याप्तमस्मत्कन्यायाः यतः कुशिकाः कौशिका वयं। उभयैर्मंत्रैः पत्न्याः स्वस्य च तु क्षात्रैरित्यर्थः। यावत्स्नातुं मुनिर्निर्गतः तावद्भार्यया भ्रातस्ते हा त्पुत्र्याः सत्यवत्याः चरुः श्रेष्ठं मत्वा नयाचितामातास त्यवती याचिता सती ब्राह्ममंत्राभिमंत्रितं चरुं मात्रे अयच्छत् प्र

एकतःश्यामकर्णानां हयानां चंद्रवर्चसां सहस्रं दीयतां शुल्कं कन्यायाः कुशिका वयं ६ इत्युक्तस्तन्मतं ज्ञात्वा गतः स वरुणांतिकं आनीय दत्वा तानश्वानुपयेमे वराननां ७ स ऋषिभिः प्रार्थितः पत्न्या श्वश्र्वा चापत्यकाम्यया श्रपयित्वोभयैर्मंत्रैश्चरुं स्नातुं गतो मुनिः ८ तावत्सत्यवती मात्रा स्वचरुं याचिता सती श्रेष्ठं मत्वा तयायच्छन्मात्रे मातुरदत्स्वयं ९ तद्विज्ञाय मुनिः प्राह पत्नीं कष्टमकारि ते घोरो दंडधरः पुत्रो भ्राता ते ब्रह्मवित्तमः १० प्रसादितः सत्यवत्या मैवं भूदिति भार्गवः अथ तर्हि भवेत्पौत्रो जमदग्निस्ततोऽभवत् ११ सा चाभूत्सुमहत्पुण्या कौशिकी लोकपावनी रेणोः सुतां रेणुकां वै जमदग्निरुवाह यां १२ तस्यां वै भार्गवऋषेः सुता वसुमनादयः यवीयान्जज्ञ एतेषां राम इत्यभिविश्रुतः १३

दात्। मातुः चरुं क्षात्रमंत्राभिमंत्रितं स्वयं अदत् आदत्। कष्टं जुगुप्सितं तदेवाह। ते पुत्रो घोरो भविष्यति भ्राता तु ब्रह्मवित्तमो भविष्यतीति। एवं माभूदिति प्रसादितो भार्गव आह। अथ तर्हि पौत्रो घोरो भविष्यति। जमदग्निः पुत्रोऽभवदित्यर्थः। सा च सत्यवती कौशिकी नद्यभूत्। भार्गवऋषेः जमदग्नेः सुताः अनीनशन्नाशयामास १३

१४ तदेवाह रजस्तमोवृतमिति पाठांतरं सुगमं। कार्त्तवीर्यार्जुनेन कृतं अपराधं वक्तुं तस्य दर्पहेतुमैश्वर्यादिकमाह हैहयानामिति षड्भिः। परिकर्मभिः परिचर्यादिभिर्दत्तात्रेयमाराध्य। अव्याहतमिंद्रियादिकं लेभे यस्मिन्नै

यमाहुर्वासुदेवांशं हैहयानां कुलांतकं त्रिःसप्तकृत्वो य इमां चक्रे निःक्षत्रियां महीं १४ दुष्टं क्षत्रं भुवो भारमब्रह्मण्यमनीनशत् रजस्तमोवृतमहन्फल्गुन्यपि कृतेंऽहसि १५ राजोवाच किं तदंहो भगवतो राजन्यैरजितात्मभिः कृतं येन कुलं नष्टं क्षत्रियाणामभीक्ष्णशः १६ बादरायणिरुवाच हैहयानामधिपतिरर्जुनः क्षत्रियर्षभः दत्तं नारायणांशांशमाराध्य परिकर्मभिः १७ बाहून्दशशतं लेभे दुर्धर्षत्वमरातिषु अव्याहतेंद्रियौजःश्रीतेजोवीर्ययशोबलं १८ योगेश्वरत्वमैश्वर्यं गुणा यत्राणिमादयः चचाराव्याहतगतिर्लोकेषु पवनो यथा १९ स्त्रीरत्नैरावृतः क्रीडन्रेवांभसि मदोत्कटः वैजयंतीं स्रजं बिभ्रद्रुरोध सरितं भुजैः २० विप्लावितं स्वशिबिरं प्रतिस्रोतःसरिज्जलैः नामृष्यत्तस्य तद्वीर्यं वीरमानी दशाननः २१

श्वर्ये अणिमादयो गुणाः रेवांभसि नर्मदाजले। सरितं नर्मदां। रावणो दिग्विजये माहिष्मत्याः समीपे नर्मदायां देवपूजां कुर्वन् तेन प्रवाहस्यावरोधात् प्रतिस्रोतसः सत्याः सरितो जलैर्विप्लावितं स्वशिबिरमालक्ष्य तस्य तद्वीर्यं न सेहे २१

भा॰न॰ ततश्चकृतकिल्बिषः क्रीडंतमभिभवितुंप्रवृत्तः सन्गृहीतः माहिष्मत्यांस्वपुर्यांकपिरिवसन्निरुद्धश्चपुनश्चावज्ञ
३८ यायेनमुक्तः १इदानींतत्कृतमपराधंदर्शयन्नाहसएकदेत्यादिना। अर्हणमातिथ्यादिहविष्मत्याकामधेन्वात

गृहीतोलीलयास्त्रीणांसमर्क्षःकृतकिल्बिषः माहिष्मत्यांसन्निरुद्धोमुक्तोयेनकपिर्यथा २२ सएकदातु
मृगयांविचरन्विपिनेवने यदृच्छयाश्रमपदंजमदग्नेरुपाविशत् २३ तस्मैसनरदेवायमुनिरर्हणमा
हरत् ससैन्यामात्यवाहायहविष्मत्यातपोधनः २४ सवीरस्तत्रतद्दृष्ट्वाआत्मैश्वर्यातिशायिनीं तन्ना
द्रियताग्निहोत्र्यांसाभिलाषःसहैहयः २५ हविर्धानीमृषेर्दर्पान्नरान्हर्तुमचोदयत् तेचमाहिष्मतीं
निन्युःसवत्सांक्रंदतींबलात् २६ अथराजनिनिर्यातेरामआश्रममागतः श्रुत्वातत्तस्यदौरात्म्यंचु राम
क्रोधाहिरिवाहतः २७ घोरमादायपरशुंसतूणंवर्मकार्मुकं अन्वधावतदुर्मर्षोमृगेंद्रइवयूथपं। ३८
२८ तमापतंतंभृगुवर्यमोजसाधनुर्धरंबाणपरश्वधायुधं ऐणेयचर्मांबरमर्कधामभिर्युतंजटा
भिर्ददृशेपुरींविशन् २९

तत्रअर्हणंनाद्रियतततस्मिन्ननुष्यन्नुयत्तोग्निहोत्र्यांहोमधेनौसाभिलाषःसहैहयः हैहयैःसहवर्त्तमानः दर्पाद्धेतो
र्ऋषेर्हविर्धानीं अग्निहोत्रधेनुंहर्तुंनरानचोदयत्। सतूणंकार्मुकंचर्मचादाय ऐणेयंचर्मकृष्णाजिनमंबरंयस्य २९

प्रहरन्परश्वधोयस्य। मनश्चअनिलश्चतयोरिवोजोवीर्यंयस्यपरेषांचक्रंसैन्यंसूदयतीतितथा। छिन्नाभुजाः ऊरवः
कंधराश्चयेषां। हताःसूताःवाहनानिचयेषांतेवीरानिपेतुः। विहृक्ताःचर्मादयोयस्या पंचशतेषुधनुःषुसोर्जुनः

अचोदयद्धस्तिरथाश्वपत्तिभिर्गदासिबाणर्ष्टिशतघ्निशक्तिभिः अक्षौहिणीःसप्तदशातिभीषणास्ताराम
एकोभगवानसूदयत् ३० यतोयतोसौप्रहरत्परश्वधोमनोनिलौजाःपरचक्रसूदनः ततस्ततश्छि
न्नभुजोरुकंधरानिपेतुरुर्व्यांहतसूतवाहनाः ३१ दृष्ट्वास्वसैन्यंरुधिरौघकर्दमेरणाजिरेरामकुठा
रसायकैः विवृक्णचर्मध्वजचापविग्रहंनिपातितंहैहयआपतद्रुषा ३२ अथार्जुनःपंचशतेषुबा
हुभिर्धनुःषुबाणान्युगपत्ससंदधे। भुजान्कुठारेणकठोरनेमिनाचिच्छेदरामःप्रसभंत्वहेरिव ३४
×रामायरामोस्त्रभृतांसमग्रणीस्तान्येकधन्वेषुभिराच्छिनत्समं ३३ पुनःस्वहस्तैरचलान्मृधेंघ्रिपा
नुत्क्षिप्यवेगादभिधावतोयुधि ×छत्तबाहोःशिरस्तस्यगिरेःशृंगमिवाहरत् हतेपितरितत्पुत्राअ
युतंदुद्रुवुर्भयात् ३५ अग्निहोत्रीमुपावर्त्यसवत्सांपरवीरहा समुपेत्याश्रमंपित्रेपरिक्लिष्टांसम
(र्पयत् ३६

रामायसंदधेएकमेवधनुर्यस्यसःपार्श्वांतरेएकएवबंधःसंधानंयेषांतेरिषुभिःतानिधनूंषि
समंसहतत्क्षणमेवाच्छिनत्।मृधेसाधनभूतानचलानंघ्रिपांश्चोत्क्षिप्यअभिधावतःतस्यभुजान्विच्छेद
अहेःफणानिवेत्यर्थः।समर्पयत्समार्पयत् ३६

भा० न० अर्हणं तां पूज्यतां सौरी सूर्यस्य प्रभा तीर्थसंसेवया त्वकारात्तु यमनियमैश्च अच्युते चेतना चित्तं यस्य सः इ
३९ ति नवमे पंचदशः षोडशे यार्जुनसुतो जमदग्निहतो मुदः । रामात्क्षत्रवधः प्रोक्तो विश्वामित्रस्य चान्वयः ।

स्वकर्म तत्कृतं रामः पित्रे भ्रातृभ्य एव च वर्णयामास तच्छ्रुत्वा जमदग्निरभाषत ३७ राम राम महाबाहो भ
वान्पापमकारयत् अवधीन्नरदेवं यत्सर्वदेवमयं वृथा ३८ वयं हि ब्राह्मणास्तात क्षमयार्हणतां गताः
यया लोकगुरुर्देवः पारमेष्ठ्यमगात्पदं ३९ क्षमया रोचते लक्ष्मीर्ब्राह्मी सौरी यथा प्रभा क्षमिणामाशु भ
गवांस्तुष्यते हरिरीश्वरः ४० राज्ञो मूर्धाभिषिक्तस्य वधो ब्रह्मवधाद्गुरुः तीर्थसंसेवया चांहो जह्यंगाच्यु
तचेतनः ४१ इति श्रीभागवते महापुराणे नवमस्कंधे परशुरामचरिते हैहयार्जुनवधो नाम पंच
दशोध्यायः शुक उवाच पित्रोपशिक्षितो रामस्तथेति कुरुनंदन । संवत्सरं तीर्थयात्रां चरित्वा
श्रममाव्रजत् १ कदाचिद्रेणुका याता गंगायां पद्ममालिनं गंधर्वराजं क्रीडंतं अप्सरोभिरपश्यत २ राम
विलोकयंती क्रीडंतमुदकार्थं नदीं गता होमवेलां न सस्मार किंचिच्चित्ररथस्पृहा ३ कालात्ययं तं ३९
विलोक्य मुनेः शापविशंकिता आगत्य कलशं तस्थौ पुरोधाय कृतांजलिः ४

१ किंचिच्चित्ररथे गंधर्वराजे स्पृहा यस्याः सा किंचिन्न सस्मारेति वा । कलशं पुरोधाय ४ श्रीरामकृष्णाय

व्यभिचारं मानसं ज्ञात्वा आज्ञातिलंघिनां भ्रातॄणां मातुश्च वधे संचोदितः सन् मुनेर्यत्समाधिस्तपश्च तयोः प्रभाव
ज्ञः । यदि न हन्यां तर्हि मामपि शप्तुं समर्थः । यदि तु हन्यां तर्हि मयि संतुष्टः सन् तामपि जीवयितुं समर्थ इति जान

व्यभिचारं मुनिर्ज्ञात्वा पत्न्याः प्रकुपितोब्रवीत् घ्नतैनां पुत्रकाः पापामित्युक्तास्ते न चक्रिरे ५ रामः संचो
दितः पित्रा भ्रातॄन्मात्रा सहावधीत् प्रभावज्ञो मुनेः सम्यक् समाधेस्तपसश्च सः ६ वरेण छंदयामास प्री
व तः सत्यवतीसुतः वव्रे हतानां रामोपि जीवितं चास्मृतिं वधे ७ उत्तस्थुस्ते कुशलिनो निद्रापाय इवांज
सा पितुर्विद्वांस्तपोवीर्यं रामश्चक्रे सुहृद्वधं ८ येर्जुनस्य सुता राजन् स्मरंतस्ते पितुर्वधं रामवीर्यपरा
भूता लेभिरे शर्म न क्वचित् ९ एकदाश्रमतो रामे सभ्रातरि वनं गते वैरं सिसाधयिषवो लब्धच्छिद्रा
उपागमन् १० दृष्ट्वाग्न्यगार आसीनमावेशितधियं मुनिं भगवत्युत्तमश्लोके जघ्नुस्ते पापनिश्चयाः
याच्यमानाः कृपणया राममात्रातिदारुणाः प्रसह्य शिर उत्कृत्य निन्युस्ते क्षत्रबंधवः ११ रेणुका दुः
खशोकार्ता निघ्नंत्यात्मानमात्मना राम रामेति तातेति विचुक्रोशोच्चकैः सती १२ तदुपश्रुत्य दू
रस्थो हा रामेत्यार्तवत्स्वनं त्वरयाश्रममासाद्य ददृशे पितरं हतं १३

न्नित्यर्थः । ननु अतिनिंदितं कथं कृतवान् तत्राह । पितुर्विद्वानिति । पूर्वोक्त एवाभिप्रायः । सर्वक्षत्रियवधे कार
णं वक्तुमाह । येर्जुनस्य सुता इत्यादिना । भगवत्यावेशिता धीर्येन तं ११ १४ श्रीकृष्ण कृपाल दयाल ॥॥

भा० न० ५० दुःखादीनांवेगेनविमोहिताः।ब्रह्मघ्नैर्विहताश्रीर्यस्याः।तां।हेराजन्सरामस्तेषांशीर्षैर्माहिष्मत्यांमध्येमहांतं
गिरिंचक्रे।तेषांरक्तेनअब्रह्मण्यानांभयावहांघोरांनदींचक्रे।तथापिसर्वक्षत्रवधेकिंकारणंतदाह।हेतुंकृत्वे

तद्दुःखरोषामर्षार्तिशोकवेगविमोहिताः हातातसाधोधर्मिष्ठत्यक्त्वास्मान्स्वर्गतोभवान् १५ विल
प्यैवंपितुर्देहंनिधायभ्रातृषुस्वयं प्रगृह्यपरशुंरामःक्षत्रांतायमनोदधे १६ गत्वामाहिष्मतींरामो
ब्रह्मघ्नविहतश्रियं तेषांसशीर्षभीराजन्मध्येचक्रेमहागिरिं १७ तद्रक्तेननदींघोरामब्रह्मण्यभया
वहां हेतुंकृत्वापितृवधंक्षत्रेमंगलकारिणि १८ त्रिःसप्तकृत्वःपृथिवींकृत्वानिःक्षत्रियांप्रभुः स
मंतपंचकेचक्रेशोणितोदान्ह्रदान्नव १९ पितुःकायेनसंधायशिरआदायबर्हिषि सर्वदेवमयंदेवमा
त्मानमयजन्मखैः २० ददौप्राचींदिशंहोत्रेब्रह्मणेदक्षिणांदिशं अध्वर्यवेप्रतीचींवैउद्गात्रेउत्तरांदि
शं २१ अन्येभ्योवांतरदिशःकश्यपायचमध्यतः आर्यावर्तमुपद्रष्ट्रेसदस्येभ्यस्ततःपरं २२ ततश्च राम
ावभृथस्नानविधूताशेषकिल्बिषः सरस्वत्यांब्रह्मनद्यांरेजेव्यभ्रइवांशुमान् २३ स्वदेहंजमदग्नि ५०
स्तुलब्ध्वासंज्ञानलक्षणं ऋषीणांमंडलेसोभूत्सप्तमोरामपूजितः २४

तिसार्धेन।अमंगलकारिणी।अन्यायवर्तिनीसती।त्रिःसप्तकृत्वोरेणुकयादुःखावेशादुदरताडनंकृतं।ततोराम
स्तावत्कृत्वःक्षत्रमुत्सादितवानितिप्रसिद्धिः।संज्ञानंस्पर्शादितिः तदेवलक्षणंचिन्हंयस्यतंस्वदेहंसलब्ध्वासऋषी
स्मृ णांमंडलेसप्तमऋषिरभूत् २४

बृहत्बृहन्वेदंवेदप्रवर्तकेषुसप्तर्षिषुएकतमोभविष्यतीत्यर्थः २५ भुवोभारमहन्भारमेवाहन्नृपानिति २७ तदेवंप्रस
क्तानुप्रसक्तंसमाप्यप्रस्तुतमाह गाधेरितिमहातेजाविश्वामित्रः २८ तेसर्वेलिंगरसमवायन्यायेनप्राणन्तउपदधातीति
वन्मधुच्छंदसएवोच्यंते तथाचश्रुतिःतस्यहविश्वामित्रस्यैकशतंपुत्राआसुःपंचाशदेवज्यायांसोमधुच्छंदसःपंचाशत्

जामदग्न्योपिभगवान्रामःकमललोचनः आगामिन्यंतरेराजन्वर्तयिष्यतिवैबृहत् २५ आस्तेद्यापिमहेंद्रा
द्रौन्यस्तदंडःप्रशांतधीः उपगीयमानचरितःसिद्धगंधर्वचारणैः २६ एवंभृगुषुविश्वात्माभगवान्हरिरीश्वरः
अवतीर्यपरंभारंभुवोहन्बहुशोनृपान् २७ गाधेरभून्महातेजाःसमिद्धइवपावकः तपसाक्षात्रमुत्सृज्ययोले
भेब्रह्मवर्चसं २८ विश्वामित्रस्यचैवासन्पुत्राएकशतंनृप मध्यमस्तुमधुच्छंदामधुच्छंदसएवते २९ पुत्रं
कृत्वाशुनःशेफंदेवरातंचभार्गवं आजीगर्तंसुतानाहज्येष्ठएषप्रकल्प्यतां ३०

त्कनीयांसइत्यादि तत्रविश्वामित्रस्यतेषुभार्गवस्याजीगर्तस्यदेवरातस्यज्येष्ठत्वमवगम्यते तथाआश्वलायनबोधा
यनादिभिःकौशिकानांदेवरातप्रवरत्वमुक्तं प्रवरश्चतस्मिन्नेववंशेआवांतरभेदःनतुवंशांतरं तथाचस्मृतिः एकएव
ऋषिर्यावत्प्रवरेष्वनुवर्तते तावत्समानगोत्रत्वंविनाभृग्वंगिरोगणादिति २९ तत्कुतोभृगुवंशभवस्यदेवरातस्यकौशि
कप्रवरत्वमित्याशंक्यतदुपपादयन्नाह पुत्रंकृत्वेत्यादियावत्समाप्ति पूर्वमजीगर्तस्यतत्वेमध्यमत्वेनपितृत्वांममतां
विहायविक्रीतत्वात्तस्यकृपयास्तुतानाहज्येष्ठएषप्रकल्पतामिति ३०

एतदेवस्पष्टयितुंतंविशिनष्टि यइतिद्वाभ्यां मुमुचेअमुच्यत ३१ भार्गवोपिगाधिषुगाधेर्वंशजेषुदेवरातइतिख्यातः ३२
तत्रस्यज्येष्ठत्वंकुशलंनमेनिरे मध्यमस्यानपविहत्वंदृष्ट्वानांगीकृतवंतः मुनिर्विश्वामित्रःपंचाशाताकनिष्ठैःसाकंस
मध्यमोमधुच्छंदउवाच नोस्माकंयत्ज्येष्ठत्वंकनिष्ठत्वंवाभवान्पितासंजानीतेमन्यतेतस्मिन्वयंतिष्ठामेतिएवमु
क्त्वामंत्रद्रष्टारं कस्यन्नूनंकतमस्याभूतानामित्याभदिमंत्राणांद्रष्टारंशुनःशेपंज्येष्ठंचक्रुःकथंचक्रुःतदाह वयंसर्वेत्वा
योवैहरिश्चंद्रमखेविक्रीतःपुरुषःपशुः स्तुत्वादेवान्प्रजेशादीन्मुमुचेपाशबंधनात् ३१ योरातोदेवयजनेदे
वैर्गाधिषुतापसः देवरातइतिख्यातःशुनःशेपस्तुभार्गवः ३२ येमधुच्छंदसोज्येष्ठाःकुशलंमेनिरेनतत् अ
शापत्तान्मुनिःक्रुद्धोम्लेच्छाभवतदुर्जनाः ३३ सहोवाचमधुच्छंदाःसार्धंपंचाशताततः यन्नोभवान्संजानी
तेतस्मिंस्तिष्ठामहेवयं ३४ ज्येष्ठंमंत्रदृशंचक्रुस्त्वामन्वंचोवयंस्महि विश्वामित्रःसुतानाहवीरवंतोभविष्य
थ ३५ येमानंमेनुगृह्णंतोवीरवंतमकर्तमां एषवःकुशिकावीरोदेवरातस्तमान्वित अन्येचाष्टकहारीतजय ४१
क्रतुमदादयः ३६ एवंकौशिकगोत्रंतुवैश्वामित्रैःपृथग्विधं प्रवरांतरमापन्नंतद्धिचैवंविकल्पितं ३७
इतिश्रीभागवतेमहापुराणेनवमस्कंधेपारमहंस्यांसंहितायांवैयासिक्यांषोडशोध्यायः श्रीबादरायणि
मन्वंचःस्महि अनुगंतारःकनिष्ठाःस्मइत्यर्थः ३४ ओंनमोभगवतेवासुदेवाय० ६

ततःप्रसन्नोविश्वामित्रस्तान्सुतानाह।वीरवंतःपुत्रवंतःभविष्यथ।येयूयंमांनपरज्यलमनुगृह्णंतःअनुवर्तमानाः
संतःमांवीरवंतंपुत्रवंतंअकर्तकृतवंतइत्यर्थः।हेकुशिकाएषदेवरातःवोयुष्मदीयःकौशिकएवयतःवीरःसत्पु
त्रःतमेवंअन्वितअनुगच्छत।अन्येचाष्टकादयस्तस्यसुताआसन्।तानुपसंहरति।एकेशप्ताएकेनुगृहीताःअन्य
स्तुपुत्रत्वेनस्वीकृतइत्येवंकौशिकगोत्रंपृथग्विधंनानाप्रकारंजातं।तच्चप्रवरांतमापन्नंप्राप्तंहियस्मात्।एवंदे
विश्वामित्रःसुतानाहवीरवंतोभविष्यथ येमानंमेनुगृह्णंतोवीरवंतमकर्तमां ३५ एषवःकुशिकावी
स्त रोदेवरातस्तमन्वित अन्येचाष्टकहारीतजयक्रतुमदादयः ३६ एवंकौशिकगोत्रंतुवैश्वामित्रैःपृथ
ग्विधं प्रवरांतरमापन्नंतद्धिचैवंविकल्पितं ३७ इतिश्रीभागवतेषोडशोध्यायः बादराय
णिरुवाच यःपुरूरवसःपुत्रआयुस्तस्याभवन्सुताः नहुषःक्षत्रवृद्धश्चरजीरंभश्चवीर्यवान् १ अ
नेनाइतिराजेंद्रशृणुक्षत्रवृधोन्वयं क्षत्रवृद्धसुतस्यासन्सुहोत्रस्यात्मजास्त्रयः २ काश्यःकुशोगृ
त्समदइतिगृत्समदादभूत् शुनकःशौनकोयस्यबह्वृचप्रवरोमुनिः ३
वरात्तज्ज्येष्ठत्वेनतत्रप्रकल्पितं इतिनवमेषोडशः आयोःसप्तदशेत्वैलज्येष्ठपुत्रस्यपंचसुतेषुक्षत्रवृद्धा सु
दिवर्णनंवंशवर्णनं।इहश्रीकृष्णावतारप्रस्तावायवंशानुक्रमणमल्पादिक्रमेणप्रक्रांतमिति।यस्य
वंशेकृष्णावतारस्तस्यवंशोतिविततत्वादंतेनिरूप्यते।अतःपुरूरवसःपुत्राणांपंचानांकनिष्ठानांवंशानुक्त्वेदा
नींप्रथमस्यवंशमाह।यइति।एवंनहुषययातियदुप्रभृतिष्वपिद्रष्टव्यं १ ३

भा० न० ४२ क्षत्रवृद्धः क्षत्रवृद्धस्य दीर्घतमसः पिता। स्मृतमात्र एवार्तिरोगदुःखं नाशयतीति तथा। ततः प्रतर्दनादिशब्दवा-
च्याद्द्युमतः सकाशादलर्कादयः संततिसंज्ञः सत्यकेतोर्धृष्टकेतुः तस्मात्सुकुमारस्तस्माद्वीतिहोत्रः तस्य भर्गः

काश्यस्य काशिस्तत्पुत्रो राष्ट्रो दीर्घतमःपिता धन्वंतरिर्दीर्घतमस आयुर्वेदप्रवर्त्तकः ४ यज्ञभुग्वासुदेवांशः
स्मृतिमात्रार्तिनाशनः तत्पुत्रः केतुमानस्य जज्ञे भीमरथस्ततः ५ दिवोदासो द्युमांस्तस्मात्प्रतर्दन इति स्मृ
तः स एव शत्रुजिद्वत्स ऋतध्वज इतीरितः तथा कुवलयाश्वेति प्रोक्तोलर्कादयस्ततः ६ षष्टिं वर्षसह
स्राणि षष्टिं वर्षशतानि च नालर्कादपरो राजन् बुभुजे मेदिनीं युवा ७ अलर्कात्संततिस्तस्मात्सुनीथो
थ सुकेतनः धर्मकेतुः सुतस्तस्मात्सत्यकेतुरजायत ८ धृष्टकेतुः सुतस्तस्मात्सुकुमारः क्षितीश्वरः वी
तिहोत्रस्य भर्गोतो भार्गभूमिरभून्नृप ९ इतीमे काशयो भूपाः क्षत्रवृद्धान्वयायिनः रंभस्य रभसः पुत्रो
गंभीरश्चाक्रियस्ततः तस्य क्षेत्रे ब्रह्म जज्ञे शृणु वंशमनेनसः शुद्धस्ततः शुचिस्तस्मात्त्रिककुद्धर्मसारथिः राम ४२
११ ततः शांतरजा जज्ञे कृतकृत्यः स आत्मवान् रजेः पंचशतान्यासन्पुत्राणाममितौजसां १२ देवैरभ्य
र्थितो दैत्यान्हत्वेंद्रायाददाद्दिवं इंद्रस्तस्मै पुनर्दत्वा गृहीत्वा चरणौ रजेः १३ आत्मानमर्पयामास प्रह्ला
दाद्यरिशंकितः १४

अतो भर्गात् भार्गभूमिः। काशयः काशेर्वंश्याः। काशेः प्रपितामहस्य क्षत्रवृद्धस्यान्वयं अयंते यान्तीति तथा। ततः अने
नसः शुद्धो जज्ञे। कृतकृत्यः संयतः आत्मवान् ज्ञानी। अतः पुत्रोत्पादनं कृतवानित्यर्थः १४

तेषां मतिभ्रंशाय गुरुणा बृहस्पतिना अभिचारविधानेनाग्नौ हूयमाने सति १५ सिंहावलोकनेनाह क्षात्रवृद्धात्
पौ क्षत्रवृद्धजात् कुशात् प्रतिः प्रतेः संजयः १६ १७ नवमे सप्तदशः अष्टादशे ययातेस्तु नहुषस्य कथोच्यते यस्य पंचसु
पुत्रेषु कनीयान् यहीत्याद्धुरं १ तस्य राज्यस्य परिणामं अनर्थावहत्वं वेत्तीति तथा तत्र हेतुः यत्रेति २ स्थानात्स्वर्गाद्वि

पितर्युपरते पुत्रा याचमानाय नो ददुः त्रिविष्टपं महेंद्राय यज्ञभागान्समाददुः १५ गुरुणा हूयमानेग्नौ बलभि
त्तनयान् रजेः अवधीद्भ्रंशितान्मार्गान्न कश्चिदवशेषितः १६ कुशात्प्रतिः क्षात्रवृद्धात्संजयस्तत्सुतो जयः ततः
कृतः कृतस्यापि जज्ञे हर्यवनो नृपः १६ सहदेवस्ततो हीनो जयसेनस्तु तत्सुतः संकृतिस्तस्य तु जयः क्षत्रधर्मा म
हारथः क्षत्रवृद्धान्वया भूपा इमे शृण्वथ नाहुषान् १७ इति श्रीभागवते महापुराणे नवमस्कंधे सप्तदशोध्यायः
श्रीशुक उवाच यतिर्ययातिः संयातिरायतिर्वियतिः कृतिः षडिमे नहुषस्यासन्निंद्रियाणीव देहिनः १ राज्यं नै
च्छद्यतिः पित्रा दत्तं तत्परिणामवित् यत्र प्रविष्टः पुरुष आत्मानं नावबुध्यते २ पितरि भ्रंशिते स्थानादिंद्राण्या धर्षणा
द्द्विजैः प्रापितेऽजगरत्वं वै ययातिरभवन्नृपः ३ चतसृष्वादिशद्दिक्षु भ्रातॄन्भ्राता यवीयसः कृतदारो जुगोपो
जुगोपो र्वीं काव्यस्य वृषपर्वणः ४ श्रीराजोवाच ब्रह्मर्षिर्भगवान्काव्यः क्षत्रबंधुश्च नाहुषः राजन्यविप्रयोः क
स्माद्विवाहः प्रतिलोमकः ५

अजगरत्वमादिष्टः ३ यवीयसो भ्रातॄन् नादिशत् काव्यस्य शुक्रस्य वृषपर्वणश्च कन्ये भार्ये कृतदारः सन् ४ ५ रामकृष्णाभ्यां
नमः

न प्रतिलोमतादोषः ईश्वरघटनादिति दर्शयन् कथामाह एकदेत्यादिना प्रतिजग्राह तद्वच इत्यन्तेन गुरोः शुक्रस्य पुत्र्या देवयान्या
च व्यचरदिति द्वयोरन्वयः ६ कलगीता अलयो येषु तानि नलिनीपुलिनानि यस्मिन् तस्मिन्पुरोद्याने अबला शर्मिष्ठा ७ सिंचं
तीः सिंचंत्यः ८ ९ अजानती स्वीयं मत्वा गुरुपुत्र्या वासः समव्ययत पर्यधात् १० असांप्रतं अन्याय्यं ११ अन्याय्यमेव ब्रा
ह्मणोत्कर्षवर्णनेन व्यनक्ति यैरिति त्रिभिः यैर्ब्राह्मणैः परस्य पुंसो मुखं मुखादुत्पन्नत्वेन तन्निद्वारत्वेन च श्रेष्ठ इत्यर्थः ज्योति

एकदा दानवेंद्रस्य शर्मिष्ठा नामकन्यका सखीसहस्रसंयुक्ता गुरुपुत्र्या च भामिनी ६ देवयान्या पुरोद्याने पुष्पितद्रुम
संकुले व्यचरत्कलगीतालिनलिनीपुलिनेबला ७ ता जलाशयमासाद्य कन्याः कमललोचनाः तीरे न्यस्य दुकूला
नि विजह्रुः सिंचतीर्मिथः ८ वीक्ष्य व्रजंतं गिरिशं सह देव्या वृषस्थितं सहसोत्तीर्य वासांसि पर्यधुर्व्रीडिताः स्त्रियः
९ शर्मिष्ठाजानती वासो गुरुपुत्र्याः समव्ययत स्वीयं मत्वा प्रकुपिता देवयानीदमब्रवीत् १० अहो निरीक्ष्यता
मस्या दास्याः कर्म ह्यसांप्रतं अस्मद्धार्यं धृतवती शुनीव हविरध्वरे ११ यैरिदं तपसा सृष्टं मुखं पुंसः परस्य ये धार्य ४२
ते यैरिह ज्योतिः शिवः पंथाः प्रदर्शितः १२ यान्वंदंत्युपतिष्ठंते लोकनाथाः सुरेश्वराः भगवानपि विश्वात्मा पावनः
श्रीनिकेतनः १३ वयं तत्रापि भृगवः शिष्योस्या नः पितासुरः अस्मद्धार्यं धृतवती शूद्रो वेदमिवासती १४ एवं क्षि
पंतीं शर्मिष्ठा गुरुपुत्रीमभाषत रुषा श्वसंत्युरंगीव धर्षिता दष्टदच्छदा १५

ब्रह्मपंथा वेदमार्गः १२ १३ तदेवं ब्राह्मणमात्रमेव तावत्पूज्यं तत्रापि वयं भृगवोस्याश्च पिता नः शिष्यः एवं सत्यपि अस्मा
भिर्धार्यं वासः इयमसती धृतवती १४ १५ निषिद्धोयं प्रतिलोमसंबंध इति चेत्तत्राह एष इति १६ कृष्णाय नमः कृ

ब्राह्मणमेव त्वं वृणीहि किमनेनाग्रहेणेति तत्राह न ब्राह्मण इति बृहस्पतेः पुत्रः कचः शुक्रान्मृतसंजीवनीं विद्यामध्यगा
त् तदा च देवयानी तं पतिं चकमे स च गुरुपुत्रीमम पूज्येति नानुदवहत् ततश्च कुपिता सती तव चेयं विद्या निःफला भवत्विति तं श
शाप स च तव ब्राह्मणः पतिर्न भवेदिति तां शशाप तदेतदाह यमहमशापं तस्य शापात् २२ अशास्त्रीयत्वात् अनभिप्रेतम

आत्मवृत्तमविज्ञाय कत्थसे बहु भिक्षुकि किं न प्रतीक्षसेस्माकं गृहान्बलिभुजो यथा १६ एवंविधैः सुपरुषैः क्षि
प्त्वाचार्यसुतां सती शर्मिष्ठा प्राक्षिपत्कूपे वासश्चादाय मन्युना १७ तस्यां गतायां स्वगृहं ययातिर्मृगयां चरन् प्राप्तो य
दृच्छया कूपे जलार्थी तां ददर्श ह १८ दत्वा स्वमुत्तरं वासस्तस्यै राजा विवाससे गृहीत्वा पाणिना पाणिमुज्जहार दयाप
रः १९ तं वीरमाहौशनसी प्रेमनिर्भरया गिरा राजंस्त्वया गृहीतो मे पाणिः परपुरंजय २० हस्तग्राहोपरो मा भूद्गृही
तायास्त्वया हि मे एष ईशकृतो वीर संबंधो नौ न पौरुषः २१ यदिदं कूपमग्नाया भवतो दर्शनं मम न ब्राह्मणो मे
भविता हस्तग्राहो महाभुज कचस्य बार्हस्पत्यस्य शापाद्यमशपं पुरा २२ ययातिरनभिप्रेतं दैवोपहृतमात्म
नः मनस्तु तद्गतं बुद्ध्वा प्रतिजग्राह तद्वचः २३ गते राजनि सा वीरे तत्र स्म रुदती पितुः न्यवेदयत्ततः सर्वमुक्तं शर्मि
ष्ठया कृतं २४ दुर्मना भगवान्काव्यः पौरोहित्यं विगर्हयन् स्तुवन्वृत्तिं च कापोतीं दुहित्रा स ययौ पुरात् २५

पि दैवेनोपहृतं प्रापितं बुद्ध्वा तद्गतं तस्यां सकामं स्वं मनश्च बुद्ध्वा न ह्यधर्मे मदीयं मनः प्रविशेदिति तस्या वचः प्रतिजग्राह अं
गीकृतवान् शर्मिष्ठासंबंधोपि दैववशादेवाभवदिति दर्शयन्नाह गते राजनीति नवभिः उक्तं भिक्षुकीत्यादि कृतं कूपप्रक्षे

भा० न० प्रत्यनीका देवास्ते विवक्षिताः जयं प्रापणीया इत्यभिप्रेतं यस्य तथाभूतं ज्ञात्वा प्रत्यनीकानां विवक्षितमिति वा २६।२७ सानुगा
४४ सखीसहितां शर्मिष्ठां मामनुयात्विति २८ तत्र तस्मान्निर्गतात् शुक्रात् संकटं वीक्ष्य २९ तत्र तस्मादवस्थितादर्थस्य प्रयोजनस्य
गौरवं च वीक्ष्य ३० तल्पे माधाः नोपगच्छ इत्यर्थः ३१ अपत्यार्थं ऋतुकाले प्रार्थनात्तस्याः कामपूरणं धर्ममवेक्ष्य शुक्रस्य च

वृषपर्वा तमाज्ञाय प्रत्यनीकविवक्षितं गुरुं प्रसादयन्मूर्ध्ना पादयोः पतितः पथि २६ क्षणार्धमन्युर्भगवान् शिष्यं १८
व्याचष्ट भार्गवः कामोऽस्याः क्रियतां राजन् नैनां त्यक्तुमिहोत्सहे २७ तथेत्यवस्थिते प्राह देवयानी मनोगतं पित्रा
दत्ता यतो यास्ये सानुगा यातु मामनु २८ स्वानां तत्संकटं वीक्ष्य तदर्थस्य च गौरवं देवयानीं पर्यचरत् स्त्रीसहस्रेण
दासवत् २९ नाहुषाय सुतां दत्वा सह शर्मिष्ठयोशनाः तमाह राजन् शर्मिष्ठामाधास्तल्पे न कर्हिचित् ३० विलो
क्यौशनसीं राजन् शर्मिष्ठा सुप्रजां क्वचित् तमेव वव्रे रहसि सख्याः पतिमृतौ सती ३१ राजपुत्र्यार्थितोऽपत्ये धर्मं
चावेक्ष्य धर्मवित् स्मरन् शुक्रवचः काले दिष्टमेवाभ्यपद्यत ३२ यदुं च तुर्वसुं चैव देवयानी व्यजायत द्रुह्युं चानुं ४४
च पूरुं च शर्मिष्ठा वार्षपर्वणी ३३ गर्भसंभवमासुर्या भर्तुर्विज्ञाय मानिनी देवयानी पितुर्गेहं ययौ क्रोधविमूर्छि
ता ३४ प्रियामनुगतः कामी वचोभिरुपमंत्रयन् न प्रसादयितुं शेके पादसंवाहनादिभिः ३५ शुक्रस्तमाह कुपि
तः स्त्रीकामानृतपूरुष त्वां जराविशतां मंद विरूपकरणी नृणां ३६

वचः स्मरन् दिष्टं दैवप्रापितमेव तत्संगमं अभ्यपद्यत न तु कामत इत्यर्थः ३३ आसुर्याः शर्मिष्ठायाः भर्तुः सकाशात् ३४
उपमंत्रयन् प्रसादयन् विकृतं रूपं करोतीति तथा ते दुहितरि कामैरघाप्यतृप्तोऽस्मि कामानां भोगैरिति वा शुक्र आह तर्हि

तर्हि यो विधास्यति अविभो धारयिष्यति तस्य वयसा कामं व्यत्यस्यतां यथेच्छं जरां व्यत्ययं यातु व्यत्ययं नीत्वा यतामिति वा यु
द्धावस्थस्येति भेदः तां जरां व्यत्यासं गमयेत्यर्थः इतिलब्धव्यवस्थानं जराया व्यवस्थितिर्येन सः यतो न धर्मज्ञाः अनित्ये यौवने
नित्यबुद्धयः तं जरां किं ग्रहीष्यसि इत्यपृच्छत् प्रत्याख्यानं माकृथा इत्याह न त्वमिति आत्मकृतः स्वदेहकर्तुः प्रत्युपकारं कर्तुं को

शुक्रस्तमाह कुपितः स्त्रीकामानृतपूरुष त्वां जराविशतां मंद विरूपकरणी नृणां ३७ ययातिरुवाच अतृप्तोऽस्म्य
द्य कामानां ब्रह्मन् दुहितरि स्म ते शुक्र उवाच व्यत्यस्यतां यथाकामं वयसा यो विधास्यति इति लब्धव्यवस्था
नः पुत्रं ज्येष्ठमवोचत ३८ यदो तात प्रतीच्छेमां जरां देहि निजं वयः ३९ मातामहकृतां वत्स न तृप्तो विषयेष्वहं वय
सा भवदीयेन रंस्ये कतिपयाः समाः ४० यदुरुवाच नोत्सहे जरया स्थातुमंतरा प्राप्तया तव अविदित्वा सुखं
ग्राम्यं वैतृष्ण्यं नैति पूरुषः ४१ तुर्वसुश्चोदितः पित्रा द्रुह्युश्चानुश्च भारत प्रत्याचख्युरधर्मज्ञा ह्यनित्ये नित्यबु
द्धयः ४२ अपृच्छत्तनयं पूरुं वयसोनं गुणाधिकं न त्वमग्रजवद्वत्स मां प्रत्याख्यातुमर्हसि ४३ पूरुरुवाच को नु
लोके मनुष्येंद्र पितुरात्मकृतः पुमान् प्रतिकर्तुं क्षमो यस्य प्रसादाद्विंदते परं ४४ उत्तमश्चिंतितं कुर्यात् प्रोक्तकारी
च मध्यमः अधमोऽश्रद्धया कुर्यादकर्तोच्चरितं पितुः ४५

नु क्षमः तथापि पितुर्यच्चिंतितं कुर्यात्स उत्तमः यस्तु प्रोक्तकारी स मध्यमः यस्त्वश्रद्धया कुर्यात्सोऽधमः अकर्ता पितुरुच्चरि
तं पुरीषप्रायः ४५

भा० न० जुजुषे सेवितवान् ४६ यथोपजोषं यथाप्रीति जुजुषे ४६ ४७ ४८ नानेव भातीति यावदिंद्रियप्रवृत्तिः तदुपरमे नाभाति स्व
५५ स्वप्नमायायां स्वप्नसहितो मनोरथ इवेत्यर्थः ४९ ५० मनः सुखं कामभोगं कर्हिंद्रियैः कुशलैः पराङ्मुखैरिंद्रियैः ५१

इति नवमे अष्टादशः ॥ ऊनविंशे ययातिः स्वं चेष्टितं तत्वतो परमं देवयानीसमाभाष्य विरक्तो मुक्तिमाप्तवान् १ भुक्तभोगम
जांहास्यन्नज इव इत्तमात्मनः विडंबयन् प्रियामाह निर्वेदयितुमात्मवान् २ कामानाचरन्नुपभुंजानः १ गाथामिति

इति प्रमुदितः पूरुः प्रत्यगृह्णाज्जरां पितुः सोपि तद्वयसा कामान् यथावज्जुजुषे नृप ४६ सप्तद्वीपपतिः संस
कृपितृवत्पालयन् प्रजाः यथोपजोषं विषयान् जुजुषेऽव्याहतेंद्रियः ४७ देवयान्यप्यनुदिनं मनोवाग्देहवस्तु
भिः प्रेयसः परमां प्रीतिमुवाह प्रेयसी रहः ४८ अयजद्यज्ञपुरुषं क्रतुभिर्भूरिदक्षिणैः सर्वदेवमयं देवं सर्व
देवमयं हरिं ४९ यस्मिन्निदं विरचितं व्योम्नीव जलदावलिः नानेव भाति नाभाति स्वप्नमाया मनोरथः ५० त
मेव हृदि विन्यस्य वासुदेवं गुहाशयं नारायणमणीयांसं निराशीरयजत्प्रभुं ५१ एवं वर्षसहस्राणि मनः षष्ठे ५५
मनःसुखं विदधानोपि नात्यप्यत्सार्वभौमः कदिंद्रियैः ५२ इति श्रीभागवते महापुराणे नवमस्कंधे अष्टाद
शोध्यायः ॥ श्रीशुक उवाच ॥ स इत्थमाचरन्कामान्स्त्रैणोपह्नवमात्मनः बुद्ध्वा प्रियायै निर्विण्णो गाथामेतामगाय
त १ शृणु भार्गव्यमूं गाथां मद्विधाचरितां भुवि धीरा यस्यानुशोचंति वने ग्रामनिवासिनः २

हासं मद्विधेन मत्सदृशेनाचरितामनुष्ठितां मद्विधस्याचरितं यस्यामिति वा यस्य ग्रामनिवासिनः कामिनो मद्विधस्या
चरितं वनोस्थिता धीराः शोचंति तस्य गाथां शृणु २

भा० न० ननु तर्हि पुनरपि बहवो विषयाः सेव्यंतां ततो मनसि प्रीते सति कामोपशांत्या मोहो निवर्तेत इति चेत्तत्राह यदिति द्वाभ्यां न
४६ दुह्यंति न पूरयंति १३ हविषा घृतेन कृष्णवर्त्मा अग्निरिव १४ तर्हि कदा केनोपायेन वा मनसः संपूर्णा प्रीतिः स्यात् य
दा कामोपशमः स्यादित्यत आह यदेति द्वाभ्यां अमंगलं भावं रागद्वेषादि वैषम्यं १५ दुःखानि नितरां वहतीति तथा तां

यत्पृथिव्यां व्रीहियवं हिरण्यं पशवः स्त्रियः न दुह्यंति मनः प्रीतिं पुंसः कामहतस्य ते १३ न जातु कामः कामाना
मुपभोगेन शाम्यति हविषा कृष्णवर्त्मेव भूय एवाभिवर्द्धते १४ स्त्रीसंनिधानं तु सर्वथा त्याज्यमित्याह यदा न
कुरुते भावं सर्वभूतेष्वमंगलं समदृष्टेस्तदा पुंसः सर्वाः सुखमया दिशः १५ या दुस्त्यजा दुर्मतिभिर्जीर्यतो या न
जीर्यते तां तृष्णां दुःखनिवहां शर्मकामो द्रुतं त्यजेत् १६ मात्रा स्वस्रा दुहित्रा वा नाविविक्तासनो भवेत् बलवानिं
द्रियग्रामो विद्वांसमपि कर्षति १७ पूर्णं वर्षसहस्रं मे विषयान्सेवतोसकृत् तथापि चानुसवनं तृष्णा तेषूपजायते १८
तस्मादेतामहं त्यक्त्वा ब्रह्मण्याधाय मानसं निर्द्वंद्वो निरहंकारश्चरिष्यामि मृगैः सह १९ दृष्टं श्रुतमसद्बुद्ध्वा नानुध्या ४६
येन्न संविशेत् संसृतिं चात्मनाशं च तत्र विद्वान्स आत्मदृक् २० इत्युक्त्वा नाहुषो जायां तदीयं पूरवे वयः दत्वा स्व
दा जरसं तस्मादाददे विगतस्पृहः २१ दिशि दक्षिणपूर्वस्यां द्रुह्युं दक्षिणतो यदुं प्रतीच्यां तुर्वसुं चक्र उदीच्यामणुमीश्वरं २२

१६ स्त्रीसंनिधानं तु सर्वथा त्याज्यमित्याह मात्रेति अविविक्तं संकीर्णमासनं यस्य सः कर्षतीति १७ ननु तत्त्यागस्त्याग
स्यादिदुःकरत्वात् कथं ब्रह्मणि मनस आधानं स्यात् तत्राह दृष्टमिति यो नानुध्यायेत् न संविशेत् नचोपभुंजीत तत्र दृष्टश्रुत
योरनुध्यानादौ स आत्मदृग्भवति २२

आत्मानमालक्ष्याह बस्त इति वने संसारे प्रियं विषयं प्रियामनुलक्ष्याह अजामिति रोधसि तटे विषाणाग्रेण मृदादिकमुद्धृ
तीर्थं निर्गमाय मार्गं व्यधत्त ४ बस्त्य इति वार्मिष्ठाप्रमुखाः कामयमानासु कांतं प्रति कामिनीः कामवत्यः पीवानं पुष्टं श्मश्रुलं श्म
श्रुवत्त्वं रतिसामर्थ्यमित्यर्थः मीढ्वांसं रेतःसेक्तारं यामे कोविदं अभिज्ञं अत एव प्रेष्ठं नावबुध्यत ६ ७ स्वामिनमिति शुक्रादि

बस्त एको वने कश्चिद्विचिन्वन्प्रियमात्मनः ददर्श कूपे पतितां स्वकर्मवशगामजां ३ तस्या उद्धरणोपायं बस्तः कामी
विचिंतयन् व्यधत्त तीर्थमुद्धृत्य विषाणाग्रेण रोधसि ४ सोत्तीर्य कूपात्सुश्रोणीतमेव चकमे किल तया वृतं समु
दीक्ष्य बह्व्योजाः कांतकामिनीः ५ पीवानं श्मश्रुलं प्रेष्ठं मीढ्वांसं याभकोविदं स एकोजवृषस्तासां बह्वीनां रतिवर्द्धनः ६
रेमे कामग्रहग्रस्त आत्मानं नावबुध्यत तमेव प्रेष्ठतमया रममाणमजान्यया ७ विलोक्य कूपसंविग्ना नामृष्यद्बस्त
कर्म तत् तं दुर्हृदं सुहृद्रूपं कामिनं क्षणसौहृदं ८ इंद्रियाराममुत्सृज्य स्वामिनं दुःखिता ययौ सोपि चानुगतः स्त्रै
णः कृपणस्तां प्रसादितुं ९ कुर्वन्निडविडाकारं नाशक्नोत्पथि संधितुं तस्य तत्र द्विजः कश्चिदजास्वाम्यच्छिनद्रुषा
प्रलंबनं वृषणं भूयः संदधेर्थाय योगवित् १० संबद्धवृषणः सोपि ह्यजया कूपलब्धया कालं बहुतिथं भद्रे का
मैर्नाद्यापि तुष्यति ११ तथाहं कृपणः सुभ्रु भवत्याः प्रेमयंत्रितः आत्मानं नाभिजानामि मोहितस्तव मायया १२

जायेयाह ८ इडविडाकारं बस्तजातिशब्दं संधितुं प्रसादयितुं वृषणमच्छिनत् अजस्यासंभोगासमर्थमकरोत् ९ अर्था
यस्वपुत्र्याः कामभोगाय योगवित् उपायज्ञः उराव्यत्यासेन रतिशक्तिं ददावित्यर्थः १० कूपलब्धया सह कामैः सेव्यमा
नैर्न तुष्यति १२

विषयेषु शब्दादिषु आसेवितं षड्वर्गं षडिंद्रियसंबंधं मुमुक्षुरेतत्त्याज यद्वा विषयेषु आसेवितं सेवाकारितं यस्मै षडिंद्रियाणां वर्गं मुमु
चे उपेक्षतेत्यर्थः २३ २४ विधूतं निरस्तं त्रिगुणात्मकं लिंगं येन प्रतीतः प्रख्यातः २५ प्रस्तोभमेवाह परिहासमिवेति यद्वा प्रस्तो
भं निवृत्तिमार्गे प्रोत्साहनं मेने २६ २७ २८ कथं समावेश्य तदाह नम इति नमनादिभिः समावेश्येत्यर्थः शुक्रो वा नमस्करोति
२९ नवम एकोनविंशः   विंशे पितृप्रसादात्तु राजा सन्महोन्नते पुरोर्वंशे तु दौष्यंते भरतस्येर्यते यशः १ तस्कृतः अहंया
भूमंडलस्य सर्वस्य पूरुमर्हत्तमं विभुं अभिषिच्याग्रजांस्तस्य वशे स्थाप्य वनं ययौ २३ आसेवितं वर्षपूगान्षड्वर्गं
विषयेषु सः क्षणेन मुमुचे नीडं जातपक्ष इव द्विजः २४ स तत्र निर्मुक्तसमस्तसंग आत्मानुभूत्या विधुतत्रिलिंगः परे
मलेब्रह्मणि वासुदेवे लेभे गतिं भागवतीं प्रतीतः २५ श्रुत्वा गाथां देवयानी मेने प्रस्तोभमात्मनः स्त्रीपुंसोः स्नेह
वैक्लव्यात्परिहासमिवेरितं २६ सा सन्निवासं सुहृदां प्रपायामिव गच्छतां विज्ञायेश्वरतंत्राणां मायाविरचितं प्रभोः
२७ सर्वत्र संगमुत्सृज्य स्वप्नौपम्येन भार्गवी कृष्णे मनः समावेश्य व्यधुनोल्लिंगमात्मनः २८ नमस्तुभ्यं भगवते वा
सुदेवाय वेधसे सर्वभूताधिवासाय शांताय बृहते नमः २९ इति श्रीभागवते महापुराणे नवमस्कंधे ययातिनामए
कोनविंशतिमोध्यायः   श्रीशुक उवाच पुरोर्वंशं प्रवक्ष्यामि यत्र जातोसि भारत यत्र राजर्षयो वंश्या ब्रह्मवंश्याश्च
जज्ञिरे १ जनमेजयो ह्यभूत्पूरोः प्रचिन्वांस्तत्सुतस्ततः प्रवीरोथ मनस्युर्वै तस्माच्चारुपदोभवत् २
तेः स्मृतः ३   तस्य सुद्युरभूत्पुत्रस्तस्माद्बहुगवस्ततः संयातिस्तस्याहंयातीरौद्राश्वस्तत्सुतः स्मृतः ३ ऋतेयु
स्तस्य कक्षेयुः स्थंडिलेयुः कृतेयुकः जलेयुः संततेयुश्च धर्मसत्यव्रतेयवः ४   श्रीकृष्णाय नमः
धर्मेयुश्च सत्येयुश्च व्रतेयुश्च धर्मसत्यव्रतेयवः ४

ना० न० ४७ वनेयुश्चावमः स्मृतः एवं दशैते ऋतेयुप्रमुखास्तस्यैवैश्चस्य घृताच्याम प्सरसि पुत्राजाता अप्सरस इति षष्ठीसप्तम्यर्थे वज्ञाव २१
न्तित्वेदृष्टांतः जगदात्मनः जगतआत्मन्नूतस्य मुख्यप्राणस्येंद्रियाणीव ५ ६ ७ दुष्यंतस्य शकुंतलायां भरतः पुत्रोभवदिति
कथाद्वारेणाह दुष्यंतो मृगयामितिपंचदशभिः तमाश्रमं मंडयंतीं स्त्रियं विलोक्य मुमुहे अमुह्यत ८ तस्याद्दर्शनेन प्रमुदितः

दशैतेप्सरसः पुत्रावनेयुश्चावमः स्मृतः घृताच्यामिंद्रियाणीव मुख्यस्य जगदात्मनः ५ ऋतेयोरंतिनारोभूत्तत्रयस्त
स्यात्मजास्त्रय सुमतिर्ध्रुवोप्रतिरथः काण्वोप्रतिरथात्मजः ६ तस्य मेधातिथिस्तस्मात्प्रस्कण्वाद्या द्विजातयः पुत्रो
भूत्सुमतेरेभिर्दुष्यंतस्तत्सुतो मतः ७ दुष्यंतो मृगयां यातः कण्वाश्रमपदं गतः तत्रासीनां स्वप्रभया मंडयंतीं रमामिव
विलोक्य सद्यो मुमुहे देवमायामिव स्त्रियं ८ बभाषे तां वरारोहां भटैः कतिपयैर्वृतः तद्दर्शनप्रमुदितः संनिवृत्तप
रिश्रमः ९ पप्रच्छ कामसंतप्तः प्रहसन्श्लक्ष्णया गिरा कात्वं कमलपत्राक्षि कस्यासि हृदयंगमे १० किंवाचिकीर्षि
तं चात्रभवत्या निर्जने वने व्यक्तं राजन्यतनयां वेद्म्यहं त्वां सुमध्यमे नहि चेतः पौरवाणामधर्मे रमते क्वचित ११ श
कुंतलोवाच विश्वामित्रात्मजैवाहं त्यक्ता मेनकया वने वेदैतद्भगवान्कण्वो वीर किं करवाम ते १२ आस्यतां ह्य
रविंदाक्ष गृह्यतामर्हणं च नः भुज्यतां संति नीवारा उष्यतां यदि रोचते १३ दुष्यंत उवाच उपपन्नमिदं सुभ्रु जा
तायाः कुशिकान्वये स्वयं हि वृणते राज्ञां कन्यकाः सदृशं वरं १४
अतएव सन्निवृत्तः परिश्रमो यस्य ९ पौरवाणां चेतो न ह्यधर्मे रमते अतो मद्भूतसः त्वयि रमणाद्वाहं त्वां राजन्यतनयां
वेद्मि १० विश्वामित्रस्यात्मजाहं मेनकायां जाता तया च स्वर्गं गच्छंत्या त्यक्ता अतो राजकन्यैवाहमित्यर्थः ११ १२ किंकर

४७

गांधर्वविधिना मिथः समयपूर्वकेन १५ १७ दुरत्ययं विक्रांतं विक्रमणं यस्य १८ १९ भरस्वाचर्मपात्रं तद्वत्माताभ्र
धारमात्रं पितुरेव तु पुत्रः तत्र हेतुः येनेति आत्मा वै पुत्रनामासीति श्रुतेः भरस्व पुत्रप्राणे अनेन भरतनाम निरुक्तं २० किं
च रेतोधाः रेतः सेक्ता वंशाकृत पुत्रोयमक्षयात्पितरं नयति तारयति तथा च श्रुतिः पुन्नाम्नो नरकाद्यस्मात्पितरं त्रायते
सुतः तस्मात्पुत्र इति प्रोक्तः स्वयमेव स्वयंभुवेति पापो तरेमात्‌पित्रोः पुत्रं प्रति विवादेयमक्षयात धर्मनिर्णेतुः यमस्य

ओमित्युक्ते यथाधर्ममुपयेमे शकुंतलां गांधर्वविधिना राजा देशकालविधानवित् १५ अमोघवीर्यो राजर्षिर्म
हिष्यां वीर्यमादधे श्वोभूते स्वपुरं यातः कालेनासूत सा सुतं १६ कण्वः कुमारस्य वने चक्रे समुचिताः क्रियाः
बध्वा मृगेंद्रं तरसा क्रीडतिस्म स बालकः १७ तं दुरत्ययविक्रांतमादाय प्रमदोत्तमा हरेरंशांशसंभूतं भर्तुरंति
कमागमत् १८ यदा न जगृहे राजा भार्यापुत्रावनिंदितौ शृण्वतां सर्वभूतानां खे वागाहाशरीरिणी १९ मा
ता भस्त्रा पितुः पुत्रो येन जातः स एव सः भरस्व पुत्रं दुष्यंत मावमंस्थाः शकुंतलां २० रेतोधाः पुत्रो नयति नरदेव य
मक्षयात् त्वं चास्य धाता गर्भस्य सत्यमाह शकुंतला २१ पितर्युपरते सोपि चक्रवर्ती महायशाः महिमा गीयते त
स्य हरेरंशभुवो भुवि २२
सजायाः सकाशात् रेतोधारेतः सेक्ता पितैव धर्मेण विजित्य पुत्रं नयति नतु मातेत्यर्थः ततश्च सा यां पुत्रो स्वीकृतवानिति
ति शेषः २१ चक्रवर्ति बिरुदवेति शेषः तस्य महिमा गीयते न दृष्यते श्लोका अभिगीता इत्यादिव ह्रुव अस्माहरेरंशभुवः अंशा
दजातस्य २२

भा० न० तत्रलिंगमाहवक्रमिति २३ गंगायां अनुलोमं पंचपंचाशताबाजिभिरीजे पुरोधाय पुरोहितं कृत्वा यमुनामनु च यमुनाया
४८ श्चानुलोमं अष्टाधिकसप्ततिमेध्यानश्वान् बबंध किं कुर्वन् वसु धनं प्रकर्षेण ददत् २४ साचीगुणे प्रकृष्टगुणवति देशे अ
ग्निः साचीगुणे चितो भूत् यस्मिन्नग्निचयने बद्वशो वा सहस्रं ब्राह्मणाः भरतेन भूरिदानेन दत्ताः गाः बद्वशः प्रत्येकं ब द्व
बद्वं विभेजिरे विभज्य जगृहुः चतुरशीत्यधिकैः त्रयोदशसहस्रैरेकैं बद्वं भवतितथा हि हिरण्येन परिवृतान् कृष्णान् शु

चक्रं दक्षिणहस्ते स्य पद्मकोशो स्य पादयोः ईजे महाभिषेकेण सो भिषिक्तो धिराड्विभुः २३ पंचपंचाशता मे
ध्यैर्गंगायामनु वाजिभिः मामतेयं पुरोधाय यमुनायामनु प्रभुः २४ अष्टसप्ततिमेध्याश्वान् बबंध प्रददद्
वसु भरतस्य हि दौष्यंतेरग्निः साचीगुणे चितः सहस्रं बद्वशो यस्मिन् ब्राह्मणा गा विभेजिरे २५ त्रयस्त्रिंश
च्छतं ह्यश्वान् बध्वा विस्मापयन्नृपान् दौष्यंतिरत्यगान्मायां देवानां गुरुमाययौ २६ ५८

क्लदतो मृगान् मष्णारे भरतो ददाविति तं बद्वानि सप्तचेति श्रुत्युक्तानि सप्ताधिकशतं बद्वानि श्लोके नोत्तरश्लोके चतुर्दश
लक्षत्वेन संगृहीतानि अदात्कर्मणि मष्णारे नियुतानि चतुर्दशेति एवं चतुर्दशलक्षाणां सप्ताधिकशतत्वेन गो बद्वमित्युक्तं द
यं च बद्वसंख्या श्लोकेन संगृह्यते चतुर्दशानां लक्षाणां सप्ताधिकशतांशकः बद्वं चतुरशीत्यग्र सहस्राणि त्रयोदश
२५ देवानामपि मायां वैभवं अत्यगात् अत्यशेत यतः गुरुं पूज्यं हरिं आययो प्राप्तः तदंशत्वात् मायवत्तर इति पाठे
कुत्वं श्रुत्यनुसारेण मायावतां श्रेष्ठः हरिरेवासावित्यर्थः २६

र

मृगान् श्रेष्ठगजान् भद्रमंद्रमृगादयो गजजातिभेदाः मष्णारे इत्यस्य श्रुतिपदस्य व्याख्यानं कर्मणीति कस्मिंश्चित्कर्मविशेषे केचि
त्तु मष्णार इति तीर्थ इति व्याचक्षते २७ २८ पुरा देवान् जित्वा ये सुरा रसौकांसि रसातलादिस्थानानि भेजिरे तैः प्राणिभिर्बलि
भिर्देवस्त्रियो रसातलं नीताः सतीः पुनराहरत् आनिन्ये प्राणिभिरन्यैर्मनुष्यादिभिः सह नीता इति वा पणिभिरिति पाठे पणा
यो सुरास्तैर्नीताः सतीः यद्वा पणया द्यूतास्तैर्हृतानप्सराः प्याहरदित्यर्थः ३० त्रिणवसाहस्रीः समाः सप्तविंशतिसहस्रं वत्स

मृगान् शुक्लदतः कृष्णान् हिरण्येन परीवृतान् अदात्कर्मणि मष्णारे नियुतानि चतुर्दश २७ भरतस्य महत्कर्म न पूर्वे
नापरे नृपाः नैवापुर्नैव प्राप्स्यंति बाहुभ्यां त्रिदिवं यथा २८ किरातहूणान्यवनान् पौण्ड्रान् कंकान् खशाञ्छकान् अ
ब्रह्मण्यान् नृपांश्चाहन् म्लेच्छान् दिग्विजये खिलान् २९ जित्वा पुरासुरा देवान् ये रसौकांसि भेजिरे देवस्त्रियो रसां
नीताः प्राणिभिः पुनराहरत् ३० सर्वकामान् दुदुहतुः प्रजानां तस्य रोदसी समास्त्रिणवसाहस्रीर्दिक्षु चक्रमवर्तयत्
३१ स सम्राट् लोकपालाख्यमैश्वर्यमधिराट् श्रियं चक्रं चास्खलितं प्राणान् मृषेत्युपरराम ह ३२ तस्यासन्नृप वै
दर्भ्यः पत्न्यस्तिस्रः सुसंमताः जघ्नुस्त्यागभयात्पुत्रान् नानुरूपा इतीरिते ३३

रान् चक्रं सेना आज्ञा वा ३१ तस्य वैराग्येण मोक्षप्रकारमाह स इति मृषेति विचार्येति शेषः ३२ नानुरूपाः मत्सदृशा न भ
वंतीति भर्त्रा ईरिते सति व्यभिचारशंकया अस्मांस्त्यक्ष्यतीति भयात्पुत्रानजघ्नुः पुनः पुनः पुत्राणां दर्शनेन वैसादृश्यानुसंधा
नेन त्यजेत् नान्यथेत्याशयेन हतवत्यः ३३

भा० न०
४९

वितथे व्यर्थे सति तदर्थं पुत्रार्थं मरुत्सोमेन यागेन यजतस्तस्य प्रसन्नाः संतो मरुतो भरद्वाजं नाम पुत्रमुपाददुः समर्पयामासुः
३४ मरुतां भरद्वाजागमप्रकारं दर्शयन्नाह अंतर्वत्न्यामिति चतुर्भिः अंतर्वत्न्यां गर्भिण्यां भ्रातुरुतथ्यस्य पत्न्यां ममतायां वी
र्येण मैथुनाय कृताभिलाषो बृहस्पतिः तदा द्वितीयगर्भस्यावकाशाभावात् क्रोशपूर्वकं गर्भस्थेन वारितः ततः क्रुद्धो बृहस्पति
रंधो भवेति तं गर्भं शप्त्वा बलात् वीर्यं न्यषिंचत् ततो बृहस्पतेः पत्न्या पाद्गर्भस्थो दीर्घतमा अंधो बभूव तेन च तद्वीर्यं पार्ष्णिप्र
हारेण योनेर्बहिर्निःसारितं भूमौ पतितं सद्यस्तु कुमारोऽभवत् ३५ तं च परवीर्यजं भर्तुस्त्यागादिशंकितां सतीं त्यक्तुकामां

तस्यैवं वितथे वंशे तदर्थं यजतः सुतं मरुत्सोमेन मरुतो भरद्वाजमुपाददुः ३४ अंतर्वत्न्यां भ्रातृपत्न्यां मैथुनाय बृ
हस्पतिः प्रवृत्तो वारितो गर्भेण शप्त्वा वीर्यमवासृजत् ३५ तं त्यक्तुकामां ममतां भर्तृत्यागविशंकितां नामनिर्वचनं त
स्य श्लोकमेनं सुरा जगुः ३६ मूढे भर द्वाजमिमं भर द्वाजं बृहस्पते यातौ यदुक्त्वा पितरौ भरद्वाजस्ततः स्वयं ३७
ममतां प्रति सुराः एनं बृहस्पतेर्ममतायाश्च विवादरूपं श्लोकं जगुः किमर्थं जगुः अत आह तस्य नाम निरुच्यते येन तं तन्नामनिर्व ४९
चनेनैव भर्तुस्त्यागशंका मया कर्तुमित्यर्थः ३६ तत्र पुत्रं त्यक्तुकामां ममतां बृहस्पतिराह हे मूढे इमं पुत्रं भर पुषाण भर्तुर्बि
भेमीति चेत्तत्राह द्वाजं एकस्य क्षेत्रे अन्यस्य बीजादित्येवं द्वाभ्यां जातं अतस्तस्याप्ययं पुत्र इति न तस्माद्भयशंकेत्यर्थः एवमु
क्ता सती तं प्रत्याह हे बृहस्पते त्वमिमं भर यतः द्वाजं द्वाभ्यां मावाभ्यामन्यायतो जातं अतो नाहमेकाकिनी भरामीत्यर्थः य
त् यस्मादेवमुक्त्वा पितरौ ममताबृहस्पती विवदमानौ पुत्रं परित्यज्य यातौ ततो हेतोरयं भरद्वाज इति पादांतरेण स्वपुत्रस्य त्या
गः स्वात् पितरौ यातावित्यर्थः ३७

वितथं व्यभिचारसंभवात् तमात्मजं वितथं निरर्थकं मत्वा ममता व्यसृजत् तत्याज पाठांतरे आदिजं प्रथमजं भर्तुर्वी
र्याज्जातमेव मुख्यमात्मजं मत्वा बृहस्पतेर्जातं तत्याजेत्यर्थः एवं तया सक्तं मरुतो बिभ्रत् अबिभरुः तदेवं

चोद्यमाना सुरैरेवं मत्वा वितथमात्मजं व्यसृजन्मरुतो बिभ्रद्दत्तोऽयं वितथेऽन्वये ३८ इति श्री
भागवते महापुराणे नवमस्कंधे पूरुवंशानुकीर्तनं विंशोऽध्यायः श्रीशुक उवाच वितथस्य
सुतान्मन्योर्बृहत्क्षत्रो जयस्तथा महावीर्यो नरो गर्गः संकृतिस्तु नरात्मजः १

मरुद्भिः प्राप्तोऽयं भरतस्यान्वये वितथे सति दत्तः ३८ नवमे विंशः एकविंशे तु दौष्यंतेः सुतस्यान्वय उच्यते रं
तिदेवाजमीढादेर्यत्र कीर्तिः प्रतन्यते १ भरतस्यान्वये वितथे सति दत्तत्वाद्वितथसंज्ञो भरद्वाजः स च ब्राह्मणोपि
भरतस्य दत्तपुत्रो जात इति तद्वंशोऽनुक्रम्यते वितथस्य सुतो मन्युस्तस्माद् बृहत्क्षत्र जय महावीर्य नर गर्गाः पंच पुत्रा बभू
वुः १

भा॰ न॰ ५० वियद्वित्तस्यवियतोगगनादिवोद्यमंविनादैवादुपस्थितमेववित्तंभोग्यंयस्ययद्वावियद्व्ययंप्राप्नुवद्वित्तंभोग्यंयस्य

गुरुश्चरंतिदेवश्चसंकृतेःपांडुनंदन रंतिदेवस्यहियशइहामुत्रचगीयते २ वियद्वित्तस्यददतोलब्धं
लब्धंबुभुक्षतः निःकिंचनस्यधीरस्यसकुटुंबस्यसीदतः ३ व्यतीयुरष्टचत्वारिंशदहान्यपिबतःकि
ल घृतपायससंयावंतोयंप्रातरुपस्थितं ४ कृच्छ्रप्राप्तकुटुंबस्यक्षुत्तृड्भ्यांजातवेपथोः अ
तिथिर्ब्राह्मणःकालेभोक्तुकामस्यचागमत् ५ तस्मैसंव्यभजत्सोन्नमादृत्यश्रद्धयान्वितः
हरिंसर्वत्रसंपश्यन्सभुक्त्वाप्रययौद्विजः ६ ५०

तदेवाह बुभुक्षतोपिसतोलब्धंलब्धंददतः ३ तत्रपंचयतिनिःकिंचनस्येत्यादिसार्द्धैःपंचदशभिः अपिब
तोजलपानमप्यकुर्वतोघृतादित्रयाणांद्वंद्वैक्यंतोयंच ४ ५ ६

अथान्योवृषलोतिथिरागमत्।विभक्तस्यकुटुंबार्थमन्नादिकंविभक्तवतः।सगणायश्वयूथसहितायउच्छेषंउर्वरि
तंएकमेवतर्पयतीतितथा।परदुःखासहिष्णुतयासर्वेषांदुःखंस्वयंभोक्तुमाशास्तेनेति।अणिमाद्यष्टसमृद्धियुक्तां ७५
गतिमपि।मोक्षमपिवाहंनकामये।तर्हिकिंकामयसेतदाह।अखिलदेहभाजामार्तिंदुःखंतत्तद्देहरूपेणांतःस्थि

अथान्योभोक्ष्यमाणस्यविभक्तस्यमहीपते विभक्तंव्यभजत्तस्मैवृषलायहरिंस्मरन् ७ यातेशूद्रेतमन्यो
गादतिथिःश्वभिरावृतः राजन्मेदीयतामन्नंसगणायबुभुक्षते ८ सआदृत्यावशिष्टंयद्बहुमानपुरस्कृ
तं तच्चदत्वानमश्चक्रेश्वभ्यःश्वपतयेविभुः ९ पानीयमात्रमुच्छेषंतच्चैकपरितर्पणं पास्यतःपुल्कशोभ्या
गादपोदेह्यशुभस्यमे १० तस्यतांकरुणांवाचंनिशम्यविपुलश्रमां कृपयाभृशसंतप्तइदमाहामृतंवचः
११ नकामयेहंगतिमीश्वरात्परांमहर्द्धियुक्तामपुनर्भवंवा आर्तिंप्रपद्येखिलदेहभाजामंतःस्थितोयेन
भवंत्यदुःखाः १२ क्षुत्तृट्श्रमोगात्रपरिश्रमश्चदैन्यंक्लमःशोकविषादमोहाः सर्वेनिवृत्ताःकृपणस्यजंतो
र्जिजीविषोर्जीवजलार्पणान्मे १३ एवंप्रभाष्यपानीयंम्रियमाणःपिपासया पुल्कशायाददद्धीरोनिस
र्गकरुणोनृपः १४ तस्यत्रिभुवनाधीशाःफलदाःफलमिच्छतां आत्मानंदर्शयांचक्रुर्मायाविष्णुविनिर्मिताः

तःसन्नहंप्रपद्येप्राप्नुयामीत्येवंकामये।येनदुःखभोक्तामयाहेतुभूतेनतेसर्वेअदुःखाभवंति।ननुतवदुःखंकि
मितिप्रार्थयसे।परदुःखनिवृत्त्यैवसर्वदुःखनिवृत्तिरित्याहक्षुत्तृडिति।कृपणस्यजंतोर्जीवहेतोःजलस्यार्पणा
न्मेसर्वेक्षुत्तडादयोनिवृत्ताः।इत्येवंसंभाष्य।त्रिभुवनाधीशाःब्रह्मादयः।तदीयधैर्यपरीक्षार्थंप्रथमंमाययाविः

ब्रह्मादिरूपेणप्रतीताःसंतस्तस्थुः

भा०न० परं केवलं वासुदेवे भक्त्या नमश्चक्रे न तु तान् किमपि याचितवान् ॥ अनन्यराधसः ईश्वरातिरिक्तफलांतरानपेक्षस्य । प्र-
५१ त्यलीयत । आत्मन्येव लीना बभूवुः । मन्युसुतस्य नरस्य वंशमुक्त्वा तत्सुतस्यैव गर्गस्य वंशमाह । गर्गादिति । महावी-
र्यस्य वंशमाह । दुरितक्षयः तस्य त्रय्यारुणिः कविः पुष्करारुणिश्चेति त्रयः पुत्राः । ये अत्र क्षत्रवंशे ब्राह्मणगतिं ब्राह्म-

सर्वे तेभ्यो नमस्कृत्य निःसंगो विगतस्पृहः वासुदेवे भगवति भक्त्या चक्रे नमः परं १६ ईश्वरालंबनं चित्तं कुर्व-
तोनन्यराधसः मायागुणबलाराजन् स्वप्नवत्प्रत्यलीयत १७ तत्प्रसंगानुभावेन रंतिदेवानुवर्तिनः अ-
भवन्योगिनः सर्वे नारायणपरायणाः १८ गर्गाच्छिनिस्ततो गार्ग्यः क्षत्राद्ब्रह्म ह्यवर्तत दुरितक्षयो महावी-
र्यात्तस्य त्रय्यारुणिः कविः १९ पुष्करारुणिरित्यत्र ये ब्राह्मणगतिं गताः बृहत्क्षत्रस्य पुत्रोभूद्धस्ती यद्धस्तिना-
पुरं २० आजमीढो द्विमीढश्च पुरुमीढश्च हस्तिनः अजमीढस्य वंश्याः स्युः प्रियमेधादयो द्विजाः २१ अ-
जमीढाद्बृहदिषुस्तस्य पुत्रो बृहद्धनुः बृहत्कायस्ततस्तस्य पुत्र आसीज्जयद्रथः २२ तत्सुतो विशदस्तस्य-
श्येनजित्समजायत रुचिराश्वो दृढहनुः काश्यो वत्सश्च तत्सुताः २३ रुचिराश्वसुतः पारः पृथुसेनस्तदा-
त्मजः पारस्य तनयो नीपस्तस्य पुत्रशतं त्वभूत् २४ राम ५१

णं रूपतां गतास्ते । मन्युपुत्राणां पंचानां ज्येष्ठस्य वंशमाह । बृहत्क्षत्रस्येति । यत् येन हस्तिना पुरं कृतमित्यर्थः । आज-
मीढादयस्त्रयो हस्तिनः पुत्राः अजमीढदेवात्मन्यः पुत्रो बृहदिषुर्नामाभवत् । पारस्य तनयो नीपाश्वः । नीपस्य पुत्रश-
तं २४

स एव कृत्व्यां संज्ञायां शुककन्यायां ब्रह्मदत्तं जनयामास तदुक्तं हरिवंशादिषु पराशरकुलोत्पन्नः शुको नाम महायशाः
व्यासादरण्यां संभूतो विधूमोग्निरिवोज्ज्वलन् स तस्यां पितृकन्यायां वीरिण्यां जनयिष्यति कृष्णं गौरप्रभं शंभुं तथा भूरिश्रुतं
जयं कन्यां कीर्तिमतीं षष्ठीं योगिनीं योगमातरं ब्रह्मदत्तस्य जननीं महिषीमणुहस्य चेति यद्यपि शुकउत्पत्त्यैव विमुक्तसंगो

स कृत्व्यां शुककन्यायां ब्रह्मदत्तमजीजनत् स योगी गवि भार्यायां विष्वक्सेनमधात्सुतं २५ जैगीषव्योपदेशेन यो-
गतंत्रं चकार ह उदक्सेनस्ततस्तस्माद्भल्लाटो बार्हदीषवाः २६ यवीनरो द्विमीढस्य कृतिमांस्तत्सुतः स्मृतः ना-
म्ना सत्यधृतिर्यस्य दृढनेमिः सुपार्श्वकृत् २७ सुपार्श्वात्सुमतिस्तस्य पुत्रः संनतिमांस्ततः कृती हिरण्यनाभा-
द्यो योगं प्राप्य जगौ स्म षट् २८ संहिताः प्राच्यसाम्नां वै नीपो ह्युग्रायुधस्ततः तस्य क्षेम्यः सुवीरोथ सु-
वीरस्य रिपुंजयः २९ ततो बहुरथो नाम पुरमीढो प्रजोभवत् नलिन्यामजमीढस्य नीलः शांतिस्सुतस्ततः ३०
शांतेः सुशांतिस्तत्पुत्रः पुरुजोर्कस्ततोभवत् भर्म्याश्वस्तनयस्तस्य पंचासन्मुद्गलादयः ३० यवीनरो बृह-
दिश्वः कांपिल्यः संजयः सुताः भर्म्याश्वः प्राह पुत्रा मे पंचानां रक्षणाय हि ३१

निर्गतः तथापि विरहातुरं व्यासमनुयांतं दृष्ट्वा छायाशुकं निर्माय गतवान् तदभिप्रायेणैव गार्हस्थ्यादिव्यवहार इत्यविरोधः स
च ब्रह्मदत्तो योगी गवि वाचि सरस्वत्यां २५ स एव योगतंत्रं चकार बार्हदीषवाः बृहदिषोर्वंश्याः इमे दीर्घमार्षं २६ सुपार्श्वकृत्सुपार्श्व-
स्य पिता २७ प्राच्यसाम्नां षट् संहिता जगौ विभज्याध्यापितवान् २९ अजमीढस्य वंश्याः प्रियमेधादयः केचिद्ब्राह्मणा बभू-
वुः बृहदिषुप्रभृतयः क्षत्रियाश्चेति वंशद्वयमुक्तं तस्यैव वंशांतरमाह नलिन्यामिति यावत्समाप्ति ३० मुद्गलाद्याः यवीनरादयश्चत्वार

भा० न० भर्म्यात् भर्म्याश्च पुत्रात् मिथुनं याभूत् तदेवाह दिवोदासः पुमान् अहल्या च कन्येति ३५ नवमे एकविंशतितमः । द्वाविंशे
५२ तु दिवोदासवंशमुक्त्वाथ वर्णिताः ऋक्षवंशे जरासंधपार्थदुर्योधनादयः तस्य सोमकस्य पुत्राणां शतं बभूव तेषां जंतुर्ज्येष्ठः

विषयाणामलमिमे इति यवालसंज्ञिताः मुद्गलाद्ब्रह्मनिर्वृत्तं गोत्रं मौद्गल्यसंज्ञितं ३२ मिथुनं मुद्गलाद्भार्म्याद्दि
वोदासः पुमानभूत् अहल्या कन्यका यस्यां शतानंदस्तु गौतमात् ३३ तस्य सत्यधृतिः पुत्रो धनुर्वेदविशारदः
शरद्वांस्तत्सुतो यस्मादुर्वशीदर्शनात्किल ३४ शरस्तंबेऽपतद्रेतो मिथुनं तदभूच्छुभं तद्दृष्ट्वा कृपयागृह्णात्
शंतनुर्मृगयां चरन् कृपः कुमारः कन्या च द्रोणपत्न्यभवत्कृपी ३५ इति श्रीभागवते महापुराणे नवमस्कं
धे एकविंशतितमोऽध्यायः श्रीशुक उवाच मित्रायुश्च दिवोदासात् च्यवनस्तत्सुतो नृप सुदासः स
हदेवोऽथ सोमको जंतुजन्मकृत् १ तस्य पुत्रशतं तेषां यवीयान्पृषतस्ततः द्रुपदो द्रौपदी तस्य धृष्टद्युम्नादयः
सुताः २ धृष्टद्युम्नाद्धृष्टकेतुर्भार्म्याः पांचालका इमे योऽजमीढसुतो ह्यन्य ऋक्षः संवरणस्ततः ३ तपत्यां ५२
सूर्यकन्यायां कुरुक्षेत्रपतिः कुरुः परीक्षित्सुधनुर्जह्नुर्निषधाश्च कुरोः सुताः ४ सुहोत्रोऽभूत्सुधनुषश्च्यवनो
ऽथ ततः कृती वसुस्तस्योपरिचरो बृहद्रथमुखास्ततः ५

यवीयान्पृषदः २ अजमीढस्यैव वंशांतरमाह य इति ततः संवरणात्कुरुः ३ ४ तस्य कृतिनः उपरिचरो वसुः त
ावसोः बृहद्रथो मुखं आदिर्येषां ५

ओं नमो भगवते वासुदेवाय कु

तानेवाह कुशांबेति तत्सुतः पुष्पवान् जज्ञे तस्यापत्यं सत्यहित इति योऽन्यं जरया राक्षस्यायत्सोमापेः श्रुतश्रवा कुरोः पुत्रः परीक्षि
दनपत्यः जाह्नवः जह्नोः पुत्रः ९ अतो राधिकाद्युतोऽभूदित्यर्थः १० तस्य प्रतीपस्य देवापिशंतनुबाह्लीकाः १२ प्राक्पूर्वजन्म
नि महाभिष इति संज्ञा यस्य सः १३ यदा देवो न ववर्ष तदा शंतनुस्तत्र कारणं ब्राह्मणान्पप्रच्छ ब्राह्मणैश्चैवमुक्तः तदा दाराग्नि

कुशांबमत्स्यप्रत्यग्रचेदिपाद्याश्चेदिपाः बृहद्रथात्कुशाग्रोऽभूदृषभस्तस्य तत्सुतः ६ जज्ञे सत्यहितोऽपत्यं पु
ष्पवांस्तत्सुतो यदुः अन्यस्यामपि भार्यायां शकले द्वे बृहद्रथात् ७ ते मात्रा बहिरुत्सृष्टे जरया चाभिसंधिते जी
व जीवेति क्रीडंत्या जरासंधोऽभवत्सुतः ८ ततश्च सहदेवोऽभूत्सोमापिर्यच्छ्रुतश्रवाः परीक्षिदनपत्योऽभूत्सुरथो ना
म जाह्नवः ९ ततो विदूरथस्तस्मात्सार्वभौमस्ततोऽभवत् जयसेनस्तत्तनयो राधिकोऽतोऽयुतो ह्यभूत् १० ततश्चाक्रो
धनस्तस्माद्देवातिथिरमुष्य च ऋष्यस्तस्य दिलीपोऽभूत्प्रतीपस्तस्य चात्मजः ११ देवापिः शंतनुस्तस्य बाह्लीक इति
चात्मजाः पितृराज्यं परित्यज्य देवापिस्तु वनं गतः १२ अभवच्छंतनू राजा प्राङ्महाभिषसंज्ञितः यं यं कराभ्यां
स्पृशति जीर्णं यौवनमेष्यति १३ शांतिमाप्नोति चैवाग्र्यां कर्मणा तेन शंतनुः समा द्वादश तद्राज्ये न ववर्ष यदा विभुः १४
शंतनुर्ब्राह्मणैरुक्तः परिवेत्तायमग्रभुक् राज्यं देह्यग्रजायाशु पुरराष्ट्रविवृद्धये १५

होत्रसंयोगं कुरुते योऽग्रजे स्थिते परिवेत्ता स विज्ञेयः परिवित्तिस्तु पूर्वज इति स्मृतेः योऽग्रजमनुक्त्वा भुवमग्रतो भुनक्ति अयं त्वाद
शोऽपि परिवेत्तैव भवति १४ अतस्तद्दोषपरिहाराय राज्यमग्रजाय देहि १५

ततो वृष्टिर्भविष्यतीत्येवमुक्तः शंतनुर्वनं गत्वा ज्येष्ठं छंदयामास राज्ञः प्रजापालनादिः परो धर्मः अतस्त्वं राज्यं स्वीकुर्विति
प्रार्थितवान् १६ ततः पूर्वमेव तस्य मंत्रिणा अश्मरावसंज्ञेन देवापिं पाखंडीकृत्य राज्यानर्हणं कर्तुं ये प्रेरिता विप्राः तैः पा
खंडमताश्रयया गिरा वेदात् विध्वंशितः सन् वेदवादस्यातिवादान् निंदावचनानि सोऽब्रवीत् ततस्तस्य पातित्येन राज्येन
एवमुक्तो द्विजैर्ज्येष्ठं छंदयामास सोऽब्रवीत् तन्मंत्रिप्रहितैर्विप्रैर्वेदाद्विभ्रंशितो गिरा १६ वेदवादातिवादान्वै तत
दा देवो ववर्ष हि देवापिर्योगमास्थाय कलापग्राममास्थितः १७ सोमवंशे कलौ नष्टे कृतादौ स्थापयिष्यति
वाह्लीकात्सोमदत्तोऽभूद्भूरिर्भूरिश्रवास्ततः १८ शलश्च शंतनोरासीद्गंगायां भीष्म आत्मवान् सर्वधर्मविदां
श्रेष्ठो महाभागवतः कविः १९ वीरयूथाग्रणीर्येन रामोऽपि युधि तोषितः शंतनोर्दासकन्यायां जज्ञे चित्रांगदः सुतः
२० विचित्रवीर्यश्चावरजो नाम्ना चित्रांगदो हतः यस्यां पराशरात्साक्षादवतीर्णो हरेः कला २१ वेदगुप्तो मुनिः
कृष्णो यतोऽहमिदमध्यगां हित्वा स्वशिष्यान्पैलादीन्भगवान्बादरायणः २२ मह्यं पुत्राय शांताय परं गुह्यमि
दं जगौ विचित्रवीर्योऽथोवाह काशिराजसुते बलात् २३
हत्वे जाते शंतनोर्दोषाभावात् देवो ववर्षेत्यर्थः १७ ततः सोमदत्ताद्भूरिर्भूरिश्रवाः शलश्चेति त्रयः १८ ततो जामदग्न्यः १९ दास
कन्यायामिति उपरिचरस्य वसोर्वीर्येण मत्स्यगर्भादुत्पन्ना कन्या दाशैः केवर्तैः पालिता अतो दाशकन्येति प्रसिद्धायां सत्य
वत्यां २० नाम्ना तत्समाननाम्ना चित्रांगदेन गंधर्वेण युद्धे हतः यस्यां सत्यवत्यां शंतनुपरिग्रहात्पूर्वमेव वेदगुप्ताय येन यतो अहं
जातः इदं श्रीभागवतं चाध्ययनं अधिगतवानस्मि २२

स्वयंवरात् भीष्मेण बलादुपानीते २४ माता सत्यवत्या उक्त इति निषेधाभावमाह अपतिरपत्यलिप्सुर्देवराद्गुरुप्रयुक्ता
तु ऋतुमतीत्यादिवचनात् २५ दुःशीला नामकन्यका च जज्ञे २६ अरण्ये मृगरूपायां मैथुने रुद्धस्य प्रतिरुद्धस्य २७ नासत्य
दस्राभ्यामश्विभ्यां पंचभ्यो युधिष्ठिरादिभ्यः पंचाभवन् २८ तथा परे च भार्यांतरेषु ३० ३२ कालीवान्याम्भीमस्य
स्वयंवरादुपानीते अंबिकांबालिके उभे तयोरासक्तहृदयो गृहीतो यक्ष्मणा मृतः २४ क्षेत्रेऽप्रजस्य वै भ्रा
तुर्मात्रोक्तो बादरायणः धृतराष्ट्रं च पांडुं च विदुरं चाप्यजीजनत् २५ गांधार्यां धृतराष्ट्रस्य जज्ञे पुत्रशतं नृप
तत्र दुर्योधनो ज्येष्ठो दुःशीला चापि कन्यका २६ शापान्मैथुनरुद्धस्य पांडोः कुंत्यां महारथाः जाता धर्मानि
लेंद्रेभ्यो युधिष्ठिरमुखास्त्रयः २७ नकुलः सहदेवश्च माद्र्यां नासत्यदस्रयोः द्रौपद्यां पंच पंचभ्यः पुत्रास्ते
पितरोऽभवन् २८ युधिष्ठिरात्प्रतिविंध्यः श्रुतसेनो वृकोदरात् अर्जुनाच्छ्रुतकीर्तिस्तु शतानीकस्तु नाकु
लिः २९ सहदेवसुतो राजन्श्रुतकर्मा तथा परे युधिष्ठिरात्तु पौरव्यां देवकोऽथ घटोत्कचः ३० भीमसे
नाद्धिडिंबायां काल्यां सर्वगतस्ततः सहदेवात्सुहोत्रं तु विजयासूत पार्वती ३१ करेणुमत्यां नकुलो निरमित्रं तथार्जुनः
इरावंतमुलूप्यां वै सुतायां बभ्रुवाहनं मणिपूरपतेः सोऽपि तत्पुत्रः पुत्रिकासुतः ३२
र्या तस्यां ततो भीमात् सर्वगतो नाम पुत्रोऽभवदित्यर्थः ३१ उलूप्यां नागकन्यायां मणिपूरपतेः सुतायां पुत्रिकाधर्मेण दत्तायां
बभ्रुवाहनमसूत अतस्तत्पुत्रः सन्नपि सः पुत्रिकासुतमातामहसुता इत्यर्थः ३२ ओं नमो भगवते वासुदेवाय

भा० न०
५४

तुरसंज्ञंपुरोहितंकृत्वा ३७ भविष्यानाह तस्य पुत्र इति यावत्समाप्ति याज्ञवल्क्यात् क्रियाज्ञानं परं आत्मज्ञानं शौनकात् प्राप्स्य
ति अस्त्रज्ञानं च कृपाचार्यादिति द्रष्टव्यं याज्ञवल्क्यात् त्रयीमधीत्य कृपादस्त्राण्यवाप्येति विवेको वोक्तः क्वचित्तु अस्त्र

तववतातः सुतद्वायामत्रिमन्यरजायत सर्वातिरथजिद्वीर उत्तरायांततोभवान् ३३ परिक्षीणेषु कुरुषु द्रोणेर्ब्र
ह्मास्त्रतेजसा त्वं च कृष्णानुभावेन सजीवो मोचितोऽन्तकात् ३४ तवेमे तनयास्तात जनमेजयपूर्वकाः श्रुत
सेनो भीमसेनउग्रसेनश्च वीर्यवान् ३५ जनमेजयस्त्वां विदित्वा तक्षकान्निधनं गतं सर्पान्वै सर्पयागा
ग्नौ सहोष्यति रुषान्वितः ५३६ कावषेयं पुरोधाय तुरं तुरगमेधयाट् समंतात्पृथिवीं सर्वां जित्वा यक्ष्यति चा
ध्वरैः ३७ तस्य पुत्रः शतानीको याज्ञवल्क्यात् त्रयीं पठन् अस्त्रज्ञानं क्रियाज्ञानं शौनकात्परमेष्यति ३८
सहस्रानीकस्तत्पुत्रस्ततश्चैवाश्वमेधजः असीमकृष्णस्तस्यापि नेमिचक्रस्तु तत्सुतः ३९ गजाह्वये हृते नद्या ५४
कौशाम्ब्यां साधु वत्स्यति उक्तस्ततश्चित्ररथस्तस्मात्कविरथः सुतः ४० तस्माच्च वृष्टिमांस्तस्य सुषेणो
थ महीपतिः सुनीथस्तस्य भविता नृचक्षुर्यत्सुखीनलः ४१ पारिप्लवः सुतस्तस्मान्मेधावी सुनयात्मजः
नृपंजयस्ततो दूर्वस्तिमिस्तस्माज्जनिष्यति तिमेर्बृहद्रथस्तस्मात् शतानीकः सुदासजः ४२ शतानीका
द्दुर्दमनस्तस्यापत्यं वहीनरः दंडपाणिर्निमिस्तस्य क्षेमको भविता नृपः ४३

ज्ञानं कृपाचार्यादित्येव पाठः ३८ ४० यद्यस्मात्सुखीनलः पुत्रः तस्मात्पारिप्लवात्सुनयः यस्यात्मजो मेधावी त्य
र्थः ४१ तस्मात्सुदासः ततः शतानीक इत्यर्थः ४३ बृहद्रथस्य जरासंधः तस्य सहदेवः तस्य मार्जारिः यस्मान्मार्जारेः सु टीका: ४७

रो२

सहस्रसंवत्सरमेते भाव्या नृपालाः ततः परं भाव्यान् द्वादशस्कंधे वक्ष्यति इति नवमे द्वाविंशः त्रयोविंशे त्वनोर्द्रुह्योस्तु
र्वसोश्चान्वयः क्रमात् यदोश्च वंशोनुक्रांतो यावज्ज्यामघसंभवः १ तदेवं ययातेः पुत्राणां पंचमस्य पूर्ववंशोनुक्रांतः इदानीं

ब्रह्मक्षत्रस्य वै प्रोक्तो वंशो देवर्षिसत्कृतः क्षेमकं प्राप्य राजानं संस्थां प्राप्स्यति वै कलौ ४४ अथ मागधराजानो
भवितारो वदामि ते भविता सहदेवस्य मार्जारिर्यच्छ्रुतश्रवाः ४५ ततो युतायुस्तस्यापि निरमित्रोथ तत्सुतः सुन
क्षत्रः सुनक्षत्राद्बृहत्सेनोथ कर्मजित् ४६ ततः सुतंजयाद्विप्रः शुचिस्तस्य भविष्यति क्षेमोथ सुव्र
तस्तस्माद्धर्मसूत्रः शमस्ततः ४७ द्युमत्सेनोथ सुमतिः सुबलो जनिता ततः सुनीथः सत्यजिदथ विश्वजि
द्यद्रिपुंजयः ४८ बार्हद्रथाश्च भूपाला भाव्याः साहस्रवत्सरं ४९ इति श्रीभागवते महापुराणे नवम
स्कंधे द्वाविंशोध्यायः श्रीशुक उवाच अनोः सभानरश्चक्षुः परेष्णुश्च सुतास्त्रयः सभानरात्का
लनरः सृंजयस्तत्सुतस्ततः १ जनमेजयस्तस्य पुत्रो महाशालो महामनाः उशीनरस्तितिक्षुश्च
महामनस आत्मजौ शिबिर्वनः शमिर्दक्षश्चत्वारोशीनरात्मजाः २

वत्तर्थस्य वंशमनुक्रामति अनोरिति कर्णस्य जगतीपतेरित्यंतेन १ तस्य जनमेजयस्य महाशालः तस्य
महामनाः २ चत्वार उशीनरात्मजाः २

सदुष्यंतः स्ववंशं पौरववंशं १७ प्रथमस्य सहस्रजित आत्मजः २० सोहंतेर्महिष्मान् महिष्मतो भद्रसेनकः तस्य दुर्मदो धन

वृषदर्भः सुवीरश्च मद्रः कैकय आत्मजाः शिबेश्चत्वार एवासन् तितिक्षोश्च उशद्रथः ३ ततो हेमोथ सुतपा बलिः सु
तपसोभवत् अंगवंगकलिंगाद्याः सुह्मपुंड्रोड्रसंज्ञिताः ४ जज्ञिरे दीर्घतमसो बलेः क्षेत्रे महीक्षितः चक्रुः स्वनाम्ना
विषयान् षडिमान् प्राच्यकांश्चते ५ खनपानोंगतो जज्ञे तस्माद्दिविरथस्ततः सुतो धर्मरथो यस्य जज्ञे चित्ररथोप्रजः ६
रोमपाद इति ख्यातस्तस्मै दशरथः सखा शांतां स्वकन्यां प्रायच्छदृष्यशृंग उवाह तां ७ देवेऽवर्षति यं रामा आनिन्युर्हरि
णीसुतं नाट्यसंगीतवादित्रैर्विभ्रमालिंगनार्हणैः ८ सतु राज्ञोनपत्यस्य निरूप्येष्टिं मरुत्वतः प्रजामदाद्दशरथो येन लो
भेऽप्रजः प्रजाः ९ चतुरंगो रोमपादात् पृथुलाक्षस्तु तत्सुतः बृहद्रथो बृहत्कर्मा बृहद्भानुश्च तत्सुताः १० आद्यात्
बृहन्मनास्तस्माज्जयद्रथ उदाहृतः विजयस्तस्य संभूत्यां ततो धृतिरजायत ११ ततो धृतव्रतस्तस्य सत्कर्माधिर
थस्ततः यो सौ गंगातटे क्रीडन् मंजूषांतर्गतं शिशुं १२ कुंत्यापविद्धं कानीनमनपत्योकरोत्सुतं वृषसेनः सुतस्त ५५
स्य कर्णस्य जगतीपतेः १३ द्रुह्योश्च तनयो बभ्रुः सेतुस्तस्यात्मजस्ततः आरब्धस्तस्य गांधारस्तस्य धर्मस्ततो धृतः
१४ धृतस्य दुर्मदस्तस्मात् प्रचेताः प्राचेतसं शतं म्लेच्छाधिपतयोभूवन्नुदीचीं दिशमाश्रिताः १५ तुर्वसोश्च सुतो
वह्निर्वह्नेर्भर्गोथ भानुमान् त्रिभानुस्तत्सुतोस्यापि करंधम उदारधीः १६ मरुतस्तत्सुतोपुत्रः पुत्रं पौरवमन्वभूत्
दुष्यंतः स पुनर्भेजे स्ववंशं राज्यकामुकः ययातेर्ज्येष्ठपुत्रस्य यदोर्वंशं नरर्षभ वर्णयामि महापुण्यं सर्वपापह
रं नृणां १८

कश्चेति द्वौ पुत्रौ कृतवीर्यस्य जनः २२

यदोर्वंशं नरः श्रुत्वा सर्वपापैः प्रमुच्यते यत्रावतीर्णो भगवान् परमात्मा नराकृतिः १९ यदोः सहस्रजित्क्रोष्टा नलो रिपुरि
ति श्रुताः चत्वारः सूनवस्तत्र शतजित्प्रथमात्मजः २० महाहयो वेणुहयो हैहयश्चेति तत्सुताः धर्मस्तु हैहयसुतो नेत्रः

कुंतेः पिता ततः २१ सोहंजिरभवत् कुंतेर्महिष्मान् भद्रसेनकः दुर्मदो भद्रसेनस्य धनकः कृतवीर्यसूः
कृताग्निः कृतवर्मा च कृतौजा धनकात्मजाः २२ अर्जुनः कृतवीर्यस्य सप्तद्वीपेश्वरोभवत् दत्तात्रे
याद्धरेरंशात् प्राप्तयोगमहागुणः २३ न नूनं कार्तवीर्यस्य गतिं यास्यंति पार्थिवाः यज्ञदान
तपोयोगैः श्रुतवीर्यजयादिभिः २४ पंचाशीतिसहस्राणि ह्यव्याहतबलः समाः अनष्ट
वित्तस्मरणो बुभुजेक्षय्यषड्वसु २५ तस्य पुत्रसहस्रेषु पंचैवोर्वरिता मृधे जयध्वजः शू
रसेनो वृषभो मधुरूर्जितः २६ जयध्वजात्तालजंघस्तस्य पुत्रशतं त्वभूत् क्षत्रं तत्तालजंघा
ख्यमौर्वतेजोपसंहृतं २७ तेषां ज्येष्ठो वीतिहोत्रो वृष्णिः पुत्रो मधोः स्मृतः तस्य पुत्रशतं त्वासीद् वृष्णिज्येष्ठं यतः
कुलं २८

कृतवीर्यादयश्चत्वारो धनकस्यात्मजा इत्यर्थः २२ अनष्टमविनाशं वित्तं येन तथाविधं स्मरणं यस्य (पुत्रो)
और्वस्य तेजसा सगरेणोपसंहृतमित्यर्थः २७ सः अक्षय्यं षड्वसु षडिंद्रियविषयं बुभुजे २५

भा० न०
५६

तेषांतात्तस्त्र पुत्राणां ज्येष्ठः तस्य मघोः पुत्रशतं दृष्टिर्ज्येष्ठो यस्मिन् यतो मघोर्दक्षैर्यशोर्भ्वहेतोः इदंकुलं २९ चतुर्दशमहार
त्नानि तज्जातिज्येष्ठानियस्यसः तानि च मार्कंडेयपुराणे वर्णितानि गजवीथीरथस्त्रीपुनिधिमाल्यांबरद्रुमाः शक्तिपाश
मणि छत्रविमानानि चतुर्दशेति दशानांपत्नीसहस्त्राणां भार्यायुतस्य ३२ प्रत्येकंलक्षंलक्षमित्येवंतासु पुत्राणांदशलक्ष

माधवावृष्णयो राजन् यादवाश्चेति संज्ञिताः यदुपुत्रस्य च क्रोष्टो पुत्रो वृजिनवांस्ततः ३० स्वाहितस्ततो
रुशेकुर्वैतस्य चित्ररथस्ततः शशबिंदुर्महायोगी महाभोजो महानभूत् ३१ चतुर्दशमहारत्नश्च
क्रवर्त्यपराजितः तस्य पत्नीसहस्त्राणां दशानां सुमहायशाः ३२ दशलक्षसहस्त्राणि पुत्रा
णांतास्वजीजनत् तेषां तु षट्प्रधानानां पृथुश्रवस आत्मजाः ३३ धर्मोनामोशना तस्य हय
मेधशतस्य याट् तत्सुतो रुचकस्तस्य पंचासन्नात्मजाः शृणु ३४ पुरुजिद्रुक्मरुक्मेषु पृथुज्या ५६
मघसंज्ञिताः ३५

सहस्त्राणिजनयामास पृथुकीर्तिः पृथुश्रवाइत्यादयः षट्प्रधानाः ज्येष्ठायेषांतेषांमध्ये ३३ पंचआत्मजाआ
सन् शृणु तानेवाह पुरुजिदिति ३४

ना भार्याभयादेवैकभार्यस्य वंध्यापतेर्ज्यामघस्यापुत्रस्य तद्भयमेव पुत्रप्रदमभवदिति दर्शयन्नाह ज्यामघस्त्विति
यदिमे सपत्नी स्यात् तर्हि स्नुषेयं युज्येतापि न त्वेतदस्तीत्याह असपत्नी चेति अतिभयव्याकुल आह जनयिष्य
सीति भार्याभयप्रकंपमानः खिन्नसर्वांगस्य राज्ञः प्राणसंकटमालोक्यानुकंपिता स्नेन पूर्वं बहुकालमाराधिता

ज्यामघस्त्वप्रजोप्यन्यां भार्यां शैब्यापतिर्भयात् नाविंदच्छत्रुभवनाद्भोज्यां कन्यामहाषीत् ३५ रथस्थां
तां निरीक्ष्याह शैब्यापतिममर्षिता केयं कुहक मत्स्थानं रथमारोपितेति वै ३६ स्नुषा तवेत्यभिहिते स्म
यंती पतिमब्रवीत् अहं वंध्यासपत्नी च स्नुषा मे युज्यते कथं ३७ जनयिष्यसि यं राज्ञि तस्येयमुपयुज्यते
अन्वमोदंत तद्विश्वे देवाः पितर एव च ३८ शैब्या गर्भमधात्काले कुमारं सुषुवे शुभं स विदर्भ इति प्रो
क्त उपयेमे स्नुषां सती ३९ इति श्रीभागवते महापुराणे नवमस्कंधे यदुवंशानुकथने त्रयोविंशो
ध्यायः शुक उवाच तस्यां विदर्भोजनयत्पुत्रौ नाम्ना कुशक्रथौ तृतीयं रोमपादं च विदर्भकु
लनंदनं १ रोमपादसुतो बभ्रुर्बभ्रोः कृतिरजायत उशिकस्तत्सुतस्तस्माच्चेदिश्चैद्यादयो नृपाः २

विश्वेदेवाः पितरस्तथास्त्वित्यन्वमोदंत ततस्तद्देवताप्रसादेन जनयिष्यसीति वचनमुहूर्तगुणेन च विदर्भराजस्ता
पि शैब्या गर्भमधात् तस्य च महिमा पराशरादिभिरुक्तः पथो क्तं भार्यावश्या ह्ये केचिद्भविष्यंत्यथवा मृताः तेषां
तु ज्यामघः श्रेष्ठः शैब्यापतिरभून्नृपः इति नवमे त्रयोविंशः चतुर्विंशे विदर्भस्य पुत्रत्रयसमुद्भवाः वंशा
नानामुखाः प्रोक्ता रामकृष्णोद्भवावधि॥ चैद्यादयः दमघोषादयः २

ततोदशरथाच्छकुनिः पुराणांतरेदेवमादिविशेषोद्रष्टव्यः। ततः कुरुवशादनुः। अनोः पुत्रः पुरुहोत्रः महाभोजश्चे

क्रथस्य कुंतिः पुत्रोभूद्वृष्टिस्तस्याथ निर्वृतिः ततोदशार्होनामाभूत्तस्यव्योमसुतस्ततः ३ जीमूतोविकृ
तिस्तस्ययस्यभीमरथस्ततः ततोनवरथः पुत्रोजातोदशरथस्ततः ४ करंभः शकुनेः पुत्रोदेवरातस्तदा
त्मजः देवक्षत्रस्ततस्तस्यमधुः कुरुवशादनुः ५ पुरुहोत्रस्त्वनोः पुत्रस्तस्यायुः सात्वतस्ततः भजमा
नोभजिर्दिव्योवृष्णिर्देवावृधोंधकः ६ सात्वतस्यसुताः सप्तमहाभोजश्चमारिष भजमानस्यनिम्लो
चिः किंकिणोधृष्टिरेवच ७ एकस्यामात्मजाः पत्न्यामन्यस्यां चत्रयः सुताः शताजिच्चसहस्राजिद
युताजिदितिप्रभो ८ बभ्रुर्देवावृधसुतस्तयोः श्लोकोपठंत्यमू यथैवशृणुमोदूरात्संपश्यामस्तथां
तिकात् ९ बभ्रुः श्रेष्ठोमनुष्याणांदेवैर्देवोमधः समः पुरुषाः पंचषष्टिश्चषट्सहस्राणिचाष्टच।
तेमृतत्वमनुप्राप्ताबभ्रोर्देवावृधादपि महाभोजोपिधर्मात्माभोजाआसन्तदन्वये १० वृष्णेः सुमि
त्रः पुत्रोभूद्युधाजिच्चपरंतप सिनिस्तस्यानमित्रश्चनिम्नोभूदनमित्रतः ११

त्येवंसप्त। मारिषहेआर्य। ततस्तदुपदेशभेदेन पंचषष्ट्यादिसंख्याः पुरुषाः तेअमृतत्वंमोक्षंप्राप्ताः। तस्ययुधा
जितः। सिनिरनमित्रश्च ११

सात्यकिः सत्यकस्यपुत्रोयुयुधानः तस्यजयः तस्यकुणिः ततः कुणेर्युगंधरः अनमित्रस्यैवापरः वृष्णिर्नामपुत्रः
अक्रूरः प्रमुखोयेषामित्यतद्गुणसंविज्ञानोबहुव्रीहिः। अतोक्रूरातिरिक्तान्द्वादशदर्शयति आसंगइति। पृथु

सत्राजितः प्रसेनश्चनिम्नस्याथासतुःसुतौ अनमित्रसुतोह्यन्यः सिनिस्तस्याथसात्यकः १२ युयुधा
नः सात्यकिर्वैजयस्तस्यकुणिस्ततः युगंधरोनमित्रस्यवृष्णिः पुत्रोपरस्ततः १४ फल्कश्चित्ररथश्चैव
गांदिन्यांतुश्वफल्कतः अक्रूरप्रमुखाआसन्पुत्राद्वादशविश्रुताः १५ आसंगःसारमेयश्चमृदुरोम
दवाग्गिरिः धर्मवृद्धिः सुकर्माचक्षेत्रोपेक्षोरिमर्दनः १६ शत्रुघ्नोगंधमादश्चप्रतिबाहुश्चद्वादश
तेषांस्वसासुचाराख्याद्वावक्रूरसुतावपि १७ देववानुपदेवश्चतथाचित्ररथात्मजाः पृथुर्विदूरथा
आद्याबहवोवृष्णिनंदनाः १८ कुकुरोभजमानश्चशुचिःकंबलबर्हिषः कुकुरस्यसुतोवह्निर्विलोमा
तनयस्ततः १९ कपोतरोमातस्यानुः सखायस्यचतुंब अंधकोदुंदुभिस्तस्यदरिद्योतः पुनर्वसुः २०

रेकः। विदूरथाद्याअन्येचबहवः। चिंपृथुधानाद्याइतिपाठेआद्यशब्देनविदूरथोप्युक्तः। ततश्चशूरोविदूरथादा
सीत् इतिवक्ष्यमाणनिर्देशोपपत्तिः। कुकुरादयश्चत्वारोंधकस्यसुताइतित्रे हनादेवच्चेयं तथावपाराशरः।
कुकुरभजमानशुचिकंबलबर्हिषसंज्ञाश्चांधकस्यपुत्राइति। अनोरंधकः। अंधकात्दुंदुभिरित्यपितद्धनादेवच्चेयं २०

ष्टतदेवाआदिर्यासांशांतिदेवादीनांताः सप्तऔग्रसेनयः उग्रसेनस्यसुताः॥ वसुदेवस्यअनुजा देवभागादयस्ते
षांस्त्रियोभार्या अंधकस्यसुतानांचतुर्णांप्रथमस्यकुकुरस्यवंशउक्तः॥ द्वितीयस्यभजमानस्यवंशमाह॥ शू
रोविदूरथादिति। भजमानाद्यविदूरथः पुत्रोभवत्। विदूरथाद्यशूरइतिपराशरादिवचनात्। यद्वाएथूरथाद्वि

तस्याहुकस्याहुकीचकंन्याचैवाहुकात्मजौ देवकश्चोग्रसेनश्च चत्वारोदेवकात्मजाः २१ देववानुपदे
वश्चसुदेवोदेववर्धनः तेषांस्वसारःसप्तासन्धृतदेवादयोनृप २२ शांतिदेवोपदेवाश्चश्रीदेवादेवर
क्षिता सहदेवादेवकीचवसुदेवउवाहताः २३ कंसःसुनामान्यग्रोधः कंकःशंकुःसुहूस्तथा रा
ष्ट्रपालश्चसृष्टिश्चतुष्टिमासोग्रसेनयः २४ कंसाकंसवतीकंकाशूरभूराष्ट्रपालिका उग्रसेनदुहित
रोवसुदेवानुजस्त्रियः २५ शूरोविदूरथादासीद्भजमानःसुतस्ततः सिनिस्तस्मात्स्वयंभोजोहृदी
कस्तत्सुतोमतः २६ देवबाहुःशतधनुःकृतवर्मेतितत्सुताः देवमीढस्यशूरस्यमारिषानामपत्न्य
भूत् २७ तस्यांसंजनयामासदशपुत्रानकल्मषान् वसुदेवंदेवभागंदेवश्रवसमानकं २८ सृ
जयंश्यामकंकंकंशमीकंवत्सकंवृकं देवदुंदुभयोनेदुरानकायस्यजन्मनि २९

दूरथाद्याश्चेतिपूर्वोक्तविचित्ररथात्तमजात् विदूरथात्। देवमीढस्यपःशूरोनामपुत्रः तस्यदेवमीढोहृदीकस्येवसु
तः॥ यथाहपराशरः॥ तस्यापिकृतवर्मशतधनुर्देवमीढुषाद्याः पुत्राःबभूवुः। देवमीढस्यशूरः। तस्यापिमारिषा
नामपत्न्यभवत्। तस्यांवासौदशपुत्रानजनयत्। वसुदेवप्रर्वानिति। आनकाश्चनेदुः २९ श्रीगोपालोजयति

हरेःप्राडुर्भवच्छानंदृष्टयायाःकंन्यकावस्थायांकर्णोत्पत्तिप्रकारमाह। कुंतेरितिपंचभिः। कदाचिद्गृहमागतंदुर्वासंदृष्
यापरिचर्यादिनातोषयामास। ततश्चसातस्माद्देवहूतीदेवाह्वानहेतुंविद्यामवाप। तदाह। सापीति। देवमुपागतं

वसुदेवंहरेःस्थानंवदंत्यानकदुंदुभिं पृथाचश्रुतदेवाचश्रुतकीर्तिःश्रुतश्रवाः ३० राजाधिदेवीचैतेषांभ
गिन्यःपंचकंन्यकाः कुंतेःसख्युःपिताशूरोह्यपुत्रस्यपृथामदात् ३१ सापदुर्वाससोविद्यांदेवहूतीप्र
तोषितात् तस्यावीर्यपरीक्षार्थमाजुहावरविंशुचिः ३२ तदैवोपागतंदेवंवीक्ष्यविस्मितमानसा
प्रत्ययार्थंप्रयुक्तामेयाहिदेवक्षमस्वमे ३३ अमोघंदर्शनंदेविआधत्सेत्वयिचात्मजं योनिर्यथान
दुष्येतकर्ताहंतेसुमध्यमे ३४ इतितस्यांसआधायगर्भंसूर्योदिवंगतः सद्यःकुमारःसंजज्ञेद्वितीयइव
भास्करः ३५ तंसात्यजन्नदीतोयेकृच्छ्राल्लोकस्यबिभ्यती प्रपितामहस्तामुवाहपांडुर्वैसत्यवि
क्रमः ३६ श्रुतदेवांतुकारूषोवृद्धशर्मासमग्रहीत् यस्यामभूद्दंतवक्त्रऋषिःशप्तोदितेःसुतः ३७
कैकयोधृष्टकेतुश्चश्रुतकीर्तिमविंदत संतर्दनादयस्तस्यांपंचासन्कैकयाःसुताः ३८

वीक्ष्यसाप्राहप्रत्ययार्थंमयाविद्याप्रयुक्तानतुत्वयाकिंचित्कार्यमित्यभिसंगिना। अतोयाहीत्येवमुक्तोरविरुवा
च। अमोघंदेवदर्शनमिति। कंन्याहमितिचेत्तत्राह। यथायोनिर्नदुष्येत्तथाहंकर्ताकरिष्यामि ३८

भा० नं० ५९

आवंत्यौविंदानुविंदौ॥ तदेवं वसुदेवस्य भगिनीनां पतीन्पुत्रांश्चोक्त्वा तद्भ्रातॄणां नवानां पत्नीः पुत्रांश्चाह। देवभागस्य

राजाधिदेव्यामावंत्यौ जयसेनोऽजनिष्ट ह दमघोषश्चेदिराजः श्रुतश्रवसमग्रहीत् ३९ शिशुपालः सुतस्तस्याः कथितस्तस्य संभवः देवभागस्य कंसायां चित्रकेतुबृहद्बलौ ४० कंसवत्यां देवश्रवसः सुवीर इषुमांस्तथा कंकायामानकाज्जातः सत्यजित्पुरुजित्तथा ४१ सृंजयो राष्ट्रपाल्यां च वृषदुर्मर्षणादिकान् हरिकेश हिरण्याक्षौ शूरभूम्यां च श्यामकः ४२ मिश्रकेश्यामप्सरसि वृकादीन्वत्सकस्तथा तक्षपुष्करशालादीन्दुर्वाक्ष्यां वृक आदधे ४३ सुमित्रार्जुनपालादीन्शमीकात्तु सुदामिनी कंकश्च कर्णिकायां वै ऋतधामजयावपि ४४ पौरवी रोहिणी भद्रा मदिरा रोचना इला देवकीप्रमुखाश्चासन्पत्न्य आनकदुंदुभेः ४५ बलं गदं सारणं च दुर्मदं विपुलं ध्रुवं वसुदेवस्तु रोहिण्यां कृतादीनुदपादयत् ४६ सुभद्रो भद्रबाहुश्च दुर्मदो भद्र एव च पौरव्यास्तनया ह्येते भूताद्या द्वादशाभवन् ४७ नंदोपनंदकृतकशूराद्या मदिरात्मजाः कौशल्या केशिनं त्वेकमसूत कुलनंदनं ४८ रोचनायामतो जाता हस्तहेमांगदादयः इलायामुरुवल्कादीन्यदुमुख्यानजीजनत् ४९ विपृष्ठो धृतदेवायामेक आनकदुंदुभेः शांतिदेवात्मजा राजन्प्रश्रमप्रतिश्रुतादयः ५० राजानः कल्पवर्षाद्या उपदेवासुता दश वसुहंससुवंशाद्याः श्रीदेवायास्तु षट्सुताः ५१ देवरक्षितया लब्धा नव चात्र गदादयः वसुदेवः सुतानष्टावादधे सहदेवया ५२

नवभिः श्लोकार्धैः॥ वसुदेवपत्नीः पुत्रांश्चाह। पौरवीत्येकादशभिः। कौशल्या माद्री   श्रीगोपालकृष्णायनमः॥

राम ५९

अष्टमस्तु स्वयमेवासीत्। न तु कर्मादिना हेतुना। ताभ्यां जनितो वा। यतोऽसौ हरिः॥ तदेवोपपादयति यदेतीति त्रिभिः॥ ईशस्य मायानियंतुः। परस्य असंगस्य। द्रष्टुः साक्षिणः। आत्मनः सर्वगस्य न ह्येवंभूतस्य माया॥ विनोदं विना जन्मनः कर्मणो वा हेतुर्भवतीत्यर्थः॥ किं यस्य मायावेष्टितं पुंसो जीवस्यानुग्रहः। तस्य सर्वजीवानुग्राहकस्य कुतः कर्मादि

पुरुविश्रुतमुख्यांस्तु साक्षाद्धर्मो वसूनिव वसुदेवस्य देवक्यामष्टपुत्रानजीजनत् ५३ कीर्तिमंतं सुषेणं च भद्रसेनमुदारधीः ऋजुं संमर्दनं भद्रं संकर्षणमहीश्वरं ५४ अष्टमस्तु तयोरासीत्स्वयमेव हरिः किल सुभद्रा च महाभागा तव राजन्पितामही ५५ यदा यदा हि धर्मस्य क्षयो वृद्धिश्च पाप्मनः तदा तु भगवानीश आत्मानं सृजते हरिः ५६ न ह्यस्य जन्मनो हेतुः कर्मणो वा महीपते आत्ममायां विनेशस्य परस्य द्रष्टुरात्मनः ५७ यन्मायाचेष्टितं पुंसः स्थित्युत्पत्त्यप्ययाय हि अनुग्रहस्तन्निवृत्तेरात्मलाभाय चेष्यते ५८ अक्षौहिणीनां पतिभिरसुरैर्नृपलांछनैः भुव आक्रम्यमाणाया अभाराय कृतोद्यमः ५९ कर्माण्यपरिमेयाणि मनसापि सुरेश्वरैः सह संकर्षणश्चक्रे भगवान्मधुसूदनः ६०

पारतंत्र्येण जन्मादिसंभवः॥ अनुग्रहमेवाह। हि यस्मात्तद्देवस्थित्यादयद्दृष्यते। प्रलये लीनोपाधेर्जीवस्य धर्माद्यसंभवात् उपाधिसृष्ट्यादिना धर्मादिसंपादनेनानुग्रहः। तथा आत्मलाभाय मोक्षाय चेष्यते। तत्र हेतुः॥ तेनैव श्रूयमाणेन तस्याः स्थित्यादेः निवृत्तेः। तस्य चेष्टितं भूमेरनुग्रह इत्याह। अक्षौहिणीनामिति द्वाभ्यां। अभाराय भारपरिहाराय।

सुरेश्वरैरपि मनसापि अपरिमेयाणि अवितर्क्याणि संकर्षणसहितश्चक्रे ६०

भा०न० संकल्पमात्रेणभूभारहरणसमर्थस्यापिकर्मकरणंयशोविस्तारद्वाराभक्तानुग्रहार्थमित्याह।कलाविति द्वा
६० भ्यां।दुःखशोकतमांसिनुदतीतितथातद्यशोव्यतनोत्।यस्मिन्सत्तांकर्णपीयूषेयशोरूपेतीर्थवरे।श्रोत्रमे
वांजलिःपानसाधनंयस्यसपुरुषःसकृदपिउपस्पृश्यआचमनमात्रंकृत्वातत्सौंदर्याकृष्टचित्तःकर्मवास

कलौजनिष्यमाणानांदुःखशोकतमोनुदं अनुग्रहायभक्तानांसुपुण्यंव्यतनोद्यशः ६१ यस्मिन्स
त्कर्णपीयूषेयशस्तीर्थवरेसकृत् श्रोत्रांजलिंतुयःस्पृश्यधुनुतेकर्मवासनां ६२ भोजवृष्ण्यंधकमधु
शूरसेनदशार्हकैः श्लाघनीयेहितःशश्वत्कुरुसृंजयपांडुभिः ६३ स्निग्धस्मितेक्षणोदारैर्वाक्यै
र्विक्रमलीलया नृलोकंरमयामासमूर्त्यासर्वांगरम्यया ६४ यस्याननंमकरकुंडलचारुकर्णभ्रा
जत्कपोलसुभगंसविलासहासं नित्योत्सवंनततृपुर्दृशिभिःपिबंत्योनार्योनराश्चमुदिताःकुपिता राम ६०
निमेश्च ६५

नांधुनुते।तेदेवाहृद्वाभ्यां।भोजादिभिःश्लाघनीयमीहितंयस्यसर्वैरंगैररम्ययामूर्त्यावित्तत्प्रदर्शनार्थमुखशो
भामाह।यस्याननंदृशिभिर्नेत्रैःपिबंत्योनार्योनराश्चनततृपुर्नतृप्ताः।निमेषोन्मेषव्यवधानमप्यसहमानास्त
त्कर्तुर्निमेःतत्कुपिताश्चबभूवुः।कथंभूतमाननं।मकरकुंडलाभ्यांचारूकर्णौभ्राजंतौकपोलौताभ्यांसुभगं।स
विलासोहासोयस्मिन्।नित्यमुत्सवोयस्मिन् ६५

भा०न० श्रीकृष्णचरितंसमासतोवर्णयतिजातइतिद्वाभ्यां।जातोनिजेनरूपेणपश्चात्पुरुषोमनुष्याकारःसन्व्रजंगतः
६१ व्रजवासिनांएधिताअर्थायेनतेषुदारेषुसुतानांशतान्युत्पादयन्।आत्मनिगमंवेदमार्गंआत्तःसमुल्बेन
कलिनानिमित्तेनउरुभरंक्षपयन्।दृष्ट्वैवभूपचमूर्विधूयविजयेजयंअर्जुनेनाजितमित्येवमहद्घोषंकृत्वा

जातोगतःपितृगृहाद्व्रजमेधितार्थोहत्वारिपून्सुतशतानिकृतोनुदारः उत्पाद्यतेषुपुरुषःक्रतुभिः
समीजेआत्मानमात्मनिगमंप्रथयन्जनेषु ६६ पृथ्व्याःसवैगुरुभरंक्षपयन्कुरूणामंतःसमुत्थ
कलिनायुधिभूपचम्वः दृष्ट्याविधूयविजयेजयमुद्विघोष्यप्रोच्योद्धवायचपरंसमगात्स्वधाम ६७ राम
इतिश्रीभागवतेमहापुराणेनवमस्कंधेपारमहंस्यांसंहितायांयदुवंशकीर्तनंनामचतुर्विंशो ६१
ध्यायः

परंतत्वमुद्धवायोपदिश्यस्वधामसम्यक्तेनैवरूपेणजगामेति ६७ इतिश्रीभागवतेमहापुराणेनव
मस्कंधेश्रीधरस्वामिविरचितायांभावार्थदीपिकायांनवमेचतुर्विंशोध्यायः शुभमस्तुसर्वजगतः

अरणमेषमाणः शरणमिछन्। आमिततेजसः